3-3

॥ श्री ॥

अथदानमयूखःप्रारभ्यते

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः १

श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकपर
श्रीविश्वनाथजीकेपास
महाराजशिवलालदुबेजीकेमकानमे ९
काशीसंस्कृतयंत्रालयमेछपी
जिनकोलेनाहोयउनकोइसकार्यकेसंपादक
श्रीयुतबाबूवाराणसीप्रसादजीकेपास
याकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी॥
मितिमाघशुक्ल १ बुधवार
संवत १९३६
तारीख ९ माह फर्वरी सन १८८० ई०

॥अथदानमयूखःप्रारभ्यते

श्रीगणेशायनमः॥योलीलयासंततनुतेत्रिबिम्बंतस्माल्लयस्यात्मनि
विश्वरूपे॥लयंनयत्याम्नुचपूर्णरूपःशिवंतनोत्वाशुरविर्ममासौ॥१॥
श्रुतीःस्मृतीर्वीक्ष्यपुराणजातंतत्तन्निबन्धानपिसन्निबंधान्॥श्रीशं
करस्यात्मजएषदानेश्रीनीलकंठोविवृणोतितत्त्वं २ परस्वत्वोत्पत्त्यं
तोद्रव्यत्यागोदानं।अत्ययविनिमयादयस्त्वेतद्व्याप्याएवदानप्र
योगादितिकेचित्॥परेप्रयोगस्यभाक्तत्वात्तद्भिन्नत्वेनापिविशेष
णीयमित्याहुः॥दामोदरठक्कुरस्तुक्रयादिवारयितुमदृष्टार्थत्वेन
विशेषणीयंश्रीत्यादिदानेदानपदंगौणमित्यूचेतन्न।सोमक्रयाति
व्याप्त्यवारणात्॥गौण्यांमानाभावाच्च॥दूरस्थविप्रमुद्दिश्यत्यक्त
स्यापहर्त्तातुप्रत्येयव॥तादृशापहारंशिष्टविगानेननिषेधकल्पनात्॥
परस्वत्वेनादत्तेत्येवमाकारकःप्रत्यक्षस्तुनिषेधोनप्रवर्त्ततेअपहारद
शायांकस्यापिस्वत्वाभावात्।दातुःपुनरुत्पत्तौमानाभावः।स्वत्वे
नुपरकीयस्यापिप्रीत्यादिनोपपद्यतएव।अग्न्युद्देशत्यक्तपुरोडाशा
दाविव।अन्यथातत्रापिपुनरुत्पत्तिप्रयोजकस्विष्टकृदादिविध्यभावे
पिपुनरुत्पत्तिप्रसंगः।स्विष्टकृदादिविधिसत्वएवपुनरुत्पत्तिर्नान्यथा
॥त्यक्तोपादानेविगानादितिनिर्णीतंतंत्ररत्नादौ॥नत्यागकालेस्व
त्वापगमः।किंतुविप्रकर्तृकस्वीकारकालइतितुकस्यचिद्व्याहतःप्र
लापउपेक्षणीयएव॥यदिकेनचित्कंचिद्ब्राह्मणमुद्दिश्यकिंचिद्द्रव्यसु
वर्णरजतादि।मनसापात्रमुद्दिश्यजलमध्येजलंक्षिपेत्।दातातत्फल
माप्नोतिप्रतिग्राहीनदोषभागित्यादिवचनप्रतिपादितेननविधिनोत्सृ
ज्यदेशांतरस्थायतस्मैतद्द्रव्यंप्रहितंतच्चयदिमध्येमार्गेनष्टंचौरै
र्वापहृतंनदातुर्नकोपिप्रत्यवायः।प्रमाणाभावात्॥दानफलंतुनैव
जायते॥ब्राह्मणस्वत्वापत्त्यवसानकस्योत्सर्गस्याजातत्वात्।नचा
नेनवचसादानानुकल्पेनपात्रोद्देश्यकःसंकल्पएवविधीयते।नतुप

त्रस्वत्वोत्पत्तिपर्यंततापि॥ उद्देशमात्रश्रवणादितिवाच्यम्। व्रजाप
तिव्रतांतर्गतोद्यदादित्यानीक्षणसंकल्पवदत्रापि फलपर्यंतताया अ
वश्यकत्वात्॥ अन्यथातत्रापिसंकल्पमात्रादेवफलंस्यात्॥ अस्त्वि
तिचेन्नैवं। तस्यव्रतमितिभावरूपव्रतोपक्रमेणाभावरूपादित्यानी
क्षणाद्युक्तिर्विरुद्धोपक्रमानुरोधात्॥ प्रतिपालनीयस्यार्थाव्यभि
चारिणीभावरूपांसंकल्पक्रियांलक्षयतितत्रचपरिपालितेनीक्षणा
दौव्यभिचारात्संकल्पलक्षणैवदुर्घटास्यात्॥ अतोनसंकल्पमात्रा
त्तत्रफलं। किंचात्रैवैधदेशकालावच्छेदेनपात्रहस्तप्रक्षेपासंभवेत
त्स्थानेमानसपात्रोद्देश्यकोजलाधिकरणकोजलप्रक्षेपोविधीयते।
नतुपात्रस्वस्वापत्तिपर्यंततापिबाध्यते॥ यद्वात्रप्रतिगृहीतृपदैःत्या
गप्रतिग्रहयोःप्रतीतेः॥ अतोनप्रतिगृहीतृव्यापारंविनोद्देशविशि
ष्टजलप्रक्षेपमात्रात्फलमितिदिक्॥ यत्तुदेवलः। अर्थानामुदितेपा
त्रेश्रद्धयाप्रतिपादनं॥ दानमित्यभिनिर्दिष्टंव्याख्यानंतस्यकथ्यतइ
तिवक्ष्यमाणसात्विकदानोक्त्यर्थंनदानसामान्यपरं॥ इतिदानस्व
रूपं॥ एतत्प्रशंसासामवेदोपनिषदि॥ दानेनसर्वान्कामानवाप्नोतिचि
रंजीवत्वमिति। व्यासः। यद्ददासिविशिष्टेभ्योयदश्नासिदिनेदिनेतत्ते
वित्तमहंमन्येशेषंकस्यापिरक्षसि॥ ग्रासादर्द्धमपिग्रासमर्थिभ्यःकिं
नदीयते॥ इच्छानुरूपोविभवःकदाकस्यभविष्यतीत्यादि॥ तच्चदा
नंत्रेधोक्तंभगवद्गीतासु॥ दातव्यमितियद्दानंदीयतेनुपकारिणे॥
देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतम्॥ यत्तुप्रत्युपकारार्थंफल
मुद्दिश्यवापुनः। दीयतेचपरिक्लिष्टंतद्राजसमुदाहृतं। अदेशकाले
यद्दानमपात्रेभ्यश्चदीयते॥ असंस्कृतमवज्ञातंतत्तामसमुदाहृ
तम्॥ विष्णुधर्मोत्तरे॥ तामसानांफलंभुंक्तेतिर्यक्त्वेमानवःसदा॥
वर्णशंकरभावेनवाहकेपदिवापुनः। बाल्येवादासभावेवानात्रका
र्याविचारणा॥ अतोन्यधातुमानुष्येराजसानांफलंभवेत्। सात्विका
नांफलंभुंक्तेदेवत्वेनात्रसंशयः। मात्स्ये॥ येवांपूर्वकृतंकर्मसात्विकंम
नुजोत्तम॥ पौरुषेणविनातेषांकेषांचिद्दृश्यतेफलं॥ कर्मणाप्राप्यतेलो
केराजसस्यतथाफलं। कृच्छ्रेणकर्मणाविद्धितामसस्यतथाफलम्॥

हारीतः।मुमूर्षुस्त्वामसंयच्चाप्रकृतोददातीति॥अप्रकृतोऽसाव
धानः।गारुडे॥अर्हतेयस्तुवर्णादिदानंतत्कायिकंमतं।आर्त्तानामभय
दत्वादेतद्विवाचिकंस्मृतम्॥विद्यामादाययज्ञध्येस्तद्दानंमानसंद्विजा
इति॥अथदानसामान्येतिकर्त्तव्यता।तत्रदानाधिकारस्तुचतुर्णामपि
वर्णानांस्त्रीणांच।वर्णानामाश्रमाणांचचातुर्वर्ण्यैयुधिष्ठिर॥दानधर्मं
प्रवक्ष्यामियथाव्यासेनभाषितमितिव्यासोक्तेः॥सचनिषादस्थपति
वत्वैदिकमंत्रवत्स्वपिसमंत्रकएवस्त्रीशूद्रयोरविरुद्धः।मदनरत्ने
जातूकर्ण्यः।अधिकारीभवेच्छूद्रःपूर्त्तधर्मेनवैदिके।पूर्त्तधर्मास्तत्रै
वस्मृत्यंतरे।बहिर्वेदिचयद्दानंतत्पौर्त्तिकमुदाहृतं।तत्रैवव्यासोपि।
अंतर्वेद्यांचयद्दानंदृष्टंतदभिधीयतेति।अथपात्रं।याज्ञवल्क्यः।न
विद्ययाकेवलयातपसावापिपात्रता।यत्रवृत्तमिमेचोभेतद्धिपात्रंप्र
चक्षतइति।व्यासः।प्रथमंतुगुरोर्दानंदत्वाज्येष्ठमनुक्रमात्।ततोन्ये
षांतुविप्राणांदद्यात्पात्रानुरूपतः।भविष्यपुराणे।संनिधानस्थितान्
विप्रान्दौहित्रंविट्पतिंतथा।भागिनेयंविशेषेणतथाबंधून्गृहागता
न्।नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपिदीयते।अतिक्रम्यमहारौद्रौ
रवंनरकंव्रजेत्।विट्पतिर्जामाता।विष्णुः।मातृष्वसास्वसाचैवतथैव
चपितृष्वसा।मामामहीभागिनेयीभागिनेयस्तथैवच।दौहित्रश्चैव
जामातातेषुदत्तमिहाक्षयं॥श्रीभ्रष्टेषुतथादत्तंतदप्यक्षय्यमुच्यते
॥मातापित्रोर्गुरौमित्रेविनीतेचोपकारिणि।दीनानाथविशिष्टेभ्योदा
तव्यंभूतिमिच्छता।विष्णुः।पितुःशतगुणंदानंसहस्रंमातुरेवच।अ
नंतंदुहितुर्दानंसोदर्येदत्तमक्षयं।एतत्प्रशंसामात्रं।दक्षः।सममब्रा
ह्मणेदानंद्विगुणंब्राह्मणब्रुवे।सहस्रगुणमाचार्येत्वनंतंवेदपारगे।
व्यासः।ब्रह्मबीजसमुत्पन्नोमंत्रसंस्कारवर्जितः।जातिमात्रोपजीवी
चभवेद्ब्राह्मणःसतु॥गर्भाधानादिभिर्युक्तस्तथोपनयनेनच।नक
र्मविन्नचाधीतेसभवेद्ब्राह्मणब्रुवः।तथा।देवार्चनपरोनित्यंवित्तार्थी
वत्सरत्रयं।असौदेवलकोनामहव्यकव्येषुगर्हितः।यत्तुबृहस्पति
ना।शूद्रेसमगुणंदानंवैश्येतुद्विगुणंस्मृतं।क्षत्रियेत्रिगुणंप्रोक्तंब्राह्म
णेषड्गुणंस्मृतमितिशूद्रादीनामपिपात्रतोक्तासाच्छादनपरा।अ

न्नाच्छादनदानेषुपात्रंनैवविचारयेत्।अन्नस्यक्षुधितंपात्रंविवस्त्रो
वसनस्यचेतिविष्णुधर्मोक्तेः।अपात्रायामंत्रकंदानं।मंत्रपूर्वंतुयद्दा
नमपात्रायप्रदीयते।दातुर्निकृत्यहस्तंतुभोक्तुर्जिह्वांनिकृंतनीतिशा
तातपोक्तेः।तथा।यस्यवेदस्यवेदीविच्छिद्येतेत्रिपूरुषं।सवैदुर्ब्राह्मणो
नामयश्चैववृषलीपतिरिति।अपात्रमित्यर्थः।अथदेयं।यथाविधेनद्र
व्येणयत्किंचित्कुरुतेनरः।तथाविधमवाप्नोतिसफलंप्रेत्यचेहच।तथा
विधंशुक्लेनशुद्धंशबलेदुःखंसमिश्रंकृष्णेनासुखोदयं।शुक्लादिस्वरू
पंतुस्मृतौ।श्रुतशौर्यतपःकन्यायाज्यशिष्यात्तपागतं।धनंसप्तविधं
शुक्लमुदयोप्यस्यतद्विधः।कुसीदकृषिवाणिज्यशिल्पशुक्लानुवृत्ति
तः।कृतोपकारादाप्तंचशबलंसमुदाहृतं।पार्श्वकद्यूतचौर्यार्तिप्र
तिरूपकसाहसैः।व्याजेनोपार्जितंयत्तत्सर्वेषांकृष्णमुच्यतेइति।
पार्श्वकंसर्वदासमीपस्थित्यासेवा।प्रतिरूपकंवेशांतरग्रहणं।शिव
धर्मे।तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत्॥भागद्वयंतुधर्मा
र्थमनित्यंजीवितंयतः॥सर्ववित्तस्यभागपंचकंकृत्वाभागत्रयंजीवना
र्थंभागद्वयंधर्मार्थमितिहेमाद्रिः।भागत्रयंसर्ववित्तस्य।तत्रैकोभागो
जीवनायभागद्वयंधर्मायेत्यन्ये।कृपणाशक्तविषयेतुभारते।एकांगां
दशगुर्दद्याद्दशदद्याच्चगोशती।शतंसहस्रगुर्दद्यात्सर्वेसमफलाः
स्मृताइति।गोपदंवित्तमात्रोपलक्षणार्थं।अन्यथापंचगवादेःसह
स्राधिकगवादेश्चगोदानेनधिकारःस्यादितिहेमाद्रिः।यमः।सुवर्णर
जतंताम्रंयतिभ्योयःप्रयच्छति।नतत्फलमवाप्नोतितत्रैवपरिवर्त्तते
॥यतयेकांचनंदत्वादातापिनरकंव्रजेत्॥अपिशब्दात्प्रतिग्रहीतापि
॥अंगिराः।देवतानांगुरूणांचमातापित्रोस्तथैवच॥पुण्यंदेयंप्रयत्ने
ननापुण्यंचोदितंक्वचित्।तथा।पापदःपापमाप्नोतिनरोलक्षगुणंसदा
।पुण्यदःपुण्यमाप्नोतिशतशोथसहस्रशः॥स्कांदे॥आपत्स्वपिनदे
यानिनववस्तूनिसर्वदा।अन्वयेसतिसर्वस्वंदाराश्चशरणागताः॥
न्यासाधीकुलवृत्तिंचनिक्षेपःस्त्रीधनंसुतः।योददातिसमूढात्माप्रा
यश्चित्तैर्विशुद्ध्यति।अंगिराः।बहुभ्योनप्रदेयानिगोगृहंशयनंस्त्रियः
।विभक्तदक्षिणाह्येतादातारंतारयंतिहि।विभक्तदत्तानिपृथग्दत्तानि।

गौरेकस्यैव दातव्या नबहुभ्यः कथंचन॥ साहि विक्रयमापन्ना दहत्या
सप्तमं कुलमिति। अग्राह्यं स्कान्दे॥ अजिनं मृतशय्यां च मेषीं चोभय
तः मुखीं। कुरुक्षेत्रे च गृण्हानो न भूयः पुरुषो भवेत्॥ अग्राह्यं प्रकृत्य
तत्रैव॥ हस्त्यश्वरथयानानि मृतशय्यासनादयः॥ अग्राह्या इत्यर्थः।
आसनं मृतस्यैव॥ पद्मपुराणे॥ ब्रह्माण्डभूमिदानं च ग्राह्यं नैकेन तद्भवे
त्॥ अश्वं च मणिमातंगतिललोहानि वर्जयेदिति॥ वसिष्ठः। शस्त्रवि
षसुरा वा प्रतिग्राह्याणि ब्राह्मणस्य। हेमाद्रौ पाद्मे॥ अतिदुष्टा प्रेतश
य्या न ग्राह्या द्विजसत्तमैः। गृहीता यांतु तस्यां तु पुनः संस्कारमर्हति। लोहं
तिलाश्च महिषीं तेलं लवणमेव च। तिलधेनुर्मणिश्चैव घोराः सप्त प्रतिग्र
हा इति। मनुः। हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतं। अविद्वान्प्र
तिगृण्हानो भस्मीभवति काष्ठवत्॥ प्रतिग्रहसमर्थोपि प्रसंगं तत्र वर्ज
येत्। प्रतिग्रहेण विप्राणां ब्राह्मं तेजो विनश्यति। इति दे पद्रव्यं। अथ का
लाः। व्यासः। दर्शे शतगुणं दानं तच्चतुर्घ्नं दिनक्षये। शतघ्नं तच्च संक्रांतौ
शतघ्नं विषुवे ततः। युगादौ तच्छतगुणं अयने तच्छताहतं। सोमग्रहे
तच्छतघ्नं तच्छतघ्नं रवेर्ग्रहे। तच्छतघ्नं व्यतीपाते दानं वेदविदो विदुः।
विष्णुधर्मोत्तरे॥ वैशाखी कार्त्तिकी माघी पूर्णिमा तु महाफला। पौर्णमा
सीषु सर्वासु मासर्क्षसहितासु च। दत्तानामिह दानानां फलं शतगुणं भ
वेत्। यस्यां पूर्णेंदुना योगं याति जीवो महाचलः। पौर्णमासी तु विज्ञेया
महापूर्वा द्विजोत्तम। स्नानं दानं तथा जप्यमक्षय्यं वै तदा स्मृतं। शंखः
। अमावास्या तु सोमेन सप्तमी भानुना सह। चतुर्थी भूमिपुत्रेण सोमपु
त्रेण चाष्टमी॥ चतस्रस्तिथयस्त्वेतास्तुल्याः स्युर्ग्रहणादिभिः। सर्वम
क्षपमत्रोक्तं स्नानदानजपादिकं॥ अमावास्या व्यतीपातो ग्रहणं चं
द्रसूर्ययोः। मन्वादयो युगादिश्च संक्रांतिर्वैधृतिस्तथेत्यादि॥ भारते
। रात्रौ दानं न शंसंति विना त्वभयदक्षिणां॥ विद्यां कन्यां द्विजश्रेष्ठ दीप
मन्नं प्रतिश्रयं॥ विनेति पदं विद्यादिभिरपि संबध्यते। तथा। महानिशा
तु विज्ञेया मध्यस्थं प्रहरद्वयं। स्नानं तत्र न कुर्वीत काम्यनैमित्तिकादृते
। नेच्छंत्येके स्नानदानं रात्रौ मध्यमयामयोः। नैमित्तिकं तदा कुर्यान्नित्यं
तु न मनागपि। उभयतोमुख्यातुरदानाभयदानान्नदानादिकं तु सर्वं

दाभवतीतितत्रस्पष्टं।अर्द्धप्रसूतांगांदद्यात्कालादिनविचारयेदिति
॥अथपुण्यदेशाः।मनुः।दृषद्वतीसरस्वत्योर्देवनद्योर्यदंतरं।तंदेवनि
र्मितंदेशंब्रह्मावर्त्तंप्रचक्षते॥कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनकाः
॥एषब्रह्मर्षिदेशोवैब्रह्मावर्त्तादनंतरः॥मत्स्योविराटदेशः।पंचालाः
कान्यकुब्जाहिछत्रादिदेशः।शूरसेनिकोमथुरादिदेशः।हिमवद्विंध्य
योर्मध्यंयत्प्राग्विनशनादपि॥प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकी
र्त्तितः।विनशनमंतर्द्धानं॥भविष्यत्पुराणे॥वाराणसीकुरुक्षेत्रप्र
यागपुष्करक्षेत्रगंगासमुद्रतीरनैमिषामरकंटकश्रीपर्वतमहा
कालगोकर्णदेवपर्वतादीनिपुण्यानीति॥पाद्मे॥लिंगंवाप्रतिमा
वापिदृश्यतेयत्रकुत्रचित्॥तत्सर्वंपुण्यतांयातिदानेषुचमहाफ
लं॥भविष्योत्तरे॥क्रोशमात्रंभवेत्क्षेत्रंशिवस्यपरमात्मनः॥प्राणि
नांतत्रपंचत्वंशिवसायुज्यकारकं॥फलंदत्तहुतानांचअनंतंपरि
कीर्त्तितं॥मनुजैःस्थापितेलिंगेक्षेत्रमानमिदंस्मृतं।स्वयंभुविस
हस्रंस्यादार्षेचैवतदर्द्धकं॥तथा।गृहेदशगुणंदानंगोष्ठेचैवशता
धिकं।पुण्यतीर्थेषुसाहस्रंअनंतंशिवसन्निधौ॥मात्स्ये॥शालग्रा
मसमुद्भूतःशैलश्चक्रांकमंडितः।तिष्ठतेयत्रवसुधेतत्क्षेत्रंयोजनं
त्रयं॥द्वारवत्याःशिलादेविमुद्रितामममुद्रया।यत्रापिनीयतेतस्या
क्षेत्रंद्वादशयोजनमित्यादि॥काशीखंडे॥अन्यत्रयत्कृतंकर्मंत्रतं
दानंतपोजपः।गंगातटेषुतत्सर्वंकृतंकोटिगुणंभवेत्॥मात्स्ये॥अ
ग्निहोत्रगृहेचैवयदल्पमपिदीयते॥तदनंतफलंसर्वंभवतीतिविनि
श्चयः।इतिदेशाः।प्रतिग्रहेदेशनिषेधःपाद्मे॥नतीर्थेप्रतिगृण्हीया
त्प्राणैःकंठगतैरपि।ब्रह्मपुराणे।प्रवाहमवधिंकृत्वायावद्धस्तचतु
ष्टयं॥तत्रनप्रतिगृण्हीयात्प्राणैःकंठगतैरपि।दानधर्मे।भाद्रशुक्ल
चतुर्दश्यांयावदाक्रमतेजलं।तावद्गर्भंविजानीयात्तदूर्ध्वंतीरमु
च्यते।मात्स्येपि।सार्द्धहस्तशतंयावद्गर्भतस्तीरमुच्यते।स्कांदे।ती
राद्गव्यूतिमात्रंतुपरितःक्षेत्रमुच्यते।इति।इदंचगंगायां।गर्भप्रति
ग्रहनिषेधःप्रसिद्धनदीषु।प्रसिद्धतरगंडक्यादिषुतुतीरेपिगंगायांतु
क्षेत्रेपीतिसर्वशिष्टाचारः।अथदातृकृत्यं।मनुः।प्रभुःप्रथमकल्प॰

स्यपोनुकूल्येनवर्त्तते। नसांपरायिकंतस्यदुर्मतेर्विद्यतेफलं। कात्या
यनः। कुशोपरिनिविष्टेनतथायज्ञोपवीतिना। देयंप्रतिगृहीतव्यमन्य
थाविफलंभवेत्। स्मृत्यंतरे। दद्यात्पूर्वमुखोदानंगृण्हीयादुत्तरामुखः।
आयुर्विवर्द्धतेदातुर्गृहीतुःक्षीयतेनतत्। हेमाद्रौ। नामगोत्रेसमुच्चार्य
संप्रदानस्यचात्मनः। संप्रदेयंप्रयच्छंतिकन्यादानेतुपुंस्त्रयं। शाखाम
प्युच्चारयंतिशिष्टाः। वस्त्रादिनाविप्रवरणंचकुर्वंतिमध्यदेशे। तथा। ना
मगोत्रेसमुच्चार्यसम्यक्श्रद्धान्वितोददेत्। संकीर्त्यदेशकालादितुभ्यं
संप्रददेइति। नममेत्यपिकीर्त्तयंतिशिष्टाः। वाराहे। सुस्नातःसम्यगा
चांतःकृतसंध्यादिकक्रियः। कामक्रोधविहीनश्चपाखंडस्पर्शवर्जि
तः। दद्यादितिशेषः। गौतमः। अंतर्जानुकरंकृत्वासकुशंसतिलोदकं।
फलान्यपिचसंधायप्रदद्याच्छ्रद्धयान्वितः। तथा। नामगोत्रेसमुच्चा
र्यप्राङ्मुखोदेयकीर्त्तनात्। उदङ्मुखायविप्रायदत्वातंस्वस्तिकीर्त्त
येत्॥ सदेवताकदेयकीर्त्तनानंतरंदत्वेत्यर्थः। देवलः। प्रदायशाक
मुष्टिंवायस्तुश्रद्धासमन्वितः। महतेपात्रभूतायसर्वाभ्युदयमाप्नु
यात्॥ पात्रासंनिधानेनारदीये। मनसापात्रमुद्दिश्यजलंभूमौवि
निक्षिपेत्। विद्यतेसागरस्यांतस्तस्यांतोनैवविद्यते। पात्रासंनिधा
नेऽन्यविप्रकरेदानंदेयमितिधौम्यस्मृतौ। पात्रासन्निधाने। अप्सुदे
यंविनिक्षिपेदितिषट्त्रिंशन्मते। देयपात्रासंन्निधानेतत्रैवविशेषउ
क्तः। द्रव्यपात्रविकर्षश्चेत्परोक्षंदातुमुद्यतः। नैष्यामाहेभवंपात्रंद्र
व्यमादित्यदैवतं। तथा। परोक्षेकल्पितंदानंपात्राभावेकथंभवेत्।
गोत्रजेभ्यस्तदाद्यात्तदभावेऽस्यबंधुषु॥ गोत्रजाःपात्रस्य। स्कांदे
। तस्मात्प्रणवमुच्चार्यकातंस्प्रतिग्राह्यो। याज्ञवल्क्यः। प्रतिग्रहेसूति
चक्रिध्वजिवेश्यानराधिपाः। दुष्टादशगुणंपूर्वात्पूर्वादेतेयथाक्रमं
॥ राजाशास्त्रातिक्रमवतीनराज्ञःप्रतिगृण्हीयाल्लुब्धस्योच्छास्त्रव
र्त्तिनइतिस्मृतेः। तदपवादः। अयाचिताहृतंग्राह्यमपिदुष्कृतकर्मणः।
अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः। तथा। चांडालोजायतेयज्ञक
रणाच्छूद्रभिक्षितात्। यज्ञार्थंलब्धमददद्भासःकाकोपिवाभवेत्। यज्ञो
द्देशेननयाचेतेत्यर्थः। प्रकारांतरेणलब्धेनयज्ञेकृतेनदोषः। अतएवज्ञा

यतेवैश्यादेर्येत्रोद्देशेनापियाचनीयं॥अथप्रतिगृहीतकृत्यं।ॐका
रमुच्चरन्नाज्ञोहूविणंसकुशोदकं।गृण्हीयाद्दक्षिणेहस्तेतदंतेस्वस्तिकी
र्त्तयेत्।पुराणांतरे।प्रतिगृहीतासावित्र्यसर्वत्रैवानुकीर्त्तयेत्।ततस्तु
कीर्त्तयेत्साईद्रव्येणद्रव्यदेवतां।समापयेत्ततःपश्चात्कामस्तुत्याप्र
तिग्रहं।तदंतेकीर्त्तयेत्स्वस्तिप्रतिग्रहविधिस्त्वयं।सावित्रोदेवस्यत्वे
त्यादिः।आदित्यपुराणे।प्रतिग्रहंपठेदुच्चैःप्रतिगृह्यद्विजोत्तमात्।म
न्त्रंपठेत्तुराजन्यात्उपांशुचतथाविशि।मनसातुतथाशूद्रेस्वस्तिवा
चनमेवच।सोंकारंब्राह्मणेकुर्यान्निरोंकारंमहीपतौ।उपांशुचतथावै
श्येमनसाशूद्रजेतथेति।प्रतिग्रहश्चदक्षिणहस्तमध्येकर्त्तव्यःहस्त
मध्येब्रह्मतीर्थंदक्षिणाग्रहणेतदितिस्मरणात्॥तथा।प्रतिग्रहस्य
योधर्म्यंनजानातिद्विजोविधिं॥द्रव्यस्तैन्यसमायुक्तोनरकंप्रतिप
द्यते।विधिंतुधर्म्यंविज्ञायब्राह्मणस्तुप्रतिग्रहे।दात्रासहतरत्येवम
हादुर्गाण्यसौध्रुवमिति।याज्ञवल्क्यः।प्रतिग्रहसमर्थोपिनादत्तेयः
प्रतिग्रहं।येलोकादानशीलानांसतानाप्नोतिपुष्कलानिति।अप्र
त्याख्येयमाहसएव।कुशाःशाकंपयोमत्स्यागंधाःपुष्पंदधिक्षितिः।
मांसंशय्यासनाधानाःप्रत्याख्येयंनवारिच।तथा।एधोदकंमूलंफ
लंमन्नमभ्युद्धृतंचयत्।सर्वतःप्रतिगृण्हीयान्मध्वथाभयदक्षि
णामिति।तथा।आममांसंमधुघृतंधानाःक्षीरमथोदितं।गुडंतक्रंच
संग्राह्यंनिवृत्तेनापिशूद्रतः।खलक्षेत्रगतंधान्यंवापीकूपगतंजलं।
असाधोरपितद्ग्राह्यंयच्चगोष्ठगतंपयः।इक्षुःफलानिपिण्याकंप्रति
ग्राह्याणिसर्वतः।बृहस्पतिः।विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके।
पूर्वसंकल्पितंग्राह्यंनदोषःपरिकीर्त्तितइति।अत्रविवाहोत्सवयज्ञे
ष्वितियजतिषुयेयजामहेकरोतिनानूयाजेष्वितिवदुद्देश्यविशेष
णमपिविवक्षितं।अन्यथाविवाहोत्सवयज्ञेष्विति परिगणनंव्यर्थंस्या
त्।अतोन्यत्रपूर्वसंकल्पितस्यसूतकादौदोषएवेति।द्रव्यदेवतास्ते
त्तिरीये।सोमायवासः।रुद्रायगां।वरुणायाश्वं।प्रजापतयेपुरुषं
।मनवेतल्पं।त्वष्ट्रेऽजां।पूष्णेऽविं।निर्ऋत्याअश्वतरगर्दभौ।हिमव
तेहस्तिनं।गंधर्वाप्सरोभ्यःस्त्रगलंकरणे।विश्वेभ्योदेवेभ्योधान्यं॥

वाचेःन्त्वंब्राह्मणेओदनं। समुद्रायापः। उत्तानायांगीरसायनः। वैश्वानरा
यरथमिति॥ विष्णुधर्मोत्तरे। अभयंसर्वदैवत्यंभूमिर्वैविष्णुदेवता। कन्या
दासस्तथादासीप्राजापत्याःप्रकीर्त्तिताः। तथाचैकशफंसर्वंकथितंय
मदैवतं। महिषाश्वास्तथायाम्याउष्ट्रोवानैरृतोभवेत्। रौद्रीधेनुर्विनि
र्दिष्टाछागमाग्नेयमादिशेत्। मेषंतुवारुणंविद्याद्धरसंहंवैष्णवंतथा। आ
रण्याःपशवःसर्वेकथितावायुदेवताः॥ जलपात्रांस्तुसर्वांस्तुवारि
धानींकमंडलुं॥ कुंभंचकरकंचैववारुणानिनिबोधत। समुद्रजानि
सर्वाणिवारुणानिद्विजोत्तमाः। आग्नेयंदैवतंप्रोक्तंसर्वलोहानिवाप्य
थ। प्राजापत्यानिसस्यानिपक्वान्नमपिवैद्विज॥ ज्ञेयास्तुसर्वगंधावै
गांधर्वाश्चविचक्षणैः। बार्हस्पत्यंस्मृतंवासःसौम्याज्ञेयारसास्तथा
। पक्षिणश्चतथासर्वेवायव्याःपरिकीर्त्तिताः। विद्याब्राह्मीविनिर्दिष्टा
विद्योपकरणानिच। सारस्वतानिदेयानिपुस्तकादीनिपंडितैः। सर्वेषां
शिल्पिभांडानांविश्वकर्मातुदैवतं। द्रुमाणामथपुष्पाणांशाकैर्हरित
कैःसह। फलानामपिसर्वेषांतथाज्ञेयोवनस्पतिः। मत्स्यमांसेविनि
र्दिष्टेप्राजापत्येतथैवच। छत्रंकृष्णाजिनंशय्यांरथमासनमेवचउ
पानहौचयानंचयच्चान्यत्प्राणिवर्जितं। तत्तुचांगिरसत्वेनप्रतिगृह्णी
तमानवः। भूरोपयोगियत्सर्वंशस्त्रवर्मध्वजादिकं। रणोपकरणंसर्वं
विज्ञेयंसर्वदैवतं। गृहंतुसर्वदैवत्यंयदनुक्तंद्विजोत्तम। विज्ञेयंविष्णुदै
वत्यंसर्वंवाद्विजसत्तमाः। हेमाद्रौ। यजुःपाठानंतरंराजात्वावरुणोन
यतुदेविदक्षिणेअमुकस्मैअमुकांतेनाम तत्वमस्यांमयोदात्रेमयो
मह्यमस्तुप्रतिगृहीत्रे॥ ततःकामस्तुतिः। ॐस्वस्तीतिविशेषः॥ विष्णु
धर्मोत्तरे॥ भूमेःप्रतिग्रहंकुर्याद्भूमिंकृत्वाप्रदक्षिणं। करेगृहीत्वाकन्यां
चदासदास्यौद्विजोत्तमाः। करंतुहृदिविन्यस्यधर्म्योज्ञेयःप्रतिग्रहः।
आरुह्यतुगजस्योक्तःकर्णेवाश्वस्यकीर्त्तितः। तथाचैकशफानांतुस
र्वेषांचविशेषतः। तथाकर्णःप्रतिगृह्णीततान्शृंगेपुच्छेकृष्णाजिनं
तथा। तान्एकशफान्। अत्रशृंगिणामेकशफानांशृंगेइतरेषांकर्णेइ
तितुव्यवस्था। कर्णजाःपशवःसर्वेग्राह्याःपुच्छेविचक्षणैः। गृह्णीयान्मा
हिषंशृंगेखरंवैपृष्ठदेशतः। प्रतिग्रहमशेषस्ययानानांचाधिरोहणात्।

वीजानांमुष्टिमादायरत्नान्यादायसर्वतः।वस्त्रंदशांतादादद्यात्सरिधायाथवापुनः।आरुह्योपानहौमंच आरुह्यैवतु पादुके।चर्मध्वजौतु संस्पृश्यप्रविश्यवतथागृहं।आवर्तीयंच सर्वाणिजलस्थानानिवै द्विजाः।ईषायांतुरथोग्राह्यः छत्रंदंडे तथैवच।द्रुमांश्चप्रतिगृह्णीयान्मूलन्यस्तकरोद्विजः।आयुधानिसमादायतथामुच्यविभूषणं।परिशिष्टेतु।प्रतिगृह्णीतगांपुच्छेकर्णेवाहस्तिनंकरे॥मूर्ध्निदासीमजेचैवपृष्ठेऽश्वतरगर्दभौ॥अश्वंकर्णेसटेवापिअन्नमुद्दिश्यधारयेत्॥शय्यासनंगृहंक्षेत्रंसंस्पृश्याद्यकांचनं।उष्ट्रंचककुदेस्पृष्ट्वामृगांश्चमहिषादिकान्॥गोधामश्वविधानेनपुच्छेसंस्पृश्यपक्षिणः।दंष्ट्रिणोदंष्ट्रिनश्चैवतथाक्षुद्रमृगाश्चये।ओजस्विनांचसर्वेषामेषएवविधिःस्मृतः।छत्रंचचामरंमूलेफलंसंगृह्यगौरवात्॥अगृह्योपानहौ— मंत्रंवाचयेत्प्रतिमुच्यवै॥वासस्त्वथसमादायकन्यांशीर्ष्येथवैकरे।रतिभार्यांपरपूर्वांप्रतिगृह्णीतचाक्षतां।पुत्रमुत्संगमारोप्यप्रतिगृह्णीतदंतकंरथंरथमुखेस्पृष्ट्वाप्रतिगृह्णीतकूवरे॥कूवरोयुगाधारकाष्ठं।मुख्यकांचनवस्त्राणांअंगयुक्तेप्रतिग्रहः।इतिसामान्येतिकर्त्तव्यतानिरूपणं।

अथपरिभाषा॥वामनपुराणे॥सर्वमंगलमंगल्यंवरेण्यंवरदंशुभं॥नारायणंनमस्कृत्यसर्वकर्माणिकारयेत्॥भविष्ये॥संकल्पेनविनाविप्रयत्किंचित्कुरुतेनरः॥फलंचाल्पाल्पकंतस्यधर्मस्यार्द्धक्षयोभवेत्॥वसिष्ठः।जपहोमोपवासेषुधौतवस्त्रधरोभवेत्।अलंकृतःशुचिःमौनीश्रद्धावान्विजितेंद्रियः।याज्ञवल्क्यः।यदिवाग्यमलोपःस्याज्जप्यादिषुकथंचन॥व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं।सएवरौद्रविन्नासुरान्मंत्रांस्तथाचैवाभिचारिकान्।व्याहृत्यालभ्यचात्मानमपःस्पृष्ट्वान्यदाचरेत्।कात्यायनः।पित्र्यमंत्रानुद्रवणेआत्मालंभेवमोक्षणे।अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे॥मार्जारमूषकस्पर्शेआक्रुष्टेक्रोधसंभवे।निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपःस्पृशेत्॥आत्मालंभोहृदयस्पर्शः।सचकर्माणिविहितइतिकेचित्।स्मृत्यर्थसारे।कर्त्रंगनामतुक्तेतुदक्षिणांगंभवेत्तथा॥छंदोगपरिशिष्टे।यत्रदिङ्नियमोनास्तिजपादिषुकथंचन।तिस्रस्तत्रदिशःप्रोक्ताऐंद्रीसौम्यापरा।

जिता॥ नैवैव। आसीनऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः। तदासीनेन कर्त्त
व्यं न प्रह्वेन न तिष्ठतेति। तथा। पंचाशद्भिर्भवेद्ब्रह्मा तदर्द्धेन तु विष्टरः। द
क्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः। तथा। अनंतर्गर्भिणं साग्रं कौशं
द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। तथा। सदोपवी
तिना भाव्यं सदा बद्धशिखेन च। विशिखो व्युपवीतश्च यत्करोति न तत्कृ
तं। विष्णुधर्मोत्तरे। मंत्रेणोंकारपूतेन स्वाहांतेन विचक्षणः। स्वाहावसा
ने जुहुयाद्ध्यायन्वै मंत्रदेवतां। ब्राह्मे। शमीपलाशन्यग्रोधप्लक्षवैकंक
तोद्भवाः। अश्वत्थोदुंबरो बिल्वश्चंदनः सरलस्तथा। शालश्च देवदारु
श्च खदिरश्चेति याज्ञिकाः। कर्मप्रदीपे। नांगुष्ठादधिका कार्या समित्स्थू
ला तथा क्वचित्। न वियुक्ता त्वचा चैव न सकीटा न पाटिता। प्रादेशान्ना
धिका नोना न तथा स्याद्विशाखिका। न सपर्णा समित्कार्या होमकर्मसु
जानता। तथा। प्राग्ग्राः समिधो ग्राह्या अखर्वा नोष्ठपाटिताः। काम्येषु
वश्यकर्मादौ विपरीता जिघांसतः। विशीर्णा विदला ह्रस्वा वक्रा बहु
शिराः कृशाः। दीर्घाः स्थूला घुणैर्जुष्टा कर्मसिद्धिविनाशकाः। वायुपुरा
णे। कंडनं पेषणं चैव तथैवोल्लेखनं तथा। सकृद्देवपितॄणां स्याद्देवानां
तन्निरुच्यते॥ भविष्यत्पुराणे॥ भूमौ स्थितेन पात्रेण विष्टब्धेन च पाणि
ना॥ वामेन यद्दुशार्दूल नांतरिक्षे तु हूयते। धनायुर्हारि रे खवासु सोमतीर्थे
तु मध्यमं। लाजादिहवनं तेन कर्त्तव्यं वपनं तथा। वपनं निर्वापः। कात्या
यनः। पाण्याहुतिर्द्वादशपर्वपूरिका कंसादिना चेत्स्रुचिपर्वपूरिका। दैवेन
तीर्थेन तु हूयते हविः स्वंगारिणि स्वर्चिषि तच्च पावके॥ योनर्चिषि जु
होत्यग्नौ व्यंगारिणि च मानवः। मंदाग्निरामयावी च दरिद्रश्चैव जायते
॥ तस्मात्समिद्धे होतव्यं नासमिद्धे कथंचन॥ आरोग्यमिच्छतायुश्च
श्रियमात्यंतिकीं तथा॥ जुहुयुश्च हुते चैव पाणिशूर्पस्रुवादिभिः। न
कुर्यादग्निधमनं कुर्याद्वा व्यजनादिना॥ मुखेनैव धमेदग्निं मुखाद्ध्येषो
ध्यजायत॥ नाग्निं मुखेनेति तु यल्लौकिके योजयंति तत्। व ब्रह्मचपरि
शिष्टे॥ अथाबुधः सधूमे तु जुहुयाद्यो हुताशने। यजमानो भवेदंधः
सपुत्र इति च श्रुतिः। इति परिभाषाप्रकरणं॥ मात्स्ये॥ होमो ग्रहादि
पूजायां शतमष्टोत्तरं भवेत्॥ अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते।

गृह्यपरिशिष्टे।वन्हल्पंवास्वगृह्योक्तंयस्यकर्मप्रकीर्त्तितं।तस्यता
वतिशास्त्रार्थेकृतेसर्वंकृतंभवेत्।प्रवृत्तमन्यथाकुर्याद्यदिहोमात्कथं
चन।यतस्तदन्यथाभूतंततएवसमापयेत्।अन्यथाभूतंविपर्यस्तं।छं
दोगपरिशिष्टे।यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्।विद्वद्भि
स्तदनुष्ठेयमग्निहोत्रादिकर्मवत्।समाप्तेयदिजानीयान्मयैतदयथाकृ
तं॥तावदेवपुनःकुर्यान्नावृत्तिःसर्वकर्मणः।प्रधानस्याक्रियायत्रसां
गंतत्क्रियतेपुनः।तदंगस्याक्रियायांतुनावृत्तिर्नचतत्क्रिया।तथा।दर्भाः
कृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः॥अयातयामान्येतानिनियो
ज्यानिपुनःपुनः।लघुहारीतः।चितौदर्भाःपथिदर्भायेदर्भायज्ञभूमि
षु।स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेदिति।ब्राह्मे।यथोक्तव
स्त्वसंपत्तौग्राह्यंतदनुकारियत्॥यवानामिवगोधूमाव्रीहीणामिव
शालयः॥आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते॥मंत्रस्यदेवताया
श्चप्रजापतिरितिस्थितिः।अना ‾ देशेअविधाने।प्राजापत्यमंत्रःस
मस्तव्याहृतयइतिमदनः।स्मृत्यंतरेपि।नव्याहृत्यासमंहुतमिति
गारुडे।प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तम।देवतायाःस्वकंनाम
मूलमंत्रःप्रकीर्त्तितः॥विष्णुधर्मोत्तरे।दध्यलाभेपयःकार्यंमध्वला
भेतथागुडः।घृतप्रतिनिधिंकुर्यात्पयोवादधिवानृप।सर्वाभावेय
वःप्रतिनिधिरितिपैठीनसिनोक्तं।बौधायनः।पलाशाश्वत्थखदिररो
हितकौदुंबरीणांइध्मास्तदलाभेसर्ववनस्पतीनां।बौधायनः।आज्य
होमेषुसर्वेषुगव्यमेवभवेद्धुतं॥तदलाभेमहिष्यास्तुआजमाविकमे
वच॥तदलाभेतुतैलंस्यात्तदलाभेतुजार्त्तिलं॥तदभावेतुकौसुंभंतद
भावेतुसार्षपं॥याज्ञवल्क्यः।आर्षंछंदश्चदैवत्यंविनियोगंतथैवच
वेदितव्यंप्रयत्नेनब्राह्मणंचविशेषतः।अविदित्वातुयःकुर्याद्याजना
ध्ययनंजपं।होममंतर्जलादीनितस्यवाल्पंफलंभवेत्॥आदित्यपुरा
णे॥सुवर्णंरजतंमुक्ताराजावर्त्तंप्रवालकं।रत्नपंचकमाख्यातंशेषंव
स्तुप्रवीम्यहं।स्मृत्यंतरेतु।कनकंकुलिशंनीलंपद्मरागंचमौक्तिकं।ए
तानिपंचरत्नानिरत्नशास्त्रविदोविदुरिति।तत्रैव।अभावेसर्वरत्नानां
हेमसर्वत्रयोजयेत्॥विष्णुधर्मोत्तरे॥गायत्र्यादायगोमूत्रंगंधद्वारे

तिगोमयं।आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि॥तेजोसिशुक्रमि
त्याज्यंदेवस्यत्वाकुशोदकं।एभिस्तुपंचभिर्युक्तंपंचगव्यमितिस्मृतं।म
दनरत्नेकात्यायनः।आज्यंक्षीरंमधुतथामधुरत्रयमुच्यतइति।ब्राह्मे।
अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः।पंचभंगाइतिप्रोक्ताःसर्वकर्मसु
शोभनाः॥पंचभंगाःपंचपल्लवाः।चतुःसमंगारुडे।कस्तूरिकायाद्वौभागौ
चत्वारश्चंदनस्यच।कुंकुमस्यत्रयश्चैवशशिनश्चचतुःसमं॥शशीकर्पूरः।
कर्पूरंचंदनंदर्पंकुंकुमंचसमांशकं।सर्वगंधमितिप्रोक्तंसमस्तसुरवल्ल
भं॥दर्पःकस्तूरी।तथा।कर्पूरमगुरुश्चैवकस्तूरीचंदनंतथा।कंकोलंच
भवेदेभिःपंचभिर्यक्षकर्दमः।छंदोगपरिशिष्टे॥कुष्ठंमांसीहरिद्रेद्वेमुरा
शैलेयचंदनं।वचाचंपकमुस्तंचसर्वौषध्योदशस्मृताः।पाद्मे।प्लक्षव
स्तृणराजंचनिष्पावाजाजिधान्यकं॥विकारवंचगोक्षीरंकुसुंभंकुंकु
मंतथा।लवणंचाष्टमंतत्रसौभाग्याष्टकमुच्यते।तृणराजस्तालस्त
त्वात्रं॥अजाजीजीरकं॥विष्णुधर्मोत्तरे॥मुक्ताफलंहरितकंवैडूर्यंप
द्मरागकं॥पुष्परागंचगोमेदंनीलंगारुत्मतंतथा॥प्रवालमुक्तायुक्ता
निमहारत्नानिवैनव॥स्कांदे॥दधिक्षीरमथाज्यंचमाक्षिकंलवणंगुडः
॥तथैवेक्षुरसश्चेति ———— रसाःप्रोक्तामनीषिभिः।भविष्यत्पुराणे।
आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्तथा।यवाःसिद्धार्थकाश्चेतिह्य
र्घोष्टांगःप्रकीर्त्तितः।तत्रैव।सुवर्णरजतंताम्रमारकूटंतथैवच।लोहंत्र
पुतथासीसंधातवःसप्तकीर्त्तिताः॥पंचरात्रे॥रजांसिपंचवर्णानिमंड
लार्थेहिकारयेत्॥शालितंडुलचूर्णेनशुक्लंवायवसंभवं।रक्तंकुसुंभ
सिंदूरगैरिकादिसमुद्भवं॥हरितालोद्भवंपीतंरजनीसंभवंतथा॥कृ
ष्णंदग्धयवैर्हरितंपीतकृष्णविमिश्रितं॥रजनीहरिद्रा॥भविष्यत्पुरा
णे॥दूर्वायवांकुरश्चैवबालकंचूतपल्लवाः॥हरिद्राद्वयसिद्धार्थशिखि
पत्रोरगत्वचः॥कंकणौषधयश्चैताःकौतुकाख्यानवस्मृताः॥इतिनव
कौतुकानि।दशांगधूपोमदनरत्ने॥षड्भागकुष्ठंद्विगुणोगुडश्चलाक्षात्र
यंपंचनखस्यभागाः॥हरीतकीसर्जरसःसमांसीभागैकमेकंत्रिलवं
शिलाजं।घनस्यचत्वारिपुरस्यचैकोधूपोदशांगःकथितोमुनींद्रैः॥शिला
जंशैलेयं।घनोमुस्ता।पुरोगुग्गुलः।भविष्यत्पुराणेविशेषः।अनुक्तद्रव्यत

सौवर्णी राजती ताम्री रक्षजा मार्त्तिकी त
त्संख्यादेवताप्रतिमा नृप॥ सौवर्णी राजती ताम्री रक्षजामार्त्तिकीत
था॥ चित्रजापिष्टलेपोत्था निजवित्तानुरूपतः॥ आमाषात्सल्पपर्यंता
कर्त्तव्याशाठ्यवर्जितैः। अंगुष्ठपर्वप्रभृति वितस्त्यवधिकास्मृतेति। त
त्तद्दानांगदेवताप्रतिमालक्षणानि तत्र वक्ष्यंते॥ तुलाधिष्ठितदेवता
प्रतिमानां तु लक्षणानि। त्रिनेत्रो वृषभस्थः त्रिशूलधृक्॥ पाशपाणिश्चं
द्रार्द्धभूषण ईशः। श्वेताश्वरथगः सोमो गदापाणिर्वरप्रदः॥ धावद्धरि
णपृष्ठस्थो ध्वजधारी समीरणः। रक्तवर्णस्त्रिनयनो द्विभुजाश्च भूमी
सुतः॥ जटिलाश्च प्रकर्त्तव्या रुद्रा बाणधनुर्द्धराः। शुभश्मश्रुः सिंदूरारु
णसप्रभः॥ पद्मासनः पद्मकरो भूषितांगो रसनाधरः। श्मश्रुलो रसना
धरः संदर्शपाणिर्द्विभुजस्तेजोमूर्त्तिधरो महान्विश्वकर्मा॥ पीतांबरः
पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतो दंडकमंडल्वक्षसूत्रधृक्
गुरुः। कमंडलुं स्रुवं चैव शक्तिं दर्भमपि क्रमात्॥ कल्पयत्यं गिरो नाम करा
ग्राणि समं ततः। पाणयश्चाग्निनाम्नोपि कल्पयंति जपस्रजं॥ शक्तिं च पु
स्तकं चैव क्रमाद्देवं कमंडलुं। यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः।
असंस्रजं स्रुवं धत्ते कुंडिकां च प्रजापतिः। विश्वेदेवास्तु सर्वेपि दक्षिणबा
णपाणयः। कर्त्तव्या वामपाणौ तु सशरासनपाणयः। क्रतुर्दक्षो वसुः स
त्यः कालकामौ धुरिलोचनौ। पुरूरवा द्रवश्चेति विश्वेदेवा दश स्मृताः॥
२२। जगद्विधातृ रूपं प्रजापतितुल्यं। चतुर्मुखत्वमात्रमस्याधिकं ज्ञेयं
॥ पर्जन्यनामा विज्ञेयो गजवक्त्रः त्रपान्वितः॥ यो धत्ते सर्वजीवानामव
रं जीवं च शोषकं॥ कुठारं च पयोजं च चिंतारत्नं महाशुचिं॥ पाशं वज्रं वि
शलयं कुंडीं च दशभिः करैः। शंभुरीशतुल्यः कुशविष्टरपद्मस्थाः पितरः
पिंडपात्रिणः॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी॥
चर्मासिधृक्सोमसुतः सदानः सिंहाधिरूढो वरदो बुधश्च। चतुर्वक्त्रः
चतुर्बाहुः सितमाल्यः सितांबरः। सर्वाभरणवान् श्वेतो धर्मः कार्यो महाव
पुः। चतुर्दंतगजारूढो वज्रपाणिः पुरंदरः। शचीपतिः प्रकर्त्तव्यो नाना
भरणभूषितः। द्विभुजौ देवभिषजौ कर्त्तव्यावश्ववाहनौ। तयोरौषधयः
कार्याः दिव्या दक्षिणहस्तयोः। वामयोः पुस्तकौ कार्यौ दर्शनीयौ तथा द्वि
जा। वरुणः पाशभृत्सौम्यः प्रतीच्यां मकराश्रयः। मित्रः कमलपाणिश्च

कमलासनसंस्थितः। द्विभुजः श्वेतमूर्त्तिश्च सर्वभूतहिते रतः। वरु
णस्तु पूर्ववत्॥ देवा एकोनपंचाशद्देवेंद्रसमतेजसः॥ भ्रातरः पुरुहूत
स्य मरुतः सूर्यवर्चसः॥ किरीटहारकेयूरकटकादिविभूषिताः। खड्ग
चर्मधरा नित्यं शक्रस्यानुचराः सदा॥ ह्रस्वमापिंगनेत्रं च गदिनं पीतवि
ग्रहं। पुष्पकस्थं धनाध्यक्षं ध्यायेच्छिवसखं सदा॥ वरदो भक्तलोका
नां किरीटी कुंडली गदी॥ कार्यः सुरूपो गंधर्वो वीणावाद्यरतस्तथा। ज
लेशः पूर्ववत्। प्रदक्षिणं दक्षिणाधः करादारभ्य नित्यशः॥ विष्णुः कौ
मोदकीपद्मशंखचक्रैरलंकृत इति विष्णुलक्षणं। ब्रह्मवैवर्त्ते॥ दानका
लेषु देवत्वं प्रतिमानां प्रकीर्त्तितं॥ धेनूनामपि धेनुत्वं श्रुत्युक्तं दानयो
गतः। दातुर्वै दानकाले तु धेनवः परिकीर्त्तिताः॥ विप्रस्य व्ययकाले तु द्र
व्यं तदिति निश्चय इति॥ विष्णुधर्मोत्तरे॥ हेमराजतताम्राश्च मृन्मया
लक्षणान्विताः। यात्रोत्सवप्रतिष्ठादौ कुंभाः स्युरभिषेचने। पंचाशांगुल
वैपुल्या उत्सेधे षोडशांगुलाः॥ द्वादशांगुलमूलाः स्युर्मुखमष्टांगुलं भ
वेत्। पंच च आशाश्च पंचाशाः॥ पंचाधिकशतमंगुलानि वैपुल्यमि
त्यर्थः। तथा। कलशस्य मुखे ब्रह्मा ग्रीवायां च महेश्वरः। मूले तु संस्थि
तो विष्णुर्मध्ये मातृगणाः स्मृताः॥ शेषास्तु देवताः सर्वा वेष्टयंति चतुर्दि
शं। पृथिव्यां यानि तीर्थानि कलशे निवसंति हि॥ ग्रहाः शांतिश्च पुष्टि
श्च प्रीतिश्च मतिरेव च॥ ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च। अथ
र्ववेदसहिताः सर्वे कलशसंस्थिता इति॥ षट्त्रिंशन्मते॥ यवगोधूम
धान्यानि तिलाः कंगुस्तथैव च॥ श्यामाकं चीनकं चैव सप्त धान्यमुदा
हृतं॥ मार्कंडेयपुराणे। व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः।
प्रियंगवः कोविदाराः कोरदूषाः सचीनकाः। माषा मुद्गा मसूराश्च नि
ष्पावाः सकुलत्थकाः॥ आढक्यश्चणकाश्चैव सणाः सप्तदश स्मृताः।
कोरदूषाः कोद्रवाः। सतीनकाः सकलापाः। स्कांदे॥ यवगोधूमधान्यानि
तिलाः कंगुकुलत्थकाः। माषा मुद्गा मसूराश्च निष्पावाः श्यामसर्षपाः। गवे
धुकाश्च नीवारा आढक्योथ सतीनकाः। चणकाश्चीनकाश्चैव धान्यान्य
ष्टादशैव तु। श्यामाः श्यामाकाः॥ व्यासः। सुवर्णं परमं दानं सुवर्णं दक्षि
णा परा॥ सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते। परे त्वेके पुरुषाहारोप

यत्वन्येषामेवदानानांसुव
र्णिकंतंडुलादिकमपिदक्षिणेतिहेमाद्रिः। यत्वन्येषामेवदानानांसुव
र्णंदक्षिणास्मृता॥सुवर्णेदीयमानेतुरजतंदक्षिणेष्यतइतितन्मूलंमृग्यं
॥सुवर्णरजतंताम्रंतंडुलाधान्यमेववा॥नित्यश्राद्धेदेवपूजासर्वमेतद्द
क्षिणमितिव्यासेनकेवलसुवर्णदानेदक्षिणापर्युदासाच्च। अयंचपर्यु
दासःकेवलसुवर्णदानएवनतुसुवर्णब्रह्मांडादिदानइतिमदनादयः।
देयद्रव्यतृतीयांशंदक्षिणांपरिकल्पयेत्॥अनुक्तदक्षिणेदानेदशांशं
वापिशक्तितः।तुलापुरुषदानादीन्यधिकृत्यलिंगपुराणे॥दक्षिणांच
शतंसार्द्धंतदर्धंवाप्रदापयेत्।ऋत्विजांचैवसर्वेषांदशनिष्कांश्चदाप
येत्॥भविष्योत्तरे। ज्ञेयंनिष्कशतंपार्थदानेषुविधिरुत्तमः।मध्यमस्तु
तदर्धेनतदर्द्धेनाधमःस्मृतः॥मेरुचक्रकालपुरुषेतथान्येषुमहत्सु
च।एवंवृक्षेरथेअंडेचधेनोःकृष्णाजिनस्यच॥अशक्तस्यापि कुर्वीत
पंचसौवर्णिकोविधिः॥वृक्षेकल्पपादपे॥रथेहिरण्याश्वरथे।हेमह
स्तिरथेच।अंडेब्रह्मांडे।धेनोःसुवर्णकामधेनोः।अतोप्यल्पेनयोदद्यान्म
हादानंनराधमः।प्रतिगृह्णातियस्तस्यदुःखशोकावहंभवेत्॥अन्ये
षुमहत्सुतिलगर्भादिषुजपाभिषेकमभिधाय॥लिंगपुराणे।अष्टष
ष्टिपलोन्मानंदद्याद्धैदक्षिणांगुरोः।होतॄणांचैवसर्वेषांत्रिंशत्सल्लु
मुदाहृतं॥अध्येतॄणांतदर्द्धेनद्वारपानांतदर्द्धतः। अयंचगुर्वृत्विक्
जापकद्वारपालानां अष्टौदक्षिणाविभागो।अनुक्तविभागविशेषे
षुदानांतरेष्वपिद्रष्टव्यः॥गृह्यपरिशिष्टेदक्षिणालाभे॥मूलानांफ
लानांभक्ष्याणांदक्षिणांददातीति।अथद्रव्यमानं।याज्ञवल्क्यः।जा
लसूर्यमरीचिस्थंत्रसरेणूरजःस्मृतं॥तेष्टौलिक्षास्तुतास्तिस्रोराज
सर्षपउच्यते॥गौरस्तुतेत्रयःषट्तेयवोमध्यस्तुतेत्रयः।कृष्णलःपं
चतेमाषस्तेसुवर्णस्तुषोडश॥पलंसुवर्णाश्चत्वारःपंचवापिप्रकी
र्तितं॥द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते॥शतमानंतुदशभि
र्धरणैःपलमेवतु।निष्कःसुवर्णाश्चत्वारइति॥धरणपुराणौपर्यायौ
॥तथाशतमानपले।पूर्वोक्ताश्चत्वारःसुवर्णाराजतोनिष्कइति।का
र्षिकस्ताम्रिकःपणइतिताम्रस्योन्मानं।पलचतुर्थांशेनकर्षेणोन्मितः
कार्षिकस्ताम्रसंबंधीपणोभवति।कार्षापणसंज्ञश्चस्मृत्यंतरेपि॥

षोडशपणःपुराणःपणोभवेत्काकिणीचतुष्केणपंचाहतैश्चतुर्भिर्वरा
टकैःकाकिणीत्येकेतितथाचदेशादिभेदेनपणादिव्यवहारोज्ञेयः।अ
थधान्यादिमानं॥भविष्यत्पुराणे।पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं
।चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः।आढकैस्तैश्चतुर्भिश्च
द्रोणस्तुकथितोबुधैः।कुंभोद्रोणद्वयंशूर्पःखारीद्रोणास्तुषोडश।द्रोण
द्वयस्यैवशूर्पइतिसंज्ञागोपथे।पंचकृष्णलकोमाषस्तैश्चतुःषष्टिभिः
पलं॥पलैर्द्वात्रिंशद्भिःप्रस्थोमागधेषुप्रकीर्तितः॥आढकैस्तैश्चतुर्भि
श्चद्रोणःस्याच्चतुराढकः।विष्णुधर्मोत्तरे।पलंचकुडवःप्रस्थआढ
कोद्रोणएवच।धान्यमानेषुबोद्धव्याःक्रमशोमीचतुर्गुणाः।द्रोणैःषो
डशभिःखारीविंशत्याकुंभउच्यते॥कुंभैस्तुदशभिर्वाहोधान्यसंख्या
प्रकीर्तिता।विंशत्येत्यत्रद्रोणैरितिसंबध्यते।तथाचकुंभोद्रोणद्वय
मितिपक्षाद्विंशतिद्रोणमितःकुंभइतिपक्षांतरं॥पलसहस्रमितःकुं
भइत्यपिपक्षांतरंज्ञेयं।वाराहे।पलद्वयंतुप्रसृतंमुष्टिरेकपलंस्मृतं।
अष्टमुष्टिभवेत्किंचित्किंचिदष्टौतुपुष्कलं।पुष्कलानिचचत्वारिआ
ढकःपरिकीर्तितः।चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणं।एतत्त्व
क्षाणांशक्तिदेशकालाद्यपेक्षयाव्यवस्था।उक्ताश्रीनीलकंठाख्यः
परिभाषादिकंपुरा।दानाद्यौपयिकंकुंडमंडपादिवदत्यथ।तत्रभू
मानं॥आदित्यपुराणे।जालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः।प्र
थमंतत्प्रमाणानांत्रसरेणुंप्रचक्षते॥त्रसरेणुस्तुविज्ञेयोअष्टौयेपरि
माणवः।त्रसरेणवस्तुतेह्यष्टौरथरेणुस्तुसस्मृतः।रथरेणवस्तुतेष्टौ
चबालाग्रंतत्स्मृतंबुधैः।वालाग्राष्टकंलिक्षातुयूकालिक्षाष्टकंत
था॥अष्टौयूकायवंप्राहुरंगुलंतुयवाष्टकं।अन्यत्रापि।यूकाष्टकंय
वंप्राहुर्यवानामुदरैस्तथा।अष्टभिश्चांगुलंतिर्यक्यवानामुत्तमंमतं।
सप्तभिर्मध्यमंप्रोक्तंषड्भिःस्यादधमांगुलमिति।द्वादशांगुलमात्रोवैवि
तस्तिःपरिकीर्तितः।अंगुष्ठस्यप्रदेशिन्याव्यासःप्रादेशउच्यते।तालः
स्मृतोमध्यमयागोकर्णश्चाप्यनामया।कनिष्ठयावितस्तिस्तुद्वादशां
गुलमानिकः।रत्निस्त्वंगुलपर्वाणिविज्ञेयस्त्वेकविंशतिः।चत्वारिविं
शतिश्चैवहस्तःस्यादंगुलानितु।किष्कुःस्मृतोद्विरत्निस्तुद्विचत्वारिं

शदंगुलः। षण्णवत्यंगुलिश्चैव धनुर्दंडः प्रकीर्त्तितः। धनुर्दंडयुगं नालि
र्द्वैयाद्धेतैयवांगुलैः। धनुषां त्रिंशतं नल्वमाहुः संख्याविदो जनाः। धनुः
सहस्रे द्वे चापि गव्यूतिरपदिश्यते॥ अष्टौ धनुःसहस्राणि योजनं परिकी
र्त्तितं॥ विष्णुधर्मोत्तरे॥ यदुत्स्नमथाश्नाति नरः संवत्सरं द्विजः। एक
गोचर्ममात्रं तु भुवः प्रोक्तं विचक्षणैः। बृहस्पतिः। दशहस्तेन दंडेन त्रिं
शद्दंडा निवर्त्तनं। दशतान्येव वत्तानि ब्राह्मणेभ्यो ददाति यः। इति भूमा
नं। मार्जनखननाद्यन्यतमप्रकारेण यथोचितं भूमितं भूमिः संशोध्या
तत्र मंडपस्थलं॥ सिद्धांतशेखरे॥ स्थलादर्कांगुलोच्छ्रायं मंडपस्थल
मीरितमिति॥ मंडपप्रकृत्यंकपिलपंचरात्रे॥ उच्छ्रायो हस्तमानं स्या
त्सुसमे च सुशोभनमिति। ततो दंडत्रयं निर्मितदीर्घत्रिकोणाकारयं
त्रैदंडाग्राभ्यां भुवि न्यस्ते मध्यमूलात्तिर्यग्दंडोपरिलंबितमधोभोरव
द्भूमिमप्राप्तसूत्रं यथा तिर्यग्दंडमध्यचिन्हे पतेत्तथा निम्ना भूः पूर्वो
क्तावामाननीयेत्यादिशिल्पशास्त्ररीत्या तां समीकृत्य च मंडपाद्युप
युक्तां प्राचीं साधयेदेवं। समायां भुवि द्वादशांगुलव्यासार्द्धमेकं तन्म
ध्ये चापरं नवांगुलं व्यासार्द्धमिति वृत्तद्वयं कृत्वा तन्मध्ये द्वादशांगुलं
पृथुमूलं सूक्ष्माग्रं ऋजुं शंकुं निधाय नवांगुलवृत्ते रेखायां च तस्यो दिशः
प्रकल्प्य तासु चतस्रो ऋज्व्यः पंचदशांगुलाः शलाकाः शंकग्रस्पृष्टा
ग्राः स्थाप्याः। शंकुसमतार्थं तादृशशंकुच्छायाचमहद्वृत्तरेखां पू
र्वाह्णे यत्र स्पृशति सा प्रत्यक्। यत्रापराह्णे सा प्राक्। सूक्ष्मप्राचीज्ञाना
र्थं तु परदिनेपि तस्मिन्नेव वृत्ते शंकुच्छायानिर्गमप्रवेशयोश्चिह्नं कृत्वा
पूर्वापरदिनच्छायाप्रदेशनिर्गमनचिन्हयोरंतरालमिष्टे स्थिचतुराद्यै
र्भागैर्विभज्य पूर्वदिनच्छायाप्रवेशनिर्गमांतरालघटीः पादच्छायाघटी
यंत्रादिना ज्ञात्वा ताभिर्घटिकाभिः कल्पितान् भागान् गुणयेत्। ष
ष्टिभिश्च हरेत्॥ ततो लब्धांशेन प्राच्यामेव पूर्वदिनकृतापगमचि
न्हादुत्तरायणउत्तरस्मिन् दक्षिणायने दक्षिणस्मिन् लंकयेत्॥ तदु
परि पूर्वच्छायाप्रवेशचिन्होपरि च धृते सूक्ष्मा प्राची भवति। दिग्ज्ञानो
पायांतरं चशुल्वे। कृत्तिकाश्रवणःपुष्यश्चित्रा स्वात्योर्यदंतरं॥ एत
त्प्राच्या दिशो रूपं युगमात्रोदिते सतीति। अत्रायं गुरूपदेशः। ऋजवी

सूक्ष्मरंध्रां नलिकां काष्ठादौ बध्वा तद्रंध्रेण सुगमात्रमुपरिगतं कृत्ति
कादिनक्षत्रं दृष्ट्वा नलिकांताभ्यां प्राक्प्रत्यग्देशयोः सूक्ष्मं पाषाणद्र
व्यमवलंब्य वा भूमौ प्रक्षिप्य तच्चिन्हयोः प्राचीसूत्रं देयमिति। एव
मेव ध्रुवं दृष्ट्वोदीची साध्या। चित्रास्वात्यंतरालज्ञानार्थं तु नलिकाद्वये
नैकेन च दंडांतरेण कृत्यकारपंचं कृत्वा दंडं च मध्ये कल्पयेत्।। नलिकाद्व
यांतौ तु तष्टालक्षणादिना परस्परं योजनीयौ।। यथैकेनैव प्रयत्नेन युग
पद्द्वयमपि दृश्यते।। एवं दृष्ट्वा मिलिता नलिकांता दंडमध्यात्काष्ठ
पाषाणावलंबौ प्रक्षेप्तव्याविति।। अथ मंडपादिलक्षणम्। तत्र पंच
रात्रे।। कनीयान्दशहस्तः स्यान्मध्यमो द्वादशोन्मितः।। तथा षोडश
भिर्हस्तैर्मंडपः स्यादिहोत्तमः।। प्रतिष्ठासारसंग्रहे।। मंडपः कलाह
स्तो वा सर्वलक्षणसंयुतः। दशद्वादशहस्तो वा द्विद्विवृध्यात्ततः क्र
मात्।। लिंगपुराणे तु पुरुषदानप्रकरणे। विंशद्धस्तप्रमाणेन मंडपं
कूटमेव वा।। अष्टादशहस्तेन कलाहस्तेन वा पुनरिति विंशतिह
स्तोप्युक्तः। मध्यस्तंभवलिकोपरिगतैश्चतुर्भिरष्टभिर्वा सृंगाका
रकलशप्रोतैः काष्ठैर्मध्ये शिखराकारयुतः कूटः। कूटोस्त्री शिखरं शृं
गमित्यभिधानानुसारात्।। मध्यस्तंभोपरि समतयाच्छादितो मं
डपइति हेमाद्रिः।। संप्रति कूटएव बादरो लोकानां। तत्रैव च मंडपप्र
मः।। दशहस्तमंडपस्तु एकमेखलकुंडपक्षे एकाग्निविधानपक्षे
चोपयुक्तो भवतीति मदनरत्ने पंचरात्रे। कुर्याद्वैष्णवयागेषु चतु
र्द्वारांश्च मंडपान्।। सारदारुमयान्स्तंभान्दृढान्कुर्याद्दृजून्समा
न्।। मंडपार्द्धोच्छ्रितान्वेदसंख्याश्चूडासमन्वितान्।। वलिकामूर्ध्व
तस्तेषां स्तंभद्वादशकं पुनः।। बाह्यपीठप्रमाणेन तत्र सूत्रविधानतः
।। कल्पयेद्द्विकरं द्वारं चतुरंगुलवृद्धितः।। मध्यमोत्तमयोर्वेदी मंड
पस्य त्रिभागतः। चतुर्थांशोच्छ्रितिस्तस्यास्त्रिसप्त पंचतोपि वा। न
वैकादशहीनं वा द्वाष्टिकाभिः प्रकल्पयेदिति।। चूडा शिखा। वलिका
मिति तेषां चतुःस्तंभानां शिखाभिः प्रोतच्छिद्राण्युभयतश्छिद्रद्वयो
पेतानि वलिकाख्यानि तिर्यक्काष्ठानि विधेयानीत्यर्थः। बाह्य इत्यादि
। आदौ मध्यस्तंभचतुष्टयं विन्यस्य तद्बाह्यपरिधौ मंडपक्षेत्रविस्तारपक्षे

पपीठपरिमितसूत्रतृतीयांशेनतुल्यांतरद्वादशचिह्नकरणपूर्वकं
पंचहस्तप्रमाणाद्वादशस्तंभानिखेयाइत्यर्थः। तदेवंषोडशस्तंभ
तासंपद्यते॥तेषुचत्वारोमंडपायामार्द्धमितोच्छ्राया अष्टहस्तानव
हस्तावाभवंति। अधममध्यमोत्तमरूपेष्वष्टहस्ताएतेचत्वारःशार
दातिलकेउक्तत्वादितितत्रापिमध्यमस्तंभेषुचूडास्ववतिर्यक्काष्ठ
निवेशनं। बाह्येषुतुचूडासुस्तंभकर्णेषुवेत्यनियमः।सर्वेच।पंचमां
शंन्यसेद्भूमौसर्वेसाधारणोविधिरित्युक्तत्वात्।सूत्रपंचमांशेनवि
खेयाः॥सर्वेपिदशांगुलसूत्रवेष्टनयोग्यस्थौल्याविधेयाःकल्पयेदि
त्यादि॥कनिष्ठमंडपेद्वारचतुष्टयेद्विहस्तविस्तारं॥तथामध्यमेचतुरं
गुलाधिकद्विहस्तविस्तारं॥एवमुत्तमेष्टांगुलाधिकद्विहस्तविस्तारं
।मध्यमोत्तमयोःवेदीत्यादि।मंडपमध्यत्रिभागमानावेदिः।स्वायाम
तृतीयचतुर्थपंचमसप्तमनवमैकादशान्यतमेनोच्चा।तुलापुरुषे
तुमात्स्ये॥सप्तहस्ताभवेद्वेदीमध्येपंचकराथवेति॥सिद्धांतशेखरे
॥चतुरस्राचतुःकोणावेदीसर्वफलप्रदा॥तडागादिप्रतिष्ठायांपद्मि
नीपद्मसन्निभा।राज्ञांस्यात्सर्वतोभद्रावेदीराज्याभिषेचने।विवाहेश्रीधरीवे
दीविंशद्धस्तसमन्वितेति॥द्वारदेहल्यावहिर्हस्तमात्रेद्वारशाखानि
खेयाइतिनिबंधांतरे॥व्रतखंडेतुहस्तद्वयंबहिस्त्यक्त्वातोरणानि
निवेशयेदित्युक्तं।मात्स्ये॥द्वारेषुकार्याणिचतोरणानिचत्वार्यपिक्षीर
वनस्पतीनामिति॥अयमर्थः।पूर्वद्वारे अश्वत्थशाखेदक्षिणेउदुंब
रशाखे।पश्चिमेप्लक्षशाखे।उत्तरतोवटशाखे॥शाखाश्चाधमम
ध्यमोत्तममंडपेषुक्रमात्।पंचषट्सप्तहस्तोच्चास्तासामुपरिस्थित
चूडासुतिर्यक्फलकमुन्नयतःसच्छिद्रंचूडान्यस्तच्छिद्रंनिदध्यात
।तद्द्विहस्तमधममंडपे॥अंगुलषट्काधिकेद्विहस्तमध्ये।सार्द्धहस्त
द्वयमुत्तमे॥तिर्यक्फलकोपरिमध्यमंडपेषुक्रमात्चतुरंगुलाःसा
र्द्धचतुरंगुलाःपंचांगुलाश्चकीलानिवेश्याः।तिर्यक्फलकेकीलाश्च
तत्काष्ठजाएव॥यद्वास्तुशास्त्रे॥मस्तकेद्वादशांशेनशंखचक्रगदां
बुजं।प्रागादिक्रमयोगेनन्यसेत्तेषांस्वदारुजं॥द्वादशांशोत्रफलक
स्यचतुरंगुलादिरेवोक्तः।शंखचक्रगदांबुजाकरणंवैष्णवयागविष

यं॥ शैवयागेतुतेकीलास्त्रिमूलाःस्युस्त्रिमूलाकारतंतैवं॥मध्यकीलो
नवांगुलोरत्नःसपादद्व्यंगुलविस्तारःतस्मुभयतोन्यौकिंचिदूनौ॥दैर्घ्ये
मध्येमूलस्यमूलांगुलद्वयंविलेप्रविशतिइत्यधममंडपे॥मध्यमेत्वेका
दशांगुलउच्छ्रायः।पादेनत्र्यंगुलविस्तारः।त्र्यंगुलोविलप्रवेशः।उत्तमे
त्रयोदशांगुलमुच्छ्रायःसपादत्र्यंगुलोविस्तारश्च तुरंगुलोविलप्र
वेशः।इदंचपिंगलमते।मूलेनचिन्हिताःकार्याद्वारशाखास्तुमस्तके
।मूलैर्नवांगुलैर्दैर्घ्येतुरीयांशेनविस्तृताः।ऋजुवैमध्यमूंगःस्यात्किंचि
दूनंचपृष्ठयोः।प्रथमंतत्समारभ्यातंद्व्यंगुलंरोपयेत्तथेत्यादिनोक्तं।ए
षामलाभेएकदस्सजानितोरणानि।तस्याप्यभावेशमीदुमजानि।एत
न्निवेशनमंत्राश्चाग्निमीलेइषेत्वाअग्नआयाहिशन्नोदेवीरित्यनुसंधे
याः॥मध्यस्तंभचतुष्टयोपरिचतुरस्राकृतिकाष्ठंदिग्विदिग्गतंराष्ट
कप्रोताग्रकाष्ठाष्टकेनान्ततताकार्या॥कटैःसद्भिस्तुसंछाद्याविजयाख्या
स्तुमंडपाइत्युक्तत्वात्।द्वारवर्जंसर्वतोमंडपआछादयः।जयविजयभ
द्रविभवसूक्ष्मसुरूपध्रुवचनंदधचकस्तुप्रसन्नाः।एतेऽष्टहस्तादयोद्विह
स्तवृद्धितोज्ञातव्याः॥यदामंडपद्वयंक्रियतेतदातत्रप्रथममंडपपरि
मितमंतरमुत्सृज्यद्वितीयोमंडपःकर्तव्यइतिवास्तुशास्त्रे।एवंपदाधा
माग्रेमंडपःक्रियतेतदातद्धामपरिमाणमंतरमुत्सृज्यपरतोमंडपोवि
धेयइति।मात्स्ये।मंडपेपताकाउक्ताः।लोकेशवर्णापरितःपताकामध्ये
ध्वजःकिंकिणिकायुतःस्यात्।इति।संग्रहेपि।सप्तहस्ताःपताकाःस्युः
सप्तमांशेनविस्तृताः।लोकपालानुवर्णेनवमीतुहिनप्रभा।पीतरक्ता
दिवर्णाश्चपंचहस्ताध्वजाःस्मृताः।द्विपंचहस्तैर्दंडैश्चवंशजैःसंयुताः
स्तथेतिलोकपालवर्णाः।इंद्रःपीतोयमःश्यामोवरुणःस्फटिकप्रभः
॥कुबेरस्तुसुवर्णाभोह्यग्निश्चापिसुवर्णभः।तथैवनिरृतिःश्यामोवायु
र्धूम्रःप्रशस्यते।ईशानस्तुभवेद्रक्तएवंध्यायेत्क्रमादिमानिति।गारुडे
तुपताकानांप्रकारोतरमुक्तः।पंचहस्ताध्वजाःकार्यावैपुल्येनद्विहस्त
काः॥सप्तहस्ताःपताकास्युर्विंशत्यंगुलविस्तृताः।दशहस्ताःपताका
नांदंडाःपंचांशवेष्टिताः।सिंदूराःकर्बुराधूम्राधूसरामेघसन्निभाः।ह
रिताःपांडुवर्णाश्चशुक्लाःपूर्वादितःक्रमात्।एवंवर्णाःशुभाःकार्याःपता

काःपाकशासनेति।अत्रसमचतुरस्रमंडपसाधनंमंडपादिव्यासप्रमाणांरज्जुंद्विगुणीकृत्यतामेवोभयतःपाशाभ्यांसहाष्टधाविभज्यपंचमांशांतेकर्षणायषष्ठांशांतेशंक्वर्थंचचिन्हद्वयंकृत्वामंडपादेःप्राचीसूत्रप्रांतद्वयेशंकुद्वयंनिखायरज्ज्वंतपाशौतयोःशंक्वोःरज्यकर्षणचिन्हंदक्षिणतआकृष्यशंकुचिन्हेशंकुंनिखायततःकर्षणचिन्हमुत्तरतआकृष्यशंकुचिन्हेशंकुंनिखायव्यत्यासं कृत्वाशंक्वोःपाशांतौवासज्यपूर्ववद्दक्षिणोत्तरयोःक्रमेणकर्षणचिन्हंआकृष्यशंकुद्वयंनिहन्यात्।ततईशानाग्नेयादिशंकुषुमार्दक्षिण्येनरज्जुवेष्टनान्मंडपादिचतुरस्रंक्षेत्रंसिद्धंभवति॥मध्यवेदीसाधनं॥मंडपस्यसूत्रंप्रागायतंदक्षिणोत्तरायतंचत्रेधाविभज्यतेननवभागोमंडपःसंपद्यते॥मध्यमेनवमेंशेतन्मानावेदिकायजमानहस्तोच्छ्रायाचविधेया।मात्स्ये।द्वारेषुकुंभद्वयमत्रकार्यंस्रग्गंधधूपांबररत्नयुक्तमिति।मदनरत्ने।गंधपुष्पाक्षतोपेतान्कुंभांस्तेषुनिवेशयेत्।ध्रुवंधरंवास्पतिंचविघ्नेशंतेषुपूजयेत्।मंडपस्यतुकोणेषुकलशेषुक्रमादमी।अमृतोदुर्जेयश्चैवसिद्धार्थोमंगलस्तथा।पूज्याद्वारस्यकुंभेषुशक्राद्यास्तुमंत्रतमैः॥इतिमंडपनिरूपणम्॥अथकुंडानि।तत्रभविष्यपुराणे।वेदीपादांतरंत्यक्त्वाकुंडानिनवपंचवा।वेदास्त्रीण्येवतानिस्युर्वर्तुलान्यथवाक्वचित्।आम्नायरहस्ये।कुंडानिचतुरस्राणिवृत्तनानाकृतीनिवा।नवपंचाथवैकंवाकर्तव्यंलक्षणान्वितं।नवकुंडविधानेतुदिक्षुकुंडाष्टकेस्थिते।नवमंकारयेत्कुंडंपूर्वेशानदिगंतरे॥विधानेपंचकुंडानामीशानेपंचमंभवेत्।अत्रचतुःकुंडीपक्षेखातंनास्तीत्युक्तंहेमाद्रौ।नारदीये।यत्रोपदिश्यतेकुंडंचतुष्कंतत्रकर्मणि।वेदास्रमर्धचंद्रंचवृत्तंपद्मनिभंतथा।पीठवद्दर्पयेत्कुंडंसुप्रमाणेष्वगर्तकं।कुर्यात्कुंडानिचत्वारिप्राच्यादिषुविचक्षणः।कुंडवेद्यंतरंचैवसपादकरसंमितं।विंशांगुलंप्रकर्तव्यंअंतरंकुंडपीठयोः।स्मृत्यंतरे।वेदिभित्तिंपरित्यज्यत्रयोदशभिरंगुलैः।हस्तमात्राणिकुंडानिचतुरस्राणिसर्वतः।इतिसर्वतोदिक्षुकाम्येतुऐंद्र्यांस्तंभेचतुष्कोणंअग्रेभागेभगाकृतिं।चंद्रार्धंमारणेयाम्येत्रिकोणंद्वेषणेनैर्ऋते॥वारुण्यांशांतिकेवृत्तंषडस्रमुच्चाटनेनिले।उदी

च्यांपौष्टिकेपद्मंशैद्यामंशान्तिमुक्तिदं।शारदातिलके।विप्राणांचतुर
स्रंस्याद्राज्ञांवर्त्तुलमिष्यते।।वैश्यानामर्द्धचंद्राभंशूद्राणांत्र्यस्रमीरितं।।
चतुरस्रंचसर्वेषांकेचिदिच्छंतितांत्रिकाः चतुरस्रसाधनेतुमंडपसाधन
वत्समस्युक्तं।तत्रैकस्मिन्हस्तेचतुर्विंशत्यंगुलानिव्यासः।द्विहस्तेत्रयस्त्रिंश
दंगुलानिसप्तयवाःचतस्रोयूकाः।द्वेलिक्षे।त्रिष्वेकचत्वारिंशदंगुलानि।
चत्वारोयवाःचतस्रोयूकाःचतस्रोलिक्षाःचतुर्ष्वष्टाचत्वारिंशदंगुला
नि।पंचसुत्रिपंचाशदंगुलानि।पंचयवाः।द्वेयूके।।पंचलिक्षाः।षट्स्वष्टपं
चाशदंगुलानि।षट्यवाः।द्वेयूके।चतस्रोलिक्षाःसप्तसुत्रिषष्ट्यंगुला
नि।यवत्रयं।सप्तयूकाःसप्तलिक्षाः।अष्टसुसप्तषष्ट्यंगुलानि।सप्तयवाः
।लिक्षाश्चतस्रः।नवसुद्वासप्तत्यंगुलानि।दशसुपंचसप्तत्यंगुलानि।
षट्यवाःयूकाश्चतस्रः।लिक्षाश्चतस्रः।एवंषोडशहस्तेषण्णवत्यंगु
लानि।।अथयोनिकुंडं।।इष्टचतुरस्रंव्यासंचतुर्विंशतिधाविभज्यस
पादैःपंचभिर्भागैःमध्यसूत्रंप्राच्यांविवर्ध्यचतुरस्रमध्येप्रागुदक्
सूत्रपातनात्स्यच्चतुरस्रयोःकोणसूत्रद्वयपातज्ञातमध्यादेतत्कोण
सूत्रार्द्धमानेनेष्टचतुरस्रोदक्सूत्रदक्षिणांतात्प्राक्सूत्रपश्चिमांतं
यावत्भ्रामयेद्वृत्तार्द्धं।एवमेवोत्तरात्स्यचतुरस्रेपिइष्टचतुरस्रोदगंता
त्प्राक्सूत्रपश्चिमांतंपरिभ्राम्यवृत्तार्द्धद्वयदक्षिणोदक्कोटितोबहिस्त
प्राक्सूत्राग्रांतंयावत्सूत्रद्वयंपातयेदितियोनिकुंडं।अत्रोत्पत्तिः।प्राग्दि
गतत्र्यस्रलंबःसप्तदशांगुलानि।१७एकोयवः।१एकायूका१लिक्षा
पंचभूस्तुइष्टचतुरस्रमध्योदक्सूत्रंचतुर्विंशत्यंगुलंउपरितनात्स्य
त्र्यस्रेपिभूःसैवालंबस्तुद्वादशांगुलानिवृत्तार्द्धव्यासार्द्धयोस्तुअंगु
लानिअष्टौ८यवाश्चत्वारः४इति।योनिमध्यसूत्रंद्व्यंगुलानिएकह
स्तेपंचांगुलानि।।एकोयवः।एकायूका।पंचलिक्षाः।द्विहस्तेसप्तांगुला
नि।द्वौयवौ।द्वेयूके।एकालिक्षा।त्रिहस्तेष्टांगुलानि८सप्तयवाः।तिस्रो
यूकाः।चतुर्हस्तेदशांगुलानि।चत्वारोयवाः।तिस्रोयूकाः।द्वेलिक्षे।पंच
हस्तेएकद०यवचतुष्टयमेकायूकाः।षट्हस्तेद्वादशांगुलानिचत्वारो
यवाः।सप्तयूकाः।तिस्रोलिक्षाः।सप्तहस्तेत्रयोदशांगुलानि।पंचयवाः।
अष्टहस्तेचतुर्दशांगुलानि।यवचतुष्टयं।यूकाश्चतस्रः।द्वेलिक्षे।नव

हस्ते पंचदशांगु० यवत्रयं। यूकाचतुष्टयं सप्तलिक्षाः। दशहस्ते षोड
शांगु० द्वौ यवौ तिस्रो यूकास्तिस्रो लिक्षाः। एवं षोडशहस्ते विंशत्यंगुला
नि यवचतुष्टयं षट् यूकाः। चतस्रो लिक्षाः। रामस्तु। इष्टचतुरस्रक्षेत्रम
ध्यरेखाया द्विनवत्यधिकं शतमंशान् कृत्वाष्टविंशदंशान् मध्यसूत्र
प्राच्यां एकोनविंशदंशे मत्स्यो भयतः श्रोणिसंबद्धौ सष्टद्विश्रोणिचतुर्थो
शककर्कटेन सूत्रेण वा पश्चिमभागे वृत्तार्द्धद्वयं प्राङ्मुखं श्रोणिसूत्र
लग्नं विलिख्य वृत्तार्द्धद्वयबाह्यप्रांतयोर्वर्द्धितप्राक्सूत्रे चिन्हं यावत्सू
त्रद्वयात् तद्योन्याकारं कार्यमित्याह। तत्स्थलसंवादे पि विरूपत्वादयुक्तं
। इदं चोदगग्रं कार्यं। तच्च मध्यरेखापंचमांशहृद्यावुदीच्यां कृतायां भव
ति। इदमुदाहृतं मदनरत्ने। योन्याख्यमुच्यते कुंडं आग्नेय्यामुत्तरामु
खमिति। अथार्द्धचंद्राभं कामिके। चतुरस्रे गृहे भक्ते त्यक्त्वा द्वौ तौ तदं
शकौ॥ मध्ये सप्तांशमानेन कुंडखंडेंदुवत् भ्रमात्॥ अयमर्थः। इष्टप्र
माणचतुरस्रमध्यरेषां नवधा विभज्याद्यंतिमौ भागौ परिमृज्य तत्र चि
न्हद्वयं कृत्वोपरि चिन्हे तिर्यक्दक्षिणोत्तरं सूत्रं दत्वोपरि चिन्हात्पश्चिमं
यावद्वृत्तेन सूत्रेण कर्कटेन वा भ्रमाद्वृत्तार्द्धं ज्यासूत्रजातकोटिकमर्द्ध
चंद्रं कुंडं कुर्यादिति। अर्द्धेंदौ व्यासांगुलानि एकस्मिन्नेकोनविंशत्यं
गुलानि॥ एको यवः। एका यूका। पंच लिक्षाः। द्वयोः सप्तविंशत्यंगुलानि
पंच यूकाः। द्वे लिक्षे। त्रिषु त्रयस्त्रिंशदंगुलानि। एको यवः। द्वे यूके। षट् लि
क्षाः। चतुर्षु अष्टत्रिंशदंगुलानि। द्वौ यवौ तिस्रो यूकाः। द्वे लिक्षे। पंचसु द्वि
चत्वारिंशदंगुलानि सप्त यवाः। यूकाश्चतस्रः। तिस्रो लिक्षाः। षट्सु। ष
ट्चत्वारिंशदंगुलानि। सप्त यवाः। द्वे यूके। सप्तसु पंचाशदंगुलानि। पंच य
वाः। द्वे यूके चतस्रो लिक्षाः। अष्टसु पंचपंचाशदंगुलानि एको यवः। द्वे यू
के तिस्रो लिक्षाः। नवसु सप्तपंचाशदंगुलानि चत्वारो यवाः। एवं षोडश
सु षट्सप्तत्यंगुलानि। पंच यवाः। अत्र रामेण चतुरशीत्यधिकत्रिंशत्या
विभक्तस्येष्टक्षेत्रव्यासस्यैकोंशोधिकस्त्याज्यः क्षेत्रफलसंवादार्थमि
त्युक्तं। स चैकांश इष्टक्षेत्रव्यासश्चतुर्विंशांशस्य षोडशांशो भवति। ए
कहस्तचतुरस्रे तु सार्द्धयवमितः। एवं द्विहस्तादिष्वप्यूह्यं। इदं चोदग
ग्रं कार्यं। तदुक्तं मदनरत्ने। उदगग्रं तच्चोदङ्मध्ये रेखा यो नवधा विभागे

नसंगादनीयमिति॥ यत्तुशारदातिलके॥चतुरस्रीकृतंक्षेत्रंदशधाविभ
जेद्बुधः॥एकमेकंत्यजेदंशं अधऊर्ध्वंचतत्रवित्॥ज्यासूत्रंपातयेद्द्वे
तन्मानाद्भ्रमयेत्ततः। अर्धचंद्रनिभंकुंडंरमणीयमिदंभवेदिति॥तत्रभू
यान्क्षेत्रफलविसंवादः॥कामिकोक्तंत्वल्पः॥अथत्रिकोणं। इष्टचतु
रस्रमध्यसूत्रस्यचतुर्विंशतिरंशाः। तत्रसूत्रंप्राच्यां अष्टमांशोनैकांश
सहितान्सार्धसप्तांशान्श्रोणिंचपार्श्वयोः। प्रत्येकंसपादान्षडंशान्सं
वर्ध्यतत्रोभयतःयोर्वर्धितप्रान्तसूत्रांतंयावत्सूत्रद्वयेदत्तेसमभुजत्र्य
स्रंभवति॥यथोक्तंशारदातिलके॥चतुर्थांमोदितेक्षेत्रेन्यसेदुभयपार्श्व
योः।एकैकमंशंतन्मानाद्द्यतोलांछयेत्ततः।सूत्रद्वयंबुधःकुर्यात्त्र्यस्रंकुं
डमुदाहृतमिति। इदंतुकिंचित्फलव्यभिचारि अतोस्माभिरधिकावृद्धि
रुक्ता। रामभट्टेतुमध्यसूत्रंदशभिरंशैःसंवर्ध्यतत्रैकोंशःस्वाष्टमांशो
नःश्रोणिसूत्रस्योभयतःपंचपंचाशद्वृद्धिरितितत्तुविषमभुजत्वादुपे
क्ष्यं। इदंचनिर्मितौप्रागग्रंपश्चिमयोनित्र्यस्रभुजाः। एकस्मिन्षट्त्रिं
शदंगुलानिचत्वारोयवाः॥द्वयोरेकपंचाशदंगुलानिपंचयवाः। त्रिषु
त्रिषष्ट्यंगुलानि। एकोयवः। चतुर्षुत्रिसप्तत्यंगुलानि। पंचयवाः। षट्
सुएकोननवत्यंगुलानि। त्रयोयवाः। सप्तसुचतुर्नवत्यंगुलानिचत्वारो
यवाः। अष्टसुत्र्युत्तरशतांगु०। एकोयवः। नवसुनवाधिकशतांगुलानि
।यवत्रयं। दशसुपंचदशाधिकशतांगुलानियवद्वयं॥ अथवृत्तं। इष्ट०
चतुरस्रव्यासषोडशांशाधिकव्यासार्धमितेनकर्कटेनसूत्रेणवाकृतं
मंडलंवृत्तकुंडंप्रागग्रंपश्चिमयोनिप्रतीच्यांवृत्तव्यासार्धांगुलानिएक
स्मिन्त्रयोदशांगुलानियवचतुष्टयं॥द्वयोरेकोनविंशत्यंगुलानि।ए
कोयवः॥त्रिषुत्रयोविंशत्यंगुलानियवचतुष्टयं। चतुर्षुसप्तविंशत्यं
गुलानि। एकोयवः। पंचसुत्रिंशदंगुलानिद्वौयवौ। षट्सुत्रयस्त्रिंश
दंगुलानि। एकोयवः। सप्तसुपंचत्रिंशदंगुलानिसप्तयवाः। अष्टस्व
ष्टत्रिंशदंगुलानि। द्वौयवौ। नवसुचत्वारिंशदंगुलानिपंचयवाः। दश
सुद्विचत्वारिंशदंगुलानिसप्तयवाः। अथषडस्रं। इष्टचतुरस्रमध्य
सूत्रस्यचतुर्विंशतिरंशान्कृत्वातत्सूत्रंत्रिभिरंशैःप्राच्यांवर्धयेत
त्रैकोंशःस्वाष्टमांशोनःतावच्चप्रतीच्यांसंवर्ध्यतदर्धेनवृत्तंकृत्वाता

वैतवकर्कटेनोदीचीमारभ्यषट्सुस्थानेषुअंकयेदिति॥अत्रैकह
स्तेतावदेवफलं॥मध्येदीर्घचतुरस्रंतद्दीर्घभुजःपंचविंशत्यंगुल
नि।षट्यवाश्च।एवमन्योपि।अल्पभुजस्तुचतुर्दशांगुलानि।सप्त
यवाः।सप्तयूकाश्च।तत्रफलंपंचाशीत्यधिकानिशतत्रयमंगुलानि।
चतुरस्रदीर्घभुजमंलग्नेत्र्यस्रेतुभुजएवभूः।लंबस्तुवृत्तचतुर्थां
शः सप्तांगुलानि।त्रयोयवाःपंचयूकाश्चेति।तत्फलंपंचनवत्यंगु
लानि।चत्वारोयवाश्च।अपरत्र्यस्रेप्येवं॥फलत्रययोगेपंचशतष
ट्सप्ततिश्च॥यत्तुविष्णुमूलप्रभृतिभिर्बहुभिःफलसंवाद्यपित्र्य
स्रद्वययोगेनबहिर्निर्गतास्त्रिकंषडस्रमुक्तं।तद्युक्तं।अंतरबाह्य
त्र्यस्रयोगेनद्वादशास्र ताद्वादशभुजतापत्तेः।बहिस्तनाएवस्रानां
तर्गताइतिचेत्।तथापिवक्रभुजतायामानाभावः।चतुरस्रत्र्यस्रवाद
वपिफलसंवादेनकदाचित्तथापत्तेश्च॥एतेनरामायुक्तमष्टास्रम
पिप्रत्युक्तं।षडस्रभुजांगुलानि॥एकहस्ताद्दिक्रमेणदशहस्तप
र्यंतं।चतुर्दशांगुलानि।सप्तयवाः।एकविंशत्यंगुलानि।पंचविंश
त्यंगुलानि।षट्य०।एकोनत्रिंशदंगुलानि।षट्य०।त्रयस्त्रिंशदंगु०
द्वौयवौ॥षट्त्रिंशदंगुलानि।यवचतुष्कं।एकोनचत्वारिंशदंगुल
नि।यवत्रयं।द्विचत्वारिंशदंगुलानि।एकोय०।चतुश्चत्वारिंशदंगु
लानि।पंचय०।सप्तचत्वारिंशदंगुलानि।एकोय०।अथपद्मं।इष्टच
तुरस्रमध्यसूत्रस्यचतुर्विंशतिरंशाः।तत्रद्वादशभिरंशैरेकंवृत्तंकृ
त्वासार्धत्रीनंशान्संवर्ध्यापरंकृत्वातत्रदिक्षुलदंतरालेषुचसू
त्राण्यास्फालयेत्॥ततोंतर्वृत्तरेखाप्राक्सूत्रमत्स्यात्तदंकांतरित
मत्स्याच्चसूत्रद्वयेत्रिकोणाकारेणास्फालयेत्॥तदंतरालमत्स्य
समसूत्रबहिर्वृत्तरेखागतमत्स्यंयावत्।तच्चैकसूत्रंसमाशात
पामध्यंकयित्वासूत्राद्धिमितकर्कटकोटिमेकांमध्यांकेपरांचसूत्रा
रंभकमत्स्यसंस्थाप्यत्रिकोणमध्येभ्रमणादेकमत्स्यंबहिर्वृत्त
रेखागतत्रिकोणांतात्तस्मादेवचसूत्रांकात्त्रिकोणाद्बहिरपरंमत्स्यं
कृत्वांतर्मत्स्यात्त्रिकोणाद्बहिरपरंमत्स्यंकृत्वांतर्मत्स्यात्त्रिकोणाद्ब
हिरुपरिसूत्रार्द्धज्याक्रमेकंबहिर्मत्स्यात्त्रिकोणांतःअधःसूत्रार्द्धज्या

क्रमपरमितिसंलग्नकोटिकसुपर्यधोभावेनधनुर्द्वयं कार्यं। एवमपर
सूत्रेऽपिकृत्वासूत्रद्वयमार्जनेनवक्राग्रपद्मदलवत् पत्रंभवति। एव
मन्यानिपत्राणिअधःकृत्वाइष्टचतुरस्रक्षेत्रकल्पितचतुर्विंशत्यंश
मध्येत्रिभिरंशैर्व्यासार्द्धेनमध्येतद्बहिश्चषडंशव्यासार्द्धेनेतिद्वेवृत्ते
कार्ये। तत्रांतरवृत्तेविस्तारेतद्वृत्तेनोच्चतायांतद्व्यासेनसमामृदाकर्णि
काकार्या। बहिर्वृत्तेतुकेसराइतिएतत्पद्मकुंडं। तथैतत्फलं। तत्रैक
स्मिन्पत्रेउपरितनेमहतितर्येकहस्तेचतुर्थमहद्वृत्तव्यासार्द्धंपंचद
शांगुलानि। १५ पंचयवाः। ५ तिस्रोयूकाः ३ तिस्रोलिक्षाः ३ द्वेवालाग्रे
२ द्विहस्तेविंशत्यंगुलानि। २० त्रयोयवाः ३ तिस्रोयूकाः ३ एकालिक्षा
१ षड्बालाग्राणि ६ त्रिहस्तेसप्तविंशत्यंगुलानि २७ एकोयवः १ एकायू
का १ द्वेवालाग्रे २ चतुर्हस्तेएकत्रिंशदंगुलानि ३१ द्वौयवौ २ षड्यूकाः ६
षड्बालाग्राणि ६ पंचहस्तेपंचत्रिंशदंगुलानि ३५ तिस्रोयूकाः ३ षड्लि
क्षाः ६ पंचबालाग्राणि ५ षड्ढस्तेअष्टत्रिंशदंगुलानि ३८ यवद्वयं २ एका
यूका १ द्वेवालाग्रे २ सप्तहस्तेएकचत्वारिंशदंगुलानि ४१ यवत्रयं ३
सप्तयूकाः ७ अष्टहस्तेचतुश्चत्वारिंशदंगुलानि ४४ द्वौयवौ २ यूकात्र
यं ३ षड्लिक्षाः। ६ नवहस्तेसप्तचत्वारिंशदंगुलानि ४७ द्वेयूके २ नव
लिक्षाः ९ दशहस्तेएकोनपंचाशदंगुलानि ४९ चत्वारोयवाः। ४ चतस्रो
यूकाः ४ सप्तलिक्षाः ७ एकंबालाग्रं १ पंचरथरेणवः ५ एकास्त्रसरेणुः।
१ सप्तपरमाणवः ७ इतिपूर्वोक्तभूम्यर्द्धेनैतल्लब्धगणनेफलंएकविंश
तिरंगुलानि २१ पंचयूकाः ५ पंचलिक्षाः ५ एकंबालाग्रं १ पंचरथरेणवः ५
षट्त्रसरेणवः ६ त्रयः परमाणवः ३ इति। त्र्यस्रद्वयफलैकीकरणेद्वास
प्ततिरंगुलानि ७२ पत्राग्रवक्रतायांतावत्येवभूस्त्यज्यतेतावत्येवसंगृ
ह्यतेइतिगणितंक्षेत्रफलमविहितं। अष्टानामपिपत्राणांक्षेत्रफलमे
लनेंगुलानांषट्सप्तत्यधिकापंचशती ५७६॥ अथाष्टास्रं॥ इष्टचतु
रस्रव्यासंचतुर्विंशतिभागः। तत्रद्वाभ्यांभागाभ्यांएकभागचतुर्थां
शाधिकाभ्यांमध्यसूत्रंसंवर्द्ध्यमध्याद्बहिर्व्यंतधृतकर्कटेनवृत्तंकृत्वेशा
नपूर्वांतरालमारभ्यैकादशभिरंशैर्मितेनसूत्रेणाष्टसुस्थानेष्वंकिते
षुअष्टास्रंभवति। अत्रचैकादशांशः स्वाष्टमांशोनः कार्यः। अत्रैकहस्ता

दावुपपत्तिः। मध्येसमचतुरस्रंतद्भुजमानंतु। विंशत्यंगुलानिएकोय
वोयूकात्रयंचचतुरस्रचतुर्भागेषुचत्वारिन्यस्राणितत्रभुजश्चतुर॰
स्रभुजाएवंपूर्वोक्तकर्णसूत्रमितावेवचद्वौभुजौ। लंबानांतुचत्वार्यंगुला
निएकोयवोद्वेयूकेइतितत्रचतुरस्रफलंचत्वारिंशतानिसप्तचांगुला
नियवाश्चसप्त४०।७प्रत्येकंत्र्यस्रफलंद्विचत्वार्यंगुलानि ४२ त्र्यस्रचतुष्ट
यफलमष्टषष्ट्यधिकंशतं१६८। तामोक्तत्वष्टास्रं विषमत्र्यस्रभुजत्वात्
षोडशास्रतापत्तेश्चोपेक्ष्यमितिदिक्। अष्टास्रभुजांगुलानिएकस्मि
न्दशांगुलानिसप्तयवाः। द्वयोःपंचदशांगुलानित्रयोयवाः। त्रिष्वष्ट
दशांगुलानिसप्तयवाः चतुर्ष्वेकविंशत्यंगुलानिसप्तयवाः पंचसुचतु
र्विंशत्यंगुलानियवद्वयं। षट्सुषड्विंशत्यंगुलानिषड्यवाः। सप्त
स्वष्टाविंशत्यंगुला०। सप्तयवाः। अष्टसुत्रिंशदंगुलानिसप्तयवाः न
वसुद्वात्रिंशदंगुलानिषड्यवाः दशसुचतुस्त्रिंशदंगुलानियवचतुष्ट
यं। षोडशसुत्रिचत्वारिंशदंगुलानि। पंचयवाः। अथचतुर्विंशांशाः॥
एकस्मिन्एकांगुलंद्वयोरेकांगुलंत्रयोयवाः। त्रिष्वेकांगुलंषड्यवाः।
चतुर्ष्वंगुलद्वयम्। पंचस्वंगुलद्वयं। यवद्वयं। षट्स्वंगुलद्वयंपंचयवाः।
।षट्सुचत्वार्यंगुलानि॥ एकहस्तादिषुचतुर्थांशाः। एकस्मिन्षडंगु॰
द्वयोरष्टांगु॰चत्वारोयवाः। त्रिषुदशांगुलानियवत्रयंयूकाश्चतस्रः।
चतुर्षुद्वादशांगुलानिपंचसुत्रयोविंशांगुलानि। त्रयमेकोयवः षोड
शसुचत्वार्यंगुलानि। एकहस्तादिषुचतुर्थांशाः। एकस्मिन्षडंगु॰द्व
योरष्टांगु॰चत्वारोयवाः त्रिषुदशांगुलानियवत्रयं। यूकाश्चतस्रः। च
तुर्षुद्वादशांगुलानि पंचसुत्रयोविंशांगुलानि। त्रयोयवाः यूकाश्चत
स्रः। षट्सुचतुर्दशांगुलानि। षड्यवाः। सप्तसुपंचदशांगुलानिसप्त
यवाः अष्टसुषोडशांगुलानि। सप्तयवाः। चतस्रोयूकाः। नवस्वष्टाद
शांगुलानिदशस्वष्टादशांगुलानि सप्तयवाः षड्यूकाः। षोडशसुचतु
र्विंशत्यंगुलानि॥ अथाष्टमांशाः। एकस्मिन्नंगुलत्रयं। द्वयोश्चत्वार्यंगु
लानि। द्वौयवौ। त्रिषुपंचांगुलानि। द्वौयवौ। चतुर्षुषडंगुलानिपंचसुषडं
गुलानिषड्यवाः। षट्सुसप्तांगुलानियवत्रयं। सप्तस्वष्टांगुलानि। अष्ट
स्वष्टांगु॰यवचतुष्कं। नवसुनवांगुलानि। दशसुनवांगुलानिचत्वारोयवाः

षोडशसु द्वादशांगुलानि॥ अथ षष्ठांशाः॥ एकस्मिन्नंगुलचतुष्टयं। द्व
योः पंचांगुलानि पंच यवाः तिस्रो यूकाः। त्रिषु षडंगुलानि सप्त यवाः च
तस्रो यूकाः। चतुर्ष्वष्टांगुलानि पंचस्वष्टांगुलानि। सप्त यवाः पंच यूकाः
॥ षट्सु नवांगुलानि षड्यवाः चतस्रो यूकाः। सप्तसु दशांगुलानि चत्वा
रो यवाः पंच यूकाः॥ अष्टस्वेकादशांगु० द्वौ यवौ चतस्रो यूकाः नवसु द्वा
दशांगुलानि। दशसु द्वादशांगु० पंच यवाः षोडशसु षोडशांगुलानि॥
अथ द्वादशांशाः। एकस्मिन्नंगुलद्वयं। द्वयोर्द्वे अंगुले। सप्त यवाः। त्रिष्वं
गुलत्रयं। यवचतुष्टयं॥ चतुर्षु चत्वार्यंगुलानि। पंचसु चत्वार्यंगुला
नि चत्वारो यवाः। षट्सु चत्वार्यंगुलानि सप्त यवाः। सप्तसु पंचांगु० द्वौ
यवौ। अष्टसु पंचांगुलानि। पंच यवाः। नवसु षडंगुलानि। दशसु षडंगु
लानि यवत्रयं। षोडशस्वष्टांगुलानि। स्थापने सर्वकुंडानां ध्वजायः स
र्वसिद्धिद इति उक्तत्वात्सर्वेषु चैतेषु प्रोक्तमानादर्धांगुलयवादिन्यू
नमतिरिक्तं वा कृत्वा ध्वजायः साधनीयः विस्तारदैर्घ्यगुणितैरष्ट
भिर्विभक्ते यद्येकः परिशिष्यते तदा ध्वजाय इति। तदुक्तं। ध्वजो धूम्रो
थ सिंहश्च सौरमेयः खरो गजः॥ ध्वांक्षश्चेति क्रमेणैतदायाष्टकमु
दाहृतमिति। भविष्यपुराणे॥ मुनिमानं शतार्द्धे तु शते चारत्निमात्र
कं॥ सहस्रे लक्षहोतव्ये कुर्यात्कुंडं करात्मकं॥ द्विहस्तमयुते तच्च लक्ष
होमे चतुःकरं। अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकमिति॥ यत्तु
शारदातिलके॥ एकहस्तमितं कुंडमेकलक्षे विधीयते। लक्षाणां दश
कं यावत्तावद्धस्तेन वर्द्धयेत्॥ दशहस्तमितं कुंडं कोटिहोमे प्रशस्य
त इति। यत्तु स्कांदे॥ कोटिहोमे चतुर्हस्तं चतुरस्रं समंततः॥ योनिव
क्रद्वयोपेतं तदप्याहुस्त्रिमेखलमिति च। लक्षादिहोमेष्वेकहस्ता
दिकुंडविधानम्॥ कोटिहोमे दशहस्तस्य तद्यथोचितव्रीह्यादिचिर
दाहस्थूलद्रव्यविषयं घृतादिक्षिप्रदाहिद्रव्यविषयं च ज्ञेयं। अथ खा
तो मोहचूडोत्तरे॥ चतुर्विंशतिमं भागमंगुलं परिकल्प्य तु। चतुर्विंशांगु
लं हस्तं कुंडानां परिकल्पयेत्॥ हस्तमात्रं खनेत्तिर्यक् ऊर्ध्वं मेखलया स
ह। पिंगलमते। खातादेकांगुलं त्यक्त्वा मेखलानां स्थितिर्भवेत्॥ तथा।
सर्वेषामेव कुंडानामेका वा तिस्र एव वा। कुंडलक्षणविवृतौ॥ कंठांगुला

वृद्धिः कार्या मेखलैका षडंगुलेति। चतुस्त्र्यंगुला वापि तिस्रः सर्वत्र शोभना इति॥ मेखलात्रितयं कार्यं कोणरामयमांगुलैः। कोणाश्चला ः॥ रामास्त्रयः॥ यमौ द्वौ॥ चतुस्त्रिद्व्यंगुलत्वं च विस्तारे उच्चतायां च। अतएव शारदातिलके॥ मेखलामानमुक्त्वा। विस्तारोत्सेधतो ज्ञेया मेखलाः सर्वतो बुधैरिति। रामेण तु तिसृणामपि त्र्यंगुलोच्चतैव। विस्तारस्तु चतुस्त्रिद्व्यंगुल इत्युक्तं। अथ योनिः। तत्र स्वायंभुवे। मेखलामध्यतो योनिः कुंडार्द्धात्र्यंशविस्तृता। अंगुष्ठमानोष्ठकंठा कार्याश्वत्थदलाकृतिः। कुंडार्द्धदीर्घा त्र्यंशविस्तृता मूलेग्रेश्वत्थदलवत्कुंचिता अंगुष्ठमानौ ओष्ठकण्ठौ यस्याः सा अंगुष्ठमानोष्ठकंठा। ओष्ठः कुंडमध्येप्रविष्टं योन्यग्रं कंठो योनिमेखलेत्येके। तथा च भुविवेष्टिता योनिः कार्येत्यर्थः। मेखला तदुच्चो भाग इत्यपरे॥ त्रैलोक्यसारे॥ दैर्घ्यात्तत्र्यंगुला योनिस्त्र्यंशोना विस्तरेण तु॥ एकांगुलोच्छ्रिता सा तु प्रविष्टाभ्यंतरे तथा॥ कुंभद्वयसमायुक्ता चाश्वत्थदलवन्मता॥ अंगुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिक्षमेति॥ अंशोन्या योनिर्दैर्घ्यात् अष्टांगुलेति यावत्। कुंभद्वयेन रुत्ताद्वयाकारेण मूलदेशे समायुक्ता॥ शारदातिलके॥ स्थूला द्वारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकमिति॥ प्रागग्नियाम्यकुंडानां प्रोक्ता योनिरुदङ्मुखी॥ पूर्वामुखाः स्मृताः शेषा यथाशोभासमन्विता॥ त्रैलोक्यसारे॥ नवमस्यापि कुंडस्य योनिर्दक्षदले स्थितेति शारदायां योनिकुंडे योनिमज्जडतुल्यां नाभिं च वर्जयेदिति। सिद्धांतशेखरेपि॥ योनौ योनिं न कुर्वीतेति शारदातिलके॥ कुंडानां कल्पयेदंते नाभिमंबुजसन्निभाम्। तत्तत्कुंडानुरूपां च मानमस्या निगद्यते॥ मुष्टिरत्नैकहस्तानां नाभिरुत्सेधतो मता॥ नेत्रवेदांगुलोपेता कुंडेष्वन्येषु वर्द्धयेत्॥ यवद्व्यक्रमेणैव नाभिं पृथुगुदारधीरिति। नेत्रवेदांगुलोपेता उच्चतायां द्व्यंगुलविस्तारा वामयोश्चतुरंगुलेत्यर्थः। द्वित्रिहस्तादिकुंडेषु वृद्धिः द्विहस्तुविस्तारामयोः षष्ठांशविस्तारपरा उच्चतायां द्वादशांशपरेति। रामादयः। शारदातिलके। एकमेव भवेत्कुंडमैशान्यां वैष्णवाध्वर इति विश्वकर्मा॥ खाताधिके भवेद्रोगी हीने धेनुधनक्षयः॥ वक्रकुंडे तु संतापो मरणं छिन्नमेखले। मेखलारहिते शोको भ्यधिके वित्तसंक्षयः। भार्यावि

नाशनंप्रोक्तं कुंडे योन्याविनाकृतं॥अपत्यध्वंसनंप्रोक्तं कुंडं यत्कंठव
र्जितमिति॥सिद्धांतशेखरे।मानहीनेमहाव्याधिरधिके शत्रुवर्द्धनं।यो
निहीनेत्वपस्मारोवाकुंडःकंठवर्जिते।तत्रैव।स्थंडिलंवापिकुर्वीत
सुस्निग्धैःसितकैश्चितैः।हस्तमात्रंप्रविस्तारंसुसमेत्र्यंगुलोन्नतं।ग्रंथां
तरेपि।नित्यंनैमित्तिकंहोमंस्थंडिलेवासमाचरेत्॥हस्तमात्रेणत
त्कुर्याद्वालुकाभिःसुशोभनं॥त्र्यंगुलोत्सेधसंयुक्तंचतुरस्रंसमंतत
इति॥ ॥इतिश्रीशंकरभट्टात्मजभट्टनीलकंठकृतेदानमयूखेकुंडमे
खलानिर्णयः॥ ॥अथषोडशारचक्रं॥तत्रगुरुर्वेद्यामध्येत्रिहस्तव्या
संचतुरस्रंप्रसाध्यप्रागपरदक्षिणोत्तरनवनवरेखाभिस्तच्चतुःषष्टि
कोष्ठकंकुर्यात्॥तत्रकोष्ठानिप्रत्येकंनवांगुलानिसंपद्यंते।ततोबहिः
र्त्यपंक्तिषुचतुर्दिक्षुमध्यकोष्ठानिचत्वारिचत्वारिमार्जयित्वातदुपर्यु
पांत्यपंक्तिषुपार्श्वयोस्तत्रतत्रपंत्यत्क्वाप्रतिदिशंमध्यकोष्ठद्वयंमार्ज
येत्तेनचतुर्दिक्षुषट्षट्कोष्ठानिचत्वारिद्वाराणिसिध्यंति।ततोमध्य
स्थितषोडशकोष्ठानिमार्जयेत्॥ततोबाह्यएकैकंकोणकोष्ठंविहायको
णकोष्ठद्वारपीठांतरालवर्तीन्यवशिष्टानिपंचपंचकोष्ठानिमार्जयेत्
॥तथाचमध्यचतुरस्रपीठस्यपादाःसिध्यंति।ततोमध्याच्चत्वारिवृ
त्तानिकुर्यात्।तत्राद्येचत्वार्यंगुलानिव्यासः द्वितीयेष्टौतृतीयेचतु
र्विंशतिः।चतुर्थेषड्विंशतिरिति।तच्चतुरंगुलंवृत्तंकर्णिकारूपंपीतेन
रजसापूरयित्वाकर्णिकावधिरेखांसितेनरजसानिर्माय तद्बहिरष्टांगु
लात्मकेवृत्तेपीतरक्तसितरजोभिःसंपादितमूलमध्याग्राणिषोडश
केशराणिसंपाद्यतत्केसरावधिरेखांसितेनैवरजसांगुलोन्नतांसंपा
द्यचतुर्विंशांगुलात्मकेतद्बहिर्वृत्तेसितरजसाअष्टदिक्ष्वष्टौपत्राणि
रक्ताग्राणिकुर्यात्॥ततोदलांतरेरेखांसितेनरजसाविधायदलांत
राणिकृष्णेनरजसापूरयित्वातद्बहिरेकांगुलांतरंबहिर्वृत्तरेखांसि
तेनैवरजसासंपाद्यतद्व्यांतरंपरितोंगुष्ठदलांतराणिकृष्णेनरजसा
पूरयित्वातद्बहिरेकांगुलांतरांबहिर्वृत्त रेखांसितेनैवरजसासंपा
द्यतद्व्यांतरंपरितोंगुष्ठदलाग्रतत्संधिचिन्हैःषोडशधाविभज्यप्रति
भागंयवाकारान्षोडशकोष्ठान्श्यामपीतारुणश्वेतरजोभिःकल्पयि

त्वातदंतरायथायोगरजोभिःपूरयित्वातद्बहिःसितपीतारुणश्याम
हरिताःपंचरेखालिखेत्।तद्बहिःपीठक्षेत्रंचतुरस्रंयथाशोभंरजोभि
रलंकृत्यपीठावधिरेखांसितेनरजसाचतुरस्रांरचयेत्।द्वारक्षेत्राणि
पूर्वादितःपीतश्यामश्वेतहरितरजोभिःपूरयेत्॥आग्नेयादिकोणेको
ष्ठचतुष्टयंलोहितहरितश्यामधवलैःपूरयेत्।आग्नेयादिपीठपादच
तुष्टयंपंचकोष्ठात्मकंक्रमात्।सितरक्तपीतकृष्णरजोभिःपूरयेत्।त
तःसितेनरजसांगुलोन्नतेनबहिश्चतुरस्ररेखांकुर्यादितिपितामह
चरणाः।मदनाख्यश्चठक्कुरमतेचतुर्हस्तंचतुरस्रंतत्रप्रत्येकंद्वाद
शांगुलानिकोष्ठानिरत्नानितुपंचतत्राद्येवृत्तेचत्वार्यंगुलानिव्यासः
।द्वितीयेष्टौतृतीयेविंशतिःचतुर्थेचतुर्विंशतिःपंचमेषट्त्रिंशदिति
।पंचकोष्ठात्मकंपीठपादचतुष्टयंआग्नेयादिक्रमेणरक्तहरितश्याम
सितैःपूरणीयं।कोणकोष्ठचतुष्टयंतेकैस्त्रिभिस्त्रिभिर्वर्णैःसितविशेषः।
इतिषोडशारचक्रनिर्मितिः॥इदमेववारुणमंडलं॥तथाचतत्रप्रागु
त्तमेभागेआग्नेय्यांशक्तिमुज्ज्वलां॥आलिखेद्दक्षिणेदंडंनैर्ऋत्यां
खड्गमालिखेत्॥पाशंतुवारुणेलेख्यंध्वजंवैवायुगोचरे॥कौबेर्यां
तुगदांलिख्यईशान्यांशूलमालिखेत्॥शूलस्यवामदेशेतुचक्रंपद्मं
तुदक्षिणेइति॥ततोमहावेद्युपरिपंचवर्णफलपुष्पोपशोभितंवितानं
बध्नीयादिति॥ततोमहावेदीशानभागेआयामपर्यायोच्छ्रायैर्हस्तमि
ताग्रहादिस्थापनार्थापरावेदिर्याविहितास्ति।हेमाद्रिमतेवितस्त्यु
च्छ्रायावातस्यांसर्वतोभद्रंलिखेत्।तल्लेखनप्रकारोपीत्थं।प्रागुदी
च्यांगतारेखाःकुर्यादेकोनविंशतिः।खंडेंदुस्त्रिपदःकोणेशृंखला
पंचभिःपदैः॥एकादशपदावल्लीभद्रंतुनवभिःपदैः। ॥ ॥
॥ ॥ चतुर्विंशत्यथवापिपरिधिर्विंशकैःपदैः॥मध्येषोडशभिःको
ष्ठैःपद्ममष्टदलंस्मृतं॥श्वेतेंदुःशृंखलाकृष्णावल्लीनीलेनपूरयेत्॥भ
द्रारुणासितावापिपरिधिःपीतवर्णकः।बाह्यांतरदलाश्वेताकर्णिका
पीतवर्णिका॥परिध्यावेष्टितंपद्मंमध्येसत्वंरजस्तमः।तन्मध्येस्था
पयेद्देवान्ब्रह्माद्यांश्चसुरासुरानिति॥अथग्रहपूजाप्रकारः।तत्रग्र
हामात्स्ये।सूर्यःसोमोमहीपुत्रःसोमपुत्रोबृहस्पतिः।शुक्रःशनैश्चरो

राहुः केतुश्चेति ग्रहा नव। स्कांदे। जन्मभूगोत्रमेतेषां वर्णस्थानमुखानि
च॥ यो ज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः। स्थानमधिष्ठानं। ए
तद्विज्ञाय यः कुर्यात्तत्सर्वं सफलं भवेत्॥ वर्णजन्मनी आह वृद्धपरा
शरः। रक्तः कश्यपजो भानुः शुक्लो ब्रह्मसुतः शशी। रक्तो रुद्रसुतो भौ
मः पीतः सोमसुतो बुधः॥ पीतो ब्राह्मः सुराचार्यः शुक्लः शुक्रो भृगूद्व
हः॥ कृष्णः शनी रवेः पुत्रः कृष्णो राहुः प्रजापतेः। कृष्णः केतुः कृशानू
त्थः कृष्णाः पापास्त्रयोप्यमी॥ भुवमाह। स एव। उत्पन्नोर्कः कलिं
गेषु यमुनायां च चंद्रमाः। अंगारकस्त्ववंत्यां तु मगधायां हिमांशु
जः। सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्चरस्तु सौराष्ट्रे रा
हुर्वैराटिके पुरे॥ अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः। गोत्रमाह
स एव। आदित्यः काश्यपो गोत्रादात्रेयश्चंद्रमा भवेत्॥ भारद्वाजो
भवेद्भौमस्तथात्रेयश्च सोमजः। शक्रपूज्योंगिरोगोत्रः शुक्रो वै भार्ग
वस्तथा। शनिः काश्यपस्त्वाथ राहुः पैठीनसिस्तथा॥ केतवो जैमिनी
याश्च ग्रहा लोकहितावहाः॥ दामोदरीये ग्रहान्प्रक्रम्य॥ वर्णरूपगु
णैर्युक्तान्व्याहृत्यावाहयेत्तु तान्॥ नत्रैव॥ भानुं तु मंडलाकारं अ
र्द्धचंद्राकृतिं विधुं॥ अंगारकं त्रिकोणं च बुधं बाणाकृतिं विदुः। पद्मा
कारं गुरुं कुर्याच्चतुष्कोणं च भार्गवं॥ दंडाकृतिं शनिं राहुं मकराकार
मेव च॥ खड्गाकारांस्तथा केतून्स्थापयेदनुपूर्वशः॥ ग्रहादिरूपा
णि मात्स्ये। पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वरथसंयु
क्तो द्विभुजः स्यात्सदा रविः। श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः
। गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी। रक्तमाल्यांबरधरः शक्ति
शूलगदाधरः। चतुर्भुजो मेषवाहो वरदः स्याद्धरासुतः॥ पीतमाल्यां
बरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो वरदो बु
धः। देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ॥ दंडिनौ वरदौ यो हि साक्ष
सूत्रकमंडलू॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः। चापबाणास
नधरः कर्तव्योर्कसुतः सदा॥ करालवदनः खड्गचर्मशूली वरप्रदः। नील
सिंहासनस्थश्च राहुस्तत्र प्रशस्यते॥ धूम्रा द्विबाहवः सर्वे गदिनो वि
कृताननाः। गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः

कार्याग्रहालोकहितावहाः।केतूनांबहुत्वेएकमेवदेवतात्वं।ऊर्ध्वप
राशरः।मध्येतुभास्करंविद्याच्छशिनंपूर्वदक्षिणे।दक्षिणेनधरासू
नुंबुधंपूर्वोत्तरेणतु।उत्तरेणगुरुंविद्यात्पूर्वेणैवतुभार्गवं।शनैश्चरं
पश्चिमस्यांराहुंदक्षिणपश्चिमे।पश्चिमोत्तरतःकेतूंस्थापयेत्तुपू
र्वशाः।मुखानिमात्स्ये।देवानांतत्रसंस्थाप्याविंशतिर्द्वादशाधिका।
आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः।शुक्रार्कौप्राङ्मुखौज्ञे
यावितिस्कांदात्सूर्यःप्राङ्मुखः॥पूजायांसंमुखतानुरोधात्प्रत्यङ्मु
खइत्यन्ये।अधिदेवताःप्रत्यधिदेवताश्च।मात्स्ये॥भास्करस्येश्वरं
विद्यादुमांचशशिनस्तथा॥स्कंदमंगारकस्यापिबुधस्यापितथाह
रिं॥ब्रह्माणंचगुरोर्विद्याच्छुक्रस्यापिशचीपतिं।शनैश्चरस्यापियमं
राहोःकालंतथैवच।केतूनांचित्रगुप्तंचसर्वेषामधिदेवताः।अग्निरा
पःक्षितिर्विष्णुरिंद्रऐंद्रीचदेवता॥प्रजापतिश्चसर्पाश्चब्रह्माप्रत्यधि
देवताः।एतेषांलक्षणानिविष्णुधर्मोत्तरे॥पंचवक्त्रोवृषारूढःप्रतिव
क्त्रंत्रिलोचनः।कपालशूलखट्वांगीचंद्रमौलिःसदाशिवः।अक्षसूत्रंच
कमलंदर्पणंचकमंडलुं॥उमाविभर्तिहस्तेषुपूजितात्रिदशैरपि।कु
मारःषण्मुखःकार्यःशिखंडकविभूषणः।रक्तांबरधरोदेवोमयूरव
रवाहनः।कुक्कुटश्चतथाघंटातस्यदक्षिणहस्तयोः।पताकावैजयंती
स्याच्छक्तिःकार्याचवामयोः॥विष्णुःकौमोदकीपद्मशंखचक्रधरः
क्रमात्॥प्रदक्षिणंदक्षिणाधःकरादारभ्यनित्यशः।पद्मासनस्थोज
टिलोब्रह्माकार्यश्चतुर्मुखः।अक्षमालांस्रुवंबिभ्रत्पुस्तकंचकमं
डलुम्।चतुर्दंतगजारूढोवज्रीकुलिशभृत्करः।शचीपतिःप्रकर्त
व्योनानाभरणभूषितः।इंद्रनीलोयमःकार्योदंडहस्तोविजानता
।रक्तदृक्पाशहस्तश्चमहामहिषवाहनः॥कालःकरालवदनोनी
लांगश्चविभीषणः।पाशहस्तोदंडहस्तःकार्योष्ट्रिकरोमवान्।अ
पीच्यवेषस्त्वाकारेद्विभुजःसौम्यदर्शनः।दक्षिणेलेखनींचित्रगुप्तंवा
मेतुपात्रकं।पिंगलश्मश्रुकेशाक्षःपीनांगोजवरोरुणः।छागस्थःसा
क्षसूत्रोऽग्निःसप्तार्चिःशक्तिधारकः।चिन्हितंचपरेणास्यकरमन्यंप्र
कल्पयेत्॥आपःस्त्रीरूपधारिण्यःश्वेतामकरवाहनाः।दधानाःपा

शृकलशौ मुक्ताभरणभूषिताः॥शुक्लवर्णा मही कार्या दिव्याभरणभू
षिता॥चतुर्भुजा सौम्यवपुश्चंडांशुसदृशांबरा॥रत्नपात्रं सस्यपात्रं
पात्रमोषधिसंयुतं॥पद्मं करे च कर्त्तव्यं भुवो यादवनंदन॥दिग्गजा
नां चतुर्णां सा कार्या पृष्ठगता तथा।विष्णोरिंद्रस्य चोक्ते।वामे शच्याः
करे कार्या सौम्या संतानमंजरी॥वरदा मंडिता कार्या द्विभुजा च तथा
सती॥यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः।अक्षं स्रुचं स्रुवं वि
भ्रत्कुंडिकां च प्रजापतिः।अक्षं अक्षमालां।कुंडिकां कमंडलुं।अक्षसू
त्रधराः सर्पाः कुंडिका पुच्छभूषणाः।एकभोगास्त्रिभोगा वा सर्वे कार्या
श्च भीषणाः।ब्रह्मलक्षणमुक्तं।ग्रहाणां दक्षिणे पार्श्वे न्यसेत्प्रत्यधि
देवताः॥अथ विनायकादिलक्षणानि।चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योत्र
गजाननः।नागयज्ञोपवीतश्च शशांककृतशेखरः।दक्षे दंतं करे दद्याद्द्वि
तीये चाक्षसूत्रकं।तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा।शक्तिं बाणं
तथा शूलं खड्गं चक्रं च दक्षिणे।चंद्रबिंबमधो वामे खेटमूर्ध्वे कपालकं
॥शुकं कटं च बिभ्राणा सिंहारूढा तु दिग्भुजा।एषा देवी समुद्दिष्टा दुर्गा
दुर्गार्त्तिनाशिनी॥धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः॥वरदान
करो धूम्रवर्णः कार्यो विजानता॥नीलोत्पलाभं गगनं तद्वर्णांबरधारि
च॥चंद्रार्कहस्तं कर्त्तव्यं द्विभुजं सौम्यखंडवत्॥द्विभुजौ सौम्यवरदौ
कर्त्तव्यौ रूपसंयुतौ॥तयोरौषधयः कार्या दिव्या दक्षिणहस्तयोः।वाम
योः पुस्तकौ कार्यौ दर्शनीयौ तथा द्विजाः।एकस्य दक्षिणे पार्श्वे वामे चा
स्य च यादव॥नारीयुगं प्रकर्त्तव्यं सुरूपं चारुदर्शनं।रत्नभांडकरे कार्ये
चंद्रशुक्लांबरे तथा॥अथ लोकपालरूपाणि।तत्रेंद्राग्नियमब्रह्मरूपा
णि प्रत्यधिदेवतोक्त्योक्तानि।खड्गचर्मधरो वाम्लो निर्ऋतिर्नरवाहनः
॥ऊर्ध्वकेशो विरूपाक्षः करालः कालिकाप्रियः।नागपाशधरो रक्तभू
षणः पद्मिनीपतिः।वरुणोंबुपतिः स्वर्णवर्णो मकरवाहनः।वायुर्वि
नायकादिपंचके उक्तः।सोमो ग्रहेषु।अनंतः प्रत्यधिदेवतासु।विनाय
कादिस्थापनं ग्रहेभ्य उत्तरत इति संप्रदायः।दक्षिणपश्चिमवायव्यो
त्तरपूर्वेषु यथाक्रममित्यन्ये॥राहुमंदद्विनेशानां उत्तरस्यां यथाक्रमं।
गणेशदुर्गावायुश्च राहुकेत्वोश्च दक्षिणे॥आकाशमश्विनौ चेति पंचे

तान्स्थापयेद्बुधः इतिवचनानुसारेणेतिभट्टाः॥ रूपनारायणश्च॥ पू
जाप्रकारमाह याज्ञवल्क्यः॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि
च॥ गंधाश्च बलयश्चैव धूपो देयोत्र गुग्गुलुः॥ मात्स्ये॥ धूपामोदोत्र
सुरभिरुपरिष्टाद्वितानकं॥ शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितं
॥ धूपविशेषोहेमाद्रौ स्कांदे॥ रवेः कुंदुरुकं धूपं शशिनस्तु घृताक्षताः
भौमे सर्ज्जरसं चैव अगरुं च बुधे स्मृतो॥ सिल्हकं गुरवे दद्याच्छुक्रे वि
ल्वागरुः स्मृतं॥ गुग्गुलं मंदवारे तु लाक्षा राहोश्च केतवे॥ कुंदुरुकं सल्ल
कीनिर्यासः॥ सर्ज्जः शालः॥ सिल्हकं सिल्हा इति मध्यदेशे प्रसिद्धं॥ बि
ल्वागुरु बिल्वफलनिर्यासहितमगुरुः मंदवारे शनैश्चराय॥ लाक्षा
राहवे केतुभ्यश्च॥ गंधविशेषमाह॥ दिवाकरकुजाभ्यां हि दापयेद्रक्त
चंदनं॥ चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत्॥ कुंकुमेन च संयुक्तं चंद
नं जीवसौम्ययोः॥ अगुरुं चापि कस्तूरीं राहुकेत्वर्कजेषु च॥ अंगदेव
तानां तु॥ पुष्पाणि सितवर्णानि चंदनं च विलेपनं॥ एतेषां गुग्गुलुधू
पो नैवेद्यं घृतपायसं॥ वासांसि शुक्लानीति संप्रदायः॥ ग्रहबलीनाह
गुडौदनं रवेर्दद्यात्सोमाय घृतपायसं॥ अंगारकाय संयावं बुधाय क्षी
रषष्टिकं॥ दध्योदनं तु जीवाय शुक्राय च घृतौदनं॥ शनैश्चराय कृश
रं आजं मांसं च राहवे॥ चित्रौदनं च केतुभ्यः सर्वं भक्ष्यैरथार्चयेत्॥ अ
त्र सर्वभक्ष्यैरथार्चयेदित्यन्यदपि मोदकादि देयमिति दामोदरठक्कु
रः॥ संयावो गोधूमचूर्णसाधितो घाटारव्य इत्यपिसरएव॥ तंडुलमसू
रान्नमिति रूपनारायणः॥ कृशरं तिलतंडुलं दुग्धसाधितं॥ चित्रौदनं
॥ तिलतंडुलमिश्रं स्यादजाक्षीरं तु शोणितं॥ कर्णनासागृहीनं स्यादेत
च्चित्रौदनं स्मृतमिति दामोदरः॥ याज्ञवल्क्यः॥ शक्तितो वा यथालाभं
सत्कृत्य विधिपूर्वकं॥ पूजयंतो ग्रहानेतांल्लभंते सकलं फलं॥ यत्तु पृथ्वी
चंद्रोदये दैः॥ वर्णरूपगुणैर्युक्तान्व्याहृत्यावाहयेत्तु तान्॥ इतिवच
नात्॥ ॐ भूरादित्यमावाहयामि॥ ॐ भुवः आदित्यमावाहयामि॥
ॐ स्वः आदित्यमावाहयामि॥ ॐ भूर्भुवःस्वरादित्यमिति व्यस्तसम
स्तव्याहृतिभिरावाह्य॥ भगवन्नादित्य नक्षत्राधिपते काश्यपगोत्र
कलिंगदेशेश्वर जपापुष्पोपमांग द्युते द्विभुज पद्माभयहस्त सिंदूर

वर्णमाल्यांबरानुलेपनज्वलन्माणिक्यखचितसर्वांगाभरणभास्व
त्तेजोनिधेस्त्रिलोकप्रकाशकस्त्रिदेवतामयमूर्तेर्नमस्तेसन्नद्धारुणध्व
जपताकोपशोभितेनसप्ताश्वरथवाहनेनमेरुंप्रदक्षिणीकुर्वन्नाग
च्छाग्निरुद्राभ्यांसहेत्यादिविशेषणैरपियुक्तान्ग्रहान्आवाहयेदि
तितन्मूलंविमृश्यकार्यं।वामनग्रंथे।आचार्यप्रभृतिभ्यश्चग्रहार्चन
फलंततः।समिदाज्यचरूणां।ब्रह्मलेकुंभपूजायांचार्चनस्यफलंच
यत्।लोकपालगणेशाद्यास्तेत्रयाअंगदेवताश्चनासांजपफलंतहुत्
ह्लीयाज्ञलपूर्वकं।ततस्तेभ्योयथाशक्तिदातव्यादक्षिणाततइति।
॥इतिग्रहपूजाविधिः॥अथपुण्याहवाचनं।त्रिकांडमंडनः।गर्भाधाना
दिसंस्कारेष्विष्टापूर्तेक्रतुष्वपि।वृद्धिश्राद्धेपुराकार्येकर्मादौस्वस्तिवा
चनं।व्यासः।संपूज्यगंधपुष्पाद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्।धर्मकर्म
णिमांगल्येसंग्रामेद्भुतदर्शनेइति।गृह्यपरिशिष्टे।स्वस्तिवाचनमृद्धि
पूर्तेषुतत्कर्मणश्चादंतयोःकुर्यात्।आश्वलायनः।दैविकेतांत्रिकेचा
दौततःपुण्याहवाचनमिति।तच्चरूपनारायणीयेद्रष्टव्यं।तत्रवधिकान्
ब्राह्मणान्भोजयित्वोदङ्मुखानुपवेश्यवस्त्रादिभिःपरितोष्यपुण्या
हंभवंतोब्रुवंत्वितिब्राह्मणान्यजमानःप्राङ्मुखस्त्रिःश्रावयेत्।ततो
ब्राह्मणाःपुण्याहमितित्रिर्ब्रूयुः।ततःस्वस्तिभवंतोब्रुवंत्वितित्रिःश्राव
येत्।ॐस्वस्तिरितित्रिर्ब्रूयुः।ततऋद्धिंभवंतोब्रुवंत्वितित्रिःश्रावयेत
।ऋद्ध्यतामितित्रिःप्रतिवचनं।एतच्चब्राह्मणानन्नेनपरिविष्यपुण्या
हंस्वस्तिऋद्धिरित्योंकारपूर्वंत्रिस्त्रिरेकैकमाशिषोवाचयित्वेत्या
दिनाबौधायनेनोक्तं।यमः।पुण्याहवाचनंदैवेब्राह्मणस्यविधीयते
।एतदेवनिरोंकारंकुर्यात्क्षत्रियवैश्ययोरिति॥बह्वृचगृह्यपरिशिष्टेतु।
अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायद
क्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वादीर्घानागानद्योगिरयः
त्रीणिविष्णुपदानिवतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तुशिवा
आपःसंतुसौमनस्यमस्तुअक्षतंचारिष्टंचास्तुगंधाःपांतुसुमंगल्यंचा
स्तुपुष्पाणिपांतुसुश्रियमस्तुअक्षताःपांतुआयुष्यमस्तुतांबूलानिपां
तुऐश्वर्यमस्तु।दक्षिणाःपांतु।आरोग्यमस्तुदीर्घमायुःशांतिःपुष्टिस्तु

ष्टिः श्रीर्यशो विद्याविनयो वित्तं बहुपुत्रं चायुष्यं चास्तु। यं कृत्वा सर्ववेद
यज्ञक्रियाकरणकर्मारंभाः शुभाशोभनाः प्रवर्त्तंते तमहमोंकारमादिं
कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञा
तः पुण्यं पुण्याहं वाचयिष्ये वाच्यतां। द्रविणोदाद्रविणसस्तुरस्य॰ स
विता पश्चातात॰ नवो नवो भवति यजमानः। उच्चादिवि। दक्षिणावंतो
अस्थुरित्येताऋचः पुण्याहे ब्रूयात्। व्रतनियमतपः स्वाध्यायक्रतु
दमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयतां। समाहित
मनसः स्मः। प्रसीदंतु भवंतः। प्रसन्नाः स्मः। शांतिरस्तु। पुष्टिरस्तु। तु
ष्टिरस्तु। ऋद्धिरस्तु। अविघ्नमस्तु॥ आयुष्यमस्तु। शिवं कर्मास्तु। कर्म
समृद्धिरस्तु। पुत्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसमृद्धिर
स्तु। अरिष्टनिरसनमस्तु। यत्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु उ
त्तरे कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्त
राः क्रियाः शुभाः शोभनाः संपद्यंतां तिथिकरणमुहूर्त्तनक्षत्रसं
पदस्तु। तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां। ति
थिकरणे समुहूर्त्ते नक्षत्रे सग्रहे सदैवते प्रीयंतां। अग्निपुरोगा विश्वेदे
वाः प्रीयंतां। इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥ वसिष्ठपुरोगा मरुद्गणाः
प्रीयंतां। माहेश्वरीपुरोगा उमामातरः प्रीयंतां॥ अरुंधतीपुरोगा ए
कपत्न्यः प्रीयंतां। विष्णुपुरोगाः सर्वे देवाः प्रीयंतां। ब्रह्मपुरोगाः सर्वे
वेदाः प्रीयंतां। ब्रह्मा च ब्राह्मणाश्च प्रीयंतां। श्रीसरस्वत्यौ प्रीयेतां। श्र
द्धामेधे प्रीयेतां। भगवती कात्यायनी प्रीयतां। भगवती माहेश्वरी प्री
यतां। भगवती ऋद्धिकरी प्रीयतां। भगवती पुष्टिकरी प्रीयतां। भगव
ती तुष्टिकरी प्रीयतां। भगवंतौ विघ्नविनायकौ प्रीयेतां। सर्वाः कुलदे
वताः प्रीयंतां। हता ब्रह्मद्विषः। हताः परिपंथिनः। हताश्च विघ्नकर्त्तारः।
शत्रवः पराभवं यांतु। शाम्यंतु घोराणि। शाम्यंतु पापानि। शाम्यं त्वीत
यः। शुभानि वर्द्धंतां। शिवा आपः संतु। शिवा अग्नयः संतु। शिवा आहुतयः
संतु। शिवा वनस्पतयः संतु। शिवा अतिथयः संतु। अहोरात्रे शिवे स्या
तां। निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योग
क्षेमो नः कल्पतां। शुक्रांगारकबुधबृहस्पतिशनिराहुकेतुसोमसहि

ताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां।भगवान्नारायणःप्रीयतां।भग
वान्पर्जन्यःप्रीयतां।भगवान्स्वामीमहासेनःप्रीयतां।पुण्याहकालं
वाचयिष्येवाच्यतां॥उद्गातेवशकुनेसामगायसि।याज्यंयाजयति।
यत्पुण्यनक्षत्रं।तद्बट्कुर्वीतोपव्युषं।यदावैसूर्यउदेति।अथनक्षत्रंने
ति।यावतीतत्रसूर्योगच्छेत्॥यत्रजघन्यंपश्येत्॥तावतिकुर्वीतयत्
कारीस्यात्।पुण्याहएवकुरुते॥तानिवाएतानियमनक्षत्राणि।या
न्येवदेवनक्षत्राणि॥तेषुकुर्वीतयत्कारीस्यात्।पुण्याहएवकुरुते
॥पुण्याहंभवंतोब्रुवंतु।ॐपुण्याहंस्वस्तये वायुमुपब्रवामहे।आ
दित्यउदयनीयास्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः
।स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधात्विति।अष्टौ
देवावसवःसोम्यासः।चतस्रोदेवीरजराश्रविष्ठाः तेयज्ञंपांतुरज
सःपरस्तात्।संवत्सरीणममृतंस्वस्ति।स्वस्तिभवंतोब्रुवंतु।आयु
ष्मतेस्वस्ति॰ ऋध्यामस्तोमं॰सर्वामृद्धिमृद्धिमृध्नुयामिति।ऋध्या
स्महव्यैर्नमसोपसद्यः।मित्रंदेवंमित्रधेयंनोअस्तु।अनूराधान्ह
विषावर्धयंतः।शतंजीवेमशरदःसवीराः।त्रीणि।त्रीणिवैदेवानी
मृद्धानि।त्रीणिछंदांसित्रीणिसवनानि।त्रयइमेलोकाः।ऋद्ध्यामे
वतद्वीर्यएषुलोकेषुप्रतितिष्ठति।ऋद्धिंभवंतोब्रुवंतु।ऋध्यतां।
श्रियेजातःश्रियएवैनं॰ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतदमुंचलोक
मिदमुंचसर्वं।तन्नोनक्षत्रमभिजिद्विजित्यश्रियंदधात्वहृणीय
मानं।अहेर्बुध्न्यमंत्रंमेगोपायय मृषयस्त्रैविदाविदुः।ऋचःसा
मानियजूंषि।साहिश्रीरमृतासतां।श्रीरस्त्विति भवंतोब्रुवंतु॥
अस्तुश्रीः।पुण्याहवाचनसमृद्धिरस्तु भगवान्प्रजापतिःप्रीयतां
॥इतिपुण्याहवाचनं॥ततोनीराजनमभिषेकंचयथाशाखंकारये
दिति।पुण्याहवाचनंचादिमध्यांतेषुकार्यं।आद्यावंतेचमध्येचकु
र्याद्ब्राह्मणवाचनमितिवचनात्।ततोस्मिन्कर्मण्यमुकगोत्रम
मुकप्रवरममुकशर्माणंगुरुंत्वांवृणइत्याचार्यंवृत्वाऋग्वेदिनौहौ
पूर्वोक्तकुंडेहोमंकर्त्तुंऋत्विक्त्वेनत्वामहंवृणे॥ऋग्वेदःपद्मपत्रा॰
क्षोगायत्रःसोमदैवतः।अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवे

तिप्रत्येकं वृणुयात्॥ सर्वत्रप्रथमं ब्रह्मणः ततो होतुरिति क्रमः। वृतो
स्मीत्येव प्रतिवचनं॥ यजुर्वेदिनो दक्षिणे॥ कातरासो यजुर्वेदस्त्रैष्टुभो
विष्णुदैवतः। काश्यपेयस्त्वं विप्रेंद्र ऋत्विक् त्वं मेमखे भवेति। सामगो
पश्चिमे। सामवेदस्तु पिंगाक्षो जागतः शक्रदैवतः। भारद्वाजस्तु वि
प्रेंद्र ऋत्विक् त्वं मेमखे भवेति। अथर्वणा तूत्तरे। बृहन्नेत्रो ऽथर्ववेदः
त्रिष्टुभो रुद्रदैवतः। विशंपायनगोत्रस्तु ऋत्विक् त्वं मेमखे भवेति॥
ततो जापकानां। ते चाष्टाविति कल्पतरौ। चत्वार इति रूपनारायणा
दयः। एतन्मते ऽष्टौ ऋत्विजः चत्वारो जापकाः गुरुश्चत्रयोदश। अष्टौ
ऋत्विजो ऽष्टौ जापकाः गुरुश्चेति सप्तदश वा॥ अष्टौ ऋत्विजश्चत्वा
रो जापकाश्चत्वारो द्वारपालका गुरुश्चेति वा सप्तदश एवं वरणानं
तरं॥ तत्र कर्मणे वाचार्यादीनां तच्छाखया मधुपर्कं इति हेमाद्रौ।
संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत्॥ अपूज्य कारयेत् कर्म किं
ल्बिषेरेव युज्यतेति वचनात्॥ ततो यदाबध्नन्निति मंत्रेण। येनबद्धो
बली राजा दानवेंद्रो महाबलः। तेन त्वामभिबध्नामि रक्षे मा चल मा च
लेति॥ अनेन च पीतसूत्रं यजमानतत्पत्नीगुर्वृत्विक् द्वारपालानां ह
स्ते रक्षार्थं बध्नंति मध्यदेशे॥ ततो गौर्यादि षोडश ब्राह्म्यादि सप्त च मा
तॄः। श्रीश्च लक्ष्मी धृति मेधा स्वाहा प्रज्ञा सरस्वती। ति वसोर्द्धारादेवता
श्च संपूज्य सपिंडमपिंडं वा वृद्धिश्राद्धं कुर्यात्॥ तत्र रूपनारायणी
ये विशेषः। अग्नौकरणमर्घ्यं चावाहनं चावनेजनं॥ पिंडश्राद्धं प्रकु
र्वीत पिंडहीने निवर्त्तते॥ तथा। पिंडनिर्वापरहितं यत्र श्राद्धं विधीय
ते॥ स्वधावाचनलोपो ऽस्ति विकिरस्तु न लिप्यते। अक्षय्यं दक्षिणा स्व
स्ति सौमनस्यं यथास्थितमिति॥ तत्र संक्षिप्त प्रयोगः। सत्यवसुसंज्ञ
का विश्वेदेवाः ॐ भूर्भुवः स्वः इदं वः पाद्यं एवं सर्वत्र पाद्यं। मातृपिता
महीप्रपितामह्यः नांदीमुख्यः। ॐ भूर्भुवः स्वः इदं वः पाद्यं। पितृपिता
महप्रपिता ——— महा नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यं। मा
तामहप्रमातामहवृद्धप्रमातामहा नांदीमुखाः सपत्नीकाः भूर्भुवः
स्वः इदं वः पाद्यं॥ आचमनं। सत्यवसुसंज्ञकानां विश्वेषां देवानां भूर्भु
वः स्वः इदमासनं। सुखासनं। नांदीश्राद्धे क्षणो क्रियेतां। ॐ तथा प्राप्नु

तांभवंतौ।प्राप्नवावःमातृपितामहीप्रपितामहीनांभूर्भुवःस्वःइद
मासनंसुखासनं॥नांदीश्राद्धेक्षणौक्रियेतां।ॐतथाप्राप्नुतांभवंतौप्रा
प्नवाव।मातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानामि
दमासनं।नांदीश्राद्धेक्षणौक्रियेतां।ॐतथाप्राप्नुतांभवंतौप्नुवावः॥ प्रा
नतोगंधादिदानं॥सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यइदंगंधाद्य
र्चनंस्वाहासंपाद्यतांवृद्धिः।मातृपितामहीप्रपितामहीभ्योनांदी
मुखीभ्यइदंगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः।पितृपितामहप्रपि
तामहेभ्योनांदीमुखेभ्यइदंगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः।मा
तामहप्रमातामहवृद्धप्रमातामहेभ्योनांदीमुखेभ्यःसपत्नीसहि
तेभ्यइदंगंधाद्यर्चनंस्वाहासंपाद्यतांवृद्धिः।ततःपरिवेषणंकृत्वागा
यत्र्याभोक्ष्यपृथिवीतेपात्रमितिपात्रमालभ्यसत्यवसुसंज्ञकेभ्योविश्वे
भ्योदेवेभ्योयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेणस्वाहासं
पाद्यतांवृद्धिः।मातृपितामहीप्रपितामहीभ्योनांदीमुखीभ्योयुग्म
ब्राह्मणभोजनपर्याप्तमन्नममृतरूपेणस्वाहासंपाद्यतांवृद्धिः।पि
तृपितामहप्रपितामहेभ्योनांदीमुखेभ्योयुग्मब्राह्मणभोजनपर्या
प्तमन्नममृतरूपेणस्वाहासंपाद्यतांवृद्धिः॥मातामहप्रमातामह
वृद्धप्रमातामहेभ्योनांदीमुखेभ्यःसपत्नीकेभ्योयुग्मब्राह्मणभो
जनपर्याप्तमन्नममृतरूपेणस्वाहासंपाद्यतांवृद्धिः।स्वस्तिनइंद्रो
वृद्धश्रवाइतिपाठः।अनेननांदीश्राद्धेनकर्मांगदेवताःप्रीयंतां वृ
द्धिःपुरुषसूक्तादिजपः।नांदीश्राद्धंसुसंपन्नंसुप्रोक्षितमस्तु॥ शि
वाआपःसंतु।सौमनस्यमस्तु।अक्षतंचारिष्टंचास्तु।नांदीमुख्यो
मातरःप्रीयंतां।नांदीमुखाःपितरःपितामहाःप्रीयंतां॥नांदीमुखा
मातामहाप्रमातामहावृद्धप्रमातामहाःप्रीयंतां।ततोगोत्रंनोवर्द्धतां॥
वर्द्धतामित्युक्ते।दातारोनोभिवर्द्धंतांवेदाःसंततिरेवच॥श्रद्धाचनोमा
व्यगमद्बहुदेयंचनोस्त्विति॥अन्नंचनोबहुभवेदतिथींश्चलभेमहि
।याचितारश्चनःसंतुमाचयाचिष्मकंचनेतिसंप्रार्थ्यविप्रैर्दातारोवो
भिवर्द्धंतांवेदाःसंततिरेवच।श्रद्धाचवोमाव्यगमद्बहुदेयंचवोस्तु।अ
न्नंचवोबहुभवेदतिथींश्चलभध्वं।याचितारश्चवःसंतुमाचयाचिष्व

कंचनेति प्रत्युक्ते ब्राह्मामलकास्तान्निष्क्रपंचादक्षिणांदत्वाविश्वेदेवाः
श्रीपंतामिति देवेवान्चयित्वावाजेवाज इति पूर्ववि सृज्यामावाजस्ये
त्यनुव्रजेदिति नांदीश्राद्धं॥अथवास्तुपूजा।मात्स्ये।यज्ञोत्सवादौच
बलिस्त्वाहारोभविष्यति।वास्तुपूजामकुर्वाणस्तवाहारोभविष्यती
ति।तथा।वास्तुयज्ञःसमुद्दिष्टस्तदाप्रभृतिशांतयइतिज्ञानरत्नावल्यां
॥चतुःषष्टिपदंवास्तुदेवानांपरमंहितं।एकाशीतिपदंवास्तुब्रह्माणां
तुप्रकीर्त्यते॥प्रपंचसारे॥कृत्वावनिंसमतलांचतुरस्रसंख्यामष्टा
दिकोष्टकपदांचहिकोणसूत्रां।तस्यांचतुष्पदसमन्वितमध्यकोष्टब्र
ह्मानुसाधकवरेणसमर्चनीयइत्यादिअत्रप्रयोगः॥मंडपनिर्ऋति
भागेहस्तमात्रांवेदिंकृत्वातस्यांतत्स्थापितेवस्त्रेवासुवर्णादिशला
कयानवरेखाःप्राक्पश्चिमायतानवचदक्षिणोदगायताःकृत्वामध्य
कोष्टचतुष्टयमेकीकृत्यप्रतिकोणंत्रिषुत्रिषुपदेषुसूत्रंदद्यात्।तथा
च चतुर्विंशतिरर्धपदानिसंपद्यंते।अथकालादिसंकीर्त्यमारीप्सित
स्यामुककर्मणःसांगतासिद्ध्यर्थंवास्तुपूजांकरिष्य इतिसंकल्प्य वा
स्तुमंडलस्याग्नेयादिकोणेषुशंकुचतुष्टये।विशंतुभूतलेनागालोक
पालाश्चसर्वतः।मंडपेत्रावतिष्ठंतुआयुर्बलकराः सदेतिमंत्रेण निधा
य।अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः।तेभ्योबलिंप्रयच्छा
मिपुण्यमोदनसंयुतं।नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः।बलिं
तेभ्यःप्रयच्छामिसर्वेगृह्णंतुमंत्रितं। ॐनमोवासुरक्षेभ्योयेचान्येता
न्समाश्रिताः।बलिंतेभ्यःप्रयच्छामिपुण्यमोदनमुत्तमं॥रुद्रेभ्यश्चैव
सर्पेभ्योयेचान्येतान्समाश्रिताः।बलिंतेभ्यःप्रयच्छामिगृह्णंतुसततं
तुष्टा इतिमंत्रैःशंकुपार्श्वेयथाक्रमं माषभक्तबलीन्दत्वा। शांतिर्यशो
वतीकांतिर्विशालाप्राणवाहिनी॥सतीसुमनानंदासुभद्रा इतिनव
प्रागायतरेखादेवताःपूजयित्वा।हिरण्यासुप्रभालक्ष्मीर्विभूतिर्विमला
प्रिया॥जयाकालाविशोका इतिनवदक्षिणोत्तरायतरेखादेवताश्चसं
पूज्यमध्येसमस्तव्याहृतिभिर्वास्तुपुरुषमावाह्यवास्तोष्पतेइति मं
त्रेणसंपूज्यबलिंचदत्वामध्यपदचतुष्टयेवास्तोर्हृदयेब्रह्माणमावा
ह्य पूजयित्वा।ॐब्रह्मणेनमोबलिंसमर्पयामीति पायसादिबलिंदद्या

तु॥ततःपूर्वपदद्वयेदक्षिणस्तनेअर्यम्णेनमः।दक्षिणपदद्वयेजठर
दक्षिणभागेविवस्वते॰पश्चिमपदद्वयेजठरवामभागेमित्राय॰उ
दक्पदद्वयेवामस्तनेपृथ्वीधरायनमइत्युदक्पदद्वयेआग्नेयको॰
णस्सूत्रद्विधाकृतपदोत्तरार्द्धेदक्षिणहस्तेसावित्राय।दक्षिणार्द्धेसवि
त्रेच॥एवंनैर्ऋत्यपदपूर्वार्द्धेदक्षिणयोर्विबुधाधिपाय॥तत्पश्चिमा
र्द्धेमेढ्रेजयंताय।वायव्यपददक्षिणार्द्धेवामहस्तेराजयक्ष्मणे॥
उत्तरार्द्धेरुद्रायच।ईशानपदार्द्धेउरसि।अद्भ्यःदक्षिणार्द्धेमुखेआप
वत्साय।ततोंत्यपंक्तिगतेईशानपददक्षिणार्द्धेशिरसिशिखिने।त
द्दक्षिणसार्द्धपदेदक्षिणनेत्रेपर्जन्याय।तद्दक्षिणपदयोर्दक्षिणश्रोत्रे
जयंताय।दक्षिणपदयोर्दक्षिणांसेकुलिशायुधाय।तद्दक्षिणयोर्दक्षि
णबाहौसूर्याय।तद्दक्षिणयोर्दक्षिणबाह्वावेवसत्याय।तद्दक्षिणेसा
र्द्धेदक्षिणकूर्परेभृशाय।तद्दक्षिणपदार्द्धेदक्षिणप्रबाहौआका
शाय।तत्पश्चिमार्द्धेदक्षिणप्रबाहावेववायवे॥तत्पश्चिमेसार्द्धेदक्षि
णमणिबंधेपूष्णे॥तत्पश्चिमयोर्दक्षिणपार्श्वेवितथाय।पश्चिमयो
र्दक्षिणपार्श्वएवगृहक्षताय॥तत्पश्चिमयोर्दक्षिणोरौयमाय।तत्प
श्चिमयोर्दक्षिणजानौगंधर्वाय।तत्पश्चिमेसार्द्धपदेदक्षिणजंघायां
भृंगराजाय।तत्पश्चिमेनैर्ऋत्यपदार्द्धेदक्षिणस्फिजिमृगाय।तदु
त्तरार्द्धेपादयोःपितृभ्यः।तदुत्तरेसार्द्धपदेवामस्फिजिदौवारिकाय।त
दुत्तरयोर्वामजंघायांसुग्रीवाय।तदुत्तरयोर्वामजानौपुष्पदंताय।
तदुत्तरयोर्वामोरौवरुणाय।तदुत्तरयोर्वामपार्श्वेसुराय।तदुत्तरे॰
सार्द्धपदेवामपार्श्वएवशोषाय।तदुत्तरेवायव्यार्द्धेवाममणिबंधे
पापाय।तत्प्रागर्द्धेवामप्रबाहौरोगाय।तत्प्राक्सार्द्धेवामप्रबाहावे
वाहये।तत्प्राक्पदद्वयेवामबाहौभल्लाटाय।तत्प्राग्द्वयेवामबाहावे
वसोमाय।तत्प्राग्द्वयेवामांसेसर्पाय।तत्प्राक्सार्द्धेवामश्रोत्रेअदि
त्यै।तत्प्रागर्द्धेवामनेत्रेदित्यै।तदुत्तरेवास्तोष्पतइतिवास्तोष्पतिं
॥ततोमंडलाद्बहिरीशानादिषुचरक्यै॰विदार्यै॰पूतनायै॰पापराक्ष॰
स्यै।ततःपूर्वादिषुस्कंदाय।अर्यम्णे॰जंभकाय।पिलिपिच्छाय॰पुनः
पूर्वादिषुइंद्रादीन्ततोमंडलादीशानेकलशंसंस्थाप्यतत्रवरुणंत॰

त्वायामीत्यावाह्यपूजयेत्।यथामेरुगिरेःशृंगंदेवानामालयःसदा
।तथाब्रह्मादिदेवानाममयज्ञेस्थिरोभवेदितिप्रार्थयेत्।ततउदुंब
रादिसमित्तिलाज्यैःस्वतंत्रस्थंडिलेष्टाविंशतिरष्टौवाप्रत्येकंतत्त
न्नाममंत्रैर्हुत्वावास्तोष्पतइतिचतुर्भिश्चहुत्वाॐवास्तोष्पतेध्रु
वास्थूणामित्यनेनचपंचबिल्वफलानिहुत्वास्विष्टकृदादिपूर्णाहु
त्यंतंकुर्यात्।।ततोमंडलदेवताभ्यःपायसबलिंदत्वाकृणुष्वपाजइ
तिसूक्तादिनामंडपंत्रिसूत्र्यावेष्टयित्वावास्तुकलशोदकेनयजमा
नमभिषिच्यपुनःसंपूज्ययथाशक्तिदक्षिणांदत्वाब्राह्मणान्भोज
येदिति।शारदातिलकेतुहोमोनोक्तःतिलाज्यादिद्रव्याणांविकल्प
इतिग्रंथान्तरे।।इतिवास्तुपूजा।।मात्स्ये।उपोषितास्ततःसर्वेकृत्वैव
मधिवासनमितिपाद्मे।उपवासोभवेदेवमशक्तौनक्तमिष्यते।स
द्योधिवासनेवाथकुर्याद्वोविकल्पोनरइतितत्रैवोक्तं।अधिवासनं
चैवं।शुक्लवेषःसपत्नीकःसकृत्विक्कोयजमानःपूर्णकलशंगृही
त्वाभद्रंकर्णेभिरित्यादिमंत्रघोषेणमंडपंप्रदक्षिणीकृत्यपश्चिम
द्वारेणप्रविश्यदेशकालादिस्मृत्वाकरिष्यमाणेतत्कर्मांगतयामं
डपदेवतास्थापनादिकरिष्यइतिसंकल्प्यगणपतिंसंपूज्यमंड
पांतःसर्वतःसर्षपान्विकिरेत्।तत्रमंत्राः।यदत्रसंस्थितंभूतंस्था
नमाश्रित्यसर्वदा।।स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु।।
अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं।सर्वेषामविरोधेनब्रह्म
कर्मसमारभइति।ततःकुशैःपंचगव्येनसर्वत्रापोहिष्ठेतितृचेन
प्रोक्षयेत्।ततःस्वस्तिनइतिमंत्रंपठेत्।।अथद्वारपूजा।।पूर्वद्वा
रेद्वारश्रियैनमः।ऊर्ध्वंदेहल्यैअधः।वामदक्षिणस्तंभयोर्गणेशा
यस्कंदायनमः।द्वारस्थितकलशद्वयेगंगायैयमुनायै।दक्षिणद्वा
रेद्वारश्रियै।ऊर्ध्वंदेहल्यै·अधस्तंभयोःपुष्पदंताय।कपर्दिने।कल
शद्वयेगोदायैकृष्णायै।पश्चिमेद्वारश्रियैइत्यूर्ध्वं।देहल्यैअधःस्तं
भयोःनंदिनेचंडाय।कलशद्वयेरेवायै।ताप्यै।उत्तरेद्वारश्रियैऊर्ध्वं।दे
हल्यैअधःस्तंभयोर्महाकालाय०भृंगिणेनमः।कलशद्वयेवाण्यैवेण्यै
।इतिद्वारपूजा।ततःबहिर्हस्तमात्रेवटतोरणमाश्वत्थंवासुदृढंनाम

कंसुशोभननामकंवाशंखांकितमग्निमीलइतिमंत्रेणन्यस्यसंपूज्य
राहुबृहस्पतीतत्रन्यसेत्तंपूजयेच्च।तत्रैकःकलशःस्थाप्यः।तत्रमही
द्यौरितिभूमिप्रार्थना।ओषधयःसमितियवप्रक्षेपः।आजिघ्रकलशमि
तिकलशनिधानं।इमंमेगंगइतिजलपूरणं।गंधद्वारामितिगंधंप्रक्षि
पेत्।।याओषधीरितिसर्वौषधीः।कांडात्कांडादितिदूर्वाः।अश्वत्थेवइ
तिपंचपल्लवान्।स्योनापृथिवीतिसप्तमृदः।याःफलिनीरितिफलं।स
हिरत्नानिइतिरत्नं।हिरण्यरूपइतिहिरण्यं।युवासुवासाइतिवस्त्रा
दिनावेष्टयेत्।पूर्णादर्वीतिधान्यपूर्णपात्रमुपरिनिदध्यात्।तत्रध्रुवा
वाहनंपूजनं।।ततोदक्षिणेऔदुंबरंप्लक्षंवासुभद्रंविकटंवाचक्रां
कितंतोरणंइषेत्वोर्ज्जेत्वेतिनिधायचंदनादिचर्चितंकृत्वासूर्यमंगा
रकंचतत्रन्यसेत्।ततःपूर्ववत्कलशंस्थापयित्वातत्रधरामावाह्या
र्चयेत्।।ततःपश्चिमेप्लक्षमौदुंबरंवासुकर्मसुभीमंवागदांकितं
तोरणंअग्नआयाहीतिन्यस्यचंदनादिनाचर्चितंशुक्रंबुधंचतत्रन्य
सेत्।ततःपूर्ववत्कलशंस्थापयित्वातत्रवाक्पत्यावाहनपूजनादि।
ततउत्तरेनैयग्रोधमाश्वत्थंपालाशंवासुहोत्रंसुप्रभवंपद्मांकितंतो
रणंशन्नोदेवीरितिनिधायपूजितंकृत्वासोमंकेतुंशनिंचतत्रन्यसेत्
।ततःकलशंस्थापयित्वातत्रविघ्नेशावाहनपूजनादि।ततःपूर्वद्वारे
द्वारशाखाद्वयेकलशद्वयंदध्यक्षतादियुक्तंपूर्ववत्स्थापयेत्।ऐरावतं
कलशद्वयेन्यस्यार्चयेत्।तत्रपूर्वस्मिन्नृग्वेदिनाऽऽत्विजोद्वावेकंवाशां
तिसूक्तजपार्थत्वेनत्वामहंवृणइतिप्रत्येकं।ऋग्वेदःपद्मपत्राक्षोगा
यत्रःसोमदैवतः।अत्रिगोत्रस्तुविप्रेंद्रशांतिपाठमथैवकुर्वीतिवृत्वाग्नि
मीलइत्यादिनापूजयेच्च।ततःएह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोव
ज्रधरामरेश।संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते
।भोइंद्रइहागच्छइहतिष्ठेतींद्रंसांगंसपरिवारंसायुधंसशक्तिकंद्वार
कलशेआवाह्यत्रातारमिंद्रमितिपूजयित्वाआशुःशिशानइतिमंत्रेण
तांपताकांध्वजंचसमुच्छ्रयेत्।।ततऐरावतस्थंपीतवर्णंसहस्राक्षं
दक्षिणवामहस्तस्थवज्रोत्पलमिंद्रंध्यात्वाइंद्रःसुरपतिःश्रेष्ठोवज्र
हस्तोमहाबलः।शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमः।इतिनत्वाइं

द्रायसांगायसपरिवारायसायुधायसशक्तिकायेतंमाषभक्तबं
लिंसमर्पयामीतिबलिंदद्यात्।ततआचम्याग्नेयकोणेगत्वापूर्वव
त्कलशंस्थापयित्वातत्रपुंडरीकममृतंचसंपूज्यएह्येहिसर्वामरह
व्यवाहमुनिप्रवर्य्यैरभितोभिजुष्ट।तेजोवतालोकगणेनसार्द्धंममा
ध्वरंपाहिकवेनमस्ते।भोअग्नेइहागच्छइहतिष्ठेतिसांगादिकमग्निंक
लशेआवाह्यत्वंनोअग्नेत्यग्निंसंपूज्यअग्निंदूतमितिरक्तांपताकांर
क्तंध्वजंचोच्छ्रयेत्॥ततःछागस्थंरक्तंदक्षिणवामकरधृतशक्ति
कमंडलुयज्ञोपवीतिनमग्निंध्यात्वा।आग्नेयःपुरुषोरक्तःसर्वदेवम
योव्ययः।धूमकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वाअग्नये
सांगायेत्यादिएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततःकृ
ताचमनोदक्षिणेगत्वाप्रतिहारशाखंपूर्ववत्कलशद्वयंस्थापयित्वा
वामनदिग्गजंतत्रार्चयेत्॥ततोयजुर्वेदिनौद्वावेकंवादक्षिणद्वारेशां
तिसूक्तजपत्वेनत्वांवृणाइत्युक्त्वाकांतरक्षोयजुर्वेदस्त्रैष्टुभोवि
ष्णुदैवतः।काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिप्रत्येकंसंप्रा
र्थ्यैषेत्वोर्जेत्वेतिपूजयेत्॥ततएह्येहिवैवस्वतधर्मराजसर्वामरैर
र्चितधर्ममूर्त्ते।शुभाशुभानंदशुचामधीशशिवायनःपाहिमखंन
मस्ते।भोयमेहागच्छइहतिष्ठेतिसांगादिंयममावाह्ययमायसोम
मितिसंपूज्यकृष्णांपताकांकृष्णंध्वजंचायंगौरित्युच्छ्रयेत्।ततो
महिषारूढंधृतदंडपाशदक्षिणवामकरंअंजनपर्वततुल्यरूप
मग्निसमलोचनंयमंध्यात्वामहामहिषमारूढंदंडहस्तंमहाबलं।आ
वाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिनत्वासांगाययमायेतं
माषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।ततआचम्यनैर्ऋत्यांपू
र्ववत्कलशंस्थापयित्वाकुमुदगजंदुर्जयंचसंपूज्यएह्येहिरक्षोगण
नायकस्त्वंविशालवेतालपिशाचसंघैः।ममाध्वरंपाहिपिशाचनाथ
लोकेश्वरस्त्वंभगवन्नमस्ते।भोनिर्ऋतेइहागच्छइहतिष्ठेतिसांगमावा
ह्यामुन्वंतमितिसंपूज्यनीलांपताकांध्वजंचमोषुणइत्युच्छ्रित्यनरा
रूढंखड्गहस्तंनीलवर्णंमहाबलं।महाकायंबहुराक्षससंयुतंनिर्ऋतिं
ध्यात्वानिर्ऋतिंखड्गहस्तंचसर्वलोकैकपावनं।आवाहयामियज्ञेस्मि

नपूजेयंप्रतिगृह्यतामितिनत्वासांगायनिर्ऋतयेएतंमाषभक्तबलिं
समर्पयामीतिबलिंदद्यात्॥ततआचम्यपश्चिमेप्रतिद्वारशाखंकल
शद्वयंनिधायांजनंदिग्गजंन्यस्यार्चयेत्।ततःसामगाद्दत्विजोऋ
त्विजंवावृत्वासामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः॥भारद्वाजस्तु
विप्रेंद्रशांतिपाठंमखेकुर्विति प्रार्थयित्वा अग्नआयाहीतिप्रार्थ्य।ततएह्ये
हियादोगणवारिधीनांगणेनपर्जन्यसहाप्सरोभिः॥विद्याधरेंद्रामर
गीयमानपाहित्वमस्मान्भगवन्नमस्तेइत्युक्त्वाभोवरुणइहागच्छे
हतिष्ठेतिसांगंवरुणमावाह्यतत्वायामीतिसंपूज्यश्वेतांपताकांध्व
जंचेमंमेवरुणेत्युच्छ्रित्यमकरस्थपाशहस्तंकिरीटिनंश्वेतवर्णंव
रुणंध्यात्वा।पाशहस्तंचवरुणंयादसांपतिमीश्वरं॥आवाहयामि
यज्ञेस्मिन्वरुणायनमोनमइतिनत्वासांगायवरुणायेतंमाषभ
क्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततउपस्पृश्यवायव्यांपूर्वव
त्कलशंस्थापयित्वापुष्पदंतेसिद्धार्थंचतत्रपूजयित्वाएह्येहियज्ञे
ममरक्षणायमृगाधिरूढःसहसिद्धसंघैः॥प्राणाधिपःकालकवेःस
हायगृहाणपूजांभगवन्नमस्ते।भोवायोइहागच्छेहतिष्ठेतिसांगा
दिंवायुमावाह्यतववायवृतस्पतइतिसंपूज्यवायोःशतमितिधूम्रां
पताकांध्वजंचोच्छ्रित्यमृगारूढंचित्रांबरधरंयुवानंवरध्वजधरंवाम
हस्तंवायुंध्यात्वावायुमापजगतोवायवहंनमामितइतिनत्वासांगा
यवायवेएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्।ततआचम्यो
त्तरेप्रतिशाखंकलशद्वयंस्थापयित्वासार्वभौमंदिग्गजंन्यस्यपूज
यित्वाथर्ववेदोक्तऋत्विजोऋत्विजंवाउत्तरद्वारेशांतिसूक्तजपार्थंत्वेना
र्हत्वेनाहंत्वांवृणइतिउक्त्वागृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः॥वैशं
पायनविप्रेंद्रशांतिपाठंमखेकुर्विंत्युक्त्वाप्रार्थ्यशन्नोदेवीरितिपूजयेत्
।एह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं।सर्वौषधीभिःपितृ
भिःसहैवगृहाणपूजांभगवन्नमस्ते॥भोसोमइहागच्छेहतिष्ठेतिसां
गादिंसोममावाह्य।वयंसोमेतिसंपूज्यहरितांपताकांध्वजंचाप्यायस्व
तिन्यस्यनरयुतपुष्पकविमानस्थंकुंडलकेयूरहारसंशोभितंवरदगदाध
रदक्षिणवामहस्तंमुकुटिनंमहोदरंस्थूलकायंह्रस्वंपिंगलनेत्रंपानवि

ग्रहंशिवसखंविमानस्थंकुबेरंध्यात्वासर्वनक्षत्रमध्येतुसोमोराजा
व्यवस्थितः।तस्मैसोमायदेवायनक्षत्रपतयेनमइतिनत्वासांगाय
सोमायैतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततईशान्यां
गत्वाचम्यपूर्ववत्कलशंसंस्थाप्यसुप्रतीकनामानंदिग्गजंमंगलंच
तत्रपूजयित्वाएह्येहिविश्वेश्वरनस्त्रिशूलकपालखट्वांगधरेणसार्द्धं
।लोकेनयज्ञेश्वरयज्ञसिद्ध्यैगृहाणपूजांभगवन्नमस्ते।ईशानेहागं
च्छेहतिष्ठेतितमावाह्यतमीशानमितिसंपूज्यश्वेतांसर्ववर्णांवापता
कांध्वजंचाभित्वादेवसवित्तरित्युच्छ्रित्यवृषारूढंवरदंत्रिशूलयुत
दक्षिणवामहस्तद्वयंत्रिनेत्रंशुद्धस्फटिकवर्णमीशानंध्यात्वावृष
धसमारूढंशूलहस्तंत्रिलोचनं।आवाहयामियज्ञेस्मिन्पूजेयंप्र
तिगृह्यतां।सर्वाधिपोमहादेवईशानःशुक्लईश्वरः।शूलपाणिर्विरूपाक्ष
स्तस्मैनित्यंनमोनमइतिनत्वासांगायैतंमाषभक्तबलिंसमर्पयामी
तिबलिंदद्यात्।ततआचम्येशानपूर्वयोर्मध्येगत्वाएह्येहिपातालध
रामरेंद्रनागांगनाकिन्नरगीयमान।यक्षोरगेंद्रामरलोकसंघैरनंतर
साध्वरमस्मदीयं।भोअनंतइहागच्छेहतिष्ठेतिसांगमनंतमावाह्य
गौरितिसंपूज्यमेघवर्णांश्वेतांपताकांध्वजंचायंगौरित्युच्छ्रित्यअनं
तं शूमनासीनंफणसप्तकमंडितं।पद्मशंखकरोर्ध्वोधोदक्षिणकरद्व
पंचक्रगदाधरोर्ध्वोधोवामकरद्वयंनीलवर्णमनंतंध्यात्वायोसावनं
तरूपेणब्रह्मांडंसचराचरं।पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनम
इतिनत्वासांगायानंतायैतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्
।ततआचम्यनैर्ऋतपश्चिमयोर्मध्येगत्वाएह्येहिसर्वाधिपतेसुरेंद्र
लोकेनसार्द्धंपितृदेवताभिः।सर्वस्यधातास्यमितप्रभावोविशाध्वरं
नःसततंशिवाय।भोब्रह्मन्निहागच्छेहतिष्ठेतिब्रह्माणमावाह्यब्रह्म
जज्ञानमितिसंपूज्यरक्तांपताकांध्वजंचब्रह्मजज्ञानमित्युच्छ्रित्यचतु
र्मुखंहंसारूढंअक्षमालांकुशमुष्टिधरोर्ध्वोधोदक्षिणकरद्वयंस्रुवक
मंडलुधरोर्ध्वोधोवामकरद्वयंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्या
त्वापद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः।यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै
नित्यंनमोनमइतिनत्वासांगायब्रह्मणेएतंमाषभक्तबलिंसमर्पयामी

तिवलिंदद्यात्। नैऋत्यपश्चिमोनराले अनंतबलिदानं ईशानपूर्वांत
रालेब्रह्मबलिदानंवेतिरूपनारायणः। तत आचम्यमंडपमध्येत्य
चदंडोदशहस्तदीर्घस्त्रिहस्तविस्ततः पंचहस्तदीर्घोहस्तविस्तारो
वा महाध्वजः किंकिण्यादियुक्त इंद्रस्यतृष्णइतिस्थाप्यतत्रैवब्रह्म
पूजनंचततो मंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्यो नमः वंशेषुकिंन
रेभ्योनमः। पृष्ठेपन्नगेभ्योनमः इत्यर्चयेत्। ततः पूर्वभागेउपलिप्त
भूमावुपविश्यत्रैलोक्येयानिभूतानिस्थावराणिचराणिच। ब्रह्मवि
ष्णुशिवैः सार्द्धं रक्षांकुर्वंतुतानिमे। देवदानवगंधर्वायक्षराक्षसपन्नगाः
॥ ऋषयोमनवोगावोदेवमातरएवच। सर्वेममाध्वरंरक्षांप्रकुर्वंतुमुदा
न्विताः॥ ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालोगणैःसह। रक्षंतुमंडपंसर्वे
घ्नंतुरक्षांसिसर्वतइतिपठित्वात्रैलोक्यस्थेभ्यःस्थावरेभ्योभूते
भ्योनमस्त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमः। ब्रह्मणेविष्णवेशिव
यदेवेभ्यो दानवेभ्योगंधर्वेभ्योराक्षसेभ्यः पन्नगेभ्यऋषिभ्योमनु
ष्येभ्योगोभ्योदेवमातृभ्योनमइतिप्रत्येकंसंपूज्य भूमौमाषभक्तब
लिंदद्यात्। ततोयजमानः सर्वैऋत्विग्भिःसहप्राग्द्वारेणमंडपंप्रविश्य
दक्षिणद्वारपश्चिमभागेउपविश्यगुर्वादयो यथाविहितंकर्मकुरुध्व
मितिवदेत्। प्रतिकुंडमेकैकः कलशःस्थाप्योऋत्विग्भिरितिकेचित्।
गुरुणास्थाप्यइत्यन्ये। ततोगुरुर्यजमानान्वितोग्रहवेद्यांसर्वतोभ
द्रमंडलदेवताःस्थापयेदितिपितामहचरणाः॥ यथा। अद्येहेत्यादि
मंडलदेवतास्थापनंकरिष्यइतिसंकल्प्यस्थापयेत्। तत्रमध्येब्रह्मा
णं। ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप्। ब्रह्मस्थापनेपूजनेवि
नियोगः। एवमुत्तरत्र। ब्रह्मजज्ञानं। ततउदीचीमारभ्यवायवीपर्यंतं
कुबेरादीन्वाय्वंतान् अष्टौलोकपालान्। तत्र आप्यायस्वगोतमःसो
मोगायत्री। ॐ आप्यायस्व। अभित्वाजीगर्त्तःशुनःशेप ईशानोजग
तीअभित्वादेवसवितः। इंद्रंवोमधुच्छंदाइंद्रोगायत्री। ॐ इंद्रंवो वि
श्वतः अग्निंकाण्वोमेधातिथिरग्निर्गायत्री। ॐ अग्निंदूतंवृणीमहे॥
यमायसोमंयमोनुष्टुप्यमायसोमं। मो षुणो घोरःकाण्वोनिर्ऋतिर्गा
यत्री। ॐ मोषुणः। तत्त्वायामिशुनःशेपोवरुणस्त्रिष्टुप्। तत्त्वायामि०

वायोः शतंगौतमोवामदेवोवायुरनुष्टुप् वायोशतं। वायुसोममध्ये श्वेवसून् ज्मया अत्रमैत्रावरुणोवसिष्ठोवसवस्त्रिष्टुप्। ज्मया अत्र। सोमेशानमध्येएकादशरुद्रान्। आरुद्रासः श्यावाश्वएकादशरुद्राजगती। ॐआरुद्रासः। ईशानेंद्रमध्येद्वादशादित्यान्। त्यान्नुसमदोमत्स्योद्वादशादित्यागायत्री। ॐत्यान्नुसत्रियान्। इंद्राग्निमध्ये श्विनौ। अग्निनाराहूगणोगौतमोश्विनावुष्णिक्। ॐअश्विनावर्तिः। अग्नियममध्येविश्वेदेवान्सपेतकान्। ॐमासोमधुश्चंद्राविश्वेदेवागायत्री। ॐमासः॥ यमनिर्ऋतिमध्येसप्तयक्षान्। अभित्यंवामदेवः सप्तयक्षाःप्रकृतिः। अभित्यंदेवंसवितारमोण्योः कविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविं। ऊर्ध्वायस्यामतिर्भा अदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः। निर्ऋतिवरुणमध्येभूतनागान्। आयंगौः सार्पराज्ञीसर्पागायत्री। आयंगौः। वरुणवायुमध्येगंधर्वाप्सरसः। अप्सरसामैतशत्रुःश्यश्रृंगोगंधर्वाप्सरसोनुष्टुप्। अप्सरसांगंधर्वाणां। ब्रह्मसोममध्येस्कंदनंदीश्वरशूलमहाकालान्। कुमारंकुमारः स्कंदस्त्रिष्टुप्। अदितिर्द्यौः। निष्ठा ब्रह्मेंद्रमध्येदुर्गांविष्णुंच। तामग्निवर्णांसौभरिर्दुर्गात्रिष्टुप्। उदीरतां० सूनृताः। ब्रह्मयममध्येमृत्युरोगान्। परंमृत्योः संकुसुकोमृत्युरोगास्त्रिष्टुप्। ॐपरंमृत्योअनुपरेहि। ब्रह्मनिर्ऋतिमध्येगणपतिं। गणानांत्वागृत्समदोगणपतिर्जगती। ॐगणानांत्वा। ब्रह्मवरुणमध्ये अपः। शन्नोंवरीषसिंधुद्वीपआपोगायत्री। ॐशन्नोदेवीः। ब्रह्मवायुमध्येमरुतः। मरुतोयस्यराहूगणोगौतमोमरुतोगायत्री। ॐमरुतोयस्य। ब्रह्मणः पादमूलेकर्णिकाधः पृथ्वीं। स्योनामेधातिथिर्भूमिर्गायत्री। ॐस्योनापृथिवि। तत्रैवगंगादिनद्यः। इमंमेसिंधुक्षित्प्रैयमेधोगंगायमुनासरस्वत्योजगती० इमंमेगंगेयमुने। तत्रैवसप्तसागरान्। धाम्नोधाम्नोराजन्नितोवरुणानोमुंच। यदापो अघ्न्याइतिवरुणेतिशपामहेततोवरुणनोमुंच। मयिवायोमोघधीहिंसीरतोविश्वधा भूस्त्वेतोवरुणमोमुंच। तदुपरिमेरुंनाम्ना। वास्तेसोमादिसमीपेक्रमेणायुधानि। गदांत्रिशूलंवज्रंशक्तिंदंडं० खड्गं० पा

शं· अंकुशं। तद्बाह्ये उत्तरादितः। गौतमं· भरद्वाजं· विश्वामित्रं· कश्यपं·
जमदग्निं· वसिष्ठं· अत्रिं· अरुंधतीं। तद्बाह्ये पूर्वादि। ऐंद्रीं· कौमारीं· ब्राह्मीं
वाराहीं। चामुंडां· वैष्णवीं· माहेश्वरीं· विनायकीं। इत्यष्टौ शक्तयः। एताः
प्रतिष्ठाप्य प्रत्येकं सहवा पूजयेत्॥ ततस्तस्यामेव वेद्यां वक्ष्यमाणलिखि
तवक्ष्यमाणमंडलेष्वादित्यादिदेवताः स्थापयेत् जपेच्च। अस्मिन्क
र्मणि ग्रहादिस्थापनं पूजनं च करिष्येति संकल्प्य प्रणवस्य ब्रह्मा ऋषिः
परमात्माग्निर्देवता दैवी गायत्री छंदः व्याहृतीनां क्रमेण जमदग्निभ
रद्वाजभृगवऋषयः अग्निवायुसूर्या देवताः दैवी गायत्री दैवी उष्णि
क् दैवी बृहत्यश्छंदांसि सूर्याद्यावाहने विनियोगः। केचित्तत्तन्मंत्रा
नप्यावाहने आहुः। तत्र ग्रहपीठमध्ये वर्तुले प्राङ्मुखं सूर्यं रक्तपुष्पा
क्षतैः आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप्। सूर्यावाहने विनियोगः
। ॐ आकृष्णेन रजसा। ॐ भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपगोत्र
सूर्य इहागच्छ इह तिष्ठेत्यावाह्य इह तिष्ठेति स्थापयेत्। एवं सर्वत्र मंत्रां
ते व्याहृतीरुक्त्वा इहागच्छ इह तिष्ठेति स्थापयेत्॥ तत आग्नेये च
तुरस्रे प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः। आप्यायस्व गौतमः सोमो
गायत्री यमुनातीरोद्भव आत्रेयगोत्र सोम·। ततो दक्षिणे त्रिकोणे। द
क्षिणामुखं भौमं रक्तपुष्पाक्षतैः अग्निर्मूर्द्धा विरूपो गारको गायत्री
अग्नि अवंतीसमुद्भव भारद्वाजगोत्र भौम· तत ईशाने बाणाकारे बुध
मुदङ्मुखं पीतपुष्पाक्षतैः उद्बुध्यध्वं बुधः सौम्यो बुधस्त्रिष्टुप् मगधदे
शोद्भव आत्रेयसगोत्र बुध॰ तत उत्तरतो दीर्घचतुरस्रे उदङ्मुखं बृ
हस्पतिं पीतपुष्पाक्षतैः बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप् सिं
धुदेशोद्भव आंगिरससगोत्र बृहस्पते॰ ततः पूर्वे पंचकोणे प्राङ्मुखं
शुक्रं शुक्लपुष्पाक्षतैः शुक्रः पाराशरो द्विपदा विराट् भोजकटदेशो
द्भव भार्गवसगोत्र शुक्र॰ ततः पश्चिमे धनुषि प्रत्यङ्मुखं शनिं कृष्ण
पुष्पाक्षतैः शमग्निरिरिंबिठिः शनिः उष्णिक् सौराष्ट्रज काश्यपसगो
त्र शनैश्चर॰ ततो नैर्ऋत्ये शूर्पाकारे दक्षिणामुखं राहुं कृष्णपुष्पा
क्षतैः। कयानो वामदेवो राहुर्गायत्री राष्ट्रावने राठिनापुरोद्भव पैठी
नसिगोत्र राहो॰ ततो वायव्ये ध्वजाकारे दक्षिणामुखं केतुं धूम्रपुष्पा

क्षतैः केतुंमधुच्छंदाः केतवो गायत्री। अंतर्वेदिसमुद्भवजैमिनिसगोत्र
केतो० सर्वेवा आदित्याभिमुखाः। अथाधिदेवताः। श्वेतपुष्पाक्षतैः
क्रमात्सूर्यादीनां दक्षिणतः स्थाप्याः। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्। वि
नियोगः सर्वत्रज्ञेयः। ॐ त्र्यंबकं। ॐ भूर्भुवः स्वः ईश्वरः गौरीर्मिमाय०
दीर्घतमा उमा जगती। सोमदक्षिणे। यदक्रंदो दीर्घतमा स्कंदस्त्रिष्टु
प्। विष्णोर्दीर्घतमा विष्णुस्त्रिष्टुप्। ब्रह्मजज्ञानं गौतमो वामदेवो ब्र
ह्मा त्रिष्टुप्। इंद्रं वो मधुच्छंदा इन्द्रो गायत्री। यमाय सोमं यमो यमो
नुष्टुप्। मोषुणो घोरः काण्वः कालो गायत्री। उषो वाजं स्कंदश्चित्र
गुप्तो बृहती १ एवमेव शुक्लपुष्पाक्षतैर्ग्रहाणां वामतः मंत्रांते व्याहृ
तीरुच्चार्य इहागच्छेह तिष्ठ तिचोक्त्वा प्रत्यधिदेवताः स्थापयेत्। अ
ग्निं काण्वो मेधातिथिरग्निर्गायत्री। ॐ अग्निं दूतं। अप्सु मे मेधातिथि
रापोनुष्टुप्। स्योना मेधातिथिर्भूमिर्गायत्री। इदं विष्णुर्मेधातिथिर्वि
ष्णुर्गायत्री। इंद्र श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप्। इंद्राणीं वृषाकपिरिं
द्राणी पंक्तिः प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। आयं गौः सा
र्पराज्ञी सर्पा गायत्री। ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्। ततः
शुक्लपुष्पाक्षतैर्विनायकादीन्पंच। गणानां त्वा गृत्समदो गणपतिर्ज
गती। राहोरुत्तरतो विनायकं। जातवेदसे कश्यपो दुर्गा त्रिष्टुप्। शने
रुत्तरतो दुर्गां तव वायव्यश्च आंगिरसो वायुर्गायत्री रवेरुत्तरतो वा
युं। एतान्मंत्रान्पठंति सांप्रदायिकाः तत्र केषुचिन्मंत्रेषु मूलं चिंत्यं। आ
दित्प्रत्नस्य वत्स आकाशो गायत्री। राहोर्दक्षिणे आकाशं। एषो उषा
प्रस्कण्वोश्विनौ गायत्री। अश्विनाविहागच्छतमिह तिष्ठतमिति के
तोर्दक्षिणेश्विनौ। एतानि विनायकादिस्थानानि चिंतामणौ। विनाय
कादीन्पंच उत्तरत एवेति संप्रदायः। इति द्वात्रिंशद्देवता इति रूपना
रायणादयः। हेमाद्रौ तु लोकपालादीनामपि सूर्याभिमुखानां दिक्षु स्था
पनमुक्तं। तद्यथा। इंद्रं विश्वा जेता माधुच्छंदस इंद्रोनुष्टुप् इंद्र इहाग
च्छेह तिष्ठेति पूर्वे इन्द्रमेवमुत्तरत्र। अग्निं काण्वो मेधातिथिरग्निर्गाय
त्री। यमाय सोमं यमो यमोनुष्टुप्। मोषुणो घोरः काण्वो निर्ऋतिर्गाय
त्री। त्वं नो अग्ने वामदेवो वरुणस्त्रिष्टुप्। तव वायो व्यश्वो वायुर्गायत्री

सोमोधेनुंगौतमः सोमस्त्रिष्टुप्। तमीशानंगौतमईशानोजगती।सहस्रशीर्षानारायणोनंतोनुष्टुप्। ईशानपूर्वयोर्मध्येनंतं।ॐब्रह्मजज्ञानं गौतमोवामदेवोब्रह्मात्रिष्टुप्।नैर्ऋत्यपश्चिमयोर्मध्येब्रह्माणं॥अथवस्वाद्येकादशदेवताः ज्मयाअत्रमैत्रावरुणोवसिष्ठोवसवस्त्रिष्टुप्। इंद्राग्निमध्ये। ध्रुवाध्वरसोमावनिलानलप्रत्यूषप्रभासाख्यानष्टौवसून्। त्यान्नुसामदोमृत्स्योहादशादित्यागायत्री। इन्द्रेशानमध्येधात्रर्यममित्रवरुणांशभर्गेंद्रविवस्वत्पूषपर्जन्यत्वष्टृजघन्याजघन्यविष्णाख्यान्द्वादशादित्यान्। आरुद्रासःश्यावाश्वएकादशरुद्राजगती। अग्नियममध्ये। वीरभद्रशंभुमहाशयगिरिशाजैकपादहिर्बुध्न्यापराजितपिनाकिभुवनाधीश्वरविरूपतिकपालिस्थाभगवद्भगाख्यानेकादशरुद्रान्। गौरीर्मिमायदीर्घतमागौर्यादयोजगती। गौरीपद्माशचीमेधासावित्रीविजयाजया। देवसेनास्वधास्वाहामातृलोकमातृधृतिपुष्टितुष्ट्यात्मकुलदेवताख्याःषोडशमातृः निर्ऋतिवरुणमध्येगणपतिं। गणानांत्वागृत्समदोगणपतिर्जगती। मरुतोयस्यराहूगणोगौतमोमरुतोगायत्री। वायुसोममध्ये आवहप्रवहोद्वहसंवहविवहपरावहपरिवहानिलाख्यान्सप्तमरुतः। वेद्यामेवयथावकाशंब्रह्मादीन्पंचस्थापयेत्। ब्रह्मजज्ञानंगौतमोवामदेवोब्रह्मात्रिष्टुप्। इदंविष्णुर्मेधातिथिरच्युतोगायत्री। कद्रुद्रायघोरःकण्वईशानोगायत्री। अग्निरश्मिविश्वामित्रोर्कस्त्रिष्टुप्वनस्पतेगर्गोवनस्पतिस्त्रिष्टुप्। एवंप्रतिष्ठाप्यपूजयेत्षोडशोपचारैः पूजाचतत्तद्वर्णैःगंधपुष्पवासोभिस्तत्तन्मंत्रैः एवंसूर्यादिद्वात्रिंशतदशदिक्पालान्वस्वादीनेकादशचावास्यसंस्थाप्यपंचभिःषोडशभिर्वोपचारैः संपूजयेत्॥ तत्रवस्त्राणिग्रहवर्णानि॥रविभौमयोरक्तचंदनं। चंद्रशुक्रयोःश्वेतचंदनं। बुधगुर्वोःकुंकुमयुतं॥शनिराहुकेतूनांकृष्णागुरु। पुष्पाणितद्वर्णानि। धूपास्तु सल्लकीनिर्यासंघृताक्तयवान्रालमगुरुसिल्हकंबिल्वयुतागुरुं। गुग्गुलुं। लाक्षां लक्षाः क्रमाद्गायत्र्यादत्वाउद्दीप्यस्वेतिसर्वेभ्योदीपान्दत्वागुडौदनंपायसंनीवारौदनंक्षीरसुतषष्टिकौदनंदध्योदनं घृतोदनंतिलमाषयुतमोदनंमांसौदनंचित्रौदनंचत्र

मान्निवेदयेत्॥ अधिदेवतादिभ्यस्तुवासोगंधपुष्पाणिश्वेतानिगुग्गुलुर्धूपः। नैवेद्यंपायसादिपथालाभं। सूर्यादिद्वात्रिंशतामन्येषांच्च सर्वेषांपूजापदार्थानुसमयेनैवततोग्रहवेदीशान्यांकलशंसंस्थाप्य तत्रवरुणमावाह्यसंपूज्याभिमंत्रयेत्॥ तद्यथा। कलशस्यमुखेविष्णुः कंठेरुद्रःसमाश्रितः॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥ कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा॥ आयांतुयजमानस्यदुरितक्षयकारकाः॥ देवदानवसंवादेमथ्यमानेमहोदधौ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति ततःफलपुष्पमालाशोभितंवितानंबृहस्पतिदैवत्यंसूर्यादिभ्यइदंनममेतिउत्सृज्यग्रहवेद्युपरिबध्नीयात्॥ ततएकोहोतापरोब्रह्मेतिपूर्वेकुंडेद्वावृत्विजौदक्षिणादिकुंडेषुयथाशाखंहोमास्वाक्तनंकर्म कुर्युः। तत्रषोडशमहादानादौप्रागादिक्रमेणऋग्वेदादिविहितंकर्म जलाशयोत्सर्गादौपंचकुंडीपक्षेप्येवंतत्राचार्यकुंडंत्वैशानपूर्वयोर्मध्येवृत्तंचतुरस्रंवातत्रैवनवकुंड्यामप्येवमेवाचार्यकुंडं॥ तस्मिन्दिक्कुंडेषुचचतुःपंचकुंडीवद्धोमावृत्तिरितिकेचित्। युक्तंतुचतुःकुंडीहोमसवविभज्यकार्यइति। तदाचैकोहोतापरोब्रह्मेतिविदिक्कुंडचतुष्टयेअष्टावधिकाऋत्विजः॥ तेत्वाग्नेयादिकोणक्रमेणऋगादिशाखीयाइतिकेचित्॥ अनियताइत्यपरे। आचार्यकुंडंतुप्रणनयनयोग्याग्निस्थापनार्थमितिसांप्रदायिकाः। होमावृत्तिंविभज्यहोमानुष्ठानंवेतिपरे॥ अथऋक्शाखीयानामन्वाधानेविशेषः। तत्रचक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधानंसूर्यसोमभौमबुधगुरुशुक्रशनिराहुकेतून्ग्रहान्समिच्चर्वाज्यैःप्रतिद्रव्यमष्टसहस्राष्टशताष्टविंशतिअष्टान्यतः

मसंख्यायाः ईश्वरोमास्कंदविष्णुब्रह्मेंद्रयमकालचित्रगुप्ताख्या अधि
देवताः। अग्न्यप्भूमिविष्णिंद्रेंद्राणीसर्पप्रजापतिब्रह्माख्याः प्रत्यधिदेव
ताः। विनायकदुर्गावाय्वाकाशाख्यान् पंचलोकपालान् इंद्राग्नियमनिर्ऋ
तिवरुणवायुसोमेशानानंतब्रह्माख्यदशदिक्पालान् ध्रुवाध्वरसोमा
पानिलानलप्रत्यूषप्रभासाख्यान् अष्टौवसून् धात्रर्यममित्रवरुणांशभ
गेंद्रविवस्वत्पूषपर्जन्यत्वष्टृविष्ण्वाख्यान् द्वादशादित्यान् वीरभद्रशं
भुगिरिशाजैकपादहिर्बुध्न्यपिनाकिभुवनाधीश्वरकपालिविशांपति
स्थाणुभगाख्यानेकादशरुद्रान् आवहप्रवहोद्वहसंवहविवहपरावहप
रिवहाख्यान् सप्तमरुतः ब्रह्माच्युतेशार्केनस्मतीन् पंचचामुकसंख्ययास
मिद्वर्वाज्यैर्यक्ष्य इति वसूनादित्यान् रुद्रान्मरुत इति समुदितानामे
वोल्लेखो युक्त इति बहवः। अत्र ग्रहहोमसंख्यातोधिदेवताहोमेन्यून
संख्येति संप्रदायः। ततोयजमानो मंडपमध्ये दक्षिणत उपविष्ट आघा
राज्यभागदेवता अन्वाधानोक्तप्रधानदेवताः स्विष्टकृदाद्युत्तरांगदेव
ताश्चतुर्थ्यंतेनादिश्यैताभ्य एतानि समित्तिलचर्वादिद्रव्याणि होतुमु
त्सृज्य इति त्यजेत्। बहुकर्तृके होमे प्रत्याहुति त्यागस्याशक्यत्वादिति
प्रयोगविदः। ततो होतारः स्वस्वशाखीयैः प्रणवाद्यैः स्वाहांतैस्तत्तन्मंत्रै
र्ऋषिदेवताछंदःस्मरणपूर्वकं सूर्यादिभ्यः समिच्चर्वाज्यादि जुहुयुः।
तत्र वस्वादित्यरुद्रमरुतां प्रत्येकं मंत्राभावात् प्रणवादिना चतुर्थीस्वा
हांतेन प्रत्येकं होम इति केचित्। समुदितानामेव विधौ श्रवणात् मंत्रा
नुरोधाच्चेति तूक्तं। तत्र प्रत्येकदेवतात्वपक्षे पंचाशीतिर्देवताः समुदित
पक्षे एकपंचाशत् होमकाले ऋग्वेदिनो द्वारपालौ पूर्वद्वार उदङ्मुखौ
रात्रिसूक्तं रौद्रं पवमानं सुमंगलं शन्न इंद्राग्नी इति सूक्तानि पठेतां।
यजुर्विदौ दक्षिणे शाक्रं रौद्रं सौम्यं कौष्मांडं ऋचं वाचमित्यध्यायं च प
ठेतां। पश्चिमे सामविदौ सुपर्णं विराजं आग्नेयं रुद्रसंहितां ज्येष्ठसाम
रबोधयेति च पठेतां। उत्तरेथर्ववेदिनौ सौरं शाकुनकं पौष्टिकं सुमहारा
जं शन्न इन्द्राग्नी इति ऋक्त्रयं च पठेतां। अथ तत्तद्दैवत्यानि सूक्तानि
जप्यानि। ह्वयामीत्येकादशर्चस्य सूक्तस्य हिरण्यस्तूप ऋषिः सविता
देवताद्यायाः पादत्रये अग्निमित्रावरुणौ रात्रिश्च देवतास्त्रिष्टुप् छंदः आद्य

नवम्योर्जगती सूर्यप्रीतयेजपेविनियोगः। ह्वयाम्यग्निं देवं। ११ त्वंसो
मेतित्रयोदशर्चस्य सूक्तस्यगोतमऋषिः सोमो देवता पंचम्यादिद्वा
दश्यागायत्र्यः सप्तदश्युष्णिक् शेषास्त्रिष्टुभः सोमप्रीतयेजपेविनियो
गः। त्वंसोम० गविष्ठो। समिधाग्निमिति त्रिंशदृचस्य सूक्तस्य विरूप आंगि
रसोग्निर्गायत्री। भौमप्रीतयेसमिधाग्निं सोनिर। उद्बुध्यध्वमिति द्वाद
शर्चस्य सूक्तस्य बुधो विश्वेदेवा नवमीद्वादशीच जगती पंचमी बृह
तीचतुर्थीषष्ठीच गायत्री शेषास्त्रिष्टुभो बुधप्रीतये० उद्बुध्यध्वं० य
स्तस्तंभेत्येकादशर्चस्य वामदेवोनवानां बृहस्पतिरंत्ययोरिंद्राबृह
स्पतीदशत्रिष्टुभ उपांत्याजगती बृहस्पतिप्रीतये० यस्तस्तंभ०। प्र
रातीः शुक्रं त इति चतसृणां भरद्वाजः पूषा त्रिष्टुप् द्वितीया जगती। शु
क्रप्रीतये शुक्रं ते अन्यत्सस्तंबं। आपो हिष्ठेति नवर्चस्यांबरीष सिंधुद्वी
प आपः सप्त गायत्र्यः पंचमी वर्द्धमाना सप्तमी प्रतिष्ठांत्ये द्वे अनुष्टुभौ श
निप्रीतये० आपोहिष्ठा० वर्चसा। कयान इति पंचदशर्चस्य वामदेव इं
द्रो गायत्री तृतीया पादनिवृत्तरा हुप्रीतये० कयानश्चित्र० मिवोपरि।
युंजंतीति दशर्चस्य मधुच्छंदा आद्यानां तिसृणां चतुर्थी षष्ठ्यष्टमीनां
मरुतो गायत्री केतुप्रीतये० युंजंति ब्रध्नं रजस०॥ इति नवग्रहसूक्ता
नि॥ अथ होममंत्राः। तत्रऋग्वेदे अध्याधिदेवतानां। इमारुद्रायेत्येका
दशर्चस्य कुत्सो रुद्रो जगती अंत्ये त्रिष्टुभे रुद्रप्रीतये। इमारुद्राय तवसे।
। आपो हिष्ठेति नवर्चं पूर्ववत्। उमाप्रीतये॥ आपोहिष्ठा० वर्चसा। प्रात
र्युजेत्येकविंशत्यृचस्य सूक्तस्य मेधातिथिराद्यानां चतसृणां अश्विनौ
चतसृणां सविता द्वयोरग्निरेकादश्या देव्यो द्वादश्या इंद्राणी वरुणा
न्याग्नेय्यो द्वयोर्द्यावापृथिव्यौ पंचदश्याः पृथिवी षण्णां विष्णुर्गायत्री
स्कंदप्रीतये। प्रातर्युजा० पदं। अतोदेवा इति षण्णां मेधातिथिर्विष्णु
र्गायत्री हरिप्रीतये० अतोदेवा० पदं। अग्न आयाहीति विंशत्यृचस्य सू
क्तस्य भर्गो ग्निः प्रगाथः ब्रह्मप्रीत्यर्थे० अग्न आयाह्यग्निभिः स्त्विनः। इंद्रं
विश्वा इत्यष्टर्चस्य जेता माधुच्छंदस इंद्रोनुष्टुप्। इंद्रप्रीतये० इंद्रं विश्वा०
यसीः। आयंगौरिति तिसृणां सार्पराज्ञ्यात्मा गायत्री यमप्रीतये० आ
यंगौः पृश्नि० द्युभिः। परंमृत्यो इति चतसृणां संकुसुको मृत्युस्त्रिष्टुप्।

कालप्रीतये० परंमृत्यो० तेन।सचित्रेत्यस्यभरद्वाजोमरुतस्त्रिष्टुप्।चि
त्रगुप्तप्रीतये० सचित्रचित्रं० युवस्व०।अथप्रत्यधिदेवतानां।अग्निंदूतमि
तिद्वादशर्चस्यमेधातिथिरग्निःषष्ठ्या आद्येपादेनिर्मथ्याहवनीयोगाय
त्री।अग्निंदूतं।स्वनः।कस्येतिपंचदशर्चस्यजीगर्तःशुनशेप।आद्यायाः
कोद्वितीयाग्निस्तिसृणांसविताद्शानांवरुणस्तत्रीयास्तिस्रोगायत्र्यः
शेषास्त्रिष्टुभः अप्प्रीतये० कस्यनूनं।स्योनामेधातिथिःपृथिवीगायत्री
भूमिप्रीतये० स्योनापृथिवि० अथःसहस्रशीर्षेतिषोडशर्चस्यनारायणः
पुरुषोनुष्टुवंत्यात्रिष्टुप्विष्णुप्रीतये।सहस्रशीर्षा० देवा० इंद्रायकश्य
पःपवमानसोमोगायत्रीइंद्रप्रीतये० इंद्रायेंदोमरुत्वते।इमांखनामीतिष
ण्णांइंद्राणीद्राण्यनुष्टुभंत्यापंचपदापंक्तिः इंद्राणीप्रीतये० इमां
खनामि०धावतु।प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्प्रजापतिप्रीत
ये० प्रजापते० रयीणां।कालिकोवसिष्ठःसर्पाअनुष्टुप्सर्पप्रीतये।कालि
कोनामसर्पःहनः।ब्रह्मादेवानांदेवोदासिःप्रतर्दनोब्रह्मात्रिष्टुप्ब्रह्मप्री
तये० ब्रह्मा० रेभं।।अथविनायकादिपंचानां।आतूनइतिनवानांकुसीदः
काण्वोगणपतिर्गायत्रीविनायकप्रीतये।आतूनइंद्र० रंतोजातवेद
सेकश्यपोजातवेदास्त्रिष्टुप्दुर्गाप्रीतये०जातवेदसेत्यग्निःकृणोविनोवा
पुरुउष्णिक्वायुप्रीतये० कृणोशिशुद्धिला० आदिहत्सआकाशोगायत्री
आकाशप्रीतये० आदित्प्रत्नस्य० एषोउषाप्रस्कण्वोश्विनौगायत्रीअ
श्विनोःप्रीतये० एषो० हत।।अथदशलोकपालानां।।इंद्रंविश्वेत्यष्टानांजे
तामधुच्छंदसइंद्रोनुष्टुप्इंद्रप्रीतये० इंद्रंविश्वा० वसी।अग्निःसप्तिमिति
सप्तानांसोचीकोग्निर्वैश्वानरोग्निस्त्रिष्टुप्अग्निप्रीतये० अग्निःसप्तिःजस्व
।परेयिवांसमितिषोडशर्चस्ययमःपंचानांयमःषष्ठ्याअंगिरसस्तिसृणां
श्वानौचतसृणांयमोद्वादशास्त्रिष्टुभौपादनिवृत्तोपंचदशीबृहतीषोड
शीअनुष्टुप्यमप्रीतये० परेयिवांसं० हिताबेस्याद्दिविश्वमानावेपश्चानि
र्ऋतिप्रीतये० वेस्याद्दिमिवमोष्वितिपंचानांवसिष्ठोवरुणोगायत्री० अंत्या
जगतीवरुणप्रीतये० मोषुवरुणोरीरिषः।वातइतितिसृणांवातायनउ
लोवायुर्गायत्री० वायुप्रीतये० वातआवातु० सीवसे० त्वंसोमेतिग्रहवत
।इमारुद्रायेतिपूर्ववत।सहस्रशीर्षेतिप्राग्वत।त्वमिद्ध्रोमाग्निर्बृहतीब्र

ह्मप्रीतये। त्वमित्सप्रथा० धसः॥ अथवस्वादिदेवानां। ज्मया अत्रेतिव
ह्मप्रीतये। त्वमित्सप्रथा०धसः॥ अथवस्वादिनवानां। ज्मया अत्रेतिव
सूनांहोमवत्॥ इमागिरइतिसप्तदशर्चस्यगार्त्समदःकूर्मआदित्य०
त्रिष्टुप्आदित्यप्रीतये। इमागिरः वीराः। आनइतिपंचदशर्चस्यगा
र्त्समदःकूर्मरुद्रस्त्रिष्टुप्ईशानप्रीतये। आतेपित० वीराः। मरुतोयस्य
तिरश्चानांगोतमोगायत्रीमरुत्प्रीतये० मरुतोयस्य० क्षमसि० हिरण्य
गर्भइतिदशर्चस्यहिरण्यःप्रजापतिःकस्त्रिष्टुप्ब्रह्मप्रीतये। हिरण्यग
र्भःरयीणां। सहस्रशीर्षस्यच्युतस्यप्राग्वत्। आनेपितरितीशस्यप्राग्व
त्। चित्रमितिषण्णांकुत्सकस्त्रिष्टुप्अर्कप्रीतये। चित्रंदेवानां० उतद्यौः॥
वनस्पतइतितिसृणांगर्गोवनस्पतिस्त्रिष्टुप्। वनस्पतिप्रीतये। वनस्पते
वीड्वंगोगृभाय। आवाहितयोरपिमात्रगणप्रत्योहोमस्तत्तज्जपेनस्तः। ए
वंऋग्वेदी हुत्वास्विष्टकृदादिप्रायश्चित्त्यंतंपूर्णाहुतिप्राग्भाविकर्मकुर्या
त्॥ अथयजुर्वेदिनःकुशकंडिकानंतरंप्रधानहोममंत्राः। आकृष्णेनहि
रण्यस्तूपःसवितात्रिष्टुप्। सूर्यप्रीतये तिलाज्यहोमेविनियोगः। आकृ
ष्णेनपश्यन्स्वाहा। इदंसूर्यायएवंसर्वत्र। इमंदेवावरुणः। सोमोयजुः
इमंदेवानां० राजा। अग्निर्मूर्द्धाविरूपोंगारकोगायत्री। उद्बुध्यस्वपरमे
ष्ठीबुधस्त्रिष्टुप्। बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्। अन्नात्प्रजापति
रश्विसरस्वतींद्राःशुक्रोजगती। शन्नोदेव्यङ्‌गथर्वणश्शनिर्गायत्री। कया
नोवामदेवोराहुर्गायत्री। केतुंमधुच्छंदाः केतवोगायत्री। अथाधिदेव
तानां। त्र्यंबकंवसिष्ठोरुद्रस्त्रिष्टुप्। अत्रप्रणीतोदकंस्पृशेत्। श्रीश्चेत्यु
त्तरनारायणउमात्रिष्टुप्। यदक्रंदोभास्करजमदग्निर्दीर्घतमाःस्कंदस्त्रि
ष्टुप्। विष्णोरराटमुतथ्योविष्णुर्यजुः। विष्णोरराटं। वेत्वा। आब्रह्मन्प्रजा
पतिर्ब्रह्मायजुः। आब्रह्मन् कल्पतां। सजोषाविश्वामित्रइंद्रस्त्रिष्टुप्। स
जोषाइंद्रः। असियमोभास्करजमदग्निदीर्घतमसोयमस्त्रिष्टुप्। अत्र
प्रणीतोदकंस्पृशेत्। कार्षिरसिदध्यङ्ङाथर्वणःकालोनुष्टुप्। अत्रापिप्र
णीतोदकस्पर्शः। चित्रापिप्रणीतोदकस्पर्शः। चित्रावसोऋषयश्चित्रगुप्तो
जगतीचित्रावसोःप्रीय०॥ अथप्रत्यधिदेवतानां। अग्निंदूतेतिविरूपोग्नि
र्गायत्री॥ अश्वंतद्बृहस्पतिःआपःपुरउष्णिक्। स्योनामेधातिथिःपृथिवी
गायत्री। इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री। त्रातारंगार्ग्यइंद्रस्त्रिष्टुप्। अ

दित्यैदध्यङ्ङाथर्वणइंद्राणीयजुः अदित्यैरास्ना० णी य० प्रजापतेवरु
णःप्रजापतिस्त्रिष्टुप् ॥नमोस्तुदेवाःसर्पाअनुष्टुप् ब्रह्मप्रजापतिर्ब्रह्मात्रि
ष्टुप्।अथविनायकादिपंचानां॥गणानांप्रजापतिर्गणपतिर्यजुः।गणा
नांत्वा।मम।अंबेप्रजापतिर्दुर्गानुष्टुप्॥वातोवागंधर्वोवातउष्णिक्॥
ऊर्ध्वाअस्यसमिधोप्रजापतिराकाशउष्णिक्।अश्विनौअश्विनोयजुः
।अश्विनेभैषज्यमि।अथदिक्पालानां।त्रातारंगार्ग्यइंद्रस्त्रिष्टुप्।अग्निं
दूतंविरूपोग्निर्गायत्री।असियमोभार्गवजमदग्निर्दीर्घतमसोयमस्त्रि
ष्टुप्।अत्रप्रणीतोदकस्पर्शः।एषतेवरुणोनिर्ऋतिर्यजुः।एषतेनिर्ऋ
ते।अत्रप्रणीतोदकस्पर्शः।इमंमेशुनःशेपोवरुणोगायत्री।इमंमेवरु
ण।वातोवागंधर्वोवातउष्णिक्।वयंवंधुःसोमोगायत्रीतमीशानंगोत
मईशानोजगती।प्रणीतोदकस्पर्शः।नमोस्तुदेवाअनंतोनुष्टुप्।ब्रह्म
प्रजापतिर्ब्रह्मात्रिष्टुप्॥अथवस्वादीनां।स्वर्णदेवावसवस्त्रिष्टुप्।य
ज्ञोदेवानांकुत्सआदित्यस्त्रिष्टुप्॥यएतावंतश्चपरमेष्ठीरुद्रोनुष्टुप्।
मरुतोयस्यगोतमोमरुतोगायत्री।आब्रह्मन्प्रजापतिर्ब्रह्मायजुः।इ
दंविष्णुर्मेधातिथिरच्युतोगायत्री।मानस्तोकेकुत्सईशोजगती।चित्रं
देवानांकुत्सोर्कस्त्रिष्टुप्।अयंहिप्रजापतिर्वनस्पतिर्यजुः।अयंहित्वा
हेम॥इतिहोममंत्राः।अथजपसूक्तानि।विभ्राडितिसप्तदशर्चस्यानुवा
कस्यआद्यायाविभ्राट्ततस्त्रिसृणांप्रस्कण्वःपंचम्याअवत्सारःका
श्यपःषष्ठ्यावेनःसप्तम्याःकुत्सोष्टम्याअगस्त्योनवम्याःश्रुतकक्षसु
कक्षौदशम्याःप्रस्कण्वोथद्वयोःजमदग्निःपंचदश्यानृमेधःषोडश्याः
कुत्सअंत्यायाहिरण्यस्तूपआंगिरसःपंचम्याविश्वेदेवाःषष्ठ्याःसोमो
न्यासांसूर्यआद्यापंचमीजगतीद्वितीयादितिस्रोनवमीदशमीचगा
यत्र्यस्त्रयोदशीपंचदश्यौपथ्याबृहत्यौचतुर्दशीसतोबृहतीशेषाः
सप्तत्रिष्टुभःसूर्यप्रीतयेजपेविनियोगः।ॐविभ्राड्बृहत्पश्यन्आषा
ढंयुत्स्वितिचतसृणांगोतमःसोमस्त्रिष्टुप्सोमप्रीतये।आषाढंयुत्सु
विक्षेअग्निर्मूर्द्धाविरूपाक्षोग्निर्गायत्री।उद्बुध्यस्वपरमेष्ठ्यग्निस्त्रिष्टुप्
।बुधप्रीतये।बृहस्पतेअतियदर्यसमदोब्रह्मात्रिष्टुप्बृहस्पतिप्रीतये०
अन्नात्परिस्रुतःप्रजापत्यश्विसरस्वतींद्राइंद्रोजगती।शन्नोदेवीरध्य

ङ्गाथर्वणआपोगायत्रीकेतुंकृण्वन्नमधुच्छंदाअग्निर्गायत्री।एतेमंत्राए
वसूक्तानि।।अथाधिदैवतानां।षट्षष्टिमंत्रात्मकरुद्राध्यायस्यपरमे
ष्ठीऋषिः।।आद्यानांषोडशानामेकरुद्रस्ततोबहुरुद्रआद्यागायत्रीति
स्रोनुष्टुभोद्वेजगत्यौनमोहिरण्यबाहवइत्यंतरस्त्रिंशद्यजूंषिद्रापइत्यु
परिष्टाद्बृहतीइमारुद्रायेतिजगतीयातेरुद्रेत्यनुष्टुप्ततोद्वेत्रिष्टुभौ
विकिरिदेत्याद्याद्वादशानुष्टुभःशेषाणित्रीणियजूंषिरुद्रप्रीतये।नम
स्तेरुद्र·द्ध्यः६६हवामहइत्यंताःषोडशैवरुद्रसूक्तमितिसूत्रनाराय
णीये।प्रणीतोदकस्पर्शः।श्रीश्चतेउत्तरनारायणोनारायणस्त्रिष्टुप्उ
माप्रीतये।यदक्रंदोभार्गवजमदग्निर्दीर्घतमसोश्वस्त्रिष्टुप्स्कंदप्रीतये·
सहस्रशीर्षेतिषोडशानांनारायणः।पुरुषोनुष्टुबंत्यात्रिष्टुबंत्यास्त्रिष्टु
प्विष्णुप्रीतये।आब्रह्मन्नितिप्रजापतिर्ब्रह्मायजुःब्रह्मप्रीतये।आशुः
शिशानमितिद्वादशानामप्रतिरथइंद्रस्त्रिष्टुप्·इंद्रप्रीत·प्रणीतोदकस्प
र्शः।चित्रावसोऋषयोरात्रिर्जगतीचित्रगुप्तप्रीतये।अथमत्स्याधिदैवता
नां।अस्याजरासइतिसप्तदशर्चस्यआद्यायावत्सप्री·इंद्रवायूत्रि
ष्टुप्द्वितीयाविरूपइंद्रवायूगायत्री।तृतीयागौतमोमित्रावरुणौगाय
त्रीचतुर्थ्याविरूपइंद्रवरुणौगायत्रीपंचम्याःकुत्सःस्युक्तस्त्रिष्टुप्।षष्ठ्या
वामदेवोग्निर्जगतीसप्तम्याविश्वामित्रइंद्राग्नीत्रिष्टुप्अष्टम्याभरद्वाजो
ग्निस्त्रिष्टुप्नवम्याभरद्वाजोविश्वेदेवागायत्रीदशम्यामेधातिथिरग्निर्गा
यत्रीएकादश्याःशक्तयःपाराशरोमरुतस्त्रिष्टुप्द्वादश्याअत्रिर्दुहितावि
श्वेदेवामरुतस्त्रिष्टुप्।त्रयोदश्याभरद्वाजोग्निस्त्रिष्टुप्चतुर्दश्यावसिष्ठ
आदित्योबृहतीषोडश्यावामदेवोग्निस्त्रिष्टुप्।सप्तदश्यानुराधातकःस
वितात्रिष्टुप्।अग्निप्रीतये·आपोहिष्ठेतितिसृणांसिंधुद्वीपआपोगायत्री
अप्प्रीतये·स्योनापृथिविदध्यङ्ङाथर्वणऋषिःपृथिविदध्यङ्ङाथर्वणः
पृथिवीगायत्री·पृथिवीप्रीत्यर्थं।सहस्रशीर्षानारायणःपुरुषस्त्रिष्टुप्
।विष्णुप्रीत्यर्थं।आशुःशिशानोद्वादशानामप्रतिरथइंद्रस्त्रिष्टुप्इंद्रप्रीत
र्थंअदितैराश्नाद्दध्यङ्ङाथर्वणइंद्राणीपन्तुइंद्राणीप्राहिरण्यगर्भइति
चतुर्णांहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्प्रजापतिप्रीत्यर्थं·नमोस्तुसर्पेभ्य
इतितृचस्यदेवाःसर्पाअनुष्टुप्सर्पप्रीत्यर्थं।ब्रह्मयज्ञानंप्रजापतिरादि

त्यस्त्रिष्टुप्।ब्रह्मप्रीत०॥अथविनायकादिपंचानांगणानांत्वाप्रजापतिर्गण
पतिर्यजुःगणपतिप्री० अंबेअंबिकेप्रजापतिरश्वोनुष्टुप्।दुर्गाप्री० त्वांवा
येनिषण्णामाध्वायागृत्समदोद्विती यायाःपुरुषद्वाजमीढौतिसृणांप्र
जापतिःषष्ठ्याश्च आंगिरसोवायुर्द्वितीयानुष्टुप्पंचमीत्रिष्टुप्शेषागा
यत्र्यःवायुप्रीतये।ऊर्ध्वाअस्यसमिधइतिद्वादशानांप्रजापतिरग्निरु
ष्णिक्आकाशप्रीतये-यावांकशामेधातिथिरश्विनौगायत्री।अश्विनोः
प्रीतये।अथदिक्पालानां॥आशुःशिशानइतिद्वादशर्चमैंद्रंप्राग्वत्॥
अस्याजरासइतिसप्तदशर्चमाग्नेयंप्राग्वत्।यमायत्वाद्ध्यङ्ङाथर्वणो
यमोयजुःयमप्री० यमायस्वाहा-प्रणीतोदकस्पर्शः।असुन्वंतमितिनृच
स्यप्रजापतिरग्निस्त्रिष्टुप्।निरृतिप्रीत्यर्थं।प्रणीतोदकस्पर्शः।इमंमेव
रुणेतिद्वयोःशुनःशेपोवरुणोगायत्रीत्रिष्टुभौवरुणप्रीतये।नियुत्वान्वा
यवितिषडर्चंवायवीयंप्राग्वत्-आषाढमितिसौम्यचतुष्टयंप्राग्वत्।
रुद्राध्यायःषट्षष्टिमंत्रावसानंप्राग्वत्॥६६प्रणीतोदकस्पर्शः।नमो
स्तुसर्पेभ्यइतित्र्युचमनंतसूक्तंप्राग्वत्।ब्रह्मजज्ञानंप्रजापतिरादित्य
स्त्रिष्टुप्ब्रह्मप्रीत० अथवस्वादीनांस्वमावादेवावसवस्त्रिष्टुप्।वसु
प्रीतये-इमागिरोगृत्समदआदित्यस्त्रिष्टुप्।आदित्यप्री० रुद्राध्याये
पैंद्रंप्राग्वत्॥शुक्रज्योतिश्चेतिपण्णांसप्तर्षयोमरुतआचतुर्थीवो
ष्णिक्पंचमीजगतीशेषागायत्र्योमरुत्प्रीतये।आब्रह्मन्प्रजापतिर्ब्र
ह्मायजुःब्रह्मप्री० सहस्रशीर्षेतिवैष्णवंप्राग्वत्रुद्राध्यायेरौद्रंप्रा
ग्वत्॥विभ्राडितिसप्तदशर्चमार्कंप्राग्वत्॥वनस्पतेवीड्वंगःप्रजापति
र्वनस्पतिस्त्रिष्टुप्॥वनस्पतिप्री० ततोव्याहृतिहोमादिबलिहोमांत
याजुषंपूर्णाहुतिप्राग्भाविकर्मकुर्यात्॥अथसामगानांकुशकंडिका
नंतरंप्रधानहोमेमंत्राः।उदुत्यंप्रस्कण्वःसूर्योगायत्रीतिलाज्यहोमे
विनियोगः।उदुत्यं।सूर्यायस्वाहा।संतेपयांसिसोमःसोमोगायत्री।अ
ग्निर्मूर्द्धावरुणोसोमोगायत्री।अग्नेविवस्वन्मंडोजमदग्निर्बुधोबृहती।
बृहस्पतेपरिदीयाप्रतिरथोबृहस्पतिस्त्रिष्टुप्।शुक्रंतेभरद्वाजःशुक्रस्त्रि
ष्टुप्।शन्नोदेवीःसिंधुद्वीपःशनिर्गायत्री।कयानोवामदेवोराहुर्गायत्रीके
तुंकृण्वन्मधुच्छंदाःकेतुर्गायत्री।अथाधिदेवतानां।आवोराजानंवामदे

वोरुद्रस्त्रिष्टुप्॥आपोहिष्ठासिंधुद्वीपउमागायत्री॥स्योनापृथिवीमेधा
तिथिःस्कंदउष्णिक्॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री।त्वमिन्द्रसप्रथा
गौतमोब्रह्माबृहती।इंद्रमिद्देवताउन्नःस्कंदस्त्रिष्टुप्॥आयंगौःसार्प
राज्ञीयमोगायत्री।ब्रह्मजज्ञानंब्रह्माकालस्त्रिष्टुप्।विश्वइच्छिशोभि
त्रयग्नस्त्रित्रगुप्तोजगती।अथमत्यधिदेवतानां।अग्निंदूतंभरद्वाजोग्नि
र्गायत्री।उदुत्तमंगौतमआपस्त्रिष्टुप्।पृथिव्यंतरिक्षंविष्णुपृथिव्युः
ष्णिक्॥सहस्रशीर्षानारायणोविष्णुरनुष्टुप्।इंद्रोवृषोवृधीयइंद्रा
गायत्री।एकाष्टकीवसिष्ठइंद्राणीत्रिष्टुप्।प्रजापतेनत्वद्धिरण्यगर्भप्र
जापतिस्त्रिष्टुप्॥तवेदिंद्रावमंवसिष्ठःसर्पास्त्रिष्टुप्॥एषप्रत्नाप्रजाप
तिर्ब्रह्माद्विपदागायत्री॥अथविनायकादिपंचानां।आतूनोगौरिवीतो
गणपतिर्गायत्री।इमंस्तोमंकुत्सोदुर्गाजगती॥राजाशिरींद्रोवायुरु
ष्णिक्।आदित्वत्वस्यनिधनकामआकाशोगायत्री।एषोउषाअस्म
ण्वोश्विनौगायत्री॥अथलोकपालानां।त्वामिद्धिभरद्वाजइंद्रोबृह
तीअग्निर्वृत्राणिश्रोतोग्निर्गायत्री।नाकेसुपर्णंयमोयमस्त्रिष्टुप्॥वैस्था
हीत्यादित्योनिर्ऋतिरुष्णिक्।इमंमेसुष्कभोवरुणोगायत्री।वा।आ
वातुमाजीनेकाशीतोवायुर्गायत्री।स्वादिष्ठयागंभीरःसोमोगायत्री।
तद्वोगायत्री।तद्वोगायरुद्रईशानोगायत्री।समानोअध्वाउशनाअनं
तस्त्रिष्टुप्॥ब्रह्मजज्ञानंब्रह्मात्रिष्टुप्॥अथवस्वादीनां।नमग्निनमस्ते
वामदेवोवसवोविराट्।आदित्यैरिंद्रभरद्वाजआदित्योविराट्।आ
वैराजानंवामदेवोरुद्रस्त्रिष्टुप्।पवमानाअसृक्षतआदारसनध्रु
मरुतोबृहती।ब्रह्मजज्ञानंब्रह्मात्रिष्टुप्।इदंविष्णुर्मेधातिथिर्विष्णु
र्गायत्री।आत्वासोमस्यसोमईशानोबृहती।इंद्रायमद्वनेगौरीवित
कोगायत्री।वनस्पतेवीड्वंगोवाभ्रव्योवनस्पतिस्त्रिष्टुप्।इतिसाम
गानांहोममंत्राः।होममंत्राश्चसामगानांजप्यानिसूक्तानि।विशे
षस्तुग्रहेषुसौम्यग्रकीर्तितव्यमितिद्वादशर्चेस्याद्यानांतिसृणांवाजः
स्त्रिष्टुप्शेषाणामादित्योगायत्रीसोमोदेवतासोमश्रीत्यर्थेएकाद
शसामात्मिकायांरुद्रसंहितायांआवोराजानमितिवामदेवस्त्रिष्टुप्
नद्वोगायेतिचतुःसाम्नोवर्गस्यरुद्रोगायत्रीत्रयाणामाज्यदोहसीना

वैश्वानरस्त्रिष्टुप्।त्रयाणांदेवव्रतसाम्नांपूर्वमोरुद्रेत्यस्यविश्वेदे
वाउत्कृतिःसर्वेषांरुद्रोदेवतारुद्रप्रीत्यर्थेआ४वी५राजा५७एकादश
सामात्मिकायांस्कंदसंहितायांआमंद्रैरितित्रयाणांत्वष्ट्रअनोविश्वा
सुहव्यमितित्रयाणांशक्त्योबृहती।प्रसेनानीमितित्रयाणांकुत्सस्त्रि
ष्टुप्।पवित्रंतइतिद्वयोरादित्योजगती।सर्वेषांस्कंदोदेवतास्कंदप्रीत्यर्थे
आ५मं५०द्रे५२ ५० नवसामात्मिकायांविष्णुसंहितायांइदंविष्णुर्गा
यत्रीप्रत्यस्यस्यकृष्णयोविष्णुर्जगती।प्रकाव्यमुशनेइतिवराहस्यवा
जिस्त्रिष्टुप्।सहस्रशीर्षाषड्चगीतयोःपुरुषव्रतयोःपुरुषोनुष्टुप्।
सर्वेषांविष्णुर्देवता०विष्णुप्रीत्यर्थेर५६मे५विष्णुःविनायकस्यअदं
दोरितिदशसामात्मिकायांविनायकसंहितायांअदर्दरितिद्वयोरुद्र
हसस्त्रिष्टुप्।सुश्राणासइतिद्वयोःपृथिवीत्रिष्टुप्।आतूनइतिचतुःसा
मवर्गेआद्ययोर्गौरिवीतअंत्ययोरपालवैणवश्चतुर्णांगायत्रीमृज्य
मानाइतिद्वयोराद्यस्योश्योराद्योर्द्वितीयस्यवर्गस्यषष्ठस्याग्निर्बृ
हती।सर्वेषांविनायकोदेवताविनायकप्रीत्यर्थे४ द५द ५रुप५
त४॥०॥सोमस्यप्रकाव्यमुशनइतिप्राग्वत्
द्वादशी।ईशानस्यरुद्राणामावोराजानमितिरुद्रसंहिताप्राग्वत्।अ०
च्युतस्यवैष्णवीसंहिताप्राग्वत्।अन्येषांतुहोममंत्राएवेतिभट्टचरणाः
।मदनोमापतिरूपनारायणदानसागराद्याःयेषांगीतिरस्तितेगीतिसं
हिताएवजप्याइत्यर्पितएवंचसूक्तजपानंतरंव्याहृतिहोमादिबर्हि
जुड्डिकाहोमांतंप्राग्भाविस्वशाखोक्तंसामवेदीकुर्यात्।अथाथर्ववेदि
नः।प्रधानहोमेमंत्राःविषासहिमथर्वादित्योजगतीहोमेविनियोगः।
एवंसर्वत्र।शाकधूममथर्वासोमोनुष्टुप्त्वयामन्योभौमस्त्रिष्टुप्।य
द्राजानोविभजंतविष्णुःबुधःपंक्तिःबृहस्पतिर्नोब्रह्माबृहस्पतिस्त्रि
ष्टुप्।।शुक्रोस्यथर्वाशुक्रोनुष्टुप्।सहस्रबाहुर्नारायणःशनिस्त्रिष्टु
प्।दिव्यंविन्नकौशिकोराहुस्त्रिष्टुप्।यस्तेपृथुरथर्वाकेतवस्त्रिष्टुप्।९
अथाधिदेवतानां।मानोविदन्ब्रह्माईश्वरोनुष्टुप्।आहिहिष्ठासिंधु
द्वीपउमागायत्री।अग्निस्त्विमन्योब्रह्मास्कंदस्त्रिष्टुप्।प्रतद्विष्णुरथर्वा

विष्णुर्गायत्री॥ब्रह्मजज्ञानमथर्वाब्रह्मात्रिष्टुप्।इंद्रंमेब्राह्मेंद्रोनुष्टुप्।यः
प्रथमोब्रह्मायमस्त्रिष्टुप्।रोहितःकालोथर्वाकालोनुष्टुप्।यदाज्ञातेकौ
शिकश्चित्रगुप्तोनुष्टुप्॥अथप्रत्यधिदेवतानां॥सामस्त्वाग्नेब्रह्मात्रि
ष्टुप्।शन्नोदेवीब्रह्माआपोगायत्री।भूमेर्मातर्ब्रह्माभूमिरनुष्टुप्।इदंवि
ष्णुरथर्वाविष्णुर्गायत्री।इंद्राजुषस्वब्रह्मेंद्रोनुष्टुप्॥प्रेतपादावथर्वै
ष्णुरथर्वाविष्णुर्गायत्री।इंद्राजुषस्वब्रह्मेंद्रोनुष्टुप्।सर्पानुसर्पाथर्वास
र्पाण्यनुष्टुप्।नक्षत्रजातास्यथर्वाप्रजापतिरनुष्टुप्।सर्पानुसर्पाथर्वासृ
पीःपंक्तिः येदिशामथर्वाब्रह्मात्रिष्टुप्॥अथविनायकादिपंचानांतिले
स्मद्गविणोदाविनायकोनुष्टुप्।पृतनाजितमथर्वादुर्गात्रिष्टुप्।अंत
रिक्षेवायवेब्रह्मावायुरनुष्टुप्।शाम्यंताथर्वाआकाशस्त्रिष्टुप्।सं वे
नपश्यांगिरा अश्विनावनुष्टुप्॥अथदिक्पालानां।इंद्रब्रह्मेंद्रस्त्रिष्टु
प्।अग्नेमन्वेतिब्रह्माग्निस्त्रिष्टुप्।परोमृत्युक्तब्रह्मायमस्त्रिष्टुप्।असि
न्नेतिर्वोतिरथर्वानिऋतिस्त्रिष्टुप्।येपश्यानजुष्टयथर्वावरुणस्त्रिष्टुप्।
वायोःसवितुरथर्वावायुस्त्रिष्टुप्।यउत्तरतोब्रह्मासोमस्त्रिष्टुप्।धाता
दद्यात्वंगिराईशानोगायत्री।यअनंतंवितमथर्वाअनंतःपंक्तिः ब्रह्मापरं
युज्यतांअथर्वाब्रह्मात्रिष्टुप्।अथवस्वादीनां।यानवहवस्तब्रह्माव
सवस्त्रिष्टुप्।आदित्योब्रह्माआदित्यस्त्रिष्टुप्।रुद्रंजलाषब्रह्मारुद्र
स्त्रिष्टुप्।मरुतामत्वेर्वोमरुतस्त्रिष्टुप्॥इमाब्रह्मब्रह्माब्रह्मस्त्रिष्टुप्॥
तद्विष्णोर्ब्रह्मागायत्री।रुद्रजाम्बब्रह्मेशस्त्रिष्टुप्।वत्सोविराजोब्रह्मा
कास्त्रिष्टुप्।वनस्पतेवीड्वंगोथर्वावनस्पतिस्त्रिष्टुप्।इत्यथर्ववेदोक्त
ममंत्राः।अथसूक्तानि।विषासहिंसाहमाइतिपण्णांअथर्वासूर्योजग
तीसूर्यप्रीतयेजपेविनियोगः।एवमग्रेपि।शकधूममितिचतुर्णांअथ
र्वासोमोनुष्टुप्।त्वयामन्योइतिसप्तानांब्रह्माभौमस्त्रिष्टुप्।सोमस्त्वां
शोइतिचतुर्णामथर्वाबुधोनुष्टुप्।

भद्रादधिश्रेयइत्यस्यब्रह्माबृहस्पतिस्त्रिष्टुप्।१शुक्रोसि
सीत्यथर्वाशुक्रोनुष्टुप्॥प्राणापानमइतितिसृणांब्रह्माशनिस्त्रिष्टुप्।
राहुराजानंब्रह्माराहुस्त्रिष्टुप्।यस्तेपृथुरितितृचस्याथर्वाकेतवः।आ
द्ययोरंत्यानुष्टुप्।अथाधिदेवतानां।मानोविदन्नितिचतसृणांब्रह्मारु
द्रस्त्रिष्टुप्।अग्निरिवमन्योब्रह्मास्कंदस्त्रिष्टुप्।यत्तइंद्राइतिपंचानांअथ

र्वाविष्णुस्त्रिष्टुप्। अंत्यागायत्री। विष्णुप्रीतये० ब्रह्मजज्ञानमिति सप्तानां अथर्वाब्रह्मात्रिष्टुप्। इंद्रोजयतीति तृचस्यब्रह्मेंद्रविष्णुस्त्रिष्टुप्। इंद्रप्रीतये। यमोमृत्युरितितृचस्यब्रह्मायमस्त्रिष्टुप्। यमप्रीतये। ओहिनः काल इतिद्वयोरथर्वाकालोनुष्टुप्। अथर्वाङ्परस्तादितिचतसृणां अथर्वाविश्वगुणास्त्रिष्टुप्। अथप्रत्यधिदेवतानां। अग्नेर्मघइतितृचस्यब्रह्माग्निस्त्रिष्टुप्। शन्नोदेवीतिचतसृणांब्रह्मापोगायत्री। सत्यंबृहदृतमितिब्रह्माक्षितिस्त्रिष्टुप्। यन्नइंद्रइतिपंचर्चेवैष्णवंप्राग्वत्॥ इंद्राजुषस्वेत्येकस्यब्रह्मेंद्रोनुष्टुप्। प्रेतपादावित्यस्य अथर्वेंद्राण्यनुष्टुप्। प्रजापतेनत्वदितिद्वयो ब्रह्माप्रजापतिस्त्रिष्टुप्। शेरभकेत्यष्टानां अथर्वासर्पाःपंक्तिः ब्रह्मजज्ञानमितिसप्तर्चेब्राह्मंप्राग्वत्। अथविनायकादिपंचानां। निर्लक्ष्म्यमितिचतसृणांद्रविणोदाविनायकोनुष्टुप्। वायोःसवितुरिति द्वयोरथर्वावायुस्त्रिष्टुप्। यःस्कंभोब्रह्मणइतिचतसृणांब्रह्माकाशोनुष्टुप्। अश्विनाब्रह्मणेत्यस्यब्रह्माश्विनौत्रिष्टुप्॥ अथलोकपालानां॥ तत्रेंद्राग्नियमानांत्रयस्तृचाः प्रागुक्ताएव। यस्यासौ आसनीतितिसृणांब्रह्मानिर्ऋतिस्त्रिष्टुप्। उदुत्तमंब्रह्मावरुणस्त्रिष्टुप्। वायोःसवितुरितिवायवीयो ऋचःप्राग्वत्। शकंधूममितिचतस्रः सोमस्यमानोविदन्निति चतस्र ईशस्य शेरभकेत्यष्टानांतस्यब्रह्म जज्ञानमितिब्रह्मणः सप्तएतानिपूर्ववत्। वस्वादित्यरुद्रमरुतांहोममंत्राएव। ब्रह्मजज्ञानमितिसप्तब्रह्मणः। यन्नइंद्रइतिपंचाच्युतस्यमानोविदन्निति चतस्र ईशस्य विषासहिं तमितिषडर्कस्य। एतानिपूर्ववत्। वनस्पतेहोममंत्राएव। ततः स्वस्वशाखीयस्विष्टकृद्भ्यां तानहोमादिपूर्णाहुतिप्राग्भाविशेषंकर्मकुर्युः। ततोयजमानो मंडपप्राग्द्वारकलशसमीपेत्रातारमिंद्र इंद्रस्त्रिष्टुप्। इंद्रप्रीत्यर्थेबलिदानेविनियोगः। त्रातारमिंद्रं। इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायामुंसदीपंमाषभक्तबलिंसमर्पयामिनममइतिमाषभक्तबलिंदत्वा भोइंद्रदिशंरक्षबलिंभक्षममसकुटुंबस्यआयुःकर्ताक्षेमकर्ताशुभकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्ताभवेतिप्रार्थयेत्। एवमाग्नेय्यादिग्रहहोमोक्तैः स्वस्वादिमंत्रैर्बलिदानंप्रार्थनंच। एवमधिदेवताप्रत्यधिदेवतासहितेभ्यः सूर्यादिग्रहेभ्योपि होमोक्तैस्तत्तन्मंत्रैर्विनाय

कदुर्गावाय्वाकाशवास्तोष्पतिक्षेत्राधिपतिभ्यस्तत्तन्मंत्रैर्होमोक्तैरेव
।ततआचार्योयजमानान्वारब्धःस्रुचिस्रुवेणद्विवारंचतुर्वारंवाना
लिकेरादिफलयुक्तमाज्यंगृहीत्वापूर्णाहुतिंजुहुयात्॥तत्रमंत्राःस
मुद्रादूर्मिरितितृचस्यगोतमोवामदेवोग्निस्त्रिष्टुप्पूर्णाहुतौविनि
योगः।एवमग्रेपिविनियोगः॥मूर्द्धानंदिवोभरद्वाजोवैश्वानरस्त्रिष्टुप्
।पुनरग्निवसुरुद्रादित्यास्त्रिष्टुप्पूर्णादर्विविश्वेदेवाःशतक्रतुरनुष्टुप्
।सप्ततेअग्नेसप्तवानग्निर्जगती।धामंतेवामदेवआपोजगती।धामंते
स्वाहेतियजमानस्तुइदमग्नयेवैश्वानरायवसुरुद्रादित्येभ्यःशतक्र
तवेसप्तवतेअग्नयेऽद्भ्यश्चनममेतित्यजेत्।कातीयानांतुमूर्द्धानंदि
वइत्येवपूर्णाहुतिमंत्रः।अग्नयइदंनममेतित्यागः।सामगानांतुप्रजाप
तिऋषिर्गायत्रीछंदइंद्रोदेवतायशस्कामस्ययजनीयप्रयोगेविनियो
गः।पूर्णहोमंयशसाजुहोमियोस्मैजुहोतिवरमस्मैददाति।वरंवृणेय
शसाभामिलोकेस्वाहेत्यनेनस्रुवेणैवहोमः।इंद्रायइदंनममेतित्यागः।
ततोवसोर्धारयाहोष्यामीतिसंकल्प्ययजमानोवसोर्धारांजुहुयात्।
मंत्रास्तुअग्निमीळइतिनवानांमधुच्छंदाअग्निर्गायत्रीवसोर्धारायां
विनियोगः।विष्णोर्नुकमितिषण्णांदीर्घतमाविष्णुस्त्रिष्टुप्।आतेपितरि
तिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्।स्वादिष्ठयेतिनवानांमधुच्छंदःप
वमानसोमोगायत्री।महोवैश्वानरसाम्नो

वैश्वानरऋषिर्वैश्वानरोदेवतापथ्याबृहतीछंदः।ज्येष्ठसाम्नोभरद्वाज
ऋषिर्वैश्वानरोदेवतात्रिष्टुप्छंदःवसोर्धारायांविनियोगः।वसोर्धारा
जुहोतीत्यनुवाकमपिपठंतिशिष्टाः।वसोर्धाराहोमस्तुमहावानजला
शयोत्सर्गादौनास्तीतिबहवः।ततःपूर्णपात्रविमोकादिचयथाशाखं
समाप्यआचार्यसहिताऋत्विजःसर्वौषधीभिरनुलिप्तांगपत्नीपुत्रादि
सहितंयजमानंस्वस्वशाखीयैर्मंत्रैर्नवग्रहपीठसमीपस्थकुशोदकेन
संपातकलशोदकेनचअभिषिंचेयुःपौराणैश्च।तेच।सुरास्त्वामभिषिं
चंतुब्रह्मविष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः।
प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते।आखंडलोग्निर्भगवान्यमो
वैनिर्ऋतिस्तथा।वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः।ब्रह्मणास

हिताःसर्वेदिक्पालाःपांतुतेसदा। कीर्त्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रि
यामतिः।बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमातरः।एतास्त्वामभिषि
चंतुदेवपत्न्यःसमागताः।आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः।
ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः।देवदानवगंधर्वायक्षराक्षस
पन्नगाः।ऋषयोमनवोगावोदेवमातरएवच।देवपत्न्योद्रुमानागादै
त्याश्चाप्सरसांगणाः॥अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥
औषधानिसमस्तानिकालस्यावयवाश्चये॥सरितःसागराःशैलास्ती
र्थानिजलदानदाः।एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये।तच्छ्रेयो
राहूणीमहइति।ततोयजमानःस्नात्वाशुक्लमाल्यगंधांबरधरआचार्या
दीन्संपूज्यतेभ्योदक्षिणांदद्यात्॥तत्राचार्यायधेनुःब्रह्मणेकृष्णोऽन
ड्वान्सर्वेसदस्यर्त्विक्द्वारपालादिभ्योयथाशक्ति।तथा।धेनुःशंखस्त
थानड्वान्हेमवासोह्यःक्रमात्।कृष्णागौरायसंछागएतावेदक्षिणाः
क्रमात्॥ग्रहानुद्दिश्यदेयाःततःशक्त्याब्राह्मणान्भोजयेत्।संकल्प
येद्वाशक्तौततोदीनानाथेभ्योभूयसींदक्षिणांदद्यात्।मंडलदेवतानां
ग्रहपीठदेवतानांचोत्तरपूजांकृत्वायांतुदेवगणाःअभ्यारमितइयो
उत्तिष्ठब्रह्मणस्पतेइति उत्थाप्यविसृज्यमंडपादीन्प्रतिमादींश्चस
र्वान्संभारान्आचार्यायप्रतिपाद्ययस्यस्मृत्याप्रमादात्कुर्वतांकर्मेति
पठित्वाकर्मेश्वरार्पणंकृत्वाविप्राशिषोगृहीत्वातान्नमस्कृत्यसुहृ
द्युतोभुंजीतेतिसर्वंशिवं॥ ॥इतिश्रीभट्टशंकरात्मजनीलकंठकृते
दानपरिभाषाप्रयोगः॥ अथदानानि॥मात्स्ये॥ अथातःसंप्रवक्ष्यामी
त्यादिनाषोडशमहादानानिउक्तानि।यथा।आद्यंतुसर्वदानानांतुला
पुरुषसंज्ञितं॥हिरण्यगर्भदानंचब्रह्मांडंतदनंतरं॥कल्पपादपदा
नंचगोसहस्रंचपंचमं॥हिरण्यकामधेनुश्चहिरण्याश्वस्तथैवच।
हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा।पंचलांगलकंतद्वद्धरादा
नंतथैवच।द्वादशंविश्वचक्रंचततःकल्पलतात्मकं।सप्तसागरदानंच
रत्नधेनुस्तथैवच।महाभूतघटस्तद्वत्षोडशःपरिकीर्त्तितः।तस्मादा
राध्यगोविंदमुमापतिविनायकौ।महादानमथंकुर्याद्विप्रैश्चैवानुमो
दितइति।तथा।षोडशारत्निमात्रंतुदशद्वादशवाकरान्।मंडपंकारये

द्विहस्तश्चतुर्भद्रासनंबुधः।भद्रासनानिद्वाराणीतिकेचित्॥कुंडसमी
पान्यासनानीतिपरे॥तथा।सप्तहस्ताभवेद्वेदीमध्येपंचकराथवा।त
न्मध्येतोरणंकुर्यात्सारदारुमयंदृढं।षोडशहस्तपक्षेसप्तहस्तदश
द्वादशहस्तयोःपंचहस्तेतिसाचपूर्वैवनिर्णीता।तस्यांमध्यगतप्राक्
सूत्रेपूर्वपश्चिमयोः।शाकेंगुदीदेवदारुश्रीपर्णीबिल्वकदंबकांचना
दीनामन्यतमनिर्मितसप्तहस्तंचतुरस्रंस्तंभद्वयं।हस्तद्वयंभूमौस्तं
भयोरंतरालंतुहस्तचतुष्टयं।तयोरुपरिहस्तमिताचूडा।हस्तमितंस
त्काच्छिद्रंवाकार्यं।एवमुत्तरंगोपिस्तंभसजातीयकाष्ठघटितःपंचह
स्तोन्नयोर्वितस्तिमात्रत्यक्ताकृतबिलस्तंभचूडयोर्वितस्तिमात्रैःस्व
कराभ्यांवास्तंभबिलयोर्निवेश्यः।तदेतत्तोरणं।उत्तरंगमध्येधोभागे
लोहकटकमंकुशंवाकीलेननिवेश्यतदुत्तरकाष्ठात्षडंगुलावलंबि
तुलावलंबनायतुलातुपूर्वोक्ताकाष्ठमयीदशांगुलसूत्रवेष्टनस्थू
लाचतुर्भिःसार्द्धैर्वाचतुर्भिर्हस्तैर्दीर्घावृत्तुलाग्रांतयोर्मध्येचषडंगुलो
न्मिताचतुरस्राकार्यातस्यांचतुलावद्दीर्घपदद्वयंचतुष्टयंवानिवेश्य
तयोर्मध्येचपदत्रयंषडंगुलंनिवेश्यमध्येचान्येचतुर्विंशतिर्बधानि
वेश्याःसौवर्णाद्याःतस्याःषडंगुलयोरंतरयोरधोभागेवडिशाकृतिक
टद्वयंनिवेश्यतन्मध्येचोर्ध्वभागएकं।ततस्ताम्रपलानांदशाष्टषड्
शतैःक्रमात्पंचचतुःसार्द्धत्रिप्रादेशव्यासवर्त्तुलेपंचचतुस्त्र्यंगुलोच्छ्रि
तान्वितेताम्रचतुर्वलयान्वितेफलकेलौह्याभिस्त्रिहस्ताभिश्चतसृ
भिःशृंखलाभीरज्जुभिर्वात्तुलांतयोरवलंबयेत्।यथाफलकयोर्भूमे
श्चवितस्तिमंतरंभवतिहेमाद्रिरूपनारायणादिभिश्चकाष्ठमयेफल
केउक्तेतथा।कुर्यात्कुंडानिचत्वारिचतुर्दिक्षुविचक्षणः।सुमेखलायो
नियुतानितानिसंपूर्णकुंभानिसहासनानिसुताम्रपात्रद्वयसंयुता
निसयज्ञपात्राणिसविष्टराणिहस्तप्रमाणानितिलाज्यपुष्पधूपोप
हाराणिसुशोभनानि॥पूर्वोत्तरेहस्तमिताथवेदीग्रहादिदेवेश्वरपूज
नाय।विस्तारायामोच्छ्रयैर्हस्तमितेतिकेचित्॥वितस्त्युच्छ्रायेतिहेमा
द्रिः।तदुक्तं।गर्त्तस्योत्तरपूर्वेणवितस्तिद्वयविस्तृता।वप्रद्वययुतावेदी
वितस्त्युच्छ्रायसंयुता।मात्स्ये।द्व्यंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृ

तः॥ अंगुलोच्छ्रायसंयुक्तं च ग्रहयमथोपरि॥ द्व्यंगुलस्तत्रविस्तारः सर्वेषां कथितो बुधैरिति॥ तथा॥ अनेनविधिनायस्तु तुलापुरुषमाचरेत्॥ प्रतिलोकाधिपस्थाने प्रतिमन्वंतरं वसेत्॥ विमानेनार्कवर्णेन किंकिणीजालमालिना॥ पूज्यमानोप्सरोभिश्च ततो विष्णुपुरं व्रजेत्॥ कल्पकोटिशतं यावत्तस्मिन्लोके महीयते॥ कर्मक्षयादिह पुनर्भुविराजराजो भूपालमौलिमणिरंजितपादपीठः॥ श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्तप्रतापजितसर्वमहीपलोकः॥ योदीयमानमपि पश्यति भक्तियुक्तः कालांतरे स्मरति वाचयतीह लोके॥ यो वा शृणोति पठतींद्रसमानलोकं प्राप्नोति धाम स पुरंदरदेवजुष्टमिति॥ अथ तुलापुरुषदानप्रयोगः। अधिवासनात्पूर्वदिने कृतैकभक्तादिरधिवासरदिने यजमानः देशकालौ संकीर्त्य ब्रह्महत्यादिसर्वपापनाशपूर्वकसर्वमन्वंतरकालावच्छिन्नसर्वलोकपालस्थानाधिकरणकवासोत्तरकालोप्सरोगणाधिष्ठितकालरणत्किंकिणीगणमंडितार्कवर्णविमानकरणवैकुंठभुवनगमनानंतरकल्पकोटिशतावधिपूजायुक्तविष्णुपुरवासोत्तराखिलभूपालमौलिमणिमाणिक्यमालोपरंजितचरणपीठत्वविशेषितराजराजत्वश्रद्धानुविद्धयज्ञसहस्रयाजित्वप्रदीप्तप्रतापाशेषमहीपालविजयकामो विष्णुप्रीतिकामो वाश्च स्तुलापुरुषदानमहं प्रतिपादयिष्य इति संकल्प्य एकस्यां प्रतिमायां गोविंदपरायासुमापतिविनायकौ गोविंदायनम उमापतिविनायकाभ्यां नम इति संपूज्य विप्रश्च यं च संपूज्य विप्राङ्गां गृहीत्वा षोडशमातृः सप्तवसोर्धाराश्च संपूज्य नांदीश्राद्धपुण्याहवाचनगुर्वर्त्विक्द्वारपालवरणतदीयमधुपर्कपूजनानि पूर्वाण्हे कृत्वापराण्हे गुरुसहितो मंडपपूजां कुर्यात्। ततऋत्विजः प्रतिकुंडमेकैकं कलशमपि पूर्वोक्तैर्मंत्रैः स्थापयेयुः। कलशस्थापनं गुरुः कुर्यादिति परे। ततऋत्विजः स्वस्वकुंडेग्निं स्थापयेयुः। गुरुस्तु महावेद्यां षोडशारग्रहवेद्यां च सर्वतोभद्रं विलिख्य तद्देवताः तस्यामेव वेद्यां प्रतिमासु वास्तूयादि वनस्पत्यंते कपंचाशद्देवताश्च संपूज्य नवग्रहवेदिकलशस्थापन तदभिमंत्रणानि प्राग्वत्कृत्वा सर्वकर्माध्यक्षतया तिष्ठेत्। ऋत्विजस्तु ग्रहादिहोमसूक्तजपद्वारसूक्तपाठान्प्राग्वत्कृत्वा

स्विष्टकृदादिपूर्णाहुतिशांतकं कर्मकुर्युः। भूमिर्भूमिमगान्माता भूमि मीतरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो स्मान्द्वेष्टि स भिद्यतामिति भूमिं स्पृशेत्॥ ततस्तोरणस्पर्शः। तुलायज्ञस्य पूर्वस्यां सुप्रभं नाम तोरणं॥ महावीर्यं महाकायं सुवर्णसदृशप्रभं॥ अत्र द्वारे स्थितः शैलो माल्यवांश्च महाद्युतिः। एह्येहि सुप्रभ तोरण तुलायज्ञं रक्ष विघ्नं नाशय अग्निमील इत्याव्हानं। दक्षिणाशांगतं यस्य भीमाख्यं नाम तोरणं॥ महावीर्यं महाकायं भिन्नांजनसमप्रभं। अत्र द्वारे स्थितः शैलो विंध्यो नाम महाचलः। एह्येहि भीम तोरणेत्यादि पूर्ववत्॥ इषेत्वेत्यावाहनं। पश्चिमां दिशमाश्रित्य सुदंष्ट्रं नाम तोरणं। द्वारि तत्र स्थितः शैलो गंधमादनसंज्ञकः। एह्येहि सुदंष्ट्र तोरणेत्यादि। अग्न आयाहीत्यावाहनं। उत्तरस्यां दिशि तथा विकटं नाम तोरणं। महावीर्यं महाकायं शुद्धस्फटिकसन्निभं॥ तत्र द्वारि स्थितः शैलो हिमवांश्च महाद्युतिः। एह्येहि विकट तोरणेत्यादि शन्नो देवीरित्याव्हानं॥ पूर्वादिद्वारनामानि॥ पूर्वद्वारं वितानं स्याद्दक्षिणं पुष्पकं भवेत्॥ पश्चिमं तु घनं नाम कामदं चोत्तरं स्मृतम्मिति। ततः एह्येहि वितान द्वारेति तन्नामभिश्च तु द्वारावाहनं कार्यं। अथ कुंकुमपुष्पधूपदीपनैवेद्यवलीनादाय पूर्वभागे सुभद्राय ऋग्वेदमूर्त्तये इंद्रदैवत्याय माल्यवत्पर्वतसहिताय वितानाख्यपूर्वद्वाराश्रिताय द्वारपालसहिताय सुप्रभनाम्नेःश्वत्थतोरणाय नम इति पूजयेद्बलिं च दद्यात्॥ दक्षिणे शोभनाय यजुर्वेदमूर्त्तये यमदैवत्याय विंध्यपर्वतयुताय पुष्पकाख्यदक्षिणद्वारमाश्रिताय द्वारपालसहिताय भीमनाम्ने औदुंबरतोरणाय नम इति पश्चिमे सुधर्माय सामवेदमूर्त्तये वरुणदैवत्याय गंधमादनसहिताय घननामपश्चिमद्वाराश्रिताय सुदंष्ट्रप्लक्षतोरणाय नम इति पूजयेत्। अथर्ववेदमूर्त्तये सोमदैवत्याय हिमवत्पर्वतसहिताय कामदद्वारमाश्रिताय द्वारपाल सहिताय विकटाख्यवटतोरणाय नम इति उत्तरे पूजयेत्। मंडपस्तंभेषु सर्वेभ्यो देवेभ्यो नम इति पूजयेत्। वंशेषु किंनरेभ्यो नमः। पृष्ठे पन्नगेभ्यो नमः। ततः क्षेत्रपालाय मंडपाधः पूजयेत् बलिं दद्यात्। कुमुदः कुमुदाक्षश्च पुंडरीकोऽथ वामनः। शंकुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः। ब्रह्मा नागश्च

पूर्वादिशैलेध्वजना——यकाः॥कुमुदसहितायपूर्वध्वजायनमइ
तिगंधादिदद्यात्॥एवंकुमुदाक्षसहितायेत्यादिदशध्वजान्सदेवा
न्पूजयेत्॥गुरुर्यजमानसहितःपुष्पधूपौमाषभक्तबलिंचादायतू
र्यनादंकारयेत्॥मंडपपूर्वद्वारदेशे।एह्येहिसर्वामरसिद्धसाध्यैरभि
ष्टुतोवज्रधरामरेश।संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्न
मस्ते।इतींद्रमावाह्य।इंद्रायनमइतिसंपूज्यइंद्रायसांगायसपरिवारा
यसायुधायसशक्तिकायएषपुष्पादिसहितोमाषभक्तबलिर्नममेति
बलिंदद्यात्।एवमाग्नेय्यादिष्वग्न्यादिभ्यः।मंत्रास्तु।ॐएह्येहिसर्वा
मरहव्यवाहमुनिप्रवीरैरभितोभिजुष्ट।तेजोवतालोकगणेनसार्द्धंम
माध्वरंरक्षकवेनमस्ते।एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितदिव्य
मूर्ते।शुभाशुभानंदशुचामधीशशिवायनःपाहिमखंनमस्ते।एह्येहि
रक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः॥ममाध्वरंपाहिशुभा
धिनाथलोकेश्वरस्त्वंभगवन्नमस्ते॥एह्येहियज्ञेममरक्षणायमृगाधि
रूढःसहसिद्धसंघैः॥प्राणाधिपःकालकवेःसहायगृहाणपूजांभगव
न्नमस्ते।एह्येहियक्षेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं।सर्वौष
धीभिःपितृभिःसहैवगृहाणपूजांभगवन्नमस्ते॥एह्येहिपातालधरा
मरेंद्रनागांगनाकिंनरगीयमान।यक्षोरगेंद्रामरलोकसार्द्धंअनंतर
क्षाध्वरमस्मदीयं॥एह्येहिविश्वाधिपतेमुनींद्रलोकेनसार्द्धंपितृदेवता
भिः।सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशिवाय॥ततः
पूर्वस्यांदिशिकिंचिद्भूमिमुपलिप्य।त्रैलोक्येयानिभूतानिस्थावराणि
चराणिच॥ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे॥देवदानवगंध
र्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएवच॥एतेम
माध्वरेरक्षांप्रकुर्वंतुमुदान्विताः॥ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालो
गणैःसह।रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः।ॐत्रैलोक्यस्थेभ्यः
स्थावरेभ्योभूतेभ्योनमस्त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमःदानवे
भ्यःगंधर्वेभ्यःयक्षेभ्यःराक्षसेभ्यःपन्नगेभ्यःऋषिभ्यःमनुष्येभ्यःगो
भ्यःदेवताभ्यःब्रह्मणेविष्णवेरुद्रायक्षेत्रपालायगणेभ्योनमइतिसं
पूज्यमाषभक्तबलिंदद्यात्।ततःसाचार्यऋत्विक्कोयजमानश्चरणौ

प्रक्षाल्य वेद्यामुपविश्य षोडशारे तुलां संस्थाप्य तस्यां दक्षिणाग्रां ता
दारभ्य सुवर्णादिधातुबंधेषु सूत्रबंधेषु वा चतुर्विंशतिदेवता आवाह्य
पूजयेत्। ताश्च। ईशः शशी मारुतः रुद्रः सूर्यः विश्वकर्मा गुरुः अंगिरा अग्निः
प्रजापतिः विश्वे देवाः जगद्धाता पर्जन्यः शंभुः पितृदेवताः सौम्यः धर्मः
अमरराजः अश्विनौ तुलेशः मित्रावरुणौ मरुद्गणाः धनेशः गंधर्वः जले
शः विष्णुरिति॥ ततस्तिसृषु प्रतिमासु गोविंदसूर्यधर्मराजानावाह्य
संपूज्य गोविंदप्रतिमां द्वादशांगुलमुक्तादाम्ना सुवर्णशृंखलया वा तु
लामध्ये वलंबयेत्॥ सूर्यधर्मराजौ तुलासमीप एव स्थाप्यौ। ततः स
र्वे ऋत्विजः शांतिं पठेयुः ततो यजमानः कृतस्याधिवासनसांगतासिद्ध
ये गुर्वर्त्विक्जापकेभ्य इमां दक्षिणां संप्रददे इति शक्त्या दक्षिणां कुंडलो
पवीतकंठकांगुलीयवासांसि च दद्यात्। द्विगुणां गुरवे। तद्दिने यजमा
नगुर्वर्त्विक्द्वारपालानुपवासाशक्तो नक्तं जागरश्च नृत्यगीतादिना।
एवं पूर्वेद्युरशक्तो सद्यो वाधिवासनं कृत्वा परेद्युः कृतनित्यकर्मा यजमा
नः स्वस्तिवाचयेत्॥ ऋत्विजः पूर्ववत्स्वस्वकुंडे पूर्णाहुतिं स्वशाखया जु
हुयुः। कर्मशेषं समापयेयुश्च। अत्र ब्रह्मदक्षिणा पूर्णपात्ररूपा नास्ति
।अधिवासनतुलाद्रव्यदानेनान्यत्किंचिद्देयमिति पितामहचरणानामाश
यः॥ ततो ऋत्विजो पुत्रपत्नीयुतं यजमानं प्राङ्मुखमुदङ्मुखं वा कुंड
द्वारग्रहसमीपस्थकलशोदकैरभिषिंचेयुः स्वस्वशाखीयैर्मंत्रैः पौराणै
श्च। ते तु प्रदर्शिताः सुरास्त्वामित्यादयः॥ यजमानस्तु सर्वौषध्यनुलि
प्तः स्नात्वा शुक्लमाल्यांबरः पुष्पांजलिं गृहीत्वा सफलकां तोरणावलं
बितां तुलां त्रिःप्रदक्षिणीकृत्य अनुमंत्रयेत्॥ ॐ नमस्ते सर्वदेवानां
शक्तिस्त्वं सत्यमाश्रिता। साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना
।एकतः सर्वसत्यानि तथानृतशतानि च। धर्माधर्मकृतां मध्ये स्थापिता
सि जगद्धिते। त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता। मां तोलयंती सं
सारादुद्धरस्व नमोस्तु ते॥ योसौ तत्त्वाधिपो देवः पुरुषः पंचविंशकः। स
एषोधिष्ठितो देवि त्वयि तस्मान्नमो नमः॥ ततः। नमो नमस्ते गोविंद तु
लापुरुषसंज्ञक। त्वं हरे तारयस्वास्मानस्मात्संसारसागरादिति। तत्प्र
तिमामनुमंत्र्य स तुलां गोविंदं संपूज्य पुनस्तां प्रदक्षिणीकृत्य सखड्ग

र्मकवचालंकृतोहैमोधर्मराजसूर्यस्तयोर्वामदक्षिणकराभ्यामादाय
तुलामध्यावलंबितंगोविंदंपश्येत्॥तुलोत्तरशिक्यआरुह्योपविशेत्त
त्रप्राङ्मुखः।मात्स्ये।ततोपरेतुलाभागेन्यसेयुर्द्विजपुंगवाः।समाद
भ्यधिकंयावत्कांचनंचातिनिर्मलं।पुष्टिकामस्तुकुर्वीतभूमिसंस्थंनरा
धिप।यत्तु।पूर्वंद्रव्यन्यासःपश्चात्तदारोहणमितिगोपथेतन्नानापुरा
णवचनविरोधाद्वैशाखीयविषयमितिदानसौख्यादौ।गोदोहमा
त्रंस्थित्वैतदुदीरयेत्।नमस्तेसर्वभूतानांसाक्षिभूतेसनातनि॥पिता
महेनदेवित्वंनिर्मितापरमेष्ठिना।त्वयाधृतंजगत्सर्वंसहस्थावरजंगमं
॥सर्वभूतात्मभूतेस्थेनमस्तेसर्वधारिणीतिवह्निपुराणेतुमुहूर्तमात्र
वस्थानंउक्ता।जपेन्मंत्रांस्तुपौराणान्पुनंतुमेतिचतृचं।यथापवित्र
मतुलमपत्यंजातवेदसः।तथात्वेनपवित्रेणसुवर्णंतुपुनातुमां।रुद्रस्य
सुमहत्तेजःकार्त्तिकेयस्यसंभवः।यथाग्निर्देवताःसर्वाःसुवर्णंचतदात्मकं
॥तथा।यत्कृतंमेस्वकायेनमनसावचसातथा॥दुष्कृतंयत्सुवर्णस्थंया
तुमुक्तिंपरांशुभामिति।मात्स्ये।ततोवतीर्यगुरवेपूर्वमर्द्धंनिवेदयेत्।ऋ
त्विग्भ्योपरमर्द्धंचदद्यादुदकपूर्वकं।गुरवेग्रामरत्नानिऋत्विग्भ्यश्च
निवेदयेत्।अत्रेत्थंप्रयोगः।वेदिपश्चिमतउपविश्यसुवर्णादिकुशोद
केनप्रोक्ष्यजलाक्षतकुशानादायमासपक्षतिथ्याद्युल्लिख्यएकैकम
न्वंतरकालेत्यादिराजराजत्वकामोहमित्यंतंप्रागुक्तमहाप्रयोगमु
क्त्वापापक्षयकामोवाविष्णुप्रीतिकामोवेत्याद्युल्लिख्यामुकगोत्रायामु
कशर्मणेगुरवेऽमुकशर्माहंइदंतुलापुरुषसुवर्णार्द्धममग्निदैवतंसंप्रद
देनममेतिगुरवेर्द्धंसुवर्णंदद्यात्॥एवमपरार्द्धमृत्विग्भ्यःदानसाग
रादिमतेतुवरणक्रमेणाचार्यकराधःस्थितोदानकरेभ्यःसर्वेभ्योमुग
पदेवगोत्राद्युच्चारपूर्वकमुत्सृज्याचार्यादिभ्योयथाविभागंप्रतिपाद
येत्।अदक्षिणंतुयद्दानंतत्सर्वंनिष्फलंभवेदित्युक्तत्वादत्रदक्षिणाप
क्षयागुरवेग्रामरत्नादीतिश्रुतंदक्षिणात्वेनान्वेति।ग्रामरत्नेदक्षिणा
पिक्षत्रियकर्त्तृकेदानेअन्यकर्त्तृकेतुसुवर्णंदक्षिणेतिहेमाद्रिः।ततः
पुनर्मासाद्युल्लिख्यकृतैतत्तुलापुरुषमहादानप्रतिष्ठासिद्ध्यर्थंशतंसु
वर्णंदक्षिणांग्रामरत्नानिगुर्वृत्विग्भ्योहंसंप्रददइतितद्धस्तेजलंक्षिपेत्।

पश्चादाचार्यादिभ्यो भागशः प्रतिपादयेत्। रूपनारायणादयस्तु गुरु
वे दानानंतरं सुवर्णमात्रं दक्षिणां दत्वा। पुनस्तेभ्योऽष्टऋत्विग्भ्यो द्वे
दानानंतरमेकैकं सुवर्णं दक्षिणां दद्यादित्याहुः। अन्ये तु। अन्येषामपि
तुलाद्रव्यदानानुज्ञार्थं ग्रामरत्नानि निवेदयेत्। दक्षिणा तु सर्वेषामेव
दानानामिति सामान्यन्यायेन सुवर्णं तत्रापि संख्याकांक्षायां गोपथो
क्तसहस्रसंख्यान्वयः सोपि कृष्णलादिभिर्निर्वाह्य इत्याहुः। अत्र द
नसारे त्रयः पक्षाः। आद्ये गुरवे ऋत्विग्भ्य इति। अत्र अदक्षिणं तु य
द्दानं तत्सर्वं निष्फलं भवेत्। इति वचनाद्दक्षिणापेक्षायां गुरवे ग्रामरत्ना
दीत्युक्तं। जापकेभ्यः पुनरन्यद्द्रव्यं देयं। तेषु ऋत्विक्त्वाभावात्। द्वितीय
स्तु। प्राप्य तेषामनुज्ञां तं तथान्येभ्योपि दापयेदिति। तत्र गुरवे तुलाद्रव्य
स्यार्द्धं स्वतुर्यांशः। तुलाविकृतिभूतधरादाने धरार्द्धं चतुर्भागं गुरवे तु
निवेदयेदिति श्रुतमत्रापि परिमाणापेक्षायामन्वेति सत्रोक्तो वा। द्विपादव्य
वस्था ज्योतिष्टोमे येन वा तुष्यते गुरुरिति सामान्योक्तं वा। दीनानाथवि
शिष्टादीन्पूजयेद्ब्राह्मणैः सहेत्यनेन तृतीयः पक्षस्तत्रापि गुरवे दाने द्वि
तीयपक्षोक्तैव व्यवस्थेति विशिष्टब्राह्मणा अपि। अनयोः पक्षयोर्जा
पकादिभ्योप्येतन्मध्यस्थसुवर्णदानेन क्षतिरिति। अत्र पक्षत्रयेपि।
गुरवे ग्रामरत्नादि। सर्वेषामेव दानानां सुवर्णं दक्षिणेत्यलदृत्यादिनो
क्तं सुवर्णमेव प्रत्येकं समुदायेन वा देयमिति। मदनरत्ने गुर्वृत्विग्ज
पान्येभ्योपि देयमिति द्वितीयपक्षे तुलाद्रव्यं त्रेधा विभज्यैकांशो गु
रवे देयोन्य ऋत्विग्भ्यः परो द्वारपालेभ्यो दीनानाथेभ्यश्च। तृतीयपक्षे
तु एतत्तुलितसुवर्णं गुरवे ऋत्विग्भ्यो द्वारजापकेभ्योन्येभ्यश्च दीना
नाथेभ्यो ब्राह्मणेभ्यश्च दातुमहमुत्सृज्य इत्युत्सृज्य दद्यात्। सर्वप
क्षे दक्षिणा गुर्वृत्विग्भ्य एव नान्येभ्य इत्युक्तं। अत्र प्रतिग्रहे ब्राह्मणो य
जमाने सप्रणवं स्वस्तीति शब्दमुच्चैः पठेयुः। क्षत्रिये निरोंकारं मंद्रं वैश्ये
उपांशु। शूद्रे मनसा। ततो द्रव्यं स्पृष्ट्वा स्वशाखोक्तां कामस्तुतिं पठेदिति
रूपनारायणीये। अथर्वणानां तु कइदं कस्मा अदात्कामः कामायादा
त्कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृ
ह्णामि कामैतत्ते भूमिस्त्वा प्रतिगृह्णात्वंतरिक्षमिदं महत्। माहं प्राणे

नमात्मना ग्रजपाप्रति गृह्य विराधिषी येति। ततः सहस्रं विप्रान्भोजयेत्सं
कल्पयेद्वा। ततः पुण्याहवाचनं कृत्वा स्थापितदेवतापूजनं कुर्यात्पूज्य
मानः। गुरुस्तु यांतु देवगणाः सर्वे पूजामादाय पार्थिवीं। इष्टकामप्रसि
द्ध्यर्थं पुनरागमनाय चेत्याद्युक्त्वा पीठादिदेवता विसर्जयेत्॥ ततो मंड
पादि सामग्री आचार्याय प्रतिपादयामीत्युक्त्वा गुरुसात्कुर्यात्। मात्स्ये। न
चिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः॥ तिष्ठद्भयावहं यस्माच्छोकव्याधि
करं नृणां। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलमिति॥ इति तुलापुरु
षदानविधिः॥ अथ रजतादितुलाविधिः॥ भविष्योत्तरे॥ अनेनैव विधा
नेन केचिद्रूप्यमयं पुनः॥ कर्पूरेण तथेच्छंति केचिद्ब्राह्मणपुंगवाः। अने
नेति मुख्यतुलापुरुषदानकथितेनेत्यर्थः। रजतादितुलापुरुषफलं च
। यत्पापं स्वकुले जातं त्रिसप्तपुरुषैः कृतं॥ तत्सर्वं नश्यति क्षिप्रं अग्नौ तू
लं यथा तथेत्यादिना गोपथब्राह्मणादौ पापविशेषस्य सूर्यलोकावा
प्त्यादिरूपमुक्तं। तथा सितशर्करायां नार्यः सौभाग्यदास्तुलां। कुंकुमे
न प्रयच्छंति लवणेन गुडेन वा। न तत्र मंत्रा होमो वा एवमेव प्रदापयेत्
॥ विश्वामित्रः। आदित्ये राहुणा ग्रस्ते सुवर्णैस्तोलयेत्तनुं। सोमग्रहे तु
रौप्येण यथा दानं तथा शृणु। सर्वग्रहस्य मुखे युक्त उत्सन्नः पक्षिदेहतः॥
सर्वपापहरायैतद्दद्यामि प्रीयतां विधुः। इत्युक्त्वा यजलं त्वप्सु निक्षिपेद्द्विज
सत्तमः। प्रीयतां पितरः कांस्ये ताम्रे चैव पितामहः। लवणे सिंधुजे लक्ष्मीः
प्रीयतां पार्वती गुडे॥ गंधैर्गुडैर्वा वासोभिः सौभाग्यं लवणे परं॥ प्रीयतां
विश्वधात्रीति दानमंत्रोऽभिधीयतां। तुलापुरुषतो राजन्याति तत्परमं
पदं॥ सर्वपापविशुद्धात्मा पुनर्निर्यात्यपुनर्भवं। अत्र सर्वपापहरायैत
द्दभिप्रीयतां विधुरिति रूप्ये॥ पितरः प्रीयतामिति कांस्ये गंधगुडवाससु
लायां पार्वती। लवणे विश्वधात्री। आत्मतुल्यं सुवर्णं वा रजतं रत्नमेव
वा॥ यो ददाति द्विजाग्र्येभ्यस्तस्याप्येतत्फलं भवेदित्युक्तत्वात् रत्नतुला
यामपि सुवर्णतुलाफलमेव इति कर्तव्यतापि सैवेति केचित्॥ इति रू
प्यादितुलापुरुषः॥ अथ नानारोगघ्नादिस्तुलाविधिः। गारुडे॥ तुलापु
रुषदानस्य शृणु मृत्युंजयोदकं॥ अथ लोहं प्रदातव्यं सर्वरोगोपशांतये
॥ कांस्यं च पस्मके देयं त्रपु चार्शोविकारके। अपस्मारे च सीसं स्यात्ताम्रं कु

श्रेसुदारुणे॥पित्तलंरक्तपित्तेचरूप्यंप्रदरमेहयोः॥सौवर्णंसर्वरोगेषुप्र
दद्यान्मृत्युनोदनं॥फलोद्भवंतथादेयंग्रहणीदारुणेरुजि॥गौडंभस्म
करोगेचयोगंतुगंडमालके॥जांगलंचाग्निमांद्येचरोमोत्पातेतुपैष्टकं
॥जांगलंकाष्ठजं॥मधूद्भवंतथादेयंकासश्वासजलोदरे॥घृतोद्भवंतथा
देयंछर्दिरोगोपशांतये॥क्षीरंपित्तविनाशायदाधिकंभगदारणे॥ल
वणंवेपनाशायपैष्टंदद्रुविनाशने॥अन्नंचसर्वरोगस्यनाशनेस्मृत
मेवच॥अत्रतत्तुलादानेमासाधिदेवताःपूज्याः ताम्रेगारुडे॥लोहेम
हाभैरवः॥कांस्येश्विनौपूषाच॥सीसकेवासुः॥ताम्रेसूर्यः॥पैत्तलेकुजः
॥रौप्येपितरः॥सुवर्णेदेवताः॥फलेसोमः॥गुडेआपः॥तांबूलेविनायकः
॥कुसुमेगंधर्वाः॥जांगलेग्निः॥मधुनियक्षः॥घृतेमृत्युंजयः॥क्षीरेताश
गणाः॥दध्निसर्पाः॥पिष्टेप्रजापतिः॥अन्नेसर्वदेवताइति॥अथघृता
दितुलाविधिः॥विष्णुधर्मोत्तरे॥पुण्यंदिनमथासाद्यतृतीयायांवि
शेषतः॥गोमयेनानुलिप्तायांभूमौकुर्याद्दृढंशुभं॥दारवंशुभवृक्षस्य
चतुर्हस्तप्रमाणतः॥सुवर्णंतत्रबध्नीयात्स्वशक्त्याघटितंघटे॥सौ
वर्णंस्थापयेत्तत्रवासुदेवंचतुर्भुजं॥शिक्यद्वयंतुबध्नीयात्स्थापयेत्
पिटकेततः॥तत्रारूढस्तुवस्त्रास्त्रैःपुष्पालंकारभूषितः॥अभीष्टांदेव
तांगृह्यस्नापयित्वाघृतादिभिः॥तुलादानस्यसर्वस्यविधिरेषप्रकी
र्त्तितः॥प्रथमातुघृतस्योक्तातेजोवृद्धिकरीतुला॥माक्षिकेणतुसौ
भाग्यंतैलेनबहुलाःप्रजाः॥वस्त्रस्यदिव्यवस्त्राणिप्राप्नोतितुल
याध्रुवं॥लवणस्यतुलावण्यमरोगित्वंगुडस्यतु॥असापत्न्यंशर्क
रयासुरूपंचंदनेनच॥अवियुक्ताभवेद्भर्त्रातुलयाकुंकुमस्यच॥नसं
तापोहृदिभवेत्क्षीरस्यतुलयासदा॥सर्वकामप्रदाःसर्वाःसर्वपापक्ष
यंकराः॥योददातितुलाःसर्वाःसगोर्यालयमाप्नुयात्॥मंत्रेणदद्यादभि
मंत्रितांतुसकृत्तुलामेकतमांद्विजेभ्यः॥सयातिगौर्याःसदनंसुपुण्यं
नशोकदौर्गत्यमुपाश्नुतेपुमान्॥त्वंतुलेसर्वभूतानांप्रमाणंपरिकीर्त्ति
ता॥मांतोलयंतीसंसाराद्रुद्धरस्वनमोस्तुते॥इत्यारुह्यक्षणंस्थित्वाचिं
तयित्वाहरिंप्रियां॥अवरुह्यततोदद्यादर्घ्यपाद्यमथापिवा॥गुरुंसंपू
ज्यविधिवत्सर्वालंकारभूषणैः॥विसर्जयेन्नमस्कृत्यभोजयित्वाविधा

नतः॥शेषंद्विजेभ्योदातव्यंस्त्रीभ्योन्येभ्यस्तथैवच॥इष्टबंधुशिष्टा
नांआश्रितानांकुटुंबिनां।कदलीरलसंस्यात्तुपंचपिंडांहिमाद्रिजा।क
र्पूरस्यतुलांपूज्यकुंकुमेनलभेत्तुतां।गुडंवायदिवाखंडंलवणंवापि
तोलितं।योदद्यादात्मनातुल्यानारीवापुरुषोपिवा।पुमान्सद्युम्नव
त्स्यान्नारीस्यात्पार्वतीसमेति।तुलादानस्यसर्वस्यविधिरेषउदाहृ
तः॥इतिरूप्यादितुलादानविधिः॥अथरूप्यादितुलादानप्रयोगः॥त
त्ररूप्यकर्पूरतुलयोःसुवर्णतुलाफलमेवइतिकर्तव्यतापिपक्षेसैव।
रत्नतुलायामपितदेवफलं।फलेषुरोगेषुचविशेषःकेचित्।तत्रखले
गंधेकुंकुमेलवणेगुडेमधुनिचसौभाग्यं।वस्त्रेषुवस्त्रप्राप्तिश्च।लवणे
लावण्यंच।कुंकुमेभर्तृवियोगश्च।तैलेबहुलाःप्रजाः।सर्वरोगेषुलो
हं।यक्ष्मणिकांस्यं।अर्शस्सुत्रपुः।अपस्मारेसीसं।कुष्टेताम्रं।रक्तपि
त्तेपित्तलं।प्रदरमेहयोःरूप्यं।सर्वरोगेषुमृत्युनिवारणार्थंचसुवर्णं।
ग्रहण्यांफलं।भस्मकेसर्वरोगेषुचगुडः।गंडमालासुपूगफलं।अग्नि
मांद्येकाष्ठं।वायुजेरोमनाशेपुष्पं।कासश्वासजलोदरेषुमधु।क्षयेघृ
तं।तेजोवृद्ध्यर्थं।पित्तेक्षीरंसंतापनिवृत्त्यर्थंच।भगंदरेदधि।कंपेलव
णं।दद्रुणिपिष्टं।सर्वरोगेषुअन्नंशर्करयासाफल्यं।चंदनेसौंदर्यं।स
र्वासुवातुलासुसर्वाणिफलानि।अत्रतत्तत्फलकामस्यतत्तद्रोग
निवृत्तिकामस्यवातत्तद्द्रव्यतुलाज्ञेया।अथतत्तद्द्रव्येषुदेवताः।लो
हेमहाभैरवः।कांस्येपूषाश्विनौच।सीसेवायुः।ताम्रेसूर्यः।पित्तलेकु
जः।रूप्येपितरः॥सुवर्णेसर्वदेवताः॥फलेसोमः॥गुडेआपः।तांबू
लेविनायकः॥पुष्पेगंधर्वाः।काष्ठेवह्निः।मधुनिवसुः।घृतेमृत्युंजयः
।क्षीरेतारागणाः।दध्निसर्पाः।पिष्टेप्रजापतिः।अन्नेसर्वेदेवताः।तुलातु
शाकेंगुदीदेवदारुश्रीपर्णीबिल्वकदंबकांचनादिकाष्ठमयीसार्द्ध
चतुरस्रहस्तादशांगुलसूत्रवेष्टनस्थूलावर्तुलाप्रांतयोर्मध्येचषडं
गुलमिताचतुरस्राकार्या।तस्याःषडंगुलयोरंतरयोरधोभागेवडि
शाकृतिकटकद्वयंनिवेश्यं।मध्येचोर्ध्वभागेएकं।तस्याःसमांतरा
श्चतुर्विंशतिर्वेधाधातुमयानिवेश्याः।एकंफलकद्वयमपिपंचचतुः
सार्द्धत्रिप्रादेशमितंव्याससहितंचतुरस्रं... तुल्यांगुलोच्छ्रितः

र्भं दोलाबंधनार्थं भित्तिषु स्तंभेषु कटकैर्युतं कार्यं। अथ सांप्रदायिकः
प्रयोगः। कर्त्ता मासपक्षाद्युल्लिख्यामुककामोऽमुकरोगनिवृत्तिकामः
सर्वत्र गौरीसदनसुपुण्यप्राप्तिशोकदुर्गतिनिवृत्तिकाम ईश्वरप्राप्
तिकामो वाऽमुकतुलादानं करिष्य इति संकल्प्य गणेशपूजाचार्य
वरणतत्पूजनानि कुर्यात्। स्वस्तिवाचनमातृकापूजनाभ्युदयि
कश्राद्धान्यपीति केचित्। ततआचार्यो यत्रसंस्थितसर्षपान् विकीर्य ग्र
चीवोऽहमिति तृचेन। एतोन्विंद्रमिति तृचेनापोहिष्ठेत्यादिभिः कर्म
भुवंसंशोध्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रं हूयंजस्या पूर्वोक्तामष्टाभिः
वेदिकां तत्र द्व्यदेवतां गोविंदं सूर्यं धर्मराजं च प्रतिमाचतुष्टयं सं
पूज्य तुलां गंधादिभिरलंकृत्य तस्यां धातुमयेषु सूत्रमयेषु वा चतुर्विं
शतिबंधेषु देवतास्तन्नाम भिरभ्यर्चतु र्थ्यंतनमो नेरावाह्य पूजयेत्। ता
श्च ईशः १ शशी २ मारुतः ३ रुद्रः ४ सूर्यः ५ विश्वकर्मा ६ गुरुः ७ अंगि
रोग्नी ८ प्रजापतिः ९ विश्वेदेवाः १० जगद्विधाता ११ पर्जन्यश्शंभू १२ पि
तृदेवताः १३ सौम्यः १४ धर्मः १५ अमरराजः १६ अश्विनौ १७ तुलेशः १८
मित्रावरुणौ १९ मरुद्गणाः २० धनेशः २१ गंधर्वः २२ जलेशः २३ विष्णुः
२४ इति ततस्तुलामुत्तरांगादिषु बध्वा फलकद्वयं तथा ऽवलंबयेद्य
था भूमेर्वितस्तिमात्रमुच्चं भवेत्॥ गोविंदप्रतिमां च हेमशृंखलयासु
क्ताद्दाम्ना सूत्रांतरेण वा द्वादशांगुलेन तुलामध्येऽवलंबनीया॥ ततो
यजमानः पुष्पांजलिं गृहीत्वा तुलां त्रिः प्रदक्षिणीकृत्यानुमंत्रयेत्॥
ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता॥ साक्षिभूता जगद्धात्री
निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथानृतशतानि च। धर्मा
धर्मकृतां मध्ये स्थापितासि जगद्धिते। त्वं तुले सर्वभूतानां प्रमाणमिह
कीर्तिता॥ मां तोलयंती संसारादुद्धरस्व नमोऽस्तु ते॥ योसौ तत्त्वाधि
पो देवः पुरुषः पंचविंशतिः। स एषोऽधिष्ठितो देवि त्वयि तस्मान्नमो नम
इति। नमो नमस्ते गोविंद तुलापुरुषसंज्ञक। त्वं हरे तारयत्वस्मानस्मा
त्संसारसागरादिति गोविंदमनुमंत्र्य पुनस्तुलां गोविंदं च संपूज्य पुनः
प्रदक्षिणीकृत्य सूर्यं दक्षिणकरे धर्मराजं च वामे आदाय तुलावलंबितं
गोविंदं पश्यन्नुत्तरशिक्ये प्राङ्मुख उपविशेत्। ततोऽपरे शिक्ये आचार्यो

द्रव्योद्रव्यंन्यसेत्प्रभुः। ततोमुहूर्त्तंगोदोहनमात्रंवास्थित्वापठेत्। ॐनमः
स्तेसर्वभूतानांसाक्षिभूतेसनातनि॥ पितामहेनदेवित्वंनिर्मितापर
मेष्ठिना॥ त्वयाधृतंजगत्सर्वंसहस्थावरजंगमं। सर्वभूतात्मभूतेशेन
मस्तेसर्वधारिणीति॥ ततोवतीर्यदेशकालौस्मृत्वामुकफलकामो
मुकरोगनिवृत्तिकामःसर्वत्रगौरीसदनपुण्यप्राप्तिशोकदुर्गतिनिवृ
त्तिकामईश्वरप्रीतिकामोवाइदमात्मसमतोलितममुकद्रव्यममुक
दैवतमाचार्यादिविप्रेभ्योनानानामगोत्रेभ्योदातुमहमुत्सृजेनममे
तिजलंक्षिपेत्। तत्रकांस्येपितरःप्रीयंतामितिवदेत्। ताम्रेपितामहःप्री
०लवणेलक्ष्मीःप्री०गंधगुडवस्त्रेषुविश्वधात्री। गुडेपार्वतीप्री० ततआ
चार्यायशक्त्यादक्षिणांदद्यात्॥ आचार्यस्तुतत्तद्देवतांगोविंदंसूर्यंध
र्मराजमीशादींश्चसंपूज्यउत्तिष्ठब्रह्मणस्पतइत्युत्थाप्ययांतुदेवग
णाइतिविसृजेत्। ततोयजमानःप्रतिमादिमाचार्यकरेप्रतिपाद्यन्नीन्वि
प्रान्संभोज्यभूयसींदक्षिणांदद्यात्॥ ॥इतिश्रीमीमांसकशंकरभट्टा
त्मजनीलकंठकृतेदानमयूखेरूप्यादितुलादानप्रयोगः॥ अथहिर
ण्यगर्भदानम्॥ मात्स्ये॥ अथातःसंप्रवक्ष्यामिहेमदानमनुत्तमं। नाम्ना
हिरण्यगर्भाख्यंमहापातकनाशनं। पुण्यंदिनमथासाद्यतुलापुरुष
दानवत्॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। कुर्यादुपोषित
स्तद्वत्लोकेशावाहनंततः। उपोषितउपक्रांतोपवासः। पुण्याहवाचनंकृत्वात
द्वत्कृत्वाधिवासनं। ब्राह्मणैरुन्नयेत्कुंडंतपनीयमयंशुभं। द्वासप्ततंगु
लोच्छ्रायंहेमपंकजगर्भवत्। त्रिभागहीनविस्तारंप्रशस्तंमुरजाकृ
ति। ब्राह्मणैर्गुर्वृत्विग्भिःसहयजमानइतिरूपनारायणः। ठक्कुरस्तुने
रेवानयेदितिमदनरत्नादौकुंडंहिरण्यगर्भेहेमपंकजेति। अधोभाग
मध्यस्थिताष्टदलहेमकमलयुतं। त्रिभागेति। अष्टाचत्वारिंशदंगुल
विस्तारं। मुरजोमृदंगः। तदाकृतिमध्येकिंचित्स्थूलमितिठक्कुरः। मूल
मध्याग्रेषुसममितिवाचस्पतिमिश्राः। दानसागरेतुविस्तारमित्यस्या
ग्रेआज्यक्षीराभिपूरितमितिपाठः। तत्रतुल्याभ्यामाज्यक्षीराभ्यांएकदे
शेपूरितमित्यर्थः। अभिरभागइत्यभेरेकदेशवाचित्वात्। दशांगाणि
सरत्नानिदानंस्रूचीतथैवच। हेमनालंसपिटकंबहिरादित्यसंयुते॥

तथैवावरणंनाभेरुपवीतंचकांचनं॥पार्श्वतःस्थापयेत्तद्वद्धैमंदंडकमं
डलुं॥आंत्राणिदशास्त्रखंडानि।अस्त्राणीतिवापाठः।तत्रअस्त्राकाराणि
सुवर्णखंडानीतिहेमाद्रिः।अस्त्राणीतिदामोदरः॥तानिचतत्रैव।ख
ड्गंचक्रंदंडः।पाशःध्वजःगदाशूलंपरशुकुलिशाख्यानिदश।रत्नानि
पंचप्रसिद्धानि॥पिटकंमंजूषेतिहेमाद्रिः।स्थलाकारउपवेशनपट्ट
इतिदामोदरः।दात्रंनालच्छेदनार्थं।सूचीकर्णवेधार्था।नाभेरावरंपाव
त्राकारं।उपवीतमुपनयनार्थं।दंडकमंडलूसमावर्त्तनार्थौ।एतानिद
शास्त्रखंडादीनिहैमानीतिहेमाद्रिः।नालोपवीतदंडाएवहैमाः।अन्यत्तु
अकृतमेवग्राह्यमितितुयुक्तं।रत्नेषुसर्वैरप्यहैमत्वांगीकारात्॥अ
त्रास्त्राणीत्यनेनरत्नादिदशकमेवोच्यतइतिदानसागरः।दशाश्चा
स्त्राणिचेतिरूपनारायणः।दशांतानीतिभूपालः।दशाह्वानीतिपाठेर
त्नविशेषणंचेदं।पंचरत्नानीत्यर्थइतिविद्याधरः॥आदित्यसंयुतंआ
दित्यप्रतिमायुतं।तथा॥पद्माकारंपिधानंस्यात्समंतादंगुलाधिकं।
मुक्तावलीसमोपेतंपद्मरागदलान्वितं।तिलद्रोणोपरिगतंवेदीमध्ये
ततोर्चयेत्॥पात्रमुखादेकांगुलेनसमंतादधिकमष्टदलकमलाकारं
पिधानंस्यात्॥द्रोणःपरिभाषायांज्ञेयः।कुंडहेममानंतुयावतातद्युक्त
प्रमाणंयद्येतावद्ग्राह्यं।लैंगेतु।कुर्यात्सहस्रकर्षेणाधःपात्रंहिरण्यतः।
तदर्द्धेनार्द्धपात्रंतुसहस्रेणद्वयंतुवा।त्रिपादंवार्द्धपादंवासपादंसार्द्धमे
ववा।द्विगुणंवाप्रकर्त्तव्यंयथालाभंतुवाभवेत्।सहस्रजंवानत्कृत्वा
स्वर्णपादेस्त्रुवेष्टयेदितिहेममानमुक्तं।ततोमंगलशब्देनब्रह्मघोषर
वेणच।सर्वौषध्युदकेनैवस्नापितोवेदपुंगवैः॥शुक्लमाल्यांबरधरःस
र्वाभरणभूषितः।इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः।उच्चार्यमंत्र
णमंत्राःप्रयोगेज्ञेयाः।एवमामंत्र्यतन्मध्येआविश्यास्तउदङ्मुखः।मु
ष्टिभ्यांसंपरिगृह्याथधर्मराजचतुर्मुखौ।जानुमध्येशिरःकृत्वातिष्ठेदु
च्छ्वासपंचकं।तथा।गर्भाधानंपुंसवनंसीमंतोन्नयनंतथा।कुर्युर्हिरण्य
गर्भस्यततस्तेद्विजपुंगवाः।गर्भाधानादिग्रहणमनवलोभस्योपलक्ष
णं।प्रजावज्जीवपुत्राभ्यांसेवनंतत्रआचरेत्।दूर्वारसेनकर्त्तव्यंव्याहृत्या
चघृताहुतिरितिहेमाद्रौवातुलोक्तेः।गीतमंगलशब्देनगुरुरुत्थापयेत्ततः

जातकर्मादिकाः कुर्यात्क्रियाः षोडशचापराः॥जातकर्मादिकाः अपरा
श्चक्रियाः कुर्यात्तेनषोडशसंपद्यंतेइत्यर्थः।एवमेवहेमाद्रिरूपनारा
यणादीनामाशयः।तेनगर्भाधानपुंसवनसीमन्तोन्नयनानवलोभना
निगुर्वीयन्नतमः कुर्यात्।ततोगुरुर्यजमानमुत्थापयेत्ततोजातकर्म
नामकरणनिष्क्रमणान्नप्राशनचूडोपनयनवेदव्रतचतुष्टयसमाव
र्तनोद्वाहाः कार्याः।हेमाद्रौतुजातकर्मादिषुप्राजापत्यैंद्राग्नेयसौम्यव्रत
चतुष्टयगोदानसाहित्येनोद्वाहत्यागेनद्वादशत्वमुक्तंजातकर्मादिषु
विवाहपितृयज्ञप्रवेशनंचषोडशचापराइतियथाश्रुतमेवयोज्यमि
तिमदनदामोदरौ॥एतेचजातकर्माद्याःसंस्कारायजमानशाखयेतित
योराद्यः।गुरोः कर्तृत्वात्तच्छाखयेतिपरः।युक्तंतुसमावर्तनोद्वाह
पंचयज्ञायजमानेनैवस्वशाखयाकार्याः॥इतरेतुगुरुणायजमानशा
खयैवेति।फलिशाखेतिकर्तव्यतयैवतेषांफलजनकत्वस्यक्लृप्तत्वा
त्॥कर्मांतरत्वेतुजातकर्मादीनांमानाभावः।सर्वेभ्यः कर्मभ्योदर्शपू
र्णमासावित्यत्रैवाख्याताभावेनप्रकरणांतरायोगात्॥त्रैधातवीया
दीक्षणीयेतिवत्तुतान्येवजातकर्मादीनिदानांगतयाविनियुज्यंते।क
र्मांतरत्वेपिचैतेषांजातकर्मादिविकृतित्वेनफलिशाखीयैवेतिकर्त
व्यताप्राप्नोतिनगुरुशाखीया।तेनगुरुरेवयजमानशाखीयोभवस्य
स्मिन्दानेअध्ययनसिद्धज्ञानबलात्।अवैगुण्याय।सत्रइवसमानक
ल्पायजमानाः।तेचसंस्कारास्तत्कर्मानुध्यानपूर्वंतत्तत्प्रधानमंत्रपा
ठमात्रेणकार्याः।स्त्रीशूद्रकर्तृकेमंत्रवत्तमनुध्यानमात्रं।तत्रस्त्रियाः
जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाकर्मविवाहाख्यसंस्का
राःषड्।तत्रापिविवाहःसमंत्रकः।शूद्राणांतुएतेषट्पंचमहायज्ञाश्चे
त्येकादशानुध्यानरूपाएवेतिसर्वनिबंधकृतः।शिष्टास्तुत्रैवर्णिककर्तृ
केप्यमंत्रकानुध्यानमेवाचरंति।युक्तमिवचेदं।सर्वपदार्थत्यागेमंत्र
मात्रपाठेमानाभावात्।आष्यंतुस्वरूपतएवानुष्ठानंसर्वेषां।यत्तुहा
मोदरोगर्भाधानादीनांकुंडेविवाहस्यचातत्काले।संभवात्समंत्रकानु
ध्यानमेवकार्यमिति।तन्न।दूर्वीरसेनकर्तव्यंसेचनंदक्षिणेपुटे।औदुं
बरफलैःसार्द्धमेकविंशत्कुशानसदा।शक्ताःपुतावदेवात्रकुर्यात्सामंतक

एवंविश्वजिदंता
र्मणि॥अन्नप्राशनकेविद्वान्भोजयेत्पायसादिभिः॥ ब्राह्मणैर्वेदपारगै रि
त्यगर्भाधानादिकाःक्रियाः॥शक्तिबीजेनकर्त्तव्या
तिलिंगपुराणात्॥दक्षिणपुटेअधःपात्रगतरंध्रयोर्मध्येदक्षिणरंध्रे॥
यत्तुहेमाद्रौटोडरानंदेच॥उपरिपात्रगतरंध्रयोरितितन्न॥अधःपा
त्रेस्मरेद्दिव्यांगुणत्रयसमन्वितां॥चतुर्विंशतिकांदेवींब्रह्मविष्ण्वातिरू
पिणीं॥ऊर्ध्वेपात्रेगुणातीतंषड्विंशारव्यमुमापतिं॥आत्मानंपुरुषंध्या
येत्पंचविंशकमंत्रजमिति।लैंगे।अधःपात्रस्यैवस्त्रीरूपतोक्तेः।ताव
देवत्येवकारेणांगांतरपरिसंख्या।अत्रहोवावपंनीतिवत्।तेनगृ
ह्याग्नेरपिनिवृत्तिः।उहहेलन्यकांकृत्वात्रिंशन्निष्केणशोभनां।अ
लंकृत्यतथाहत्वाशिवायविनिवेदयेत्॥अत्रचतुःसौवर्णिकोनि
ष्कइतिकेचित्॥षट्पंचाशदधिकद्विशतपणमितइतिभास्कराचा
र्याः॥दीनारेपिचसुवर्णेनिष्कइत्यमरः।सुवर्णपर्यायइत्यन्ये।ते
षांशक्त्याव्यवस्था॥दूर्वारसासेकोयजमानस्यपितरौनस्तःयानीय
वामिथुनमानीयतयोरन्यतरेणकारयेद्गुरुः।कर्त्तारंभार्ययायुक्तंस
र्वालंकारशोभितं।आनीयकुर्यात्तत्स्थस्यगर्भाधानादिकाःक्रियाः।
भार्यादक्षपुटेदूर्वारससेचनमाचरेत्॥एकविंशतिसंख्यातानुदुं
बरफलान्वितान्॥कुशानानीयशक्त्याथकुर्यात्सीमंतकर्मचेतिका
मिकोक्तेः।प्रजावज्जीवपुत्राभ्यांसेचनंततआचरेत्॥दूर्वारसेनक
र्त्तव्यंव्याहृत्याचघृताहुतिरितिहेमाद्रौवातुलोक्तेश्च।प्रजावत्आ
तेगर्भइत्यादि।जीवपुत्रंअग्निरेतुप्रथमइत्यादि।सत्यपिवाकेषांचि
दसंभवेनसर्वेषामनुध्यानमात्रमुक्तं।यत्तुअन्नप्राशनेभुक्तवतःक
र्मानुष्ठानविरोधइतिसोपिहविःशेषभोजनवद्विहितत्वादपास्तः।किं
चसर्वैरपिप्रयोगेनसर्वेसंस्कारमंत्राउक्ताः।चौलादौहोममंत्राउक्ताः
॥अथप्रधानकरणीभूताएवमंत्राअभिप्रेतास्ततोगर्भाधानेऽपन्नः
शोभुचदघमितिमूर्द्धाभिमर्शनार्थसूक्ताद्यंगमंत्रस्यसमावर्त्तने
होमसाधनस्यममाग्नेवर्गइतिसूक्तस्यतत्रैवस्मृतंचमइत्यादेर्लि
खनंविवाहादौचभार्यात्वोत्पादकप्रधानभूतहोमसप्तपदीमंत्राणा
मलिखनमितिकथमिहपूर्वापरविरुद्धंप्रमाणशून्यमेतेषांलिखनं

मादर्त्तव्यं।अतःस्वरूपतएवकार्याःसर्वे।तत्रपूर्वादिकुंडेष्वेवक्रमात्
गादिशाखीययजमानसंस्कारप्रधानहोमाःकार्याः।उल्लेखनोपलेप
नेध्माधानाघाराज्यभागाःस्विष्टकृदाद्युत्तरांगानिचनकार्याणि।तदु
पकाराणांसिद्धत्वात्।पश्चुतंत्रांतःपातिपुरोडाशप्रयाजानुयाजनानु
ष्ठानवत्।पाश्चुकैरेवतैरुपकारसिद्धेः।अत्रगर्भाधानादित्रयनिष्क्रम
णान्नाद्यसहितषोडशसंस्कारपक्षेनिष्क्रमणश्राद्धत्यागेनपंचयज्ञसा
हित्येनोनविंशतिपक्षेवागर्भाधानसीमंतेतावत्कर्मांतरेयावदुक्तं।
कामिकलिंगादिष्वनेकगुणश्रुतेः।प्रधानबाधाच्च।पुंसवनंतुध्यानमा
त्रेणकार्यं।स्वरूपानुष्ठानबाधान्मंत्रपाठमानाभावाच्च।तथाकृशा
खीयेश्रौतलएवाग्नआयूंष्यास्याद्याहुतिचतुष्टयंकार्यंनोपनयनत्रंत
चतुष्टयसमावर्त्तनविवाहेषुचौलीयैरेवाहुत्यैरुपकारसिद्धेः।उपनय
नेविशेषमाहाश्वलायनः।अथोपेतपूर्वस्यकृताकृतंकेश वपनंमे
धाजननंचानिरुक्तं।परिदानंकालश्च तत्सवितुर्वृणीमहइतिसा वि
त्री पूर्वउपेतउपेतपूर्वस्तस्यपुनरुपनीयमानस्येतियावत्।कृताकृ
तंवैकल्पिकं।अनिरुक्तंवर्जितंपरिदानकालावप्यनिरुक्तौ।परिदान
मादित्यायब्रह्मणस्पतयेबृहुतेददामीति।गायत्र्याःस्थानेतत्सवितुर्वृणी
महइतिऋचउपदेशः।मनुश्च।अजिनंमेखलादंडोभैक्ष्यचर्याव्रतानि
च।निवर्त्ततेद्विजातीनांपुनःसंस्कारकर्मणीति।अन्यत्कार्यं।विवाहे
सप्तपदीक्रमणपाणिग्रहणयोर्निवृत्तिः।प्रतिमायाअसंभवात्।अन्येष्व
पिसंस्कारेषुबाधितंलुप्यतइतिदिक्।षोडशक्रियाभावात्स्त्रीशूद्र
योर्हिरण्यगर्भदानेअनधिकारइतिकेचित्तन्न।नरोवायदिवानारी
एवंब्रह्मात्मसंभवं।यःकरोतिमहापुण्यंतस्यापिशृणुयत्फलमितिहेमा
द्रौहिरण्यगर्भप्रकरणेविष्णुधर्मोक्तेः।स्त्रीणामधिकारावगमात्।आत्म
संभवेहिरण्यगर्भे।स्त्रीशूद्रास्तुसधर्माणइतिवाक्याच्चशूद्रस्येति।त
था।स्त्र्यादिकंचगुरुर्वेदत्वामंत्रमिमंजपेत्।मंत्रःप्रयोगेज्ञेयः।चतुर्भिः
कलशैर्भूयस्ततस्तेद्विजपुंगवाः।स्नानंकुर्युःप्रसन्नांगाःदिव्याभरणभू
षिताः।देवस्यत्वेतिमंत्रेणस्थितस्यकनकासने।चतुर्भिःकुंडसमीपस्थैः
कुर्युःकारयेयुः।मंत्रःप्रयोगे।ततोहिरण्यगर्भेचतेभ्योदद्याद्दक्षिणाः।अ

त्रापिसर्त्विगाचार्याणांदानद्रव्यविभागस्तुलापुरुषवद्वगंतव्यः। ते पूज्याःसर्वभावेनबहवोवातदाज्ञया। तन्नोपकरणंसर्वंगुरवेविनिवेदयेत्‌। पादुकोपानहच्छत्रचामरासनभाजनं। ग्रामंवाविषयंवापियच्चान्यदपिसंभवेत्‌॥ विषयोग्रामसमूहः॥ अन्यद्गलादि। ग्रामादिकंचतुलापुरुषवत्‌ अत्रापिदक्षिणात्वेनान्वेति। अत्राप्यात्मालंकारंगुरवेदद्यात्‌॥ इतिहिरण्यगर्भदानविधिः अथैतत्प्रयोगः। देशकालौसंकीर्त्यसकलकदिकलुषनिवृत्तिसंभावितनरकनिमग्नपित्रादिपुरुषशतविविधबंधुपुत्रपौत्रादिसमुद्धरणपूर्वकसिद्धसंघसेवितत्वाप्सरोगणकरकलितचामरमालावीज्यमानत्वैकैकमन्वंतरसमयावच्छिन्नसर्वलोकपालपुरनिवासोत्तरकल्पकोटिशतावच्छिन्नब्रह्मलोकमहितत्वकामोहंश्वोहिरण्यगर्भदानंप्रतिपादयिष्येइतिप्रतिज्ञायतुलापुरुषवत्तद्गोविंदोमापतिविनायकपूजाविप्राज्ञाग्रहणमातृपूजाभ्युदयिकश्राद्धपुण्याहवाचनगुर्वादिवरणमधुपर्कदानमंडपपूजागुर्वादिविनियोगांतंकुर्यात्‌। अत्रगुरुर्यजमानशाखीयएवततोगुरुर्वेद्यांषोडशोपरिस्थापिततिलद्रोणोपरिप्रागुक्तहिरण्यगर्भपात्रंऋत्विग्भिःसहानीयस्थापयेत्‌। ततःकुंडमध्येहेमपद्मंनिधायकुंडैकदेशंघृतक्षीराभ्यांपूरयित्वाकुंडस्यबहिःपार्श्वयोर्दक्षांबद्धानिल्लुरिकांसूचींहेमनालंउपवेशनपट्टंआदित्यप्रतिमांनाभेरावरणवस्त्रंहेमोपवीतंदंडंकमंडलुमितिस्थापयेत्‌॥ ततःॐहिरण्यगर्भायेतिसपिधानंहिरण्यगर्भंपूजयेत्‌॥ कुंडसमीपस्थंकुंभस्थापनग्रहस्थापनादिपूर्णाहुत्यभिषेकांतंतुलापुरुषवत्‌। एवमभिषिक्तोयजमानःस्नातःशुक्लवस्त्रालंकारादियुक्तोगृहीतकुसुमांजलिःप्राङ्मुखःपात्रमामंत्रयेत्‌। नमोहिरण्यगर्भायहिरण्यकवचायच। सप्तलोकसुराध्यक्षजगद्धात्रेनमोनमः॥ भूर्लोकप्रमुखालोकास्तवगर्भव्यवस्थिताः। ब्रह्मादयस्तथादेवानमस्तेविश्वधारिणे। नमस्तेभुवनाधारनमस्तेभुवनाश्रय। नमोहिरण्यगर्भायगर्भेयस्यपितामहः। यतस्त्वंभवभूतात्माभूतेभव्येव्यवस्थितः। तस्मान्मामुद्धराशेषदुःखसंसारसागरात्‌। ततःपात्रेपुष्पांजलिंप्रक्षिप्यसमंगलघोषतत्रप्रविशेत्‌गुर्वृत्विजस्तुपात्रंपिधानेनाच्छादयेयुः। यजमानस्तुतत्रोदङ्मुखोदक्षिणवामसुष्टिभ्यांक्रमात्धर्मराजचतुर्मुखौगृहीत्वाजान्वोःशिरःकृत्वोच्छ्वासपंचकावच्छिन्नसमयंमार

सीत।ततोगुर्वादिर्यजमानस्यपितरौतत्स्थानीयमन्यद्वामिथुनमानी
यतद्वाराधःपात्रगतरंध्रयोर्मध्येदक्षिणरंध्रेशक्तिबीजेनदूर्वारसंसेच
येदितिगर्भाधानं।पुंसवनस्यध्यानमात्रं।सीमंतेगुर्वादयन्यतमःसोदुंब
रफलैरेकविंशतिकुशैरधःपात्रेकाल्पनिकंसीमंतंशक्तिबीजेनोन्नीयं
।ॐआतेगर्भोयोनिमितिप्रजावतासूक्तेनअग्निरैत्विति जीवपुत्रेणच
दूर्वारसंपूर्वोक्तेरंध्रआसिच्यऋकुशाखीयादियजमानक्रमेणप्रागादि
कुंडेसमस्तव्याहृतिभिरेकामाज्याहुतिंजुहुयादिति। इदमेवानवलोभ
नं।सीमंतोत्तरव्यस्तमुक्तं।।एवमुत्तरसंस्कारेष्वपितत्रकुंडेषुहो
मः।ततोगुरुःशुभलग्नेयजमानमुत्थाप्याश्वलायनयजमानस्यजात
कर्मनामकरणान्नप्राशनचौलोपनयनव्रतचतुष्टयानिकुर्यात्।तत्रान्न
प्राशनेपायसभोजनं।।चौलेमातुरुत्संगोपवेशनाभावइतिनारायणः
।उपनयनेअग्नआयूंषीत्याद्याहुतिचतुष्टयवपनमेधाजननादिस्था
यव्रतपतयेबटुंतेपरिददामीतिपरिदानाजिनमेखलादंडभैक्ष्यचर्या
व्रताचरणाभावः।एवंमहानाम्न्यादिव्रतसमावर्त्तनविवाहेष्वाहुति
चतुष्टयाभावः।गायत्र्याःस्थानेतत्सवितुर्वृणीमहेवयंदेवस्यभोजनं।
श्रेष्ठंसर्वधातमंतुरंभगस्यधीमहीतिऋचउपदेशः।अन्यत्तुल्यं।
समावर्त्तनविवाहौस्वयंयजमानःकुर्यात्।विवाहस्तुत्रिंशन्निष्कमू
ल्यसुवर्णघटितप्रतिमयासहतत्राग्निपरिणयनसप्तपदीक्रमणध्रु
वारुंधतीदर्शनानिनिवर्त्तंतेलाजाहोमस्तुस्त्रुचैव।अन्यत्तुल्यंश्राद्धं
तुयजमानएवकुर्यात्।मदनदामोदरादयस्तुपंचमहायज्ञाःकार्याः
नश्राद्धानवलोभनमित्याहुः।यजुःशाखीयानांतुजातकर्मादिषुप्राजा
पत्यमैंद्रमाग्नेयंसौम्यंचत्वारिवेदव्रतानिनिष्क्रमणंचोक्तं।नामकर
णंनोक्तमितिविशेषः।छंदोगानांतुनामकरण — — मस्ति।अन्नप्रा
शनंनास्ति।गोदानव्रतंकेशांतव्रतंचत्वारिवेदव्रतानिचेति।अथर्ववेदे
जातकर्मनिष्क्रमान्नप्राशनगोदानोपनयनसावित्रव्रतमेवसावित्री
व्रतंविसर्गसमावर्त्तनविवाहपंचयज्ञाउक्ताः।एतेषामनुष्ठानप्रकारस्त
त्तच्छाखयाबोध्यः।शिष्टास्तुसर्वेषांसंस्काराणामनुध्यानमात्रंकुर्व
ति।ततोयजमानोदशाखंडादिगुरवेऽर्पयेत्।नमोहिरण्यगर्भायेत्यादि

प्रागुक्तमंत्रद्वयेननमस्कुर्यात्।ततःकुंडसमीपस्थकलशजलैर्देवस्य
त्वेत्यादिनाअद्यजातस्यतेंगानिअभिषेच्यामहेवयं।दिव्येनानेनवपु
षाचिरंजीवसुखीभवेतिचमंत्रेणकनकासनस्थंयजमानमभिषिंचे
युः।ततोदेशकालौसंकीर्त्यसकलेत्यादिमहितत्वकामइत्यंतमुक्त्वा
तिलद्रोणोपरिस्थमिदंहिरण्यगर्भपात्रंसवितानकंविष्णुदैवतंयु
ष्मभ्यंयथोक्तभागव्यवस्थयासंप्रददेनममेत्युक्त्वापुनस्तथैवदेश
कालाद्युक्त्वैतद्दानप्रतिष्ठासिद्ध्यर्थमिदंसुवर्णादिदक्षिणांगुर्वादिभ्यः
संप्रददइत्युक्त्वादीनानाथेभ्योपियथाशक्तिदत्वापुण्याहवाचनग्र
हपूजाविसर्जनांतंतुलापुरुषवत्सर्वंकृत्वात्मालंकारादिगुरवेदद्या
त्॥ इतिहिरण्यगर्भप्रयोगः॥ अथब्रह्मांडं॥ मात्स्ये। अथातःसंप्रवक्ष्या
मिब्रह्मांडंविधिपूर्वकं॥यच्छ्रेष्ठंसर्वदानानांमहापातकनाशनं।पुण्यं
दिनमथासाद्यतुलापुरुषदानवत्।ऋत्विङ्मंडपसंभारभूषणाच्छा
दनादिकं॥लोकेशावाहनंतद्वदधिवासनकंतथा॥कुर्याद्विंशत्पलादू
र्ध्वेआसहस्राच्चशक्तितः।शकलद्वयसंयुक्तंब्रह्मांडकांचनंबुधः।श
कलःखंडः।उक्तंचब्रह्मांडे।कुंभच्छायोभवेद्द्यौरकूपतीच्यांदिशिचंद्र
माः।उदितःशुक्लपक्षादौवपुरंडस्यतादृशं।कुंभच्छायोनामग्रीवाहीन
कुंभइत्यर्थः।दिग्गजाष्टकसंयुक्तंषड्वेदांगसमन्वितं।लोकपालाष्ट
कोपेतंमध्यस्थितचतुर्भुजं।शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वि
तं।वस्वादित्यमरुद्गर्भंमहारत्नसमन्वितं।वितस्तेरंगुलशतंयावदाया
मविस्तरं॥कौशेयवस्त्रसंवीतंतिलद्रोणेपरिन्यसेत्।तथाष्टादश
धान्यानिसमंतात्परिकल्पयेत्।दिग्गजाऐरावतपुंडरीकवामनकु
मुदांजनपुष्पदंतसार्वभौमसुप्रतीकाः॥ तल्लक्षणमादित्यपुराणे।सु
श्रीभश्चचतुर्दंतःश्रीमानैरावतोमतः।पुष्पदंतोरुहस्तश्चाषड्दंतःपु
ष्पदंतवान्॥सामान्यगजरूपेणशेषादिक्करिणःस्मृताः।षडंगानि।शि
क्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमिति।तल्लक्षणं।स्रुक्त्वानिब्र
ह्मणोलोकेसाक्षसूत्राणितानितु।द्विभुजानिशुभास्यानिवामेदधाति
कुंडिकाः।कुंडिकाःकमंडलून्।अर्थादक्षसूत्राणिदक्षिणकरे॥तानिचप
श्चिमे।चतुरोवेदाइतिवाक्यात्तुअंगानिचवेदस्यानेप्रधानंनीयमानंद्वित

त्रांगान्यपकर्षतीति न्यायात्स्थाप्यानि। लोकपालरूपाण्याह विश्वक
र्मा। चतुर्दंतगजारूढो वज्रपाणिः पुरंदरः। शचीपतिः प्रकर्त्तव्यो नाना
भरणभूषितः। पिंगभ्रूश्मश्रुकेशाक्षः पिंगाक्षो जठरो रुणः। छागस्थः
साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः। दृषत्पीतो यमः कार्यो दंडहस्तो
विजानता। रक्तदृक्पाशभृत्क्रुद्धो निर्ऋतिर्विकृताननः। पुंस्थितः ख
ड्गहस्तश्च भूतवान्राक्षसैर्वृतः। वरुणः पाशधृक्सौम्यः प्रतीच्यां
मकराश्रयः। धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। दशाश्वरथगः
सोमो गदापाणिर्वरप्रदः॥ पूर्वोत्तरे त्रिनेत्रश्च वृषभस्थस्त्रिशूलधृक्
॥ कपालपाणिश्चंद्रार्कभूषणः परमेश्वरः॥ उमारूपं देवीपुराणे। चतु
र्भुजा द्विबाहुर्वा द्विनेत्रा वा त्रिलोचना। कुंडलालंकृता इंदुशेखराभर
णान्विता। गौरोचनानिभा गौरी स्वस्तिका नवयौवना। स्वस्तिका बाहु
भ्यां कुचौ पिहितुं कृतस्वस्तिकाकारेत्यर्थः। गौरी च शिववामभागे।
रूपनारायणीये तु अक्षसूत्रकमंडलुधराभयहस्तेत्युक्तं लक्ष्मीरू
पं॥ पाशाक्षमालिकांभोजसृणिभिर्याम्यसौम्ययोः॥ पद्मासनस्थां
कुर्वीत श्रियं त्रैलोक्यमातरं॥ गौरवर्णां सुरूपां च सर्वालंकारभूषितां
रौक्मपद्मकरव्यग्रां वरदां दक्षिणेन तु॥ ऊर्ध्वे दक्षिणकरे पाशाक्षमा
ले॥ ऊर्ध्ववामे पद्मांकुशौ॥ अधोवामदक्षिणयोर्हैमपद्मवरमुद्रां द
धतीति चतुर्हस्तेयमिति दामोदरः॥ वसुरूपं। प्रसन्नवदनाः सौम्या वर
दाः शक्तिपाणयः। पद्मासनस्था द्विभुजाः कर्त्तव्या वरदाः सदा। दामो
दरीये निगमे॥ आपो ध्रुवश्च सोमश्च — — — चरश्चैवानिलोनलः
॥ प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृता इति॥ पद्मासनस्था द्विभु
जाः पद्मगर्भाभकांतयः॥ करादिस्कंधपर्यंतं नीलपंकजधारिणः। अ
धःसंस्थितमेषादि राशयः प्रावृतांघ्रिकाः। मेषादिराशिरूपं दामोदरी
ये॥ मेषवृषकर्कटसिंहवृश्चिकमीनाः स्वनामानुरूपाः॥ बाणाधरौ दं
पती मिथुनं। करद्वयधृतसस्यमंजरीकुमारी कन्या तुलाहस्तो नरस्तुला
। मृगास्यो ध्वजघनो गकरः॥ घटशिरा नरः कुंभः। प्रावृतांघ्रिका मौजाद्य
च्छिन्नचरणा इति दामोदरः। इंद्राद्या द्वादशादित्यास्तेजोमंडलमध्य
गाः। इंद्रादिनामानि हरिवंशे। इंद्रो विष्णुर्भगस्त्वष्टा वरुणोंशोर्यमार

विः॥पूषामित्रोयमश्चैवपर्जन्योद्वादशस्मृताइति।मरुतस्तुधावल्ल
ष्णामृगारूढावरदाध्वजधारिणः॥ऊनपंचाशत्।शिवादिप्रतिमाः
प्रागुक्ताः।अष्टादशधान्यानिप्रत्येकंद्रोणपरिमितानीतिकेचित्।पू
र्वेणानंतशयनंप्रद्युम्नंपूर्वदक्षिणे॥प्रकृतिंदक्षिणेदेशेसंकर्षणमतः
परं॥पश्चिमेचतुरोवेदाननिरुद्धमतःपरं।अग्निमुत्तरतोहैमंवासु
देवमतःपरं।समंताद्गुडपीठस्थानर्चयेत्कांचनान्बुधः।स्थापयेद्व
स्त्रसंवीतान्पूर्णकुंभान्दशैवतु।अनंतशयनस्वरूपंविष्णुधर्मोत्त
रे॥देवदेवस्तुकर्त्तव्यःशेषस्तुप्तश्चतुर्भुजः॥एकःपादोस्यकर्त्तव्योल
क्ष्म्युत्संगगतःप्रभो।तथाकरश्चकर्त्तव्यःशेषभोगांकसंस्थितः।ए
कःकरोस्यकर्त्तव्यस्तत्रजानौप्रसारितः॥कर्त्तव्योनाभिदेशस्थस्त
थातस्यापरःकरः॥नाभिसंभूतकमलेसुखासीनःपितामहः।नाल
लग्नौतुकर्त्तव्यौपद्मस्यमधुकैटभौ॥शंखचक्रगदादीनिमूर्त्तानिप
रितोन्यसेत्।प्रद्युम्नलक्षणंपंचरात्रादिषु।दक्षिणोर्ध्वकरेपद्मंद्द्या
च्छंखमधःकरे॥चक्रमूर्ध्वेतथावामेगदांदद्यात्तथाबुधः।चापेषु
धृग्वाप्रद्युम्नोरूपवान्विश्वमोहकइति।प्रकृतिर्यद्यप्यव्यक्तरूपिणी
तथापितत्स्थानेलक्ष्मीप्रतिमानिवेश्या।तदुक्तंमार्कंडेयपुराणे॥
सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी॥मातुलिंगंगदांखेटं
पानपात्रंचबिभ्रती॥नागंलिंगंचयोनिंचबिभ्रतीनृपमूर्द्धनि॥संक
र्षणरूपंविष्णुधर्मोत्तरे॥वासुदेवस्यरूपेणकार्यःसंकर्षःप्रभुः।सतु
शुक्लवपुःकार्योनीलवासायदूत्तमः॥गदास्थानेचमुशलंचक्रस्थाने
चलांगलं॥वेदलक्षणंमहाभूतघटेवक्ष्यते।तथा।कृष्णंचतुर्भुजंद
क्षेशरखड्गौतथोत्तरे॥धनुःखेटधरंवीरंअनिरुद्धंप्रचक्षतइतिनार
दीये॥अग्निप्रतिमाप्रागुक्ता॥वासुदेवप्रतिमापिनारदीये॥वासुदेवः
शिवःशांतःसिताब्जस्थश्चतुर्भुजः।योगमूर्द्धाईशंखश्चहृद्देशार्पित
हस्तकः॥धारयेदुत्तरेचक्रंकरेवैदक्षिणेगदामिति।एताश्चप्रतिमाः
प्रकृतदानपरिमाणात्पृथक्कार्याः।एतानगुडपीठस्थानर्चयेत्।पूर्णकुं
भानस्थापयेदित्यत्रसमंतादित्यनुषंजनीयं॥तथा।दशैवधेनवोदे
याःसहेमावरदोहनाः।पादुकोपानहच्छत्रचामरासनदर्पणैः॥भो

क्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः। होमाधिवासनांते च स्नापि
तो वेदपुंगवैः। इममुच्चारयेन्मंत्रं त्रिः कृत्वाथ प्रदक्षिणं। सहेमांबरेति
। हेमशृंग्यः सवस्त्राः कांस्यदोहनाः एताश्च दक्षिणार्थमुपकल्प्याः
। भविष्ये तु सुवर्णमेव दक्षिणार्थमुपकल्प्यमिति उक्तं। इममुच्चार
येदिति। ब्रह्मांडं त्रिः प्रदक्षिणीकृत्य मंत्रं पठेत्। तत्र मंत्रः प्रयोगे ज्ञेयः।
एवं प्रणम्यामररविश्वगर्भं दद्याद्द्विजेभ्यो दशधा विभज्य। भागद्वयं तत्र
गुरोः प्रकल्प्य समं भजेच्छेषमनुक्रमेण॥ समं भजेच्छेषमिति। गुरोर्भा
गद्वयं प्रकल्प्यावशिष्टभागानामेकैकं भागं त्रेधा विभज्य चतुर्विंशति
संख्येभ्य ऋत्विगादिभ्यः समं दद्यात्। दानवाक्यं तुलावदेव ज्ञेयं। त
था। स्वल्पे च होमं गुरुरेक एव कुर्यादथैकाग्निविधानयुक्त्या। स एव सं
पूज्यतमोऽल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन। अत्र सहस्रपलपक्षउ
त्तमस्तदर्धेन मध्यमस्तदर्द्धेनाधमपक्षे स्वल्पत्वं ज्ञेयं। विंशतिपल
निर्मिते स्वल्पत्वमित्येके॥ एकाग्निविधाने प्रतीच्यां वृत्तं कुंडमिति परि
भाषायामुक्तं॥ एकस्य वक्रलिगष्टकं विनेत्यर्थः। इत्थं य एतदखिलं
पुरुषोऽत्र कुर्याद्ब्रह्मांडदानमधिगम्य महद्विमानं। निर्धूतकल्मष वि
शुद्धतनुर्मुरारेरानंदकृत्पदमुपैति सहाप्सरोभिः। संतारयेत्पितृपिता
महपुत्रपौत्र बंधुप्रियातिथिकलत्रशताष्टकं यः। ब्रह्मांडदानशकली
कृतपातकौघं आनन्दयेच्च जननीकुलमप्यशेषं॥ इति ब्रह्मांडदानं। अ
थ प्रयोगः। यजमानो देशकालौ संकीर्त्य सकलपातकक्षयपितृपिता
महपुत्रपौत्रबंधुप्रियातिथिकलत्रपुरुषशताष्टकतारणविलीनस
कलपातकाशेषमातृकुलपातकौघशकलीकरणसंतारणानन्दपू
र्वकाप्सरःसंघसहितविमानकरणकमुरारिपदप्राप्तिकामोऽहं श्वो ब्र
ह्मांडमहादानं प्रतिपादयिष्य इति संकल्प्य तुलापुरुषदानवत्प्रा
रभ्योपवासो गोविंदादिपूजादिमंडपपूजाचार्यादिविनियोगांतं विद
ध्यात्॥ तत आचार्यो वेदिरचितषोडशारचक्रोपरि स्थतिलद्रोणोप
रि ब्रह्मांडं स्थापयेत्॥ एतत्प्रागादिदिक्षु दिग्गजाष्टकलोकपालाष्टक
प्रतिमाः स्थापयित्वा पश्चिमायां वेदचतुष्टयतदंगषट्कप्रतिमाः स्था
पयेत्। ब्रह्मांडोपरि शिवो माच्युतलक्ष्मीसूर्यप्रतिमां मध्ये चतुर्मुखप्र

तिमांमध्यएवसमंतादष्टवसुद्वादशादित्यमरुद्गणप्रतिमानवरत्नानि
चेतिस्थापयित्वाकौशेयवस्त्रेणब्रह्मांडंवेष्टयित्वाप्रत्येकंद्रोणपरिमि
परितोनिधायप्राः
तान्यष्टादशधान्यानि
च्यादिदिक्षुगरुडपीठेषुअनंतशयनप्रद्युम्नप्रकृतिसंकर्षणवेदचतुष्टया
निरुद्धाग्निवासुदेवप्रतिमाष्टकंचनिधायस्थापितब्रह्मांडादिप्रतिमाः
क्रमेणनाममंत्रैरावाह्यार्चयित्वापरितोदशपूर्णकुंभान्सवस्त्रान्स्था
पयेत्ततःपादुकोपानहच्छत्रचामरासनदर्पणभक्ष्यभोज्यफलमाल्य
दीपानुलेपनमंत्रैःसहकांस्यदोहनादियुक्तादशधेनूरूपकल्प्यब्रह्मां
डोपरिवितानंबध्नीयात्।ततःकुंडसमीपस्थकुंभस्थापनंनवग्रहस्थाप
नादिपूर्णाहुत्यभिषेकांतंतुलापुरुषवत्।एवमभिषिक्तोयजमानः शु
क्लवेषोंजलिबध्वाब्रह्मांडंत्रिःप्रदक्षिणीकृत्यनमोस्तुविश्वेश्वरविश्व
धामजगत्सवित्रेभगवन्नमस्ते।सप्तर्षिलोकामरभूतलेशगर्भेणसार्द्धं
वितराभिरक्षां।यद्दुःखितास्तेसुखिनोभवंतुप्रयांतुपापानिचराचराणां
।त्वद्दानशस्त्राहतपातकानांब्रह्मांडदोषाःप्रलयंव्रजंत्वितिपठेत्।ततोय
जमानःपश्चिममुपविश्यगोदशकेनसहब्रह्मांडंदशधाविभज्याचार्या
यभागद्वयंभागाष्टकमृत्विग्भ्योदद्यात्।अद्यामुककालेसकलपातक
क्षयकामइदंतंसंकल्पवाक्यमुक्त्वाब्रह्मांडमेतावत्पलमितसुवर्णनिर्
मितंतिलद्रोणोपरिस्थापितमेतत्सर्वोपस्करयुतंयुष्मभ्यंगुरुऋत्विग्
भ्यःसंप्रददइतिगुर्वादिहस्तेषुजलंनिक्षिपेत्॥ब्राह्मणाश्चब्रह्मांडंस्पृ
ष्ट्वाप्रतिगृह्णीयुः॥ततःकृतैतत्ब्रह्मांडदानप्रतिष्ठार्थमिदंहिरण्यमा
ग्नेयंग्रामादिचगुरवेसंप्रददइतिदद्यात्॥ऋत्विग्भ्योपियथाश
क्तिहिरण्यंदद्यात्।अल्पदेयद्रव्यत्वेगुरुरेवस्वशाखयापश्चिमायां
वृत्तकुंडेहवनादिकुर्यात्॥ब्रह्मजापकाद्योपिप्रयोगांतरवत्कार्यान्
ऋत्विजः।ततोग्रहवेद्यांग्रहादिपूजनादिविसर्जनांतंगुरुःकुर्यात्।इ
त्येकाध्वर्युपक्षः॥इतिब्रह्मांडदानप्रयोगः॥अथकल्पतरुदानं।मात्स्ये
।कल्पपादपदानाख्यमतःपरमनुत्तमं।महादानंप्रवक्ष्यामिसर्वपात
कनाशनं।पुण्यंदिनमथासाद्यतुलापुरुषदानवत्।पुण्याहवाचनंकु
र्याल्लोकेशावाहनंतथा।ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकम्।

कांचनान्कारयेद्वृक्षान् नानाफलसमन्वितान्॥ नानाविहंगवस्त्रा
णिभूषणानि च कारयेत्॥ नानाफलानि स्त्रीपुरुषगोगजवाजिमणि
कनकरजतभक्ष्यफलादीनीति केचित्। फलान्येवेत्यन्ये॥ शक्तित
स्त्रिपलादूर्ध्वमासहस्रात्प्रकल्पयेत्॥ अर्द्धकृष्णसुवर्णस्य कारये
त्कल्पपादपं॥ कल्पपादपदानार्थमुपक्लृप्तसुवर्णस्यार्द्धेन ब्रह्मादिप्र
तिमासहितं कल्पपादपं कुर्यात्॥ द्वितीयार्द्धं तु चतुर्द्धा विभज्यैकैकः
भागेन स्वस्वदेवताप्रतिमासहितान् संतानादीन् कुर्यात्। गुडप्रस्थो
परिष्टाच्च सितवस्त्रयुगावृतं॥ ब्रह्मविष्णुशिवोपेतं पंचशाखं सभास्क
रं॥ प्रस्थो द्वात्रिंशत्पलः परिभाषायां दर्शितः। षोडशपलो वा १० ब्रह्मादि
प्रतिमाः प्राग्दर्शिताः॥ कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत्। विष्णु
धर्मोत्तरे॥ कामदेवस्तु कर्तव्यो रूपेणाप्रतिमो भुवि॥ अष्टबाहुः प्रकर्त
व्यः शंखपद्मविभूषितः। चापबाणकरश्चैव मदादंचितलोचनः। रतिः
प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्वला॥ चतस्रस्तस्य कर्तव्याः पत्न्यो
रूपमनोहराः। चत्वारश्च करास्तस्य कार्या भार्यास्तनोपगाः। केतुश्च म
करः कार्यः पंचबाणमुखो महान् इति। दामोदरीये तु। चापपुष्पधृक्कामदेवो
रूपवान् विश्वमोहकृदित्युक्तं॥ अधस्तादिति ब्रह्मादिभिरप्यन्वेति। सं
तानं पूर्वतस्तद्वत्तुरीयांशेन कल्पयेत्। तुरीयांशोपरार्द्धस्य वर्तिना गुड
प्रस्थोपरिगतत्वसितवस्त्रयुग्मशाखापंचकफलान्वितत्वं चोक्तं मंदारा
दिष्वपि वस्त्रयुग्माद्यन्वेति॥ मंदारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि
। पश्चिमे पारिजातं तु सावित्र्या सह जीरके॥ सुरभीसंयुतं तद्वत्तिलेपुह
रिचंदनं। तुरीयांशेन कुर्वीत सौम्येन फलसंयुतं। तुरीयांशेनेति मंदारपा
रिजाताभ्यामप्यन्वेति। पंचाप्येते द्रुमाः। क्रमादश्वत्थनिंबार्कपारिभ
द्रबिल्वतरुतुल्याकाराः शिष्टाचारादिति दामोदरः। श्रीप्रतिमोक्ता हिर
ण्यगर्भदाने सावित्री तु ब्रह्मांडे॥ पद्मासना च सा विज्ञेया साक्षसूत्रकमंड
लुरिति उक्ता। सवत्सा सुरभी धेनुरागता प्रस्नुतस्तनीति सुरभीलक्ष
णं। घृतादिकमपि प्रस्थपरिमितं ग्राह्यं। कौशेयवस्त्रसंवीतानि स्रुमाल्य
फलान्वितान्॥ तथाष्टौ पूर्णकलशान् पादुकासनभाजनं। दीपिकोपा
नहच्छत्रचामरासनसंयुतं। फलमाल्ययुतं तद्वदुपरिष्टाद्वितानकं। त

याष्टादशधान्यानिसमंताडुपकल्पयेत्। अशनभाजनंभोज्यपूरित भाजनं। धान्यानिप्रत्येकंद्रोणपरिमितानि। होमाधिवासनांतेच स्नापितोवेदपुंगवैः॥त्रिःप्रदक्षिणमावृत्य मंत्रमेतमुदीरयेत्। अधिवासनांते प्रातःपूर्णाहुत्यादिकर्मोत्तरंपुण्याहवाचनेकृतेकुंडाभ्यासेकलशैः स्नापितइत्यर्थः। मंत्रःप्रयोगेज्ञेयः॥एवमामंत्र्य तंदद्यात्कुरवेकल्पपादपं॥चतुर्भ्यश्चापिऋत्विग्भ्यःसंतानादीन्प्रकल्पयेत्। कुंडचतुष्टयसंबंधिभ्योष्टभ्यःऋत्विग्भ्यःसंतानादीन्चतुरोदद्यादितिमदनः। चतुर्णामेवऋत्विजांमंत्रवरणमितिहेमाद्र्यादयः। जापकादिभ्योन्येवदक्षिणादेया। स्वल्पेतेकाग्निवत्कुर्याद्गुरोरेवाभिपूजनं। नवित्तशाठ्यंकुर्वीतनचविस्मयवान्भवेत्। अनेनविधिनायस्तुमहादानंनिवेदयेत्॥सर्वपापविनिर्मुक्तःसोश्वमेधफलंलभेत्। अप्सरोभिःपरिवृतःसिद्धचारणकिन्नरैः। भूतान्भव्यांश्चमनुजान्तारयेद्रोमसंमितान्। स्तूयमानोदिवःपृष्ठेपुत्रपौत्रप्रपौत्रवान्। विमानेनार्कवर्णेनविष्णुलोकंसगच्छति॥दिविकल्पशतंतिष्ठेद्राजराजोभवेत्ततः॥ नारायणबलोपेतोनारायणपरायणः॥ नारायणकथासक्तोनारायणपुरंव्रजेदिति॥ इतिकल्पपादपदानविधिः॥ अथप्रयोगः॥ यजमानोदेशकालोच्चारणांतेसर्वपापक्षयपूर्वकाश्वमेधफलप्राप्तिपितृपुत्रादिस्वरोमसंमितभूतभव्यस्वकीयपुरुषसंतारणाप्सरःसिद्धचारणकिन्नरसेवितत्वसर्वस्तूयमानत्वविशिष्टार्कवर्णविमानकरणकविष्णुपुरगमनपूर्वककल्पशतावच्छिन्नकालवैष्णवस्वर्गलोकनिवासपूर्वकनारायणपरायणत्वनारायणतुल्यबलत्व नारायणकथासक्तत्वविशिष्टभूलोकराजराजत्वानंतरनारायणपुरप्राप्तिकामःश्वःकल्पपादपमहादानंप्रतिपादयिष्य इतिसंकल्प्यप्रारब्धोपवासोगोविंदादिमंडपपूजाचार्यादिविनियोगांतंकुर्यात्॥ ततोगुरुःषोडशारयुतबह्वोपरिगुडप्रस्थंनिधायतदुपरिब्रह्मविष्णुशिवभास्करप्रतिमाभिःसहपंचशाखंसितवस्त्रयुगान्वितंकल्पवृक्षंमध्येस्थापयित्वागुडप्रस्थेसदारकामप्रतिमयासहनिर्मितंसितवस्त्रयुगान्वितंसंतानंपूर्ववत्स्थापयित्वातथैवघृतप्रस्थोपरिश्रीप्रतिमान्वि

तं मंदारं दक्षिणतः स्थापयित्वा पश्चिमे जीरकप्रस्थोपरि सावित्रीप्रति
मान्वितं पूर्ववत् पारिजातं स्थापयित्वोत्तरे तिलप्रस्थोपरि सुरभीप्रति
मान्वितं हरिचंदनं स्थापयित्वा सर्वेषु माल्यफलादि स्थापयेत्। तथा
ऽष्टास्वष्टदिक्षु कौशेयवस्त्रादियुक्तान् पूर्णकलशान् स्थापयित्वा पा
दुकोपानच्छत्रादिकं स्थापयित्वा प्रत्येकं द्रोणमितधान्यान्यपि निधा
य वेद्यां वितानं च बध्वा मंत्रेण पंचपादपानुक्रमेण प्रतिष्ठाप्य ब्रह्मवि
ष्णुशिवार्कसहिताय कल्पपादपाय नमः। सदारकामसहिताय सं
तानाय श्रीसहिताय मंदाराय सावित्रीसहिताय पारिजाताय। सुरभी
सहिताय हरिचंदनायेत्येवं प्रकारेण यथासंभवमावाहनाद्युपचारैः
संपूज्य वितानं बध्नीयात्॥ ततः कुंडसमीपकुंभस्थापनग्रहादिस्थाप
नप्रभृति पूर्णाहुत्यभिषेकांतं तुलापुरुषवत्। एवमभिषिक्तो यजमा
नः शुक्लवेषो धृतपुष्पांजलिः कल्पपादपं त्रिः प्रदक्षिणीकृत्य तत्पश्चि
मत उपविश्य नमस्ते कल्प वृक्षाय चिंतितार्थप्रदायिने। विश्वंभराय
देवाय नमस्ते विश्वमूर्तये। यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दि
वाकरः। मूर्तामूर्तपरं बीजं अतः पाहि सनातन। त्वमेवामृतसर्वस्व
मनंतः पुरुषोऽव्ययः। संतानाद्यैरुपेतः सन् पाहि संसारसागरात्। इत्यु
क्त्वा पुष्पांजलिं क्षिप्त्वा नत्वा वेदिपश्चिमतः प्राङ्मुखोऽद्येत्याद्युक्त्वा
सर्वपातकक्षयेत्यादि नारायणपुरप्राप्तिकाम इत्यंतमुच्चरितेमुक
गोत्रायेत्यादिविशेषणविशिष्टमुच्चार्य तुभ्यं गुरवे इमं कल्पपादपं मू
लदेशस्थापितब्रह्मविष्णुशिवभास्करप्रतिमं गुडप्रस्थोपरि स्थितं
सितवस्त्रयुगान्वितं कौशेयसंवीतं कलशाष्टकेषु माल्यफलपादु
कासनभाजनदीपिकोपानच्छत्रादिसहितं सवितानं संप्रददे इति
गुरुहस्ते जलं क्षिपेत्॥ गुरुश्च स्वस्तिशब्दपूर्वकं देवस्य त्वेति प्रतिगृ
ह्य कामस्तुतिं पठेत्। ततएतत्प्रतिष्ठार्थमिदं हिरण्यं ग्रामरत्नादिकं
च दक्षिणां तुभ्यं गुरवे संप्रददे इति तां निदध्यात्। एवं पूर्वतो गुडप्रस्थो
परिस्थितं सदारकामप्रतिमान्वितमिक्षुमाल्यफलाद्युपकरणान्वितं
संतानं तुभ्यं बह्वृचायर्त्विजे संप्रददे इति॥ ततो दक्षिणतो घृतप्रस्थो
परिस्थं मंदारं श्रीयुतं यजुर्विदृत्विजे पश्चिमभागे जीरकस्थं सावित्रीप्रति-

मान्वितंपारिजातंसामशाखिने॥उत्तरतस्तिलप्रस्थोपरिस्थितंमूलेसुरभी
त्रतिमान्वितंहरिचंदनमथर्वविदेदत्वाचतुर्भ्योपिसुवर्णग्रामरत्नादिदश॰
त्त्वादक्षिणांदद्यात्।जापकादिभ्यःपृथक्दद्यात्।यद्वागुर्वादीन्संतोष्य
तदनुज्ञयान्येभ्योपिदद्यात्॥ततआचार्यपुण्याहवाचनांतेपुनर्ग्रहादिपू
जांकारयित्वापीठादिदेवताविसर्गंकुर्यात्॥इतिकल्पपादपदानविधिः
॥अथगोसहस्रं॥मात्स्ये।अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं।गो
सहस्रप्रदानाख्यंसर्वपापहरंशुभम्।पुण्यांतिथिमथासाद्ययुगमन्वं
तरादिकं।पयोव्रतंत्रिरात्रंस्यादेकरात्रमथापिवा।लोकेशावाहनंकुर्या
त्तुलापुरुषदानवत्।पुण्याहवाचनंकुर्याद्धोमःकार्यस्तथैवच।ऋत्वि
क्मंडपसंभारभूषणाच्छादनादिकं।वृषंलक्षणसंयुक्तंवेदिमध्येधिवा
सयेत्।गोसहस्राद्विनिष्क्रम्यगवांदशकमेववेत्यादिः।पयोव्रतंदानात्पू
र्वे।वृषश्चपुष्टःसुरूपोनीरुक्ग्राह्यः।यत्तुकैश्चित्।उन्नतस्कंधककुदमु
ज्ज्वलायतकंबलमित्यादीनिवृषोत्सर्गप्रकरणेमात्स्येउक्तानिलक्ष
णान्युक्तं।तन्नमूलंमृग्यं।गोसहस्राद्विनिष्क्रम्येतिदशोत्तरगोसहस्रा
दित्यर्थः।तथाचदशाधिकंगोसहस्रादित्यर्थः।तथाचदशाधिकंगोस
हस्रंज्ञेयं।तत्राप्याधिवासनीयंगोदशकं।सहस्रगोषुतुनावश्यंधेनु
त्वादरइतिविवेकइतिकेचित्।गोसहस्रंबहिःकुर्याद्वस्त्रमाल्यविभूषि
तं।सुवर्णशृंगाभरणंरौप्यपादसमन्वितं।बहिःकुर्यान्मंडपाद्बहिरासा
दयेत्।अंतःप्रवेश्यदशकंवस्त्रमाल्यैःप्रपूजयेत्।सुवर्णघंटिकायुक्तं
ताम्रदोहनिकान्वितं।सुवर्णतिलकोपेतंहेमपट्टैरलंकृतं।कौशेयव
स्त्रसंवीतंमाल्यगंधविभूषितं॥हेमरत्नयुतैःशृंगैश्चामरैश्चापिशोभि
तं॥पादुकोपानहच्छत्रचामरासनसंयुतं।सुवर्णघंटिकेत्यत्रसुवर्णश
ब्दोशीतिगुंजापरिमितहेमपरः।सत्कलमयुक्तसुवर्णशब्दस्यतथैवप्र
सिद्धेः।अत्रशृंगेदशसौवर्णिके।खुराःपंचपलाः।पंचाशत्पलदोहनपात्र
मित्यन्यत्रोक्तंग्राह्यमितिकेचित्॥यथाशक्तीतिपरे।पादुकोपानहादि
पंचकंप्रत्येकंगोदशकसमीपेस्थाप्यं।गवांदशकमध्येस्यात्कांचनोनं
दिकेश्वरः।कौशेयवस्त्रसंवीतोनानाभरणभूषितः।लवणद्रोणशिखरे
माल्येक्षुफलसंयुतः।ऊर्ध्वस्त्रिनेत्रोद्विभुजःसौम्यास्योनंदिकेश्वरः।वामे

त्रिशूलधृदृक्षेचाक्षमालासमन्वितः।ऊर्ध्वइतिस्थितइत्यर्थः।कुर्यात्स
लशलादूर्ध्वंसर्वमेतदशेषतः॥शक्तितःपलसाहस्रत्रितयंयावदेवतु
॥साभरणनंदिकेश्वरनिर्माणार्थमेतद्धेमास्मितिहेमाद्रौ॥गोभूष
णाद्यप्येतन्मध्यइतिदानसागरादौ॥गोशतेवेदशांशेनसर्वमेतत्प्र
कल्पयेत्॥गोशताख्यमहादानंसप्तदशमितिदानसौख्ये॥पुण्यंदि
नमथासाद्यगीतमंगलनिस्वनैः॥सर्वौषध्युदकस्नानस्नापितोवेदपुं
गवैः।इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः।मंत्रःप्रयोगेज्ञेयः।इत्या
मंत्र्यततोदद्याद्गुरवेनंदिकेश्वरं॥सर्वोपकरणोपेतंगोयुगंचविचक्षणः।
ऋत्विग्भ्योधेनुमेकैकांदशकाद्धिनिवेदयेत्॥गवांशतमथैकैकांतद
र्द्धंवाथविंशतिं।दशपंचाथवादद्यादन्येभ्यस्तदनुज्ञया।अन्येऋत्वि
जउदासीनाश्चविप्राःसर्वपक्षेषुद्विगुणागुरवेदेया।नैकाबहुभ्योदात
व्यायतोदोषकरीभवेत्॥बह्व्यस्त्वेकस्यदातव्याःश्रीमदारोग्यवृद्ध
ये॥श्रावयेच्छृणुयाद्वापिमहादानानुकीर्त्तनं॥तद्दिनेब्रह्मचारीस्या
द्यदीच्छेद्विपुलांश्रियं।अनेनविधिनायस्तुगोसहस्रप्रदोभवेत्॥सर्व
पापविनिर्मुक्तःसिद्धचारणसेवितः।विमानेनार्कवर्णेनकिंकिणीजा
लमालिना।सर्वेषांलोकपालानांलोकेसंपूज्यतेनरैः।प्रतिमन्वंतरंति
ष्ठेत्पुत्रपौत्रसमन्वितः॥सप्तलोकानतिक्रम्यततःशिवपुरंव्रजेत्।शत
मेकोत्तरंतद्वत्पितृणांतारयेद्बुधः।मातामहानांतद्वत्पुत्रपौत्रसम
न्वितः।यावत्कल्पशतंतिष्ठेद्राजराजोभवेत्ततः।अश्वमेधशतंकुर्या
च्छिवध्यानपरायणः।वैष्णवंयोगमास्थायततोमुच्येतबंधनादिति॥
इतिगोसहस्रदानविधिः॥अथप्रयोगः।यजमानोधिवासनदिनात्पू
र्वेद्यहमेकाहंदुग्धमात्राहारोधिवासनदिनेत्याद्युक्त्वासकलपापक्ष
यानंतरसिद्धचारणसेवितत्वार्कवर्णसुवर्णकिंकिणीजालमालिवि
मानारोहणोत्तरैकैकमन्वंतरावच्छिन्नेंद्रादिसकललोकपाललोकाधि
करणपुत्रपौत्रसमन्वितनिवासामरकर्तृकपूजापूर्वकसप्तलोकातिक्र
मणोत्तरःपुत्रपौत्रसमन्वितशिवालयगमनैकोत्तरशतपितृपितामह
कुलतारणकल्पशतावच्छिन्नशिवपुरनिवासानंतरराजराजभवना
श्वमेधशतकर्तृत्वशिवध्यानपरत्वविष्णुसादृश्यापन्नयोगस्थानहे

तुकसंसारमोचनकामोहंगोसहस्रदानंश्वःप्रतिपादइष्यइतिसं
कल्प्यउपवासगोविंदादिपूजादिमंडपपूजाचार्यादिविनियोगांतं
कुर्यात्।ततोगुरुर्वेदिमध्येषोडशारंविलिख्यपुष्पैरवकीर्यपूर्वोक्तं
वृषंधेनुदशकंचवस्त्रमाल्यसुवर्णघंटासुवर्णतिलकसुवर्णशृंगरौ
प्यखुरदोहनपात्रकौशेयवस्त्रपादुकोपानहच्छत्रचामराद्युपशो
भितंवेद्याःपरितःस्थापयेत्॥मंडपाद्बहिर्गोसहस्रंसुवर्णशृंगादि
सहितंवाधिवासयेत्।ततःसवृषगोदशकमध्येषोडशारस्थलल
वणद्रोणोपरिकौशेयवस्त्रसंवीतंमाल्येक्षुफलादिसंयुतंप्रागुक्तनं
दिकेश्वरंस्थापयेत्।पूजयेदुपरिवितानंबध्नीयाच्च।ततःकुंडसमीप
स्थकुंभस्थापनग्रहस्थापनपूर्णाहुत्यभिषेकांतंतुलापुरुषवत्।ततो
यजमानःपश्चात्स्थित्वापुष्पाण्यादायसवृषंगोदशकंनमोवोविश्व
मूर्तिभ्योविश्वमातृभ्यएवच॥लोकाधिवासिनीभ्यश्चरोहिणीभ्यो
नमोनमः।गवामंगेषुतिष्ठंतिभुवनान्येकविंशतिः।ब्रह्मादयस्तथादे
वारोहिण्यःपांतुमातरः॥गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः।गा
वोमेहृदयेनित्यंगवांमध्येवसाम्यहं।यस्मात्त्वंवृषरूपेणधर्मएवस
नातनः।अष्टमूर्तेरधिष्ठानमतःपाहिसनातनइत्यावाहयेत्।ततो
वेदिपश्चिमभागेउपविश्यकुशतिलजलान्यादायदेशकालौच्चार
णांतेसकलपापक्षयानंतरेत्यादिसंसारमोचनकामइत्यंतेसंकल्पे
उच्चारितेएताःसुवर्णशृंगाद्यलंकृताःसवृषलवणद्रोणोपरिस्थित
नंदिकेश्वरसहिताःपादुकोपानहच्छत्रचामरासनसंयुताः सवस्त्र
सुवर्णालंकृतधेनुदशकसहिताःसहस्रंगाःवितानाद्युपस्करसहि
ताःअमुकामुकशर्मभ्योगुरुर्त्विग्भ्योहंसंप्रददइतिदद्यात्।तेपिस्व
स्तीत्युक्त्वापुच्छेषुप्रतिगृह्यरुद्रायगामित्याद्युक्त्वास्वकामस्तुतिंप
ठेयुः।दातादानप्रतिष्ठार्थंतेषुदक्षिणांदद्यात्।सोपकरणनंदिकेश्वरं
मत्स्यसूक्तवृषभंधेनुदशकंसोपकरणधेनुद्वयंगोसहस्राच्चशतद्वयं
गुरवेदद्यात्।ऋत्विग्भ्यश्चदशकांतर्गतानामेकामेकांगोसहस्राच्चप्रत्ये
कंशतमित्येकःपक्षः।जापकादीनामप्येवंदक्षिणादेयाग्रामादिनासंतो
षयेच्चविभागइतिप्रागुक्तं।ततःपुण्याहवाचनांतेग्रहपूजनंत

द्विसर्जनादि सर्वं प्रकृतिवद्भवेत्। श्रीकामस्तस्मिन्दिने दुग्धमात्राहारो
ब्रह्मचारी च भवेत्॥ कर्मसाद्गुण्यार्थं च यथाशक्ति ब्राह्मणान्भोजयेत्॥
इति श्रीमीमांसकभट्टशंकरात्मजभट्टनीलकंठकृते दानमयूखे गोसहस्र
दानविधिः॥ अथ हिरण्यकामधेनुः। मात्स्ये। अथातः संप्रवक्ष्यामि काम
धेनुविधिं परं॥ सर्वकामप्रदं नृणां सर्वपातकनाशनं। लोकेशावाहनं तद्व
द्धोमः कार्योधिवासनं। तुलापुरुषवत्कुर्यात्कुंडमंडपवेदिकाः। स्वल्पेप्ये
काग्निवत्कुर्याद्गुरुरेव समाहितः। कुंडमंडपेति गोविंदपूजादि ब्राह्मण
भोजनांतधर्माणामुपलक्षणं। गुरुर्वेत्यृत्विङ्निषेधो न जापकानां। कांचन
स्यातिशुद्धस्य धेनुं वत्सं च कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु म
ध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्तिता। यद्यपि पौर्वनादिवत्स
हस्राणां गणः साहस्रं बहुवचनेन च तद्बहुत्वे उक्ते न वसहस्रं पलानी
ति भाति तथापि कल्पतर्वाद्युपकर्षवद्द्रुक्तेपि तुल्यएवोचितः। उपनाय
नमितिवत्तु साहस्रमितिवृत्तानुरोधेन दैर्घ्यं पलपदस्यापि पूर्वनिपा
तश्चानेन पलसहस्रेणेत्यर्थः। रूपनारायणदामोदराद्योप्येवं पलस
हस्राणीति क्वचित्कः पाठोप्यमुमेवार्थं सवदंति। शक्तितस्त्रिपलादूर्ध्व
मशक्तोपि हि कारयेत्। गुडधेन्वादिषु चतुर्थांशेन वत्सः स्यादित्यभिधा
नात् अत्रापि स्वसुवर्णचतुर्थांशेन वत्सः कार्य इति निबंधकृतः। वेद्यां
कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितं। न्यसेदुपरि तां धेनुं महारत्नैरलं
कृतां। कुंभाष्टकसमोपेतां नानाफलसमन्वितां। तथाष्टादश धान्यानि
समंतात्परिकल्पयेत्॥ इक्षुदंडाष्टकं तद्वन्नानाफलसमन्वितं। भाजनं
चासनं तद्वत्ताम्रदोहनकं तथा। भाजनं भोजनपात्रं। कौशेयवस्त्रद्वयसं
वृतांगीं दीपातपत्राभरणाभिरामां। सचामरां कुंडलिनीं सघंटां गणित्रि
कापादुकरौप्यपादां। रसैश्च सर्वैः पुरतोभिजुष्टां हरिद्रयापुष्पफलैरनेकैः
॥ कुंडलिनीं कर्णयोः कुंडलयुतां। अजाजिकुस्तुंबुरुशर्कराभिर्वितानकं
चोपरि पंचवर्णं। गणित्रिका० अक्षमाला। दामोदरीये तु गोलत्रिकेति पा
ठः। पादकिंकिणीति तदर्थः। पादुकेति पादुकाः काष्ठमय्यः। रौप्यं रौप्यालं
कारः तद्व यमपि पादेषु यस्याः सा। अजाजी जीरकं। कुस्तुंबुरुर्धान्याकं
। रसैर्मधुराम्लतिक्तकषायकटुलवणरसयुतैर्द्रव्यैः। स्नातस्ततो मंगल

वेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः। आवाहयेत्तां गुडधेनुमंत्रैर्द्विजाय
दद्याद्धर्भपाणिः। आमंत्र्य शीलकुलरूपगुणान्विताय विप्राय यः
कनकधेनुमिमां प्रदद्यात्। प्राप्नोति धाम स पुरंदरदेवजुष्टं कन्यागणैः परि
वृतः पदमिंदुमौलेः। विप्रायेत्येकवचनमेकाग्निपक्षे। जापकादिभ्यो
न्येवदक्षिणा॥ अनेकाग्निपक्षे तुलापुरुषवल्लक्षत्रयमिति केचित्। प
क्षद्वयेप्येकस्मै एव विप्रायेति तु युक्तं। आमंत्रणमंत्रास्तु प्रयोगे ज्ञेया
इति॥ इति हिरण्यकामधेनुदानविधिः। अथ प्रयोगः। तत्र यजमानोऽद्ये
त्याद्युक्त्वा सर्वपापक्षयपूर्वकरुद्रकन्यागणेंद्रादिसेवितशिवपदप्राप्ति
कामः श्वो हिरण्यगर्भकामधेनुमहादानमहं प्रतिपादयिष्य इति संक
ल्प्य गोविंदादिपूजादि मंडपपूजादि गुर्वादिनियोगांतं तुलादानवत्कु
र्यात्॥ गुरुर्वेद्यां षोडशारं विरच्य तदुपरि कृष्णाजिनं प्राग्ग्रीवमुत्तरलो
मकं न्यस्य तदुपरि गुडप्रस्थं च न्यस्य तदुपरि तुलत्रयाधिकयथाशक्ति
हैमीं कामधेनुं सालंकारां निर्माय तत्तुरीयभागनिर्मितं वत्सं सत्तनाभि
मुखं दक्षिणादिगवस्थितं विधाय पंचरत्नालंकृतां कौशेयवस्त्रद्वयसंवी
तां सौवर्णनूपुरद्वयग्रैवेयकसौवर्णकुंडलद्वयघंटापादकिंकिणीका
ष्ठपादुकाद्वयरौप्यपादचतुष्टयाभरणयुतां ताम्रदोहनान्वितां सचा
मरां धेनुं स्थापयित्वा तत्समंताद्वारिपूर्णकुंभाष्टकं नानाफलानि अ
ष्टादशधान्यानि इक्षुदंडाष्टकं भोजनभाजनपीठदीपछत्रषड्रसद्र
व्याणि हरिद्रां पुष्पाणि जीरकं धान्याकं शर्करादि स्थापयेत्॥ ततो वि
तानं बध्वा प्रतिष्ठापूर्वकं नाममंत्रेण यथाशक्त्युपचारैः पूजयेत्। उपरि
वितानं च बध्नीयात्॥ ततः कुंडसमीपस्थकुंभस्थापनपूर्णाहुत्यंतं अ
भिषेकांतं तुलापुरुषवत्। एवमभिषिक्तो यजमानो गृहीतकुसुमां
जलिः तां प्रदक्षिणीकृत्योपविश्य ॐ या लक्ष्मीः सर्वलोकानां या च देवे
ष्ववस्थिता॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु॥ देहस्था या च रु
द्राणी शंकरस्य सदा प्रिया। धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णो
र्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरू
पास्तु सा श्रिये॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥ लक्ष्मीर्या
लोकपालानां सा धेनुर्वरदास्तु मे॥ स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां

च्चया॥सर्वपापहरा धेनुस्तस्माच्छांतिंप्रयच्छतु॥इतिगुडधेनुमंत्रैरावा
ह्य ॐ त्वंसर्वदेवगणमंदिरमंगभूताविश्वेश्वरित्रिपथगोदधिपर्व
तानां॥त्वद्दानशस्त्रशकलीकृतपातकौघःप्राप्तोस्मिनिर्वृतिमतीवप
रांनमामि॥लोकेयथेप्सितफलानुविधायिनींत्वामासाद्यकोहिभव
दुःखमुपैतिमर्त्यः।संसारदुःखशमनाययतस्वकामंत्वांकामधेनु
रितिदेवगणावदंति॥इत्यामंत्र्याद्येत्यादिकीर्त्तनांतेसर्वपापक्षयपू
र्वकरुद्रकन्यागणेंद्रादिसेवितशिवपदप्राप्तिकामःस्वर्गकामईश्वर
प्राप्तिकामोवागुरवेपूर्वोक्तवत्संयवरत्नालंकाराद्युपेतामिमांकाम
धेनुंतुभ्यंसंप्रददइतिदद्यात्॥ततःकृतैतद्दानप्रतिष्ठार्थंग्रामरत्नादि
हिरण्यंवासंप्रददेनममेतिवदेत्॥ततःपुण्याहवाचनानंतरंयजमा
नोग्रहादिसंपूज्ययांत्वित्यादिनाविसर्जयेत्।मंडपाद्युपकरणंगुरवे
निवेदयेत्॥कर्मसांगतासिद्ध्यर्थंब्राह्मणान्भोजयेत्॥इतिहिरण्य
कामधेनुप्रयोगः॥अथहिरण्याश्वदानं॥मात्स्ये।अथातःसंप्रवक्ष्या
मिहिरण्याश्वविधिंपरं।यस्यप्रसादाद्भुवनमनंतंफलमश्नुते।पुण्यां
तिथिमथासाद्यकृत्वाब्राह्मणवाचनं॥लोकेशावाहनंकुर्यात्तुलापु
रुषदानवत्॥ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं।स्वल्पेप्येका
ग्निवत्कुर्याद्धेमवाजिमखंततः।स्थापयेद्वेदिमध्येतुकृष्णाजिनतिलो
परि।कौशेयवस्त्रसंवीतंकारयेद्धेमवाजिनं।शक्तितस्त्रिपलादूर्ध्व
मासहस्रपलाद्बुधः।पादुकोपानहच्छत्रचामरासनभाजनं।पूर्णकुं
भाष्टकोपेतंमाल्येक्षुफलसंयुतं।शय्यांसोपस्करांतद्वद्धेममार्त्तंड
संयुतां।मार्त्तंडसंयुतामितिदीर्घपाठः।शय्यायाविशेषणंचेतिदा
मोदरा द्याः।ह्रस्वपाठेनाश्वस्येतिहेमाद्रिमदनौ॥ततःसर्वौषधिस्ना
नस्नापितोवेदपुंगवैः।इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः।मंत्रःप्र
योगेज्ञेयः॥एवमुच्चार्यगुरवेतमश्वंविनिवेदयेत्॥गुरवइतिऋत्वि
जामप्युपलक्षणमितिरत्नाकरपारिजातयोः।गुरवएवेतिवाचस्पति
मिश्राः।युक्तंचेदमुपलक्षणेमानाभावात्॥दत्वापापक्षयाज्ज्ञानोर्ले
कमभ्येतिशाश्वतं॥गोभिर्विभवतःसार्द्धमृत्विजःपरिपूजयेत्।सर्वेषा
म्योपकरणंगुरवेविनिवेदयेत्।इमंहिरण्याश्वविधिंकरोतिसंवीज्य

मानो दिवि देवतैश्च ॥ विमुक्तपापः सपुरं मुरारेः प्राप्नोति सिद्धैरभिपूजितः
सन्निति । इति हिरण्याश्वदानविधिः । अथ प्रयोगः । यजमानः अद्येत्यादि सु
त्वा सकलदुरितनिवृत्तिसमनंतरप्राप्तसूर्यलोकप्राप्तिपूर्वकं देवैः
स्तूयमानतया विशिष्टस्वर्लोकगमनोत्तरसिद्धपूजितत्वविशिष्टविष्णु
लोकप्राप्तिकामः अश्वो हिरण्याश्वमहं प्रतिपादयिष्ये इति संकल्प्य गोवि
दादिपूजनादि मंडपपूजादि गुर्वृत्त्विगादिविनियोगांतं सर्वं प्रकृतिवत्कुर्या
त् ॥ ततो गुरुः षोडशारचक्रं वेद्यां विलिख्य तदुपरि त्रिपलाधिकसहस्र
पलपर्यंतशक्त्यनुसारसुवर्णघटितं भास्करप्रतिमायुतं हैमवाजिनं
कौशेयवस्त्रसंवीतं प्राङ्मुखं स्थापयित्वा समंतात्पूर्णकुंभाष्टकं पा
दुकोपानहछत्रचामरासनभोजनभाजनमाल्येक्षुफलान्यष्टादश धा
न्यानि च स्थापयित्वा सोपकरणां शय्यां च संनिधापयेत् । शय्योपकरण
नि च तूलिकोपधानप्रच्छादपटफलपुष्पकुंकुमकर्पूरागरुचंदनतांबू
लदर्पणकंकतिकाचामरव्यजनासनासिपुत्रिकादीपिकोपानत्ताम्रघं
टिकाजलपात्रवितानादीनि ततो भास्करादिधिष्ठितायहिरण्याश्वा
यनमः इति प्रतिष्ठापूर्वकं यथासंभवोपचारैरभ्यर्च्योपरि विना ---
---------- नेवप्रीयात् ॥ ततः कुंडसमीपस्थकुंभस्थापनपू
र्णाहुत्यभिषेकांतं प्रकृतिवद्देवमभिषिक्तो यजमानो गृहीतकुसुमांजलि
र्हिरण्याश्वं त्रिः परिक्रम्योपविश्य नमस्ते सर्वदेवेश वेदाहरणलंपट ॥
वाजिरूपेण मामस्मात्पाहि संसारसागरात् । त्वमेव सप्तधा भूत्वा
छंदोरूपेण भास्कर ॥ यस्माद्भावयसे लोकानतः पाहि सनातन इत्याम
न्त्र्य नमस्कृत्याद्येत्यादि प्रागुक्तसंकल्पांते इमं हिरण्याश्वं कृष्णा
जिनोपरिन्यस्ततिलद्रोणोपरिस्थितं कौशेयवस्त्रसंवीतं उपर्यारूढ
मार्त्तंडप्रतिमं शय्यामाल्येक्षुफलादिपूर्णकुंभाष्टसर्वोपस्करयुतममु
कगोत्रायगुरवे संप्रददे इति तद्धस्ते जलं क्षिपेत् । दानप्रतिष्ठार्थं सुवर्णं द
क्षिणां संप्रददे इति दक्षिणां दत्वा ऋत्विगादिभ्यो गाः शय्याद्युपकरणं
च गुरवे दत्वा पुण्याहवाचनादि ग्रहविसर्जनाद्यंतं कृत्वा ब्राह्मणान्भो
जयेत् ॥ इति हिरण्याश्वप्रयोगः ॥ अथ हिरण्याश्वरथदानं । मात्स्ये । अ

थातःसंप्रवक्ष्यामिमहादानमनुत्तमं।पुण्यमश्वरथंनाममहापातक
नाशनं।पुण्यंदिनमथासाद्यकृत्वाब्राह्मणवाचनं।लोकेशावाहनंतद्व
त्तुलापुरुषदानवत्।ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं।कृष्णा
जिनेतिलान्कृत्वाकांचनंकारयेद्रथं।अष्टाश्वंचतुरश्वंवाचतुश्चक्रंस
कूबरं।ऐंद्रनीलेनकुंभेनध्वजरूपेणसंयुतं॥लोकपालाष्टकोपेतंपद्म
रागदलान्वितं॥तिलाद्रोणमिताः।आभारात्त्रिपलादूर्ध्वंशक्तितःकारये
द्बुधः।भारःपलसहस्रद्वयं॥स्त्रियांतुलापलशतंभारःस्याद्विंशतिस्तु
लाइत्यभिधानात्।एतच्चसुवर्णमानंकूबरध्वजपुरुषलोकपालाश्व
चक्ररक्षकसहितस्येतिनिबंधकृतः।कूबरोयुगाधारकाष्ठं।लोकपाल
लक्षणंब्रह्मांडेउक्तं।चत्वारःपूर्णकलशाधान्यान्यष्टादशैवतु।कौशेय
वस्त्रसंवीतमुपरिष्टाद्वितानकं।माल्यैश्चफलसंयुक्तंपुरुषेणसमन्वि
तं।पुरुषेणेष्टदेवताप्रतिमयासमन्वितमधिष्ठितं।छत्रचामरकौशेयव
स्त्रोपानहपादुकाः।गोभिर्विभवतःसार्द्धंदद्याच्चशयनादिकं।अश्वाष्ट
केनसंयुक्तंचतुर्भिरथवाजिभिः।द्वाभ्यामथयुतंदद्याद्धेमसिंहध्वजा
न्वितं।अष्टाश्वंचतुरश्वंवेतिकांचनाश्वपरं।अष्टाश्वकेनेत्यादितुप्र
त्यक्षाश्वपरमितिभेदः।तत्राश्वद्वयपक्षेहेममयसिंहांकितध्वजयु
क्तता।अवशिष्टपक्षद्वयेकांचनाश्वोक्तेंद्रनीलकुंभांकितध्वजयुक्त
रथइतिव्यवस्था।यत्तुहेमाद्रौ।सप्ताश्वकेनसंयुक्तमितिक्वचित्पाठः
सर्वपुस्तकविसंवादादुपेक्ष्यः।एतेनयत्केनचिदेतत्पाठलंबनेनोक्तम
ष्टाश्वमित्यनेनपौनरुक्त्याभावादुभयत्रापिहेमाद्रावश्वाग्राह्यानक
चिदपिस्वाभाविकाइतितदप्यपास्तं।चतुर्भिरथवाजिभिरित्यस्यचतु
रश्वंवेत्यनेनपौनरुक्त्यस्यापरिहाराच्च।चक्ररक्षावुभौतस्यतुरग॰
स्थावथाश्विनौ।चक्ररक्षौचक्रसमीपस्थावश्विनौकार्यौ।तल्लक्षणमु
क्तंतुलायां।पुण्यकालंततःप्राप्यपूर्ववत्स्नापितोद्विजैः।त्रिःप्रदक्षिण
मावृत्यगृहीतकुसुमांजलिः।शुक्लमाल्यांबरोदद्यादिमंमंत्रमुदीरये
त्।मंत्रःप्रयोगेज्ञेयः।इतितुरगरथदानमेतद्भवभयसूदनमत्रपरीति
।सकलुषपटलैर्विमुक्तदेहःपरममुपैतिपदंपिनाकपाणेः।देदीप्यमा
नवपुषांविजितप्रभावमाक्रम्यमंडलमखंडलचंडरश्मेः।सिद्धांगना

नयनषट्पदपीयमानवक्त्रांबुजोंबुजभवेनचिरंसहास्ते॥ इतिहिरण्या
श्वरथदानं॥ अथप्रयोगः॥ यजमानोद्येत्याद्युच्चार्यसकलकलुषपटल
विमुक्तिभवभव्याभावपूर्वकपिनाकपाणिपरमपदप्राप्तिकामः देदी
प्यमान स्ववपुःप्रभाविजितचंद्रमंडलांकमणसिंहांगनानयनष
ट्पद पीयमानवदनांबुजलपूर्वकचिरकालब्रह्मसहवासकामो
वांश्वोहिरण्याश्वरथमहादानमहंप्रतिपादयिष्य इतिसंकल्प्यगोविं
दादिपूजांगुर्वादिविनियोगांतंप्रकृतिवत्कुर्यात्। ततोगुरुर्वेद्यांषोड
शारचक्रादिविरच्य तत्रन्यस्तकृष्णाजिने द्रोणपरिमितांस्तिला
न्स्थापयित्वा तदुपरिप्रागुक्तकूबरध्वजपुरुषादिभिरष्टभिश्चतुर्भि
र्वाश्वैः सह यथासुवर्णघटितंचतुश्चक्रमिंद्रनीलमयहेमध्वजयु
तंप्रत्यक्षाहूयपक्षेहेमसिंहांकितध्वजसंयुतंप्रागादिदिगष्टकस्थि
तलोकपालाष्टकप्रतिमायुतंपद्मरागदलंसौवर्णस्वेष्टदेवताप्रति
माधिष्ठितंचक्रसमीपस्थाश्वारूढचक्ररक्षकाश्विनीकुमारप्रति
माहूययुतंप्रागुक्तकुंभधान्याद्युपेतंसवितानकंयथाशक्तिकृतगवी
भियुतंप्रत्यक्षैरष्टाभिश्चतुर्भिर्वाश्वैर्द्वाभ्यांवाप्रत्यक्षाश्वाभ्यांयुतंरथं
स्थापयेत्॥ ततोहिरण्याश्वरथायनमइतिसंपूज्योपरिवितानंबध्नी
यात्॥ ततःकुंडसमीपस्थकुंभस्थापनपूर्णाहुत्यभिषे   कांतंप्रकृति
वत्॥ एवमभिषिक्तोयजमानोगृहीतकुसुमांजलिस्त्रिःप्रदक्षिणी
कृत्य नमोनमःपापविनाशनायविश्वात्मनेवेदतुरंगमाय। धाम्नामधी
शायभवायजेत्रेपापौघदावानलदेहिशांतिं। वस्वष्टकादित्यमरुद्गणा
नांत्वमेवधातापरमंनिधानं। यतस्ततोमेहृदयंप्रयातुधर्मैकतानत्व
मघौघनाशात्॥ इतिमंत्रमुक्त्वापुष्पांजलिंप्रक्षिप्यनमस्कृत्योपवि
श्याद्येत्याद्युक्त्वासकलकलुषेत्यादिसंकल्पांतेगु   र्वृत्विग्भ्योब्रा
ह्मणेभ्यइमंहिरण्याश्वरथंहेमाष्टाश्वंहेमचतुरश्वंवासर्वोपस्कर
सहितंअहंसंप्रददेनममेतितद्धस्तेपुनर्जलंक्षिपेत्। अनेनदानप्रति
ष्ठार्थमेतान्सुवर्णान्युष्मभ्यमहंसंप्रददइतिवदेत्। अत्राप्युत्सर्ग
त्वेएकाग्निविधानादिकंज्ञेयंततःपुण्याहवाचनदेवताविसर्जनांत
कृत्वाप्रकृतिवद्ब्राह्मणान्भोजयेत्॥ इतिहिरण्याश्वरथदानं। अथ

हेमहस्तिरथदानं॥ मात्स्ये। अथातः संप्रवक्ष्यामि हेमहस्तिरथंशु
भम्॥ यस्यप्रसादाद्भवनंवैष्णवंयातिमानवः। पुण्यांतिथिमथासाद्य
तुलापुरुषदानवत्॥ विप्रवाचनिकंकुर्याल्लोकेशावाहनंबुधः। ऋत्विङ्
मंडपसंभारभूषणाच्छादनादिकं। अत्राप्युपोषितस्तद्वद्ब्राह्मणैः स
हभोजनं॥ कुर्यात्पुष्परथाकारंकांचनंमणिमंडलं। वलभीभिर्विरच्य
। इतिसंकल्प्यगोविंदादिपूजादिमंडपपूजादिगुर्वादिविनियोगांतंतु
लादानवत्कुर्यात्॥ गुरुर्वेद्यांषोडशारंत्रिबिम्बकसमन्वितं॥ लोक
पालाष्टकोपेतंशिवार्कब्रह्मसंयुतं॥ मध्येनारायणोपेतंलक्ष्मीपुष्टि
समन्वितं॥ कृष्णाजिनेतिलद्रोणंकृत्वासंस्थापयेद्रथं। तथाष्टादश
धान्यानिभाजनासनचन्दनैः। दीपिकोपानहच्छत्रदर्पणंपादुकान्वि
तं। ध्वजेतुगरुडंकुर्यात्कूबराग्रेविनायकं। नानाफलसमायुक्तमुप
रिष्टाद्वितानकं॥ कौशेयंपंचवर्णंचअम्लानकुसुमान्वितं॥ चतुर्भिः
कलशैःसार्द्धंगोभिरष्टाभिरन्वितं॥ चतुर्भिर्हेममातंगैर्मुक्तादामविभू
षितैः। स्वरूपतःकरिभ्यांचयुक्तंकृत्वानिवेदयेत्॥ कुर्यात्संचपलादू
र्ध्वमाभारादपिशक्तितः। तथामंगलशब्देनस्नापितोवेदपुंगवैः। त्रिः
प्रदक्षिणमावृत्यगृहीतकुसुमांजलिः। इममुच्चारयेन्मंत्रंब्राह्मणे
भ्योनिवेदयेत्॥ मंत्रः प्रयोगेज्ञेयः। इत्थंप्रणम्यकनकेनरथप्रधानंयः
कारयेत्सकलपापविमुक्तदेहः। विद्याधरामरमुनीन्द्रगणाभिजुष्टंप्रा
प्नोत्यसौपदमतींद्रियमिंदुमौलेरिति। पुष्परथःक्रीडारथः सचोपर्य
च्छादितोभवति॥ वलभ्यांलोकपालाश्रयाः। उपरितनलघुगृहाणी
तिदामोदरः। लोकपालशिवार्कब्रह्मलक्षणानिप्रागुक्तानि। नारायण
प्रतिमानारद पंचरात्रे। नारायणंचतुर्बाहुंशंखचक्रेतयोत्तरे। दक्षि
णेतुगदापद्मंनीलजीमूतसंनिभं। वामेश्रीर्वल्लकीहस्तापुष्टिःपद्मक
रापरे॥ उत्तरेशंखंअधः। उपरिचक्रं। दक्षिणेउपरिगदा। पद्ममधइति
। वामेवामभागे। अपरेदक्षिणभागे। गरुडस्तु। उपेंद्रस्याग्रतःपक्षीगु
डाकेशःकृतांजलिः। सव्यजानुगतोभूमौमूर्द्धाचफणमंडितः। पक्षिज
घोनरग्रीवस्तुंगनासोनरांगकः। द्विबाहुपक्षपुच्छश्चकर्त्तव्योविनता
सतइति॥ विनायकोपि॥ चतुर्भुजस्त्रिनेत्रश्चकर्त्तव्योत्रगजाननः। नाग

यज्ञोपवीतश्चशशांककृतशेखरः।दंतंदक्षकरेदद्याद्द्वितीयेचाक्षसू
त्रकं।तृतीयेपरशुंदद्याच्चतुर्थेमोदकंतथेत्युक्तइत्यर्थः।पंचपलादि
सुवर्णपरिमाणंध्वजगरुडविनायकादिप्रतिमासहितस्यरथस्यअ
धिवासनं॥हेमहस्तिसहितरथस्यैव।स्वरूपहस्तिनोस्तुबहिरेव
स्थापनं।अथप्रयोगः।यजमानोदेशकालौसंकीर्त्यसर्वपापक्षयानंत
रसंभावितनरकनिवासयातनाभितप्तत्रासादिसकलबंधूद्धरणपूर्व
कविष्णुशयनसमनंतरस्वविष्णुपदप्राप्तिपूर्वकविद्याधरामरेंद्रादि
सेवितेंदुमौलिपदप्राप्तिकामःश्वोहेमहस्तिमहादानमहंप्रतिपादयि
ष्यइतिसंकल्प्यप्रकृतिवद्गोविंदादिपूजामंडपपूजागुर्वादिविनियो
गांतंसर्वंकुर्यात्॥ततोगुरुर्वेद्यांषोडशारंविरच्यतदास्तीर्णकृष्णाजि
नन्यस्ततिलद्रोणोपरिपलपंचकादाभारांतंयथाशक्तिसुवर्णनग
जध्वजलोकपालशिवार्कब्रह्मनारायणादिप्रतिमाभिःसहनिर्मित
हेमहस्तिचतुष्टययुतंगरुडाधिष्ठितध्वजाग्रस्थविनायकाधिष्ठित
कूबरंपरितःस्थापितधान्याद्युपस्करंप्रत्यक्षगजद्वयोपेतंसवितान
करथंस्थापयित्वा।ॐहेमहस्तिरथायनमइतिसंपूज्योपरिविता
नंबध्नीयात्।ततःकुंडसमीपस्थकुंभस्थापनादिपूर्णाहुत्यभिषेकां
तंप्रकृतिवत्।एवमभिषिक्तोयजमानःसपुष्पांजलिस्त्रिःप्रदक्षिणं
प्रक्रम्यनमोनमःशंकरपद्मजार्कलोकेशविद्याधरवासुदेवैः।त्वंसे
व्यसेवेदपुराणयज्ञतेजोमयस्यंदनपाहितस्मात्।यत्तत्सदंपरमगुह्य
तमंमुरारेरानंदहेतुगुणरूपविमुक्तमंतः॥योगैकमानसदृशोमुनयःस
माधौपश्यंतितत्त्वमसिनाथरथेनरूढः।यस्मात्त्वमेवभवसागरसंप्लु
तानामानंदभांडभृतमध्वरपारपात्रं॥तस्मादघौघशमनेनकुरुप्र
सादंचामीकरेभरथमाधवसंप्रदानात्॥इतिमंत्रैरावाह्यपुष्पाणि
प्रक्षिप्यनमस्कृत्यवेदिपश्चिमभागेउपविश्यप्रागुक्तदानसंकल्पमु
च्चार्यगुरुर्त्विग्भ्यइमंहस्तिरथंप्रागुक्तसकलोपस्करसहितंप्रत्यक्ष
जगद्वयपयुक्तंयुष्मभ्यमहंसंप्रददेइतिगुर्वादिभ्योदत्वासुवर्णंदक्षि
णांदद्यात्।विभागःप्राकृतः।स्वस्त्यादिवाचनादिविप्रभोजनांतंप्राकृ
तं।द्रव्याल्पत्वेनवएकाग्निविधानमितिकेचित्॥इतिहेमहस्तिरथदानं॥

॥अथपंचलांगलदानं।मात्स्ये।अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं
पंचलांगलकंनाममहापातकनाशनं।पुण्यांतिथिमथासाद्ययुगादिग्र
हणादिकीं॥भूमिदानंनरोदद्यात्पंचलांगलकान्वितं॥खर्वटंखेटकं
वापिग्राममवासस्यशालिनं॥निवर्त्तनशतंवापितदर्द्धंवापिशक्तितःसा
रदारुमयान्कृत्वाहलान्पंचविचक्षणः।सर्वोपकरणैर्युक्तांस्तथान्या
न्पंचकाननान्।कुर्यात्पंचपलादूर्ध्वमासहस्रपलावधि।वृषान्लक्ष
णयुक्तांश्चदशैवचधुरंधरान्।सुवर्णशृंगाभरणान्मुक्तालांगलभू
षितान्॥रौप्यपादाग्रतिलकान्रक्तकौशेयभूषणान्॥स्रग्दामचंद
नयुक्तान्शालायामधिवासयेत्।पर्जन्यादित्यरुद्रेभ्यःपायसंनिर्वप
च्चरुं॥एकस्मिन्नेवकुंडेतुगुरुर्यस्मैनिवेदयेत्॥पालाशसमिधस्तद्वदा
ज्यंकृष्णतिलास्तथा॥तुलापुरुषवत्कुर्याल्लोकेशावाहनंततः॥ततो
मंगलशब्देनशुक्लमाल्यांबरोबुधः।आहूयद्विजदांपत्यंहेमसूत्रांगु
लीयकैः।कौशेयवस्त्रकटकैर्मणिभिश्चापिपूजयेत्।ततःप्रदक्षिणंकु
र्यात्गृहीतकुसुमांजलिः।इममुच्चारयेन्मंत्रमथसर्वंनिवेदयेत्।मंत्रःप्र
योगेद्रष्टव्यः।सप्तहस्तेनदंडेनत्रिंशद्दंडानिवर्त्तनं।त्रिभागहीनंगोचर्ममा
नमाहप्रजापतिः।मानेनानेनयोदद्यान्निवर्त्तनशतंबुधः।विधिनानेन
तस्याशुक्षीयतेपापसंहतिः।तदर्द्धमपियोदद्यादपिगोचर्ममात्रकं।भ
वनस्थानमात्रंवासोपिपापैःप्रमुच्यते।खर्वटादिलक्षणंमार्कंडेये।सौ
धवप्रप्राकारंप्राकारखातकावृतं।योजनार्द्धार्द्धविष्कंभमष्टभागायतं
पुरं।तदर्द्धेनतथाखेटंतत्पादोनंचखर्वटं॥तथाशूद्रजनप्रायंसुसमृद्ध
कृषीवलं।क्षेत्रोपभोगभूमध्येवसतिर्ग्रामसंज्ञिता॥यावंतिलांगलवि
भागमुखानिभूमेर्मासांपतेर्दुहितरंगजरोमकाणि।तावंतिशंकरपुरे
ससमाहिनिष्ठेद्भूमिप्रदानमिहयःकुरुतेमनुष्यइति।अथप्रयोगः।य
जमानोद्येत्यादिसंकल्पातकक्षयानंतरगंधर्वकिन्नरसुरासुरसिद्धसं
घसेवितावधूतचामरविमानाधिष्ठानपूर्वकस्वीयामरतापकल्पपूर्वक
पितृपितामहादिबंधुसहितशंभुपुरगमनानंतरैतद्देयभूलांगलमुखो
त्कीर्णरजःसहितहलसंबद्धवृषरोमसंख्यवर्षावच्छिन्नशंभुपुरनिवा
सकामःस्वःपंचलांगलमहादानंप्रतिपादयिष्यइतिकृतसंकल्पःप्रकृ

तिवज्ञेविंशादिपूजादिमंडपपूजादिगुर्वादि विनियोगांतंसर्वंकुर्यात्। त
तोगुरुःषोडशारेसारदारुमयानिपंचहलानियुगयोत्ररज्जुफालनोत्
युपाकरणयुतानिकांचनोपकरणसहितानिकांचननिर्मितानिपंचह
लानितूलीतांबूलाद्युपकरणसहितांशय्यांगामेकांदोग्ध्रींपरितोष्टाद
शधान्यानिमंडपोदग्भागेसहस्रोक्तलक्षणान्वृषान्सालंकारान्सोप
स्करान्अधिवास्यवेद्युपरिवितानंबध्वाहलेभ्योनमइतिमंत्रेणसंपू
ज्यकुंडाभ्यासेकलशस्थापनादिवनस्पतिपर्यंतप्रधानहोमांतंसंपाद
येत्॥ततोगुर्वाज्ञयाचतुर्णामन्यतमऋत्विक्स्वकीयेकुंडेपर्ज्जन्याया
दित्येभ्योरुद्रायजुष्टंनिर्वपामीतितत्तद्देवतायैप्रत्येकंचरुंनिरूप्यपय
सिश्रपयित्वातेनपालाशसमिद्भिःप्रणवाज्येनश्यामतिलैश्चपर्जन्या
दित्यरुद्रेभ्यःतल्लिंगकैर्मंत्रैःप्रत्येकमष्टाविंशतिर्जुहुयात्। तत्रऋग्वे
दिनांअच्छावदेतिपर्ज्जन्यमंत्रः एवंयजुर्वेदिनांशन्नोवातःपवतां।साम
गानांपर्जन्यःपितामहिषस्येति।आथर्वणानामभिक्रंदस्तनयार्द्रयोद
धीति।आदित्यरुद्रयोस्तुमंत्रास्तत्तच्छाखीयाःसामान्यप्रयोगेपूर्वमु
क्ताः।ततःस्विष्टकृदाद्यभिषेकांतंततोयजमानःसपुष्पलांगलानित्रिः
प्रदक्षिणीकृत्ययस्माद्देवगणाःसर्वेस्थावराणिचराणिच॥धुरंधरांगे
तिष्ठमतस्माद्भक्तिःशिवास्तुमे॥यस्मात्त्वद्भूमिदानस्यकलांनार्हंतिषो
डशीं॥दानान्यन्यानिमेभक्तिर्धर्मएवदृढाभवेदित्युक्त्वापुष्पाणिह
लेषुक्षिप्त्वाचवेदिपश्चिमतउपविश्यसपत्नीकंगुरुमुपवेश्याद्येत्यादि
प्रधानसंकल्पकीर्त्तनांतेऽमुकगुरवेतुभ्यंभूमिसहितानिधुरंधरवृष
शय्यादिसर्वोपस्करसहितानिसुवर्णसारदारुमयान्युभयविधानि
हलानिसंप्रददइतिदद्यात्।दक्षिणांचऋत्विग्भ्योन्यादक्षिणा।स्वल्पे
ष्वेकाग्निविधानमितिकेचित्।पुनःपुण्याहवाचनानंतरपूजादेवतावि
सर्जनविप्रभोजनानि॥इतिपंचलांगलदानप्रयोगः॥अथधरादानंम
त्स्ये॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥पापक्षयकरंनृणांअ
मंगल्यविनाशनं।कारयेत्पृथिवींहैमींजंबूद्वीपानुकारिणीं।मर्यादा
पर्वतवतींमध्येमेरुसमन्वितां।लोकपालाष्टकोपेतांनववर्षसमन्वि
तां।नदीनदसमोपेतांअंतेसागरवेष्टितां।महारत्नसमाकीर्णांवसुरुद्रा

केसंयुतां।हेम्नःपलसहस्रेणतदर्द्धेनयथाशक्तितः।शतत्रयेणवाकु
र्याद्द्विशतेनशतेनवा॥कुर्यात्संचपलादूर्ध्वमशक्तोपिविचक्षणः।प
लसहस्राद्धिमानंप्रतिमादिसहितायाःपृथिव्याः।तुलापुरुषवत्कुर्या
ल्लोकेशावाहनंततः।ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं।वेद्यां
कृष्णाजिनंकृत्वातिलानामुपरिन्यसेत्॥तथाष्टादशधान्यानिरसां
श्चलवणादिकान्।तथाष्टौपूर्णकलशान्समंतात्परिकल्पयेत्।वि
तानकंचकौशेयंफलानिविविधानिच।इत्येवंरचयित्वातामधिवास
नपूर्वकं॥पुण्यंकालमथासाद्यमंत्राःप्रयोगेज्ञेयाः।एवमुच्चार्यतांदेवीं
ब्राह्मणेभ्योनिवेदयेत्।धरार्द्धंवाचतुर्भागंगुरवेविनिवेदयेत्।शेषंचै
वाथऋत्विग्भ्यःप्रणिपत्यविसर्जयेदिति।एकहस्तेनकर्तव्याचतुर
स्रासुशोभनेतिहेमाद्रिरूपनारायणादिभिश्चतुरस्रोक्ता।त्रिकोणा
दानसौख्येदामोदरीयेच॥परिमंडलेत्यन्ये।अनेनविधिनायस्तुदद्या
द्धैममयींशुभां।पुण्यकालेतुसंप्राप्तेसपदंयातिवैष्णवं।विमानेनार्कव
र्णेनकिंकिणीजालमालिना॥नारायणपुरंगत्वाकल्पत्रयमसौरमेत्॥
पुत्रपौत्रप्रपौत्रांश्चतारयेदेकविंशतिमिति॥पृथिवींहैमींकुर्यादित्युक्ते
सप्तद्वीपवत्याःकरणप्रसंगेजंबूद्वीपानुकारिणीमितिविशेषणं।जंबू
द्वीपानुसारत्वेपिनानापर्वतसरोवराद्यन्वितानुकारित्वप्रसंगेमर्या
दापर्वतवतीमित्युक्तं।तावतामेरोरकरणप्रसंगेमध्येमेरुसमन्विता
मित्युक्तं।जंबूद्वीपलक्षणंविष्णुपुराणे।नववर्षंतुमैत्रेयजंबूद्वीपमिदं
मया॥लक्षयोजनविस्तारंसंक्षेपात्कथितंतव ।जंबूद्वीपंसमावृत्यल
क्षयोजनविस्तरः।मैत्रेयवलयाकारःस्थितःक्षीरोदधिर्बहिः।जंबूद्वी
पंसमस्तानांद्वीपानांमध्यतःस्थितं।तस्यापिमेरुर्मैत्रेयमध्येकनक
निर्मितः।चतुराशीतिसाहस्रैर्योजनैरस्यचोच्छ्रयः॥प्रविष्टःषोडशाध
स्ताद्द्वात्रिंशन्मूर्ध्निविस्तृतः।मूलेषोडशसाहस्रोविस्तारस्तस्यसर्वतः।
तथा।मेरोश्चतुर्दिशंतत्रनवसाहस्रविस्तृतः।इलावृतंमहाभागचत्वा
रश्चात्रपर्वताः।विष्कंभारचितामेरोर्योजनायुतविस्तृताः।पूर्वेणमंदरोना
मदक्षिणेगंधमादनः।वैभ्राजःपश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृतः।मर्यादा
पर्वतास्तुब्रह्मांडे।जाठरोदेवकूटश्चपूर्वस्यांदिशिपर्वतौ॥तौदक्षिणोत्तरा

यामावानीलनिषधायतौ॥कैलासोहिमवांश्चैवदक्षिणेवर्षपर्वतौ।पू
र्वपश्चायतावेतौअर्णवांतर्व्यवस्थितौ॥त्रिशृंगोजारधिश्चैवउत्तरेवर्ष
पर्वतौ॥पूर्वपश्चायतावेतौअर्णवांतर्व्यवस्थितौ।निषधःपारिजातश्च
पश्चिमेवर्षपर्वतौ।तौदक्षिणोत्तरायामावानीलनिषधायतौ।इलावृत
स्योभयपार्श्ववर्तिनौनीलनिषिद्धौद्वौपर्वतौदैर्घ्येणलक्षयोजनौ।व
र्षाण्यप्युक्तानिब्रह्मांडे॥उत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणे।ए
तद्धैभारतंनामभारतीयत्रसंततिः।भारतंप्रथमंवर्षंततःकिंपुरुषंस्मृ
तं।हरिवर्षंतथैवान्यंमेरोर्दक्षिणतोद्विज।रम्यकंचोत्तरेवर्षंतस्यचानु
हिरण्मयं।उत्तराःकुरवश्चैवयथावैभारतंतथा॥मेरोःपूर्वेणभद्राश्वं
केतुमालंतुपश्चिमे।वर्षेद्वेतुसमाख्यातेतयोर्मध्यमिलावृतं॥नवसाह
स्रमेतेषांएकैकंद्विजसत्तम।अथप्रयोगः।कर्ताद्येत्याद्युक्त्वासर्वपापाप
गलनिवृत्तिपितृपुत्राद्येकविंशतिस्वपुरुषोद्धारणपूर्वककिंकिणीजा
लमालिसौवर्णविमानकरणकनारायणपुरगमनानंतरकल्पत्रया
वच्छिन्ननारायणपुरनिवासकामःस्वोधरामहादानमहंप्रतिपादयि
ष्यइतिप्रधानसंकल्पादिषोडशारत्निखनांतंप्रकृतिवत्॥तदुपरिकृ
ष्णाजिनमास्तीर्यतत्रद्रोणमितांस्तिलानासाद्यतदुपरिप्रागुक्तलक्ष
णांमेरोरुपरिपूर्वादिक्रमेणलोकपालाष्टकोपेतांमहारत्नयुतांवसु
रुद्रादित्यप्रतिमोपेतांधरांस्थापयेत्॥तस्याश्चपरितःप्रागुक्तधान्य
कुंभाष्टकोपेतनानाविधफलवासःप्रभृतीन्स्थापयेत्।धरायैनमइ
तिपूजयेदुपरिवितानंबध्नीयाच्च।ततःकुंडसमीपस्थकुंभस्थापनादि
पूर्णाहुत्यभिषेकांतंप्रकृतिवत्एवमभिषिक्तोयजमानःतांत्रिःप्रद
क्षिणीकृत्यपुष्पाण्यादाय।ततःकुंडसमीपस्थकुंभस्थापनादिपूर्णाहु
त्यभिषेकांतंप्रकृतिवत्।नमस्तेसर्वभूतानांत्वमेवभवनंयतः।धात्रीच
सर्वभूतानामतःपाहिवसुंधरे।वसुधारयसेयस्माद्वसुचातीवनिर्मलं॥
वसुंधराततोजातातस्मात्पाहिभयादलं।चतुर्मुखोपिनोगच्छेद्यस्मा
दंतंतवाचले।अनंतायैनमस्तस्मात्पाहिसंसारकर्दमात्॥त्वमेवलक्ष्मी
र्गोविंदेशिवेगौरीतिसंस्थिता।गायत्रीब्रह्मणःपार्श्वेज्योत्स्नाचंद्रेरवौ
प्रभा।बुद्धिर्बृहस्पतौख्यातामेधामुनिषुसंस्थिता॥विश्वंव्याप्यस्थिता

यस्मात्तेनोविश्वंभरास्मृता। धृतिःस्थितिःस्समास्तोणीपृथ्वीवसुमती
रसा॥ एताभिर्मूर्त्तिभिःपाहिदेविसंसारसागरादित्यभिमंत्र्यपुष्पाणिप्र
क्षिप्यनत्वोदङ्मुखान्ब्राह्मणानुपवेश्यार्चेत्याद्युक्त्वासर्वपापेत्यादिना
रायणपुरनिवासकामइत्यंतंप्रतिज्ञावत्उच्चार्येइमांकृष्णाजिनन्य
स्ततिलोपरिविन्यस्तांपंचपलाधिकयथाशक्तिहेमसपरिकरनिर्मि
तांजंबूद्वीपानुकारिणींमर्यादापर्वतमध्यमेरुनववर्षलोकपालाष्ट
कनदीनदशतयुतांसप्तसागरवेष्टितांफलधान्यवस्त्रादिप्रतिमायु
पेतांधरांविष्णुदैवतांयुष्मभ्यमहंसंप्रददइतिदद्यात्। अर्द्धंतुरीयां
शंवाचार्यायशिष्टमृत्विग्भ्यःप्रकृतिवद्विभागइतिकेचित्॥ नृपकर्त्तृ
केदानेग्रामादिदक्षिणा। अन्यकर्त्तृकेतुयथाशक्तिसुवर्णस्वल्पेले
काग्निविधानमितिकेचित्॥ ब्राह्मणवाचनदेवतापूजनविसर्जनवि
प्रभोजनानिप्रकृतिवत्॥ इतिधरादानप्रयोगः। अथविश्वचक्रदानं
मात्स्ये॥ अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥ विश्वचक्रमिति
ख्यातंसर्वपापप्रणाशनं॥ तपनीयस्यशुद्धस्यविषुवादिषुकारयेत्॥
श्रेष्ठंपलसहस्रेणतदर्द्धेनतुमध्यमं॥ तस्यार्द्धेनकनिष्ठंस्याद्विश्वच
क्रमुदाहृतं॥ अन्यद्विंशपलादूर्ध्वंअशक्तोपिनिवेदयेत्॥ वक्ष्यमाण
विष्ण्वादिप्रतिमासहितस्यविश्वचक्रस्येदंमानं॥ षोडशारंततश्चक्रंभ्र
मन्नेम्यष्टकावृतं॥ अरानाभिस्पृष्टमूलानेमिस्पृष्टाग्राःशलाकाः। भ्र
मंतीनांवलयाकाराणांनेमीनांचक्रावयवानांअष्टकेनावृतंवेष्टितमि
त्यर्थः। नाभिपद्मेस्थितंविष्णुंयोगारूढंचतुर्भुजं॥ नाभिपद्मेनाभिरू
पाष्टदलपद्मकर्णिकायामित्यर्थः। अष्टसुदलेषुआवरणरूपदेवता
ष्टकस्यसंनिवेशात्॥ शंखचक्रस्यपार्श्वेतुदेव्यष्टकसमायुतं। योगारू
ढंहंसदेशावस्थितसंपुटाकारहस्तद्वयं। अष्टौदेव्योपिपंचरात्रे। विम
लोत्कर्षिणीज्ञानाक्रियायोगातथैवच। प्रह्वीसत्यातथेशानाअष्टौ
चपरितोहरेः॥ वरदादक्षहस्तेनवामहस्तधृतायुधाः। प्रशस्ततरुणी
रूपाअष्टौदेव्यःप्रकीर्त्तिताः॥ दक्षोदक्षिणआयुधंचक्रमितिदामोदरः॥ द्वि
तीयावरणेतद्वत्पूर्वंतोजलशायिनं। अत्रिर्भृगुर्वसिष्ठश्चब्रह्माकश्यपएव
च। मत्स्यःकूर्मोवराहश्चनरसिंहोथवामनः। रामोरामश्चकृष्णश्चबुद्धःक

ल्कौचतेक्रमात्॥तृतीयावरणेगौरीमातृभिर्वसुभिर्युता॥चतुर्थेद्वादशादि
त्यावेदाश्चत्वारएवच॥पंचमेपंचभूतानिरुद्राश्चैकादशैवतु॥लोकपा
लाष्टकंषष्ठेदिङ्मातंगास्तथैवच॥सप्तमेस्त्राणिसर्वाणिमांगल्यानिचकार
येत्।अंतरांतरतोदेवान्विन्यसेदष्टमेपुनः।तुलापुरुषवच्छेषंसमंता
त्परिकल्पयेत्॥कृष्णाजिनेतिलादीनिधान्यवासःफलानिच॥होमाधि
वासनांतेतुगृहीतकुसुमांजलिः॥होमइत्यादि॥चक्राधिष्ठितविष्ण्वादि
देवस्यहोमविधानार्थः॥सचहोमःतत्तन्मंत्रैर्नाममंत्रैर्वाशाकृतग्रहादि
होमोत्तरंकार्यः।आगंतूनामंतेनिवेशइतिकेचित्।तन्न।एतस्यशाकृत
होमानुवादकृतयाधिष्ठायकत्वाभावात्।इममुच्चारयेन्मंत्रंत्रिःकृत्वा
थप्रदक्षिणं।मंत्रःप्रयोगेज्ञेयः।इत्यामंत्र्यतुयोदद्याद्विष्णुचक्रंविमत्स
रं॥विमुक्तःसर्वपापेभ्योविष्णुलोकेमहीयते॥वैकुंठलोकमासाद्यच
तुर्बाहुःसनातनः।सेव्यतेप्सरसांसंघैस्तिष्ठेत्कल्पशतत्रयं॥प्रणमेद्वाप्य
थकृत्वाविश्वचक्रंदिनेदिने॥तस्यायुर्वर्द्धतेनित्यंलक्ष्मीश्चविपुलाभवे
त्॥इतिसकलसुराधिवासंवितरतियस्तपनीयषोडशारं॥हरिभवनमुपा
गतःससिद्धैश्चिरमधिगम्यनमस्यतेशिरोभिरिति॥जलशायीब्रह्मांड
दानेउक्तः॥ऋषिरूपंपंचरात्रे।जटिलाःश्मश्रुलाःशांताःकृशाधमनिसंत
ताः॥कुंडिकास्रधराःकार्याऋषयोद्विभुजाःसदा॥धमनिःशिरा।कुंडि
काकमंडलुः।अक्षोक्षमाला॥मत्स्यादयःपंचरात्रे।वामेशंखंगदांदक्षे
द्विभुजोमत्स्यरूपधृक्।नरांघ्रिर्मत्स्यरूपोधोमत्स्यरूपीजनार्दनः।
अधोंघ्रौमत्स्यरूपंवेतिविकल्पः॥दामोदरस्तुउक्तायुधकरचरणादि
युतपुरुषाकारेणकेवलमत्स्याकारेणचविकल्पमाह।कूर्मस्तुकच्छ
पाकारान्मत्स्यरूपोक्तरूपवान्॥मधुपिंगलवर्णश्चचतुर्बाह्वायुधैर्वृतं
।नरांगंसूकरास्यंचमनाक्पीनंसुभीषणं॥श्रीर्वामकूर्परस्यातुधरानं
तौपदानुगौ।एतद्रूपधरंदेववराहंभुक्तिमुक्तिदं।कूर्परंदंष्ट्राग्रमितिदामो
दरः।ज्वलदग्निसमाकारंसिंहवक्त्रंनरांगकं।दंष्ट्राकरालवदनंललज्जि
ह्वंसुभीषणं।रक्तास्यंजटिलंक्रुद्धमासीढंपीनवक्षसं।अभेद्यतीक्ष्णन
खरमालासंहतदानवं।तद्वक्षोदारयंतंचकराभ्यांनखरैर्भृशं।गदाचक्र
धरद्वाभ्यांनरसिंहजगत्प्रभुं।कुंडीछत्रधरोद्विर्दीर्वामनःपरिकीर्त्तितः

स्त्रांतकरणं घोरमुद्वहन् परशुं करे॥ जामदग्न्यश्च कर्तव्यो रामो रोषारुणे
क्षणः॥ प्रसन्नवदनः सिंहस्कंधो महाबलः॥ आजानुबाहुः कर्तव्यो रा
मो बाणधनुर्द्धरः॥ मद्यपात्रं च सीरं च वामदक्षिणयोः क्रमात्॥ गदामुसल
वज्रं च हली रामः प्रकीर्तितः॥ मुसलरूपं वज्रमित्यर्थः॥ दक्षिणोर्ध्वाधः क
रयोर्मद्यपात्रसीरे॥ वामयोर्गदामुसले इति चतुर्बाहू रामः॥ शंखचक्रध
रः श्यामो द्विभुजः कृष्णसंज्ञकः॥ काषायवस्त्रसंवीतः स्कंधसंसक्तचीवरः
॥ पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्तितः॥ खड्गोद्यतकरः क्रुद्धो हय
रूढो महाबलः॥ म्लेच्छोच्छेदकरः कल्की द्विभुजः परिकीर्तितः॥ अथ विश्व
चक्रप्रयोगः॥ अधिवासनदिने यजमान उपविश्याचम्य देशकालौ संकीर्त्य नानातेस
कल्पापक्षयानंतर विष्णुलोकमहीयमानत्वविशिष्टवैकुंठलोकासाद
नपूर्वकचतुर्बाहुत्वसनातनत्वाप्सरःसंघसेव्यमानताविशिष्टकल्पत्र
यावधिकतदधिकरणकस्थितिकामो हं विश्वचक्रमहादानं प्रतिपा
दयिष्य इति कृतसंकल्पः प्रकृतिवह्नौ विंशाद्दिपूजादि मंडपपूजादिगुर्वा
दिविनियोगांतं सर्वं कुर्यात्॥ ततो गुरुर्वेद्यां षोडशारचक्रं न्यस्त कृष्णा
जिने स्थापित द्रोणमितति लोपरि विश्वचक्रं संस्थाप्य तस्याष्टदलकर्णि
कायां विष्णुं पूर्वादिदलेषु विमला उत्कर्षणी ज्ञाना क्रियायोगा प्रह्वी स
त्या ईशाना इत्यष्टौ द्वितीयावरणे षोडशकोष्ठेषु जलशाय्यत्रिभृगुवसि
ष्ठब्रह्मकश्यपमत्स्याद्यवतारदशकमिति प्रतिमाषोडशकं तृतीयावर
णे॥ गौरी ब्रह्माणी रौद्री कौमारी वैष्णवी वाराही इंद्राणी कौशिकी त्यष्टौ॥
ध्रुवाध्वरसोमआप्यनिलप्रत्यूषप्रभासाख्यानष्टौ वसून्॥ चतुर्थावर
णे धात्रर्यममित्रवरुणांशभगेंद्रविवस्वत्पूषपर्जन्यत्वष्टृविष्ण्वाख्यद्वा
दशादित्यान् वेदचतुष्टयं च पंचमे पंचभूतानि पृथिवीवरुणवन्हिवायु
विनायकात्मकानि वीरभद्रशंभुगिरिशाजैकपात् अहिर्बुध्न्यपिनाकि
भुवनाधीश्वरकपालिविशांपतिस्थाणुभगाख्यानेकादशरुद्रांश्चष
ष्ठे यथाक्रमतो लोकपालाष्टकं ऐरावतपुंडरीकवामनकुमुदांजनपु
ष्पदंतसार्वभौमसुप्रतीक इति दिग्गजाष्टकं॥ सप्तमे खड्गचक्रशक्तिपा
शध्वजगदाशूलशंखकौस्तुभचामरछत्रपूर्णकुंभदीपदर्पभरूपाणि
स्वर्णखंडानि॥ अष्टमे विष्णुदेव्यष्टकजलशाय्यत्रिभृगुवसिष्ठब्रह्मकश्य

पमत्स्यप्रतिमाषोडशकंस्थापयेत्॥चक्रस्यसमंतात्धान्यरसद्रव्यपू
र्णकुंभाष्टकवस्त्रमाल्येक्षुफलरत्नादीनिवितानकंचबध्नीयात्॥ततो
विश्वचक्रायनमइतिपूजयेत्॥ततःकुंडसमीपेकलशस्थापनादिपू
र्णाहुत्यभिषेकांतंप्रकृतिवत्॥प्राकृतग्रहादिहोमोत्तरंचक्राधिष्ठितवि
ष्ण्वादिभ्यःतत्तन्मंत्रैर्नाममंत्रैर्वाष्टाविंशत्यादिसंख्ययाहोमःकार्यइ
तिकेचित्॥ततोभिषिक्तोयजमानोविश्वचक्रंत्रिःप्रदक्षिणीकृत्यन
मोविश्वमयायेतिविश्वचक्रात्मनेनमः।परमानंदरूपात्वंपाहिनः
पापकर्दमात्॥तेजोमयमिदंयस्मात्सदापश्यंतियोगिनः।हृदितत्वं
गुणातीतंविश्वचक्रंनमाम्यहं॥वासुदेवेस्थितंचक्रंचक्रमध्येतुमा
धवः॥अन्योन्याधाररूपेणप्रणमामिस्थिताविह॥विश्वचक्रमिदंय
स्मात्सर्वपापहरंपरं॥आयुधंचाधिवासश्च भवादुद्धरमामतइति
मंत्रैरामंत्र्यपुष्पाणिप्रक्षिप्यनमस्कृत्यवेदिपश्चिमतउपविश्यपूर्वो
क्तंसकलेत्यादिमहासंकल्पमुक्त्वाइमंविश्वचक्रंविष्ण्वादिदेवता
धिष्ठितंविष्णुदैवत्यंयुष्मभ्यंअहंसंप्रददइतिदद्यात्॥दानप्रतिष्ठार्थं
सुवर्णदक्षिणाविभागःप्राकृतः॥स्वल्पेष्वेकाग्नि विधानमि
तिकेचित्॥पुण्याहवाचनदेवताविसर्जनब्राह्मणभोजनानिकुर्यात्
॥इतिविश्वचक्रदानं॥अथमहाकल्पलतादानं॥मात्स्ये॥अथातः
संप्रवक्ष्यामिमहादानमनुत्तमम्॥महाकल्पलतानाममहापातक
नाशनं॥पुण्यांतिथिमथासाद्यकृत्वाब्राह्मणवाचनं॥ऋत्विङ्मंड
पसंभारभूषणाच्छादनादिकं॥तुलापुरुषवत्कुर्याल्लोकेशावाहना
दिकं॥चामीकरमयीःकुर्याद्दशकल्पलताःशुभाः॥चामीकरंहेम।
नानापुष्पफलोपेतानानांशुकविभूषिताः।पुष्पफलांशुकानिस्वरू
पतइतिकेचित्॥हैमानीत्यपरे।हेमलतास्वरूपतःपुष्पफलानांयो
गासंभवात्तानिहैमानिअंशुकानितुकार्पासादीन्येव।हैमोपादानेत
त्तदेलक्षणपत्तेरितितुयुक्तंप्रतीमः॥अत्रफलान्याम्राकाराणीति
रूपनारायणः।कामनयापशुपुत्रादिरूपाणीतिसामोदररत्नाकरा
दयः।विद्याधरसुवर्णानांमिथुनैरुपशोभिताः॥हारानादित्सुभिःसि
द्धैःफलानिचविहंगमैः॥सिद्धाःपक्षिमुखाःकिन्नराः।विहंगमाःपक्षि

योवेति दामोदरः। लोकपालानुसारिण्यः कर्तव्यास्तासु देवताः। ब्राह्मीमनंत
शक्तिं च लवणस्योपरि न्यसेत्। अधस्ताल्लतयोर्मध्ये पद्मशंखधरे उभे॥ इ
आसनस्थानु गुडे पूर्वतः कुलिशायुधा। रजन्यजस्थिताग्नेयी स्रुवपाणिर
श्वानले॥ याम्यं च महिषारूढा गदिनी तंदुलोपरि। घृते च नैर्ऋती स्थाप्या
खड्गा च दक्षिणा करे॥ वारुणी वारुणी क्षीरे झषस्था नागपाशिनी॥ पताकिनी
च वायव्ये मृगस्था शर्करोपरि॥ सौम्या तिलेषु संस्थाप्या शंखिनी निधि
संस्थिता॥ माहेश्वरी वृषारूढा नवनीते त्रिशूलिनी। मौलिन्यो वरदा
स्तद्वत्कर्तव्या बालकान्विताः। मध्ये हे लते अष्टदिक्ष्वष्टौ। मध्ययोरधो
ब्राह्म्यनंतशक्ती। अन्यासामधो लोकपालशक्तयः। इभ ऐरावतः। रज
न्यजो हरिद्राछागः। निधिः कलशाकारः। बालकान्विताः क्रोडस्थबालाः
॥ शक्त्या पंचपलादूर्ध्वमासहस्रात्प्रकल्पयेत्। सप्रतिमादीनामेतन्मानं।
सर्वासामुपरिष्टाच्च पंचवर्णवितानकं। धेनवो दश कुंभाश्च वस्त्रयुग्मानि चै
वहि। मध्यमे हेतुगुरवे कल्पिभ्योन्यास्तथैव च॥ ततो मंगलशब्देन स्नातः
शुक्लांबरावृतः॥ त्रिःप्रदक्षिणमावृत्य मंत्रानेतानुदीरयेत्॥ मंत्रः प्रयोगे
ज्ञेयः। इति सकलदिगंगनाप्रदानं भवभयसूदनकारि यः करोति॥ अभि
मतफलदे स नागलोके वसति पितामहवत्सराणि त्रिंशत्॥ पितृशतम
थ तारयेद्भवाब्धेर्भवदुरितौघविनाशशुद्धदेहः। सुरपतिवनितासहस्र
संख्यैः परिवृतमंबुजसंसदाभिवंद्य इति॥ अथ प्रयोगः। अद्येत्यादि स
कलपापक्षयविशुद्धदेहत्वपूर्वकदेवगणसहसहस्रपरिवृतब्रह्माभि
नंद्यपितृशतभवाब्धिसंतारणानंतरब्रह्मत्रिंशद्वत्सरावधिकामितफल
दनागलोकनिवासकामः श्वः कल्पलतामहादानं प्रतिपादयिष्य इति सं
कल्प्य प्रकृतिवद्धोविंदादिपूजामंडपपूजागुर्वादिविनियोगांतं सर्वं कुर्या
त्॥ ततो वेदिलिखितचक्रन्यस्तलवणकूटोपरि एकां लतां स्थापयित्वा
तन्मूले ब्राह्मीं न्यसेत्॥ लवणकूट एवापरां लतां स्थापयित्वा तन्मूल
देशे आनंतीं शक्तिं पूर्वादिक्रमात् गुडहरिद्राछागतंदुलघृतक्षीरशर्क
रातिलनवनीतस्थाष्टलतामूलेषु ऐंद्र्यादिशक्तीः संस्थाप्य परितो दश पू
र्णकुंभान् दश धेनूर्दशवस्त्रयुगानि फलमाल्यधान्यादीनि च विन्यस्य ल
तासहिताः शक्तीः प्रतिष्ठापूर्वकं पूजयित्वा ततः कुंडसमीपस्थकलशस्था

पनादिपूर्णाहुत्यभिषेकांतंप्रकृतिवत्।एवमभिषिक्तोयजमानःक
ल्पलताभ्यःप्रदक्षिणमावृत्यनमोनमःपापविनाशिनीभ्योब्रह्मां
डलोकेभ्यश्चमालिनीभ्यः॥आशंसिताधिकफलप्रदाभ्योदिग्भ्यस्त
थाकल्पलतावधूभ्यः॥इमं मंत्रमुच्चार्यपुष्पाणिप्रक्षिप्यनमस्कृ
त्यवेदिपश्चिमतउपविश्यमहासंकल्पमुक्त्वायथासंभवंविशेषण
वैशिष्ट्यमुच्चार्यदद्यात्।स्वल्पद्रव्यत्वपक्षेएकाग्निविधानमितिके
चित्॥पुण्याहवाचनदेवतापूजनविसर्जनमंडपादिप्रतिपादनब्रा
ह्मणभोजनादीनि॥इतिकल्पलतादानं॥अथसप्तसागरदानविधिः
॥मात्स्ये॥अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं॥सप्तसागरकंना
मसर्वपातकनाशनं॥कारयेत्सप्तकुंडानिकांचनानिविचक्षणः।प्रा
देशमात्राणितथारत्निमात्राणिवापुनः॥कुर्यात्सप्तपलादूर्ध्वमास
हस्राच्चशक्तितः॥संस्थाप्यानिचसर्वाणिकृष्णाजिनतिलोपरि।प्र
थमंपूरयेत्कुंडंलवणेनविचक्षणः।द्वितीयंपयसातद्वत्तृतीयंसर्पि
षापुनः॥चतुर्थंतुगुडेनैवदध्नापंचममेवच॥षष्ठंशर्करयातद्वत्सप्त
मंतीर्थवारिणा॥स्थापयेल्लवणस्यांतर्ब्रह्माणंकांचनंशुभम्॥केशवं
क्षीरमध्येचघृतमध्येमहेश्वरं।भास्करंगुडमध्येचदधिमध्येसुराधि
पं।शर्करायांन्यसेल्लक्ष्मींजलमध्येचपार्वतीं॥सर्वेषुसर्वरत्नानिधा
न्यानिचसमंततः।तुलापुरुषवच्छेषमत्रापिपरिकल्पयेत्॥ततो
वारुणहोमांतेस्नापितोवेदपुंगवैः॥त्रिःप्रदक्षिणमावृत्यमंत्रानेता
नुदीरयेत्॥मंत्राःप्रयोगेज्ञेयाः॥इतिदत्तातिरसामृतसंयुतान्मुनि
रविस्मयवानिहसागरान्॥अमलकांचनवर्णमयानसौपदमुपै
तिहरेरमरार्चितः।सकलपापविधौतविराजितःपितृपितामहपुत्र
कलत्रकं॥पुत्रशतत्रय मितिवाचस्पतिमिश्रःपपाठ।पुत्रकल
त्रकमितिरत्नाकरदामोदरादयः॥नरकलोकसमाकुलमप्ययंझ
टितिसोपिनयेच्छिवमंदिरमित्यादिप्रादेशांतिकमात्राणीतितिर्यगू
र्ध्वं॥रत्निरंगुष्ठपर्वाणिप्रादेशःपरिकीर्तितः॥सार्द्धदशांगुलप्रादेश
इतिकल्पतरुः।ब्रह्मादिप्रतिमाब्रह्मांडदानादौदर्शिताः॥अथप्रयोगः
॥यजमानोद्येत्यादिकलुषक्षयसंभावितनरकनिवासपितृपिताम

हपुत्रकलत्रशिवमंदिरनयनपूर्वकामरानृतत्वविशिष्टस्वीयहरिप
दप्राप्तिकामः श्वःसप्तसागरमहादानमहंप्रतिपादयिष्यइतिसंक
ल्प्यगोविंदादिपूजादिमंडपपूजायुर्वादिविनियोगांतंप्रकृतिवत्।
लनश्चकासादितकृष्णाजिनन्यस्ततिलद्रोणेहैमानिसप्तकुंडानि
स्थाप्यक्रमेणलवणदुग्धघृतगुडदधिशर्करातीर्थवारिभिःपूरयि
त्वातेषुब्रह्मकेशवमहेश्वरभास्करस्कराधिपलक्ष्मीपार्वतीप्रतिमाः
स्थापयेत्।परितोष्टादशधान्यानिवितानकंचोपरिसब्रह्मादीन्सा
गरान्पूजयेच्चततःकुंडसमीपस्थकलशस्थापनादिवनस्पतिहो
मांतंप्रतिकुंडमष्टाविंशतिअष्टोत्तरशताष्टोत्तरसहस्रान्यतमसं
ख्यास्वस्वशाखीयैर्वारुणैर्मंत्रैस्तिलान्हुत्वास्विष्टकृदादिपूर्णा
हुत्यभिषेकांतंप्राकृतंकुर्युः।एवमभिषिक्तोयजमानःसागरान्त्रिः
प्रदक्षिणीकृत्यनमोवः सर्वसिंधूनामाधारेभ्यःसनातनाः।जंतूनां
प्राणदेभ्यश्चसमुद्रेभ्योनमोनमः॥क्षीरोदकान्यदधिमाधुरलाव
णेक्षुरसामृतेनभुवनत्रयजीवसंघान्॥आनंदयंतिवसुभिश्चयतो
भवंतस्तस्मान्ममाप्यघविघातमलंविधध्वं॥यस्मात्समस्तभुवने
षुभवंतएवतीर्थामरासुरसुवद्रमणिप्रदानं॥पापक्षयामृतविले
पनभूषणायलोकस्यबिभ्रतितदस्तुममापिलक्ष्मीरितिमंत्रैरनुमं
त्र्यपुष्पाणिप्रक्षिप्यनमस्कृत्यवेदिपश्चिमतउपविश्यदेशकालकी
र्तनांतेसकलकलुषक्षयेत्यादिमहासंकल्पमुक्त्वासप्तसागरान्
ब्रह्मादिप्रतिमासहितान्सोपस्करान्विष्णुदैवतान्तुलापुरुष
मत्स्यपुराणीयभागव्यवस्थयायुष्मभ्यमहंसंप्रददेनममेतिसुव
र्णदक्षिणांदद्यात्॥स्वल्पेत्वेकाग्निरितिकेचित्॥ततःपुण्याहवाचन
ग्रहादिपूजाविसर्जनब्राह्मणभोजनानिकुर्यात्॥इतिसप्तसागरदा
नविधिः॥अथरत्नधेनुदानविधिः॥मात्स्ये॥अथातःसंप्रवक्ष्यामिम
हादानमनुत्तमम्॥रत्नधेनुरितिख्यातंगोलोकफलदंनृणां॥पुण्यां
तिथिमथासाद्यतुलापुरुषदानवत्॥लोकेशावाहनंतद्वत्ततोधेनुं
प्रकल्पयेत्॥भूमौकृष्णाजिनंकृत्वालवणद्रोणसंयुतं॥धेनुंरत्नम
यींकृत्वासंकल्प्यविधिपूर्वकम्॥स्थापयेत्पद्मरागाणामेकाशीतिमु

स्वेविधिः॥पुष्परागशतेन हृत् घोणायांपरिकल्पयेत्॥ललाटेहेमति
लकंमुक्ताफलशतंदृशोः॥भ्रूयुगेविद्रुमशतंशुक्तीकर्णद्वयोःस्थिते॥
कांचनानिचशृंगाणिशिरोवज्रशतात्मकं॥ग्रीवायांनेत्रपट्टकंगोमेदक
शतात्मकं॥इंद्रनीलशतंपृष्ठेवैडूर्यशतपार्श्वके॥स्फाटिकेकुदरंतद्व
त्सौगंधिकशतात्कटि॥सौगंधिकंपद्मरागः॥सौगंधिकंतुकल्हारपद्म
रागेचकल्पृणइतिवैजयंतीकोशात्॥खुराहेममयाःकार्याःपुच्छंमुक्ता
वलीमयं॥सूर्यकांतेंदुकांतौचघ्राणेकर्पूरचंदनं॥कुंकुमानिचरोमाणि
रौप्यांनाभिंचकारयेत्॥गारुत्मतशतंतद्वत् अपानेपरिकल्पयेत्॥अन्या
न्यानिचरत्नानिस्थापयेत्सर्वसंधिषु॥कुर्याच्छर्करयाजिह्वांगोमयंच
गुडात्मकं॥गोमूत्रमाज्येनतथादधिदुग्धंस्वरूपतः॥पुच्छाग्रेचामरंद
द्यात्समीपेताम्रदोहनं॥कुंडलानिचहैमानिभूषणानिचशक्तितः॥
कारयेदेवमेवंतुचतुर्थांशेनवत्सकं॥तथासर्वाणिधान्यानिपादाश्चे
क्षुमयाःस्मृताः॥नानाफलानिसर्वाणिपंचवर्णवितानकं॥एवंविरच
नंकृत्वातद्वद्धोमाधिवासनं॥ऋत्विग्भ्योदक्षिणांदद्याद्धेनुमामंत्रयेद्बु
धः॥गुडधेनुवदामंत्र्यइदंचोदाहरेत्ततः॥मंत्रःप्रयोगेज्ञेयः॥आमंत्र्य
चैत्यमथितःपरिहृत्यभक्त्यादद्याद्द्विजायगुरवेजलपूर्वकांतां॥यःपुण्य
माप्यदिनमत्रकृतोपवासःपापैर्विमुक्ततनुरेतिपदंमुरारेः॥इतिसकल
विधिज्ञोरत्नधेनुप्रदानंवितरतिसविमानंप्राप्यदेदीप्यमानं॥सकल
कलुषमुक्तोबंधुभिःपुत्रपौत्रैःसहमदनसरूपःस्थानमभ्येतिशंभो
रिति॥अथप्रयोगः॥अद्येत्यादिसकलकलुषक्षयमदनस्वरूपत्वपूर्व
कबंधुवर्गपुत्रपौत्रादिसहितवरविमानारोहणपूर्वकगोलोकप्राप्तिका
मस्तद्वच्छंभुपदप्राप्तिकामस्तद्वद्धरिपदप्राप्तिकामोवाऽमोरत्नधेनुम
हादानमहंप्रतिपादयिष्यइतिसंकल्प्यप्रकृतिवद्गोविंदादिपूजामंड
पपूजागुर्वादिविनियोगांतंकृत्वागुरुःषोडशारेकृष्णाजिनंप्रसार्यतदुप
रिलवणंद्रोणमितंप्रसार्यतदुपरिरेखामयांप्राङ्मुखींगामुदक्पादा
मालिख्यरत्नैरंगानिकुर्यात्॥तत्रएकाशीतिपद्मरागैर्मुखं॥पुष्पराग
शतेननासाग्रं॥ललाटेहेमतिलकं॥पंचाशन्मुक्ताफलैःप्रत्येकंदृशौ॥विद्रु
मशतेनविभज्यभ्रूयुगं॥शुक्तिभ्यांकर्णौ॥कांचनेशृंगेहीरकशतेनशिरः

गोमेदकशतान्वितेननेत्रनामकपटेनग्रीवां॥वैडूर्यशतेनपार्श्वे।स्फ
टिकशतेनोदरं॥पद्मरागशतेनकटिं॥शक्तितोहेम्नाखुरान्।सूर्यकांत
कर्पूराभ्यांदक्षिणघ्राणपुटं।चंद्रकांतचंदनाभ्यांवामघ्राणपुटं।कुंकुमे
नरोमाणि।रूप्येणनाभिं।गारुत्मतशतेनऽपानं।रत्नांतरैःसर्वसंधीन्
शर्करयाजिह्वां।गुडोगोमये।आज्यंमूत्रे।चामरंपुच्छाग्रे।स्वरूपतो
दधिदुग्धेसन्निधौताम्रपदोहनंसौवर्णकुंडलग्रैवेयकादीनिस्थाप्या
निएवंधेनुसाधनद्रव्यचतुर्थांशेनधेनोरुत्तरतःप्राङ्मुखमुदङ्मुखंवा
त्सं रचयेत्॥दधिदुग्धदोहनानिचवत्सेनसंभवंति।समंतादष्टादशधा
न्यानिफलपुष्पवस्त्रादीनिचासाधरत्नधेनवेसवत्सायैनमइतिपूजयि
त्वावितानंबध्नीयान्।ततःकुंडसमीपस्थकलशस्थापनादिप्रकृतिवत्
॥एवमभिषिक्तोयजमानोरत्नधेनुंत्रिःप्रदक्षिणमावृत्योपतिष्ठेत्।मं
त्रास्तु।यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता।धेनुरूपेणसादेवी
ममशांतिंप्रयच्छतु॥देहस्थायाचरुद्राणीशंकरस्यचयाप्रिया।धेनुरू
पेणसादेवीममपापंव्यपोहतु॥विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचवि
भावसो।चंद्रार्कशक्रशक्तिर्याधेनुरूपाचसाश्रिये॥चतुर्मुखस्ययाल
क्ष्मीर्यालक्ष्मीर्धनदस्यच॥लक्ष्मीर्यालोकपालानांसाधेनुर्वरदास्तुमे
॥स्वधायापितृमुख्यानांस्वाहायज्ञभुजांचया।सर्वपापहराधेनुस्त
स्माच्छांतिंप्रयच्छमे॥त्वांसर्वदेवगणधामयतःपठंतिरुद्रेंद्रचंद्रकम
लासनवासुदेवाः।तस्मात्समस्तभुवनत्रयदेवयुक्तेमांपाहिदेविभव
सागरपीड्यमानमिति॥ततःपुष्पाणिप्रक्षिप्यनमस्कृत्यवेदिपश्चि
मतउपविश्याद्येत्यादिमहासंकल्पमुक्त्वाइमांरत्नधेनुंपद्मरागमु
खांपुष्परागघोणांसुवर्णतिलकालंकृतांमुक्ताफलादिरचितनय
नाद्यवयवोपेतांधेनुसाधनपद्मरागादिद्रव्यचतुर्थांशेनरचितवत्स
सहितांपरितःस्थापितधान्यपुष्पफलादिमतींविष्णुदेवतांगुरवे
हंसंप्रददइतिएवंदद्यादितिभूपालरत्नाकरादयः।हेमाद्र्यादयस्तु
एकाग्निविधानएकस्मै।अनेकाग्निपक्षेतुतुलापुरुषवद्विभागइत्या
हुः सुवर्णदक्षिणांदद्यात्।ततःस्वस्त्यादिवाचनग्रहादिपूजनविस
र्जनब्राह्मणभोजनादिपूर्ववत्॥इतिरत्नधेनुदानप्रयोगः॥अथमहा

भूतघटदानविधिः॥मात्स्ये॥अथातः संप्रवक्ष्यामिमहादानमनुत्त
मम्॥महाभूतघटंनाममहापातकनाशनम्॥पुण्यंदिनमथासाद्य
कृत्वाब्राह्मणवाचनं॥ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं।
तुलापुरुषवत्कुर्याल्लोकेशावाहनंतथा॥कारयेत्कांचनंकुंभंमहा
रत्नचितंबुधः॥महारत्नानिब्रह्मोक्तानि।प्रादेशादंगुलशतंयावत्कु
र्यात्प्रमाणतः॥क्षीराज्यपूजितंतद्वत्कल्पवृक्षसमन्वितं॥पद्मासन
गतांस्तत्रब्रह्मविष्णुमहेश्वरान्॥लोकपालान्महेंद्रांश्चस्ववाहनस
मन्वितान्॥वराहेणधृतांतद्वत्कृत्वापृथ्वींसपंकजां॥वरुणंचासन
गतंकांचनंमकरोपरि॥हुताशनंमेषगतंवायुंकृतमृगासनं॥ऋग्वे
दस्याक्षसूत्रंस्याद्यजुर्वेदस्यपंकजं॥सामवेदस्यवीणास्याद्वेणुं
दक्षिणतोन्यसेत्॥अथर्ववेदस्यपुनःस्रुकस्रुवौदक्षिणेकरे॥पुरा
णवेदोवरदःसाक्षसूत्रकमंडलुः॥अत्रकल्पवृक्षप्रतिमाप्रादेशा
दिपरिमाणसहितघटसंपादकसुवर्णमानमार्थिकं।परितःसर्वधा
न्यानिचामरासनदर्पणं।पादुकोपानहच्छत्रभूषणाच्छादनादिकं
॥शय्यांचजलकुंभांश्चपंचवर्णवितानकं॥जलकुंभाःषोडश।स्नात्वा
धिवासनांतेतुमंत्रमेतमुदीरयेत्॥मंत्रःप्रयोगेज्ञेयः॥इत्थंचार्थंम
हाभूतघटंयोविनिवेदयेत्॥सर्वपापविनिर्मुक्तःसयातिपरमांगतिं।
विमानेनार्कवर्णेनपितृबंधुसमन्वितः॥स्तूयमानोवरस्त्रीभिःपदं
प्राप्नोतिवैष्णवं॥षोडशैतानियःकुर्यान्महादानानिमानवः।नतस्य
पुनरावृत्तिरिहलोकेभिजायतइति॥अथप्रयोगः॥अद्येत्यादिस
कलपापक्षयपूर्वकपित्रादिसकलबंधुजनसहितामरस्त्रीसेव्यमा
नार्कवर्णविमानकरणकविष्णुपदप्राप्तिकामःश्रीमहाभूतघटम
हादानमहंप्रतिपादयिष्य इतिसंकल्प्यप्रकृतिवद्गणेशादिपूजामं
डपपूजागुर्वादिविनियोगांतंकुर्यात्॥गुरुःषोडशारेवज्रमौक्तिक
माणिक्यनीलमरकतारव्यमहारत्नान्वितंतुल्याभ्यांगव्यदुग्धघृ
ताभ्यापूर्णंमध्यस्थापितकल्पवृक्षंघटाकारंमहाभूतघटंस्थापये
त्॥घटमध्येब्रह्मादिप्रतिमाःस्थापयित्वाचतुर्दिक्षुअष्टादशधान्यानि
छत्रचामरभूषणशय्यादीनिषोडशजलकुंभांश्चसन्निधापयेत्॥ततो

महाभूतघटायनमइतिसंपूज्यवितानेनबभीयात्।ततःकुंडसमीप
स्थकुंभस्थापनादिपूर्णाहुत्यभिषेकांतंप्रकृतिवत्।एवमभिषिक्तो
यजमानोमहाभूतघटंत्रिःप्रदक्षिणमावृत्यनमोवः सर्वदेवानामाधा
रेभ्यश्चराचरे।महाभूताधिदेवेभ्यः शांतिरस्तुशिवंमम।यस्मान्नकिं
चिदप्यस्तिमहाभूतैर्विनाकृतं।ब्रह्मांडेसर्वभूतेषुतस्माच्छ्रीरक्षयाः
स्तुमे इत्युपस्थायपुष्पाणिप्रक्षिप्यनमस्कृत्यवेदिपश्चिमतउपवि
श्याद्येत्याद्युक्त्वामहासंकल्पमुच्चार्येदंममहाभूतघटंमहारत्नचितं
मतः।स्थितसौवर्णकल्पवृक्षादिपुराणवेदांतप्रतिमासहितंपरितः
स्थापिताष्टादशधान्यछत्रचामरासनशय्यापूर्णकुंभादिसहितंवि
ष्णुदैवतंतुलापुरुषवत्त्रैधा।।ततःपुण्याहवाचनग्रहादिपूजनविस
र्जनमंडपादिप्रतिपादनब्राह्मणभोजनाशीर्वादग्रहणमंगलाचारा
दीनि।।इतिमहाभूतघटमहादानं।।इतिश्रीमीमांसकभट्टशंकरात्म
जभट्टनीलकंठकृतेदानमयूखेषोडशमहादानानि।।अथदशमहा
दानानि।कौर्मे।।कनकाश्वतिलानागादासीरथमहीगृहाः।कन्याच
कपिलाधेनुर्महादानानिवैदश।।वन्हिपुराणे।।रामउवाच।।क्रोधादि
कंमयाकर्मकृतंमुनिवरोत्तमाः।।कथंतस्माद्विमुच्येहंपापात्प्राणिव
धादिकात्।।इत्युक्त्वाधर्मतत्वज्ञाः पापानांपावनंपरं।।दानंचेहसुव
र्णस्यतेतमूचुर्महर्षयः।व्यासः।।सर्वान्कामान्प्रयच्छंतियेप्रयच्छंति
कांचनं।।एतद्धिभगवानत्रिःपितामहसुतोब्रवीत्।।नंदिपुराणे।।तस्मा
त्स्वशक्त्या दातव्यंकांचनंमानवैर्भुवि।।नातःपरतरंलोकेसद्यःपाप
विमोचनम्।।सुवर्णस्यसुवर्णस्यसुवर्णयःप्रयच्छति।।सर्वपापविनि
र्मुक्तःस्वर्गलोकेमहीयते।।आद्यसुवर्णशब्देनहिरण्यमुक्तं।द्विती
येनचशोभनवर्णत्वंतृतीयेनपरिमाणविशेषः।।सुवर्णाद्वितयंद
त्वाअक्षयांगतिमाप्नुयात्।।दत्वासुवर्णस्यशतंद्विजेभ्यःश्रद्धयान्वि
तः।ब्रह्मलोकमनुप्राप्यब्रह्मणासहमोदते।सकृदुच्चरितसुवर्ण
शब्दस्यषोडशमाषविशिष्टहेमवाचितेतिप्रागुक्तं।सुवर्णदानेदेय
सुवर्णस्यतृतीयश्चतुर्थोवांशोदक्षिणेतिपूर्वंपरिभाषायामुक्तं।एत
तमितिकेचित्।।दानमंत्रः।हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः।अ

नेतपुण्यफलदमतःशांतिंप्रयच्छमे॥ कौर्मे। पलैकंद्विगुणंवापित्रिगुणंशक्त्यनुक्रमात्। कनकस्यात्सुवर्णेनद्वाभ्यांत्रिभिःसदक्षिणं। यत्नादधोवातत्कुर्याद्द्विजायास्याद्यथारुचि॥ इतिसुवर्णदानं॥ आदित्यपुराणे॥ आदित्योदयसंप्राप्तेविधिमंत्रपुरस्कृतं। ददातिकांचनंयोवैदुःस्वप्नंप्रतिहंतिसः॥ ददात्युदितमात्रेयस्तस्यपाप्माविलीयते॥ वायुपुराणे॥ गुंजागुंजार्द्धमात्रंवानियतःप्रतिवासरं। कनकंन्यस्यलिंगेतुव्रजेत्तत्पदमुत्तमं। ब्रह्मांडे॥ शृणुष्वावहितोदानंब्रवीमितवनारद॥ शतमानमितिप्रोक्तंसर्वपापप्रणाशनं॥ आयुष्यंश्रीकरंपुण्यंआरोग्यंसंततिप्रदं॥ भुक्तिमुक्तिप्रदंस्वर्ग्यंसर्वमंगलकारणं॥ पुण्यकालेषुसर्वेषुचंद्रसूर्यग्रहादिषु॥ नित्यंवाकारयेद्दानंजन्मर्क्षेषुविशेषतः॥ पुण्यदेशेषुसर्वेषुगृहेदेवालयेषुच॥ यत्रसाधनसंपत्तिस्तत्रदानंसमाचरेत्‌तथा। गव्येनभूमिंशकृताजलेनआलिख्यमध्येसिततंदुलैश्च। सरोरुहंकेसराढ्यसकर्णिकंचाष्टदलंविलिख्य॥ तस्मिन्हिरण्यंशतमानपात्रंनिधायतस्योपरितंविचिंत्य॥ ब्रह्माणमीशंकमलासनस्थमाराध्यगंधादिभिरादरेण॥ विप्रंतथावेदविदांवरिष्ठंविचिंत्यबुध्यातुसमर्चयित्वा॥ दद्यात्सुवर्णंशतमानमस्मैसंप्रीयतामात्मभूरित्युदीर्य॥ शतमानंशतंकृष्णलमाषाद्युन्मितं॥ इतिशतमानदानं॥ अथरजतदानं॥ स्कांदे॥ यःप्रयच्छतिविप्रायरजतंचापिनिर्मलं। सविधूयाशुपापानिस्वर्गलोकेमहीयते॥ रूपवान्सुभगःश्रीमानिहलोकेषुजायतइतिरजतदानं॥ अथाश्वदानंस्कान्दे॥ अश्वंयस्तुप्रयच्छेद्धैहेमचित्रंसुलक्षणं। सतेनकर्मणादेविगांधर्वंलोकमश्नुते॥ भारते। सर्वोपकरणोपेतंयुवानंदोषवर्जितं॥ योश्वंददातिविप्रायस्वर्गलोकेमहीयते॥ तथा॥ यावंतिरोमाणिहयेभवंतिहिनरेश्वर॥ तावतोवाजिदालोकान्प्राप्नुवंतीहपुष्कलान्॥ कालिकापुराणे॥ अश्वंवायदिवायुग्यंशोभनेचाथपादुके॥ ददातियःप्रधानेवैब्राह्मणेभ्यःसुसंयतः॥ तस्यदिव्यानियानानिरथाध्वजपताकिनः॥ दुष्टःपंथानचैवेहभविष्यतिकदाचन॥ अत्रदिव्ययानस्यदुष्टपथविरहसंपत्तियथाक्रमंप्रत्येकंफलंज्ञेयं॥ कौर्मे॥ अश्वंनमूल्यमथवाकनीयोमध्यमोत्तमं॥ द

श्वाहित्तानुसारेणतारागणपरिच्छदं॥शफैःपंचपलैरौप्यैःसुवर्णालंकृ
तंकमात्॥सदक्षिणंसवस्त्रंचब्राह्मणायाग्निहोत्रिणे॥तारागणस्ता
रानुकार्यलंकारः॥दानमंत्रः।उच्चैःश्रवास्त्वमश्वानांराज्ञांविजयका
रकः।सूर्यवाहनमस्तुभ्यमतःशांतिंप्रयच्छमे॥अथश्वेताश्वदानं॥
गारुडे॥अश्वमेधमखंयस्तुकलौकर्त्तुमनीश्वरः॥अश्वदानंतुतेनेह
कर्त्तव्यंविधिपूर्वकं॥विधिंतस्यप्रवक्ष्यामिब्रह्मणानिर्मितंपुरा॥श्वेत
मश्वंशुभंतातहेमपर्याणभूषितं।रूप्यैस्तुकटकैःशुभ्रैःकरिदंतोपः
शोभितं॥वज्रनेत्रंखुरैस्ताम्रैःक्षौमपुच्छंसुवाससं॥शुभ्रेणपटकेनै
वसंवृतंस्वाग्रधान्वितं॥धान्यरत्नोपरिस्थंतुवद्धकक्षंसुपट्टकं।ए
वंसुतेजसंचाश्वंब्राह्मणायनिवेदयेत्॥मन्वादियुगाद्ययनविषुवोप
रागादिषुदानं॥अथपूजामंत्रः॥मार्त्तंडायसुवेगायकाश्यपायत्रिमूर्त्त
ये॥जगद्ध्यायसूर्यायत्रिवेदायनमोस्तुते॥एवंसमुच्चरेन्मंत्रंकर्णेद
द्यात्तिलोदकं।दानवाक्यं ॐअद्येत्यादिअमुकगोत्रायामुकशर्मणे
ब्राह्मणायममश्वंसुवर्णतिलकालंकारयुक्तललाटंग्रैवेयकसुपर्या
णान्वितंरौप्यकटककरत्नोपशोभितंवज्रनेत्रंताम्रखुरंक्षौमपुच्छंसु
वाससंशुभ्रपटकसंवृतंस्वाग्रधान्वितंधान्यरत्नोपरिस्थितंबद्धकक्षं
सुपट्टंगंधपुष्पाद्यर्चितंसकलब्रह्महत्यादिपापनाशकामस्तुभ्यम
हंसंप्रददेनममेतिस्वावधिकत्रिंशत्पूर्वत्रिंशत्परावरपितृनुद्धरणका
मइतिवासूर्यलोकव्रजनकामइतिवायथाकाममूह्यं॥महार्णवेस
मुत्पन्नउच्चैःश्रवसपुत्रक॥मयात्वंविप्रमुख्यायदत्तोहयसुखीभव
॥इमंविप्रनमस्तुभ्यमश्वंतेप्रतिपादितं।प्रतिगृह्णीष्वविप्रेंद्रमयाद
त्तंतुशोभनमितिदानमंत्रमुच्चार्यकर्णेसमर्पणंकृत्वाविप्रहस्तेजलं
क्षिपेत्।ततःसुवर्णदक्षिणांदद्यात्॥पश्चादश्वपुरोगच्छेत्सदानोस
प्तसप्तिं॥भास्करंमनसिध्यात्वाआलोक्यस्वगृहंव्रजेत्।श्वेतमश्वं
तुयोदद्यात्फलंदशगुणंभवेत्।वडवांचतथादत्वातुल्यमेवफलंल
भेत्॥एवंकृतेनरव्याघ्रसूर्यलोकंव्रजेन्नरः॥इतिश्वेताश्वदानं।वैशा
ख्यांपौर्णमास्यांवातिलान्क्षौद्रेणसंयुतान्।यःप्रयच्छेद्द्विजाग्रेभ्यः
सर्वपापैःप्रमुच्यते।ज्येष्ठेमासितिलान्दत्वापौर्णमास्यांविशेषतः।अश्व

मेधस्ययज्ञस्यफलंप्राप्नोतिमानवः॥माघेमासितिलान्यस्तुब्राह्मणे·
भ्यःप्रयच्छति॥सर्वसत्वसमाकीर्णंनरकंनसपश्यति।वसिष्ठः॥नि
त्यदातातिलानांयोनरःस्वर्गेमहीयते॥महाभारते।ददन्नोऽनुब्दृत
श्चैवहरतःप्रतिगृह्णतः॥तिलेतिलेतिलेद्रोणःसौवर्णानांयुधिष्ठिर
।तथा।सर्वेषामेवदानानांतिलदानंपरंस्मृतं॥सर्वपापहरंनित्यंपवि
त्रंस्वर्ग्यमेवच॥विष्णुधर्मोत्तरे॥तिलागावोहिरण्यंचअन्नंकन्यावसुं
धरा॥दत्तान्येतानिविधिवत्तारयंतिमहाभयात्॥तथा॥तिलोद्वर्तीति
लस्नायीतिलहोमीतिलोदकी॥तिलदाताचभोक्ताचषट्तिलाःपाप
नाशनाः॥असकृत्षट्तिलीभूत्वासर्वपापविवर्जितः॥त्रिंशद्वर्षसह
स्राणिस्वर्गलोकेमहीयते॥कौर्मे।कृष्णाजिनेतिलान्कृत्वासुवर्णंमधुस
र्पिषी।द्रोणैकंवाससाच्छन्नंत्रिधातद्वत्सदक्षिणं॥आहिताग्नौद्विजेद
त्वासर्वंतरतिदुष्कृतं॥त्रिधेतिहीनमध्यमोत्तमभेदतः।द्रोणैकंद्रोण
द्वयंद्रोणत्रितयंचेतितद्वत्सदक्षिणंक्रमादेकद्वित्रिसुवर्णसहितं।अत्रे
त्थंदानवाक्यं॥अद्येत्यादिअमुकसगोत्रायब्राह्मणायएवंकृष्णाजिनस्थं
सुवर्णमधुसर्पिर्युतंवस्त्रच्छन्नंतिलद्रोणंसर्वपापक्षयकामस्तुभ्यमहंसंप्र
ददेनमम॥कृतैतत्तिलदानप्रतिष्ठासिद्ध्यर्थंइदंसुवर्णंदक्षिणांतुभ्यम
हंसंप्रददेनमम॥इतितिलदानं॥यमः॥तिलपात्रंतुयोदद्यात्कृत्स्नमर्द्धंवा
प्यपर्वणि॥सदक्षिणंसत्वभावाद्वह्निंकृत्वाजनार्दनं॥नाशयेत्रिविधंपा
पंधर्मस्यवचनंयथा॥स्कांदेत्वमायांदत्तंतत्पितृतारकमित्युक्तं।ब्राह्मे
॥ताम्रपात्रंतिलैःपूर्णंप्रस्थमात्रंद्विजायतु॥सहिरण्यंचयोदद्याच्छ्र
द्धावित्तानुसारतः॥सर्वपापविशुद्धात्मालभेतपरमांगतिं॥दानवाक्यं
तु॥अद्येत्यादिइदंताम्रपात्रंतिलपूर्णंससुवर्णमशेषपापक्षयकाम
स्तुभ्यमहंसंप्रददेनमम॥सुवर्णंदक्षिणांचदद्यात्॥अथमहातिल
पात्रं॥ताम्रपात्रेतिलान्कृत्वापलषोडशकल्पितं।सहिरण्यंस्वशक्त्या
वाविप्रायप्रतिपादयेत्॥नाशयेत्रिविधंपापंवाङ्मनःकायसंभवं॥कौ
र्मे॥तिलपूर्णंताम्रपात्रंसहिरण्यंद्विजातये॥प्रातर्दत्वातुविधिवद्दुःस्वप्नं
विनिहंतिसः।तिलपात्रंत्रिधाप्रोक्तंकनिष्ठोत्तममध्यमं॥ताम्रपात्रेदश
पलंजघन्यंपरिकीर्तितं।द्विगुणंमध्यमंप्रोक्तंत्रिगुणंचोत्तमंस्मृतम्॥

स्वर्णमेकंजघन्येतुद्विगुणंमध्यमेक्षिपेत्॥ त्रिगुणंचोत्तमंतद्वत्सुवर्णं
परिकीर्तितं॥ सुवर्णंदक्षिणांकृत्वैयदिशक्तिर्नविद्यते॥ महासरस्तथा
वापींकूपंकर्तुंचदीर्घिकां॥ एवंकृतेमातृऋणान्मुक्तोभवतिमानवः॥ स
दक्षिणंकांस्यपात्रंअथदत्वाप्रमुच्यते॥ शुद्धकांस्यस्यपात्रस्यप्र
माणंपंचविंशतिः॥ पलानामत्रनिर्दिष्टंतिलानांप्रस्थसप्तकं॥ सुव
र्णमाषांश्चतुरःपात्रोपरिविधारयेत्॥ वस्त्रेणवेष्टयेत्पात्रंप्रधानेन
सुभक्तितः॥ स्नानंकृत्वानिम्नगादौपितॄन्देवांश्चतर्पयेत्॥ ततोभि
पूजयेच्छंभुंशंकरंहरिमेववा॥ गोमयेनाथसंलिप्यगृहमध्यंचस
वैनः॥ लिखेत्पद्मंद्वादशारंकुंकुमेनाथचंदनैः॥ ततोवन्हिंस्थापयि
त्वाहोमंकुर्याद्वैस्तिलैः॥ तत्रपात्रंप्रतिष्ठाप्यपूजयेद्भक्तिभावतः॥
ततोब्राह्मणमाहूयबहुभृत्यंससंयतं॥ पादौप्रक्षाल्यविधिवन्मा
तृश्राद्धंसमाचरेत्॥ अलंकृत्ययथाशक्त्यामाघ्यांवामृतवासरे
ग्रहणेरविसोमाभ्यांसंक्रांतिषुयुगादिषु॥ तथान्यदपियद्दत्तंमा
घ्यामुद्दिश्यमातरं॥ तदक्षयफलंसर्वंपुराप्राहमहेश्वरः॥ जीवं
तींभूषयेद्वस्त्रैर्माल्यैरपिविभूषणैः॥ दत्वाविप्रस्यपात्रंतुहोमंकु
र्यात्प्रयत्नतः॥ सोपस्करंसतांबूलंसमाप्यविप्रंविसर्जयेत्॥ अन्ये
षामपिविप्राणांभोजनानिप्रदापयेदित्यादि॥ अथास्यप्रयोगः॥ मा
तृमृतवासरेसमाप्यविप्रंविसर्जयेत्॥ माघ्यादौवायजमानोनद्या
दौकृतस्नानोगृहमध्येउपलिप्तदेशेकुंकुमचंदनाभ्यांद्वादशदलप
द्मंविरचय्यतत्रपंचविंशतिपलमितंकांस्यपात्रंतिलप्रस्थसप्तकपूरि
तंउपस्थापितस्वर्णमाषचतुष्टयंचवरवस्त्रवेष्टितंस्थापयित्वा तत्स
मीपेहरिंशंकरंवावाहनाद्युपचारैरभ्यर्च्यपुरतोग्निंस्थापयित्वास्व
सूत्रविधिनाघृताक्तैस्तिलैर्यवैश्चविष्णुमंत्रेणशिवमंत्रेणवाष्टोत्त
रशताहुतीर्हुत्वामातृक्षयाहश्चेन्मातृश्राद्धंकृत्वाजीवंत्यांमातरि
तांवस्त्रादिभिःसत्कृत्यदानपात्रंतथैवाभ्यर्च्योदङ्मुखमुपवेश्याद्य
त्यादिउक्त्वामुकगोत्रायब्राह्मणायेदंपलपंचविंशतिमितंकांस्यपा
त्रंप्रस्थसप्तकमिततिलपूरितंसुवर्णवरवस्त्रवेष्टितंसमंतात्स्थापित
सप्तधान्यफलादिसहितंमातुरानृण्यकामस्तुभ्यमहंसंप्रददेनममेति

दद्यात्।मंत्रास्तु।कांस्यपात्रंमयादत्तंमातुरानृण्यकांक्षया।भगवन्
वचनात्तुभ्यंयथाशक्तिस्तथावद।दशमासांश्चउदरेजनन्यासंस्थित
स्यमे।।कुक्षिणाबालभावेनस्तनपानाद्द्विजोत्तम।पूयमूत्रादिमध्येपलि
प्तायाचकृतामया।भवतोवचनादद्यममसुक्तिर्भवेदृणात्।कांस्यपा
त्रंसुवर्णंचतिलान्वस्त्रादिदक्षिणां।सप्तधान्यंमयादत्तमृणान्मुक्ति
र्भवेन्मम।।कांस्यपात्रप्रदानेनतत्त्वज्ञानंशरीरकं।तथाहेमप्रदानेन
परमात्मानमव्ययं।।आच्छादनंतुब्रह्मांडगुह्यमेतत्सदक्षिणं।।विप्रा
च्छादनदानेनपरमात्मासुपूजितः।तिलसंख्याकृतंदुःखंजनन्याम
मसेवितं।।तिलपात्रप्रदानेनकृतमुक्तोभवाम्यहमिति।।ततःश्रद्धा
हिरण्यंदक्षिणांदद्यात्।।पात्रदानेनजननीसंभवादृणात्त्वंमुक्तइतिवि
प्रोब्रूयात्।।पुनर्व्याहृतिभिर्होमंकृत्वाविप्रंविसृज्ययथाशक्तिब्राह्म
णान्भोजयेत्।।इतिकांस्यपात्रप्रयोगः।।अथतिलकुंभदानं।।वायवी
ये।तिलकुंभमथोवस्त्रेकुंभेपूर्ववदास्थिते।वारुणेमंडलेदेवंवरुणा
कारमर्चयेत्।।श्वेतैःपुष्पैःफलैर्गंधैःकर्पूरेणतुपूजयेत्।।वरुण----
रूपंब्रह्मांडदाने।।वारुणंमंडलंस्थाप्यंतच्चार्धचंद्राकारंकार्यं।।
षट्सान्परितोन्यस्यततोमंत्रमिमंजपेत्।।नमोवरुणरूपायरसांबु
पतयेनमः।।रसवारिनिमित्तानियांतुनाशमघानिमे।।तिलकुंभप्र
दानेनप्रसीदपरमेश्वर।इतिदत्तेविनश्यंति पापानिजलचारिणां।।
हिंसोद्भवानिस्नानेषुपानकेवावगाहने।।रसोपदानभक्ष्याणामपेया
नांचवांछया।औषधंवापिदेवेशसर्वंमेध्यंभविष्यति।।शिवलोकेव
सेत्कल्पानशतपंचदशावरान्।इतितिलकुंभदानं।।अथतिलकर
कदानं।।वायवीये।करकंतिलसंपूर्णंमंडलेवन्हिदैवते।शिवंवन्हिव
दाराध्यपूजयेत्करवीरकैः।रक्तचंदनगंधेननिर्यासेनचधूपयेत्।व
न्हिदैवतंत्रिकोणंमंडलमित्यर्थः।शिवंवन्हिवदिति वन्हिस्वरूपंशि
वमित्यर्थः।तच्चोक्तंब्रह्मांडदाने।निर्यासःसर्जरसः।आदर्शंचततोद
द्याद्दीपानांचचतुष्टयं।वन्हिरूपपतिःशंभुर्वन्हिरूपीतिलाश्रयः।तेजो
रूपकृतंपापंचाक्षुषं चव्यपोहतु।इतिदत्तेप्रणश्यंतिपापान्यग्निकृता
निच।।पाकहोमेषुकार्येषुहिंस्यंतेप्राणिनोवन्हिना।।अगारवनदाहादिसं

भवानिचयानिवै॥विरुद्धकरणोत्थानिरूपयोगोद्भवानिच॥परदारपरद्र
व्यपुत्रदर्शनजानिच॥श्वादिदर्शनोत्थानिनेत्रदोषकृतानिच॥यए
वंकुरुतेदानंशिवभक्त्यायतव्रतः।शिवलोकेवसेद्भूयःकल्पत्रयमशं
कितः॥इतितिलकरकदानं॥ ॥अथगजदानं॥कौर्मे।दद्याद्गजंपुराणो
क्तंमूल्यंपंचशतानिच॥वित्तानुसारातत्रापिकनिष्ठोत्तममध्यमः।स्व
रूपतोगजदानमुत्तमःपक्षःतन्मूल्यंहेममाषशतपंचकंमध्यमः।शत
द्वयमधमइतिकेचित्॥पंचशतमाषास्तदर्द्धंतदर्द्धमित्यन्ये।तादृशाःसु
वर्णाइत्यपरे॥रूप्यस्थूणालंकरणंस्वर्णताराविभूषणं॥सदक्षिणंवि
त्तशक्त्यादत्वाशिवपुरंव्रजेत्॥स्थूणारज्जुः॥तारागणोमौक्तिकजालात्म
कोगजालंकारविशेषः॥तथा॥यथालाभोपपन्नंवायःप्रयच्छतिदंतिनं
॥ब्राह्मणायदरिद्रायसस्वर्गलोकेमहीयते॥कर्मक्षयादिहागत्यमहारा
जोगजाधिपः।सर्वपापविनिर्मुक्तोजायतेनात्रसंशयः।हस्त्यश्वशकटा
दिदानफलंभारते।षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच।भोगान्भुक्त्वा
ऽमरपुरेराजाकालक्षयादिहेति।अत्रदानवाक्यं।अद्येत्याद्युक्त्वाषष्
टिवर्षसहस्रावधिकामरपुरभोगोत्तरमहाराजत्वकामोहममुकगो
त्रायब्राह्मणायेमंहस्तिनंकक्षारज्जुस्थिरासनसहितंकांचनमालादि
कीर्णंचामरगंधपुष्पालंकृतंप्रजापतिदैवतंतुभ्यमहंसंप्रददेनममेतिक
रंधृत्वादद्यात्।सुवर्णंदक्षिणांतुभ्यमहंसंप्रददेनममेति॥इतिहस्तिदा
नं॥निवेदयतिमातंगंभक्त्यास्वर्णाद्यलंकृतं।शिवायपर्वदिवसेतस्यपु
ण्यफलंशृणुइत्यादिनाशिवधर्मादौ॥शिवायगजदानमुक्तम्॥अ
थदासीदानं॥वन्हिपुराणे।स्थिरनक्षत्रसंयुक्तेसौम्येसौम्यग्रहान्विते
॥दानकालंप्रशंसंतिसंतःपर्वणिवापुनः।अलंकृत्ययथाशक्त्यावासो
भिर्भूषणैस्तथा॥ब्राह्मणायप्रदातव्यामंत्रेणानेनशंकितः।इयंदासी
मयातुभ्यंश्रीवत्सप्रतिपादिता।सर्वकामकरीभोग्यायथेष्टंभद्रम
स्तुते॥पंचवर्षाधिकासातुचत्वारिंशत्समावधि॥दासीद्विजायदात
व्यादाससदानेप्ययंविधिरित्यादि।अत्रदानवाक्यं।अमुकसगोत्राये
मांदासींसुवर्णालंकारवतींपुष्पाद्यर्चितांनामस्यसुखप्राप्तिकामस्तु
भ्यमहंसंप्रददेनममेतिशिरसिधृत्वादद्यात्सुवर्णदक्षिणांचदत्वाक्ष
मापयेत्सश्वाब्राह्मणंवस्त्रकांचनैः।अनुगत्वासीमांतंद्विजंविसर्जये

त्तनइत्यादि॥अश्वमेधफलशतगुणफलकामःशिवायदासींविनि
वेदयेदितिशिवायदासीदानमप्युक्तं॥इतिदासीदानं।अथरथदानं।
कौर्मे॥रथंचतु र्बलीवर्दरूढंधान्यावृतंतथा।वित्तानुसारात्सौवर्णर्
थोपकरणैर्युतं।सदक्षिणंचविप्रायदत्वाशिवपुरंव्रजेत्।धान्यावृत
मष्टादशधान्यावृतं।रथोपकरणानियुगयोक्त्रतोत्रवरत्रादीनि।धान्या
वृतंत्रिधेतिवापाठः।त्रिद्व्येकसुवर्णदक्षिणाचशक्त्याउत्तममध्यमकनि
ष्ठभेदतस्त्रैविध्यमितिहेमाद्रिः॥दानवाक्यं।अमुकसगोत्रायब्रा
ह्मणायचतुर्बलीवर्दयुक्तमष्टादशधान्यपरिष्कृतंसर्वोपकरणयुत
मेतंरथंविश्वकर्मदेवतंअक्षय्यस्वर्गादिसुखकामस्तुभ्यमहंसंप्रद
देनममेति।मंत्रस्तु।रथायरथनाथायनमस्तेविश्वकर्मणे॥विश्वरूपा
यनाथायअरुणायनमोनमइतिसुवर्णदक्षिणांचदद्यात्॥गारुडे।
गंत्रींतुरंगसंयुक्तांयोददातिद्विजातये॥सर्वकामसमृद्धात्मासराजा
जायतेभुवीति॥गंत्रीरथविशेषः॥साचचतुर्भिरश्वैर्वृषैर्गजैर्वोपेता
ह्यभ्यांवोपेता॥गंत्रीमिमांप्रयच्छामिविश्वकर्माधिदेवतां॥दानेनानेन
भगवान्प्रीयतांमेपरःपुमानितिगंत्रीदानेमंत्रः॥इतिरथदानं॥मार्ग
शुक्लैकादश्यांमाघफाल्गुनयोर्वावैशाखेवाहिरण्मयंहरिमभ्यर्च्य
जागरंचकृत्वाप्रातःशिबिकांब्राह्मणायदत्वातस्यवर्षाशनंशिबिका
वाहकानांचवर्षाहैमन्नंकल्पयित्वातिविपुलभोगानंतरंविष्णुसायु
ज्यभाग्भवति।एतन्मूलंहेमाद्रौवह्निपुराणे॥अथमहीदानं।कौर्मे॥
गोचर्ममात्रंभूखंडंअधिकंवास्वशक्तितः।त्रिधासदक्षिणांकृत्वाद
त्वाशिवपुरंव्रजेत्॥त्रिद्व्येकसुवर्णरूपादक्षिणात्रिधेत्यर्थः।बृहस्पतिः
।अपिगोचर्ममात्रेणसम्यग्दत्तेनमानवः॥धौतपापोविशुद्धात्मास्व
र्गलोकेमहीयते॥दशहस्तेनदंडेनत्रिंशद्दंडानिवर्त्तनं॥त्रिभागहीनं
गोचर्ममानमाहप्रजापतिः।मानेनानेनयोदद्यान्निवर्त्तनशतंबुधइ
ति।तथा।गवांशतंवृषश्चैकोयत्रतिष्ठत्ययंत्रितः॥तद्धिगोचर्ममात्रं
तुप्राहुर्वेदविदोजनाः॥अत्रनानागोचर्मप्रकारेषुउत्तममध्यमा
धमभावेनव्यवस्थाज्ञेया।तथा।षष्टिवर्षसहस्राणिस्वर्गेवसतिभू
मिदः॥अच्छेत्ताचानुमंताचतान्येवनरकंवसेत्।तत्रपुराणभेदान्ना

नाफलश्रवणेपिस्वकामितमेवफलमुल्लेखं॥ मंत्रोपि। यथाभूमिप्रदानस्यफलंनार्हंतिषोडशीं॥ दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विह॥ अमुकब्राह्मणायामुककामःषट्षष्ठिसहस्रवर्षमितस्वर्गवासकामः शिवपुरप्राप्तिकामोवासर्वपापक्षयकामोवा भूमिंतुभ्यमहंसंप्रददेन ममेतिसपुष्पंकुशतिलोदकंब्राह्मणहस्तेनिक्षिपेत्॥ ब्राह्मणःसमीपस्थांभूमिंप्रदक्षिणीकृत्यप्रतिगृह्णीयात्। विप्रकृष्टांतुमनसाप्रदक्षिणीकृत्य। नहिभूमेःपरंवस्तुगोःसुवर्णाच्चकिंचन॥ अतोभूमिगविप्राद्येःसुवर्णंदक्षिणामतेतिमांडव्यवचनादत्रसुवर्णमेवदक्षिणा। विश्वामित्रः॥ ग्रामंवानगरंवापिविप्रेभ्योयःप्रयच्छति॥ क्षेत्रंवासस्यसंपन्नंसर्वपापैःप्रमुच्यते॥ स्वदत्तांपरदत्तांवायोहरेच्चवसुंधरां॥ सविष्ठायांकृमिर्भूत्वा पितृभिःसहमज्जति॥ तथा। अपिपापकृतांराज्ञांप्रतिगृण्हंतिसाधवः। पृथिवींनान्यदिच्छंतिपावनंह्येतदुत्तमं। येपिसंकीर्णकर्माणोराजानोरौद्रकर्मिणः। तेभ्यःपवित्रमाख्येयंभूमिदानमनुत्तमं। किमत्रचित्रंदातारंयत्समुद्धरतेधरा॥ प्रतिग्रहगृहीतारमपितारयतेद्विजमित्यपिहेमाद्रौ। शिवधर्मेशिवायभूमिदानमुक्तं॥ इतिमहीदानविधिः॥ अथगृहदानं॥ कौर्मे॥ शक्तितःसर्ववित्तेनपूर्णंगृहमपित्रिधासदक्षिणंद्विजंदत्वाब्रह्मलोकंव्रजेन्नरः॥ सर्ववित्तेनदासीदासगोबलीवर्दकांस्यताम्रपात्रादिसोपस्करशय्यासर्वधान्यघृतगुडशर्करादिरूपेण॥ गारुडे॥ ऐष्टकंदारवंवापिमृन्मयंवास्वशक्तितः। सर्वोपकरणैर्युक्तंयोदद्याद्विपुलंगृहं॥ ब्राह्मणायदरिद्रायविदुषेचकुटुंबिने॥ क्रीडित्वासुचिरंकालंमानुष्यंलोकमागतः। भवत्यप्रहतैश्वर्यैःसर्वकामसमन्वितः॥ ब्रह्मवैवर्ते। नगार्हस्थ्यात्परोधर्मोनैवदानंगृहात्परं॥ नानृतादधिकंपापंनपूज्योब्राह्मणात्परः॥ तथा। कारयित्वागृहान्रम्यानृतुवत्स्वर्गसंख्यया॥ भुवनाष्टादशतथातत्वनक्षत्रसंख्यया॥ शक्त्यातद्द्विगुणाश्चैवशतंवाथसहस्रकं॥ कुड्यस्तंभगवाक्षाद्यैर्विचित्रबहुभूमिकानितिमात्स्ये॥ देवतापंचकंतत्रचत्वारिंशत्समावृतं। पूजयित्वायथान्यायंततोदद्याद्गृहंगृही॥ एकाशीतिपदंकृत्वारेणुभिःकनकेनवा। पश्चात्पिंडेनानुलिंपेत्सूत्रेणवेष्टयेत्तुसर्वतः। दशपूर्वापरारेखादशचै

वोत्तरायताः॥ सर्ववास्तुविभागेनविज्ञेयानवकोनव॥ एकाशीतिपदं
कृत्वावास्तुवित्सर्ववास्तुषु॥ पदस्थान्पूजयेद्देवान्त्रिंशत्पंचदशैव
तु। द्वात्रिंशद्बाह्यतःपूज्याःपूज्याश्चांतस्त्रयोदश।मध्येनवपदस्त्वेक
श्चत्वारस्त्रिपदाःस्मृताः।विंशतिस्त्वेकपदिकास्तावंतोद्विपदाःस्मृ
ताः॥ एवंप्रतिष्ठितादेवाश्चत्वारिंशच्चपंचच॥ नामतस्तान्प्रवक्ष्यामि
स्थानानिचनिबोधत॥ ईशकोणादिषुसुरान्पूजयेत्क्रमशोनव॥
ईशानादोशिखीचैवतुपर्जन्योजयंतःकुलिशायुधः। सूर्यःसत्योभृ
शश्चैवआकाशोवायुरेवच॥ पूषाचवितथश्चैवगृहक्षतयमावुभौ॥
गंधर्वोभृंगराजश्चमृगःपितृगणास्तथा॥ दौवारिकोथसुग्रीवःपुष्पदं
तोजलाधिपः॥ असुरःशोकपापौचरोगोहिर्मुख्यएवच। भल्लाटःसो
मसर्पौच अदितिश्चदितिश्चवै॥ बहिर्द्वात्रिंशदेतेतुतदंतश्चतुरःशृ
णु॥ आपश्चैवाथसावित्रोजयोरुद्रस्तथैवच। अर्यमासविताचैवविव
स्वान्विबुधाधिपः॥ मित्रोथराजयक्ष्माचतथापृथ्वीधरःक्रमात्। अ
ष्टमस्त्वापवत्सस्तुपरितोब्रह्मणःस्मृताः॥ आपश्चैवापवत्सश्चपर्ज
न्योग्निर्दितिस्तथा।पदिकानांतुवर्गोयमेवंकोणेष्वशेषतः॥ तन्मध्ये
तु बहिर्विंशद्विपदास्तेतुसर्वतः। एतत्पूर्वंगृहारंभंकुर्याद्वास्तुविचक्षणः
। वास्तोःपरीक्षितेतस्मिन्वास्तुदेहेविचक्षणः। वास्तूपशमनंकुर्यात्समि
द्भिर्बलिकर्मच॥ जीर्णोद्धारेतथोद्याने तथाचनववेश्मनि। नवप्रासादभ
वनेप्रासादपरिवर्तने। द्वाराभिवर्तनेनद्व्यासादेषुगृहेषुच। वास्तूप
शमनंकुर्यात्पूर्वमेवविचक्षणः। एकाशीतिपदंलिख्यवास्तुमध्येतुपि
ष्टकैः। होमस्त्रिमेखलेकार्यःकुंडेहस्तप्रमाणके॥ यवैःकृष्णतिलैश्चैव
समिद्भिःक्षीरवृक्षजैः। पालाशैःखादिरैश्चापामार्गोदुंबरसंभवैः। कु
शदूर्वादलैर्वापिमधुसर्पिःसमन्वितैः॥ कार्यस्तुपंचभिर्बिल्वैर्बिल्वबी
जैस्तथापिच॥ होमांतेभक्ष्यभोज्यैश्चवास्तुदेहेबलिंहरेत्॥ तद्वद्विशेष
नैवेद्यमिदंदद्यात्क्रमेणतु। एवंसंपूजितादेवाःशांतिंकुर्वंतितेसदा। स
वैषांकांचनंदद्याद्ब्राह्मणेगांपयस्विनीमिति॥ अथगृहवास्तुशांतिप्र
योगः॥ यजमानोमासपक्षाद्युल्लिख्य ममवास्तोःशुभतासिध्यर्थंवास्तु
शांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृपूजाभ्युद-

यिकश्चाद्वाचार्यब्रह्मर्त्विग्वरणानिकुर्यात्॥ततआचार्योयदत्रसंस्थि-
तं।अपक्रामंत्विसेताभ्योभूतप्रेतपिशाचाद्याअपक्रामंतुराक्षसाः॥
स्थानादस्मान्व्रजंत्वन्यत्स्वीकरोमिभुवंत्विमामित्यनेनचसर्षपान्वि-
कीर्यपंचगव्येनशुचीवोहव्याइतितृचेनएतोन्विंद्रमितिचतृचेनगृहं
संप्रोक्ष्यगृहेप्राच्यामीशान्यांवाचतुरस्रंसोच्चंहस्तमितंस्थंडिलंकृत्वा
तस्येशानादिकोणचतुष्टयेचतुरोलोहकीलान्॥विशंतुभूतलेनागा
लोकपालाश्चसर्वशः।अस्मिन्गृहेचतिष्ठंतुआयुर्बलकराःसदेतिमंत्रे
णनिखनेत्।प्रतिकीलंमंत्रावृत्तिः॥ततईशानादिक्रमेणैवचतुर्षुको
णेषुअग्निभ्योप्यथसर्पेभ्योयेचान्येतत्समाश्रिताः॥तेभ्योबलिंप्रयच्छा
मिपुण्यमोदनमुत्तममितिमंत्रेणमाषभक्तादिबलीन्दद्यात्स्थंडिलो
परि॥ॐशांतायैनमः।यशोवत्यै·कांतायै·विशालायै·प्राणवाहिन्यै·
सत्यै·सुमत्यै·नंदायै·सुभद्रायै·सुरथायैइतिप्रणवाद्यैर्नमोंतैर्दशभि
र्मंत्रैः·कुंकुमादिनाहेमरूप्यादिशलाकयाप्राक्पश्चादायताःप्रागंताउ
दक्संस्थादशरेखाःकृत्वा·हिरण्यायै·सुव्रतायै·लक्ष्म्यै·वि
भूत्यै·विमलायै·प्रियायै·विजयायै।वालायै·विशोकायै·इडायैइति
दक्षिणोत्तरायताउदक्संस्थादशरेखाःकुर्यात्॥एवमेकाशीतिपदंमं
डलंसंपद्यते।तत्रमध्यस्थनवकोष्ठरेखामार्जनेनैकीकुर्यात्॥एतन्न
वपदंब्रह्मस्थानंतस्यचतुर्दिक्षुचत्वारित्रिपदानि।विदिक्षुशृंखला-
काराणिद्वादशकोणवाद्यैश्चतुर्थ्यंतैर्नमोंतैर्वक्ष्यमाणनामभिर्देवता
आवाह्यस्थापयेत्॥तत्रेशानकोणपदेवास्तोःशिरसिशिखिनेनमइति
शिखिनं।तद्दक्षिणैकपदेदक्षिणनेत्रेपर्जन्यंतद्दक्षिणेततोपिपश्चि
मइतिद्विपदेदक्षिणश्रोत्रेजयंतं।तद्दक्षिणद्विपदेतद्दक्षिणांशेकुलि
शायुधाय।तद्दक्षिणद्विपदेदक्षिणबाहौसूर्याय।तद्दक्षिणद्विपदेद
क्षिणबाहावेवसत्याय।तद्दक्षिणद्विपदेदक्षिणकूर्परेभृशाय।तद्दक्षि
णेत्यपंक्तिगतैकपदेदक्षिणबाहौआकाशाय।आग्नेयकोणपदेदक्षिण
प्रबाहावेववायवे।तत्पश्चिमैकपदेदक्षिणमणिबंधेपूष्णे।तत्पश्चि
मेततोप्युत्तरइतिद्विपदेदक्षिणपार्श्वेवितथाय।तत्पश्चिमद्विपदेदक्षि
णपार्श्वएवगृहक्षताय।तत्पश्चिमेद्विपदेदक्षिणोरौयमाय।तत्पश्चिमे

ह्रूपदेदक्षिणजानौगंधर्वाय॥तत्पश्चिमेद्विपदेदक्षिणजानौ भृंगराजा
य।तत्पश्चिमेबाह्येदक्षिणगतैकपदेदक्षिणस्फिचि मृगाय।नैऋत्य
कोणपदेपादयोःपितृभ्यः।तदुत्तरैकपदेवामस्फिचिदौवारिकाय॥
तदुत्तेनतोपिआविवेति द्विपदेवामजंघायांसुग्रीवाय।तदुत्तरेद्विपदे
वामजानौपुष्पदंताय।तदुत्तरेद्विपदेवामोरोजलाधिपाय।तदुत्तरेद्वि
पदेवामपार्श्वेअसुराय।तदुत्तरेद्विपदेवामपार्श्वेएवशोषाय।तदुत्त
रेबाह्यपंक्तिगतैकपदेवाममणिबंधेपापाय॥वायव्यांकोणपदेवामप्र
बाहोरोगाय।तत्प्राच्येकपदेवामपार्श्वेएवअहये।तत्प्राचीनतोदक्षिणे
चेतिद्विपदेवामकूर्परेमुख्याय।तत्प्राचिद्विपदेवामबाहौभल्लाटाय॥त
त्प्राचिद्विपदेवामबाहावेवसोमाय॥तत्प्राचिद्विपदेवामांसेसर्पाय॥त
त्प्राचिद्विपदेवामश्रोत्रेअदितये॥तत्प्राचिबाह्यपंक्तिगतैकपदेवामनेत्रे
दितये॥तद्दक्षिणेईशानकोणपदाधःपदेमुखेआपायनमः।आग्नेयको
णपदाधःकोणपदेदक्षिणहस्तेसावित्राय।नैऋत्यकोणपदाधःकोण
पदेमेढ्रेजयाय।वायव्यकोण पदाधःकोणपदेवामहस्तेरुद्राय।।म
ध्यमप्रागगतेकोष्ठकब्रह्मपदंसंलग्नेप्राग्गतेत्रिपदेदक्षिणस्तनेअर्य
म्णे॥तद्दक्षिणैकपदेदक्षिणहस्तेसवित्रेतत्पश्चिमेब्रह्मपदसंलग्नेवि
पदेजठरदक्षिणभागेविवस्वते॥तत्पश्चिमेकपदेवृषणयोर्विबुधाधि
पाय॥तदुत्तरेब्रह्मपदसंलग्नेत्रिपदेजठरवामभागेमित्राय॥तदुत्तरैक
पदेवामहस्तेराजयक्ष्मणे तत्प्राचित्रिपदेवामस्तनेपृथ्वीधराय।त
त्प्रागेकपदेउरसि आपवत्साय।मध्येनवपदेहन्नाभ्योर्ब्रह्मणेतदुत्त
रेवास्तोष्पते प्रतिजानीहीतिवृषवास्तुंसुवर्णादिप्रतिमायांमंडला
द्वहिरीशानादिकोणेषुचरकींविदारीं२पूतनां३पापराक्षसींपूर्वादि
षुस्कंदं१अर्यमणं२जंभकं३पिलिपिच्छं४प्राच्याष्टदिक्षुइंद्रादीना
वाह्यसर्वान्संपूज्यमंडलादीशान्यांकलशंसंस्थाप्यतत्रवरुणंसं
पूज्यकुंडेस्थंडिलेवाग्निंसंस्थाप्यतदीशान्यांग्रहानावाह्यसंपूज्य
तदीशान्यांग्रहकलशंसंस्थाप्यतत्रवरुणंसंपूज्यान्वाधानेचक्षुषी
आज्येनेत्युक्त्वाग्रहादीनमुकसंख्ययासमिच्चर्वाज्यैः।शिखीपर्जन्य
जयंत·कुलिशायुध·सूर्य·सत्य·भृश·आकाश·वायु·पूष·वितथ·गृहक्षत॥

यम·गंधर्व·भृंगराज·मृग·पितृ·दौवारिक·सुग्रीव·पुष्पदंतजलाधिपा
सुर॥शोष·पाप·रोगाहिमुख्यभल्लाटसोमसर्पादितिदित्यापसावि
त्रजयरुद्रार्यमसवित्रविवस्वद्विबुधाधिपमित्रराजयक्ष्मपृथ्वीध
रापवत्सप्रमाणोयवतिलसमिदाज्यपायसैरमुकसंख्ययावास्तो
ष्पतिमेतैरेवद्रव्यैरमुकसंख्ययापंचविल्वैस्तद्वीजैर्वाचरकीवि
दारीपूतनापापराक्षसीस्कंदार्यमजंभकपिलिपिच्छानिंद्रादींश्चैते
रेवद्रव्यैरमुकसंख्ययाय क्ष्य इत्युक्त्वाःशेषेणेत्यादिआज्यभागांते
ग्रहहोमंकृत्वायवतिलसमिदाज्यपायसैःशिख्यादिदेवताभ्योना
ममंत्रैःप्रत्येकमष्टावष्टाविंशतिमष्टोत्तरशतंवाहुत्वावास्तोष्पत
येएतान्येवद्रव्याणिअष्टोत्तरशतंएतैश्चतुर्भिर्वास्तोष्पतेश्च वास्तू
पानिचपंचविंशतिःपंचवाविल्वफलानितद्वीजानिवाजुहुयुः।।त
त्राचार्यःस्विष्टकृदादिहोमशेषंसमापयेत्।।यजमानस्तुलोकपा
लेभ्योग्रहपीठदेवताभ्यश्चबलिंदत्वापूर्णाहुतिंहुत्वाशिख्यादिपं
चचत्वारिंशद्देवताभ्यःपायसादिनाबलिंदत्वाईशानादिक्रमेणच
रकीविदारीपूतनापा पराक्षसीभ्योलोकपालेभ्यश्चबलिंदत्वाशि
ख्यादिप्रीतयेकांचनंद्विजेभ्यःब्रह्मप्रीतयेधेनुंचदद्यात्।।ततःशां
तिकलशोदकेनऋत्विग्भिरभिषिक्तोयजमानःऋत्विग्भ्योदक्षिणां
दत्वावाय्व्यादिपूर्वकंरक्षोघ्न पावमानमंत्रैर्गृहंसूत्रेणप्रदक्षिणं
वेष्टयित्वासमंतात् जलधारांक्षीरधारांचदत्वामध्यनवपदेसुरू
पांपृथ्वीं ध्यात्वापृथ्व्यैनमइतिसंपूज्यसर्वदेवमयंवास्तुसर्वदे
वमयंपरमितिपठित्वागृहस्याग्ने येआकाशपदेजानुमात्रंगर्तं
खात्वागोमयेनानुलिप्यशुभ्रचंदनपुष्पाक्षतैरलंकृत्यसप्तव्री
जानिदध्योदनंचक्षिप्त्वान वंजलपूर्णकलशंशुक्लकुसुमयुतंगं
धाद्यर्चितमादायजानुभ्यांभुवंगत्वातज्जलंगर्तेक्षिपेत्।ॐन
मोवरुणायेतिमंत्रेणजलेप्र दक्षिणावर्तेपुष्पेचोर्ध्वमुखेशुभं
ततोपक्वमृत्पेटिकायांसप्तबीजंदध्योदनेशैवालफलपुष्पाणिक्षि
प्त्वासत्पूर्यघोषंपूर्वस्थापितांरूपवास्तुप्रतिमामानीयपेटिकायां
संस्थाप्यपेटिकांपिधायपठेत्।पूजितोसियावास्तोहेमाद्येरर्चि

नैःशुभैः॥प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखं॥वास्तुपुरुषनमस्ते
स्तुभूशय्याभिरतप्रभो॥मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदेति त
तोमृत्पेटिकागर्तसंस्थाप्यसशैलसागरांपृथिवींयथावहसिमूर्द्धं
नि॥तथामांवहकल्याणसंपत्संततिभिःसहेतिसंप्रार्थ्य तथैवमृ
दागर्त्तंपूरयेत्॥मृदआधिक्येधिकफलं॥साम्येसमं॥न्यूनत्वेन्यूनं॥ग
र्तोपरिगोमयेनालिप्यगंधपुष्पाक्षतादिक्षिप्त्वाआचार्यब्रह्मर्त्विजःसं
पूज्यतेभ्योदक्षिणांचदत्वाग्रहपीठवास्तुपीठदेवताःसंपूज्य उत्तिष्ठ
ब्रह्मणस्पतेयांतुदेवगणाइतिविसृज्याचार्यायदत्वाब्रह्मादिभ्यउ
द्देशेनविप्रान्संभोज्यभूयसींदक्षिणांदत्वासुहृद्युतोभुंजीत॥इतिगृ
हवास्तुशांतिप्रयोगः॥अथगृहदानप्रयोगः॥गृहमध्येदक्षिणभागे
पद्मंविलिख्यतदुपरिप्रस्थमात्रान्तिलान्तदुपरिशय्यांस्थापयित्वा
शय्योपरिसौवर्णशय्योपरिसौवर्णलक्ष्मीनारायणप्रतिमांसंपूज्यप्र
तिग्रहीतारंसपत्नीकंप्रतिग्रहार्थंकृत्वातंकरेगृहीत्वासमंगलघोषंव
क्ष्यमाणमंत्रैर्गृहंप्रवेशयेत्॥तेचमंत्राः॥एह्येहिनारायणदिव्यरूपस
र्वोमरैर्वंदितपादपद्म॥शुभाशुभानंदशुभामधीशलक्ष्मीयुतस्त्वंच
गृहंगृहाण॥नमःकौस्तुभनाथायहिरण्यकवचायच॥क्षीरोदार्णव
सुप्तायजगद्धात्रेनमोनमः॥नमोहिरण्यगर्भायविश्वगर्भायवैनमः
॥चराचरस्यजगतोगृहभूतायवैनमः॥भूर्लोकप्रमुखालोकास्तव
देहेव्यवस्थिताः॥नंदंतियावत्कल्पांतंतथास्मिन्भवनेगृही॥त्वत्प्र
सादेनदेवेशपुत्रपौत्रैर्युतोगृहे॥पंचयज्ञक्रियायुक्तोवसेदाचंद्रता
रकं॥ततस्तंपूर्वस्थापितशय्यांपर्य्युदङ्मुखमुपवेश्यस्वयमासनेप्रा
ङ्मुखउपविश्यदेशकालकीर्त्तनोत्तरममुकगोत्रायामुकशर्मणे
ब्राह्मणायेदंगृहंपक्वेष्टकामुपवेश्यस्वयमासनेप्रादिरचितंयथो
पपत्तिसंपादितंकांस्यताम्रादिभाजनसर्वधान्यलवणघृतगुडशर्क
रागोवलीवर्द्दासमंचतूलिकावितानादिसर्वोपकरणयुतंसदीपप्र
भोद्योतंसर्वदैवतंगृहसर्वपापक्षयपूर्वककल्पकोटिशता वधि
नारायणसमीपेक्षीरार्णवनिवासकामइति॥मृन्मयगृहेदानएकै
कमन्वंतरावच्छिन्नप्रतिलोकपालपुरनिवासकामइति।यद्वासर्वेष्वि

ष्णुप्रीतिकामः ततः प्रार्थना॥इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं
॥तव विप्र प्रसादेन ममास्त्वतिनवं गृहं॥ गृहं मम विभूत्यर्थं गृहाण त्वं
द्विजोत्तम॥प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दन इति॥ततः प्रति
गृहीता देवस्य त्वेति यजुषा प्रतिगृह्य॥ॐ स्वस्तीत्युक्त्वा कामस्तुतिं
पठेत्॥दक्षिणा तु स्वर्णसहस्रमारभ्यैकस्वर्णपर्यंतशक्त्या देया
॥ततः पादुकोपानहच्छत्रचामरादिकं पुनर्दत्वा संपन्नं वाप्यसंपन्नं
गृहोपस्करभूषणं॥सर्वं संपूर्णमेवास्तु त्वत्प्रसादाद्द्विजोत्तमेति प्रा
र्थयेत्॥एतत्फलमपि मात्स्ये॥यस्त्वेवं सवर्णैः पौत्रायां संपन्नं पक्के
ष्टं विनिवेदयेत्॥कल्पकोटिशतं यावद्ब्रह्मलोके महीयते॥शैलजं
दारुजं वापि यो दद्याद्विधिपूर्वकं॥वसेत्क्षीरार्णवे रम्ये नारायणस
मीपतः॥मृन्मयं चापि यो दद्याद्गृहं चोपस्करान्वितं॥ पुरेषु लोकपाला
नां प्रतिमन्वंतरं वसेदिति॥ एतच्च वास्तुपूजनं॥अनेन विधिना प
स्तु प्रतिसंवत्सरं बुधः॥ गृहे चायतने कुर्यान्न स दुःखमवाप्नुयादि
त्युक्त्वात्प्रतिसंवत्सरं कर्तव्यं॥अत्र वास्तुदेवतानां विशेषनैवेद्या
दीनि। शिखिने घृतान्नं॥पर्जन्याय सोत्पलं घृतोदनं॥जयंताय पीत
ध्वजं पिष्टमयं कूर्चं च। कुलिशायुधाय पंचरत्नानि पैष्टं कुलिशं च॥
सूर्याय वितानकं धूपं सक्तुं च॥सत्याय घृतगोधूमं॥भृशाय मत्स्या
न्॥अंतरिक्षाय शष्कुलीः॥वायवे सक्तून्॥पूष्णे लाजाः॥वितथाय च
णकौदनं॥गृहक्षताय मध्वन्नं॥यमाय पिशितोदनम्॥गंधर्वाय गंधौ
दनं॥भृंगराजाय मेषजिह्विकां॥मृगाय यावकं॥पितृभ्यः कृसरं॥
दौवारिकाय दंतकाष्ठं॥पैष्टं कृष्णां वल्लिं च॥सुग्रीवाय धूपं॥पुष्पदं
ताय पायसं॥वरुणाय कुशस्तंबसहितं पद्मं॥असुराय पैष्टं हिर
ण्मयं सुरां च॥शोषाय घृतौदनं॥पापाय गोधां॥रोगाय घृतलड्डुका
न्॥अहये फलान्वितं पुष्पं॥मुख्याय सर्पिः॥भल्लाटाय गुडौदनं॥सो
माय मधुपायसं॥सर्पेभ्यः शालिपिष्टं॥अदितये पोलिकां॥दितये पू
रिकां॥आपाय क्षीरं॥आपवत्साय दधि॥सावित्राय लड्डुकान्॥सम
रीचं कुशोदकं॥सवित्रे गुडापूपं॥जयाय घृतचंदनं॥विवस्वते रक्तचं
दनं पायसं॥राजयक्ष्मणे आमं पक्वं च मांसं॥रुद्राय हरितालौदनं घृतसं

युतं।गुडोदनंतुमित्रायरुद्रायघृतपायसं॥पृथ्वीधरायमांसानि
कुष्मांडानिच।अर्यम्णेशर्करापायसं।पंचगव्यंयवांश्चैवतिलक्ष
तहविश्वरूपन्।भक्ष्यंभोज्यंचविविधंब्रह्मणेविनिवेदयेदिति।राक्ष
सीनांतु।चरकेमांसोदनंघृतंपद्मकेसरंहविषान्वितं।आग्नेयेवि
दार्यैसरुधिरमांसोदनंहरिद्रौदनंच॥नैर्ऋतेपुतनायैसरुधिरंदभो
दनं मत्स्यखंडैश्चसंयुतं॥पीनरक्तंचबलिंवायव्येपापराक्षस्यै
मत्स्यमांसंसुरासवं॥सर्वत्रपायसंवादद्यात्॥इतिगृहदानप्रयो
गः॥ कृत्वामंचंप्रयत्नेनशयनासनसंयुतं॥पुण्यकालेद्विजेभ्यो
ग्रयतिभ्योवानिवेदयेत्॥सर्वान्कामानवाप्नोतिनिष्कामोमोक्षमा
प्नुयादितिस्कांदोक्तं॥मठदानंकार्यं॥मार्कंडेये॥कुर्यात्सतिश्रयंगृ
हंपथिकानांहितावहं।निजगेहैकदेशंवासाधूनांयोनिवेदयेत्॥
अक्षयंपुण्यमुद्दिष्टंतस्यस्वर्गापवर्गदं॥सर्वकामसमृद्धोसौदेव
वद्दिविमोदते॥भविष्यत्पुराणेपि॥प्रतिश्रयेसुविस्तीर्णेकारितेस
जलेंधने॥दीनानाथजनार्थायवदकिंनकृतंभवेत्॥प्रतिश्रयोधर्म
शाला॥इतिप्रतिश्रयदानं॥अथकन्यादानं॥बृहस्पतिः॥सहस्रमे
वधेनूनांशतंवानडुहांसमं॥दशानडुत्समंयानंदशयानसमोहयः
।दशवाजिसमाकन्याभूमिदानंनतःपरं॥ददंतिसर्वपापेभ्योब्रह्म
लोकंव्रजंतितइति।देवलः॥तिस्रःकन्याप्रयान्यायंपालयित्वानि
वेद्यच।नपितानरकंयातिनारीवास्त्रीप्रसूयिनी।वसिष्ठः॥हाटकसि
तिगौरीणांसप्तजन्मानुगंफलं॥धर्मेणविधिनादातुमसगोत्रोविधु
ज्यते॥स्कांदे॥आत्मीकृत्यसुवर्णेनपरकीयांतुकन्यकां।रूप्यशृंगः
वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं॥नामसंकीर्तयेद्विद्वान्कन्याया
श्चैवमेवहि।तिष्ठेत्पूर्वमुखोदातावरःप्रत्यङ्मुखोभवेत्॥मधुपर्को
न्वितायैतानस्मैदायात्सदक्षिणां॥उदपात्रंततोगृह्यमंत्रेणानेनदा
पयेत्॥गौरींकन्यामिमांविप्रयथाशक्तिविभूषितां॥गोत्रायशर्म
णेतुभ्यंदत्तांविप्रसमाश्रय।भूमिंगावश्चदासीश्चवासांसिचस्व
शक्तितः॥महिष्योवाजिनश्चैवदद्यात्स्वर्णमणीनपि।ततःस्वगृह्य
विधिनाहोमाद्यंकर्मकारयेत्॥यथाचारंविधेयानिमांगल्यानिकुतुकानिच

कन्यादाता प्राङ्मुखो वरः प्रत्यङ्मुखः॥ दातोदङ्मुखो वरः प्रत्यङ्मुख
इति भट्टचरणाः॥ आवरश्च। अत्रायं प्रयोगः। वरं मधुपर्केण संपूज्य मा
सपक्षाद्युक्त्वा मम समस्तपितॄणां निरतिशयसानंदब्रह्मलोकावाप्त्या
दि कन्यादानकल्पोक्तफलावाप्तये ऽनेन वरेणास्यां कन्यायामुत्पत्स्य
मानसंतत्या द्वादशावरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्मन
श्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं क
रिष्य इति संकल्प्य कन्यां कनकसंपन्नां कनकाभरणैर्युतां। दास्या
मि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया इति दद्यात्॥ वरस्तु देवस्य त्वे
ति प्रतिगृह्य स्वस्तीत्युक्त्वा स्वशाखीयां कामस्तुतिं पठेत्॥ एवं नममे
त्यादिना संप्रददे इत्यंतेन वाक्येन त्रिर्दद्यात्॥ कन्यादानप्रतिष्ठार्थं सु
वर्णदक्षिणां भूमिदास्यादिकं यथाशक्ति दद्यात्॥ विश्वंभरः सर्वभू
ताः साक्षिण्यः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि पितॄणां तारणा
य चेति मंत्रं पुनर्नममेत्यादि प्रीतय इत्यंतमुक्त्वामुकप्रवरायामुक
गोत्रायामुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः
पुत्रायामुकशर्मणे वराय श्रीधररूपिणे ऽमुकप्रवरामनुकगोत्रोत्प
न्नाममुकशर्मणः प्रपौत्रीममुकशर्मणः पौत्रीममुकशर्मणः पुत्रीममु
कनाम्नीमिमां कन्यां श्रीरूपिणीं तुभ्यमहं संप्रददे इति वरहस्ते। वि
स्तरस्तु प्रयोगरत्ने भट्टचरणैरुक्तः॥ इति कन्यादानं। स्कांदे॥ वैवाहि
कप्रदानं हि यो ददाति द्वापरे। विमानेनार्कवर्णेन किंकिणीजा
लमालिना॥ महेंद्रभवनं याति सेव्यमानोऽप्सरोगणैरिति। वैवाहि
कं विवाहोपयोगि द्रव्यवस्त्रालंकारादीनि वैवाहिकदानं॥ अथ क
पिलादानं। आदित्यपुराणे॥ सहस्रं यो गवां दद्यात्कपिलां चापि सु
व्रत। सममेव पुरा प्राह ब्रह्मा यत्नविदांवरः। रुक्मशृंगीं रौप्यखुरां स
वस्त्रां कांस्यदोहनां॥ सवत्सां कपिलां दत्वा वंशान्सप्त समुद्धरेत्॥
यावंति चास्या रोमाणि सवत्साया भवंति हि॥ सुरभीलोकमासाद्य रम
ते तावतीः समाः॥ अद्येत्यादि गोसहस्रफलावाप्त्यनंतरं सवत्सकपिला
रोममितवर्षपर्यंतं कामधेनुलोककाम इमां कपिलां सुवर्णशृंगाद्युप
[illegible]तां युताममुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे नम

मेतिदद्यात्॥मंत्रोमात्स्ये।कपिलेसर्वेभूतानांपूजनीयासिरोहिणी
।तीर्थदेवमयीयस्माद्दतःशांतिंप्रयच्छमे॥तत्रैव।वस्त्रंतुत्रिगुणंधे
न्वाद्दक्षिणांचचतुर्गुणां॥एतैरलंकृतांधेनुंघंटाभरणभूषितां।कपि
लांविप्रमुख्यायदत्वामोक्षमवाप्नुयात्॥शुभ्रसुवर्णवस्त्रत्रयोपेतांद
त्वाचतुःसुवर्णान्दक्षिणांदद्यात्॥द्विगुणोपस्करोपेतामहतीक
पिलास्मृता।उपस्कराःसुवर्णशृंगवस्त्रदोहनपात्राद्याःसामान्यगो
दानेवक्ष्यमाणाः॥दत्तासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा॥सप्तज
न्मकृतात्पापान्मुच्यतेदशसंयुतः॥यान्यान्प्रार्थयतेकामान्तां
स्तान्प्राप्नोतिमानवः॥अद्येत्यादिसप्तजन्मकृतपापनाशपूर्वक
स्वर्गकामोमोक्षकामःपुत्रकामःशुभकामईश्वरप्रीतिकामइत्या
द्यथाकामंफलमुल्लिख्यद्विगुणोपस्करयुतांदद्यादिति॥महाक
पिलादानं॥इतिदशमहादानानि॥दशधेनवोमात्स्ये॥यास्तुपाप
विनाशिन्यःकथितादशधेनवः।तासांस्वरूपंवक्ष्यामिनामानिच
नराधिप॥प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा॥तिलधेनुस्तृ
तीयातुचतुर्थीजलसंज्ञिता॥क्षीरधेनुस्तुविख्यातामधुधेनुस्तथा
परा॥सप्तमीशर्कराधेनुःकार्पासस्याष्टमीतथा॥रसधेनुस्तुनवमी
दशमीस्यात्स्वरूपतः।कुंभीघृतादिधेनूनामितरासांतुराशयः।सुवर्ण
धेनुमप्यत्रकेचिदिच्छंतिमानवाः॥नवमीतिलतैलेनतथान्येपिम
हर्षयः॥रसधेनुस्थानेसुवर्णधेनुंतिलतैलधेनुंच॥एतद्विधानमपि
मात्स्यएव॥कृष्णाजिनंचतुर्हस्तंप्राग्ग्रीवंविन्यसेद्भुवि॥गोमयेनोप
लिप्तायांदर्भानास्तीर्यसर्वतः॥लघ्वेणकाजिनंतद्वद्वत्सस्यपरिकल्प
येत्॥लघ्वैणवाजिनंलघुकृष्णाजिनं।प्राङ्मुखींकल्पयेद्धेनुमुदक्पा
दांसवत्सकां।प्राङ्मुखींप्राक्शिरसं।सवत्सां।उत्तरभागस्थितवत्स
सहितां।उत्तमागुडधेनुःस्यात्सदाभारचतुष्टयं।वत्संभारेणकुर्वीत
भाराभ्यांमध्यमास्मृता।अर्द्धभारेणवत्सःस्यात्कनिष्ठाभारकेणतु॥
चतुर्थांशेनवत्सःस्याद्गृहवित्तानुसारतः।भारःपलसहस्रद्वयमितिप
रिभाषायामुक्तं।धेनुवत्सौघृतस्यैतौसितसूक्ष्मांबरावृतौ।शुक्तिकर्णा
विक्षुपादौशुचिमुक्ताफलेक्षणौ॥सितसूत्रशिरालौतौसितकंबलकंबलौ

ताम्रगंडुकपृष्ठौतौसितचामररोमकौ॥गंडुकंककुत्प्रदेशः।विद्रुमभ्रू
युगोपेतौनवनीतस्तनान्वितौ॥क्षौमपुच्छौकांस्यदोहौइंद्रनीलकता
रकौ॥सुवर्णशृंगाभरणौराजतक्षुरसंयुतौ॥नानाफलमयैर्दंतैर्घ्राण
गंधकरंडकौ॥गंधकरंडकःकर्पूरादियुतःपात्रविशेषः।इत्येवंरचयि
त्वातौधूपदीपैरथार्चयेत्॥वस्त्रमुक्तादीनांसारतोमानतश्चाधिक्ये
फलाधिक्यं॥अथप्रयोगः॥अद्येत्यादि।सर्वपापक्षयपूर्वकाशेषयज्ञ
फलप्राप्तिसहितभुक्तिमुक्तिकामोगुडधेन्वादिदानंकरिष्य इतिसंक
ल्प्यविप्रंवृत्वासंपूज्यसवत्सगुडधेनवेनमइत्यावाहनप्रतिष्ठापनपू
जनानिकृत्वातांप्रदक्षिणीकृत्यवक्ष्यमाणमंत्रैरामंत्र्याद्येत्यादिस
र्वपापक्षयपूर्वकाशेषयज्ञफलप्राप्तिसहितभुक्तिकामइमांधेनुममु
कप्रवरायामुकगोत्रायामुकशर्मणेविप्रायतुभ्यमहंसंप्रददेनममेति
दद्यात्॥विप्रस्तुपुच्छंप्रतिगृह्यस्वस्तीत्युक्त्वाकामस्तुतिंपठेत्॥दाता
तुसुवर्णदक्षिणादानविप्रभोजनभूयसीदानादिकर्मशेषंसमापयेत्
॥अथामंत्रणमंत्राः॥यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता॥धे
नुरूपेणसादेवीममशांतिंप्रयच्छतु॥देहस्थायाचकल्याणीशंकर
स्यसदाप्रिया॥धेनुरूपेणसादेवीममपापंव्यपोहतु॥विष्णोर्वक्षसि
यालक्ष्मीःस्वाहायाचविभावसोः॥चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तु
साश्रियै॥चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्य॥लक्ष्मीर्यालोकपा
लानांसाधेनुर्वरदास्तुमे॥स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांत
था॥सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमेइति॥एवमामंत्र्यतां
धेनुंब्राह्मणायनिवेदयेत्॥विधानमेतद्धेनूनांसर्वासामिहपठ्यते।स
र्वासांप्रत्यक्षधेनुव्यतिरिक्तानामित्यर्थः।उक्तरचनस्यतत्रानुपयोगा
त्॥एतदेवविधानंस्यात्तएवोपस्कराःस्मृताः।मंत्रावाहनसंयुक्ताः
सदापर्वणिपर्वणि।यथाश्रद्धंप्रदातव्याभुक्तिमुक्तिफलप्रदाः।अशे
षयज्ञफलदाःसर्वपापहराःशुभाः।अयनेविषुवेपुण्येव्यतीपातेतथा
पुनः।गुडधेन्वादयोदेयाउपरागादिपर्वसु।अत्रपापविनाशिन्य इत्युप
क्रमात्सर्वपापहराइत्युपसंहाराच्चपापनाशएवफलंनभुक्तिमुक्त्या
दीतिदानसौख्ये।तत्रपुत्रेशविवार्थ्रदादेन्कानांभुक्तिमुक्त्यादीनां

त्यागेमानाभावात्॥ उपक्रमोपसंहारौतत्प्रयोजकौ॥ यत्तुपद्मपुरा
णादाविवेकेनैवघटेनघृतादिधेनुः॥ द्रोणमात्रेणचतिलेनधेनुरुक्ता॥
तत्प्रकारांतरमितिकल्पतरौ॥ दानविवेकेतुपलसहस्रप्रमाणःकुंभ
इति। द्वादशपलाधिकानिपंचपलशतानिकुंभइत्यन्ये॥ ततश्चयथा
धिकारंव्यवस्थाज्ञेया॥ यद्यपिगुडधेन्वनंतरंघृतधेनुरुद्दिष्टातथा
पितिलाभावेतथादद्यात्॥ घृतधेनुमित्युक्त्वातिलानांप्राधान्यात्तद्धे
नुरादावुच्यते॥ अथतिलधेनुः॥ तत्रकिंचित्प्रकारांतरंविष्णुधर्मोत्तरे।
अनुलिप्तेमहीपृष्ठेवस्त्राजिनकुशावृते॥ धेनुंतिलमयींकृत्वासर्वरत्नै
रलंकृतां॥ धेनुंद्रोणेनकुर्वीतआढकेनतुवत्सकं। सुवर्णशृंगीरौप्यखु
रांगंधघ्राणवतींतथा॥ कुर्याच्चशर्कराजिह्वांगुडास्यामक्षिकंबलां।
इक्षुपादांताम्रपृष्ठांमुक्ताफलेक्षणां॥ प्रशस्तपत्रश्रवणांफलदं
तवतींशुभां॥ स्रग्दामपुच्छांकुर्वीतनवनीतस्तनान्वितां। सितसूत्र
शिरालांचसितसर्षपरोमिकां॥ फलैर्मनोहरैर्भक्ष्यैर्मणिमुक्ताफला
न्वितां॥ सितवस्त्रयुगच्छन्नांघंटाभरणभूषणां। ईदृग्वत्सस्थानसंप
न्नांकृत्वाश्रद्धासमन्वितः। कांस्योपदोहनांदद्यात्केशवःप्रीयतामि
तिफलेतिकर्तव्यतामप्यागुडधेनूक्तैव। वह्निपुराणेतुतिलाश्च
पितृदैवत्यानिर्मिताश्चेहगोसवे॥ ब्रह्मणातन्मयीधेनुर्दत्ताप्रीणा
तुकेशवमितिमंत्रांतरमुक्तं। अथघृतधेनुःविष्णुधर्मोत्तरे। तिला
भावेतथादद्याद्घृतधेनुंप्रयत्नतः। वासुदेवंजगन्नाथंघृतक्षीराभिषे
चनात्॥ संपूज्यपूर्ववत्पुष्पैर्गंधधूपादिभिर्नरः। अहोरात्रोषितोनाम
अभिघूपघृतार्चिषं। अभिघूपप्रज्वाल्य। घृतार्चिषमग्निं। गव्यस्यस
र्पिषःकुंभंपुष्पमालादिभूषितं। कांस्यापिधानसंयुक्तंसितवस्त्रयुगे
नच। हिरण्यगर्भसहितंमणिविद्रुममौक्तिकैः। अत्रपलसहस्रपरि
माणःकुंभः। द्वादशपलाधिकानिपंचपलशतानीतिवा। इक्षुयष्टिम
यान्पादान्खु रान्रौप्यमयांस्तथा। सौवर्णेचाक्षिणीकुर्याच्छृंगेचा
गरुकाष्ठजे॥ सप्तधान्यमयेपार्श्वेपत्रोर्णेनचकंबलं। कुर्यात्तुरुष्ककर्पू
रैर्घ्राणंफलमयान्स्तनान्॥ तद्वच्छर्करयाजिह्वांगुडक्षीरमयंमुखं।
पत्रोर्णंधौतकौशेयं। तुरुष्कःसिल्हकं। सिल्हाररसइतियावत्। पुच्छं

क्षौममयंकार्यंरोमाणिसितसर्षपैः॥ताम्रपृष्ठंविचित्रंतुईदृक्कृत्वाप्रमनोरमां॥विधिनोक्तेनवत्सांचकुर्याल्लक्षणलक्षितां।एतैःकृत्वातथावत्सांपूजयित्वाविधानतः।तद्भक्तायप्रदातव्यामंगलाशीःस्वपारगे।एतांममोपकारायगृह्णीष्वत्वंद्विजोत्तम॥प्रीयतांममदेवेशोघृतार्चिःपुरुषोत्तमः॥इत्युदाहृत्यविप्रायदद्याद्धेनुंनराधिप।स्कांदेत्वयंमंत्रः॥घृतंगावःप्रसूयंतेघृतंभूम्यांप्रतिष्ठितं।घृतमग्निश्चदेवाश्चघृतंमेसंप्रदीयतामिति॥फलंच॥घृतक्षीरवहानद्योयत्रपायसकर्दमाः॥तेषुलोकेषुसर्वेषुसुपुण्येषूपजायते॥सकामानामियंव्युष्टिःकथितानृपसत्तम॥व्युष्टिःफलं॥विष्णुलोकंनरायांतिनिष्पापाधेनुदानतइत्यादि॥दक्षिणात्रैकसुवर्णप्रभृतियथाशक्तीतिमदनरत्ने।यथाशक्तिहिरण्यमितिहेमाद्रौ॥अथजलधेनुः॥तत्रैव॥जलधेनुंप्रक्रम्य।जलकुंभंनरव्याघ्रसुवर्णरजतान्वितं॥सुवर्णरजतशृंगखुरान्वितमितिसांप्रदायिकाः॥रत्नगर्भमशेषैस्तुग्राम्यैर्धान्यैःसमन्वितम्॥सितवस्त्रयुगच्छन्नंदूर्वापल्लवशोभितं॥कुष्ठमांसीमुराशीरबालकामलकैर्युतं॥प्रियंगुपत्रसहितंसितवस्त्रोपवीतिनम्॥सछत्रंसउपानत्कंदर्भविष्टरसंस्थितं॥चतुर्भिःसंभृतंभूपतिलपात्रैश्चतुर्दिशं॥स्थगितंदधिपात्रेणघृतक्षौद्रवतामुखे॥तिलपात्राणिताम्रस्यदधिपात्रंकांस्यस्येतिदानविवेके॥उपोषितःसमभ्यर्च्यवासुदेवंजलेशयं।पुष्पधूपोपहारैश्चयथाविभवमादृतः॥संकल्प्यजलधेनुंचकुंभंतमभिपूज्यच॥पूजयेद्वत्सकंतद्वत्तंजलमयंबुधः॥एवंसंपूज्यगोविंदंजलधेनुंसवत्सकां॥शितवस्त्रधरःशांतोवीतरागोविमत्सरः॥दद्याद्द्विजायराजेंद्रप्रीत्यर्थंजलशायिनः॥जलशायीजगद्योनिःप्रीयतांममकेशवः।इतिचोच्चार्यभूनाथविप्रायप्रतिपाद्यतां॥अपक्वान्नाशिनास्थेयमहोरात्रमतःपरं॥तथा॥धान्यानिपार्श्वेहृयेकुष्टादीनिघ्राणदेशे॥प्रियंगुपत्रंश्रवणे॥यज्ञोपवीतंमूर्द्धिस्थापयेत्॥वत्सश्चतुर्थांशेनैव ॥दक्षिणाशक्तितःसुवर्णं।अनेनविधिनादत्वाजलधेनुंनराधिप।सर्वान्कामानवाप्नोतियेदिव्यायेचमानुषाइति॥अथक्षीरधेनुः।स्कांदे॥क्षीरधेनुंप्रवक्ष्यामितांनिबोधनराधिप॥

अनुलिप्तेमहीपृष्ठेगोमयेननराधिप॥गोचर्ममात्रमानेनकुशाना
स्तीर्यसर्वतः॥तत्रोपरिमहाराजन्यसेत्कृष्णाजिनंततः॥तत्रोपरि
कुंडलिकांगोमयेनकृतामपि॥क्षीरकुंभंततःस्थाप्यचतुर्थांशेनव
त्सकं॥सुवर्णमुखशृंगाणिचंदनागरुकाणिच॥प्रशस्तपत्रश्रवणं
तिलपात्रोपरिन्यसेत्॥मुखंगुडमयंतस्याजिह्वाशर्करयातथा॥मू
लप्रशस्तदंताचमुक्तामयफलेक्षणा॥इक्षुपादादर्भरोमासितकंबल
कंबला॥ताम्रपृष्ठाकांस्यदोहापट्टसूत्रमयंतथा॥पुच्छंचनृपशार्दू
लनवनीतमयस्तनी।स्वर्णशृंगीरौप्यखुरापंचरत्नमयीभुवि॥चत्वा
रितिलपात्राणिचतुर्दिक्षुविस्थापयेत्॥सप्तव्रीहीन्समायुक्तोदिक्षु
सर्वासुप्रक्षिपेत्॥एवंलक्षणसंयुक्तांक्षीरधेनुंप्रकल्पयेत्॥आच्छा
द्यवस्त्रयुग्मेनगंधपुष्पैःसमर्चयेत्॥धूपदीपादिकंकृत्वाब्राह्मणाय
निवेदयेत्॥अनेनैवतुमंत्रेणक्षीरधेनुंप्रकल्पयेत्॥अनेनगुडधेनू
क्तेन॥प्रकल्पयेदनुमंत्रयेत्॥आप्यायस्वेतिमंत्रेणक्षीरधेनुंप्रसाद
येत्॥गृह्णामित्वांविप्रभक्त्याग्राहकोमंत्रमुच्चरेत्॥एवंधेनुंप्रदत्वा
चक्षीराहारोदिनंचरेत्॥त्रिरात्रंतुपयोभक्षोब्राह्मणोराजसत्तम॥मं
त्रस्तु॥गृह्णामित्वांदेविभक्त्याकुटुंबार्थंविशेषतः॥भरस्वकामैर्मांस
र्वैःक्षीरधेनोनमोस्तुतइति॥एतांहेमसहस्रेणशतेनाथस्वशक्तितः
॥शतार्द्धमथवाप्यर्द्धंतत्रैवार्द्धंस्वशक्तितः॥दद्याद्धेनुंमहाराजशृणु
तस्यापियत्फलं॥दिव्यंवर्षसहस्रंतुरुद्रलोकेमहीयते॥दिव्यवर्ष
सहस्रावधिरुद्रलोककामइतिफलोल्लेखः॥संकल्पवाक्यंअन्यद्गु
डधेनुवत्॥अथदधिधेनुः॥तत्रैवभूलेपनकुशकृष्णाजिनान्युक्त्वा
॥दधिकुंभंचसंस्थाप्यसप्तधान्यस्यचोपरि॥चतुर्थांशेनवत्संतुसौव
र्णमुखसंयुतं॥प्रशस्तपत्रश्रवणामुक्ताफलमयेक्षणा॥चंदनागरु
शृंगाचमुखंवैगंधमालिका॥गंधमालिकागंधद्रव्यविशेषइतिकेचि
त्॥सुगंधपुष्पस्रगित्यन्ये।कर्पूरादिसुगंधद्रव्यसमूहइतिबहवः॥
जिह्वाशर्करयाराजन्घ्राणंश्रीखंडकंतथा॥फलमूलमयादंतासित
सूत्रस्यकंबलः॥ताम्रपृष्ठादर्भरोमापुच्छंसूत्रमयंतथा॥सुवर्णशृंगी
रौप्यखुरानवनीतमयस्तनी॥इक्षुपादासुसंस्कृत्यसर्वाभरणभूषि

तां॥आच्छाद्य वस्त्रयुग्मेन पुष्पगंधैः सुपूजिताम्॥ब्राह्मणायकुलीना
यसाधुवृत्ताय धीमते॥पुच्छदेशोपविष्टाय मुद्रिकाकर्णमात्रकैः॥पा
दुकोपानहौछत्रं दत्वा मंत्रमनुस्मरेत्॥मंत्रो गुडधेनूक्तः॥दधिक्राव्णो
तिमंत्रेण दधिधेनुं प्रदापयेत्॥एवं दधिमयीं धेनुं दत्वा राजर्षिसत्तम
॥एकाहारो दिनं तिष्ठेद्भ्राच नृपनंदन॥यजमानो वसेद्राजन्त्रिदि
नं च द्विजोत्तमः॥यत्र मधुवहा नद्यो यत्र पायसकर्दमाः॥मुनयो ऋ
षयः सिद्धास्तत्र गच्छंति धेनुदाः॥दाता दापकश्चैव तेपि यांति परां
गतिं॥मधुनदीकवहुपायसऋषिसिद्धलोककाम इति शेषफलोल्ले
खः॥अथ मधुधेनुः॥स्कांदे॥मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशि
नीं॥अनुलिप्ते मही पृष्ठे कृष्णाजिनकुशोत्तरे॥धेनुं मधुमयीं कृत्वा सं
पूर्णघटपूरितां॥तद्वच्चतुर्थभागेन वत्सकं परिकल्पयेत्॥सौवर्णंतु
मुखं कृत्वा शृंगाण्यगुरुचंदनं॥पृष्ठं ताम्रमयं तस्याः पुच्छं सूत्रमयं
तथा॥पादास्त्विक्षुमयाः कार्याः सितकंबलकंबलं॥मुखं गुडमयं
कृत्वा जिह्वा शर्करयान्विता॥मौक्तिकं नयने तस्या दंताः फलमयाः
स्मृताः॥दर्भरोम धरा देवी रौप्यखुरविभूषिता॥प्रशस्तपत्रश्रव
णा नवनीतमयस्तनी॥सर्वलक्षणसंयुक्ता सप्तधान्यानि दापयेत्
॥चत्वारि तिलपात्राणि चतुर्दिक्षु च भूषिता॥आच्छाद्य वस्त्रयुग्मे
न घंटाभरणभूषितां॥कांस्योपदोहनीं कृत्वा गंधपुष्पैस्तु पूजितां
॥पुच्छदेशोपविष्टाय ब्राह्मणाय प्रतिपादयेत्॥उदपूर्वं तु कर्त्तव्यं
पश्चाद्दानं समाचरेत्॥रसज्ञा सर्वदेवानां सर्वभूतहिते रता॥प्री
यंतां पितरो देवा मधुधेनो नमोस्तु ते॥एवमुच्चार्य तां धेनुं ब्राह्मणा
य निवेदयेत्॥अहं गृण्हामि त्वां देवि कुटुंबार्थे विशेषतः॥कामा
न्कामदुघे धुंक्ष्व मधुधेनो नमोस्तु ते॥मधुवातेति मंत्रेण प्रदाप्या
यतचेतसा॥धेनुं दत्वा च मधुपायसाभ्यां दिनं नयेत्॥ब्राह्मणोपि
तथैव त्रिरात्रं नयेत्॥फलश्रुतिरपि॥यत्र मधुवहा नद्यो यत्र पाय
सकर्दमाः॥ऋषयो मुनयः सिद्धास्तत्र गच्छंति धेनुदाः॥तत्र भोगान्
वरान्भुंक्ते ब्रह्मलोके स तिष्ठति॥मधुनदीकवहुपायसकर्दममुनि
सिद्धलोकोत्तमभोगोत्तरब्रह्मलोककाम इति विशेषफलोल्लेखः॥

अथरसधेनुः॥ स्कांदे॥ रसधेनुंमहाराजकथयामिसमासतः॥ अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥ रसस्यतुघटंराजन्संपूर्णमिक्षुरसस्यतु॥ तद्वत्संकल्पयेत्प्राज्ञश्चतुर्थांशेनवत्सकं॥ इक्षुदंडमयाःपादाराजन्खुरसंयुताः॥ सुवर्णशृंगाभरणावस्त्रपुच्छाघृतस्तनी॥ पुष्पकंबलसंयुक्ताशर्करामुखजिह्विका॥ दंताःफलमयास्तस्याःपृष्ठंताम्रमयंशुभं॥ पुष्परोमातुराजेंद्रमुक्ताफलकृतेक्षणा॥ सप्तव्रीहिसमायुक्ताचतुर्दिक्षुसदीपिका॥ सर्वोपस्करसंयुक्ता सर्वगंधविभूषिता॥ चत्वारितिलपात्राणिचतुर्दिक्षुनिवेशयेत्॥ धेनुंतुपूजयित्वाग्रेपुष्पगंधस्रगादिभिः॥ पूर्वोक्तायेचमंत्राश्चतानेवप्रपठेत्ततः स्मरेत्॥ मंत्रागुडधेनूक्ताः॥ एवमुच्चारयित्वातुदीयतेवैद्विजोत्तमे॥ दशपूर्वान्परांश्चैवआत्मानंचैकविंशकं॥ नयेत्तुपरमंस्थानंयस्मान्ननिवर्त्ततेपुनः॥ दाताचाग्राहकोवापिस्कान्दरसभोजका॥ सोमपानंभवेत्तस्यसर्वक्रतुफलंलभेदित्यादिस्वाधिकदशपूर्वदशपरपुरुषाणांनिवृत्तिरहितपरपदप्राप्तयेआत्मनश्चसोमपानसर्वक्रतुफलप्राप्तिकामइतिविशेषफलोल्लेखः॥ अथशर्कराधेनुःस्कांदे॥ तद्वच्चशर्कराधेनुंशृणुराजन्यथार्थतः॥ अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥ धेनुःशर्करयाराजन्सदाभारचतुष्टयं॥ उत्तमाकथ्यतेसद्भिश्चतुर्थांशेनवत्सकः॥ तदर्द्धेमध्यमाप्रोक्ताचतुर्थांशेनकनीयसी॥ तद्वद्वत्संप्रकुर्वीतचतुर्थांशेनमानवः॥ अथवाकुर्याद्दष्टांशातश्चतुर्थांशेनवत्सकं॥ अष्टांशइति॥ भारचतुष्टयस्याष्टमांशेनअर्द्धभारेणेत्यर्थः॥ स्वशक्त्याकारयेद्धेनुमात्मपीडांनकारयेत्॥ सर्वबीजानिसंस्थाप्यचतुर्दिक्षुसमंततः॥ सौवर्णमुखशृंगाणिमौक्तिकैर्नयनानिचगुडेनचमुखंकार्यंजिह्वापिष्टमयीतथा॥ कंबलंपट्टसूत्रेणकंठाभरणभूषिता॥ इक्षुपादारौप्यखुरानवनीतमयस्तनी॥ प्रशस्तपत्रश्रवणासितचामरभूषिता॥ पंचरत्नसमायुक्तादर्भरोमसमन्विता॥ कांस्योपदोहनासम्यक्गंधपुष्पैःसमन्विता॥ ईदृग्विधानसंयुक्तावस्त्रैराच्छादितोपरि॥ गंधपुष्पैरलंकृत्यब्राह्मणायनिवेदयेत्॥ पूर्वामुखःसदाताअथवास्यादुदङ्मुखः॥ धेनुंपूर्वमुखींकृत्वावत्समुत्तरतो॰

न्यसेत्॥दानकालेतुयेमंत्रास्तान्पठित्वासमर्चयेत्॥गुडधेनूक्ताः
।आच्छाद्यचैवतंविप्रंमुद्रिकाकर्णवेष्टनैः॥स्वशक्त्यादक्षिणांदद्याद्गं
धपुष्पंसचंदनं॥धेनुंसमर्चयेत्तस्यमुखंचनविलोकयेत्॥एकाहंश
र्कराहारोब्राह्मणस्त्रिदिनंवसेत्॥सर्वपापहराधेनुःसर्वकामप्रदा
यिनी॥सर्वकामसमृद्धश्चजायतेनात्रसंशयइति॥अथकार्पासधेनुः
॥वाराहे॥अतःपरंप्रवक्ष्यामिधेनुंकार्पासकींशुभां॥एवंविष्णुस्वरु
पर्धेब्रह्मणाचांम्बुकंकृतं॥कार्पासमूलेनत्वापितेनासावुत्तमःस्मृ
तः॥साचकार्पासभारेणधेनुःश्रेष्ठाप्रकीर्त्तिता॥मध्यमाचतदर्द्धेन
तदर्द्धेनतुकन्यसी॥पूर्ववद्वस्त्रधान्यंचहिरण्यंचतथैवच॥वत्सकं
तुचतुर्थांशाद्दानमंत्रोविधीयते॥कुर्वीतपूर्ववद्वत्संवस्त्रधान्याद्यु
पस्कृतं॥पूर्ववद्धराहोक्ततिलधेनुदानवत्॥हेमकुंदेंदुसदृशेक्षी
रार्णवसमुद्भवे॥सोमप्रियेसुधेन्वाख्येसोरभेयिनमोस्तुते॥दत्तेय
मिंदुनाथायशशांकायाःसृतायच॥अत्रिनेत्रप्रजातायसोमरा
जायवैनमः॥यस्त्वेवंपरयाभक्त्याब्राह्मणायप्रयच्छति॥सयातिचं
द्रलोकंतुसोमेनसहमोदतइति॥चंद्रलोकगमनानंतरचंद्रसह
वाससकलकामइतिविशेषफलोल्लेखः॥अथभविष्यत्पुराणे लव
णधेनुः॥तत्रयुधिष्ठिरंप्रतिकृष्णः॥शृणुराजन्प्रवक्ष्यामिलवणस्य
हकल्पितं॥गोमयेनानुलिप्तेतुदर्भसंस्तरसंस्थितं॥आविकंचर्म
विन्यस्यपूर्वाशाभिमुखंस्थितं॥वस्त्रेणच्छादितंकृत्वाधेनुंकुर्वीत
बुद्धिमान्॥हाटकेनैवकुर्वीतवहुवित्तोल्पवानपि॥स्वर्णशृंगीरौप्य
खुराइक्षुपादाफलस्तनीम्॥कार्याशर्करयाजिह्वागंधघ्राणवतीत
था॥समुद्रोदरजांशुक्तिंकर्णौचपरिकल्पयेत्॥शृंगेचंदनकाष्ठा
भ्यांमौक्तिकेचाक्षिणीउभे॥कपालेसक्तुपिंडाभ्यांयवानास्येप्रद
पयेत्॥कंबलंपट्टसूत्रेणग्रीवायांक्रत्रिकांतथा॥पृष्ठेवैताम्रपात्रंतु
अपानेगुडपिंडिकां॥लांगूलेकंबलंदद्याद्रसान्क्षीरप्रदेशतः॥यो
नि प्रदेशेतुमधुसर्वेतस्तुफलान्विता॥एवंसम्यक्परिस्थाप्यलवण
स्यकृतांतुगां॥स्थापयेद्वत्सकंचापिचतुर्भागेनमानवः॥एवंधेनुंसम
भ्यर्च्यमाल्यवस्त्रविभूषणैः॥स्नात्वादेवार्चनंकुर्याद्ब्राह्मणानभिपूज्य

च॥ कृतां प्रदक्षिणं गां तु पुत्रभार्यासमन्वितः॥ दानमंत्रः॥ लवणे वै रसाः
सर्वे लवणे सर्वदेवताः॥ सर्वदेवमये देवि लवणाख्ये नमोस्तु ते॥ प्रदक्षि
णा महीतेन कृता भवति भारत॥ सर्वदानानि दत्तानि सर्वे तु कफलानि
तु॥ सर्वे रसाः सर्वमंत्राः सर्वमेतच्चराचरं॥ सौभाग्यं च परा वृद्धिः श
रीरारोग्यसंपदः॥ नृणां भवंति दत्वा तु रसधेनुं न संशयः॥ सौभाग्य
परमवृद्ध्यारोग्यकाम इति विशेषफलोल्लेखः॥ पुराणांतरे॥ गां लव
णमयीं कृत्वा षोडशप्रस्थसंयुतां॥ चतुर्भिर्वत्सं राजेन्द्र इत्यादिना लव
णपरिमाणांतरमुक्तं॥ अथ सुवर्णधेनुः॥ विष्णुधर्मे॥ भगवानुवाच॥
यद्ब्रह्मणोपि राजेन्द्र ऊहितं विष्णुना पुरा॥ तत्ते विस्तरतो राजन् कथ
याम्यनुपूर्वशः॥ सुवर्णस्य सुवर्णस्य शुद्धस्य परिकल्पितां॥ एकं सु
वर्णपदं शोभनं रूपमाहापरं मानं॥ रौप्यवत्सकसंयुक्तां मुक्ताफल
विभूषितां॥ प्रवालशृंगोपयुतां पद्मरागादिशालिनीं॥ घृतपात्रस्तन
वतीं कर्पूरागरुनासिकां॥ शर्करारसनोपेतां मिष्टान्नरसवासितां॥ शं
खशृंगांतरां शुक्तिललाटस्थानकल्पितां॥ फलदंतां वस्त्रयुग्मपार्श्वां क्षौ
मसुकंबलां॥ इक्षुपादां नालिकेरश्रवणां गुडजानुकां॥ पंचगव्याः पानव
तीं कांस्यपृष्ठसमन्वितां॥ सुपट्टसूत्रलांगूलां सप्तधान्यसमन्वितां॥ फ
लपुष्पसमोपेतां छत्रोपानत्समन्वितां॥ सुवर्णधेनुं विप्राय प्रतिपाद्येद्द
शीं नरः॥ हिरण्यरेताः पुरुषः पुराणः कृष्णपिंगलः॥ तत्र हेमच्छविः स्रष्टा
विश्वात्मा प्रीयतामिति॥ अनेनैव तु मंत्रेण धेनोर्दानं प्रकीर्तितं॥ अश्वमे
धसहस्रस्य फलमाप्नोत्यसंशयं॥ कुलानां तु सहस्रं च स्वर्गं नयति तद्ध्रुवं इ
ति॥ अश्वमेधसहस्रतुल्यफलप्राप्तिकुलसहस्रस्वर्गनयन इति काम
फलोल्लेखः॥ वन्हिपुराणे तु॥ सुवर्णधेनुश्चाप्यत्र सुवर्णाश्च चतुर्दश॥ सु
निर्णिक्तसुवर्णैश्च सप्तभिर्मध्यमा मता॥ चतुर्भिः कन्यसी प्रोक्ता चतुर्थां
शेन वत्सकः॥ गुडधेनुविधानेन दत्ता सर्वफलप्रदेत्यादिना सर्वं गुडधेनुव
दुक्तं॥ अथ वायुपुराणोक्तवंध्यालहरं सुवर्णधेनुदानं॥ चतुर्विधा तु या वं
ध्या भवेत्तत्सविधिं योजनात्॥ चतुर्विधा॥ वंध्या च काकवंध्या च स्त्रीप्रसू
श्च मृतप्रजेति॥ वंध्या अपत्यसामान्याभाववती॥ काकवंध्या काकव
देकापत्या॥ तस्येतस्याः प्रतीकारं न तत्त्वरूपं निबोध मे॥ हिरण्येन यथा

शक्त्यासवत्सांकारयेद्दृढां॥धेनुंपलेनवत्संचपादेनगुरुरब्रवीत्।धेनुरौ
प्यखुरांरत्नंतस्याःपुच्छेनियोजयेत्॥घंटांगलेचबध्नीयात्तिलकंचाभयो
रपि॥अर्चयेद्विधिनातांतुनैवेद्यंपायसंभवेत्।मोदकांश्चतथापूपान्गु
डंलवणमेवच।जीरकंचसक्तुविस्तीर्णेशूर्पेवेणुमयेदृढं।धेनोरेकंप्रदात
व्यंब्राह्मणस्त्रीषुचैवहि।षड्भ्योदशभ्योदद्यात्तदनंतरमेवच।ब्राह्मणंस
र्वशास्त्रार्थकुशलंधर्मवेदिनं।विद्याविनयसंपन्नंशांतंदांतंजितेंद्रियं।
अलोलुपंसर्वजनप्रियंकल्मषवर्जितं।आहूयभक्त्यासंपूज्यवस्त्राद्यै
र्गंधपुष्पकैः॥तेनैवकारयेत्पूजामाहतोधेनुवत्सयोः।होमंचकारयेत्त
त्रसमिदाज्यचरूत्कटं।सोमोधेनुमितिमंत्रंसमुच्चार्यततःपुनःप्रा
ङ्मुखायोपविष्टायप्रदद्यात्ताम्मुदङ्मुखः।मंत्रेणानेनविधिवत्तत्पुच्छेह
स्तंनिधायच॥धेनुर्यांगिरसःसत्रेवसिष्ठसुरभीचया।दुहिताचतथा
भानोरग्नेश्चवरुणस्यच॥याश्चगावःप्रवर्तंतेवनेषूपवनेषुच।प्रीणंतुता
ममसदापुत्रपौत्रप्रवर्द्धनाः।प्रयच्छंतुदिवारात्रंअविच्छेदंचसंततेः।वं
ध्यात्वंकाकवंध्यात्वंकन्याप्रसवएवच।तथैवमृतवत्सात्वंदोषंममच
तुर्विधं।दानेनानेनहरतुयासाकामदुघानघेति॥अथस्वरूपतोगोदा
नंतत्रयाज्ञवल्क्यः॥यथाकथंचिद्दत्वागांधेनुंवाधेनुमेववा।अरोगामप
रिक्लिष्टांदातास्वर्गेमहीयते।जाबालिः।होमार्थमग्निहोत्रस्ययोगांदद्या
द्दयान्वितः॥त्रिर्वित्तपूर्णापृथिवीतेनदत्तानसंशयः।अंगिराः।गौरेकस्यैव
दातव्याश्रोत्रियस्यविशेषतः।साहितारयतेपूर्वान्सप्तसप्तचसप्तच॥
आत्रेयः।सीदतेबहुभृत्यायश्रोत्रियायाहिताग्नये।अतिथिप्रियायदां
तायदेयाधेनुर्गुणान्विता।देवलः।सुशीलांलक्षणवतींयुवतींवत्ससंयु
तां।बहुदुग्धवतींस्निग्धांधेनुंदद्याद्विचक्षणः॥व्यासः।संग्रामेध्वजयि
तानुयोवैगाःसंप्रयच्छति॥यादृशीःस्पर्शयेद्गावःसतावत्फलमश्नुते।ता
वत् नक्रोशेममितवत्सरंस्वर्गफलं।योवैद्यूतेधनंजित्वागाःक्रीत्वासंप्र
यच्छति।सदिव्यमयुतंशक्रवर्षाणांफलमश्नुते।भारते।नगोदानात्परंदा
नंकिंचिदस्तीतिमेमतिः।सागौर्न्यायार्जितादत्ताकृत्स्नंतारयतेकुलं।तथा
।अकुलीनायमूर्खायलुब्धायपिशुनायच।हव्यकव्यव्यपेतायगोर्नदेयाक
थंचन॥तृणानिखादंतिवसंत्यरण्येपिबंतितोयान्यपरिग्रहाय।दुहंतिवा

घ्नंतिपुनंतिपापंनराणांसैर्जीवंतिजीवल्लोकइतिप्रशंसा॥अथविधिः॥
याज्ञवल्क्यः॥हेमशृंगीशफैरौप्यैःसुशीलावस्त्रसंयुता॥सकांस्यपा
त्रादातव्याक्षीरिणीगौःसदक्षिणा॥विश्वामित्रः॥प्राङ्मुखींगामव
स्थाप्यसवत्सांगांतुपूजितां।पुच्छदेशेतुदातावैतनोबद्धशिखोभवे
त्॥उदङ्मुखस्तुविप्रःस्यात्सावलक्षणलक्षितः।आज्यपात्रंकरेकृ
त्वाकनकेनसमन्वितं॥निक्षिप्यपुच्छंतस्मिंस्तुघृतदिग्धंप्रगृह्यच।
सतिलंविप्रपाणिंचप्रागग्रंतुनिधापयेत्॥सतिलंसकुशंचापिगृही
त्वादानमाचरेत्॥अनेनैवतुमंत्रेणपात्रहस्तेजलंक्षिपेत्॥मंत्रोव
क्ष्यते।अनुव्रज्यचेतांधेनुंब्राह्मणेनसमन्वितां॥गौतमींतुततोविद्यां
जपेत्प्रयतःशुचिः।उद्दिश्यवासुदेवंचप्रीयतामितिचानघ॥पात्रं
मनसिसंचिंत्यतोयमप्सुविनिक्षिपेत्॥अथप्रयोगः।अद्येत्यादिगोमात्र
दानफलतुल्यफलकामःस्वर्गकामःसर्वत्रापिकृत्स्नकुलतारणकामःस
र्वपापक्षयकामईश्वरप्रीतिकामोवागोदानंकरिष्यइतिसंकल्प्य।
प्राङ्मुखींसवत्सांगांविप्रंचसंपूज्यससुवर्णमाज्यपात्रंहस्तेगृही
त्वातत्रपुच्छंघृताक्तंकृत्वाविप्रहस्तेकुशतिलजलान्यादायउक्तफ
लेष्वभिलषितंफलमुक्त्वायज्ञसाधनभूतायाविश्वस्याघप्रणाशि
नी॥विश्वरूपधरोदेवःप्रीयतामनयागवेतिमंत्रंघृतक्षीरप्रदागावो
घृतयोन्योघृतोद्भवाः।घृतनद्योघृतावर्त्तास्तामेसंतुसदागृहे।घृतं
मेहृदयेनित्यंघृतंनाभ्यांप्रतिष्ठितं॥घृतंमेसर्वतश्चैवगवांमध्येव
साम्यहमितिपौराणमंत्रंचपठित्वाजलमुत्सृजेत्॥दानप्रतिष्ठार्थं
दक्षिणांदत्वाब्राह्मणधेनूअनुव्रज्यगावःसुरभयोनित्यंगावोगुग्गु
लगंधिकाः॥गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्॥अन्नमेव
परंगावोदेवानांहविरुत्तमं॥पावनंसर्वभूतानांक्षरंतिचवहंतिच॥
हविषामंत्रपूतेनतर्पयंत्यमरान्दिवि॥ऋषीणामपिहोतॄणांगावो॥
होमेप्रतिष्ठिताः।सर्वेषामेवभूतानांगावःशरणमुत्तमं।गावःपवित्रंप
रमंगावोमंगलमुत्तमं।गावःसर्वस्यलोकस्यगावोधन्याःसवाहनाः
॥नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच॥नमोब्रह्मसुताभ्यश्च
पवित्राभ्योनमोनमः।ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं।एक

त्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठतीतियमोक्तांगोमतींविद्यांजपेत्।महा
भारतेपिगोमती।गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः।सुरभ्यः
सौरभेय्यश्चसरितःसागरंयथा॥गावैपश्याम्यहंनित्यंगावःपश्यं
तुमांसदा॥गावोस्माकंवयंतासांयतोगावस्ततोवयमिति।गावोम
माग्रतःसंतुगावोमेसंतुपृष्ठतः।गावोमेहृदयेसंतुगवांमध्येवसा
म्यहमितिपठित्वाधेनुंद्विजंचप्रदक्षिणीकृत्यदद्यादित्यपिवदंति
।दक्षिणामाहवसिष्ठोगोदानप्रकरणे॥सुवर्णंपरमंदानंसुवर्णंद
क्षिणापरा॥सुवर्णंपावनंप्राहुःपरिमाणंपरंतथेति।यजमानस्ततो
दद्याद्यथाशक्त्यातुदक्षिणामितितदशक्तपरमितिमदनः।अथमा
त्स्येहेमशृंगी।दशसौवर्णिकेशृंगेखुराःपंचपलान्विताः।पंचाशत्प
लिकंकांस्यंताम्रंचापितथैवच॥दातास्याःसर्वमाप्नोतियावदाहूत
संप्लवं।सुवर्णमत्रदक्षिणा।इतिहेमशृंगीदानं॥शिवायविष्णवेवा
पियस्तुदद्यात्पयस्विनीं।धेनुंस्नानोपहारार्थंसपरंब्रह्मगच्छतीति
स्कांदे।देवताभ्योगोदानं॥सहस्रंगोशतंदद्याच्छिवायातीवशोभनं
।त्रिःसप्तकुलजैःसार्द्धंशृणुतत्पदमाप्नुयादित्यादिनाशिवधर्मोक्तं
शिवायवृषाधिकगोशतदानं।देवताभ्योदानेदेवैवसंप्रदानं।न
ब्राह्मणः।दत्तंचतत्तद्देवतायतनेदक्षिणभागेस्थाप्यमितिदानसौ
ख्ये॥अथोभयतोमुखी॥तद्दानकालःस्कांदे॥अर्द्धप्रसूतांगांदद्यात्का
लादीनविचारयेत्।कालःसएवग्रहणेयदासाहिमुखीतुगौः।मा
त्स्ये।रुक्मशृंगींरौप्यखुरांमुक्तालांगूलभूषितां।कांस्योपदोहनां
राजन्सवत्सांद्विजपुंगवे।प्रसूयमानांयोदद्याद्धेनुंद्रविणसंयुतां॥
यावद्वत्सोयोनिगतोयावद्गर्भंनमुंचति।तावद्गौःपृथिवीज्ञेयासशै
लवनकानना।देवलः।अलंकृत्योक्तविधिनासुवर्णत्रिपलान्विता।
दातव्याद्विपलामध्येकपलाकन्यसीमता।वाराहेयश्चोभयमुखींद
द्यात्प्रभूतकनकान्वितां॥तद्दिनंपायसाहारःपयसावातिवाहयेत्।
सुवर्णस्यसहस्रेणतदर्द्धेनापिवापुनः।तस्याप्यर्द्धशतंवाथपंचाश
च्चतथार्द्धकं॥यथाशक्त्यापिदातव्यंवित्तशाठ्यविवर्जितम्॥योगी
[illegible]वारोमतुल्यानियुगान्युभयतोमुखी।दानास्याःस्वर्गमाप्नो

निपूर्वेणविधिनाददत्॥ मात्स्ये।गोलोकःसुलभस्तस्यब्रह्मलोकश्च
पार्थिव।स्त्रियश्चतंचंद्रसमानवक्त्राःप्रतप्तजांबूनदतुल्यवर्णाःमहानि
तंबस्तनमध्यवृत्ताभजंत्यजस्रंनलिनाभनेत्राः॥अथप्रयोगः।अद्ये
त्यादिगृहसमुद्रशैलवनोपेतपृथिवीदानसमफलेतद्धेनुवत्सरोमसं
ख्ययुगदेवलोकमहितत्वपितृपितामहप्रपितामहनरकोद्धरणघृ
तक्षीरवहबहुकुल्याकदधिपायसकर्दमकदेशाधिकरणकेप्सितका
मगत्यात्मलोकसुलभत्वब्रह्मलोकसुलभत्वाजस्रचंद्रसमानवक्त्र
सुतप्तजांबूनदतुल्यवर्णमहानितंबस्तनवृत्तमध्यनलिनाभनेत्राने
कस्त्रीसेव्यमानत्वकामउभयतोमुखींदास्यइतिसंकल्प्यॐत्वंम
हीमवनिविश्वधेनोर्वीतयेवव्यापसस्तंती॥अरमयोनमसैतदर्णस्सु
तरणानिकृणोरिंद्रसिंधूनितिगामनुमंत्र्यविप्रंवस्त्रादिभिर्गांचसुव
र्णशृंगरूप्यखुरादिभिरलंकृत्यगंधादिनाभ्यर्च्यसगृहेत्यादिकामद
त्यंतंप्रयोगांतेइमांसोपस्करामुभयतोमुखींगांरुद्रदैवतां अमुकगो
त्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेनममेतिब्राह्मणकरेद
द्यात्॥विप्रस्तुविधिवत्प्रतिगृह्यॐस्वस्तीत्युक्त्वागोपुच्छंसस्पृष्ट्वाद
तांदक्षिणांचप्रतिगृह्यस्पृष्ट्वाइरावतीधेनुमती।स्योनापृथिविनोभ
वेतिमंत्रद्वयंजप्त्वाप्रतिगृह्णामित्वांधेनुंकुटुंबार्थेविशेषतः।स्वस्तिमे
वनुमेनित्यंरुद्रमातर्नमोनमइतिमंत्रेणगृहीतायादक्षिणपाणिना।
गर्भेनुसंतत्वेषामवेदमहंदेवानांजनिमानिविश्वाशतमापुरआय
सीररक्षंनधश्येनोजवसानिरदीयमिति।मंत्रेणानेनगर्भमाकर्षेत्॥
अनंतरकृत्यमाहव्यासः।निष्क्रांतेग्निमुपसमाधायदेवान्पितॄन्नदीः
पर्वतान्वनस्पतीनुदधीन्नागानोषधीस्तर्पयेत्तत्क्रमेणमंत्राः।येदे
वासः।उग्रंतत्त्वा।इमंमेगंगे।अद्भिःसुतोमतिभिःश्चनोहितः।वन
स्पते।समुद्रज्येष्ठाः।अहिरिवभोगैः।मधुवाताइतिनदनुपृथिवींत
र्पयेत्।मंत्रास्तु।इलेधावामहीद्यौः।उर्वीपृथिवी।गौरीर्मिमाय।ततःस
मस्तव्याहृतिभिश्चतुरशीत्याज्याहुतीर्हुत्वाब्राह्मणान्भोजयित्वास्व
स्त्ययनंवाचयित्वागामनुव्रज्यप्रागुक्तांगोमतींविद्यांजप्त्वापायसमात्रंभु
जीत॥इत्युभयतोमुखीगोदा[illegible] इतिकंठमनड्वाहंसर्वदे

रलंकृतं॥दत्वाप्रजापतेर्लोकान्विशोकः प्रतिपद्यत इत्यादिसुवर्णशृंग
रौप्यलांगूलादिकमपिभारतोक्तं बोध्यं॥इति कंठप्रवलगलकंबलं॥अथवै
तरणीब्रह्मवैवर्ते॥यासावैतरणीनामयमद्वारेमहानदी॥शतयोजनवि
स्तीर्णापृथुत्वेसामहासरित्॥अगाधाऽनंतरूपाचदृष्टमात्राभयावहा
॥तथापतंतितत्रैवमर्त्याःक्रंदमानाःसुदारुणं।तच्छृणुष्वनरव्याघ्रक
थ्यमानंयुधिष्ठिर॥अयनेविषुवेपुण्येव्यतीपातेदिनक्षये।पाटलांम
थवाकृष्णांकुर्याद्वैतरणींशुभां।स्वर्णशृंगींरौप्यखुरांकांस्यपात्रसदोह
नां॥कृष्णवस्त्रयुगच्छन्नांसप्तधान्यसमन्वितां।कार्पासद्रोणशिख
रेआसीनंताम्रभाजने॥यमंहैमंप्रकुर्याद्वैलोहदंडसमन्वितं।मत्तम
हिषमारूढंमूढपाशंकरेपरे॥इक्षुदंडमयंबध्वाउडुपंपट्टबंधनैः।उडु
पोपरितांधेनुंसूर्यदेहसमुद्भवां।कुलायकाशयेहिद्वानछत्रोपानहसं
युतां।इममुच्चारयेन्मंत्रंसंघृतोदकमंडलुं।अथप्रयोगः॥पूर्वोक्ताय
नादिकालेमृत्युकालेवापाटलांकृष्णांवाहेमशृंगाद्युपेतांकृष्णवस्त्र
युगच्छन्नांसप्तधान्यसंयुक्तांछत्रोपानद्युगलसंयुतांगांसंनिधाप्यद्रो
णमितकार्पासशिखरेताम्रपात्रंतत्रचमहिषारूढंदक्षिणवामहस्त
धृतलोहदंडपाशंहैमंयमंस्थापयित्वातदग्रेपट्टबद्धेक्षुदंडनिर्मितप्ल
वोपरितांधेनुंस्थापयित्वाउदङ्मुखंप्रतिग्रहीतारंउपवेश्यस्वयंप्राङ्मु
खः॥यमद्वारेमहाघोरेयासावैतरणीनदी।तर्तुकामोददाम्येनांतुभ्यं
वैतरणींचगामितिमंत्रेणगामधिवासयेत्॥ततःतिथ्यादिसंकीर्त्यवैत
रणींतर्तुंगांदास्यइतिसंकल्प्यप्रतिमायामक्षतपुंजेवाविष्णुंगांविप्रं
चसंपूज्य।अद्येत्यादि।अमुकगोत्रायामुकशर्मणेब्राह्मणायाहंयम
द्वारेस्थितायानद्याःसुखेनोत्तरणार्थमिमांवैतरणींगांसवत्सांसोपस्क
रांहैमयममूर्तिसहितांविष्णुदेवतांसंप्रददे॥दानमंत्रः।विष्णुरूपद्वि
जश्रेष्ठभूदेवपंक्तिपावन।सदक्षिणामयातुभ्यंदत्तावैतरणीचगौरि
ति।ततःसुवर्णदक्षिणांदत्वातद्धेनोःपुच्छंप्रगृह्यानुव्रजेत्।तत्रमंत्रः।
धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहाभये।उत्तितीर्षुरहंदेविवैतरण्यैनः
मोनमः॥इतिवैतरणीदानं॥अथमहिष्याः।भविष्योत्तरे॥महिषीदान
माहात्म्यंकथयामियुधिष्ठिर॥पुण्यंपवित्रमायुष्यंसर्वकामप्रदंसुखं।

चंद्रसूर्यग्रहे पुण्ये कार्त्तिक्यामयने तथा। शुक्लपक्षे चतुर्दश्यां सूर्यसं
क्रांतिवासरे॥ यदा वा जायते वित्तं चित्तं च कुरुनंदन। तदैव देया महि
षी संसारभयभीरुणा॥ प्रथमप्रसूता तरुणी सुशीला दोषवर्जिता॥
सुवर्णशृंगतिलका घंटाभरणभूषिता॥ रक्तवस्त्रवृता रम्या ताम्रदोहनिका
न्विता। पिण्याकपिटकोपेता सहिरण्या च शक्तितः। पिण्याकपिटकं व
ल्लिपूर्णं वंशादिपात्रं॥ सप्तधान्ययुता देया ब्राह्मणे तां पयस्विनीं। प्र
तिग्रहस्मृतस्तस्याः पृष्ठदेशे स्वयंभुवा॥ दानवाक्यं तु॥ ॐ अद्येत्या
दि। इंद्रादिलोकपालानां या राज्यमहिषी शुभा। महिषीदानमाहा
त्म्यात्ता सतु मे कामदा सदा। धर्मराजस्य माहात्म्ये यस्याः पुत्रः प्रति
ष्ठितः। महिषासुरस्य जननी या सास्तु वरदा ममेति मंत्रमुक्त्वामुक
गोत्रायामुकशर्मणे ब्राह्मणाय इमां महिषीं सुवर्णशृंगतिलकाभ
रणां घंटाताम्रदोहनिकां पिण्याकपिटकसप्तधान्यपादुकोपेतां
यमदैवतां आयुष्यसुखमहाराज्यकामस्तुभ्यमहं संप्रददे इति
स्त्री तु राजमहिषीत्वकामेति। जयकाम इति क्षत्रियः। धनधान्यका
म इति वैश्यः। एवं शूद्रेणापि स्वाभिलषितफलमुल्लेख्यं। ईश्वरप्री
तिकाम इति वा सर्वैः। ततो दक्षिणां दद्यादिति। अनेन विधिना दत्त्वा
महिषीं द्विजपुंगवे। सर्वान्कामानवाप्नोति इह लोके परत्र च। या स्त्री
ददाति महिषीं सा राजमहिषी भवेत्॥ महाराजः पुमान् राजन् व्या
सस्य वचनं यथा। यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत्। वैश्य
स्तु धान्यधनवान् शूद्रः सर्वार्थसंयुत इत्यादि फलश्रुतिरिति तत्रैवो
क्ता॥ इति महिषीदानं। अथ मेष्याः। भविष्योत्तरे॥ शृणु पार्थ परं दानं
सर्वकिल्बिषनाशनं। यद्दत्त्वा विविधं पापं सद्यो विलयमृच्छति। सुव
र्णरोमां सौवर्णीं प्रत्यक्षां वा सुशोभनां। सुवर्णतिलकोपेतां सर्वालं
कारभूषितां। कौशेयपरिधानां च दिव्यचंदनभूषितां। दिव्यपुष्पो
पहारां च सर्वधातुरसैर्युतां। सप्तधातुसमायुक्तां फलपुष्पवतीं तथा
। शतेन कारयेत्तां तु सुवर्णस्य प्रयत्नतः। यथाशक्त्याथवा कुर्याद्वित्त
शाठ्यं न कारयेत्। अयने विषुवे पुण्ये ग्रहणे शशिसूर्ययोः। दुःस्वप्नद
र्शने चैव जन्मर्क्षे तिथिसंक्षये। यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितं।

तदैवदानकालःस्याद्यतोःनित्यंहिजीवितं॥दद्यात्तीर्थेगृहेवापियत्रवा
रमतेमनः।तत्रसंस्थाप्यदेवेशमुमयासहशंकरं॥ब्रह्माणंसहगाय
त्र्यासश्रीकंश्रीधरंतथा।रत्यासहतथानंगंलोकपालान्ग्रहानपि।तांस्तु
पूज्यविधानेनगंधपुष्पनिवेदनैः।उमाशंकररूपं।चर्मांबरश्चतुर्बाहुः
शूलखड्गांगपाशभृत्।वृषांकःशंकरोगौरीवामोत्संगेस्थिताभवेदिति
।ब्रह्मगायत्र्यादिरूपाणितुप्रागुक्तानि।तानिचयथाशक्तिसौवर्णानिका
र्याणि॥तदग्रेकारयेद्धोमंतिलाज्येनमहीतले॥अलंकृत्यद्विजंशांतं
वासोभिःपरिपूज्यच॥तल्लिंगमंत्रैर्होमश्चकर्तव्योज्वलितेनले।तत
स्तांतिलकुंभस्थांलवणाभिमुखांस्थितां।पूजयित्वाविधानेनमंत्रमे
तमुदीरयेत्।मंत्रःप्रयोगेज्ञेयः।एवमुच्चार्यतांदद्याद्ब्राह्मणायकुटुंबि
ने॥नाभिभाषेत्ततोदत्त्वानमुखंवावलोकयेत्॥दुष्टप्रतिग्रहणतोवि
प्रोभवतिपातकी॥अपुत्रोलभतेपुत्रमधनोलभतेधनं।दत्त्वादानंशु
भंकांतिंकीर्त्तिंचविपुलांतथेति॥अथप्रयोगः॥उक्तायनादिकाले
गृहेतीर्थेवादानाद्यंत्यादि०सर्वपापक्षयपूर्वकपुत्रधनकांतिकीर्त्ति
प्राप्तिकामोमेषीदानंकरिष्यइतिसंकल्पयेत्॥दुःस्वप्नेतुतत्सूचिता
निष्टनिवृत्तिकामइतिविशेषःप्रतिमासुतंदुलपुंजेषुवाउमासहितं
शंकरंगायत्रीसहितंब्रह्माणंश्रीसहितंश्रीधरंरतिसहितमनंगंलोक
पालान्ग्रहांश्चसंपूज्येतत्प्रकाशकैर्मंत्रैराज्याक्ततिलैरष्टाष्टाविंश
त्यादिसंख्ययाहुत्वासुवर्णतिलकाद्यलंकारकौशेयचंदनपुष्पसुवर्ण
रूप्यादिसप्तधातुसप्तरससकलपुष्पयुतांमध्यस्थापिततिलकुंभांस
न्मुखस्थापितलवणांमेषींचसंपूज्यायोमलक्ष्मांसमज्जाद्यैःसर्वोपक
रणैःसदा।जगतःसंप्रवृत्तासित्वामतःप्रार्थयेप्सितं।वाङ्मनःकायज
नितंयत्किंचिन्ममदुष्कृतं॥तत्सर्वविलयंयातुत्वद्दानानुपसेवितमि
ति मंत्रमुक्त्वातिथ्यादि संकीर्त्यसर्वपापक्षयपूर्वकपुत्रधनकांतिकी
र्त्तिप्राप्तिकामोदुःस्वप्नसूचितानिष्टनिवृत्तिकामोवेमांमेषींसर्वोपस्क
रयुतामुकगोत्रायामुकशर्मणे विप्रायाहंसंप्रददेनममेतिदत्त्वाविप्रे
णयथाविधिप्रतिग्रहेकृतेनदक्षिणांदद्यात्।एवमेवसुवर्णमेषीदेया।
प्रतिगृहीतविप्रसंभाषणमुखावलोकनेवर्जयेत्॥इतिमेषीदानम्।

अथाजादानंसुमंतुः।अजापालोमहीपालोह्यजादानैर्दिवंगतः।अयनेविषु
वेचैवयुगादौग्रहणेषुच।अमावास्यामजादानंपौर्णमास्यांचशस्यते।विधिं
स्यप्रवक्ष्यामिविश्वामित्रेणनिर्मितं।सर्वरत्नोपसंपन्नांसप्तधान्योपरिस्थितां।
वस्त्रमाल्योपमालांतुभूषितांपशुजानकीं।वज्रनेत्रांहेमशृंगांताम्र
पृष्ठांसदोहनां।ससुतांरौप्यपादांचकुष्टौदध्यान्तिलोदकं।गोदानव
त्प्रयुंजीतमंत्रेणानेनसंयुतः।मंत्रवासोअजेम्लक्ष्योपत्तसंपत्नेरसु
भे।।सृष्टातंदहमेपापंजन्मांतरशतैःकृतमिति।।एवंसमुच्चरेद्गत्वा
विप्रहस्तेजलंक्षिपेत्।।प्रीयतांयज्ञनाथायवासुदेवायवैनमः।एवंप्रद
क्षिणीकृत्यसूर्यंसमवलोकयेत्।।ततश्चगच्छेत्स्वगृहंहरिंसंस्मृत्यमा
नवः।येबाल्येकृताःपापाःकामतोवाप्यकामतः।यौवनेवार्द्धकेकौमारे
प्रसंगेनापिपातकं।।अजादानस्यमाहात्म्यान्निष्पापोजायतेनरः।पु
त्रपौत्रसमायुक्तःसदाचारमतिश्चिरं।विष्णुधर्मोत्तरे।उष्ट्रंवागर्दभं
वापियःप्रयच्छतिसुद्विजे।अजासुरभ्रंतुरगंयश्चाशक्त्यासदक्षिणं
।अलकांससमासाद्ययक्षेंद्रैःसहमोदते।सर्वकामसमृद्धात्मासर्व
यज्ञफलंलभेत्।।तस्मादजांप्रयच्छस्वततःसर्वमवाप्स्यसि।मंत्रे
णानेनविधिवदलंकृत्यस्वशक्तितः।।त्वंपूर्वंब्रह्मणासृष्टापवित्रंभव
तीपरं।।त्वत्प्रसूतौस्थितायज्ञास्तस्माच्छांतिकरीभव।प्रतिगृह्णीत
तांचैवपृष्टदेशेद्विजोत्तम।।दानवाक्यंतुमहिषीदानवत्तज्ज्ञेयं।अ
जाविकंचमहिषंदत्वाविप्रायशक्तितः।घृतक्षीरवहानद्योयत्रतत्र
समेधते।। इत्यजादानं।।अथमेषदानं।बौधायनः।अग्नेर्मांद्यंभवे
त्तस्ययस्येताग्निविनाशनः।।वक्ष्यामितत्प्रतीकारंयथोक्तंब्रह्मणा
पुरा।।पलार्द्धेनतदर्द्धेनतदर्द्धेनाथवापुनः।राजतंकारयेत्सौम्यमग्ने
र्वाहनमुत्तमं।सौवर्णाश्चखुराःकार्याःश्वेतवस्त्रेणवेष्टयेत्।।श्वेत
माल्यैःश्वेतगंधैर्धूपंदद्यान्मधूत्कटं।।तंडुलोपरिसंस्थाप्यपुनस्तं
पूजयेत्सुधीः।तंडुलानांपरीमाणंद्रोणद्वयमुदाहृतं।आग्नेय्यांदिशि
होमश्चसमिदाज्यतिलैरपि।।आचार्येणविनीतेनसर्वशास्त्रार्थवे
दिना।।वह्न्यर्चनंचकर्तव्यस्तत्रमंत्रानिमान्शृणु।अग्निर्मूर्द्धेतिमंत्रे
णसमिद्धोमःप्रशस्यते।अग्नेनयेत्याज्यहोमोप्यग्निनाग्निस्तिलास्तैः।

मंत्राध्यायोक्तमार्गेण चाग्निसंस्थापनं भवेत्। अग्नेः प्रागुत्तरे देशे शुभं
कुंभं च विन्यसेत्॥ प्रणीतामोक्षपर्यंते कृते स्नानं विधीयते॥ आपो हि
ष्ठेत्यपि त्र्यृचं हिरण्येति चतुर्ऋचं॥ पवमानानुवाकेन मार्जयेद्रोगिणं
ततः॥ शन्नोवातानुवाकेन शांतिं चापि प्रकल्पयेत्। तस्यैहुतवते रोगी
प्राङ्मुखो यद्युदङ्मुखः॥ पूजितायथ शास्त्रत्वात् दद्यात्तं तु सदक्षिणं
देवानां यो मुखं हव्यवाहनः सर्वपूजितः॥ तस्य त्वं वाहनं पूज्यं देवैः सं
द्रैर्महर्षिभिः॥ अग्निमांद्यं पूर्वकर्मविपाकोत्थं तु यन्मम॥ तत्सर्वं नाश
यक्षिप्रं जाठराग्निं प्रवर्द्धयेति॥ दानमंत्रः॥ एवं विप्राय यो दद्यात् मेषं वी
ह्नमुत्तमं॥ बलवानग्निवान्मर्त्यो जीवेद्वर्षशतं पुनः। ततः स्वबंधुभि
र्विप्रैः स्नात्वा भुंजीत मानवः॥ इति मेषदानं॥ अथ पर्वतदानानि। मा
त्स्ये। प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः। गुडाचलस्तृतीयः
स्याच्चतुर्थो हेमपर्वतः। पंचमस्तिलशैलः स्यात्षष्ठः कार्पासपर्वतः।
सप्तमो घृतशैलः स्याद्रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वद्दशमः
शर्कराचलः॥ वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः। अयने विषुवे चैव
व्यतीपाते दिनक्षये॥ शुक्लपक्षे तृतीयायामुपरागे शशिक्षये॥ विवा
होत्सवयज्ञेषु द्वादश्यामथवा पुनः॥ शुक्लायां पंचदश्यां वा पुण्यर्क्षे
वा विधानतः॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः॥ तीर्थे वाय
तने वापि गोष्ठे वा भवनांगणे॥ मंडपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखं
॥ प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधानतः। प्राच्यामुदीच्यां चैकमे
व द्वारं। न चत्वारि द्वाराणीत्यर्थः। द्वारैक्याच्च तोरणमप्येकमेव द्वार
परिष्कारणमप्येकमेव द्वारपरिष्कारणत्वात्तस्य मंडपो द्वादशहस्तो
न्यथा द्रोणसहस्रादिमितपर्वतनिवेशायोगात्॥ गोमयेनोपलिप्ता
यां भूमावास्तीर्य वै कुशान्। तन्मध्ये पर्वतं कुर्याद्विष्कंभैः पर्वतैर्युतं।
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः। मध्यमः पंचशतिकः कनि
ष्ठः स्यात्त्रिभिः शतैः॥ मेरुर्महान्व्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रय
संयुतः स्यात्। वृक्षत्रयं मंदारपारिजातकल्पवृक्षरूपं। मध्ये कल्पत
रुर्दक्षिणोत्तरयोर्मंदारपारिजातौ। शक्रो हरिचंदनसंतानाव पि पूर्व
पश्चिमयोः स्यातां। निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचल इति व-

पूर्वेणशुक्ताफलवज्र
स्यमाणवाक्यत्वात्।शर्कराचलदानेतावश्यकं।पूर्वेणशुक्ताफलवज्र
युक्तोयाम्येनगोमेदकपुष्परागैः।पश्चाच्चगारुत्मतनीलरत्नैःसौम्ये
नवैडूर्यसरोजरागैः।सरोजरागःपद्मरागः।मुक्ताफलादीनिपूर्वादि
दिग्वस्थितराजतसृंगेषुनिवेश्यानि।मंदरः।श्रीखंडखंडैरभि तः
प्रवालवल्लिताग्रितःशुक्तिशिलातलःस्यात्।ब्रह्माचविष्णुर्भगवान्पुरा
रिर्दिवाकरोयत्रहिरण्मयःस्यात्।मूर्द्धव्यवस्थागतमत्सरेणकार्या
स्त्वनेकेचतथाद्विजौघाः।ब्रह्मादिप्रतिमाब्रह्मांडदाने।द्विजाःपक्षि
णोमुनयश्चहेमाः।अनेकपदस्वरसादितिमदनः।चत्वारिशृंगाणि
चराजतानिनितंबभागेपिचराजतःस्यात्।आर्द्रैक्षुवंशाहृतकंद
रस्तघृतोदकप्रस्रवणश्चदिक्षु।शुक्लांबराण्यंबुधरावलीस्यात्पू
र्वेणपीतानिचदक्षिणेस्यात्।वासांसिपश्चादथकर्बुराणिरक्तानि
चैवोत्तरतोघनाली।आर्द्रैक्षवएववंशाः।घृतमेवोदकं।शुक्लाण्यं
बराण्येवमेघावली।रौप्यान्महेंद्रप्रमुखानथाष्टौसंस्थाप्यलोका
धिपतीन्क्रमेण।महेंद्रादिलक्षणंतुलादाने।नानाफलालीचस
मंततःस्यान्मनोरमंमाल्यविलेपनंच।वितानकंचोपरिपंचवर्णम
म्लानपुष्पाभरणंसितंच।इत्थंनिवेश्यामरशैलमग्र्यमेरोस्तुवि
ष्कंभगिरीन्क्रमेण।तुरीयभागेनचतुर्दिशंतुसंस्थापयेत्पुष्पवि
लेपनाढ्यान्।प्रतिविष्कंभपर्वतं।तुरीयांशेनचतुर्थांशेनविष्कंभप
र्वतान्कारयेत्।पृथगिविलवणाचलेवक्ष्यमाणत्वात्।इतिमदनः
।वास्तवंतुएकेनैवचतुर्थांशेनचत्वारोपिविष्कंभपर्वताःकार्याइति
तत्रैववक्ष्यते।पूर्वेणमंदरमनेकफलैश्चयुक्तंयुक्तंगणैःकनकभ
द्रकदंबचिन्हं।कामेनकांचनमयेनविराजमानमाकारयेत्कुसुम
वस्त्रविलेपनाढ्यं।क्षीरारुणोदसरसीचवनेनचैवरौप्येणशक्ति
घटितेनविराजमानं।कामरूपमाह।विश्वकर्मा।चापबाणधरः
कामोरतिप्रियात्सुमध्यमः।आलापीनंदनेरागीरूपवान्विश्वमो
हकइति।चेहमेरुसंनिधानाद्धान्यांतरानुपदेशाच्चमंदरोपिद्रोहि
मयएवेतिमदनः।तत्र।विष्कंभपर्वतंचैवयवैःकुर्याच्चपूर्वतइति
ब्रह्मांडोक्तेः।गणैरितिनराकृतिभिस्त्रिभिर्गणैर्युक्तं।कपिंजलवत्।

कनकेति कनकनिर्मितो भद्रकंदरः। तद्रूपं प्रयोगे ज्ञेयं॥ क्षीरेति क्षीर
चूर्णेन रौप्येणारुणोदाख्येन सरसा रौप्येण वनेन च विराजमानं॥ याम्ये
न गंधमदनश्च निवेशनीयो गोधूमसंचयमयः कलधौतजंब्वा॥
हैमेन यक्षपतिना घृतमानसेन वस्त्रैश्च राजतवनेन च संयुतः स्यात्
।कलधौतजंब्वा हैमजंबूवृक्षेण। यक्षपतिरूपं हेमाद्रौ श्रीपद्मे। ह्रस्व
मापिंगनेत्रं च गदिनं पीतविग्रहं॥ पुष्पकस्थं धनाध्यक्षं ध्यायेच्छि
वसखं सदेति॥ सघृतेन राजतेन मानससरसा॥ पश्चात्तिलाचल
मनेकसुवर्णपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तं॥ आकारयेद्र
जतपुष्पमयेन तद्वद्वस्त्रान्वितं दधिसितोदसरस्तथाग्रे॥ आकार
येत्कुर्यात्॥ दधीति सद्धिराजतं पार्श्वं सितोदाख्यं सरः। संस्थाप्य
तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि माषमयं सवस्त्रं। पुष्पै
श्च हेमवरपादपशेखरं तमाकारयेत्कनकधेनुविराजमानं। माक्षी
कभद्रसरसा च वनेन तद्वद्रौप्येण भास्करवतावयुतं विधाय। संस्था
प्येति शैलानं पूर्वोक्ततिलाचलानुवादकं। अथेत्यादिः पुनः पार्श्ववि
धिः। माक्षीकेति समधुरूपभद्राख्यसरसेत्यर्थः। होमश्चतुर्भिरथवे
दपुराणविद्भिर्दान्तैरनिंद्यचरितैः कृतिभिर्द्विजेंद्रैः। पूर्वेण हस्तमित
मत्र विधाय कुंडं कार्यं तिलैर्यवघृतेन समित्कुशैश्च ब्रह्मांडे। इंद्राद्या
लोकपालाश्च तेषां होमो विधीयते। तल्लिंगैश्चैव मंत्रैश्च समिद्भिरथ
वा तिलैः॥ पौरुषेण तु सूक्तेन ब्रह्मादीनां विधीयते॥ तथा व्याहृतिभि
र्होमस्तिलैराज्येन चैव हि। अष्टशतं तु होतव्यं सर्वकामसमृद्धयइ
ति॥ वसुरुद्रादित्यसमुच्चायकौ लोकपालाश्चेति चकारः ग्रहादिकाम
धोन्वंतानामष्टीति देवतानां तिलयवघृतौदुंबरसमी कुशैः पंचभि
र्द्रव्यैः पृथक्प्रत्येकं दशसंख्यया होम इति त्रिपंचाशदधिकं सहस्रं स
र्वा आहुतय इति दानविवेके। तन्न। तिलैर्यवघृतेन समित्कुशैरिति पृ
थक्समस्तया च तृतीयया साधनवैषम्यात्॥ समित्कुशैरिति द्वन्द्वाप
क्षया कर्मधारयस्य लघुत्वात्॥ ब्रह्मांडवचो विरोधात्त्रिपंचाशदधिक
सहस्रसंख्याप्रचयशिष्टयाः कथमप्यसंगतेश्च। समिधश्च कुशाइ
ति कर्मधारयः॥ तेन तिलानां पृथक्साधनता। यवघृतयोर्व्यासक्ता

समस्तयोस्तृतीयाकृतेः॥ कुशानांतु पृथगितित्रीण्येव होमसाधनानि॥ तैः प्रत्येकमष्टसंख्य याग्रहादिहूत्रिंशद्देवताहुत्वेंद्रादिदशलोकपालेभ्योष्टवसुभ्यएकादशरुद्रेभ्योद्वादशादित्येभ्यश्वतिलैः समिद्भिर्वाप्रत्येकमष्टसंख्ययाहुत्वासूर्यकामदेवधनदहंसकामधेनुभ्यः समस्तव्याहृतिभिस्तिलैराज्येनचजुहुयात्॥ अष्टोत्तरशतंतत्रचतुःपंचाशत्तिलैः चतुःपंचाशदाज्येन। रात्रौचजागरमनुहूतगीततूर्यैरावाहनंचकथयामिशिलोच्चयानां। मंत्रावक्ष्यंते। एवमभ्यर्च्यतंमेरुंमंदरंचाभिपूजयेत्॥ एवमामंत्र्यतान्सर्वान्प्रभातेविमलेपुनः स्नात्वाथगुरवेदद्यान्मध्यमंपर्वतोत्तमं॥ विष्कंभपर्वतान्दद्यादृत्विग्भ्यः क्रमशोबुधः॥ गाश्चदद्याच्चतुर्विंशदथवादशपार्थिव। शक्तितः सप्तवाष्टौवापंचदद्याद्शक्तिमान्। एकांवागुरवेदद्यात्कपिलांचपयस्विनीं॥ ऋत्विग्भ्योदक्षिणादेयायथासंभवकांचनं॥ पर्वतानामशेषाणामेषएवविधिः स्मृतः। तएवपूजनेमंत्रास्तएवोपस्कराः स्मृताः॥ ग्रहाणांलोकपालानांब्रह्मादीनांचसर्वशः स्वमंत्रेणैवसर्वेषुहोमः शैलेषुपच्यते॥ उपवासीभवेन्नित्यमशक्तोनक्तमिष्यते॥ विधानंसर्वशैलानांक्रमशः शृणुपार्थिव॥ दानकालेषुयेमंत्राः पर्वतेषुचयत्फलं॥ मंत्राः प्रयोगेज्ञेयाः॥ अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः। धान्यपर्वतरूपेणपाहितस्मान्नगोत्तम। अनेनविधिनायस्तुदद्याद्धान्यमयंगिरिं॥ मन्वंतरशतंसाग्रंब्रह्मलोकेमहीयते॥ अप्सरोगणगंधर्वैराकीर्णेनविराजितः। विमानेनदिवः पृष्ठमायातिसुरसेवितः॥ कर्मक्षयाद्राजराज्यंप्राप्नोतीहनसंशयः॥ इतिधान्यादिशैलदानं॥ अथसाधारणः प्रयोगः। यजमानः पूर्वोक्तेदेशेष्टादशहस्तंमंडपंकुंडंचपूर्ववत्कुर्यात्॥ तस्यचप्राच्यामुदीच्यांवैकमेवद्वारंतोरणंचनचत्वारि। कुंडंचैकमेवप्राच्यांहस्तमात्रायहवेदी। अथशैलनिर्माणं॥ मध्येकुशानास्तीर्यसहस्रद्रोणमितराजशालिनामकमहाव्रीहिभिरुत्तमंतदर्द्धेनमध्यमं द्रोणशतत्रयेणाधममितिमेरुंशक्त्याकल्पयेत्। द्रोणपरिभाषायामुक्तं। मेरोरुपरिमध्येकल्पवृक्षंप्रागादिदि

श्चहरिचंदनमंदारसंतानपारिजातान्॥ अशक्तौमंदारकल्पवृक्षपारि
जातनरवः स्थाप्याः। शर्कराचलेतुसंतानहरिचंदनावावश्यकौ॥ पू
र्वादिदिक्षुब्रह्मविष्णुरुद्रसूर्यप्रतिमाःपक्षिसंघान्मुनिसंघांश्च। तथा
प्रागादिदिक्चतुष्टयेक्रमेणमुक्ताफलहारैर्गोमेदपुष्परागैर्मरक
तनीलरत्नैर्वैडूर्यपद्मरागैःसमसंख्याकैर्भूषितंरौप्यशृंगचतुष्कं
तद्बहिर्दिगष्टके रौप्यमिंद्रादिलोकपालप्रतिमाष्टकंसमंतात् श्रीखंडले
तानांस्थानेप्रवालानिशिलानांमुक्ताःप्रागादिषुमेघानांश्वेतपीतकर्बु
ररक्तवस्त्राणिवंशानामिक्षून् जलस्यघृतंगंधपुष्पनानाफलानिच
परितःसंस्थाप्यपंचवर्णवितानकंतथैवपार्श्वेचोपरिबध्नीयात्। ततो
ग्रवेमेरोश्चषोडशांशेनप्राच्यांमंदरं॥ तदुपरिनररूपंगणनायंकदंब
चसौवर्णकदंबमूलेहेमःकामदेवः। अरुणोदसरःस्थानेदुग्धपूर्णरौ
प्यपात्रंरौप्यंचैत्ररथाख्यंवनंगंधपुष्पफलवस्त्राणिचस्थापयेत्। या
म्येमेरुषोडशांशगोधूममयंगंधमादनंतदुपरिसौवर्णजंबूरसंतन्मू
लेसौवर्णमुदक्षुरंधनदंमानससरःस्थानेसघृतंरौप्यपात्रेरूप्यंगं
धर्वाख्यंवनंनानाफलवस्त्रमाल्यानिचस्थापयेत्॥ पश्चिमेमेरुषोड
शांशतिलमयंविपुलपर्वतंतदुपरिसौवर्णंपिप्पलंतन्मूलेप्राङ्मुखः
सौवर्णहंसप्रतिमांसितोदसरःस्थानेपयोदधिपूर्णंरौप्यपात्रंरौप्यंवै
भ्राजवनंवस्त्रफलमाल्यानिचस्थापयेत्॥ उत्तरेमेरुषोडशांशमित
माषैःसुपार्श्वपर्वतंतदुपरिसौवर्णवटंतन्मूलेदक्षिणाभिमुखींसव
त्सांसुवर्णधेनुंभद्रसरःस्थानेमधुपूर्णरौप्यपात्रंरूप्यंसावित्रवनंव
स्त्रफलादिचस्थापयेत्। एवंवक्ष्यमाणपर्वतेष्वपिमेरुद्रव्यचतुर्थां
शेनलवणादिद्रव्येनप्रागादिषुविष्कंभादिपर्वताज्ञेयाः॥ अथयजमा
नोद्येत्याद्युक्ताःऽप्सरोगंधर्वयुतविमानकरणकस्वर्लोकगमनसाग्रम
न्वंतरकालदेवलोकवासोत्तरभूर्लोकराजत्वकामईश्वरप्रीतिकामोवा
श्वोधान्यपर्वतदानमहंकरिष्ये इतिसंकल्प्य गणेशपूजास्वस्तिवाच
नमातृपूजानांदीश्राद्धाचार्यर्त्विग्वरणतन्मधुपर्कमंडपपूजनाचार्यवि
नियोगांतंसामान्यप्रयोगोक्तंकुर्यात्॥ आचार्योपिब्रह्मादिस्थापनादि
कुंडसमीपस्थितकलशस्थापनांतंकुर्यात्। अत्रर्त्विजःप्राक्कुंडेग्रहादिहो

त्रिंशद्देवताभ्यस्तन्मंत्रैस्तिलैः पृथक्पृथग्घृताक्तान्यैस्तिलैः पृथक्पृथ घृताभ्यामिलिताभ्यां कुशैश्चेतिविधिः साधनैः प्रत्येकमष्टवारं हुत्वा द शलोकपालेभ्योऽष्टवसुभ्यएकादशरुद्रेभ्योद्वादशादित्येभ्यश्च प्रत्येक मष्टसंख्यया समिद्भिस्तिलैर्वा जुहुयुः। मंत्रास्तु सामान्यप्रयोगेउक्ताः। ततः पुरुषसूक्तेन ब्रह्मविष्णुशिवेभ्यः समिद्भिस्तिलैर्वा सूर्यकामदे वधनदहंसकामधेनुभ्यस्तिलैर्घृतेन चाष्टोत्तरशतं जुहुयुः। तत्र चतुः पंचाशत्तिलैः चतुःपंचाशद्घृतेनेति। ततो यजमानो मेरुमावाह्य पूजये त्। तत्र मंत्राः। त्वं सर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेष्वमरपर्वतना शयाशु। क्षेमं विधत्स्व कुरु शांतिमनुत्तमां नः संपूजितः परमभक्तिमता मयाद्य। त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः। मूर्तामूर्तं परं बीज मतः पाहि सनातन। यस्मात्त्वं लोकपालानां पाहि त्वं विश्वमंदिरं। रुद्रादि त्यवसूनां च ततः शांतिं प्रयच्छ मे। यस्मादशून्यममरैर्नारीभिश्च शिरस्त व। तस्मान्मामुद्धराशेषदुःखसंसारसागरात्। अथ मंदरस्य। यस्माच्चैत्र रथेन त्वं भद्राश्वप्रमुखेन च। शोभसे मंदरक्षिप्रमलं तुष्टिकरो भव। अथ गंधमादनस्य। यस्माच्चूडामणिर्जंबूद्वीपे त्वं गंधमादन। गंधर्व वनशोभावानतः कीर्तिर्दृढास्तु मे। अथ विपुलस्य। यस्मात्त्वं केतु मालेन वैभ्राजेन वनेन च। हिरण्मयाश्वत्थशिरास्तस्मात्पुष्टिर्दृढा स्तु मे। अथ सुपार्श्वस्य। उत्तरैः कुरुभिर्यस्मात्सावित्रेण वनेन च। सु पार्श्व शोभसे नित्यमतः श्रीरक्षयास्तु मे। ततः सर्वैर्जागरणे कृते स्नाना दि कृत्वा कुंडसमीपस्थकलशजलैर्यजमानमभिषिंचेयुः। ततः कर्ता गृहीतकुसुमो मेरुं प्रदक्षिणीकृत्योपतिष्ठेत्। मंत्रास्तु। अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः। अन्नाद्भवंति भूतानि जगदन्नेन व र्तते। अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः। धान्यपर्वतरूपेण पा हि तस्मान्नमो नमः। इत्युपस्थाय पुष्पांजलिं प्रक्षिप्य नमस्कृत्य प्रा ङ्मुख उपविश्योदङ्मुखेभ्यो गुर्वादिभ्यः क्रमेण गिरीन्दद्यात्। प्रयो गस्तु। अद्येत्यादि देशकालकीर्तनांते अमुकगोत्रायामुकवेदायामु कशाखाध्यायिने अमुकशर्मणे गुरवे सरोगंधर्वगणायुतविमानकर णकस्वर्लोकगमनानंतरसार्वमन्वंतरशतावधिसमयदेवलोकनि-

वासोत्तरभूलोकराजत्वप्राप्तिकामः इमंधान्यमेरुंसौवर्णमंदरा
द्रिंरुक्षपंचकसौवर्णब्रह्मविष्णुरुद्रार्कप्रतिमायुक्तमुक्ताहीरकादि
भूषितरौप्यमयशृंगचतुष्कशोभितंरूप्यमयेंद्रादिलोकपालप्रति
मारौप्यमयनितंबान्वितमिक्षुवंशावृतकंदरंदिक्चतुष्टयस्थापित
रौप्यपात्रस्थितघृतोदकप्रस्रवणादिकचतुष्टयस्थापितसुक्लपीत
कर्बुररक्तवस्त्रांबुदधरंनानाफलमाल्यवितानाद्युपकरणसंहितं
तुभ्यंसंप्रददेनममेतितद्धस्तेदद्यात्॥सचओंस्वस्तीतिप्रतिगृह्य
स्वशाखीयांकामस्तुतिंपठेत्॥ततःकृतैतद्दानप्रतिष्ठार्थमिमागाः
स्तुभ्यंदक्षिणात्वेनसंप्रददेनममेतिदद्यात्॥तत्रचतुर्विंशतिपक्षे
अष्टौगागुरवेचतस्रश्चतस्रश्चर्त्विग्भ्यःदशपक्षेषड्गुरवेए
कैकामृत्विग्भ्यःअष्टसप्तपक्षयोश्चतस्रःतिस्रोवागुरवेएकैका
मृत्विग्भ्यःपंचपक्षेसर्वेभ्यएकैकां॥एकपक्षेगुरवएवतांकपिलां
ऋत्विग्भ्यःसुवर्णमितिमदनादयःएवंपूर्वस्थितंमंदराख्यविष्कं
भगिरियवमयंसौवर्णनानाफलभद्रकदंबतन्मूलस्थसौवर्णका
मदेवप्रतिमंमरुणोदसरःस्थानीयक्षीरपूरितरौप्यपात्ररौप्यघटि
तचैत्ररथवनवस्त्रनानाफलादियुतंतुभ्यमृत्विजेसंप्रददेनमम
तिदद्यात्॥इमंदक्षिणस्थितगोधूममयंगंधमादनंविष्कंभपर्वतं
सौवर्णजंबूवृक्षमूलस्थितसौवर्णकुबेरप्रतिमान्वितंमानससरः
स्थानीयघृतपूरितरौप्यपात्ररूप्यघटितगंधर्ववनवस्त्रनानाफ
लमाल्यवितानादियुतंतुभ्यमितिदद्यात्।इमंपश्चिमस्थितंति
लमयंविपुलाख्यंविष्कंभपर्वतंसौवर्णपिप्पलतन्मूलस्थितसौव
र्णहंसप्रतिमान्वितंसितोदसरःस्थानीयदधिपूरितरजतपात्रंर
जतघटितवैभ्राजवनवस्त्रफलादियुतंतुभ्यमितिदद्यात्।इममु
त्तरस्थितंमाषमयंसुपार्श्वाख्यंविष्कंभपर्वतंहेमवटतन्मूलस्थित
हेमधेनुप्रतिमायुतंभद्रसरःस्थानीयमधुपूरितरौप्यपात्ररौप्यघ
टितसावित्रवनवस्त्रफलादियुतंतुभ्यमितिदद्यात्॥लवणादिदा
नपक्षेप्रयोगेधान्यपदस्थानेलवणादिपदंप्रक्षेप्यंतत्तत्स्थानिन
अतत्रवक्ष्यामः।आचार्याद्यनुज्ञयान्येभ्योपिदानपक्षेगुणाभ्याम-

न्येभ्यश्च ब्राह्मणेभ्यः संप्रददइतिदद्यात्॥ ततोग्रहवेद्यां यजमानो
देवताःसंपूज्यनमस्कुर्यात्। गुरुस्तान्विसर्जयेत्। यजमानस्तुमंड
पादिग्रहप्रतिमादिगुरवेप्रतिपाद्यब्राह्मणान्संभोज्यभूयसींदक्षि
णांदत्वायस्यस्मृत्येतिप्रमादात्कुर्वतामितिचोक्त्वाविष्णुंस्मृत्वा
कर्मेश्वरेसमर्प्यविप्राशिषोगृहीत्वासुहृन्मित्रादियुतोभुंजीतेति
॥इतिधान्यादिमेरुसाधारणप्रयोगः। अथलवणाचलः पाद्मे। उत्त
मःषोडशद्रोणःकर्तव्योलवणाचलः। मध्यमःस्यात्तदर्द्धेनचतुर्भिर
धमःस्मृतः। वित्तहीनोयथाशक्त्याद्रोणादूर्ध्वंतुकारयेत्। चतुर्थां
शेनविष्कंभपर्वतान्कारयेत्पृथक्। अत्रपृथगित्युक्तेःप्रत्येकंमेरुद्र
व्यचतुर्थांशपरिमितेनलवणेनविष्कंभपर्वतचतुष्कं। अयंचन्यायः
सर्वविष्कंभगिरिषुइतिमदनः। युक्तंतुचतुर्थांशेनेतिविधेयचतुर्थां
शगतैकत्वविवक्षयैकस्यैवचतुर्थांशेनचत्वारोपिविष्कंभाचलाःका
र्याःपृथक्त्वानुगिरिगतानूद्यतेनचतुर्थांशगताविधीयतइति। विधा
नंपूर्ववत्कुर्याद्ब्रह्मादीनांचसर्वदा॥ तद्वद्धेमतरून्सर्वांल्लोकपालान्नि
वेशयेत्। सरांसिकामदेवादींस्तद्वच्चात्रनिवेशयेत्। पूर्ववद्धान्या
चलवत्। सौभाग्यरससंभूतोयतोयंलवणोरसः। तदात्मकत्वेन
चमांपाहिपापान्नमोनमः। यस्मादन्नरसाःसर्वेनोत्कटालवणंवि
ना। प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्रयच्छमे॥ विष्णुदेहसमुद्भू
तंयस्मादारोग्यवर्द्धनं। तस्मात्पर्वतरूपेणपाहिसंसारसागरात्
॥अनेनविधिनायस्तुदद्याल्लवणपर्वतं॥ उमालोकेवसेत्कल्पंततो
यातिपरांगतिं। कल्पपर्यंतमुमालोकप्राप्तिपूर्वककल्पावधिउमा
लोकनिवाससमनंतरपरमगतिकामइतिमदनः। तन्मूलंतुचिं
त्यम्॥ अथगुडपर्वतः॥ पाद्मे। अथातःसंप्रवक्ष्यामिगुडपर्वतमु
त्तमं। यत्प्रदानान्नरःस्वर्गंप्राप्नोतिसुरपूजितं। उत्तमोदशभिर्भा
रैर्मध्यमःपंचभिर्मतः। त्रिभिर्भारैःकनिष्ठःस्यात्तदर्द्धेनाल्पवित्त
वान्॥ भारःपलसहस्रद्वयं। तुलास्त्रियांपलशतंभारःस्याद्विंशति
स्तुलेत्यमरः। तद्वदामंत्रणंपूजांहेमवृक्षसुरार्चनं। विष्कंभपर्वतां
स्तद्वत्सरांसिवनदेवताः। होमंजागरणंतद्वल्लोकपालाधिवासनं॥

धान्यपर्वतवत्कुर्यादिमंमंत्रमुदीरयेत्।यथादेवेषुविश्वात्माप्रवरश्चज
नार्दनः।सामवेदस्तुवेदानांमहादेवस्तुयोगिनां॥प्रणवःसर्वमंत्राणां
नारीणांपार्वतीयथा।तथारसानांप्रवरःसदैवेक्षुरसोमतः।ममतस्मा
त्परांलक्ष्मींददस्वगुडपर्वत।यस्मात्सौभाग्यदायिन्याभ्रातात्वंगुडप
र्वत।निवासश्चापिपार्वत्यास्तस्मान्मांपाहिसर्वदा।अनेनविधिना
यस्तुदद्याद्गुडमयंगिरिं॥पूज्यमानःसगंधर्वैर्गौरीलोकेमहीयते।पु
नःकल्पशतांतेतुसप्तद्वीपाधिपोभवेत्॥आयुरारोग्यसंपन्नःशत्रुभि
श्चापराजितः।अत्रसकलपापक्षयोत्तरंगंधर्वपूज्यमानत्वपूर्वककल्प
शतावधिगौरीलोकप्राप्त्यनंतरंसंपन्नापराजितायुरारोग्यपूर्वकसप्त
द्वीपाधिपतित्वकामईश्वरप्रीतिकामोवेतिसंकल्पेविशेषोन्यत्सर्वंपू
र्ववत्॥अथसुवर्णाचलः।पाद्मे॥अथपापहरंवक्ष्येसुवर्णाचलमुत्तमं
।यस्यप्रसादाद्भवनंवैरिंचंयातिमानवः।उत्तमःपलसाहस्रोमध्यमः
पंचभिःशतैः।तदर्द्धेनाधमस्तद्वदल्पवित्तोपिशक्तितः।दद्यादेकपला
दूर्ध्वंयथाशक्त्याविमत्सरः।धान्यपर्वतवत्सर्वंविदध्याद्राजसत्तम॥
विष्कंभशैलांस्तद्वच्चऋत्विग्भ्यःप्रतिपादयेत्।नमस्तेब्रह्मगर्भायब्र
ह्मबीजायवैनमः।यस्मादनंतफलदस्तस्मात्पाहिशिलोच्चय।यस्मा
दग्नेरपत्यंत्वंयस्मात्तेजोजगत्पतेः॥हेमपर्वतरूपेणतस्मात्पाहिनगो
त्तम॥अनेनविधिनायस्तुदद्यात्कनकपर्वतं।सयातिपरमंब्रह्मलोक
मानंदकारकं॥तत्रकल्पशतंतिष्ठेत्ततोयातिपरांगतिं।अत्रगुर्वादिभ्यो
मेर्वादिदानमल्पद्रव्यविषयं।बहुद्रव्येतुतुलापुरुषवदर्द्धंचतुर्थंवांशं
गुरवेन्यत्तुतदाज्ञयान्येभ्योपिविशिष्टेभ्योदेयमितिहेमाद्रिः।अत्रस
कलपापक्षयोत्तरशतकल्पावधिआनंदकारकब्रह्मलोकभोगानंतर
परमगतिकामइतिदानवाक्यं॥अथतिलाचलः॥पाद्मे।उत्तमोदशभि
र्द्रोणैःपंचभिर्मध्यमोमतः॥त्रिभिःकनिष्ठोराजेंद्रतिलशैलःप्रकीर्तितः
।पूर्ववच्चापरंसर्वंवृक्षविष्कंभकादिकं।दानमंत्रान्प्रवक्ष्यामियथाचमु
निपुंगव।यस्मान्मधुवनेविष्णोर्देहस्वेदसमुद्भवाः।तिलाःकुशाश्चमा
षाश्चतस्माच्छंनोभवत्विह।हव्यकव्येषुयस्माच्चतिलैरेवाभिरक्षणं॥
भवादुद्धरशैलेंद्रतिलाचलनमोस्तुते।इत्यामंत्र्यचयोदद्यात्तिलाचलम

त्तुत्तमं।सवैष्णवंपदंयातिपुनरावृत्तिदुर्लभं॥दीर्घायुष्यमवाप्नोतिपुत्रं
पौत्रंचमानवः।पितृभिर्देवगंधर्वैःपूज्यमानोदिवंव्रजेत्॥सकलपापक्षय
दीर्घायुष्यपुत्रपौत्रसमन्वितानंतरपितृदेवगंधर्वपूर्वकपूज्यमानत्वपूर्व
कद्युलोकगमनसमनंतराक्षयवैष्णवपदप्राप्तिकामइतिदानवाक्यं।अ
थार्द्धोदयव्रतंतिलपर्वतदानं।स्कान्दे।पूर्वाण्हेसंगमेस्नात्वाशुचिर्भूत्वा
समाहितः।सर्वपापविमुक्त्यर्थंनियमस्थोभवेन्नरः।नियममंत्रस्तु।त्रिदे
वस्यव्रतंदेवाःकरिष्येभुक्तिमुक्तिदाः।भवंतुसन्निधौमेद्यत्रयोदेवास्त्रयोग्न
यइति।ब्रह्मविष्णुमहेशानांसौवर्णपलसंख्यया।प्रतिमास्तुप्रकर्त्त
व्यास्तास्त्रिभिर्द्विजोत्तमाः।साग्रंशतत्रयंप्रोक्तंद्रोणानांतिलपर्वतः।ब्रह्म
विष्णुशिवप्रीत्यैदातव्यंतुगवांत्रयं।हिरण्यभूमिधान्यादिदानंविभ
वसारतः।मध्यान्हेतु नरःस्नात्वाशुचिर्भूत्वासमाहितः।तिलपर्वत
मध्यस्थंपूजयेद्देवतात्रयं॥आदौब्रह्मपूजा॥नमोविश्वसृजेतुभ्यंस
त्यायपरमात्मने॥देवायदेवपतयेयज्ञानांपतयेनमः॥ॐब्रह्मणेन
मःपादौहिरण्यगर्भायऊरुभ्यां।जंघाभ्यांपरमात्मनेवेधसेइतिगुह्ये
।पद्मोद्भवायवस्तौहंसवाहनायकटिदेशे॥शतानंदायवक्षसिसावित्री
पतयेबाहुषु॥ऋग्वेदायनमःपूर्ववक्त्रे।यजुर्वेदायदक्षिणेसामवेदाय
पश्चिमे।अथर्ववेदायउत्तरे।चतुर्वक्त्रायशिरसि।हंसायनमः।कपा
लायनमः।ततोलोकपालादिपूजनंस्वमंत्रैः।हिरण्यगर्भपुरुषप्रधान
व्यक्तरूपयः।प्रसादसुमुखोभूत्वापूजांगृण्हनमोस्तुते।अनंतायन
मःपादौ।विश्वरूपायऊरुभ्यां।मुकुंदायजानुभ्यां।गोविंदायजंघाभ्यां
गुह्येप्रद्युम्नदेवाय।पद्मनाभायनाभौ।लंबोदरायउदरे।वक्षसिकौस्तु
भवक्षसे।चतुर्भुजायबाहुषु।वदनेविश्वतोमुखाय।शतसहस्रशि
रसे।मौलौ।आदित्यचंद्रनयनदिग्बाहोदैत्यसूदन।पूजांदत्तांमयाभ
क्त्यागृहाणकरुणापरेतिविष्णुप्रार्थनं।महेश्वरमहेशाननमस्तेत्रि
पुरांतक।जीमूतकेशायनमोनमस्तेवृषभध्वज।ईशानायनमःपादौ
जंघाभ्यांचंद्रशेखरं।जानुभ्यांपशुपतिर्देवश्चोरुभ्यांशंकरःस्मृतः।उ
माकांतायगुह्येतुनाभौवैनीललोहितः।उदरेकृत्तिवासाश्चवक्षोनागो
पवीतिने।अंधकारेप्रसन्नात्मानमोलोकांतकायच॥पूजांदत्तांमया

भक्त्या गृहाण वृषभध्वजेति महेशप्रार्थना॥ इति पूजाक्रमः प्रोक्तो
मंत्रैरेतैः प्रयत्नतः॥ आचार्यं पूजयेद्भक्त्या पूजालंकारभूषणैः॥ हस्त
मात्रा कर्णमात्रा पीठछत्रं कमंडलुः॥ श्वेतवस्त्रयुगं देयं ब्रह्मणे सर्व
मूर्त्तये॥ पीतवस्त्रयुगं विष्णोर्लोहितं शंकरस्य तु। पंचामृतेन स्नप
नं पूजनं कुसुमैः स्वकैः॥ कमलैस्तुलसीपत्रैर्बिल्वपत्रैरखंडि
तैः॥ तत्कालसंभवैर्दिव्यैः पूज्या देवा यथाक्रमं॥ यथाशक्त्या प्रक
र्तव्यं व्रतमेतत्सुदुर्लभं॥ जीवितं प्राणिनामेतदनित्यं निश्चितं यतः॥
अथ व्रतस्य करणविधानं शृणु तत्वतः। देवतात्रयमुद्दिश्य शास्त्रदृष्टे
न कर्मणा। प्रजापतये विश्वकर्मणे रुद्राय नमो नमः। इत्यनेनैव मं
त्रेण वन्हिं संस्थाप्य भक्तितः॥ ततो ब्रह्मविष्णुशिवानां नाममंत्रेणा
ष्टोत्तरसहस्रमष्टोत्तरशतं वा तिलहोमः॥ अथ होमावसाने तु गां च
दद्यात्पयस्विनीं॥ हेमशृंगीं रूप्यखुरां घंटाभरणभूषितां॥ ताम्रपृ
ष्ठीं रूप्यखुरां सर्वोपस्करसंयुतां॥ सदक्षिणां शुभां पुण्यां ब्राह्मणा
य निवेदयेत्॥ तेन दत्तं हुतं जप्तमिष्टं यज्ञसहस्रधा। कृतकृत्यो
भवेद्विप्रो व्रतस्यास्य प्रभावतः इत्यह्लीदये तिलाचलदाने॥ अथ का
र्पासाचलः॥ पाद्मे। कार्पासपर्वतस्तद्वद्विंशद्भारैरिहोदितः। दशभि
र्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः। भारेणाल्पधनो दद्याद्वित्तशा
ठ्यविवर्जितः॥ धान्यपर्वतवत्सर्वमासाद्य मुनिसत्तम॥ प्रभातायां
तु शर्वर्यां दद्यादिदमुदीरयन्॥ त्वमेवावरणं यस्माल्लोकानामिह स
र्वदा॥ कार्पासाचल तस्मात्त्वमघौघध्वंसनो भव। एवं कार्पासशैलें
द्रं यो दद्यात्सर्वसन्निधौ। रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह
सकलपापक्षयपूर्वककल्पावधिरुद्रलोकनिवासानंतरभूलोकरा
जत्वकाम इति दानवाक्यं॥ अथ घृताचलः। पाद्मे। अथातः संप्र
वक्ष्यामि घृताचलमनुत्तमं। तेजोमयमिदं दिव्यं महापातकना
शनं। विंशत्या घृतकुंभानामुत्तमः स्याद्घृताचलः। मध्यमस्तु तदर्द्धे
न तदर्द्धेनाधमः स्मृतः॥ अल्पवित्तः प्रकुर्वीत द्वाभ्यामिह विधानतः। कुं
भः पलसहस्रात्मकः परिमाणविशेषः। विष्कंभपर्वतांस्तद्वच्चतुर्भा
गेन कल्पयेत्॥ शालितंदुलपात्राणि कुंभोपरि निवेशयेत्॥ अत्र तु कुं

भःपात्ररूपएव॥सचप्रायोघृतस्यद्रवत्वेनतद्धारणयोग्यपरिमाणः
।तदुपरिचतंदुलपात्रं।एवंविष्कंभाचलेष्वपिएतदभिप्रायेणैवपा
त्राणीतिवहुवचनं॥कारयेत्संहतान्सर्वान्यथाशोभंविधानतः।वे
ष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः॥धान्यपर्वतवच्छेषंविधान
मिहपठ्यते।।अधिवासनवत्कुर्वीततद्वद्धोमंसुरार्चनं॥प्रभातायांतु
शर्वर्यांगुरवेविनिवेदयेत्॥घृताचलमितिशेषः।विष्कंभपर्वतांस्त
द्वदृत्विग्भ्यःशांतमानसः।संयोगाद्घृतमुत्पन्नंयस्मादमृततेज
सः॥तस्माद्घृतार्चिर्विश्वात्माप्रीयतामत्रशंकरः।यस्मात्तेजोमयंब्र
ह्मघृतेतच्चव्यवस्थितम्॥घृतपर्वतरूपेणतस्मान्नःपाहिभूधरः
॥अनेनविधिनादद्याद्घृताचलमनुत्तमं॥महापातकयुक्तोपिलोक
मायातिशांकरं॥हंससारसयुक्तेनकिंकिणीजालमालिना॥विमाने
नार्कवर्णेनसिद्धविद्याधरार्चितः॥विचरेत्पितृभिःसार्द्धंयावदाभूतसं
प्लवं॥अत्रसकलपातकनाशनपूर्वकहंससारसयुक्तकिंकिणीजा
लमाल्यर्कवर्णविमानकरणकशंकरलोकागमनपूर्वकसिद्धवि
द्याधरार्चितत्वविशिष्टपितृसहितभूतसंहारावधिकविचरणका
मइतिदानवाक्यं॥अथरत्नाचलःपाद्मे॥अथातःसंप्रवक्ष्यामिरत्ना
चलमनुत्तमं।मुक्ताफलसहस्रेणपर्वतःस्याद्विजोत्तमः।मध्यमः
पंचशतिकस्त्रिशतात्वाधमःस्मृतः॥चतुर्थांशेनविष्कंभपर्वताःस्युः
समंततः।पूर्वेणवज्रगोमेदैर्दक्षिणेनेंद्रनीलकैः॥वज्रगोमेदैरित्यनं
तरंमंदरइतिशेषः।पद्मरागयुतैःकार्योविद्वद्भिर्गंधमादनः॥वैडूर्य
विद्रुमैःपश्चात्संमिश्रोविपुलाचलः॥पद्मरागैःससौवर्णैरुत्तरेणतुवि
न्यसेत्॥सुपार्श्वमितिशेषः।वज्रगोमेदैःसममसंख्यः।समंस्यादश्रुतिला
दितिन्यायात्।एवमुत्तरत्रापिज्ञेयं।धान्यपर्वतवच्छेषमत्रापिपरिक
ल्पते॥तद्वदावाहनंकुर्याद्वृक्षान्देवांश्चकांचनान्॥पूजयेत्पुष्पपानी
यैःप्रभातेचविसर्जनं॥दानानंतरमितिशेषः।पूर्ववद्गुरुऋत्विग्भ्यइ
मान्मंत्रानुदीरयेत्॥गुरुऋत्विग्भ्योदानायेतिशेषः॥यथादेवगणाःस
र्वेरत्नेष्वेवव्यवस्थिताः।त्वंचरत्नमयोनित्यमतःपाहिमहाचल॥य
स्माद्रत्नप्रसादेनतुष्टिंप्रकुरुतेहरिः॥महारत्नप्रसादेनतस्मान्नःपाहि

सर्वतः। अत्राप्युपक्रमादारभ्यविसर्जनादीनांव्युत्क्रमोक्तावपिचा
न्यपर्वतवद्दातिदेशिकःक्रमोज्ञेयः॥अनेनविधिनायस्तद्दद्याद्रत्नम
हागिरिं॥सयातिवैष्णवंलोकममरेश्वरपूजितः॥यावत्क----
ल्पशतंसाग्रंवसेदिहनराधिप॥रूपारोग्यगुणोपेतःसप्तद्वीपाधिपो
भवेत्॥ब्रह्महत्यादिकंयत्स्यादिहात्रामुत्रवाकृतं॥तत्सर्वंनाशमाया
तिगिरिर्वज्रहतोयथा॥अत्रानेकजन्मकृतब्रह्महत्यादिपापक्षयो
त्तरममरेश्वरपूजितत्वपूर्वकसाग्रकल्पशतावच्छिन्नविष्णुलोकनि
वासानंतररूपारोग्यगुणोपेतसप्तद्वीपाधिपत्यकाम इतिदानवाक्यं
॥अथरौप्याचलःपाद्मे।दशभिःपलसाहस्रैरुत्तमोराजताचलः।पंच
भिर्मध्यमःप्रोक्तस्तदर्द्धेनाधमःस्मृतः।अशक्तोविंशतेरूर्ध्वंकारये
च्छक्तितःसदा।विष्कंभपर्वतांस्तद्वत्तुरीयांशेनकल्पयेत्॥पूर्ववद्रा
जतान्कुर्यान्मंदरादीन्विधानतः।कलधौतमयांस्तद्वल्लोकेशानर्चये
द्बुधः।कलधौतंकांचनं।ब्रह्मविष्णुशिवान्कुर्यान्नितंबोत्रहिरण्मयः।रा
जतंस्याद्यदन्येषांकांचनंस्यात्तदत्रवै॥शेषंचपूर्ववत्कुर्याद्धोमजागर
णादिकं॥दद्यात्तद्वत्प्रभातेतुगुरवेरौप्यपर्वतं॥विष्कंभशैलान्ऋत्विग्भ्यः
पूज्यवस्त्रविभूषणैः॥इमंमंत्रंपठन्दद्याद्दर्भपाणिर्विमत्सरः।पितॄणांव
ल्लभंयस्माद्धरेर्विष्णोःशंकरस्यच॥रजतंपाहितस्मान्नःशोकसंसारसा
गरात्॥इत्थंनिवेद्ययोदद्याद्रजताचलमुत्तमं।गवांदशसहस्रस्यफ
लंप्राप्नोतिमानवः।सोमलोकेसगंधर्वैःकिन्नराप्सरसांगणैः।पूज्यमा
नोवसेद्धीमान्यावदाभूतसंप्लवं॥अत्रसकलपापक्षयदशसहस्रगो
दानफलावाप्तिपूर्वकगंधर्वकिन्नराप्सरोगणपूज्यमानत्वविशिष्टया
वदाभूतसंप्लवसोमलोकनिवासकाम इतिदानवाक्यं।अथशर्करा
चलःपाद्मे।अथातःसंप्रवक्ष्यामिशर्कराचलमुत्तमं॥यस्यप्रसादाद्वि
ष्ण्वर्करुद्रास्तुष्यंतिसर्वदा॥अष्टभिःशर्कराभारैरुत्तमःस्यान्महाचलः
चतुर्भिर्मध्यमस्तद्वद्भाराभ्यामधमःस्मृतः।भारेणवार्द्धभारेणकुर्याद्यः
स्वल्पवित्तवान्॥विष्कंभपर्वतान्कुर्यात्तुरीयांशेनमानवः॥धान्यपर्व
तवत्सर्वमासाद्यामरसंयुतं॥मेरोरुपरितद्वच्चस्थाप्यहेमतरुत्रयं।
मंदारःपारिजातश्चतृतीयःकल्पपादपः॥एतद्वृक्षत्रयंमूर्ध्निसर्वेष्व

विनिवेशयेत्॥ हरिचंदनसंतानौपूर्वपश्चिमभागयोः। निवेश्यौसर्वशै
लेषुविशेषाच्छर्कराचले। मंदरेकामदेवस्तुप्रत्यग्वक्त्रः सदाभवेत्॥
गंधमादनशृंगेचधनदःस्यादुदङ्मुखः। प्राङ्मुखोवेदमूर्तिश्चहंसः
स्याद्विपुलाचले। हैमीसुपार्श्वेसुरभिर्दक्षिणाभिमुखीभवेत्। धा
न्यपर्वतवत्सर्वमावाहनमखादिकं॥ कृत्वाथगुरवेदद्यान्मध्यस्थं
पर्वतोत्तमं। ऋत्विग्भ्यश्चतुरःशैलानिमान्मंत्रानुदीरयेत्। सौभा
ग्यामृतसारोयंपरमःशर्कराचलः। नत्समानंदकारीत्वंभवशैलेंद्र
सर्वदा। अमृतंपिबतांयेतुनिपेतुर्भुविशीकराः। देवानांतत्समुद्यं
पाहिनःशर्कराचल॥ मनोभवधनुर्मध्यादुद्भूताशर्करायतः। तन्म
योसिमहाशैलपाहिसंसारसागरात्। योदद्याच्छर्कराशैलमनेनवि
धिनानरः। सर्वपापविनिर्मुक्तःप्रयातिशिवमंदिरं। चंद्रादित्यप्रतीका
शमधिरुह्यानुजीविभिः। सहेमयानमातिष्ठेत्ततोविष्णुपुरंव्रजेत्॥
ततःकल्पशतांतेतुसप्तद्वीपोभवेत्॥ आयुरारोग्यसंपन्नोयावज्ज
न्मायुतत्रयं। भोजनंशक्तितःकुर्यात्सर्वशैलेष्वमत्सरः। सर्वत्राक्षी
रलवणमश्नीयात्तदनुज्ञया। भोजनंब्राह्मणानांसर्वत्रसर्वशैलेषु। दा
नात्पूर्वेद्युःकृतोपवासोदानानंतरंगुर्वाद्यनुज्ञयाक्षीरलवणम
श्नीयादित्यर्थः। सर्वत्रोपस्करान्सर्वान्प्रापयेद्ब्राह्मणालयं। पश्ये
दिमानल्पधनोपिभक्त्यास्मरेन्मनुष्यैरपिदीयमानं॥ शृणोतिभ
क्त्याथमतिंकरोतिनिःकल्मषःसोपिदिवंप्रयाति। दुःस्वप्नशमनमु
पैतिपठ्यमानेशैलेंद्रेभवभयभेदनेमनुष्यः। यःकुर्यात्किमुमुनि
पुंगवेहसम्यक्सन्नात्मासकलगिरींद्रसंप्रदानं। सन्नात्माप्रस
न्नचित्तः। अत्रसकलदुरितक्षयानंतरंकल्पशतावधिकविष्णुलो
कनिवासानंतरंसप्तद्वीपाधिपत्योत्तरजन्मायुतत्रयावच्छिन्नायु
रारोग्यकामइतिदानवाक्यं॥ अथशिखरदानं॥ विष्णुधर्मोत्तरे॥
शृणुराजन्प्रवक्ष्यामिशिखराणांयथाक्रमं॥ दानंदेयंयथायेनत
च्छृणुष्वसनातनं। माघशुक्लतृतीयायांमार्गशीर्षस्यवापुनः। तृ
तीयावाथवैशाखेशुक्लायांरोहिणीपुनः॥ प्रोष्ठपद्यांतृतीयायां
विशेषेणतुभार्गव॥ गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्कराः। ख

जूरतंडुलद्राक्षाक्षौद्रैर्मलयजेनच॥ फलैर्मनोहरैरम्यैः शिखराणि
प्रदापयेत्॥तेषामन्यतमंदद्याद्यथाश्रद्धंविधानतः।आत्मप्रमाणं
कुर्वीतशदेशाभ्यधिकंशुभं॥भुविगोमयलिप्तायामिक्षुपत्राणि
संस्तरेत्॥ततःकुर्वीतशिखरेगौरीस्थानमनुत्तमं॥द्विहस्तमूले
कर्त्तव्यंहस्तमात्रंशिरस्तथा॥भित्तिरिक्षुदलैःकार्यावेष्टयेद्रक्तवा
ससा॥दानद्रव्येणतन्मध्यंपूरयेद्भृगुनंदन।इक्षुपत्रकटेगौरींतः
स्योपरिनिवेशयेत्॥चतुर्भुजांहेममयींपूजयेत्कुंकुमेनतु॥गौरी
लक्षणमुक्तंदेवीपुराणे॥गौरींशंखेंदुवर्णाभांशर्वरीशनिषेवितां॥
वृत्तपद्मासनांरम्यांसाक्षसूत्रकमंडलुं॥वरदोद्यतरूपाढ्यांसर्व
माल्यफलप्रियां।वरदोद्यतेतिवरदाभयकरामित्यर्थः।वेष्टयेत्सू
क्ष्मवस्त्रेणदेवींशिखरमेवच॥अष्टांगंपूजयेद्गौरींमंत्रैरेतैस्तुभक्ति
तः।नमोभवान्यैपादौतुकामिन्यैजानुनीनमः।वामदेव्यैतथाचोरू
नाभिंचैवजगत्प्रियै।आनंदायैतुहृदयंनंदायैपूजयेत्स्तनौ॥सुभद्रा
यैमुखंपूज्यंललितायैनमःशिरः॥एवंपूज्यमहादेवींशिखरानभि
मंत्रयेत्॥यस्मान्निवासःपार्वत्याःशिखरत्वंसुरैःकृतः।तथानिवा
सःसर्वेषांतस्मान्मांत्राहिभक्तितः।तस्मान्मांपाहिभगवंस्त्वंगौरी
शिखरःसदा।एवमामंत्र्यशिखरंतृतीयायांतदग्रतः।ततःस्नात्वा
प्रभातेतुदद्यान्मंत्रेणभक्तितः।यस्मात्त्वंसर्वभूतानामुपरिष्टादव
स्थितः।तस्मान्मांपाहिभगवन्त्वंगौरीशिखरःसदा।एवमामंत्र्य
शिखरंतृतीयायांतदग्रतः।तस्माच्छिवःप्रीयतांमेतवदानेनसर्व
दा।अर्द्धंभागंचतुर्थंवापंचमंवापिवैगुरोः।दद्याच्छेषंतुबंधूनां
शिष्टानांस्वजनस्यच॥अनुजीविनांचभूतानांदुर्गतानांचधर्म
तः॥एवंदत्वातुशिखरंगौर्याभुंजीतवाग्यतः।समुक्तकेशःसंप्रा
प्यक्षीरंघृतमथापिवा॥विधिनानेनयोदद्याद्गौर्याःशिखरमुत्तमं
।सवसेद्भुवनेदेव्याःकल्पकोटिशतत्रयं॥पुण्यक्षयादिहायातो
जायतेपृथिवीपतिः।अनेनविधिनादेयंविधिहीनंनकारयेत्॥विधि
हीनंकृतंसर्वंतत्रदातुःफलंभवेत्॥अथप्रयोगः।यजमानोमाघ
शुक्लतृतीयायुक्तकालेपूर्वाह्णेगणेशपूजास्वस्तिवाचनमातृका

वसोर्द्धारापूजानांदीश्राद्धानिकरिष्यमाणशिखरदानांगतयाक रिष्यइतिसंकल्प्यनानिकृत्वामासपक्षाद्युक्त्वादौर्भाग्यदौर्गत्या भावपूर्वककल्पकोटिशतावच्छिन्नगौरीभवननिवासानंतरपृथि वीपतित्वकामः श्रीगुडशिखरदानमहंकरिष्यइतिसंकल्प्यतत्र पूर्वोक्तप्रकारेणसऋत्विजमाचार्यंवृत्वासंपूज्यलिप्तायांभूमावि सुपत्राणिसंस्तीर्यमूलेद्विहस्तविस्तारमुपरिहस्तमात्रविस्तारं चतुरस्रंस्वशरीरार्द्धप्रमाणतः श्रद्धेशाधिकमुच्चमिक्षुदलमयं कुसूलंकृत्वातदभ्यंतरेरक्तवस्त्रेणसंवेष्ट्यगुडादिदेयद्रव्येणापू र्योपरीक्षुपत्रकटमास्तीर्यतत्रक्षौमादिवस्त्रोपरिखंडेदुवर्णा भांचंद्रमौलिंपद्मासनामक्षसूत्रकमंडलुधरवराभयकरांगौरीं हैमींसशिखरांसूक्ष्मवस्त्रेणावेष्ट्यकुंकुमादिनासंपूज्य। भवा न्यैनमःपादौ। कामिन्यैजानुनी। कामदेव्यैऊरू॥ जगन्धात्र्यैनमोना भिं। आनंदायैहृदयं। नंदायैस्तनौ। सुभद्रायैमुखं॥ ललितायैशिरः संपूज्यपुष्पांजलिमादायशिखरंत्रिःप्रदक्षिणंकृत्वा। यस्मान्नि वासःपार्वत्याःशिखरत्वंस्मरैर्द्धतः। तस्मान्मांपाहिभगवन्नलंगौ रीशिखरःसदेत्यनुमंत्र्यपुष्पांजलिंप्रक्षिप्यनमस्कृत्यजागरणंकु र्यात्॥ ततःप्रभातेकृतनित्यक्रियःशिखरपश्चिमभागमुपविश्य मासपक्षाद्युक्त्वाऽमुकगोत्रायामुकवेदायामुकशाखाध्यायिने मुकशर्मणेब्राह्मणायदौर्भाग्यदौर्गत्यभावपूर्वककल्पकोटिश तत्रयावच्छिन्नगौरीभवननिवासानंतरपृथिवीपतित्वकामोहंतु भ्यमन्येभ्यश्चविप्रेभ्यइदंशिखरंगौरीप्रतिमायुतंसंप्रददेनमम इतिदत्त्वासुवर्णंचदत्त्वाविप्रान्संभक्तकेशःप्राश्नीयात्॥ इक्षुवस्त्रा दिशिखरदानेनतुतत्तद्द्रव्येणकुसूलपूरणसंकल्पवाक्यादौचतत्तत्स योगइतिविशेषः। अन्यत्तुल्यं। इतिगुडादिशिखरदानप्रयोगः॥

अथभद्रनिधिदानं॥ वह्निपुराणे। पुण्यांतिथिंप्राप्यतुपौर्णमासीं तथोपरागेशशिसूर्ययोर्वा॥ चतुर्युगादिष्वयनद्वयेवामबोधनेप्रस्व पनेचविष्णोः॥ कुर्यादथौदुंबरमेकंकुंभंहिरण्यमानेनयथास्वश क्त्या। हिरण्यमानेनांतःप्रसेप्रस्थभारादिमितसुवर्णरत्नादिनायथा

कुंभः पूर्णः स्यादित्यर्थः। तथापिधानं चस्फराजतं स्याद्धिरण्यभारेणतुपू
रयेत्तत्। तदर्द्धतोऽर्द्धेन तदर्धतो वा स्वशक्तितः स्वर्णपलैः शतेन। तद
र्द्धमर्द्धेन तु वित्तशक्त्यापलत्रयादूर्ध्वमपि प्रकुर्यात्॥ तत्ताम्रभांडेक
नकं निधाय सवज्रनीलोत्पलपद्मरागं॥ समुक्तवैडूर्यसविद्रुमं च
तद्राजतं पात्रमधोमुखं स्यात्। तद्राजतं पूर्वोक्तं पिधानपात्रं। एवं तु
तं भद्रनिधिं सविद्वान्कृत्वासने प्रावरणोपयुक्ते॥ प्रावरणमुत्तरच्छद
स्तेनोपयुक्ते सहिते॥ कुशोत्तरे दर्पणचामराढ्यं सपादुकोपानहच्छ
त्रयुक्तं। ततोऽस्य मध्योत्तमयुग्मयुक्तं संपूजयेन्मंत्रवरैरपैतैः॥ आ
दौनु पंचामृतमाप्य विष्णुं संस्नाप्य संसारहरं समर्च्य। तथैव संप्राव
कमेव हुत्वा आमंत्रयेद्भद्रनिधिं ततस्तं। श्रीखंडकर्पूरसकुंकुमेन पंचा
क्षरं नामशिवः प्रलिख्य॥ नमस्तथोंकारयुतं च पात्रे तद्राजते प्येवम
थार्चयेत्तं॥ मंत्रः प्रयोगे वक्ष्यते॥ एवं पूज्यविधानेन ततो विप्रमथा
र्चयेत्॥ किरीटांगदनिष्काग्र्यकुंडलांगुलिभूषणैः अलंकृत्य हरिं
यद्वा पीतांबरधरं ततः॥ पूजयेदच्युतं ध्यात्वा मंत्रेणानेन भक्तिमान्
। मंत्रः प्रयोगे वक्ष्यते॥ एवं पूज्य हरिं ध्यात्वा तं द्विजं विष्णुरूपिणं॥
ततो भद्रनिधिं दद्यान्मंत्रेणानेन मानवः। स्वगोत्रोच्चारणेनादौ विष्णो
र्नाम महात्मनः। यवदर्भतिलैः सार्द्धमुदकं संपरित्यजेत्॥ पितृसंता
रणार्थाय नित्यानंदविवृद्धये॥ सर्वाघौघविनाशाय विष्णोर्दानमया
कृतं। तदन्नेन सरत्नेन धातुत्रययुतेन च॥ सक्षौमांबरयुक्तेन सादर्श
पादुकेन च॥ सासनेन सच्छत्रेण चामरोपानहेन च। सदानंदविधा
नेन प्रीयतां विष्णुरीश्वरः। एवमुच्चार्य तं दद्याद्द्विजाय हरिरूपिणे॥
गोदानविधिना दद्याद्धेमसंख्यां न कीर्तयेत्॥ प्रकीर्तितं कोटियुगा
युतं फलं प्रगोपितं कल्पगणैर्न संशयः। इतीदमाख्यायन कीर्त्तयेत्सुधी
र्निधानमध्ये निहितं त्रयद्भवेत्। एवं कृते स्यान्मनुजः कृतात्मा भवे
न्न च स्यान्मरणं कदाचित्। प्रयाति विष्णोः पदमव्ययं तत् शिवात्म
कानंदमयं स साक्षात्। इति भद्रनिधिदानं॥ अथ प्रयोगः। पूर्वोक्ते काले
यजमानस्तिथ्याद्युल्लिख्य सकलपापक्षयसर्वपितृतारणानंदविवृ
द्धिशिवात्मकानंदमयपादुकोपानहच्छत्राणिवासायुतरतो हरिहरो

स्थापयित्वा संपूज्य प्रागुत्तरे देशे स्वगृह्यानुसारेण अग्निस्थापनादि
कर्म कृत्वा घृताक्तैस्तिलैरष्टोत्तरशतादिसंख्यया हुत्वा। श्रीखंडकुंकु
मकर्पूरैः प्रणवादि श्रियै नम इति पंचाक्षरमंत्रं निधिकुंभे पिधाने च लि
खित्वा तेनैव भद्रनिधिमुपचारैः संपूज्य गृहीतकुसुमांजलिर्भद्रनि
धिं प्रदक्षिणीकृत्य। त्वया संस्तामरसिद्धयक्षविद्याधरेंद्रोरगकिन्न
रैश्च। गंधर्वविद्याधरदानवेंद्रैः स्तुतं स्तुतं विष्णुमिदं नमस्ते। समग्रसं
सारकरी त्वमेव विभोः सदानंदमयी च माया। समस्तकल्याणवपुः
समाधि हरिप्रिये भद्रनिधे नमस्ते इत्युपस्थाय पुष्पांजलिं प्रक्षिप्य
नमस्कृत्वोदङ्मुखमाचार्यं किरीटांगदनिष्काग्र्यकुंडलांगुलिभू
षणपीतवासश्चंदनादिभिः संपूज्य॥ तं विष्णुरूपिणं ध्यात्वा कुसुम
पाणिः। भूदेवोसि विभो नित्यं नित्यानंदमयो हरे। हर मे दुष्कृतं कमल
पाकर नमोस्तु ते॥ भूदेव भगवन्ब्रह्मन् भवभंगकरेश्वर॥ भवभूतिक
रो जिष्णोः प्रभविष्णो नमोस्तु ते इति। पुष्पांजलिनाभ्यर्च्य कुशयव
तिलजलान्यादाय अमुकशर्माहं सकलपापक्षयसकलपितृसं
तारणनित्यानंदविवृद्धिशिवात्मकानंदमयाव्ययविष्णुपदप्राप्ति
कामोमुकगोत्रायामुकशर्मणे मुकशाखाध्यायिने इमं भद्रनिधिं सरत्न
पात्रपात्मकं सक्षौमांबरयुग्ममादर्शपादुकोपानहच्छत्रासनोपकरण
सहितं विष्णुरूपिणे तुभ्यमहं संप्रददे इति दद्यात्। ततः सुवर्णदक्षिणां
दत्वा विप्रान्संभोज्य भूयसीं दक्षिणां दत्वा यस्य स्मृत्या प्रमादात्कुर्वतां
कर्मेत्युक्त्वा कर्मेश्वरार्पणं कुर्यादिति भद्रनिधिप्रयोगः। अथानंदनिधि
दानं। वन्हिपुराणे भगवद्वाचो गरुडं प्रति। तस्मान्निधानं शृणु सर्वदा
तनःप्रभावदं नित्यफलप्रदं च। ऐश्वर्यदं मोक्षदमक्षयं यद्धातुत्रयो
द्भूतमनेकरत्नं। कारयेत्कार्त्तिक्यां तु वा माघ्यां वा माधवेपि वा। अयने
विषुवे वापि मन्वादिषु युगादिषु॥ चंद्रसूर्योपरागे च स्वशक्त्योदुंबरं
घटं। औदुंबरं ताम्रमयं॥ पिधानं राजतं तेन हून्मध्ये सौवर्णमुत्सृजे
त्। सुवर्णमेव सौवर्णं। नानारत्नवरैः पूर्णं नानानामभिरावृतं। हेमरा
जतताम्रोत्थैस्सरित्कैरपि पूरितं। रिक्तैरीतिः। नानानामशतादूर्ध्वम
युतादपि शक्तितः। एकं नानापदं बहुप्रकारवाचि। परं महाराष्ट्रमसि

हूनाणकवाचि॥शक्त्यापलसहस्रेणशतेनार्द्धशतेनवा॥तदर्द्धार्द्धे
नवाराजन्पलाद्धीनंनकारयेत्।कार्यंतद्विगुणंदेव्यावित्तशाठ्यम
कुर्वता॥उक्तनाणकातिरिक्तंपलादूर्ध्वपलसहस्रावधिशक्त्याहे
मापिस्विपेदितिमदनः।राजतेनाथताम्रेणरत्नैर्वावस्त्रसंवृतं।रा
जतेनपिधानेनताम्रेणापिघटेनच॥नानाधान्योपरिस्थाप्यकल्पो
क्तैरर्चयेत्सदैः।नानाधान्यान्यष्टादशधान्यानि।पद्मानिमंत्राः।पौरा
णिकंपुरस्कृत्यस्वगृह्यंवातदनुज्ञया॥पौराणिकोगुरुः।कृतक्रियोपि
सान्निध्येविष्णोरीशस्यचांद्रज।इमंसमुच्चरेन्मंत्रंकुशपाणिःप्रसन्न
धीः।मंत्रःप्रयोगेज्ञेयः।एवंपूज्यविधानेननित्यानंदनिधिंसुधीः।स
सिद्धार्थकदूर्वाभिःसकुशाक्षतचंदनैः।सिद्धार्थकादिभिरानंदनैः॥
सिद्धार्थकादिभिरानंदमेवंसंपूज्येतियोजना।तिललाजासुसंपूर्णंभू
मावुदकमुत्सृजेत्॥मंत्रेणानेनविधिवत्कल्पोक्तेनखगोत्तम॥
मंत्रःप्रयोगेज्ञेयः।यशःश्रेयोभिवृद्ध्यर्थंमातापित्रोस्तथात्मनः।पुरा
णन्यायमीमांसावेदवादिभ्यएवच॥एवमुत्सृज्यउदकंविप्रेभ्यःप्र
तिपादयेत्॥संविभज्ययथाशास्त्रंनकंचिदपमानयेत्॥महादा
नमिदंयस्मात्तस्मादेकोपिनार्हति॥अथान्येकेचिदिच्छंतिसम
स्तविधिपारगाः।यज्ञदानव्रतानांचसोप्येकोर्हतितद्वदे।एवंयःकु
रुतेदानंनित्यानंदनिधेःपरं॥परंपदमवाप्नोतिसंसारेस्मिन्निरंतरं
॥दानानामप्यशेषाणामनंतंफलमश्नुते।नित्यानंदविधानस्यप्रदा
नादपवर्गभाक्॥इत्यानंदनिधिदानं।अथप्रयोगः॥तत्रयजमा
नःपूर्वाह्णेकालेकुशतिलयवजललाजाआदायसकृद्दानपक्षे
देशकालकीर्त्तनांतेवेधःपदाधिकरणासकृद्राज्यकरणोत्तर
स्वकर्मशेषसंचितत्रेतायुगकालीननिजानुजीविसहिताखि
लमहीराज्यावाप्तिपूर्वकनित्येशानपदप्राप्त्यनंतरकल्पावधिका
नलश्रीकवैद्याधरपदराज्यलाभोत्तराव्ययवैष्णवपदप्रीतिदीर्घ
पुष्यविच्छिन्नसंतानआनंदनिधिमहादानमहंकरिष्यइतिकृतसंक
ल्पःस्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यवरणानिकुर्यात्।अत्रानं
दनिध्यासादनपूजादिगुरुःकुर्याद्यजमानोवा।तद्यथा।राजतेपिधा

नंताम्रघटरूपमानंदनिधिंनानारत्नहेमरूप्यताम्रमुद्रापत्राधिक हेमयुतंसूक्ष्मवस्त्रवेष्टितमष्टादशधान्योपरिविष्वगादिद्वेष्टितासं न्निधौस्थापयित्वाप्रतिष्ठापूर्वकं ॐनित्यानंदनिधये नमइतिमंत्रे णाभ्यर्च्यसिद्धार्थदूर्वाक्षतकुशचंदनाक्षतानादायानंदनिधिंप्रद क्षिणीकृत्य। ॐनमःसर्वदानंदसर्वसंपद्विवर्द्धन। वर्द्धयास्मान्सम्र द्धेहआयुषायशसाश्रिया। नमस्तेनंदसंतानसदानंदसदोदय। त्वंसुखंवैकुरुष्वेहसंतत्यामेधनायुषा॥ नमोनमःपद्मनिधेधनेशा शतक्रतोशंकरनैऋतेश। शमंनयास्मद्दुरितंहरमभोनमोनमस्तेह रशंकरेश॥ नमोनमःपाशधराप्रमेयनमोस्तुवामायमनामधेय॥ नमःसमीरायहुताशनायनमोस्त्वनंतायकनाशनाय। नमःसुरश्रे ष्ठहरीश्वरायनमोस्तुसावित्रिशिवश्रियेति। सरस्वतीश्रीतिरतिः क्रियेतिपुष्टिश्चतुष्टिस्मृतिशांतिकीर्त्यै। सर्वामराणांनिधिरप्रमेय स्त्वमेवमंत्रर्षिमुनीश्वराणां। आधारभूतोसिचराचरस्यविश्वस्य यस्मात्प्रणतोस्म्यतस्त्वां॥ नमोस्तुसौंदर्यनिधेसुरेशनमोस्तुगांभीर्य निधेसमुद्र। नमोनमःकांतिनिधानइंदोतेजोनिधेत्वांप्रणतोस्मि भानो॥ नमःपद्मायभद्रायनमस्तेस्वस्तिकायच। नमःशंखायमण येमणिभद्रायतेनमः। नमोनंदविवर्त्तायनंदावर्त्तायतेनमः। नमः कंटकर्णायकंठावर्त्तायतेनमः। नमोनंदप्रतिष्ठायनमोहेमप्रिया यच। नमोहिरण्यगर्भायनित्यानंदायतेनमइत्युपस्थायपूजयि त्वाकुशतिललाजयवाक्षतजलान्यादायअद्येत्याद्युक्त्वा। अद्येहपु ण्यकालेस्मिनद्विजदेवाग्निसन्निधौ। यशःश्रेयोभिवृद्ध्यर्थंमातापि त्रोस्तथात्मनः। पुराणन्यायमीमांसावेदवादिभ्यएवच॥ नमोवि द्याविधायिभ्योनानागोत्रेभ्यएवच। विप्रेभ्योनेकशर्मभ्योनित्यानं दनिधिंपरं॥ अहंसंप्रददेतेभ्योनानानानावृतेनच॥ सस्वर्णरौप्य ताम्रेणासरत्नेनसवाससा॥ सोपस्करेणपुरुषोब्रह्मविष्णुशिवा त्मकः। प्रीयतांनिधिदानेनश्रीयज्ञपुरुषोच्युतः। इतिमंत्रैरुदकं भूमौक्षिप्त्वाविप्रेभ्योमुकामुकगोत्रेभ्योमुकामुकनामभ्यः। मुमौ दु वरौप्यपिधानसुवर्णवस्त्राष्टादशधान्यादियुतमानंदनिधिंनिरंतर

त्यादिशान्तिकामइतिसरुद्दानपक्षेफलमुद्दिश्यासरुद्दानपक्षेतुवेधःपदेत्यादिसंतानकामइत्युक्त्वायुष्मभ्यमहंसंप्रददेइतिदद्यात्।एकस्मैवादद्यात्।ततःसुवर्णदक्षिणांदत्त्वाविप्रान्संभोज्यभूयसींदक्षिणांदत्त्वायस्यस्मृत्येतिप्रमादादितिचोक्त्वाविष्णुंस्मरेत्।इत्यानंदनिधिदानप्रयोगः॥अथदेवतादानानि॥तत्रादौदशावतारदानं।विश्वामित्रः।दानानामुत्तमंदानंहेमविष्णोःस्वरूपकं।तस्मात्पुण्यार्थिनादेयाहेमाविष्णोःस्वरूपकाः।तेच।मत्स्यःकूर्मोथवाराहोनारसिंहोथवामनः।रामोरामश्चकृष्णश्चबौद्धःकल्कीचतेदशेति।मत्स्यादिस्वरूपाणिविश्वचक्रदानेदर्शितानि॥यथाशक्त्याप्रकुर्वीतसुवर्णेनविजानता॥समेनषोडशेनैवसमान्येतानिकारयेत्॥षोडशेनैवसमानीति।महाभूतघटाख्येषोडशदाने।प्रादेशाद्वंगुलशतंयावत्कुर्यात्प्रमाणतइतियत्प्रमाणमुक्तंतत्प्रमाणकानिमत्स्यादिरूपकाणिभवंतीत्यर्थः।वित्तानुरूपतोराजन्तुल्यमाढ्यदरिद्रयोः।संपूज्यनामभिस्तैस्तुपुष्पधूपनिवेदनैः।भक्तिनम्रःप्रणामांतेनिवेद्यश्रद्धयाततः।आहूयब्राह्मणान्राजन्पादौप्रक्षाल्ययत्नतः।उपवेश्यासनेसर्वांश्चंदनेनानुलेपयेत्॥सुगंधैःकुसुमैश्चैवधूपैर्दीपैस्तथैवच।आच्छाद्यवस्त्रयुग्मेनग्रहणेचंद्रसूर्ययोः।अयनेविषुवेचापिद्वादश्यांतुविशेषतः।उपोष्यैकादशींकार्यंधर्मकार्यंचसर्वशः।अन्यथानरकंयातीत्येवमाहपितामहः।ग्राहकान्विष्णुरूपांश्चअर्हयेत्तुविमत्सरः।एकैकंदेवरूपंतमेकैकस्यसमर्पयेत्॥अथवाविदुषःसर्वान्दद्यात्संपूज्यमानवः।नानृतेनकदाचिन्नदद्यात्पाषंडिनेतथा।एतदुक्त्वाथविप्रस्यहस्तेतोयंक्षिपेत्स्वयं।दशावतारतोराजन्विष्णोरैक्यंसगच्छति।महापातकसंसर्गान्मुच्यतेतत्क्षणादपीति।अद्येत्यादि॥महापापसंसर्गजदोषनिवृत्त्यर्थंविष्णोर्दशावतारान्दास्यइतिसंकल्प्यावतारान्विप्रान्संपूज्य॥देवरूपमयाविप्रकारितंकांचनंशुभं॥तद्ददाम्प्रदानेनप्रीयतांविश्वरूपधृगितिमंत्रमुक्त्वादेशकालाद्युक्त्वामुकगोत्रायामुकशर्मणेमुकरूपंमहापापसंसर्गजदोषनिवृत्तिकामस्तुभ्यमहंसंप्रददेनममेतिएकैकमेकैकस्मैदद्यात्।एकस्मैवासर्वाणि।दानप्रतिष्ठार्थंसुवर्णंदक्षिणां॰

चेतिदशावतारदानप्रयोगः॥अथब्रह्मविष्णुरुद्रदानं॥ब्रह्मांडपुराणे
॥शौनकादिभिःपृष्टेनरोमहर्षणेनशृण्वंतुमुनयःसर्वेइत्याद्युपक्र
म्योक्तं।त्रिमूर्त्तिदानंदानानामुत्तमोत्तममुच्यते।विषुवेअयनेवापिचंद्र
सूर्यग्रहेषुच॥नित्यंचपंचदश्यांचजन्मर्क्षेषुसमारभेत्॥देवालयेनदी
तीरेपुण्येष्वायतनेषुच॥गृहेवाकारयेद्दानंयत्रभूमिःशुचिर्भवेत्।च
तुरस्रांसमांभूमिंगोमयेनोपलेपयेत्॥तत्राक्षताभिर्विकिरेत्पुष्पांज
लिंसमंततः॥एकहस्ताद्विहस्तावात्रिगुणादैर्घ्यतःस्मृता।त्रिवेदिका
भवेत्तिर्यक्श्वेततंडुलमिश्रिता॥ब्रह्माचविष्णुर्भगवान्पुरारिर्हिर
ण्मयास्तत्रनिवेशनीयाः।चतुर्भुजाःसायुधभूषणाढ्याःकिरीटिन
श्चापियथाक्रमेण॥एतत्प्रतिमालक्षणमुक्तंब्रह्मांडदाने॥स्नानार्घ्यपा
द्याचमनीयवस्त्रैर्गंधादिभिस्तानभिपूज्यभक्त्या। प्रदक्षिणीकृत्य
सपुष्पहस्तःप्रणम्यचोद्वास्यततःप्रदद्यात्।प्रत्येकमेवंबहुमानपूर्वं
संपूज्यदातव्यमनुक्रमेण॥तथाजगत्सृष्टिकरस्त्वमेवत्वमेवसर्वस्य
पितामहोसि॥त्वमेवकर्त्ताजगतांविहर्त्तात्वमेवधाताजगतांविधा
ता॥त्वत्संप्रदानादनघोयथाहंत्वयाचसायुज्यमुपैमिदेव।तथाकुरु
त्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसीद॥त्वयाजगद्व्याप्तमिदंसमस्तं
त्वांविष्णुमेवप्रवदंतिसंतः॥त्वत्स्थानिसर्वाणिवदंतिदेवत्वयाधृतं
विश्वमनंतमूर्त्ते॥त्वत्संप्रदानादनघोभवामियथाजगत्कारणकार
णेश॥तथाकुरुत्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसीद॥त्वयासुरा
णाममृतंविहायहालाहलंसंहृतमेवयस्मात्।तथासुराणांत्रिपुरं
चदग्धंएकेषुणालोकहितायेश॥त्वद्रूपदानादहमप्यशेषैर्दोषै
र्विमुक्तोहियथाभवेयं॥तथाकुरुत्वांशरणंप्रपन्नेमयिप्रभोदेववर
प्रसीद॥इत्येवमुक्त्वाविधिवद्ददातिसयातिसायुज्यमथत्रिमूर्त्तेः।यः
कारयेद्विप्रवरायतस्मैसुवर्णसंख्यागणितंहिरण्यं।दद्याच्चवासोयुग
मादरेणतथाकृतेनैतल्लभतेफलंतत्॥इतित्रिमूर्त्तिदानं॥अथद्वादशा
दित्यदानं॥ब्रह्मांडपुराणे।शृणुनारदभद्रंतेदानमादित्यसंज्ञितं।यथो
क्तंलोकगुरुणाविष्णुनाप्रभविष्णुना।कर्त्तुःपापहरंपुण्यमायुष्यंश्रीकरं
शुभं।आरोग्यंसर्वमंगल्यंदुःस्वप्नाद्भुतनाशनं।सर्वशांतिकरंह्येतत्सर्वसि

द्धिफलप्रदं॥ चक्षुष्यं सर्वरोगघ्नं भुक्तिमुक्तिफलप्रदं॥ विषुवत्ययने राहु
ग्रहणे चंद्रसूर्ययोः॥ जन्मर्क्षे सौरमासे वा पंचदश्यार्कसंक्रमे॥ सौरवा
रे सूर्यसंबंधिनि वारे॥ सप्तम्यां वाथ नक्षत्रे सावित्रे द्भुतदर्शने। दुःस्वप्नदर्श
ने कुर्याद्द्वादशादित्यसंज्ञितं। देवालये नदीतीरे तडागे वरुणालये। अन्येषु पु
ण्यदेशेषु देवदानं समाचरेत्। आलिप्य वै द्वादशहस्तदेश्यां क्षितिं यथा
गोमयसंयुताभिः। तस्मिन्सितैस्तंदुलपुंजकैश्च विस्तारयेद्द्वादशपंक
जानि॥ प्रादेशमात्राणि शुभानि तानि सकर्णिकान्यष्टदलेषु तेषु। हिर
ण्यरूपाणि रवेर्विधाय यथाक्रमाद्गुत्तरपोपवर्गः। प्रत्यङ्मुखान्प्राङ्मु
खएव देवांस्तद्रूपगंधादिभिरादरेण। संप्रीयतामित्यथ चक्रमेण प्र
त्येकमुच्चार्य तदीयनाम॥ धाता च मित्रश्च ततः क्रमेण मार्तंडनामा
च तथार्यनामा॥ शक्रश्च देवो वरुणस्तथासौ भगो विवस्वान्नवमस्त
थैषां॥ विष्णुस्तथा द्वादशमः स्वमंत्रैराराधयेद्देववरान्द्विजांश्च॥
पुरा देवकृते दानं प्रोक्तं कमलयोनिना॥ तथा मयापि युष्माकं प्रोक्तं
मुनिवरोत्तमाः। द्वादशादित्यप्रतिमालक्षणं प्रागुक्तं वेदितव्यं॥ इति
द्वादशादित्यदानं। अथ चंद्रादित्यदानं॥ विष्णुधर्मोत्तरे। भगवानुवा
च॥ अतः परं प्रवक्ष्यामि दानराजं नराधिप॥ यद्दत्वा तु बली राजा शक्र
राज्यमवापह॥ शक्रश्च बलिराज्यं तु दत्वा पुनरवापह॥ चंद्रसूर्योपरागे
षु अयने विषुवे तथा॥ चंद्रक्षये च द्वादश्यां वैशाख्यां पुत्रजन्मनि॥ का
र्तिक्यां च महामाघ्यां तत्रम्यां च यथा तथा॥ चंद्रादित्यौ तु दातव्यौ सूर्यः
सौवर्ण उच्यते॥ शुद्धस्य रजतस्यैव मंडलं हिमरोचिषः। द्वादशांगुल
वृत्तं तु उभयोरपि मंडलं॥ वृत्तौ पद्मसमाकारौ मध्ये चैव तु कर्णिका।
भानुं ताम्रमये पात्रे घृतपूर्णे तु निक्षिपेत्॥ सोमं शंखे क्षीरपूर्णे उपरि
स्थापयेद्बुधः। सूर्यं तु रक्तकुसुमैः सोमं शुक्लैस्तथैव च। आदित्याय सुगं
धं च धूपं चैव प्रदापयेत्॥ सोमस्य गुग्गुलुर्देयो गंधः शुक्लस्तथैव च॥
कुंकुमं तु पतंगाय दीपं चैव घृतेन तु। एवं संपूज्य यत्नेन चंद्रादित्यौ पृथ
क्पृथक्॥ अमृतमूर्ते पे सोम नमोस्तेनेव पूजयेत्॥ खखोल्काय ति वै सू
र्यं नमोंतेन पुनःपुनः। आहूय ब्राह्मणं भक्त्या वेदवेदांगपारगं। कुटुंबिनं
दरिद्रं च आहिताग्निं तथैव च॥ रक्तेन वाससाच्छाद्य कुंकुमेनानुलेपयेत्

संपूज्यपुष्पधूपैश्चद्विजंसूर्यमिवापरं॥रविंचचंद्रबिंबंचघृतस्थंतु
निरीक्ष्यवै॥समर्पयेद्ब्राह्मणायमंत्रेणानेनभूमिपः।रुक्मंचपुष्करंचै
ववर्णपुष्करमेवच॥त्रयीविद्याचसांगातुयस्यांगंविष्णुरूपिणः॥स
वैदिवाकरोदेवःप्रीयतांविप्रमाचिरम्।एवमुच्चार्यभानुंतुद्विजराजं
तथैवच॥अमृतमूर्तिशीतांशुर्ददामितेद्विजोत्तम।गायत्र्याचैवसू
र्यस्यअर्हणंजायतेविभोः।सोमंतरत्समदीपंशुचिःशुद्धेनतेजसा।
एवंचंद्ररविंदत्त्वावलीराज्यमवाप्नुह।सर्वंतेनतुदत्तंस्याद्योददाच्चंद्र
भास्करौ।सर्वंतेनकृतंराजन्सर्वंतेनचसंस्कृतं।सर्वंदक्षिणयाचेष्टंसं
सारेतुनरोत्तमैः।पूज्यतेसिद्धगंधर्वैर्ब्रह्मर्षिभिर्देवदानवैः॥इतिचंद्रादि
त्यदानं।अथलोकपालाष्टकदानं।ब्रह्मांडपुराणे॥शृणुनारदभद्रंते
दानंसर्वाघनाशनं।सर्वमंगलमायुष्यमारोग्यंशंकरंशुभं।दानानामु
त्तमंदानंसर्वसिद्धिकरंपरं॥करोतिदानंनारीवासापुत्रंब्रह्मणोव्रजे
त्॥विषुवत्ययनेराहुग्रहणेचंद्रसूर्ययोः।अन्येषुपुण्यकालेषुजन्म
र्क्षेषुविशेषतः।देवालयेनदीतीरेगृहेवादानमाचरेत्॥पुण्यदेशेषु
सर्वेषुपुराणोक्तेषुनारद॥चतुरस्रांसमांभूमिंलिप्तांगोमयवारिणा
।षड्करंचाष्टहस्तंवादशद्वादशवाकरम्।प्राच्योदीच्यश्चकर्तव्यारे
खाश्चतस्रकाःस्मृताः।नवकोष्ठानितत्रस्युःश्वेतंतंडुलपुंजकैः।सि
तैरष्टदलैर्युक्तान्कमलान्विन्यसेच्छुभान्॥राजतरूपमयंदेवंजग
त्कर्तारमव्ययं।तेषांमध्यमकोष्ठेषुकमलस्थंनिवेशयेत्॥इंद्रमग्निं
यमंचैवनिर्ऋतिंवरुणंतथा।वायुंसोमंतथेशानंप्रागादिषुयथाक्र
मं।जातरूपमयान्देवान्अष्टौस्वायुधसंयुतान्॥त्रिपलार्धकंसुव
र्णेनतुयथाशक्तिविनिर्मितान्।ब्रह्मणोभिमुखान्सर्वान्सर्वेषुवि
निवेशयेत्।जातरूपमयान्देवानष्टौस्वायुधसंयुतान्।स्वर्णमयं
कमलस्थंब्रह्माणं।ब्रह्मलोकप्रतिमालक्षणंब्रह्मांडदानेद्रष्टव्यं॥
प्रत्येकंवासमावेष्ट्यसंप्रोक्ष्यकुशवारिणा॥योसौकारयिताविप्र
स्त्वेवमेतत्समाचरेत्॥दानकालेतुसंप्राप्तेदातास्नात्वाकुशोदकैः
प्रसन्नचित्तवदनःपरमेष्ठिपुरोगमान्॥स्वनाममंत्रैरभितोनमोंतै
राराध्यगंधादिभिरादरेण।विप्रांस्तथाभ्यर्च्ययथाक्रमेणसंप्रीयता

मयमिवेत्युक्त्वा यो सौ कारयिता विप्रस्तस्मै दद्याच्च दक्षिणां। सुवर्ण संख्यागणितं हिरण्यं चैव वाससी। प्रोक्तं देवऋषे दानं लोकपालाष्टयं मया॥ किमन्यच्छ्रोतुमिच्छा ते नंदिदं वद सांप्रतं॥ इति लोकपालाष्टकदानं॥ अथ नवग्रहदानं। ब्रह्मांडपुराणे। ब्रह्मोवाच। ग्रहदानक्रमं वक्ष्ये सर्वसिद्धिकरं परं। सर्वशांतिकरं नृणां सर्वपापप्रणाशनं॥ विषुवत्ययने राहुग्रहणे शशिसूर्ययोः॥ जन्मर्क्षे सौरवारे वा पंचदश्यां तथैव च॥ पुण्यकालेषु सर्वेषु पुण्यदेशे विशेषतः। ग्रहदानं तु कर्त्तव्यं नित्यं श्रेयोभिकांक्षिणा॥ हस्तमात्रं द्विहस्तं वा त्रिहस्तं वाथ नारद॥ चतुरस्रां समां भूमिं गोमयेनोपलेपयेत्॥ रेखाश्चत्वारश्चैव तस्यास्तास्तथा समाः। नव कोष्ठेषु पद्मानि विन्यसेच्छुतंदुलैः। आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः। राहुः केतुरिति प्रोक्ता ग्रहा लोकसुखावहाः। एषां हिरण्यरूपाणि कारयित्वा यथाविधि॥ त्रिनिष्केणाथवा कुर्याद्यथाशक्त्या पृथक् पृथक्। हिरण्यरूपाणि हिरण्यप्रतिमाः। तल्लक्षणान्यत्रैव वक्ष्यंते। आदित्यं मध्यमे कोष्टे दक्षिणे गारकं न्यसेत्। उत्तरे तु गुरुं विद्याद्बुधमुत्तरपूर्वके। भार्गवं पूर्वतो न्यस्य सोमं दक्षिणपूर्वके। पश्चिमेर्कसुतं न्यस्य राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुः सन्निवेश्यो यथाविधि। तद्वर्णपुष्पगंधाद्यैरर्चयेत्स्वस्वमंत्रकैः। दानं शूद्रोथवा कुर्यात्स्त्री वा तत्र तु नारद। भूलेपनादि यत्कार्यं सर्वं विप्रेण कारयेत्। स्नानकाले तु संप्राप्ते स्नात्वा कुशतिलोदकैः। प्रयतो यजमानस्तु धौतवस्त्रः प्रसन्नधीः। अर्चयित्वार्घ्यं दद्यादहस्करमुखान्ग्रहान्। प्रत्येकमेकं विशेषोस्त्वमंत्रमुदीरयेत्। पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः॥ दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः। श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडकरो द्विबाहुः। चंद्रोमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः। रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत्। धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः। प्रियंगुकलिकाश्यामो रूपेणाप्रतिमो बुधः। सौम्यः सौम्यगुणोपेतः सदास्तु वरदो मम। सुराणां च मुनीनां च गुरुः कनकसन्निभः। बुद्धिदाता त्रिलोकस्य स मेस्तु वाक्पतिः। हेमकुंदमृणालाभो दैत्यानां परमो गुरुः। सर्वशास्त्रप्रवक्ता च भार्गवो वरदोस्तु सः। नीलद्युतिः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्। चतुर्भुजः सूर्यसुतः प्रशांतः स चास्तु मह्यं वरमंदगा

मी॥नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली। चतुर्भु
जश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यं। धूम्रो द्विबाहुर्वरदो
गदाभृत् गृध्रासनस्थो विकृताननश्च। किरीटकेयूरविभूषितांगः
सदास्तु मे केतुगणः प्रशांतः। इत्युक्त्वा दापयेत्सर्वानादित्यादीन्नव
ग्रहान्॥ पुरुषो वाथ नारी वा यथोक्तं फलमाप्नुयात्। मध्यमं गुरवे द
द्यादन्यस्मै वा प्रदापयेत्॥ गुरुरत्र पूजादिकर्त्ता॥ अथवा दक्षिणां दे
या सुवर्णं वाससी शुभे॥ इत्याह भगवान्ब्रह्मा नारदाय महात्मने। त
थाहमब्रुवं दानं युष्माकं मुनिसत्तमाः। इति ग्रहदानं॥ अथ वारदानं
दिस्कांदे॥ आदित्यादिषु वारेषु सहिरण्यं सदैवतु। यः प्रयच्छति त
न्मूर्तीस्तस्य तुष्यंति वै ग्रहाः। दद्यादादित्यमादित्ये सोमं सोमे कु
जं कुजे। एवं बुधादीन्मंदे तु राहुकेतू शनैश्चरान्॥ इति वारदानानि। अ
थ शूलदानं। वायुपुराणे। या निष्कृतिस्तु पापानां कृतानां प्रज्ञया विना
। यत्साशुपतमाख्यातमस्त्रं देवस्य शूलिनः। तस्य प्रदानात्सकलं
तत्पापं संप्रणश्यति। कृष्णपक्षे चतुर्दश्यामष्टम्यां वा सितेतरे। कुर्याद्द्वा
दशनिष्केण त्रिशूलं लक्षणान्वितं। निष्कश्चतुष्कः सौवर्णिकः॥ सौवर्ण
मात्रं षट्पंचाशदधिकशततृयपणमूल्यो वेति पक्षत्रयं शास्त्राद्ज्ञेयं।
युगांतकरणं घोरमघविध्वंसनं परं॥ नानारजोविरचिते चक्रे षोड
शारविभूषिते। चक्रं षोडशारं परिभाषायामुक्तं। नाभौ निधाय संपू
र्णे तिलानां ताम्रनिर्मिते॥ पात्रमाढकसंमानं तत्र शूलं न्यसेत्पुनः। कु
र्यात्तेनैव मंत्रेण तस्मात्पूजामनुक्रमात्॥ तेनैव शूलायुधनम इति मंत्रे
ण॥ विरूपाक्षं च तत्पार्श्वे कमलोपरि पूजितं। अघोरेभ्योपि मंत्रेण पू
जां ते प्रणिपत्य च। अघोरमंत्रस्तु लैंगे॥ अघोरेभ्योऽथ घोरेभ्यो घोरघो
रतरेभ्यः॥ सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। विप्रं च ज्ञा
निनं तद्वत्संपूज्य मुनिपुंगवाः। प्रदक्षिणं ततो गत्वा इमं मंत्रमुदीरयेत्॥
भगवन् भगनेत्रघ्न दक्षयज्ञक्षयमर्दन॥ तवायुधप्रदानेन पापं नश्यतु
शंकर। युगांते येन लोकानां त्वमंतकविनाशनः॥ विदग्धं न त्वपापेन ते
न पापं व्यपोहय॥ येन दग्धं क्षणार्द्धेन त्रिपुरं सुरदुर्जयं। तेन पाशुपता
स्त्रेण मम पापं विनाशय। यदबुद्धिकृतं पापं मम वाकायचमानसम्। त

त्सर्वंस्यमभ्येतुतवश्मूलप्रदानतः॥ इत्यामंत्र्यततोदद्याच्छूलंतस्मै
द्विजन्मने॥ अवश्यंकुरुतेपापमज्ञानान्मानवोयतः॥ वर्षेवर्षेततो
दद्यात्तस्यतस्यापनुत्तये॥ इति शूलदानं॥ अथात्मप्रतिकृति
दानं। भविष्योत्तरे। दानकालःसदातस्येत्युक्त्वा। हैमीं प्रतिकृतिं
भव्यांकारयित्वात्मनोनृप॥ अभीष्टवाहनगतामिष्टालंकारभूषि
तां॥ अभीष्टलोकसहितांसर्वोपस्करसंयुतां॥ अभीष्टलोकः प्रिय
जनः। नेत्रपट्टपटीवस्त्रैश्छादितांस्रग्विभूषितां। कुंकुमेनानुलिप्तांगीं
कर्पूरागुरुवासितां॥ स्त्रीवादद्यात्तुशयनेशायितांकारयेत्स्वयं। यद्य
दिष्टतमंकिंचित्तत्सर्वंपार्श्वतोन्यसेत्॥ उपकारकरस्त्रीणांपुरुषाणां
चयद्भवेत्॥ तत्सर्वंस्थापयेत्पार्श्वेस्वयंसंचिंत्यचेतसि॥ एतत्सर्वंमे
लयित्वास्वेस्वेस्थानेनियोजयेत्॥ ॐअद्येत्यादिसाग्रशतवर्षपर्यंतं
सुरसाहित्येनस्वर्गादीष्टभोगोत्तरजन्मनीष्टबंधुजनावियोगकाम
आत्मप्रतिकृतिदानंकरिष्यइतिसंकल्प्यपूजयित्वालोकपालान्
ग्रहान्देवींविनायकं॥ देवीदुर्गा। ततःशुक्लांबरःस्नात्वा गृहीतकुसुमां
जलिः। इममुच्चारयेन्मंत्रंविप्रस्यपुरतःस्थितः॥ आत्मनःप्रतिमाचेयं
सर्वोपकरणैर्युता। सर्वरत्नसमायुक्तातवविप्रनिवेदिता। आत्माशं
भुःशिवःशौरिःशक्रःसुरगणैर्युतः। तस्मादात्मप्रदानेनममचात्मा
प्रसीदतु। इत्युक्त्वामासपक्षादिचोल्लिख्यपूर्वोक्तंसाग्रेत्यादिकानां
संकल्पवाक्यमुक्त्वाइमामात्मप्रतिमांसोपस्करामसुकशर्मणेऽमु
कगोत्रायतुभ्यमहंसंप्रददइत्युच्चार्यततोदद्याद्ब्राह्मणाययुधिष्ठि
र। ब्राह्मणश्चाथगृण्हातिकोदादितिचकीर्तयेत्। ततःप्रदक्षिणीकृ
त्यप्रणिपत्यविसर्जयेत्॥ विधिनानेनराजेंद्रदानमेतत्प्रयच्छति। यः
पुमानथवानारीशृणुतत्फलमाप्नुयात्। साग्रंवर्षशतंभव्यंसर्वलो
कैःसुरैर्वृतः। अभीष्टफलदानेनचाभीष्टफलभाग्भवेत्। पत्रैर्वोत्प
द्यतेजंतुःप्राप्तःकर्मक्षयंक्षणं। तत्रैवसर्वकामानांफलभाग्जायतेनृप
इष्टबंधुजनैःसार्द्धंनवियोगंकदाचन॥ प्राप्नोतिपुरुषोराजन्स्वर्गमानंस
मश्नुतइति॥ इत्यात्मप्रतिमादानं॥ अथधनदमूर्त्तिदानं॥ वापवीये
दरिद्रोजायतेमर्त्योदानविघ्नंकरोतियः। ऐश्वर्येजायतेयेनकर्मणात

च्छृणुष्वमे॥फलार्द्धेनतदर्द्धेनतदर्द्धेनाथवापुनः।पलेनवातदर्द्धेन
तदर्द्धार्द्धेनवेतिक्वचित्पाठः।तदर्द्धेनाथवापुनरितिचक्वचित्।धनद
स्यप्रतिकृतिंकुर्यात्स्वर्णमयींशुभां।द्विभुजांवाहनोपेतांनयनानंद
कारिणीं।धनदरूपंतु।ह्रस्वमापिंगनेत्रंचगदिनंपीतविग्रहं।पुष्प
कस्थंधनाध्यक्षंध्यायेच्छिवसखंसदेत्यादिनोक्तं।शंखपद्मनिधि
भ्यांचयुक्तंतत्पार्श्वयोर्द्वयोः।श्वेतवस्त्रेणसंवेष्ट्यतंदुलोपरिवि
न्यसेत्॥तंदुलानांपरीमाणंभवेद्द्रोणचतुष्टयं।तदर्द्धंवातदर्द्धंवा
वित्तशाठ्यंनकारयेत्॥श्वेतमाल्यैस्तथागंधैरनुलिप्यप्रपूजयेत्।
आग्नेय्यांदिशिहोमश्चसमिदाज्यतिलैर्भवेत्।मंत्रोराजाधिराजा
येत्येषयोज्यःस्वलिंगकैः।व्याहृत्यातिलहोमश्चकर्त्तव्योधनकांक्षि
भिः।आचार्यःसर्वशास्त्रज्ञोविनीतःसर्वसंमतः।महाकुलप्रसूतश्च
धर्मज्ञःसत्यवाक्शुचिः।कारयेदर्चनंतेनधनदस्यातिभक्तितः।त
द्दैवत्येनमंत्रेणसचकामेश्वरोभवेत्॥तस्मैहोमंकृतवतेप्रदद्या
त्प्रतिमांतुतां।मंत्रेणानेनविधिवत्प्राङ्मुखस्तुउदङ्मुखः।मंत्रप्र
योगेज्ञेयः।एवंकुबेरदानंयःकरोतिविधिपूर्वकं।धनदेनसमोमं
र्त्यस्तत्क्षणादेवजायते॥अथप्रयोगः।सार्द्धमाषद्वयाधिकांपंचा
शन्माषावधिकुबेरमूर्त्तिंपुष्पकविमानस्थांपार्श्वयोःपद्मशंखाका
रयुतांकृत्वाद्येत्यादियथेष्टधनकामोहंधनदमूर्त्तिदानंकरिष्यइति
संकल्प्यश्वेतवस्त्रांमूर्त्तिंयथाशक्तिएकद्विचतुर्द्रोणतंदुलराशौ
निधायसंपूज्यतदाग्नेय्यामग्निंसंस्थाप्यसमिदाज्यचरुभिःप्रत्येक
मष्टाष्टाविंशत्यादिसंख्ययाराजाधिराजायेतिमंत्रेणव्याहृतिभि
श्चतिलैर्हुत्वाआचार्येणधनदपूजांकारयित्वाउत्तराशापतेदेवकुबे
रनरवाहन॥पद्मशंखनिधीनांत्वंपतिःश्रीकंठवल्लभः।दानाद्येनय
थाप्राप्तंदारिद्र्यंममदुःखदं।तत्सर्वमात्मदानेनपापमाशुविनाश
येतिमंत्रमुक्त्वाद्येत्यादिइमांधनदमूर्त्तिंदारिद्र्यनाशकामोमुकगो
त्रायामुकशर्मणेतुभ्यमहंसंप्रददेनममेतिदत्वादेयद्रव्यतत्ती
यंचतुर्थंवांशंसुवर्णंदक्षिणांदद्यात्॥इतिधनदमूर्त्तिदानं।अथ
शालग्रामदानं।शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमं।भूचक्रं

लेनदत्तंस्यात्सशैलवनकाननमितिपाद्मे शालग्रामदानं॥सशै
लवनभूचक्रदानफलकामइतिदानवाक्यं।मंत्रस्तु।महाकाशनिवा
सेनचक्राद्यैरुपशोभितं॥अस्यदेवस्यदानेनममसंतुमनोरथा इ
ति॥अथकालपुरुषदानं॥भविष्योत्तरे॥काम्योदानविधिःपार्थक्रि
यमाणोयथाऽनृथं।फलायमुनिभिःप्रोक्तोविपरीतोभयायच।देयं
निष्कशतंपार्थदानेषुविधिरुत्तमः॥मध्यमस्तुतदर्द्धेनतदर्द्धेनावरः
स्मृतः।एवंवृक्षेरथेंडेचधेनोःकृष्णाजिनस्यच।अशक्तस्यापिकु
र्वीतपंचसौवर्णिकोविधिः।अतोप्यल्पेनयोदद्यान्महादानंनराधि
प।प्रतिगृण्हातिवातस्यदुःखशोकावहंभवेत्।दशमहादानेषुकल्प
वृक्षः।रथोहिरण्याश्वरथः।अंडंब्रह्मांडं।धेनुःकामधेनुः।पुण्यंदिन
मथासाद्यभूमिभागेसमेशुभे।चतुर्दश्यांचतुर्थ्यांवाविष्ट्यांवापांडुनंद
न॥पुमान्कृष्णाजिनेकार्योरौप्यदंतःसुवर्णदृक्।खड्गोद्यतकरोदी
र्घोजपाकुसुमकुंडलः।रक्तांवरधरःस्रग्वीशंखमालाविभूषितः।ती
क्ष्णासिपुत्रीवंधेनविस्फारितकटीतटः।असिपुत्रीछुरिका।उपान
द्युगयुक्तांघ्रिःकृष्णकंबलपार्श्वगः।गृहीतमांसपिंडश्चवामेकरत
लेतथा।एवंविधंपुमान्कृत्वागृहीतकुसुमांजलिः।यजमानःप्रस
न्नात्माइमंमंत्रमुदीरयेत्।संपूज्यगंधकुसुमैर्नैवेद्यंविनिवेद्यच।
सर्वकल्मषसेयस्मात्कालस्त्वंतेनचोच्यसे।ब्रह्मविष्णुशिवादीनांत्व
मसाध्योहिसुव्रत।पूजितस्त्वंमयाभक्त्यापार्थिवश्चतथासुखं।तद्बुध्य
नेतवविभोतत्पुरुषनमोनमः।एवंसंपूज यित्वातंब्राह्मणायनिवे
दयेत्।ब्राह्मणंप्रथमंपूज्यवासोभिर्भूषणैस्तथा।दक्षिणांशक्तितो
दद्यात्प्रणिपत्यविसर्जयेत्।दक्षिणांप्रागुक्तांनिष्कशतादिरूपां।अ
नेनविधिनायस्तुदानमेतत्प्रयच्छति।नापमृत्युभयंतस्यानचव्याधि
कृतंभवेत्।भवत्यव्याहतैश्वर्यःसर्वबाधाविवर्जितः।देहांतेसूर्य
भवनंभित्वायातिपरंपदमिति।पुण्यक्षयादिहाभ्येत्यराजाभवतिधा
र्मिकः।सत्यवाजीश्रियायुक्तःपुत्रपौत्रसमन्वितः।संपूज्यकालपुरु
षंविधिवद्द्विजायदत्वाशुभाशुभफलोदयहेतुभूतं।रोगातुरेसकल
दोषमयेचदेहेदेहीनमोहमुपगच्छतितत्प्रभावात्॥अथप्रयोगः॥

चतुर्थ्यांचचतुर्दश्यांभद्राकरणेवारौप्यदशनंसुवर्णनेत्रंखड्गोद्यतदक्षि
णकरंमांसपिंडयुतवामकरंजपाकुसुमकुंडलंरक्तस्रग्विणंशंखमा
लाधरंछुरिकयायुतकटिदेशमतिदीर्घंकृष्णाजिनेकालपुरुषंनिर्मा
याद्येत्यादिअपमृत्युव्याधिसर्वबाधानिवारणाव्याहतैश्वर्यप्राप्तिप
रणोत्तरपरपदतदुत्तरधर्मश्रीपुत्रपौत्रादिकर्तृत्वराज्यकामःकालपु
रुषदानंकरिष्यइतिसंकल्प्यकालरूपंविप्रंचसंपूज्यपुष्पांजलिंगृ
हीत्वा।सर्वकालयसेयस्मात्कालस्त्वंतेनचोच्यसे।ब्रह्मविष्णुशिवा
दीनांत्वमसाध्योसिसुव्रत॥पूजितस्त्वंमयाभक्त्यापार्थिवस्त्वंयथा
सुखं।यद्बुध्यतेतवविभोतत्कुरुष्वनमोनमइतिमंत्रमुक्त्वाद्येत्यादि
अपमृत्युव्याधीत्यादिकामोनपूर्वोक्तसंकल्पवाक्यंचोक्त्वेमंकाल
पुरुषंसोपस्करममुकगोत्रायामुकशर्मणेविप्रायतुभ्यमहंसंप्रददेन
ममेतिदत्वापंचसुवर्णादूर्ध्वमानिष्कशतंदक्षिणांदत्वाभूयसीदानवि
प्रभोजनानिकुर्यात्॥इतिकालपुरुषदानविधिः॥अथकालचक्रदानं
॥मृत्युंजये।चक्रंरूप्यमयंकृत्वामुक्तारश्मिमयात्मकंकृत्वा मूर्ध्निशर
च्चंद्रंरश्मिमध्यांतरस्थितं।तमःशतैकरूपाणिगात्रेषुचसमंततः।एवं
ध्यानवतस्तस्यसर्वंदुःकृष्णांतांव्रजेत्॥ततोप्यनंतरंपश्चात्स्थित्वा
विप्रप्रदक्षिणां॥तंगृहीत्वाव्रजेद्दूरंअदृष्टत्वमपिव्रजेत्॥स्वयंवामृ
तसंघातपूर्णकायस्थितस्थितिः।कालचक्रमिदंनाम्नादानंमृत्युवि
नाशनं॥इमंतेराजतंचंद्ररश्मिजालसमाकुलं।अपमृत्युविनाशा
यददामीतिसमुच्चरन्॥सुवर्णदक्षिणायुक्तंब्राह्मणायनिवेदयेत्
॥एवंकृतेविनश्येतअपमृत्युर्विनाशाय।तस्मादेतत्सदादेयमपमृ
त्युभयान्वितैः।ज्वरादिरोगग्रस्तैर्वामहापसत्तितैरपि॥ततोगृह्यो
क्तविधिनास्थापयेज्जातवेदसं।जुहुयात्कालनाम्नातुशतमष्टोत्त
रंशतं॥ततस्तुभोजयेद्भक्त्याविप्रान्द्वादशसंख्यया।स्वयमक्षारल
वणंभुंजीतसकृदेवतु।एवंकृतेनरोनूनंचिरंजीवेन्नसंशयः।अद्येत्या
दि·अपमृत्युनिवारणकामःकालचक्रदानंकरिष्यइतिसंकल्प्यश
क्तितोरूप्यकृतंचंद्राकारमनेकमुक्तामालात्मकंरश्मियुतकालच
क्रंविप्रंचसंपूज्य।इमंतेराजतंचंद्ररश्मिजालसमाकुलं।अपमृत्यु

विनाशायददामीतिसमुच्चरन्।इदंकालचक्रंमुक्तादामयुतंअपमृत्युनि
वारणकामोमुकगोत्रायामुकशर्मणेविप्रायतुभ्यमहंसंप्रददेनमम
तिदत्वास्वर्णंदक्षिणांदत्वाग्निंसंस्थाप्यकालचक्रायस्वाहेत्यष्टोत
रशतंतिलैर्हुत्वाद्वादशविप्रान्भोजयित्वास्वयमक्षारमलवणंसकृद्भु
जीत॥इतिकालचक्रदानविधिः।अथयमदानं॥मृत्युंजये।लोहपा
त्रेस्थितंकांस्यंतत्रपद्मंतुराजतं।तस्मिन्कालेश्वरःस्वर्णैःपुरुषाकार
तांगतः।यमरूपंतु।ईषत्पीतोयमःकार्योदंडहस्तोविजानता।रक्तदृ
क्पाशभृत्क्रुद्धइति॥वस्त्रालंकारसंयुक्तोभयदास्त्राणिसर्वतः॥
त्रिलोहाकारपुरुषैःकालदूतैश्चपार्श्वतः।भयदास्त्राणिखड्गादीनि।
त्रिलोहं।कांस्यताम्रपित्तलाख्यंकालदूतैर्दंडहस्तैस्त्रिभिःपुरुषाका
रैः।कृत्वाचमाहिषेपृष्ठेतंदद्यात्यममालपन्॥आलपन्यमंददामीत्यु
च्चरन्॥अष्टम्यांचचतुर्दश्यांकरोतिविधिवत्तुयः॥समुच्यतेध्रुवंनाशा
त्दत्वाघृतघटोत्तरं॥नाशोमृत्युः॥घृतघटउत्तरोदक्षिणास्थानेयस्ये
तिदानविवेके॥अपरेतुदक्षिणास्वर्णमिति।इतियमदानं॥अथापु
ष्करदानं॥ब्रह्मांडे॥भूमौगोमयलिप्तायांदक्षिणोत्तरतःशुभां।निधा
यतत्रपाणिभ्यांपूर्णानिसिततंदुलैः।चत्वारितेषुहैमानिमंडलानि
निवेशयेत्॥मंडलानिस्थलाकाराणिकुंभानित्यन्ये॥सौवर्णांश्चत
तोदेवान्अर्चयेच्चयथाक्रमं॥पूर्वमात्मभुवंतत्रविष्टरश्रवसंततः॥
कृत्तिवाससमीशानंवज्रपाणिंशतक्रतुं॥गंधादिभिरथाभ्यर्च्यदक्षि
णोत्तरतःक्रमात्॥प्रत्येकमेकंविप्रेभ्योदद्यादारभ्यभक्तितः।तंतंदेव
मिहध्यात्वामंत्रानेतानुदीरयेत्।संप्रीयतांमेभगवानात्मभूरित्युदी
रयन्॥संप्रीयतांजगद्व्यापीभगवान्विष्टरश्रवाः।संप्रीयतांमेभगवा
न्कृत्तिवासाइतिध्रुवं॥संप्रीयतांमेभगवान्वज्रपाणिःशतक्रतुः।ए
वमाहपुराब्रह्मानारदायसुरर्षये।प्रोक्तंमयापितत्सर्वंयुष्माकंमुनिपुं
गवाः॥अत्रब्रह्मविष्णुशिवेन्द्रा यथाशक्तिसुवर्णमयाःकार्याः।आयु
ष्कामोब्रह्मविष्णुशिवेंद्रप्रतिमादानमहंकरिष्यइतिसंकल्प्य।लोहपा
त्रेकांस्यपात्रंतस्मिन्रौप्यपद्मंतस्मिन्सौवर्णंमहिषस्थंदंडपाशकरं
पानयममलंकृतंतत्समीपेहेमानिखड्गाद्यस्त्राणित्रिलोहघटितान्दंड

करान्कालदूतांश्च संस्थाप्य तिथ्यादिस्मृत्वाऽपमृत्युनिवारणका
मो यमदानं करिष्य इति संकल्प्य सवाहनदूतास्त्रं यमं विप्रं च संपू
ज्याद्येत्यादि अपमृत्युनिवारणकाम इमां पूर्वोपस्करयुतामसुकश
र्मणेऽमुकगोत्राय विप्राया हं संप्रददे न ममेति दत्वा दक्षिणां सुवर्णं द
द्यात्॥ इति आयुष्करदानं। अथ संपत्करं ब्रह्मांडे। संपत्करं दानम
तीव पुण्यं यस्मिन्कृते संपदोभ्येति जंतुः। तथा। आयुष्करं रोगहरं तु
पापविनाशनं नाशकरं त्वघानां। स्वर्गापवर्गौ कुलपुत्रवृद्धिं श्रियं त
था च प्रददाती ष्टसिद्धिं। तथा। कालेषु सूर्यग्रहणादिकेषु तारेषु जन्म
त्रितयेषु कार्यं। देशेषु देवायतनादिकेषु गृहेषु वा यत्र मनः प्रसन्नं। स्ना
त्वा प्रातस्तिलमिश्रैः कुशाद्यैः शुचिर्भूत्वा धौतवासाः प्रयत्नात्॥ संक
ल्प्य विप्रं विदुषं गुरुं च कार्यं च त स्यानुमतेन सर्वं॥ गुरुंवृत्वेति शेषः॥
गव्येन भूमिं शकृता जलेन विलेपयेद्धिंशकमात्रहस्तां। तत्रैव लेख्या
श्चतुरः समास्युः प्राच्यश्चतिर्यक्च यथोपदिष्टं॥ नवकोष्ठानि तत्र
स्युस्तेषु पूर्णानि तंडुलैः। निधातव्यानि पात्राणि वासोभिरभिवेष्ट्य च
पात्राणि कुंभान्। पलस्यार्धं कृत्विनिष्कार्द्धं यथाशक्ति विनिर्मितान्।
निष्कोत्रसुवर्णं॥ दक्षिणोत्तरतो देवान्जातरूपमयान्न्यसेत्॥ पार्श्व
स्थ कोष्ठवितयेतु मित्रं तथा च देवं वरुणं च सोमं॥ चतुर्भुजं मध्यमको
ष्ठकेषु जगत्पतिं विष्णुमुमापतिं च। दिवाकरं रुद्रमहणं च वन्हिं संपूज्य
सर्वान्विधिवत्क्रमेण॥ मित्रलक्षणं तु॥ पद्मगर्भसमः कार्यो मित्रः क
मलसंस्थितः। आजानुलंबिनालां तर्विकचां भोजहृत्प्रभुः। वरुणा
दिरूपयुक्तं ब्रह्मांडदाने॥ अभ्यर्च्य विप्रानपि गंधवस्त्रैः पृथक्च दात
व्यमनुक्रमेण। संप्रीयतां मे यम मित्येवमुक्त्वा ततो हिरण्यं सोदकं
पूर्वमत्र। एकस्य चैकं च हिरण्यरूपं प्रणम्य पूर्वं परिणीय सर्वान्॥ पा
त्राणि वासः परिधाय चैव सतंदुलं सहिरण्यं च दत्वा। अभीष्टसिद्धिं ल
भते च सर्वामायुष्यमारोग्यमुपैति चाग्र्यं॥ अथोपरेष्टे गुरवे सुवर्णं
वासोयुगं दानसमं च दद्यात्। विप्रैस्तथा वाचयेत्स्वस्ति वाच्यं ततो द
द्याद्दक्षिणां वाचकेभ्यः। अथ प्रयोगः। प्रातस्तिलकुशमिश्रोदकेन स्
नात्वा देश्येत्यादि। संपदायुरारोग्यपापनाशपुत्रादिकुलवृद्धिश्रीस्वर्ग

मोक्षसुखसिद्धिकामोमित्रादिप्रतिमादानंकरिष्यइतिसंकल्प्यगुरुंवृत्वातेना
ज्ञप्तोविंशद्धस्तांचतुरस्रांभुवंगोमयेनालिप्यतत्रप्रागायताश्चतस्रउदगा
यताश्चतस्रोलेखालिखित्वातत्रजातेषुनवकोष्ठेषुतंडुलान्निक्षिप्यतेषुन
वकुंभान्सवस्त्रान्विधिनासंस्थाप्यतेषुसुवर्णत्रयादूर्ध्वंपलावधिहेम्नाकृ
ताःप्रतिमाःस्थापयेत्पूजयेच्च।तत्रपश्चिमपंक्तौउदक्संस्थान्मित्रंवरुणं
सोमंच।मध्यमपंक्तौचतुर्भुजंविष्णुमुमापतिंच।अंत्यपंक्तौदिवाकरंचत्र
हणंवह्निंच।ततोनवविप्रान्संपूज्यैकैकस्मैविप्रायमित्रःप्रीयतामद्यत्या
दि० संपदादिकामांतंपूर्वोक्तंफलमुक्त्वामुकशर्मणेमुकगोत्रायविप्रायेमांप्र
तिमांसंप्रददेइतिदद्यात्।एवंचवरुणःप्रीयतामितिवरुणादिप्रतिमांशुर
वेचदेयद्रव्यसमंसुवर्णंवस्त्रयुगंचदद्यात्॥इतिसंपत्कारदानं॥अथकृ
ष्णाजिनं।सौरे।कृष्णाजिनंचमहिषींमेषींचदशधेनवः।ब्रह्मलोकप्रदायी
तितुलापुरुषएवच।यमः।गोभूहिरण्यसंयुक्तंमार्गमेकंददातियः।सर्व
दुष्कृतकर्मापिसायुज्यंब्रह्मणोव्रजेत्।मरीचिः।कृष्णाजिनोभयमुखीं
योदद्यादाहिताग्नये॥सप्तजन्मकृतंपापंतत्क्षणादेवनश्यति॥कृष्णाजि
नसमंदानंनचास्तिभुवनत्रये॥प्रतिग्रहोपिपापीयानितिवेदविदोविदुः
।मात्स्ये।वैशाखीपूर्णमासीचग्रहणंशशिसूर्ययोः॥पौर्णमासीतुयामा
घेआषाढीकार्त्तिकीतथा।उत्तरायणंद्वादशीवातस्यांदत्तंमहाफलं।आहि
ताग्निर्द्विजोयस्तुतद्देयंतस्यपार्थिव।यथायेननविधानेनतन्मेनिगदतःशृ
णु।गोमयेनोपलिप्तेतुशुचौदेशेनराधिप।आदावेवसमास्तीर्यशोभनंच
स्वमाविकं।ततःसशृंगंसखुरमास्तरेत्कृष्णमार्गणं।कर्त्तव्यंरुक्मशृंगंतुरूप्य
दंतंतथैवच।लांगूलंमौक्तिकैर्युक्तंतिलच्छन्नंतथैवच।तिलैरास्यसमंकृ
त्वावाससाच्छादयेद्बुधः।सुवर्णनाभंतत्कुर्यादलंकुर्याद्विचक्षणः।रत्नैर्गं
धैर्यथाशक्त्यातस्यदिक्षुचविन्यसेत्।कांस्यपात्राणिचत्वारिदिक्षुदद्याद्य
थाक्रमं।मृन्मयेषुचपात्रेषुपूर्वादिषुक्रमेणतु।घृतंक्षीरंदधिक्षौद्रमेवंद
द्याद्यथाविधि।सरत्नानिकांस्यपात्राणिचतुर्दिक्षुस्थापयेत्।मृन्मयानि
पात्राणिचघृतक्षीरदधिमधुपूर्णानिपूर्वादिदिक्षुस्थाप्यानि।चंपकस्यत
थाशाखाःसव्रणंकुंभमेवच।वाह्योपस्थानकंकृत्वाशुभंचितानिवेशयेत्
।दानदेशाद्बाह्यउपसमीपेस्थानंपयस्येतिकुंभविशेषणं।जीर्णवस्त्रेणपी

तेनसर्वांगानिचमार्जयेत्।धातुमयानिपात्राणिपादेष्वस्यतुदापयेत्।धा
तुविशेषाःपात्रमध्यस्थानिचद्रव्याणिचमंत्रतःप्रयोगेबोध्यानि।तिलपू
र्णंततःकृत्वावामपादेनिवेशयेत्।मधुपूर्णंतुतत्कृत्वापादेवैदक्षिणेन्यसे
त्।एतत्पात्रद्वयंपश्चिमपादयोःस्थाप्यं।ऊर्ध्वपादेत्विमेकार्येताम्रस्य
जतस्यच।ऊर्ध्वपादेअग्रपादयोः।एकवचनमविवक्षितं।ताम्रपात्रंतिल
पूर्णंदक्षिणपादेरजतपात्रंमधुपूर्णंसपादइतिव्यवस्थाप्रयोगेवक्ष्यमा
णमंत्रात्।सुवर्णपात्रमक्षतपूर्णंमध्येस्थापयेत्।इतिहेमाद्रिः।हेममु
क्ताविद्रुमंचदाडिमंबीजपूरकं।प्रशस्तपत्रेश्रवणेखुरेशृंगाटकानिच।
एवंकृत्वायथोक्तेनसर्वशाकफलानिच।तत्प्रतिग्रहविद्विद्वानाहिताग्नि
र्द्विजोत्तमः।स्नातोवस्त्रयुगच्छन्नःस्वशक्त्याचाप्यलंकृतः।प्रतिग्रहश्चत
स्योक्तःपुच्छदेशेमहीपते।सुवर्णनाभिकंदद्यात्प्रीयतांवृषभध्वजः।अ
थप्रयोगः।पूर्वोक्तकालेगोमयेनोपलिप्तेदेशेअविलोमनिर्मितंकंबलंत
दुपरिसशृंगंसखुरंबहिर्लोमप्राग्ग्रीवंकृष्णाजिनमास्तीर्यसुवर्णशृंगंरूप्य
दंतंमौक्तिकपुच्छंसुवर्णनाभंचतत्कृत्वातदुपर्याढकप्रमाणांस्तिलान्सं
स्थाप्यवाससासंछाद्यसगंधरत्नानिचत्वारिकांस्यघृतदुग्धदधिमधु
युतानिचत्वारिमृद्भाजनानिदिक्षुदानदेशाद्बहिश्चपंचकशास्त्रांसव्रण
कुंभंचसंस्थाप्यदेशकालादिस्मृत्वाब्रह्मलोकप्राप्तिकामःसप्तजन्मोपा
त्तपापनाशकामःपितृपुत्रमृत्युपरिहारभार्याधनदेशाद्यवियोगकामः
प्रलयावधिस्वर्गप्राप्तिसर्वभूदानफलसर्वलोकगतिकामोमोक्षकामई
श्वरप्रीतिकामोवाकृष्णाजिनदानंकरिष्यइतिसंकल्प्यजीर्णपीतवा
ससास्वांगानिसंमृज्ययानिपापानिकाम्यानिमयाल्लोभात्कृतानिवै
।लोहपात्रप्रदानेनप्रणश्यंतुममाशुवैइतिमंत्रेणसतिलंलोहपात्रंकृ
ष्णाजिनस्यवामेपादे॥यानिकाम्यानिपापानिकर्मोत्थानिकृतानिवै।
कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदेतिसमधुकांस्यंदक्षिणे।परापः
वादपैशून्याद्वृथामांसस्यभक्षणात्।तत्रोत्थितंचमेपापंताम्रपात्रा
त्प्रणश्यतु।इतिसतिलंताम्रपात्रंवामहस्ते।कन्यानृतंगवांचैवपरदा
रप्रधर्षणं।रौप्यपात्रप्रदानेनक्षिप्रंनाशंप्रयातुमइतिसमधुरौप्यपा
त्रंदक्षिणहस्ते।जन्मजन्मसहस्रेषुकृतंपापंकुबुद्धिना।सुवर्णपात्रदानात्

न्नाशयाशुजनार्द्दनेतिसाक्षतहेमपात्रंमध्येहेममुक्ताविद्रुमदाडिममा
तुलिंगानिसन्निधावाआदिप्रशस्तपत्रेकर्णयोःशृंगारकाणिचखुरेषु
संस्थाप्यवस्त्रयुग्मादिनाहिताग्निविप्रेयद्रव्यंचसंपूज्यप्रीयतांवृष
भध्वजइत्युक्त्वादेशकालौसंकीर्त्यामुकसगोत्रायामुकशर्मणेब्राह्म
णायतुभ्यमिदंकृष्णाजिनंकुशोपरिगतंकंबलोपरिस्थितंवस्त्राच्छा
दिततिलराशिसुवर्णशृंगरौप्यखुररूप्यदंतंमुक्तालांगूलसुवर्णालं
पंचरत्नालंकृतंचतुर्दिगवस्थितघृतक्षीरदधिमधुपूर्णपात्रचतुष्टयंस
कांस्यपात्रंतिलमध्वक्षतपूर्णलोहकांस्यताम्ररौप्यहेमपात्रहेममु
क्ताविद्रुमदाडिमबीजपूरपत्रशृंगारकयुतंशिवदैवतममुकसगोत्रो
मुकशर्माऽमुककामोहंसंप्रददेनममेति।एतद्दक्षिणातुगारुडे।शतनिष्क
समोपेतंतदर्द्धार्द्धमथापिवा।।अतोन्यूनंनदातव्यमधिकेफलमूर्जितं।
तत्रैव।अस्पृश्यःसद्विजोराजन्चितिमूपसमोहियः।दानेचश्राद्धकालेच
दूरतःपरिवर्जयेत्।।स्वगृहात्प्रेष्यतंविप्रंमंडलेस्नानमाचरेत्।तद्वस्त्रं
कुंभसहितंनीत्वाक्षेप्यंचतुष्पथे।स्वपितृपुत्रमरणंवियोगंभार्ययासह
।धनदेशपरित्यागंनचैवेहाप्नुयात्क्वचित्।समग्रभूमिदानस्यफलंप्रा
प्नोतिमानवः।सर्वांल्लोकान्विचरतिकामचारीविहंगमः।आभूतसंप्लवंया
वत्स्वर्गमाप्नोत्यसंशयमिति कृष्णाजिनदानतत्प्रयोगश्च।अथशय्यादा
नं।महाभारते।शय्यामास्तरणोपेतांसुप्रच्छादनसंस्कृतां।प्रदद्याद्यस्तुवि
प्रायशृणुतस्यापियत्फलं।सुरूपःसुभगःश्रीमान्स्त्रीसहस्रैस्तुसंवृतः।
दशवर्षसहस्राणिस्वर्गलोकेमहीयते।विष्णुसंहितायां।दर्पणैःपात्रा
णैश्चनानाद्रव्यैर्विभूषणैः।।चतुष्कोणेषुसंस्थाप्ययथाशक्त्यायुधिष्ठिर।
घृतकुंकुमगोधूमपूर्णपात्रंजलस्यच।शय्यांसंपूजयित्वातुमन्त्रेणोम
त्परायणः।कृतांजलिपुटोभूत्वाकुर्याच्छय्यांप्रदक्षिणां।नमःप्रमाण्यै
देव्यैतिप्रणम्यचचतुर्दिशं।ब्राह्मणायदरिद्रायश्रुताध्ययनशीलिने।त
थात्मज्ञानविदुषेशय्यांदद्याद्विचक्षणः।फलंच।तस्मादिंद्रपुरंगच्छेत्से
व्यमानोप्सरोगणैः।षष्टिवर्षसहस्राणिक्रीडित्वाचयथासुखं।इंद्रलो
कात्परिभ्रष्टइहलोकेनृपोभवेत्।।षष्टियोजनविस्तीर्णस्वामीभवतिमंड
ले।।भविष्योत्तरे।तस्माच्छय्यांसमासाद्यसारदारुमयींदृढां।दंतपत्रचि

तांरम्यांहेमपट्टैरलंकृतां। हंसतूलीप्रतिच्छन्नांशुभगंडोपधानकां। प्र
च्छादनपटीयुक्तांधूपगंधादिवासितां। तस्यांसंस्थापयेद्धैमंहरिंलक्ष्मी
समन्वितं। उच्छीर्षके घृतभृतंकलशंपरिकल्पयेत्। विज्ञेयःपांडव श्रे
ष्ठसनिद्राकलशोबुधैः। तांबूलकुंकुमक्षोदकर्पूरागुरुचंदनं। दीपिकोपा
नहच्छत्रंचामरासनभोजनं॥ पार्श्वेषुस्थापयेद्भक्त्यासप्तधान्यानिचैव
हि॥ शयनस्थंचभवतियदन्यदुपकारकं॥ भृंगारकरकाद्यंचपंचवर्णं
वितानकं॥ शय्यामेवंविधांकृत्वाब्राह्मणायोपपादयेत्। सपत्नीकायसंपू
ज्यपुण्येन्हिविधिपूर्वकं॥ यथानकृष्णशयनंशून्यंसागरजातया। श
य्याममाप्यशून्यास्तुतथाजन्मनिजन्मनीति॥ अथप्रयोगः। अष्टद
लेतिलप्रस्थंतस्मिन्स्वास्तीर्णांशय्यांतस्याःसमंतात्संकल्पवाक्येव
क्ष्यमाणानिकुंभादीनिसंस्थाप्य ॐअद्येत्यादि० सर्वपापक्षयपूर्वकाप्स
रोगणसेव्ययुतविमानकरणकेंद्रपुरगमनोत्तरषष्टिसहस्रवर्षतद
धिकरणकक्रीडनस्त्रीसहस्रसंवरणसहितस्वर्लोकसहितत्वतदुत्त
रषष्टियोजनमंडलराज्यानंतरशिवैक्यकामः शय्यांदास्यइतिसंक
ल्प्यसपत्नीकंविप्रंशय्यानदुपरिप्रतिमायांलक्ष्मीयुतंनारायणंचसंपूज्य
प्रदक्षिणीकृत्यनमः प्रमाण्यैपदेव्येतिचतुर्दिक्षुप्रणम्यतिष्ठ्याद्युल्लेखनां
तेसर्वपापक्षयेत्यादिकामांतपूर्वोक्तंसंकल्पवाक्यममुकसगोत्रायामु
कशर्मणेब्राह्मणायेमांशय्यांईशानादिकोणचतुष्टयस्थापितघृतकुं
भगोधूमजलपूर्णपात्रायुच्छीर्षकप्रदेशस्थापितांघृतपूर्णकलशांहंस
तूलीप्रच्छन्नांशुभगंडोपधानकांप्रच्छादनपटीसप्तधान्यतांबूलाद
र्शकुंकुमसोदकर्पूरागरुचंदनदीपिकोपानहच्छत्रचामरासनभोज
नजलपात्रपंचवर्णवितानलक्ष्मीनारायणप्रतिमायुतांअंगिरोदैव
तांअमुकसगोत्रोऽमुकशर्माहंसंप्रददेनममेति॥ शय्योपवेशितविप्र
हस्तेकुशोदकंक्षिपेत्॥ मंत्रः। यथानकृष्णशयनंशून्यंसागरजातया।
शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनीतिहिरण्यंदक्षिणेतिशय्या
दानप्रयोगः। हंसतूलीसमायुक्तांमृद्वास्तरणालंकृतां। सर्वोपकरणो
पेतांशिवेशय्यांनिवेदयेत्। शिवंदेवीसमायुक्तंपैष्टंकृत्वानिवेदयेदि
ति। शिवधर्मेशिवशय्यादानं। अथवस्त्रदानं। नंदिपुराणे। वस्त्रंयस्त्वर्थि

नेदद्याच्छुभंचापियदृच्छया। सभवेद्धनवान्श्रीमान्बृहस्पतिपुरेवसेत्
विष्णुधर्मोत्तरे। वासोहिसर्वदैवत्यंसर्वदेशायोऽप्यमुच्यते॥वस्त्रदानात्तुवे
षःस्याद्रूपद्रविणसंयुतः। युक्तोलावण्यसौभाग्यैर्विरोगश्चतथाद्विजः। तथा
।दत्वाकार्पासिकंवस्त्रंस्वर्गलोकेमहीयते। दत्वासरोमंतत्रापिफलंदशगु
णंभवेत्॥आविकंवसनंदत्वाभूरानांलोकमाप्नुयात्। छागंदत्वाचांगि
रसंक्षौमंदत्वाबृहस्पतेः। वस्तूनांलोकमाप्नोतिकुशकौशेयवाससा। कृमि
जंचतथादत्वासोमलोकेमहीयते॥ अग्निष्टोममवाप्नोतिदत्वैवमृगलो
मिकां। तथा। सर्वदोवस्त्रदःप्रोक्तोयतःसर्वत्रवस्त्रवान्। अवाप्नोतिचधर्मे
शस्तद्धितस्माद्विशिष्यते। भविष्यपुराणे। वासांसितुविचित्राणिसारवं
तिदृढंतिच॥ स्नापितानिशिवेदद्यात्सकोशानिनवानिच॥ यावत्तद्वस्त्र
तंतूनांपरिमाणंविधीयते। तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥
स्नापितानिप्रक्षालितानि। वाराहपुराणे। क्षौमंवराणियोदद्यात्सत्रोर्णा
निचचक्रिणे॥कार्पासजानिवादद्याद्भक्तोवित्तानुसारतः। तववासांसि
यावंतस्तंतूनांपरमाणवः। तावद्वर्षसहस्राणिविष्णुलोकेमहीयते।
देवीपुराणे। अंडजैर्वांडजैर्वापिवस्त्रैरभ्यर्च्यशैलजां। सभूष्याभरणैः
शंखचक्रवर्तित्वमाप्नुयात्। नंदिपुराणे। उष्णीषदायिनोमर्त्याजायंते
कुक्कुटोज्वलाः। विस्तीर्णराजवंशेषुसितच्छत्राग्र्यलक्षणाः। नारदीये। नि
ष्कंचनेभ्योदीनेभ्यःशीतवातमहातपैः। अर्दितेभ्यःकरुणयावस्त्रमू
र्णांददातियः। नतस्यसुकृतंवक्तुंत्रिदशैरपिशक्यते। आधिव्याधिविनि
र्मुक्तःसोऽक्षयंसुखमश्नुते। अथासनदानं। आसनंयःप्रयच्छेत्तुसुपात्रा
यचभक्तितः। सदिव्यान्भोगसंभोगान्नरोगःसर्वदाश्नुते। महाभारते
।चंद्रोदयंतुयोदद्याद्भक्त्यायच्छतिपुण्यधीः। नतस्याश्रयसामंतःकदा
चिदपिजायते॥चंद्रोदयोवितानं। स्कंदपुराणे। भाजनंयःप्रयच्छेत्तुहेमं
रत्नविभूषितं। सोप्सरःशतसंकीर्णोविमानेदिविमोदते। राजतंयःप्रय
च्छेत्तुविप्रेभ्योभाजनंशुभं। सगंधर्वपदंप्राप्यउर्वश्यासहमोदते॥ता
म्रं योभाजनंदद्याद्ब्राह्मणायविशेषतः। सभवेद्यक्षराजस्यप्रभुर्बलस
मन्वितः। ब्रह्मपुराणे। औदुंबराणिभांडानियोदद्याद्रायसानिच। औदुंब
राणिताम्रमयानि। महतींवृद्धिमाप्नोतिदुर्लभांत्रिदशैरपि। मदनरत्ने॥उ

त्तमंपलषष्टिश्चचत्वारिंशत्तुमध्यमं।द्वादशाधमपात्रंतुताम्रमश्माय
संस्मृतं।अत्रायसशब्दोधातुमात्रपरः।वासांसिवरणेदद्यादुपवीतंसमा
ल्यकं।चंदनंचैवतांबूलंविप्रंसंपूजयेत्ततः।घृतादिद्रव्यसंपूर्णंहेमग
र्भंसवस्त्रकं।प्रतिष्ठाप्यतुतत्पात्रंब्राह्मणायनिवेदयेत्।ततस्तत्पूर्णंसु
वर्णंतुप्रतिष्ठार्थंद्विजायतु।दद्यादितिशेषः।चंद्रलोकेवसेत्तावद्याव
दिंद्राश्चतुर्दशेति।घृतादीनिचात्रचतुर्दश।तत्रैव।घृतंचनवनीतंच
दधिदुग्धंतथैवच।शर्करागुडतैलानितिलाम धुजलंतथा।लवणंच
फलंसर्वंपावद्रत्नसमन्वितं।एवंचतुर्दशयुतंदातव्यंविधिनानृपेतिप
द्मे।सर्वेषामेवदानानामुत्तमंपात्रमिष्यते।यथाविधिप्रदातव्यंवित्त
शाठ्यविवर्जितं।अत्यंतनिर्द्धनोयोपिसोपिदद्याद्यथाविधि।चतुर्दशा
र्द्धमर्द्धंवादद्यादन्नफलेप्सयेति।वाराहे।अथातःसंप्रवक्ष्यामिपात्रर
त्नमनुत्तमं।।कृत्वाताम्रमयंपात्रंयथाविभवविस्तरं।उभयासहितंशं
भुंहरिंसश्रीकमेवच।।कृत्वातुकांचनींदिव्यांसंपूज्यावाहनादिभिः।
प्रतिमांब्राह्मणेदद्यात्पात्रभूतेविचक्षणे।।अत्रैवपूर्वोक्तघृतादिचतु
र्दशद्रव्याधिकात्कार्पासोपादानेनतद्द्रव्यपूर्णषोडशपात्रदानंप्रयु
क्तं।।अथस्थालीदानं।भविष्योत्तरे।दत्वाताम्रमयींस्थालींपलानांपं
चभिःशतैः।अशक्तस्तुतदर्द्धेनचतुर्थांशेनवापुनः।सर्वशक्तिविहीन
स्तुमृन्मयीमपिकारयेत्।।सुगंभीरोदरदरींदृढदंडकडच्छुकं।कड
च्छुकशब्देनदर्व्विरभिधीयते।।मृदुतंदुलनिष्पन्नस्विन्नक्षीरेणपूरि
तां।।उपदेशोदकयुतांघृतपात्रसमन्वितां।कृतपार्श्वांधौतवर्णांचर्चि
तांचंदनेनच।।स्थाप्यमंडलकेवस्त्रैःपुष्पधूपैरथार्चयेत्।आदित्येह
निसंक्रांतौचतुर्दश्यष्टमीषुच।एकादश्यांतृतीयायांविप्रायप्रतिपाद
येत्।।ज्वलज्ज्वलनपार्श्वस्थैस्तंडुलैःसजलैरपि।नभवेद्वाज्यसंसिद्धि
र्भूतानांपिठरंविना।त्वंसिद्धिःसिद्धिकामानांत्वंपुष्टिःपुष्टिमिच्छतां।
अतस्त्वांप्रणतोयाचेसत्यंकुरुवचोमम।ज्ञातिबंधुसुहृद्वर्गविप्रेषुस्व
जनेतथा।अभुक्तवत्सुनाश्नीयात्तथाभववरप्रद।इत्युच्चार्यप्रदातव्या
हंडिकाद्विजपुंगवे।।पुष्टितुष्टिप्रदापुंसांसर्वान्कामानभीप्सितान्।।इति
स्थालीदानं।।अथपाकदानं।तत्रप्रभावतींप्रतिपिप्पलादः।यद्येनपूर्वं

विहितंनरसौप्राप्नुतेफलं।कर्मभूमिरियंराज्ञिमानःशोचितुमर्हसि।त
स्माद्वह्निर्यद्दत्तंप्राप्तंतद्राज्यमुत्तमं॥भृत्यमित्रादिसंबंधोनदत्तःप्राप्य
तेकुतइत्यादिनाहेमरूप्यताम्रनिर्मितनानाविधभांडानांसर्वसंपत्क
रंआपाकदानमुक्त्वानित्यापाकदानं।अथविद्यादानाख्यमतिदानं।
तत्रपुराणदानंतावत्॥वाराहे।तत्संख्या।ब्राह्मंपाद्मंवैष्णवंचशैवं
भागवतंतथा।तथान्यन्नारदीयंचमार्कंडेयंचसप्तमं।आग्नेयमष्टमंप्रो
क्तंभविष्यंनवमंतथा।दशमंब्रह्मवैवर्त्तंलैंगमेकादशंतथा॥वाराहंद्वा
दशंप्रोक्तंस्कांदंचैवत्रयोदशं।चतुर्दशंवामनंचकौर्मंपंचदशंतथा।मा
त्स्यंचगारुडंचैवब्रह्मांडमितिमंतथा।अन्यान्युपपुराणानिसहिरण्या
निपर्वणि।लिखित्वायःप्रयच्छेत्तुसविद्यापारगोभवेदितिक्रमेणकाल
विशेषः।ब्राह्मंजलधेनुयुतंवैशाख्यांदेवफलंब्रह्मलोकः।पाद्मंहेमपद्म
युतंज्येष्ठायां॥फलमश्वमेधस्य।वैष्णवमाषाढ्यांस्वर्णधेनुसहितंफ
लंवरुणलोकः॥शैवंगुडधेनुसहितंश्रावण्यांफलंशिवलोकः।भागव
तंहेमसिंहयुतंप्रौष्ठपद्यांपरमपदंफलं॥नारदीयमाश्विन्यांहेमयुतं
परासिद्धिःफलं।मार्कंडेयंहेमहस्तियुतंकार्त्तिक्यांफलंपौंडरीकस्य॥
आग्नेयंहेमपद्मति लधेनुयुतंमार्गशीर्ष्यांसर्वक्रतुफलं।भविष्यंगु
डमस्थयुतंपौष्यांफलंविष्णुलोकः।ब्रह्मवैवर्त्तंचमरयुतंमाघ्यांफलं
ब्रह्मलोकः।लैंगंतिलधेनुयुतंफाल्गुन्यांफलंशिवसाम्यं।वाराहंगुड
युतंचैत्र्यांफलंविष्णुपदं।स्कांदंहेमशूलयुतंमकरसंक्रांतौफलंशिवप
दं।वामनंहेमवामनयुतंमेषेविष्णुपदंफलं।कौर्मंहेमकूर्मयुतंकर्के
गोसहस्रफलं॥मात्स्यंहेममत्स्ययुतंतुलायांपृथ्वीदानफलं।गारु
डंहेमहंसयुतंविषुवेसिद्धिःफलं।ब्रह्मांडंकौशेयसुवर्णधेनुयुतंव्यतीपा
तेराजसूयफलं।एतन्मूलंमात्स्ये।क्वचिच्छैवस्थानेवायवीयग्रहणं।ए
तदन्यान्युपपुराणानि।तद्दानेफलंविद्याविष्णुलोकः।सर्वत्रविष्णुप्रीति
र्वा।अत्रदानवाक्यमपिदेशकालौसंकीर्त्येतत्फलमुल्लिख्यदेयंदक्षिणा
नपृथगितिकेचित्।युक्तंतत्तद्दानेयुक्तधेन्वादिकैवदक्षिणा।रामायणं
भारतंचदत्वास्वर्गेमहीयते।पुराणंतर्कशास्त्रंचछंदोलक्षणमेवच।वे
दंमीमांसकंदत्वाशिवधर्मंचवैनृप।सप्तद्वीपपृथिव्यांचराजराजोभवे

ङ्गिसः। तथा। धर्मशास्त्रं नरो दत्त्वा स्वर्गलोके महीयते॥ अथ वेददानं
गारुडे॥ आम्नायरूपाणि विधाय सम्यक् हेमानि पूर्वोदितलक्षणानि। वि
शुद्धनानामणिभूषितानि ऋगादिवेदक्रमतो निवेश्य॥ वेदरूपं महाभूत
घटे उक्तं। वासांसि देयानि यथाक्रमेण पीतानि शुक्लान्यथ लोहितानि।
नीलानि चैवं कुसुमानि दत्त्वा संपूज्य गंधाक्षतधूपदीपैः॥ आमोदिमोद
कयुतं घृतपायसं च सक्षौद्रमन्नमथ पूपघृतं क्रमेण। तेभ्यो निवेद्य विधि
वत्स्वयतः प्रणम्य सम्यक् प्रदक्षिणविधिं विदधीत विद्वान्॥ तेषां पूजावि
धिः कार्यो गायत्र्या धीमतां वर॥ व्याहृत्या व्याहृतीः कुर्यादावाहनविसर्ज
ने। मंत्रैरेतैस्ततः कुर्यात्तदमीषामनुमंत्रणं। ऋग्वेद पद्मपत्राक्ष समां त्वं रक्ष
क्षिपाः शुभे। शरणं त्वां प्रपन्नोस्मि धेहि मे हितमद्भुत। यजुर्वेद नमस्तेस्तु
लोकत्राणपरायण॥ त्वत्प्रसादेन मे कामानि सिद्धाः संतु संततं। साम
वेद महाबाहो त्वं हि साक्षादधोक्षजः। प्रसादसुमुखो भूत्वा कृपया नु गृ
हाण मां। अथर्वन्सर्वभूतानां त्वदायत्ते हिताहिते॥ शांतिं कुरुष्व देवेश
पुष्टिमिष्टां प्रयच्छ नः। इति संप्रार्थ्य देवेशान्विप्रेभ्यः प्रतिपादयेत्॥ प्रद
द्यादेकमेकस्मै सुवर्णं त्रिपलान्वितं। दद्यादेकपलोपेतमेकैकमिह दुर्ब
लः॥ अथ स्वशक्तितो वापि दानमेषां विधीयते। एतदेव प्रमाणं स्यादेते
षां मूर्तिनिर्मितं। अनधीतवतो वेदान्वेददानविधिस्त्वयं। सदाध्ययन
युक्तस्य वेदाध्ययनमेव हि। याज्ञवल्क्यः। सर्वधर्ममयं ब्रह्म प्रदानेभ्यो
धिकं यतः। तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतमिति॥ इति वेददान
विधिः। अथ पुस्तकदानं। भविष्ये। शास्त्रसद्भावविदुषे वाचके च प्रियंवदे
॥ वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेदिति। तथा। कपिलादानसहस्रे
ण सम्यक् दत्तेन यत्फलं। तत्फलं समवाप्नोति पुस्तकैकप्रदानतः। पुराणं
भारतं वापि रामायणमथापि वा। दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्य
त इति तच्च हेमरूप्यगजदंतकाष्ठादिकृतेन्योन्यसंश्लिष्टे यंत्रे न्यस्य संपू
ज्य देयमिति पुराणांतरे॥ इति पुस्तकदानं। एवं त्रिविधविद्यादानं। पुस्तक
दानं प्रतिमादानमध्यापनं चेति। अथ छत्रोपानद्दानं। पाद्मे। असिपत्र
वने मार्गे क्षुरधारासमन्विते॥ तीक्ष्णातपं च तरति छत्रोपानत्प्रदो नरः
ति छत्रोपानद्दानं॥ अथान्नदानं स्कांदे॥ अन्नदः प्राणदः प्रोक्तः प्राणद

श्चापिसर्वदः।तस्मादन्नप्रदानेनसर्वदानफलंलभेदित्यन्नदानं।महा
र्णवेब्रह्मगीतायां॥वर्षाशनंश्रोत्रियायहार्थिनेचविशेषतः।असाध्यव्या
धिनायस्तोधनंदद्याद्द्विजातयइतिवर्षाशनदानं॥अथतांबूलदानं।भवि
ष्यपुराणे॥तांबूलंयोनरोदद्यात्सत्यहंनियमान्वितः॥देवेभ्योथद्विजा
तिभ्यःसमहाभाग्यमश्नुते॥इतितांबूलदानं।अथगंधद्रव्यदानं।स्कां
दे।नरःसुवर्णदेहत्वंगंधदानादवाप्नुयात्।भोगवान्जायतेनित्यंशरीरं
नास्यतप्यति॥विष्णुधर्मोत्तरे॥सौभाग्यकारकंदानंप्रोक्तंवैकुंकुमस्य
तु॥तथाकर्पूरदानेनसर्वकामानवाप्नुयात्।मृगदर्पप्रदानेनसम्राज्यं
राज्यमश्नुतइतिगंधद्रव्यदानं।लैंगे।तुष्टिर्भवेत्सदाकालंप्रदानाद्गंध
माल्ययोरितिनंदिपुराणे॥धूपदःसुरभिर्नित्यंपुष्पदःसुभगस्तथेति
।अथरत्नदानानि॥जाबालिः॥रत्नानियोद्विजेदद्याद्बहुमूल्यानिमान
वः।अलंकारनिमित्तंवादैवताभ्योतियत्नतः।संतापपापनिर्मुक्तोमुक्तिमे
वसमश्नुते।स्कांदे॥विद्रुमाणांप्रदानेनरुद्रलोकंव्रजेन्नरः॥सर्वपापवि
निर्मुक्तोमुक्तादानेनजायते।लोकमाप्नोतिदानेननरोवज्रस्यवज्रिणः
।तथाप्रमन्नेगौमेदैर्मोदतेनंदनेवने।सर्वत्रह्यप्रतुष्यंतिपुष्परागप्रदान
तः।गारुत्मतैर्गरुत्मंतंनियतंजयतिश्रियः।वैडूर्यैःसूर्यलोकंचपद्मरागै
रोगता॥प्रदानादिंद्रलोकानांनीलानांभाजनंभवेत्।सुखीशंखप्र
दानेनशक्तिःशुक्तिप्रदानतइतिरत्नदानं।अथगलंतिकादानं।भवि
ष्योत्तरे।वसंतसमयंज्ञात्वागत्वादेवालयंपरं।शिवस्यविष्णोःसंप्राप्ते
देवंपंचामृतेनतु।संस्नाप्यपूजयेद्गंधैर्नैवेद्यैश्चमनोरमैः।प्रणिपत्यम
हेशानंमंत्रमेतमुदीरयेत्॥ॐनमःशंकरःशंभुर्भवोधाताशिवोहरः।
प्रीयतांमेमहादेवोजलकुंभप्रदानतः।एवंसंकल्प्यदानांतुपश्चादागत्य
वेश्मनि।स्वशक्त्याशिवभक्तांश्चविप्रमुख्यांश्चभोजयेत्।एवंयःकु
रुतेग्रीष्मेजलदानक्रियांहरेः।यावद्बिंदूनिलिंगस्यपतितानिनसंशयः।
सवसेच्छांकरेलोकेतावत्कोट्योनरेश्वरेतिगलंतिकादानं।अथप्रपादा
नंभविष्योत्तरे॥अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे।पुण्येन्हिविप्र
कथितेमंडपंकारयेत्ततः।पुरस्यमध्येपथिवाचैत्यवृक्षतलेथवा॥सुशी
तलंतरंरम्यंविचित्रासनसंयुतं।तन्मध्येस्थापयेद्रम्यान्मपिकुंभांश्च

शोभनान्॥ब्राह्मणःशीलसंपन्नोभृतिंदत्वायथोचितां॥प्रपापालः
प्रकर्त्तव्योबहुपुत्रपरिच्छदः।एवंविधांप्रपांकृत्वाशुभेन्हिविधिपूर्व
कं॥यथाशक्त्यानरश्रेष्ठप्रारंभेभोजयेद्द्विजान्॥ततश्चोत्सर्जयेद्विप्रमं
त्रेणानेनमानवः।प्रपेयंसर्वसामान्यभूतेभ्यःप्रतिपादिता॥अस्याः
प्रदानात्पितरस्तृप्यंतुप्रपितामहाः॥अनिवारिततोदेयंजलंमास
चतुष्टयं।त्रिपक्षंचमहाराजजीवानांजीवनंपरं।प्रत्यहंकारयेत्तस्यां
भोजनंशक्तितोद्विजान्।अनेनविधिनायस्तुग्रीष्मेतापप्रणाशनं।पा
नीयमुत्तमंदद्यात्तस्यपुण्यफलंशृणु।कपिलाशतदानस्यसम्यग्दत्त
स्ययत्फलं॥तत्पुण्यफलमाप्नोतिसर्वदेवैःसुपूजितः॥पूर्णचंद्रप्रती
काशंविमानमधिरुह्यसः।यातिदेवेंद्रनगरंपूज्यमानोप्सरोगणैः॥त्रिं
शत्कोट्योहिवर्षाणांयक्षगंधर्वसेवितं॥पुण्यक्षयादिहागत्यचतु
र्वेदोद्विजोभवेत्॥ततःपरंपदंयातिपुनरावृत्तिदुर्लभमितिप्रपादानं
।अथोदकदानं।स्कंदपुराणे।त्रयाणामपिलोकानामुदकंजीवनंस्मृतं
॥पवित्रममृतंयस्मात्तद्देयंपुण्यमिच्छता।भविष्यपुराणे॥ग्रीष्मेचै
ववसंतेचपानीयंयःप्रयच्छति॥वक्तुंजिह्वासहस्रेणतस्यपुण्यंनः
शक्यते॥नंदिपुराणे॥योपिकश्चित्तृषार्त्तायजलपानंप्रयच्छति।स
नित्यतृप्तोभवतिस्वर्गेयुगशतंनरः॥गरुडपुराणे॥मूल्येनक्रीत्वा
घर्मांतेजलदानंप्रयच्छति।सयातिचंद्रसालोक्यंशुभमालाशुकावृ
तः।क्षीरकुल्यास्तमायांतितथायांतिमधुस्रवाः॥घृतदध्युदकास्त
स्यसमुद्रावशवर्त्तिनः॥देवलः॥सतोयांपथिकेविप्रेप्रदद्यात्करपात्रि
कां॥फलंसकूपखातस्यनूनमाप्नोतिमानवः॥महाभारते॥पिपास
यानम्रियतेसोपच्छंदश्चजायते॥नैवाप्नुयाच्चव्यसनंकरकान्यःप्रय
च्छति॥आदित्यपुराणे।योददातिघटीपात्रंकुंडिकाःकरकांस्तथा
।तृषार्त्तस्यतथाघर्मेलभतेशीतलंजलं॥अथधर्मघटदानं॥विष्णुः।
शीतलेनसुगंधेनवारिणापूरितंघटं।सुकुंकुमचंदनदिग्धांगंपुष्पदामो
पशोभितं॥दध्योदनभृतंकुर्याच्छरावंतस्यचोपरि॥उपानच्छत्रसंयु
क्तेधर्माख्यंकल्पयेद्घटं॥पुष्पाक्षतंगृहीत्वातुइमंमंत्रमुदीरयेत्।ॐन
मोविष्णुरूपायनमःसागरसंभव।अपांपूर्णोद्धरास्मांस्त्वंदुःखसंसार

सागरात्॥उदकुंभोमयादत्तोग्रीष्मकालेदिनेदिने॥उदकुंभप्रदानेनप्री
यतांमधुसूदनः॥भविष्योत्तरे।प्रत्यहंधर्मघटकोवस्त्रसंवेष्टितोनवः
।ब्राह्मणस्यगृहेदेयःशीतामलजलःशुचिः।वसंतग्रीष्मयोर्मध्येपान
नीयंप्रयच्छति॥पलेपलेसुवर्णस्यफलमाप्नोतिमानवः।मार्गशीर्षा
त्समारभ्यउदकुंभंतुयःक्षिपेत्॥दिनेदिनेसहस्रस्यगवांपुण्यफलंल
भेत्॥तस्यैवोद्यापनंकार्यंमासिमासिनरोत्तम॥मंडकावेष्टकाभि
श्चपक्वान्नैःसार्वकामिकैः।उद्दिश्यशंकरंविष्णुंब्रह्माणमथवापितॄ
न्।सतिलंप्रोक्षयित्वातुमंत्रेणानेनमानवः॥एषधर्मघटोदत्तोब्रह्म
विष्णुशिवात्मकः।अस्यप्रदानात्सततंममसंतुमनोरथाः।अनेन
विधिनायस्तुधर्मकुंभंप्रयच्छति॥वसंतग्रीष्मसमयेगोप्रदानफलंल
भेत्॥इतिधर्मघटदानं॥बौधायनः।यज्ञोपवीतदानेनजायतेब्रह्मव
र्चसी।तस्मात्तानिप्रदेयानिब्राह्मणेभ्योविपश्चिता।अत्रिः।क्षौमजं
वापिकार्पासंपट्टसूत्रमथापिवा॥यज्ञोपवीतंयोदद्याच्छ्वेतवर्णंसुशो
भनं॥यथाशक्त्याविधानेनअग्निष्टोमफलंलभेत्॥नंदिपुराणे॥यज्ञो
पवीतदानेनसुरेभ्योब्राह्मणायवा॥भवेद्विप्रश्चतुर्वेदःशुद्धधीर्नात्र
संशयः।विष्णुसूक्ते॥उपाकर्मणिविप्रेभ्योदद्याद्यज्ञोपवीतकं।आयु
ष्मान्जायतेतेनकर्मणामानवोभुवि॥अथयष्टिदानं।यष्टिंयेचप्रय
च्छंतिनेत्रहीनेषुदुर्बले।तेषांसुविपुलःपंथाःफलमूलोपशोभितः।
ब्रह्मवैवर्त्ते।येपंगुभ्यश्चपांथेभ्योदीनेभ्योपिदयालवः।यष्टिदानंप्रकु
र्वंतिनिरोगास्तेनसंशयः।पंगोश्चरणकार्याणियष्टिःप्रकुरुतेसदा।गो
सर्पादिनिवृत्तिश्चजायतेयष्टिधारणात्।भीतानांशरणंयष्टिर्गच्छतां
निशिवावने॥शंकांपंकाहिवानोत्थांनियमेननिरस्यति॥स्कंदपुराणे।
यतिभ्योवैणवंदंडंद्विजेभ्योपिसनित्रकं।प्रदायपरलोकेसयमदंडंन
गच्छति।प्रदद्यातियथावर्णंयोदंडंब्रह्मचारिणे।समहापुरुषोलोके
ब्रह्मवर्चसमश्नुते॥अथेंधनदानं॥वन्हिपुराणे॥यइंधनानिकाष्ठानि
ब्राह्मणेभ्यःप्रयच्छति॥सर्वार्थास्तस्यसिद्ध्यंतितेजस्वीचापिजायते।
हेमंतेशिशिरेचैवपुण्योग्निंयःप्रयच्छति।सर्वलोकप्रतापार्थपुण्यांग
तिमवाप्नुयात्॥यमः।इंधनानांप्रदानेनदीप्ताग्निर्भुविजायते।महाभा

रते॥यश्चेंधनार्थंकाष्ठानिब्राह्मणेभ्यःप्रयच्छति।।प्रतापनार्थंराजें
द्रप्रवृत्तेशिशिरेनरः।सिद्ध्यंत्यर्थाःसदातस्यकार्याणित्रिविधानिच।उ
पर्युपरिशत्रूणांवपुषादीप्यतेनरः॥भगवांस्तस्यसुप्रीतोवन्हिर्भवति
नित्यशः॥नतस्यजंतिपशवःसंग्रामेषुजयत्यपि।अथाग्नीष्टिकादानं
॥भविष्योत्तरे।कृष्णउवाच।आदौमार्गशिरेमासिशोभनेदिवसेशुभे।अ
ग्नीष्टिकांकारयित्वासुखासनवतींदृढां।देवांगणेमठेहट्टेविस्तीर्णेच
त्वरेतथा।उभयोःसंध्ययोःकृत्वासुपुष्टकाष्ठसंचयं।ततःप्रज्वालयेदग्निं
हुत्वाव्याहृतिभिःक्रमात्।ब्राह्मणान्भोजयेद्भक्त्यातेभ्योदद्याच्चदक्षिणां
॥अनेनविधिनाकृत्वाप्रत्यहंज्वालयेत्ततः॥यदिकश्चित्तुधार्तःस्याद्भो
जनंतस्यकल्पयेत्॥ॐअद्येत्यादिहेमंतशिशिराख्यमृतुद्वयंयावत्स
त्यहंशीतार्त्तप्राणितापनार्थंइमामग्नीष्टिकांविष्णुदैवतांषष्टिसह
स्रषष्टिशतावच्छिन्नब्रह्मलोकमहितत्वानंतरसर्वार्थसंपन्नचतुर्वे
दित्वप्राप्तिकामोहमुत्सृजे॥अस्यदानस्यफलमपितत्रैव।विमाने
चार्कसंकाशेसमारूढोमहामते॥षष्टिवर्षसहस्राणिषष्टिवर्षशता
निच॥अर्चितोत्यंतसंतुष्टोब्रह्मलोकेमहीपते।इहलोकेवतीर्णश्च
चतुर्वेदोद्विजोभवेत्॥नीरुजःसत्यवादीचअग्नितेजाःप्रभावतः।चैत्ये
सुरालयसभावसथेषुभव्यांयेग्नीष्टिकांप्रचुरकाष्ठवतींप्रदद्युः।हेमंत
शैशिरऋतौसुखदांजनानांकायाग्निदीप्तममलंवपुरावहंति॥अथ
दीपदानं।संवर्त्तः।देवागारेद्विजानांवादीपंदत्वाचतुष्पथे॥मेधावीज्ञा
नसंपन्नश्चक्षुष्मांश्चसदाभवेत्।गरुडपुराणे।नीलकंठस्यमोक्षेथा
गयायांचतिलोदकैः।वर्षासुदीपदानेनपितृणामनृणोभवेत्।नी
लकंठस्यमोसो ———————— नीलकंठवृषोत्सर्गः।यस्तुब्राह्मण
गेहेषुदीपमालांप्रयच्छति।सनिर्जित्यतमोघोरंज्योतिषांलोकमाप्नुया
त्।महाभारते।दीपप्रदानंवक्ष्यामिफलयोगमनुत्तमं।यथायेनयदादे
यप्रदीपायादृशाश्चते।ज्योतिस्तेजःप्रकाशंवाप्यूर्ध्वगत्यापिचार्णवे॥
प्रदानंतेजसांतस्मात्तेजोवर्द्धयतेनृणां।अंधंतमस्तमिस्रंचदक्षिणाय
नमेवच॥उत्तरायणमेतस्माद्दीपदानंप्रशस्यते।यस्मादूर्ध्वगतोयस्त
त्तमसश्चैवभेषजं।तस्मादूर्ध्वगतिर्दाताभवेत्तत्रेतिनिश्चयः।विष्णुध

र्मोत्तरे॥ महावर्त्तिः सदा देया भूमिपाल महाफला॥ कृष्णपक्षे विशेषेण
तत्रापि च विशेषतः॥ अमावास्या विनिर्दिष्टा द्वादशी च महाफला॥ अ
श्वयुज्यामतीतायां कृष्णपक्षस्य या भवेत्॥ अमावास्या तदा पुण्या द्वाद
शी च विशेषतः॥ देवस्य दक्षिणे पार्श्वे देया तैलतुला नृप॥ फलाष्टकयुता रा
जन् वर्त्तिं तत्रैव दापयेत्॥ वाससा तु समग्रेण सोपवासो जितेंद्रियः॥ महावर्त्ति
द्वयमिदं सकृद्दत्वा महीयते॥ गिरिशृंगेषु दातव्यं नदीनां पुलिनेषु च। चतु
ष्पथेषु रथ्यासु ब्राह्मणानां च वेश्मसु। वृक्षमूलेषु गोष्ठेषु कांतार गहनेषु च
॥ दीपदानेन सर्वत्र महत्फलमुपाश्नुते॥ यावंत्यक्षिनिमेषाणि दीपः प्रज्व
लते नृप॥ तावंत्येव स राजेंद्र वर्षाणि दिवि मोदते॥ दीपदानेन राजेंद्र चक्षु
ष्मानिह जायते॥ रूपसौभाग्ययुक्तस्तु धनधान्यसमन्वितः। अथाभयदा
नं। संवर्त्तः। भूताभयप्रदानेन सर्वान्कामानवाप्नुयात्। दीर्घमायुश्च लभते स
दा च सुखिनो भवेत्॥ रामायणे॥ बद्धांजलिपुटं दीनं याचंतमपराधिनं। न
हन्याच्छरणं प्राप्तं सतां धर्ममनुस्मरन्। महाभारते। लोभाद्द्वेषाद्भयाद्वापि
यस्त्यजेच्छरणागतं। ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः॥ अथ मासे
षु दानानि। विष्णुधर्मोत्तरे। तिलप्रदानान्माघे तु याम्यं लोकं न गच्छति। प्रि
यंगुं फाल्गुने दत्वा प्रियो भवति भूतले॥ चैत्रे चित्राणि वस्त्राणि दत्वा सौ
भाग्यमश्नुते॥ अपूपानां प्रदानेन वैशाखे स्वर्गमश्नुते॥ छत्रदानं तथा ज्येष्ठे
सर्वान्कामान्समश्नुते॥ आषाढे चंदनं देयं सकर्पूरं महाफलं॥ श्रावणे व
स्त्रदानस्य कीर्त्तितं सुमहत्फलं॥ प्रोष्ठपादे तथा मासे प्रदानात्फाणितस्य
च। आश्विने घृतदानेन रूपवानभिजायते। कार्त्तिके दीपदानेन सर्वथोज्ज्व
लमाप्नुयात्॥ लवणं मार्गशीर्षे तु दत्वा सौभाग्यमश्नुते। पौषे कांचनदानेन
परां तुष्टिं तथैव च॥ पुष्पाणां च सिते पक्षे दानं लक्ष्मीकरं मतं॥ फलानां च त
था दानं कृष्णपक्षे महाफलं॥ अथाश्वत्थसेचनं। भविष्योत्तरे। उदकुंभप्र
दानेपि ह्यशक्तो यः पुमान्भवेत्। तेनाश्वत्थतरोर्मूलं सेव्यं नित्यं जितात्मना
॥ सर्वपापप्रशमनं सर्वदुःस्वप्ननाशनं। सर्वरोगप्रशमनं नित्यं संततिवर्द्ध
नं॥ अश्वत्थरूपी भगवान्प्रीयतां मे जनार्द्दनः। इत्युच्चार्य नमस्कृत्य प्र
त्यहं पापनाशनं॥ यः करोति तरोर्मूले सेकं मासचतुष्टयं॥ सोपि तत्फल
माप्नोति श्रुतिरेषा सनातनी॥ इत्यश्वत्थसेचनं॥ अथ पांथोपचारः॥ गरु

ड्पुराणे॥ पांथंपरिचरेद्यस्तुशयनासनभोजनैः॥ सस्वल्पेनप्रयासेन
जयतिक्रतुयाजिनं॥ दत्वावासोविवस्त्रायरोगिणेरुक्प्रतिक्रियां॥ त
षार्त्तायजलंदत्वामृष्टमन्नंबुभुक्षवे॥ पथिकाययथावित्तंसर्वंतरति
दुष्कृतं॥ अध्वन्यमनसान्यापिशाकमूलफलैर्जलैः। सत्कृतस्सत्कृत्य
वाचापिश्रेयसोभाजनंभवेत्॥ तथा। अभावेतृणभूम्यंबुपत्रेंधनफ
लानिच॥ दत्वागताघनिर्विण्णःस्वर्गंयातिप्रियेणवा॥ विष्णुधर्मोत्तरे
॥ उपानद्भ्यांचछत्रेणश्रांतंसंयोज्यमानवः॥ संस्थाप्यशुभदेशेतुक्षणाद्दु
फलंलभेत्। तथा। स्वल्पेनवासयित्वापिपरभारविचक्षणः। अश्वमेध
स्ययज्ञस्यफलंदशगुणंभवेत्॥ तथा। चौरेभ्योरक्षणंकृत्वाशक्रलो
केमहीयते। स्कांदे। यस्तुमार्गपरिश्रांतंद्विजातिंयामकर्षितं। तैलेनाभ्यं
जयेत्स्नातःससुखीमोदतेचिरं। सर्पिषाकपिलाधेनोरथवान्येनसर्पि
षा॥ उत्तरायणमासाद्ययोभ्यंजयतिधूर्जटिं॥ महापूजाघृतेनैवतस्मि
न्नेवदिनेशिवे। कृत्वामनुष्योलभतेराज्यंनिहतकंटकं। सर्पिःपलसह
स्रेणगोविंदस्यशिवस्यच॥ महास्नानंनरःकृत्वाब्रह्महत्यांतरिष्यति
। नंदिपुराणे॥ पादाभ्यंगंतुयोदद्यात्स्नाप्यपरिखेदिने। सप्रभाभरणै
पादैर्वंदिभिर्नित्यवंदितः॥ भवेन्नृपोमहाभागोमंडलेदशयोजने॥ सं
वाह्याध्वपरिश्रांतंपादाभ्यंगादिनानरः॥ धर्मस्यपरमाप्नोतिसर्वका
मगुणोज्वलः। दत्वावातिसुसंस्पर्शंपादाभ्यांचद्विजातये॥ उच्छिष्टमार्जे
नाच्चापिगोदानफलमश्नुते॥ भविष्यपुराणे॥ ब्राह्मणस्यतुयोभक्त्या
पादौप्रक्षाल्यशक्तितः॥ घृतेनाभ्यज्यपादौतुविष्णुलोकेमहीयते। इ
तिपांथोपचारः॥ अथगोपरिचर्या॥ विष्णुः॥ गवांकंडूयनंचैवसर्वक
ल्मषनाशनं॥ गवांग्रासप्रदानेनस्वर्गलोकेमहीयते॥ आदित्यपु
राणे॥ लवणं चयथाशक्त्यागवांयोवैददातिच। तेषांपुण्यकृतांलो
कागवांलोकंव्रजंतिते॥ महाभारते। कृत्वागवार्थेशरणंशीतवातक्षमं
महत्॥ आसप्तमंतारयतिकुलंभरतसत्तम॥ हारीतः। द्वौमासौपायये
द्वत्संतृतीयेद्विस्तनंदुहेत्। चतुर्थेत्रिस्तनंचैवयथान्यायंयथाबलं। ब्र
ह्मपुराणे। आदौविचार्यैववयसःपरिमाणंबलंरुचिं। आकस्मिकंतुदात
व्यंपुण्यार्थंतुगवाह्निकं। विष्णुधर्मोत्तरे। गवांकंडूयनंचैवसर्वकल्मष

नाशनं॥ तासांशृंगोदकं नाम जान्हवीजलसन्निभं। तथा। दत्वा परगवे ग्रा
सं पुण्यं समहदाप्नुयात्॥ शिशिरं सकलं कालं ग्रासं परगवे तथा॥ दत्वा स्व
र्गमवाप्नोति संवत्सरशतानि षट्। अग्रभक्तं नरो दद्यान्नित्यमेव तथा गवां
। मासाष्टकेन लभते नाकलोकं समायुतं॥ सायं प्रातर्मनुष्याणामशनं स्मृ
तिनिर्मितं॥ तत्रैकमशनं दत्वा गवां नित्यमतंद्रितः। द्वितीयं यः समश्ना
ति तेन संवत्सरं नरः। गवां लोकमवाप्नोति तेन संवत्सरं नरः। गवां लोकम
वाप्नोति यावन्मन्वंतरं द्विजः॥ शीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम॥
वारुणं लोकमाप्नोति क्रीडत्यप्सरोगणायुतं॥ तथा। सिंहव्याघ्रभयत्र
स्तां पंकलग्नां जले गतां॥ गामुद्धृत्य नरः स्वर्गे कल्पभोगाननुपाश्नुते॥
तासां संस्पर्शनं धन्यं सर्वकल्मषनाशनं॥ दानेन च तथा तासां कुलान्य
पि समुद्धरेत्॥ उदक्या सूतिकादोषो नैव तत्र गृहे भवेत्॥ इति गोपरि
चर्या॥ अथ सहस्रादिविप्रभोजनविधिः। भारते॥ ब्राह्मणानां सह
स्रं तु संभोज्य भरतर्षभ॥ नरः पापात्प्रमुच्येत पापेष्वभिरतोपि यः॥
भोजयित्वा दशशतं नरो वेदविदां नृप॥ न्यायविद्धर्मविदुषां स्मृतिभा
ष्यविदां तथा॥ न याति नरकं घोरं संसारांश्च न सेवते॥ सर्वकामसमा
युक्तः प्रेत्य चाप्यश्नुते सुखमिति॥ लक्षभोजनादौ तु न विधिः क्वाप्युप
लभ्यः। यस्तु मैथिलग्रंथे क्वचिद्दृष्टे लिखितः सोप्यनाकरः॥ अथैतस्य प्रयोगः
। देशकालौ संकीर्त्य पूर्वोक्तफलकामः सहस्रब्राह्मणान्भोज्यादिना तृप्ति
तर्पयिष्ये इति संकल्प्य पुण्याहं वाचयित्वा दिकालाष्टकं संपूज्य ब्राह्म
णान् धूपदीपवस्त्रालंकारैः संपूज्य सघृतान्नेनातृप्ति भोजयेत्॥ ततो
ऽग्निस्थापनाग्निमुखांतं कृत्वा केशवादिभिर्द्वादशनामभिः स्वाहांतैर्घृ
तेन हुत्वा दध्यन्नं ब्राह्मणेभ्यो निवेद्य स्विष्टकृदादि कृत्वा ब्राह्मणेभ्यः
छत्रोपानहौ प्रत्येकं दत्वा स्वस्तिवाच्य तानृक्षमापयित्वा आशिषो गृही
त्वा विसर्जयेत्। ततो भुक्तशेषं बंधुसहितौ दंपती हृष्टमनस्कौ भुंजीयाता
मिति। अनेन चैकस्मिन्नेव दिने सहस्रादिभोजनं कार्यमिति प्रतीयते। शि
ष्टास्त्वनेकदिनैरपि समापयंति। तन्मूलं विचारणीयं। अथ नानाद्रव्यदा
नमंत्राः। हेमाद्रौ व्रतखंडे॥ धन्यं करोति दातारमिहलोके परत्र च। तस्मा
त्प्रदीयते धान्यमतः शांतिं प्रयच्छ मे। धान्यस्य। अन्नेन जायते विश्वं

प्राणिनांप्राणरक्षणं।तंडुलावैश्वदेवत्याः पाकेनान्नं भवंतिये।पावनाः
सर्वयज्ञेषुप्रशस्ताहोमकर्मणि॥तस्मात्तंडुलदानेनप्रीयतांविश्वदेव
ताः॥तंडुलानां।यस्मादन्नमयोजंबूद्वीपेगोधूमसंभवः।गंधर्वैसौख्य
धनद अतःशांतिंप्रयच्छमे॥गोधूमानां।धान्यराजाश्चमांगल्याद्विज
प्रीतिकरायवाः॥तस्मादेषांप्रदानेनममास्त्वभिमतंफलं।यवानां।
मुद्गबीजानिवैयस्मात्प्रियाण्पिरमेष्ठिनः।तस्मादेषांप्रदानेनप्रीतिः
सिद्ध्यातुमेसदा॥मुद्गानां॥यस्मान्मधुवधेकालेविष्णुदेहसमुद्भवाः॥
पितृप्रीतिकरामाषाअतःशांतिंप्रयच्छमे॥माषाणां॥पुरागोवर्द्धनोद्धा
रसमयेहरिभक्षिताः।चणकाःसर्वपापघ्नाअतःशांतिंप्रयच्छमे॥चण
कानां।अग्निवर्णोद्भवानामवलकीर्तिप्रवर्द्धनाः।कुलत्थाःसर्वपापघ्ना
अतःशांतिंप्रयच्छमे।कुलत्थानां॥तिलाःपापहरानित्यंविष्णुदेहसमु
द्भवाः।तिलदानेनसर्वमेपापंनाशयकेशव॥तिलानां।तिलाःस्वर्णम
यायुक्तादुरितक्षयकारकाः।विष्णुप्रीतिकरानित्यमतःशांतिंप्रयच्छमे
।स्वर्णतिलानां।तिलाःपुण्याःपवित्राश्चसर्वकामकराःशुभाः।शुक्लाश्चैव
तथाकृष्णाविष्णुगात्रसमुद्भवाः॥यानिकानिचपापानिब्रह्महत्यासमा
निच॥तिलपात्रप्रदानेनतानिनश्यंतुमेसदा॥सहिरण्यतिलपात्र
स्य।अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः।अन्नंब्रह्माशिवस्त्राणं
अस्तुमेजन्मजन्मनि।अन्नस्य।चंद्रमंडलमध्यस्थंचंद्रांबुजसमप्रभं
॥दध्यन्नंतस्यदानेनप्रीयतांवामनोमम॥दध्यन्नंसोपदेशंचब्रह्मवि
ष्णुशिवात्मकं।प्रीयतांधर्मराजोहितद्दानान्ममसर्वदा॥सोपदेशदध्य
न्नस्य।पानीयसहितंचैवसदध्योदनपात्रकं।समर्चितंचसफलंसदक्षिणं
गृहाणमे।सपानीयदध्यन्नस्य।सर्वदैवतयोग्यंचश्रेयःपुष्टिंप्रयच्छतु॥
पायसान्नस्य।केशवप्रीतिदाभक्ष्याःशंभुब्रह्माकेतुष्टिदाः।पृथग्विधापूप
काद्यायच्छंतुबलमौरसं।भक्ष्याणां।आदित्यतेजसोत्पन्नाःसर्वमंगलकार
काः।मंडकाःसर्वपापघ्नाअतःशांतिंप्रयच्छमे।मंडकानां।आदित्यतेजसा॰
भ्यक्तंत्रातिश्रेष्ठ्यकरंपरं॥दत्तंतेममविप्रत्वंप्रतीच्छापूपमुत्तमं।अपूपा
न्नस्य॥प्राजापत्यायतःप्रोक्तासक्तवोयत्तकर्मणि।तस्मात्सक्तून्प्रयच्छा
मिप्रीयतांमेप्रजापतिः॥सक्तूनां॥अलक्ष्मीमरणंनित्यंनित्यंसौभाग्यवर्द्धे

नं॥क्षीरंमंगलमायुष्यमतःशांतिंप्रयच्छमे।दुग्धस्य।कामधेनोःसमु
द्भूतंविष्णोःप्रीतिकरंपरं॥नवनीतंप्रदास्यामिबलंपुष्टिंचदेहिमे।नवनी
तस्य।कामधेनोःसमुद्भूतंदेवानामुत्तमंहविः।आयुर्विवर्द्धनंदातुराज्यं
पातुसदैवमां।आज्यस्य।या॰लक्ष्मीर्यच्चमेदोःस्थ्यंसर्वगात्रेव्यवस्थि
तं।तत्सर्वंशमयाज्यत्वंलक्ष्मींपुष्टिंचवर्द्धय।यज्ञार्थाज्यस्य॥आज्यंते
जःसमुद्दिष्टंआज्यंपापहरंस्मृतं॥आज्यंसुराणामाहारंआज्येदेवाः
प्रतिष्ठिताः।पापघ्नपार्थाज्यस्य॥तैलंपुष्टिकरंनित्यंआयुष्यंपापनाश
नं॥अमंगल्यहरंपुण्यमतःशांतिंप्रयच्छमे।तैलस्य।अमृतस्यकुले
त्पन्नाइक्षुधारातिशर्करा॥सूर्यप्रीतिकरानित्यमतःशांतिंप्रयच्छमे॥
शर्करायाः।मनोभवधनुर्मध्यादुद्भूताशर्करायतः।तस्मादस्याःप्रदानेन
ममसंतुमनोरथाः।खंडस्य।प्रणवःसर्वमंत्राणांनारीणांपार्वतीयथा।त
थारसानांप्रवरःसदैवेक्षुरसोमतः।ममतस्मात्परांशांतिंददस्वगुडस
र्वदा॥गुडस्य।इक्षुदंडमहापुण्यंरसालंसर्वकामदं॥तुभ्यंदास्यामिते
नाशुप्रीयतांपरमेश्वरः।इक्षोः।यस्मात्पितॄणांश्राद्धेत्वंपीतंमध्वमृतोद्भ
वं।तस्मात्त्वद्दानेनरक्षमांदुःखसागरात्॥मधुनः।वारिपूर्णघटोपेतंदे
वत्रयमयंयतः।प्रीयतांधर्मराजस्तुदानेनानेनपुण्यदः।उदकुंभस्य।
यमामनंतिविघ्नेशंविश्वनाथमुमासुतं।विघ्नेश्वरक्षिप्रचरतुभ्यंदास्या
म्यभीष्टदं॥गणेशप्रतिमायाः।ददामिभानुभवनेसर्वोपस्करसंयुतं।म
नोभिलषितावाप्तिंकरोतुममभास्करः॥सूर्यमूर्तेः।त्वयासुराणामम्
तंविहाययहालाहलंसंहृतमेवयस्मात्।तथासुराणांत्रिपुरंचदग्धमेके
षुणालोकहितार्थमीश॥त्वद्रूपदानादहमप्यदोषोदोषैर्विमुक्तस्तुगुणा
न्प्रपद्ये॥तथाकुरुत्वंशरणंप्रपद्येमयिप्रभोदेववरप्रसादं।शिवमूर्तेः।
प्रसीदतुभवोनित्यंकृत्तिवासामहेश्वरः।पार्वत्यासहितोदेवोजगदुत्पत्तिका
रकः।उमामहेश्वरयोः।शिवशक्त्यात्मकंयस्माज्जगदेतच्चराचरं।यस्माद
नेनसर्वमेकरोतुभगवान्शिवं।कैलासवासीगौरीशोभगवान्भगने
त्रवित्।चराचरात्मकोलिंगरूपीदिशतुवांछितं।लिंगस्य।इदंमारकतंलि
गंरौप्यपीठसमन्वितं।धान्यैर्द्वादशभिर्युक्तंएकादशफलान्वितं।संप्रदद्यांवि
धानेनयथोक्तंफलमस्तुमे॥मरकतलिंगस्य।काश्मीरलिंगपक्षेतुइदंकाश्मी

रत्नमिनिवदेत्।महाकोशनिवासेनचक्राद्यैरुपशोभितं।अस्यदेवप्रदा
नात्तुममसंतुमनोरथाः।शालग्रामस्य।महाकोश निवासत्वंमहादेवो
महेश्वरः।प्रीयतांत्वदानेननतःशांतिंप्रयच्छमे।शिवनाभस्य।शंकु
कर्णप्रलंबोष्ठलंबभ्रूर्दीर्घनासिक।अष्टनेत्रचतुर्वक्त्रविस्तीर्णशतयो
जन।व्यतीपातनमस्तेस्तुसोमसूर्यसुतप्रभो।यद्दानादिकृतंसर्वंतद
क्षय्यमिहास्तुमे।व्यतीपातस्य।विधुंतुदनमस्तेस्तुसिंहिकानंदनाच्यु
य।दानेनानेननागस्यरक्षमांवेधजाद्भयात्।स्वर्णनागस्य।जन्मां
तरसहस्रेषुयत्कृतंदुरितंमया।स्वर्णपात्रप्रदानेनशांतिरस्तुसदाम
म।स्वर्णपात्रस्य।त्वदुद्भवोजगत्स्रष्टुर्वेधसोहेमपंकज।पद्मावासह
रैर्नीभिर्ज्ञात्वमांपाहिसर्वदा।स्वर्णपद्मस्य।कांतारवनदुर्गेषुचौरव्या
लाकुलेपथि।हिंसकाश्चनहिंसंतुसिंहदानप्रभावतः।स्वर्णसिंहस्य।
हिरण्यगर्भसंभूतंसौवर्णंचांगुलीयकं।धर्मपादंप्रयच्छामिप्रीयतांक
मलापतिः।अंगुलीयस्य।कांचनंहस्तवलयंरूपकांतिसुखप्रदं।वि
भूषणंप्रदास्यामिविभूषयतुमांसदा।वलयस्य।क्षीरोदमथनोद्भूत
मुद्भूतंकुंडलद्वयं।श्रियासहसमुद्भूतंददेश्रीःप्रीयतांमम।कुंडलस्य।
अगम्यागमनंचैवपरदाराभिमर्शनं।रौप्यपात्रप्रदानेननतानिनश्यंतुमेस
दा।रौप्यपात्रस्य।असुरेषुसमुद्भूतंरजतंपितृवल्लभं।तस्माद्स्यप्रदा
नेनरुद्रःसंप्रीयतांमम।रजतस्य।परापवादपैशून्याद्भक्ष्यस्यचभ
क्षणात्।तत्रजातंचयत्पापंताम्रपात्रात्प्रणश्यतु।ताम्रपात्रस्य।या
निपापानिकाम्यानिकर्मोत्थानिकृतानिवै।कांस्यपात्रप्रदानेनतानिनश्यं
तुमेसदा।कांस्यपात्रस्य।यानिपापान्यनेकानिमयायानिकृतानिच।
लोहपात्रप्रदानेनतानिनश्यंतुसर्वदा।लोहपात्रस्य।यथारत्नेषुसर्वेषु
सर्वेदेवाव्यवस्थिताः।तथाशांतिंप्रयच्छंतुरत्नदानेनमेसुराः।रत्नमंत्रः।ताम्र
पर्णपर्णवोत्पन्नाश्चावर्णाद्याःकल्पवर्णिताः।मुक्ताःमुक्त्युद्भवाःसंतुभुक्तिमुक्ति
प्रदामम।मुक्तामंत्रः।यथाभूमिप्रदानस्यकलांनार्हंतिषोडशीं।दानान्य
न्यानिमेशांतिर्भूमिदानाद्भवत्विह।ध्रुवः।सर्वभूताश्रयाभूमिर्वराहेणस
मुद्धृता।अनंतसस्यफलदाअतःशांतिंप्रयच्छमे।सस्यभूमेः।सदाराहंति
बीजानिफालकृष्टेमहीतले।तत्प्रदानात्सकलाममसंतुमनोरथाः।कृष्टक्षेत्र

स्य॥ इदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं। तवदानप्रसादेनममास्त्व
भिमतंफलं। गृहस्य। सभा आश्रयंप्रयच्छामिप्रीयतांमेजगन्निधिः। आ
श्रयस्य। गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश। यस्मात्तस्माच्छिवंमे॰
स्यादिहलोकेपरत्रच॥ गोः। यमद्वारेमहाघोरायासावैतरणीनदी। तांत
र्तुकामो यच्छामिउत्तारयस्वतेनमां। वैतरण्याः। यस्मात्त्वंपृथिवीसर्वा
धेनुर्वैकृष्णसन्निभा॥ सर्वपापहरानित्यमतःशांतिंप्रयच्छमे। कृष्णधे
नोः। मृत्यूत्क्रांतिप्रशस्तस्यसुखोत्क्रांतिविवृद्धये। तुभ्यंसंप्रददेनाम्नागां
समुत्क्रांतिसंज्ञितां। उत्क्रांतिधेनोः। इंद्रादिलोकपालानांयाराजमहि
षीशुभा। महिषीदानमाहात्म्यात्सास्तुमेसर्वकामदा। धर्मराजस्यसा
हाय्ययस्याःपुत्रःप्रतिष्ठितः। महिषासुरस्यजननीसास्तुमेसर्वकाम
दा। महिष्याः। महिषींवत्ससंयुक्तांसुशीलांचपयस्विनीं। रक्तवस्त्रेणसु
छ्रेणदत्वामृत्युंजयेन्नरः। मृत्युमहिष्याः। वाङ्मनःकायजनितंयत्किं
चिन्ममदुष्कृतं। तत्सर्वंविलयंयातुलदानेनोपसेवितं। रोमत्वङ्मां
समज्जाद्यैःसर्वोपकरणैःसदा। जगतःसंभवत्वोसित्वामतःप्रार्थयेशि
वं। देवानांयोमुखंहव्यवाहनःसर्वपूजितः। तस्यत्वंवाहनंपूज्यंदेवैः
सेंद्रैर्महर्षिभिः। अग्निमांद्यंपूर्वकर्मविपाकोत्थंतुयन्मम। तत्सर्वंनाश
यक्षिप्रंजठराग्निंविवर्द्धय। मेषस्य। त्वंपूर्वंब्रह्मणासृष्टापवित्रंभवती
परा। त्वत्प्रसूतौस्थितायज्ञास्तस्माच्छांतिकरीभव॥ अजायाः। गौ
रींकन्यामिमांविप्रयथाशक्तिविभूषितां। गोत्रायशर्मणेदत्तांत्वंहिविप्र
समाश्रय। कन्यायाः। इयंदासीमयातुभ्यंश्रीवत्सप्रतिपादिता। तवक
र्मकरीभोग्यायथेष्टंभद्रमस्तुमे। दास्याः। यस्मादशून्यंशयनंकेशवस्य
शिवस्यच। शय्याममाप्यशून्यास्तुतस्माज्जन्मनिजन्मनि। शय्यायाः।
देवदेवजगन्नाथविश्वात्मन्दत्तयानया। प्रभोशिबिकयादेवप्रीतोभ
वजनार्दन। शिबिकायाः। रथायरथनाथायनमस्तेविश्वकर्मणे। विश्व
भूतायनाथायअरुणायनमोनमः। रथस्य। कंटकोच्छिद्रपाषाणवृ
श्चिकादिनिवारणे। पादुकेसंप्रदास्यामिविप्रप्रीत्याप्रगृह्यतां। पादु
कयोः। उपानहौप्रदास्यामिकंटकादिनिवारणे। सर्वस्थानेषुसुख
दावतःशांतिंप्रयच्छमे। उपानहोः॥ इहामुत्रातपत्राणंकुरुकेशवमेप्रभो।

छत्रंतस्मीनयेद्दत्तंब्राह्मणायमयाशुभं॥छत्रस्य।कमंडलुर्जलैःपूर्णैः
स्वर्णगर्भःसुलक्षणः।अर्पितस्तेमहासेनप्रसन्नस्तेनमेभव।कमंड
लुनः।शशांककरसंकाशहिमडिंडीरपांडुर॥प्रोत्सारयाशुदुरितंत्वाम
रामरवल्लभ॥चामरस्य॥पवित्रिकासर्वजंतूनांशैत्यानंदकरीशुभा।
पितृणांतृप्तिदानित्यमतःशांतिंप्रयच्छमे।व्यजनस्य॥दर्शनेनत्वमा
दर्शनृणांमंगलदायकः।शौर्यसौभाग्यसत्कीर्त्तिनिर्मलज्ञानदोभव
।दर्पणस्य।भगवन्शूलहस्तेशदस्युध्वरविनाशन॥तवायुधप्रदानेन
शूलंनश्यतुमेसदा॥शूलस्य।सर्वग्रहर्क्षनारेशासर्वेशस्त्वंहिभास्कर।
संक्रांतिशूलदोषंमेनिवारयदिवाकर॥संक्रांतिशूलस्य॥त्वंदेवानांम
नुष्याणांरक्षसामायुधावसि।तस्मादेषांप्रदानेनशांतिर्भवतुसर्वदा।
आयुधस्य॥सोमोद्भवानिदारूणिजातवेदःप्रियाणिच॥तस्मादेषांप्र
दानेनप्रियंदेहिविभावसो॥काष्ठानां॥शरण्यंसर्वलोकानांलज्जाया
रक्षणंपरं॥सुवेषधारित्वंयस्माद्वासःशांतिंप्रयच्छमे॥वस्त्रस्य॥र
क्तवस्त्रयुगंयस्मादादित्यस्यप्रियंसदा॥प्रदानादस्यमेसूर्यअतःशां
तिंप्रयच्छमे।रक्तवस्त्रयुग्मस्य॥धर्मराजेनविधृतंकृष्णवस्त्रंसुशोभ
नं॥सर्वक्लेशविनाशायकृष्णवस्त्रंददाम्यहं॥कृष्णवस्त्रस्य॥और्णपट्ट
मनुष्येयंस्वर्णवीजंतवप्रभो॥दत्तंगृहाणदेवेशपापंसंहरसत्वरं॥
और्णपट्टस्य॥और्णमेषसमुत्पन्नाशीतवातभयापहा।यस्मात्तुषारहा
रीस्यादतःशांतिंप्रयच्छमे।ऊर्णायाः।ब्रह्मसूत्रंमहादिव्यंमयायत्नेननि
र्मितं।ब्राह्मंतन्मेस्तुमेदेवब्रह्मसूत्रप्रदानतः।उपवीतस्य।अष्टाविंशति
संख्याकैरुद्राक्षैर्योजितामया।अर्पितातवहस्तेचगृहाणसुरसैन्यप॥
अक्षमालायाः।सर्वविद्याश्रयंज्ञानकरणंललिताक्षरं।पुस्तकंसंप्रयच्छा
मिप्रियाभवतिभारती।पुस्तकस्य॥कर्पूरःकदलीभूतोदेवदेवप्रियःसदा
।भाग्योत्तमोनृपाणांचतद्दानात्सुखमस्तुमे।कर्पूरस्य।जटामांस्युद्भवां
देवीमेणनाभिसमुद्भवां।भक्त्याहंसंप्रदास्यामिममसंतुमनोरथाः।गंधद्र
व्यस्य॥नंदनावासमंदारसखेवृंदारकार्चित॥चंदनत्वत्प्रसादान्मेसां
द्रानंदप्रदोभव।चंदनस्य।श्रीखंडागरुकर्पूरकस्तूरीकुंकुमान्वितं।विले
पनंप्रयच्छामिसौख्यमस्तुसदामम।चंदनाद्यनुलेपनस्य।समस्तेभ्योपि

वस्तुभ्यःसंस्तुताभिःसुरासुरैः॥विन्यस्तांगेषुकस्तूरीसुखदास्तुसदाम
म॥कस्तूर्याः॥कंदर्पदर्पदंयस्मात्कर्पूरंघ्राणतर्पणं॥अहर्पतिभवस्ताप
स्त्वद्दानादपसर्पतु॥कर्पूरस्य॥यदभूदंगसंलग्नंकुंकुमादिविलेपनं॥
जलक्रीडासुगोपीनांद्वारवत्यांजलार्पितं।गोपीचंदनमित्युक्तंमुनींद्रैः
कल्मषापहं॥तस्मादस्यप्रदानेनविष्णुर्दिशतुवांछितं॥गोपीचंदनस्य
॥मणिकांचनपुष्पाणिमणिमुक्तामयानिच॥तुलसीपत्रदानस्यकलां
नार्हंतिषोडशीं॥तुलसीपत्रदानाद्धिब्रह्मणःकायसंभवं॥पापंप्रशम
मायातुसर्वेसंतुमनोरथाः।तुलस्याः।ल्हादयंतिमनोयस्मात्तस्मात्सु
मनसःस्मृताः॥दत्तादद्तमेनित्यंभक्त्याल्हादंसतींश्रियं।पुष्पस्य॥
इदंफलंमयाविप्रभूतंपुरतस्तव।तेनमेसफलावाप्तिर्भवेज्जन्मनिज
न्मनि॥फलस्य।ब्रह्महत्यादिपापघ्नंब्रह्मणानिर्मितंपुरा।कूष्मांडब
हुबीजाढ्यमतःशांतिंप्रयच्छमे॥कूष्मांडस्य।तांबूलंश्रीकरंभद्रंब्रह्म
विष्णुशिवात्मकं॥अस्यप्रदानाद्ब्रह्माद्याःशिवंददतुपुष्कलं।तांबू
लस्य।पूरितंपूगपूगेननागवल्लीदलान्वितं।चूर्णेनचूर्णपत्रेणकर्पूर
पिंडकेनच।सपूगखंडनंदिव्यंगंधर्वाप्सरसांप्रियं।करकत्वंनिरातं
कंत्वस्मतादात्कुरुष्वमां।तांबूलकरंडस्य।लक्ष्मीप्रियाचलक्ष्मीदा
लक्ष्मीचवसनप्रिया॥सौभाग्यकृद्धिस्त्रीणांहरिद्राश्रीप्रदास्तुमे।ह
रिद्रायाः॥जरानोजायतेयस्मात्मंडनंशुभकर्मसु॥तस्माज्जीरकदा
नेनप्रीयतांगिरिजामम॥जीरकस्य।कंचुकीवस्त्रयुग्मेश्चतथाक
र्णावतंसकैः॥कंठसूत्रैश्चभूषाभिःप्रीयतांनिमिनंदिनी॥सौभाग्य
द्रव्ययुक्तशूर्पस्य॥रामपत्निमहाभागेपुण्यमूर्त्तिनिरामये॥गृहा
णेमानिशूर्पाणिमयादत्तानिजानकि॥शूर्पस्य।नवग्रहदक्षिणादान
मंत्राःमात्स्ये॥कपिलेसर्वभूतानांपूजनीयासिरोहिणि॥सर्वतीर्थम
यीयस्मादतःशांतिंप्रयच्छमेइति॥ ॥इतिश्रीजगद्गुरुभट्टनाराय
णसूरिसूनुपंडितशिरोरत्नमीमांसकशंकरभट्टात्मजभट्टनीलकं
ठकृतेभगवंतभास्करेदानमयूखःषष्ठः समाप्तः॥ शुभमस्तु॥ ॥

अथदानमयूखस्यसूचीपत्रम्॥

॥श्री॥

अथव्यवहारमयूखःप्रारभ्यते

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः १
श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकपर
श्रीविश्वनाथजीकेपास
महाराजशिवलालदुबेजीकेमकानमे
काशीसंस्कृतयंत्रालयमेछपी
जिनकोलेनाहोयउनकोइसकार्यकेसंपादक
श्रीयुतबाबूवाराणसीप्रसादजीकेपास
खाकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी
मितिफाल्गुनकृष्ण ५ भौमवार
संवत १९३५
तारीख ११ माहे फरवरीसन १८७९ ई०

अथव्यवहारमयूखः प्रारभ्यते

श्रीगणेशायनमः॥उत्कान्नृपनयपरिष्कृतेनत्वाभास्वत्पदांबुजेसम्यक्॥
विरचयतिनीलकंठोव्यवहारनिर्णयंकिंचित्॥१॥विप्रतिपद्यमान
निशांतरगताज्ञाताधर्मज्ञापनानुकूलोव्यापारोव्यवहारः॥वादिप्र
तिवादिकर्तृकःसंभवद्भोगसाक्षिप्रमाणकोविरोधिकोटिव्यवस्था
पनानुकूलोव्यापारोवासः॥संप्रतिप्रत्युत्तरेतुव्यवहारपदप्रयोगो
भाक्तइतिमदनरत्ने॥वादवितंडादिव्यावृत्त्यर्थमुत्तरदलं॥अथतत्सदं
याज्ञवल्क्यः॥स्मृत्याचारव्यपेतेनमार्गेणाधर्षितःपरैः॥आवेदय
तियद्राज्ञेव्यवहारपदंहितत्॥आधर्षितस्तिरस्कृतः॥तस्याष्टा
दशभेदानाहमनुः॥तेषामाद्यमृणादानंनिक्षेपोस्वामिविक्रयः
संभूयचसमुत्थानंदत्तस्यानपकर्मच॥वेतनस्यैवचादानंसंवि
दश्चव्यतिक्रमः॥क्रयविक्रयानुशयोविवादःस्वामिपालयोः॥
सीमाविवादधर्मश्चपारुष्येदंडवाचिके॥स्तेयंचसाहसंचैवस्त्रीसं
ग्रहणमेवच॥स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयएवच॥पदान्य
ष्टादशैतानिव्यवहारस्थिताविहेति॥अनपकर्माप्रदानं॥अनुशयः
पश्चात्तापः॥द्यूतमप्राणिकरणिकाक्रीडा॥प्राणिकरणिकासासमाह्वयः॥
अथमनुष्यमारणंस्तेयंपरदाराभिमर्शनं॥पारुष्यमुभयंचेतिसाह
संस्याच्चतुर्विधमितिबृहस्पत्युक्तेः॥स्त्रीसंग्रहणवाक्पारुष्यदंड
पारुष्याणांसाहसभेदत्वेपिपृथङ्निर्देशोगोबलीवर्दन्यायेन॥ए
तेषांचाष्टादशपदानांस्वरूपमग्रेव्यक्तीकरिष्यते॥अथव्यवहार
मातृकाः॥बृहस्पतिः॥दुर्गमध्येगृहंकुर्याज्जलवृक्षान्वितंपृथक्॥
प्राग्दिशिप्राङ्मुखींतस्यलक्षण्यांकल्पयेत्सभां॥सैवचधर्माधिक
रणम्॥धर्मशास्त्रविचारेणसारासारविवेचनं॥यत्राधिक्रियते
स्थानेधर्माधिकरणंहितदितिकात्यायनोक्तेः॥मनुः॥व्यवहारान्दिदृ
क्षुस्तुब्राह्मणैःसहपार्थिवः॥मंत्रज्ञैर्मंत्रिभिश्चैव विनीतःप्रविशेत्सभां॥

विनीतवेषाभरणःपश्येत्कार्याणिकार्यिणां॥याज्ञवल्क्यः॥व्य
हारान्नृपःपश्येद्विद्वद्भिर्ब्राह्मणैःसह॥धर्मशास्त्रानुसारेणक्रोधलो
भविवर्जितः॥नृपःप्रजापालनाधिकृतोयःकश्चित्क्षत्रियएव ॥
कात्यायनः॥सप्राड्विवाकःसामात्यःसब्राह्मणपुरोहितः॥ससभ्यः
प्रेक्षकोराजास्वर्गेतिष्ठतिधर्मतः॥अत्रब्राह्मणोऽनियुक्तः॥सभ्यास्तु
नियुक्ताः॥तथाचोक्तं॥नियुक्तोवानियुक्तोवाधर्मज्ञोवक्तुमर्हतीति॥
प्राड्विवाकस्वरूपमाह॥बृहस्पतिः॥विवादेपृच्छतिप्रश्नंप्रतिप्रश्नंत
थैवच॥नयपूर्वंप्राग्वदतिप्राड्विवाकस्ततःस्मृतइति॥अमात्यस्व
रूपमाहव्यासः॥सर्वशास्त्रार्थवेत्तारमलुब्धंन्यायभाषिणं॥विप्र
प्राज्ञंक्रमायातममात्यंस्थापयेद्द्विजमिति॥अत्रपुनर्द्विजग्रहणंवि
प्राभावेक्षत्रियवैश्ययोरुपादानार्थं॥तथाचकात्यायनः॥यत्रवि
प्रोनविद्वान्स्यात्क्षत्रियंतत्रभोजयेत्॥वैश्यंवाधर्मशास्त्रज्ञंशूद्रं
यत्नेनवर्जयेदिति॥सभ्यानाहयाज्ञवल्क्यः॥श्रुताध्ययनसं
पन्नाधर्मज्ञाःसत्यवादिनः॥राज्ञासभासदःकार्यारिपौमित्रेचयेस
माइति॥एतेषांसंख्यामाह॥बृहस्पतिः॥लोकवेदज्ञधर्मज्ञाःसप्त
पंचत्रयोपिवा॥यत्रोपविष्टाविप्राःस्युःसायज्ञसदृशीसभेति॥स
एव॥शब्दाभिधानतत्त्वज्ञौगणनाकुशलौशुची॥नानालिपिज्ञौ
कर्त्तव्यौराज्ञागणकलेखकौ॥शब्दःशब्दशास्त्रं॥अभिधानंको
शः॥कात्यायनः॥श्रोतारोवणिजस्तत्रकर्त्तव्यान्यायदर्शिनः॥त
सभायां॥बृहस्पतिः॥आकारणेरक्षणेचसाक्ष्यार्थंप्रतिवादिनः॥
सभाधीनःसत्यवादीकर्त्तव्यस्तुस्वपूरुषः॥अयंचशूद्रएव॥त
थाचव्यासः॥साध्यपालस्तुकर्त्तव्योराज्ञासाध्यस्यसाधकः॥क्रमा
यातोदृढःशूद्रःसभ्यानांचमतेस्थितइति॥याज्ञवल्क्यः॥अपश्य
ताकार्यवशाद्व्यवहारान्नृपेणतु॥सभ्यैःसहनियोक्तव्योब्राह्मणः
सर्वधर्मवित्॥नृपाध्यक्षादीनांकार्यमाह॥बृहस्पतिः॥वक्ताऽध्य
क्षोनृपःशास्तासभ्याःकार्यपरीक्षकाः॥गणकोगणयेदर्थंलिखेन्न्या
यंचलेखकः॥सएव॥पूर्वामुखस्तूपविशेद्राजासभ्याउदङ्मुखाः
गणकःपश्चिमास्यस्तुलेखकोदक्षिणामुखः॥राजसभातोनिर्णीय

कांतरमाह याज्ञवल्क्यः॥नृपेणाधिकृताःपूगाःश्रेणयोथकुलानि च॥पूर्वंपूर्वंगुरुज्ञेयंव्यवहारविधौनृणां॥नृपेणाधिकृताःप्राड्विवाकादयः पूगाः नानाकर्मोपजीविनामेकग्रामस्थद्विजातीयानां समूहाः॥पूगविपरीताश्चश्रेणयः॥कुलानिज्ञातिसंबंधिबंधूनां समूहाः॥बृहस्पतिरपि॥येचारण्यचरास्तेषामरण्येकरणंभवेत्॥सेनायांसैनिकानांतुसार्थेषुवणिजांतथा॥ करणंसभाव्यवहारदर्शनेकालमाहकात्यायनः॥सभ्याःस्थानेषुपूर्वाह्णेकार्याणांनिर्णयंनृपः॥कुर्याच्छास्त्रप्रणीतेनमार्गेणामित्रकर्शनः॥दिवसस्याष्टमंभागंमुक्त्वाभागत्रयंतुयत्॥सकालोव्यवहाराणांशास्त्रदृष्टःपरःस्मृतइति॥आद्य यामार्धार्द्धमष्टमोभागएतदुत्तरमावर्त्तनात्प्राचीनंभागत्रयं॥वर्ज्यास्तिथीश्चाहसंवर्त्तः॥चतुर्दशीह्यमावास्यापौर्णमासीतथाष्टमी॥तिथिष्वासुनपश्येतव्यवहारान्विचक्षणइति॥बृहस्पतिः॥पूर्वाण्हेतामधिष्ठायवृद्धामात्यानुजीविभिः॥पश्येत्पुराणधर्मार्थशास्त्राणिशृणुयात्तथा॥तांसभां॥अर्थशास्त्रंनीतिशास्त्रं॥धर्मशास्त्रार्थशास्त्रयोर्विप्रतिपत्तावाहनारदः॥यत्रविप्रतिपत्तिःस्याद्धर्मशास्त्रार्थशास्त्रयोः॥अर्थशास्त्रोक्तमुत्सृज्यधर्मशास्त्रोक्तमाचरेदिति॥धर्मशास्त्रयोर्विरोधेत्वाहयाज्ञवल्क्यः॥स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः॥न्यायमनालोचयतोदोषमाहबृहस्पतिः॥केवलंशास्त्रमाश्रित्यनकर्तव्योहिनिर्णयः॥युक्तिहीनेविचारेतुधर्महानिःप्रजायतइति॥देशाचाराद्यप्यालोचयेदित्याहगुरुः॥देशजातिकुलानांचयेधर्माःप्राक्प्रवर्तिताः॥तथैवतेपालनीयाःप्रजाःप्रक्षुभ्यतेन्यथा॥जनापरक्तिर्भवतिबलंकोशश्चनश्यति॥उद्वह्यतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः॥मध्यदेशेकर्मकराःशिल्पिनश्चगवाशिनः॥मत्स्यादाश्चनराःपूर्वेव्यभिचाररताःस्त्रियः॥उत्तरेमद्यपानार्याःस्पृश्यानृणांरजस्वलाः॥अनेनकर्मणानैतेप्रायश्चित्तदमार्हकाः इति॥पूर्वेप्राच्याः॥क्वचित्सर्वेइतिपाठः॥सर्वेब्राह्मणाद्याः॥दमोदंडः॥यत्त्वत्रप्रायश्चित्तादिस्मरणंतदेतद्वाक्यमुपात्तदेशपरमि-

तिकेचित्॥ अन्येतुप्रायश्चित्तरूपोयोदमइतिव्याचक्षाणा दंडा
वसात्र॥ अन्यदेशेदंडःप्रायश्चित्तंचेत्याहुः॥ व्यासः॥ वणिक्शिल्पि
भृतिषुकृषिरंगोपजीविषु॥ अशक्योनिर्णयोह्यन्यैस्तज्ज्ञैरेवतुका
येत्॥ मनुः॥ आश्रमेषुद्विजातीनांकार्येविवदतांमिथः॥ नविब्रूयान्
पोधर्मंचिकीर्षन्हितमात्मनइति॥ कात्यायनः॥ कालेकार्यार्थिनं
पृच्छेत्प्रणतंपुरतःस्थितं॥ किंकार्यंकाचतेपीडामाभैषीर्ब्रूहिमानव
॥ केनकस्मिन्कदाकस्मात्पृच्छेदेवंसमागतं॥ एवंपृष्टःसयद्ब्रूया
सभ्यैर्ब्राह्मणैःसह॥ विचार्यकार्यंन्याय्यंचेदाह्वानार्थमतःपरं॥ मु
द्रांवानिक्षिपेत्तस्मिन्पुरुषंवासमादिशेत्॥ नारदः॥ वक्तव्यार्थे
तिष्ठंतमुत्क्रामंतंचतद्वचः॥ आसेधयेद्विवादार्थीयावदाह्वानद
नं॥ आसेधस्यचातुर्विध्यमाह॥ सएव॥ स्थानासेधःकालकृतःप्र
वासात्कर्मणस्तथा॥ चतुर्विधःस्यादासेधस्तमासिद्धोनलंघयेत्॥
आसिद्धस्यासेधातिक्रमेदंडमाह सएव॥ असिद्धयोन्यथेआसेद
आक्रामन्दंडमर्हति॥ क्वचिदासेद्धुरेवदंडमाह सएव॥ यस्त्विंद्रि
याःनिरोधेनव्याहारोच्छ्वसनादिभिः॥ आसेधयेदनासेध्यैःसदंड्यो
नत्वतिक्रमादिति॥ क्वचिदासेधातिक्रमेदंडाभावमाह नारदः॥ न
दीसंतारकांतारदुर्गेशोपप्लवादिषु॥ आसिद्धस्तंपरासेधमुत्क्राम
न्नापराध्नुयादिति॥ अनासेध्यानासेद्धुर्दंडमाह॥ कात्यायनः॥ अ
सेधयंस्त्वनासेध्यंराज्ञाशास्यइतिस्थितिरिति॥ अनासेध्यानाह
सएव॥ वृक्षपर्वतमारूढाहस्त्यश्वरथनौस्थिताः॥ विषमस्था
तेसर्वेःनासेध्याःकार्यसाधकैः॥ व्याध्यार्त्ताव्यसनस्थाश्चयज
नस्तथैवच॥ आह्वानेव्यवस्थामाह नारदः॥ अकल्पबालस्थ
विरविषमस्थक्रियाकुलान्॥ कार्यातिपातिव्यसनिनृपकार्योत्स
वाकुलान्॥ मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः॥ नहीनपक्षां
युवतिंकुलेजातांप्रसूतिकां॥ सर्ववर्णोत्तमांकन्यां ताज्ञातिप्रभुकाः
स्मृताः॥ तदधीनकुटुंबिन्यःस्वैरिण्योगणिकाश्चयाः॥ निष्कुला
याश्चपतितास्तासामाह्वानमिष्यते॥ ज्ञात्वाभियोगंयेपिस्युर्वने
प्रव्रजितादयः॥ तानप्याह्वानयेद्राजागुरुकार्येष्वकोपयन्॥ कालंदे

शंचविज्ञायकार्याणांचबलाबलं॥आकल्पादीनपिशनैःशनैराव्हानयेन्नृ
पः॥यानैरितिक्वचित्पाठः॥आहूतोनागच्छन्दंड्यः॥तथाचबृहस्पतिः॥आहू
तोयत्रनागच्छेद्दर्पाद्बंधुकुलान्वितः॥अभियोगानुरूपेणतस्यदंडंप्रकल्प
येत्॥अभियोगभेदेनदंडभेदमाहकात्यायनः॥हीनेकर्मणिपंचाशन्मध्य
मेतुशतावरः॥गुरुकार्येषुदंडःस्यान्नित्यंपंचशतावरइति॥आहूतस्याग
मनेयत्कार्यंतदाहपितामहः॥सभायांतुस्तस्याप्योभियुक्तोवादिना
तथेति॥तृतीयासहार्थे॥यत्राभियोक्ताप्रब्रूयादभियुक्तस्त्वनंतरं॥तयो
रंतेसदस्यास्तुप्राड्विवाकस्ततःपरं॥बृहस्पतिः॥अहंपूर्विकयायानावर्थिप्र
त्यर्थिनौयदा॥वादोवर्णानुरूपेणग्राह्यःपीडामवेक्ष्यवा॥अप्रगल्भजडो
न्मत्तवृद्धस्त्रीबालरोगिणां॥पूर्वोत्तरंवदेद्बंधुर्नियुक्तोन्योथवानरः॥
नारदः॥अर्थिनासंनियुक्तोवाप्रत्यर्थिप्रेरितोपिवा॥योयस्यार्थेविवदते
तयोर्जयपराजयौ॥यत्तुकात्यायनः॥योनभ्रातानचपितानपुत्रोननि
योगकृत्॥परार्थवादीदंड्यःस्याद्व्यवहारेषुविब्रुवन्नितितदभियुक्त
परंक्वचित्प्रतिनिध्यभावस्तेनैवोक्तः॥ब्रह्महत्यासुरापानेस्तेयेगुर्वंग
नागमे॥मनुष्यमारणेस्तेयेपरदाराभिमर्शने॥अभक्ष्यभक्षणेचैवक
न्याहरणदूषणे॥पारुष्येकूटकरणेनृपद्रोहेतथैवच॥प्रतिवादीनदा
प्यःस्यात्कर्तातुविवदेत्स्वयमिति॥अत्यंतिकप्रतिनिधिनिषेधार्थंपुन
स्तेषग्रहणं॥प्रत्यर्थिनिस्थापिते:र्थिनःकार्यमाह॥याज्ञवल्क्यः॥प्रत्यर्थि
नोग्रतोलेख्यंयथावेदितमर्थिना॥समामासतदर्द्धाहर्नामजात्यादिचि
न्हितं॥स्मृत्यंतरे॥अर्थवद्धर्मसंयुक्तंपरिपूर्णमनाकुलं॥साध्यवद्वाच
कपदंप्रकृतार्थानुबंधिच॥प्रसिद्धमविरुद्धंचनिश्चितंसाधनक्षमं॥सं
क्षिप्तंनिखिलार्थंचदेशकालाविरोधिच॥वर्षर्तुमासपक्षाहोवेलादेश
प्रदेशवत्॥स्थानावसथसाध्याख्याजात्याकारवयोयुतं॥साध्यप्रमा
णसंख्यावदात्मप्रत्यर्थिनामवत्॥परात्मपूर्वजानेकराजनामभिरं
कितं॥क्षमालिंगात्मपीडावत्कथिताहर्तृदायकं॥यदावेदयतोराज्ञेत
द्भाष्यमभिधीयतइति॥अत्रोक्तवर्षादीनांआध्यादिषूपयोगोवक्ष्यते॥
देशादीनांचक्वचिदुपयोगयुक्तःस्मृत्यंतरे॥देशश्चैवतथास्थानंसन्निवे
शस्तथैवच॥जातिःसंज्ञाधिवासश्चप्रमाणंक्षेत्रनामच॥पितृपैतामहं

चैवपूर्वराजानुकीर्तनं॥स्थावरेषुविवादेषुदशैतानिप्रवेशयेदिति॥का
त्यायनः॥पूर्वपक्षंस्वभावोक्तं प्राड्विवाकोभिलेखयेत्॥पांडुलेखेन
फलकेततःपत्रेविशोधितं॥शोधनस्यावधिमाहनारदः॥शोधयेत्पू
र्ववादंतुयावन्नोत्तरदर्शनं॥अवष्टब्धस्योत्तरेणनिवृत्तंशोधनंभवेत्
॥भाषायाउत्तरंयावत्प्रत्यर्थीतुनिवेशयेत्॥अर्थीतुलेखयेत्तावद्या
वद्वस्तुविवक्षितमिति॥एवंपक्षलक्षणेस्थितेतद्विरुद्धाःपक्षाभासा
अर्थसिद्धा अप्युक्ताःस्मृत्यंतरे॥अप्रसिद्धंनिराबाधंनिरर्थंनिःप्रयो
जनं॥असाध्यंवाविरुद्धंवापक्षाभासंविवर्जयेदिति॥अप्रसिद्धंश
पुष्पंममाहृतमिति॥निराबाधंममदीपप्रकाशेनायंव्यवहरती
ति॥निरर्थकचटतपंममापहृतमिति॥निःप्रयोजनंमस्मातिवेशिकः
सुस्वरमधीतइति॥असाध्यंसभ्रूभंगंहसितोनेनेत्यादि॥विरुद्धं
मूकेनाहंशप्तइति॥पुरराष्ट्रादिविरुद्धंवा॥तथाचस्मर्यते॥राज्ञातुव
र्जितोयस्तुयश्चपौरविरोधकृत्॥राष्ट्रस्यवासमस्तस्यप्रकृतीनांतथै
वच॥अन्येवायेपुरग्राममहाजनविरोधकाः॥अनादेयास्तुतेसर्वेव्य
वहाराःप्रकीर्तिताइति॥नचानेकप्रतिज्ञत्वमपिपक्षाभासत्वमिति
॥बहुप्रतिज्ञंयत्कार्यंव्यवहारेषुनिश्चितं॥कामंतदपिगृह्णीयाद्रा
जातत्वबुभुत्सयेतिकात्यायनीयेनविरोधापत्तेः॥यत्त्वनेकपदसंकी
र्णःपूर्वपक्षोनसिध्यतीतितद्युगपन्नसिध्यतिक्रमेणतुसिध्यतीतिव्या
ख्येयं॥एवंपूर्वपक्षेलिखितेयत्कार्यंतदाहयाज्ञवल्क्यः॥श्रुतार्थस्योत्त
रंलेख्यंपूर्वावेदकसंनिधाविति॥उत्तरलक्षणंनारदः॥पक्षस्यव्या
पकंसारसंदिग्धमनाकुलं॥अव्याख्यागम्यमित्येतदुत्तरंतद्विदो
विदुरिति॥अस्यचातुर्विध्यमाहकात्यायनः॥मिथ्यासंप्रतिपत्त्यावा
प्रत्यवस्कन्दनेनवा॥प्राङ्न्यायप्रतिसिद्ध्यावाउत्तरंस्याच्चतुर्विधमिति
॥मिथ्योत्तरंचलक्षयतिसएव॥अभियुक्तोभियोगस्ययदिकुर्यादप
ह्नवं॥मिथ्यातत्तुविजानीयादुत्तरंव्यवहारतइति॥तच्चचतुर्विधमि
त्याहसएव॥मिथ्यैतन्नाभिजानामितदामेभूदसंनिधिः॥अजातश्चा
स्मितत्कालइतिमिथ्याचतुर्विधमिति॥संप्रतिपत्त्युत्तरंतूक्तंस्मृत्यंत
रे॥साध्यस्यसत्यवचनंप्रतिपत्तिरुदाहृतेति॥प्रत्यवस्कंदनोत्तरंल

क्षयतिनारदः॥अर्थिनालिखितोयोर्थः प्रत्यर्थीयदितंतथा॥प्रपद्य
कारणंब्रूयात्प्रत्यवस्कंदनंस्मृतमिति॥प्राङ्न्यायोत्तरंलक्षयतिका
त्यायनः॥आचारेणावसन्नोपिपुनर्लेखयतेयदि॥सोभिधेयोजितः
पूर्वंपूर्वंप्राङ्न्यायउच्यतइति॥एवमुत्तरलक्षणेस्थितेतद्रहितानां
मुत्तराभासत्वमर्थसिद्धमपि॥स्पष्टीकृतंस्मृत्यंतरे॥संदिग्धमन्यत्प्र
कृतादत्यल्पमतिभूरिवा॥पक्षैकदेशव्याप्यन्यत्तथानैवोत्तरंभवेत्॥
गूढव्यस्तपदमव्यापिनिरूढार्थंतथाकुलं॥व्याख्यागम्यमसारंच
नोत्तरंस्वार्थसिद्धयेइति॥कात्यायनोपि॥पक्षैकदेशेयत्सत्यंएकदे
शेचकारणं॥मिथ्याचैवैकदेशेचसंकरात्तदनुत्तरमिति॥अनुत्तर
त्वेचकारणमाह॥सएव॥नचैकस्मिन्विवादेतुक्रियास्याद्वादिनो
र्द्वयोः॥नचार्थसिद्धिरुभयोर्नचैकत्रक्रियाद्वयमिति॥अत्रायमर्थः
मिथ्याकारणोत्तरयोःसंकरेद्वयोरपिवादिनोःक्रियाप्राप्नोतिमिथ्या
क्रियापूर्ववादेकारणेप्रतिवादिनीतिनारदोक्तेः॥तदुभयमेकस्मिन्
व्यवहारेविरुद्धं॥तथाकारणप्राङ्न्यायसंकरेतुप्रत्यर्थिनएवक्रिया
द्वयं॥प्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियामितिव्यासोक्तेः
॥अत्रचप्राङ्न्यायेजयपत्रेणप्राड्विवाकादिभिस्तथेतिव्यासोक्तेः
वप्राङ्न्यायेजयपत्रेणप्राङ्न्यायदर्शिभिर्वाभावयितव्यं॥कारणो
त्तरेतुसाक्षिलेख्यादिभिरित्यत्रापिविरोधः॥एवंत्रिचतुःसंकरेपिद्र
ष्टव्यं॥एषांचानुत्तरत्वंयौगपद्येन॥क्रमेणतूत्तरत्वमेव॥क्रमश्चार्थि
प्रत्यर्थिसभ्येच्छयाभवति॥तथाचहारीतः॥मिथ्योत्तरंकारणंचस्या
तामेकत्रचेदुभे॥सत्यंचापिसहान्येनतत्रग्राह्यंकिमुत्तरं॥यत्प्रभूता
र्थविषयंयत्रवास्यात्क्रियाफलं॥उत्तरंतत्रतज्ज्ञेयंअसंकीर्णमतोन्य
था॥संकीर्णंभवतीतिशेषः॥अस्यार्थः॥सुवर्णवस्त्राभियोगेसुव
र्णंनगृहीतंवस्त्रंतुगृहीतंप्रतिदत्तंचेत्यत्रादौसुवर्णविषयेव्यवह
त्यपश्चाद्वस्त्रविषयेव्यवहर्तव्यं॥एवंमिथ्याप्राङ्न्याययोःकारण
प्राङ्न्याययोश्चसंकरेयोज्यं॥तथातत्रैवाभियोगेसुवर्णंगृहीतंव
स्त्रंतुनगृहीतंप्रतिदत्तमितिवावस्त्रविषयेपूर्वंजितइतिवोच्यते
तत्रवस्त्रविषयएवव्यवहर्तव्यंनसुवर्णविषये॥भूरिविषयत्वेपिक्रि

याभावात्॥ यत्र त्वियं गौर्मदीया ऽमुकस्मिन्काले नष्टाद्याधमद्गृहे दृष्टे
त्यभियोगे मिथ्यैतदेतत्संदर्शितकालात्पूर्वमेवास्मद्गृहे स्थितेति मि
थ्याकारणयोः कृत्स्नपक्षव्यापित्वं तत्र नानुत्तरत्वं सकारणमिथ्यो
रमिदं॥ अत्र च प्रत्यर्थिन एव क्रिया नार्थिनोपि॥ मिथ्याकारणयोर्वापि ग्रा
ह्यं कारणमुत्तरमिति हारीतोक्तेः॥ एवं मिथ्याप्राङ्न्याययोः कारणप्रा
ङ्न्याययोश्च कृत्स्नपदव्यापित्वे सति नानुत्तरत्वं॥ अत्रोभयत्रापि प्र
त्यर्थिन एव क्रियेति नद्वाव्येकस्मिन्व्यवहारे द्वयोः क्रियेत्युक्तं॥ उत्तरी
रवनोत्तरं साधनोक्तौ क्रममाह याज्ञवल्क्यः॥ ततोर्थी लेखयेत्सद्यः प्र
तिज्ञातार्थसाधनं॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोन्यथेति॥ इदं
च मिथ्योत्तरविषयं॥ उत्तरांतरे तु प्रत्यर्थिन एव साधनोपन्यासः॥ य
थाह हारीतः॥ प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां॥ मिथ्यो
क्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति॥ एवं व्यवहारस्य चतुष्पात्त्वमा
ह याज्ञवल्क्यः॥ चतुष्पाद्व्यवहारोयं विवादेषूपदर्शित इति॥ पादच
तुष्टयं तु व्यक्तीकृतं स्मृत्यंतरे॥ भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृ
त्तिभिः॥ आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयत इति॥ इदं च संप्र
तिपत्त्यतिरिक्तोत्तरविषयं॥ संप्रतिपत्तेर्हि पात्त्वात्॥ यथा बृहस्पतिः॥ मि
थ्योत्तरे चतुष्पात्स्यात्प्रत्यवस्कंदने तथा॥ व्यवहारस्तु विज्ञेयो द्विपात्सं
प्रतिपत्तिष्विति॥ याज्ञवल्क्यः॥ अभियोगमनिस्तीर्य नैनं प्रत्यभियो
जयेत्॥ अभियुक्तं च नान्येन नोक्तां च विकृतिं नयेत्॥ कुर्यात्प्रत्यभि
योगं च कलहे साहसेषु च॥ नारदः॥ पूर्ववादं परित्यज्य योन्यमालंबते
पुनः॥ वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥ हीनवादी दंड्यो भव
ति न प्रकृतार्थाद्धीयत इत्यर्थः॥ एतच्चार्थव्यवहारे ज्ञेयं॥ यथाह स ए
वाह॥ सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥ परस्त्रीभूम्यृणादाने
शास्योप्यर्थान्न हीयत इति॥ पूर्वार्द्धस्योदाहरणार्थमुत्तरार्द्धं॥ याज्ञवल्क्य
॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः॥ पूर्वपक्षेऽधरीभूते भवंत्युत्त
रवादिनः॥ पूर्ववादिनः प्रतिज्ञावादिनः॥ पूर्वपक्षः प्रतिज्ञा॥ अधरीभूते का
रणोत्तरोपन्यासेन प्रत्यर्थिस्वीकारेण साध्ये साक्षिग्रहणं प्रमाणांतर
स्याप्युपलक्षणार्थं॥ स एव॥ उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये॥

निर्णयस्यकार्येकार्यनिर्णयइति॥प्रतिभूत्वेनाग्राह्यानाहकात्यायनः॥
नस्वामीनचवैशत्रुःस्वामिनाधिकृतस्तथा॥निरुद्धोदंडितश्चैवसंशय
स्थोनचक्वचित्॥नैवरिक्थीनरिक्थश्चनचैवान्यत्रवासिनः॥राजका
र्येनियुक्तश्चयेचप्रव्रजितानराः॥नाशक्तोधनिनेदातुंदंडंराज्ञेचतत्स
मं॥नविज्ञातोगृहीतव्यःप्रतिभूतत्क्रियांप्रतिइति॥निरुद्धोनिगडादि
बद्धः॥संशयस्थोव्यसनी॥रिक्थीपुत्रपौत्रादिर्द्रव्यग्रहणाधिकारी
रिक्तोदरिद्रः॥अन्यत्रवासिनोदेशाद्बहिष्कृतः॥याज्ञवल्क्यः॥भ्रातॄ
णामथदंपत्योःपितुःपुत्रस्यचैवहि॥प्रातिभाव्यमृणंसाक्ष्यमविभक्ते
नतुस्मृतं॥लग्नकाभावेत्वाहकात्यायनः॥अथचेत्प्रतिभूर्नास्तिकार्ययो
ग्यस्यवादिनः॥सरक्षितोदिनस्यांतेदद्याद्भृत्यायवेतनमिति॥सएव॥द्वि
जातिःप्रतिभूहीनोरक्ष्यःस्याद्बाह्यचारिभिः॥शूद्रादीन्प्रतिभूहीनान्बंध
येन्निगडेनत्विति॥दुष्टलक्षणानि॥याज्ञवल्क्यः॥देशाद्देशांतरंयातिसृ
क्किणीपरिलेढिच॥ललाटंस्विद्यतेचास्यमुखंवैवर्ण्यमेतिच॥परिशुष्य
त्स्खलद्वाक्योविरुद्धंबहुभाषते॥वाक्चक्षुःपूजयतिनोतथोष्ठौनिर्भु
जत्यपि॥स्वभावाद्विकृतिंगच्छेन्मनोवाक्कायकर्मभिः॥अभियोगेचसा
क्ष्येचदुष्टःसपरिकीर्तितः॥सृक्किणीओष्ठप्रांतौ॥अथप्रमाणम्॥या
ज्ञवल्क्यः॥प्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं॥एषाम
न्यतमाभावेदिव्यान्यतममुच्यते॥कात्यायनोपि॥यद्येकोमानुषींब्रू
यादन्योब्रूयात्तुदैविकीं॥मानुषींतत्रगृह्णीयान्नतुदैवीक्रियांनृपः॥
यद्येकदेशव्याप्तापिक्रियाविद्येतमानुषी॥साग्राह्यानतुपूर्णापिदैविकी
वदतांनृणां॥क्रियानदैविकीप्रोक्ताविद्यमानेषुसाक्षिषु॥लेख्येचस
निवादेषुनस्याद्दिव्यंनसाक्षिणः॥दत्वादत्तेतथादत्तेस्वामिनांनिर्णयेस
ति॥विक्रयादानसंबंधेक्रीत्वाधनमनिच्छति॥द्यूतेसमाह्वयेचैववि
वादेसमुपस्थिते॥साक्षिणःसाधनंप्रोक्तंनदिव्यंनचलेख्यकं॥द्वारमा
र्गक्रियाभोगेजलवाहादिकेतथा॥भुक्तिरेवतुगुर्वीस्यान्नलेख्यंनचसा
क्षिणः॥दत्वादत्ते॥दत्तमितिप्रतिश्रुत्याऽनर्पिते॥तथादत्तेदत्वापुनरा
च्छिद्यगृहीतेस्वामिनांनिर्णयेसतीति॥एतत्स्वामिकमेतदितिनिश्च
येसति॥क्वचिद्दिव्यप्राबल्यमाहबृहस्पतिः॥मणिमुक्ताणकानांकूट

कृन्यासहारकः॥हिंसकोऽन्यांगनासेवीपरीक्ष्याःशपथैःसदा॥महा
पापाभिशापेषुविद्यमानेषुसाक्षिषु॥दिव्यमालंबतेवादीनपृच्छेत्तत्रसा
क्षिणइति॥व्यासः॥नमयैतत्कृतंलेख्यंकूटमेतेनकारितं॥अधरीकृत्य
तत्सत्रमर्थेदिव्येननिर्णयः॥अरण्येविजनेरात्रावंतर्वेश्मनिसाहसे॥
न्यासपन्हवनेचैवदिव्यासंभवतिक्रिया॥बृहस्पतिः॥लिखितेसाक्षि
वादेचसंदिग्धंतत्रजायते॥अनुमानेचसंभ्रांतेतत्रदिव्यंविशोधनं॥क्व
चित्साक्षिदिव्ययोर्विकल्प—माह॥सएव॥प्रक्रांतेसाहसेवादेपारुष्ये
दंडवाचिके॥बलोद्भूतेषुकार्येषुसाक्षिणोदिव्यमेवच॥ऋणेलेख्यंसा
क्षिणोवायुक्तिलेशादयोपिवा॥दैविकीवाक्रियाप्रोक्ताप्रजानांहित
काम्ययेति॥युक्तिलेशोयुक्त्येकदेशः॥वाचिकेपारुष्येब्रह्महाऽसीत्येव
मात्माक्रोशात्मकेत्यर्थः॥यत्तुकात्यायनः॥वाक्पारुष्येचभूमौचदि
व्यंनपरिकल्पयेदिति॥तदल्पवाक्पारुष्यपरंभूमिग्रहणंस्थावरमा
त्रोपलक्षणं॥यथाहपितामहः॥स्थावरेषुविवादेषुदिव्यानिपरिवर्जयेदि
ति॥साक्ष्यादिसत्त्वेऽयंदिव्यनिषेधः॥तथाचसएव॥साक्षिभिर्लिखिते
नाथभुक्त्याचैतान्प्रसाधयेदिति॥पितामहः॥लेख्यंयत्रनविद्येतनभु
क्तिर्नचसाक्षिणः॥नचदिव्यावतारोस्तिप्रमाणंतत्रपार्थिवः॥निश्चेतुं
येनशक्याःस्युर्वादाःसंदिग्धरूपिणः॥तेषांनृपःप्रमाणंस्यात्ससर्वस्य
प्रभुर्यतः॥अथलेख्यं॥तत्रबृहस्पतिः॥राजलेख्यंस्थानकृतंस्वहस्त
लिखितंतथा॥लेख्यंतुत्रिविधंप्रोक्तंभिन्नंतद्बहुधापुनरिति॥यत्तुवसि
ष्ठेन॥लौकिकंराजकीयंचलेख्यंविद्याद्द्विलक्षणमितिद्वैविध्यमुक्तंतत्
स्थानकृतस्वहस्तलिखितयोर्भेदमाश्रित्यलौकिकंजानपदमितिपर्या
यो॥राजकीयंजानपदंलिखितंद्विविधंस्मृतमितिसंग्रहकारोक्तेः॥
बृहस्पतिः॥भागदानक्रयाधानसंविद्दासऋणादिभिः॥सप्तधालौकि
कंलेख्यंत्रिविधंराजशासनं॥भ्रातरःसंविभक्तायेस्वरुच्यातुपरस्परं॥
विभागपत्रंकुर्वंतिभागलेख्यंतदुच्यते॥भूमिंदत्वातुयत्पत्रंकुर्याच्चंद्रा
र्ककालिकं॥अनाच्छेद्यमनाहार्यंदानलेख्यंतुतद्विदुः॥गृहक्षेत्रादिकं
क्रीत्वातुल्यमूल्याक्षरान्वितं॥पत्रंकारयतेयत्तुक्रयलेख्यंतदुच्यते॥जंग
मंस्थावरंबंधंदत्वालेख्यंकरोतियत्॥गोप्यभोग्यक्रियायुक्तमाधिले

ख्यंतदुच्यते॥ग्रामोदेशश्चयत्कुर्यान्मतंलेख्यंपरस्परं॥राजाविरोधिध
र्मार्थंसंवित्पत्रंवदामितत्॥वस्त्रान्नहीनःकांतारेलिखितंकुरुतेतुयत्
कर्माणितेकरिष्यामिदासपत्रंतदुच्यते॥धनंवृध्यागृहीत्वातुस्वयंकु
र्यात्त्वकारयेत्॥उद्धारपत्रंतत्प्रोक्तंऋणलेख्यंमनीषिभिः॥आदिशब्दा
द्विशुद्ध्यादिपत्रग्रहणं॥विशुद्ध्यादिपत्राण्याहकात्यायनः॥अभिशा
पेसमुत्तीर्णेप्रायश्चित्तेकृतेजनैः॥विशुद्धिपत्रिकंज्ञेयंतेभ्यःसाक्षिस
मन्वितं॥उत्तमेषुसमस्तेषुअभिशापेसमागते॥वृत्तानुवादेलेख्यंय
त्तज्ज्ञेयंसंधिपत्रकं॥सीमाविवादेनिर्णीतेसीमापत्रंविधीयतइति
॥अन्वाधिपत्रमाहप्रजापतिः॥धनीधनेनतेनैवपरमाधिंनयेद्यदि।
कृत्वातदाधिलिखितंपूर्वंचास्यसमर्पयेत्॥याज्ञवल्क्योपि॥दत्वर्णं
पाटयेल्लेख्यंशुद्ध्यैवान्यत्तुकारयेत्॥पूर्वोक्तयोःस्वहस्तकृतान्यकृ
तयोर्विशेषमाह॥नारदः॥लेख्यंतुद्विविधंप्रोक्तंस्वहस्तान्यकृतंत
था॥असाक्षिमत्साक्षिमच्चसिद्धिर्देशस्थितेस्तयोरिति॥याज्ञवल्क्यः
॥विनापिसाक्षिभिर्लेख्यंस्वहस्तलिखितंतुयत्॥तत्प्रमाणंस्मृतं
लेख्यंबलोपधिकृतादृते॥बलंबलात्कारः॥उपधिर्लोभादि विशेष
माहसएव॥यःकश्चिदर्थोनिष्णातःस्वरुच्यातुपरस्परं॥लेख्यंतुसा
क्षिमत्कार्यंतस्मिन्धनिकपूर्वकं॥समामासतदर्धाहर्नामजातिस्वगोत्र
कैः॥सब्रह्मचारिकात्मीयपितृनामादिचिन्हितमिति॥सब्रह्मचारिब
ह्वृचादिशाखाप्रयुक्तंगुणनामबह्वृचःकठइत्यादि॥सएव॥समाप्ते
र्थेऋणीनामस्वहस्तेननिवेशयेत्॥मतंमेऽमुकपुत्रस्ययदत्रोपरिले
खितं॥साक्षिणश्चस्वहस्तेनपितृनामकपूर्वकं॥अत्राहममुकःसाक्षी
लिखेयुरितितेसमाः॥उभयाभ्यर्थितेनैतन्मयाह्यमुकसूनुना॥लिखि
तंह्यमुकेनेतिलेखकोंऽतेततोलिखेत्॥समाःसंख्यानोगुणतश्च॥क्व
चित्समाइत्यकारप्रश्लेषः॥नारदः॥अलिपिज्ञऋणीयःस्यात्स्वमतं
तुसलेखयेत्॥साक्षीवासाक्षिणान्येनसर्वसाक्षिसमीपतः॥त्रिविधं
राजशासनमित्युक्तंतद्दर्शयतोयाज्ञवल्क्यबृहस्पती॥दत्वाभूमिंनि
बंधंवाकृत्वालेख्यंतुकारयेत्॥आगामिभद्रनृपतिपरिज्ञानायपार्थि
वः॥पटेवाताम्रपट्टेवास्वमुद्रोपरिचिन्हितं॥अभिलेख्यात्मनोवंश्या

नात्मानंच महीपतिः॥प्रतिग्रहपरीमाणंदानच्छेदोपवर्णनं॥स्वहस्त
कालसंपन्नंशासनंकारयेत्स्थिरं॥निबंधःआकरादौराज्ञादिदत्तंनि
तलभ्यं॥प्रतिगृह्यतेयत्तत्प्रतिग्रहोभूम्यादिःतस्यपरिमाणमियत्ता॥
दीयतेयत्तद्दानं गृहादितस्यच्छेदोमर्यादातस्याउपवर्णनंकथनं॥
तथा॥देशादिकंयस्यराजालिखितेनप्रयच्छति॥सेवाशौर्यादिना
तुष्टःप्रसादलिखितंतुतत्॥पूर्वोत्तरक्रियावादनिर्णयांतेयदानृपः॥
प्रदद्याज्जयिनेलेख्यंजयपत्रंतदुच्यतेइति॥राज्ञोनुकल्पमाहव्या
सः॥राज्ञातुस्वयमादिष्टसंधिविग्रहलेखकः॥ताम्रपट्टेपटेवापिप्रलि
खेद्राजशासनं॥अत्रचराज्ञास्वमतंलेख्यमित्याहसएव॥सन्निवे
शप्रमाणंचस्वहस्तेनलिखेत्स्वयं॥मतंमेऽमुकपुत्रस्यअमुकस्यम
हीपतेः॥सन्निवेशंप्रमाणंचेतिपूर्ववाक्येनान्वयः॥वसिष्ठस्तुराजले
ख्यस्यचातुर्विध्यमाह॥शासनंप्रथमंज्ञेयंजयपत्रंतथापरं॥आज्ञा
प्रज्ञापनापत्रेराजकीयंचतुर्विधं॥सामंतेष्वथभृत्येषुराष्ट्रपालादि
केषुच॥कार्यमादिश्यतेयेनतदाज्ञापत्रमुच्यते॥ऋत्विक्पुरोहिता
चार्यमान्येष्वभ्यर्थितेषुच॥कार्यंनिवेद्यतेयेनपत्रंप्रज्ञापनायतत्॥
शासनजयपत्रेप्रागुक्ते॥याज्ञवल्क्यः॥देशांतरस्थेदुर्लेख्येनष्टोन्मृ
ष्टेतथाहृते॥भिन्नेदग्धेतथाछिन्नेलेख्यमन्यत्तुकारयेत्॥नारदः॥ले
ख्येदेशांतरन्यस्तेशीर्णेदुर्लिखितेहृते॥सतस्तत्कालकरणमसतो
द्रष्टृदर्शनं॥द्रष्टारःसाक्षिणः॥तदभावेदिव्यं॥अलेख्यसाक्षिकेदैवी
व्यवहारेविनिर्दिशेदितिकात्यायनोक्तेः॥याज्ञवल्क्यः॥संदिग्धलेख्य
शुद्धिःस्यात्स्वहस्तलिखितादिभिः॥युक्तिप्राप्तिक्रियाचिन्हसंबंधा
गमहेतुभिः॥युक्तिरर्थापत्तिः॥प्राप्तिर्देशकालावस्थानंचिन्हंमुद्रा
दिक्रियासाक्ष्यादि॥संबंधोनागतः॥आगमःसंभावितःप्राप्त्युपा
यः॥हेतुरनुमानं॥प्रजापतिः॥कार्योयत्नेनमहता निर्णयोराजशा
सने॥राज्ञःस्वहस्ततोमुद्रालेखकाक्षरदर्शनात्॥दुष्टलेख्यान्याह
बृहस्पतिः॥मुमूर्षुशत्रुभीतार्तस्त्रीमत्तव्यसनातुरैः॥निशोपधिब
लात्कारकृतंलेख्यंनसिद्ध्यति॥दूषितोगर्हितःसाक्षिपत्रेकोविनिवे
शितः॥कूटलेख्यंतुतत्प्रोक्तंलेखकोवापितद्विधइति॥अथभुक्तिः॥

नारदः॥ आगमेनविशुद्धेनभोगोयातिप्रमाणतां॥ अविशुद्धागमोभोगःप्रामाण्यंनैवगच्छति॥ सागमत्वविशेषणानरवैशिष्ट्यमप्याह॥ व्यासः॥ सागमोदीर्घकालश्चाविच्छेदोपरवोज्झितः॥ प्रत्यर्थिसन्निधानश्चपंचांगोभोगइष्यते॥ भुक्तिमात्रेणसाध्यासिद्धिमाहनारदः॥ संभोगंकेवलंयस्तुकीर्त्तयेन्नागमंक्वचित्॥ भोगच्छलापदेशेनविज्ञेयःसतुतस्करइति॥ इदंचागमस्मरणयोग्यकालेज्ञेयं॥ तदयोग्येतुभुक्तिमात्रमपिप्रमाणमित्याहसएव॥ स्मार्त्तकालेक्रियाभूमेःसागमाभुक्तिरिष्यते॥ अस्मार्त्तेनुगमाभावात्क्रमात्त्रिपुरुषागतेति॥ अनुगमाभावात्॥ योग्यानुपलब्ध्याआगमाभावनिश्चयस्यासंभवात्॥ अस्मार्त्तेप्यागमाभावस्मरणानुवृत्तावाहसएव॥ अनागमंतुयोभुंक्तेबहून्यब्दशतान्यपि॥ चौरदंडेनतंपापंदंडयेत्पृथिवीपतिरिति॥ यत्तुसएव॥ अन्यायेनापियद्भुक्तंपित्रापूर्वतरैस्त्रिभिः॥ नतच्छक्यमपहर्तुंक्रमात्त्रिपुरुषागतमिति तदागमंविनाप्यन्यायेनापियत्पित्रासहपूर्वतरैस्त्रिभिर्भुक्तंतदपाहर्त्तुंनशक्यं॥ किंपुनरागमाभावनिश्चयासंभवइतियोज्यं॥ यदपिहारीतीयं॥ यद्विनागममत्यन्तंभुक्तंपूर्वैस्त्रिभिर्भवेत्॥ नतच्छक्यमपाकर्त्तुंक्रमात्त्रिपुरुषागतमिति॥ तदत्यंतोपलभ्यमानागमंविनेतिव्याख्येयं॥ नत्वागमस्वरूपंविनेति॥ यत्तुयाज्ञवल्कीयं॥ आगमस्तुकृतोयेनसोभियुक्तस्तमुद्धरेत्॥ नतत्सुतस्तत्सुतोवाभुक्तिस्तत्रगरीयसीतितदागमकर्त्तुरेवागमानुद्धारे दंडोनतत्सुतादीनामित्येवंपरं॥ नत्वर्थसिद्धिरिति॥ यदाह हारीतः॥ आगमस्तुकृतोयेनसदंड्यस्तमनुद्धरन्॥ नतत्सुतस्तत्सुतोवाभोग्यहानिस्तयोरपीति॥ याज्ञवल्क्यः॥ योभियुक्तःपरेतःस्यात्तस्यरिक्थीसमुद्धरेत्॥ नतत्रकारणंभुक्तिरागमेनविनाकृता॥ रिक्थीअंशभागीपुत्रादिः तमागमं॥ ननुदीर्घकालोभोगःप्रमाणमितिविरुद्धंयतःस्वल्पकालोपभोगेनापिअभियोक्तुर्हानिःप्रतीयते॥ यथाहसंवर्तः॥ पश्यतोब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी॥ परेणभुज्यमानायाधनस्यदशवार्षिकीति॥ उच्यते॥ एतत्पश्यतोप्रतिषेधतस्तावत्कालीनतदुत्पादिजन्यफलहानिर्भवतीत्येवंपरं॥ ननुतदुत्पादिवस्तुहानिरपीति॥

अनागमं तु यो भुंक्त इत्युदाहृतवचनविरोधात्॥ कात्यायनः॥ नोपभो-
गे बलं कार्यं आहर्त्रा तत्सुतेन वा॥ पशुस्त्रीपुरुषादीनामिति धर्मो व्यव-
स्थितः॥ नारदः॥ आधिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः॥ राज-
स्वं श्रोत्रियस्वं च नोपभोगेन नश्यति॥ मनुः॥ संप्रीत्या भुज्यमानानि
न नश्यंति कदाचन॥ धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते॥ दम्य
प्रयुज्यते दमनार्थं यः समर्प्यते॥ अथ साक्षिणः॥ टोडशनंदे नारदः॥
संदिग्धेषु तु कार्येषु द्वयोर्विवदमानयोः॥ दृष्टश्रुतानुभूतत्वात्साक्षि-
भ्यो व्यक्तदर्शनं॥ तद्भेदानाह बृहस्पतिः॥ लिखितो लेखितो गूढः स्मा-
रितः कुल्यदूतकौ॥ याहच्छिकश्चोत्तरश्च कार्यमध्यगतोऽपरः॥ नृपोऽध्य-
क्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः॥ पत्रे विनिवेशितो लिखितः॥
प्रत्यर्थिनार्थिप्रेरणया निवेशितो लेखितः॥ कुड्यादिव्यवधानेन श्रा-
वितो गूढः॥ पुनः पुनः कार्यस्मार्यमाणः स्मारितः॥ यदृच्छयैवाग-
तः साक्षी क्रियमाणो याहच्छिकः॥ श्रवणाच्छ्रावणाद्वा साक्षिणा-
मप्युपर्युपरि भाषमाण उत्तरः॥ अध्यक्षः प्राड्विवाकः॥ इदं च सभ्या-
दीनामुपलक्षणं॥ लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः इति का-
त्यायनवाक्यात्॥ स एव॥ नव सप्त पंच वा स्युश्चत्वारस्त्रय एव वा॥ उ-
भौ वा श्रोत्रियौ ग्राह्यौ नैकं पृच्छेत्कदाचन॥ लिखितौ द्वौ तथा गूढौ त्रि-
चतुःपंच लेखिताः॥ यदृच्छाः स्मारिताः कुल्यास्तथा चोत्तरसाक्षि-
णः॥ दूतकः खरिकाग्राही कार्यमध्यगतस्तथा॥ एक एव प्रमाणं
स्यान्नृपोऽध्यक्षस्तथैव च॥ लिखितादीनामुभयानुमतत्वे एकस्या-
पि ग्रहणमाह याज्ञवल्क्यः॥ उभयानुमतः साक्षी भवेदेकोऽपि धर्म-
वित्॥ व्यासः॥ शुचिक्रियश्च धर्मज्ञः साक्षी यस्त्वनुभूतवाक्॥ प्रमा-
णमेको भवति साहसेषु विशेषतः॥ अनुभूतवाक् प्रायो दृष्टसत्यव-
चनः निक्षेपादिष्वनात्तमप्येकमाह कात्यायनः॥ अभ्यंतरस्तु निक्षेपे सा-
क्ष्यमेकोऽपि वाच्यते॥ अर्थिना प्रहितः साक्षी भवेदेकोऽपि याचिते॥ या-
चितं विवाहाद्यर्थं नीतमाभरणादिकं कुंडलादि पण्यविवादेप्येकमा-
ह स एव॥ संस्कृतं येन यत्पण्यं तत्तेनैव विभावयेत्॥ एक एव प्रमाणं
स विवादे तत्र कीर्तितः॥ तेषां च स्वरूपमाह व्यासः॥ धर्मज्ञाः पुत्रिणो

मौला: कुलीना: सत्यवादिन:॥श्रौतस्मार्तक्रियायुक्ताविगतद्वेषम-
त्सरा:॥श्रोत्रियानपराधीना: सूरयश्चाप्रवासिन:॥युवान: साक्षिण:
कार्याःऋणादिषुविजानता॥ नारद:॥श्रेणीषुश्रेणिपुरुषा: स्वेषुवर्गे
षुवर्गिण:॥बहिर्वासिषुबाह्या: स्यु:स्त्रिय: स्त्रीषुतुसाक्षिण:॥वर्गि
ण आह कात्यायन:॥ लिंगन: श्रेणिपूगाश्चवणिग्जातास्तथापरे॥स
मूहस्थाश्चयेचान्येवर्गास्तानब्रवीद्भृगु:॥दासचारणमल्लानांहस्त्य
श्वरथवाजिनां॥प्रत्येकैकसमूहानांनायकावर्गिण: स्मृता:॥विजाती
यानप्याह याज्ञवल्क्य:॥ त्र्यवरा: साक्षिणो ज्ञेया श्रौतस्मार्तक्रिया
परा:॥ यथाजाति यथावर्णं सर्वेसर्वेषु वास्मृता:॥वर्ज्यानप्याह स एव
॥स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तका:॥रंगावतारिपाखंडि
कूटकृद्विकलेंद्रिया:॥पतिताप्तार्थसंबंधसहायरिपुतस्करा:॥सा
हसीदृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिण:॥निर्धूत: स्वजनैस्त्यक्त:
॥ आदिशब्देनदासाद्या:॥ बृहस्पति:॥मातु:पिता पितृव्यश्च भार्या
या भ्रातृमातुलौ॥भ्रातासखाचजामातासर्ववादेष्वसाक्षिण:॥ना
रद:॥ अनिर्दिष्टस्तु साक्षित्वे स्वयमेवैत्ययोवदेत्॥ स्वयमुक्ति: स
शास्त्रेषु नससाक्षित्वमर्हति॥कात्यायन:॥साक्षिणां लिखितानां च
निर्दिष्टानां च वादिनां॥तेषामेकोन्यथावादी भवेत्सर्वे न साक्षिण:॥ए
तेषामपिक्वचित्साक्षित्वमाह नारद:॥ असाक्षिणोये निर्दिष्टा दास
नैकृतिकादय:॥कार्यगौरवमासाद्य भवेयुस्तेपि साक्षिण:॥ असं
भवे मनु:॥स्त्रियाप्यसंभवे कार्य्यं बालेन स्थविरेण वा॥शिष्येण बंधुना
वापि दासेन भृतकेन वा॥ याज्ञवल्क्य:॥ सर्व: साक्षी संग्रहणे चौर्य्यपा
रुष्यसाहसे॥ अत्र स्त्रीसंग्रहादीनां साहसत्वेपि पृथगुक्तता क्रिय
माणस्त्रीसंग्रहपरं॥ उशना॥ दासोऽधो बधिर: कुष्ठी स्त्रीबालस्थ
विरादय:॥ एतेप्यनभिसंबद्धा साहसे साक्षिणो मता:॥ अनभिसंब
द्धा अपक्षपातिन:॥ बृहस्पति:॥ साक्षिणोर्थे समुद्दिष्टान्यस्तु दोषे
षु दूषयेत्॥ अदुष्टान्दूषयन्वादीतत्समं दंडमर्हति॥ वादयत्र प्रत्यर्थी॥
तत्समं विवादविषयीभूतद्रव्यसमं॥ व्यास:॥ साक्षिदोषा: प्रयोक्तव्या:
संसदि प्रतिवादिना॥ पत्रेभिलिखितान्सर्वान्वाच्या: प्रत्युत्तरं तु ते॥

पत्रेलिखितान्साक्षिदोषान्प्रतिलक्षीकृत्यतद्दूषणपरिहारंतेसाक्षिणःसौ
वीचनीयाइत्यर्थः॥सएव॥प्रतिपन्नोनसाक्षित्वमर्हतितुकथंचन॥अतो
न्यथाभावनीयाःक्रिययाप्रतिवादिना॥अभावयन्दमंदाप्यःप्रत्यर्थीसा
क्षिणःस्फुटं॥भाविताःसाक्षिणोवर्ज्याःसाक्षिधर्मनिराकृताः॥अतोन्य
थाअसंप्रतिपत्तौ॥भावनीयाअंगीकारयितव्याःक्रिययाप्रमाणेनस्फु
टंयथास्यात्तथाभावयन्नित्यन्वयः॥यत्तु॥सभासद्भिर्दूषणंयच्छ्लोकसिद्
मथापिवा॥साक्षिणांदूषणंग्राह्यंनसाध्यदोषवर्जनादिति॥तच्छ्लोका
धारितासुसाक्षिविषयं॥प्रतिवादिनादोषास्तानेसएव॥प्रमाणस्यहि
दोषावक्तव्यास्तेविवादिना॥गूढास्तुप्रकटाःसभ्यैःकालेशास्त्रप्रदर्शना
त्॥गूढाःशास्त्रप्रदर्शनेनसाक्षिवादात्पूर्वकालेवक्तव्याइत्यर्थः॥अनं
तरंतुनवक्तव्याइत्याहबृहस्पतिः॥लेख्यदोषास्तुयेकेचित्साक्षिणांचै
वयस्मृताः॥वादकालेतुवक्तव्याःपश्चादुक्तान्नदूषयेत्॥उक्तानुक्त
तः॥अत्रदंडमाहकात्यायनः॥उक्तेर्थेसाक्षिणोयस्तुदूषयेत्सागदूषि
तान्॥नचतत्कारणंब्रूयात्प्राप्नुयात्पूर्वसाहसं॥साक्षिणांस्वदूषणपरि
हाराशक्तावर्थीतंकुर्यादित्याह॥बृहस्पतिः॥लेख्यंवासाक्षिणोवापिवि
वादेयस्यदूषिताः॥तस्यकार्यंनसिद्ध्येत्तुयावत्तन्नविशोधयेत्॥तल्ले
ख्यादिकं॥कूटसाक्षिकर्तुर्दंडमाहकात्यायनः॥येनकार्यस्यलोभेन
निर्दिष्टाःकूटसाक्षिणः॥गृहीत्वातस्यसर्वस्वंकुर्यान्निर्विषयंततः॥नि
र्विषयंविवादविषयीभूतार्थरहितं॥दुष्टसाक्षिणांनिश्चयोपायमाह
नारदः॥यस्त्वात्मदोषदुष्टत्वादस्वस्थइवलक्ष्यते॥स्थानात्स्थानां
तरंगच्छेदेकैकंवानुधावति॥कासत्यकस्माच्चभृशंअभीक्ष्णंनिश्व
सत्यपि॥विलिखत्यवनिंपद्भ्यांबाहूवासश्चधूनयेत्॥भिद्यतेमुखवर्णो
स्यललाटंस्विद्यतेतथा॥शोषमागच्छतश्चौष्ठौऊर्ध्वंतिर्यक्चवीक्षते॥
त्वरमाणइवाबद्धमपृष्टोबहुभाषते॥कूटसाक्षीसविज्ञेयस्तंपापंविन
येद्भृशं॥साक्षिणांप्रश्नप्रकारमाहकात्यायनः॥देवब्राह्मणसान्निध्येसा
क्ष्यंपृच्छेदृतंद्विजान्॥उदङ्मुखान्प्राङ्मुखान्वापूर्वाण्हेचशुचिःशुची
न्॥सभांतःसाक्षिणःसर्वानर्थिप्रत्यर्थिसन्निधौ॥प्राड्विवाकोनुयु
जीतविधिनानेनसांत्वयन्॥यद्द्वयोरनयोर्वेत्थकार्येस्मिन्चेष्टितंमि
थः॥तद्ब्रूतसर्वंसत्येनयुष्माकंह्यत्रसाक्षिता॥गवाश्वादिविवादेषुविप्रति
पन्नार्थसान्निध्यमप्याहसएव॥अर्थिप्रत्यर्थिसान्निध्येसाध्यार्थस्य
चसन्निधौ॥प्रत्यक्षंचोदयेत्साक्ष्यंनपरोक्षेकथंचन॥अर्थस्यापरिकर्तव्यंतयोः

यिविनाक्कचित्॥ चतुष्पादेषु धर्मोयं द्विपदःस्थावरेषुच॥ तौल्यंगणि
मयेयानामभावेपिद्विवादयेत्॥ क्रियाकारेषुसर्वेषुसाक्षित्वंनत्वतोन्य
थेति॥ तयोरपिविनाकश्चित्॥ तयोर्वादिनोविना अपिअर्थसन्निधाने
कश्चित्तुप्रदर्शयित्यर्थः॥ तौल्यंतोलनयोग्यंसुवर्णादि। गणिमंगणनीयं॥
नाणकादिमेयंमानयोग्यंव्रीहिगोधूमादि॥ अभावेपिसाध्यार्थसन्निधा
नाभावेपि॥ क्रियाकारेषुव्यवहारेषु॥ वधस्तेयविवादपदेसाक्षिभाषणंचि
ह्नसन्निधावित्याहसएव॥ वधेचेस्वामिनांसाक्ष्यंवादयेच्चिह्नसन्निधौ
॥तदभावेपिचिन्हस्यनान्यथैवप्रवादयेत्॥ तत्साक्षिभाषणंवधचिन्ह
स्याभावेकार्यं॥ अन्यथावधचिन्हसद्भावे॥ सएव॥ नकालहरणंकार्यं
राज्ञासाक्षिप्रभाषणे॥ महान्दोषोभवेत्कालाद्धर्मव्यावृत्तिलक्षणः॥ नार
दः॥ आहूयसाक्षिणःपृच्छेन्नियम्यशपथैर्भृशं॥ समस्तान्विदिताचा
रान्विज्ञातार्थान्पृथक्पृथक्॥ वसिष्ठः॥ समवेतैस्तुयद्दृष्टंवक्तव्यंतु
तथैवतत्॥ विभिन्नैनैवतत्कार्यंवक्तव्यंतुपृथक्पृथक्॥ भिन्नकाले
तुयत्कार्यंविज्ञातंयत्रसाक्षिभिः॥ एकैकंवादयेत्तत्रविधिरेषप्रकीर्ति
तः॥ मनुः॥ सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः॥ गोबीजकांचनैर्वै
श्यंशूद्रंसर्वैस्तुपातकैः॥ गोरक्षकान्वणिजकांस्तथाकारुकुशीलवान्
॥प्रेष्यान्वार्धुषिकांश्चैवविप्रान्शूद्रवदाचरेत्॥ येव्यपेताःस्वकर्मभ्यः
परपिंडोपजीविनः॥ द्विजत्वमभिवांछंतितांस्तुशूद्रवदाचरेदिति॥ अन्य
थाब्रुवतः सत्यंतेनश्यतीत्येवमादिप्रकारेणेत्यर्थः॥ साक्षिवचनप
रीक्षामाह॥ देशकालवयोद्रव्यसंज्ञाजातिप्रमाणतः॥ अन्यूनंचेन्नि
गदितंसिद्धंसाध्यंविनिर्दिशेत्॥ साक्षिणां विप्रतिपत्तौ निर्णयमाह॥
याज्ञवल्क्यः॥ द्वैधेबहूनांवचनंसमेषुगुणिनांतथा॥ गुणिद्वैधेतुव
चनंग्राह्यंयेगुणवत्तमाः॥ साक्ष्यमंगीकृत्याऽनभिधाने दंडमाहस
एव॥ अब्रुवन्हिनरः साक्ष्यंऋणंसदशबंधकं॥ राजासर्वंप्रदाप्यःस्या
त्षट्चत्वारिंशकेहनि॥ सर्वं वृद्धिसहितं॥ सदशबंधकं॥ दशमांश
सहितं॥ दशमांशोराज्ञाग्राह्यः॥ सवृद्धिकमृणमुत्तमर्णेनग्राह्यमितिमि
ताक्षरायां॥ जानतः साक्ष्यानंगीकारे दंडमाहसएव॥ यःसाक्ष्यंश्रा
वितोन्येभ्योनिन्हुतेतत्तमोवृतः॥ सदाप्योष्टगुणंदंडंब्राह्मणंतुवि

वास पेत्॥ विवादपराये यो दंडस्तं दण्डमष्टगुणं दाप्यः॥ दंडदाना
मर्थस्तु ब्राह्मणो निर्वास्यः क्षत्रियादिः स्वोचितं कर्मकारयितव्य इ
ति मिताक्षरायां॥ मनुः॥ यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः
॥रोगोग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः॥ याज्ञवल्क्यः॥ उक्तेपि
साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तराः॥ द्विगुणा वाऽन्यथा ब्रूयुः कूटाःस्युः
पूर्वसाक्षिणः॥ नारदः॥ निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्॥ लिखि
तं साक्षिणा वापि पूर्वमावेदितं न चेत्॥ क्वचित्साक्षिणोनृतवचनानु
ज्ञां प्रायश्चित्तं चाह याज्ञवल्क्यः॥ वर्णिनो हि वधो यत्र तत्र साक्ष्यनृ
तं वदेत्॥ तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः॥ शूद्रस्य प्रायश्चि
त्तमाह विष्णुः॥ शूद्रश्चैकाह्निकं गोर्दशकस्य ग्रासं दद्यादिति॥ एका
ह्निकं एकस्मिन्नहनि भक्षयितुं पर्याप्तं॥ ॥इति साक्षिनिरूपणम्॥ ॥
अथ दिव्यं॥ तत्तु मानुषप्रमाणानिर्णीतार्थनिर्णायकं॥ तच्च तत्काल
कालांतरनिर्णायकतया द्वेधा॥ तत्राद्यभेदानाह बृहस्पतिः॥ घटोग्नि
रुदकं चैव विषं कोशश्च पंचमं॥ षष्ठं च तंडुलाः प्रोक्ताः सप्तमं तु समा
षकः॥ अष्टमं फलमित्युक्तं नवमं धर्मजं स्मृतं॥ तत्राद्यानि पंच महा
भियोगस्येवेत्याह याज्ञवल्क्यः॥ तुलाग्न्यापो विषं कोशो दिव्यानीह
विशुद्धये॥ महाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरि॥ शीर्षकस्थे पारा
जयिकं दंडभाजि पितामहः॥ सावष्टंभाभियुक्तानां घटादीनि विनि
र्दिशेत्॥ तंडुलाश्चैव कोशश्च शंकास्वेतानि योजयेदिति॥ तेन कोशः
शतं विष्टंभेशंकायां भवति॥ कालिकापुराणे॥ परदाराभिशापे च चौर्याग
म्यागमेषु च॥ महापातकशस्ते च स्याद्दिव्यं नृपसाहसे॥ विप्रतिपत्तौ
विवादे वर्णस्य स्थापने सति॥ तत्रैव स्थापयेद्दिव्यं शिरः पूर्वं महीपतिः॥
परदाराभिशापे च बहवो यत्र वादिनः॥ शिरोहीनं भवेद्दिव्यं आत्मनः
शुद्धिकारणात्॥ अगम्याः परदारभिन्नाः साधारणा वेश्याद्याः॥ शस्तेऽ
भिशस्ते॥ साहसं बलात्कारः॥ अवर्णो निंदा॥ पारदाररूपं विशेषण
मविवक्षितमभिशापस्यानुबाध्यत्वात्॥ एवं बहव इत्याद्यपि॥ तेन बा
द्यभावेपि सर्वाभिशापे दिव्यं भवति॥ शुद्धिकारणादिति हेतुनिर्देशा
च्चैवं संगच्छते॥ विनापि शीर्षकं कुर्यान्नृपद्रोहे शपानके॥ इति सा॰

मान्योक्तिश्च॥नारदः॥राजभिःशंकितानांच निर्दिष्टानांच दस्युभिः।
आत्मशुद्धिपराणांच देयंदिव्यंशिरोविनेति॥कालांतरे निर्णयकं दिव्यं
शपथः॥तद्भेदानाह नारदः॥सत्यवाहनशस्त्राणिगोबीजकनकानिच
॥देवतापितृपादांश्च दत्तानिसुकृतानिच॥स्पृशेच्छिरांसिपुत्राणां दा
राणांसुहृदांतथा॥अभियोगेषुसर्वेषुकोशपानमथापिवा॥इत्येते
शपथाःप्रोक्ता मनुना स्वल्पकारणात्॥कोशस्यनिर्णायकत्वेपिम
हाभियोगविषयतयाद्येषुपाठः॥याज्ञवल्क्यः॥रुच्यावान्यतरःकु
र्यादितरोवर्तयेच्छिरः॥अ.पंचविकल्पोभियोक्त्रेच्छायामेव॥तदनि
च्छायांत्वभियोज्यस्यैवदिव्यं॥नकश्चिदभियोक्तारंदिव्येषुविनयो
जयेत्॥अभियुक्तायदातव्यंदिव्यंदिव्यविशारदैरितिदिव्यनत्वेका
तीयोक्तेः॥अथाधिकारिव्यवस्था॥याज्ञवल्क्यः॥तुलास्त्रीबालवृ
द्धांधपंगुब्राह्मणरोगिणां॥अग्निर्जलंवाशूद्रस्यवासप्तविषयस्यवा
॥स्त्रीजातिवयोवस्थाविशेषानारदेन॥षोडशाब्दावधिकोबालःस
र्वजाती-योपि॥अशीतिवर्षाधिको वृद्धः॥अत्रब्राह्मणस्यवस्यमा
णसाधारणकाले तुलैवनियता॥अगन्यादिकालेतु तान्यपिभवंति।
अतएवपितामहः॥सर्वेषामेववर्णानांकोशाच्छुद्धिर्विधीयते॥सर्वा
ण्येतानिसर्वेषांब्राह्मणस्यविषंविना॥कालिकापुराणे॥वर्णात्य
स्यसदादेयंमाषकंतप्तहेमजं॥नारदः॥क्लीबान्नरान्सत्वहीनान्व
रितश्चार्दितांनरान्॥बालवृद्धातुरान्स्त्रीश्चपरीक्षेतघटेसदा॥
स्त्रीणांतुनविषंप्रोक्तंनचापिसलिलंस्मृतं॥घटकोशादिभिस्तासा
मतस्तत्वंविचारयेत्॥आर्त्तानांतोयशुद्धिःस्यान्नविषंपित्तरोगिणां
॥श्वित्रंधकुनखादीनांनाग्निकार्यंविधीयते॥नमज्जनीयाः स्त्री
बालाधर्मशास्त्रविचक्षणैः॥रोगिणोयेचवृद्धाःस्युःपुमांसोयेचदु
र्बलाः॥निरुत्साहान्व्याधिक्लिष्टान्नार्तांस्तोयेनिमज्जयेत्॥सद्यो
म्रियंते मज्जंतःस्वल्पप्राणाहितेस्मृताः॥साहसेष्वागतानेतान्वे
वतोयेनिमज्जयेत्॥नचापिहारयेदग्निंनविशेषाविशोधयेत्॥वि
ष्णुः॥नश्लेष्मिकाणांव्याधितानांभीरूणांश्वासकासिनां॥कात्या
यनः॥नलोहशिल्पिनामग्निःसलिलंनाम्बुसेविनां॥मंत्रयोगविदां

चैवविषंदद्यात्तुनकचित्॥ तंडुलैर्ननियुंजीतव्रतिनंमुखरोगिणं
॥व्रतीषयोव्रनादिमान्पितामहः॥ मद्यपस्त्रीव्यसनिनांकितवानां
तथैवच॥ कोषःप्राज्ञैर्नदातव्योयेचनास्तिकवृत्तयः॥ नारदः॥ म
हापराधेनिर्द्धर्मेकृतघ्नेक्लीबकुत्सिते॥ नास्तिकेदृष्टदोषेचकोशदा
नंविवर्जयेत्॥ कात्यायनः॥ अस्पृश्याःधमदासानांम्लेच्छानांपाप
कारिणां॥ प्रातिलोम्यप्रसूतानांनिश्चयोनतुराजनि॥ तत्प्रसिद्धानि
दिव्यानिसंशयेतेषुनिर्दिशेत्॥ तत्प्रसिद्धानिघटसर्पादीनि॥ दिव्यका
रिणःशक्तौप्रतिनिधिमाहदिव्यंतेसएव॥ देशकालाःविशेषेतुय
थायुक्तंप्रकल्पयेत्॥ अन्येनहारयेद्दिव्यंविधिरेषविपर्यये॥ अ
न्येनहारयेत्प्रतिनिधिनाकारयेत्॥ विपर्ययेदिव्यकारिणःसाम
र्थ्येपूर्वंपित्रादिघातोमहापापंवाकृतमितिनिश्चयेकालांतरेचा
र्थांतरसंदेहेपिप्रतिनिधिद्वारैवदिव्यमाहसएव॥ मातापितृद्वि
जगुरुवृद्धस्त्रीबालघातिनां॥ महापातकयुक्तानांनास्तिकानां
विशेषतः॥ लिंगिनांप्रमदानांचमंत्रयोगक्रियाविदां॥ वर्णसंकर
जातानांपापाभ्यासप्रवर्त्तिनां॥ एतेष्वेवाभियोगेषुनिंद्येष्वेवप्रय
त्नतः॥ दिव्यंप्रकल्पयेन्नैवराजाधर्मपरायणः॥ एतैरेवनियुक्ता
नांसाधूनांदिव्यमर्हति॥ नसंतिसाधवोयत्रतत्रशोध्याःस्वकैर्न
रैः॥ स्वकैराप्तैः॥ अथकालः॥ पितामहः॥ चैत्रोमार्गशिरश्चैववै
शाखश्चतथैवच॥ एतेसाधारणामासादिव्यानामविरोधिनः॥ घ
टःसर्वर्तुकःप्रोक्तोवातिवातेविवर्जयेत्॥ अग्निःशिशिरहेमंतव
र्षासुपरिकीर्त्तितः॥ शरद्ग्रीष्मेतुसलिलंहेमंतेशिशिरेविषं॥ हेमं
तशिशिरयोरेवोपादानंकालांतरस्याप्युपलक्षणं॥ वर्षेचतुर्थव
मात्रोपादाग्रेवक्ष्यमाणत्वात्॥ नारदः॥ कोशस्तुसर्वदादेयस्तुल
स्यात्सार्वकालिकी॥ पितामहः॥ पूर्वाह्णेग्निपरीक्षास्यात्पूर्वाह्णेच
घटोभवेत्॥ मध्याह्नेतुजलंदेयंधर्मतत्त्वमभीप्सता॥ दिवसस्य
तुपूर्वाह्णेकोशशुद्धिर्विधीयते॥ रात्रौतुपश्चिमेयामेविषंदेयंसु
शीतलमिति॥ एतानिचदिव्यान्यादित्यवारेकार्याणीतिशिष्टाः॥ अ
थदेशः॥ पितामहः॥ प्राङ्मुखोनिश्चलःकार्यःशुचौदेशेघटःसदा॥

द्रस्थानेसभायांवाराजद्वारेचतुष्पथे॥नारदः॥सभाराजकुल
द्वारदेवायतनचत्वरइति॥कात्यायनः॥इंद्रस्थानेभिशस्तानांम
हापातकिनांनृणां॥नृपद्रोहप्रवृत्तानांराजद्वारेप्रयोजयेत्॥
प्रातिलोम्यप्रसूतानांदिव्यंदेयंचतुष्पथे॥अतोन्येषुतुकार्येषुसभा
मध्येविदुर्बुधाइति॥नारदः॥अदेशकालदत्तानिबहिर्वादिकृतानि
च॥व्यभिचारंसदार्थेषुकुर्वन्तीहनसंशयइति॥अथसर्वदिव्यसाधा
रणेविधिः॥पितामहः॥ततआवाहयेद्देवान्विधिनानेनधर्मवित्॥प्राङ्मु
खःप्रांजलिर्भूत्वाप्राड्विवाकस्ततोवदेत्॥एह्येहिभगवन्धर्मअस्मि
न्दिव्येसमाविश॥सहितोलोकपालैश्चवस्वादित्यमरुद्गणैः॥आवाह्य
तुघटेधर्मंपश्चादंगानिविन्यसेत्॥सएव॥इंद्रंपूर्वेतुसंस्थाप्यप्रेतेशं
दक्षिणेतथा॥वरुणंपश्चिमेभागेकुबेरंचोत्तरेतथा॥अग्न्यादिलोक
पालांश्चकोणभागेषुविन्यसेत्॥इंद्रःपीतोयमःश्यामोवरुणःस्फ
टिकप्रभः॥कुबेरश्चसुवर्णाभअग्निश्चापिसुवर्णभः॥तथैवनिरृतिः
श्यामोवायुर्धूम्रःप्रशस्यते॥ईशानस्तुभवेद्रक्तएवंध्यायेत्क्रमादिमान्
॥इंद्रस्यदक्षिणेपार्श्वेवसूनावाहयेद्बुधः॥धरोध्रुवस्तथासोमआपश्चै
वाऽनिलोऽनलः॥प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्त्तिताः॥देवेशेशान
योर्मध्येआदित्यानांतथायनं॥धातार्यमाचमित्रश्चवरुणोंशोभगस्त
था॥इंद्रोविवस्वान्पूषाचपर्जन्योदशमस्तथा॥ततःस्त्वष्टाततोविष्णुरज
घन्योजघन्यजः॥एतेतुद्वादशादित्यानामभिःपरिकीर्त्तिताः॥अग्नेः
पश्चिमभागेतुरुद्राणामयनंविदुः॥वीरभद्रश्चशंभुश्चगिरिशश्चम
हायशाः॥अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः॥भुवनाधीश्वर
श्चैवकपालीचविशांपतिः॥स्थाणुर्भगश्चभगवान्रुद्रास्त्वेकादशस्मृ
ताः॥प्रेतेशरक्षोमध्येचमातृस्थानंप्रकल्पयेत्॥ब्राह्मीमाहेश्वरीचैव
कौमारीवैष्णवीतथा॥वाराहीचैवमाहेंद्रीचामुंडागणसंयुता॥निरृ
तेरुत्तरेभागेगणेशायतनंविदुः॥वरुणस्योत्तरेभागेमरुतांस्थानमुच्य
च्यते॥गगनस्पर्शनोवायुरनिलोमरुतस्तथा॥प्राणःप्राणेशजीवौचम
रुतःसप्तकीर्त्तिताः॥घटस्योत्तरभागेतुदुर्गामावाहयेद्बुधः॥एतासांदे
वतानांतुस्वनाम्नापूजनंविदुः॥भूषावसानंधर्मायदत्वाचार्घादिकंक्र

मात्॥अर्घ्यादिपञ्चाङ्गानांभूषांतमुपकल्पयेत्॥गंधादिकोनिवेद्यां
तांपरिचर्यांप्रकल्पयेत्॥चतुर्दिक्षुतथाहोमःकर्त्तव्योवेदपारगैः॥आ
ज्येनहविषाचैवसमिद्भिर्होमसाधनं॥सावित्र्याप्रणवेनाथस्वाहांते
नैवहोमयेत्॥हविश्चरुः॥आज्यहविःसमिधांसंप्रतिपन्नदेवताक
त्वात्मिलितानामेवहोमः॥सान्नाय्ययोरिवेतिदिव्यतत्वेगौडमी
मांसकः॥तन्न॥आज्येस्तुवेणावद्यतीतिस्रुवस्यचरौसकृदुपस्त
णानिमध्यात्पूर्वार्द्धाच्चद्विर्हविषोऽवद्यतिअभिघारयतिहविरवत्तंवैषे
ऽवदानधर्मैइत्याश्वलायनादिसूत्रात्स्रुवःसमित्सुसामर्थ्याद्धस्तस्ये
तिभिन्नसाधनकत्वात्तंत्रतानुपपत्तेः॥सान्नाय्यहोमयोस्तुजुह्वाए
वसाधनत्वाद्युक्तंतंत्रतेति॥सएव॥यमर्थमभियुक्तःस्याल्लिखित्वा
तंतुपत्रके॥मंत्रेणानेनसहितंतत्कार्यंचशिरोगतं॥मंत्रश्च॥आदि
त्यचंद्रावनिलोऽनलश्चद्यौर्भूमिरापोहृदयंमनश्च॥अहश्चरात्रिश्च
उभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति॥नारदः॥प्राड्विवाकस्त
तोविप्रोवेदवेदांगपारगः॥श्रुतवृत्तोपसंपन्नःशांतचित्तोविमत्सरः॥स
त्यसंधःशुचिर्दक्षःसर्वप्राणिहितेरतः॥उपोषितश्चार्द्रवासाकृतदंता
नुधावनः॥सर्वासांदेवतानांचपूजांकृत्वायथाविधीति॥याज्ञवल्क्यः॥
सचैलंस्नातमाहूयसूर्योदयउपोषितं॥कारयेत्सर्वदिव्यानिनृपब्राह्म
णसन्निधौ॥पितामहोपि॥एकरात्रोपोषितायत्रिरात्रोपोषितायवा॥
नित्यंदेयानिदिव्यानिशुचयेचार्द्रवाससइति॥सएव॥सद्भिःपरिवृतारा
जाशुद्धिमतांप्रपूजयेत्॥ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिस्तुतोष
येत्॥एवंकारयिताराजाभुक्त्वाभोगान्मनोरमान्॥महतींकीर्त्तिमाप्नो
तिब्रह्मभूयायकल्पते॥अथघटविधिः॥ ॥पितामहः॥विशाखामु=
च्छ्रितांशुभ्रांघटशालांतुकारयेत्॥यत्रस्थानोपहन्येतश्वभिश्चांडाल
वायसैः॥कपाटबीजसंयुक्तांपरिवारकरक्षितां॥पानीयानुसमायुक्ता
मश्मन्यांकारयेन्नृपः॥नारदः॥खादिरंकारयेत्तत्रनिर्व्रणंशुक्लवर्जितं॥
शुक्लखादिरवर्जितमित्यर्थः॥शांशपंतदभावेवाशालंवाकोटरैर्विना॥
अंजनंतिंदुकीसारंतिनिशोरक्तचंदनः॥माधवस्तु॥अर्जुनस्तिलको
शोकःतिनिशोरक्तचंदनइतिपपाठ॥एवंविधानिकाष्ठानिघटार्थंपरी

कल्पयेत्॥ एवंविधानीत्यादीनि अन्यान्यपि यज्ञियान्यौदुंबरादीनी
तिमदनः॥ अतएवपितामहः॥ छित्वातुयज्ञियंवृक्षंयूपवन्मंत्रपूर्वकं
प्रणम्यलोकपालेभ्यस्तुलाकार्यामनीषिभिः॥ मंत्रः सौम्योवानस्प
त्यच्छेदनेजप्यएवच॥ यूपवदोषधेत्रायस्वैनमित्यादिमंत्रपूर्वकं॥
सौम्यवानस्पत्ययोर्जपमंत्रत्वेनादृष्टार्थत्वात्समुच्चयः॥ सौम्याःप्र
सिद्धाः॥ वानस्पत्योशतवल्शोविरोहेति॥ अस्ययूपवदित्यतिदेशा
त्सिद्धस्यैवानुवादः पितामहः॥ चतुर्हस्तातुलाकार्यापादौकार्यौ
तथाविधौ॥ अंतरंतुतयोर्हस्तौभवेदध्यर्द्धमेवच॥ कंठकानिचदेयानि
त्रिषुस्थानेषुयत्नतः॥ सएव॥ शिक्यद्वयंसमासज्यपार्श्वयोरुभयो
रपि॥ प्रागग्रान्कल्पयेद्दर्भान्शिक्ययोरुभयोरपि॥ पश्चिमेतोलयेत्क
र्तॄनन्यस्मिन्मृत्तिकांशुभां॥ इष्टकाभस्मपाषाणकपालास्थिविवर्जि
तां॥ नारदः॥ शिक्यद्वयंसमासज्यघटकर्कटयोर्दृढं॥ एकत्रशिक्येपु
रुषमन्यत्रतुलयेच्छिलां॥ धारयेदुत्तरेपार्श्वेपुरुषंदक्षिणेशिलां॥ पिट
कंपूरयेत्तस्मिन्इष्टकापांसुलोष्टकैः॥ परीक्षाप्रकारमाहसएव॥ का
र्यःपरीक्षकैर्नित्यमवलंबसमोघटः॥ उदकंचप्रदातव्यंघटस्योपरिपंडि
तैः॥ यस्मिन्नप्लवतेतोयंसविज्ञेयःसमोघटः॥ सामर्थ्यमवलंबावाह
पितामहः॥ तोरणेचतथाकार्येपार्श्वयोरुभयोरपि॥ घटादुच्चतरेस्यो
तांनित्यंदशभिरंगुलैः॥ अवलंबौचकर्त्तव्यौतोरणाभ्यामधोमुखौ॥
मृन्मयौसूत्रसंबद्धौघटमस्तकचुंबिनौ॥ पितामहः॥ तोलयित्वानरंपू
र्वंतस्मात्तमवतारयेत्॥ घटंतुकारयेन्नित्यंपताकाध्वजशोभितं॥ त
तआवाहयेद्देवान्विधिनानेनमंत्रवित्॥ वादित्रतूर्यनिर्घोषैर्गंध
माल्यानुलेपनैः॥ नारदः॥ रक्तैर्गंधैश्चमाल्यैश्चदध्यपूपाक्षतादिभिः
॥अर्चयेत्तुघटंपूर्वंततःशिष्टांस्तुपूजयेत्॥ याज्ञवल्क्यः॥ तुलाधारण
विद्वद्भिरभियुक्तस्तुलाश्रितः॥ प्रतिमानसमीभूतोरेखांकृत्वावतारि
तः॥ त्वंतुलेसत्यधामासिपुरादेवैर्विनिर्मिता॥ तत्सत्यंवदकल्याणि
संशयान्मांविमोचय॥ यद्यस्मिपापकृन्मातस्ततोमांत्वमधोनय॥ शु
द्धश्चेद्गमयोर्ध्वंमांतुलामित्यभिमंत्र ॥ नारदः॥ समयैःपरिगृह्य
चपुनरारोहयेन्नरं॥ निवर्त्तेदृष्टिरदि रस्यारोप्यपत्रकं॥ समयैः

परिगृह्यशपथैर्नियमय्यतानाहविष्णुः॥ब्रह्मघ्नायेस्मृतालोकाये
लोकाःकूटसाक्षिणः॥तुलाधारस्यतेलोकातुलांधारयतोमृषेति॥
पुनरारोहणकालेभिमंत्रणमाहनारदः॥त्वंवेत्ससर्वलोकानांपापानि
सुकृतानिच॥त्वमेवदेवजानीषेनविदुर्यानिमानवाः॥व्यवहाराभिश
स्तोयंमानवस्तोल्यतेत्वयि॥तदेनंसंशयारूढंधर्मतस्त्रातुमर्हसि॥
देवासुरमनुष्याणांसत्येत्वमतिरिच्यसे॥सत्यसंधोसिभगवान्शु
भाशुभविभावने॥आदित्यचंद्रावनिलोऽनलश्चद्यौर्भूमिरापोहृदं
यमश्च॥अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति॥पि
तामहः॥ज्योतिर्विद्ब्राह्मणःश्रेष्ठःकुर्यात्कालपरीक्षणं॥विनाड्यःपंच
विज्ञेयाःपरीक्षाकालकोविदैः॥साक्षिणोब्राह्मणश्रेष्ठायथादृष्टार्थवा
दिनः॥ज्ञानिनःशुचयोऽलुब्धानियोक्तव्यानृपेणतु॥शृण्वंतिसाक्षिणः
सर्वेशुद्ध्यशुद्धीनृपेतदा॥विनाड्यःपलानि॥दशगुर्वक्षरःप्राणःषट्प्रा
णाःस्याद्विनाडिकेतिस्मृतेः॥नारदः॥तुलितोयदिवर्द्धेतविशुद्धःस्या
न्नसंशयः॥समोवाहीनमानोवानविशुद्धोभवेन्नरः॥वृद्धिरूर्ध्वगतिः
॥हानिरधोगतिः॥पितामहः॥अल्पपापःसमोज्ञेयोबहुपापस्तुहीय
ते॥अल्पत्वंसकृदमतिकृतत्वेन॥यत्रतुशिरःस्थापिवचनेनैवसकृ
दमतिकृतत्वनिश्चयःपापमात्रेचप्रतिपत्त्याचदिव्येकृतेसमत्वातद्दो
षाल्पत्वासंभवात्पुनःकरणमतएवबृहस्पतिः॥नत्समस्तुपुनस्तोल्यो
वर्द्धितोविजयीभवेदिति॥पुनःकरणेकारणांतरमाहकात्यायनः॥शि
क्यच्छेदेतुलाभंगेतथाचापिगुणस्यवा॥शुद्धेश्चसंशयेचैवंपरीक्षेत
पुनर्नरं॥व्यासः॥कक्षच्छेदेतुलाभंगेघटकर्कटयोस्तथा॥रज्जुच्छेदे
क्षभंगेवादद्यात्शुद्धिंपुनर्नृपः॥इदंतुदृष्टकारणकभंगपरं॥आकस्मि
कभंगादौत्वशुद्धएव॥कक्षच्छेदेतुलाभंगेघटकर्कटयोस्तथा॥रज्जु
च्छेदेक्षभंगेवातथैवाशुद्धिमादिशेदितिस्मृत्यंतरात्॥कक्षंशिल्पतलं
अक्षःस्तंभोपरिस्थापितःतुलाधारः॥आवृत्तिस्तोलनमात्रस्यनसां
गप्रयोगस्येतिप्राच्याः॥एवंतुवैगुण्यपरिहारात्सांगःप्रयोगआवर्त
नीयइतिमदनः॥अथप्रयोगः॥कर्ताशुभेन्हिपूर्वाह्णेपूर्वोक्तान्यतमवृ
क्षसमीपेगत्वाओषधेत्रायस्वैनमितिमंत्रेणवृक्षंछित्त्वासोमोधेनुंगौ

तमः सोमस्त्रिष्टुप्जपेविनियोगः॥सोमोधेनुं॥वनस्पतेगाथिनो
विश्वामित्रोवनस्पतिस्त्रिष्टुप्जपे॰ वनस्पतेशतवल्शोइतिजप्त्वा
इंद्रादिलोकपालान्प्रत्येकंनत्वाचतुर्हस्तांदीर्घांचतुरंगुलस्थूलांच
तुरस्रांमध्येतयोश्चतुरंगुलवृत्तांमध्यउपभागे तयोश्चाधोभागेच
त्रिभिःकर्कटैःकटकैर्वायुतांतुलांकुर्यात्॥ततःसप्तहस्तांपंचहस्तां
वाचतुरंगुलोन्नतांवेदिंचकुर्यादितिकेचित्॥ततस्तस्यांमुनिदेशांत
रेवाचतुरस्रंषड्हस्तंषड्हस्ताधिकांशकृतचूडंस्तंभद्वयंहस्तद्वयंभू
मौनिखेयं॥भूमेरुपरिहस्तचतुष्टयंचूडांशश्चाधिकःस्तंभांतरंतु
हस्तद्वयंसार्द्धहस्तंवा॥तच्चूडयोर्मध्येऽधोभागेलौहकर्कटकटक
वडिशाद्याकारतुलावलंबनयुतंकाष्ठंनिवेश्यंतस्मिंस्तुलास्थाप
रितनकर्कटवडिशादिनावलंबनीयाप्रांतयोश्चफलकद्वयंतिस्रभि
स्तिस्रभीरज्जुभिर्बंधनीयं॥तुलायाःप्राच्यांहस्तद्वयांतरालेदक्षिणो
त्तरयोःस्तंभद्वयंनिखायतयोरुपर्युत्तरंगकाष्ठंदद्यात्॥तदेतत्तोर
णं॥तच्चघटाद्दशांगुलोच्चं॥एतादृशंपश्चिमायामपिकार्यं॥तोरणा
भ्यामधोलंबमानौमृन्मयौसूत्रसंबद्धौगोलकरूपावक्लवौतुलाप्रां
तस्पृशौकार्यौसाम्यज्ञानायफलकयोश्चप्रागग्रान्कुशान्स्तृणीया
त्॥ततःकृतैकोपवासंशक्तोमहाभियोगेवाकृतोपवासत्रयंरवि
वारेसूर्योदयोत्तरंसचेलस्नातंशोध्यंकृतैकोपवासःप्राड्विवाकःप
श्चिमेशिक्यआरोप्यपूर्वशिक्येपाषाणेष्टकामृदाधोरोप्यसमंतोलये
त्॥तत्परीक्षामुदकप्रक्षेपादिनासत्यवादिनोविप्राहेमकाराश्चकुर्युः
॥ततस्तोलनकालेयेनसन्निवेशेनोपविष्टंतत्संनिवेशज्ञानायतादृशीं
रेखांकृत्वातमवतारयेत्॥ततःशोध्योदेशकालौसंकीर्त्यात्मशुद्धिज्ञा
पनायामुकदिव्यंकरिष्यइतिसंकल्प्यप्राड्विवाकमेकंचतुरोऋत्विज
श्चवस्त्रादिनावृणुयात्॥स्वस्तिवाचनाद्यपिकार्यमितिस्मार्त्तमित्ति
भट्टाचार्याः॥प्राड्विवाकश्चप्रांजलिःसत्पूर्वनाद ॐ एह्येहिभगवन्धर्मअ
स्मिन्दिव्येसमाविश॥सहितोलोकपालैश्चवस्वादित्यमरुद्गणैरिति॥ए
वंधटेधर्ममावाह्यपश्चाद्दंगदेवताआवाहयेत्॥इंद्रंविश्वामाधुच्छंद
सइंद्रोनुष्टुप्॥इंद्रावाहनेविनियोगः॥एवंसर्वत्रविनियोगः॥ॐइंद्रं

विष्वाइंद्र इहागच्छ इह तिष्ठेति पूर्वे इंद्रमावाह्य पीतं ध्यायेत्॥ यमा
य सोमं यमोनुष्टुप्॥ ॐ यमाय सोमं॥ यम इहागच्छ इह तिष्ठेति दक्षि
णे यममावाह्य श्यामं ध्यायेत्॥ राजाधिराज्ययेति यजुषा कुबेर इ
हागच्छ इह तिष्ठेति उत्तरे कुबेरमावाह्य स्वर्णाभं ध्यायेत्॥ त्वंनोवाम
देवो वरुणस्त्रिष्टुप्॥ ॐ त्वन्नो अग्ने व०॥ वरुण इहागच्छ इह तिष्ठेति प
श्चिमे वरुणमावाह्य स्फटिकाभं ध्यायेत्॥ अग्निमेधातिथिरग्निर्गा
यत्री॥ अग्निंदूतं॥ अग्ने इहागच्छ इह तिष्ठेति आग्नेये अग्निमावाह्य सु
वर्णवर्णं ध्यायेत्॥ मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री॥ ॐ मोषुणः
इत्यावाह्य श्यामं ध्यायेत्॥ तव वायो व्यश्वो वायुर्गायत्री॥ तव वायः
इहेति पूर्ववत्॥ धूम्रं ध्यायेत्॥ तमीशानं गौतम ईशानो जगती॥
ॐ तमीशानं। इहेत्यावाह्य रक्तं ध्यायेत्॥ इंद्राद्दक्षिणतः ज्मयाअ
त्र वसवो मैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप्॥ ज्मया अत्र वसव इहा
गच्छतेत्यष्टौ वसून्॥ धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः॥ इंद्रेशानमध्ये त्यान्नु सा
मदो मत्स्यो द्वादशादित्या गायत्री॥ त्यान्नु क्षत्रियान्॥ इत्यादि द्वादशा
दित्यानावाह्य॥ धातार्यमा च मित्रश्च वरुणोंशो भगस्तथा॥ इंद्रो
विवस्वान्पूषा च पर्जन्यो दशमस्तथा॥ ततस्त्वष्टा ततो विष्णुरजघ
न्यो जघन्यजः॥ इत्येते द्वादशादित्या नामभिः परिकीर्तिताः॥ अग्ने
पश्चिमे॥ आरुद्रासः श्यावाश्व एकादशरुद्रा जगती॥ आरुद्रासः इ
हेति रुद्रानावाह्य॥ वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः॥ अ
जैकपादहिर्बुध्न्यः पिनाकी चापराजितः॥ भुवनाधीश्वरश्चैव कपाली
च विशांपतिः॥ स्थाणुर्भगश्च भगवान्रुद्रा एकादश स्मृताः॥ यमनि
र्ऋतिमध्ये ब्रह्मजज्ञानं गौतमो वामदेवो ब्रह्मा त्रिष्टुप्॥ ॐ ब्रह्मजज्ञानं
॥ इहेत्यादि ब्रह्माणमावाह्य॥ मातर इहागच्छत इह तिष्ठतेति मातॄरावा
ह्य॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथेंद्राणी
चामुंडाः सप्त मातरः॥ निर्ऋतेरुत्तरतः॥ गणानां त्वा गृत्समदो गणा
धिपतिर्जगती॥ ॐ गणानां त्वा इहेत्यादि गणेशं॥ वरुणादुत्तरे मरु
तो यस्य राहूगणो मरुतो गायत्री॥ ॐ मरुतो यस्य इहेत्यादि मरुतः

गगनस्पर्शनोवायुरनिलोमारुतस्तथा॥प्राणःप्राणेशजीवौचमरुतो
ष्टौप्रकीर्त्तिताः॥घटादुत्तरेजातवेदसेकश्यपोदुर्गात्रिष्टुप्॥ॐजातवे
दसेइहेतिदुर्गां॥एवमेतादेवताआवाह्यपूजयेत्॥धर्मायार्घ्यंप्रकल्प
यामिनमःइत्यादिप्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयस्ना
नवस्त्रयज्ञोपवीताचमनीयमुकुटकटकादिभूषणानिधर्मायदत्वाइंद्रा
दीनांप्रणवाद्यैःस्वस्वनामभिश्चतुर्थ्यंतनमोंतैरर्घ्यादिभूषणांतप
दार्थानुसमयेनदत्वाधर्मायगंधपुष्पधूपदीपनैवेद्यानिदद्यापूपा
स्तनानिचदत्वाइंद्रादीनांगंधादीनिपूर्ववद्दद्यात्॥गंधपुष्पादीनि
चघटेधर्मपूजायाचरक्तानिकार्याणि॥इंद्रादीनांयथालाभंएतदं
तंप्राड्विवाकःकुर्यात्॥ततश्चतुर्भिर्ऋत्विग्भिश्चतसृषुदिक्षुलौकि
काग्निस्थापनादिपूर्वंहोमःकार्यः॥तत्रसप्रणवांगायत्रीमुच्चार्यपुनः
स्वाहाकारांतंप्रणवमुच्चार्यआज्यचरुसमिधःप्रत्येकमष्टोत्तरश
तंसवित्रेजुहुयुः॥ततोभियुक्तमर्थंपत्रेलिखेदभियुक्तः॥आदित्यचं
द्रावनिलोनलश्चद्यौर्भूमिरापोहृदयंयमश्च॥अहश्चरात्रिश्चउभे
चसंध्येधर्मश्चजानातिनरस्यवृत्तमितिमंत्रंलिखेत्॥अत्रपत्रंसंशो
ध्याभियुक्तशिरोगतंकुर्यात्॥इदंचधर्मावाहनादिशिरःपत्रदानांतं
सर्वदिव्यसाधारणं॥ततःप्राड्विवाकोघटमभिमंत्रयेत्॥त्वंघटब्र
ह्मणासृष्टःपरीक्षार्थंदुरात्मनां॥धकाराद्धर्मभूतस्त्वंटकारात्कुटि
लंनरं॥धृतोभावयसेयस्मात्घटस्तेनाभिधीयसे॥त्वंवेत्सिसर्वभू
तानांपापानिसुकृतानिच॥त्वमेवदेवजानीषेनविदुर्यानिमानवाः
॥व्यवहाराभिशस्तोयंमानुषःशुद्धिमिच्छति॥तदेनंसंशयादस्माद्धर्म
तस्त्रातुमर्हसीतिमंत्रेण।ततोभियुक्तःसत्यधामासिपुरादेवैर्विनि
र्मिता॥तत्सत्यंवदकल्याणिसंशयान्मांविमोचय॥यद्यहंपापकृन्मा
तस्ततोमांत्वमधोनय॥शुद्धश्चेद्गमयोर्ध्वंमांइतितुलामभिमंत्रये
त्॥ततःप्राड्विवाकःशिरोगतपत्रकंअभियुक्तंयथास्थानंयथासंनि
वेशंचघटमारोप्यपंचपल्लवंतत्रैवस्थापयेत्॥तस्मिंश्चकालेशु——
द्ध्यशुद्धीपरीक्ष्यशुचिभिर्ब्राह्मणैराज्ञेसभ्येभ्यश्चनिवेदनीये॥ततस्त
तोव्रतीयेप्राड्विवाकब्रह्मर्त्विजोयथाविभवंदक्षिणादिभिस्तोषयेत्।

तत्तोदेवताः उत्तिष्ठब्रह्मणस्पते॥ यांतुदेवगणाइतिविसृज्यसर्वंआ
चाकायसमर्पयेत्॥ अथाग्निविधिः॥ पितामहः॥ अग्नेर्विधिंप्रवक्ष्या
मियथावच्छास्त्रचोदितं॥ कारयेन्मंडलान्यष्टौपुरस्तान्नवमंतथा॥
आग्नेयंमंडलंचाद्यंद्वितीयंवारुणंतथा॥ तृतीयंवायुदैवत्यंचतुर्थंय
मदैवतं॥ पंचमंत्विंद्रदैवत्यंषष्ठंकौबेरमुच्यते॥ सप्तमंसोमदैवत्यंसा
वित्रंत्वष्टमंतथा॥ नवमंसर्वदैवत्यमितिवेदविदोविदुः॥ मदनर
अष्टमंसर्वदैवतं॥ पुरस्तान्नवमंयत्तुतन्महत्सार्थिवंविदुः॥ गोमये
तानिस्युरद्भिःपर्युक्षितानिचेतिपपाठ॥ मंडलपरिमाणमाहसएव॥
त्रिंशदंगुलंप्राहुर्मंडलान्मंडलांतरं॥ अष्टभिर्मंडलैरेवमंगुलानांशतद्वयं
॥ षट्पंचाशत्समधिकंभूमेस्तुपरिकल्पना॥ मंडलान्मंडलादेःमंड
लभुवोंतरालभुवनश्चमिलिताद्वात्रिंशदंगुलानीत्यर्थः॥ तत्रषोड
शांगुलंमंडलमंडलयोरंतरालंचतावदेवषोडशांगुलकंज्ञेयंमंडल
तावदंतरमितियाज्ञवल्क्योक्तेः॥ यदिशोध्यपदंषोडशांगुलाधिकं
दंतरालंषोडशांगुलन्यूनमेवभवति॥ यदिशोध्यपदंषोडशांगुलाद
ल्पंतदाषोडशांगुलंमंडलमध्येपदपरिमाणमवांतरमंडलंकार्यं॥
यत्तुनारदस्यवशतद्वयमित्यस्याग्रेचत्वारिंशत्समधिकंभूमेरंगुल
मानतइतिपपाठ॥ तदष्टमनवममंडलांतरालभूभागंविहायवो
ज्यं॥ तस्यगमनानर्हत्वात्॥ एवंचतुर्विंशतिराख्याताभूमेस्तुपरि
कल्पनेतिकल्पनसूक्तेपिपाठेप्याद्यमवस्थितिमंडलंविहायांगुल
परिमाणंयोज्यं॥ मंडलेमंडलेदेयाःकुशाःशास्त्रप्रचोदिताः॥ विन
सेच्चपदांतेषुकर्त्तानित्यमितिस्थितिः॥ मिताक्षरायांमदनरत्नेच॥
स्यर्थंजुहुयादग्नौघृतमष्टोत्तरंशतं॥ अयंचहोमोऽग्नयेपावकाय
स्वाहेतिमंत्रेणकार्यइतिविज्ञानेश्वरः॥ नारदः॥ जात्यैवलोहकारो
यःकुशलश्चाग्निकर्मणि॥ इष्टप्रयोगश्चान्यत्रतेनायोग्नौप्रतापये
त्॥ अग्निवर्णमयःपिंडंसस्फुलिंगंसुरक्षितं॥ पितामहः॥ अग्नि
नैसमंकृत्वाअष्टांगुलमयोमयं॥ पिंडंतुपातयेदग्नौपंचाशत्पलि
समं॥ कालिकापुराणे॥ शताईपलिकंवृत्तंद्वादशांगुलमायतं॥ लो
हमग्निमयंध्मातंदेयंराज्ञाःभिशापिने॥ शंखलिखितौतुपिंडस्य

डशपलत्वमाहतुः॥ अथवासप्ताश्वत्थपत्रांतरितं षोडशपलमग्निवर्णं
पिंडमंजलिनादायेत्यादि॥ एतच्चाशक्तौ॥ तृतीयतापेतव्यंतमिति
नारदोक्तेस्त्रिवारंपिंडःसंताप्यः॥ तत्रसंताप्यजलेक्षिप्त्वापुनःसंता-
प्यजलेक्षिप्त्वापुनस्ताप्यमानेप्राड्विवाकोधर्मावाहनादिशिरःपत्रारो
पणांतंकुर्यात्॥ तत्रवन्हिपूजायांविशेषमाहपितामहः॥ तत्रपूजा
हुताशस्यकारयेन्मनुजाधिपः॥ रक्तचंदनधूपाभ्यांरक्तपुष्पैस्तथैव
च॥ हारीतः॥ प्राङ्मुखस्कृतस्तिष्ठेत्प्रसारितकरांगुलिः॥ आर्द्रवासाः
शुचिश्चैवशिरस्यारोप्यपत्रकं॥ शोध्यइतिशेषः॥ नारदः॥ हस्तक्षते
षुसर्वेषुकुर्याद्धंसपदानितु॥ तान्येवपुनरालक्ष्येद्धस्तौबिंदुविचित्रितौ
॥ याज्ञवल्क्यः॥ करौविमृदितव्रीहेर्लक्षयित्वाततोन्यसेत्॥ सप्ताश्वत्थ
स्यपत्राणितावत्सूत्रेणवेष्टयेत्॥ तावदितिक्रियाविशेषणं॥ तेनसप्त
वारंवेष्टयेदितिविज्ञानेश्वरादयः॥ तावतासूत्राणांसमाहारस्तावत्सू
त्रं॥ तेनतावत्सूत्रेणसप्तसूत्र्यासकृद्वेष्टयेदित्यर्थइतिमदनः॥ पिता
महः॥ सप्तपिप्पलपत्राणिअक्षतान्सुमनोदधि॥ हस्तयोर्निक्षिपेत्त
त्रसूत्रेणवेष्टनंतथा॥ अत्रप्राड्विवाकस्यपिंडस्याग्न्यभिमंत्रणमं
त्राःप्रयोगेवक्ष्यंते॥ याज्ञवल्क्यः॥ त्वमग्नेसर्वभूतानामंतश्चरसिपा
वक॥ साक्षिवत्पुण्यपापेभ्योब्रूहिसत्यंकवेमम॥ तस्येत्युक्तवतोलो
हंपंचाशत्पलिकंसमं॥ अग्निवर्णंन्यसेत्पिंडंहस्तयोरुभयोरपि॥ पि
तामहः॥ ततस्तंसमुपादायधर्मराजपरायणः॥ संधायेननियुक्तोवा
हस्तयोस्तस्यनिक्षिपेत्॥ नारदः॥ हस्ताभ्यांतंसमादायप्राड्विवाक
समीरितः॥ स्थित्वैकस्मिंस्ततोन्यानिव्रजेत्सप्तत्वजिह्मगः॥ पितामहः
॥ त्वरमाणोनगच्छेत्तुस्वस्थोगच्छेच्छनैःशनैः॥ नमंडलंव्यतिक्रामे
न्नांतरास्थापयेत्पदं॥ अष्टमंमंडलंगत्वानवमेनिक्षिपेद्बुधइति॥ पिं
डस्तुसतृणेनवममंडलेनिक्षेप्यः॥ मंडलानितथासप्तषोडशांगुल
मानतः॥ तावदंतरतोगच्छेद्गत्वानवतृणेक्षिपेत्॥ कालिकापुराणात्॥
पितामहः॥ ततस्तद्धस्तयोःप्रास्येद्व्रीहीन्वापदिवायवान्॥ निर्विशंकेन
तेषांतुहस्ताभ्यांमर्दनेकृते॥ निर्विकारेदिनस्यांतेशुद्धिंतस्यविनिर्दिशे
त्॥ कात्यायनः॥ प्रस्खलन्स्यभियुक्तश्चेत्स्थानादन्यत्रदह्यते॥ नतद्

यं विदुर्देवास्तस्य भूयोपि दापयेत्॥ याज्ञवल्क्यः॥ अंतरा पतिते पिंडे सं
देहे वा पुनर्हरेत्॥ अथ प्रयोगः॥ पूर्वेद्युर्भूशुद्धिं विधाय परेद्युर्नवमंडलानि
कार्याणि। तत्राद्यं षोडशांगुलं विधायाऽग्नेर्द्वात्रिंशदंगुलं भूभागं हित्वा वि
मन्यद्वितीयभागे गत्पदप्रमाणं द्वितीयं मंडलं कार्यं॥ अवशिष्टमंतरा
लं भवति॥ एवमेव तृतीयाद्यष्टमपर्यंतमंतरालसहितं निर्वर्त्याग्रे षोडशां
गुलमंतरालं मुक्त्वा नवमं परिमितांगुलप्रमाणं कार्यं॥ तथा चाष्टानां मंडला
नामंतरालं च मिलित्वांगुलानां षट्पंचाशदधिकं शतद्वयं संपद्यते॥ ति
र्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः॥ प्रमाणमंगुलस्योक्तं वितस्ति
र्द्वादशांगुलः॥ हस्तौ वितस्तिद्वितयं दंडो हस्तचतुष्टयं॥ तत्सहस्रद्वयं
क्रोशो योजनं तच्चतुष्टयं॥ वितस्त्याद्युत्तरन्नोपयोक्ष्यते॥ ततः पश्चिमादि
षु नवसु मंडलेष्वधिदेवताः क्रमेणाग्निं वरुणं वायुं यममिंद्रं कुबेरं सोमं
सवितारं सर्वदेवतांश्च संपूज्य मंडलभूभागाद्दक्षिणप्रदेशे लौकिकम
ग्निमुपसमाधायाग्नये पावकाय स्वाहेत्याज्येनाष्टोत्तरशतं जुहुयात्प्रा
ड्विवाकः शांत्यर्थं॥ ततस्तस्मिन्नग्नावस्त्ररहितं वृत्तं श्लक्ष्णमष्टांगुला
यामं पंचाशत्पलसम्मितमयः पिंडं प्रक्षिप्य तस्मिंस्ताप्यमाने धर्मा
वाहनादिहनांतं धटविध्युक्तमनुष्ठानकांडं कृत्वानुतीर्थे तापे वर्त्तमानेऽयः
पिंडस्थमग्निमभिमंत्रयेदेभिर्मंत्रैः प्राड्विवाकः॥ त्वमग्ने वेदाश्चत्वारस्त्वं
च यज्ञेषु हूयसे॥ त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनां॥ जठरस्थो
हि भूतानां ततो वेत्सि शुभाशुभं॥ पापं पुनासि वै यस्मात्तस्मात्पावक उ
च्यते॥ पापेषु दर्शयात्मानं अर्चिष्मान्भव पावक॥ अथवा शुद्धभावेषु
शुद्धो भव हुताशन॥ त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्॥ त्वमे
व देव जानीषे न विदुर्यानि मानवाः॥ व्यवहाराभिशस्तोयं मानवः शुद्धि
मिच्छति॥ तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसीति॥ लोहस्त्वयं सु
तप्तलोहपिंडमुदके निक्षिप्य पुनः संताप्योदके निक्षिप्य पुनः संतापनं
तृतीयस्तापः॥ एवमभिमंत्रितं सुतप्तमग्निवर्णमयः पिंडं संदंशेन गृही
त्वा प्राड्विवाक उपोषितस्य स्नातस्यार्द्रवाससा शिरो बद्ध प्रतिज्ञापत्र
स्य पश्चिमे मंडले तिष्ठतो दिव्यकर्तुः पुरत उपनीय॥ त्वमग्ने सर्वभूता ना
मंतश्चरसि पावक॥ साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम इति दिव्य

कर्त्राभिमंत्रितं तस्य कृतसंस्कारयोर्हस्तयोर्निक्षिपेत्।। कृतसंस्कारयो
र्व्रीहीन्मर्दयित्वांजलीकृतयोस्तिलकालव्रणकिणादिस्थानेष्वलक्त
करसादिनांकयित्वा समानाश्वत्थस्य पत्राणि अलाभेर्कपत्राणि सप्त
शमीपत्राणि सप्तदूर्वापत्राणि अक्षतान्दध्यक्ताः स्रक्पुष्पाणि च वि
न्यस्य सप्तभिः शुक्लसूत्रैः सप्तकृत्वा वेष्टितयोः। ततो दिव्यकर्त्ता द्वितीया
दीन्यष्टमांतानि मंडलेष्वेव पदं निक्षिपन्सप्तपदानि शनैर्गत्वांजलिस्थ
मयःपिंडं सतृणे नवमे निक्षिपेत्।। ततः पुनः कराभ्यां व्रीहीन्संघृष्याद
ग्धहस्तश्चेच्छुद्धो भवति।। इत्यग्निदिव्यविधिः।। अथ जलविधिः।। पि
तामहः।। तोयस्यातः प्रवक्ष्यामि विधिं धर्म्यं सनातनं।। मंडलं धूपदीपा
भ्यां कारयेत विचक्षणः।। शरान्संपूजयेद्वस्त्रवैणवं च धनुस्तथा।। मं
गलैः पुष्पधूपैश्च ततः कर्म समाचरेत्।। धूपदीपाभ्यां शरान्संपूजये
दित्यन्वयः।। पूजा च मंडले कार्या।। धनुःपरिमाणमाह नारदः।। क्रूरं ध
नुः सप्तशतं मध्यमं षट्शतं स्मृतं।। मंदं पंचशतं ज्ञेयमेष ज्ञेयो धनुर्वि
धिः।। मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयं।। हस्तानां तु शते सार्द्धे लक्ष्यं
कृत्वा विचक्षणः।। सप्तशतं सप्ताधिकशतांगुलं।। एवं षट्शतं पंच
शतं च।। कात्यायनः।। शरांश्चानायसाग्रांश्च प्रकुर्वीत विशुद्धये।। वेणु
कांडमयांश्चैव सेक्ता तु सुदृढं क्षिपेत्।। नारदः।। गत्वा तु तज्जलस्थानं त
टे तोरणमंडिते।। कुर्वीत कार्यमात्रं तु भूमिभागे समे शुचौ।। गंधमा
ल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः।। सतोरणाय कुर्वीत पूजामादौ स
माहितः।। ब्राह्मणः क्षत्रियो वैश्यो रागद्वेषविवर्जितः।। नाभिमात्रे जले
स्थाप्यः पुरुषः स्थाणुवद्बली।। पितामहः।। स्थापयेत्स्वयमंतोये संभवत्पु
रुषं नृपः।। आगतं प्राङ्मुखं कृत्वा तोयमध्येनुकारिणं।। ततस्त्वावाहये
द्देवान्सलिलं चानुमंत्रयेत्।। देवान्धर्मादीन्। धर्मावाहनादिशिरःपत्रारो
पणांतं कुर्यादित्यादि।। अनुमंत्रणमंत्राः प्रयोगे द्रष्टव्याः।। व्यासः।। सत्ये
न माऽभिरक्षस्त्वं वरुणेत्यभिशाप्य कं।। नाभिदघ्नोदकस्थस्य गृहीत्वा रु
जलं विशेत्।। कमुदकमभिशाप्याभिमंत्र्येत्यर्थः।। बृहस्पतिः।। अनुप्र
वेश्य पुरुषं प्रक्षिपेत्सायकत्रयं।। पितामहः।। क्षेप्ता तु क्षत्रियः कार्यस्तद्वृत्ति
र्ब्राह्मणोपि वा।। अक्रूरहृदयः शांतः सोपवासस्तथा शुचिः।। क्षिप्तेषुमज्ज

नंकार्यंगमनंसमकालिकं॥मज्जनसमकालिकमित्यर्थः॥नारदपि
तामहौ॥शरप्रक्षेपणस्थानाद्युवाजवसमन्वितः॥गच्छेत्तरमथा
शक्त्यायुक्तसोमध्यमःशरः॥मध्यमंशरमादायपुरुषोन्यस्तथाविधि
॥प्रत्यागच्छेत्तुवेगेनयतःसपुरुषोगतः॥आगतस्तुशरग्राहीनपश्य
तितथाजले॥अंतर्जलगतंसम्यक्तदाशुद्धंविनिर्दिशेत्॥अन्यथान
विशुद्धःस्यादेकांगस्यापिदर्शनात्॥स्थानाद्वान्यत्रगमनाद्यस्मिन्पूर्वं
निवेशितः॥एकांगस्येतिकर्णपरं॥तथाचकात्यायनः॥शिरोमात्रंतुदृ
श्येतनकर्णौनापिनासिका॥अप्सुप्रवेशनेयस्यशुद्धंतमपिनिर्दिशे
त्॥पितामहः॥शरस्यपतनंग्राह्यंसर्पणंपरिवर्जयेत्॥नारदः॥पंचा
शतोधावकानांयौस्यातामधिकौजवे॥तौचतत्रनियोक्तव्यौशरान
यनकारणात्॥अथप्रयोगः॥जलस्थानंनदीसागरह्रददेवखातं
सरस्तडागादिस्थिरतोयंयोज्यं॥अल्पमाहार्यंतृणशैवालोर्मिपंक
ग्राहजलूकमत्स्यादियुक्तंशीघ्रवेगमित्यादिवर्ज्यं॥तत्रनाभिदघ्ने
जलेयज्ञियवृक्षोद्भवास्थूणाकार्या॥तत्सन्निधौपश्चिमतीरदेशेशे
ध्यकर्णोच्छ्रितंतोरणंकार्यं॥तत्समीपेषडुत्तरंनवांगुलंवैणवंधनु
रानीयसाग्रावेणवास्त्रयःशराश्चस्थाप्याः॥तोरणात्सार्द्धशतहस्तमि
तेसुदेशेलक्ष्यंस्थाप्यं॥ततःसशरंधनुःश्वेतगंधमाल्यादिभिःसंपूज्य
जलाशयेवरुणमावाह्यपूजयित्वातत्तीरेधर्मावाहनादिहवनांतंपूर्वो
क्तंनिर्वर्त्यशोध्यशिरसिप्रतिज्ञापत्रमावध्यप्राड्विवाकोजलमभिमं
त्रयेदेवं॥तोयत्वंप्राणिनांप्राणःसृष्टेराद्यंतुनिर्मितं॥शुद्धेश्चकारणंप्रो
क्तंद्रव्याणांदेहिनांतथा॥अतस्त्वंदर्शयात्मानंशुभाशुभ परीक्षण
इति॥ततःशोध्योपि॥सत्येनमाऽभिरक्षत्वंवरुणेत्यभिमंत्रयेत्॥
ततोवस्त्रबद्धधर्मस्थूणस्यप्राङ्मुखस्यनाभिदघ्नोदकावस्थितस्यब
लीयसःपुरुषस्यसमीपंगच्छेच्छोध्यः॥ततोधनुःस्थानात्क्षत्रिय
स्तद्वृत्तिर्ब्राह्मणोवानायसाग्रान्त्रीन्शरान्लक्ष्यंप्रतिसुदृढंक्षिपे
त्॥ततएकस्मिन्जविनिपुरुषेमध्यमंशरंगृहीत्वातस्यप्रसर्पण
स्थानंविहायपतनस्थानेस्थितेन्येनजविनाशरमोक्षस्थानेतोरण
मूलेस्थातव्यं॥जवीचपंचशतोधावकानांमध्येजवाधिकः॥ततः

रणमूलस्थितेनप्राड्विवाकेनकरतालिकात्रयेदत्तेतृतीयकरतालिकास
मकालमेवशोध्यतोरणमूलस्थजविभ्यांमज्जनन्तुततरगमनेकार्यं॥
मज्जनंचावष्टभ्यधर्मस्थूणस्योरुग्राही वाकार्यं॥ततस्तस्मिन्मध्य
मशरपातस्थानंगतेतत्रस्थितःशरग्राहीद्रुततरंतोरणंगत्वाजलांतर्गतं
शोध्यंपश्यसौपश्यतितदासौशुद्धः॥शिरोमात्रदर्शनेपिशुद्धोनकर्णाद्यं
गांतरदर्शनेनिमज्जस्थानादन्यत्रगतेवा॥इत्युदकविधिः॥अथविष
दिव्यविधिः॥तत्रनारदः॥दद्याद्विषंसोपवासोदेवब्राह्मणसंनिधौ॥धूपो
पहारमंत्रैश्चपूजयित्वामहेश्वरं॥द्विजानांसन्निधावेवदक्षिणाभिमु
खेस्थिते॥उदङ्मुखःप्राङ्मुखोवादद्याद्विप्रःसमाहितः॥तत्परिमाण
माहसएव॥वर्षेचतुर्यवामात्राग्रीष्मेपंचयवास्मृता॥हेमंतेसासप्त
यवाशरद्यल्पाततोपिहि॥अल्पात्रियवा॥हेमंतःशिशिरस्याप्युपल
क्षकः॥तयोःसमासश्रुतेः॥वसंतस्तुसर्वदिव्यसाधारण्येनप्राप्तएव॥
तत्रापिसप्तयवामात्रेतिविज्ञानेश्वरः॥विषंचत्रिंशद्गुणघृतप्लुतंदेयं
॥पूर्वाण्हेशीतलेदेशेविषंदेयंतुदेहिनां॥घृतेनयोजितंसम्यक्पिष्टं
त्रिंशद्गुणान्वितमितिकात्यायनोक्तेः॥विषाभिमंत्रणमाह॥याज्ञव
ल्क्यः॥विषत्वंब्रह्मणःपुत्रःसत्यधर्मेव्यवस्थितः॥त्रायस्वास्मादभी
शापात्सत्येनभववमेऽमृतं॥नारदः॥छायानिवेशितोरक्ष्योदिनशेषम
भोजनः॥विषवेगक्रमातीतःशुद्धोसौमनुरब्रवीत्॥विषपरिमाणबा
हुल्येत्ववध्यंतरमाहसएव॥पंचतालशतंकालंनिर्विकारोभवेद्यदा
॥तदाभवतिसंशुद्धस्ततःकुर्याच्चिकित्सितमिति॥विषवेगश्चविषतंत्रे
॥वेगोरोमांचमाद्योरचयतिविषजःस्वेदवक्त्रोपशोषौतस्योर्ध्वंस्त
त्परौद्वौवपुषिजनयतोवर्णभेदप्रवेपौ॥योवेगःपंचमोसौनयनविव
शतांकंठभंगंचहिक्कांषष्ठोनिश्वाससंमोहौवितरतिचमृतिंसप्तमोभक्ष
कस्य॥ अत्रसोपवासेनप्राड्विवाकेनमहादेवाग्रेविषंसंस्थापितंभक्ष
येदिति॥ अथकोशः॥पितामहः॥भक्तोयोयस्यदेवस्यपाययेत्तस्य
तज्जलं॥समभावेतुदेवानांआदित्यस्यतुपाययेत्॥दुर्गायाःपायये
च्चोरान्येचशस्त्रोपजीविनः॥भास्करस्यतुयत्तोयंब्राह्मणंतत्रपाय
येत्॥बृहस्पतिः॥यद्भक्तःसोभियुक्तःस्यात्तद्देवायुधमंडलं॥प्रक्षाल्य

पाययेत्तस्माज्जलात्तु प्रसृतित्रयं॥नारदः॥तमाहूयाभिशस्तं तु मंडल
भ्यंतरे स्थितं॥आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयं॥पूर्वोक्तेन
विधानेन स्नातमार्द्रांबरं शुचिं॥ अर्चयित्वा तु तं देवं प्रक्षाल्य सलिलेन
तु॥एनश्च श्रावयित्वा तु पाययेत्प्रसृतित्रयं॥अत्र सोपवासः प्राड्विव
कः पूर्वाह्णे देवमभ्यर्च्य तत्स्नानोदकं गृहीत्वा धर्मावाहनादि शिरःप
त्रारोपणांतं कृत्वा जलादिव्योक्तमंत्रेण तज्जलमभिमंत्रयेत्॥शो
पितदुक्तेनैवाभिमंत्र्य भक्षयेदिति॥बृहस्पतिः॥सप्ताहाद्द्विसप्ता
द्यस्यार्तिर्न प्रदृश्यते॥ पुत्रदारधनानां च स शुद्धः स्यान्न संशयः॥अ
तंडुलविधिः॥पितामहः॥तंडुलानां प्रवक्ष्यामि विधिं लक्षणबोधितं
चौर्ये तु तंडुला देया नान्यत्रेति विनिश्चयः॥ तंडुलान्कारयेच्छुक्लान्
शालेर्नान्यस्य कस्यचित्॥मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचि
॥स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत्॥आवाहनादि पूर्वं तु
त्वा रात्रौ विधानतः॥ कात्यायनोपि॥ देवतास्नानपानीयदिग्धतंडु
लभक्षणे॥मुखान्निष्ठीवनाच्छुद्धो नियम्योऽशुचिरन्यथा॥पितामहः॥
शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति॥गात्रं च कंपते यस्य तमशु
द्धं विनिर्दिशेत्॥अथ तप्तमाषविधिः॥पितामहः॥ तप्तमाषस्य वक्ष्या
मि विधिमुद्धारणे शुभं॥कारयेदायसं पात्रं मानेवा षोडशांगुलं॥चतु
रंगुलखातं तु मृन्मयं वापि मंडलं॥पूरयेद्घृततैलाभ्यां विंशत्या च प
लैस्तु तत्॥ सुवर्णमाषकं तस्मिन्सुतप्ते निक्षिपेन्नतः॥अंगुष्ठांगुलिय
गेन तप्तमाषकमुद्धरेत्॥ कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते॥शु
द्धो भवति धर्मेण निर्विकारकरांगुलिः॥प्रकारांतरमाह स एव॥सौव
र्णे राजते ताम्रे आयसे मृन्मयेपि वा॥गव्यं घृतमुपादाय तदग्नौ ता
येच्छुचिः॥सौवर्णीं राजतीं ताम्रीं आयसीं वा सुशोभितां॥सलिलेन
सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकां॥भ्रमद्वीचितरंगाढ्ये अनखस्पर्शगो
चरे॥परीक्षेतार्द्रपर्णेन चुरुकारं सुघोषकं॥ततश्चानेन मंत्रेण स
त्तमभिमंत्रयेत्॥परं पवित्रममृतं घृत त्वं यज्ञकर्मणि॥दह पावक पा
पं त्वं हिमशीतं शुचौ भव॥उपोषितं तु स्नातमार्द्रवाससमागतं॥ग्रा
हयेन्मुद्रिकां तां तु घृतमध्यगतां तथा॥प्रदेशिनीं च तस्यायपरीक्षेतु

परीक्षकाः॥ यस्य विस्फोटका न स्युः शुद्धोसावन्यथा शुचिः॥ अथ फा
लविधिः॥ बृहस्पतिः॥ आयसं द्वादश पलं घटितं फालमुच्यते॥ अष्टां
गुलं भवेद्दीर्घं चतुरंगुलविस्तृतं॥ अग्निवर्णं तु तच्चौरो जिह्वया लेलि
हेत्सकृत्॥ न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते॥ अथ धर्मजवि
धिः॥ पितामहः॥ अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणं॥ हंतॄणां याच
मानानां प्रायश्चित्तार्थिनां नृणां॥ राजतं कारयेद्धर्ममधर्मं सीसकायसं
॥ लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ॥ अभ्युक्ष्य पंचगव्येन गंध
माल्यैः समर्चयेत्॥ सितपुष्पस्तु धर्मः स्यादधर्मः सितपुष्पधृक्॥ ए
वं विधायोपलिप्य पिंडयोस्तौ निधापयेत्॥ गोमयेन मृदा वापि पिंडौ
कार्यौ समंततः॥ मृद्भांडकेऽनुपहते स्थाप्यौ चानुपलक्षितौ॥ उपलिप्ते
शुचौ देशे देवब्राह्मणसन्निधौ॥ आवाहयेत्ततो देवान् लोकपालांश्च पू
र्ववत्॥ धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्॥ यदि पापविमुक्तोहं
धर्मस्त्वायातु मे करे॥ अभियुक्तस्ततश्चैकं प्रगृण्हीताविलंबितं॥ ध
र्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते॥ एवं समासतः प्रोक्तं धर्माधर्मप
रीक्षणं॥ बृहस्पतिः॥ पत्रद्वये लेखनीयौ धर्माऽधर्मौ सिताऽसितौ॥ जी
वदानादिकैर्मंत्रैर्गायत्र्याद्यैश्च सामभिः॥ आमंत्र्य पूजयेद्गंधैः कुसुमै
श्च सितासितैः॥ अभ्युक्ष्य पंचगव्येन मृत्पिंडांतरितौ ततः॥ समोत्कृ
ष्टौ तु मृत्कुंभे स्थाप्यौ चानुपलक्षितौ॥ ततः कुंभात्पिंडमेकं गृण्हीत स
अविलंबितः॥ धर्मे गृहीते शुद्धः स्यात्संपूज्यश्च परीक्षकैः॥ अथ प्रयो
गः॥ पत्रद्वये शुक्लं धर्मं कृष्णमधर्मं पुत्तलरूपं विधाय ओं ह्रीं क्रों हं यं रं
लं वं शं षं हं सों धर्मस्य प्राणा इह प्राणा पुनरपी मं मंत्रं पठित्वा धर्मस्य
जीव इह स्थितः॥ पुनरपि तमेव पठित्वा धर्मस्य सर्वेंद्रियाणि वाङ्म
नो नेत्र श्रोत्र घ्राण प्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इत्यनेन जी
वदानं धर्मप्रतिमायाः कृत्वा गायत्र्यादि साम ज्ञाने नैव नो चेत्सव्याहृ
ति प्रणव गायत्रीं पठित्वा आवाहनादि कृत्वा यथाक्रमं शुक्लकृष्णपु
ष्पाभ्यां धर्माधर्मौ संपूज्य प्रणवेन पंचगव्यमादाय अभ्युक्ष्य शुक्लपुष्प
युक्तं धर्मं कृष्णपुष्पयुक्तं अधर्मं मृत्पिंडद्वये कृत्वा नवे कुंभे स्थापयेत्प्रा
ड्विवाकः॥ ततो धर्मावाहनादि हवनांतं कर्म कृत्वा स मंत्रकं प्रतिज्ञाप

त्रैसंशोध्यशिरस्त्विबध्नीयात्॥शोध्यस्तुयदिपापविशुद्धोहंधर्मस्त्व
यातुमेकरमित्युच्चार्यकुंभात्तयोरेकंगृण्हीयात्॥धर्मेगृहीतेशुद्ध
तिततोदक्षिणांदद्यात्॥अथशपथाः॥मनुः॥सत्येनशपथेद्विप्रंक्षत्रि
यंवाहनायुधैः॥गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः॥बृहस्पतिः॥
सत्यंवाहनशस्त्राणिगोबीजकनकानिच॥देवब्राह्मणपादांश्चपुत्रदा
रशिरांसिच॥एतेचशपथाःप्रोक्ताःस्वल्पेर्थेसुकराःसदा॥साहसेष्व
भिशापेषुदिव्यान्याहुर्विशोधनं॥याज्ञवल्क्यः॥अर्वाक्चतुर्दशादन्हो
यस्यनोराजदैविकं॥व्यसनंजायतेघोरंसशुद्धःस्यान्नसंशयः॥घोरं
महत्॥स्वल्पस्यदेहिनामपरिहार्यत्वादितिमिताक्षरायां॥कात्या
यनोपि॥आचतुर्दशकादन्होयस्यनोराजदैविकं॥व्यसनंजायतेघोरं
सज्ञेयःशपथैःशुचिः॥व्यसनमापत्॥घोरमतिपीडाकरं॥स्वल्पस्य
शरीरधर्मत्वादितिवाचस्पतिमिश्रस्मार्तभट्टाचार्यौ॥पुनःकात्याय
नः॥अथदैवविसंवादेत्रिसप्ताहात्तुदापयेत्॥अभियुक्तंप्रयत्नेनतम
र्थंदंडमेवच॥तस्यैकस्यनसर्वस्यजनस्ययदितद्भवेत्॥रोगाग्निज्ञा
तिमरणंऋणंदाप्योदमंच सः॥ज्वरातीसारविस्फोटगूढास्थिपरिपीडनं
॥नेत्ररुग्गलरोगस्तुतथोन्मादःप्रजायते॥शिरोरुक्भुजभंगश्चदै
विकाव्याधयोनृणां॥दैवविसंवादेज्ञातिमरणादौतस्यैकस्येति॥ते
नदेशव्यापकमर्यादादिव्यावृत्तिः॥अत्रतस्येत्यनेनपूर्वोक्ताभियुक्त
परामर्शादभियुक्तस्यैवरोगादिर्भंगलिंगं॥नतुतत्पुत्रादेः॥सोपिचम
हान्नस्वल्पइतिप्रागेवोक्तं॥नतुज्ञातिरोगादिरिति॥अथदायनि
र्णयोपयोगिस्वत्वं॥तच्चक्रयप्रतिग्रहादिजन्यःशक्तिविशेषः॥तत्का
रणतातुक्रयादीनांलोकव्यवहारादेवगम्यते॥नशास्त्रात्॥तदनभि
ज्ञानामपितद्दर्शनात्॥शास्त्रकल्पनायांगौरवाच्चनयविवेकेभव
नाथोप्येवं॥यत्तुगौतमः॥स्वामीरिक्थक्रयसंविभागपरिग्रहाधिग
मेषुब्राह्मणस्याधिकंलब्धंविजितंक्षत्रियस्यस्वनिर्विष्टंवैश्यशूद्रयोरि
ति॥तल्लोकसिद्धकारणानुवादकं॥स्वामिलब्धांशमात्रेणयत्स्वस्य
भवतितस्मिन्रिक्थमितिप्रयुंजतेलोकाः॥क्रयप्रतिग्रहादिवारयि
तुंमात्रपदं॥अत्रतादृशलब्धांशएवरिक्थपदंशक्तं॥क्रयादिस्वत्वे

पायसमभिव्याहारात्॥नागृहीतविशेषणान्यायाच्च। पितरिजीवति
तद्द्रव्येपुत्रादीनांपूर्वमनुत्पन्नमेवस्वत्वंसंविभागेनजन्यतइतिधारे
श्वराचार्याः॥स्मृतिसंग्रहकारश्चतत्र॥उत्पत्त्यैवार्थस्वामित्वंलभे
तइत्येवमादिवचनेनपुत्रोत्पत्तेरेवपितृधनेपुत्रनिरूपितस्वत्वो
त्पादकत्वबोधनात्॥भूर्यापितामहोपात्तानिबंधोद्रव्यमेववा॥
तत्रस्यात्सदृशंस्वाम्यंपितुःपुत्रस्यचोभयोरितिवचनाच्च॥नचे
दंपितामहमरणस्यैवस्वत्वोत्पत्तिहेतुत्वंगमयतिनपुत्रोत्पत्तेः॥
मरणकालेऽनुत्पन्नेपौत्रेतदभावप्रसंगात्॥वस्तुतस्तु॥पिताम
हपदमविवक्षितं अन्यथाप्रपितामहाद्युपात्तेसदृशस्वाम्याभा
वप्रसक्तेः॥अनुवाद्यविशेषणत्वाच्च॥ यत्तुदेवलः॥पितर्युपरते
पुत्राविभजेयुर्धनंपितुः॥अस्वाम्यंहिभवेदेषांनिर्दोषेपितरिस्थितइ
तितत्रपूर्वार्द्धेतावद्विभागकालविधायकंविधिप्रत्ययश्रवणात्॥उ
त्तरार्द्धंतुतस्यैवस्तुत्यर्थतयास्वातंत्र्यपरं॥नतुस्वत्वाभावपरं॥एतेन
नजीवतिपितरिपुत्रारिक्थंभजेरन्यद्यपिस्यात्तैस्तदधिगतंतैर
नहीशएवपुत्राअर्थधर्मपरेस्वातंत्र्यादितिशंखवचोपिव्याख्यातंपूर्वनि
षेधार्थवादार्थोनं तरास्वातंत्र्योक्तिरितियद्यपितैः पश्चादधिगत
मित्यन्वयः॥तैःपुत्रैःपश्चादुत्पत्तेः॥अधिगतंप्रतिग्रहादिनाप्राप्तं
॥पुत्रादिभिःप्रतिगृहीतेस्वत्वाविवादात्तत्राप्यस्वातंत्र्योक्तिसुतपि
त्रर्जितइतितात्पर्यार्थः॥इदंचास्वातंत्र्यंविभागकाम्यधर्मव्यवसा
यादिविषयं॥अतएवहारीतः॥जीवतिपितरिपुत्राणामर्थादानवि
सर्गविभागाक्षेपेष्वस्वातंत्र्यमिति॥आदानविसर्गपदेनव्यवसायो
लक्ष्यते॥आक्षेपोदास्यादिभर्त्सनमितिमदनः॥यत्तुमणिमुक्ताप्र
वालानांसर्वस्यैवपिताप्रभुः।स्थावरस्यतुसर्वस्यनपितानपिताम
हइति तत्कुंडलांगुलीयकधारणादावेवपितुःस्वातंत्र्यमात्रार्थंनतु
दानादौनवापुत्रोत्पत्तेः स्वत्वकारणत्वनिवृत्त्यर्थं॥भोगानामप्या
द्युपादानादप्येषएव अर्थःप्रतीयते॥अतएवस्थावरंद्विपदंचैवयद्य
पिस्वयमर्जितं॥असंभूयसुतान्सर्वान्नदानंनचविक्रयइतिदानवि
क्रयादीनामेवनिषेधोनभोगस्य॥अतःपूर्वमनेकभ्रात्रादीनामपरि

छिन्नंस्वत्वंसंविभागेनव्यवस्थाप्यते॥तत्रसमुदितद्रव्यगतपूर्वस्व
त्वनाशेनतदेकदेशेविलक्षणंतद्युत्पद्यतइतिकेचित्॥युक्तंतुपूर्वना
शस्वत्वांतरोत्पत्तिकल्पनेगौरवात्पूर्वमेकदेशस्थितमेवोत्पन्नंविभागे
नपदार्थविशेषनिष्ठतयाज्ञाप्यते॥प्रकृतमुच्यते॥ब्राह्मणस्याधिकं
लब्धमिति॥प्रतिग्रहलब्धंविप्रस्याधिकंफलजनकमितिकेचित्
॥रिक्थाद्यपेक्षयाविप्रस्यैवायमधिकउपायएवंक्षत्रियादेर्जयादी
नितुयुक्तं॥जयेपिजितस्ययत्रगृहक्षेत्रद्रव्यादौस्वत्वमासीत्॥तत्रै
वजेतुरप्युत्पद्यतेजितस्यकरग्राहितायांतुजेतुरपिसैवनस्वत्वं॥अ
तएवसार्वभौमेनसंपूर्णपृथ्वीमांडलिकेनचमंडलंनदेयमित्युक्तंष
ष्ठे॥संपूर्णपृथिवीमंडलस्यतत्तद्ग्रामक्षेत्रादौस्वत्वंतुतत्तद्भौमिका
दीनामेव॥राज्ञांतुकरग्रहमात्रं॥अतएवेदानींतनपारिभाषिकक्षे
त्रदानादौनभूदानसिद्धिः॥किंतुवृत्तिकल्पनमात्रमेव॥भौमकेभ्यः
क्रीतेतुगृहक्षेत्रादौस्वत्वमप्यस्त्येव॥तेनतत्रभूदानस्यापिफलंभ
वति॥निर्विष्टकुसीदकृषिवाणिज्यपशुपालनलब्धंसेवालब्धंच॥निर्वे
शोभृतिभोगयोरित्यभिधानात्॥भृतिःसेवा॥भोगःकुसीदादिः॥त
दयंवैश्यस्य॥द्वितीयंशूद्रस्य॥अतोलोकसिद्धैवक्रयादीनांकारण
ता॥एवंचस्तेयगवादिजातवत्सादौस्वत्वव्यवहारःसंगच्छते॥उ
पायानांशास्त्रगम्यत्वेतुनस्यात्॥स्तेयगवादिजननरूपोपायस्य
शास्त्रेणाबोधनात्॥ननुस्तेयगवादिजननेनेवस्वभार्यायामुत्पत्त्याक
न्यापुत्रादावपिस्वत्वंस्यात्॥इष्टापत्तौ॥विश्वजितिसर्वस्वंददामी
तिविहितेसर्वस्वदानेनकन्यापुत्रादिदानापत्त्याकन्यापुत्रादिर्नदेयमि
तिबाधसिद्धांतविरोधइतिचेन्न॥गवादाविवभार्यायांस्वत्वाभावे
नतस्यामुत्पन्नेःपत्येपितदभावात्॥लोकेचस्वत्वास्पदीभूतोत्पत्ते
रेवस्वत्वकारणत्वक्लृप्तेः॥भार्यायामपिप्रतिग्रहेणस्वत्वंस्यादेवेतिचे
॥क्षत्रियादीनांप्रतिग्रहाभावेनतद्भार्यासुस्वत्वाभावात्तदपत्येष्वपि
तदभावः॥तेनसजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितिसजाती
यस्यैवदत्तकस्यग्राह्यत्वात्॥क्षत्रियादीन्प्रतितावद्दत्तकप्रतिग्रहोगौ
णएवनचविप्रान्प्रतिसमुच्चयःसंभवतिनहिधोयुगपद्वृत्तिद्वयविरो

त्॥ नचपुत्रप्रतिग्रहविधिर्विप्राधिकारिकएव॥ नक्षत्रियाद्यधिकारिक इतिवाच्यं॥ दौहित्रो भागिनेयश्च शूद्रस्यापिच दीयत इत्यादिशौनकादिवचोभिस्तदधिकारिकत्वस्यापिअवगमात्॥ एवंब्राह्मविधिनाक्षत्रियादिकन्यया सह विप्रस्योद्वाहेदानप्रतिग्रहयोर्गौणत्वमंगीकार्यं अन्यत्रमुख्यत्वमितिवृत्तिद्वयविरोधः॥ क्षत्रियान्प्रतिब्राह्मादिविवाहप्रवृत्तिस्तुसर्वेषामविप्रतिपन्नैव॥ अतएवपुत्रादीनांदानगौणमितितंत्ररत्नेमिश्राः॥ नन्वस्वभार्यापुत्रकन्याइतिशब्दव्यवहारात्स्वत्वकल्पना॥ तस्यस्वःपितास्वमातेत्यादाविवज्ञातिवाचकत्वेनाप्युपपत्तेः॥ अस्तिचज्ञातावपिस्वशब्दस्यशक्तिः॥ स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियांधनइतिकोशात्॥ यत्तुषष्ठेगर्भदासदानमुक्तंतच्चिंत्यं॥ तन्मातरिमुख्यदान—प्रतिग्रहक्रयविक्रयाद्यभावेनस्वत्वाभावेतदुत्पन्नेगर्भदासेसुतरांतदयोगात्॥ इत्यस्तुप्रासंगिकं॥ अथदायः॥ असंसृष्टंविभजनीयधनंदायः॥ लाभाद्यर्थंसंसृष्टधनव्यावृत्तयेऽसंसृष्टमितिवणिग्भिरंगीकृत्यविभज्यमानेदायभागशब्दाप्रयोगात्॥ एवंवक्ष्यमाणपारिभाषिकसंसर्गवतोपिनिवृत्तिः॥ अतएवस्मृतिसंग्रहे॥ पितृद्वारागतंद्रव्यंमातृद्वारागतंचयत्॥ कथितंदायशब्देनतद्विभागः प्रोच्यतेति॥ निघंटौच॥ विभक्तव्यंपितृद्रव्यंदायमाहुर्मनीषिणइति॥ पितृपदंसंबंधिमात्रोपलक्षणं॥ अयंदायोद्विधासप्रतिबंधोऽप्रतिबंधश्च॥ यत्रधनस्वामिनस्तत्सुतादेश्चजीवनेप्रतिबंधकंससप्रतिबंधः॥ यथापितृव्यादिधनं॥ यत्तुस्वामिसंबंधादेवपुत्रादेर्धनार्जनोपायांतरनिरपेक्षात्स्वंभवतिसोप्रतिबंधोयथापितृधनं॥ इतिदायस्वरूपं॥ अथतद्विभागः॥ तमाहनारदः॥ विभागोर्थस्यपित्र्यस्यपुत्रैर्यत्रप्रकल्प्यते॥ दायभागइतिप्रोक्तंतद्विवादपदंबुधैः॥ पुत्रैरितिपौत्रादीनामप्युपलक्षणं॥ पित्र्यस्येतिपितामहादीनां॥ मदनस्तुपित्र्यादेरित्येवपपाठ॥ इत्थंदायभागस्वरूपमुक्तं॥ द्रव्यसामान्याभावेपित्वत्तोहंविभक्तइतिव्यवस्थामात्रेणापिभवत्येवविभागः॥ बुद्धिविशेषमात्रमेवहिविशेषमात्रमेवहिविभागः॥ तस्यैवाभिव्यंजिकेयंव्यवस्था॥ अथविभागकालः॥ मनुः॥ ऊर्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमं॥ भजेरन्पैतृकंरिक्थं

च्छिन्नंस्वत्वंसंविभागेनव्यवस्थाप्यते॥तत्रसमुदितद्रव्यगतपूर्वस्व
त्वनाशेनतदेकदेशेविलक्षणंतच्चोत्पद्यतइतिकेचित्॥युक्तंतुपूर्वना
शस्वत्वांतरोत्पत्तिकल्पनेगौरवात्पूर्वमेकदेशस्थितमेवोत्पन्नंविभागे
नपदार्थविशेषनिष्ठतयाज्ञाप्यते॥प्रकृतमुच्यते॥ब्राह्मणस्याधिकं
लब्धमिति॥प्रतिग्रहलब्धंविप्रस्याधिकंफलजनमेकमितिकेचित्
॥रिक्थाद्यपेक्षयाविप्रस्यैवायमधिकउपायएवंक्षत्रियादेर्जयादीरि
तितुयुक्तं॥जयेपिजितस्ययत्रग्रहस्तेनद्रव्यादौस्वत्वमासीत्॥तत्रै
वजेतुरप्युत्पद्यतेजितस्यकरग्राहितायांतुजेतुरपिसैवनस्वत्वं॥अ
तएवसार्वभौमेनसंपूर्णापृथ्वीमांडलिकेनचमंडलंनदेयमित्युक्तंष
ष्ठे॥संपूर्णपृथिवीमंडलस्यतत्तद्ग्रामक्षेत्रादौस्वत्वंतुतत्तद्भौमिका
दीनामेव॥राज्ञांतुकरग्रहमात्रं॥अतएवइदानींतनपारिभाषिकक्षे
त्रदानादौनभूदानसिद्धिः॥किंतुवृत्तिकल्पनमात्रमेव॥भौमकेभ्यः
क्रीतेतुगृहक्षेत्रादौस्वत्वमप्यस्त्येव॥तेनतत्रभूदानस्यापिफलंभ
वति॥निर्विष्टकुसीदकृषिवाणिज्यपशुपालनलब्धंसेवालब्धंच॥निर्वे
शोभृतिभोगयोरित्यभिधानात्॥भृतिःसेवा॥भोगःकुसीदादिः॥त
त्राद्यंवैश्यस्य॥द्वितीयंशूद्रस्य॥अतोलोकसिद्धेवक्रयादीनांकारण
ता॥एवंचस्वीयगवादिजातवत्सादौस्वत्वव्यवहारःसंगच्छते॥उ
पायानांशास्त्रगम्यत्वेतुनस्यात्॥स्वीयगवादिजननरूपोपायस्य
शास्त्रेणाबोधनात्॥ननुस्वीयगवादिजननेनेवस्वभार्यायामुत्पन्नस्यक
न्यापुत्रादावपिस्वत्वंस्यात्॥इष्टापत्तौ॥विश्वजितिसर्वस्वंददामी
तिविहितेसर्वस्वदानेकन्यापुत्रादिदानापत्त्याकन्यापुत्रादिनदेयमि
तिषाष्ठसिद्धांतविरोधइतिचेन्न॥गवादाविवभार्यायांस्वत्वाभावे
नतस्यामुत्पन्नेऽपत्येपितदभावात्॥लोकेचस्वत्वास्पदीभूतोत्पत्ते
रेवस्वत्वकारणत्वंक्लृप्तं॥भार्यायामपिप्रतिग्रहेणास्वत्वंस्यादेवेतिचे
॥क्षत्रियादीनांप्रतिग्रहाभावेनतद्भार्यासुस्वत्वाभावात्तदपत्येष्वपि
तदभावः॥तेनसजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितिसजाती
यस्यैवदत्तकस्यग्राह्यत्वात्॥क्षत्रियादीन्प्रतितावद्दत्तकप्रतिग्रहो
पायएवनचविप्रान्प्रतिसमुच्चयःसंभवतितद्विधेर्युगपद्वृत्तिद्वयविरो

तु॥ नचपुत्रप्रतिग्रहविधिर्विप्राधिकारिकएव॥ नक्षत्रियाद्यधिकारिक
इतिवाच्यं॥ दौहित्रोभागिनेयश्चशूद्रस्यापिचदीयत इत्यादिदर्शनेनका
दिवचोभिस्तदधिकारिकत्वस्यापिअवगमात्॥ एवंब्राह्मविधिनाक्ष
त्रियादिकन्ययासह विप्रस्योद्वाहेदानप्रतिग्रहयोर्गौणत्वमंगीकार्यं
अन्यत्रमुख्यत्वमितिनिवृत्तिह्यविरोधः॥ क्षत्रियान्प्रतिब्राह्मादिविवाह
प्रवृत्तिस्तुसर्वेषामविप्रतिपन्नैव॥ अतएवपुत्रादीनांदानगौणमितितं
त्ररत्नेमिश्राः॥ नचस्वभार्यापुत्रकन्याइतिशब्दव्यवहारात्स्वत्वकल्पना
॥ तस्यस्वःपितास्वमातेत्यादाविवज्ञातिवाचकत्वेनाप्युपपत्तेः॥ अस्ति
चज्ञातावपिस्वशब्दस्यशक्तिः॥ स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वो
स्त्रियांधनइतिकोशात्॥ यत्तुषष्ठेगर्भदासदानमुक्तंतच्चिंत्यं॥ तन्मा
तरिमुख्यदान---प्रतिग्रहक्रयविक्रयाद्यभावेनस्वत्वाभावेतद्गर्भे
गर्भदासेसुतरांतदयोगात्॥ इत्यलंतुप्रासंगिकं॥ अथदायः॥ असंसृ
ष्टविभजनीयधनंदायः॥ लाभाद्यर्थंसंसृष्टधनव्यापारवद्भिः संसृष्टमिति
वणिग्भिरंगीकृत्यविभज्यमानेदायभागशब्दाप्रयोगात्॥ एवंवक्ष्य
माणपारिभाषिकसंसर्गवतोपिनिवृत्तिः॥ अतएवस्मृतिसंग्रहे॥ पितृ
द्वारागतंद्रव्यंमातृद्वारागतंचयत्॥ कथितंदायशब्देनतद्विभागः प्र
नोच्यतेति॥ निघंटौच॥ विभक्तव्यंपितृद्रव्यंदायमाहुर्मनीषिणइति॥
पितृपदंसंबंधिमात्रोपलक्षणं॥ अयंदायोद्विधासप्रतिबंधोऽप्रतिबंधश्च
॥ यत्रधनस्वामिनस्तत्सुतादेश्चजीवनेप्रतिबंधकंससप्रतिबंधः॥ यथा
पितृव्यादिधनं॥ यत्तुस्वामिसंबंधादेवपुत्रादेर्धनार्जनेपायांतरनिरपे
क्षत्वंभवतिसोप्रतिबंधोयथापितृधनं॥ इतिदायस्वरूपं॥ अथतद्वि
भागः॥ तमाहनारदः॥ विभागोर्थस्यपित्र्यस्यपुत्रैर्यत्रप्रकल्प्यते॥ दाय
भागइतिप्रोक्तंतद्विवादपदंबुधैः॥ पुत्रैरितिपौत्रादीनामप्युपलक्षणं॥
पित्र्यस्येतिपितामहादीनां॥ मदनस्तुपित्र्यादेरित्येवपपाठ॥ इदंच
दायभागस्वरूपमुक्तं॥ द्रव्यसामान्याभावेपित्वत्तोहंविभक्तइतिव्यव
स्यामात्रेणापिभवत्येवविभागः॥ बुद्धिविशेषमात्रमेवहिविशेषमात्र
मेवहिविभागः॥ तस्यैवाभिव्यंजिकेयंव्यवस्था॥ अथविभागकालः॥
मनुः॥ ऊर्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमं॥ भजेरन्पैतृकंरिक्थ

अनीशास्तेहिजीवतोः॥ चशब्दोपादानेपिमरणसमुच्चयोनविवक्षितः।
अतएवमदनरत्नेस्मृति संग्रहे॥ पितृद्रव्यविभागःस्याज्जीवंत्याम
पिमातरि॥ नस्वतंत्रतयास्वाम्यंयस्मान्मातुःपतिंविना॥ मातृद्रव्यविभा
गोपितथापितरिजीवति॥ सत्वपत्येषुयस्मान्नस्त्रीधनस्यपतिःपतिः
॥एतदेववदतिबृहस्पतिः॥ पित्रोरभावेभ्रातॄणांविभागःसंप्रदर्शितः
॥मातुर्निवृत्तेरजसिजीवतोरपिशस्यते॥ नारदः॥ अतऊर्ध्वंपितुःपुत्रा
विभजेयुर्धनंसमं॥ मातुर्निवृत्तेरजसिप्रत्तासुभगिनीषुच॥ निवृत्तेवा
पिमरणेपितर्युपरतस्पृहे॥ मरणःकामः॥ उपरतस्पृहोविरक्तः॥ प्रत्ता
सुभगिनीषुचेतिकाकाक्षिवद्रजोमरणनिवृत्त्योर्विशेषणं॥ गौतमः॥
ऊर्ध्वंपितुःपुत्रारिक्थंविभजेरन्निवृत्तेरजसिमातुर्जीवतिपितरिचेच्छ
तीति॥ इच्छतीत्यनेनरजोनिवृत्तिंविनापिपितुरिच्छयाविभागउक्तः।
क्वचिदिच्छांविनापिविभागमाहबृहस्पतिः॥ क्रमागतेगृहक्षेत्रेपितापु
त्राःसमांशिनः॥ पैतृकेनविभागार्हाःसुताःपितुरनिच्छया॥ अर्थात्पित
महाद्यर्जितेतदनिच्छयापिविभागार्हाइत्यर्थः॥ पैतामहेपिक्वचित्पि
तुरिच्छयैवविभागमाहतुर्मनुविष्णू॥ पैतृकेतुपिताद्रव्यमनवाप्यं
यदाप्नुयात्॥ नतत्पुत्रैर्भजेत्सार्द्धंअकामःस्वयमर्जितं॥ बृहस्पतिः॥
पैतामहंहृतंपित्रास्वशक्त्यायदुपार्जितं॥ विद्याशौर्यादिनावाप्तंतत्र
स्वाम्यंपितुःस्मृतं॥ प्रदानंस्वेच्छयाकुर्याद्भोगंचैवततोधनात्॥ नारदः
॥व्याधितःकुपितश्चैवविषयासक्तमानसः॥ अन्यथाशास्त्रकारीच
नविभागेपिताप्रभुः॥ हारीतः॥ अकामेपितरिरिक्थभागोवृद्धेविपरी
तचेतसिदीर्घरोगिणिचेति॥ अकामेविभागेच्छारहितइतिमदनर
त्ने॥ विपरीतचेताअधर्मवर्त्ती। पितुरनिच्छायामपिविभागोभवती
तिभावः॥ पितर्यसमर्थेज्येष्ठपुत्रानुपपत्याविभागमाहहारीतः॥ का
मंदानेप्रोषितेआर्त्तिगतेवाज्येष्ठोर्थांश्चिंतयेदिति॥ शंखलिखितौ
॥पितर्यशक्तेकुटुंबस्यव्यवहारंज्येष्ठःकुर्यात्तदनंतरोवाकार्यज्ञस्तद
नुमतेनेति॥ अनंतरोऽनुजः॥ कुटुंबभरणादिसामर्थ्येच्छयाविभागः॥
सर्वेषांतथात्वेत्वनियमइतिनिष्कर्षः॥ याज्ञवल्क्यः॥ विभागंचेत्पिता
कुर्यादिच्छयाविभजेत्सुतान्॥ ज्येष्ठंवाज्येष्ठभागेनसर्वेवास्युःसमांशिनः

ऐच्छिकविभागएवविवृतउत्तरार्द्धेन॥इच्छायाःसंभवतिउक्तपक्षद्व
यालंबनत्वेस्यातंत्र्यायोगात्॥वाक्यभेदापत्तेः॥एकस्मैलक्षंकस्मैचिद्वि
लक्षद्वैकमन्यस्मैनकिमपीत्यव्यवस्थापत्तेश्च॥ज्येष्ठविभागेविशेष
माहमनुः॥ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरं॥तदर्धंमध्यमस्य
स्यात्तदर्द्धंतुकनीयसः॥उद्धारेतुधृतेत्वेषामियंस्यादंशकल्पना॥ए
काधिकंहरेज्ज्येष्ठःपुत्रोध्यर्द्धंततोपरं॥अंशमंशंयवीयांसइतिधर्मो
व्यवस्थितः॥यमलयोर्मध्येप्रथमप्रसूतस्यज्येष्ठ्यंमनुराह॥जन्म
ज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतं॥यमलयोश्चैवसंज्ञासुजन्म
तोज्येष्ठतामता॥यस्यजातस्ययमयोःपश्यंतिप्रथमंमुखं॥संतानःपि
तरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितमिति॥यत्तुपिंडसिद्ध्यादिवैधकग्रंथे
षुअनंतरप्रसूतस्यज्येष्ठ्यमुक्तंतदनेनकार्यांशेबाध्यतेतस्याश्रुतिमू
लत्वात्॥मासेनमूत्रीभवतीतिवत्॥यत्तुद्वौतदाभवतोगर्भौसूतिर्वेश
विपर्ययादित्यादिनाभागवतेपश्चाज्जातस्यज्येष्ठ्यमुक्तंतदप्यनेनन
बाध्यते॥पुराणेषुस्मृतिविरुद्धाचाराणांबहुशोदर्शनात्॥देशाचार
तोव्यवस्थाज्ञेयेतिकेचित्॥युक्तंतुपूर्वोक्तमेव॥अयंचोद्धारविभागः
कलौनिषिद्धः॥कलिवर्ज्येषुपाठात्॥निर्णीतंचेदंसमयमयूखेऽस्मा
भिः॥पितुरंशद्वयमाहनारदः॥द्वावंशौप्रतिपद्येतविभजन्नात्मनःपिता
॥इदंत्वेकपुत्रपरं॥सयद्येकःपुत्रस्यद्वौविभागावात्मनःकुर्यादितिशंख
लिखितोक्तेरितिमदनरत्ने॥एकपदंश्रेष्ठपरं॥एकेमुख्यान्यकेवलाः
इत्यमरोक्तेः॥गुणवत्पुत्रइतियावदितिपारिजाते॥पितामहार्जितेत्वेक
पुत्रेणापिसहसमांशित्वमाह॥बृहस्पतिः॥द्रव्येपितामहोपात्तेस्थाव
रेजंगमेतथा॥सममंशित्वमाख्यातंपितुःपुत्रस्यचैवहि॥याज्ञवल्क्यः
॥भूर्यापितामहोपात्तानिबंधोद्रव्यमेववा॥तत्रस्यात्सदृशंस्वाम्यंपि
तुःपुत्रस्यचोभयोः॥कात्यायनः॥सकलंद्रव्यजातंतद्भागैर्गृह्णंतितत्स
मैः॥पितरोभ्रातरश्चैवविभागोधर्म्यउच्यते॥यत्तुयाज्ञवल्क्यः॥न्यूना
धिकविभक्तानांधर्म्यःपितृकृतःस्मृतइति॥तत्रपितृकृतोधर्म्यश्चेत्स्मृ
तोनपरावर्तनीयइतिमदनविज्ञानेश्वरादयः॥यदपिनारदः॥पित्रै
वतुविभक्तायेसमन्यूनाधिकैर्धनैः॥तेषांसएवधर्मःस्यात्सर्वस्यहि

पिताप्रभुरितितत्पुत्रांतरपरं॥स्वस्यपुत्राणांचसमांशप्रक्षेपत्न्याअपं
शमाह॥याज्ञवल्क्यः॥यदिकुर्यात्समानंशान्पत्न्यःकार्याःसमांशिकाः॥
नदत्तंस्त्रीधनंयासांभर्त्रावाश्वशुरेणचेति॥दत्तेत्वर्द्धंदेयं॥दत्तेत्वर्द्धंप्रक
ल्पयेदिति॥अर्द्धंपूर्वदत्तंस्त्रीधनंयावतापुत्रांशसमंभवतितावदित्य
र्थः॥अंशाधिकधनायास्तुनांशः॥अर्जनसमर्थस्यपुत्रस्यदायजिघृ
क्षाभावेआहसएव॥शक्तस्यानीहमानस्यकिंचिद्दत्वापृथक्क्रिया॥
किंचिद्दानंचतत्पुत्राणांदायजिघृक्षानिवृत्यर्थमितिमिताक्षरायां॥पि
तृमरणानंतरंसमविभागउक्तःस्मृत्यंतरे॥विभजेरन्सुताःपित्रोरू
र्ध्वंरिक्थमृणंसमं॥हारीतः॥समानोमृतेपितरिरिक्थभागइति॥या
ज्ञवल्क्यः॥पितुरूर्ध्वंविभजतांमाताप्यंशंसमंहरेत्॥विष्णुः॥मात
रःपुत्रभागानुसारिभागहारिण्यः॥स्मृत्यंतरे॥जनन्यःस्वधनाःपुत्रै
र्विभागेंशंसमंहरेत्॥सधनातुयावतास्वधनपुत्रांशसमाभवती
तितावदेवहरेदित्यर्थः॥अंशाधिकधनायास्तुनांशः॥सपत्नमातुःपि
तामह्याश्चांशमाह॥व्यासः॥असुताश्चपितुःपत्न्यःसमानांशाःप्रकी
र्त्तिताः॥पितामह्यश्चताःसर्वाःमातृतुल्याःप्रकीर्त्तिताः॥सर्वाइत्यनेन
पितामहीसपत्न्योपिगृह्यंते॥अनेकभ्रातृपुत्राणांविभागप्रकारमाह
॥याज्ञवल्क्यः॥अनेकपितृकाणांतुपितृतोभागकल्पना॥एकस्यैकः
पुत्रोपरस्यद्वावन्यस्यत्रयस्तेषांपितृसंख्ययैवविभागोनविभाजक
संख्ययेत्यर्थः॥कात्यायनः॥अविभक्तेऽनुजेप्रेतेतत्सुतंरिक्थभा
गिनं॥कुर्वीतजीवनंयेनलब्धंनैवपितामहात्॥लभेतांशंसपित्र्यं
तुपितृव्यात्तस्यवासुतात्॥सएवांशस्तुसर्वेषांभ्रातृणांन्यायतोभ
वेत्॥लभेततत्सुतोवापिनिवृत्तिःपरतोभवेत्॥अनुजपदंज्यायसो
प्युपलक्षणं॥परतःप्रपौत्रात्॥प्रपौत्रपुत्रादिःपितृपितामहप्रपिता
महेषुमृतेषुअनंतरंवृद्धप्रपितामहेऽन्यस्मिंश्चतत्पुत्रादिकेजीवति
तद्धनंनलभतेपुत्रपौत्रप्रपौत्रसामान्याभावेसोपिलभतएवेत्यर्थः
॥इदंचनाविभक्तपरंकिंतुसंसृष्टपरं॥अविभक्तविभक्तानांकुल्यानां
वसतांसह॥भूयोदायविभागःस्यादाचतुर्थादितिस्थितिरितिदेवलो
क्तेः॥ऋणंलेख्यंगृहंक्षेत्रंयस्यपैतामहंभवेत्॥चिरकालप्रोषितोवा

भागभागागतस्तु सः॥ गोत्रसाधारणीं त्यक्त्वा योन्यदेशं समाश्रितः
॥ तद्वंशस्यागतस्यांशः प्रदातव्यो न संशयः॥ अविभक्तविभक्तानां कु
ल्यप्रपितामहतत्पुत्राणां च संसृष्टानामित्यर्थः॥ इदं च समदेशस्थि
तपरं॥ देशांतरस्थस्तु पंचमादिरपि लभत एव॥ तृतीयः पंचमश्चैव स
प्तमश्चापि यो भवेत्॥ जन्मनामपरिज्ञाने लभेतांशं क्रमागतमिति
देशांतरक्रमेण बृहस्पतिस्मृतेः॥ क्वचिन्मातृतो विभागमाह बृहस्प
तिः॥ यद्येकजाता बहवः समाना जातिसंख्यया॥ सापत्न्यास्ते वि
भक्तव्यं मातृभागेन धर्मतः॥ व्यासः॥ समानजातिसंख्या ये जाता
स्त्वेकेन सूनवः॥ विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते॥ एतत्तु
इत्युदाहरणमाह बृहस्पतिः॥ सवर्णाभिन्नसंख्या ये पुंभागस्तेषु प्र
शस्यते॥ विजातीयविभागमाह याज्ञवल्क्यः॥ चतुस्त्रिद्व्येकभागाः
स्युः क्रमशो ब्राह्मणात्मजाः॥ क्षात्रजास्त्रिद्व्येकभागा विट्जास्तु द्व्येक
भागिनः॥ ब्राह्मणात्मजा ब्राह्मणीक्षत्रियावैश्याशूद्रासु जाताः॥ क्षा
त्रजाः क्षत्रियावैश्याशूद्रासु॥ विट्जा वैश्याशूद्रयोः॥ बृहस्पतिः॥ न प्र
तिग्रहभूर्देया क्षत्रियादिसुताय वै॥ यद्यप्येषां पिता दद्यान्मृते विप्रासु
तो हरेत्॥ देवलः॥ शूद्रायां द्विजातिभिर्जातो न भूमेर्भागमर्हति॥ सजा
तावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः॥ द्रव्यस्य तु लभत एव॥ अप
रिणीतशूद्रापुत्रस्तु द्रव्यांशमपि न लभते॥ तथा च मनुः॥ ब्राह्मणक्ष
त्रियविशां शूद्रापुत्रो न रिक्थभाक्॥ यदेवास्य पिता दद्यात्तदेवास्य
धनं भवेत्॥ पितृमरणोत्तरं विशेषमाह बृहस्पतिः॥ अनपत्यस्य शु
श्रूषुर्गुणवान्शूद्रयोनिजः॥ लभेत जीवनं शेषं सपिंडाः समवाप्नुयुः
॥ गौतमः॥ शूद्रापुत्रोप्यनपत्यस्य शुश्रूषुश्चेल्लभते वृत्तिमूलं॥ वृत्ति
मूलं जीवनकारणं॥ स एव॥ शूद्रापुत्रवत्प्रतिलोमास्विति॥ प्रतिलोमास्तू
त्पादकापेक्षयोत्कृष्टवर्णस्त्रीषूत्पन्ना इत्यर्थः॥ शूद्रेणापरिणीतायामुत्पन्ने वि
शेषमाह॥ याज्ञवल्क्यः॥ जातोपि दास्यां शूद्रेण कामतोंशहरो भवे
त्॥ मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिकं॥ कामः पितुरिच्छा॥ शूद्रे
णेति द्विजातिभिर्दास्यामुत्पन्नस्तु पित्रिच्छयापि नांशभाक्॥ नापि पि
तृमरणोत्तरं अर्द्धं नापि पुत्राद्यभावे सर्वमिति मदनरत्नादिषु॥ विभा

गानंतरोत्पन्नपुत्रेविशेषमाह॥विभक्तजःपित्र्यमेवेति॥बृहस्पतिः॥
पुत्रैःसहविभक्तेनपित्रायत्स्वयमर्जितं॥विभक्तजस्यतत्सर्वंअनी
शाःपूर्वजाःस्मृताः॥यथाधनेतथर्णेचदानादानक्रयेषुच॥परस्प
रमनीशास्तेमुक्त्वाशौचोदकक्रियां॥ऋणमात्रसत्त्वेतुपूर्वविभक्ते
भ्योविभागग्रहणंविनातेनऋणंनैवदेयं॥रिक्थग्राहऋणंदाप्य
इतिवक्ष्यमाणत्वात्॥कस्मिंश्चित्संसृष्टेतुतेनसहविभागः॥ऊर्ध्वं
विभागाज्जातस्तुपित्र्यमेवहरेद्धनं॥संसृष्टास्तेनवायेस्युर्विभजेत
सतैःसहेतिमनूक्तेः॥पितृमरणोत्तरविभागकालेऽस्पष्टगर्भायामा
तरितत्सपत्न्यांभ्रातृपत्न्यांवानंतरमुत्पन्नेविशेषमाह॥याज्ञवल्क्यः
॥विभक्तेषुसुतोजातःसवर्णायांविभागभाक्॥विभागश्चसर्वैर्भ्रात
्रादिभिःस्वस्वांशात्किंचित्किंचिदुद्धृत्ययथास्वांशसमोभवतितथाकार्यः
॥विष्णुः॥पितृविभक्ताविभागानंतरोत्पन्नस्यविभागंदद्युः॥इदंचत
दंशेष्वरतःसेकसहितेषुज्ञेयं॥तत्सत्त्वेतुसएवाह॥दृश्याद्वातद्विभा
गःस्यादायव्ययविशोधितात्॥दृश्याद्विद्यमानद्रव्यात्॥भ्रातृणांवि
भागकालेविशेषमाहवसिष्ठः॥अथभ्रातृणांदायविभागोयाश्चानप
त्याःस्त्रियस्तासामापुत्रलाभादिति॥प्रतीक्षाकार्येतिशेषः॥पितृम
रणोत्तरंविभागेविशेषमाहबृहस्पतिः॥असंस्कृताभ्रातरस्तुसंस्कार्यो
स्तेमवीयसः॥भ्रातृग्रहणंभगिनीनामप्युपलक्षणं॥तथाचसएव॥अ
संस्कृतास्तुयास्तत्रपैतृकादेवताधनात्॥संस्कार्याभ्रातृभिर्ज्येष्ठैःक
न्यकाश्चयथाविधीति॥याज्ञवल्क्यः॥असंस्कृतास्तुसंस्कार्याभ्रात
भिःपूर्वसंस्कृतैः॥भगिन्यश्चनिजादंशाद्दत्वांशंतुतुरीयकं॥यज्जा
तीयाकन्यातज्जातीयपुत्रस्ययावान्भागःतस्यचतुर्थंचतुर्थमंशंप्र
त्येकंभगिनीभ्योदत्वाताःसंस्कर्तव्याइत्यर्थः॥दायग्रहणव्यवस्थोप
योगितयामुख्यगौणपुत्रव्यवस्थामाह॥याज्ञवल्क्यः॥औरसोध
र्मपत्नीजस्तत्समःपुत्रिकासुतः॥क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरे
णवा॥गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः॥कानीनःकन्यकाजा
तोमातामहसुतोमतः॥अक्षतायांक्षतायांवाजातःपौनर्भवःस्मृतः॥द
द्यान्मातापितावायंसपुत्रोदत्तकोभवेत्॥क्रीतश्चताभ्यांविक्रीतःकृ

त्रिमःस्यात्स्वयंकृतः॥ दत्तात्मातुस्वयंदत्तोगर्भेविन्नःसहोढजः॥ उ
त्कृष्टेगृह्यतेयस्तुसोपविद्धोभवेत्सुतः॥ सवर्णायांधर्मपत्न्यामुत्पन्नऔ
रसःपुत्रोमुख्यः॥ पुत्रिकासुतोद्वेधा॥ तत्राद्यमाहवसिष्ठः॥ अभ्रातृकां
प्रदास्यामितुभ्यंकन्यामलंकृतां॥ अस्यांयोजायतेपुत्रःसमेपुत्रोभवि
ष्यतीति॥ अंत्यमाहसएव॥ तृतीयःपुत्रिकैवेति॥ अस्मिन्पक्षेकन्यैव
पितुरौर्ध्वदेहिकादिकार्ये॥ क्षेत्रजअपुत्रभ्रात्रादिपत्न्यांगुर्वाज्ञयादेव
रादिसगोत्रेणोत्पन्नः॥ अक्षतायांपूर्ववोढ्रा भुक्तायां॥ क्षतायांतेनभु
क्तायांवावोढ्रंतरेणोत्पन्नःपौनर्भवः॥ अत्रदत्तकभिन्नागौणाःपुत्राःक
लौवर्ज्याः॥ दत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहइतितन्निषेधेषुपाठात्
॥ अथदत्तकविधिः॥ मनुः॥ मातापितावादद्यातांयमद्भिःपुत्रमापदि॥
सदृशंप्रीतिसंयुक्तंसज्ञेयोदत्रिमःसुतः॥ वाशब्दान्मात्रभावेपितैवदद्या
त्॥ पित्रभावेमातैवोभयसत्त्वेतूभावपीतिमदनः॥ आपद्ग्रहणादनापदि
नदेयः॥ अयंनिषेधोदातुरेवपुरुषार्थोनक्रत्वर्थइतिविज्ञानेश्वरः॥ तच्च
॥ अस्यवाक्यात्दृष्टार्थतयाक्रत्वर्थावगमात्कथंचिद्दृष्टार्थत्वेपिवानिय
मादृष्टस्यआवश्यकत्वान्नतदतिक्रमेकार्यविशेषप्रयोजकादृष्टसिद्धिः
॥ केचित्त्वापच्छब्दस्यस्वार्थत्यागापत्तेरनापत्परिसंख्यापकत्वाभा
वेननिषेधार्थकत्वं॥ किंत्वापदोनिमित्तमात्रबोधकत्वमेव॥ नचनै
मित्तिकत्वेआपदिपुत्रादानेप्रत्यवायापत्तिः॥ एतद्वाक्यस्यसंज्ञासंज्ञि
संबंधमात्रबोधकत्वात्॥ आपदिनिमित्तेदानविधायकत्वाभावात्॥ यद
पिविवादप्रकरणेतैनैवोक्तं॥ रोगिण्यादिनिषेधातिक्रमेदृष्टविरोधएव
॥ भार्यात्वंतूत्पद्यतएवेति॥ तदप्यनेनैवापास्तं॥ सदृशंकुलगुणादिभि
र्नजात्या॥ अतःक्षत्रियादिरपिविप्रादेर्दत्तकोभवतीतिमेधातिथिः॥ सदृ
शंजात्येतिकुल्लूकभट्टः॥ युक्तंचेदं॥ याज्ञवल्क्येन॥ औरसोधर्मपत्नी
जइतिद्वादशापिपुत्राननुक्रम्यसजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधि
रित्युपसंहारात्॥ स्पष्टीकरिष्यतेचेदंवक्ष्यमाणशौनकवचोभ्यां॥ विज्ञा
नेश्वरोप्येवं॥ ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवइतिज्येष्ठस्यैवपुत्र
कार्येमुख्यत्वात्सनदेयइत्ययमपिनिषेधोदातुरेवनप्रतिग्रहीतुरित्य
पिसः॥ स्यादयंप्रतिषेधोदातुरेवयद्येकस्यज्येष्ठदाननिषेधकतास्यान्न

तुसास्ति॥मानाभावात्॥पुत्रीभवतीतिपुत्रिवोक्तेःऋणापाकरणमा
त्रपरत्वाच्च॥अतएवपितॄणामनृणश्चैवसतस्मात्सर्वमर्हतीत्युक्ता
र्द्धसंगच्छते॥सर्वैर्द्रव्यं॥दत्तकश्चपुमानेवभवतिनकन्या॥सज्ञेयो
दत्रिमःसुतइतिसंज्ञासंज्ञिसंबंधबोधकवाक्यगतेनसइतिसर्वनाम्ना
मातापितृकर्तृकप्रीतिजलगुणकापन्निमित्तकदानकर्मीभूतसजाती
यपुंसएवाष्टवर्षेब्राह्मणमुपनयीतनमध्यापयीतेतितच्छब्देनाष्टवर्षे
ब्राह्मण्यपुंस्त्वोपनयनादिसंस्कृतस्यैवपरामर्शात्॥एतेनदाक्षोर्मम
नित्यमितिमंत्रोदत्रिमशब्दोदाननिर्वृत्तकर्मत्वाविशेषाद्दत्तायाः॥न
स्यैवादत्तांकन्यामप्यधत्तइतिकेषांचिदुक्तिःपरास्ता॥पुत्रप्रतिग्रह
प्रकारमाहशौनकः॥शौनकोहंप्रवक्ष्यामिपुत्रसंग्रहमुत्तमं॥अपु
त्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यच॥वाससीकुंडलेदत्त्वाउष्णीषंचांगु
लीयकं॥आचार्यंधर्मसंयुक्तंवैष्णवंवेदपारगं॥बर्हिःकुशनमंचैव
पालाशंचेध्ममेवच॥एतानाहृत्यबंधूंश्चज्ञातीनाहूयसत्तमः॥बंधू
नन्नेनसंभोज्यब्राह्मणांश्चविशेषतः॥अन्वाधानादियत्तंत्रंकृत्वाज्यो
त्पवनादिकं॥दातुःसमक्षंगत्वातुपुत्रंदेहीतियाचयेत्॥दानेसमर्थोद
तास्मैयेयज्ञेनेतिपंचभिः॥देवस्यत्वेतिमंत्रेणहस्ताभ्यांप्रतिगृह्यच॥
अंगादंगेत्यृचंजप्त्वाचाघ्रायशिशुमूर्द्धनि॥वस्त्रादिभिरलंकृत्यपुत्र
छायावहंसुतं॥नृत्यगीतैश्चवाद्यैश्चस्वस्तिशब्दैश्चसंयुतं॥गृहमः
ध्येतमादायचरुंहुत्वाविधानतः॥यस्त्वाहृदेत्यृचाचैवतुभ्यमग्नऋचै
कया॥सोमोददित्येताभिःऋग्भिस्तुपंचभिस्तथा॥स्विष्टकृदादिहोमंचकृत्वा
शेषंसमापयेत्॥ब्राह्मणानांसपिंडेषुकर्तव्यःपुत्रसंग्रहः॥तदभावे
सपिंडोवाअन्यत्रतुनकारयेत्॥क्षत्रियाणांस्वजातौवागुरुगोत्रसमो
पिवा॥वैश्यानांवैश्यजातेषुशूद्राणांशूद्रजातिषु॥सर्वेषांचैववर्णानां
ज्ञातिष्वेवनचान्यतः॥दौहित्रोभागिनेयश्चशूद्रस्यापिचदीयते॥नैक
पुत्रेणकर्तव्यंपुत्रदानंकदाचन॥बहुपुत्रेणकर्तव्यंपुत्रदानंप्रयत्नतः
॥दक्षिणांगुरवेदत्त्वायथाशक्तिद्विजोत्तमः॥नृपस्तुराष्ट्रमेवापिवैश्यो
वित्तशतत्रयं॥शूद्रःसर्वस्वमेवापिअशक्तश्चेद्यथाबलं॥छायावहंसद
शंदौहित्रोभागिनेयश्चेतियथाभूतोपयोगित्वेनदंडस्यमैत्रावरुणाय

दंडंप्रयच्छतीत्यत्र संभवत्यपि भाव्यत्वे चतुर्थ्यां दंडीभैव्यानन्वाहेतिशे
षानुवचनकर्तृत्वेन भाव्युपयोगिनो मैत्रावरुणस्यैव भाव्यत्वमुक्तं तथे
हाप्यनपाकृतर्णत्वेन चतुर्थ्यर्थे षष्ठी शूद्रस्यैव दौहित्रभागिनेयावपित्र
तिशेषितया भाव्यत्वं ॥ अतस्तयोरेव विधेयत्वेन दौहित्रभागिनेयावेव
शूद्रस्येति नियमविधिविषयताप्युक्ता ॥ शूद्रस्यत्वविधेयत्वेन तद्वि
षयत्वायोगात्तौ शूद्रस्यैवेति वचनव्यक्तौ विप्रादिशेष्यंतरपरिसंख्या
पत्तेः ॥ तस्माद्दौहित्रभागिनेयावेव शूद्रस्य मुख्यौ तदभावे त्वन्योपिस
जातीयः ॥ शूद्राणां शूद्रजातिष्विति तेनैवोक्तेः ॥ नचेदं जातिपदं दौहि
त्रभागिनेययोरेवोपसंह्रियते ॥ दौहित्रभागिनेयत्वयोः सजातीयत्व
स्य च परस्परव्यभिचारित्वात् एकस्मृतौ सामान्यवाक्यवैयर्थ्यापत्ते
श्च ॥ विवृतं चैतद्द्वैतनिर्णये तातचरणैः ॥ शिष्टाचारोप्येवं ॥ एवं च निषा
दस्थपतिवत्तस्याधिकारे सिद्धे यच्छुद्धिविवेक उक्तं ॥ वैदिकमंत्रसाध्य
होमवति पुत्रप्रतिग्रहे शूद्रस्यानधिकार इति तदपास्तं ॥ समंत्रहोम
स्तु तेन विप्रद्वारा कार्यः ॥ उपवासो व्रतं होमस्तीर्थस्नानजपादिकं ॥ वि
प्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति पराशरोक्तेः ॥ स्मार्तेहरि
नाथावप्येवमेव ॥ यत्तु पराशर एव ॥ दक्षिणार्थं तु यो विप्रः शूद्रस्य जु
हुयाद्धविः ॥ ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेदिति ॥ तत्तु शू
द्रस्य कर्मसाद्गुण्यं विप्रस्य च दोषं प्रतिपादयतीति माधवः ॥ स्त्रिया अपि
शूद्रवदेवाधिकारः स्त्रीशूद्राश्च सधर्माण इति वाक्यात् ॥ वसिष्ठः ॥ शु
क्रशोणितसंभवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरि
त्यागेषु मातापितरौ प्रभवतो न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स
हि त्रायते पुरुषं न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः
पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्या
हृतिभिर्हुत्वादूरेबांधवं संनिकृष्टमेव प्रतिगृह्णीयात् ॥ संदेहे चोत्प
न्ने दूरेबांधवं शूद्रमिव स्थापयेद्विज्ञायते ह्येकेन बहूंस्तारयेदिति तस्मिं
श्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्यादिति ॥ भर्त्रनु
ज्ञा तु सधवाया एव दृष्टार्थत्वात् ॥ विधवायास्तु तां विनापि पितुः तद
भावे ज्ञातीनामाज्ञया भवति ॥ अतएव ॥ रक्षेत्कन्यां पिता विन्नां पतिः पु

ग्रास्त्र वार्द्धके॥अभावेज्ञातयस्तेषांन स्वातंत्र्यं क्वचित्स्त्रिया इति॥या
ज्ञवल्क्येनावस्थाविशेष एव भर्त्तुः पारतंत्र्यमुक्तं॥तदभावे वार्द्धका
दिना तस्याक्षमतायां वा पुत्रादीनामपि कात्यायनेनापि॥नारीखल्वन
नुज्ञाता पित्रा भर्त्रा सुतेन वा॥विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहि
कमिति अवस्थाविशेष एव पितृभर्त्रादनुज्ञा उक्ताः॥और्ध्वदेहिकं पा
रलौकिकं॥अतो यस्यामवस्थायां भर्त्तुरनुज्ञाप्राप्ता सैवात्रानूद्यते
॥नत्वपूर्वा विधीयते॥अतो विधवाया भर्त्तुराज्ञां विनाप्यधिकारः॥
अदूरे बांधवो यथा संन्निहितः सपिंडः सन्निहितेष्वपि भ्रातृपुत्रो मु
ख्यः॥भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्॥सर्वे ते तेन पुत्रेण
पुत्रिणो मनुरब्रवीदिति मनूक्तेरिति मिताक्षरायां॥दूरमेव चेत्तदुच
सः प्रयोजनं युक्तमन्यासंभवात्॥दूरे बांधवं विजातीयं।दत्तकस्त
परिणीत उत्पन्नपुत्रोपि च भवतीति सातत्वरणाः॥युक्तं चेदं बाधका
भावात्॥यत्तु कालिकापुराणे॥पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवी
पते॥आचूडांतं न पुत्रः स पुत्रतां याति चान्यतः॥चूडोपनयसंस्कारा
निजगोत्रेण वै कृताः॥दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते॥ऊ
र्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप॥गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथ
मं चरेदिति॥तदसगोत्रपरं॥आचूडांतमित्याङ्भिव्याप्त्यर्थो मर्या
दार्थत्वे चूडोपनयसंस्कारा इत्यनेन विरोधापत्तेः॥इदं तु वचो नातप्र
विश्रंभणीयं॥द्वित्रिकालिकापुराणपुस्तकेष्वदर्शनात्॥अयं च द
त्तको द्विविधः॥केवलो द्व्यामुष्यायणश्च॥संविदं विना दत्त आद्यः॥
आवयोरसाविति संविदा दत्तस्त्वन्यः॥तत्राद्यः प्रतिग्रहीतुरेवौर्ध्वदे
हिकश्राद्धादि कुर्यात्॥तथाहि॥पुत्रप्रतिग्रहस्य भाव्यकांक्षायां पुत्र
प्रतिग्रहीष्येऽहमित्यादिके तद्धि पौत्रमिति द्वितीयांतेन तस्य पुत्रस्य भा
व्यत्वमुक्तं॥नच जन्यं पुंस्त्वाख्यं पुत्रत्वं भावयितुं शक्यं॥तेन पुत्रश
ब्देन सर्वे पुत्रकार्यं लक्षयित्वा नत्वयाजक मदृष्टं भाव्यमंगीकर्त्तव्यं॥
अतः प्रतिग्रहीतृकुले पुत्रपित्रादिसंबंधविशेषप्रयुक्तानि कार्याणि प्र
वर्त्तंते॥अत एवाह मनुः॥गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः॥गो
त्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा॥गोत्ररिक्थे अनुगच्छतीति गो

त्रीरिक्थानुगःप्रायस्तत्समनियतइतियावत्॥ दत्रिमः केवलः॥ द्व्यामु
ष्यायणेगोत्राद्यनुवृत्तेर्वक्ष्यमाणत्वात्॥ पिंडः श्राद्धमौर्ध्वदेहिकादी
तिमेधातिथिकुल्लूकभट्टादयः॥ पिंडः सापिंड्यं॥ स्वमौर्ध्वदेहिकश्राद्धा
दीत्यपरे॥ वस्तुतस्तु॥ यथाजातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यत्रव
योवस्थाविशेषोयथावाइमंतर्वेदिमिनोत्यर्द्धंबहिर्वेदीत्यनेनदेशवि
शेषोलक्ष्यतेतथात्रगोत्ररिक्थपिंडस्वधापदैर्जनकादिनासंबंधप्रयु
क्तकार्यमात्रंलक्षयित्वातन्निवृत्तिरुच्यते॥ तेनसोदरपितृव्यादिसंबं
धनिवृत्तिरपिसिद्धाभवति॥ अतएवकेवलदत्तकजन्यः पुत्रोपिपितुः
सपिंडीकरणपार्वणश्राद्धादिप्रतिग्रहीत्रैवसहकुर्यात्॥ एवंतत्त्वत्रोपि
यत्तु अथचेद्दत्तकक्रीतपुत्रिकासुताः परपरिग्रहेणानार्षेयास्तेद्व्यामु
ष्यायणाभवंतीत्यादिनाद्व्यामुष्यायणानुपक्रम्यकात्यायनः॥ अथय
द्येषांस्वासुभार्यासु अपत्यंनस्याद्रिक्थंहरेयुः पिंडंचैभ्यस्त्रिपुरुषंद
द्युरथयद्युभयोर्नस्यादुभाभ्यामेवैकस्मिन्श्राद्धेपृथगुद्दिश्यद्वावनुकी
र्तयेत्॥ प्रतिग्रहीतारंचोत्पादयितारंचातृतीयात्पुरुषादिति॥ तत्
द्व्यामुष्यायणपरं॥ द्व्यामुष्यायणाभवंतीत्युपक्रमात्॥ तेनद्व्यामु
ष्यायणोजनकस्यप्रतिग्रहीतुर्वापुत्रांतराभावेतस्मैपिंडंदद्यात् रिक्थं
चगृह्णीयात्॥ नतत्सत्वे॥ यदातूभयोरप्यौरसाः पुत्राः संतितदाकस्मा
अपिनदद्यात्॥ प्रतिग्रहीतुरंशांशस्यचतुर्थंभागंचहरेत्॥ तस्मिन्प्र
तिगृहीते औरसउत्पन्ने तच्चतुर्थभागभागीस्यादितिवसिष्ठोक्तेः
॥ उत्पन्नेत्वौरसेपुत्रेचतुर्थांशहराः सुताः॥ सवर्णाअसवर्णास्तुग्रा
साच्छादनभाजनाइतिकात्यायनोक्तेश्च॥ तृतीयांशहराइतितुकल्प
तरोपाठः॥ सवर्णाः क्षेत्रजदत्तकाद्यइतिविज्ञानेश्वरः॥ यदातूभयोः
पुत्राभावस्तदाएकस्मिन्श्राद्धइत्याद्युक्तप्रकारेणोभयोरप्येकमेवश्रा
द्धंकुर्यात्॥ यदपिहेमाद्रौकार्ष्णाजिनिः॥ यावंतः पितृवर्गाःस्युस्ताव
द्भिर्दत्तकादयः॥ प्रेतानांयोजनंकुर्युः स्वकीयैः पितृभिःसह॥ द्वाभ्यांस
हाथतत्सुताः पौत्रास्त्वेकेनतत्समः॥ चतुर्थपुरुषेछेदस्तस्मादेषांत्रि
पौरुषी॥ साधारणेषुकालेषुविशेषोनास्तिवर्गिणां॥ मृताहेत्वेकमुद्दि
श्यकुर्युःश्राद्धंयथाविधीति॥ तदपिकात्यायनीयसमानार्थमेव॥ अथ

मर्थः। द्व्यामुष्यायणा दत्तकादयो जनकप्रतिग्रहीत्रोः कुले मृतानां
स्ववर्गैस्तत्पित्रादिभिः सह सपिंडीकरणं कुर्युः॥ दत्तकादिपुत्रास्तु तेषां
जनकप्रतिग्रहीतृभ्यां सह कुर्युः। तत्पौत्रा अपि स्वपितरं दत्तकेन पिता
महेन तज्जनकेन प्रपितामहेन चतुर्थे पुरुषे तत्प्रपौत्रे छंदः इच्छा॥
प्रतिग्रहीतारमुच्चारयेन्नवेति। जनकं तूच्चारयेदेव। साधारणेष्व
मावास्यादिकालेषु जनकप्रतिग्रहीतृवर्गिणां श्राद्धं कार्यं॥ मृताहे
त्वेकमेवोद्दिश्यैकोद्दिष्टं श्राद्धं कुर्यादिति। केचित्तु॥ केवलदत्तक
स्याविधानात्स नास्त्येव॥ अनयोरसाविति संविदश्च विधानाभाव
त्तां विना गृहीतोपि द्व्यामुष्यायणः॥ तेनैव च जनकप्रतिग्रहीत्रोरु
द्देशेनामावास्यादिषु श्राद्धद्वयमेकं वा श्राद्धं कार्यं॥ तत्पुत्रेण तु दत्तकस्य
तज्जनकप्रतिगृहीतृभ्यां द्वाभ्यामपि सह सपिंडीकरणपार्वणश्राद्धा
दिकार्यं॥ एवं तत्पुत्रादिभिरपीत्याहुः॥ तच्चिंत्यं॥ यद्यपि केवलदत्तकः
क्वापि शब्दतो नोक्तस्तथापि पूर्वोक्तमनुवचनेन जनकादीनां संबंध
निवृत्तेरुक्तत्वाद्व्यामुष्यायणे तदभावादर्थात्सिध्यत्येव॥ किंच॥ ऊर्ध्वं
सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमादिति गौतमीयेन
बीजिकुले सप्तपुरुषं यावद्विवाहो नेति विरुद्धः स्याद्व्यामुष्यायणे व्यर्थः
स्यात्॥ तस्मिन्सापिंड्यसत्त्वात्॥ अतोवश्यमेतत्सार्थक्यार्थं केवलद
त्तको वाच्यः॥ तत्र सापिंड्यनिवृत्तेरुक्तत्वाच्च॥ अपि च प्रवराध्याये॥
द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः॥ गोत्रद्वयेप्यनुद्वाहः शौं
गशैशिरयोर्यथेति॥ एतेन गोत्रद्वयमपि द्व्यामुष्यायणस्योक्तं। मानवी
येन च जनकगोत्रनिवृत्तिरुक्तेति विरोधः॥ केवलद्व्यामुष्यायणभेदेनै
व परिहरणीयस्तेन सिद्ध्यत्येव केवलोपि दत्तकः॥ अत एव सूरेण कुंति
भोजाय दत्त्रिमत्वेन दत्तायाः कुंत्याः सुतस्यार्जुनस्य शूरपुत्रवसुदेव
दुहितुः सुभद्रायाः सापिंड्यनिवृत्तिमनुवचनेनोक्त्वास्य गौतमीयस्य
बीजसंतानजायाः अपि निषेधमात्रपरत्वमेवोक्त्वा अर्जुनेन सुभद्रा
परिणये त्याशंक्य वार्त्तिकोक्तसंबंधव्यवधानकल्पनास्य समाधान
माह भट्टसोमेश्वरः॥ यत्तु कश्चित्सोमेश्वरेण गौतमवचनात्तुल्याः शू
रकुलेपि साप्तपौरुषं सापिंड्यमुक्तमित्याह तद्व्याख्यानाध्ययननिबंधनं

तेनहिसापिंड्यनिवृत्तिंपूर्वमुक्त्वागौतमीयस्यजनककुलेनिषेधपर
त्वमुक्तंनतुसापिंड्यबोधकत्वं॥ एवंसिद्धेकेवलेद्व्यामुष्यायणेचअ
नयोरस्याविनिसंविदपिसिद्ध्यति॥ प्रतिग्रहीतुर्द्व्यामुष्यायणज्ञाना
र्थत्वेनदृष्टार्थत्वात्॥ अत्रकेवलदत्तकस्यपालकपितृकुलेसाप्तपौरुषं
मातृकुलेचपांचपौरुषंसापिंड्यं॥ यत्तुवृद्धगौतमः॥ स्वगोत्रेणकुर्माये
त्युर्दत्तक्रीतादयःसुताः॥ विधिनागोत्रमायांतिनसापिंड्यंविधीयते॥
यत्तुवृद्धमनुः॥ दत्तक्रीतादिपुत्राणांबीजवप्तुःसपिंडता॥ पंचमीस
प्तमीचैवगोत्रित्वंपालकस्यच॥ यदपिनारदः॥ धर्मार्थेवर्द्धिताःपुत्रा
स्तत्क्षेत्रेणपुत्रवत्॥ अंशपिंडविभागित्वंतेषुकेवलमिष्यतइतित
न्यनाकराणि॥ साकरत्वेपिद्व्यामुष्यायणस्यप्रतिग्रहीतृकुलेसाप्त
पौरुषसापिंड्याभावप्रतिपादनार्थंकेवलदत्तकेपूर्वोक्तगौतमीयेन
पालककुलेसाप्तपौरुषसापिंड्यस्योक्तत्वात्॥ मानवीयेन चजन
ककुलेसापिंड्यनिवृत्तेरुक्तत्वात्॥ परस्तुसापिंड्यनिर्णयेकेषांचिन्मा
नाह्नवः॥ जनकगोत्रेणोपनयनादिसंस्कृतस्यजनककुलेपितृतो
मातृतश्चपांचपौरुषंसाप्तपौरुषंचसापिंड्यं॥ प्रतिग्रहीतुःकुलेतुत्रि
पुरुषंप्रतिग्रहीतरिगौणपितृत्वप्रयोजकस्योत्पादकत्वस्योपनेतृत्व
स्यचाभावात्॥ प्रतिग्रहीत्रैवगोत्रेणसंस्कृतस्यतुप्रतिग्रहीत्रादिभिर
वसाप्तपौरुषंपांचपौरुषंचेति॥ तत्रमूलंनविद्मः॥ किंच॥ यदिप्रतिग्र
हीतुरुत्पादकत्वोपनेतृत्वाद्यभावान्नपितृत्वंकथंतर्हित्रिपुरुषसा
पिंड्यंप्रतिग्रहीत्रादिभिः श्राद्धादिकर्तृत्वंवादत्तकस्य। नचपितृत्वव्या
प्यंसापिंड्यंयेनतदभावात्सापिंड्याभावःस्यात्॥ वस्तुतस्तु॥ ऊर्ध्वं
सप्तमात्पितृबंधुभ्यइतिगौतमादिवचनैः प्रतिग्रहीत्रादिभिःसहसा
पिंड्यंपूर्वमुक्तमेवेतिदिक्॥ अथपुत्रदानप्रतिग्रहविधी॥ तत्रानेक
पुत्राणामज्येष्ठदानएवाधिकारः सर्वेषांप्रतिग्रहेत्वजातपुत्राणांमृ
तपुत्रामृतपुत्राणांवास्त्रीणांसधवानांभर्तुरनुज्ञया॥ भर्त्रभावेपि
त्रादीनां॥ शूद्रेणदौहित्रोभागिनेयोवाग्राह्योनान्यः॥ अन्येस्तुसंनि
हितःसपिंडस्तदभावेविप्रकृष्टोनत्वन्यजातीयइति॥ अथदाताप्रतिग्र
हदिनेकलादिस्मृत्वाऽस्मदादीनामस्यचपुत्रस्यपरस्परंवर्त्तमान

मपिपितृपुत्रादितत्तत्संबंधनिमित्तकतत्तत्कार्यनिर्वृत्तयेचपुत्रदानंक
रिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृकापूजावृद्धिश्राद्धा
निकुर्यात्तुप्रतिग्रहीतातुप्रतिग्रहदिनपूर्वदिनेउपोष्यःपरदिनेबंधून
हूयपुत्रप्रतिग्रहंराज्ञेनिवेद्यकालादिस्मृत्वाग्रहीष्यमाणपुत्रस्यतज्ज
नकादीनांचपरस्परंवर्त्तमानपितृपुत्रादितत्तत्संबंधिनिवृत्तयेःस्वा
दीनांचपरस्परंपितृपुत्रादितत्तत्संबंधनिमित्तकतत्तत्कार्यनिर्वृत्त
येचपुत्रंप्रतिग्रहीष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृका
पूजावृद्धिश्राद्धाचार्यवरणकुंडलांगुलीयकवासोयुगलोष्णीषमधु
पर्कादिभिर्हिराचार्यपूजनानिसंकल्पपूर्वकंकृत्वात्रीन्विप्रान्बंधूंश्च
भोजयेत्॥अथाचार्यःस्वकर्मकरिष्यइतिसंकल्प्यस्थंडिलोल्लेखना
द्यग्निप्रतिष्ठापनांतंकृत्वान्वाधानेचक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधा
नमग्निंवायुंसूर्यंप्रजापतिंचैकैकयाहुत्याअग्निमेकयासूर्यासावित्रींच
षड्भिःसर्वाहुतिभिर्यक्ष्येशेषेणस्विष्टकृतमित्याद्याज्यभागांतंकु
र्यात्॥अथप्रतिग्रहीतादातृनिकटेगत्वापुत्रंयाचेत्॥दातातुयेयज्ञेने
तिऋक्पंचकमुक्त्वाकालादिस्मृत्वाःस्मदादीनामित्यादिप्रवृत्तयइ
त्यंतमुक्त्वाअमुंपुत्रंयथाशक्त्यलंकृतंतुभ्यमहंसंप्रददेतिवदेत्॥
येयज्ञेनेतिपंचानांमानवपुत्रोनाभानेदिष्टोविश्वेदेवाजगतीपुत्रदा
नेविनियोगः॥प्रतिग्रहीतातुदेवस्यत्वेत्यनेनप्रतिगृह्यस्वशाखोक्त
कामस्तुतिंपठित्वाअंगादंगादित्यृचंचजप्त्वापुत्रंमूर्द्धन्याघ्रायवस्त्रा
दिभिरलंकृत्यमंगलशब्दैर्गृहीत्वानयेत्॥अथाचार्यआज्यस्थापना
द्याज्यभागांतंकृत्वाआज्येनव्यस्तसमस्तव्याहृतिभिर्हुत्वाचरु
णाजुहुयात्॥यस्त्वाहृदावसुश्रुतोग्निस्त्रिष्टुप्पुत्रप्रतिग्रहप्रधान
चरुहोमेविनियोगः॥यस्त्वाहृदा॥अग्नयेइदंनममेतित्यागः॥अग्ने
पितुभ्यमग्नइत्यृचस्यसूर्यासावित्रीसूर्यासावित्र्यनुष्टुप्पतुभ्यमग्ने
सूर्यासावित्र्यैइदंनमम॥सोमोददितिपंचानांसूर्यासावित्रीसूर्या
सावित्र्यनुष्टुप्विनियोगःप्राग्वत्॥ॐसोमोददत्॥ततःस्विष्टकृदा
दिसमापयेत्॥प्रकृतमनुसरामः॥ऋणविभागेविशेषमाहकात्यायनः॥
पित्र्यंपित्र्यर्णसंबद्धंमात्रीयंवात्मनाकृतं॥ऋणमेवंकृतंशोध्यंविभागे

बंधुभिःसह॥पित्र्यर्णसंबद्धं पितृऋणापाकरणार्थंकृतंआत्मीयस्व
कुटुंबभरणाद्यर्थमन्येनकृतं॥सएव॥ भ्रात्रापितृव्यमातृभ्यांकुटुं
बार्थमृणंकृतं॥विभागकालेदेयंतद्रिक्थिभिःसर्वमेवतु॥रिक्थाद
ल्पर्णविषयेपिसएव॥ऋणंप्रीतिप्रदत्तंतुदत्त्वाशेषंविभाजयेत्॥प्रदत्तं
प्रतिश्रुतं॥नारदः॥यच्छिष्टंपितृदायेभ्योदत्त्वर्णंपैतृकंचयत्॥भ्रातृ
भिस्तद्विभक्तव्यमृणीस्यादन्यथापिता॥पितृदायःपित्राप्रतिश्रुतं॥स
एव॥धर्मार्थंप्रीतिदत्तंचयद्दणंस्वेनयोजितं॥तद्दृश्यमानंविभजेन्न
दानंपैतृकादृनात्॥धर्मार्थंप्रीत्याचयद्दत्तंदातुंप्रतिश्रुतंपित्रा॥स्वेन
योजितंस्वयंकृतं॥तद्दणंदृश्यमानंचद्रव्यंविभजेत्॥एतद्दणाति
रिक्तस्यपैतृकाद्धनाद्दानंनास्तीत्यर्थः॥अदृश्यमानशंकायामपिसए
व॥दृश्यमानंविभज्येतगृहंक्षेत्रंचतुष्पदं॥गूढद्रव्याभिशंकायांप्रत्य
यस्तत्रकीर्तितः॥गृहोपस्करवाह्याश्चदोह्याभरणकर्मिभिः॥दृश्य
मानाविभज्यंतेकोशंगूढेऽब्रवीन्मनुः॥कर्मिणोदासाद्याः॥अतएवदि
व्यप्रकरणेऽस्मिन्विषयेकोशएवनियमितस्तैनैव॥शंकाविश्वाससं
धानेविभागेरिक्थिनांसदाक्रियासमूहकर्तृत्वेकोशमेवप्रदापयेत्
॥अथाविभाज्यं॥मनुः॥विद्याधनंतुयद्यस्यतत्तस्यैवधनंभवेत्॥मै
त्रमौद्वाहिकंचैवमाधुपर्किकमेवच॥व्यासः॥विद्याप्राप्तंशौर्यधनंच
यच्चसौदायिकंभवेत्॥विभागकालेतत्तस्यनान्वेष्टव्यंस्वरिक्थिभिः॥
सौदायिकंचवक्ष्यते॥एतच्चपितृद्रव्याविरोधेनार्जितंज्ञेयं॥तथाच
याज्ञवल्क्यः॥पितृद्रव्याविरोधेनयदन्यत्स्वयमर्जितं॥मैत्रमौद्वाहि
कंचैवदायादानांनतद्भवेत्॥क्रमादभ्यागतंद्रव्यंहृतमभ्युद्धरेत्तुयः
॥दायादेभ्योनतद्दद्याद्विद्ययालब्धमेवच॥क्रमागतायामुद्धृतायांभु
विविशेषमाहशंखः॥पूर्वनष्टांतुयोभूमिमेकश्चेदुद्धरेत्क्रमात्॥यथा
भागंलभंत्यन्येदत्त्वांशंतुतुरीयकं॥उद्धृतायाश्चतुर्थमंशमुद्धर्त्रेदत्त्वा
वशिष्टमुद्धर्त्रासहविभजेयुः॥मनुः॥अनुपघ्नन्पितृद्रव्यंश्रमेणयदु
पार्जयेत्॥दायादेभ्योनतद्दद्याद्विद्ययालब्धंचयद्भवेत्॥विद्यालब्धंविशि
नष्टिकात्यायनः॥परभक्तोपयोगेनविद्याप्राप्तान्यतस्तुया॥तयालब्धं
धनंयत्तुविद्याप्राप्तंतदुच्यते॥एतदेवविशदयतिसएव॥उपन्यस्तेतु

यल्लब्धं विद्ययापणपूर्वकं ॥ विद्याधनं तु तद्विद्याद्विभागे न विभज्यते ॥
शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात् ॥ स्वज्ञानशंसनाद्वादात्
लब्धं प्राध्ययनाच्च यत् ॥ विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते ॥ शि
ल्पिष्वपि हि धर्मोयं मूल्याद्यच्चाधिकं भवेत् ॥ विद्यालब्धं हृतं चैव प्रा
ज्ञतः शिष्यतस्तथा ॥ एतद्विद्याधनं प्राहुः सामान्यं यदतोन्यथा ॥ परं नि
रस्य यल्लब्धं विद्ययापणपूर्वकं ॥ विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस
तिः ॥ विद्याप्रतिज्ञया लब्धं शिष्यादात्तं च यद्भवेत् ॥ ऋत्विक्कन्यापनय
लब्धं एतद्विद्याधनं भृगुः ॥ उपन्यासः क्रमजटादीनां संकलितानां पाठ
इति मदनरत्ने ॥ सभायां गूढमप्रमेयविधूतिरिति केचित् ॥ पणपूर्वमु
पन्यस्तमित्यन्वयः ॥ शंसनं प्रख्यापनं ॥ प्राध्ययनं प्रकृष्टाध्ययनं ॥
शिल्पिष्वपीति ॥ अयं विद्याधर्मः शिल्पिष्वपि ज्ञेय इत्यर्थः ॥ मूल्या
धिकं पारितोषिकं ॥ ऋत्विक्कन्याय उपदर्शनं ॥ अत्र सर्वत्रापि विद्याधि
गमतया द्रव्यार्जने च पितृद्रव्याविरोधे सत्येवाविभाज्यत्वं विरोधे तु
विभाज्यमेव ॥ अत एव कात्यायनः ॥ कुले विनीतविद्यानां भ्रातृणां
पितृतोपि वा ॥ शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥ पितृद्रव्य
विरोधेप्यर्जकस्यांशद्वयमस्त्येव ॥ येन चैषां स्वयमुपार्जितं स्यात्स द्व्यं
शमेव हरेदिति वसिष्ठोक्तेः ॥ कस्मिंश्चिद्विद्याधने विशेषमाह नारदः ॥
कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ॥ भागं विद्याधनात्तस्मात्
लभेताश्रुतोपि सन् ॥ अश्रुतो अविद्य इति मदनरत्ने ॥ भागं दास्यामी
त्यप्रतिश्रुत इति तु युक्तं ॥ पितृद्रव्याविरोधार्जितेपि विशेषमाह गौ
तमः ॥ स्वमर्जितं वैद्योवैद्येभ्यः कामं दद्यादिति ॥ विद्यां वेत्तीति वैद्यः ॥ स
इच्छया विद्वद्भ्यो भ्रातृभ्यो दद्यादित्यर्थः ॥ कात्यायनः ॥ नावैद्यानां तु वै
द्येन देयं विद्याधनं क्वचित् ॥ समविद्याधिकानां तु देयं वैद्येन तद्भवेत् ॥
वैद्यो वैद्याय नाकामो दद्यादंशं स्वतो धनात् ॥ पितृद्रव्यं समाश्रित्य न
चेत्तेन तदाहृतं ॥ अयं च निषेधो विद्यभ्रातृणां धनांतरसत्त्वे ॥ धनांतरा
भावे तु तेभ्योपि देयमेवेति मदनः ॥ पित्रादिदत्तस्याविभाज्यत्वमाह बृ
हस्पतिः ॥ पितामहपितृभ्यां च दत्तं मात्रापि यद्भवेत् ॥ तस्य तन्नापहर्त
व्यं शौर्यभार्याधने तथा ॥ नारदः ॥ शौर्यभार्याधने चोभे यच्च विद्याधनं भ

वेत्॥ त्रीण्येतान्यविभाज्यानिप्रसादोयश्चवैपितुः॥ कात्यायनः॥ ध्वजाहृतंभवेद्यत्तुविभाज्यंनैवतत्स्मृतं। संग्रामाद्राहृतंयच्चविद्राव्यद्विषतांबलं॥ स्वाम्यर्थेजीवितंत्यक्त्वाततध्वजाहृतमुच्यते॥ सएव॥ आहृत्यसंशयंयत्रप्रसभंकर्मकुर्वते॥ तस्मिन्कर्मणितुष्टेनप्रसादःस्वामिनाकृतः॥ तत्रलब्धंतुयत्किंचिद्धनंशौर्येणतद्भवेत्॥ अत्रविशेषमाहव्यासः॥ साधारणंसमाश्रित्ययत्किंचिद्वाहनादिकं॥ शौर्यादिनाप्नोतिधनंभ्रातरस्तत्रभागिनः॥ तस्यभागद्वयंदेयंशेषास्तुसमभागिनः॥ सौदायिकस्वरूपमाहव्यासः॥ ऊढया कन्ययावापिपत्युःपितृगृहादपि॥ भ्रातुःसकाशात्पित्रोर्वालब्धंसौदायिकंस्मृतं॥ कात्यायनः॥ यल्लब्धंलाभकालेतुस्वजात्याकन्ययासह॥ कन्यागतंतुतद्वित्तंशुद्धवृद्धिकरंस्मृतं॥ वैवाहिकंतुतद्विद्याद्भार्ययायत्सहागतं॥ धनमेवंविधंसर्वंवित्तंधर्मसाधनं॥ आदायार्षस्तुगोद्वयमितिप्रकारेणलब्धंकन्यागतं॥ अत्रापिविद्याधनवदेवपितृद्रव्याविरोधश्चेद्विभाज्यत्वंविद्यादिव्यतिरिक्तप्रकारेणतुलब्धंविभाज्यमेव॥ तथाचमनुः॥ अविद्यानांतुसर्वेषामीहातश्चेद्धनंभवेत्॥ समस्तत्रविभागःस्यादपित्र्यइतिधारणा॥ ईहाकृष्यादिचेष्टा॥ अपित्र्येपितृद्रव्यानाश्रयणे॥ तअन्यदप्यविभाज्यमाहमनुः॥ वस्त्रंपत्रमलंकारंकृतान्नमुदकंस्त्रियः॥ योगक्षेमंप्रचारंचनविभाज्यंप्रचक्षते॥ पत्रंवाहनं॥ वस्त्रपत्रालंकाराधेयेनधृतास्तेतस्यैवसमभूल्याश्चेत्॥ न्यूनाधिकमूलास्तुविभाज्याएव॥ पितृधृतंतुवस्त्रादितच्छ्राद्धभोक्त्रेदेयं॥ वस्त्रालंकारशय्यादिपितुर्यद्वाहनादिकं॥ गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्त्रेतदर्पयेदितिबृहस्पत्युक्तेः॥ विषमेष्वजातिषुविशेषमाहमनुः॥ अजाविकंसैकशफंनजातुविषमंभजेत्॥ अजाविकंसैकशफंज्येष्ठस्यैवविधीयते॥ कृतान्नोदकेयथासंभवमुपयोज्ये॥ स्त्रियोदास्यो विषमायथासंभवंकर्मकारणीयाः॥ समास्तुविभाज्याः॥ पित्रवरुद्धास्तुसमाअपिनविभाज्याः॥ स्त्रीषुचसंसक्तास्वविभागइतिगोतमोक्तेः॥ योगक्षेमसबलमंत्रिपुरोहितादयउच्यंतइतिकल्पतरौ॥ लोगासिस्तु॥ क्षेमंपूर्तंयोगमिष्टमित्याहुस्तत्वदर्शिनः॥ अविभाज्येतुतेप्रोक्तेशयनासन

मेवचेत्याह॥तत्रपूर्त्तंतडागारामादिइष्टंयोगविप्रभोजनादितदर्थं
विभागदशायांसर्वानुमत्यायद्द्रव्यंयेनोत्सृज्यपृथक्स्थापितंतेनद्र
व्येणसधर्मस्तेनैवकार्योनान्येनवासंभूयसर्वैरित्यर्थः॥प्रचारोगृह
दिमार्गः॥गवादिप्रचारार्थाभूमिश्च॥यत्तुशंखलिखितौ।नवास्तुविभा
गोनोदपात्रालंकारोपयुक्तवाससामिति॥यच्चव्यासः॥अविभाग्यःस
गोत्राणामासहस्रकुलादपि॥याज्यंक्षेत्रंचपत्रंचकृतान्नमुदकंस्त्रिय
इतिवास्तुक्षेत्रयोरविभाज्यत्वमाहतुः॥तद्धर्मशास्त्रगोप्रचारक्षेत्रादि
परं।प्रतिग्रहोपात्तयोस्तयोःक्षत्रियादिविभागप्रतिषेधपरं॥पूर्वोक्त
निषेधात्॥अल्पमूल्ययोर्मूल्येनविभागोनस्वरूपतइत्येवंपरंवा॥व
स्त्रादिषुविशेषमाहबृहस्पतिः॥वस्त्रादयोविभाज्यायैरुक्तंतैर्नविचा
रितं।धनंनचेत्सवृद्धानांवस्त्रालंकारसंश्रितं॥अधस्थितमनाजीव्यं
दातुनैकस्यशक्यते॥युक्त्याविभजनीयंतदन्यथानर्थकंभवेत्॥वि
क्रीयवस्त्राभरणमृणमुद्ग्राह्यलेखितं।कृतान्नंचाकृतान्नेनपरिवर्त्य
विभज्यते॥उद्धृत्यकूपवाप्यंभः स्वानुसारेणभुज्यते॥एकांस्त्रीकारये
त्कर्मयथांशेनगृहेगृहे।बह्व्यःसमांशतोदेयादासानामप्ययंविधिः॥
यथाभागानुसारेणसेतुःक्षेत्रंविभाज्यते।प्रचारश्चयथांशेनकर्त्तव्यो
क्रियभिःसदेति॥उद्ग्राह्येति॥अधमर्णादुद्धृत्येत्यर्थः॥कात्यायनः॥ध
नंपत्रनिविष्टंतुधर्मार्थंयन्निरूपितं॥उदकंचैवदासश्चनिबंधोयःक्रमा
गतः॥धृतंवस्त्रमलंकारोनानुरूपंतुयद्भवेत्॥यथाकालोपयुक्तानित
थायोज्यानिबंधुभिरिति॥धनमिति।धर्मार्थेनोत्सृज्यपत्रेलिखितमित्य
र्थः॥उदकंकूपादिगतं॥निबंधोवृत्तिः॥नानुरूपंविभागयोग्यं॥भ्रात्रादि
वंचनयास्थापितद्रव्यस्यविभागमाहयाज्ञवल्क्यः॥अन्योन्यापहृतं
द्रव्यंविभक्तंयत्तुदृश्यते॥तत्पुनस्तेसमैरंशैर्विभजेरन्नितिस्थितिः॥
अन्योन्यापहृतंज्येष्ठकनिष्ठाद्यपहृतं॥यत्तुमनुः॥योलोभाद्विनिकु
र्वीतज्येष्ठोभ्रातॄन्यवीयसः॥सज्येष्ठःस्यादभागश्चनियंतव्यश्चरा
जभिरिति॥तत्रापिज्येष्ठपदंदंडापूपिकनीत्यादायादमात्रोपलक्षकं॥
ज्येष्ठस्यापिदोषःकिमुतयवीयसामित्यर्थः॥अतएवगौतमः॥योवै
भागिनंभागान्नुदतेचयतएवैनंसपरिदिचेनंनन्वयतेथपुत्रमथपौत्रं

चयतइति॥भागिनंभागार्हंभागान्नुदतेःपाकरोतिसतुनरएनंवोत्तारंचयतेनाशयति॥यदितंननाशयतितस्तुत्रंपौत्रंवानाशयतीत्यर्थः॥नारदः॥विभक्तेनैवयस्यासीत्तत्तस्यैवधनंभवेत्॥हृतंनष्टंचयल्लब्धंप्रागुक्तंचपुनर्भवेदिति॥प्रागुक्तंदायादःमध्येकेनचिल्लब्धादितंपुनर्भवेद्विभागइतिशेषः॥मनुः॥विभागेतुकृतेकिंचित्सामान्यंयत्नुदृश्यते॥नासौविभागोविज्ञेयःकर्त्तव्यःपुनरेवहीति॥केनचिद्विभागस्यापलापेनि र्णयकान्याहयाज्ञवल्क्यः॥विभागनिह्नवेज्ञातिबंधुसाक्ष्यभिलेखितैः॥विभागभावनाज्ञेयागृहक्षेत्रैश्चयौतकैः॥यौतकैःपृथक्तैर्गृहक्षेत्रैरितिविशेषणविशेष्यभावः॥नारदः॥विभागधर्मसंदेहेदायादीनांविनिर्णये॥ज्ञातिभिर्भागलेख्येनपृथक्कार्यप्रवर्त्तनात्॥सएव॥भ्रातॄणामविभक्तानामेकोधर्मःप्रवर्त्तते॥विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक्॥अत्राविभक्तानामित्युद्देश्यसमर्पकं॥भ्रातॄणामितितुनविशेषणत्वादविवक्षितं॥तेनपितृपितामहपुत्रपौत्रपितृव्यभ्रातृभ्रातृपुत्रादिष्वविभक्तेष्वेकएवधर्मः॥अत्रदेशकालकर्त्रादीनामैक्येकर्मणानेकप्रयोगविषयिणीन्यायेनप्राप्तापितन्त्रताविभक्तकर्तृभेदेपिवचनेनबोध्यते॥तेनश्रौतस्मार्त्ताग्निसाध्यास्तावद्धर्माअविभक्तानांपृथगेवआहवनीयत्वावसथ्यादीनांसंबंधिकत्वभेदात्॥एवंश्राद्धमपिपितृव्यभ्रातृपुत्रादीनाममावास्यादौदेवताभेदात्पृथगेव॥भ्रातॄणांनिरग्निकानांतंत्रेणैवदैवतैक्यात्॥प्रवासादिनादेशभेदेतुपृथगेव॥साग्निकानामग्निसाध्यान्यपृथगेव॥गृहस्थदेवतापूजावैश्वदेवादितुतंत्रेणैव॥अतएवशाकलः॥एकपाकेनवसतामेकंदेवार्चनंगृहे॥वैश्वदेवंतथैवैकंविभक्तानांगृहेगृहेइति॥यत्तुपारिजातेआश्वलायनः॥एकपाकेनवसतांविभक्तानामपिप्रभुः॥एकस्तुचतुरोयज्ञान्कुर्याद्भाग्यत्पूर्वकान्॥अविभक्ताविभक्ताश्चपृथक्पाकाहिजातयः॥कुर्युःपृथक्पृथग्यज्ञान्भोजनात्प्राग्दिनेदिनेइति॥तत्संसृष्टिपरं॥विभक्तानामप्येकपाकेनवसतामित्यनेनविभक्ताअविभक्ताश्चेत्यनेनचतत्प्रतिपादनात्॥अतःसंसृष्टिनांकदाचित्पृथक्पाकेपृथग्महायज्ञाः॥वाग्यज्ञोब्रह्मयज्ञः॥

तत्पूर्वकानित्यतद्गुणसंविज्ञानः॥तद्गुणसंविज्ञानेतुवाग्यज्ञेस्यान
र्थकं॥प्रथमत्यागेकारणाभावादितिन्यायादेवचतुर्णांप्राप्तिसंभवात्
॥अतोब्रह्मयज्ञःपृथगेवकार्यः॥इदंतुवचनद्वयंशिष्टैस्तथानादृयते
॥यानितुधर्मप्रवृत्तौवचांसि॥अविभक्ताःसुताःपित्रोरेकंकुर्युर्मृताहिकं
॥देशांतरेपृथक्कुर्युर्दर्शश्राद्धानुमासिकं॥ग्रामांतरंव्रजेयुश्चेद्विभक्ताः
सदैवहि॥दर्शंचमासिकंश्राद्धंकुर्युःपित्रोःपृथक्पृथक्॥अविभक्ताःपृथ
ग्ग्रामाःस्वस्वार्जितधनाशिनः॥कुर्युस्तेभ्रातरःश्राद्धंपार्वणंचपृथक्पृथ
गिति॥यच्चस्मृतिसमुच्चये॥वैश्वदेवःक्षयाहश्चमहालयविधिस्तथा॥
देशांतरेपृथक्कार्योदर्शश्राद्धंतथैवच॥तान्यपिदेशांतरस्थसंसृष्टिविष
याणीतिकेचित्तुतस्त्वेतानिनिर्मूलान्येव॥अथवादेशकालकर्त्रादी
नामैक्येन्यायेनप्राप्तातंत्रता॥कर्तृभेदेतुवाचनिकी॥देशभेदेतुवचन
स्यन्यायस्यचाभावात्पृथगेवश्राद्धादीनियुक्तिमूलकानिकेनचित्कृता
नीतिदिक्॥अन्यान्यपिविभागलिंगान्याहनारदः॥साक्षित्वंप्रातिभा
व्यंतुदानंग्रहणमेवच॥विभक्ताभ्रातरःकुर्युर्नाविभक्ताःपरस्परं॥दा
नग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः॥विभक्तानांपृथक्ज्ञेयाःपाकधर्मा
गमव्ययाः॥येषामेताःक्रियालोकेप्रवर्त्तंतेस्वरिक्थिषु॥विभक्तानव
गच्छेयुर्लेख्यमप्यंतरेणतानिति॥दानग्रहणेऋणविषये॥तएवदान
ग्रहणेद्वितीयश्लोकेन्यूद्येतेस्पष्टतार्थं॥पश्वादिप्रतिग्रहाविभक्तानांपृ
थक्पृथगनुष्ठिताएवमस्वत्वोत्पादकाः॥अविभक्तानांत्वेकेनकृताः
परस्यापिस्वत्वजनकाइत्यर्थः॥दानधर्मोलेख्यादिः॥आगमोमूलकृ
ल्यप्रवेशादि॥बृहस्पतिः॥पृथगायव्ययधनंकुसीदंचपरस्परं॥वणिक्
पथंचयेकुर्युर्विभक्तास्तेनसंशयः॥वणिक्पथंवाणिज्यं॥याज्ञवल्क्यः॥
भ्रातॄणामथदंपत्योःपितुःपुत्रस्यचैवहि॥प्रातिभाव्यमृणंसाक्ष्यमविभ
क्तेनतुस्मृतं॥एतल्लिंगाभावेतुदिव्यं॥एषामन्यतमाभावेदिव्यान्यतम
मुच्यतइतितेनैवोक्तत्वात्॥यत्तुवृद्धयाज्ञवल्क्यः॥विभागधर्मसंदेहे
बंधुसाक्ष्यभिलेखितैः॥विभागभावनाकार्यानभवेद्दैविकीक्रियेति॥त
ल्लिंगांतरसद्भावपरं॥कथंचिदविभक्ताविभक्तसंदेहानपगमेपुनर्विभा
गमाहमनुः॥विभागेयत्रसंदेहोदायादानांपरस्परं॥पुनर्विभागःकर्त्त

न्यः पृथक्स्थानस्थितेरपि॥ विभक्तकृत्यमाह नारदः॥ यद्येकजाताबह
वः पृथग्धर्माः पृथक्क्रियाः॥ पृथक्कर्मगुणोपेतानचेत्कार्येषु संमताः॥
स्वभावाद्यदिदद्युस्ते विक्रीणीयुरथापि वा॥ कुर्युर्यथेष्टं तत्सर्वं आशास्ते
स्वधनस्य वा इति॥ धर्मोवैधाः पंचमहायज्ञाद्याः क्रियाः॥ वाणिज्याद्यालौ
किक्यः कर्मगुणाः कर्मसाधनानि गृहोपस्करादीनि॥ एतेषां पार्थक्येन
विभागो लक्ष्यते॥ ते निभक्ताः परस्परानुमतिं विनापि दानविक्रयादि कुर्यु
रित्यर्थः॥ यत्तु बृहस्पतिः॥ अविभक्ता विभक्ता वा दायादाः स्थावरे समाः॥
एकोह्यनीशः सर्वत्रदानाधमनविक्रये इति॥ तद्व्यांशे विभक्तानामप्य
विभक्तसेत्राद्युत्पन्नसस्यादिदानादावनुमतिं विनाधिकारप्रतिषेधार्थ
मिति मदनः॥ विभक्ताविभक्तसंदेहनिरासार्थं विभक्तानुज्ञयाव्यवहा
रसौकर्यार्थमिति विज्ञानेश्वरादयः॥ स्वेच्छया विभक्तं पुनश्चाविवदमानं
मत्स्याहस एव॥ स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत्॥ सराज्ञांशे
स्वकेस्थाप्यः शासनीयो निबंधकृत्॥ अनुबंधो निर्बंधः॥ अथ संप्रतिबंध
दायहरणक्रमः॥ तत्र विभक्तस्यासंसृष्टिनो धनग्रहणक्रममाह या
ज्ञवल्क्यः॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा॥ तत्सुता गोत्रजा
बंधुशिष्यसब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः॥ स्व
र्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिरिति॥ पत्नी पतिव्रता धनहारिणी
तव्यभिचारिणी॥ पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी तिकात्याय
नोक्तेः॥ विधवा यौवनस्था चेन्नारी भवति कर्कशा॥ आयुष्यक्षपणार्थं तु
दातव्यं जीवनं तदेति हारीतोक्तेः॥ प्रजापतिः॥ पूर्वं मृता त्वग्निहोत्रं मृते
भर्तरि तद्धनं॥ लभेत्पतिव्रता नारी धर्म एष सनातनः॥ अग्निहोत्रम
ग्नीन्॥ ससव॥ जंगमं स्थावरं वापि कुप्यं हेमरसाबरं॥ आदाय दापये
च्छ्राद्धं मासषाण्मासिकाब्दिकं॥ पितृव्यगुरुदौहित्रान्भर्तुः स्वस्त्री
यमातुलान्॥ पूजयेत्कव्यपूर्ताभ्यां वृद्धाश्चाप्यतिथींस्त्रियः इति॥ कु
प्यं त्रपुसीसादि॥ यत्तु बृहस्पतिः॥ यद्विभक्ते धनं किंचिदाध्यादि विविधं
स्मृतं॥ तज्जा यास्थावरं मुक्त्वा लभेत मृतभर्तृका॥ रत्नस्यापि कृते च्यंशे
न स्त्री स्थावरमर्हतीति॥ तद्दुहितृमतीतु स्थावरमपि लभत इति स्मृतिचं
द्रिकायां॥ दायादानुमतिं विनास्थावरविक्रयादिनिषेधपरमिति माधवः।

यत्तुकात्यायनः॥मृतेभर्त्तरिभर्त्रंशंलभेतकुलपालिका॥यावज्जीवंन
हिस्वाम्यंदानाधमनविक्रयइति॥तद्धिचारणाद्यर्थदानादिनिषेधप
॥अदृष्टार्थेदानतदुपयोग्याधमनादितुभवत्येव॥स्थावरंजंगमंचेत्या
दिपूर्वोक्तवाक्यात्॥व्रतोपवासनिरताब्रह्मचर्येव्यवस्थिता॥दमदान
रतानित्यंअपुत्रापिदिवंव्रजेदितिकात्यायनोक्तेश्च॥यदपिसएव॥अदायकं
राजगामियोषिद्भृत्यौर्ध्वदेहिकं॥अपास्यश्रोत्रियद्रव्यंश्रोत्रियेभ्यस्त
दर्पयेदिति॥यदपिनारदः॥अन्यत्रब्राह्मणात्किंचिद्राजाधर्मपरायणः
तत्स्त्रीणांजीवनंदद्यादेषदायविधिःस्मृतइति॥तदवरुद्धस्त्रीपरं॥पत्नी
पदाश्रवणात्॥यत्तुनारदः॥भ्रातॄणामप्रजाःप्रेयात्कश्चिच्चेत्प्रव्रजेतवा
विभजेरन्धनंतस्यशेषास्त्रीतुधनंविना॥भरणंचास्यकुर्वीरन्स्त्रीणा
माजीवनक्षयात्॥रक्षन्तिशय्यांभर्तुश्चेदाच्छिन्द्युरितरास्वितितुतदवि
भक्तसंसृष्टमृतस्त्रीपरं॥तत्क्रमेपाठादितिमदनः॥कात्यायनः॥स्व
र्यातेस्वामिनिस्त्रीतुग्रासाच्छादनभागिनी॥अविभक्तेधनांशंतुप्रा
प्नोत्यामरणांतिकं॥अविभक्तपदंसंसृष्टस्याप्युपलक्षकं॥तुशब्दोवा
शब्दार्थे॥तेनपक्षद्वयं॥तत्रान्त्यःपत्नीपरः॥आद्योवरुद्धापरइतिमद
नः॥एतद्व्यवस्थामूलंचिंत्यं॥तात्त्विकींतुव्यवस्थामाहसएव॥भोक्तु
मर्हतिकृत्स्नांशंगुरुशुश्रूषणेरता॥नकुर्याद्यदिशुश्रूषांचैलंपिंडंनियो
जयेदिति॥गुरुःश्वशुरादिः॥यदिच्छायामंशभाक्॥अन्यथाग्रासाच्छा
दनमात्रमित्यर्थः॥सएव॥अपकारक्रियायुक्तानिर्लज्जाचार्थनाशिनी
॥व्यभिचाररतायाचस्त्रीधनंनचसार्हति॥यत्तु॥एवमेवविधिंकुर्याद्यो
षित्सुपतितास्वपि॥वस्त्रान्नमासांदेयंतुवसेयुश्चगृहान्तिकइति॥तद्भ
र्त्रंपरमितिग्रन्थकर्त्ता॥एवंविधिंपतितस्यागरूपशंकितव्यभिचाराया
अपिभरणमात्रमेव॥विधवायौवनस्थाचेन्नारीभवतिकर्कशा॥आ
युषःक्षपणार्थंतुदातव्यंजीवनंतदेतिहारीतोक्तेः॥कर्कशाशंकितव्य
भिचारेतिमितास्वरायां॥तत्त्विदंसंमतापत्नीधनग्राहिणीति॥अने
कास्तुताविभज्यगृह्णीयुः॥तस्याअभावेदुहिता॥अतएवमनुः॥यथै
वात्मातथापुत्रःपुत्रेणदुहितासमा॥तस्यामात्मनितिष्ठंत्यांकथमन्यो
धनंहरेत्॥दुहितरोनेकाश्चेद्विभज्यगृह्णीयुः॥तत्रापिकाचिदूढाका

चिदनूढाचेदनूढैव॥पत्नीभर्तुर्धनहरा यास्यादव्यभिचारिणी॥तद
भावेतुदुहितायद्यनूढाभवेत्तदेतिकातीयात्।ऊढातुकाचित्सधना
परानिर्धनाचेत्सैवलभेत॥स्त्रीधनंदुहितृणामप्रत्तानामप्रतिष्ठिता
नांचेतिगौतमोक्तेः॥अप्रतिष्ठानिर्धनाः॥स्त्रीपदंपितुरप्युपलक्षकमि
तिसांप्रदायिकाः॥दुहित्रभावेदौहित्रः॥अपुत्रपौत्रसंतानेदौहित्रा
धनमाप्नुयुः॥पूर्वेषांतुस्वधाकारेपौत्रादौहित्रकामताइतिविष्णूक्तेः
॥दौहित्राभावेपिता॥तदभावेमाता॥तथाचकात्यायनः॥अपुत्रस्या
स्यकुलजापत्नीदुहितरोपिवा॥तदभावेपितामाताभ्रातापुत्राःप्रकी
र्तिताः॥विष्णुश्च॥अपुत्रधनंपत्न्यभिगामि॥तदभावेदौहित्रगामी॥त
दभावेपितृगामि॥तदभावेमातृगामि॥तदभावेभ्रातृगामि॥तदभावे
भ्रातृपुत्रगामि॥तदभावेसकुल्यगामीति॥यत्तुविज्ञानेश्वरःद्वंद्वापवा
दकेपितरावित्येकशेषेक्रमाप्रतीतावपितदर्थबोधकविग्रहवाक्येमा
तृशब्दस्यपूर्वनिपातादपवादद्वंद्वक्रमानुसारात्पितुःपुत्रांतरसाधार
ण्यात्॥मातुस्त्वसाधारण्याच्चादौमातुस्तदभावेपितुर्धनग्रहणमूचे
॥तदेतद्वचोविरोधादपास्तं॥विग्रहवाक्येमातृशब्दपूर्वनिपातेप्येकशे
षस्यद्वंद्वैकल्पिकत्वेनतदपवादत्वेसाधारण्यासाधारण्ययोःक्र
मनियामकत्वमानाभावाच्च॥मातुरभावेभ्रातासोदरः॥तदभावेतत्
पुत्रः॥यत्तुविज्ञानेश्वरादयः॥सोदराभावेभिन्नोदरातदभावेसोदर
सुताइत्याहुः॥तन्न॥भ्रातृपदस्यसोदरेशक्त्याभिन्नोदरेचगौण्या
वृत्तिद्वयविरोधात्॥केचित्तुभ्रातरइत्यत्रभ्रातृपुत्रौस्वसृदुहितृ
भ्यामित्यनुशासनात्॥भ्रातरश्चस्वसारश्चइतिविरूपैकशेषेणभ्रा
तृभावेभगिन्यइत्याहुः॥तन्न॥विरूपैकशेषमानाभावात्॥भ्रातृपु
त्राअपिपितृव्यमरणकालेजीवत्पितृकतयासंज्ञानधनसंबंधाश्चे
दनेकपितृकाणांतुपितृतोभागकल्पनेतिन्यायेनपितृमंशंपितृव्या
तैरःसहविभाज्यगृण्हीयुः॥भ्रातृपुत्राभावेगोत्रजाःसपिंडाः॥तत्रा
प्यादौपितामही॥मातर्यपिचवृत्तायांपितुर्माताहरेद्धनमितिमनू
क्तेः॥यद्यपीयंमातुरनंतरंश्रुतातथापिबद्धक्रमभ्रातृपुत्रांतेषुमध्ये
निवेशायोगाद्रागंतूनांमतेनिवेशइतिवद्भ्रातृपुत्रांतेनिवेश्या॥तद

भावेभगिनी॥अनंतरःसपिंडाद्यस्तस्यतस्यधनंभवेदितिमनूक्तेः॥
बहवोज्ञातयोयत्रसकुल्याबांधवास्तथा॥यस्त्वासन्नतरस्तेषांसोन
पत्यधनंहरेदितिबृहस्पत्युक्तेः॥तस्याअपिभ्रातृगोत्रउत्पन्नत्वेनगो
त्रजताविशेषाच्च॥सगोत्रतापरंनास्ति॥नचसात्रधनग्रहणप्रयोज
कत्वेनोक्ता॥तदभावेपितामहसपत्नभ्रातरौविभज्यगृह्णीतः॥स्वज
नकजनकत्वेनस्वजनकजन्यत्वेनचसमानप्रत्यासन्नेः॥प्रत्यासत्ति
साम्येपाठक्रमाद्यणुविशेषांतराभावेवान्यत्राप्येवमेव॥तेनतयोर
भावेप्रपितामहपितृव्यभिन्नोदरभ्रातृपुत्राःविभज्यगृह्णीयुः॥सर्वे
सपिंडाःसमानोदकाश्चहिप्रत्यासत्तिक्रमेणतांश्चाहमनुः॥सपिंड
तातुपुरुषेसप्तमेविनिवर्त्तते॥समानोदकभावस्तुजन्मनाम्नोरवेद
नइति॥सप्तमेनीतेइत्यर्थः॥सोदकाभावेबंधवः॥तेचस्मृत्यंतरे॥आ
त्मपितृष्वसुःपुत्राआत्ममातुष्वसुःसुताः॥पितुर्मातुलपुत्राश्चवि
ज्ञेयाःपितृबांधवाः॥मातुःपितृष्वसुःपुत्रामातुर्मातृष्वसुःसुताः॥मा
तुर्मातुलपुत्राश्चविज्ञेयामातृबांधवाः॥अत्रक्रमःपाठिकएव॥न
नुपत्न्यादीनांसर्वेषामृतनिरूपितानामेवधनाभावेबांधवानाम
पितथैवास्तु॥अतःकथंपितुर्मातुलस्यबांधवानांधनसंबंधः॥पितुः
पितृष्वसुःपुत्राइत्यादितुसंज्ञासंज्ञिसंबंधमात्रार्थंनधनसंबंधार्थ
मितिचेत्॥उच्यते॥विनाप्येतद्वचनंपितृमातुलपितृपितृव्यादिष्व
पिपितृमातृबांधवेष्वपियोगेनैवतच्छब्दप्रवृत्तिसंभवेसंज्ञासंज्ञि
संबंधबोधनानर्थक्यापत्तिः॥तेनबंधूनुद्दिश्यधनसंबंधविधौपितृ
मातृबंधुप्रापणेनैववोधवत्ता॥बंधूद्देशेनाशौचादिविधावप्येवमेवे
तिदिक्॥बंधूनामभावआचार्यस्तदभावेशिष्यःपुत्राभावेप्रत्यासन्नः
॥सपिंडस्तदभावआचार्यस्तदभावेतेवासीत्यापस्तंबोक्तेः॥शिष्याभा
वेसहाध्यायी॥तदभावेश्रोत्रियः॥श्रोत्रियाब्राह्मणस्यानपत्यस्यरिक्थं
भजेरन्नितिगौतमोक्तेः॥तदभावेन्योब्राह्मणः॥सर्वेषामप्यभावेतुब्रा
ह्मणारिक्थभागिनः॥त्रैविद्याःशुचयोदांतास्तथाधर्मोनहीयतइति
कात्यायनात्॥नारदश्च॥सर्वेष्वादायकंराजाहरेद्ब्रह्मस्ववर्जितं॥आदा
यिकंतुब्रह्मस्वंश्रोत्रियेभ्यःप्रदापयेत्॥बृहस्पतिः॥येपुत्राःक्षत्रविट्

शूद्रापत्नीभ्रातृविवर्जिताः॥तेषांधनहरोराजासर्वेषामपिपतिर्हिसः॥य
त्यादिरिक्थेविशेषमाहयाज्ञवल्क्यः॥वानप्रस्थयतिब्रह्मचारिणांरिक्थ
भागिनः॥क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥ब्रह्मचारीनैष्ठि
कः॥उपकुर्वाणस्यतुपित्रादयएव॥धर्मभ्राताप्रतिपन्नोभ्राता॥एकती
र्थःएकाश्रमी॥धर्मभ्राताचासावेकतीर्थीतिकर्मधारयः॥आचार्यादीनां
प्रातिलोम्येनेतिमदनः॥मृतस्यरिक्थग्राहिणायेनकेनापिराजपर्यन्तेनौ
र्ध्वदैहिकंदशाहांतंकार्यं॥तथाचविष्णुः॥यश्चार्थहरःसपिंडदायीस्मृत
इति॥निरूपितंचेदंश्राद्धमयूखेऽधिकारिनिर्णयेमया॥ अथसंसृष्टिनिर्ण
यः॥तत्रसंसर्गमाहबृहस्पतिः॥विभक्तोयःपुनःपित्राभ्रात्रावैकत्रसंस्थि
तः॥पितृव्येणाथवाप्रीत्यासतत्संसृष्टउच्यते॥अत्रपितृभ्रातृपितृव्यैरे
वसहसंसृष्टतानान्यैर्नवचनेऽनुपादानादितिमिताक्षरादिषु॥विभाग
कर्त्तृसामानाधिकरण्येनैवसेतियुक्तं॥पित्रादिपदानितुविभाग कर्त्तृ
मात्रलक्षकाणिअर्द्धपेतवैदिमितोत्पन्नेबर्हिर्वेदीतिवत्॥अन्यथावाक्य
भेदात्।तेनपत्नीपितामहभ्रातृपौत्रपितृव्यपुत्रादिभिरपिसहसंसृष्टता
भवति॥विभक्तोयःएकत्रस्थितःससंसृष्टइतिसामानाधिकरण्याद्विभक्त
भ्रात्रोःपुत्रादीनांनसंसर्गः॥विद्यमानंभाविवाधनमावयोःपुनर्विभागाव
धिसाधारणमित्याकारिकाबुद्धिरिच्छावासंसर्गः॥तत्रसंसृष्टिनांपुनर्वि
भागेविशेषमाहमनुः॥संसृष्टाःसहजीवंतोविभजेरन्पुनर्यदि॥समस्त
त्रविभागःस्याज्ज्यैष्ठ्यंतत्रनविद्यते॥अत्रसमस्तत्रविभागःस्यादित्यने
नैववैषम्येनिरस्तेपुनर्ज्यैष्ठ्यप्रतिषेधोज्यैष्ठ्यकृतमेववैषम्यंनास्ति॥संसर्ग
कालीनद्रव्यन्यूनाधिक्यकृतंतुविभागेवैषम्यमस्त्येवेतिज्ञापनार्थइ
तिकेचित्॥ज्यैष्ठ्यमित्यादेरर्थवादमात्रत्वात्द्रव्यन्यूनाधिक्येपिसम
एवभागः॥आचारोप्येवं॥तेनाचारमूलकत्वेस्यवचसःसंभवतितद्विरु
द्धश्रुतिकल्पनमन्याय्यं॥व्यवहारशास्त्रस्यव्याकरणवल्लोपेनाचारमू
लकत्वाच्चेतितुपरे॥बृहस्पतिः॥संसृष्टिनांतुयःकश्चिद्विद्याशौर्यधना
दिभिः॥प्राप्नोतितस्यदातव्योद्व्यंशःशेषाःसमांशिनः॥अर्जकस्यद्वौभा
गावित्यनेनैवभागद्वयसिद्धावसंसृष्टविभागेपितृद्रव्याविरोधेवार्जनेभा
गद्वयंसंसृष्टिविभागेतुसंसृष्टधनविरोधेनाप्यर्जनेभागद्वयमित्यर्थवदे

तद्वचनइतिमदनः॥संसृष्टिधनहरणाधिकारिणमाहयाज्ञवल्क्यः॥सं
सृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः॥पत्नीदुहितरइत्यादेरपवादोयं
नायमर्थः॥संसृष्टधनहरणाधिकारितावच्छेदकंनपत्नीत्वादि॥किंतु
संसृष्टित्वमिति॥यत्तुविज्ञानेश्वरमदनादयोःपवादस्योत्सर्गसमानविष
यत्वनियमात्पूर्वोक्तस्वर्यातस्यापुत्रस्येत्यतत्पदानुषंगाच्चैतदपिपुत्र
पौत्रप्रपौत्रहीनविषयं।अतस्तादृशमृतसंसृष्टिसन्निहितयसादिस
द्भावेप्यन्यःसंसृष्टोनगृह्णीयादिति।तन्निंत्यं॥तेनविनापिगतेसंभव
त्यामनुषंगेमानाभावात्॥समानविषयत्वंतुनसर्वांशेपेक्षितंकिंतुय
थाकथंचित्मृतसपिंडविषयतया।अपुत्रस्येतिपदस्यानुषंगाभावेस्व
र्यातस्येत्यस्याप्यनुषंगाभावेनमृतस्येतिनलभ्येतेतिचेन्नह्रीयेतांश
प्रदानतः॥म्रियेतान्यतरोवापीतिवक्ष्यमाणमनूक्त्यातल्लाभात्॥अनु
षंगेतुपित्रासहसंसृष्टासंसृष्टिनोःपुत्रयोःपुत्रपौत्रयोर्वातुल्यांशाप
त्तेः॥तत्रचव्यवहारशास्त्रप्रामाण्यनिदानव्यवहारविरोधः॥नन्वनु
षंगाभावेसपुत्रेप्यन्यतद्वचनप्रवृत्तेअसंसृष्टिपुत्रसंसृष्टिभ्रात्रा
दीनांसमवायेभ्रात्रादिरेवलभेतनपुत्रादिरितिचेन्न॥उत्तरार्द्धव्याख्या
यांपरिहरिष्यमाणत्वात्॥अमुंप्रथमपादार्थमपवदति॥सोदरस्येति
संसृष्टिनःसंसृष्टीत्यनुषज्यते॥मृतसंसृष्टिनोधनंसंसृष्टिनोःसोदरा
सोदरयोःसमवायेसोदरएवसंसृष्टीगृह्णीयादित्यर्थः॥उत्तरार्द्धं॥द
द्याच्चापहरेच्चांशंजातस्यचमृतस्यचेति॥मृतसंसृष्टिनोद्रव्यविभाग
कालेतस्त्यामस्पष्टगर्भायांपश्चादुत्पन्नस्यपुत्रस्यांशंतस्मैसंसृष्ट
पितृव्यादिर्दद्यात्तदसत्वेतुस्वयमेवांशंहरेदित्यर्थः।अत्रपुत्रत्वमा
त्रंपित्र्यांशग्रहणाधिकारितावच्छेदकं।नविभागोत्तरोत्पन्नत्वमप्रयो
जकत्वाद्गौरवाद्देशांतरेविभागात्प्रागुत्पन्नैःज्ञातेचांशानधिकारिताप
त्तेः॥अतःपूर्वोत्पन्नायासंसृष्टिनेपिपुत्रायसंसृष्टोपिपितृव्यादिस्तदं
शंदद्यादेव॥असंसृष्टिसोदरसंसृष्टिभिन्नोदरयोर्विभज्यधनग्रहणमा
हसएव॥अन्योदर्यस्तुसंसृष्टीनान्योदर्योधनंहरेत्॥असंसृष्ट्यपिवा
दद्यात्संसृष्टोनान्यमातृजइति॥अत्रान्योदर्यान्यमातृजादिपदैर्नसप
त्नीभ्रातैवोच्यते॥किंतुपितृव्यादिरपि॥योगाविशेषात्॥अन्यथापितृ

व्यादिभिः संसर्गप्रतिपादनस्यानर्थक्यापत्तेः॥ संसृष्टिनाप्रयुक्तका
र्यान्तराभावात्॥ असंसृष्ट्यपीति देहलीदीपवत्पूर्वोत्तरपदाभ्यां
अन्वेति। संसृष्टपदं चात्रत्वाद्द्रव्यसंसर्गवत् उदरसंसर्गवतश्च सो
दरस्य बोधकं॥ आद्येऽप्यपिशब्दोऽपि तदनंतरं बोध्यः॥ श्लोकोत्ते एव
कारोऽध्याहार्यः॥ न देते वाक्यार्थाः॥ अन्योदर्यो भिन्नोदरः॥ पत्नीपि
तृपितामहसपत्नभ्रातृपितृव्यादिस्संसृष्टी चेद्धनं हरेत्॥ असंसृ
ष्ट्यप्यन्योदर्यो नेति॥ तेनान्योदरस्यान्वयव्यतिरेकाभ्यां संसर्गोध
नग्रहणे कारणमुक्तं॥ असंसृष्ट्यपि संसृष्ट्याख्यः सोदरो गृह्णीया
त्॥ अनेन सोदरत्वमात्रमेव कारणत्वमुक्तं॥ संसृष्टो द्रव्यद्रव्यसंसर्ग
वान् अन्यमातृज एव केवलं न गृह्णीयात् इति॥ तेनैकः संसृष्टत्वेन प
रः सोदरत्वेनेति द्वावपि विभज्य गृह्णीयातामिति निगर्वः॥ असंसृ
ष्टिसोदरपुत्रे संसृष्ट्यसोदरपुत्रे चायमेव पंथाः॥ एवमेवार्थसंसृष्ट्य
धिकारे स्पष्टयति मनुः॥ येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः॥
म्रियेतान्यतरो वापि तस्य भागो न लुप्यते॥ सोदर्या विभजेयुस्तं स
हिताः सहिताः समं॥ भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति॥
हीयेतांश्च मातरगतिपातित्यादिना॥ सोदर्या भ्रातर इत्यन्वयः॥ ये
च संसृष्टाः पत्नीपितृपितामहसपत्नभ्रातृपितृव्यादयः॥ अत्र विशे
षमाह प्रजापतिः॥ अंतर्द्धनं तु यत्किंचित्संसृष्टानां तु तद्भवेत्॥ भूमिं
गृहं त्वसंसृष्टाः प्र गृह्णीयुर्यथांशतः॥ अंतर्द्धनं भूनिक्षेपादिना गो
पितुं शक्यं॥ सुवर्णरूप्यादि संसृष्टो भिन्नोदरो गृह्णीयात्॥ ध्रुवं तु सोद
रभ्रातरः॥ गवाश्वादि तु सोदरासोदर इत्यर्थः॥ भिन्नोदरः संसृष्ट्यगृह
श्वाद्यपीति मदनः॥ तदेतद्वचनानारूढं॥ अंतर्द्धनभूमिगवाद्यन्यतर
मात्रसत्त्वे त्वसंसृष्टोऽपि सोदर एवेति स्मृतिचंद्रिकायां॥ तत्र मानं चिंत्यं॥
सोदरेष्वपि केचित्संसृष्टिनः परे तु न तत्रापि संसृष्टिन एव गृह्णीयुः॥
सोदरत्वसंसृष्टित्वकारणद्वयसद्भावात्॥ अत एव गौतमः॥ संसृष्टिनि
प्रेते संसृष्टो रिक्थभागिनि॥ बृहस्पतिः॥ संसृष्टो यो पुनः प्रीत्या तौ पर
स्परभागिनाविति॥ अत्रायं निर्गलितोऽर्थः॥ पुत्रः पित्रा संसृष्टः संसृ
ष्टो वा कृतत्वे पित्र्यमंशं गृह्णीयात्॥ पुत्रत्वस्यैवांशग्रहणाधिकारिताव

च्छेदकत्वात्॥पुत्रेष्वप्येकःसंसृष्टःपरोनचेत्संसृष्टएव॥संसृष्टिन
स्तुसंसृष्टीसुक्तेः॥संसृष्टपुत्रापुत्रसमवायेपुत्रएव॥दद्याच्चापहृते
च्चांशमित्यत्रव्याख्यातत्वात्॥पुत्रभिन्नसंसृष्टपितृभ्रातृपितृव्या
दीनांसमवायेपितरावेवतत्राप्यादौमाताततःपितेतिमदनः॥भ्रातृपितृ
व्यादयस्तुविभज्यैवगृह्णीयुः॥सर्वेषुसंसृष्टत्वरूपग्रहणाधिकारित
वच्छेदकसद्भावात्॥असंसृष्टभ्रातुःसंसृष्टपितृव्यसपत्नभ्रात्रादी
नांसत्त्वसमवायेपिविभज्यैव॥असंसृष्ट्यपिवादद्यात्संसृष्टोनान्य
मातृजइत्युक्तेः॥केवलायाःपत्न्याएवसंसृष्टत्वेसैवगृह्णीयात्॥संसृ
ष्टिनस्तुसंसृष्टीत्युक्तेः॥संसृष्टयापितयासहान्येषांसंसृष्टिनांस
मवायेतएवनासा॥तथाचसंसृष्टिप्रक्रमेशंखनारदौ॥भ्रातृणामप्र
जाःप्रेयात्कश्चिच्चेत्प्रव्रजेतवा॥विभजेरन्धनंतस्यशेषास्तेस्त्रीधनं
विना॥भरणंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयात्॥रक्षंतिशय्यां
भर्तुश्चेदाच्छिद्युरितरासुतु॥यातस्यदुहितातस्याःपित्र्यंशाद्भरणं
मतं॥आसंस्काराद्भरेद्भागंपरतोविभजेत्सतिः॥अत्रयथायस्यहवि
र्निरुप्तंपुरस्ताच्चंद्रमाभ्युदियात्सत्रेधातंडुलान्विभजेदित्यत्रहवि
रभिउदियादित्यनेनैवहविःप्रत्यवगमान्निर्वीपाविवक्षा॥तथाप्र
क्रमादेवामरणप्रव्रज्याविभागादिषुसंसृष्टिनांकर्तृत्वावगमाद्भ्रा
तृणामित्यविवक्षितं॥यत्तुसंसृष्टिप्रक्रमेशंखः॥स्वर्यातस्यपुत्रस्य
भ्रातृगामिद्रव्यंतदभावेपितरौहरेयातांज्येष्ठावापत्नीतितद्येनपितृ
व्यभ्रातृपुत्रसपत्नभ्रात्रासहसंसर्गस्तन्मरणोत्तरसंसृष्टिमरणेत
दीयासंसृष्टिभ्रात्रादीनांक्रमनियमार्थमितिमदनः।तत्राप्यादौमा
ताततःपितेत्यपिसएव॥ज्येष्ठासंयतापत्न्यभावेभगिनी॥तथाचगु
रुः॥यातस्यभगिनीसातुततोंशंलब्धुमर्हति॥अनपत्यस्यधर्मोय
मभार्यापितृकस्यच॥केचित्तुयातस्यदुहितेतिपेठुः॥दुहितृभगिन्यो
रभावेऽनंतरःसपिंडः॥अथस्त्रीधनं॥मनुः॥अध्यग्न्यध्याहवनिकं
दत्तंचप्रीतिकर्मणि॥भ्रातृमातृपितृप्राप्तंषड्विधंस्त्रीधनंस्मृतं॥ष
डितिन्यूनसंख्याव्यवच्छेदार्थं॥तेनपितृमातृपतिभ्रातृदत्तमध्य
ग्न्युपागतं॥आधिवेदनिकाद्यंचस्त्रीधनंपरिकीर्तितमितियाज्ञवल्की

यमादिपदंसंगच्छते॥विष्णुश्चाधिकमाह॥पितृमातृसुतभ्रातृद
त्तमध्यग्न्युपागतं॥आधिवेदनिकंबंधुदत्तंशुल्कान्वाधेयकमिति॥
अध्यग्न्यादीन्याहकात्यायनः॥विवाहकालेयत्स्त्रीभ्योदीयतेह्यग्नि
संनिधौ॥तदध्यग्निकृतंसद्भिःस्त्रीधनंपरिकीर्त्तितं॥यत्पुनर्लभतेना
रीनीयमानापितुर्गृहात्॥अध्यावहनिकंनामस्त्रीधनंतदुदाहृतं
॥प्रीत्यादत्तंतुयत्किंचिच्छ्वश्र्वावाश्वशुरेणवा॥पादवंदनिकंचैव
प्रीतिदत्तंतदुच्यते॥विवाहात्परतोयत्तुलब्धंभर्तृकुलात्स्त्रिया॥
अन्वाधेयंतुतत्प्रोक्तंयल्लब्धंस्वकुलात्तथा॥गृहोपस्करवाह्यानांदो
ह्याभरणकर्मणां॥मूल्यंलब्धंतुयत्किंचिच्छुल्कंतत्परिकीर्त्तितं॥
गृहोपस्कराद्यलाभेतन्मूल्यंकन्यादानकालेकन्यायैदत्तंतच्छु
ल्कमित्यर्थः॥आधिवेदनिकंविवृणोतियाज्ञवल्क्यः॥अधिविन्नस्त्रि
यैदद्यादाधिवेदनिकंसमं॥नदत्तंस्त्रीधनंयासांदत्तेत्वर्द्धंप्रकल्पयेत्
॥अर्धमिति॥यावताधिवेदनिकद्रव्यसमंभवतितावदित्यर्थः॥दे
वलः॥भर्त्राप्रतिश्रुतंदेयमृणवत्स्त्रीधनंसुतैः॥प्रतिश्रुतंस्त्रियै।स्त्री
भ्योधनदानेविशेषमाह॥कात्यायनः॥पितृमातृपतिभ्रातृज्ञातिभिः
स्त्रीधनंस्त्रियै॥यथाशक्त्याद्विसाहस्राद्दातव्यंस्थावरादृते॥स्था
वरातिरिक्तंसहस्रद्वयपणावधिदेयमितिमदनः॥व्यासोपि॥द्विसा
हस्रःपरोदायःस्त्रियादेयोधनस्यच॥इदंचद्विसाहस्रावधिकंदानं
प्रतिवर्षं॥अनेकवर्षेषुइतोधिकमपिशक्तौस्थावरमपिचदेयमि
त्यपिसएव॥दायादवंचनेदत्तेद्रव्येधारणमात्रार्थंदत्तेचभूषणादौ
स्त्रीस्वत्वंनास्तीत्याहकात्यायनः॥तत्रसोपधियद्दत्तंयच्चयोगवशे
नवा॥पित्राभ्रात्राथपत्यावानचस्त्रीधनमुच्यते॥शिल्पप्राप्तेपित्रा
भिन्नसखादिप्राप्तेपिस्त्रीधनत्वंनास्तीत्याहसएव॥प्राप्तंशिल्पैस्तु
यत्किंचित्प्रीत्याचैवयदन्यतः॥भर्त्तुःस्वाम्यंतदातत्रशेषंतुस्त्रीध
नंस्मृतं॥यत्तुभार्यापुत्रश्चदासश्चनिर्धनाःसर्वएवते॥यत्तेसमधिगच्छं
तियस्यैतेतस्यतद्धनंभवेदितितदपिशिल्पाद्यर्जितधनपरं॥आधिवेद
निकादिष्वप्यस्वातंत्र्यपरमितिनुयुक्तं॥अतएवमनुः।ननिर्हारंस्त्रियःकु
र्युःकुटुंबाद्बहुमध्यकात्।अपिचवित्ताद्धिस्वस्यभर्तुरनाज्ञयेति।निर्हारोव्ययः

॥कस्मिंश्चिद्धनेस्वातंत्र्यमाहकात्यायनः॥ऊढयाकन्ययावापिपत्युः
पितृगृहेपिवा॥भ्रातुःसकाशात्पित्रोर्वालब्धंसौदायिकंस्मृतं॥सौदा
यिकंधनंप्राप्यस्त्रीणांस्वातंत्र्यमिष्यते॥यस्मात्तदानृशंसार्थंतैर्दत्त
मुपजीवनं॥सौदायिकेसदास्त्रीणांस्वातंत्र्यंपरिकीर्त्तितं॥विक्रयेचै
वदानेचयथेष्टंस्थावरेष्वपि॥भर्तृदत्तेस्थावरेतुनस्वातंत्र्यं।भर्त्राप्री
तेनयद्दत्तंस्त्रियैतस्मिन्मृतेपितत्॥सायथाकाममश्नीयाद्दद्याद्वास्था
वरादृतइतिनारदोक्तेः॥भर्त्रादीनांस्त्रीधनेस्वातंत्र्याभावमाहसएव
नभर्त्तानैवचसुतोनपितानभ्रातरोनच॥आदानेवाविसर्गेवास्त्रीधने
प्रभविष्णवः॥यदित्वेकतरोह्येषांस्त्रीधनंभक्षयेद्बलात्॥सवृद्धिकं
सदाप्यःस्याद्दंडंचैवसमाप्नुयात्॥तदेवयद्यनुज्ञाप्यभक्षयेत्प्रीतिपू
र्वकं॥मूलमेवसदाप्यःस्याद्यदासधनवान्भवेत्॥मनुः॥जीवंतीनां
तुतासांयेतद्धरेयुःस्वबांधवाः॥तांच्छिष्याच्चौरदंडेनधार्मिकःपृथि
वीपतिः॥यस्यैजीवतियःस्त्रीभिरलंकारोधृतोभवेत्॥नतंभजेरन्दाया
दाभजमानाःपतंतितइति॥धृतोभर्त्रादिनातस्यैदत्तःस्वत्तयाधृतइ
त्यर्थः।देवलः॥वृत्ति राभरणंशुल्कंलाभश्चस्त्रीधनंभवेत्॥भोक्त्री
चस्वयमेवेदंपतिर्नाहत्यनापदि॥वृथामोक्षेचभोगेचस्त्रियैदद्यात्सवृ
द्धिकं॥पुत्रार्त्तिहरणेपिस्त्रीधनंनभोक्तुमर्हति॥वृत्तिर्जीवनार्थंपित्रा
दिदत्तंधनं॥लाभोवृद्धिः॥मोक्षस्त्यागोदानमितियावत्॥पुत्रपदंकुटुं
बोपलक्षकं॥याज्ञवल्क्यः॥दुर्भिक्षेधर्मकार्येचव्याधौसंप्रतिरोधके
॥गृहीतंस्त्रीधनंभर्त्तानाकामोदातुमर्हति॥अत्रभर्तृग्रहणात्तद्भिन्नेन
दुर्भिक्षाद्यापद्यपिस्त्रीधनंनग्राह्यमित्युक्तं।धर्मकार्यमावश्यकं॥संप्रति
रोधकेबंधने॥कश्चिदकामोदद्यादित्याहदेवलः॥अथचेत्सद्विभार्यः
स्यान्नचतांभजतेपुनः॥प्रीत्यानिसृष्टमपिचपतिर्दाप्यःसतद्बलात्॥
ग्रासाच्छादनवासानामाच्छेदोयत्रयोषितः॥तत्रस्वमाददीतस्त्री
विभागंरिक्थिनस्तदा॥रिक्थिनःसकाशादित्यर्थः॥इदंचसाध्वीपरं॥
दुष्टातुनविभागमर्हति॥तथाचसएव॥अपकारक्रियायुक्तानिर्मर्या
दार्थकाशिका॥व्यभिचाररतायाचस्त्रीधनंनचसार्हति॥सएव॥यत्ता
यैद्रव्यमुत्सन्नंतस्याद्द्रव्यंनियोजयेत्॥स्थानेषुधर्मयुक्तेषुनस्त्रीधर्मेविध

मिंषु॥स्त्रीमरणोत्तरमन्वाधेयाख्यतद्धनग्रहणेअधिकारिव्यव
स्थामाहमनुः॥अन्वाधेयंचयद्दत्तंपत्याप्रीतेनचैवयत्॥पत्यौजीव
तिवृत्तायाःप्रजायास्तद्धनंभवेत्॥प्रजाविशिनष्टिसएव॥जनन्यां
संस्थितायांतुसमंसर्वेसहोदराः॥भजेरन्मातृकंरिक्थंभगिन्यश्च
सनाभयः॥यत्रदुहित्राद्यभावेनपुत्राणामेवसाहित्येनाधिकारःप्रा
प्तस्तत्रतत्साहित्यंयत्रतुकन्यानामेवाधिकारःप्राप्तस्तत्रतत्साहि
त्यमनूद्यते॥ननुकन्यापुत्रयोःपरस्परमप्राप्तसाहित्यंविधीयतइ
तिमिताक्षराशयः॥परेतुअन्वाधेयभर्तृप्रीतिदत्तविषयेकन्यापु
त्रयोरपूर्वंसाहित्यंविधीयतइत्याहुः॥भगिनीषुविशेषमाहमनुः
॥स्त्रीधनंस्यादपत्यानांदुहिताचतदंशिनी॥अप्रत्ताचेत्समूढा
तुलभतेमानमात्रकं॥तदंशिनीपुत्रसमांशिनी॥अप्रत्ताअविवा
हिता॥तस्याःसत्वेऊढामानमात्रंकिंचिन्मात्रंलभतेइत्यर्थः॥अ
प्रत्ताभावेसधवानांभ्रातृसमोंशः॥भगिन्योबांधवैःसार्द्धंविभजेरन्स
भर्तृकाइतिकात्यायनोक्तेः॥दौहित्रेभ्योपिकिंचिद्देयं॥यास्तासां
स्युर्दुहितरस्तासामपियथार्हतः॥मातामह्याधनात्किंचित्प्रदेयं
प्रीतिपूर्वकं इतिमनूक्तेः॥यौतकंत्वनूढानामेवनपुत्राणां॥तथा
चसएव॥मातुस्तुयौतकंयत्स्यात्कुमारीभागएवसः॥यौतकंवि
वाहाग्निकालेपत्यासहैकासनेप्राप्तंयुतयोर्यौतकमितिनिघंटू
क्तेरितिमदनः॥अन्वाधेयभर्तृप्रीतिदत्तभिन्नपूर्वोक्तपारिभाषि
केस्त्रीधनेतुविशेषमाहगौतमः॥स्त्रीधनंदुहितॄणांअप्रत्ताना
मप्रतिष्ठितानांचेति॥अप्रतिष्ठितानिर्धनाः॥ब्राह्मणीकन्यातुसप
त्नमातुरपिधनंगृह्णीयादितिमनुः॥स्त्रियास्तुयद्भवेद्वित्तंपित्राद
त्तंकथंचन॥ब्राह्मणीतद्धरेत्कन्यातदपत्यस्यवाभवेत्॥वाकार
श्चार्थे॥तेनविभज्येतिलभ्यतेब्राह्मणीपदंसमोत्तमजातिकन्यो
पलक्षकमितिकेचिन्मानंतुतत्रापिचांत्यदुहितॄणामभावेदुहितृ
संततिः॥मातृदुहितरोभावेदुहितॄणांतदन्वयइतिनारदोक्तेःभि
न्नमातृकाणांदुहितॄणांदौहित्राणांचअनेकपितृतोभागकल्पनेति
न्यायेनांशकल्पना॥यत्तुयाज्ञवल्क्यः॥मातुर्दुहितरःशेषमृणात्ता

भ्यकृते च य इति॥ तत्राप्यंत्यपदं कन्यासंततिपरमिति केचित्॥ परं
तु दुहित्रभावे पुत्रा एव गृह्णीयुरिति सांप्रदायिकाः॥ दुहित्रादीनाम
भावे पुत्रपौत्राद्या गृह्णीयुः॥ दुहितॄणामभावे तु रिक्थं पुत्रेषु तद्धन
मिति कात्यायनोक्तेः॥ अथ दुहित्रादीनां मातृधनाधिकारः॥ अध्य
ग्न्यध्यावाहनिकमित्यादि पूर्वोक्तं पारिभाषिकस्त्रीधनमेव॥ मातृ
स्वामिकधनमात्रपरत्वे पारिभाषा वैयर्थ्यं तेन स्त्रीधनं स्याद पत्या
नां स्त्रीधनं दुहितॄणामित्यादीनि पूर्वोक्तानि स्त्रीधनपदवंति बृह
तिगौतमादिवचनानि पारिभाषिकपराण्येव यानि तु स्त्रीधनं यदा
वैष्वैकार्थं विभजेरन् मातृकं रिक्थमित्यादीनि नान्यार्थे तत्पराण्ये
व॥ एकमूलकल्पनालाघवात्॥ यत्तु विभजेरन्सुताः पित्रोरूर्ध्वं रि
क्थमृणं समसिति याज्ञवल्क्योक्तं तत्पारिभाषिकातिरिक्तविभाग
र्तनादिलब्धपरं॥ तेन पारिभाषिकातिरिक्तं मातृधनं दुहितृसत्त्वे
च पुत्रादय एव लभेरन्॥ उभयविधसंतत्यभावे तु पारिभाषिकस्त्री
धनं प्रकृत्य विशेषमाह याज्ञवल्क्यः॥ अतीतायामप्रजसि बांधवा
स्तदवाप्नुयुः॥ विवाहभेदेन बांधवव्यवस्थामाह स एव॥ अप्रज
स्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि॥ दुहितॄणां प्रसूता चेच्छेषेषु
पितृगामि तत्॥ भर्तुरभावे। तत्कुले तस्याः प्रत्यासन्ना लभंते पित्र
भावे च पितृकुले तस्याः प्रत्यासन्नः॥ अनंतरः सपिंडाद्यस्तस्य त
स्य धनं भवेदिति मनुना मृतनिरूपिता या एव प्रत्यासत्तेर्धनाधि
कारितावच्छेदकत्वेनाभिधानात्॥ यत्तु मिताक्षरायां॥ भर्त्रभावे
तत्प्रत्यासन्नानां सपिंडानामपि त्वभावे च तत्प्रत्यासन्नानां सपिंडा
नामिति तत्रापि तेनास्याः प्रत्यासन्नास्तत्प्रत्यासन्नास्तद्द्वारा तत्
कुलेन प्रत्यासन्ना इति यावदित्येव व्याख्येयं॥ ब्राह्मादिषु चतुर्ष्व
पीति विधिरयं तेषामेव तं प्रति धर्म्यत्वात्॥ यस्य तु क्षत्रियादेर्गांध
र्वोपि धर्म्यस्तस्य तद्धनमपि भर्तुरेव॥ तथा च मनुः॥ ब्राह्मदैवा
र्षगांधर्वप्राजापत्येषु यद्वसु॥ अतीतायामप्रजसि भर्तुरेव तदिष्यते
यत्त्वस्यै स्याद्धनं दत्तं विवाहेष्वासुरादिषु॥ अतीतायामप्रजसि मातापि
त्रोस्तदिष्यते॥ ब्राह्मादिषु विवाहेषु भर्तुरिष्यते॥ यत्त्वस्यै स्याद्

दत्तविवाहाभावेआसुरादिषुचपित्रोरभावेपारिभाषिकस्त्रीधनेऽधि
कारिणआह बृहस्पतिः॥ मातृष्वसामातुलानीपितृव्यस्त्रीपितृष्वसा
॥श्वश्रूः पूर्वजपत्नीचमातृतुल्याः प्रकीर्त्तिताः॥ यदासामौरसः स्यात्त
त्सुतोदौहित्रएववा॥ तत्सुतोवाधनंतासांस्वस्त्रीयाद्याः समाप्नुयुः
॥दुहितृदौहित्र्योरप्यभावेऽत्रबोध्यः॥ तदभावएवौरस दौहित्रयो
रधिकारात्॥ आसुरादिविवाहेषुबंधुदत्तेषु कात्यायनः॥ बंधुदत्तंबं
धूनांअभावेपुत्रगामितत्॥ शुल्कविषयेतुगौतमः॥ भगिनीशुल्कंसो
दर्याणामूर्ध्वंमातुरिति॥ यत्तुशंखः॥ शुल्कंचाप्ययंबोढेतितद्विवाह
त्प्राङ्मृतायांबोध्यं॥ अत्रविशेषमाह याज्ञवल्क्यः॥ मृतायांदत्तमा
दद्यात्परिशोध्योभयव्ययं॥ एवंदत्तमुक्तंमृतायांकन्यायांस्वस्यतस्याः
पितुश्चव्ययादवशिष्टंभर्त्तागृह्णीयादित्यर्थः॥ क्वचिद्विशेषमाहबौधा
यनः॥ रिक्थंमृतायाःकन्यायागृह्णीयुःसोदराःसमं॥ तदभावेतुतन्मातु
स्तदभावेपितुर्भवेदिति॥ इदंतुविवाहात्प्राङ्मृतायांवाग्दानकालीन
मातामहादिदत्तालंकारादिविषयमितिसांप्रदायिकाः॥ अथानंशाः॥
याज्ञवल्क्यः॥ क्लीबोथपतितस्तज्जःपंगुरुन्मत्तकोजडः॥ अंधोचिकि
त्स्यरोगश्चभर्त्तव्याःस्युर्निरंशकाः॥ तज्जःपतितोत्पन्नः॥ विभागोत्त
रमौषधादिनापुंस्त्वादियुक्तास्त्वंशंलभंतएव॥ विभक्तोसन्नवत्॥
मनुः॥ अनंशौक्लीबपतितौजात्यंधबधिरौतथा॥ उन्मत्तजडमूकाश्च
येचकेचिन्निरिन्द्रियाः॥ निरिंद्रियाघ्राणादिरहिताः॥ नारदः॥ पितृद्वि
ट्पतितःषंढोयश्चस्यादपपात्रितः॥ औरसाअपिनैवांशंलभेरन्क्षे
त्रजास्ततः॥ दीर्घतीव्रामयग्रस्ताजडोन्मत्तपंगवः॥ भर्त्तव्याःस्युः
कुलस्यैतेतत्पुत्रास्त्वंशभागिनः॥ अपपात्रितःराजद्रोहाद्यपराधेन
बंधुभिर्घटस्फोटादिनाबहिष्कृतइतिमदनः॥ व्यवसायार्थंसमुद्रम
ध्यद्वीपांतरगतेतुयुक्तं॥ द्विजस्याब्धौतुनौयातुःशोधितस्यापिसंग्रह
इतिनस्यकलौसंसर्गनिषेधात्॥ राजद्रोहादौघटस्फोटबहिष्कारयोर
विधानाच्च॥ शंखलिखितौ॥ अपपात्रितोरिक्थपिंडोदकादिभ्योवर्त्तेत
इति॥ वसिष्ठः॥ अनंशास्त्वाश्रमांतरंगताइति॥ नैष्ठिकब्रह्मचारिवान
प्रस्थयतयः॥ कात्यायनः॥ अक्रमोढासुतश्चैवसगोत्राद्यश्चजापतेः॥ प्र

व्रज्यावसितश्चैव न रिक्थं तेतु कर्हिचित्॥ सगोत्रादिति गोत्रे योढा
यातस्यां जात इत्यर्थः॥ अक्रमोढासुतः क्षेत्रज कानीनादिरिति केचित्
॥ज्येष्ठायां कन्यायामपरिणीतायां कनिष्ठा कृतविवाहा चेत्तदा ते हि
अपि क्रमोढा शब्देनोच्यते इति तु युक्तं॥ तस्यापि तु सवर्णत्वे शभा
माह स एव॥ अक्रमोढासुतो रिक्थी सवर्णश्च यदा पितुः॥ असवर्णो
प्रसूतश्च क्रमोढायां च यो भवेत्॥ प्रतिलोमप्रसूतायां भर्त्राप्युत्पन्न
पुत्रो नांशभाक्॥ तथा च स एव॥ प्रतिलोमप्रसूता या तस्याः पुत्रो न
रिक्थभाक्॥ ग्रासाच्छादनमत्यंतं देयं तद्बंधुभिर्मतमिति॥ गुणवत्
त्रांतरसत्वे तु इदं तस्यांशग्राहिताम् आह मनुः॥ सर्व एव विकर्मस्था अ
र्हंति भ्रातरो धनमिति॥ बृहस्पतिः॥ सवर्णजोप्यगुणवान्नार्हः स्या
त्पैतृके धने॥ तत्पिंडदाः श्रोत्रिया ये तेषां तदभिधीयते॥ उत्तमर्णाधमर्णे
भ्यः पितरं त्रायते सुतः॥ अतस्तु विपरीतेन तेन नास्ति प्रयोजनं॥ एतेव
नं शारिक्थग्राहिभिर्यावज्जीवं पोषणीयाः॥ सर्वेषामपि तु न्याय्यं दातुं
शक्त्या मनीषिभिः॥ ग्रासाच्छादनमत्यंतं पतितो पि ह्यददद्भवेदिति मनूक्तं
॥अत्यंतं यावज्जीवं भर्तव्यास्ते निरंशका इति पूर्वोक्त याज्ञवल्क्योक्ते
श्च॥ आश्रमांतरगतपतितपुत्रास्तु न कर्तव्याः॥ तथा च वसिष्ठः॥
अनंशास्त्वाश्रमांतरगताः क्लीबोन्मत्तव्याधिताश्च॥ भरणं क्लीबोन्म
त्तानामिति॥ अत्र द्वयोर्भरणश्रवणे तयोः परिसंख्या देवलः॥ मृते पि
त्रि क्लीबकुष्ठ्युन्मत्तजडांधकाः॥ पतितस्तदपत्यं लिंगी दायांशभा
गिनः॥ तेषां पतितवर्ज्येभ्यो भक्तवस्त्रं प्रदीयते॥ लिंगी निषिद्धलिंगधा
री॥ बौधायनः॥ अतीतव्यवहारान् ग्रासाच्छादनैर्बिभृयुरंधजडक्ली
बव्यसनिव्याधितांश्च कर्मिणः पतिततज्जवर्जमिति॥ सन्यासच्युत
तत्पुत्रा अपि न भरणीया इति मदनादयः॥ अनंशपुत्रास्तु निर्दोषा भागं
लभंत एव॥ तेषामेवौरसाः पुत्रा भागहारिणो न तु पतितपत्नीये क
र्मणि कृते ऽनंतरोत्पन्नाः प्रतिलोमासु स्त्रीषूत्पन्नाश्च भागिनस्तत्पु
त्राः॥ पैतामहेप्य इति विष्णूक्तेः॥ औरसाः क्षेत्रजास्तेषां निर्दोषा भाग
हारिण इति याज्ञवल्क्योक्तेश्च॥ तत्कन्यासु पत्नीषु च विशेषमाह स ए
व॥ सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः॥ अपुत्रा योषितश्चै

यांभर्त्तव्याःसाधुवृत्तयः॥निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथैवच॥
व्यभिचारेबहिर्निष्काशनमपोषणंवाप्रातिकूल्येबहिर्निष्कासनमेव
॥भरणंतुकार्यमेवेतिमदनादयः॥इतिश्रीमीमांसकभट्टशंकरात्मजेन
भट्टनीलकंठेनकृतेव्यवहारभास्करेऋणादानं॥ ॥तत्रधनिकस्यप्र
योगप्रकारमाह॥बृहस्पतिः॥परिपूर्णंगृहीत्वाधिंबंधंवासाधुलग्न
कं॥लेख्यारूढंसाक्षिमद्वाऋणंदद्याद्धनीसदा॥यावत्तावत्कमृणंन
शोध्यतेतावदेतद्गृहक्षेत्रादिर्नविक्रयाधिकरणाद्यहंनकरिष्याः
मीतिनिर्बंधोबंधः॥लग्नकःप्रतिभूःसएव॥कुत्सितात्सीदतश्चैवनि
र्विशंकैःप्रगृह्यते॥चतुर्गुणंवाष्टगुणंकुसीदाख्यमतःस्मृतं॥कात्या
यनः॥ऋणिकेनतुयावृद्धिरधिकातंप्रकल्पिता॥आपत्कालकृता
नित्यंदातव्याकारितातुसा॥प्रतिकालंददात्येवशिखावृद्धिस्तुसा
स्मृतेति॥प्रतिकालंप्रतिदिनंप्रतिमासंप्रतिवर्षंवेत्यर्थः॥याज्ञवल्क्यः
॥अशीतिभागोवृद्धिःस्यान्मासिमासिसबंधके॥वर्णक्रमाच्छतंद्वि
त्रिचतुःपंचकमन्यथा॥अन्यथाबंधके॥व्यासः॥सबंधेभागआशी
तःषाष्ठोभागःसलग्नके॥निराधानेद्विकशतंमासलाभउदाहृतः॥या
ज्ञवल्क्यः॥कांतारगास्तुदशकंसामुद्राविंशकंशतं॥दद्युरित्युनरवा
क्यस्यस्यानुषंगः॥दद्युर्वास्वकृतांवृद्धिंसर्वेसर्वासुजातिषु॥विष्णुः
॥योगृहीत्वाऋणंसर्वंप्रदास्यामीतिसामकं॥नदद्याल्लोभतःपश्चाद्वि
नाद्वृद्धिमवाप्नुयात्॥याचितकेवृद्धिमाहकात्यायनः॥योयाचितकमा
दायतमदत्वादिशंव्रजेत्॥ऊर्ध्वंसंवत्सरात्तस्यधनंवृद्धिमवाप्नुया
त्॥कृत्वोद्धारमदत्वायोयाचितस्तुदिशंव्रजेत्॥ऊर्ध्वंमासत्रयात्त
स्यतद्धनंवृद्धिमाप्नुयात्॥स्वदेशेवस्थितोयस्तुनदद्याद्याचितःक्व
चित्॥तेनतोऽकारितांवृद्धिमनिच्छंतंचदापयेत्॥नारदः॥नवृद्धिः
प्रीतिदत्तानांस्यादनाकारिताक्वचित्॥अनाकारितमप्यूर्ध्वंवत्सरा
द्विविवर्द्धते॥कात्यायनः॥प्रीतिदत्तंनवर्द्धेतयावन्नप्रतियाचितं॥
याच्यमानमदत्तंचेद्वर्द्धतेपंचकंशतं॥पण्यंगृहीत्वायोमूल्यमदत्वै
वदिशंव्रजेत्॥ऋतुत्रयस्योपरिष्टात्तद्धनंवृद्धिमाप्नुयात्॥निक्षिप्तं
वृद्धिशेषंचक्रयंविक्रयएवच॥याच्यमानमदत्तंचेद्वर्द्धतेपंचकंश

तं॥ नारदः॥ पण्यमूलं भृतिर्न्यासो दंडो यश्च प्रकल्पितः॥ वृथादाना
क्षिकपणा वर्द्धंते न विवक्षिताः॥ आक्षिकोक्षक्रीडासंबंधी॥ याज्ञव
ल्क्यः॥ दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनं॥ मध्यस्थस्थापितं
तत्स्याद्वर्द्धते न ततः परं॥ बृहस्पतिः॥ हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वृ
द्धिः कुप्यके॥ धान्ये चतुर्गुणा प्रोक्ता शदे बाह्ये लवेषु च॥ शदः पुष्पमू
लफलादि॥ बाह्यो बलीवर्दादिः॥ लवो मेषोर्णाचमरीकेशादि॥ यत्तु
मनुः॥ धान्ये शदे लवे बाह्ये नातिक्रामति पंचतामिति॥ तत्स्याद्गुण्या
दि निषेधपरं॥ कात्यायनः॥ मणिमुक्ताप्रवालालीसुवर्णरजतस्य च॥
तिष्ठति द्विगुणा वृद्धिः फलकेटाविकस्य च॥ केटं कीटभवं पट्टदुकूल
तसरीवस्त्रादि॥ वसिष्ठः॥ ताम्रायःकांस्यरीतीनां त्रपुणः सीसक
स्य च॥ त्रिगुणा तिष्ठते वृद्धिः कालाधिक्यकृतस्य तु॥ व्यासः॥ शाक
कार्पासबीजेषु षड्गुणा परिकीर्तिता॥ कात्यायनः॥ तैलानां चैव सर्वेषां म
द्यानामथ सर्पिषां॥ वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च॥ विष्णुः॥ हि
रण्यस्य द्विगुणा वृद्धिस्त्रिगुणा वस्त्रस्य धान्यस्य चतुर्गुणा रसस्याष्टगु
णा संततिः स्त्रीपशूनामिति॥ पुष्पमूलफलानि च तुलाधृतमष्टगुणमि
ति॥ नारदः॥ ऋणानां सार्वभौमोयं विधिर्वृद्धिकरः स्मृतः॥ देशाचार
स्थितिस्त्वन्या यादृशी यत्र तिष्ठते॥ सार्वभौमः सार्वत्रिकः इदं च द्वैगुण्या
दि सकृत्प्रयोग एव कालांतरेण पुरुषांतरेण तत्रैव रेतःसेकादिना वा
प्रयोगांतरे तु परमवृद्धिरप्यधिका भवति॥ तथा च मनुः॥ कुसीदवृद्धि
र्द्वैगुण्यं नात्येति सकृदाहिता॥ एकप्रयोगमध्ये तरांतरा गृह्यमाणे
पि परमवृद्धेराधिक्यमिति सांप्रदायिका विज्ञानेश्वरादयः॥ अथाधि
विधिः॥ बृहस्पतिः॥ आधिर्बंधः समाख्यातः स च प्रोक्तश्चतुर्विधः॥ जं
गमः स्थावरश्चैव गोप्यो भोग्यस्तथैव च॥ नारदः॥ अधिक्रियत इत्याधिः
स विज्ञेयो द्विलक्षणः॥ कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥ हारी
तः॥ बंधं यथास्थापितं स्यात्तथैव परिपालयेत्॥ अन्यथा नश्यते लाभो
मूलं नश्येद्व्यतिक्रमात्॥ व्यतिक्रम आधिनाशः॥ याज्ञवल्क्यः॥ गो
प्याधिभोगतोवृद्धिः सोपकारेथहापिते इति॥ हापित उपकारासमर्थतां
नीत इत्यर्थः॥ कात्यायनः॥ अकाममननुज्ञातमाधिं यः कर्म कारयेत्

भोक्ता कर्मफलं दाप्यो वृद्धिं वापि लभेत सः॥ कर्मकारयेदुपयुंजीत॥ कर्म
फलं भाटकं॥ याज्ञवल्क्यः॥ नष्टो देयो विनष्टश्च दैवराजकृताद्दते॥ न
ष्टो विकृतिंगतः पूर्ववत्कृत्वा देयः॥ बृहस्पतिः॥ भुक्ते त्वसारतां प्राप्ते मूल
हानिः प्रतीयते॥ आधेर्विनाशे तन्मूल्यं दातव्यमित्याह व्यासः॥ गृहीत
दोषात्कृष्टश्चेद्वधाहे माद्रिको भवेत्॥ ऋणं सलाभं संशोध्य तन्मूल्यं दा
पयेद्धनी॥ नारदः॥ विनष्टे मूलनाशः स्याद्दैवराजकृताद्दते॥ मनुः॥ मूल्ये
न तोषयेच्चैवमाधिस्तेनोन्यथा भवेत्॥ बृहस्पतिः॥ दैवराजोपघातेन
यत्राधिर्नाशमाप्नुयात्॥ तत्राधिं दापयेद्द्यात्सोदयं वा धनं ऋणी॥ व्या
सः॥ दैवराजोपघाते तु न दोषो धनिकः क्वचिदिति॥ कात्यायनः॥ न चे
द्धनिकदोषेण निपतेद्धा म्रियेत वा॥ आधिमन्यं स दाप्यः स्याद्धणान्मु
च्येत नर्णिकः॥ याज्ञवल्क्योपि॥ आधेः स्वीकरणात्सिद्धी रक्षमाणोप्यसा
रतां॥ यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ नारदः॥ आधिस्तु द्वि
विधः प्रोक्तो जंगमः स्थावरस्तथा॥ सिद्धिरस्योभयस्यापि भोगो यद्यस्ति
नान्यथा॥ वसिष्ठोपि॥ तुल्यकाले निसृष्टानां लेख्यानामाधिकर्मणि॥ ये
न भुक्तं भवेत्पूर्वं तस्याधिर्बलवत्तरः॥ स एव॥ यद्येकदिवसे तौ तु भोक्तुका
मावुपागतौ॥ विभज्याधिः समस्तत्र भोक्तव्य इति निश्चयः॥ कात्यायनः
॥ आधिमेकं द्वयोर्यस्तु कुर्यात्तं प्रतियद्भवेत्॥ तयोः पूर्वकृतं ग्राह्यं तत्कर्ता
चौरदंडभाक्॥ याज्ञवल्क्यः॥ आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते
॥ काले कालकृतो नश्येत्फलभोगो न नश्यति॥ बृहस्पतिः॥ हिरण्ये द्वि
गुणीभूते पूर्णे काले धृतावधौ॥ बंधकस्य धनी स्वामी द्विसप्ताहं प्रतीक्षतः॥
व्यासः॥ गोप्याधिर्द्विगुणादूर्ध्वं कृतकालः कृतावधेः॥ आवेदयित्वर्णिक
तुर्भोक्तव्यस्तदनंतरं॥ बृहस्पतिः॥ हिरण्ये द्विगुणीभूते मृते नष्टे धम
र्णिके॥ द्रव्यं तदीयं संगृह्य विक्रीणीत ससाक्षिकं॥ याज्ञवल्क्यः॥ चरि
त्रबंधककृतं सवृद्ध्या दापयेद्धनं॥ सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदा
पयेत्॥ धनिकविश्वासेनाल्पद्रव्यार्थमतिबहुमूल्यस्यापि तश्चेद्दणि
कविश्वासेन वा स्वल्पमूल्योपि बहुद्रव्यार्थस्यापि तश्चेच्चरित्रबंध
कं॥ अथवा चरित्रं गंगादेः स्नानादिपुण्यमाधिकृतं चरित्रबंधकं॥ एतदु
भयविधमपि चरित्रबंधकं द्विगुणीभूतेपि द्रव्येण न नश्यति॥ द्विगुणीभू

तमपिद्रव्यमेवदेयंनाधिनाशइतिसत्यंकारकृतंतदपिद्विगुणीभूतेद्र
व्येननश्यतीत्यर्थः॥सएव॥उपस्थितस्यमोक्तव्यआधिस्तेनोन्यथाभ
वेत्।प्रयोजकेसतिधनंकुलेन्यस्याधिमाप्नुयात्॥तत्कालकृतमूल्योवा
तत्रतिष्ठेदवृद्धिकः॥बृहस्पतिः॥सेव्याधिकंयदाभुक्तमुत्पन्नमधिकंत
तः॥मूलोदयंप्रविष्टंचेत्तदाधिंप्राप्नुयाद्धनी॥याज्ञवल्क्यः॥यदातुद्वि
गुणीभूतमृणमाधौतदाखलु॥मोच्यआधिस्तदुत्पन्नेप्रविष्टेद्विगुणे
धने॥ ॥अथप्रभूतिः॥ ॥तत्त्रैविध्यमाहयाज्ञवल्क्यः॥दर्शनेप्रत्ययेदा
नेप्रातिभाव्यंविधीयते॥प्रत्ययःसमीचीनोयमित्युक्त्याविश्वासोत्पा
दनं॥बृहस्पतिस्तुचातुर्विध्यमाह॥आहैकोदर्शयामीतिसाधुरित्यप
रोब्रवीत्।दाताहमेतद्द्रविणमर्पयामीतिचापरः॥अर्पयामिदापयि
ष्यामीत्यर्थः॥कात्यायनः॥नष्टस्यान्वेषणार्थंतुदेयंपक्षत्रयंपरं॥यद्यसौ
दर्शयेत्तत्रमोक्तव्यःप्रतिभूर्भवेत्॥दर्शनप्रतिभूर्ग्राह्यंदेशकालेनदर्शये
त्॥निबंधमावहेत्तत्रदैवराजकृतादृते॥निबंधमावहेद्धनिकद्रव्यंदद्या
त्॥बृहस्पतिः॥आधौतुवितथेदाप्यस्तत्कालावेदितंधनं॥उत्तरौतुविसं
वादेतौविनातत्सुतौतथा॥कात्यायनः॥प्रातिभाव्यागतंपौत्रैर्दातव्यं
तुनतत्क्वचित्॥पुत्रेणापिसमंदेयमृणंसर्वत्रपैतृकं॥व्यासः॥ऋणं
पैतामहंपौत्रंप्रातिभाव्यागतंसुतः॥समंदद्यात्तत्सुतौतुनदाप्याविति
निश्चयः॥द्रव्यग्रहणेनप्रातिभाव्यांगीकारेतुपुत्रपौत्राभ्यामपिसवृद्धि
कंदेयं॥तथाचकात्यायनः॥गृहीत्वाबंधकंयत्रदर्शनेस्यस्थितोभवेत्॥
विनापित्राधनात्तस्माद्दाप्यःस्यात्तद्धनंसुतः॥याज्ञवल्क्यः॥बहवःस्यु
र्यदिस्वांशैर्दद्युःप्रतिभुवोधनं॥एकच्छायाश्रितेष्वेषुधनिकस्ययथारु
चि॥अहमेवसर्वंदास्यामीतिप्रत्येकंप्रतिज्ञाएकच्छायामाश्रितेष्वाय
तेषुधनिकेच्छयायःकश्चिद्दद्यात्॥अंशेदास्यामइतिप्रतिज्ञायांतु
तथादेयमित्यर्थः॥याज्ञवल्क्यः॥प्रतिभूर्दापितोयत्तुप्रकाशंधनिनेधनं
॥द्विगुणंप्रतिदातव्यमृणिकैस्तस्यतद्भवेत्॥बृहस्पतिः॥प्रातिभाव्यं
चयोदद्यात्पीडितःप्रतिभावितः॥त्रिपक्षात्परतःसोर्थंद्विगुणंलब्धुम
र्हति॥ ॥अथोत्तमर्णस्वर्णग्रहणप्रकारः॥बृहस्पतिः॥प्रतिपन्नमृणं
दाप्यःसामादिभिरुपक्रमैः॥धर्मोपधिबलात्कारैर्गृहसंरोधनेनच॥

प्रतिपन्नमधमर्णेनांगीकृतं॥उपक्रमैरुपायैः॥तान्विवृणोति सएव॥सुहृत्संबंधिसंदिष्टैःसामोक्त्यानुगमेनच॥आयेणवाऋणीदाप्योधर्मएषउदाहृतः॥इच्छयायाचितंचार्थंआनीयऋणिकाद्धनी॥अन्वाहितादिसंगृह्यदाप्यतेयत्रसोपधिः॥बध्वास्वगृहमानीयताडनाद्यैरुपक्रमैः॥ऋणिकोदाप्यतेयत्रबलात्कारःसकीर्तितः॥पुत्रदारपशून्बध्वादत्ताद्वारोपवेशनं॥यत्रर्णिकोदाप्यतेर्थंतदाचरितमुच्यते॥अनुगमोनुसरणं॥आयःप्रार्थना॥अन्वाहितमन्यस्मैदातुंदत्तमलंकारादि।धर्मेउपायानांनियममाहकात्यायनः॥राजानंस्वामिनंविप्रंसांत्वेनैवप्रदापयेत्॥रिक्थिनंसुहृदंवापिछलेनैवप्रदापयेत्॥वणिजःकर्षकांश्चैवशिल्पिनश्चापिवीद्भुगुः॥देशाचारेणदाप्यास्तुदुष्टान्संपीड्यदापयेत्॥सएव॥धार्योवरुद्धस्त्वृणिकःप्रकाशंजनसंसदि॥यावद्देयंतदादेयंदेशाचारस्थितिर्यथा॥अवरुद्धविण्मूत्रशंकायामपरोधनंनिषेधतिसएव॥विण्मूत्रशंकायत्रस्याद्धार्यमाणस्यदेहिनः॥पृष्ठतश्चानुगंतव्योनिबंधंवासमुत्सृजेत्॥निबंधंस्वप्रतिनिधिभूतंपुत्रादिकं॥अवरुद्धोदर्शनप्रतिभुवंगृहीत्वाभोक्तुंभक्तव्यइत्याहसएव॥सकृतप्रतिभूश्चैवभोक्तव्यंस्याह्निलेदिने॥आहारकालेरात्रौचनिबंधेप्रतिभूस्थितः॥योदर्शनप्रतिभुवंनाधिगच्छेन्नचाश्रयेत्॥सवारकेभिरोद्धव्यःस्थाप्योवायेथरक्षिणः॥नचारकेनिरोद्धव्यआर्येःप्रत्ययिकःशुचिः॥सोःनिबंधःप्रमोक्तव्योनिबद्धःशपथेनवा॥नचाश्रयेन्न दद्यात्॥वारकेकारागारे॥रक्षिणोरक्षकानावेद्य स्थाप्यः॥प्रत्ययिकोविश्वास्यः॥बृहस्पतिः॥पूर्णावधौशांतलाभमृणमुक्ताहयेद्धनी॥कारयेद्वाऋणीलेख्यंचक्रवृद्धिव्यवस्थया॥पूर्णावधौद्विगुण्यादिकेजातेअनुएवशांतलाभंचोपपद्यते॥वृद्धिमपिमूलेप्रक्षिप्यतस्यापिवृद्धिकरणंचक्रवृद्धिः॥नारदः॥अथशक्तिविहीनः स्यादृणीकालविपर्ययात्॥शक्त्यपेक्षमृणंदाप्यःकालेकालेयथोदयं॥मनुः॥कर्मणापिसमंकुर्याद्धनिकस्याधमर्णिकः॥समोपकृष्टजातिश्चदद्याच्छ्रेयांस्तुतच्छनैः॥याज्ञवल्क्येन।जातिकर्मपरिक्षीणमृणार्थंकर्मकारयेत्॥ब्राह्मणस्तुपरिक्षीणःशनैर्दाप्योयथोदयमिति॥स

अब्राह्मणपदमुत्कृष्टजातिपरं॥ स एव॥ प्रपन्नं साधयन्नर्थं न वाच्यो
नृपतेर्भवेत्॥ साध्यमानो नृपं गच्छन्दंड्यो दाप्यश्च तद्धनं॥ बृहस्पतिः॥
प्रतिपन्नस्य धर्मोयं अपलापी तु संसदि॥ लेख्येन साक्षिभिर्वापि भा
वयित्वा प्रदाप्यते॥ नरो दृष्टः क्रियावासी संदिग्धेर्थे कथंचन॥ आसे
धयंस्तु नासेध्यं दंड्यो भवति धर्मतः॥ आसेधो राजाज्ञया व्यवरोधः॥ स
एव॥ प्रदातव्यं यद्भवति न्यायस्तत्तद्दाम्यहं॥ एवं पत्रर्णिको नूनं कि
यावादी स उच्यते॥ कात्यायनः॥ पीडयेत्तु धनी यत्र ऋणिकं न्यायवा
दिनं॥ तस्मादर्थात्स हीयेत तत्समं वाप्नुयादृणं॥ बृहस्पतिः॥ अनावे
द्य तु राज्ञे यः संदिग्धेर्थे प्रवर्तते॥ प्रसह्य स विनेयः स्यात्स चाप्यर्थो न
सिध्यति॥ यमः॥ ऋणिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति॥ रा
ज्ञा दापयितव्यः स्याद्गृहीत्वा द्विगुणं ततः॥ याज्ञवल्क्यः॥ राज्ञाधम
र्णिको दाप्यः साधिताद्दशकं शतं॥ पंचकं च शतं दाप्यः प्राप्तार्थो ह्युत्त
मर्णिकः॥ दाप्यस्तस्मै दशकं दशोत्तरं पंचकं पंचोत्तरं॥ दशांशो विंश
शश्चेत्यर्थः॥ तत्रैतावंशौ राज्ञो अन्य उत्तमर्णस्येति भावः॥ दशकग्र
हणं निर्धनिकपरं॥ सधने तु विशेषमाह नारदः॥ ऋणिकः सधनो
यस्तु दौरात्म्यान्न प्रयच्छति॥ राज्ञा दापयितव्यः स्याद्गृहीत्वांशं तु
विंशकं॥ अनेकोत्तमर्णानां युगपदुपस्थितौ क्रममाह याज्ञवल्क्यः॥
गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः॥ दत्वा तु ब्राह्मणायैव नृपते
स्तदनंतरं॥ विवादरत्नाकरे कात्यायनः॥ नानर्णसमवाये तु यद्यत्पूर्वं
कृतं भवेत्॥ तत्तदेवाग्रतो देयं राज्ञः श्रोत्रियतोनु च॥ एकाहे लिखितं
पत्रं तत्र कुर्याद्धनं समं॥ ग्रहणं रक्षणं वाथ मन्यथा तु यथाक्रमं। यस्य
द्रव्येण यत्पुण्यं साधितं यो विभावयेत्॥ तद्द्रव्यमृणिकेनैव दातव्यं त
स्य नान्यथा॥ धनी योऽपगतं दद्यात्स्वहस्तपरिनिन्हवात्॥ याज्ञव
ल्क्यः॥ लेख्यस्य पृष्ठेभिलिखेद्दत्वा यदृणिको धनं॥ नारदः॥ लेख्यं
दद्याद्विशुद्धेर्णे तदभावे प्रतिश्रवः॥ धनिकर्णिकयोरेवं विशुद्धिः स्या
त्परस्परं॥ प्रतिश्रवः प्रतिदानश्रवणाय शुद्धिपत्रं॥ ऋणादानेधम
र्णस्यानिष्टं फलमाह॥ कात्यायनः॥ उद्धारादिकमादाय स्वामिने न द
दाति यः॥ स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे॥ उद्धारो ऋणं॥ त

द्रव्यंवर्द्धतेतावद्यावत्कोटिशतंभवेत्॥ततःकोटिशतेपूर्णेवेष्टितस्ते
नकर्मणा॥अश्वःखरोवृषोदासोभवेज्जन्मनिजन्मनि॥याच्यमा
नंदातुंप्रतिश्रवं॥व्यासोपि॥नपस्वीचाग्निहोत्रीचऋणवान्म्रिय
तेयदि॥तपश्चैवाग्निहोत्रीचसर्वंतद्धनिनोभवेत्॥बृहस्पतिः॥ऋणं
चात्मीयवत्पित्र्यंपुत्रैर्देयंविभावितं॥पैतामहंसमंदेयंनदेयंतत्सुतस्य
च॥याज्ञवल्क्यः॥पितरिप्रोषितेप्रेतेव्यसनाभिप्लुतेपिवा॥पुत्रपौत्रै
ऋणंदेयंनिह्नवेसाक्षिभावितं॥विंशतिवर्षवयसापुत्रादिनाऋणं
देयमित्याहनारदः॥नार्वाक्संवत्सराद्विंशात्पितरिप्रोषितेसुतः॥ऋ
णंदद्यात्पितृव्येचज्येष्ठेभ्रातर्यथापिवा॥कात्यायनः॥विद्यमानेपि
रोगार्तेस्वगृहात्प्रोषितेतथा॥विंशात्संवत्सराद्देयमृणंपितृकृतंतथा
॥प्रोषितपदंमृतस्याप्युपलक्षकं।अतएवविष्णुः॥धनग्राहिणिप्रेतेप्रव्रजिते
द्विदशाःसमाःप्रोषितेवातत्पुत्रपौत्रैर्धनंदेयं॥नारदः॥पितर्युपरतेपुत्रा
ऋणंदद्युर्यथांशतः॥विभक्ताअविभक्तावायोवातामुद्वहेद्धुरं॥का
त्यायनः॥पित्र्यर्णेविद्यमानेतुनचपुत्रोधनंहरेत्॥देयंतद्धनिकेद्रव्य
मृतेपुत्रस्तुदाप्यते॥द्रव्यमृतेइतिसंबंधः॥द्रव्यंविनेत्यर्थः॥बृहस्प
तिः॥पित्र्यमेवाग्रतोदेयंपश्चादात्मीयमेवच॥तयोःपैतामहंपूर्वंदेय
मेवमृणंसदा॥याज्ञवल्क्यः॥सुराकामद्यूतकृतंदंडशुल्कावशिष्टकं।
वृथादानंतथैवेहपुत्रोदद्यान्नपैतृकं॥बृहस्पतिः॥सौराक्षिकंवृथा
दानंकामक्रोधप्रतिश्रुतं॥प्रातिभाव्यंदंडशुल्कशेषंपुत्रंनदापयेत्॥उ
शना॥दंडंवादंडशेषंचशुल्कंतच्छेषमेवच॥नदातव्यंतुपुत्रेणयच्चन
व्यावहारिकं॥ऋणदानस्याधिकारिणांक्रममाह॥पुत्रेविद्यमानेपियो
न्यायेनदेशाभावेप्यन्यायेनवातत्पितुःरिक्थंहरतेसरिक्थग्राहः॥
एवमेवपरस्त्रीहर्तायोषिद्ग्राहः॥अनन्याश्रितद्रव्यत्वंतूभयथापि अन्याश्रि
तत्वरूपविशिष्टप्रतियोगिकाभावाद्द्रव्यरूपविशेषणमात्रप्रतियोगि
काभावाच्च॥अत्रादौरिक्थग्राहः तदभावेयोषिद्ग्राहस्तदभावेऽनन्या
श्रितद्रव्यःपुत्रः तदभावेपौत्रोमूलमात्रंतदभावेप्रपौत्रपत्नीकन्यास्वपारि
क्थिनोद्रव्यग्राहिणश्चेद्दद्युरित्यर्थः॥रिक्थग्रहणाभावेप्रपौत्रेणपत्न्या
दिभिश्चनदेयं॥रिक्थंचाल्पंगृहीतंभूयसोपिऋणस्यापाकारेणप्र
योजकं॥ननुतत्समंततोधिकमेववेतिनियमः॥पुत्रहीनस्योत्तमर्णे

स्यरिक्थिनोद्रव्यग्रहणाधिकारिणःपत्नीकन्यादयः॥पत्यादीनाम
धमर्णादृणंगृण्हीयुरित्यन्वोतिमपादार्थः॥याज्ञवल्क्यः॥रिक्थग्राह
ऋणंदाप्यो योषिद्ग्राहस्तथैवच॥पुत्रोनन्याश्रितद्रव्यःपुत्रहीनस्य
रिक्थिनः॥क्लैब्यादिदोषयुक्तस्यसपुत्रस्यवाप्यपुत्रस्यरिक्थग्राही
ऋणंदद्यादिति॥बृहस्पतिः॥स्त्रीहारीचतथैवस्यात्अभावेधनहारि
णां॥कात्यायनः॥ऋणंतुदापयेत्पुत्रंयदिस्यान्निरुपद्रवः॥द्रविणा
र्हश्चधुर्यश्चनान्यथादापयेत्सुतं॥पूर्वंदद्याद्धनग्राहःपुत्रस्तस्मा
दनंतरं॥योषिद्ग्राहःसुताभावेपुत्रेवात्यंतनिर्द्धने॥नारदः॥यातुसप्र
धनैवस्त्रीसापत्यावान्यमाश्रयेत्॥सोस्याद्दद्यादृणंभर्तुरुत्सृजेद्वा
तथैवतां॥कात्यायनः॥निर्द्धनैरनपत्यैस्तुयत्कृतंशौंडिकादिभिः॥
तत्स्त्रीणामपिभोक्तातुदद्यात्तदृणमेवहि॥नारदः॥धनस्त्रीहारिपु
त्राणामृणभाग्योधनंहरेत्॥पुत्रोसतोःस्त्रीधनिनोःस्त्रीहारीधनिपु
त्रयोरिति॥सधनपुत्राभावेस्त्रीहारीऋणंदद्यादित्यंतपादार्थः॥पूर्वो
क्तयाज्ञवल्क्यवाक्यात्॥कात्यायनः॥प्रोषितस्यमतेनापिकुटुंबा
र्थमृणंकृतं॥दासस्त्रीमात्रशिष्यैर्वादद्यात्पुत्रेणवाभृगुः॥याज्ञवल्क्यः
नयोषित्पतिपुत्राभ्यांनपुत्रेणकृतंपिता॥दद्यादृतेकुटुंबार्थान्नपतिः
स्त्रीकृतंतथा॥कात्यायनः॥देयंप्रतिश्रुतंयत्स्याद्यच्चस्यादनुमोदितं
॥नारदः॥कृतंवायदृणंकृच्छ्रेदद्यात्पुत्रस्यतत्पिता॥याज्ञवल्क्यः॥गो
पशौंडिकशैलूषरजकव्याधयोषितां॥ऋणंदद्यात्पतिस्तासांयस्मा
द्वृत्तिस्तदाश्रया॥सएव॥प्रतिपन्नंस्त्रियादेयंपत्यावासहयत्कृतं॥स्वयं
कृतंवायदृणंनान्यत्स्त्रीदातुमर्हति॥अप्रतिपन्नमपिरिक्थग्राहिणी
स्त्रीदद्यात्॥तथाचकात्यायनः॥मर्तुकामनयाभर्त्रोक्तादेयमृणंत्व
या॥अप्रपन्नापिसादाप्याधनंयद्यात्स्थितस्त्रिया॥नारदः॥पुत्रिणीतु
समुत्सृज्यपुत्रंस्त्रीयान्यमाश्रयेत्॥तस्याऋणंहरेत्सर्वंनिःस्वायाःपु
त्रएवतु॥इदंतुरिक्थग्राहपुत्रपरं॥पितृव्येणाविभक्तेनभ्रात्रावाय
दृणंकृतं॥मात्रावायत्कुटुंबार्थेदद्युःसर्वेपिरिक्थिनः॥उत्तमर्णेनसु
त्राद्यभावेऋणस्यनेयप्रकारमाह॥नारदः॥ब्राह्मणस्यतुयद्देयंसान्वयस्य
नचास्तिसः॥निर्वपेत्तत्सकुल्येषुतदभावेस्यबंधुषु॥यदातुतत्सकुल्याः

स्युर्नच संबंधिबांधवाः॥ तदा दद्याद्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्॥ प्रजापतिरपि॥ बंध्वभावेपि विप्रेभ्यो देयं क्षेप्यं जलेपि वा॥ जलेक्षिप्तं तथाग्नौ च धनं स्यात्पारलौकिकं॥ ॥इति श्रीमीमांसक भट्ट नीलकंठकृते भगवंतभास्करे व्यवहारमयूखे ऋणदानप्रकरणम्॥ अथ निक्षेपः॥ नारदः॥ स्वद्रव्यं यत्र विस्रंभान्निक्षिपत्यविशंकितः॥ निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥ असंख्यातमविज्ञातमसमुद्रं यन्निधीयते॥ तं जानीयादुपनिधिं निक्षेपं गणितं विदुः॥ बृहस्पतिः॥ दत्तो यद्गृहवस्तुप्यं हेमकुप्यांबरादिकं॥ तस्मात्पालयतो न्यासं यथैव शरणागतम्॥ स्थापितं येन विधिना येन यच्च यथाविधि॥ तथैव तस्य दातव्यं न देयं प्रत्यनंतरे॥ न्यासो निक्षेपः॥ मनुः॥ यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते॥ तावुभौ चोरवच्छास्यौ दाप्यौ वा तत्समं दममिति॥ बृहस्पतिः॥ भेदेनोपेक्षया न्यासं गृहीत्वा यः विनाशयेत्॥ याच्यमानो न दद्याद्वा दाप्यं तत्सोदयं भवेत्॥ भेदः स द्रव्यतारतम्यं॥ तेन स्वद्रव्येण सहोपेक्षया नाशे न दोषः॥ याज्ञवल्क्यः॥ आजीवन्स्वेच्छया दद्याद्दाप्यस्तत्रापि सोदयं॥ आजीवन् भोगवृद्ध्यर्थं प्रयोगादिनोपजीवन्॥ उदयो वृद्धिः॥ तस्य विशेषमाह॥ कात्यायनः॥ निःक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च॥ याच्यमानं न चेद्दद्याद्वर्द्धते पंचकं शतमिति॥ मनुः॥ निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमं॥ तथोपनिधिहर्त्तारं विशेषेणैव पार्थिवः॥ बृहस्पतिः॥ दैवराजोपघातेन यदि तन्नाशमाप्नुयात्॥ गृहीतद्रव्यसहितं तत्र दोषो न विद्यते॥ याज्ञवल्क्यः॥ न दाप्योऽपहृतं तत्तु राजदैविकतस्करैः॥ स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनंतरे॥ न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बंधुभिः॥ प्रत्यनंतरः सन्निहितः॥ प्रमाणं विनाधिकविषयेनाभियोज्य इत्यर्थः॥ सर्वमप्यनिक्षेपन्यायमन्यत्राप्यतिदिशति बृहस्पतिः॥ अन्वाहिते याचितके शिल्पिन्यासे सबंधके॥ एष एवोदितो धर्मस्तथा च शरणागते॥ अन्वाहितं अमुकेन मयि स्थापितं त्वया तस्मै देयमिति पुरुषांतरहस्तेऽर्पितं॥ याचितं मुद्राहारादेशोभार्थं नीतमलंकारादि॥ शिल्पिन्यासो हेमकारादिषु कुंडल

व्यर्थंनिक्षिप्तं॥नारदोपि॥एषएवविधिर्दृष्टोयाचितान्वाहितादिषु
॥शिल्पिषूपनिधौन्यासेप्रतिन्यासेतथैवच॥प्रतिन्यासःस्वामिना
यत्रनिक्षिप्तंतेनाप्यन्यत्रनिक्षिप्तंराजदैवादिनष्टस्यापिशिल्पिन्या
सस्यक्वचित्प्रतिदानमाहकात्यायनः॥यश्चसंक्रियतेन्यासोदि
वसैःपरिनिष्ठितैः॥तदूर्ध्वंस्थापयेच्छिल्पीदाप्योदेवागतेपितं॥
नारदः॥मूल्याष्टभागेहीयेतसकृद्धौतस्यवाससः॥द्विपादस्त्वतृ
तीयांशश्चतुर्थौतेर्द्धमेवच॥अर्द्धंक्षयात्तुपरतःपादांशापचयःक्रमा
त्॥याज्ञवल्क्यः॥वसानस्त्रीन्पणान्दंड्योनेजकस्तुपरांशुकं॥वि
क्रयावक्रयाधानयाचितेषुपणान्दश॥अवक्रयोभाटकंगृहीत्वाः
न्यस्यार्पणं॥आधानमाधीकरणं॥सुवर्णस्याग्नौध्मायमानेह्रासनिय
ममाह॥सएव॥अग्नौसुवर्णमक्षीणंरजतेद्विपलंशते॥अष्टौत्रपु
पिसीसेचताम्रेपंचदशायसि॥इतोधिकेक्षयादिःक्षयेहेमकारादे
र्दंडः॥क्वचिद्वल्कार्थंतुसमर्पणेवृद्धौविशेषमाहसएव॥शतंदश
पलावृद्धिरौर्णेकार्पाससौत्रिके॥मध्येपंचपलावृद्धिःसूक्ष्मेद्वित्रिप
लामता॥क्वचित्क्षयमाहसएव॥कार्मिकेरोमबंधेचत्रिंशद्भागः
क्षयोमतः॥नक्षयोनचवृद्धिश्चकौशेयेवल्कलेषुचेति॥कार्मिकेसि
क्थपट्टादौपट्टसूत्रादिनास्वस्तिकाद्याकारनिर्माणे॥नियतावधिके
शिल्पिन्यस्तेःवधिमध्येयाचितेःदत्तेनष्टेपिचशिल्पिनोदोषाभावमा
हसएव॥यदितत्कार्यमुद्दिश्यकालेपरिनियम्यवा॥याचितोर्द्धकृते
तस्मिन्नाशेनतुदाप्यते॥अवक्रयोभाटकंगृहीत्वाःन्यत्रार्पणं॥ए
तद्विपर्ययमाहसएव॥प्राप्तकालेकृतेकार्येनदद्याद्याचितोपिसन्
॥तस्मिन्नष्टेहृतेवापिगृहीतामूल्यमावहेत्॥सएव॥योयाचितक
मादायनदद्यात्सनियाचितः॥सनिगृह्यबलाद्दाप्योदंड्यश्चनददा
तियः॥ इतिभगवंतभास्करेव्यवहारमयूखेनिक्षेपप्रकरणम्॥ अथा
स्वामिविक्रयः॥व्यासः॥याचितान्वाहितन्यासंहृत्वाचान्यस्ययद्द
नं॥विक्रीयतेस्वाम्यभावेसज्ञेयोस्वामिविक्रयः॥कात्यायनः॥अस्वा
मिविक्रयंदानमाधिंवाविनिवर्तयेत्॥अस्वामीतिपृथक्क्रियाविशे
षणंच॥नारदोपि॥प्रकाशतःक्रयःशुद्धःक्रेतुःस्तेयंरहःक्रयात्॥नार

द्ः॥ अस्वाम्यनुमताद्दासादसतश्च जनाद्गृहः। हीनमूल्यमवेलायां
क्रीणंस्तद्दोषभाग्भवेत्॥ तद्दोषश्चौरदोषः॥ याज्ञवल्क्यः। आगमे
नोपभोगेन नष्टं भाव्यमतोऽन्यथा॥ पंचबंधो दमस्तस्य राज्ञे तेनावि
भाविते॥ पंचबंधो नष्टद्रव्यपंचमांशः॥ नाष्टिकोपन्यस्तसाक्षिणां
विरुद्धोक्तेन नष्टद्रव्याद्द्विगुणं दंडमाह व्यासः॥ वादी चेन्मार्गितं द्रव्यं
साक्षिभिर्न विभावयेत्॥ दाप्यः स्याद्द्विगुणं दंडं क्रेता तद्द्रव्यमर्हती
ति॥ क्रेतुः कृत्यमाह स एव॥ मूले समाहृते क्रेता नाभियोज्यः कथंचन
॥ मूलेन सह वादस्तु नाष्टिकस्य विधीयते॥ बृहस्पतिः॥ विक्रेतादर्शि
तो यत्र हीयते व्यवहारतः॥ क्रेत्रे राज्ञे मूल्यदंडौ प्रदद्यात्स्वामिनो ध
नं॥ कात्यायनः॥ मूलानयनकालश्च नत्र देयो द्विसंख्यया॥ असमाहा
र्यमूलस्तु क्रयमेव विशोधयेत्॥ विशोधिते क्रये राज्ञा वक्तव्यः स न किं
चन॥ अभियोक्ता धनं कुर्यात्प्रथमं ज्ञातिभिः स्वकं॥ पश्चाद्दाय विशु
द्ध्यर्थं क्रयं क्रेता स्वबंधुभिः॥ क्रेत्रोः क्रयसाधितेपि द्रव्यं नाविक एव ल
भते॥ तथा च मनुः॥ अथ मूलमनाहार्यं प्रकाशक्रयशोधितं। अदंड्यो मु
च्यते राजा नाष्टिको लभते धनं॥ अनाहार्यं अप्रदर्श्य प्रकाशेन क्रयेण शो
धितं द्रव्यमित्यर्थः। कात्यायनः॥ अनुपस्थापयन्मूलं क्रयं वाप्यविशो
धयन्॥ यथाभियोगं धनिने धनं दाप्यो दमं च सः॥ बृहस्पतिः॥ वणिग्वी
थीपरिगतं विज्ञातं राजपूरुषैः॥ अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा
मृतः॥ स्वामी दत्वार्द्धमूल्यं तु प्रगृह्णीत स्वकं धनं॥ अर्द्धं द्वयोरपहृतं
तत्र स्याद्व्यवहारतः॥ मरीचिः॥ अविज्ञातनिवेशात्तु यत्र मूलं न लभ्य
ते॥ हानिस्तत्र समा कल्प्या क्रेतृनाष्टिकयोर्द्वयोः॥ निवेशो विक्रेतृस्थ
लं॥ नारदः॥ उद्दिष्टमेव भोक्तव्यं स्त्रीपशुर्वसुधापि वा॥ अनर्पितं तु यो
भुंक्ते भुक्त्वा भोगं प्रदापयेत्॥ उद्दिष्टमनुज्ञातं॥ भुक्तभोगं भोगानुरू
पं भाटकं याज्ञवल्क्यः॥ शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं॥ अ
र्वाक्संवत्सरात्स्वामी हरेत परतो नृपः। यत्तु मनुः॥ प्रनष्टस्वामिकं द्रव्यं
राजा त्र्यब्दं निधापयेत्॥ अर्वाक्त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्ह
रेत॥ तच्छ्रोत्रियविप्रस्वामिकद्रव्यविषयम्॥ स एव॥ आददीता
थ षड्भागं प्रनष्टाधिगतान्नृपः॥ दशमं द्वादशं वापि सतां धर्ममनुस्मर

न्निति॥ परस्वामिकनष्टलब्धपशूनामेकादिनरक्षणे भृतिमाह या
ज्ञवल्क्यः॥ पणानेकशफेदाप्यश्चतुरःपंचमानुषे॥ महिषोष्ट्रगवां
द्वौद्वौपादंपादमजाविके॥ भक्षितंतुदेयमेव॥ इतिस्वामिविक्रयनि
रूपणम्॥ अथसंभूयसमुत्थानं॥ नारदः॥ वणिक्प्रभृतयोयत्रक
र्मसंभूयकुर्वते॥ तत्संभूयसमुत्थानंव्यवहारपदंस्मृतम्॥ बृह
स्पतिः॥ बहूनांसंमतोयस्तुदद्यादेकोधनंनरः॥ करणंकारयेद्वापि
सर्वैरेवकृतंभवेत्॥ परीक्षकाःसाक्षिणश्चतएवोक्ताःपरस्परं॥ सं
दिग्धेर्थेवंचनायांनचेद्विद्वेषसंयुताः॥ यःकश्चिद्वंचकस्तेषांविज्ञा
तःक्रयविक्रये॥ शपथैःसोपिशोध्यःस्यात्सर्ववादेष्वयंविधिः॥ याज्ञ
वल्क्यः॥ जिह्मंत्यजेयुर्निर्लाभमशक्तोन्येनकारयेत्॥ प्रतिषिद्धमनादिष्टंप्रमा
दाद्यच्चनाशितं॥ कात्यायनः॥ शिष्यकाभिज्ञकुशला आचार्याश्चे
तिशिल्पिनः॥ एवंद्वित्रिचतुर्भागान्हरेयुस्तेयथोत्तरं॥ शिष्यकाः
शिष्याः॥ अभिज्ञाज्ञानवंतः॥ कुशलादक्षाः॥ आचार्यानूतनमार्गप्र
वर्त्तकाः॥ बृहस्पतिः॥ हर्म्यंदेवगृहंवापिधार्मिकोपस्कराणिच॥ सं
भूयकुर्वतांतेषांप्रमुखोद्व्यंशमर्हति॥ सएव॥ नर्त्तकानामेषएव
धर्मःसद्भिरुदाहृतः॥ तालज्ञोलभतेऽध्यर्धंगायनास्तुसमांशिनः
॥ कात्यायनः॥ तेषांचेत्प्रसृतानांचग्रहणंसमवाप्नुयात्॥ तन्मोक्ष
णार्थंयद्दत्तंवहेयुस्तेयथांशतः॥ वणिजांकर्षकाणांचचौराणांशि
ल्पिनांतथा॥ अनियम्यांशकर्तॄणांसर्वेषामेवनिर्णयः॥ इतिसं
भूयसमुत्थानम्॥ अथदत्ताप्रदानम्॥ नारदः॥ दत्वाद्रव्यमसम्यग्यः
पुनरादातुमिच्छति॥ दत्ताप्रदानिकंनामव्यवहारपदंहितत्॥ अ
सम्यगितिक्रियाविशेषणंनिषिद्धमित्यर्थः॥ सएव॥ अथदेयमदेयं
चदत्तंचादत्तमेवच॥ व्यवहारेषुविज्ञेयोदानमार्गश्चतुर्विधः॥ अ
न्वाहितंयाचितकमाधिःसाधारणंचयत्॥ निक्षेपपुत्रदारंचसर्वस्वं
चान्वयेसति॥ अदेयान्याहुराचार्यायच्चान्यस्मैप्रतिश्रुतं॥ अपुत्र
दारंतेषुस्वत्वाभावाद्विषयंयेनांतरिक्षेदिवीतिवन्निषेधानुवादमात्रं॥ ए
तेनस्वकुटुंबाविरोधेनदेयंदारसुतादृतइतियाज्ञवल्कीयःपर्यु
दासोपिव्याख्यातः॥ पुत्रदारेषुस्वत्वाभावःपूर्वमुपपादितः॥ स्वत्वा

देयंतद्दानेनकेवलंव्यवहारासिद्धिः॥किंतुप्रायश्चित्तमपीस्याद्देनानि
प्रकृत्यदस्यः॥ योददातिसमूढात्माप्रायश्चित्तीयतेनरः॥मनुः॥अदेयं
यश्चगृह्णातियश्चादेयंप्रयच्छति॥तावुभौचौरवच्छास्यौदाप्यौचो
त्तमसाहसं॥बृहस्पतिः॥कुटुंबभक्तवसनाद्देयंयदतिरिच्यते॥ब
न्निदानविक्रयौप्रतिषेधतिव्यासः।येजातायेप्यजाताश्चयेचगर्भेव
व्यवस्थिताः॥वृत्तिंचतेपिकांक्षंतिनदानंनचविक्रयमिति।देयमाहका
त्यायनः॥स्वेच्छयायःप्रतिश्रुत्यब्राह्मणायप्रतिग्रहं॥नदद्यादृण
वद्दाप्यःप्राप्नुयात्पूर्वसाहसं॥गौतमः॥प्रतिश्रुत्याप्यधर्मसंयुक्ताय
नदद्यादिति॥दत्ताःदत्तभेदानाहनारदः॥दत्तंसप्तविधंप्रोक्तमदत्तं
षोडशात्मकं।।पण्यमूल्यंभृतिस्तुष्ट्याभेदासत्सुपकारतः॥स्त्रीशु
ल्कानुग्रहार्थोयद्दत्तंदानविदोविदुः॥अनुग्रहोधर्मः॥अदत्तंतुभय
क्रोधशोकवेगातुरान्वितैः॥तथोत्कोचपरीहासव्यत्यासच्छलयोग
तः॥बालमूढास्वतंत्रार्त्तमत्तोन्मत्तापवर्जितं॥कर्त्ताममायंकर्मेति
प्रतिलाभेच्छयाचयत्॥अपात्रेपात्रमित्युक्तेकार्येवाधर्मसंज्ञिते।
यद्दत्तंस्यादविज्ञानाददत्तमितितत्स्मृतम्॥गुरूपताप॥भयादिकृ
तोपतापान्वितैरित्यन्वयः॥ताडनादिभयाद्युपतप्तेनदत्तमित्यर्थः
एवंभ्रात्रादिक्रोधाद्यपोभवतीतिबुद्ध्यादत्तंव्यत्यासः॥रूप्यंदातुंप्र
वृत्तेनभ्रमात्सुवर्णंदत्तंछलयोगतः॥देवदत्तायराज्ञागौर्देयेतिश्रु
त्वागृहीतदेवदत्तवेषायान्यस्मैपात्रभूतायापिदत्तं॥आर्त्तोरोगेणा
स्थिरचित्तः॥मत्तोमदनीयद्रव्येण उन्मत्तोवातादिना॥अपवर्जि
तंदत्तं।मामकमयंकर्मकरिष्यतीतिकर्माकुर्वाणायदत्तं।अधर्मेवि
नियोक्ष्येधर्मंकरिष्यतीतिबुद्ध्यादत्तंएतानिपरावर्तंते॥कामक्रोधा
स्वतंत्रार्त्तक्लीबोन्मत्तप्रमोहितैः॥व्यत्यासपरिहारायदत्तंतत्तुन
हीयते॥कामात्परस्त्रीवंचनार्थंक्लीबोभीतःव्यत्यासपरिहारोयद्दत्तमु
त्कोचइत्यर्थः।यस्तुकार्यस्यासिध्यर्थमुत्कोचःस्यात्प्रतिश्रुतः॥तस्मि
न्नपिप्रसिद्धेर्थेनदेयंस्यात्कथंचन॥अथप्रागेवदत्तंस्यात्प्रतिदाप्यस्त
तोबलात्॥दंडंचैकादशगुणमाहुर्गार्गीयमानवाः॥उत्कोचस्वरूपमाह
सएव॥स्तेनसाहसिकोद्वृत्तपारदारिकशंसनात्॥दर्शनाद्वृत्तनष्टस्य

तथासत्यप्रवर्त्तनात्॥ प्राप्तमेतैस्तुयत्किंचित्तदुलोच्यंतदुच्यते
॥मनुः॥ योगाधमनविक्रीतंयोगदानप्रतिग्रहं। यस्माद्वाप्युपधिंपश्ये
त्तत्सर्वंविनिवर्त्तयेत्॥ योगउपधिः॥ यस्यवाप्यंत्यस्यापिकार्यस्य
तत्सर्वमुपध्यपगमेपरावर्त्ततइत्यर्थः॥ कात्यायनः॥ स्वस्थेनार्त्तेनवादत्तं
श्राविनंधर्मकारणात्॥ अदत्वातुमृतेदाप्यस्तत्सुतोनात्रसंशयः॥ अ
त्रविस्तरोगुरुकृतेद्वैतनिर्णयेद्रष्टव्यः॥ इतिदत्ताप्रदानिकनिर्णयः॥
अथाभ्युपेत्याशुश्रूषा॥ नारदः॥ अभ्युपेत्यतुशुश्रूषांयस्तांनप्रतिप
द्यते॥ अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते॥ तत्रशुश्रूषकत्रैवि
ध्यमाहबृहस्पतिः॥ आयुधीनूत्तमःप्रोक्तोमध्यमस्तुकृषीवलः॥ भा
रवाहोधमःप्रोक्तस्तथाचगृहकर्मकृत्॥ नारदः॥ सर्वेष्वधिकृतोयः
स्यात्कुटुंबस्यतथोपरि॥ सवकर्मकृतोज्ञेयःसचकौटुंबिकःस्मृतः॥
कात्यायनः॥ स्वतंत्रस्यात्मनोदानाद्दासत्वंदारवद्भृगुः॥ त्रिषुवर्णेषुवि
ज्ञेयंदास्यंविप्रस्यनक्वचित्॥ वर्णानामानुलोम्येनदास्यंनप्रतिलो
मतः॥ राजन्यवैश्यशूद्राणांत्यजतांहिस्वतंत्रतां॥ नारदः॥ वर्णानां
प्रातिलोम्येनदासत्वंनविधीयते॥ कात्यायनः॥ प्रव्रज्यावसितायत्र
त्रयोवर्णाद्विजातयः॥ निर्वासंकारयेद्विप्रंदासत्वंक्षत्रविड्भृगुः॥ विप्रनि
र्वासनप्रकारमाहतुर्दक्षनारदौ॥ पारिव्राज्यंगृहीत्वातुयःस्वधर्मेनति
ष्ठति॥ श्वपदेनांकयित्वातुराजाशीघ्रंप्रवासयेत्॥ कात्यायनः॥ स
वर्णेपितुविप्रेतुदासत्वंनैवकारयेत्॥ शीलाध्ययनसंपन्नेनहृतंक
र्मकामतः॥ नचापिनाशुभंकिंचित्प्रकुर्वीतद्विजोत्तमः॥ मनुः॥ क्षत्रि
यंचैववैश्यंचब्राह्मणोवृत्तिकर्शितं॥ बिभृयादानृशंस्येनस्वानिक
र्मतुकारयेत्॥ कात्यायनः॥ आरद्याद्ब्राह्मणीयस्तुविक्रीणीयात्तथै
वच॥ राज्ञातदकृतंकार्यंदंड्याःस्युःसर्वएवते॥ कामात्तुसंश्रितांय
स्तुकुर्याद्दासींकुलस्त्रियं॥ संक्रामयेतवान्यत्रदंडस्तत्राकृतंभवेत्
॥ बालधात्रीमदासींचदासीमिवभुनक्तिच॥ परिचारकपत्नींवप्राप्नु
यात्पूर्वसाहसं॥ विष्णुः॥ यस्तूत्तमंवर्णंदास्येनियोजयतितस्योत्तमसा
हसोदंडः॥ कात्यायनः॥ विक्रोशमानांयोभक्त्यादासींविक्रेतुमिच्छ
ति॥ अनापदिस्थःशक्तःसन्प्राप्नुयात्पूर्वसाहसं॥ दासभेदानाहनारदः॥

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः॥ अनाकालभृतस्तद्वदाहितः स्वामिना च यः॥ मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः॥ तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥ भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः॥ विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ अत्र पूर्वेश्चतुर्वर्गो दासत्वान्न विमुच्यते॥ प्रसादात्स्वामिनोऽन्यत्र दास्यमेषां क्रमागतं॥ विक्रीणीते स्वतंत्रः सन्य आत्मानं नराधमः॥ स जघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते॥ यो वैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्॥ दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥ याज्ञवल्क्यः॥ प्रव्रज्यावसितो राज्ञो दास आमरणांतिकम्॥ नारदः॥ अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्॥ आहितोऽपि धनं दत्वा स्वामी यद्येनमुद्धरेत्॥ ऋणं तु सोदयं दत्वा ऋणी दास्यात्प्रमुच्यते॥ तवाहमित्युपगतो युद्धप्राप्तः पणे जितः॥ प्रतिशीर्षप्रदानेन मुच्येरंस्तुल्यकर्मणा॥ कृतकालव्यपगमात्कृतो दासो विमुच्यते॥ भक्तस्योपेक्षणात्सद्यो भक्तदासः प्रमुच्यते॥ निग्रहाद्वडवायास्तु मुच्यते वडवाभृतेरिति॥ प्रतिशीर्षः प्रतिनिधिः॥ वडवा दासी॥ याज्ञवल्क्यः॥ बलाद्दासीकृतः स्वैरैर्विक्रीतश्चापि मुच्यते॥ नारदः॥ तवाहमिति चात्मानं योऽस्वतंत्रः प्रयच्छति॥ न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तं॥ अस्वतंत्रः परदासः॥ अस्मिन्प्रकरणे दासपदगतं पुंस्त्वमविवक्षितत्वाद्दास्यामप्येष सर्वो विधिर्ज्ञेयः॥ तत्र दासीत्वविमोककारणमाह कात्यायनः॥ स्वां दासीं यस्तु संगच्छेत्प्रसूता च भवेत्ततः॥ अवेक्ष्य बीजं कार्यास्याद्दासी सान्वया तु सा॥ नारदः॥ स्वदासमिच्छेद्यः कर्तुमदासं प्रीतमानसः॥ स्कंधादादाय तस्यासौ भिद्यात्कुंभं सहांभसा॥ साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत्॥ अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत्॥ ततः प्रभृति वक्तव्यः स्वाम्यनुग्रहपालितः॥ भोज्यान्नेभ्यः प्रतिग्राह्यो भवत्यभिमतः सतां॥ कात्यायनः॥ दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्॥ यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः॥ दासस्य तु धनं तद्वत्स्वामी तस्य प्रभुः स्मृत इति॥ इत्यभ्युपेत्याशुश्रूषा॥ अथ वेतनादानं॥ नारदः॥ भृतानां वेतन

स्योक्तोदानादानविधिक्रमः॥ वेतनस्यानपाकर्मतद्विवादपदंस्मृ-
तं॥ याज्ञवल्क्यः॥ दाप्यस्तुदशमंभागंवाणिज्यपशुसस्यतः॥ अनि-
श्चित्यभृतिंयस्तुकारयेत्समहीक्षिता॥ एतदत्यायासपरं॥ आयास-
बहुत्वेतुबृहस्पतिः॥ त्रिभागंपंचभागंवागृण्हीयात्सीरवाहकः॥ भ-
क्ताच्छादभृतःसीराद्भागंगृण्हीतपंचमं॥ जातसस्यात्त्रिभागंतुप्रगृ-
ण्हीयाद्यथाभृतः॥ भक्ताच्छादभृतोऽन्नवस्त्रदानेनपोषितः॥ नार-
दः॥ कर्माकुर्वन्प्रतिश्रुत्यकार्योदत्वाभृतिंबलात्॥ भृतिंगृहीत्वाकु-
र्वाणोद्विगुणांभृतिमाप्नुयात्॥ मनुः॥ भृतोनार्तोनयःकुर्याद्दर्पात्कर्म
यथोदितं॥ सदंड्यःकृष्णलान्यष्टौनदेयंचास्यवेतनं॥ सएव॥ यथोक्त-
मार्तःस्वस्थोवायस्तत्कर्मनकारयेत्॥ नतस्यवेतनंदेयमल्पोनस्या-
पिकर्मणः॥ आर्तस्तुकुर्यात्स्वस्थःसन्यथाभाषितमादितः॥ सुदी-
र्घस्यापिकालस्यतल्लभेतैववेतनं॥ विष्णुः॥ भृतकश्चापूर्णेकाले
त्यजन्सकलमेवमूल्यंजह्याद्राज्ञेचपणशतंदद्यादिति॥ सएव॥ स्वा-
मीचेद्भृतकमपूर्णेकालेजह्यात्तस्यसर्वमेवमूल्यंदद्यात्पणशतं
चराजन्यन्यत्रभृतकदोषात्तत्॥ वृद्धमनुः॥ प्रमादान्नाशितंदाप्यः
समंद्विष्टेहनाशितं॥ नतुदाप्योहृतंचौरैर्दग्धमूढंजलेनवा॥ द्रोहादे-
षः॥ ऊढमपहृतं॥ याज्ञवल्क्यः॥ प्रस्थानविघ्नकृच्चैवप्रदाप्योद्विगु-
णांभृतिं॥ प्रक्रांतेसप्तमंभागंचतुर्थंपथिसंत्यजन्॥ पथिविक्रीतभांडं
वणिग्भृत्यंत्यजेद्यदि॥ अथतस्यापिदेयस्याद्भृतेरर्द्धंलभेतसः॥ कात्या-
यनः॥ यथाचपथितद्भांडमासिद्धेनद्धियेनवा॥ यावानध्वागतस्तेन
प्राप्नुयात्तावतोभृतिं॥ त्यजेत्पथिसहायंसशांतरोगार्त्तमेववा॥ प्रा-
प्नुयात्साहसंपूर्वंग्रामेत्र्यहमपालयन्॥ आसिद्धोतराजाज्ञयावरु-
द्धेत॥ बृहस्पतिः॥ प्रभुणाविनियुक्तःसन्भृतकोविदधातियः॥ तद-
र्थमशुभंकर्मस्वामीतत्रापराध्नुयात्॥ कृतेकर्मणियःस्वामीनदद्या-
द्वेतनंभृते॥ राजादापयितव्यःस्याद्वेतनंचानुरूपतइति॥ नारदः॥ अ-
नयन्भाटयित्वातुभांडवान्यानवाहने॥ दाप्योभृतिंचतुर्भागंसर्वाम-
र्द्धपथेत्यजन्॥ कात्यायनः॥ हस्त्यश्वगोखरोष्ट्रादीन्गृहीत्वाभाटके-
नयः॥ नार्पयेत्कृतकृत्यःसंस्तावद्दाप्यःसभाटकं॥ नारदः॥ परभूमौग-

हेकृत्वास्तोमंदत्वावसेत्तुयः॥सतद्गृहीत्वानिर्गच्छेत्तृणकाष्ठेष्टकादिकं
॥स्तोमाद्विनावसित्वातुपरभूमावनिश्चितः॥यान्येवतृणकाष्ठानि
त्विष्टकाविनिवेशिताः॥विनिर्गच्छंस्तुतत्सर्वंभूमिस्वामिनिवेदयेत्
॥स्तोमोभाटकम्॥ ॥अथसंविद्व्यतिक्रमः॥नारदः॥पाषंडनैगमा
दीनांस्थितिःसमयउच्यते॥समयस्यानपाकर्मतद्विवादपदंस्मृतं॥पा
षंडावेदमार्गविरोधिनोवाणिज्यनिकराः॥नैगमास्तदविरोधिनः॥आ
दिपदेनत्रैविद्यागृह्यंते॥तत्रराजकृत्यमाहबृहस्पतिः॥वेदविद्यावि
दोविप्रान्श्रोत्रियानग्निहोत्रिणः॥आहृत्यस्थापयेत्तत्रतेषांवृत्तिंप्र
कल्पयेत्॥अनाच्छेद्यकरास्तेभ्यःप्रदद्याद्गृहभूमयः॥भुक्तभाव्या
श्चनृपतिर्लेखयित्वास्वशासने॥नआच्छेद्योग्राह्यःकरोयेभ्यस्तेअ
नाच्छेद्यकराः॥भुक्तभाव्याभुक्तमुत्सृष्टंभाव्यंमातृभूम्यादिफलंया
सांताइत्यर्थः॥तेषांचश्रोत्रियादीनांधर्मानाह॥निजधर्माविरोधेन
यस्तुसामयिकोभवेत्॥सोपियत्नेनसंरक्ष्योधर्मोराजकृतश्चयः॥
नारदः॥पाषंडनैगमश्रेणिपूगव्रातगणादिषु॥संरक्षेत्समयंराजा
दुर्गेजनपदेषुच॥नानाजातीयानामेकजातीयकर्मकुर्वतांसंघाताः
श्रेणयः॥तेषामेवभिन्नजातीयकर्मकुर्वतांसंघाःपूगाः॥व्राताःज्ञाति
संबंधिबंधूनांसंघाः॥तएवकुलानीत्यप्युच्यंते॥पाषंडानैगमाश्चव्या
ख्याताः॥एतेषांपाषंडादीनांव्रातानांसंघागणाः॥एतेषांसमयभे
देदंडमाहयाज्ञवल्क्यः॥गणद्रव्यंहरेद्यस्तुसंविदंलंघयेच्चयः॥क्री
त्वामूल्येनयःपण्यंक्रेतानबहुमन्यते॥क्रीतानुशयइत्येतद्विवादप
दमुच्यते॥पण्यपरीक्षावधिमाहसएव॥त्र्यहाद्दोह्यंपरीक्षेतपंचा
हाद्वाह्यमेवतु॥मुक्तावज्रप्रवालानांसप्ताहंस्यात्परीक्षणं॥द्विपदा
मर्द्धमासंतुपुंसांतद्विगुणंस्त्रियाः॥दशाहंसर्वबीजानामेकाहंलोह
वाससां॥कात्यायनः॥भूमेर्दशाहेनुशयःक्रेतुर्विक्रेतुरेववा॥बृहस्प
तिः॥अनोवाक्पण्यदोषस्तुयस्मिंजायतेक्वचित्॥विक्रेतुःप्रतिदेयंत
त्क्रेतामूल्यमवाप्नुयात्॥कात्यायनः॥अविज्ञातंतुयत्क्रीतंतत्स्वामि
नेदेयंपण्यंकालेन्यथानतु॥सपरीक्ष्यपण्यगृहीतेतुनारदः॥क्रीत्वामू
ल्येनयःपण्यंदुःक्रीतंमन्यतेक्रयी॥विक्रेतुःप्रतिदेयंतत्तस्मिन्नेवा

स्त्वीस्थितं॥ द्वितीयेन्हि दद्क्रेता मूल्यात्त्रिंशांशमाहरेत्॥ द्विगुणं तृ
तीयेन्हि परतः क्रेतुरेव तत्॥ नारदः॥ परिभुक्तं तु यद्वासः क्लिष्टरूपं म
लीमसं॥ सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः॥ इति क्रीतानुशयः
॥ अथ विक्रीयासंप्रदानं॥ नारदः॥ विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्र
दीयते॥ विक्रीयासंप्रदानं तद्विवादपदमुच्यते॥ याज्ञवल्क्यः॥ गृही
तमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति॥ सोदयं तस्य दाप्योसौ दिग्लाभं
वा दिगागते॥ सोदयं सलाभं दिक्देशान्तरं॥ तत्र लाभो देशान्तरीयप
ण्यलाभः॥ स एव॥ राजदैवोपघातेन पण्ये दोषमुपागते॥ हानिर्वि
क्रेतुरेवासौ याचितस्याप्रयच्छतः॥ स एव॥ हानिश्चेत्क्रेतृदोषेण क्रेतु
रेव हि सा भवेत्॥ नारदः॥ दीयमानं न गृह्णाति क्रीत्वा पण्यं च यः क्रयी॥
॥ विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयात्॥ याज्ञवल्क्यः॥ मत्तो
न्मत्तेन विक्रीतं हीनमूल्येन येन वा॥ अस्वतंत्रेण मूढेन त्याज्यं त
स्य पुनर्भवेत्॥ अयं च सर्वोपि विधिर्मूल्ये दत्ते तुभ्यमेव देयं नान्यस्य
इति क्रेत्रा समयेकृते बोध्यः॥ दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्ति
तः॥ अदत्तेन्यत्र समयान्न विक्रेतुरतिक्रम इति नारदोक्तेः॥ सदोषप
ण्यविक्रये याज्ञवल्क्यः॥ ज्ञात्वा सदोषं यः पण्यं विक्रीणीता विचक्ष
णः॥ तदेव द्विगुणं दाप्यं तत्सममेव विनयं तथा॥ इति विक्रीयासंप्रदानं॥ अथ
स्वामिपालविवादः॥ पालदोषेण पश्वादिनाशे याज्ञवल्क्यः॥ पालदो
षविनाशे तु पाले दंडो विधीयते॥ अर्द्धत्रयोदशपणः स्वामिने द्रव्यमे
व च॥ द्रव्यं गवादि॥ पश्वादिमरणनिश्चायकमाह मनुः॥ कर्णौ चर्म
च बालांश्च बस्तिं स्नायूंश्च रोचनां॥ पशुस्वामिषु दद्यात्तु मृतेष्वंकाभि
दर्शने॥ अंकः शृंगादीनि मदनः॥ गवादिप्रचारार्थं भूभागमाह याज्ञ
वल्क्यः॥ धनुःशतं परीणाहो ग्रामक्षेत्रांतरं भवेत्॥ द्वे शते खर्वटस्य
स्यात्सचारस्य चतुःशतं॥ परीणाहो गवादिप्रचारार्थो भूः॥ अयमेव परी
हारः॥ धनुःशतं परीहारो ग्रामस्य स्यात्समंततः इति मनूक्तेः॥ अनेक
कोरुलषी वलयुक्तो ग्रामः खर्वटः॥ बहुकंटकसंतानः इति केचित्॥
परसस्यादिनाशे पशुस्वामिनो दंडमाह याज्ञवल्क्यः॥ माषानष्टौ तु महि
षी सस्यघातस्य कारिणी॥ दंडनीया तदर्द्धं तु गौस्तदर्द्धमजाविकं॥ भक्ष

खित्वोपविष्टानांयथोक्ताद्द्विगुणोदमः॥सममेषांविवीतेपिखरोष्ट्रमहि
षीसमं॥विवीतंतृणकाष्ठादिसंचयस्थलं॥एतदपवदत्युशना॥श्वा
वत्सस्यंविनश्येत्तलावत्सास्सेन्निशाःफलाः॥गोपस्ताड्यस्तुगोमीतु
पूर्वोक्तंदंडमर्हति॥अदंड्याश्चोत्सवेगावःश्राद्धकालेतथैवच॥व्या
सः॥आक्रम्यचद्विजेभुक्तंपरिक्षीणेश्चबांधवैः॥गोभिश्चनरशार्दूल
वाजपेयाद्विशिष्यते॥उशना॥गोभिर्विनाशितंधान्यंयोनरःप्रतिया
चते॥पितरस्तस्यनाश्नंतिनाश्नंतित्रिदिवौकसः॥ इतिस्वामिपाल
विवादः॥अथसीमाविवादः॥सीमाज्ञानोपायानाहबृहस्पतिः॥
करीषास्थितुषांगारशर्कराश्मकपालिकाः॥सिकतेष्टकगोबालका
र्पासास्थीनिभस्मच॥प्रक्षिप्यकुंभेष्वेतानिसीमांतेषुनिधापयेत्॥
अत्रसाक्षिणांविशेषमाहयाज्ञवल्क्यः॥सामंतावासमग्रामाश्चत्वा
रोष्टौदशापिवा॥रक्तस्रग्वसनाःसीमांनयेयुःक्षितिधारिणः॥नारदः
॥नैकःसमुन्नयेत्सीमांनरःप्रत्ययवानपि॥गुरुत्वादस्यकार्यस्यक्रि
येषाबहुषुस्थिता॥बृहस्पतिः॥ज्ञातिचिन्हैर्विनासाधुरेकोप्युभयसं
मतः॥रक्तमाल्यांबरधरोमृदमादायमूर्द्धनि॥सत्यव्रतःसोपवासः
सीमांनदर्शयेन्नरः॥कात्यायनः॥सीमानंचक्रमेणकोशेपादस्पर्शेनतथै
वच॥त्रिपक्षपक्षसप्ताहंदैवराजिकमिष्यते॥मनुः॥यथोक्तेननयं
तस्तेपूयंतेसत्यसाक्षिणः॥विपरीतंनयंतस्तुदाप्यास्तुद्विशतंदमं
॥नारदः॥अथचेदनृतंब्रूयुःसीमंताःसीमनिर्णये॥सर्वेपृथक्पृथग्दं
ड्याराज्ञामध्यमसाहसं॥कात्यायनः॥बहूनांतुगृहीतानांनसर्वैर्निर्णे
यंयदि॥कुर्युर्नयाद्भयाल्लोभाद्दाप्यास्तूत्तमसाहसं॥याज्ञवल्क्यः॥अ
भावेज्ञातृचिन्हानांराजासीमप्रवर्त्तिता॥मनुः॥सीमायामविषह्या
यांस्वयंराजैवधर्मवित्॥प्रदिशेद्भूमिमेकेषामुपकारादितिस्थितिः
॥सएव॥निवेशकालादारभ्यगृहद्वार्यापणादिकं॥येनयावद्यथाभु
क्तंतस्यतन्नविचालयेत्॥कात्यायनोपि॥मेखलाभ्रमनिष्कासगवा
क्षान्नोपरोधयेत्॥प्रणालीगृहवास्तुचपीडयन्दंडभाग्भवेत्॥मेख
लाभित्तिमूलबंधः॥भ्रमोजलनिर्गमः॥निष्कासोहर्म्यादिविनिर्गतका
ष्ठादिनिर्मितमस्पृष्टभूमिकमुपवेशनस्थलमितिमदनः॥भूमिनिष्का

सइतिक्वचिताढः॥धूमनिर्गमार्थंगवाक्षादीनितदर्थः॥सएव॥निवे
शसमयादूर्ध्वंनैतेयोज्याःकदाचन॥दृष्टिपातंप्रणालींचनकुर्यात्प
रवेश्मसु॥बृहस्पतिः॥वर्चस्थानंवन्हिचयंगर्त्तोच्छिष्टांबुसेवनं॥अ
त्यारात्परकुड्यस्यनकर्त्तव्यंकथंचन॥वर्चस्थानंशौचस्थलं॥अत्या
रादितिसमीपे॥कात्यायनः॥विण्मूत्रोदकसेकंचवन्हिश्वभ्रनिवेशनं
॥आराल्लिलयमुत्सृज्यपरकुड्यान्निवेशयेत्॥बृहस्पतिः॥यांत्याया
न्तिजनायेनपशवश्चानिवारिताः॥तदुच्यतेसमरणंनरोद्धव्यंतुके
नचित्॥नारदः॥अवस्करस्थलश्वभ्रभ्रमस्यंदिनिकादिभिः॥चतुष्प
थसुरस्थानराजमार्गान्नरोधयेत्॥कात्यायनः॥सर्वेजनाःसदायेन
प्रयांतिसचतुष्पथः॥अनिषिद्धायथाकालंराजमार्गःसउच्यते॥बृह
स्पतिः॥पतत्रसंकरश्वभ्रंवृक्षारोपणमेववा॥कामात्पुरीषंकुर्याच्च
तस्यदंडस्तुमाषकः॥मनुः॥समुत्सृजेद्राजमार्गेयस्त्वमेध्यमनाप
दि॥सद्वौकार्षापणौदद्यादमेध्यंचाशुशोधयेत्॥कात्यायनः॥तड
गोद्यानतीर्थानियोऽमेध्येनविनाशयेत्॥अमेध्यंशोधयित्वातुदंड
येत्पूर्वसाहसं॥याज्ञवल्क्यः॥मर्यादायाःप्रभेदेतुसीमातिक्रमणेत
था॥क्षेत्रस्यहरणेदंडाअधमोत्तममध्यमाः॥मनुः॥गृहंतडागमारा
मंक्षेत्रंवापीमपाहरन्॥शतानिपंचदंड्यःस्यादज्ञानाद्विशतोदमः॥
कात्यायनः॥सीमामध्येतुजातानांवृक्षाणांक्षेत्रयोर्द्वयोः॥फलंपुष्पंच
सामान्यंक्षेत्रस्वामिषुनिर्दिशेत्॥सएव॥अन्यक्षेत्रेतुजातानांशाखा
पत्रान्यसंस्थिताः॥स्वामिनंतंविजानीयाद्यस्यक्षेत्रेषुसंस्थिताः॥या
ज्ञवल्क्यः॥स्वामिनेयोऽनिवेद्यैवक्षेत्रेसेतुंप्रवर्त्तयेत्॥उत्पन्नेस्वामि
नोभोगस्तदभावेमहीपतेः॥सएव॥ननिषेध्योऽल्पबाधस्तुसेतुःक
ल्याणकारकः॥परभूमिंहरन्कूपःस्वल्पक्षेत्रोबहूदकः॥ननिषेध्य
इत्यनुषंगः॥नारदोपि॥परक्षेत्रस्यमध्येतुसेतुर्नप्रतिषिध्यते॥मह
गुणाल्पदोषश्चेद्वृद्धिरिष्टाक्षयेसति॥नारदः॥पूर्वप्रवृत्तमुत्सन्नमपृ
ष्ट्वास्वामिनंतुयः॥सेतुंप्रवर्त्तयेद्यस्तुनसतत्फलभाग्भवेत्॥व्यासः॥क्षे
त्रंगृहीत्वायःकश्चिन्नकुर्यान्नचकारयेत्॥स्वामिनेसससदंडोप्याराज्ञे
दंडंचतत्समं॥सदंडेत्रोत्सत्यहेफलम्॥इतिसीमाचारः॥अथवाक्प

रुष्यं॥बृहस्पतिः॥देशग्रामकुलादीनां क्षेत्रं पापेन योजनं॥द्रव्यंविनातु
प्रथमं वाक्पारुष्यं तदुच्यते॥भगिनीमातृसंबंधं उपपातकशंसनं॥
पारुष्यं मध्यमं प्रोक्तं बालिकं शास्त्रवेदिभिः॥अभक्ष्यापेयकथनं म
हापातकदूषणं॥पारुष्यमुत्तमं प्रोक्तं तीव्रमर्माभिघट्टनमिति॥द्रव्यंवि
नाद्रव्यवैशिष्ट्यं विना केवलं वाक्कृतमेवेत्यर्थः॥अभिघट्टनमुद्घाट
नं॥विष्णुः॥समवर्णाक्रोशने द्वादशपणान्दंड्यः स्मृत्यंतरे॥पारुष्य
दोषावृतयोर्युगपत्संप्रवृत्तयोः॥विशेषश्चेन्न दृश्येत विनयः स्यात्सम
स्तयोः॥नारदः॥पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्॥पश्चा
द्यः सोप्यसत्कारी पूर्वे तु विनयो गुरुः॥मनुः॥शतं ब्राह्मणमाक्रुश्य क्ष
त्रियो दंडमर्हति॥वैश्योप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति॥बृहस्पतिः
॥विप्रे शतार्हदंडस्तु क्षत्रियस्याभिशंसने॥विशस्तथार्धं पंचाशच्छू
द्रस्यार्धं त्रयोदश॥शूद्रविषये स एव॥धर्मोपदेशकर्ता च वेदोदाह
रणान्वितः॥आक्रोशनस्तु विप्राणां जिह्वाछेदेन दंड्यते॥मनुः॥मा
तरं पितरं जायां भ्रातरं श्वशुरं गुरुं॥आक्षारयन् शतं दाप्यः पंथानं चाद
दद्गुरोः॥भ्राता ज्येष्ठः पित्रादिः साहचर्यात्॥मात्रादीनां सापराधत्वे
जायायाश्च निरपराधत्वे दंड इति मिताक्षरादिषु॥याज्ञवल्क्यः॥बा
हुग्रीवानेत्रसक्थिविनाशे वाचिके दमः॥शक्तस्तदर्द्धिकः पादनासा
कर्णकरादिषु॥अशक्तस्तु वदन्नेवं दंडनीयः पणान्दश॥तथाशक्तः
प्रतिभुवं दाप्यः क्षेमाय तस्य तु॥स एव॥अभिगंतास्मि भगिनीं मात
रं वा नवेति च॥शपंतं दापयेद्राजा पंचविंशतिकं दमं॥स एव॥त्रैवि
द्यनृपदेवानां दंड उत्तमसाहसः॥नारदः॥पतितं पतितेत्युक्त्वा चौरं
चौरेति वा पुनः॥वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत्॥या
ज्ञवल्क्यः॥सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां॥क्षेपं करो
ति चेद्दंड्यः पणानर्धत्रयोदश॥उशना॥मोहात्प्रमादात्संघर्षात्प्रीत्या
वोक्तं मयेति यः॥नाहमेवं पुनर्वक्ष्ये दंडार्धं तस्य कल्पयेत्॥इति वाक्पा
रुष्यं॥अथ दंडपारुष्यं॥नारदः॥परगात्रेष्वभिद्रोहो हस्तपादायुधा
दिभिः॥भस्मादिभिश्चोपघातो दंडपारुष्यमुच्यते॥बृहस्पतिः॥आ
कृष्टस्तु समाक्रोशन् ताडितः प्रतिताडयन्॥हत्वापराधिनं चैव नापराधी

भवेत्तु सः ॥ याज्ञवल्क्यः ॥ भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः ॥
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः ॥ समेष्वेवं परस्त्रीषु द्वि
गुणस्तूत्तमेषु च ॥ हीनेष्वर्द्धदमो मोहमदादिभिरदंडनं ॥ कात्यायनः ॥
छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः ॥ षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्ट
गुणः स्मृतः ॥ याज्ञवल्क्यः ॥ उद्गूर्णे हस्तपादे तु दशविंशतिको दमौ ॥ प
रस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः ॥ स एव ॥ पादकेशांशुककरोल्लुं
चनेषु पणान्दश ॥ पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः ॥ शोणितेन
समं दंडं कुर्वन्काष्ठादिभिर्नरः ॥ द्वात्रिंशतं पणान्दंड्यो द्विगुणं दर्शनेऽसृ
जः ॥ पीडेत्यादि ॥ अंशुकेनावेष्ट्य दृढमाकृष्य पादेनाध्यासे शतमित्य
र्थः ॥ स एव ॥ करपाददतो भंगे छेदने कर्णनासयोः ॥ मध्यो दंडो व्रणोद्भे
दे मृतकल्पहते तथा ॥ विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु ॥ उद्गूर्णे
प्रथमो दंडः स्पर्शने तु तदर्द्धकः ॥ मनुः ॥ येन केनचिदंगेन हिंस्याच्छ्रे
यांसमंत्यजः ॥ छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं ॥ पाणिमुद्यम्य
दंडं वा पाणिच्छेदनमर्हति ॥ कात्यायनः ॥ वाक्पारुष्ये यथैवोक्ताः प्र
तिलोमानुलोमतः ॥ तथैव दंडपारुष्ये पात्या दंडा यथाक्रमं ॥ विष्णुः
॥ एकं बहूनां विघ्नतां प्रत्येकश उक्तो दंडो द्विगुणः ॥ कात्यायनः ॥ दे
हेंद्रियविनाशे तु यथा दंडं प्रकल्पयेत् ॥ तथा तुष्टिकरं देयं समुत्थानं
च पंडितैः ॥ तुष्टिकरं ताडिततोषकरं समुत्थानमौषधादि मूल्यं च पंडि
तैरभिज्ञैः कल्पितं देयमित्यर्थः ॥ पशुताडनादौ ॥ याज्ञवल्क्यः ॥ दुःखे
च शोणितोत्पादे शाखांगच्छेदने तथा ॥ दंडः क्षुद्रपशूनां तु द्विगुणः प्रभृति
क्रमात् ॥ लिंगस्य छेदने मृत्यौ मध्यमो मूल्यमेव च ॥ महापशूनामे
तेषु स्थानेषु द्विगुणो दमः ॥ वृक्षोपघाते मनुः ॥ वनस्पतीनां सर्वेषामु
पभोगे यथा यथा ॥ तथा तथा दमः कार्यो हिंसायामिति धारणा ॥ इति
दंडपारुष्यं ॥ अथ स्तेयं ॥ तदुपयोगितया त्रिविधं द्रव्यमाह नारदः ॥
मृद्भांडासनखट्वास्थिदारुचर्मतृणादि यत् ॥ हिरण्यरत्नकौशेयस्त्रीपुं
गोगजवाजिनः ॥ देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमं ॥ शमीधान्यं कृ
तान्नं च क्षुद्रद्रव्यमुदाहृतं ॥ वासः कौशेयवर्ज्यं च गोवर्ज्यं पशवस्तथा
॥ हिरण्यवर्जं लोहं च मध्यं व्रीहियवादि च ॥ तत्र प्रकाशतस्करांस्ताव

दाह॥सएव॥नैगमावैधकितवाःसभ्योत्कोचकवंचकाः॥दैवोत्पातवि
दोभेद्राःशिल्पज्ञाःप्रतिरूपकाः॥अक्रियाकरणाश्चैवमध्यस्थाःकूट
साक्षिणः॥प्रकाशतस्करास्त्वेतेतथाकुहकजीविनः॥नारदोपि॥प्रको
शवंचकास्तत्रकूटमानतुलाश्रिताः॥उत्कोचकाःसोपधिकावंचकाः
पापयोपितः॥प्रतिरूपकराश्चैवमंगलादेशवृत्तयः॥इत्येवमाद्यो
ज्ञेयाःप्रकाशास्तस्कराभुवि॥बृहस्पतिः॥प्रच्छाद्यदोषंव्यामिश्रं
पुनःसंस्कृत्यविक्रयी॥पण्यंतद्द्विगुणंदाप्योवणिग्दंडंचतत्समं
॥अज्ञात्वौषधिमंत्रस्तुयस्तुव्याधेरतत्ववित्॥रोगिभ्योऽर्थंसमाद
त्तेसदंड्यश्चौरवद्भिषक्॥कूटाक्षदेविनःक्षुद्राराजभाव्यहराश्चये
॥गणकावंचकाश्चैवदंड्यास्तेकितवाःस्मृताः॥अन्यायवादिनःस
भ्यास्तथैवोत्कोचजीविनः॥विश्वस्तवंचकाश्चैवनिर्वास्याःसर्वए
वते॥ज्योतिर्ज्ञानंतथोत्पातमविदित्वातुयेनृणां॥शकुनादिचयेब्रूयु
र्विनेयास्तेप्रयत्नतः॥दंडाजिनादिभिर्युक्तमात्मानंदर्शयंतिये॥हिंसं
तिछद्मनानृणांवध्यास्तेराजपूरुषैः॥स्वल्पमूल्यंतुसंस्कृत्यनयं
तिबहुमूल्यतां॥येबालकान्वंचयंतिदंड्यास्तेयानुसारतः॥हेमरत्न
प्रवालाद्यान्कृत्रिमान्कुर्वंतेतुये॥क्रेतुर्मूल्यंप्रदाप्यास्तेराज्ञातद्द्वि
गुणंदमं॥मध्यस्थावंचकाःस्युस्तेरागलोभादिनापदा॥साक्षिण
श्चान्यथाब्रूयुर्दाप्यास्तेद्विगुणंदमं॥व्यासः॥साधनाद्यन्वितारा
त्रौयदिप्रच्छन्नचारिणं॥अविज्ञातनिवासाश्चज्ञेयाःप्रच्छन्नतस्क
राः॥सएव॥उत्क्षेपकःसंधिभेत्तापांथमुड्ग्रंथिमोचकः॥स्त्रीपुंसो
ःश्चपशुस्तेयीचौरोनवविधःस्मृतः॥संधिभित्त्यादेः॥याज्ञवल्क्यः॥
उत्क्षेपकग्रंथिभेदौकरसंदंशहीनकौ॥कार्यौद्वितीयापराधेकरपादै
कहीनकौ॥संदंशःतर्जन्यंगुष्ठौ॥मनुः॥संधिंभित्त्वातुयेचौर्यंरात्रौकु
र्वंतितस्कराः॥तेषांछित्त्वानृपोहस्तौतीक्ष्णशूलेनिवेशयेत्॥बृहस्प
तिः॥तथापांथमुषांवृक्षेगलेबद्ध्वाऽवलंबयेत्॥अंगुलीग्रंथिभेदस्य
छेदयेत्प्रथमेग्रहे॥द्वितीयेहस्तचरणौतृतीयेवधमर्हति॥अंगुली
तर्जन्यंगुष्ठौ॥नारदः॥प्रथमेग्रंथिभेदानांअंगुल्यंगुष्ठयोर्वधः॥व्या
सः॥स्त्रीहर्तालोहशयनेदग्धव्योवैकटाग्निना॥नरहर्ताहस्तपादौ॥

छित्वास्याप्यश्वतुष्टये।।बृहस्पतिः।। गोहर्तुर्नासिकांछित्वाबध्वात
मितिमज्जयेत्।।नारदः।।सर्वस्वंहरणोनारींकन्यांतुहरतोवधः।।वा
जिवारणलोहानांचाददीतबृहस्पतिः।।सर्वस्वमित्यनुषंगः।।व्यासः
।।पशुहर्तुस्त्वर्द्धपादंतीक्ष्णशस्त्रेणकर्त्तयेत्।। नारदः।।महापशुस्ते
नयोग्यंदंडमुत्तमसाहसं।।मध्यमंमध्यमपशून्पूर्वंसुद्रपशून्हतः।
मनुः।।धान्यंदशभ्यःकुंभेभ्योहरतोभ्यधिकेवधः।।शेषेप्येकादशगुण
दाप्यस्तस्यचतद्धनं।।कुंभोविंशतिप्रस्थाः।।सएव।। मुख्यानांचैवर
त्नानांहरणेवधमर्हति।।नारदः।।सुवर्णरजतादीनामुत्तमानांचवास
सां।।रत्नानांचैवसर्वेषांशतादभ्यधिकेवधः।।मनुः।।सुवर्णरजतादीना
मुत्तमानांचवाससां।।पंचाशतस्त्वभ्यधिकेहस्तच्छेदनमिष्यते।।शेषे
ष्वेकादशगुणंमूल्याद्दंडंप्रकल्पयेत्।।याज्ञवल्क्यः।।सचिह्नंब्राह्मणं
कृत्वास्वराष्ट्राद्विप्रवासयेत्।।मनुः।।प्रायश्चित्तंचकुर्वाणाःसर्वेवर्णा
यथोदितं।। नांक्याराज्ञाललाटेतुदाप्यास्तूत्तमसाहसं।।याज्ञव
ल्क्योपि।।चोरंप्रदाप्यापहृतंघातयेद्विविधैर्वधैः।।नारदः।।भक्ताव
काशदातारःस्तेनानांयेप्रसर्पतां।।शक्ताश्चयेउपेक्षंतेतेपितद्दोषभा
गिनः।।इतिस्तेयं।।अथसाहसं।।बृहस्पतिः।।मनुष्यमारणंचौर्यं
परदाराभिमर्शनं।।पारुष्यमुभयंचेतिसाहसंस्याच्चतुर्विधं।।उभयं
वाक्पारुष्यंदंडपारुष्यंचनारदः।।फलमूलोदकादीनांक्षेत्रोपकर
णस्यच।।भंगाक्षेपोपमर्दाद्यैःप्रथमंसाहसंस्मृतं।।वासःपश्वन्न
पानानांगृहोपकरणस्यच।।एतेनैवप्रकारेणमध्यमंसाहसंस्मृतं।।
व्यापादोविषशस्त्राद्यैःपरदाराभिमर्शनं।।प्राणोपरोधियच्चान्यदुक्तं
मध्यमसाहसं।।याज्ञवल्क्यः।।वंदिग्राहांस्तथावाजिकुंजराणांविहा
रिणः।।प्रसह्यघातिनश्चैवशूलानारोपयेन्नरान्।।बृहस्पतिः।।प्रका
शघातकायेतुतथाचोपांशुघातकाः।।ज्ञात्वासम्यग्धनंदत्वाहंतव्यावि
विधैर्वधैरिति।।बृहस्पतिः।।एकस्यबहवोयत्रप्रहरंतिरुषान्विताः
।।मर्मप्रहारकोयस्तुघातकःसउदाहृतः।।कात्यायनः।।आरंभकृत्स
हायश्चतथामार्गानुदेशकः।। आश्रयःशस्त्रदाताचभक्तदाताविकर्मि
णां।।युद्धोपदेशकश्चैवतद्विनाशप्रवर्तकः।।उपेक्षाकार्ययुक्तश्चदोषव

तानुमोदकः॥अनिषिद्धाक्षमोयःस्यात्सर्वेतेकार्यकारिणः॥यथाश
क्त्यानुरूपंतुदंडमेषांप्रकल्पयेत्॥विप्रस्यदंडेविशेषमाहनारदः॥अ
विशेषेणसर्वेषामेषदंडविधिःस्मृतः॥वधादृतेब्राह्मणस्यनवधंब्रा
ह्मणोर्हति॥शिरसोमुंडनंदंडस्तस्यनिर्वासनंपुरात्॥ललाटेचाभि
शस्तांकःप्रयाणंगर्दभेनचेति॥आततायप्यपिविप्रोनवध्यः॥नातता
यिवधेदोषोन्यत्रगोब्राह्मणादितिसुमंतूक्तेः॥कात्यायनः॥आतता
यिनिचोत्कृष्टेतपःस्वाध्यायसंयुते॥वधस्तत्रतुनैवस्यात्पापेहीनेवधो
भृगुः॥आततायिनआहसएव॥उद्यतासिर्विषाग्निश्चशापोद्यतकरस्त
था॥आथर्वणेनहंताचपिशुनश्चापिराजनि॥भार्यातिक्रमकारीचरं
ध्रान्वेषणतत्परः॥एवमाद्यान्विजानीयात्सर्वांश्चैवाततायिनः॥वसि
ष्ठोपि॥अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः॥क्षेत्रदारहरश्चैवषडे
तेह्याततायिनः॥यत्तुमनुः॥गुरुंवाबालवृद्धौवाब्राह्मणंवाबहुश्रुतं॥आ
तताथिनमायांतंहन्यादेवाविचारयन्॥इति॥यच्चकात्यायनः॥आतता
यिनमायांतमपिवेदांतगंरणे॥जिघांसंतंजिघांसीयान्नतेनब्रह्महाभ
वेदिति॥तदपिशब्दाद्ब्राह्मणभिन्नाततायिवधपरंब्राह्मणग्रहणंतुके
मुतिकन्यायार्थं॥आततायीब्राह्मणोपिवध्यःकिमुतान्यइतिमिताक्ष
रापि॥उद्यम्यशस्त्रमायांतंभ्रूणमप्याततायिनं॥निहत्यभ्रूणहानः
स्यादहत्वाभ्रूणहाभवेदितिगालवोक्तेः॥स्वाध्यायिनंकुलेजातंयोह
न्यादाततायिनं॥अहत्वाभ्रूणहासस्यान्नहत्वाभ्रूणहाभवेदितिवृहस
त्युक्तेश्चस्ववधार्थमागच्छेन्नाततायीब्राह्मणोपिवध्यएव॥क्षेत्रदा
रहरादिब्राह्मणोनवध्यः॥क्षत्रियादिस्तुतादृशोपिवध्यइतिचंद्रिकाश
यः॥युक्तश्चायं॥मनुकात्यायनगालववचसांस्ववधोद्यताततायिविशे
षविशेषपतयासामान्यविषययोःपूर्वोक्तसुमंतुकात्यायनवचसोर्बा
धस्योचितत्वात्॥यत्तुबृहस्पतिः॥आततायिनमुत्कृष्टंवृत्तस्वाध्याय
संयुतं॥योनहन्याद्वधप्राप्तंसोश्वमेधफलंलभेदितितदपिस्ववधोद्यत
भिन्नाततायिपरं॥किंच॥आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनमितिक
लौवधोद्यतस्याततायिनोविप्रस्यहननंनिषिद्धं॥तस्यविधितोप्राप्तत्वेकलौ
निषेधोव्यर्थःस्यात्॥सर्वेषामपिकलिनिषेधानांविधिप्राप्तगोचरत्वस्यद्

मान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणइतिधर्मपदस्वरसेनसर्वनिबंधे
षुव्यवस्थापितत्वात्॥ अतःकलौस्ववधोद्यतोप्याततायीविप्रोपिनव
ध्यः॥ युगांतरेतुवध्यएव॥ अन्यस्त्वाततायिविप्रःसर्वेष्वपियुगेष्वव
ध्यः॥ क्षत्रियादिस्त्वाततायीसर्वोपिसर्वयुगेषुवध्यइतिदिक्॥ हीनम
ध्योत्कृष्टद्रव्यहरणेदंडमाहबृहस्पतिः॥ क्षेत्रोपकरणंचैवपुष्पमूल
फलानिच॥ विनाशयन्हरन्दंड्यःशताद्यमनुरूपतः॥ पशुवस्त्रान्नपा
नानिगृहोपकरणंतथा॥ हिंसयंश्चोरयन्शास्योद्विशताद्यंदमंतथा॥
स्त्रीपुंगोहेमरत्नानिदेवविप्रधनंतथा॥ पौषेपंचोत्तमद्रव्यमेषांमूल्य
समोदमः॥ द्विगुणोवाकल्पनीयःपुरुषापेक्षयानृपैः॥ हंतवाघातनीयः
स्यात्प्रसंगविनिवृत्तये॥ पौषेयस्त्रीधनं॥ वाशब्दश्चार्थे॥ अत्रविनाशनह
रणेतिपदस्वरसात्साहसविषयमेतद्वचइतिमदनः॥ साहसप्रयोजकस्य
दंडमाहयाज्ञवल्क्यः॥ यःसाहसंकारयतिसदाप्योद्विगुणंदमं॥ यः
श्चैवमुक्त्वाहंदाताकारयेत्सचतुर्गुणं॥ द्वैगुण्यंचातुर्गुण्यंचसाहसकर्तृ
दंडापेक्षया॥ साध्वींविप्रांबलाद्गच्छतोदंडमाहमनुः॥ सहस्रंब्राह्मणो
दंड्योविप्रांगुप्तांबलाद्व्रजन्॥ तादृश्यांविप्रायांक्षत्रियादेस्तुबृहस्प
तिराह॥ सहसाकामयेद्यस्तुधनंतस्याखिलंहरेत्॥ उत्कृत्यलिंगवृ
षणौभ्रामयेद्गर्दभेनतु॥ कामयेत्स्वपत्नींवांछेत्॥ क्षत्रियादीनामनु
लोमानांप्रतिलोमानांचबलात्सजातीयपरभार्यागमनेदंडमाहका
त्यायनः॥ स्त्रीषुवृत्तोपभोगःस्यात्प्रसह्यपुरुषोयदा॥ वधेतत्रप्रवर्त्ते
तकार्यातिक्रमणंहितत्॥ सएव॥ अनिच्छंतीतुयाभुक्तागुप्तांतांवास
येद्गृहे॥ मलिनांगीमधःशय्यांपिंडमात्रोपजीविकां॥ सएव॥ हीनवर्णोपभु
क्तापात्याज्यावध्याथवाभवेत्॥ वधस्त्विच्छंत्यादाप्यः॥ हीनमध्यो
मसाहसेषुदंडमाहनारदः॥ तस्यदंडःक्रियापेक्षःप्रथमस्यशतावरः॥ मध्य
मस्यचशास्त्रज्ञैर्दृष्टःपंचशतावरः॥ उत्तमेसाहसेदंडःसहस्रावरउच्यते
॥ वधःसर्वस्वहरणंपुरान्निर्वासनांकने॥ तदंगच्छेदइत्युक्तोदंडउत्तम
साहसइति॥ इतिसाहसं॥ अथस्त्रीसंग्रहणं॥ बलात्परभार्यागमन
स्यसाहसत्वात्तत्रपूर्वमेवदंडउक्तः॥ छलेनसजातीयपरभार्यागमनेत्वा
हबृहस्पतिः॥ छद्मनाकारयेद्यस्तुतस्यसर्वंहरेद्दमः॥ अंकयित्वाभ

नपुरान्निर्वासयेत्ततः॥सर्वहरःसर्वस्वहरः॥अयंचदंडःसमायां॥हीना
यामेतद्दंडं॥उत्तमायांवधः॥तथाचसएव॥दमोनेयःसमायांयोहीना
यामधिकस्ततः॥पुंसाकार्योधिकायांतुगमनेसंप्रमापणं॥हीनमः
ध्योत्तमत्रिविधस्त्रीसंग्रहणेदंडमाहसएव॥त्रयाणामपिचैतेषांप्र
थमोमध्यउत्तमः॥विनयःकल्पनीयःस्यादधिकोद्रविणाधिके॥दु
र्वृत्तस्यपरस्त्रियासहसंभाषणेदंडमाहमनुः॥परस्यपत्न्यापुरुषः
संभाषांयोजयेत्सह॥पूर्वमाक्षारितोदोषैःप्राप्नुयात्पूर्वसाहसं॥पित्रादि
भिर्निवारितयोःस्त्रीपुंसोःसंभाषणेदंडमाहयाज्ञवल्क्यः॥स्त्रीनिषेधे
शतंदद्याद्विशतंतुदमंपुमान्॥प्रतिषेधेतयोर्दंडोयथासंग्रहणेतथा
॥प्रत्येकनिषेधविषयंपूर्वमर्द्धं॥उभयनिषेधेउत्तरं॥उभयोरनुरागकृ
तेसंभोगेदंडमाहयाज्ञवल्क्यः॥सजातावुत्तमोदंडआनुलोम्येतुम
ध्यमः॥प्रातिलोम्येवधःपुंसोनार्याःकर्णादिकर्त्तनं॥कात्यायनः॥सर्वेषु
चापराधेषुपुंसोयोर्द्धदमःस्मृतः॥तदर्द्धंयोषितोदद्युर्वधेपुंसोंगकर्त्त
नं॥व्यभिचरितविप्रागमनेतुमनुः॥शतानिपंचदंड्यःस्याद्दिच्छंत्या
सहसंगतः॥इदंसजातीयपरम्॥अव्यभिचरितास्वनुलोमासुगमनेपि
सएव॥अगुप्तेवैश्यराजन्येशूद्रांवाब्राह्मणोव्रजन्॥शतानिपंचदंड्यः
स्यात्सहस्रंत्वंत्यजस्त्रियमिति॥यत्तु॥सहस्रंब्राह्मणोदंडंदाप्योगु
प्तेतुतेव्रजन्नितितत्साध्वीपरं॥शूद्रस्यप्रातिलोम्येनगमनेदंडमाहम
नुः॥शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसन्॥अगुप्तमंगसर्वस्वैर्गु
प्तःसर्वेणहीयते॥शूद्रोगुप्तांद्विजातिपत्नींगच्छंल्लिंगच्छेदनंसर्वस्व
हरणंचार्हति॥गुप्तांतुगच्छन्सर्वस्वहरणंवधंचार्हतीत्यर्थः॥गौतमः
॥आचार्यस्त्र्यभिगमनेलिंगोद्धारःसर्वस्वहरणंचगुप्ताचेद्वधोधिकइ
तिमनुः॥ब्राह्मणींतुयदागुप्तांगच्छेतांवैश्यपार्थिवौ॥वैश्यंपंचशतंकु
र्यात्क्षत्रियंतुसहस्रिणं॥सएव॥उभावपिहितावेवब्राह्मण्यागुप्तया
सह॥विप्लुतौशूद्रवद्दंड्यौदग्धव्यौवाकटाग्निना॥सएव॥वैश्यश्चेत्क्ष
त्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत्॥योब्राह्मण्यामगुप्तायांतावुभौदंड
मर्हतः॥वसिष्ठः॥राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वाराज
न्यमग्नौप्रास्येदेवंवैश्योराजन्यायामेवंशूद्रस्तुराजन्यवै

श्वयोरिति॥नारदः॥मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्वसा॥
पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा॥दुहिताऽऽचार्यभार्या
चसगोत्राशरणागता॥राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया॥आ
सामन्यतमांगच्छन्गुरुतल्पगउच्यते॥शिश्नस्योत्कर्तनात्तत्रनान्योदं
डोविधीयते॥याज्ञवल्क्योपि॥पितुःस्वसारंमातुश्चमातुलानींस्नुषाम
पि॥मातुःसपत्नींभगिनीमाचार्यतनयांतथा॥आचार्यपत्नींस्वसुतां
गच्छंस्तुगुरुतल्पगः॥छित्वालिंगंवधस्तस्यसकामायाःस्त्रियाअ
पि॥अयंचदंडोनब्राह्मणस्य॥परदाराभिमर्शेतुप्रवृत्तंनृन्महीपतिः॥उ
द्वेजनकरैर्दंडैश्चिन्हयित्वाप्रवासयेत्॥अब्राह्मणःसंग्रहणेप्राणांतंवध
मर्हति॥ब्राह्मणाधिकतरेबृहस्पतिवचनात्॥शंखलिखितौ॥येनयेनां
गेनापराधंकुर्यात्तत्तदस्यछेत्तव्यमन्यत्रब्राह्मणात्॥ब्राह्मणदास्यादि
गमनेदंडमाहयाज्ञवल्क्यः॥अवरुद्धासुदासीषुभुजिष्यासुतथैव
च॥गम्यास्वपिपुमान्दाप्यःपंचाशत्पणिकंदमं॥अवरुद्धाःस्वामि
नापुरुषांतरविशेषणंतद्भिन्नाइत्यर्थः॥इतिद्यूतं॥अथप्रकीर्णकं॥
ऊनंवाप्यधिकंवापिलिखेद्योराजशासनं॥पारदारिकचौरौवामुंचतोदं
डउत्तमः॥अभक्ष्येणद्विजंदूष्यंदंड्यउत्तमसाहसं॥मध्यमंक्षत्रियंवैश्यं
प्रथमंशूद्रमर्धिकं॥अभक्ष्यंसुरामूत्रपुरीषादि॥कूटस्वर्णव्यवहारीवि
मांसस्यचविक्रयी॥अंगहीनस्तुकर्तव्योदाप्यश्चोत्तमसाहसं॥विमां
संगवादिमांसं॥तथा॥शक्तोह्यमोक्षयन्स्वामीदंष्ट्रिणांशृंगिणांतथा
॥प्रथमंसाहसंदंड्योविक्रुष्टेद्विगुणंतथा॥विक्रोशःक्रंदनं॥मनुः॥मनुष्य
मारणेक्षिप्रंचौरवत्किल्बिषीभवेत्॥प्राणभृत्सुमहत्स्वर्धंगोगजोष्ट्रहया
दिषु॥क्षुद्रकाणांपशूनांतुहिंसनेद्विशतोदमः॥पंचाशतंभवेद्दंडःशुभेषु
चगवादिषु॥गर्दभाजाविकानांतुदंडःस्यात्पंचमाषकः॥माषकस्तुभवे
द्दंडःश्वशूकरनिपातनेइति॥अयंचदंडोहतमूल्यविक्रयेदाप्यः॥या
ज्ञवल्क्यः॥जारंचौरेत्यभिवदन्दाप्यःपंचाशतंदमं॥उपजीव्यधनंमुंचंस्त
देवाष्टगुणंस्मृतं॥उपजीव्यगृहीत्वा॥राज्ञोनिष्टप्रवक्तारं[illegible]स्यैवाक्रोशका
रिणं॥तन्मंत्रस्यचभेत्तारंजिह्वांछित्वाप्रवासयेत्॥अनिष्टंमरणादि॥आ
क्रोशःतवराज्यभ्रंशोस्त्वित्यादि॥मनुः॥राज्ञःकोशापहर्तृंश्चप्रतिकूलेषु

स्थिनां॥ घातयेद्विविधैर्दंडैररीणांचोपजापकं॥ याज्ञवल्क्यः॥ मृतां गलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा॥ राजयानसमारोढुर्दंडउत्तमसाहसं॥ मृतांगलग्नंमृतकवस्त्राणि॥ सएव॥ द्विनेत्रभेदिनोराजद्विष्टादेशकृतस्तथा॥ विप्रत्वेनचशूद्रस्यजीवतोष्टशतोदमः॥ द्विनेत्रभेदिनोनेत्रद्वयभेत्तुः राजनिषिकर्तुर्विप्रत्वाज्जीवितुश्चशूद्रस्येत्यर्थः॥ व्यवहाराद्योमन्येत जितोस्मीतिन्यायतोपिपराजितः॥ तमायांतंपुनर्जित्वादापयेद्विगुणंदमं॥ अत्रसर्वत्रानुक्तसंख्येयासंख्यापणविषयिणीज्ञेया॥ पणस्तुकर्षोन्मितंताम्रं। कार्षिकस्ताम्रिकःपणइतिकोशात्॥ कर्षःपलचतुर्थांशः॥ वराटिकापादशकद्वयंयत्साकाकिणीताश्चपणश्चतस्त्रइतिभास्कराचार्योक्तश्चपणः॥ उत्तमसाहसादिकंतुसाशीतिपणसाहस्रोदंडउत्तमसाहसः॥ तदर्धंमध्यमःप्रोक्तस्तदर्धमधमःस्मृतइति॥ तथा॥ उक्तापराधेषूक्तपरिमाणदंडैर्दमनासंभवेऽधिकोपिदंडः॥ यथाहापस्तंबः॥ दंडोदमनादित्याहुस्तेनादांतान्दमयेदिति॥ तथासर्वस्वापहारदंडेविशेषमाहनारदः॥ आयुधान्यायुधीयानांवाह्यादीन्वाह्यजीविनां॥ वेश्यास्त्रीणामलंकारान्वाद्यातोद्यादितद्विदां॥ यच्चयस्योपकरणंयेनजीवंतिकारुकाः॥ सर्वस्वहरणेऽप्येतन्नराजाहर्तुमर्हति॥ अन्यायागृहीतस्यदंडस्यप्रतिपत्तिमाह याज्ञवल्क्यः॥ राज्ञान्यायेनयोदंडोगृहीतोवरुणायतं॥ निवेद्यदद्याद्विप्रेभ्यःस्वयंत्रिंशद्गुणीकृतं॥ त्रिंशद्गुणंवरुणोद्देशेनसंकल्प्यविप्रेभ्योदद्यादित्यर्थः॥ ॥इतिश्रीमीमांसकभट्टशंकरात्मजभट्टनीलकंठकृतेभगवंतभास्करेव्यवहारमयूखःसमाप्तः॥ शुभंभवतु॥

अथव्यवहारमयूखस्यसूचीपत्रम्

इतिव्यवहार
मयूखस्यसू
चीपत्रम्॥

॥ श्री ॥

अथ शुद्धिमयूखः प्रारभ्यते

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः१

श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकप [illegible] नमुद्र
श्रीविश्वनाथजीके [illegible]
महाराजशिवलालदुबेजीपास
काशीसंस्कृतमुद्रायंत्रमछ [illegible]
जिनकोलेनाहोयउनकोइसकापेकेसंपादक
श्रीयुतबाबूवाराणसीप्रसादजीके
पासयाकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी
मितिकार्त्तिकसुक्ल१५सुक्रवार
सम्वत१९३६
तारीख २७ माहे नवम्बर सन १८७९ ई०

अथशुद्धिमयूखःप्रारभ्यते

श्रीगणेशायनमः॥ योलीलयासंततुनेत्रविश्वंतत्यालयत्यात्मनिविश्व
रूपे॥ लयंनयत्याशुचपूर्णरूपःशिवंतनोत्वाशुरविर्ममासौ॥१॥श्रु
तीःस्मृतीर्वीक्ष्यपुराणजातंतत्तन्निबंधानपिसंनिबंधान्॥श्रीशंकर
स्यात्मजनीलकंठोद्रव्यादिशुद्धिंविवृणोतिसर्वां॥२॥प्रतारकैराहृतमत्र
किंचिन्मयातुनिर्मूलतयातदुज्झितं॥उक्तोक्तितात्तोनहितेनकाचित्स्व
बुध्यहीनापचितिर्नहीयते॥३॥ अथद्रव्यशुद्धिः॥सुवर्णरूप्यशंखा
श्मशुक्तिरत्नमयानिच॥कांस्यायस्ताम्ररैत्यानित्रपुसीसमयानिच॥
निर्लेपानिविशुध्यंतिकेवलेनजलेनच॥शूद्रोच्छिष्टानिशोध्यानित्रिधा
क्षाराम्लवारिभिरिति॥शंखः॥कृष्णशकुनिमुखावमृष्टंनिर्लिखेत्॥
श्वापदमुखावमृष्टंपात्रंनप्रयुंजीतेति॥निर्लेखस्तक्षणं॥आपस्तंबः
॥गवाघ्रातानिकांस्यानिशूद्रोच्छिष्टानियानिच॥शुध्यंतिदशभिः
क्षारैःश्वकाकोपहतानिच॥क्षारोभस्म॥एतच्चस्वल्पोपहतिविषयं।
अधिकेतुस्मृत्यंतरे॥भस्मनाशुध्यतेकांस्यंसुरयायन्नलिप्यते॥सु
रामूत्रपुरीषैस्तुशुध्यतेतापलेखनैः॥ आमिषेणतुयल्लिप्तंपुनर्दाहेन
शुध्यति॥बौधायनः॥तैजसानांमूत्राद्युपघातेपुनःकरणंगोमूत्रेवा
सप्तरात्रंपरिवासनं॥पुनःकरणाशक्तौगोमूत्रेवासनं॥अंगिराः॥
गंडूषपादशौचंचयःकुर्यात्कांस्यभाजने॥षण्मासंभुविनिक्षिप्यपुन
राकरमाविशेत्॥पुनराकारःपुनःकरणं॥मृद्भांडानामल्पोपहतौपुनः
पाकान्महीमयमितियाज्ञवल्क्येनशुद्धिरुक्ता॥तथा॥लोहानांदहना
च्छुद्धिर्भस्मनागोमयेनवा॥दहनात्खननाद्वापिशैलानामंभसापिवा
काष्ठानांतक्षणाच्छुद्धिर्मृद्गोमयजलैरपि॥यदितैर्नशुध्येत्तदातावन्मा
त्रछेदनंदाहोवा॥स्मृत्यंतरे॥वस्त्रधान्यादिराशीनामेकदेशस्यदूषणे
॥तावन्मात्रंसमुद्धृत्यशेषंप्रोक्षणमर्हति॥असमुद्धृतंतुप्रोक्षणाच्छु
ध्यतीतिभावः॥याज्ञवल्क्यः॥सौषैरुदकगोमूत्रैःशुध्यत्याविककौशिकं

सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा॥ सगौरसर्षपैः क्षौममिति। अ
पूर्णा यथयथा विकं॥ कोशसंभवं तसरीपट्टादिकौशिकं॥ वल्कलतंतु
निर्मितमंशुपट्टं॥ श्रीफलं बिल्वफलं॥ पर्वतीयच्छागलोमनिर्मितं कुत
पः॥ अरिष्टः फेनिलफलं॥ अतसीसूत्रनिर्मितं॥ क्षौमं॥ एतच्चाधिको
पघाते॥ किंचिदुपघाते तु प्रोक्षणमेव॥ क्षालनासहतूलिकादिविष
ये मिताक्षरायां विशेषः॥ तूलिकाद्युपधानं च पुष्परक्ताम्बरं तथा॥ शो
षयित्वातपे किंचित्करैः संमार्जयेन्मुहुः॥ पश्चाच्च वारिणा प्रोक्ष्य वि
नियुंजीत कर्मणि॥ अतिमालिन्ये परिशोधयेदपि॥ अहतानां प्रोक्ष
णमिति स्मरणार्थं अमुना नूतनवाससां प्रोक्षणाच्छुद्धिः॥ शुष्कवासा
स्थले कुर्यात्तर्पणं च मनं जपमिति अस्या पवादः शुद्धिविवेके॥ सप्त
वाताहतं वस्त्रं शुष्कवत्प्रतिपाद्यते इति शंखः॥ सूतिकोच्छिष्टभांड
स्य सुरामद्यहतस्य च॥ त्रिःसप्तमार्जनाच्छुद्धिर्नतु कांस्यस्य तापनं॥
कांस्यातिरिक्ततैजसानां मलोपघाते मार्जनं॥ तापनं च प्रतिमार्जनमु
दकक्षालनमावर्त्तकान्ते॥ तापनं च कार्यं कांस्ये तथा न॥ अपितु क्षा
लनं मार्जनं चेत्यर्थः॥ अल्पधान्यादिविषये बौधायनः॥ ब्रीहयः प्रो
क्षणाद्भिः शाकमूलफलानि च॥ तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन
वा॥ अनेकपुरुषोद्धार्यविषये त्विकरणं प्रोक्षणं वा कश्यपोक्तं॥ विष्णु
॥ मृत्पर्णतृण काष्ठानां श्वभिश्चंडालवायसैः॥ स्पर्शने विहितं शौच
सोमसूर्यांशुमारुतैः॥ तथा॥ प्रोक्षणेन तु पुस्तकमिति क्वचित॥ सि
द्धान्ने मनुः॥ पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं॥ दूषितं केशकी
टैश्च मृत्प्रक्षेपेण शुध्यति॥ अवधूतं यस्योपरि वासोवधूतं॥ याज्ञवल्
॥ सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये॥ यत्तु गौतमः॥ नित्यमभो
ज्यं केशकीटावपन्नमिति तत्सहपक्वाभिप्रायं॥ पराशरः॥ पक्वं द्रो
णाधिकं त्वन्नं काकश्वाद्युपघातितं॥ ग्रासमुद्धृत्य तन्मात्रं यत्तु लाल
कृतं भवेत्॥ होमोदकेन चाभ्युक्षेद्राजतेनांबुनाथवा॥ अग्निज्वालो
पसंस्पर्शात्सुवर्णमधुसर्पिषा॥ विप्राणां ब्रह्मघोषेण पूतं भोज्यं च तद्भ
वेत्॥ तथा॥ अन्नमेकाहिकं पक्वं श्वकाकाद्युपघातितं॥ केशकीटाव
पन्नं च तदप्येवं विशुध्यति॥ क्रीतस्यापि विधिरीदृश एव मनीषि

इदमल्पधनविषयं ज्ञेयं॥ द्रवविषये शंखः॥ अयणं घृततैलानां
प्लावनं गोरसस्य च॥ भांडानि क्षालयेदद्भिः शाकमूलफलानि च
कारा हुततैलयोरपि॥ प्लावनं तस्मांतरिते पात्रे प्रक्षेपः॥ तदुक्तपा
त्रस्य तज्जातीयद्रव्येण तथा पूरणं यथा द्रव्यं बहिर्निःसरति तत्प्ला
वनमिति केचित्॥ तथा॥ आधारदोषदुष्टे मात्रान्तरे नीतं द्रवं॥ तथा॥ बौ
धायनः॥ देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां
च ज्ञात्वा शौचं प्रकल्पयेत्॥ याज्ञवल्क्यः॥ वाक्शस्तमंबुनिर्णिक्तं
अज्ञातं च सदा शुचीति॥ अज्ञातस्पर्शविषयकसंशयनिश्चयसाधा
रणज्ञानाभाववत्॥ चर्मकोशानां कषायद्रव्येण शोधनमिति केचित्
॥ मनुः॥ श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीदिति॥ श्वभिर्मृगया
यां॥ तदपि भक्ष्यस्य॥ तथा॥ नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपा
तने॥ प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिरिति॥ तथा॥ नित्यं शुद्धः
कारुहस्तः पण्यं यच्च प्रसारितं॥ ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमि
ति स्मृतं॥ कारुहस्तस्तन्मेपि॥ भैक्ष्यमन्नाद्यं तस्यादिदत्तं न तु चां
डालादिस्पर्शि॥ तथा॥ शुचिरग्निरजो वायुरापो दधि घृतं पयः॥ सर्वाण्ये
तानि चंडालस्पर्शे छाया च नित्यशः॥ छाया चांडालादेरन्या॥ तथा ब्र
ह्मपुराणे॥ चांडालपतितच्छायास्पर्शे दुष्टं तनुर्भवेदिति॥ रजोपि रा
सभादेरन्यत्॥ तथा हशातातपः॥ रेणवः शुचयः सर्वे वायुना ये समी
रिताः॥ अन्यत्र रासभाजाविश्वशूकरविमार्जनी॥ अंते पंचम्या अ
भावश्छांदसः॥ तथा॥ पादौ शुचौ ब्राह्मणस्य अजाश्वानां मुखं शुचि॥ गवां
पृष्ठानि मेध्यानि सर्वगात्राणि योषितां॥ भूशुद्धिमाह याज्ञवल्क्यः॥
भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणादपि॥ सेकादुल्लेखनाल्लेपा
द्गृहं मार्जनलेपनात्॥ देवलः॥ अदुष्टाः संतता धारा वातोद्धूताश्च रेण
वः॥ स्त्रियो वृद्धाश्च बालाश्च न दु[illegible]चन॥ दधि सर्पिः पयः
क्षौद्रं भांडे दोषो न विद्यते॥ मार्जारश्च[illegible]दर्वी च मारुतश्च सदा शुचिः
॥ मार्जारः शुचिः कर्मकालादन्यत्र॥ तत्र तु स्पर्शे स्नानं॥ तथा॥ आत्म
शय्यासनं वस्त्रं जायापत्यं कमंडलुः॥ शुचीन्यात्मन एतानि परेषा
मशुचीनि हि॥ तथा॥ उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः॥ ह

तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति॥ प्रथमोऽशुचिस्तत्स्पृष्टो द्वि
तीयः॥ तत्स्पृष्टस्तृतीयः॥ तत्स्पर्शे आचमनमात्रं॥ चतुर्थादीनमा
भावात्॥ हरिहरभाष्ये वृद्धशातातपः॥ शिशोरभ्युक्षणं कार्यं बाल
स्याचमनं स्मृतं॥ रजस्वलादिसंस्पर्शे स्नातव्यं च कुमारकैः॥ बाला
दिस्वरूपं च तत्रैवोक्तं॥ प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छि
शुः॥ कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनमिति॥ नदीषु शुद्धिमा
ह गार्ग्यः॥ अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत्॥ शोध्यस्य
मृच्च तोयं च संन्यासो वै द्विजन्मनामिति॥ सर्वापवादं मरीचिराह॥
येषु स्थानेषु यच्छौचं धर्माचारश्च तादृशः॥ तत्र तन्नावमन्येत धर्म
स्तत्रैव तादृशः॥ येषु देशेषु ये देवा येषु देशेषु ये द्विजाः॥ येषु स्थाने
षु यत्तोयं या च यत्रैव मृत्तिका॥ तत्पावनमिति शेषः॥ पराशरोऽपि॥ यु
गे तीर्थे च ये धर्मास्तत्र तत्र च ये द्विजाः॥ तेषां निंदा न कर्तव्या युगरूपा
हि ते स्मृताः॥ तथा॥ यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः॥
तथापि लौकिकाचारं मनसापि न लंघयेत्॥ अथ गर्भस्रावाद्याशौचं
॥ तत्र पराशरः॥ आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः॥ अत ऊ
र्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति॥ स्रावाशौचमाह मरीचिः॥
गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्र्यहः॥ राजन्ये तु चतूरात्रं वैश्ये
पंचाहमेव तु॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति॥ अचिरे आ
द्यमासत्रये॥ उत्तमे ब्राह्मणेऽपि पंचमषष्ठयोस्त्र्यहः पाते मातुर्यथा
मासं सपिंडानां तथा च चतुर्थे मातुरेव चत्वारीति विज्ञानेश्वरमाधवा
दयः॥ एवं मातुः पंचमे पंच षष्ठे षट्। सपिंडानां न द्वंद्वं च प्रसूताया एव
न सपिंडानां दिनत्रयमिति माधवीयात्॥ अत्राशौचप्रकरणे रात्रिपदं
दिनपदं चाहोरात्रपरकं ज्ञेयं॥ एवमन्यत्रापि॥ एतच्च गर्भनाशप्रयु
क्ताशौचं सर्ववर्णेषु समं॥ सप्तममासादिषु स्वस्वजात्युक्तं संपूर्ण
मेव प्रसवाशौचं कार्यमिति द्रष्टव्यं॥ स्वपत्न्यां व्यभिचारोद्भूतगर्भस्य
प्रसवेऽपि जनकक्षेत्रिणोरुभयोरप्येकाहः॥ तथा चैकाहस्तु वृत्तो याज्ञव
ल्क्यः॥ अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु चेति॥ मातुस्तु तत्रापु
त्रैव व्यवस्थानुक्तेः॥ स्वभार्यास्वन्यं प्रतिलोमव्यतिरिक्तं माश्रितासु

सूतासुमृतासुचाहोरात्रमाशौचं॥सपिंडानांतुस्नानमात्रमितिमिताक्ष
रायां॥इतिगर्भस्त्रावाशौचं॥सप्तममासप्रभृतिसूतिविषयेहारीतः॥जा
तमृतेमृतजातेवासपिंडानांदशाहमाशौचमिति॥जननोत्तरंनालछे
दोत्तरमेवशिशुमरणेसपिंडानांदशाहंजन्माशौचं।पूर्वंमरणेतुत्र्यहो
वक्ष्यते॥दशाहमितितत्तद्वर्णाशौचोपलक्षणं॥मनुरपि।दशाहाभ्यं
तरेबालेप्रमीतेतस्यबांधवैः।शावाशौचंनकर्त्तव्यंसूत्याशौचंविधीय
ते॥पञ्चजातेमृतजातेकुलस्यसद्यःशौचमितिस्मृत्यंतरंतच्छिशुम
रणनिमित्ताशौचाभावपरं॥मरणाशौचनिमित्तंस्नानमात्रमस्त्येवेतिग्रं
थकृतः।नाभिछेदात्प्राङ्मरणेमातुःसंपूर्णसूतकंसपिंडानांतुजन्मनि
मित्तंत्रिरात्रं।तथाचमनुः।जीवन्जातोयदिततोमृतःसूतकएवतु।सूतकं
सकलंमातुःपित्रादीनांत्रिरात्रकं॥ततस्तदनंतरमेव॥नाभिवर्द्धनाद्र्वा
गितियावत्॥यत्तुजैमिनिः॥यावन्नच्छिद्यतेनालंतावन्नाप्नोतिसूतकं॥
छिन्नेनालेततःपश्चात्सूतकंतुविधीयतइति॥तन्नालछेदोत्तरंशिशूप
मेसपिंडानांदशाहजन्माशौचपरमितिकेचित्॥शिशुजन्मनिनिमित्त
कदानाद्यधिकारेवधित्वप्रतिपादनपरमितितुयुक्तं॥अन्यथोत्तरार्द्धे
मृतपदाध्याहारापत्तेरिति॥जनननिमित्तमस्पृश्यत्वंमातुर्दशाहं॥
पितुस्तुसचैलस्नानादस्पृश्यत्वंगच्छतीत्याहसंवर्त्तः।पुत्रेजातेपिता
सद्यःसचैलंस्नानमाचरेत्॥स्पर्शयोग्यस्ततःपश्चादित्याहभगवान्
मनुरिति॥पुत्रइतिपुंस्त्वमविवक्षितमनुवाद्यगतत्वात्तेनकन्यापत्ते
पिपितुःस्नानमावश्यकं॥सपिंडानामस्पृश्यत्वंनास्त्येव॥अतोनते
षांस्नानमपि॥यदाहांगिराः॥सूतकेसूतिकावर्ज्यंसंस्पर्शोननिषिध्य
तइति॥वैधकार्येतुपैठीनसिः।सूतिकांपुत्रवतींविंशतिरात्रेणकर्मका
रयेन्मासेनस्त्रीजननीमिति॥दशाहपर्यंतमाशौचेनैवकर्मानधिकार
प्राप्तेर्जन्मप्रभृतिगणनार्थाविंशतिरात्रमासपदयोःप्रागदशाहांशेनु
वादेप्राप्तावशिष्टदिनांशेविधिरितिविध्यनुवादवैरूप्यापत्तेर्मासा
शौचवंतंशूद्रंप्रत्यानर्थक्यप्रसंगाच्च॥यस्ययावदाशौचंप्राप्तंतदुत्त
रमेवविंशतिरात्रंमासंचकर्मानधिकारइतिकश्चित्॥तंतुच्छं।य
त्रहिएकेनैवपदेनस्वार्थएकंपदार्थंप्रत्युद्दिश्यतेऽन्यंचप्रत्युपादीयते
तत्रवैरूप्यं।यथावाजपेयेनस्वाराज्यकामोयजेतेतियजिपदे॥इहतु

दशाहोत्तरदिनेष्वधिकानधिकारमात्रबोधनान्नतत्॥अन्यथाहा
शाहीनस्येत्यत्रापिप्रकृतितस्त्रिस्तृणामुपसदांशाग्नेस्तनदंशेनुवादो
धिकांशेविधिरितिवैरूप्यंस्यात्॥अतोजन्मप्रभृत्येवविंशतिरात्रंमा
संवायावद्गासाहःकर्मानधिकारोबोध्यतइति॥जातचरणास्तुप्र
मदशमदिनादिकर्मानधिकारावधिवाधेनविध्यंतरमेवेदंबोध्यते।
दीक्षितोनददातिनजुहोतीतिहोमानधिकारावधिभूतदीक्षामोच
कावभृथोत्तरवाधेनैतयापुनराधेयसंमितयेष्ट्वाग्निहोत्रंजुहोती
त्युदवसानीयरूपाव्यवतरवदितिगुरुमुत्पश्यंति॥प्रथमषष्ठदश
मदिवसेषुदानसूतिकागृहदेवतापूजनमात्रार्थंनाशौचं॥यदाहव्या
सः॥प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा॥त्रिष्वेतेषुनकुर्वीतसूतकं
पुत्रजन्मनि॥स्मृत्यंतरेपि॥तत्रसर्वप्रतिग्राह्यंपक्वान्नंतुनभक्षये
त्॥भक्षयित्वातुतन्मोहाद्द्विजश्चांद्रायणंचरेत्॥इतिजन्माशौचं
॥अथानुपनीताशौचं॥तत्रनामकरणप्राङ्मृतौशंखः॥प्राङ्नाम
करणात्सद्यःशुद्धिरिति॥नामकरणादितिस्वकालोपलक्षणंदंत
जननादितिवत्॥नामकरणकालस्तुएकादशेहनित्रयोदशेषो
डशेएकविंशेइतिक्रमाच्चतुर्वर्णेषु॥स्वरूपतएवनामकर्मसद्यः
शुद्ध्यवधिरितिकेचित्॥नामकरणानंतरमग्न्युदकदानंवैकल्पिकं
॥तथाचमनुः॥नात्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया॥जातदं
तस्यवाकुर्यान्नाम्निवापिकृतेसति॥उदकमग्नेरप्युपलक्षणं॥नात्रि
वर्षस्येत्युक्तेः॥पूर्णेपिवर्षत्रयादूर्ध्वमग्न्युदकदानादिनियतं॥चू
डाकर्मद्विजातीनांसर्वेषामेवधर्मतः॥प्रथमेब्देतृतीयेवाकर्तव्यं
श्रुतिनोदनादिति॥आद्यवर्षीयचूडाकर्मानंतरमप्यग्न्युदकदानं
नियतं॥तदुक्तंतूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवच॥सर्वेषां
कृतचूडानामन्यत्रापीच्छयाद्वयं॥अन्यत्रनामकरणादूर्ध्वंइच्छ
याग्न्युदकदाननिखननंवा॥तथाचयाज्ञवल्क्यः॥ऊनद्विवर्षंनिख
नेन्नकुर्यादुदकंततः॥आश्मशानादनुव्रज्यइतरोज्ञातिभिर्मृतः॥
इतरःपूर्णद्विवर्षः॥ऊनद्विवर्षेनिखननमेवेत्याचारः॥मनुरप्यूनद्वि
वर्षमधिकृत्यारण्येकाष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवत्विति॥नाम

रणात्प्राक् सर्वेषां सद्यः शौचं नामकरणादूर्ध्वं दंतजननकालात्सप्तममासलक्षणात् अग्निसंस्कारे एकाहः॥ असंस्कारे सद्यः शुद्धिः॥ मातापित्रोस्तु नामकरणादूर्ध्वं उपनयनपर्यंतं सर्वथा त्र्यहएव॥ निरस्य तु पुमान्शुक्रं उपस्पृश्यैव विशुध्यति॥ वैजिकादभिसंबंधादनुरुंध्यादघं त्र्यहमिति॥ कार्यकारणसंबंधे त्र्यहोक्तेः॥ ततो दंतजननादूर्ध्वं प्रथमवार्षिकचूडाकर्मपर्यंतं अहोरात्रं प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यंतमकृतचूडस्य कृतदाहस्याप्येकाहः॥ कृतचूडस्य तु त्रीणि॥ वर्षत्रयादूर्ध्वं कुलधर्मानुरोधेनाकृतचूडस्यापि त्रीण्येव॥ उपनयनादूर्ध्वं दशरात्रादिकं॥ अत्रसर्वत्रादंतजन्मनः सद्यआचूडान्नैशिकी स्मृता॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परमित्यादीनि वचनानि मिताक्षरादौ अनुसंधेयानि॥ अत्र दंतजननपदेन दंतजन्मकालोपलक्ष्यते। स च सप्तमो मासः। दंतजन्म सप्तमे मासीत्युपलक्षणं॥ मिताक्षरादौ अनुदर्शनात्॥ चूडापदेनापि स्वकालो लक्ष्यते। स च तृतीयं वर्षं तृतीये वर्षे चौलं यथाकुलधर्मं वेत्याश्वलायनोक्तेः। यद्यपि प्रथमे वा तृतीये वेति प्रथमवर्षविधानं॥ तथापि विप्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकीतितृतीयवर्षपर्यंतमेकरात्रविधानात्॥ तृतीयाब्दमेव लक्ष्यते। व्रतमुपनयनं॥ तेनापि स्वकालएव षड्वर्षानंतररूपो लक्ष्यत इति रुद्रधरः। तत्र वचनमप्याहुः केचित्॥ अनुपनीतमुपक्रम्य। म्रियते यद्व्रतं तस्यादशौचं त्र्यहमेव हि। द्विजन्मनामयं कालस्त्रयाणां तु षडाब्दिक इति। मेधातिथिस्तु। अष्टमैकादशद्वादशवर्षरूपः क्रमेण त्रयाणां अष्टवर्षरूपो वा सर्वेषामित्याह। अत्र षडब्दपदं मासत्रयाधिकषडब्दपरं। तेन गर्भाष्टमाब्दसंभवे न द्वयोरप्यविरोधः। विशेषमाह हारीतः॥ आमौंजीबंधनाद्द्विजः क्षत्रियश्च धनुर्ग्रहात्॥ आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहात्॥ धनुःप्रतोदौ वष्टमेब्दे। वस्त्रद्वयग्रहो द्वादशेब्दे तेन शूद्रस्य मासाशौचं द्वादशाब्दप्रभृति। अपरार्के तु। अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परः॥ मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बांधवाः। शुद्धिं समधिगच्छंति नात्र कार्या विचारणेति शंखेन विशेष उक्त

अत्रचदेशाचाराद्व्यवस्थाज्ञेया। स्त्र्यपत्यमृतौतुनामकरणादूर्ध्वं
वर्षत्रयपर्यंतं अकृतचूडायाःसद्यःशौचं। अचूडायांतुकन्यायांस
द्यःशौचंविधीयतइत्यापस्तंबोक्तेः। ततोवाग्दानपर्यंतमहोरात्रंप्रथ
मवर्षेकृतचूडायामपिमृतायांयावद्वाग्दानमहोरात्रमेव॥ अविशे
षेणवर्णानामेवोक्तसंस्कारक्रमेणः। त्रिरात्रंतुभवेच्छुद्धिःकन्यास्वन्ना
विधीयतइत्यंगिरोक्तेः। पुंविषयकन्यहविषयएवकन्यास्वेकाहइ
तिग्रंथकृतः। याज्ञवल्क्योपि॥ अहस्त्वदत्तकन्यासुबालेषुचविशो
धनं॥ बालेष्वजातदंतेष्वग्निसंस्कारइतिविज्ञेश्वरः॥ वाग्दानादू
र्ध्वंविवाहसंस्कारात्प्राक्पतिपक्षेपितृपक्षेचत्रीण्यहोरात्राणि॥
स्त्रीणामसंस्कृतानांतुत्र्यहाच्छुध्यंतिबांधवाः॥ यथोक्तेनैवक
ल्पेनशुध्यंतितुसनाभयइत्युक्तेः। बांधवाःपतिसपिंडाः। सनाभ
यःपितृसपिंडाः। एतद्वचनात्ऊर्ध्वंविवाहात्प्राक्स्त्र्याशौचंत्रिपुरु
षमेव॥ अप्रत्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायतइतिवासिष्ठात्॥ अत्र
सर्वत्रमातापित्रोःपुमपत्यवदेवाशौचंविशेषाश्रवणात्इतिकेचि
त्॥ मदनरत्नेनिर्णयामृतेचशेखरस्तुविशेषमाह॥ अजातदंतासु
पित्रोरेकरात्रमिति। इदं चनाद्दिग्यतेशिष्टाः। विवाहानंतरंविष्णुः।
संस्कृतासुस्त्रीषुनाशौचंपितृपक्षेतत्प्रसवमरणेचेत्पितृगृहेस्या
तांतदैकरात्रंत्रिरात्रंचेति॥ प्रसवेएकरात्रंमरणेत्रिरात्रमितिभेदः।
पित्रोर्गेहइतिविशेषणात्सतिगृहेप्रसवमरणयोःप्रसवेसर्वेषामा
शौचंनास्त्येवमरणेपित्रोस्त्रिरात्रमस्त्येव॥ वैजिकादभिसंबंधा
दनुरुंध्यादघंत्र्यहं। प्रत्ताप्रत्तासुयोषित्सुसंस्कृतासंस्कृतासुवा॥
मातापित्रोस्त्रिरात्रंस्यादितरेषांयथाविधीत्यविशेषेणस्मरणात्
॥ माधवस्तुदत्तानारीपितुर्गेहेसूयेताथम्रियेतवा॥ तद्बंधुवर्गस्त्वेके
नशुचिस्तज्जनकस्त्रिभिरितिब्राह्मवचनात्॥ प्रसवेपित्रोस्त्रिरा
त्रंभ्रात्रादिबंधुवर्गस्यैकरात्रमित्याह॥ पित्रोर्मरणेविवाहितक
न्यायास्त्रीण्यहोरात्राणि। पित्रोरुपरमेस्त्रीणामूढानांतुकथंभ
वेत्॥ त्रिरात्रेणतुशुद्धिःस्यादित्याहभगवान्यमइतिवचनात्। अ
विवाहितायास्तुपुत्रादीनामिवाशौचमित्यादिज्ञेयं। एतदाशौचंस

र्ववर्णसाधारण्यंवयोविशेषकृतत्वादिति॥तुल्येवयसिसर्वेषाम
तिक्रांतेतथैवच॥उपनीतेतुविषयंतस्मिन्नेवातिकालजमितिव्याघ्र
पादोक्तेः॥अनौरसेषुदत्तक्रीतक्षेत्रजादिषूत्पन्नेषुमृतेषुच नच।गो
त्रिणःप्रतिलोमव्यतिरिक्तमाश्रितासुपत्नीषुप्रसूतासुमृतासुच
त्रिरात्रं॥ननुसत्यपिसापिंड्येदशाहादि॥तथाचत्रिरात्रानुवृत्तौविष्णुः
॥अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुचेति॥एतेचत्रिरात्रैकरात्रेसंनि
धिविदेशभेदेनव्यवतिष्ठेते॥अनौरसपदेनौरसोधर्मपत्नीजइति
परिभाषितौरसभिन्नागृह्यंते॥तेनजनकस्यक्षेत्रजादौत्रिरात्रैकरा
त्रेसुस्थे॥यद्यपितुत्रिरात्रंतदासपिंडानामेकरात्रं॥सूतकेमृतकेचैव
त्रिरात्रंपरपूर्वयोः॥एकाहस्तुसपिंडानांत्रिरात्रंयत्रवैपितुरितिमारीचा
त्॥पितृग्रहणंप्रत्युपलक्षणं॥तथाचहारीतः॥परपूर्वासुभार्यासुपुत्रे
षुकृतकेषुच॥भर्तृपित्रोस्त्रिरात्रंस्यादेकाहस्तुसपिंडनइति॥पितुरेक
रात्रपक्षेसपिंडानांस्नानमात्रं॥अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच॥
भर्तृपित्रोस्त्रिरात्रंस्यादेकाहस्तुसपिंडनइति॥गोत्रिणःस्नानमुद्वाःस्यु
स्त्रिरात्रेणैवतत्स्यितेतिप्रजापत्युक्तेः॥यद्यपिस्नानस्यपितुस्त्रिरात्रसमा
नविषयत्वंप्रतीयते॥तथापिहारीतमरीचिभ्यामविरोधायपितुरेकरात्र
विषयस्यैवसपिंडानांस्नानंकल्पनीयं।यत्तुसद्यःशौचानुवृत्तौशंखः॥अ
न्यपूर्वासुभार्यासुपुत्रेषुकृतकेषुचेति॥भार्यापुत्रशब्दयोःसंबंधिशब्द
त्वादुपस्थितयोःपतिपित्रोःसपिंडानामित्यध्याहारेणसपिंडविषयं
हीनवर्णभार्याअक्षतस्त्रीयपुत्रविषयंवाव्याख्येयमिति।तस्माद्दत्तक
मरणेत्रिरात्रमितिप्राचः।नातन्वरणास्तु।उपनीत दत्तकमरणेसापिं
ड्यात्प्रतिगृहीतत्वतत्सापिंड्याद्दशाहमाचरंतीतिशिष्टाचारः।उक्त
वचसांव्यवस्थानैवं।विष्णुयाज्ञवल्क्योक्तं त्रिरात्रैकरात्रंतुप्रतिग्र
हीतसंबंधिविदेशभेदेनानुपनीतदत्तकादिमरणेएकाहस्तुसपिंडा
नामिति।मारीचंतुप्रतिगृहीतसपिंडानांतुचूडाकरणकालानंतरम
रणेगोत्रिणःस्नानमुद्वाःस्युःप्राजापत्यंतुदत्तजननोत्तरमरणेज्ञेयमि
तिप्राहुः।अत्रदत्तकपुत्रमरणे।जनकादेर्जनकादिमरणेचदत्तकस्य
नाशौचंमानाभावात्॥यत्तुकैश्चिद्बैजिकादभिसंबंधादनुरुंध्यादघंत्र

हमितिवचनात्त्र्यहमितितत्तुच्छं।गोत्ररिक्थेजनयितुर्नभजेद्दत्त्रिमः सुतः॥
गोत्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधेतिमनुवचनेगोत्ररिक्थस
धापदैर्जनकादीनांपरस्परसंबंधप्रयुक्तकार्यंलक्ष्यते॥जातपुत्रः
कृष्णकेशोग्नीनादधीतेत्यत्रेववयोवस्थाविशेषः॥तेनलक्षितका
र्यमात्रनिवृत्त्या आशौचस्यापिनिवृत्तिसिद्धेः॥अन्यथायावद्वचनं
वाचनिकमितिन्यायाद्दत्तकसोदरादीनांपरस्परसंबंधानिवृत्त्या
ह्याशौचरिक्थग्रहणादौपरस्परमधिकारापत्तेश्चेतिदिक्॥अथोप
नीतसपिंडमरणाशौचंतु॥दशाहंशावमाशौचंसपिंडेषुविधीयते
॥जननेप्येवमेवस्यान्निपुणांशुद्धिमिच्छतां॥अत्रसपिंडेष्वितिमृत
विशेषणं॥तेनमूलपुरुषमारभ्याष्टमादेर्जननमरणयोर्मूलपुरुष
स्यापरसंततेर्द्वितीयादेरष्टमावधिकायादशाहमेवाशौचं॥द्वितीया
दिप्रतिमूलपुरुषस्यसपिंडत्वेनतत्संततेःसपिंडत्वात्॥मूलपुरु
षमारभ्यद्वितीयादेर्जननमरणयोरष्टमादेःसोदकत्वेनतत्संतते
रपिसोदकत्वात्।नह्यनयोःस्वतःसापिंड्यंकिंतुमूलपुरुषद्वारकमे
व॥तस्मात्सापिंड्यंप्रतियोगिभेदेनभिन्नंप्रत्येकपर्याप्तमेकतोनि
वृत्तमन्यतोनिवर्त्ततइतिकेषांचिदाचरणानुसारीनिष्कर्षः।वस्तु
तस्तु॥दशाहेनसपिंडास्तुशुध्यंतिप्रेतसूतके॥दशाहएवविप्रस्य
सपिंडमरणेसति॥इत्यादिवचनेपरस्परंसपिंडजननमरणयोरेव
दशाहप्रतीतेः॥सप्रतियोगिकत्वेनएकतोनिवृत्तौअन्यतोनिवृत्ति
र्युक्ता।तेनपूर्वोक्तोदाहरणेपरस्परसोदकत्वप्रयुक्तंत्रिरात्रमेवयु
क्तं।एवंचसपिंडसंततेःसपिंडत्वंननिरवधिकं।अष्टमावध्येवात
थाचमनुः।सपिंडतातुपुरुषेसप्तमेविनिवर्त्तते॥समानोदकभाव
स्तुजन्मनाम्नोरवेदने॥अग्निपुराणेतुनिवर्त्ततेचतुर्दशादितिचतु
र्थःपादः॥सप्तमेतीतमूलपुरुषस्यतत्संततेश्चपरस्परंविनिवर्त्तते
इतिशेषः॥मात्स्येपि।लेपभाजश्चतुर्थाद्याःपित्राद्याःपिंडभागिनः
।पिंडदःसप्तमस्तेषांसापिंड्यंसाप्तपौरुषं॥पिंडदस्यमूलपुरुषम
भिव्याप्यमूलपुरुषस्यचपिंडदमभिव्याप्यपरस्परंसापिंड्यमित्यर्थः
।अतएवसपिंडानांसप्तपुरुषावधिकानांअविशेषेणदशरात्रं॥समा

नोदकानां तु त्रिरात्रमिति वदतां विज्ञानेश्वरादीनामयमेवाभिप्रायः। य
द्यप्यनयोरित्यासापिंड्यस्यैकतो निवृत्तत्वात् दृष्टमादेर्वरस्य द्वितीया
दिकाउद्वाह्यास्यात्तथापि पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथे
ति याज्ञवल्क्येन मातृपितृकुले सप्तमपंचमपर्यंतसापिंड्योक्तेर्नतदा
पत्तिः॥ मातृतो मातरं गृहीत्वा गण्यमानेयः पंचमस्तदूर्ध्वं एवं पितृ
तः पितरं गृहीत्वा यः सप्तमस्तदूर्ध्वं सापिंड्यं निवर्त्तत इति अर्थः। तदु
क्तं स्पष्टमभियुक्तैः। वध्वावरस्य वा तातः कूटस्थाद्यदि सप्तमः। पंच
मीचेत्तयोर्माता सापिंड्यं विनिवर्त्तत इति दिक्। क्षत्रियाद्याशौचमा
ह॥ याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दि
नानि शूद्रस्य तदर्धं न्यायवर्त्तिनः। पाकयज्ञद्विजशुश्रूषादिरतः शू
द्रो न्यायवर्त्ती तस्य पक्षः। अंगिरास्तु॥ सर्वेषामेव वर्णानां सूतके मृ
तके तथा॥ दशाहाच्छुद्धिरेतेषामिति शातातपोब्रवीदित्याह॥ अत्र
देशाचारतो व्यवस्था॥ इदं च दशाहादिमृताशौचं उपनयनोत्तरं॥
ततः पूर्वं त्र्यहादेरुक्तत्वात्॥ शूद्रो वस्त्रपरिग्रहादर्वाक् बंधनादुप
नयनस्थानीयवस्त्रग्रहोत्तरं मृतः शूद्रः स्वाशौचनिमित्तं॥ इदं चाशौ
चं अनाहिताग्नेर्मरणदिनात्कार्यं॥ आहिताग्नेस्तु दाहदिनात्। तथा च
पैठीनसिः। अनग्निमत उत्क्रांतेराशौचं च द्विजातिषु॥ दाहादग्निमतो
विद्याद्विदेशमरणे सति॥ आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं
कृत्वा शववदाशौचमिति वसिष्ठोक्तेश्च। अस्थिसंचयनं तु द्वयोरपि
दाहदिनमारभ्यैव॥ अनग्निमत उत्क्रांते साग्नेः संस्कारकर्मणः। शुद्धिः
संचयनं दाहान्मृताहस्तु यथातिथीति॥ विप्रस्य सवर्णसपिंडजन्म
मृत्योराशौचमाह हारीतः॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनि
षु॥ षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु॥ दास्यादीनां तु स्वामि
शुद्ध्या शुद्धिः कूर्मानधिकारस्तु मासे॥ तथा चांगिराः। दासी दासश्च
सर्वो वै यस्य वर्णस्य यो भवेत्॥ तद्वर्णस्य भवेच्छौचं दास्यामासस्तु सू
तके मिति। प्रतिलोमा धर्महीना इति स्मरणान्न तेषामाशौचं किंतु केव
लं जनने मरणे च मलापकर्षणार्थं शौचमात्रं। क्वचित्सद्यः शौचमाह
देवलः॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च। सद्यः संतिष्ठते यज्ञस्त

श्वाशौचमितिस्मृतं॥सद्यःशौचमित्यन्वयः॥यज्ञोदशाहकर्मैक
दिनएव॥तथा॥डिंबाहवनिहतानांचविद्युतापार्थिवेनच॥गोब्राह्म
णस्यचैवार्थे यस्यचेच्छतिपार्थिवः॥शस्त्रंविनाकलहोडिंबाहवः
॥राजायंस्वकार्यार्थमिच्छतितस्यसद्यःशौचमित्यर्थः॥यत्तुयमः॥डिं
बाहवनिहतानांचतथैवप्राणसत्रिणां॥नदीम्नापदंष्ट्रिभ्यःसद्यः
शौचंविधीयतइति॥तत्रनदीग्रहणंजलमात्रोपलक्षणं॥तच्चप्राय
श्चित्तार्थमृतानांनप्रमादेनेतिशुद्धिविवेके॥प्राणसत्रिणःपररक्षा
र्थंप्राणत्यागिनः॥यत्तुबृहस्पतिना॥महाहवेविद्युताचराज्ञागोवि
प्रपालने॥सद्यःशौचंहतस्याहुस्त्र्यहंचान्येमहर्षयइति त्र्यहमुक्तं
॥तत्पराङ्मुखहतस्ययुद्धेगाढप्रहारपीडायायुद्धविरामोत्तरंरणां
गणाद्बहिर्मृतस्यवाज्ञेयं॥इदंचयुद्धमृतस्यसद्यःशौचादिकंयुद्धो
द्देशेनप्रवृत्तस्यज्ञेयं॥नायुध्यतःप्रेक्षकादेः॥युद्धस्योभयनिष्ठत्वात्
॥अतस्तन्मृतौयथोक्तमेव।रात्रौजन्ममृतिरजःसुविशेषमाहक
श्यपः॥उदितेतुयदासूर्येनारीणांदृश्यतेरजः॥जननंवाविपत्तिर्वा
यस्याहस्तस्यशर्वरी॥अर्धरात्रावधिःकालःसूतकादौविधीयते।
रात्रिंकुर्यात्त्रिभागांतुद्वौभागौपूर्वएवतु॥उत्तमोंशःप्रभातेनयुज्य
तेऋतुसूतके॥रात्रावेवसमुत्पन्नेमृतेरजसिसूतके॥पूर्वमेवदि
नंग्राह्यंयावन्नाभ्युदितोरविरिति॥अत्राचारतोव्यवस्था॥तत्रापि
त्रिभागपक्षमेवाद्रियंतेशिष्टाः॥रुद्राश्च॥रजस्वलाविषयेस्मृत्यं
तरे॥शुद्धाभर्तुश्चतुर्थेन्हिस्नानेनस्त्रीरजस्वला॥दैवेकर्मणिपि
त्र्येचपंचमेहनिशुध्यति॥पंचमेहनीतिरजोनिवृत्त्युपलक्षणं॥स्प
र्शादिष्वनुपरतेपिरजसिचतुर्थेन्हिस्नानेनशुध्यति॥दैवपित्र्यकर्म
विषयेतुचतुर्थेन्हिस्नातापिरजोरहितैवयोग्येति अर्थः॥विशेषमा
हात्रिः॥रजस्वलापरिस्नातापुनरेवरजस्वला॥अष्टादशदिना
दर्वागशुचित्वंनविद्यते॥एकोनविंशतेरर्वागेकाहंस्यात्ततोद्व्यहं
॥विंशप्रभृत्युत्तरेषुत्रिरात्रमशुचिर्भवेदिति॥रजोदर्शनमारभ्यपु
नःसप्तदशदिनाभ्यंतरेरजोदर्शनेअशुचितानास्ति॥अष्टादशेए
काहाच्छुद्धिः॥एकोनविंशेद्व्यहाद्विंशप्रभृतिषुत्र्यहाच्छुद्धिरित्यर्थः॥

यस्याविंशतिदिनोत्तरमेव बहुधा रजोदर्शनं तद्विषयोपमशुचित्वप्रति
षेधः।यस्याः पुनर्युवत्या अष्टादशदिनादर्वागेव प्राचुर्येण रजो निस्सर
णं तस्यास्त्रिरात्रमेवाशुचित्वमिति मिताक्षरायां॥ रजस्वलासूतिक
योर्मृतौ विशेषः स्मृत्यंतरे॥ पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्व
लां॥ वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकं॥ तथा॥ सूतिकायां मृ
तायां तु कथं कुर्वंति याज्ञिकाः॥ कुंभे सलिलमादाय पंचगव्यं तथै
व च॥ पुण्यर्ग्भिरभिमंत्र्यापो वाचा शुद्धिं लभेत्तु सः॥ तेन तां स्नापयि
त्वा तु दाहं कुर्याद्यथाविधीत्यादि॥ पुण्यर्चश्च आपो हि ष्ठेति तिस्रः
हिरण्यवर्णाश्चतस्रः पुनंतु मेति नवर्चोनुवाकः॥ यदंति यच्च दूरक
मिति॥ गर्भिणीमरणेपि स्मृत्यंतरे विशेषः॥ यदा गर्भवती नारी सश
ल्या संस्थिता भवेत्॥ कुक्षौ भित्वा ततः शल्यं निर्हरेद्यदि जीवति॥ म
मीतं निक्षिपेत्तत्तु प्रायश्चित्तं ततः परं॥ त्रयस्त्रिंशत्ता कृच्छ्रैस्तु शुध्य
ते शल्यदोषतः॥ सगर्भदहने तत्तद्भ्रूणजं वधपातकमिति॥ आतु
रशुद्धिमाह पराशरः॥ आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः॥ स्ना
त्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः॥ उशना॥ ज्वराभिभूता
या नारी रजसा च परिप्लुता॥ कथं तस्या भवेच्छौचं शुद्धिः स्यात्कै
न कर्मणि॥ चतुर्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं॥ सा सचैला
वगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्॥ दश द्वादश कृत्वो वा आचामेच्च
पुनः पुनः। अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा॥ दद्याच्छ
क्त्या ततो दानं पुण्याहेन विशुध्यतीति॥ वैधमृतौ विशेषः। वृद्धः शौच
स्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः॥ आत्मानं घातयेद्यस्तु भृग्वग्न्य
नशना[illegible]भिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः। तृतीये तू
दकं दत्वा चतुर्थे श्रा[illegible]माचरेदित्यादिना त्रिरात्रमुक्तं। वृद्धादिविशेष
णादासन्नमृतिकालपरमेतत्। अनासन्नमरणानां वेणीप्रवेशपति
सहगमनादिना वैधमृतौ तु दशाहमेव साधारणं॥ शुद्धिविवेके तु वेणी
प्रवेशादौ तु सद्यः शौचमुक्तं। न तु तत्र किंचिदसाधारणं मूलं। चंडाला
मृतस्याशौचादिनिषेधस्त्वंगिराः॥ चंडालादुदकात्सर्पाद्ब्राह्मणाद्वै
तादपि॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां॥ उदकं पिंडदानं च

मैते श्योयस्मदीयते॥ नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यतीति॥ एत
च्चात्मघातो द्विजः स्वव्यापारे सति॥ प्रायोनाशकशस्त्राग्निविषोदको
द्बन्धनप्रपतनैश्चेच्छतामिति गौतमोक्तेः॥ प्रायो महाप्रस्थानं॥ हता
नां नृपगोविप्रैरन्वसंचात्मघातिनामिति याज्ञवल्क्योक्तेश्च॥ नदे
ह्यप्रतिपत्तिश्च स्मृत्यंतरे॥ गंगायां प्रक्षिपेद्देहं सरित्स्वन्यासुवानत
इति॥ अन्त्यादेस्तु मिताक्षरायां॥ वैतानं प्रक्षिपेदप्सु गृह्याग्निं चतु
ष्पथे॥ पात्राणि च दहेदग्नौ यजमाने वृथामृते॥ वृथात्मघातेन॥ त
था॥ महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि॥ पुत्रस्तान्पालयेद
ग्नीन्युक्त आदोषसंक्षयात्॥ प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते
यदि॥ गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदमिति॥ आत्मघा
ते प्रायश्चित्तं निगमे॥ आत्मघातकः शुद्ध्यर्थं चरेच्चांद्रायणद्वयं॥ त
प्तकृच्छ्रचतुष्कं च त्रिंशन्निष्काणि चाचरेदिति॥ आत्मघातिदाहादे
प्रायश्चित्तं मिताक्षरायां॥ कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथां
॥ रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति॥ यत्तु मिताक्षरायां
स्पर्शमात्रे चैकरात्रोपोषणमिति तत्तप्तकृच्छ्राशक्तौ काष्ठाद्यंतरि
तस्पर्शे बोद्धव्यं॥ तप्तकृच्छ्रस्तु॥ तप्तक्षीरघृतांबूनामेकैकं प्रत्यहं पि
बेत्॥ एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृत इति॥ संवत्सरोर्ध्वं
तु गवादिहतानां अपि दाहादिकार्यमेव॥ गोब्राह्मणहतानां च पति
तानां तथैव च॥ ऊर्ध्वं संवत्सरात्कार्यं सर्वमेवौर्ध्वदैहिकमिति षट्
त्रिंशन्मतात्॥ नारायणबलिं कृत्वा तु तद्दैवकार्यं॥ अर्वाक्संवत्स
रात्कुर्याद्दहनादि यथोदितं॥ कृत्वा नारायणबलिमनित्यत्वात्तद
युष इति स्मृतेः॥ नारायणबलिः कार्यो लोकगर्हाभयान्नरैः॥ तथा ते
षां भवेच्छौचं नान्यथेत्यब्रवीद्यम इति छागलेयोक्तेश्च॥ विष्णुं सम
र्चयेद्देवं यमं वैवस्वतं तथा॥ एकादश्यां च शुक्लायां पंचम्यां श्रवणेऽथ
वा॥ वृथामृतानां शुद्ध्यर्थं कार्यो नारायणो बलिः॥ दशपिंडान्घृताभ्य
क्तान्दर्भेषु मधुसंयुतान्॥ तिलमिश्रान्प्रदद्याद्वै संयुतो दक्षिणामुख
इति॥ अथ शौनकस्मृत्यर्थसारानुसारी प्रयोगः॥ शुक्लैकादश्यां पंच
म्यां श्रवणे वा तिथ्यादि स्मृत्वामुकशर्मण और्ध्वदैहिके संप्रदानत्व

सिद्ध्यर्थंनारायणबलिंकरिष्यइतिसंकल्प्यपंचकलशान्सजला
न्व्रीहिपुंजेषुवागंधसर्वौषधदूर्वापल्लवसप्तमृत्फलरत्नसुवर्ण
कलशयुतान्वस्त्रवेष्टितान्संस्थाप्यतेषामुपरिताम्रादिपात्रेषु
ब्रह्मविष्णुशिवान्वैवस्वतंयमंप्रेतंचपूजयेत्।।तत्रक्रमान्मंत्राःहि
रण्यगर्भः।पुरुषसूक्तं।कद्रुद्राय।यमायसोमं।चतुर्थ्यंतंनमोंतंचप्रे
तनाम।ततोगृह्योक्तमार्गेणाग्निस्थापनादिनारायणदैवत्यचरुश्र
पणांतंकृत्वापुरुषसूक्तेनप्रत्यृचंषोडशाहुतीर्हुत्वास्विष्टकृदादि
समाप्यकलशसमीपेऽमुकगोत्रायाऽमुकशर्मणेप्रेतायविष्णुरूपि
णेऽयंपिंडउपतिष्ठतामितिमधुघृततिलयुतान्दशपिंडान्प्राची
नावीतीदक्षिणाग्रकुशेषुदत्त्वायन्तेयममितिसूक्तेनानुमंत्र्यशीतो
दकेनकुशैरभ्युक्ष्याभ्यर्च्यप्रवाहणांतंकृत्वानद्यांप्रक्षिप्यामुकशर्मा
मुकगोत्रोविष्णुरूपीतृप्यत्वितिपुरुषसूक्तस्यप्रत्यृचमंतेउच्चारय
न्षोडशवारंप्रेतंसंतर्प्यब्रह्मविष्णुमहादेवायमश्चैवसकिंकरः।ब
लिंगृहीत्वाकुर्वंतुप्रेतस्यवसुभांगतिमितिब्रह्मादीन्प्रार्थयेत्।।ते
भ्यःपुरुषाहारमितमन्नंबलिंदत्त्वाप्रतिदैवतंत्रिविधफलघृतशर्क
रामधूनिनिवेद्यपरदिनकर्तव्यश्राद्धार्थंपंचविप्रानामंत्र्यरात्रिंजा
गरणेनातिवाह्यपरदिनेमध्याह्नेब्रह्मादीन्संपूज्यतिथ्यादिसंकीर्त्या
मुकशर्मणोमुकगोत्रस्यौर्ध्वदैहिकेसंप्रदानत्वयोग्यतासिद्ध्यर्थंपंचै
कोद्दिष्टश्राद्धानितंत्रेणकरिष्यइतिसंकल्प्यश्राद्धानिकुर्यात्।।तत्र
देवताब्रह्मादयएवब्रह्मादीनांपूजापिंडदानादिषुसव्यं।।प्रेतविप्रा
याःविकादक्षिणा।।भूहिरण्यादिकाअक्षय्यस्थानेकुशतिलतुल
सीयुतशंखजलधारेतिविशेषः।।ततस्तेविप्राःपवित्रहस्ताःअमुक
शर्मणोऽमुकगोत्रायप्रेतायविष्णुरूपिणेइदंतिलोदकमुपतिष्ठता
मितिप्रत्येकंतिलोदकंदद्युः।।यजमानःस्नात्वागुडशर्करापायसा
दियुतंस्वजनयुतोभुंजीतेतिनारायणबलिप्रयोगः।।मरणोद्देशेन
सर्पसमीपगमनादिनासर्पेणहतेतुवर्षपर्यंतंप्रतिपंचमिनागंसं
पूज्यवर्षांतेनारायणबलिंकृत्वासौवर्णंनागंगांचविप्रायदत्त्वास
र्वमौर्ध्वदैहिकंकुर्यात्।।तथाचव्यासः।पुराकल्पेपपात्सुवर्णतार

निष्पन्नंनागंकृत्वा तथैवगां॥व्यासायविधिवद्दत्वापितुरानृण्य
माप्तवान्॥भारनिष्पन्नमितिवापाठः॥भारःपलसहस्रद्वयं॥तु
लास्त्रियांपलशतंभारःस्याद्विंशतिस्तुलेतिकोशात्॥एतत्पाठे
प्रायोशक्त्यायंविधिः॥प्रमादमृतानांतुचांद्रायणंतप्तकृच्छ्रद्वयं
तस्यविशुद्धयइतिप्रायश्चित्तंकृत्वासद्यएवदाहादिकार्यं।तथा
चांगिराः॥अथकश्चित्प्रमादेनम्रियेताग्न्युदकादिभिः।तस्यशौ
चंविधातव्यंकर्तव्याचोदकक्रियेति॥पुराणे॥असाध्यव्याधिना
युक्तःस्वव्यापारासमःपुमान्॥प्रविशत्यनलंदीप्तंकरोत्यनश
नंतुवा॥अगाधतोयराशिंवाभृगोःपतनमेववा॥गच्छेन्महाप
थंवापितुषारगिरिमादरात्॥प्रयागवटशाखाग्राद्देहत्यागंकरो
तिवा॥स्वयंदेहविनाशश्चप्राप्तेकालेमहामतिः॥उत्तमानाप्नुया
ल्लोकान्नात्मघातीभवेत्क्वचित्॥महापापक्षयात्स्वर्गीदिव्यान्भो
गान्समश्नुते॥एतेषामधिकारोस्तिसर्वेषांसर्वजंतुषु॥नराणाम
थनारीणांसर्ववर्णेषुसर्वदेति॥ऊर्ध्वोच्छिष्टादिमरणेपराशरः॥
ऊर्ध्वोच्छिष्टेह्यधोच्छिष्टेभयो—— च्छिष्टेतथैवच।अस्पृश्यस्प
र्शमरणेखट्वादौमरणेपिच॥श्वानक्रव्यादसंस्पर्शेकृमिकीटोद्भ
वेपिच॥तत्तद्दोषानुसारेणप्रायश्चित्तंसमाचरेत्॥कृच्छ्रास्त्रिष
ट्पंचदशान्वांद्रायणमथापिवेति॥अत्रदोषानुसारेणप्रायश्चि
त्तेतारतम्यंकल्प्यं॥ब्रह्मचारिमरणेस्मृत्यंतरेविशेषः॥येषांकु
लेब्रह्मचारीनिधनंप्राप्नुयाद्यदि॥तत्कुलस्ययमाप्नोतिसोपिदु
र्गतिमाप्नुयात्॥ग्रहत्वंप्राप्नुयाद्वापिद्रुमेःनवरतंवसेत्॥तस्यापि
तस्यवंशस्यगतिमिच्छन्महीयसीं॥विधानंचविधायाशुऔर्ध्व
दैहिकमाचरेत्॥मृतस्यम्रियमाणस्यषडब्दंव्रतमादिशेत्।त्रिं
शच्चोब्रह्मचारिभ्योदद्यात्कौपीनकान्नवान्॥हस्तमात्राःकर्ण
मात्रान्दद्यात्कृष्णाजिनानिच॥पादुकाछत्रमाल्यानिगोपीचंदन
मेवच॥मणिप्रवालमालाश्चब्रह्मसूत्राणिचार्पयेत्॥मंत्रैस्तत्तल्लिं
गकैश्चब्रह्मसायुज्यसिद्धये॥अभावेव्रतिनांपूज्यागृहस्थाःसाधवःशु
भाः॥एवंकृतेविधानेतुविघ्नस्तस्यनजायतइति॥स्नातकमरणेवा॥

स्नातकोब्रह्मचारीचनिधनंप्राप्नुयाद्यदि॥संस्थोन्यचार्कविधिनासंयो
ज्यौतौपरस्परमिति॥कुष्ठिमरणेयमः॥मृतस्यकुष्ठिनोदेहंनिखनेत्क्षो
ष्ठभूमिषु॥वासरत्रितयंपश्चादुद्धृत्यान्यत्रतद्दहेत्॥नगंगाप्लवनंका
र्यंनिक्षेपेविधिरुच्यते॥षडब्दव्रतपूर्णेनविधिनोत्थंकृतंचरेत्॥ततो
स्थिसंचयंतस्यगंगायांप्रक्षिपेत्सुधीः॥मासिमासिततःकुर्यान्मासि
श्राद्धानिपार्वणान्॥संकल्पविधिनाकेचित्प्रवदंतिमनीषिणइति॥प
र्युषितदाहेगालवः॥दिवावायदिवारात्रौशवस्तिष्ठतिकर्हिचित्॥
तत्पर्युषितमित्याहुर्दहनेतस्यकागतिः॥पंचगव्येनसंस्नाप्यप्राजाप
त्यत्रयंचरेत्॥प्रेतधनहारिणेप्रेतक्रियाकरणेशंखः॥प्रेतस्यप्रेतका
र्याणिअकृत्वाधनहारकः॥वर्णानांयद्वधेप्रोक्तंतद्व्रतंप्रयतश्चरेत्॥
अथमृतेनिकर्तव्यता॥मनुः॥नविप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणहारये
त्॥अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंपर्कदूषिता॥निर्हरणाशौचमा
हमनुः॥असपिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत्॥विशुध्यतित्रिरात्रे
णमातुराप्तांश्चबांधवान्॥यद्यन्नमत्तितेषांतुदशाहेनैवशुध्यति॥
अनदन्नन्नमन्हैवनचेत्तस्मिन्गृहेवसेदिति॥तद्गृहवासिनस्तदन्नम
स्वादतोनिर्हृतवनस्त्र्यहं॥तद्गृहवासिनस्तदन्नाशिनोपितस्यदशा
हं॥अतद्गृहवासिनस्तदन्नभोजिनश्चतस्याहोरात्रमित्याशयः॥
बंधुवदित्यनेनधनग्रहणोपाधिनासवर्णशवनिर्हरणेदशाह
शौचमितिनिबंधकृतः॥ग्रामांतरवासिनोनिर्हृतवनःसज्योतिः॥प्रेत
स्पर्शिनोग्रामंनप्रविशेयुरानक्षत्रदर्शनाद्रात्रौचेदादित्यस्येतिपार
स्करसूत्रे॥अन्यवर्णनिर्हरणेतत्तदुक्ताशौचंगौतमोक्तं॥अनाथनि
र्हरणेपराशरः॥अनाथंब्राह्मणंप्रेतंयेवहंतिद्विजातयः॥पदेपदेयज्ञ
फलमानुपूर्व्याल्लभंतिते॥नतेषामशुभंकिंचित्पापंवाशुभकर्मणां॥
जलावगाहनात्तेषांसद्यःशौचंविधीयते॥संन्यासिनांमृतावाशौचं
नास्तीतिस्मृत्यर्थसारे॥तथाब्रह्मचारिसंन्यासिनामप्याशौचंना
स्तीति॥ब्रह्मचारिविषयेयोगी॥आचार्यपित्रुपाध्यायान्निर्हृत्यापि
व्रतीव्रती॥सकटान्नंचनाश्नीयान्नचतैःसहसंवसेत्॥कटआशौचि
स्तापाद्यर्थः॥तदन्नमाशौचान्नं॥अर्थादेतदन्यनिर्हरणेव्रतभंगः॥ही

नानुगमने आशौचमाह याज्ञवल्क्यः॥ ब्राह्मणेनानुगंतव्यो न शूद्रेण द्विजः क्वचित्॥ अनुगम्यांभसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥ द्विजो विप्रभिन्नः॥ स्नात्यवगाहितहीनवर्णानुयाने तु ब्राह्मणादेर्वैसिष्ठोक्तमहोरात्रं॥ एकांतरा तु व्रजने पक्षिणी॥ दिवसावुभयतः पक्षौ इव यस्यास्या रात्रेः सा पक्षिणी॥ ह्यंतरत्वे पराशरः॥ प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः॥ अनुगच्छेन्नीयमानं स त्रिरात्रेण शुद्ध्यति॥ त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां॥ प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति॥ योगी॥ सदृग्ध्य उपेतश्चेदाहिताग्न्यावृतार्थवत्॥ उपेत उपनीतः॥ आहिताग्न्यावृता आहिताग्निदाहप्रक्रियया लौकिकाग्निना॥ अग्निविशेषं निर्विशेषं निषेधति देवलः॥ चांडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्॥ पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचिता इति॥ यमः॥ यस्यानयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च॥ प्रेतत्वे हि सदा तस्य स चाधर्मेण लिप्यते॥ अत्रानाहिताग्नेर्गृह्याग्निना॥ आहिताग्नेस्तु श्रौताग्निभिरिति॥ तत्रापि स्वगृह्योक्तविधिनैव॥ कात्यायनः॥ आहुतिं जुहोति पुत्रो भ्राता अन्यो वा ब्राह्मणोऽस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः॥ असौ स्वर्गाय लोकाय स्वाहेति॥ असावित्यत्र प्रेतनामप्रथमांतं वदेत्॥ प्रचेताः॥ स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः॥ नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजेत्॥ किंचिद्देयं शववस्त्रैकदेशादिकं श्मशाने प्रक्षिपेदिति मिताक्षरायां॥ स्मृत्यंतरे॥ रात्रौ वा रात्रिशेषे वाग्निर्यन्ते चेद्द्विजातयः॥ दाहं कृत्वा यथान्याय्यं पश्चात्पिंडो निर्वपेत्सुतः॥ परदिने आद्यद्वितीयो द्वावपि पिंडौ निर्वपेदिति केचित्॥ रात्रावेवैको वपनपिंडो विषमश्राद्धे पश्चात्पर एवं द्वाविति परे॥ स्मृतिसंग्रहेपि॥ रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितं॥ वपनं नेष्यते रात्रौ श्वस्तनावपनक्रिया॥ संध्यायां वा तथा रात्रौ दाह इत्यादि पारिजातोदाहृतनिषेधकनिगमवचनं तु दिनमृतस्य न संध्यादौ दाहादिकमित्येवं परं॥ दाहानंतरं याज्ञवल्क्यः॥ सप्तमाद्दशमाद्वादिनादर्वाक् अपन इति मंत्रेण प्रथमतृतीयपंचमसप्तमनवमेषु प्रेतस्य नामगोत्रे उच्चार्याप्यत्सुदकं ददुरिति विज्ञानेश्वरः॥ युक्तं तु स्नानमेव मंत्रोंगमिति॥

अपनःशोशुचदघमिति दक्षिणाभिमुखामज्जंति प्रेतायोदकं स
कृत्प्रसिंचंति॥अंजलिनाःसावेनत्ते उदकमिति पारस्करोक्तेः॥प्र
तिदिनमंजलिवृद्धिरितिज्ञेया॥अत्रदक्षिणाभिमुखो ब्राह्मणस्योद
ङ्मुखा प्राङ्मुखाश्चराजन्यवैश्ययोरिति प्रचेतसाविशेष उक्तः॥
अथविप्रेदशांजलयः।क्षत्रिये द्वादश वैश्येपंचदशशूद्रे त्रिंशदिति
यमोक्तो विशेषोनुसंधातव्यः॥एतच्चोदकदानंमातापितृमातामह
चार्यादीनां नित्यं भागिनेयादीनामनित्यं॥तथाचयाज्ञवल्क्यः।ए
वंमातामहाचार्यप्रेतानामुदकक्रिया॥कामोदकंसखिप्रत्ताश्वस्त्री
यश्वशुरर्त्विजां॥ज्ञातित्वेसत्यपि क्वचिन्निषेधस्तेनैवोक्तः। नब्रह्मचा
रिणःकुर्युरुदकंपतितास्तथा॥पतिताःप्रत्युत द्विजातिकर्मानधिकारा:
॥ब्रह्मचारिणमुदकदानादिनिषेधोमातृपित्रादिव्यतिरिक्तविषय
इत्युक्तं प्राक्॥आशौचनियमानाह याज्ञवल्क्यः।क्रीतलब्धाशना
भूमौशयीरंस्तेपृथक्पृथक्॥पिंडयज्ञावृतादेयंप्रेतायान्नंदिनत्रयं
॥जलमेकाहमाकाशेस्थाप्यंक्षीरंचतिविज्ञानेश्वरादयः॥हरिहर
स्तु।मृन्मयइतिपात्रेकवचनसामर्थ्यादेतावत्स्नाहीतिमंत्रेणैकत्रो
भयनिधानंमन्यते।गारुडेदुग्धनिधानंस्पष्टमुक्तं॥अपक्वेमृन्मये
पात्रेदुग्धंदद्याद्दिनत्रयमितिमात्स्ये।तस्मात्प्रेतपुरंप्रेतोद्वादशेहनि
नीयते॥गृहंपुत्रकलत्रंचद्वादशाहंसपश्यति॥तस्मान्निधेयमाका
शेदशरात्रंपयस्तथा।सर्वतापोपशांत्यर्थंमध्वश्रमविनाशनमिति।
विष्णुः।यावत्स्याशौचदिनानितावत्पिंडदानमाह।यावदाशौचंतावत्प्रे
तायोदकंपिंडंचदद्युरितिपारस्करः।प्रेतेभ्यःसर्ववर्णेभ्यःपिंडान्दद्यु
र्दशैवतु।मरीचिः।प्रेतपिंडंबहिर्दद्याद्दर्भमंत्रविवर्जितं॥प्रागुदीच्यां
चरुंकृत्वास्नातःप्रयतमानसः॥दर्भवर्जितत्वमनुपनीतविषयं॥
असंस्कृतानांभूमौपिंडंदद्यात्संस्कृतानांतुकुशेष्विति प्रचेतोवच
नात्॥पाषाणेवादेयाः।भूमौमाल्यंपिंडेपानीयमुपलेवादद्युरितिशं
खोक्तेः।शातातपः।दिवसेदिवसेदेयःपिंडएवंक्रमेणतु॥सद्यःशौ
चेप्रदातव्याःसर्वेपियुगपत्तथा॥आशौचस्यह्रासेपिपिंडान्दद्याद्
शैवतु।त्रिरात्राशौचेपारस्करः।प्रथमेदिवसेदेयास्त्रयःपिंडाःसमा

ह्निते॥ द्वितीयेचतुरोदद्यादस्थिसंचयनंतथा॥ त्रींस्तुदद्यात्तृतीये
न्हिवस्त्रादिक्षालयेत्ततइति॥ गृह्यकारिकायां॥ यत्रत्रिरात्रमाशौचं
द्वितीयेत्वस्थिसंचयः॥ नवश्राद्धंवृषोत्सर्गंचतुर्थेन्हिसमाचरेत्॥
आशौचंतुयदासद्योभवेत्तत्रकथंचन॥ यथाकालेनवश्राद्धमितिसं
त्यव्रतोब्रवीत्॥ वृषोत्सर्गादिचत्तत्रकुर्यादेकादशेहनीति॥ परिशि
ष्टे॥ असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान्॥ प्रथमेह्नियोद
द्यात्सदशाहंसमापयेत्॥ प्रदीपधृतवचः॥ सगोत्रोवासगोत्रोवायो
ग्निंदद्यात्सखेनरः॥ सोपिकुर्यान्नवश्राद्धंमध्येतुदशमेह्नीति॥ अ
त्रापिसमानकर्तृतामात्रमेवविधेयं॥ दशमेह्नीतितुमानांतरप्रा
प्ताशौचावधेरनुवादः॥ यदिसत्रायदीक्षितानांसाग्नितिष्ठसेत्सो
ममयभज्यविश्वजितानिरात्रेणयजेतेत्यत्रप्राप्तविभाज्यद्रव्यो
पलक्षकसोमपदवत्तेनक्षत्रियादिर्द्वादशाहादिभिःशुद्ध्येत्॥ त्रि
रात्राशौचवांस्तुतावतैव। पक्षिण्येकाहादिमानपित्रिरात्रेणैव। असंबं
धिद्विजात्वहित्वादहित्वाचसद्यःशौचसंबंधेत्रिरात्रमितिपैठीनसि
नादाहमात्रेसंबंधिनस्त्रिरात्रविधानात्॥ दाहवहनयोः साहित्यंत
विवक्षितमनुवाद्यविशेषणात्॥ केचिद्दाहपिंडदानादिनिमित्तंद
शाहादिजात्याशौचंचरंतितन्निर्मूलं॥ तत्रनिरन्वयेसपिंडेतुमृतेस
तिदयान्वितः॥ तदशौचंपुराचीर्त्वाकुर्यात्तुपितृवत्क्रियामितिवचस्त
दाशौचाप्रयोजकमृतावाशौचमचीर्त्वाःकृत्वैवदययाधर्मार्थंक्रि
यांकुर्यादित्येतत्परं॥ अथवाधर्मार्थत्वाभावेस्नेहानुबंधेपिक्रिया
निमित्ताशौचेमानाभावाद्दाहनिमित्तंत्रिरात्रंकृत्वादशाहपर्यंतंक्रि
यांकुर्यात्॥ अतएवचीर्त्वेतिक्त्वावगतमाशौचसमाप्त्युत्तरका
लंक्रियासमाप्तेःसंगच्छते। उत्तमवर्णदाहत्वान्वेत्यादिगौतमीयं
तज्जात्याशौचं॥ यद्यपितत्रापस्पर्शनंनिर्हरणंव्याख्यातमिताक्षरा
यांतथापिकैमुतिकन्यायेनदाहेपितद्भवति॥ ब्राह्मे॥ योसवर्णंतु
ल्येननीत्वाचैवदहेन्नरः॥ आशौचंतुभवेत्तस्यप्रेतजातिसमंनृपेति
॥ मनुः॥ व्रात्यानांयाजनंकृत्वापरेषामंत्यकर्मच॥ अभिचारमहीनं
चत्रिभिःकृच्छ्रैर्विशुद्ध्यतीति। अहीनयाजकांत्येष्टियाजकयोरेवत

प्रायश्चित्तमितिविज्ञानेश्वरः॥मेधातिथिस्तुहीनस्याविहितत्वेन
नतत्रेदंप्रायश्चित्तंकिंतुरागप्राप्तेप्याजनएवपरांत्यकर्षणंतुनिषिद्ध
त्वान्नतस्मात्सालकर्तुरेवेदमितियुक्तमूचे॥वचःस्वरसोप्येवं।देवलः॥ब्र
ह्मचारीनकुर्वीतशववाहादिकाःक्रियाः॥यदिकुर्याच्चरेत्कृच्छ्रंपुनःसं
स्कारमेवचेति॥आदिपदमलंकारादेर्ग्रहणंतुदाहादेः।तत्रप्रायश्चि
त्तस्यगुरुत्वात्पैठीनसिरपि।ब्रह्मचारिणःशवकर्मिणोव्रतान्निवृ
त्तिरिति॥स्नेहलोभहेतुक्रियायाःसामान्यवचनेनैवनिषेधेसिद्धेब्र
ह्मचारिणांप्रतिपुनर्निषेधःधर्मार्थमपिगोपयति॥अन्यथावैयर्थ्या
त्॥मनुः॥आचार्यस्वमुपाध्यायंमातरंपितरंगुरुं॥निर्हृत्यतुव्रतीप्रे
तंव्रतेननवियुज्यतइतिमिताक्षरायांगुरोःप्रेतस्यशिष्यस्तुपितृमे
धंसमाचरेत्।प्रेताहारैःसमंतत्रदशरात्रेणशुध्यति।प्रेताहारैस्त
द्भोजनैः॥एतद्दशरात्रंतदन्नभोजनएव॥तदभावेत्वेकरात्रंवक्ष्य
ते॥पुनरुपनयनंतुनभवति॥क्रियायाविहितत्वात्।आचार्याद्यति
रिक्तक्रियायांत्वाशौचंपुनरुपनयनंप्रायश्चित्तंचभवति॥अतए
वयाज्ञवल्क्यः॥आचार्यपित्रुपाध्यायान्निर्हृत्यापिव्रतीव्रतीति।नि
र्हरणमग्निदानादिक्रियांतरस्याप्युपलक्षणं॥अतएवभविष्यपुराणे
॥व्रतस्थोपि यथापुत्रःपितुःकुर्यात्क्रियांनृप॥तथामातामहस्या
पिदौहित्रःकर्तुमर्हतीति॥माधवीयेब्राह्मे॥आचार्यवाप्युपाध्यायं
गुरुंवापितरंतुवा॥मातरंवास्वयंदग्ध्वाव्रतस्थस्तत्रभोजनं।कृत्वा
पततिनोतस्मात्प्रेतान्नंतत्रभक्षयेत्॥अन्यत्रभोजनंकुर्यान्नचतैःस
हसंविशेत्॥एकाहमशुचिर्भूत्वाद्वितीयेहनिशुद्ध्यतीति॥तुशब्दे
नैतदाशौचवैलक्षण्यंगम्यते॥तेनपित्रादिभिन्नक्रियायांदाहेवहने
तदन्नभोजनेवापूर्णाशौचप्रायश्चित्तपुनरुपनयनानिभवंति।चंद्रि
कायांसंवर्त्तः।पित्रोर्गुरोर्विपत्तौतुब्रह्मचार्यपियःसुतः।सव्रतस्थोपि
कुर्वीतअग्निपिंडोदकक्रियां।तेनाशौचंतुकर्तव्यंसंध्याचैवनलुप्यते
॥अग्निकार्यंचकर्त्तव्यंसायंप्रातश्चनित्यशइति।इदंचप्रागुक्ताग्नि
दाननिमित्तत्र्यहनिषेधार्थं।नतुदशाहादेःप्रसक्त्यभावात्।मातावा
चार्यकेभ्योजलजलतिलदोब्रह्मचारीतदीयाशौचइतित्रिंशत्सव॰

स्यौर्ध्वदैहिकपृष्ठलग्नंदशाहाद्याशौचमितिकेषांचिद्व्याख्यैवस्यचाभि
प्रायंनजाने।यत्तुप्रकाशेप्रजापतिः॥ब्रह्मचारीयदाकुर्यात्पिंडनिर्व
पणंपितुः॥तावत्कालमशौचंस्यात्पुनःस्नात्वाविशुद्ध्यतीतितन्नत
त्कालंब्राह्मोक्तमेकाहमित्यर्थः।दिवोदासादयस्तु।आद्यदिनेपू
र्णमाशौचंसंध्यादिकर्मलोपश्चद्वितीयादिदिनेषुपिंडदानादिका
लएवाशौचं॥नतुतत्पूर्वोत्तरकालयोरित्याहुः॥नन्वब्राह्मवाक्य
मूलान्मूलांतरकल्पनापत्तेः।प्रत्यहमनेकाशौचोत्पत्तिनाशक
ल्पनागौरवाच्च॥हारीतः॥विहितंहिसपिंड स्यप्रेतनिर्हरणादिकं
॥दोषःस्यात्त्वसपिंडस्यतत्रानाथक्रियांविनेति॥याज्ञवल्क्यः॥ब्राह्म
णेनानुगंतव्योनशूद्रोनद्विजःक्वचित्॥अनुगम्यांभसिस्नात्वास्प
ष्ट्वाग्निंघृतभुक्शुचिरिति॥मनुः॥अनुगम्येच्छयाप्रेतंज्ञातिमज्ञाति
मेववा॥स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुद्ध्यतीति॥ज्ञातिः
सजातीयमात्रंनतुसपिंडः॥तदनुगमनेदोषाभावात्॥इदंचघृत
प्राशनंकृच्छ्रपादेनतत्त्वाभावेपितपआत्मकप्रायश्चित्तत्वात्
भोजननिवर्तकं॥स्नानंतरहीनवर्णानुयानेएकाहंप्रकृत्यवसिष्ठः
शवानुगमनेचैवमिति॥विप्रस्यवैश्यानुयानेतुपक्षिणीतिविज्ञाने
श्वरादयः॥पराशरस्तु॥मृतंतुवैश्यमज्ञानात्ब्राह्मणोयोनुगच्छति
॥कृत्वाशौचंद्विरात्रंसप्राणायामान्षडाचरेदिति॥एतदेवक्षत्रिय
स्यशूद्रानुयानेपीतिग्रंथकृतः॥तथैवदशश्लोक्यामपिपराशरः॥प्रे
तीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलः॥अनुगच्छेन्नीयमानंसत्रि
रात्रेणशुद्ध्यति॥त्रिरात्रेतुनतस्तीर्णेनदींगत्वासमुद्रगां॥प्राणाया
मशतंकृत्वाघृतंप्राश्यविशुद्ध्यतीति॥ज्ञानदुर्बलः ज्ञानशून्यः।एव
मज्ञानादित्यत्रापि॥ब्राह्मे॥ब्राह्मणस्त्वन्यवर्णानांनकरोतिकदाच
न॥कामान्मोहाद्भयाल्लोभात्कृत्वातज्जातितांव्रजेदिति॥ब्राह्मणपद
मुपलक्षणं॥वर्णानामितिसामान्यतोग्रहणमपिहीनजातिपरमेव
॥तस्याप्तेरेवानिष्टत्वात्॥कामादिग्रहणाच्चधर्मार्थेद्विजस्यद्विजक्रि
यायांनदोषइतिगम्यते॥शुनःपुच्छः॥शालिनासक्तुभिर्वापिशाकै
र्वाप्यथनिर्वपेत्॥प्रथमेहनियद्द्रव्यंतदेवस्याद्दशाहिकं॥भविष्योत्त

रे॥ गृहद्वारे श्मशाने च तीर्थे देवगृहे तथा॥ यत्राद्योदीयते पिंडस्तत्र
सर्वं समापयेत्॥ निगमे॥ एकस्तोयांजलिस्त्वेवं पात्रमेकं च दीयते।
द्वितीये द्वौ तृतीये त्रींश्चतुर्थे चतुरस्तथा॥ पंचमे पंच षट् षष्ठे सप्तमे
सप्त एव हि॥ अष्टमेष्टौ च नवमे नवैव दशमे दश॥ येन स्युः पंचपंचा
शत्तोयस्यांजलयः क्रमात्॥ तोयपात्राणि तावंति संयुक्तानि तिला
दिभिः॥ पंचभिः पंचभिस्त्वेति पात्रै रंजलिभिस्तथा॥ एकादशे वंद्रीपा
णिकर्षने शास्त्रदर्शनादिति॥ पिंडश्च पुराणे॥ तिलाः क्षीरं तथा तोयं
धूपदीपं तथा बलिः॥ मधुसर्पिःसमायुक्तं पिंडमाहुर्मनीषिण इति॥
तथा॥ अर्घैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः॥ ऊर्णातंतुमयैः
शुद्धैर्वासोभिः पिंडमर्चयेदिति॥ स्मृत्यंतरेपि॥ भूमौ पिंडप्रदानं च
कर्षूं कृत्वा विधानत इति॥ कर्षूस्तु प्रादेशमात्रदीर्घा चतुरंगुलवि
स्तारा तावदेव निम्नागर्तस्वरूपा॥ अस्थिसंचयने संवर्तः। प्रथमे
न्हि तृतीये वा सप्तमे नवमे तथा॥ अस्थिसंचयनं कार्यं दिने तद्गोत्र
जैः सह॥ क्वचित् द्वितीयेप्युक्तं॥ वैष्णवे तु चतुर्थे दिवसेस्थिसंचय
नं कुर्यात्तेषां च गंगांभसि प्रक्षेप इति॥ प्रक्षेपो यथा॥ पट्टवस्त्रकौशेय
मांजिष्ठश्वेतवस्त्रकंबलशाणपट्टाजिनैरष्टभिरुपर्युपरि संवेष्ट्य
पंचगव्येन प्रक्षाल्य सास्थिदंशस्नानानि कृत्वास्थीनि पलाशपत्र
पुटे संस्थाप्य पुनर्मधुघृततिलहेमशकलैः सह मृत्पिंडे निधाय कृता
पसव्यो नाभिमात्रे जले मृतनामगोत्राद्युल्लेखपूर्वकं मृतश्राद्धपूर्वकं
च प्रक्षिप्य रजतं ब्राह्मणाय दद्यात्॥ एवं गंगायां तत्क्षेपे स्वर्गः। प्रया
गादौ तु मुक्तिरपीति फलं॥ वपनविषये देवलः॥ दशमेहनि संप्राप्ते स्ना
नं ग्रामाद्बहिर्भवेत्॥ तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि तु॥ व
पनादि च दशमपिंडदानोत्तरं॥ समाप्य दशमं पिंडं यथाशास्त्रमुदा
हृतमिति ब्रह्मपुराणात्॥ भौमार्कमंदवारेमलिम्लुचशुक्रास्तादौ गं
गायामस्थिप्रक्षेपं न कुर्यादिति त्रिस्थलीसेतौ॥ तथा॥ अस्थिक्षेपं
गयाश्राद्धं श्राद्धं चापरपाक्षिकं॥ प्रथमेब्दे न कुर्वीत कृतेपि तत्सपिंड
ने॥ यदि न स्यात्सपिंडनमिति क्वचित्पाठः॥ अस्थिक्षेपं गयाश्राद्धं
श्राद्धं चापरपाक्षिकं॥ प्रथमेब्देपि कुर्वीत यदि स्याद्भक्तिमान् सुत इति

॥दर्शश्राद्धंगयाश्राद्धंइतिकल्पतरुः॥अत्रपुत्रइत्येवोद्देश्यसम
र्पकं।भक्तिस्तुकर्मांगतयालभ्यते॥अतःसुतेनाद्याब्देकार्यंनान्येन
॥स्मृत्यंतरेपि॥द्वितीयेन्हिप्रकर्त्तव्यंक्षौरकर्मप्रयत्नतः।तृतीयेपंच
मेवापिसप्तमेवाप्रदानतइति॥एकादशाहिकश्राद्धप्रदानादर्वागि
त्यर्थः।आपस्तंबः॥अनुभाविनांचपरिवापनमिति॥अनुभाविनः
कनिष्ठाःसर्वेसपिंडाः॥पुत्राएवेतिमिताक्षरायां।अनुपनीतपुत्रप
त्न्योर्दाहाधिकारमाहकात्यायनः॥असंस्कृतेनपत्न्याचसाग्निदानं
समंत्रकं।कर्त्तव्यमितरत्सर्वंकारयेदन्यमेवहि॥कृतचौलस्तुती
यवर्षोत्तरंसर्वमौर्ध्वदेहिकंकुर्यात्॥अनुपेतोपिकुर्वीतमंत्रवत्पैत
मेधिकं॥यद्यसौकृतचूडःस्याद्यदिचस्यात्त्रिवत्सरइतिसुमंतूक्तेः।
अत्रविशेषणद्वयमपिविवक्षितं॥विधेयकर्तृगतत्वात्॥षट्पिंडा
अपिस्मृत्यंतरे॥स्थानेचार्धपथेतीतेचितायांशवहस्तके॥श्मशा
नवासिभूतेभ्यःपंचमंप्रातिवेश्मकं॥षष्ठःसंचयनेप्रोक्तोदशपिंडाद
शाहिकाः॥श्राद्धषोडशकंचैतत्प्रथमंपरिकीर्तितमिति॥प्रातिवेशि
कोद्वारदेशस्थः।कर्मप्रदीपेपि॥उत्क्रांतौद्वारदेशेचविश्रांतौशवहस्त
के॥स्तंबेसंचयनेचापिषट्सुपिंडांश्चनिर्वपेदिति॥स्तंबश्चिता॥कु
शमुष्टिरित्यन्ये॥ब्रह्मपुराणे॥छिन्नोवादग्धदेहोवाश्वापदैर्भक्षितो
पिवा॥अंगमुत्पादयेत्तेषांपिंडदानैर्दशाहिकैः॥आतिवाहिकदेह
स्तुप्रेतपीडासमन्वितः॥नहिमोक्षमवाप्नोतिपिंडांस्तत्रैवसोश्नुते
॥आतिवाहिकदेहःप्रेतशरीरं॥कृतेसपिंडीकरणेततःसंवत्सरात्प
रं॥प्रेतदेहंसमुत्सृज्यभोगदेहंप्रपद्यते॥शिरस्त्वाद्येनपिंडेनप्रेत
स्यक्रियतेतथा॥द्वितीयेनतुकर्णाक्षिनासिकास्तुसमासतः।ग
लांसभुजवक्षांसितृतीयेनतथाक्रमात्॥चतुर्थेनतुपिंडेननाभिलिं
गगुदानिच॥जानुजंघेतथापादौपंचमेनतुसर्वदा॥सर्वमर्माणिषष्ठे
नसप्तमेनतुनाडयः।दंतलोमान्यष्टमेनपूर्णत्वक्षुद्विपर्ययः॥जाय
तेनवमेनाथदशमेनतथाक्रमादिति॥रुद्रवसिष्ठः।अलब्ध्वातुन
वश्राद्धंप्रेतत्वान्नविमुच्यते॥अर्वाक्तुद्वादशाहस्यलब्ध्वानरतिड
कृतमिति॥अंगिराः॥प्रथमेन्हितृतीयेन्हिपंचमेसप्तमेतथा॥नव

मेकादशेचैवनवश्राद्धंनदुच्यते॥नागरखंडे॥त्रीणिसंचयनस्याथेता
निवैशृणुसांप्रतं॥यत्रस्थानेभवेन्मृत्युस्तत्रश्राद्धंप्रकल्पयेत्॥एकोद्दि
ष्टंततोमार्गेविश्रामोयत्रकारितः॥ततःसंचयनस्थानेतृतीयंश्राद्धमु
च्यते॥पंचमेसप्तमेतद्वदष्टमेनवमेतथा॥दशमेकादशेचैवनवश्राद्धा
नितानिचेतिनवसंख्याकान्युक्तानि॥भविष्यपुराणे॥नवसप्तविशां
राज्ञांनवश्राद्धान्यनुक्रमात्॥आद्यंतयोर्वर्णयोस्तुषडित्याहुर्महर्ष
यइति॥बह्वृचपरिशिष्टे॥अनुदकमभूपंचगंधमाल्यविवर्जितं॥न
वश्राद्धममंत्रंचपिंडोदकविवर्जितं॥अनुदकमर्घ्यसहितं॥पिंडोद
कमत्यवनेजनोदकं॥शातातपः॥सूतकेमृतकेश्राद्धेद्वितीयमृतकं
यदि॥पिंडदानंप्रकर्त्तव्यंवृषोत्सर्गंतथैवच॥आरब्धेप्रेतपिंडेतुम
ध्येचेज्जननंभवेत्॥तथैवाशौचपिंडांस्तुशेषान्दद्याद्यथाविधीति
॥यत्तुस्मृत्यंतरेपि॥नहन्यात्सूतकंकर्मेहादशैकादशाहिकं॥शुद्धोवा
यदिवाशुद्धःकुर्यादेवाविचारयन्निति॥तन्मूलंमृग्यं॥दशाहमध्येद
र्शपातेऋष्यशृंगः॥आशौचमंतरादर्शोयदिस्यात्सर्ववर्णिनां॥सं
मार्त्तिप्रेतंतत्रस्यकुर्यादित्याहगौतमः॥भविष्यपुराणेपि॥प्रवृत्ताशौच
तंत्रस्तुयदिदर्शःप्रपद्यते॥समाप्यचोदकंपिंडान्स्नानमात्रंसमाचरेत्
॥अशौचसमाप्तिपर्यंतंप्रत्यहंस्नानमाचरेदित्यर्थःपैठीनसिरपि॥आ
द्यंदावेवकर्त्तव्याः प्रेतपिंडोदकक्रियाः॥द्वितीयंतुकुर्वाणःपर्व्वस्ये
त्र्यहात्परमिति॥यत्तुगौतमः॥अंतर्दशाहंदर्शश्चेत्तत्रसर्वंसमापये
त्॥पित्रोस्तुयावदाशौचंदद्यात्पिंडजलांजलीनिति॥तत्त्र्यहांतर्दर्श
परं॥इतिपितामहचरणाः॥कालादर्शेप्येवं॥यत्तुमदनोगौतमीयमौर
सपुत्रपरं॥गालवंत्वनौरसपरमिति॥तन्न॥वैपरीत्यस्यापिसंभवेनवि
निगमनाविरहात्॥यदपिसएव॥माधवनिर्णयामृतकारौचगालव
मापद्विषयमाहतुः॥तदपिन॥मानाभावात्॥त्र्यहमध्येआपदितदुत्त
रंचतदभावेगौतमीयस्यापद्विषयतयावैपरीत्यस्यापिसुवचत्वेन
विनिगमनाविरहादवस्थात्॥मत्स्यपुराणे॥दशाहानंतरंपुत्रोवृषो
त्सर्गस्यपूर्वकं॥आरभेतशुचिर्भूत्वाश्राद्धमेकादशेहनि॥वृषोत्स
र्गेकृतेत्यर्थः॥वृषोत्सर्गप्रयोगस्तुश्राद्धमयूखउक्तः॥स्त्रीविषये॥

पतिपुत्रवतीनारीभर्त्तुरग्रे मृतायदि॥ वृषोत्सर्गंनकुर्वीत गांतुदद्या
त्पयस्विनीमितिविशेषः॥ वृषोत्सर्गादपिपूर्वं विष्णुतर्पणमुक्तंगारु
डे॥ पूर्वंतुतर्पणंकार्यंमंत्रैःपौराणवैदिकैः॥ सर्वैर्वष्यमृतैर्मिश्रं विष्णु
मुद्दिश्यतर्पयेत्॥ कार्यंपुरुषसूक्तेनमंत्रैरपिचवैष्णवैः॥ दक्षिणाभि
मुखोभूत्वाप्रेतंविष्णुमितिस्मरन्॥ अनादिनिधनोदेवःशंखचक्र
गदाधरः॥ अव्ययःपुंडरीकाक्षःप्रेतमुक्तिप्रदोभवेति॥ पैठीनसिः॥ ए
कादशेह्निपच्छ्राद्धं तत्सामान्यमुदाहृतं॥ चतुर्णामपिवर्णानां सूत
केतुपृथक्पृथक्॥ लौगाक्षिः॥ आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेह
नि॥ कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरेवसः॥ आद्यंश्राद्धमितिस
पैंडीकोद्दिष्टप्रकृतिभूतं॥ याज्ञवल्क्योपि॥ मृतेहनितुकर्त्तव्यंप्रतिमासं
तुवत्सरे॥ प्रतिसंवत्सरंचैवमाद्यमेकादशेहनि॥ आद्यमेकादशेह
नीत्यनेनाद्यदिनप्राप्तयोराद्यमासिकाद्यवार्षिकयोरेकादशाहउत्क
र्षोविधीयते॥ अथमृताग्निहोत्रप्रकारः॥ कारिकासु॥ मृताग्निहोत्रं
होतव्यंप्राग्दाहात्तत्रकथ्यते॥ प्राचीनावीतिनासर्वं शांस्यमेवोद्दू
चरेत्॥ सादनाभावतःकूर्चेस्थापनंनभवेदिह॥ प्रागग्रैर्दक्षिणाग्रै
श्चतृणैःशांस्यपरिस्तृतिः॥ पर्युक्षणंचतस्यैवकार्यमत्राप्रदक्षिणं॥
नयेद्दक्षिणतोभस्मनिरुद्धोष्णंचसंधिनीं॥ दुग्ध्वाभस्मन्यधिश्रित्या
वज्योतासेकवर्जितं॥ उद्वासयेत्तदासाद्यदक्षिणास्रुक्स्रुवंततः॥ प्रत
थैग्रेपरिहितंतस्यपःसकृदुन्नयेत्॥ धारयेत्समिधंत्वधोनयेद्दक्षिणतो
नयेत्॥ तूष्णींसमिधमाधायसव्यंजानुनिपात्यच॥ अपसव्यंस्रुचंकृ
त्वासकृत्सर्वंविनिक्षिपेत्॥ ततःकृष्णाजनेस्थाप्यपुरुषाकारवन्न्यसे
त्॥ ऊर्णाभिश्छादयेत्तानिघृतेनाभ्यज्यपूर्ववत्॥ पात्राणियोजयित्वा
तंदहेच्चैताग्निभिस्ततइति॥ इदंचमृताग्निहोत्रंदेशांतरात्मृतकलेव
रागमनानंतरंहुत्वाकलेवरंदग्धव्यमितिकेचित्॥ अन्येतुप्राकृताग्नि
होत्रस्थानेमृताग्निहोत्रस्यश्रुत्यादावुपदिष्टत्वात्॥ कलेवरस्यास्म
दागृहगमनपर्यंतंप्रतिदिनंसायंप्रातर्यथोपदिष्टंहोतव्यमितिवदंति
॥ दाहेपद्यप्याहिताग्निमग्निभिर्दहेतिपद्मपात्रैश्चेत्यविशेषेणानयः
श्रुतास्तथापितयोर्यःपूर्वंम्रियतेतस्यत्रेताग्निः पितृमेधःसंपद्यतइति

सूत्रात्॥ आहिताग्न्योर्दम्पत्योर्यस्यादौ म्रियेते शुचिः॥ तस्य देहः स
पिंडैस्तु दग्धव्यस्त्रिभिरग्निभिरिति॥ पश्चान्मृतस्य देहस्तु दग्धव्यो
लौकिकाग्निना॥ अनाहिताग्निदेहस्तु दाह्यो गृह्याग्निना द्विजैरिति॥ ब्र
ह्मपुराणवचनाच्चैतायाएवदाहसाधनतानसभ्यावसथ्ययोः॥ स
भ्यावसथ्याबाहिताग्नेर्दहनकर्मणि न प्रयुज्येते॥ चिताप्रदेशात्प्राग्
दिच्यांदिशिपंच प्रक्रमानतिक्रम्योत्सृजतीति शाट्यायनिवचनात्
॥ स्त्रीमरणेछंदोगपरिशिष्टे विशेषः॥ अनयैवावृतानारीदग्धव्या
पिव्यवस्थिता॥ अग्निप्रदानमंत्रोस्या न प्रयोज्य इतिस्थितिः॥ व्यव
स्थितासाध्वी॥ आवृत्यकारः॥ असाध्वी तु केवलाग्निभिः॥ पात्राणि
तु चितेरुत्तरतः समीपेतदन्यैकदेशे न पृथग्दग्धव्यानि॥ अतिनिंदि
ता तु केवलाग्निभिरपि न दग्धव्येति तद्वृत्तौ॥ एवं अनेकभार्यस्य ज्येष्ठा
या जीवंत्यां सह्याहिताग्निर्हिनीया॥ तृतीयापि स्त्री गार्हपत्यैकदेशेन
त्रिभिर्वाग्निभिर्दग्धव्या॥ तस्यान्नयैकदेशेन दग्धव्या पूर्वमारिणी॥ प
त्नी ज्येष्ठेतरा वापियत्तपार्श्वे निरूपितं॥ तथा॥ स्त्रीमात्रमविशेषेण द
ग्धव्यं वैदिकाग्निभिरित्युभयथा वचनसद्भावात्॥ वैदिकाग्निभिर्दे
हपक्षे च नतो ज्येष्ठया सह पुनराधानं॥ आधानोत्तरकाले या विवाहि
ता स्त्री सा तु वैदिकाग्निभिर्न दग्धव्या॥ किंतु गार्ह्यस्यैकदेशेनेति केचि
त्॥ परे तु स्मार्ताग्निसत्वे तं॥ भावे लौकिकेनेत्याहुः॥ विशेषमाह मं
डनः॥ अग्न्यावरण्योरारूढे प्रमापतपतिर्यदि॥ प्रेतं स्पृष्ट्वा मथित्वाग्निं
जत्वा चोपावरोहणं॥ घृतं च ह्वादशोपात्तं तूष्णीं हुत्वा शवक्रिया॥ उ
पावरोह जातवेद इमं प्रेतं स्वर्गाय लोकाय नय अताहुती चात्यजुषः
स्व स्वाहेत्युपावरोहणमंत्रः॥ अग्निनाशे यजमानमृतौ कारिकायां वि
शेषः॥ अग्निनाशे मृतिश्चेत्स्यादाहिताग्नेस्त दोच्यते॥ नयोल्मुकं
मथित्वैनं संस्कुर्युस्तदभावतः॥ तद्भस्मस्पृष्टकाष्ठेन मथित्वा निर्देह
चेतं॥ नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत्॥ आहरेदरणी हू
ह्माधानोक्तं च तद्यथा॥ अथ विच्छिन्नाग्नेरुत्सृष्टाग्नेश्चाधानमाह मंड
नः॥ विच्छिन्नमग्निमुत्सृष्टपावकं विधुरानलं॥ आहिताग्निं मृतं दग्धुं त्रे
तामन्युत्सन्तिसिद्धये॥ भारद्वाजादयः प्राहुः श्रेताधानविधिं पृथक्॥

प्राचीनावीतवान्कुर्यादग्न्यागारेतथास्वरान्॥तत्राग्नीनांचसंस्तृ
त्यैप्रेतंस्वाम्यासनेक्षिपेत्॥नर्मालयेरणीस्थाप्यमंथेद्यस्येतिमंत्रतः
॥यस्याग्नयोजुह्वतोमांसकामाःसंकल्पयंतुतेयजमानं॥ध्यायेतु
तेहविषेसादितायस्वर्गेलोकेपिमंप्रेतंनयंत्वितिमंथनमंत्रः॥तू
ष्णीमुद्धृत्यशंस्याग्निंसंस्कृतेनचसर्पिषा॥शंस्येहुत्वास्रुचानूर्ध्वां
गृहीत्वाद्वादशस्रुवान्॥दक्षिणाग्निंसमुद्धृत्यनिर्देहेत्पूर्ववच्छवं॥
उत्सन्नाग्नेरणिसद्भावेएवं॥अरण्योरभावेतु॥उत्सन्नाग्नेर्मृतस्या
ग्नयस्तःपूर्वयदारणी॥आनीयान्येनयोःप्रेतपाणिंस्थाप्याथदक्षि
णं॥अयंतइतिपुत्रादिःसमारोप्ययजुर्जपेत्॥मृताग्न्याधानवत्सर्वं
कृत्वातंपूर्ववद्दहेत्॥अनाहिताग्नेरप्येवंमृताधानंयथोदितं॥अना
हिताग्नेरितितुस्मार्त्ताग्निकातीयादिपरं॥तेषांस्मार्ताधानाम्नानात्
॥पत्निमृतेभर्त्तरिभार्याग्निपेततदारणीसंपाद्यमंत्रवदग्निंनिर्मं
थ्यतेनाग्निनापात्रैर्विनादाहः॥एवंभार्यामरणेनरकालेमृतस्य
पुंसोनिर्मंथ्यैनैवदाहइतिकात्यायनानुसारिणः॥अथपलाशप्रति
कृतिः॥तत्रकल्पतरौ॥अस्थ्नीनिचेन्नलभ्यंतेप्रोषितस्याग्निहोत्रिणः
॥पलाशपत्रवृंतानांषष्ट्याधिकशतत्रयं॥कृष्णाजिनेनराकारंकृत्वा
वेष्ट्याजिनेनतं॥ऊर्णासूत्रेणबद्ध्वैवयवपिष्टैःप्रलेपयेत्॥निर्दिशंदे
वदत्तोयंनाम्नेत्याहाश्वलायनः॥अह्नाज्येनदहेत्कृत्वामृद्गंधंसेचय
येतइति॥मृद्गंधमितियवपिष्टलेपोत्तरंमृदाप्यालिप्यदग्ध्वास्थाने
तांदग्ध्वांमृदंसंचिनुयादित्यर्थः॥अत्रैत्यंपलाशवृंतविभागः॥अशी
त्यर्द्धंशिरःस्थानेग्रीवायांदशयोजयेत्॥उरसित्रिंशतंदद्याद्विंशतिंज
ठरेन्यसेत्॥बाहुभ्यांतुशतंदद्याद्द्यादंगुलिभिर्दश॥तृतीयासम
म्यर्धे॥द्वादशार्द्धंवृषणयोरष्टार्द्धंशिश्नएवतु॥ऊरुभ्यांतुशतंदद्या
त्रिंशतंजानुजंघयोः॥पादांगुलीषुदशधाएतत्प्रेतेषुलक्षणमिति॥
तथा॥नालिकेरंशिरःस्थानेतुंबंदद्याच्चतालुके॥पंचरत्नंमुखेदद्या
ज्जिह्वायांकदलीफलम्॥आंत्रेषुनालकंदद्याद्वालुकंघ्राणएवच॥व
सायांमृत्तिकादद्याज्ञेमूत्रेणतुमूत्रकं॥गंधकंधातवोदेयाहरिता
मनःशिला॥पारदंरेतसःस्थानेपुरीषेपित्तलंतथा॥मनःशिलातथा

गात्रे तैलकल्कं च संधिषु॥ यवपिष्टं तथा मांसे मधु शोणितमेव च॥ के
शेषु च जटाजूटं त्वचायां च मृगत्वचं॥ कर्णयोस्तालपत्रं च स्तनयोश्चै
व गुंजिका॥ नासायां शतपत्रं च कमलं नाभिमंडले॥ वृंताकं वृषणद्वंद्वे
लिंगे स्याद्गृंजरं शुभं॥ घृतं नाभ्यां प्रदेयं स्यात्कौपीनं च त्रपुः स्मृतं॥ मौ
क्तिकं स्तनयोर्मूर्ध्नि कुंकुमेन विलेपनं॥ कर्पूरागुरुधूपैश्च शुभ्रैर्माल्यैः
सुगंधिभिः॥ परिधानं पट्टसूत्रं हृदये रुक्मकं तथा॥ ऋद्धिवृद्धी उभौ द्वौ
च चक्षुर्भ्यां च कपर्दकौ॥ सिंदूरं नेत्रकोणेषु तांबूलाद्युपहारकैः॥ सर्वौष
धियुतं प्रेतं कृत्वा पूजां यथोदितां॥ साग्निके चापि विधिना यज्ञपात्रं न्यसे
त्क्रमात्॥ शिरो मे श्रीः पुनंतु माइमे मे वरुणेति च॥ प्रेतस्य पावनं कृत्वा
शालग्रामशिलाजलैः॥ विष्णुपुत्रस्य ह्नातव्या सुशीला गौः पयस्विनी॥
तिलालोहं हिरण्यं च कार्पासं लवणं तथा॥ सप्तधान्यं क्षितिर्गावश्चैकै
कं पावनं स्मृतं॥ तिलपात्रं ततो दत्वा पददानं तथैव च॥ ततो वैतरणी
देया सर्वाभरणभूषिता॥ कर्तव्यं वैष्णवं श्राद्धं प्रेतमुक्त्यर्थमात्मनि॥
प्रेतमोक्षं ततः कुर्याद्धरिं विष्णुं प्रकल्प्य च॥ ॐ विष्णुरिति संस्मृत्य प्रेतं
तं मृत्युमेव च॥ अग्निदाहं ततः कुर्यात्सूतकं च दिनत्रयं॥ इत्थं प्रतिकृ
तिकरणानंतरं पात्रप्रतिपत्तिविषये कात्यायनः॥ केशश्मश्रुलोमनख
निकृंतनानि कृत्वा विपुरीषं चेक्कृत्य केशादीन्निखायसर्पिषांतरं स्का
चिताविनमादधाति॥ कृष्णाजिनमास्तीर्य प्राक्शिरसं सप्तसु प्राण
यतनेषु सप्त हिरण्यशकलान्न्यास्य तिसृषु वे प्रथमं दक्षिणहस्ते जुहू
ꣳसादयति घृतपूर्णाꣳ स्फ्यं चोपभृत ꣳ सव्य उरसि ध्रुवां मुखे ग्निहोत्र
हवणीं नासिकयोः स्रुवौ कर्णयोः प्राशित्रहरणे शिरसि चमसप्रणीता
प्रणायनं कपालादि च केपार्श्वयोः शूर्पं उदरे पात्रीꣳ समवत्तधानीं पृ
षदाज्यवतीꣳ शिश्ने शम्यामरणी वृषणयोरंतरा रूपं यज्ञपात्राण्य न्या
न्यप्सु वहरणं मृन्मयाश्ममयानामयस्मया निब्राह्मणाय दद्यादि
ति॥ केशश्मश्रुनखलोमकृंतनादिकं शवस्य॥ प्रतिकृतौ तु लोपः॥ सप्त प्रा
णायतनानि मुखनासाक्षिकर्णरंध्राणि॥ श्रौतपात्रप्रतिपत्तिस्तु एवमे
वाहिताग्नेस्तु पात्रन्यासादिकं भवेदिति कातीयोक्तेः॥ स्मार्तपात्रप्र
तिपत्त्यनंतरं कर्तव्या स्मार्तानां प्रतिपत्तिस्त्वेवं॥ दक्षिणशिरसं च श

वंचितौनिधायमुखेहिरण्यंशिरसिचमसंपार्श्वयोःशूर्पे।अंडयोररणी
उद्गग्रे।प्रोक्षणीपात्रादीनामंतरेणोरूप्रक्षेपः॥चक्षोर्वल्लीकयोश्च॥
मृन्मयादीनामंभसि॥ततःशिरःप्रदेशेऽग्निंदत्वास्रुवेणास्मात्त्वमि
त्याहुतिंहुत्वादक्षिणनासिकायांस्रुवंप्रक्षिपेत्॥स्फ्यंचदक्षिणेह
स्तेशेषमाहिताग्निवदिति॥मृताहाज्ञानेदीपिकायां॥अन्वयस्यनिधनं
चान्यत्रचेज्ज्ञायतेऊर्ध्वंपंचदशाब्दतःप्रतिकृतिंसंस्कृत्यतस्यान
रेद्यत्तत्कर्मसएवदाहदिवसःस्यादाब्दिकेकर्मणीति॥मृताहाज्ञाने
तुपैठीनसिः॥अनग्निमतउक्तांतेदाशौचादिद्विजादिषु॥दाहादग्नि
मतोविद्याद्विदेशस्थेमृतेसति॥वृहस्पतिः॥अनज्ञायेन्मृताहश्चे
त्प्रमीतेप्रोषितेसति॥मासश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यान्मृताहनि॥
यत्कर्तव्यंतदितिशेषः॥अत्रैवविषये॥श्राद्धविघ्नेसमुत्पन्नेअवि
ज्ञातेमृतेहनि॥एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतइतिमरीचि
वचनाद्दर्शोवाएकादशीचेतिविकल्पः॥पक्षाज्ञानेकृष्णैकादशी
ज्ञानेतुतत्रतैकादश्येवेतिविशेषः॥मृताहज्ञानेमासाज्ञानेतुभवि
ष्यपुराणे॥दिनमेवविजानातिमासंनैवतुयोनरः॥मार्गशीर्षेथवाभा
द्रेमाघेवाथसमाचरेत्॥उभयाज्ञानेतुबृहस्पतिः॥दिनमासौनविज्ञा
तौ मरणस्ययदापुनः॥प्रस्थानदिनमासौतुग्राह्यौपूर्वोक्तयादिशे
ति॥तदज्ञानेपिभविष्योत्तरे॥मृतवार्त्ताश्रुतेर्ग्राह्यौतौपूर्वोक्तक्रमेण
त्विति॥पूर्वोक्तसर्वाज्ञानेप्रभासखंडे॥मृताहंयोनजानातिमासंवा
पिकथंचन॥तेनकार्यममावास्याश्राद्धंमाघेथमार्गके इति॥अथध
निष्ठादिपंचकमृतेशांतिः॥आशौचांतेधनिष्ठार्धमेतन्नक्षत्रपंचकं
॥रेवत्यंतेसदादूष्यमशुभंसर्वदाभवेत्॥दाहस्तत्रनकर्तव्योविप्रा
दिसर्वजातिषु॥दीयतेनजलंतत्रअशुभंजायतेभृशं॥ज्योतिर्निबं
धेऽपि॥कुर्यान्नदारुतृणसंग्रहमंतकाशायानंमृतस्यदहनंगृहगो
पनंच॥शय्यावितानमिहवासवपंचकेपितद्वद्वदंतिपरतोवसुदेव
ताद्वीदिति॥अंतकाशायानेदक्षिणदिग्गमनं॥वसुदैवतंधनिष्ठा
॥अथवाऋक्षमध्येतुदाहश्चविधिपूर्वकः॥शवस्यचसमीपेतुक्षि
प्यंतेपुत्तलास्ततः॥दर्भमयाश्चचत्वारऋक्षमंत्राभिमंत्रिताः॥

ततोदाहः अर्धकर्त्तव्यस्तस्य पुत्तलकैः सह॥ दर्भाणांप्रतिमाःकार्याःपंचा
शत्सूत्रवेष्टिताः॥ यवपिष्टेनानुलिप्तास्ताभिःसहशवंदहेत्॥ प्रेतवा
हः प्रेतसखः प्रेतपः प्रेतभूमिपः॥ प्रेतहर्त्तापंचमस्तुनामान्येतान्य
नुक्रमात्॥ तत्रादौऋक्समंत्रैःपुत्तलानामभिमंत्रणम्॥ ततोमृतस्य
मुखेपंचरत्नप्रक्षेपः॥ ततःपुत्तलमुखेषुत्वहन्नपांजातवेदइतिमंत्रे
णाज्याहुतित्रयं॥ ततःपुत्तलैःसहदाहइति। नक्षत्रमंत्रास्तु॥ ज्मया
अत्रवसवोरंतिदेवाः१॥ तत्वायामिब्रह्मणा २ उतनोहिर्बुध्न्यः ३ कद्रु
द्राय ४। पूषागाअन्वेतु ५। सूतकांतेतदापुत्रःकुर्याच्छांतिकमुत्तमं
पंचकेषुमृतायोसौलभतेनगतिंनरः॥ तिलान्गाश्चहिरण्यंचत
स्योद्दिश्यमृतंदहेत्॥ भोजनोपानहौछत्रंहेममुद्रेचवाससी। दक्षि
णादीयतेविप्रेसर्वपातकमोचनी॥ बालवृद्धस्यमूनस्यपंचकेषुमृ
तस्यहि। विधानंयोनकुर्वीतविघ्नस्तस्यप्रजायतइति॥ अथरज
स्वलापतिमरणेआग्रहेणसहगमनार्थंशुद्धिंनयतीसैततदावि
शेषोत्येष्टिपद्धतौ॥ यदास्त्रियामुदक्यायांपतिःप्राणान्परित्यजे
त्॥ द्रोणमेकंतंडुलानामवहन्याद्विशुद्धये॥ मुसलाघातैस्तदस्रकु
स्रवतेयोनिमंडलात्॥ विरजस्कांमन्यमानास्वचित्तेनतदस्रकुसपं
॥ दृष्ट्वाशौचंप्रकुर्वीतपंचमृत्तिकयापृथक्॥ त्रिंशद्विंशतिदशाचगवां
दद्यात्त्वहःक्रमात्॥ विप्राणांवचनाद्बुद्ध्वासमारोहेद्धुताशनं॥
नारीणांसरजस्काणामियंशुद्धिरुदाहृतेति। तन्मूलंमृग्यंगारुडे।
गर्भेनष्टेक्रियानास्तिदुग्धंदेयंशिशौमृते॥ परंचपायसंक्षीरंदद्याद्बा
लविपत्तितः॥ एकादशाद्द्वादशाहवृषोत्सर्गविधिंविना॥ महादान
विधानंचकुमारेकृत्यमाचरेत्॥ भूमिनिक्षेपणंबालेआवर्षेद्व्य
माशिखं॥ ततःपरंत्वगग्नेषट्दाहंकुर्याद्यथाविधि॥ शिशुरादंतजन
नाद्बालःस्याद्यावदाशिखः॥ कथ्यतेसर्वशास्त्रेषुकुमारोमौंजिबंध
नात्॥ चूडाकर्मणिसंजातेविपत्तिस्तुयदाभवेत्॥ सूतकांतेप्रकर्त्तव्यं
वृषस्योत्सर्जनंबुधैः॥ तत्रदाहःप्रकर्त्तव्यउदकंतत्रनिश्चयः॥ आमौंजी
बंधनाद्विप्रःपंचमादिषुचेन्मृतः॥ केचिदुत्सर्गमिच्छंतिकेचित्पिंडक्रि
यांध्रुवं॥ पंचवर्षाधिकेबालेविपत्ति [illegible] यते॥ वृषोत्सर्गादिकंकर्म

कर्त्तव्यमुदकं ततः। अहन्यहनि संप्राप्ते कुर्याच्छ्राद्धानि षोडश॥ पाय
सेन गुडेनैव पिंडं दद्याद्यथाक्रमं। अनार्वागेव दद्यात्तु ततः पितृगणस्य
च॥ स्वाहाकारेण वै कुर्यादेकोद्दिष्टानि षोडश॥ ऋजुदर्भैस्तिलैः शुद्धैः
प्राचीनावीतिना निश्चितम्। अपसव्यं च कर्त्तव्यं कृते याति परां गतिं॥ सु
खं दुःखं सदा वेत्ति देही सर्वगतस्त्विह। परित्यज्य तदात्मानं जीर्णां
त्वचमिवोरगः। अंगुष्ठमात्रपुरुषो वायुभूतः क्षुधार्दितः॥ तस्माद्देया
निदानानि मृते तस्मिंस्तु निश्चितं॥ एतानि तु गारुडानि वचांसि शिष्टै
र्नाद्रियंते॥ अथ सहगमनविधिः। व्यासः॥ यदि प्रविष्टो नरकं बद्धः पा
शैः सुदारुणैः॥ संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः। तिष्ठते वि
वशो दीनो वेष्ट्यमानः स्वकर्मभिः॥ व्यालग्राही यथा व्यालं बिलादुद्ध
रते बलात्॥ तद्वदुद्धृत्य सा नारी तेनैव सह मोदते॥ हारीतः। ब्रह्मघ्नो
वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः॥ पुनात्यविधवा नारी तमादाय
म्रियते तयेति॥ स एव॥ तिस्रः कोट्योर्द्धकोटी च यावंत्यंगरुहाणि वै॥
तावंत्यब्दसहस्राणि स्वर्गलोके महीयते॥ मातृकं पैतृकं चापि यत्र
चैव प्रदीयते॥ कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छति॥ अधिकार
स्तु साध्वीनामदुष्टानां च भारत॥ अद्यप्रभृति या साध्वी पत्युः प्रियप
रायणा॥ ऊर्ध्वं गच्छति सा तत्र भर्त्रानुमरणं गतेति॥ तथा॥ अवमन्य
च या पूर्वं पतिं दुष्टेन चेतसा॥ वर्त्तंते याश्च सततं भर्तॄणां प्रतिकूल
तः॥ भर्त्रानुमरणं काले याः कुर्वंति यथाविधि॥ कामात्क्रोधाद्भयान्मो
हात्सर्वाः पूता भवंति ता इति॥ इदं तु वचो भारतद्वित्रिपुस्तकेषु न दृश्य
ते॥ कासांचिदनधिकारोपि बृहन्नारदीये वाहुप्रियां प्रसोर्वः॥ बाला
पत्याश्च गर्भिण्यो ह्यदृष्टरजसस्तथा। नारोहंति चितां प्राज्ञे सत्यमेत
द्ब्रवीमि त इति॥ ब्राह्मण्याः सहगमनेऽनधिकारः॥ मृतानुगमनं नास्ति
ब्राह्मण्या ब्रह्मशासनादिति निषेधात्कल्पतरौ॥ पृथक्चितिं समा
रुह्य न विप्रा गंतुमर्हतीति वचनेन तन्निषेधो भिन्नचितिपर इति विज्ञा
नेश्वरादयो युक्तमुत्पश्यंति॥ सार्वजात आचारोप्यमुमेव पक्षमनुग
ह्णाति॥ कथं तर्हि देशांतरं दाहे चिति भेदादस्थिभिः पलाशादिप्रतिकृ
त्या वा सहगमनं शृणु॥ चितिशब्दस्य यूपादिशब्दवत् दृष्टादृष्टकू

वाचित्वात्॥ अन्यदेशकाष्ठवह्नावपि संस्काराभावेन विनिवेशाभावः। दे
शांतरेऽस्थ्यादिनाशे तु विप्रस्याऽन्वारोहणं न भवत्येव॥ क्षत्रियादीनां
तु निषेधाभावाद्भवति॥ अथ सहगमनप्रयोगः॥ प्रासादि संकीर्त्य आत्मनो
भर्तुश्चानेकजन्मोपात्तसर्वपापक्षयपूर्वकं स्वरोमसमिताब्दसहस्राव
धि भर्त्रा सार्धं स्वर्गवास मातृपितृभर्तृकुलोद्धारकामा भर्त्रनुग
मनं करिष्य इति संकल्प्य। दैवैः संपादितो मह्यं पतिस्त्वं सर्वदैवते॥ त्वया
सह गमिष्यामि भर्त्रा त्वं चान्यजन्मनीत्युक्त्वा स्नात्वा कुसुमकुंकुमा
दिना स्वशरीरमलंकृत्य पुत्रादिभ्यो बंधुभ्यश्चाशिषो दत्वा चितिस्थो भग
वानग्निर्विष्णुरूपी सनातनः। पतिलोकसमावाप्त्यै गृहाणार्घ्यं नमोस्तु
त इति विष्णुरूपिणोऽग्नयेऽर्घं दत्वा। एष वार्घो मया दत्तः सूर्य साक्षी त्व
दग्रतः॥ प्रसादं कुरु मे देव गृहाणार्घ्यं नमोस्तु ते इति सूर्याय च दत्वा त्वं
ब्रह्मा त्वं च वै रुद्रस्त्वं रविस्त्वं प्रजापतिः। त्वमिंद्रो वसवश्चाष्टौ परमात्मा
त्वमेव हि॥ त्वमेव शरणं विष्णो शरणं त्वं पतिर्मम॥ स्वर्गे वा नरके वापि
यत्र यत्र गमिष्यसि॥ तत्र तत्र ह्यहं पृष्ठे गमिष्यामि तवाच्युत॥ ब्रह्महत्या
दिभिः पापैस्त्वां मोक्ष्यामि यमालयात्॥ अहं ब्रह्मा ह्यहं विष्णुरहं सूर्य
श्च दिक्पतिः॥ आदित्यचंद्रावनलोनिलश्च द्यौर्भूमिरापोथ अहर्नि
शा च॥ एते च सर्वे मम साहसेन तुष्यंतु ते देववराश्च सर्वे। इति पठित्वा
हरिद्राकुंकुमांजनकंचुक्यादियुतानि पंच शूर्पाणि सुवासिनीभ्यो द
द्यात्। लक्ष्मीनारायणो देवो बलसत्वगुणाश्रयः। गाढं सत्वं च मे देयाद्वा
यनैः परितोषितः॥ सोपस्कराणि शूर्पाणि वायनैः संयुतानि च॥ लक्ष्मी
नारायणप्रीत्यै सत्वकामा ददाम्यहमिति॥ ततो दाहार्थाग्नेः समीपे ग
त्वा पंच रत्नानि नीलांजनं च स्ववस्त्रपल्लवे बध्वा मुक्ताफलं स्वमुखे क्षि
प्त्वा स्वात्मसंश्लेषनिर्विण्ण सर्वगोऽद्य हुताशन॥ सत्वमार्गप्रदानेन न
य मां पत्युरंतिकमित्यग्निं संप्रार्थ्य तत्रैवाज्येन दशाहुतीर्जुहुयात्॥
अग्नये तेजोधिपतये स्वाहा १ कालाय धर्माधिपतये स्वाहा॥ २॥ पृथि
व्यै लोकाधिष्ठात्र्यै स्वाहा॥ ३॥ अद्भ्यो रसाधिष्ठात्रीभ्यः ४ वायवे बला
धिपतये ५ आकाशाय सर्वाधिपतये ६ कालाय धर्माधिष्ठात्रे ७ अद्भ्यः
सर्वसाक्षिभ्यः ८ ब्रह्मणे वेदाधि[illegible]९ रुद्राय श्मशानाधिपतये १०

इतिततःशिलांसंपूज्यतामारुह्यफलपुष्पांजलिंगृहीत्वाग्निंप्रद
क्षिणीकृत्यप्रार्थयेत्॥त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्।त्व
मेवदेवजानीषेनविदुर्यानिमानवाः॥अनुगच्छामिभर्तारंवैधव्यभ
यपीडिता॥सत्यमार्गप्रदानेननयमांभर्तुरंतिकं॥इदंशरीरंसकलंम
दीयंदग्ध्वाकृशानोकुरुदिव्यमाशु॥तथाचभर्तुःकुरुदिव्यदेहंभर्तुः
समीपंभगवन्व्रजामि॥किंमयानकृतंसाधुभवेद्यदिचेतनय॥इदंश
रीरमालिंग्यप्रविशामिहुताशनमिति॥ततस्तृणकुटींप्रविश्यश्रौतस्मा
र्तेलौकिकंवाग्निमादायस्वयमेवकुटींप्रज्वालयेत्॥तस्याःप्राणोत्क्र
मणोत्तरंपुत्रादिरधिकारीद्वयोरपिदाहंकुर्यादितिसहगमनविधिःप्रयो
गश्च॥अथाशौचसंनिपातादौनिर्णयः।तत्रकेचित्॥ज्ञातयोर्जन्ममृ
त्योर्जन्ममृतिज्ञानस्यवाशौचप्रयोजकतानस्वरूपतस्तयोर्निर्देश
ज्ञातिमरणंश्रुत्वापुत्रस्यजन्मचेतिलिंगदर्शनात्॥विगतंतुविदेश
स्थंशृणुयाद्योह्यनिर्दशं॥यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवे
दितिमानवानुपपत्तेश्च॥स्वरूपतोमरणमात्रस्यैवाशौचप्रयोजक
त्वेहितत्रवाशौचप्रवृत्तेर्विनाप्येतद्वचनंदशाहशेषेणैवशुद्धिःस्या
दित्यनर्थकमेतद्वचःस्यात्॥मरणज्ञानस्याज्ञानमरणस्यवानिमि
त्तत्वेतुज्ञानप्रभृत्यैवाशौचप्राप्तौतदपवादापरतार्थकमेतद्वचइति
निर्हारितत्वाच्चमिताक्षरादौ॥अहंतुब्रुवे॥आशौचंहिसपिंडजन्मा
दिकरणकोऽशुद्ध्याबाधवाइत्यादिवचःप्रतिपादितोऽशुद्ध्याख्यःस
पिंडगतःशक्तिरूपःपदार्थः।सचजननाद्यनन्तरमेवसपिंडेषूत्पद्य
तेनज्ञानमपेक्षते॥दशाहंशावमाशौचंसपिंडेषुविधीयते॥जननेप्ये
वमेवस्यान्निपुणांशुद्धिमिच्छतां॥इत्यनेनहिशावसंबंधित्वेनमृ
तेर्जन्मनश्चनिमित्तत्वमुक्तंतदनंतरमेवाशौचोत्पत्तिरविहतास
मर्थ्यंतरानपेक्षणात्वात्प्रतिबंधकाभावाच्च॥यातुज्ञानस्यनिमि
त्तोक्तिः॥साप्रवर्त्तकनिवर्त्तकविधिनिषेधबोध्याशौचनिमित्तकक
शय्यापंचयज्ञादिप्रवृत्तिनिवृत्तिपरा॥मरणंश्रुत्वापुत्रस्यजन्मचेत
दिस्नानादिपुरुषव्यापारसमानकर्तृकतायाःत्वाश्रुतेः॥अतोम
णादिज्ञानंविनाप्रवृत्तिनिषेधश्चैतत्कटशय्यासंध्यावंदनादिप्र

ति[illegible]वृत्त्यानि[illegible]नन्तर्भा[illegible]आप्तमेवज्ञानमनूद्यते॥नत्वाशौचनिमित्तत
यावापूर्वंज्ञाप्यते॥अतोस्तुविधिनिषेधप्रवृत्तिर्ज्ञानात्॥अशौचंतुज
न्ममरणयोरेवनिःप्रतिपंथिप्रवर्त्तते॥ज्ञानस्यतत्प्रवृत्तिसामग्रीत्वेमाना
भावात्॥अतोऽज्ञातेपिपूर्वंजातेजननमरणादौ आशौचस्यप्रवृत्त
त्वात् एतज्ज्ञानात्प्राक् ज्ञातमप्येतदुत्तरभाविजननंमरणंवानस्व
तंत्रस्याशौचावधिप्रयोजकं किंतुपूर्वप्रवृत्तजननमरणप्रयुक्तावधि
कमेवाशौचमात्रंप्रयुंक्त इति॥अंतराजन्ममरणेशेषाहोभिर्विशुध्य
तीतियाज्ञवल्क्योक्तेः।अल्पकालपूर्वाशौचेबहुकालीनोत्तराशौ
चपातेतूत्तरशेषेणैवशुद्धिः।अघवृद्धिमदाशौचंपश्चिमेनसमापये
दितियमोक्तेः॥अघवृद्धिमद्दीर्घकालीनं।बहुकालीनेनापिजन्माशौ
चशेषेणाल्पकालीनमपिमृताशौचंनापगच्छति॥सूतकेमृतकंचे
त्स्यान्मृतकेप्यथसूतकं॥तत्राधिकृत्यमृतकंशौचंकुर्यान्नसूतक
मित्यंगिरउक्तेः॥शावेनशुध्यतेसूतिर्नसूतिःशावशोधिनीतिषट्त्रिं
शन्मताच्च॥मातर्यग्रेप्रमीतायामशुद्धौम्रियतेपिता॥पितुःशेषेणशु
द्धिःस्यान्मातुःकुर्यात्तुपक्षिणीमिति मृताशौचांतरेमातृमृतौतुपक्षि
णीतुर्यपादार्थः।अशौचांत्यरात्रौतद्व्याप्यंतयामेवाशौचांतरपातेवि
शेषमाहशातातपः॥रात्रिशेषेद्व्यहाच्छुद्धिर्यामशेषेशुचिस्त्र्यहा
दिति।यत्तुकेचित्॥त्रिरात्रमात्रतादेशाहशावमाशौचंइत्याद
वाशौचमघवृद्धकेरात्र्यहःशब्दयोरहोरात्रेपरिभाषणात्॥आशौ
चांत्यदिनेप्याशौचांतरपातेद्व्यहवृद्धिमाहुः॥तन्न।रात्रिशेषइत्य
त्रलक्षणायांमानाभावात्॥परिभाषणंतुत्रिरात्रदशाहादिपरं॥अ
न्यथादशाहविधिनारात्र्यावाशौचाभावेनपंचयज्ञाद्यनुष्ठानापत्त्या
संध्यांपंचमहायज्ञान्नैत्यकंस्मृतिकर्मचेत्यादिसंध्यादिपर्युदास
वचसोबाधप्रसंगात्।दशाहंशावमाशौचमित्यादिसमानार्थकानां
दशरात्रमतःपरमित्यादीनां [illegible]पादर्शनाच्च॥तेनपरिभाषणम
पिन्यायमूलकं॥रात्रिशेषेद्व्यहादित्यादौतुन्यायाभावान्निर्मूलमे
वस्यात्।अत्रसर्वत्रापिपूर्वप्रवृत्ताशौचशेषएवोत्तराशौचमुद्धा
पादकोनतुज्ञातस्तज्ज्ञानंवापूर्व[illegible]गात्र[illegible]

द्भिन्नसपिंडानां॥सूतिकामग्निदं हित्वा शूद्रेशेषेष्वशुद्धिर्नास्पृश्य
ते॥अथदेशांतरआशौचं॥याज्ञवल्क्यः॥प्रोषितेकालशेषःस्या
दिति॥आशौचमध्येप्रोषितमरणश्रवणेशौचकालशेषेणशुद्धि
रित्यर्थः॥आशौचादूर्ध्वंतुमाधवीयेविष्णुः॥अर्वाक्त्रिपक्षात्त्रिनिशं
षण्मासाच्चदिवानिशं॥अहस्तुनवमादर्वाग्देशांतरमृतेष्वपीति
॥मासत्रयेत्रिरात्रंस्यात्षण्मासात्पक्षिणीभवेत्॥अहस्तुनवमा
दर्वागूर्ध्वंस्नानेनशुध्यति॥वसिष्ठंत्वेकदेशपरमितिविज्ञानेश्वरः॥
प्रसवेदेशांतरेमनुः॥निर्दशंज्ञातिमरणंश्रुत्वापुत्रस्यजन्मच॥सवा
साजलमाप्लुत्यशुद्धोभवतिमानवइति॥निर्दशमतिक्रांतदशा
हादिकालंपितुःस्नानमात्रविधानात्सपिंडानांसुतरांजन्माशौचं
नास्तीतिग्रंथकृतः॥अतएवदेवलः॥नाशुद्धिःप्रसवाशौचेव्यतीते
षुदिनेष्विति॥मातापितृविषयेपैठीनसिः॥पितरौचेन्मृतौस्यातांदू
रस्थोपिहिपुत्रकः॥श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेत्॥दशा
हमितिस्वाशौचोपलक्षणं॥स्मृत्यंतरे॥महागुरुनिपातेतुआर्द्रव
स्त्रोपवासिना॥अतीतेब्देपिकर्तव्यंप्रेतकर्मयथाविधीति॥दंपत्योः
सवर्णोत्तमवर्णसपत्न्योश्चपरस्परदेशांतरेकालांतरेचदशाहादि
स्वजात्याशौचमेवेतिस्मृत्यर्थसारे॥सपत्नमातृविषयेदक्षः॥पितृ
पत्न्यामपेतायांमातृवर्जंद्विजोत्तमाः॥संवत्सरेव्यतीतेतुत्रिरात्रम
शुचिर्भवेदिति॥देशांतरगतादिमृतावाशौचाभावेपिस्नानमात्रम
स्त्येव॥देशांतरमृतंश्रुत्वाक्लीबेवैखानसेयतौ॥मृतेस्नानेनशुध्यं
तिगर्भस्रावेतुगोत्रिणइतिस्मरणात्॥देशांतरंच॥महानद्यंतरंय
त्रगिरिर्वाव्यवधायकः॥वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते॥दे
शांतरंवदंत्येकेषष्टियोजनमायतं॥चत्वारिंशद्वदंत्यन्येत्रिंशदन्ये
तथैवचेतिस्मृतावनेकधोक्तं॥अत्रवाग्विभेदःसर्वपक्षेषुसमुच्चीय
ते॥एतच्चातिक्रांताशौचमुपनीतमरणएव॥तदपिवयोवस्थाशौ
चवत्सर्ववर्णसाधारणं॥तथाचव्याघ्रपादः॥तुल्यंवयसिसर्वे
षामतिक्रांतेतथैवच॥उपनीतेतुविषमंतस्मिन्नेवातिकालजं॥अ
नादिज्ञानं[illegible]॥[illegible]वयसियदाशौचमादंतजननात्

द्य [illegible] णादीनांतुल्यं।यच्चदशाहादिकेअतिक्रांते
तदपितुल्यं॥उपनीतोपरमेदशाहादशेत्यादिरूपविषमाशौचंतस्मि
न्नेवोपनीतमरणएवातिकालज मतिक्रांताशौचंभवतिनपुनर्याव
स्याशौचातिक्रमइति॥अथसोदकाशौचं॥मनुः।दशाहंशावमाशौ
चंसपिंडेषुविधीयते॥जननेप्येवमेवस्यान्निपुणांशुद्धिमिच्छतां॥
जन्मन्येकोदकानांतुत्रिरात्राच्छुद्धिरिष्यते॥एकोदकाःसोदकाः॥
सोदकानाहमनुः॥सपिंडतातुपुरुषेसप्तमेविनिवर्त्तते॥समानोदक
भावस्तुजन्मनाम्नोरवेदने॥अत्रापिविनिवर्त्ततइत्यनुषंजनीयं॥
गोत्रजेप्येकरात्रस्यापिमनुनोक्त त्वात्सप्तमादूर्ध्वंचतुर्दशपुरु
षपर्यंतंसोदकास्ततऊर्ध्वंगोत्रजाइत्युक्तं॥तथोपाध्यायादिमृता
शौचं॥याज्ञवल्क्यः।गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषुच॥गुरु
रुपाध्यायः॥अंतेवासीशिष्यः।एकाचार्योपनीतेसमानग्रामवासि
निश्रोत्रियेचाश्वलायनः॥एकाहंसब्रह्मचारिणिसमानग्रामीणेच
श्रोत्रियइति॥आचार्योपरमेमनुः।त्रिरात्रमाहुराशौचमाचार्येसंस्थि
तेसति॥तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः॥बृहस्पतिःत्र्य
हंमातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्॥तथा॥पित्रोरुपरमेस्त्री
णामूढानांतुकथंभवेत्॥त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवान्य
मः॥श्वशुरयोर्भगिन्यांचमातुलान्यांचमातुले॥पित्रोःस्वसरितद्व
चपक्षिणीक्षपयेन्निशां॥तथा॥मातुलेश्वशुरेमित्रेगुरौगुर्वंगनासु
च॥आशौचंपक्षिणींरात्रिंमृतामातामहीयदि॥चकाराद्बांधवेष्विति
ग्रंथकृतः॥तेपिआत्मनःपितृष्वसुर्मातृष्वसुर्मातुलस्यचपुत्राआ
त्मबांधवाः॥पितुःपितृष्वसुर्मातुलस्यचपुत्राःपितृबांधवाः॥मा
तुःपितृष्वसुर्मातृष्वसुर्मातुलस्यचपुत्रामातृबांधवाइति त्रिविधाः
॥विदेशस्थभगिन्यादिषुवृद्धवसिष्ठः॥भगिन्यांसंस्कृतायांचभ्रात
र्यपिचसंस्कृते॥मित्रेजामातरिप्रेतेदौहित्रे भगिनीसुते॥शालके
तत्सुतेचैवसद्यःस्नानेनशुद्ध्यति॥अत्रभ्रातृपेक्षयाभगिन्यास्तद
पेक्षयैवभ्रातुःसद्यःस्नानेनशुद्धिः।तथाशिष्यतपस्विश्रोत्रियकु
तियामेष्वराणांसन्निहितानांत्रि [illegible] सत्र [illegible]

त्सूर्यदर्शनात्॥ यावद्ग्राममध्येशवस्ति॥ [illegible]
हृतेशुद्धिरेव॥ नगरेस्वस्ववीथ्यामाशौचंज्ञेयं॥ अथैकविषयेउच्चा
वचाआशौचकल्पागुणवदगुणवत्वादिनाव्यवस्थाप्याः॥ तेचवृत्त
स्वाध्यायसापेक्षमघसंकोचनंतथेत्यादिनाकलौप्रतिषिद्धाः॥ कलि
वर्ज्यविचारश्चसमयमयूखेद्रष्टव्यः॥ आशौचेसकलकर्माधिकार
निवृत्तौकेचनधर्माःप्रतिप्रसूयंते॥ तत्रवैयाघ्रपादः॥ स्मार्त्तकर्मपरि
त्यागोराहोरन्यत्रसूतके॥ श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुया
त्॥ श्रौतइत्यग्निचयसाध्यावश्यकानांनित्यनैमित्तिकानां अग्निहोत्र
दर्शपूर्णमासादीनांपर्युदासः॥ नित्यानिनिवर्त्तेरन्वैतानवर्जंशाला
ग्नौचैकइतिपैठीनसिवचनाद्गृह्याग्निसाध्यानां अथावश्यकानांवैक
ल्पिकःपर्युदासः॥ जातूकर्ण्योपि॥ सूतकेतुसमुत्पन्नेस्मार्त्तंकर्मक
थंभवेत्॥ पिंडयज्ञंचरुंहोमंसगोत्रेणकारयेत्॥ चरुःपार्वणस्था
लीपाकः॥ श्रवणाकर्माग्रयण्यादिकर्म॥ होमोनित्यः॥ स्मार्त्तद्रव्य
त्यागमात्रंस्वयंकार्यं। अन्यत्सगोत्रंकारयेत्॥ श्रौतेप्येवमितिमि
ताक्षरायां॥ सर्वंकर्मस्वयंकार्यमितितुवहवः॥ तत्रापिश्रौतस्मार्त्तहो
मःशुष्कान्नफलादिनैवकर्त्तव्योदुग्धादिनात्वसगोत्रेणैवकारयित
व्यइतिकेचित्॥ अतएव॥ सूतकेचप्रवासेचअशक्तौश्राद्धभोजने
॥ एवमादिनिमित्तेषुहावयेन्नतुहापयेदित्युक्तं॥ यत्तु॥ दानंप्रतिग्र
होहोमःस्वाध्यायश्चनिवर्त्ततइतितत्काम्यहोमपरं॥ वैश्वदेवपरं
तथाशिवविष्णवर्चनंदीक्षायस्यत्वग्निपरिग्रहः॥ सतत्कर्माणिकु
र्वीतस्नातःशुद्धिमवाप्नुयात्॥ जाबालिः॥ अद्यौंतामानसीसंध्या
प्राणायामविवर्जितेति॥ अंजलिप्रक्षेपस्तुसावित्रीमुच्चार्यकार्य
इतिपैठीनसिनोक्तं॥ तथा॥ सूतकेमृतकेउभयत्रकुलस्यान्नंदश
हानिनभुज्यतेइतियमोक्तेरसपिंडैराशौच्यन्नंनभोक्तव्यं॥ यद्य
नापदितदीयमन्नंभक्षयतितदातावदाशौचभाक्यावत्तेषामि
ति॥ आपदितुयावदन्नंसमश्नातितावदह्नाअशुचिःस्यात्ततःप्रा
यश्चित्तंचरेदिति॥ अशौच्यन्नभोजनदोषश्चदातृभोक्त्रोरन्यतरस्या
[illegible]ज्ञाने[illegible]॥ उभाभ्यामपरिज्ञानेसूतकेनैवदो

षट्. [illegible] भोक्तुर्दोषमुपावहेत्॥ तथा॥ विवाहो-
त्सवयज्ञेषु अंतरामृतसूतके॥ परैरन्नं प्रदातव्यं दातॄन्भोक्तॄंश्च न
स्पृशेदिति। तथा। विवाहादिष्वेव पूर्वसंकल्पिते पि न दोषः। तथा भु-
जानेषु तु विप्रेषु अंतरामृतसूतके॥ अन्यगेहोदकाचांताः शुद्ध्यंति।
मरीचिः। लवणे मधुमांसे च पुष्पमूलफलेषु च॥ शाककाष्ठतृणेष्वप्
सु दधिसर्पिःपयस्सु च॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः। प
ण्येषु चैव सर्वेषु नाशौचं मृतसूतके इति॥ पक्वं भक्ष्यं अपक्वं तंडुलादि
स्वयं ग्रहः। स्वयमेव स्वाम्यनुज्ञानउपाददद्यादित्यर्थः। पक्वापक्वपर्यु-
दासोऽन्नसत्रप्रवृत्तादेव नान्यस्मात्॥ तथांगिराः॥ अन्नसत्रप्रवृ-
त्तानामामामन्नमगर्हितं। भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत्
॥अत्र पक्वशब्द ओदनपरः॥ तथा॥ व्रतयज्ञविवाहेषु श्राद्धे होमार्चने
जपे॥ प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं॥ सूतकमिति मृतकस्या-
प्युपलक्षणम्॥ प्रारंभश्च॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥
नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति॥ स्मृत्यंतरेपि॥ एकवि-
शत्यहर्यज्ञे विवाहे दशवासराः॥ अहानि त्रीण्युपनये श्राद्धे पाकप-
रिक्रियेति॥ आशौचसंभावनायां॥ एकविंशत्यादिदिनमध्ये प्रधा-
नेनानेकदिनव्यवहितमपि नांदीश्राद्धं कार्यमिति प्रयोगरत्ने पिताम-
हचरणाः॥ प्रचेताः॥ कारवः शिल्पिनो वैद्या दासीदासास्तथैव च॥ राजानो
राजभृत्याश्च सद्यःशौचाः प्रकीर्तिता इति॥ सद्यःशौचं शिल्पिवैद्या-
नन्यसाध्यकर्मण्येव॥ न तु पंचयज्ञादाविति मिताक्षरायां॥ तथा॥
सूतकादौ नित्यस्नानशौचाचमनबलिदानप्राणाहुतिप्रत्यक्कर-
णादयो भुजिनियमा अस्पृश्यस्पर्शनस्नानादिकं चेति सर्वं कर्तव्य-
मेवेति स्मृत्यर्थसारे॥ नित्यस्नानमंगतर्पणसहितमेव कार्यं। अ-
स्पृश्यस्पर्शने वांते अश्रुपाते क्षुरे भगे॥ स्नानं नैमित्तिकं कार्यं दैवपि-
त्र्यविवर्जितं॥ उद्धृतैरुदकैः स्नायान्न कुर्याद्धस्तपीडनमिति नैमि-
त्तिकस्नाने स्वतर्पणाद्यंगपर्युदासात्॥ पितृमरणोत्तरं प्रथमाब्दे
विशेषमाह देवलः। स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणं॥ प्र-
[illegible] न कुर्वीत महागुरुनिपा [illegible] समम्

॥ श्री ॥

अथश्राद्धमयूखःप्रारभ्यते

वाराणसीप्रसादस्य नियोगेनप्रयत्नतः॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः १

श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकपर
श्रीविश्वनाथजीकेपास
महाराजशिवलालदुबेजीकेमकानमे
काशीसंस्कृतमुद्रायंत्रमेछपी
जिनकोलेनाहोयउनकोइसकार्यकेसंपादक
श्रीयुत्बाबूवाराणसीप्रसादजीकेपास
याकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी
मिति कार्त्तिकशुक्ल १२ भौमवार
संवत १९३६
तारीख २५ माहे नवम्बर सन १८७९ ई०

अथश्राद्धमयूखः प्रारभ्यते

श्रीगणेशायनमः॥ योलीलयासंततुतेत्रविश्वंतत्पालयत्यात्मनि वि
श्वरूपे॥ लयंनयत्याशुचपूर्णरूपः शिवंतनोत्वाशुरविर्ममासौ॥१॥ज
ज्ञेपितामहतनोःखलुकश्यपोयस्तस्मादजायतमुनिस्तुविभांडका
ख्यः॥ तंपुत्रिणांधुरमरोपपदृष्यशृंगस्तस्यान्वयेप्यजनिशृंगिवरा
भिधानः॥२॥ तस्मिन्वंशेमहतिविततेसंगराख्येनृपाणांराजाकर्णः
समजनियथासागरेशीतरश्मिः॥ कीर्त्यायस्यप्रथिततरयाश्रोत्रजाते
भिपूर्वोकर्णस्यापिप्रविततकथानावकाशंलभंते॥३॥ विशोकाख्यदे
वस्ततस्तत्सुतोभूद्विशोकीकृतायेनसर्वाधरित्री॥ ततोव्यासराजा
स्ततश्चानुस्ततोभूदृपाख्योरुपेणैवसर्वाहितघ्नः॥४॥ बभूवाथवैरा
टराजस्ततोभून्नृपोमेदिनीवल्लभोवीढराजः॥ नरब्रह्मदेवस्ततो
मन्युदेवस्ततोभून्नृपश्चन्द्रपालाभिधानः॥५॥ शिवगणाख्यनृपः
समजन्यथोशिवगणाख्यपुरंप्रचकारयः॥ शिवगणेनसमःसक
लैर्गुणैः शिवशिवप्रथमोगणनासुयः॥६॥ रोह्लिचंद्रइतितत्तनयो
भूत्कर्मसेननृपतिस्तमथानु॥ लोकपोनरहरिर्नृपराजोरामचंद्रइ
तितत्तनुजातः॥७॥ यशोदेवस्ततोजातस्ताराचन्द्रनृपस्ततः॥च
क्रसेनस्ततोराजाराजसिंहनृपोयतः॥८॥ ततोप्यभूद्भूपतिसाहि
देवःस्वकीर्तिभिर्निर्जितदुग्धसिंधुः॥ अभूत्ततःश्रीभगवंतदेवःस
दैवभाग्योदयवान्क्षितीशः॥९॥ यद्दानद्रविणाद्रिनिर्जितवपूरत्ना
चलोलज्जयादूरेस्तब्धइलावृतेनिविशतेनोयत्रपुंसांगतिः॥ किं
चत्रस्यदरातिवामनयनानेत्रांबुभिर्वर्द्धितस्तेजोग्निर्वडवामुखोत्थ
हुतभुक्तुल्यःकथंनोभवेत्॥१०॥ आज्ञप्तस्तेनराज्ञाविबुधकुलमणि
दीक्षिणात्यावतंसोभट्टश्रीनीलकंठःस्मृतिषुदृढमतिर्जैमिनीयेद्विती
यः॥ आज्ञामादायमूर्ध्नासविनयममुनातस्यसर्वान्निबंधान्दृ
ष्ट्वाविविच्यप्रविततकिरणस्तन्यतेभास्करोयं॥११॥ तिथ्येर्मयू:

पाद्यसस्यगाराध्यधामाथगिरामगोचरं॥श्राद्धंवदत्यत्रसनीलकंठः
संप्रेरितःश्रीभगवंतवर्मणा॥१२॥प्रतारकैराहतमत्रकिंचिन्मयानुनि
र्मूलतयातदुज्झितं॥ऊनोक्तितातोनहितेनकाचित्स्वपुण्यहीनापत्ति
तिर्नहीयते॥१३॥मृतोद्देश्यकोविप्रस्वीकारांगकोद्रव्यत्यागःश्राद्धं॥
जीवच्छ्राद्धेदैवश्राद्धेतत्पदंगौणंकौंडपायिन्यग्निहोत्रपदवत्॥विप्रस्वी
कारवत्वोक्तस्यातर्पणनिवृत्तिः॥यत्तुकेचित्त्यागाभावाद्देवतर्पणनिवृत्ति
माहुः॥तन्नद्रव्यदेवतासंयोगेनेंद्रऊर्ध्वोध्वरमाघारमाघारयतीत्यादि
त्वयागकल्पनायाआवश्यकत्वात्॥नममेत्यभिलापःपरंनास्तिआ
चाराभावात्॥यत्रैवयागाग्निहोत्रादावभिलापाचारस्तत्रैवतादृशश्रु
त्यनुमानं॥नसर्वत्रत्यागस्तुमानसःसर्वत्राप्यविशिष्टः॥नचदेवताभा
वेनद्रव्यदेवतासंयोगाभावः॥देवतास्तर्पयतीत्याश्वलायनीत्याश्वा
श्वलायनादिसूत्रस्थदेवतापदेनतत्समर्पणात्॥अंगकत्वोक्त्याच
विप्रस्वीकृतेःश्राद्धस्वरूपघटकताव्यावर्त्यतेतेनतदभावेपिप्रधान
सिद्धिरविहता॥पिंडदानस्यचप्राधान्यसिद्धिःअन्यथातस्यविप्र
स्वीकरणांगत्वाभावेनप्राधान्यंनस्यात्॥एतेनविप्रस्वीकारांतोद्र
व्यत्यागःश्राद्धंपिंडदानाग्नौकरणयोश्चतस्यदृशकत्वमितिविरुद्धं
प्रलपंतःकेचिदपास्ताः॥अतएवापस्तंबसूत्रेपितरोदेवताब्राह्मण
स्त्वाहवनीयार्थेइतिविप्रस्वीकृतेस्त्यक्तद्रव्यप्रति — पत्तित्वमाह
वनीयाधिकरणकहोमवदुक्तंसंगच्छते॥यत्तुब्रह्मांडे॥देशेकालेच
पात्रेचश्रद्धयाविधिनाचयत्॥पितृनुद्दिश्यविप्रेभ्योदत्तंश्राद्धमुदाहृ
तमितिभोज्यान्नप्रतिपादनांशेनदानरूपतापितृन्यजेतेत्यादिस्मृत्यं
तरेचयागरूपताव्यवहृतासागौणीतिकेचित्॥यागव्यवस्थात्वेपिश्रा
द्धस्यनकाचित्क्षतिः॥गौण्यांमानाभावात्॥श्राद्धेचपित्रुद्देश्यकान्नत्या
गरूपत्वाद्विप्रभोजनपिंडदानयोरेवप्राधान्यंतादृशान्नत्यागस्यफलसं
बंधित्वेनतत्रतत्रवक्ष्यमाणत्वात्॥एवमेवकपर्दिधूर्तस्वामिप्रभृतयः॥
यत्तुतैरग्नौकरणमपिप्रधानमुक्तंतत्रमूलंमृग्यं॥यत्तुप्राच्याःकेचित्तं
क्रोत्यादिश्राद्धेषुपिंडनिषेधःपर्युदासोवाप्राप्तिमपेक्षतेसाचातिदेशेन
सर्वांगानामेवनप्रधानस्यातः पिंडदानमंगमित्याहुः॥तन्न॥नह्यतिदे

शिक्येवप्राप्तिर्निषेधस्यपर्युदासस्यवोपजीव्या॥प्रधानत्वेहितस्यापि
श्राद्धपदशक्यत्वात्तद्धितेनैवप्राप्तेनिषेधपर्युदासोपपत्तेः॥अतश्च
क्तयुक्त्यातदपिप्रधानं॥मत्तुककौनुयायिनः॥पिंडदानमेवप्रधानंनान्यो
न्नत्यागइतितदपिन॥पित्रुद्देश्यकान्नत्यागस्यापिफलसंबंधाविशेषा
त्॥निषिद्धपर्युदस्तपिंडकेसंक्रांत्यादिश्राद्धेप्रधानाभावेनांगमात्रानु
ष्ठानप्रसंगाच्चेतिदिक्॥तच्चश्राद्धंपार्वणमेकोद्दिष्टंच॥पार्वणंचदर्शश्रा
द्धमेवपर्वणिभवमितियोगात्॥नचपर्वशब्दस्यसंक्रांत्यादावपिस
त्वात्तन्निमित्तकेश्राद्धेतथापूर्णिमाश्राद्धेतथामावास्यायांविशेषेणेति
निगमवचनेनकृष्णपक्षश्राद्धस्यामावास्याख्यपर्वयोगात्तत्राप्यति
प्रसक्तोयोगइतिवाच्यं॥अमावास्यायांयत्क्रियतेतत्पार्वणमुदाहृत
मितिरूढिबोधनेनयोगेरूढत्वात्॥संक्रांत्यादौपर्वशब्दस्यगौणत्वा
च्च॥एकमुद्दिश्ययच्छ्राद्धमेकोद्दिष्टंप्रचक्षते॥त्रीनुद्दिश्यतुयत्तद्धिपा
र्वणंमुनयोविदुरितिकण्ववचसितुपित्रुद्देश्यकश्राद्धमात्रेपार्वणशब्दः
कौंडपायनहोमेमासमग्निहोत्रंजुहोतीत्यग्निहोत्रशब्दइवगौणः॥
नचत्रीनुद्दिश्यतुयत्तद्धीत्यस्यापिरूढिबोधकत्वमेवेतिवाच्यं॥दर्शि
केष्वेतेनैवरूढिसिद्धेरमावास्यायामित्यस्यानर्थक्यप्रसंगात्॥अतः
पार्वणशब्दोदर्शिकस्यैवनामधेयमितिदर्शश्राद्धप्रकरणएवचम
न्वादिस्मृतिषुधर्मपाठात्तदेवप्रकृतिः॥अन्येषुतुधर्मानुक्तेर्विकृति
त्वं॥आश्वलायनसूत्रानुसारिणांतु अथातःपार्वणेश्राद्धेकाम्यआभ्यु
दयिकएकोद्दिष्टेचेतितत्सूत्रेणचत्वारिश्राद्धानिप्रक्रम्यधर्माम्नानात्
चतुर्णामपिसमानविधानताकातीयापस्तंबसत्याषाढसूत्रानुसा
रिणांकृष्णपक्षश्राद्धप्रकृतिः॥तत्रैवधर्माम्नानात्॥तदपिप्रकृतित्व
मन्वष्टकादीन्प्रत्येव।यत्रतस्यमासिश्राद्धेनकल्पोव्याख्यातइत्यापस्तं
बादिसूत्रमस्तिन्यायेनसर्वश्राद्धप्रकृतित्वेप्राप्तेएवमादिसूत्रस्यप
रिसंख्यार्थत्वात्॥एतत्सूत्रापरिख्यातानांतुवार्षिकादीनांदर्शश्राद्ध
विकृतित्वमितिनिरणायिमथाविस्तरेणमासिश्राद्धपद्धतौ॥अतोवा
र्षिकादिश्राद्धांतरेषुचोदनालिंगेनपूर्वोक्तकाण्ववचनोक्तपार्वण
।सपिंडीकरणात्पूर्वमेकोद्दिष्टंसुतःपितुः॥ऊर्ध्वंपार्वणवत्कुर्यात्सः

मितरेणत्वितिलौगाक्षिवचनेनवार्षिकातिदेशः॥श्राद्धकालानाहया
ज्ञवल्क्यः॥अमावास्याष्टकावृद्धिःकृष्णपक्षोयनद्वयं॥द्रव्यंब्राह्मणसं
पत्तिर्विषुवत्सूर्यसंक्रमः॥व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः॥
श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताइति॥अत्रनश्राद्धानुवादे
नकालविधिः॥याज्ञवल्क्यस्मृतौश्राद्धस्यवचनांतरेणाप्राप्तेः॥आव
श्यकश्राद्धस्यास्मृतौश्राद्धस्यविधिरनुवादोवा॥अथेतिकर्तव्यताया
नवैयर्थ्यप्रसंगात्॥अतोत्रामावास्यादिविशिष्टश्राद्धविधायकान्ये
तावंतिवाक्यानिकल्प्यंते॥तत्रामावास्यानिर्णीताप्रथममयूखे॥अष्ट
काहेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्याश्वला
यनोक्ताश्चतस्रः॥भाद्रकृष्णाष्टमीचपंचमी॥तथाचपाद्मे॥वसुनाम
पितास्यकन्यांशशापानुजश्राद्धेच॥साष्टकात्वेनोत्पन्नेत्युक्तेः॥प्रौष्ठ
पद्यष्टकाभूयःपितृलोकेभविष्यति॥आयुरारोग्यदानित्यंसर्वकामफ
लप्रदेति॥अत्राशक्तावनुकल्पमाहाश्वलायनः॥अपिवानडुहोयवस
माहरेदग्निनावाकक्षमुपोषेदेषामेष्टकेतिनत्वेवानष्टकःस्यादिति॥
यवसमार्द्रतृणं॥कक्षंशुष्कतृणंउपोषेद्दहेत्॥अथान्वष्टकाः॥अष्ट
काउक्त्वाहाश्वलायनः॥अपरेद्युरन्वष्टक्यमिति॥अत्रचनवम्याअपरा
ह्णव्याप्त्यानिर्णयः॥तस्यानिमित्तत्वाश्रुतेः॥सर्वस्त्रस्मृतिसूत्रेषु
श्वोभूतइत्यष्टकोत्तरदिनस्यैवान्वष्टकानिमित्तत्वश्रवणाच्च॥आश्वला
यनः॥अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतं॥पित्रादिमातृमध्यंच
ततोमातामहांतकमिति॥आग्नेये॥अन्वष्टकासुवृद्धौचगयायांचक्षये
हनि॥अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेति॥हेमाद्रौछागलेयः॥
केवलास्तत्रसंधेकार्याःस्त्रीश्राद्धेदैवकीर्तिताः॥अन्वष्टकासुमध्यस्थानां
त्याःकार्यास्तुमातरइति॥तत्रैवब्रह्मांडे॥पितृभ्यःप्रथमंदद्यान्मातृभ्य
स्तदनंतरं॥ततोमातामहेभ्यश्चेत्यान्वष्टक्येक्रमःस्मृतइति॥दीपि
कायांतुमातृयजनंनत्वन्वष्टकास्वादितइत्युक्तंतज्जीवत्पितृकविष
यं॥तस्यपितृपार्वणाभावादितिकश्चित्॥तत्तुच्छं॥क्रमानुपपत्तेः॥शाखा
भेदेनतुव्यवस्थायुक्ता॥तत्राप्याश्वलायनीयैर्नापितृपूर्वकंतत्सूत्रेतथा
म्नानात्॥अन्येषांतुमातृपूर्वकं।अत्रसुवासिन्योपिभोज्याः।भर्तुरग्रेमृ

तानारीसहवा तेन यामृता॥तस्याःस्थाने नियुंजीत विप्रैःसहसुवासिनी
मिति स्मृतेः॥इदंचनित्यं॥अष्टकान्वष्टकास्तिस्रस्तथैवचनृपोत्तम॥ए
तानि श्राद्धकालानि नित्यानाह प्रजापतिः॥श्राद्धमेतेष्वकुर्वाणोनरकंप्र
तिपद्यत इति हेमाद्रौ विष्णुधर्मोत्तरात्॥अतएव वैरस्वतं प्रधानं नाष्टकां
गंपूर्वेद्युः श्राद्धंत्वष्टकांगं॥फलवत्संनिधावफलं तदंगमिति न्यायात्॥
एषएवपितामहचरणानामप्याशयः॥इदंच शूद्रानुपेताभ्यामपि कार्य
मिति वक्ष्यते धिकारिनिर्णये॥जीवत्पित्रापीदं कार्यं॥आन्वष्टक्यं गयाप्रौष्ठ
सत्यांयच्च मृतेहनि॥मातुःश्राद्धंसुतःकुर्यात्पितर्यपि चजीवतीति मैत्राय
णीयपरिशिष्टात्॥अकरणे प्रायश्चित्तं मृग्विधाने॥एभिर्द्युभिर्जपेन्मं
त्रंशतवारंतुतद्दिने॥अन्वष्टक्यं यदाभूत्यंसंपूर्णं याति सर्वथेति॥भाद्रपदा
न्वष्टकाश्राद्धे श्राद्धेचापरपक्षिके॥अर्घ्यदानं पृथक्कुर्यात्पिंडमेकं तु निर्वपे
त्॥द्वयोर्वे क्षीनां च नामैक्ये द्विवचनांतं बहुवचनांतं चेति श्राद्धआन्व
ष्टक्ये॥यत्तु पठंति॥नभिस्वपक्षेनवमी पुण्या भाद्रपदे हि या॥चत्वारःपा
र्वणाःकार्याःपितृपक्षे मनीषिभिरिति॥तन्नाकरश्चिंत्यः॥इदंच सधवा
याएव मातुर्मरणे भवतीति केचित्॥वस्तुतस्तु॥अविशेषाद्विधवाया
अपिमृताया भवति॥यत्तु श्राद्धं नवम्यां कुर्यात्तन्मृते भर्तरि लुप्यती
ति वचस्तद्रत्नाकर॥एतच्च मातृसपाहश्राद्धवदविशेषाज्जीवत्पितृके
णापि सपिंडं कार्यं॥यत्तु॥जीवत्पितृकनिर्णये॥मुंडनं पिंडदानं च प्रेत
कर्म च सर्वशः॥नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेव चेति दक्षवाक्य
त्वेनारेखितहस्तस्मृतौ निबंधांतरे चादर्शनाद्रत्नाकर मित्यस्तु प्रसक्ता
नुप्रसक्तं॥प्रकृतां याज्ञवल्क्यवचोव्याख्यामनुसरामः॥वृद्धिःपुत्रज
न्म॥एतानि च श्राद्धानि नित्यानि॥अमावास्याव्यतीपातपौर्णमास्यष्ट
कासु च॥विद्वान्श्राद्धमकुर्वाणःप्रायश्चित्तीयते तु सइति पितामहोक्तेः
॥श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः।इंदुक्षये मासिमासि वृद्धौ प्र
त्यब्दमेव चेति लौगाक्षिवाक्याच्च॥कृष्णःसर्वमासीयः॥नतु भाद्रपद
स्यैव॥अयनद्वयं मकरकर्कटसंक्रमणे॥विषुवत्तुलामेषसंक्रमणे॥सं
क्रमादयनविषुवतोःपृथङ्निर्देशःफलभूमार्थः॥द्रव्यं पायसादि॥ब्राह्म
णोवक्ष्यमाणलक्षणः॥तयोःसंपत्तौ इति द्विवचनांतःपाठ इति केचि

एकवचनांतःपाठः॥द्रव्यब्राह्मणसंपत्तिर्यस्मिन्काल इति बहुव्रीहि
रिति माधवस्मृतिचंद्रिकाकारौ॥द्रव्यमित्यसमस्तमिति मिताक्षरा
यां॥व्यतीपातःप्रसिद्धो योगः॥श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके
॥यद्यमा रविवारेण व्यतीपातःस उच्यत इति वृद्धमनूक्तो वा॥नागदै
वतमाश्लेषा॥मस्तकं मृगशिरः॥श्रवणादिपंचानां चतुर्थपाद इति
हेमाद्रौ॥शास्त्रांतरेपि॥पंचाननस्थो गुरुभूमिपुत्रो मेषे रविः स्याद्य
दि शुक्लपक्षे॥पाशाभिधाना करभेण युक्ता तिथिर्व्यतीपात इतीह यो
गः॥पंचाननः सिंहः॥पाशाभिधाना द्वादशी॥करभं हस्तः॥गजच्छा
यालपरार्के वायुपुराणे॥हंसे हस्तस्थिते यातु मघायुक्ता त्रयोदशी॥
तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु इति॥तथा॥हंसे हस्तस्थिते
यातु अमावास्या करान्विता॥सा ज्ञेया कुंजरच्छाया इति बौधायनोब्रवी
त्॥हंसः सूर्यः॥तद्वचनाबलात् हस्तनक्षत्रमपि॥चंद्रसूर्ययोर्हस्तस्थत्वे
रिति फलितोर्थ इति हेमाद्रौ॥स्मृत्यंतरे॥यदेंदुः पितृदैवत्ये हंसश्चैव क
रे स्थितः॥याम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तितेति॥पितृदैवत्यं
मघा॥हंसः सूर्यः॥करो हस्तः॥याम्या तिथिस्त्रयोदशी॥हस्तच्छायेति
स्मृतिचंद्रिकायां॥एतद्वै पितॄणामयनं यद्धस्ति श्राद्धं तस्माच्छाया
यां श्राद्धं दद्यादिति काठकोक्तेः॥गजच्छायासु कुर्वीत कर्णव्यजनवी
जितेति भारतोक्तेश्च॥श्राद्धकल्पः प्रकीर्तिता इति गजच्छायालक्षित
कालग्रहणाद्विरुद्धं॥ग्रहणस्पर्शकालः॥त्रिदशाः स्पर्शसमये तृप्यं
ति पितरस्तथा॥मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसा इति वृद्ध
वसिष्ठोक्तेः॥श्राद्धं प्रति रुचिः इच्छा॥ब्राह्मे॥आषाढ्यामथ कार्त्तिक्यां
माघ्यां मन्वंतरादिषु॥युगादिषु च दुःस्वप्ने जन्मर्क्षे ग्रहपीडिते॥प्रोष्ठ
पदासिते पक्षे श्राद्धं कुर्वीत यत्नतः॥मार्गशीर्षे च पौषे च माघे प्रौष्ठे च
फाल्गुने॥कृष्णपक्षे च पूर्वेद्युरन्वष्टक्यं तथाष्टमीनि॥तिस्रोष्टका
स्तासु श्राद्धं प्रकुर्वीतैव ॥र्वणामिति॥युगादयो विष्णुपुराणे॥वैशा
खमासस्य तु या तृतीया नवम्यसौ कार्तिक शुक्लपक्षे॥नभस्यमासस्य
तमिस्रपक्षे त्रयोदशी पंचदशी च माघे॥माघे पंचदशी॥अमावास्या॥

नारदीये॥ द्वेशुक्ले द्वेतथाकृष्णे युगादी कवयो विदुः॥ शुक्ले पूर्वाह्णिके
ग्राह्ये कृष्णे चैवापराह्णिके॥ अस्मिंश्च गोभूमिहिरण्यवस्त्रदानेन सर्वं
प्रविहाय पापं॥ सूरत्वमिंद्रस्य सुहृत्वमेति मर्त्याधिपत्यं लभते मनुष्यः
॥मात्स्ये मन्वादयः॥ अश्वयुक्शुक्लनवमी कार्त्तिके द्वादशी तथा॥ तृ
तीया चैत्रमासस्य तथा भाद्रपदस्य च॥ फाल्गुनस्य त्वमावास्या पु
ष्यस्यैकादशी सिता॥ आषाढस्यापि दशमी माघमासस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथा माघी च पूर्णिमा॥ कार्त्तिकी फाल्गुनी चै
त्री ज्यैष्ठी पंचदशी सिता॥ मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः
॥अत्र विशेषानिर्देशाच्छुक्ला तिथिर्ग्राह्या॥ जातूकर्ण्यः॥ ग्रहोपरागे च
तथैव जाते पि च योगयायामयनद्वये च॥ नित्यं च शंखे च तथैव पद्मे द
त्तं भवेन्निष्कसहस्रतुल्यमिति॥ नित्यं भवेद्दत्तमिसन्वयेन नित्येति
चंद्रिकायां॥ पित्र्यं मघासा च महालयस्था॥ शंखो मावास्या॥ पद्मोष्ट-
का॥ तथा च स एव॥ शंखं प्राहुरमावास्यां क्षीणसोमां द्विजोत्तमः॥ अ
ष्टका च भवेत्पद्मं तत्र दत्तं तथाक्षयमिति॥ यदा विष्टिर्व्यतीपातो भा
नुवारस्तथैव च॥ पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणमिति शंखो
क्तो वा पद्मः॥ देवलः॥ इंदुक्षये गजच्छाया मन्वादिषु युगादिषु॥ ए
ते कालाः समुद्दिष्टाः पितॄणां प्रीतिवर्द्धनाः इति॥ चतुर्दशी भिन्नासु द्वाद
श कृष्णपक्षगासु तिथिषु क्रमात्फलान्याह याज्ञवल्क्यः॥ कन्यां कन्या
वेदिनश्च पशून्वै सत्सुतानपि॥ द्यूतं कृषिं च वाणिज्यं तथैकद्विशफा
नपि॥ ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरौप्ये सकुप्यके॥ जातिश्रैष्ठ्यं सर्वका
मानाप्नोति श्राद्धदः सदा॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं॥
शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते इति॥ कन्यावेदिनो जामातरः॥
द्यूतं तत्र विजयः॥ एकशफाः अश्वादयः॥ कुप्यं ताम्रादि॥ हेमाद्रौ नागर
खंडे॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा॥ उपसर्गमृतानां च वि
षमृत्युमुपेयुषां॥ वन्हिना च प्रदग्धानां जलमृत्युमुपेयुषां॥ सर्पव्याघ्र
हतानां च शृंगैरुद्बंधनैरपि॥ तेषां श्राद्धं प्रकर्तव्यं चतुर्दश्यां नराधिप॥ ब्र
ह्मपुराणे॥ युवानः पितरो यस्य मृताः शस्त्रेण वा हताः॥ तेन कार्यं चतुर्द

एयांतेषांतत्त्रिमभीप्सता॥ प्रचेताः॥ वृक्षारोहणलोहाद्यैर्विद्युज्ज्वाला
विषाग्निभिः॥ नखिदंष्ट्रिविपन्नानांएषांशस्ताचतुर्दशीति॥ मरीचिः
॥विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनां॥ चतुर्दश्यांक्रियाकार्या
अन्येषांतुविगर्हितेति॥ विषादिभिर्घातोयेषांतेघातिनः॥ यत्तुशाक
टायनेनोक्तं॥ जलाग्निभ्यांविपन्नानांसन्यासेवागृहेपथि॥ श्राद्धंकु
र्वतितेषांवैवर्जयित्वाचतुर्दशीमिति॥ तद्वैधमृत्युपरं॥ ज्ञातिश्रेष्ठ्य
त्रयोदश्यांचतुर्दशीमितिमनूक्तेश्चतुर्दशीवर्जंनदशमीमारभ्यश्रा
द्धानुष्ठानेज्ञेयं॥ अन्यथावक्ष्यमाणामहालयश्राद्धगताषोडशसंख्या
व्याहन्येत॥ अतएव॥ नभस्यापरपक्षेतुश्राद्धंकार्यंदिनेदिने॥ नैव
नंदादिवर्ज्यंस्यान्नैववर्ज्याचतुर्दशीतिकार्ष्णाजिनिवचोपिसंगच्छ
तइतिमाधवादयः॥ तानचरणास्तु॥ शस्त्रेणतुहतायेवैतेभ्यस्तत्र
प्रदीयतइति इतरदेवतावाधेनशस्त्रहतानांदेवतात्वविधानात्त
दभावेलुप्यते॥ यथाभ्युदयेष्टौपाकृतदेवताबाधाद्देवतांतरस्यवावि
धानादुपांशुयाजः मानवकार्ष्णाजिनीये॥ अपिशस्त्रहतपितृकंप्रसे
वसंगच्छते॥ मानवेदशम्याद्याविस्यादिपदेनपक्षांतराणामपिग्रहः
णं॥ जीवत्पितृकाजीवत्सितृकरूपभिन्नाधिकारिकामावास्यांततिथि
तदुत्तरप्रतिपद्गतश्राद्धेष्विवशस्त्राशस्त्रमृतपितृकरूपभिन्नाधिका
रिकश्राद्धेष्वेवश्राद्धगताषोडशसंख्योपपद्यतइतिअतोदेवताभावेच
तुर्दशीश्राद्धंलुप्यतइतियुक्तमुत्पश्यंति॥ एतेनचतुर्दश्यांशस्त्रहते
भ्यएवेतिदेवतानियमोपिसिध्यति॥ ननुचतुर्दशीकालनियमः॥ अन्ये
षांतुविगर्हितमितिपूर्वोक्तमरीचिवचनात्॥ अतोन्यस्मिन्नपिदिने
शस्त्रहतानामशस्त्रहतानांचभवत्येवश्राद्धं॥ इदंचैकोद्दिष्टमेवकार्यं
नपार्वणं॥ समत्वमागतस्यापिपितुःशस्त्रहतस्यवै॥ एकोद्दिष्टंसुतैः
कार्यंचतुर्दश्यांमहालये इतिसुमंतूक्तेः॥ समत्वमागतस्यकृतस
पिंडनस्येत्यर्थः॥ पित्रोः स्त्रग्व्यांदृयोःशस्त्रादिनामृतावेकोद्दिष्टद्वयंका
र्यं॥ एकस्मिन्द्वयोर्वैकोद्दिष्टविधिरितिस्मृतेः॥ अत्रैकस्मिन्द्वयोर्वेत्युक्त्या
पित्रादिषुत्रिष्वपिशस्त्रहतेषुपार्वणमेव॥ अत्रमाधवदेवस्वामिप्रभृत
यः॥ एकस्मिन्द्वयोरित्यस्ययथाश्रुतत्वेवाक्यभेदापत्तेस्तस्योपलक्षणं

त्वेनत्रिष्वपिशस्त्रहतेष्वेकोद्दिष्टमपमेवकार्यं॥शस्त्रहननेनिमित्तेएकोद्दिष्टमात्रविधिपरत्वाद्वाक्यस्य॥एकस्मिन्द्वयोरितितुएकंवृणीतेद्वौवृणीतेइत्यादिवदनुवादइत्याहुः॥वस्तुतस्तुशस्त्रेणतुहतायेवैइतिशस्त्रहतदेवताविधिनैवैकस्यद्वयोर्वाशस्त्रादिमरणेएकोद्दिष्टस्यान्यथानुपपत्त्याप्राप्तेस्त्रिषुमृतेषुतुऊर्ध्वंपार्वणंकुर्यादितिसपिंडनोत्तरभावित्वेनसामान्यवचनप्राप्तस्यापिपार्वणविधेर्बाधात्पार्वणमेवकार्यं॥अतएकस्मिन्नित्यादिपूर्वोक्तसोमंतवन्यायप्राप्तस्यैवार्थस्यानुवादकंनविधायकंकस्यचिदर्थस्य॥अपरार्कस्मृतिचंद्रिकाहेमाद्र्यादीनामप्ययमेवाशयोलक्ष्यते॥दिनांतरेतुशस्त्रादिहतानामपिपार्वणमेव॥तथाचप्रजापतिः॥संक्रांतावुपरागेचपर्वोत्सवमहालये॥निर्वपेदत्रपिंडांस्त्रीनितिप्राहप्रजापतिरिति॥अथकाम्यश्राद्धानि॥विष्णुधर्मोत्तरे॥अतःकाम्यानिवक्ष्यामिश्राद्धानितवपार्थिव॥आरोग्यमथसौभाग्यंसमरेविजयंतथा॥सर्वकामांस्तथाविद्यांधनंजीवितमेवच॥आदित्यादिदिनेष्वेवंश्राद्धंकुर्यात्सदानरः॥क्रमेणैतान्यवाप्नोतिनात्रकार्याविचारणेति॥मार्कंडेयः॥कृत्तिकासुपितॄनर्च्यस्वर्गमाप्नोतिमानवः॥अपत्यकामोरोहिण्यांसौम्येत्वोजस्वितांलभेत्॥आर्द्रायांशौर्यमाप्नोतिक्षेत्रलाभःपुनर्वसौ॥पुष्टिःपुष्येपितॄनर्च्यआश्लेषासुवरान्सुतान्॥मघासुस्वजनश्रैष्ठ्यंसौभाग्यंफाल्गुनीषुच॥प्रदानशीलोभवतिसापत्यस्तूत्तरासुतु॥प्राप्नोतिश्रेष्ठतांसत्सुहस्तेश्राद्धप्रदोनरः॥रूपवंतिचचित्रासुतथापत्यान्यवाप्नुयात्॥वाणिज्यलाभदाःस्वात्योविशाखाःपुत्रकामदाः॥कुर्वतामनुराधासुदद्युश्चक्रप्रवर्त्तनं॥ज्येष्ठास्वथाधिपत्यंचमूलेचारोग्यमुत्तमं॥अषाढासुयशःप्राप्तिरुत्तरासुविशोकता॥श्रवणेचशुभान्लोकान्धनिष्ठासुमहाधनं॥वेदविद्याभिजितितुभिषक्सिद्धिस्तुवारुणे॥अजादिकंप्रोष्ठपदेविंदेद्भार्यांतथोत्तरे॥रेवतीषुतथारौप्यंअश्विनीषुतुरंगमान्॥श्राद्धंकुर्वंस्तथाप्नोतिभरणीष्वायुरुत्तमं॥तस्मात्काम्यानिकुर्वीतऋक्षेष्वेतेषुतत्त्ववित्॥सौम्यंमृगशिरः॥चक्रप्रवर्त्तनंसर्वत्राज्ञाभंगाभावः॥अथमहालयः॥तत्रप्रोष्ठपदीश्राद्धंतावदुक्तंब्र

पुराणे॥ नांदीमुखानां प्रत्यब्दं कन्याराशिगते रवौ॥ पौर्णमास्यां तु कर्त
व्यं वराहवचनं यथा॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ अश्रो
श्रुमुखा ह्येते पितरः संप्रकीर्तिताः॥ तेभ्यः परतरे ये तु ते तु नांदीमुखाः
स्मृता इति॥ अस्मिंश्च श्राद्धे मातामहपार्वणं नाचरंति शिष्टाः॥ यत्तु क
श्चिदाह॥ सर्वश्राद्धानां दर्शविकृतित्वात्तत्र च मातामहानामप्येवमिति
मातामहत्रयसद्भावादिहापि प्राप्तिः स्यादेव॥ पितरो यत्र पूज्यंते तत्र
मातामहा अपीति धौम्यवाक्येन वा प्राप्तिः॥ न च प्रौष्ठपदीश्राद्धे पित्र्यभा
वान्मातामहाननुष्ठानं॥ पितरो यत्र पूज्यंते इत्यत्र हि पितृशब्दः सपिं
डीकरणांतश्राद्धजन्यपितृभावपरो न जनकपरः अतस्तत्र वर्जत्वानुपपत्तेः।
पित्र्यपितृसमुदाये पितृशब्द इति लक्षणायाश्च शक्त्यार्थलाभे ऽनभ्युप
गमादिति॥ दृष्टश्च तत्रापि प्रयोगः॥ पितृपात्रेषु प्रेतपात्रं प्रसेचयेदित्या
दौ॥ तस्मादनुष्ठेयं मातामहपार्वणमिति॥ तत्र यद्यपि क्वचित्पितृश
ब्दः सपिंडीकरणांतजन्यपितृभावपरस्तथापि इह न तथा लिंगसमवा
यन्यायात्तु पित्र्यपितृसमुदायपरत्वमेव। कर्षूसमन्वितं मुक्त्वा तथाद्यं
श्राद्धषोडशं॥ प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति परि
शिष्टे पर्युदासानुपपत्तेः॥ षोडशश्राद्धेषु तदुक्तरीत्या मातामहानाम
प्राप्तेः॥ ननु षोडशश्राद्धानामेकोद्दिष्टत्वपक्षे त्वपरपक्षेपि कथं प्राप्ति
रिति चेत् न। पितॄणामुद्देश्यत्वेन तद्गतविशेषणस्याविवक्षितत्वात्।
न चैवं चतुर्दश्यामपि मातामहप्राप्तिः शंक्या॥ श्राद्धं शस्त्रहतस्यैवेति ए
वकारेणतरव्यावृत्तेः॥ किंच॥ आन्वष्टक्यं गयाप्राप्तौ सत्यां च क्षयेमृतेह
नि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति जीवत्पितृकस्यान्वष्ट
काश्राद्धे मातामहप्राप्तिः केन वार्येत॥ मात्रादिषु सपिंडनांतश्राद्धज
न्यपितृत्वस्य विद्यमानत्वात्॥ यदुक्तं दर्शश्राद्धान्मातामहानां प्राप्ति
रिति तन्न॥ देवतांतरविधिना प्राकृतदेवताबाधात्॥ अतो यत्र न दे
वतोपदेशः संक्रांत्यादिश्राद्धेषु तत्रैव प्राकृतदेवताप्राप्तिर्न विहितदेव
ताकेष्विति सिद्धं प्रौष्ठपदीश्राद्धे मातामहाननुष्ठानं॥ अथ प्रतिपदादि
श्राद्धानि॥ तत्र वृद्धमनुः॥ आषाढीमवधिं कृत्वा पंचमं पक्षमाश्रिताः॥
कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलं॥ आषाढीमवधिं कृत्वा यः प

स्तः पंचमो भवेत्॥ तत्र श्राद्धं प्रकुर्वीत कन्यास्थोऽर्को भवेन्न वा॥ अत्राद्यः
श्लोकोत्तरार्द्धोन्निस्यता॥ आषाढ्याः पंचमे पक्षे यः श्राद्धं न करिष्यति।
शाकेनापि दरिद्रोपि सोंत्यजत्वमुपेष्यतीति नागरखंडाच्च॥ काम्य
तापि॥ पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा॥ प्राप्नोति पंचमे दत्वा
श्राद्धकामांस्तु पुष्कलानिति कार्ष्णाजिनिस्मृतेः॥ आदित्यपुराणे॥ प
क्षांतरेपि कन्यास्थे रवौ श्राद्धं प्रशस्यते॥ कन्यागते पंचमे तु विशेषेणै
व कारयेदिति॥ गौतमः॥ अपरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्यादिद
र्शांतं॥ अष्टम्यादिदशम्यादि॥ सर्वेस्मिन्वेति॥ कार्ष्णाजिनिः॥ आद्ये
मध्येवसाने वा यत्र कन्यां रविर्व्रजेत्॥ स पक्षः सकलः पूज्यः श्राद्धषो
डशकं प्रति॥ ब्रह्मांडे॥ नभस्यकृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने॥ त्रिभा
गहीनपक्षं वा त्रिभागं त्वर्द्धमेव वेति॥ त्रिभागहीनः षष्ठीप्रभृतिः॥
त्रिभाग एकादश्यादि तु शब्देन त्रयोदश्यादिरपीति प्राच्याः॥ तेन तन्म
ते चतुर्थी पंचमी षष्ठ्यष्टमी दशम्येकादशी त्रयोदशीप्रभृतीति सप्त
पक्षः॥ त्रिभागहीनत्रिभागपदाभ्यामल्पांतरतया पंचमीदशम्याद्या
र्द्धपक्षयोर्ग्रहणमिति केचित्॥ वस्तुतस्तु पंचम्यादिदशम्यादिपद
योरतद्गुणसंविज्ञानबहुव्रीहिणैकमूलकल्पनालाघवाय षष्ठ्येका
दशीपक्षावेव गृह्येते॥ एवमष्टपदेनाष्टम्यादिः॥ तु शब्दः पादपूरक इ
ति॥ अत एव हेमाद्रौ विष्णुधर्मोत्तरे॥ उत्तरादयनाद्राजन्श्रेष्ठस्याह
क्षिणायनं॥ याम्यायनाच्चतुर्मासं तत्र सुप्ते तु केशवे॥ प्रोष्ठपद्याः परः प
क्षस्तत्रापि च विशेषतः॥ पंचम्यूर्ध्वं तु तत्रापि दशम्यूर्ध्वं ततोप्यथेति।
मघायुक्ता तु तत्रापि शजन्युक्ता त्रयोदशीति॥ श्लोकगौतमः॥ कन्याग
ते सवितरि यान्यहानि तु षोडश॥ क्रतुभिस्तानि तुल्यानि संपूर्णतरद
क्षिणैरिति॥ एते च पक्षाः शक्तितो व्यवस्थाप्याः॥ तिथिवृद्धौ षोडशसा
म्ये पंचदशेति माधवः॥ प्रोष्ठपद्या सहेति हेमाद्रिः॥ अहः षोडशकं यत्तु
शुक्लप्रतिपदा सह॥ चंद्रक्षयाविशेषेण सापि दर्शात्मिका स्मृतेति॥ अत्र
नभस्यस्यापरे पक्षे तिथिषोडशकं तु यत्॥ कन्यास्थार्कान्वितः श्रेयान्
सकालः श्राद्धकर्मणीति शाट्यायनिवाक्ये संख्यायुक्तेषु समुच्चयः स्या
दिति न्यायेन तिथीनां श्राद्धे समुच्चयावगम्यात्॥ तस्य च श्राद्धावृत्तिं वि

नानुपपत्तेरेकस्यैव श्राद्धस्य सायंप्रातरग्निहोत्रहोमस्येवावृत्तिः ॥ ते
नानेकदिनसाध्य एक एव श्राद्धप्रयोगः तेन ब्राह्मणदेशदक्षिणानामै
क्यमिति केचित् ॥ वस्तुतस्तु ॥ आदौ मध्येवसाने वा यत्र कन्यां रविर्व्रजे
त् ॥ स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रतीति कार्ष्णाजिनिवाक्यात्
त्र आहुतीर्जुहोतीतिवत्कर्मणां भेद एव ॥ यद्वा वाक्यांतरप्राप्तमेकं श्राद्ध
मनूद्य तिथिसमुच्चयो विधीयते न ततो न भेदः स्यात् प्रत्युत कोत्पत्तिः । गुण
विधिरिति विनिगमनाविरहात् ॥ शाठ्यायनिवाक्यस्याप्युत्पत्तिप
रतया समुच्चितानेकतिथिविशिष्टकालविशिष्टकर्मविधिकृतभेद
वदिहापि भेदश्च युक्त एव दशब्राह्मणादीनामपि भेदो भवतीति दि
क् ॥ पूर्वोक्तपंचम्यादिपक्षेष्वशक्तस्त्वेकस्मिन्नपि न कुर्यात् । आषा
ढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे ॥ यो वै श्राद्धं नरः कुर्यादेकस्मिन्न
पि वासरे ॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति हेमाद्रौ ना
गरखंडोक्तेः ॥ यत्तु निर्णयदीपिकायां ॥ मृताहनि पितुर्यो वै श्राद्धं दा
स्यति मानवः ॥ इति द्वितीयमर्द्धमलेखि ॥ यच्च कात्यायनेनालेखि । या
तिथिर्यस्य तातस्य मृताहे तु प्रवर्त्तते ॥ सा तिथिः पितृपक्षे पि पूजनीया
प्रयत्नतः ॥ तिथिच्छेदो न कर्त्तव्यो विनाशौचं यदृच्छया ॥ पिंडश्राद्धं च
कर्त्तव्यं विच्छित्तिं नैव कारयेत् ॥ अशक्तः पक्षमध्ये तु करोत्येकदिने य
दि ॥ निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधीति तन्महानिबंधेष्वलि
खनान्निर्मूलं ॥ अतो निषिद्धे यस्मिन्कस्मिन्नपि दिने कार्यं न तु निषि
द्धेपि मृताहनीति नियमः ॥ तच्च नित्यं ॥ आषाढ्याः पंचमे पक्षे यः श्राद्धं
न करिष्यति ॥ शाकेनापि दरिद्रो वा सोंत्यजत्वमुपेष्यतीति तन्नैवाकर
णेष्वश्रवणात् ॥ अत्रानुपपत्ते पक्षांतरमाह यमः ॥ हंसे वर्षासु कन्या
स्थे शाकेनापि गृहे वसन् ॥ पंचम्योरंतरे दद्यादुभयोर्विवस्वतोरिति ।
पक्षमध्ये कथंचिच्छ्राद्धे न जाते तु सुमंतुः ॥ कन्याराशौ महाराजयाव
त्तिष्ठेद्विभावसुः ॥ तस्मात्कालाद्वै देयं वृश्चिकं यावदागत इति ॥ अथ
महालये निषिद्धकालः । तत्र संग्रहश्लोकः ॥ नंदाभ्रकामरव्यारभृग्वभि
पितृकालभे ॥ गंडे वैधृतिपाते च पिंडास्त्याज्याः सुतैः शुभैः ॥ नंदाः प्रतिप
त्षष्ठ्येकादश्यः अभ्रं सप्तमी ॥ कामस्त्रयोदशी ॥ आरो भौमः ॥ अग्निपित

कालभानिकृत्तिकामघाभरण्यः॥पातोव्यतीपातः॥अत्रसप्तमीरवि
भौमभरणीगंडवैधृतिव्यतीपातेषुमूलवचोन्वेष्यं॥वसिष्ठः॥नंदायांभा
र्गवदिनेचतुर्दश्यांत्रिजन्मसु॥एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात्
॥त्रिजन्मजन्मभं॥ततोनवमैकोनविंशंचेति॥यत्तुकर्तुश्चपुत्रदाराणां
त्रिजन्मर्क्षाणिचिंतयेदितितत्राकरश्चिंत्यः॥नारदः॥कृत्तिकायांचनं
दायांभृगुवारेत्रिजन्मसु॥पिंडदानंनकर्तव्यंकुलक्षयकरंयतः॥त्रिज
न्मर्क्षत्रिपादेषुनंदायांभृगुवासरे॥धातृपौष्णभयोःश्राद्धंनकर्तव्यंकु
लक्षयात्॥सकृन्महालयेकाम्येपुनःश्राद्धेखिलेषुच॥अतीतविषयेचै
वमेतत्सर्वंविचिंतयेदिति॥वृद्धगर्गः॥प्राजापत्येचपौष्णेचपित्र्यर्क्षे
भार्गवेतथा॥यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यतीति॥प्राजापत्यं
रोहिणी॥पौष्णंरेवती॥पित्र्यर्क्षंमघा॥अस्यापवादोहेमाद्रावितिप्रयो
गपारिजाते॥अमापातेभरण्यांचद्वादश्यांपक्षमध्यके॥तथातिथिं
चनक्षत्रंवारंचनविचारयेदिति॥इदंचहेमाद्रिपुस्तकेषुनदृश्यते॥
महालयश्राद्धंचाधिमासेनकर्तव्यं॥नभोवाथनभस्योवामलमासो
यदाभवेत्॥पंचमःपितृपक्षःस्यादन्यत्रैवतुपंचमइतिनागरखंडात्
॥पंचमसप्तमत्वेआषाढपूर्णिमातः॥वृद्धिश्राद्धंतथाहोममग्न्याधेयंम
हालयं॥राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघितइतिभृगूक्तेश्च॥तत्र
विश्वेदेवाःतावद्धुरिलोचनौ॥तथाचादित्यपुराणे॥अपिकन्यागतेसू
र्येकाम्येचधुरिलोचनौ॥कन्यागतइतिकन्यासंक्रांतिनिमित्तकेश्राद्धे
इतिकेचित्॥तदानुमहालयेपुरूरवार्द्रवावेव॥पित्र्येदेवताक्रममाह
वोपदेवः॥तातांबात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्रीत
नयादितातजननीसभ्रातरःसस्त्रियः॥तातांबात्मभगिन्यपत्यधव
युग्जायापितासद्गुरुःशिष्याप्ताःपितरोमहालयविधौतीर्थेतथातर्प
णइति॥तातांबात्रितयंपित्रादित्रयंमात्रादित्रयंच॥मातामहादित्रयं
सस्त्रीतिसपत्नीकमितिप्रयोज्यं॥अपत्यधवयुगितिसापत्यासधवा
मित्यर्थः॥अत्रपार्वणत्रयंकार्यं॥तथाचश्राद्धहेमाद्रौ॥महालयेगया
श्राद्धेवृद्धौचान्वष्टकासुच॥नवदैवत्यमत्रेष्टंशेषंषट्पौरुषंविदुरितिस
मर्थस्यतुद्वादशदैवत्यं॥तथाचद्वैतनिर्णयेनिगमे॥महालयेगयाश्राद्धे

कृष्णोचान्वष्टकासु च॥ द्वेपंद्वादशदैवत्यंतीर्थश्रेष्ठमघासुचेति॥ क्र मांतरंत्रयदृकेस्मृत्यंतरे॥ आदौपितातत्तोमातासपत्नजननीतथा॥ मा तामहाःसपत्नीकाःस्वपत्नीतदनंतरं॥ सुतभ्रातृपितृव्याश्चमातुला स्सभार्यकाः॥ दुहिताभगिनीचैवदौहित्रोभागिनेयकः॥ पितृष्वसा मातुलश्चतद्भगिन्यःस्वजामयः॥ भार्याभगिन्योदुहिताश्वशुरोगुरुर र्थिनइति॥ क्रमांतरंपारिजातेसंग्रहे॥ पितृमातृमातामहाःपितृव्योभ्रा तरःसुतः॥ पितृष्वसामातुलश्चतद्भगिन्यःस्वजामयः॥ भार्याभगिन्यो दुहिताश्वसुराभावुकास्नुषाः॥ श्यालकोगुरुराचार्यःस्वामीमित्रंपथा त्रैमेमिति॥ स्वजामयःस्वभगिन्यःभावुकाभगिनीपतयः॥ एतेषांक्र माणामैच्छिकोविकल्पः॥ पित्रादिभिन्नानांतुमहालयेएकोद्दिष्टमेव ॥ उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः॥ श्वशुरभ्रातृतत्सुतऋ त्विक्शिष्यस्वपोषकाः॥ भगिनीस्वामिदुहितृजामातृभगिनीसुताः॥ इत्युपक्रम्यसखिद्रव्यदशिष्याद्यास्तीर्थेचैवमहालये॥ एकोद्दिष्टेन विधिनापूजनीयाःप्रयत्नतइतिहेमाद्रौपुराणोक्तेः॥ सुमंतुरपि॥ सपिं डीकरणादूर्ध्वंयत्रयत्रप्रदीयते॥ भ्रात्रेभगिन्यैपुत्रायस्वामिनेमातुला यच॥ मित्रायगुरवेश्राद्धमेकोद्दिष्टंनपार्वणमितिसपत्नमातुरप्येको द्दिष्टमेवतथातत्प्रक्रमेहेमाद्रौजातूकर्ण्यः॥ सपिंडीकरणादूर्ध्वंपित्रो रेवहिपार्वणं॥ पितृव्यभ्रातृमातॄणामेकोद्दिष्टंनपार्वणं॥ पार्वणंत्वभि निर्वर्त्यैकोद्दिष्टंसमापयेत्॥ पुलस्त्यः॥ महालयेगयाश्राद्धेगतेसू नांक्षयेहनि॥ तेत्रेणश्च पणंकृत्वाश्राद्धंकुर्यात्पृथक्पृथगिति॥ यत्तु मृतानंयत्रयत्रैषांसपिंडीकरणात्परं॥ तत्रपार्वणवत्कुर्यादेकोद्दिष्टंत्य जेद्बुधइतितदेतादृशेकोद्दिष्टविधिनाबाधादेतद्व्यतिरिक्तविषयं॥ ब हुविप्रासंभवेचतुर्विंशतिमते॥ एकस्मिन्ब्राह्मणेसर्वानाचार्यादींस्तु पूजयेदिति॥ अत्रभरणीश्राद्धेगयाफलं॥ भरणीपितृपक्षेतुमहतीप रिकीर्तिता॥ अस्यांश्राद्धंकृतंयेनसगयाश्राद्धकृद्भवेदितिमात्स्यात् महालयेसप्तम्यादिषुत्रिदिनेषुमाध्यावर्षीस्व्यंश्राद्धं॥ तथाचाष्टका न्वष्टकापूर्वेद्युःश्राद्धान्युक्ताश्वलायनः॥ एतेनमाध्यावर्षेश्रोष्ठपद्याअ परपक्षइति॥ मध्येवर्षासुभवंमाध्यावर्षमित्यर्थाद्दूरदत्तस्तुमाध्याव

र्षमितिपपाठ। मघायुतवर्षासुभवेन्माघ्यावर्षमघाश्राद्धमितिनिर्णीता
य।।अत्रत्याष्टमीनवम्योरष्टकान्वष्टकाश्राद्धे निर्णीतंप्राक्।।इयमेवा
न्वष्टकाक्षयनवमीसौभाग्यनवमीतुल्यव्रिंद्व्यतेपामरैः।।नत्वत्रक
र्मभेदेप्रमाणंकिंचिदस्ति।।वैष्णवानांसन्यासिनांचमहालयश्राद्धं
द्वादश्यांकार्यं।।यतीनांचवनस्थानांवैष्णवानांविशेषतः।।द्वादश्यांवि
हितंश्राद्धंकृष्णपक्षेविशेषतइतिप्रतापमार्तंडेसंग्रहोक्तेः।।संन्यासि
नोप्याब्दिकादिपुत्रःकुर्याद्यथाविधि।।महालयेतुयच्छ्राद्धंद्वादश्यां
पार्वणेभवेदितितत्रैववायवीयाच्च।।अथत्रयोदशीश्राद्धं।।मनुः।।यत्किं
चिन्मधुनामिश्रंप्रदद्यात्तुत्रयोदशीं।।तदप्यक्षय्यमेवस्याद्वर्षासुचम
घासुचेति।।एतन्मधुदानंकलौनकार्यं।।अक्षतागोपशुश्चैवश्राद्धमां
संतथामधु।।देवराच्चसुतोत्पत्तिःकलौपंचविवर्जयेदितिनिगमोक्तेः
।।एतच्चदिनांतरगतास्वपिमघासुकार्यंमघासुचेतिचकारात्।।अ
तएवत्रयोदशीमघाश्राद्धयोर्भेदः।।यदाग्नेयोष्टाकपालोमावास्यायां
पौर्णमास्यांवाच्युतोभवतीत्यत्रेवचकारादाग्नेययोर्भेदः।।मघात्रयो
दश्योर्योगेतुफलाधिक्यं।।त्रयोदशीभाद्रपदीकृष्णामुख्यापितृप्रिया।।
तृप्यंतिपितरस्तस्याःस्वयंपंचशतंसमाः।।मघायुतायांतस्यांतुजला
द्यैरपितोषिताः।।तृप्यंतिपितरस्तद्वर्षाणामयुतायुतमितिस्मृतिचंद्रि
कायांस्मृत्यंतरात्।।प्रौष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीं।।प्राप्ये
त्सुत्क्ता।।प्रजामिष्टांपशून्स्वर्गमारोग्यंचधनंतथा।।नृणांश्राद्धेसदा
प्रीताःप्रयच्छंतिपितामहाइतिपारिजातेशंखोक्तेः।।अत्रत्रयोदशीश्रा
द्धंनित्यमपि।।प्रौष्ठपद्यामतीतायांतथाकृष्णात्रयोदशीतिकालानुक्त्वा
।।श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइतिकालहेमाद्रौविष्णुधर्मोक्त
रात्।।मघाश्राद्धेवाविभक्तानामपिपृथगधिकारः।।विभक्तावाविभक्ता
वाकुर्युःश्राद्धंपृथक्पृथक्।।मघासुचततोन्यत्रनाधिकारःपृथग्विनेति
हेमाद्रौस्मृतेः।।इदंचगजच्छायेतिनिरणायि गजच्छायानिर्णयेप्राक्।।मघा
त्रयोदशीयोगेलिंदश्राद्धमधिमासेपिभवति।।तथाचकाठकगृह्ये।।म
घात्रयोदशीश्राद्धंप्रत्युपस्थितिहेतुकं।।अनन्यगतिकत्वेनकर्तव्यंस्या
न्मलिम्लुचइति।।केवलमघाप्रयुक्तं केवलत्रयोदशीप्रयुक्तंतुनभवति।।

शुद्धमासेपित्रोःसंभवेनानन्यगतिकत्वात्॥अतएवप्रत्युपस्थितिहेतु
कमनन्यगतिकत्वेनेतिचहेतुनिर्देशोपिसंगच्छते॥यत्तुवामनपुराणे॥
त्रयोदश्यांतुवैश्राद्धंनकुर्यात्पुत्रवान्गृहीति॥यच्चांगिराः॥त्रयोदश्यां
कृष्णपक्षेयःश्राद्धंकुरुतेनरः॥पंचत्वंतस्यजानीयाज्ज्येष्ठपुत्रस्यनि
श्चितमिति॥तत्तुअवगृहस्यमघायुक्तत्रयोदश्यांसपिंडकश्राद्धनि
षेधपरं॥अतएवप्रतापमार्त्तंडेबृहत्पराशरः॥मघायुक्तत्रयोदश्यां
पिंडनिर्वपणंद्विजः॥ससंतानोनैवकुर्यात्तस्यवंशक्षयोभवेदितितद
पिसपिंडकश्राद्धवन्नित्यंतेकवयोविदुरिति॥यत्तुहेमाद्रौनागरखंडे॥
असंतानस्तुयस्तस्यश्राद्धेप्रोक्तात्रयोदशी॥संतानयुक्तोयःकुर्यात्तस्य
वंशक्षयोभवेदितितदपिसपिंडकश्राद्धनिषेधपरं॥यत्तु कार्ष्णाजिनिः॥
श्राद्धंनैवैकवर्गस्यत्रयोदश्यामुपक्रमेत्॥नतृप्तास्तत्रयेयस्यप्रजांहिंस
तितस्यतइति॥पितरोयत्रपूज्यंतेतत्रमातामहाअपीतिधौम्यवाक्येन
मातामहप्राप्तावपित्र्यसमाप्तैकपार्वणनिषेधार्थमितिहेमाद्रिः॥यत्तु
अप्राप्तनिषेधेवचोवैयर्थ्याज्जीवन्मातृमातामहवर्गकंप्रतिअयं
निषेधस्तस्यैकवर्गयजनप्राप्तेरिति॥तन्नऔत्तरार्द्धिकार्थवादासं
गतेः॥युक्तंतु॥यावत्किंचित्स्वगृह्योक्तंयस्यकर्मप्रचोदितं॥तस्यता
वतिशास्त्रार्थेकृतेसर्वःकृतोभवेदितिवाक्येनयेषांसूत्रेमातामहा
नामतस्तान्प्रतिसामान्यतःप्राप्तस्यैकपार्वणस्यनिषेधार्थमिदमि
ति॥अत्रमघात्रयोदशीयुगादिश्राद्धानांतंत्रतामहालयश्राद्धकर
णपक्षेतुतेनैवैषांप्रसंगसिद्धिः॥बहुदेवत्यत्वमपिंडत्वादिनिर्विशे
षग्रहणात्॥महालयश्राद्धस्यापितंत्रत्वोक्तिस्तुकस्यचिन्मूर्खप्रला
पत्वादुपेक्ष्या॥इतिमहालयत्रयोदशी॥अथात्रचतुर्दश्यामवैधमृता
नामेकोद्दिष्टमुक्तंप्राक्॥तत्रविश्वेदेवाअपिभवंतीतिस्मृत्यर्थसारेप्र
योगपारिजातेच॥प्रेतपक्षेचतुर्दश्यामेकोद्दिष्टंविधानतः॥दैवयुक्तं
तुतच्छ्राद्धंपितॄणामक्षयंभवेत्॥तच्छ्राद्धंदैवहीनंचेत्सुतदारधनक्ष
यइति॥महालयेचतुर्दशीश्राद्धंतुतंचेदृश्चिकदर्शनपर्यंतंयस्मिन्
कस्मिंश्चिद्दिनएकोद्दिष्टविधिनैवकार्यं॥यथामासएवगोप्रकालवि
धानात्॥एतेनटोडरानंदीयापार्वणोक्तिरपास्ता॥अमायांरवींदूहस्त

स्थौ चेत्साग्निकस्तदापेत्युक्तं प्राक्॥आश्विनसितप्रतिपदि मातामहश्रा
द्धमुक्तं हेमाद्रौ॥जातमात्रोपि दौहित्रो विद्यमानेपि मातुले।कुर्यान्
मातामहश्राद्धं प्रतिपद्याश्विने सित इति स्मृतेः।जातमात्रोधिकारी जा
यमान इत्यर्थः॥जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायत इत्यत्रे
वाधिकारी जायमान इत्यर्थः॥तेनोपनयनात्प्रागेतच्छ्राद्धानुष्ठानमि
दानींतनानां दुराचार एव॥एतच्च जीवत्पितृक एव कुर्यादिति संप्रदा
यिकाः॥एतच्च सपिंडकमेव कार्यं।यत्तु।मुंडनं पिंडदानं च प्रेतकर्म च स
र्वशः॥न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति वृद्धस्मृतिस्थमिति क
श्चिल्लिलेख तद्वृद्धस्मृतौ ग्रंथांतरे चाभावान्निर्मूलं॥यत्त्वस्याः संगव
व्यापित्वबोधकं वचः।प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं॥श्राद्धं
मातामहं कुर्यात्सपिता संगवे सदेति तन्निर्मूलं॥क्षयाहस्य श्राद्धका
लत्वमाह व्यासः।मासपक्षतिथिस्पृष्टे यो यस्मिन्म्रियतेहनि।प्रत्य
ब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति॥संन्यासिनां तु क्षयाहे पार्वण
मेव नैकोद्दिष्टं॥तथा च प्रचेताः॥एकोद्दिष्टं यतेर्नास्ति त्रिदंडग्रहणादि
ह॥सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति।पक्षतिथिविशेषतो
पि पार्वणनियमो मिताक्षरायां स्मृतौ॥अमावास्या क्षयो यस्य प्रेतप
क्षेपि वा पुनः॥पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचनेति इदं चानाकर
मिति विज्ञानेश्वरः॥शंखस्मृतिमूलमिति माधवः॥शिष्टाचारोप्येत
द्वाक्यानुसारी॥अमावास्यामहालयभिन्नक्षयाहे॥संन्यासिभिन्ना
नां पार्वणैकोद्दिष्टयोर्विकल्पः॥वचनद्वैविध्यात्॥तथा च शातातपः।
सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा॥प्रतिसंवत्सरं विद्वान्छाग
लेयोदितो विधिरिति॥यमस्तु।सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः।मा
तापित्रोः पृथक्कुर्यादेकोद्दिष्टं क्षयेहनीति॥अत्र कुलाचाराद्व्यवस्थेति
मिताक्षरायां॥आब्दिकादिषु मातामहपर्युदासमाह कात्यायनः।क
र्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशं॥प्रत्याब्दिकं च शेषेषु पिंडाः स्युः
षडिति स्थितिरिति॥कर्षूसमन्वितं सपिंडनं तत्र कर्षूः रत्निकगर्त्तविधाना
त्॥इति श्राद्धकालाः॥क्षयाहाज्ञाने तु क्षयाहश्राद्धं प्रकृत्याह बृहस्पतिः।
न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति॥मासश्चेत्प्रतिविज्ञातस्तद्दर्शः

स्यान्मृतेहनि॥तद्दर्शेमृताहनीतिसमानाधिकरण्यं॥तद्दर्शएवमृता
हइत्यर्थः॥मरीचिस्तु॥श्राद्धविघ्नेसमुत्पन्नेअविज्ञातेमृतेहनि॥एका
दश्यांतुकर्त्तव्यं कृष्णपक्षेविशेषतइति॥अमावास्यैकादश्योस्तुविक
ल्पः॥विशेषतइत्युक्त्याशुक्लपक्षेपीतिहेमाद्रिः॥दिनाज्ञानेमासाज्ञानेच
भविष्यत्पुराणे॥दिनमेकंनजानातिमासंनापिकदाचन॥कार्यंतेनअ
मायांवैश्राद्धंमाघेथमार्गके॥प्रस्थानमासतद्दिनज्ञानेतुनदेवत्र्याह्यंत
थाचबृहस्पतिः॥दिनमासौनविज्ञातौमरणस्ययदापुनः॥प्रस्थानदि
नमासौतुग्राह्यौपूर्वोक्तयादिशेति॥प्रास्थानिकमासदिवसाज्ञानेतुभ
विष्योत्तरे॥मृतवार्त्ताश्रुतेर्ग्राह्यौतौपूर्वोक्तक्रमेणत्विति॥मरणाश्रव
णेतुजातूकर्ण्यः॥पितरिप्रोषितेयस्यनवार्त्तानैवचागतिः॥ऊर्ध्वंपंच
दशाद्वर्षात्कृत्वातत्प्रतिरूपकं॥कुर्यात्तस्यचसंस्कारंयथोक्तविधिनात
तः॥तदादीन्येवसर्वाणिप्रेतकार्याणिसंचरेदिति॥अत्रप्रोषितइत्येव
विवक्षितं॥तेननतद्विशेषणंपितरीत्यविवक्षितमनुवाक्यविशेषणत्वा
त्॥तदादीन्येवदाहदिनप्रभृतीन्येवसंचरेत्कुर्यादित्यर्थः॥एवंचदाहदि
नमेवमृताहस्थानापन्नमितितात्पर्यं॥वृद्धबृहस्पतिः॥यस्यनश्रूय
तेवार्त्तायावद्द्वादशवत्सरं॥कुशपुत्रकदाहेनतस्यस्यादवधारणं॥प्र
तिक्रियोत्तरभागतेविशेषोवृद्धमनुनादर्शितः॥प्रोषितस्ययदाकालो
गतश्चेद्द्वादशाब्दिकः॥प्राप्तेत्रयोदशेवर्षेप्रेतकार्याणिकारयेत्॥जी
वनादिसआगच्छेत्घृतकुंभेनियोजयेत्॥उद्धृत्यतापयित्वास्यजात
कर्मादिकारयेत्॥द्वादशाहंव्रतंकुर्यात्त्रिरात्रमथवास्यतु॥स्नात्वोद्व
हेत्ततोभार्यामन्यांवातदभावतः॥अग्नीनाधायविधिवद्व्रात्यस्तोमे
नवायजेत्॥अथैंद्राग्नेनपशुनागिरिंगत्वाचतत्रतु॥इष्टिमायुष्मतीं
कुर्यादीप्सितांश्चक्रतूंस्ततइति॥आशौचेनश्राद्धप्रतिबंधेविशेषः॥षट्त्रिं
शन्मते॥मासिकाब्देतुसंप्राप्तेअंतरामृतसूतके॥कार्यंवदंतिशुद्धौते
दर्शेवापिविशेषतइति॥विशेषतइत्युक्त्याशुक्लपक्षोप्यनुज्ञातइ
तिहेमाद्रिः॥अत्रिः॥तदहश्चेत्प्रदुष्येतकेनचित्सूतकादिना॥सूतका
नंतरंकार्यंपुनस्तदहरेववेति॥तदहरुत्तरमासगतेतस्मिन्नेवदिन
इत्यर्थः॥अत्राशौचांत्यआद्यःपक्षः॥मुख्यकालप्रत्यासत्तेः॥ततोदर्शः॥

ततःकृष्णैकादशी॥ ततःशुक्ला॥ ततउत्तरमासेतदहरितिहेमाद्रिः। के
चित्तु॥ पुनस्तदहरेवेतिपक्षोमासिकपरोनत्वनुमासिकपरोपि॥ एको
द्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायते॥ अन्यस्मिंस्तत्तिथौतस्मिन्श्राद्धंकुर्या
त्प्रयत्नतइतिदेवलेनैकोद्दिष्टएवमासांतरस्थतदहर्विधानात्॥ एको
द्दिष्टत्वंतुमासिकानामेवनत्वनुमासिकानामिति॥ अन्यस्मिन्मासांत
रेतत्तिथौमरणतिथौतस्मिन्कृष्णेशुक्लेवेत्यर्थइत्याहुः॥ वस्तुतस्तुश्रा
द्धिकस्यपूर्वमेकोद्दिष्टरूपत्वमप्युक्तं॥ अनुमासिकानामपितानिप्रक्र
म्ययोयथावार्षिकेकुर्यात्तथाकुर्यात्ततान्यपीतिवाक्येनैकोद्दिष्टरूप
तास्पष्टा॥ अतोवार्षिकमासिकानुमासिकानामपितानिप्रक्रम्ययो
निपदैकोद्दिष्टरूपाणिक्रियंतेतदामासांतरस्थतत्तिथौकार्याणि॥ य
दातुपार्वणानितानितदामृततिथिदर्शकृष्णशुक्लैकादश्यःकालाः॥
यदपिदैवेपितॄणांश्राद्धेतुआशौचंजायतेयदा॥ आशौचेतुव्यतिक्रां
तेतेभ्यःश्राद्धंप्रदीयतइतिऋष्यशृंगोक्तेराशौचांतमात्रपरत्वान्न
तद्विषयोमासांतरगततिथिरूपःकालइत्याहुः॥ तन्न॥ पूर्वोक्तात्रिव
चनेआशौचविघ्नेमासांतरगततत्तिथिरूपकालोक्तिविरोधात्॥ यद
पिमाधवनृसिंहौमासिकेआशौचेसतितदंतेआशौचभिन्नविघ्नेपुन
स्तदहरेव॥ षट्त्रिंशन्मतेचोनमासिकपरंत्वनुमासिकपरं॥ अतःआ
शौचेप्रतिबंधेनुमासिकेआब्दिकेवातदंतेदर्शकृष्णायांशुक्लायांमेका
दश्यांवेतिचत्वारःपक्षाइत्याहुःतदप्ययुक्तंनैवपरास्तं॥ प्रमाणाभावा
च्च॥ हारीतः॥ श्राद्धविघ्नेद्विजातीनामामश्राद्धंप्रकीर्तितं॥ अमावास्यादि
नियतंमाससंवत्सरादृतइति॥ माससंवत्सरान्मासिकसांवत्सरिका
त्॥ एतद्भिन्नंनियतंनित्यममावास्यादिआमेनकार्यमित्यर्थः॥ श्राद्ध
विघ्नोऽपत्नीरजोदर्शनं॥ अपत्नीकःप्रवासीचभार्यायस्यरजस्वला॥
सिद्धान्नेनकुर्वीतआमंतस्यविधीयतइति उशनोवाक्यात्॥ अमाभा
वेतुव्यासः॥ द्रव्याभावेद्विजाभावेप्रवासेपुत्रजन्मनि॥ हेमश्राद्धंप्रकु
र्वीतयस्यभार्यारजस्वलेतिइदंचामात्रहेमविधानंअमावास्यादिश्रा
द्धविषयं॥ सपाहश्राद्धंतुरजोदर्शनात्पंचमदिनेकार्यं॥ मृतेहनितुसंप्रा
प्तेयस्यभार्यारजस्वला॥ श्राद्धंतत्रनकर्तव्यंकर्तव्यंपंचमेहनीतिश्लोक

गौतमोक्तेरेतद्गृह्यपूर्वकत्वमृत्यंतराच्च॥यत्तुहेमाद्रिः भर्त्तुःपत्न्यासह
श्राद्धाधिकाराद्रजोदर्शनेनतस्याअधिकारप्रतिबंधेभर्त्तुरप्यनधि
कारात्सतिबद्धश्राद्धंकदाकार्यमित्याकांक्षायांपंचमदिनविधिरित्या
ह॥तन्न॥यदाहिपत्युःपत्न्याश्चाहवनीयकामनयाधानेधिकारःसिद्ध
स्तदाकृत्स्नपतिविद्ययैवकर्मनिर्वाहेतस्याअकृत्स्नविद्याकल्पनपरिजि
हीर्षयासहाधिकारउपपद्यते॥तस्याआहवनीयफलाद्यकामनायांतु
नसहाधिकारः॥भर्त्रधिकारिकेवलमाज्यावेक्षणादौकर्त्तृत्वमात्रंत
स्याअध्वर्य्वादेरिवहोमादौएवमाहवनीयादिसाध्येषुदर्शपूर्णमासा
दिष्वपिपत्न्याःफलकामनायांसहाधिकारः॥तदभावेतुपत्युरेवाधि
कारः॥पत्न्यास्तुकेवलमाज्यावेक्षणादौकर्त्तृत्वमात्रेनाधिकारः॥मंड
नोक्तेस्तुल्यएवाधिकारेपत्न्याश्चतत्त्वेनाधिकारश्चेति विनातस्या
एवकेवलंप्रयोगोस्त्वितिवाच्यं॥अपूर्वविद्याकल्पनगौरवात्॥पत्यु
स्तुरोगनाशेच्छयादाविवतस्याअधिकारेविनाप्यप्रतिषिद्धोधिकारतः
॥नचफलस्वाम्यधिकारिपर्यायपतिशब्दाद्व्युत्पन्नादेशङीप्प्रत्य
याभ्यांपत्नीशब्दसिद्धेर्यस्मिन्प्रयोगेतस्याआज्यावेक्षणादिकर्त्तृत्वंतन्नि
रूपितएवोपस्थितिलाघवात्पत्नीशब्देनाधिकारोगम्यतइतिवाच्यं॥
पत्नीभर्त्तुर्धनहरी॥पत्नीदुहितरश्चैव॥असुताश्चपितुःपत्न्यइत्यादिषु
पत्नीशब्दस्यफलस्वाम्ययोग्यतामात्रेदर्शनात्पत्युःरोगनाशेच्छादौ
चतस्याःफलोपधानासंभवेनयोग्यतामात्रस्यावश्यमंगीकार्यत्वात्स
र्वत्रयोग्यतयैवनिर्वाहः॥तदवच्छेदकंनूढात्वमेव॥किंच॥सर्वत्रापियु
ज्यमानएवफलेतत्स्वाम्यरूपाधिकारःफलोपहितंक्रतुप्रयोगादौतु
तद्योग्यतामात्रमेवनफलोपधानं॥योग्यतावच्छेदकेपरमननुगमः॥य
थाबृहस्पतिसवेब्राह्मणत्वंराजसूयेक्षत्रियत्वं॥एवमिहोढात्वमिति
नकश्चिद्विशेषः॥निर्णयसिंधौचेदंमयोध्ययनवादेसप्रपंचमितिनेहवि
स्तरः॥पत्न्यधिकारिकेषुतुतत्सितमातृश्राद्धादिदेवत्येषुतस्याअनधिका
रः॥प्रतिसंवत्सरंकार्यंमातापित्रोर्मृतेहनि॥पितृव्यस्याप्यपुत्रस्यभ्रा
तुर्ज्येष्ठस्यचैवहीतिससंबंधिकपितृमात्रादिपदगर्भदेवीपुराणादिव
चसांनाप्रत्यग्रवृत्तेः॥अधिकाराभावेचतत्कृतसाहित्यंगर्भस्त्राविणेवग

ष्टितं॥पाणिग्रहणाद्धिसहत्वंकर्मस्कृतथापुण्यफलेचेतिस्मृतिस्तुदर्श
पौर्णमासिकादिसहाधिकारमेवानुवदति॥नान्यत्रविधत्ते॥अतःपूर्वो
क्तवचनेनैवसहाहृद्दिनबाधः॥पंचमेह्निविधिश्चनसहाधिकारबले
नअत्रकालादर्शानुयायिनः॥अपुत्रातुयदाभार्यासंप्राप्तेमरणाह्निके
॥रजस्वलाभवेत्सातुकुर्यात्तत्पंचमेहनीतिकालादर्शलिखितश्लोक
गौतमवाक्यस्यमृतश्राद्धाधिकारिणीभार्याप्रतिप्रवृत्तेस्तदेकमूलक
ल्पनालाघवेनमृतेहनीत्यत्रापियस्यकर्त्रीभार्येतिव्याख्येयमित्या
हुः।माधवस्तुमतद्वयमपिलिलेखनतुकिंचिन्निर्णिनाय॥तातचरणा
स्तुमृतेहनीतिवचःपितृमातृभ्रातृपितृव्यादिमासिकाब्दिकोभयपरं
॥अपुत्रात्वितिश्लोकगौतमीयंतुभर्त्राब्दिकमात्रपरं॥अतोभिन्नविष
यतयानेकमूलतासंभवइत्याहुःअयंचैतेषामाशयः।श्राद्धविघ्नेद्धि
जातीनामामश्राद्धंप्रकीर्तितं॥अमावास्यादिनियतंमाससंवत्सरादृ
तइतिहारीतपर्युदस्तयोर्मासिकसांवत्सरिकयोरामश्राद्धाभावेनिर्णया
कांक्षायांमृतेहनीत्येतदुभयविषयंनाब्दिकमात्रेश्लोकगौतमीयेनोप
संहर्तुंशक्यं।ममतुप्रतिभाति।कालादर्शादावनयोर्द्वयोरपिवाक्ययोः
श्लोकगौतमीयतयालिखनान्नोपसंहारोयुक्तःसामान्यवचनानर्थ
क्यापत्तेः॥ननुचेदंवाक्यद्वयंकिंत्वेकस्मिन्नेववाक्येपाठद्वयमात्रं॥तत्रा
पुत्रातुयदेतिपाठपक्षेमृतेहनीत्येतत्पाठतुल्यानुपूर्वकंस्मृत्यंतरवा
क्यंकथंनोपसंह्रियतइतिचेत्शृणु।एतत्पाठद्वयमपिप्रमाणत्वात्स
मुच्चीयतेसंदिग्धत्वाद्धिकल्प्यतेवानाद्यः॥स्मृत्यंतरवादेनमृतेहनीत्ये
तत्पाठस्यैवप्रामाण्यनिश्चयादपुत्रातुयदेत्यादेःपाठस्यत्वप्रामाणिक
त्वात्॥यत्तुलौगाक्षिः॥पुष्पवत्स्वपिदारेषुविदेशस्थोप्यनग्निकः॥अ
न्नेनैवाब्दिकंकुर्याद्धेम्ना वामेननकचिदिति॥तद्दाराणांपुष्पवत्त्वेनिमि
त्तेवाक्यांतरप्राप्तेपंचमदिनरूपेकालेन्नेनैवकुर्यादित्येवमामहेमप
रिसंख्यामात्रार्थंनमृततिथिरूपकालविध्यर्थं॥यच्चैतस्यैवार्थस्यसं
ग्राहकंपौरुषेयंवाक्यं॥विदेशगोवाविगताग्निकोवारजस्वलायामपि
धर्मपत्न्यां॥श्राद्धंमृताहेविदधीतपाकेनामेनहेम्नानतुपंचमेन्हीति
॥तदपिमृताहेरजस्वलायांधर्मपत्न्यांसत्यांश्राद्धंनामेनहेम्नानपंचमे

न्हितुपाकैर्विद्धीतेत्येवंव्याख्येयं॥यत्तुपारिजातादौमासिकानिसपि
ण्डानिआमावास्यंतथाब्दिकं।अन्नेनैवतुकर्त्तव्यंयस्यभार्यारजस्वले
ति॥तदप्यामहेमपरिसंख्यामात्रार्थंआब्दिकंतुपंचमेन्हिअन्नेनैवेति
ग्रहणेभोजननिषेधप्रयोजकवेधमध्येग्रहणकालेनाब्दिकश्राद्धप्राप्तौ
भोक्तृब्राह्मणलाभेअन्नेनैवकार्यंतदलाभेआमेनहेम्नावानथाचगो
भिलः॥दर्शेरविग्रहेपित्रोःप्रत्याब्दिकमुपस्थितमित्यन्योवोद्दिश्यस
मर्पकः॥तेनरविग्रहेपित्रतिरिक्तस्यापिचंद्रग्रहेपिपित्रादीनांसर्वेषा
मन्नादिभिर्यथासंभवंविहितएवकार्यं॥एवमासिकमपिन्यायसाम्या
त्॥यत्तुपठंतिभर्त्तरितृतीयेरजोशेषात्तुपंचमइतितन्निर्मूलं॥इतिसर्वं
शिवम्॥अथश्राद्धकालनिषेधः॥स्कांदे॥उपसंध्यंनकुर्वीतपितृपूजांक
थंचनेति॥विष्णुः॥संध्यारात्र्योर्नकर्त्तव्यंश्राद्धंखलुविचक्षणैः॥तयो
पिचकर्त्तव्यंयदिस्याद्राहुदर्शनमिति॥संध्यामाहयोगयाज्ञवल्क्यः॥
उदयात्प्राक्तनीसंध्यामुहूर्त्तद्वयमुच्यते॥सायंसंध्यात्रिघटिकाह्य
स्तादुपरिभास्वतः॥अथपिंडजलदानेकालनिषेधः।ब्रह्मपुराणे।यदा
चश्रोत्रियोभ्येतिगृहंवेदविदग्निचित्॥तेनैकेनतुकर्त्तव्यंपिंडनिर्वपणं
हते॥वृहत्पराशरः॥युगादिषुमघायांचविषुवेप्ययनेथवा॥भरणीषुच
कुर्वीतपिंडनिर्वपणंनहीति॥कृत्यरत्नेवृद्धगार्ग्यः॥पौर्णमासीषुसर्वा
सुनिषिद्धंपिंडपातनं॥वर्जयित्वाप्रौष्ठपदींपश्चाद्दर्शस्तथैवचेति॥अस्य
समूलत्वंविमृश्यं॥ज्योतिःपराशरः॥विवाहेविहितेमासास्त्वजेयुर्होदशैवहि॥
सपिंडाःपिंडनिर्वापंमौंजीबंधेषडेवहीति॥क्वचित्प्रतिप्रसवमप्याहस
एव॥महालयेगयाश्राद्धेमातापित्रोःक्षयेहनि॥यस्यकस्यापिमर्त्यस्य
सपिंडीकरणेतथा॥कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसदेति॥अपिंड
निर्वपणंसदेति॥अपिंडकेस्वधावाचनमपिप्रतिषेधति॥वृद्धशाता
पः॥पिंडनिर्वापरहितंयत्तुश्राद्धंविधीयते॥स्वधावाचनलोपोत्रेति॥इ
तिपिंडदाननिषेधकालः॥अथश्राद्धदेशाः॥विष्णुधर्मोत्तरे॥दक्षिण
प्रवणेदेशेतीर्थादौवागृहेपिवा॥भूसंस्कारादिसंयुक्तेश्राद्धंकुर्याद्वि
चक्षणः।दक्षिणाप्रवणेदक्षिणतोवनतेत॥भू संस्कारोमार्जनलेपनादि
॥शंखः॥गोगजाश्वादिपृष्ठेषुकृत्रिमायांतथाभुवि॥नकुर्याच्छ्राद्धमेतेषु

पारक्याशुचिभूमिषु॥कृत्रिमायामहालिकादौ॥पारक्यासुपरगृही
तासु पुताश्चगोष्ठारामाद्योनपुनस्तीर्थादिस्थानानितथाचादिपु
राणं॥अटवीपर्वताःपुण्यानदीतीराणियानिच॥सर्वाण्यस्वामिका
न्याहुर्नहितेषुपरिग्रहइति॥श्राद्धस्यपूजितोदेशोगयागंगासरस्व
ती॥कुरुक्षेत्रंप्रयागश्चनैमिषंपुष्करंतथा॥व्यासः॥पुष्करेष्वक्षयं
श्राद्धंजपहोमतपांसिच॥महोदधौप्रयागेचकाश्यांचकुरुजांगले
इतिब्रह्मांडपुराणेश्राद्धकल्पेचतुर्दशमेध्याये॥त्रिशंकोर्वर्जयेद्दे
शंसर्वंद्वादशयोजनं॥उत्तरेणमहानद्यादक्षिणेनचकैकटं॥देशस्त्रै
शंकवोनामवर्ज्योवैश्राद्धकर्मणीतिक्वचित्पाठः॥महानदीफल्गूनस्या
स्तीरेप्रत्येकद्वादशयोजनकैकटमित्यर्थः॥इतिश्राद्धदेशः॥अथश्रा
द्धाधिकारिणः॥शंखकात्यायनौ॥पितुःपुत्रेणकर्त्तव्यापिंडदानोदक
क्रिया॥पुत्राभावेतुपत्नीस्यात्तत्यभावेतुसोदरः॥पुत्रग्रहणंपुत्रपौ
त्रयोरुपलक्षणं॥यथाहविष्णुः॥पुत्रःपौत्रःप्रपौत्रोवाभ्रातावाभ्रातृ
संततिः॥सपिंडसंततिर्वापिश्राद्धार्हान्नृपजायतइतिमनुः पुत्रप्रतिनि
धीनाहुःक्रियालोपान्मनीषिणइति॥पुत्रप्रतिनिधीन्दत्तकादीन्॥क्रि
यालोपात्क्रियालोपभयादित्यर्थः॥औरसादीन्द्वादशपुत्रानुपक्रम्य
॥याज्ञवल्क्योपि॥पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइति॥ततःप
त्नीतदभावेदौहित्रः॥तथाचस्मृतिसंग्रहे॥पुत्रःकुर्यात्पितुःश्राद्धं
पत्नीतुतदसन्निधौ॥धनहार्यथदौहित्रस्तद्भ्रातावाथतत्सुतः॥
चशब्दाद्दुहिता॥भ्रातुःसहोदरोभ्राताकुर्याद्वाहादितत्सुतः॥ततस्त्व
सोदरोभ्रातातदभावेतुतत्सुतः॥दौहित्रोन्येष्वित्यर्थः॥तद्भ्राताकनि
ष्ठइत्यर्थः॥यत्तुभ्रातृशब्देनासोदरभ्रातृव्याख्यानंतदाचारविरोधा
त्तत्सुतशब्देनचदौहित्रसपत्नभ्रातृसुतग्रहणेनभ्रातृपुत्रादौसत्यंत
विभक्तस्यक्रियाप्रसक्तेरुपेक्षणीयं॥अत्रयद्यपिधनहारिणएवदौ
हित्रस्याधिकारः प्रतीयतेतथापिकेवलोपिंडंकुर्यात्॥तथाचभवि
ष्यत्पुराणे॥यथाव्रतस्थोपिसुतःपितुःकुर्यात्क्रियांनृप॥उदकाद्यांमहा
बाहोदौहित्रोपितथार्हतीति॥यथाव्रतस्थःसुतःपितुःक्रियांकुर्यादेव
मधनहरोपिदौहित्रोपितुःकुर्यात्क्रियांनृप॥उदकाद्यांमहाबाहोदौहि

ऽपित्र्यार्हतीति॥ यथाव्रतस्थः सुतः पितुः मातामहस्य कुर्यादित्यर्थः
॥ अव्यवहितभ्रातृपुत्रस्याद्यभावे पिता। ततो माता॥ तदुक्तं तत्रैव॥ उ
त्सन्नबांधवं प्रेतं पिता भ्राताथवाग्रजः॥ जननी वापि संस्कुर्यान्महदे
नोऽन्यथा भवेत्॥ इह क्रमो न विवक्षितः॥ तद्बोधकस्याथशब्दादेरभा
वात्॥ यस्तु कातीयनिषेधः॥ अपुत्रायाः पतिर्दद्यात्सपुत्रायान्नतु क्वचि
त्॥ न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रज इति स स्नेहविशेषाभावे
बोध्यः॥ अपि स्नेहेन कुर्यात्तां सपिंडीकरणं विना॥ गयायां तु विशेषेण
ज्यायानपि समाचरेदिति बौधायनोक्तेः॥ मातुरभावे स्नुषादयः। तथा
चोक्तं निर्णयस्मृतिसंग्रहे॥ पत्नी भ्राता च तत्पुत्रः पिता माता स्नुषा त
था॥ भगिनी भागिनेयश्च सपिंडः सोदकस्तथा॥ असन्निधाने पूर्वेषां
उत्तरे पिंडदाः स्मृता इति भगिन्यां विशेषः कात्यायनेनोक्तः॥ अनुजो वा
ग्रजो वापि भ्रातुः कुर्वीत संक्रियां॥ ततस्तु सोदरास्तद्वत्क्रमेण तनया
स्तयोरिति॥ तदभावे मातृसपिंडमातुलादिः॥ तदुक्तं विष्णुपुराणे॥
तेषामभावे पूर्वेषां समानोदकसंततिः॥ मातृपक्षस्य पिंडेन संबद्धा
या जलेन वा॥ कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्या नृप क्रिया॥ तत्सं
घातगतैर्वापि कार्या प्रेतस्य संस्कृतिः॥ तदभावे शिष्यर्त्विगाचार्याः
॥ यथाह गौतमः॥ पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तद
भावे ऋत्विगाचार्यौ॥ तदभावे जामाता सखा च क्रमेण॥ तदुक्तं मार्कंडे
ये॥ संस्थुरुत्सन्नबंधोश्च सखा च श्वशुरस्य च॥ जामाता स्नेहतः कुर्या
दखिलं पैतृमेधिकमिति॥ तदभावे स्त्रीहारी च॥ स्त्रीहारी धनहारी च
कुर्यात्पिंडोदकक्रियामिति काच॥ पितुः पुत्रेण कर्तव्या पिंडदानोदक
क्रियेत्यत्र पुत्रशब्दे नौरसादिद्वादशविधपुत्रग्रहणं तथा पत्नीशब्दे
नापि सकलविवाहोढाग्रहणमपि प्रतिभाति॥ जामात्रभावे स्त्रीहा
री। तदभावे धनहारी। यद्यपि तयोः क्रमबोधकमथशब्दादि नास्ति
तथापि पाठक्रमादेव पूर्वं स्त्रीहारी ततो धनहारीति कार्ष्णाजिनिवाक्या
त्॥ यश्चार्थहरः स पिंडदायीति विष्णुवापस्तंबस्मरणाच्च॥ धनहारी
यदि न करोति तदा राज्ञा कारणीयः॥ सोपि सजातीयः॥ तदुक्तं मार्कंडे
यपुराणे॥ सर्वाभावे च नृपतिः कारयेत्तस्य रिक्थतः॥ सजातीयैर्नरैः स

न्यकृदाहाद्याःसकलाःक्रियाः॥सर्वेषामेववर्णानांबांधवोनृपतिर्यतः॥
अयंचात्रक्रमः॥प्रथममौरसःपुत्रःसत्वनुपनीतोपिकुर्यात्॥अन्येतू
पनीताएव॥नाभिव्याहारयेद्ब्रह्मयावन्मौंजीनिबध्यते॥मंत्रवाननुपनी
तोपिपठेदेवैकऔरसइतिसुमंतुस्मृतेः॥सएवच॥अनुपेतोपिकुर्वीत
मंत्रवत्पितृमेधिकं॥यद्यसौकृतचूडःस्याद्यदिचस्यात्त्रिवत्सरइति॥
तदभावेपुत्रिकादयः तदभावेपौत्रस्तदभावेप्रपौत्रः॥यदात्तुदत्तकपुत्रौ
रसपौत्रयोःसमवायस्तदातुदत्तकएवकुर्यात्॥गौणस्यापितस्यपुत्र
शब्देनग्रहणात्॥तदभावेपत्नी॥तदभावेरिक्थग्राहीदौहित्रः यदिरि
क्थग्राहीनभवतितदापत्न्यभावेतुसोदरइतिवाक्यात्सोदरःकनिष्ठः।
ततस्तत्सुतस्तदभावेअसोदरः॥ततस्तत्सुतस्तदभावेरिक्थग्राहीदौ
हित्रःरिक्थेभ्रातृपुत्रोत्तरंपितुःपाठः॥सदौहित्रस्यरिक्थग्राहित्वेननि
वेशाभावादुपपन्नोनावश्यंभ्रातृपुत्रोत्तरमरिक्थग्राहिणंदौहित्रंबाध
ते॥ततस्तत्सुतः ततोयद्यपिस्त्रैहस्ततोज्येष्ठभ्रातृपितरौक्रमेणाधिकारि
णौ॥ततोमाता॥मातुरभावेस्नुषा॥ततःक्रमेणज्येष्ठकनिष्ठभगिन्यौ॥
ततस्तत्सुतः ततोमातुलादिः॥ततःसपिंडाःसमानोदकाः॥प्रत्यासत्ति
क्रमेण॥ततःशिष्यर्त्विजौ॥तदभावेसखा॥तदभावेजामाता॥अत्रकु
लद्वयेपिविच्छिन्नेस्त्रीभिःकार्यानृपक्रियेतिवाक्येस्त्रीग्रहणंभार्याप
रमभिप्रेत्यमातुलाद्यभावेआसुरादिविवाहोढाक्रियाकारिणीतितात
चरणाः॥प्रमाणंत्वत्रनज्ञातं॥किंचयथा॥पितुःपुत्रेणकर्त्तव्यापिंडदानो
दकक्रियेत्यत्रपुत्रशब्देनौरसादिद्वादशविधपुत्रग्रहणंतथापत्नीश
ब्देनापिसकलविवाहोढाग्रहणंअपिप्रतिभाति।जामात्रभावेस्त्रीहा
री।तदभावेधनहारी॥यद्यपितयोःक्रमबोधकमथशब्दादिनास्तित
थापिपाठक्रमादेवपूर्वंस्त्रीहारीततोधनहारी।तयाभावेपिपुत्रादयः
कुर्वीरन्नेव॥तदुक्तंमार्कंडेयपुराणे॥पुत्रोभ्राताचतत्पुत्रःपत्नीमातातात
पापिता॥विन्नाभावेपिशिष्यश्चकुर्वीरन्नौर्ध्वदैहिकं॥पुत्रग्रहणंद्वादश
विधपुत्रोपलक्षणंभ्रातृग्रहणंसोदरोपलक्षणंधनहारीतिवाक्यंपूर्वो
क्तस्यापिनियामकं॥यदाभावेदौहित्रपौत्रौमध्येएकोधनग्राहीपरश्चन
तदाधनग्राह्येवकुर्यादिति॥यत्तुगुरुस्वरणेज्येष्ठस्यांधपंग्वादेरधनहारि

त्वात्कनिष्ठस्यतद्धारित्वे नक्रियादिप्रसंगइत्युक्तंतदिष्टापत्त्यापरिह
र्तुंशक्यं॥नन्वेवंज्येष्ठस्यसंसृष्टिनोधनहारित्वात्कनिष्ठस्यासंसृष्टिनो
ःधनहारिणःक्रियानधिकारःप्रसज्येतेतिचेत्॥प्रसज्यतांनामतस्मिन्
भ्रातृत्वंधनहारित्वंचेतिनिमित्तद्वयसद्भावात्॥तत्रक्रियानधिकारःप्र
सज्येतेतिचेत्॥प्रसज्यभेदेनकर्तृव्यवस्थाविष्णुपुराणउक्ता॥पूर्वाः
क्रियामध्यमाश्चतथाचैवोत्तराःक्रियाः॥त्रिप्रकाराःक्रियाह्येतास्ता
सांभेदान्शृणुष्वमे।आद्याद्वादशाहान्तुयाःक्रियामध्यमागतः।पूर्वास्तास
ध्यमामासिमास्येकोद्दिष्टसंज्ञिताः॥प्रेतेपितृत्वमापन्नेसपिंडीकरणाद
नु॥क्रियंतेयाःक्रियाःपित्र्याःप्रोच्यंतेतानृपोत्तराः॥पितृमातृसपिंडैः
स्तुसमानसलिलैस्तथा॥तत्संघातगतैश्चैवराज्ञावाधनहारिणा॥पूर्वाः
क्रियामध्यमाश्चपुत्राद्यैरेवचोत्तराः॥दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयै
स्तथा।इति।अस्यार्थएवं।पूर्वोक्ताराजांतानांकर्तृत्वंमध्यमासुपुत्रादी
नां॥उत्तरासुदौहित्राणामपीति।वाशब्दोप्यर्थे।एवंचएकादशाद्याःक्र
मशोज्येष्ठस्यविधिवत्क्रियाइतिअनेनाप्यैकार्थ्यंभवति॥तत्संघातगतै
रेकसार्थोनगतैराज्ञावाधनहारिणेत्यत्रमार्कंडेयपुराणवाक्येसजाती
यैस्तस्यरिक्थतःकार्येदितिप्रयोजककर्तृत्वावगमादिहापितथैवांगी
कार्यं॥नचराजस्सजातीयमृतेसाक्षात्कर्तृत्वेविजातीयैस्तुप्रयोजकक
र्तृत्वमितिवाच्यं॥एकस्मिन्शब्देवैरूप्यापत्तेरिति॥सपिंडीकरणेतुपु
त्रसद्भावेतदसन्निधानेपिसएवाधिकारीतिसएवकुर्यात्॥श्राद्धानिषो
डशादत्त्वाकुर्यान्नतुसपिंडनं॥प्रोषितावसितेपुत्रेःकालादपिचिरादपी
तिवायुपुराणे॥प्रोषितस्यापिपुत्रस्यैवाधिकारप्रतिपादनात्॥यत्तुकै
श्चिदुक्तंयेइदंचप्रेतश्राद्धसहितंसपिंडीकरणमसन्यासिनांपुत्रादिभिःक
र्तव्यंइत्यत्रादिशब्देनान्येषामपिकर्तृत्वंप्रतिभातितत्पुत्रासद्भावे।न
तुतदसन्निधौ।अनेनचवायुपुराणस्थेनविशेषविधिनापुत्राभावेतुप
त्नीस्यादित्यादिसामान्यशास्त्रंसपिंडीकरणविषयेबाध्यते॥तद्बाधनं
विनास्यगत्यंतराभावात्॥पुत्रेष्वपिज्येष्ठएवकुर्यात्॥एकादशाद्याःक्र
मशोज्येष्ठस्यविधिवत्क्रियाइतिमदनरत्नेप्रचेतोवाक्यात्॥षोडशश्रा
द्धेष्वपितस्यैवाधिकारः।श्राद्धानिषोडशापाद्यविदधीतसपिंडतामितिस

मानकर्तृत्वस्मरणात्॥मध्यमाःपुत्राद्यैरेवचेत्सुताद्यग्रहणंपौत्रादि
प्राप्त्यर्थं॥तच्चज्येष्ठादिनाशेत्वसन्निधाने॥वायुपुराणे॥प्रोषितग्रहणा
त्यान्यपि।काश्यादिषुगयायांचप्रेतकार्यंतुयत्कृतं॥सपिंडैरसपिंडैर्वा
पुत्रैरेवकृतंभवेदित्यादीनिवाक्यानितान्यनाकरणिसाकारत्वेपितीर्थमेवंप्र
शस्तं॥यत्रयेनकेनापिश्राद्धेकृतेपुत्रकर्तृकश्राद्धफलंभवतीतिप्रशंसा
र्थंननुसपिंडीकरणंकर्तव्यमित्येवंपरं॥नन्वेवंज्येष्ठस्यैवाधिकारेयवी
यसाकृतंकर्मप्रेतशब्दंविहायतु॥तज्ज्यायसापिकर्तव्यंसपिंडीकरणंपु
नरितिवाक्येप्रेतशब्दनिषेधानुपपत्तिः॥त्वदुक्तरीत्याकनिष्ठस्यानधि
कारात्।अनधिकारिणाचकृतेनसपिंडीकरणेनप्रेतत्वानपायात्॥जा
तायांचप्रेतत्वनिवृत्तौपुनरावृत्तिविधानवैयर्थ्यात्॥अतःकथमेतद्वा
क्योपपत्तिरितिचेत्उच्यते।पूर्वलिखितमदनवचनेनज्येष्ठस्यैवाधि
कारः सिद्धःसपदिकनिष्ठआहिताग्निर्ज्येष्ठेद्वीपस्थितातदायोद्यते।त
थाहि॥नासपिंड्याग्निमान्पुत्रःपितृयज्ञंसमाचरेत्॥नपार्वणंनाभ्यु
दयंकुर्वन्नलभतेफलमितिसपिंडीकरणंविनापिंडपितृयज्ञानधिका
रात्पिंडपितृयज्ञस्यचावश्यकर्तव्यात्तादृशंप्रतिसपिंडीकरणंविधी
यतेतेनैवचप्रेतत्वनिवृत्तिरूपेफलेजातेज्येष्ठस्यपुनरावृत्तिःकेवलं
वचनात्॥नचज्येष्ठंप्रत्येवेदंविधानंभवतिकनिष्ठंप्रतीतिवाच्यं॥
यजमानोग्निमान्राजन्प्रेतोवाप्यग्निमान्भवेत्॥द्वादशाहेतदाका
र्यंसपिंडीकरणंसुतैरित्यनेनैवतंप्रतिप्राप्तत्वादिदंकनिष्ठंप्रत्येवपिं
डपितृयज्ञप्रयुक्तसपिंडीकरणंविधीयते॥पत्न्यादीन्प्रतितुएवम
नन्यथासिद्धवचनाभावान्नाधिकारः।एवंचयद्यपितेभ्रमादिनाकृ
तंतदाज्येष्ठोयथाविध्येवावर्तयेन्नप्रेतशब्दत्यागेनेति॥यद्वाकृह्निका
मानांपुत्राणांपृथक्पृथक्सपिंडीकरणमुक्तंतत्रयदिकनिष्ठेनकाम्यंत
त्कृतंतदातेनैवप्रेतत्वनिवृत्तौप्रेतशब्दंविहायेतिपुनर्विधानंयुक्तमेव
॥वृद्धौतुयेनकेनापिकृतेनावर्त्तनीयं॥तथाचलघुहारीतः।भ्रातावाभ्रा
तृपुत्रोवासपिंडःशिष्यएववा॥सहपिंडक्रियांकृत्वाकुर्यादभ्युदयंनत
इति॥अत्रयस्यकस्यापिसगोत्रसपिंडस्यसपिंडनंतत्पुत्रेणापितेपि
व्यवहितेपिसपिंडःकुर्यादितिकेचित्॥युक्तंतुयस्याभ्युदयिकश्राद्धं

तर्गतदेवताभूतस्यसपिंडनंविनानतन्निर्वहतीतितस्यैवेहवाक्येसपिं
डनंविधीयते॥आकांक्षितविधानात्॥अन्यथाभिन्नजातीयगुरोरपि
सपिंडनंत्रिपक्षेणकार्यंस्यात्॥मासिकानामितिशास्त्रापकर्षःपुन
रपकर्षणंचज्ञेयं॥सपिंडीकरणादर्वागपकृष्यकृतान्यपि॥पुनर
प्यपकृष्यन्तेवृद्ध्युत्तरनिषेधनादितिशाट्यायनिस्मरणात्॥अत्रयद्य
पिवृद्ध्युत्तरनिषेधनादितिहेतुस्तथापिसर्व्यंहिमनुष्याःप्रथममंज
तइतिवदप्रापकत्वाद्विधिःकल्पनीयः॥कात्यायनेनापिस्पष्टीकृतः
॥निर्वर्त्यवृद्धितंत्रंतुमासिकानिनतंत्रयेदिति॥वृद्धिंकृत्वामासिकानि
नकुर्यादित्यर्थः॥तथाचकनिष्ठसाग्निकेकामनयातुतिष्ठत्सोवाज्ये
ष्ठत्वमात्रापवादः॥वृद्धौतुपुत्रस्यापीतिनिर्णयः॥ननुपुत्राद्यभावेदौ
हित्रसत्वेपत्न्याअनधिकारःप्रसज्यतेतिचेत्॥नपुत्राभावेतुपत्नीस्या
दित्यत्रिनदौहित्रैर्वानरश्रेष्ठेत्यनेनबाधितेपिअपुत्रवत्सलीपुत्र
कार्यंसमाचरेदित्यनेनाधिकारिणी॥नचपुत्राभावेतुइत्यनेनइद
मेकार्थंतस्यनाशासन्निध्योःप्रवृत्तत्वात्॥अपुत्रेत्यस्यचासंनि
ध्येःप्रवृत्तेः॥अपुत्रायाःपत्न्याःपतिःऔर्ध्वदैहिकंकुर्यात्॥अतःपु
त्राद्यभावेपत्नीतदभावेदौहित्रःएवंपितृव्यादीनामपि॥यथाहजा
तूकर्ण्यः॥पितृव्यभ्रातृमातृणामपुत्राणांतथैवच॥मातामहस्यापु
त्रस्यश्राद्धादिपितृवद्भवेदितिपितृश्राद्धित्यावश्यकत्वार्थंनतुपार्वण
विधानार्थमितिहेमाद्रिः॥मातृपदंसपत्नमातृपरं॥पितृव्यभ्रातृपु
त्राणामेकोद्दिष्टंनपार्वणमितिकात्यायनोक्तेः॥भ्रातुरपिज्येष्ठस्यैव॥य
थाहमनुः॥प्रतिसंवत्सरंकार्यंमातापित्रोर्मृतेहनि॥पितृव्यस्याप्यपुत्र
स्यभ्रातुर्ज्येष्ठस्यचैवहीति॥अत्रिरपि॥भ्रात्रेभगिन्यैपुत्रायस्वश्वशुरेमातु
लायच॥पितृव्यगुरवेश्राद्धमेकोद्दिष्टंनपार्वणं॥एकवचनंत्वादरे॥नचै
वममावास्यादिष्वपिश्राद्धप्रसक्तिरितिवाच्यं॥पूर्वोल्लिखितजातूकर्ण्य
वाक्यस्यसर्वाहप्रकरणपाठात्॥अतश्चसर्वाहश्राद्धमावश्यकंनान्यत्
॥दौहित्रस्यत्वमावास्यादौमातामहश्राद्धमावश्यकमेव॥पितरोयत्रपूज्यं
तेतत्रमातामहाअपि॥अविशेषेणकर्तव्यंविशेषान्नरकंव्रजेदितिधौ
म्योक्तेः॥एवंपित्रादीनांपार्वणंपितृव्यादीनामेकोद्दिष्टमेव॥दाक्षिणास

स्तुपितृव्यभ्रातृमात्रादिश्राद्धंपार्वणमाचरंति॥तत्रमूलंपितृवदितिपार्व
णत्वस्याप्यतिदेशइतिकेचित्तुवस्तुतस्तु॥पितृव्यभ्रातृमातॄणांज्येष्ठा
नांपार्वणंभवेत्॥एकोद्दिष्टंकनिष्ठानांदंपत्योःपार्वणंमिथइतिश्राद्धदीप
कलिकायांचतुर्विंशतिमतवचनात्ज्येष्ठानांपार्वणंकनिष्ठानामेको
द्दिष्टं॥एवंचपूर्वोक्तानिकात्यायनवचांसिकनिष्ठपितृव्यादिपराणि॥यत्तु
भ्रातुर्ज्येष्ठस्यकुर्वीतज्येष्ठोवानुजस्यच॥दैवहीनंतुतत्कुर्यादितिधर्मवि
दब्रवीत्॥दैवहीनमेकोद्दिष्टंकार्यं॥अनाद्यगर्भेज्येष्ठोपिभ्रातर्यद्दिनिग
द्यते॥तत्तेसपिंडनान्तस्यनैवपार्वणमाचरेदिति तथा॥प्रतिसंवत्सरंका
र्यमेकोद्दिष्टंनरैःस्त्रियाः॥तथा॥सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते
॥अपुत्राणांचसर्वेषामपत्नीनांतथैवचेतिपृथ्वीचंद्रोदयमात्रधृतवृद्ध
पराशरशातातपमार्कंडेयप्रचेतोवचसामाचारतोव्यवस्थेतिसाप्यति
देशइतितुसर्वंशिवं॥अथगौणपुत्राणांविशेषः॥तत्रदत्तौरसेतरेषांतु
पुत्रत्वेनपरिग्रहइतिकलिनिषिद्धेषुपाठात्दत्तातिरिक्तागौणाःपुत्रा
निषिद्धाः॥दत्तकस्तुद्विविधः॥केवलोद्व्यामुष्यायणश्चादानकालेदात्
प्रतिगृहीतृभ्यामावयोरसावितिसंविदोकरणेकेवलः॥तत्करणेद्व्यामु
ष्यायणः।तत्रकेवलःप्रतिग्रहीतुरेवश्राद्धादिकुर्यात्॥जनकस्याप्यपु
त्रत्वेप्रतिग्रहीष्यन्नित्यादिकेप्रतिग्रहविधौभाव्याकांक्षायांजन्यपुत्रत्वा
व्यपुत्रत्वस्यभाव्यत्वासंभवाच्छ्राद्धादिपुत्रकार्यप्रयोजकंप्रतिग्राह्य
गतदृष्टंभाव्यमंगीकर्त्तव्यं॥गोत्ररिक्थेजनयितुर्नभजेद्दत्रिमःसुतः॥गो
त्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधेतिमनूक्तेश्चदत्रिमोदत्तकः॥गो
त्ररिक्थेनुगच्छतीतिगोत्ररिक्थानुगःप्राप्यस्तमनियतइतियावत्॥पिं
डस्तापिंड्यंस्वधाश्राद्धं॥विवेचयिष्यतेचेदंव्यवहारमयूखे॥द्व्यामुष्या
यणस्यश्राद्धेविशेषमाहदेवलः॥द्व्यामुष्यायणकादद्युर्द्वाभ्यांपिंडोद
केपृथक्॥षण्णांदेयास्तुषट्पिंडाएवंकुर्वन्नमुह्यति॥आपस्तंबः॥यदि
द्वयोःपितास्यादेकैकस्मिन्पिंडेद्वौद्वावुपलक्षयेदिति॥इदमापस्तंबप
रे॥पिंडशब्दश्चश्राद्धोपलक्षणं॥अतएवप्रवराध्याये॥द्वेश्राद्धेकुर्यादे
कश्राद्धंवापितृत्वृद्धिश्चैकपिंडेद्वावनुकीर्त्तयेत्॥प्रतिग्रहीतारंचोत्पादयि
तारंचातृतीयात्पुरुषादिति॥द्व्यामुष्यायणपुत्रस्यपिंडभेदेअमावास्या

यामेकः पित्रे द्वौ द्वावितरयोरिति पंच॥ द्व्यामुष्यायणपौत्रस्य प्रपितामह
ह एव द्वौ पिंडाविति चत्वारः॥ केचित्तु॥ एकस्मिन् पिंडे द्वौ द्वाविति कुंडगो
लकपरं वर्णयंति॥ तत्तु न स्मृत्यंतरसंवादि॥ शूद्रानुपेतयोरप्यमावा
स्यादिश्राद्धेधिकारो मात्स्ये॥ अमावास्याष्टकाकृष्णपक्षे पंचदशीषु
चेत्युक्त्वा॥ एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु॥ श्राद्धं साधारणं ना
म सर्वकामफलप्रदं॥ शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुध इति॥ अ
मावास्याष्टकादौ होमस्तु पाण्यादिषु लौकिकाग्नौ वा कार्यः॥ इदं तु श्रा
द्धविवेके लेखि॥ केषुचित्पुराणपुस्तकेषु नोपलभ्यते॥ जीवत्पितृक
स्यापि क्वचिदधिकारो मैत्रायणीयपरिशिष्टे॥ उद्वाहे पुत्रजनने पित्र्ये
ष्ट्यां सौमिके मखे॥ तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति॥ उ
द्वाहे द्वितीयादौ प्रथमे पितुरेवाधिकारान्नांदीश्राद्धं पिता कुर्याद्द्वितीयपा
णिग्रहे पुनः॥ अत ऊर्ध्वं सुतः कुर्यात्स्वयमेव तु नांदिकमिति मदनरत्नधृ
तस्मृत्यंतरात्॥ सौमिक इति सोमयागकमात्रस्य॥ अन्यथाधानांगे त
स्मिन्नधिकारो दुर्घटः स्यात्॥ काम्येधिकारविधेः प्राप्त्यत इति चेत्स
त्यं॥ यागेनापूर्वं कृत्वा स्वर्गं कुर्यादितिवच्छ्रुतानुपपत्तिकशब्दकल्पना
मपेक्ष्य सौमिके मख इत्यत्र लघीयः स्याल्लक्षणयैवाधिकारसमर्पणं
न्यायः षडिति न परिसंख्या॥ अत एवान्वष्टक्यं गयाप्राप्तौ सत्यां प्र
मृते हन्नि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीत्यान्वष्टकादाव
धिकारः संगच्छते॥ मैत्रायणीयपरिशिष्टेपि॥ महानदीषु सर्वासु तीर्थे
षु च गयामृते॥ जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवदिति॥ गया
मृत इति तदुद्देश्यकवैधयात्रापूर्वकश्राद्धपर्युदासार्थं॥ अवैधगमने तु
पितुर्देवताउद्दिश्य श्राद्धं कार्यमेव तत्रापि मृतमातृकश्चेत्पितृपत्नीत्वेन
तामुद्दिश्य पिंडादि दत्वा मातृत्वेनाप्युद्दिश्य दद्यात्॥ गयां प्रसंगतो ग
त्वा मातृश्राद्धं समाचरेदिति वाक्यादिति केचित्॥ तत्त्वं तु॥ गयामृत इति
पर्युदस्तं गयाश्राद्धं जीवत्पितृकस्य मृतायां मातरि तदुद्देश्यकमेव प्रति
प्रसूयते॥ वाक्ये तथैव श्रवणात्॥ पर्युदासवाक्ये यात्रानुपादानेन त
त्पूर्वकश्राद्धपर्युदासे मानाभावाच्च॥ गयां प्रसंगतो गत्वेति तु पित्राद्युद्दे
श्यकगयायात्रायां जीवत्पितृकं प्रत्यप्राप्तेरनुवादकमेव॥ एषु एव च का

ल्लादर्शस्मृतिदर्पणादीनामप्याशयः॥ अत्रदेवता आहकात्यायनः॥
वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति॥ येभ्यएवपितादद्यात्तेभ्योद
द्यात्स्वयंसुतइतितातेसतीतिवृद्धितीर्थसंन्यस्तपतितपदैःप्रत्येकंसं
बध्यते॥ तत्राद्याभ्यांवैयधिकरण्येनोत्तराभ्यांसामानाधिकरण्येन
वृद्धौतीर्थेचेत्यनेकनिमित्तसमावेशेवाक्यभेदापत्तेरर्द्धमंतर्वेदिमिनो
त्यर्द्धंबहिर्वेदीत्यंतर्वेदिपदेसंधिदेशस्यजातपुत्रःकृष्णकेशोग्नीनाद
धीतेतिजातपुत्रादिपदानीवचयोविशेषस्यवृद्धितीर्थपदेजीवत्पितृ
काधिकारिकश्राद्धमात्रोपलक्षके॥ उक्तप्रकारेणतेष्वपिजीवत्पितृक
स्याधिकारस्यसमर्थितत्वात्तेषांदेवताकांक्षासद्भावात्॥ जीवन्न्य
स्तपतितपितृकस्यतुदर्शश्राद्धादावप्यधिकारः॥ उक्तरीत्यैनपितृदेवता
एवैनंप्रत्युपदिश्यंते अतएवजीवत्पितृकस्यमातरिमातामहेचमृ
तेपितृत्वनिरूपितमातृमातामहपार्वणयोःप्राप्तिः॥ किंतुपितृनिरू
पितयोरेव॥ पितामहेपिजीवतितन्निरूपिताएवदेवताः॥ पौत्रस्यपि
तृनिरूपितत्वसंबंधेनैतद्वचनादेवप्राप्तेः॥ अत्रद्वेवावपंतीतिवद्देवका
रेणशब्दतस्तासांपरिसंख्यातत्वात्॥ सुमंतुर्हारीतौ॥ जीवेपितरिवै
पुत्रःश्राद्धकालंविवर्जयेत्॥ येभ्योवापिपितादद्यात्तेभ्योदानंप्रचक्ष
ते॥ पितुःपितृभ्योवादद्यात्सपितेत्यपराश्रुतिः॥ गर्भाधानपुंसवनसी
मंतोन्नयनजातकर्माद्यपत्यसंस्कारेष्वाश्वलायनानांप्रतिप्रसूयं
ते॥ प्रयोगपारिजातेआश्वलायनगृह्यपरिशिष्टे॥ जीवत्पितासुतसं
स्कारेषुमातृमातामहयोस्तस्यांजीवंत्यांमातामहस्यकुर्यादिति॥
अनयोरन्यतरजीवनेतुपितृनिरूपितःसवर्गइत्युभयोर्जीवनेतुवर्ग
त्रयमपिपितृनिरूपितमेवयेत्वेतद्वचसांस्वीयमातृमातामहपार्वण
एवभवतिनपितृपार्वणमित्याहुः। तन्न॥ अग्निहोत्रेमान्नवर्णिकाग्नि
तृर्पयोःपृष्ठभावेनप्रजापतिविधाविवतयोःपितरोयत्रपूज्यंतेतत्रमा
तामहाअपीतिपितृप्राप्तेर्मातामहप्राप्तावुपजीव्यत्वेनतद्बाधायोगा
न्मानाभावाच्च॥ यत्तुकौंडिन्यः॥ दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकं
।नजीवत्पितृकःकुर्यात्तिलैःकृष्णैश्चतर्पणमिति तत्प्रतिनिधीभूयैतानि
श्राद्धानिनकुर्यादित्यर्थः॥ एतेनाष्टकादिषुसंक्रांतौमन्वादिषुयुगादिषु॥

चंद्रसूर्यग्रहे पाते स्वेच्छया पूज्ययोगतः॥ जीवत्पिता नैव कुर्याच्छ्राद्धं
काम्यं तथाखिलमिति क्रतुवचोपि व्याख्यातं॥ एतैर्वाक्यैर्जीवत्पितृका
धिकारिकविधिप्राप्तश्राद्धनिषेधे तु नतोपशोकरोतीति वह्निकल्पापः
त्तिः॥ किंच जीवत्संन्यासिपतितपितृकयोरपि निषेधप्रवृत्तेः श्राद्धाधि
काराभावेन तन्न देवताविधेरनुपपत्तिः॥ ननु भवत्पक्षे तयोः कथं श्राद्धे
धिकारः॥ दृष्टो तीर्थे चेति कात्यायनेनैव देवताविशिष्टश्राद्धविधेर्दार्शिका
द्यपेक्षया कर्मान्तरापत्तिः॥ एतौ प्रति विशिष्टविधिः इतरजीवत्पितृकं प्र
ति विवाहादिश्राद्धे देवतामात्रविधिरिति वैरूप्यापत्तिश्चेति चेत् शृ
णु॥ सर्वेप्यमावास्याष्टकादिश्राद्धविधयो जीवत्पितृमृतकसाधारणे
नैव प्रवर्त्तन्ते तत्र जीवतिपितरि दर्शश्राद्धप्रधानपित्रादिपार्वणदेवता
भावादनुदिते होमवुपांशुयाजवल्लुप्यंते॥ एतस्यैवानुवादकं॥ सपितुः
पितृकृत्येषु अधिकारो न विद्यते॥ न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रु
तिरिति कात्यायं॥ येभ्य एव पिता कुर्यात्तेषां कुर्यात्सि तरि पितामहे च जी
वति येषां पितामहः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात् य
स्य पिता प्रेतः स्यात्स पित्रे पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्या
द्यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडौ दत्वा ———— पि
तामहाय दद्याद्यस्य पितामहः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहा
त्पराभ्यां द्वाभ्यां दद्याद्यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स ताभ्यां पिं
डान्दत्वा पितामहपितामहाय दद्यात्॥ मातामहानामप्येवं श्राद्धं कुर्या
द्विचक्षणः॥ मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति मातामहादी
नामेकद्वित्रिषु जीवत्सु सर्वं पितृपार्वणवदित्यर्थः। मात्रादिष्वप्येवं न्या
यसाम्यात्॥ मंत्रोहेनेत्यादि व्याख्यास्यते ऊहप्रकरणे॥ स्त्रीणामपि वृ
त्तौ महादानकन्योद्वाहादिप्रधानेधिकारात्तदंगे नांदीश्राद्धेप्यसौ स्पष्ट
एव॥ तत्र जीवद्भर्तृकायाः पूर्त्तव्रतमहादानादिषु तावत्पुरुषस्येव स्वी
यमातृपितृमातामहपार्वणानीति॥ भर्त्रे सन्निधाने न तस्याः कन्योद्वा
हे स्वीया भर्तुर्वा पार्व-णत्रयदेवताः॥ अयं च विकल्पः स्वपितृभ्यः पि
ता दद्यादिति श्लोकव्याख्यानेन नांदीश्राद्धप्रकरणे स्पष्टो भयं चेत् वि
धवायास्तु पुत्राभावे तद्दैवाधिकारः॥ अपुत्रा पुत्रवत्पत्नी पुत्रकर्म समा

चरेदिति वचनात्पुत्रवदिति यतिना प्रकरणानुरोधाच्छ्राद्धे क्रियातु
ल्यतोक्त्या पुत्रकर्तृकश्राद्धवद्देवदेवताः॥ उद्देश्यत्वं तु पित्रादीनां भर्तृ
त्वादिना तन्मातामहानां च पितृत्वादिना यं प्रति येन रूपेण संबंधिना
तं प्रति तेनैव रूपेणोद्देश्यत्वात् अत एव स्मृतिदर्पणे॥ स्वभर्तृप्रभृतित्रि
भ्यः स्वपितृभ्यस्तथैव च॥ विधवा कारयेच्छ्राद्धं यथाकालमतंद्रितेति
।तथैव त्रिभ्य एवेत्यर्थः। इदं च षड्दैवत्यदर्शश्राद्धादिविषयं॥ अत्र
स्वपितुरपुत्रपौत्रत्व एव तत्पार्वणमिति दिवोदासीये॥ तन्न। अपुत्राणा
मेवेति विशेषवचनाभावात्॥ स्वपितरि जीवति द्वारलोपात्तत्पार्वण
लोप एव॥ मृतभर्तृकायास्तु श्वश्र्वादिपार्वणमपि कृताकृतमिति नव
दैवत्यं॥ केचिन्मृतमातृकायाः स्वमात्रादिपार्वणमपीति द्वादशदै
वत्यमाहुः॥ अपरे स्वमातामहपार्वणेन पंचदशदैवत्यं॥ तत्राप्या
द्यायां जीवने द्वारलोपाल्लोप इति च॥ एतत्प्रथमपुत्रविषयं युक्तमिति
पितामहचरणाः॥ यत्तु स्मृतिसंग्रहे॥ चत्वारः पार्वणाः प्रोक्ता विध
वायाः सदैव हि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ ततो मा
तामहानां च श्राद्धदानमुपक्रमेदिति॥ तथा॥ श्वश्रूणां च विशेषेण
मातामह्यास्तथैव चेति॥ एतन्मूलं मृग्यं श्वश्र्वादिमात्रादिपार्वणयो
रकरणे भर्तृपितृपार्वणयोरेव यथायोग्यं सपत्नीकानामिति वाच्यं।
अन्येषां तु यथासंभवमेकोद्दिष्टानीति इदं च महालयादिश्राद्धविषयं
॥यत्तु॥ भर्तुः श्राद्धं तु या नारी मोहात्पार्वणमाचरेत्॥ न तेन तृप्यते भर्ता
कृत्वा तु नरकं व्रजेदिति वचनं तस्या हएकोद्दिष्टप्रशंसार्थं॥ न तु स
र्वथा पार्वणप्रतिषेधार्थमिति दिक्॥ इति श्राद्धाधिकारिणः॥ अथ का
लदेशकर्तृणामैक्येन तंत्रप्रसंगापविचारः॥ तत्रांगप्रधानानां तुल्य
त्वेनागृह्यमाणविशेषत्वे भिन्नप्रयोगविधिपरिगृहीतानामपि कर्मणां
प्रधानानामंगानां च तंत्रेणानुष्ठानं॥ यथा संक्रांतियुगादिमन्वादिव्य
तीपातश्राद्धानां च सौर्ये चित्रादिष्वपि तथापत्तिः प्रधानभेदात्॥ न
चांगानामेव दर्शपूर्णमासयोरिव तथास्तु द्वयोरपि प्रयोगप्राप्त्यभा
वप्रसंगेन वैगुण्यापातात्॥ दर्शपूर्णमासयोस्तु पौर्णमास्यां पौर्णमास्या
यजेतामावास्यायाममावास्यया यजेतेति वाक्याभ्यां प्रतित्रिकं प्रयाजा

थ्वंगानां तंत्रनेति॥ तथाहि॥ अनयोर्वाक्ययोर्विधेयकालगतैकवच
नस्योपादेययागतसाहित्यस्य चविवक्षितत्वात्तृतीयांतत्वेन चसां
गभावनोपादानादेकस्यां पौर्णमास्याममावास्यायांच सांगानि सहि
तानि त्रीणि प्रधानानि कार्याणीत्यर्थप्रतीतेः॥ साहित्यस्य च स्वरू
पतः प्रधाने संभवादंगद्वारा तदुपपत्तिरिति युक्तातंत्रता॥ ननु भिन्नप्र
योगविधिपरिगृहीतेषु न्विद्यासोमादिषु तथा किंचित्प्रमाणमस्ति प्र
योगप्रांसु भावभंगबाधकं॥ येषु त्वमावास्यासंक्रांत्यादिनिमित्तके
षु श्राद्धेषु प्रधानानामंगानां चाल्पत्वबाहुल्यकृतं विशेषग्रहणं तेषु
महतात्पस्य प्रसंगेन सिद्धिः॥ यथामाश्राद्धेन संक्रांतियुगादिमन्वादि
व्यतीपातश्राद्धानां तत्र सर्वेषां तंत्रिणां संकल्पवाक्ये उल्लेखः॥ संक्रांति
युगादिश्राद्धं तंत्रेण करिष्य इति प्रसंगे तु महालंत्रवनोमाश्राद्धादेरेवो
ल्लेखः॥ न प्रसंगिनः संक्रांत्यादिश्राद्धस्य एतेनामासंक्रांतिव्यतीपा
तश्राद्धानां तंत्रेण संकल्पं वदन् हेमाद्रिरपास्तः॥ अमाश्राद्धस्य महत्ते
न विशेषग्रहणात्प्रसंग एवान्यथोचितः॥ यत्तु कालादर्शे॥ युगादिश्रा
द्धेन च दर्शश्राद्धस्य सिद्धिरुक्ता नित्यदार्शिकयोश्चोदकुंभमासिकयो
रपि दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः॥ दार्शिकस्य च मन्वा
देः संपाते श्राद्धकर्मणां॥ प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेदिति॥
तत्र दार्शिकस्य बहुलविधानत्वेन तेनैव युगादिमन्वादिश्राद्धसिद्धे
र्युक्तत्वात्॥ क्वचिद्देवताभेदेन तत्रापवादमाह॥ स एव॥ नित्यस्यो
दकुंभस्य दर्शमासिकयोरपि॥ नित्यस्य चाब्दिकस्यापि दार्शिकाब्दि
कयोरपि॥ युगाद्याब्दिकयोश्चापि मन्वाद्याब्दिकयोरपि॥ प्रत्याब्दि
केषु चालभ्ययोगेषु विहितस्य च॥ संपाते देवताभेदाच्छ्राद्धयुग्मं समा
चरेदिति अत्र नित्ययुगदर्शयुगादिमघाद्यलभ्ययोगश्राद्धेषु सपत्नी
काः पितरो देवताः उदकुंभमासिकाब्दिकेषु त्वपत्नीका इति देवताभेद
इत्याशयः॥ यत्त्वन्वष्टक्यादौ नवदैवत्यविधानात्केवलानामेव
पित्रादीनां देवतात्वं तत्रान्वष्टक्यादिना मासिकाब्दिक
योरपि प्रसंगतः सिद्धिः॥ नन्वत्रत्वयं प्रसंगः सपिंडके न तु दार्शिके न त
दभावांगकस्य संक्रांत्यादिश्राद्धस्य न प्रसंगो विरोधादिति चेन्न पिंड

दानादीनां पर्युदासेन तदभावस्य संक्रान्त्यादावंगत्वाभावेन विरोधा
भावात्॥ न च पिंडदानप्राप्तिः प्रकृतौ॥ अयनद्वितये श्राद्धं विषुवद्वित
ये तथा॥ संक्रान्तिषु च सर्वासु पिंडनिर्वपणादृत इत्यादि निवर्तकवा
क्यं तु विकृताविति सन्निधानाभावमेवैकवाक्यत्वाभावेन पर्युदासाभावा
त्ततो पशोकरोतीतिवन्निषेधांगीकारेण विकल्प इति वाच्यं॥ पिंड
दानप्राधान्यस्य प्राक्प्रतिपादितत्वेन संक्रान्तौ श्राद्धकार्यमित्यादि
विधिनैव तस्याप्तौ निषेधसन्निधाने न पर्युदासोपपत्तेः। यदा त्वेकपु
त्रजननोत्तरं स्नानादौ क्रियमाणे द्वितीयपुत्रोत्पत्तिस्तदा जातकर्म
भेदेपि वृद्धिश्राद्धं तंत्रेण॥ अगृह्यमाणविशेषत्वात्॥ यत्र तु निमि
त्तयोर्वापर्ये नैमित्तिकयोर्वा विरोधस्तत्र निमित्तक्रमानुरोधेन नै
मित्तिकानि कार्याणि॥ द्वे बहूनि निमित्तानि जायेरन्नेकवासरे॥ नैमि
त्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमादिति॥ पतितिथावन्वारूढा
याः पत्न्याः क्षयाहश्राद्धं तंत्रेणेति निर्विवादं॥ तत्र ब्राह्मणपिंडयोरैक्य
मिति हेमाद्र्यनुसारिणः॥ ब्राह्मणपिंडयोर्भेदः विश्वेदेवादीनां त्वाराद
पकारकाणां तंत्रतेति माधवप्रयोगपारिजातकारादयः॥ भिन्नति
थावन्वारूढभिन्नमेव श्राद्धमिति निबंधकाराः॥ पतितिथावेव वैश्व
देवाघाराद्युपकारकांगतंत्रता ब्राह्मणभोजनपिंडदानयोः पार्थक्य
मित्येव दाक्षिणात्यानुष्ठानं। युक्तं चैतत्॥ या समारोहणं कुर्याद्भर्तु
श्चित्यां पतिव्रता॥ तां मृताहनि संप्राप्ते पृथक्पिंडे नियोजयेत्॥ प्रत्य
ब्दं च नवश्राद्धं युगपच्च समापयेदिति भृगूक्तेः॥ मृताहनि मासिके
संप्राप्ते पृथक्पिंडे नियोजयेच्चकारात्प्रत्यब्दे वार्षिकेपीत्यर्थः॥ एक
चित्यां समारूढौ दंपती निधनं गतौ॥ पृथक्श्राद्धं तयोः कुर्यादोदनं
च पृथक्पृथक्॥ इति गार्ग्योक्तेश्च॥ अत्र तु श्राद्धशब्दस्य ब्राह्मणभो
जनपिंडदानरूपप्रधानवचनत्वात्तन्मात्रपृथक्त्वे तयान्येषामा
राद्युपकारकांगानां तंत्रता॥ ओदनपदं तूपादानलक्षकमिति हेमा
द्रिः॥ तन्न॥ श्राद्धपदेनैव प्रधानभूतपिंडदानोपादानसिद्धेः॥ मृताहनि
समासेन पिंडनिर्वपणं पृथक्॥ नवश्राद्धं तु दंपत्योरन्वारोहण एव ति
तिलोगासिवाक्येपि सामान्यतस्तिथिभेदे तदभेदे वान्वारोहणे सति

दंपत्योः मृततिथिनिमित्तके श्राद्धे समासो विधीयते॥ अविशेषश्रु
तस्यएकतिथिगतानुगमनमात्रविषयत्वरूपसंकोचेप्रमाणा
भावात्॥ लघुभूतमृताहश्राद्धत्वरूपोद्देश्यतावच्छेदकसंभवेगु
रुभूतएकदिनमृताहश्राद्धत्वरूपस्यायुक्तत्वाच्च॥ नचभिन्नति
थिनिमित्तकयोरेकाहाप्राप्तेः कथं तत्रसाहित्यविधिरितिवाच्यं॥ अ
भ्युदितेष्टौसहश्रपयतीतिवाक्येसहत्वमात्रविधौदध्यंशेश्रपण
स्याप्राप्तस्यार्थादाक्षेपवत्साहित्यविधानान्यथानुपपत्त्यैकका
लताक्षेपात्॥ नचैककालताक्षेपेविनिगमनाविरहात्पत्नीमृता
हएवभर्त्तुःश्राद्धंस्यादितिवाच्यं॥ अन्वारूढाया भर्त्तृमरणसमका
लीनमरणप्रतिपादकार्थवादैःसंदिग्धार्थनिर्णयात्॥ अथवापस
नश्रूयतेवार्त्ता यावद्द्वादशवत्सरं॥ कुशपुत्रकदाहेनतस्यस्यादवधा
रणमितिअत्रदाहदिनेआहार्यमरणनिश्चयवद्भर्त्तृमृताहेमरणमा
हार्यमर्थवादेभ्यःवस्तुतस्तुशंखताप्रायासंतिष्ठतेइत्यत्रप्रथमोप
स्थितेराशयशंकायुवाकांतवृद्धवद्भर्त्तृमृततिथेःप्राथम्यान्नैवेह
त्यंननुमृताहनीतिवाक्येपिंडनिर्वपणमितिविवक्षितत्वात्पिंड
समासएवापरैर्विधीयते॥ ननुश्राद्धसमासइतिचेन्न॥ नवश्राद्ध
मितिश्राद्धपदोपादानेनपिंडनिर्वपणपदस्यापिश्राद्धपरत्वेनभृगु
गार्ग्यवाक्यसमानार्थकत्वस्यैवोचितत्वात्॥ एकचित्यांसमारूढ
मृतयोरेकबर्हिषि॥ पित्रोःपिंडान्पृथग्दद्यात्पिंडं त्वापस्तुतस्तुतद्द
ग्निस्मृतिवाक्यंत्वापरं॥ इदंचसमासविधानमाब्दिक — — विष
यमितिहेमाद्र्यनुसारिणः॥ तत्रपितुर्मृताहनिसंप्राप्तेपृथक्पिंडानि
योजयेत्॥ प्रत्यब्दंचेत्यत्रमृताहनीत्यस्यमासिकपरत्वेनगोबली
वर्दन्यायेनचसर्वविषयत्वात्॥ नवश्राद्धमात्रंतुपृथक्लोगाक्षिवा
क्यात्॥ एतद्विरुद्धंनवश्राद्धंयुगपत्तुसमापयेदितिभृगुवाक्यंत्वाप
रमग्निस्मृतिवाक्यवत्॥ विस्तरस्तुमातचरणकृतेद्वैतनिर्णयेबोध्यः
॥ कार्ष्णाजिनिः॥ पित्रोःश्राद्धेसमंप्राप्तेनवेपर्युषितेपिवा॥ पितुःपूर्वंसुतः
कुर्यादन्यत्रासतियोगतः॥ पर्युषितेचिरंतने॥ अन्यत्रमातृपितृव्यति
रिक्तविषये॥ अथश्राद्धद्रव्याणि॥ तत्रमनुः॥ तिलैर्व्रीहियवैर्माषैरद्भि

मूलफलेन वा॥ दत्तेन मासं प्रीयंते विधिवत्पितरो नृणां॥ कालशाकं
महाशल्कः खड्गलोहामिषं मधु॥ आनंत्यायैव कल्प्यंते मुन्यन्ना
नि च सर्वशः॥ कालशाकं कालिका॥ महाशल्कः शल्यकः॥ ———
॥ मत्स्यात्य इत्यन्ये॥ खड्गो गंडकः॥ लोहो रक्तछागः॥ कृष्ण इति हे
माद्रिः॥ लोहपृष्ठनामा शकुनिरित्यन्ये॥ मधु माक्षिकं॥ मुन्यन्नानि नी
वारादीनि॥ तथा। मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं। अक्षा
रलवणं चैव प्रकृत्या हविरुच्यते॥ अनुपस्कृतमविकृतमप्रतिवि
द्धं च॥ अक्षारलवणं ऊषरमृत्तिकाकृताल्लवणाद्भिन्नं॥ प्रचेताः। कृष्ण
माषास्तिलाश्चैव ग्राह्याः स्युर्यवशालयः॥ महायवा व्रीहियवास्तथैव
च मधूलिकाः॥ कृष्णाः श्वेताश्च लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि॥ म
धूलिकाः यावनालविशेषाः। शालिविशेषाः॥ शालिविशेषा वेति हेमा
द्रिः॥ अत्रिः। अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत्॥ ब्रह्मपुराणे॥
यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा॥ संतर्पयेत्पितॄन्मुद्गैः श्यामा
कैः सर्षपद्रवैः॥ नीवारैर्हस्तिश्यामाकैः प्रियंगुभिरथार्चयेत्॥ सर्षपा
गौराः। मार्कंडेये॥ नीवाराः पौष्कराश्चैव वन्यानां पितृतृप्तये॥ प्रियंग
वः कोविदाराश्च निष्पावाश्चात्र शोभनाः। पौष्कराः पद्मबीजानि॥ निष्पा
वा वल्लाः॥ विष्णुधर्मोत्तरे॥ गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि॥
श्राद्धेषु दत्तैः प्रीयंते मासमेकं पितामहाः॥ सतीनाः कलापाः॥ अथ व
र्ज्यानि॥ वायुपुराणे॥ अकृताग्रयणं धान्यजातं वै परिपाटलाः। राज
माषानणूंश्चैव मसूरांश्च विवर्जयेत्॥ परिपाटलाः स्थूला राजमाषाः
॥ नानेवाणूश्च। षट्त्रिंशन्मते॥ कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धक
र्मणि॥ न वर्जयेत्तिलांश्चैव मुद्गान्माषांस्तथैव च॥ भरद्वाजः। मुद्गाढ
कीमाषवर्जं द्विदलानि न दद्यात्॥ आढकी तुवरी॥ सुमंतुः। बीजपूरान्
माषांश्च न दद्यात्॥ बीजपूरकं मातुलिंगं माषाः। चतुर्विंशतिमते॥
कोद्रवा राजमाषाश्च कुलत्थाा वरकास्तथा। निष्पावाश्च विशेषेण
पंचैतांस्तु विवर्जयेत्॥ वरका वनमुद्गाः॥ निगमः॥ यावनालानपि त
था वर्जयंति विपश्चितः। तैलमप्यापदि प्राज्ञाः संप्रयच्छंति याज्ञिकाः।
तैलमपि वर्जयंति॥ आपदि तु भयमपि प्रयच्छंती त्यन्ये॥ षट्त्रिंशन्म

ते॥ वर्ज्या मर्कटकाः श्राद्ध इति॥ मर्कटकालंकाः॥ वर्जयेदित्यनुवृत्तौ
॥ मरीचिः॥ कटुकानि च सर्वाणि विरसानि तथैव च॥ कटुकानि पिप
ल्यादीनि। शंखः॥ लोहितान् वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत्॥
महाभारते॥ अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा॥ पुलका
स्तुच्छधान्यानि॥ कोद्रवोद्दालवरककुसुंभमधुकातसीः॥ एतानि
वैन देयानीति॥ मधुकं ज्येष्ठीमधु॥ वर्ज्यान्यपि चकुल्यमात्स्ये॥ कोद्र
वोद्दालवरककपित्थमधुकातसीः॥ वैष्णवेव॥ मसूरस्सारनालौ कु
कुलत्थशणशिग्रवः॥ शिग्रुः सोभांजनः॥ ब्रह्मांडे॥ सर्वं श्राद्धे जनं पु
ष्पं कुसुंभं राजसर्षपाः॥ वर्ज्यं चापक्वपंसर्वं निशि पत्वाहृतं जलं॥
अंजनपुष्पमंजनद्रुमपुष्पं॥ मार्कंडेयः॥ वर्ज्याश्चाभिषवानि त्यश्वत
पुष्पं गवेधुकं॥ अभिषवाः संधानानि॥ कौर्मे॥ आढकीकोविदारां
श्च पालंक्यामरिचं तथा॥ वर्जयेदिति॥ कोविदारः कांचनारः॥ म
रिचान्याद्रीणि न शुष्कानि॥ हेमाद्रिः॥ पालंक्या मुकुंदाख्यो गंधद्र
व्यविशेषः॥ अथ ग्राह्यफलादि॥ शंखः॥ आम्रान्पारेवतानि सूनृम
द्वीकाभव्यदाडिमान्॥ विदार्यांश्च भरुंडांश्च श्राद्धकाले प्रदापयेत
र्या च्छ्राद्धे प्रयत्नेन शृंगाटविसकेबुकान्॥ पालेवतं जंबीरानुकारि
॥ मृद्वीका द्राक्षा॥ भव्यं कर्मरंगं॥ विदार्यान् भूकूष्मांडी कंदान्॥ भा
रुंडाः काश्मीरे प्रसिद्धाः शृंगाटकं जलजं त्रिकं॥ विसं पद्मिनीमूलं॥ के
बुकं कबुकं॥ ब्राह्मे॥ आम्रमाम्रातकं बिल्वं दाडिमं बीजपूरकं॥ वीणा
कं लकुचं जंबु भव्यं भूतं तथारुकं॥ प्राचीनामल्लकं क्षीरं नालिकेरं प
रूषकं॥ नागरं च सखर्जूरं द्राक्षा नीलकपित्थकं॥ पटोलं च प्रियाले
च कर्कंधु बदराणि च॥ वैकंकतं वत्सकं च एर्वारुर्वोरुकानि च॥ एता
नि फलजातीनि श्राद्धे देयानि यत्नतः॥ आम्रातकं कपीतफलं॥ वीणाक
मेर्वारुकानुकारि॥ लकुचं लकुचफलं भूतं कर्णाटदेशे प्रसिद्धं॥ आरुक
मारण्यैर्वारुकं॥ प्राचीनामलकं पानीयामलकं॥ क्षीरं राजादनफलं॥
परूषकं कोंकणे प्रसिद्धं॥ पटोलं स्वादु पटोलीफलं॥ प्रियालं चारवृक्ष
फलं कर्कंधुर्वदरीफलं वैकंकतं स्रुवद्रुमफलं॥ वत्सकं कुटजफलं॥ ए
र्वारुः स्वादुकर्कटी॥ वारुकानि वारुकीफलानि॥ तथा॥ कालशाकं

ण्डुलीयं वास्तुकं मूलकं तथा॥ शाकमारण्यकं चैव दद्यात्सुष्याण्य
मूनि च॥ तंडुलीयोल्पमारिषः॥ वास्तुकं कटवास्तूकं॥ मूलं कंदं॥ त
था॥ दाडिमं मागधीं चैव नागराद्रकतिंतिणीः॥ आम्रातकं जीरकं च
कुवरं च नियोजयेत्॥ मागधी पिप्पली॥ नागरं शुंठी॥ कुवरं कुस्तुब
र॥ कौर्मे॥ बिल्वामलकमृद्वीकपनसाम्रातदाडिमं॥ भव्यं पारावता
क्षोटखर्जूराम्रफलानि च॥ कसेरुं कोविदारं च तालकंदस्तथा वि
सं॥ मांसं शाकं दधिक्षीरं चुंचुर्वेत्रांकुरस्तथा॥ कट्फलं कौकणी द्राक्षा
लकुचं मोचमेव च॥ पारावतपालेवतं॥ तालकंदस्तालमूलीकंदः॥
चुंचुश्चूचुरिति प्रसिद्धः॥ मोचकं कदलीफलं॥ अथ वर्ज्यानि वायुपु
राणे॥ लशुनं गृंजनं चैव पलांडुपिंडमूलकं॥ पिप्पलीमरिचं चैव पटो
लं बृहतीफलं॥ वंशांकरीरं सुरसमर्जकं भूस्तृणानि च॥ अवेदोक्ताश्च
निर्यासा लवणान्यूखराणि च॥ श्राद्धकर्मणि वर्ज्यानि याश्च नार्यो रज
स्वलाः॥ पिंडाकृतिमूलं पिंडमूलकं॥ पिप्पल्यआर्द्रा न शुष्काः॥ तथा म
रिचं च॥ सुरसं निर्गुंडीपत्रं॥ अर्जकं श्वेतकुवेरकपत्रं॥ भूस्तृणो भूति
काख्यः शाकः॥ विष्णुः॥ न प्रत्यक्षलवणं दद्यादिति॥ ब्राह्मे॥ सैंधवं लव
णं चैव तथा मानससंभवं॥ पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यशः॥ वि
ष्णुः॥ भूतृणं शिग्रुसर्षपकूष्मांडालाबुवार्त्ताकपालंक्यां तंडुलीयकं॥
कुसुंभमहिषीक्षीराणि वर्जयेदिति॥ शिग्रुः सोभांजनः रक्तपुष्पः श्वेतपु
ष्पः॥ सर्षपो राजसर्षपो न गौरः॥ अलाबुस्तुंबीफलं वर्तुलं॥ वार्त्ताकं
क्षुद्रवार्त्ताकीफलं॥ उशनाः॥ नालिकाशणछत्राककुसुंभालाबुवि
ड्वरान्॥ कुंभीकंबुकवृंताककोविदारांश्च वर्जयेत्॥ वर्जयेद्गृंजनं
श्राद्धे कांजिकं पिंडमूलकं॥ करंजं चेति॥ छत्राकं शतपुष्पेति हेमाद्रिः
॥ कवकमित्यन्ये॥ कुंभी श्रीपर्णिका कंबुकं वृन्तमलाबु॥ वृंताकं श्वेतं॥
केंडूरं श्वेतवृंताकं कुंभांडं च विवर्जयेदिति देवलोक्तेः॥ केंडूरं प्रावृषे
णीफलं॥ कुंभांडं वृत्तालावुसदृशं॥ कांजिकमारनालं॥ करंजं नक्तमा
लफलं॥ भारद्वाजः॥ नक्तोद्भूतं तु यत्तोयं पल्वलां वु तथैव च॥ शाल्यं तु
कूष्मांडफलवज्रकंदश्च पिप्पली॥ कुलत्थशणजीराणि करंभाणि त
थैव च॥ अन्नादन्यद्रक्तपुष्पं शिग्रुः स्यास्तथैव च॥ एतानि नैव देयानि

सर्वस्मिन् श्राद्धकर्मणि॥ वज्रकंद आरण्यसूरणः॥ जीरकं कृष्णजी
रकं॥ करंभाणि दधिसक्तवः॥ क्षारो यवक्षारादिः॥ ब्राह्मे॥ गृंजनं चुक्रि
कां तुंबं गाजरं पोतिकां तथा॥ हिंगूग्रगंधापनसं भूनिंबं निंबराजि
के॥ कुस्तुंबरं कलिंगोत्थं वर्जयेदम्लवेतसं॥ गृंजनं लशुनानुकारी
॥ सूक्ष्मनालः कंदविशेष इति विज्ञानेश्वरः॥ श्वेतकंदः पलांडुविशे
षो गृंजनमिति श्राद्धप्रकरणे माधवः॥ प्रायश्चित्तप्रकरणे तु गृंजनं प
त्रविशेषः॥ यदीयं चूर्णं गायकाः कंठशुद्ध्यर्थं भक्षयंतीति तत्र गंधाकृ
तिरसैस्तुल्यं गृंजनं तु पलांडुना॥ सूक्ष्मनालाग्रपत्रत्वाद्भिद्यते तु प
लांडुत इति वा भट्टीयटीकायां हेमाद्रौ वाप्येवं द्रवचनं विनिगम
कं। यत्तु हेमाद्रिः गृंजनं गाजरमिति माधवोपि प्रायश्चित्तप्रकरणे मूल
विशेषो वा गाजरापरपर्याय इति व्याचष्ट तदनेन गृंजगाजरयोः पृथ
गुपादानेनापास्तं॥ यत्तु हिंगुनः श्राद्धत्वमुक्तमादित्यपुराणे॥ मधू
कं रामठं चैव कर्पूरं मरिचं गुडं॥ श्राद्धकर्मणि शस्तानि सैंधवं त्रपुसं
तथेति॥ तद्धि हितप्रतिषिद्धत्वाद्वैकल्पिकमानुकल्पिकं वेति ज्ञेयं॥
रामठं हिंगु॥ एवमन्येष्वपि विहितप्रतिषिद्धेषु॥ मनुः॥ लोहितान्वृक्ष
निर्यासान्व्रश्चनप्रभवांस्तथा॥ शेलुं गव्यं च पीयूषं प्रयत्नेन विव
र्जयेत्॥ शेलुः श्लेष्मातकः॥ अनिर्दशाहपयः पीयूषं॥ अथ श्राद्धे मां
सविचारः॥ तत्र कश्चिच्छ्राद्धे गलेन श्रुतं मांसं वा श्रीणस्य चेति॥ त
त्र व्यवस्थोक्ता मनुना॥ मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः
॥ मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यदिति अत्र हि सप्तदशो वैश्य
स्य सामिधेन्य इतिवत् क्षत्रियवैश्ययोरेव मांसमिति वचनव्यक्त्या
ब्राह्मणस्य न श्राद्धे मांसदानं॥ सर्वेषां मांसदानविधीनां क्षत्रियवै
श्यपरत्वात्॥ न च मुन्यन्नमेव ब्राह्मणस्य मांसमेव क्षत्रियवैश्ययो
रिति वचनव्यक्तिः॥ सर्ववर्णानां मुन्यन्नादिद्रव्यनियमे नान्यद्रव्य
प्रतिपादकानां वाक्यानामानर्थक्यप्रसंगात्॥ न च प्रधानशब्दस्य
पूर्वत्रानुषंगः॥ प्रमाणाभावात्॥ यदि हि यातेभजा शया इष एकप
धूर्जे हि पदीत्यादिवदनुषंगं विना साकांक्षं स्यात् यदि वाच्छित्सिल्ला
पुनातु वाक्यनित्त्वा पुनातु देवस्त्वा सविता पुनात्वित्यत्रेव तेनैव प

देनाग्नेर्वसोः सूर्यस्य रश्मिभिरित्यस्यैवान्वयः स्यान्नतदानुषंगः॥न
त्वेवमिहोभयमप्यस्तीतिनानुषंगः अतः पूर्वोक्तैव व्यवस्था युक्ता
॥नन्वस्तु नामैवं व्यवस्था॥ तथापि काम्यमांसदानं केन वार्येत॥ अं
गीकृतमेव हि वैश्यं प्रत्यप्येकविंशतिसामिधेन्यनुवचनमिति सत्य
मस्तु नामैवं कृतयुगादिषु॥ कलौ तु सर्ववर्णानां मांसं प्रतिनिषिद्धमे
व तथा चोक्तं श्राद्धदीपकलिकामदनपारिजातयोर्निगमे॥ अक्षतागो
पशुश्चैव श्राद्धे मांसं तथा मधु॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्ज
येदिति॥ बृहन्नारदीये॥ समुद्रयानस्वीकारमध्ये॥ मांसदानं तथा श्रा
द्धे वानप्रस्थाश्रमस्तथेति॥ उक्त्वा एतान् धर्मान् कलियुगे वर्ज्यान्या
हुर्मनीषिण इत्युक्तं॥ न च श्राद्धे मांसमिति श्राद्धार्थस्यैव न फलार्थस्ये
ति वाच्यं॥ एतादृशव्यवस्थायां मानाभावात्॥ किंच॥ एतस्य वाक्य
स्य सर्ववर्णान् प्रति प्राप्तेस्तत्र च ब्राह्मणस्य नित्यमांसाभावेन काम्य
मांसनिषेधपरत्वं॥ क्षत्रियवैश्ययोस्तु श्राद्धार्थप्रतिषेधपरत्वमिति वै
रूप्यापत्तिः॥ अतः श्राद्धसंबंधि मांसं यस्य येन रूपेण प्राप्तं तत्सर्वं मत्र
प्रतिषिध्यते॥ दीक्षितस्य वदीक्षितोनुजुहोतीत्यादिना नित्यानामपि
होत्रादीनां काम्यानां चतुर्होतृहोमादीनां प्रतिषेध इति बृहत्पराशरे
णाप्युक्तं॥ यस्तु प्राणिवधं कृत्वा मांसेन तर्पयेत्पितॄन्॥ सोविद्वांश्चं
दनं दग्ध्वा कुर्यादंगारविक्रयं॥ क्षिप्त्वा कूपे यथा किंचिद्बालः प्राप्तुं तदि
च्छति॥ पतत्यज्ञानतः सोपि मांसेन श्राद्धकृत्तथा॥ इति॥ इदमप्येक
मूलकल्पनालाघवात् कलिपरमेव॥ अन्ययुगपरत्वे मांसविधीनां
सर्वेषामानर्थक्यात्॥ तथा भागवते सप्तमस्कंधे पंचदशाध्याये॥ नद
द्यादामिषं श्राद्धे नचाद्याद्धर्मतत्त्ववित्॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न
पशुहिंसयेति॥ यथा मुन्यन्नैस्तथा न पशुहिंसयेति॥ अत्र दानभक्षण
योर्निषेधः कलावेव॥ अन्यथा यथाविधिनियुक्तस्तु यो मांसं नात्ति मा
नव इत्यादीनामानर्थक्यं स्यात्॥ अत एवं शास्त्रार्थे स्थितेपि ये केचन
स्मृतिज्ञंमन्या मांसभक्षणलोलुपाः श्राद्धे मांसं ददति तान्॥ गवयस्य तु
मांसेन तृप्तिर्मासान्दशैव तु॥ मासानेकादशाप्रीतिः पितॄणां माहिषेण तु
॥ गव्येषु श्ने श्राद्धेषु संवत्सरमिहोच्यत इत्यादिव्यासवाक्यमालोच्य

श्राद्धे गोमांसं ददतः स्वतंत्रान्को वारयेदिति दिक्॥ अथ कुशनिरूपणं
॥तेषामुत्पत्तिः शतपथश्रुतौ॥ यावै वृत्राद्बीभत्समाना आपो धन्व दर्भं
तउदायंस्ते दर्भा अभवन् यद्दर्भं त्यउदायंस्तस्माद्दर्भास्ताहैताः शुद्धा मे
ध्या आपो वृत्राभिप्रक्षरिता यद्दर्भा इति॥ अत्र वृत्राभिक्षरिता वृत्रेण का
लुष्यमापादिताः॥ गोभिलः॥ कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः
॥कुशाग्रे शंकरं विद्यात्सर्वे देवाः समंततः॥ विधिमाह कौशिकः॥ शुचौ
देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः॥ ॐकारेणैव मंत्रेण कुशाः स्पृ
श्या द्विजोत्तमैः॥ उत्पाटनमंत्रः॥ विरंचिना सहोत्पन्न परमेष्ठि निसर्ग
ज॥ नुद सर्वाणि पापानि मम स्वस्तिकरो भव तमेव मंत्रमभिधाय स्मृ
त्यंतरे॥ एवं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः॥ हुं फट्कारेण मंत्रेण
सकृच्छित्वा समुद्धरेत्॥ कालमाह हारीतः॥ मासे नभस्यमावास्या
तस्यां दर्भोच्चयो मतः॥ अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः
॥अयातयामा उपयुक्ता अप्यपवादं विहायान्यत्र प्रयोज्याः। यत्तु गृ
ह्यपरिशिष्टे॥ दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः॥ अयातयामा
न्येतानि नियोज्यानि पुनः पुनरिति॥ सामान्यवचनं तत्पूर्वकालगृही
तविषयं॥ पवित्रे मार्कंडेयः॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां।
नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत्॥ आचमनांगत्वमाह का
त्यायनः॥ सपवित्रः सदर्भो वा कर्मांगे पितृकर्मणि॥ अशून्यं तु करं कृ
त्वा सर्वत्राचमनं चरेत्॥ पवित्रशब्देन ग्रंथिमत्॥ सर्वकर्मांगत्वं शा
तातपेनोक्तं॥ जपे होमे तथा दाने स्वाध्याये पितृकर्मणि॥ सव्यापसव्ये
कुर्वीत सपवित्रौ करौ बुध इति॥ ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीय
ते॥ भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते इति॥ द्विगुणीकृतानां दर्भ
शिखानां पाशः प्रदक्षिणमावेष्टितं विधाय पश्चाद्भागेन पदाग्रं प्रवे
श्यते तदा वर्तुलो ग्रंथिः॥ स एव यदा प्रादक्षिण्येन समावेष्टनं विधाय
पुरोभागेन प्रवेश्यते तदा ब्रह्मग्रंथिरिति हेमाद्रिः॥ पवित्रलक्षणं का
त्यायनेनोक्तं॥ अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च॥ प्रादेशमात्रं
विज्ञेयं पवित्रं यत्र कुत्रचित्॥ तत्प्रकारमापस्तंब आह। समौ साग्रौ दर्भौ
प्रादेशमात्रौ पवित्रे कुरुते पवित्रे स्थो वैष्णव्यौ वायुर्वो मनसा पुनात्वि

नितृणं काष्ठं वांतर्द्धाय छिन्नस्तेन नखेनेति॥ पवित्रे दर्भसंख्या गारुडे
॥सप्तभिर्दर्भपिंजूलैः कुर्याद्ब्राह्मं पवित्रकं॥ पंचभिः क्षत्रियस्यैव चतुर्भि
स्तु तथा विशः॥ द्वाभ्यां शूद्रस्य विहितमंतराणां तथैव च॥ मार्कंडेयस्तु
॥चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ एकैकन्यूनमुद्दिष्टं वर्णे व
र्णे यथाक्रमं॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रंथितं नवा॥ त्रिभिस्तु शांति
केकार्ये पौष्टिके पंचभिस्तथा॥ चतुर्भिश्चाभिचाराख्यं कुर्वन्कुर्यात्पवि
त्रकमिति॥ दर्भलक्षणमाह कौशिकः॥ सप्तपत्राः शुभा दर्भास्तिलक्षेत्र
समुद्भवाः॥ अप्रसूनाः स्मृता दर्भाः प्रसूनास्तु कुशाः स्मृताः॥ समूलाः
कुतपाः प्रोक्ताश्छिन्नाश्च तृणसंज्ञिताः॥ अथ तिलनिरूपणं मत्स्यपु
राणे॥ विष्णोर्देहसमुद्भूताः कुशाः कृष्णास्तिलास्तथा॥ धर्मस्य रक्ष
णायालमेतत्प्राहुर्दिवौकसः॥ सत्यव्रतः॥ जर्तिलास्तु तिलाः प्रोक्ताः कृ
ष्णा वर्णा वनोद्भवाः॥ जर्तिलाश्चैव ते ज्ञेया अकृष्टोत्पादिताश्च ये॥ आपस्त
बः॥ अटव्यां ये समुद्भूता अकृष्टाः फलितास्तथा॥ ते वै श्राद्धे पवित्राः स्युस्ति
लास्ते न तिलास्तिलाः॥ अत्राकृष्टभूमौ जाताः जर्तिलाः प्रशस्ततराः॥
तदभावे क्षेत्रोत्पन्नास्तेषामपशावो वा अन्ये गोऽश्वादि इति वत्प्रशं
सार्थः न निषेधः॥ पुष्पाण्याह वृद्धमनुः॥ शुक्लाः सुमनसः श्रेष्ठास्तथा
पद्मोत्पलानि तु॥ गंधरूपोपपन्नानि ऋतुकालोद्भवानि च॥ वर्ज्या
न्याह स एव जपादि कुसुमं भिंडी रूपिकाः सकुरंटिका॥ पुष्पाणि वर्ज
नीयानि श्राद्धकर्मणि नित्यशः॥ रूपिकार्कपुष्पं॥ उग्रगंधीन्यगंधी
नि दुष्टान्यपि च वर्जयेत्॥ चंदनागुरुणी चोभे तथैवोशीर पद्मकं॥ तु
रुष्कं गुग्गुलुं चैव घृताक्तं युगपद्दहेत्॥ घृतं न केवलं दद्याद् दुष्टं वा तृ
णगुग्गुलमिति॥ तुलसीपत्राण्यपि देयानीति स्मृत्यर्थसारे॥ अथार्घ
पात्राणि॥ हारीतः॥ कांस्यपार्णे राजत ताम्रपात्राण्यर्घोदकधारणानि
सर्वाण्युपकल्पानि॥ वैजवापः॥ खादिरौदुंबराण्यर्घे पात्राणि श्राद्ध
कर्मणि॥ अथाश्ममृन्मयानि स्युरपि पर्णपुटास्तथेति॥ पर्णपुटा यज्ञि
यवृक्षपर्णनिर्मितास्त्र मसाकृतपः॥ यत्तु कात्यायनेन मृन्मयवर्जनीया
नि वा विवृतं तदस्युक्तेतदभावे मृन्मयनिषेधार्थं॥ नात्यंतिकनि वृत्य
र्थमिति हेमाद्रिः॥ अपक्वमृन्मयनिषेधार्थमित्यन्ये॥ विकल्पार्थमि

त्यपरे॥मत्स्यपुराणे पर्णमयपात्रमभिधायोक्तं॥जलजं वापि कुर्वी
त तथा सागरसंभवं॥सौवर्णं राजतं ताम्रं पितॄणां पात्रमुत्तममिति
॥राजते भोजनैरेषां अपि वा रजतान्वितैरिति च॥पात्रविशेषेण फल
विशेषो ब्रह्मवैवर्ते॥पालाशे ब्रह्मवर्चस्वमश्वत्थे राज्यभागिता॥स
र्वभूताधिपत्यं च प्लक्षे नित्यमुदाहृतं॥पुष्टिः प्रजाश्च न्यग्रोधे बुद्धिः
प्रज्ञा धृतिः स्मृतिः॥रक्षोघ्नं च यशस्यं च काश्मर्याः पात्रमुच्यते॥सौ
भाग्यमुत्तमं लोके मधूके समुदाहृतं॥फल्गुपात्रेण कुर्वाणः सर्वान्का
मानवाप्नुयात्॥फल्गुः काकोदुंबरिका॥परां द्युतिमथार्के च प्राकाम्यं
च विशेषतः॥बिल्वे लक्ष्मीस्तथा मेधा नित्यमायुष्यमेव च॥वर्षत्य
जस्रं तत्रैव पर्जन्यो वेणुपात्रतः॥तेषां निर्णयनिर्णयः॥अथ भोजन
पात्राणि॥वायुपुराणे॥पात्रे वै तैजसे दद्याद्भोज्यं श्राद्धभोजने॥रा
जतं कांचनं चैव दद्याच्छ्रूद्रेषु यः पुमान्॥दत्वा च लभते दाता प्राधा
न्यं धनमेव च॥व्यवस्थामाहात्रिः॥भोजने हेमरौप्याणि यथाक्रमं
॥हारीतः॥राजतकांस्यपर्णताम्रपात्राणि ब्राह्मणभोजनार्थानि म
हांति॥भोजनार्थोपकल्पितसर्वान्नधारणपर्याप्तं महत्त्वं ग्राह्यं॥कां
स्यविशेषमाहात्रिः॥पंचाशत्पलिकं कांस्यं त्वधिकं भोजनाय वै॥इ
ति वाराहे॥अन्यान्यपि तु पात्राणि दारुजान्यपि जानता॥यथोपपन्नं
कार्याणि मृन्मयानि न तु क्वचित्॥नायसान्यपि कुर्वीत पैत्तलानि न
चैव हि॥न च सीसमयानीह शस्यंते त्रपुजान्यपीति॥अंगिराः॥न
जातीकुसुमानि दद्यान्न कदलीपत्र इति भोजनभाजनविधिः॥अ
थ श्राद्धे प्रशस्ता ब्राह्मणाः॥वसिष्ठः॥पितृभ्यो दद्यात् पूर्वेद्युर्ब्राह्मणा
न्संनिपात्य यतीन्गृहस्थान्साधून्परिणतवयसो विकर्मस्थान्
श्रोत्रियान् अशिष्याननंतेवासिन इति॥अंतेवासी शुश्रूषकः॥का
त्यायनः॥स्नातकानेके यतीन्गृहस्थान्साधून्वा श्रोत्रियान्वृद्धा
ननवद्यान्स्वकर्मस्थानभावेपि शिष्यान्सदाचारानिति॥मनुः॥
यत्नेन भोजयेदथर्वाणं दैवे पित्र्ये च कर्मणि॥अनंतमक्षयं चैव
फलं तस्येति वै श्रुतिः॥अत्र केचिदथर्वाकन्यातयाहुर्विरिति कन्यासा
धर्म्येण स्वशाखीयमेव नियमेमानाभावात्॥वचनं तु कुलीननियम

परं युक्तमिति॥ बृहस्पतिः॥ यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत्॥ ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते॥ यमशातातपौ॥ छंदोगं भोजयेच्छ्राद्धे वैश्वदेवे च बह्वृचं॥ पुष्टिकर्मणि वाध्वर्युं शांतिकर्मण्यथर्वणं॥ ब्रह्मवैवर्ते॥ विप्रान्गृहस्थान्वेदार्थविदो निरभिमानिनः॥ पत्नीपुत्रसमायुक्तान् श्राद्धकर्मणि भोजयेत्॥ नंदिपुराणे॥ चत्वार आश्रमाः पुण्याः श्राद्धे दैवे नैव चेति॥ कूर्मपुराणे॥ असमानप्रवरको ह्यसगोत्रस्तथैव च॥ असंबंधी च विज्ञेया ब्राह्मणाः श्राद्धसिद्धये॥ यमः॥ नक्षत्रतिथिपुण्याहान् मुहूर्तांश्च मंगलानि च॥ न विदंति ये विप्रास्तैर्भुक्तं त्वसमं भवेत्॥ अथानुकल्पः॥ ब्रह्मांडपुराणे॥ अलाभे सति भिक्षूणां भोजयेद्ध्यानिनः शुभान्॥ असंभवेपि तेषां वै नैष्ठिकान्ब्रह्मचारिणः॥ तदभावेप्युदासीनं गृहस्थमपि भोजयेत्॥ भिक्षवो यतयस्ते च त्रिदंडिन एव भोज्या इति हेमाद्रिः॥ अत्र मानं तु चिंत्यं ध्यानिनो वानप्रस्थाः॥ गारुडे॥ उदासीनेष्वलब्धेषु भोज्याः संबंधिनोपि हि॥ मातुलश्यालयाज्यर्त्विक्शिष्याचार्यादयोपि च॥ गौतमः॥ शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणवतः वद्धेनयोन्यसमानार्षेयग्रहणं॥ मनुः॥ मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुं॥ दौहित्रं च भोजयेत्॥ विट्पतिर्जामातेति हेमाद्रिः॥ अतिथिरिति मेधातिथिमाधवौ॥ गार्ग्यः॥ नैकगोत्रे हविर्दद्याद्यथा कन्या तथा हविः॥ अभावे ह्यन्यगोत्राणामेकगोत्रांस्तु भोजयेत्॥ असमप्रवराभावे समानप्रवरानपि॥ बौधायनः॥ तस्मादेवंविधं सपिंडमप्याशयेदिति॥ तत्र विशेषमाह गौतमः॥ भोजयेदूर्ध्वं त्रिभ्यो गुणवंतमिति॥ अ अपितामहो भ्राता पुत्रो वाथ सपिंडकः॥ न परस्परमर्हाः स्युर्न श्राद्धे ऋत्विजस्तथा॥ ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणाः स्मृताः। वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः इत्यनुकल्पः॥ शातातपः॥ संनिकृष्टमधीयानं ब्राह्मणं यस्त्वतिक्रमेत्॥ भोजने चैव दाने च दहत्यासप्तमं कुलं॥ भविष्यत्पुराणे॥ अतिक्रांते न दोषोस्ति निर्गुणं प्रविकर्हिचित्॥ महाभारते॥ गायत्रीमात्रसारोपि ब्राह्मणः पूजितः स्वग॥ गृहा

सन्नोविशेषेणनभवेत्पतितःसचेल्॥भविष्यत्पुराणे॥यस्त्वामंत्र
मतिक्रम्यब्राह्मणंपतिताद्दते॥हरेच्चभोजयेन्मूढोगुणाढ्यनरकंव्र
जेत्॥महाभारते॥यदिस्यादधिकोविप्रोहरेदन्नादिभिर्वृतः॥तस्मै
यत्नेनदातव्यमतिक्रम्यापिसन्निधौ॥अथवर्ज्याब्राह्मणाः॥वायु
पुराणे॥नभोजयेदेकगोत्रान्समानप्रवरांस्तथा॥मनुः॥नारिंनमि
त्रंयंविद्यात्तंश्राद्धेभोजयेद्द्विजं॥ब्रह्मांडे॥नभोज्यायोनिसंबद्धागो
त्रसंबंधिनस्तथा॥मंत्रांतेवासिसंबद्धाश्राद्धेविप्राःकदाचन॥ब्रह्म
वैवर्ते॥शिष्याश्चऋत्विजोयाज्याःसुहृदःशत्रवस्तथा॥श्राद्धेतुश्व
शुरःश्यालोनभोज्यामातुलादयः॥कौर्मे॥यस्यवेदश्चवेदीचविच्छि
द्येतेत्रिपौरुषं॥सवैदुर्ब्राह्मणोनार्हःश्राद्धादिषुकदाचन॥याज्ञवल्क्यः
॥रोगीहीनातिरिक्तांगःकाणःपौनर्भवस्तथा॥अवकीर्णीकुंडगोलौ
कुनखीश्यावदंतकः॥भृतकाध्यापकःक्लीबःकन्यादूष्यभिशस्त
कः॥मित्रध्रुक्पिशुनःसोमविक्रयीपरिविंदकः॥मातापित्रोर्गुरोस्त्या
गीकुंडाशीवृषलात्मजः॥परपूर्वापतिःस्तेनःकर्मदुष्टाश्चनिंदिताइ
ति॥दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते॥परिवेत्तासविज्ञेयःप
रिवित्तिस्तुपूर्वजइति॥प्रपंचितंचेदंसंस्कारमयूखे॥तथाकुशील
वोवकीर्णीचवृषलीपतिरेवचेतिवर्ज्याइत्यर्थः॥विष्णुः॥नचार्थयिप्र
यच्छेतविडालव्रतिकेद्विजे॥ब्रह्मपुराणे॥भोक्तुंश्राद्धेनचार्हंतिदेवो
पहतचेतसः॥षंढोमूकश्चकुनखीखल्वाटोदंतरोगवान्॥श्याव
दंतःपूतिनासःछिन्नांगश्चाधिकांगुलिः॥गलरोगीचगड्डुमान्स्फु
टितांगश्चसज्वरः॥खंजतूवरमंठाश्चयेचान्येहीनरूपिणः॥गल
रोगीगंडमालीगड्डुमानकुब्जः॥यौवनेष्वजातश्मश्रूस्तूवरः॥मं
ठावक्रजंघाः॥स्कांदे॥काणाःकुंठाश्चमंठाश्चमूकाश्चबधिराजडाः
॥कुनखाःकुष्ठिनश्चैवदुर्नम्नाविद्धमेहनाः॥अतिदीर्घाअतिह्रस्वा
अतिस्थूलाभृशंकृशाः॥निर्लोमानातिलोमानोगौराःकृष्णाअती
वये॥एतान्विवर्जयेद्विप्रान्प्राज्ञःश्राद्धेष्वशोत्रियान्॥दुर्नम्नादु
श्चर्माणः॥विद्धमेहनाविद्धशिश्नाइतिहेमाद्रिः॥मरीचिः॥अवि
द्धकर्णाःकृष्णाश्चलंबकर्णास्तथैवच॥वर्जनीयःप्रयत्नेनब्राह्मणःश्रा

द्धकर्मणि॥लंबकर्णवर्णयनिगोभिलः॥हनुस्थलादधःकर्णौलंबौत
परिकीर्तितौ॥द्व्यंगुलत्र्यंगुलौशस्तौतेनशातातपोब्रवीत्॥पूर्वोक्तस
र्वोपचारमाहसुमंतुः॥काणाःकुंठाश्चमंडाश्चदुश्चर्माणःकचैर्विना
॥सर्वेश्राद्धेनियोक्तव्यामिश्रितावेदपारगैः॥काश्यपेनतुमिश्रणे
विशेषउक्तः॥काणादीन्भोजयेद्दैवेश्राद्धदानेतुवर्जयेत्॥तथा॥
नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित्॥पित्र्येकर्मणिसंप्राप्तेप्रयत्ने
नपरीक्षयेदिति॥कालिकापुराणे॥अनाश्रमीतुयोविप्रोजटीमुंडी
वृथान्वयः॥वृथाकाषायधारीयःश्राद्धेनंदूरतस्त्यजेत्॥चिकित्सका
देवलकावृथानियमधारिणः॥सोमविक्रयिणश्चैवराजन्नार्हंतिके
तनं॥केतनंश्राद्धीयनिमंत्रणं॥होतारोवृषलान्नायेवृषलाध्याप
कास्तथा॥नष्टावृषलशिष्याश्चश्राद्धेनार्हंतिकेतनं॥अनग्नयश्च
येविप्रामृतनिर्यातकाश्चये॥स्तेनाश्चपतिताश्चैवराजन्नार्हंतिके
तनं॥सौरपुराणे॥अंगवंगकलिंगांश्चसौराष्ट्रान्गुर्जरांस्तथा॥आ
भीरान्कोंकणांश्चैवद्राविडान्दक्षिणापथान्॥आवंत्यान्मागधांश्चै
वब्राह्मणांस्तुविवर्जयेदिति॥अथविभक्तयोनिर्णीयंते॥विभक्तिरहि
तंश्राद्धंक्रियतेयद्विपर्ययात्॥अकृतंतद्विजानीयात्पितॄणांनोपतिष्ठ
ति॥तस्मात्सर्वप्रयत्नेनब्राह्मणेनविजानता॥विभक्तिभिर्यथोक्ता
भिःश्राद्धकार्यंत्रिभिःसदा॥विपर्ययाद्बाधते॥तिसृभिरितिएकोद्दिष्टे
आवाहनाभावेनद्वितीयायाअभावात्॥तिसृणांश्राद्धमंत्रसंबंधा
भिप्रायं॥व्यासः॥चतुर्थीत्वासनेनित्यंसंकल्पेचविधीयते॥प्रथमा
तर्पणेप्रोक्तासंबुद्धिमपरेजगुः॥नित्यस्यसंकल्पइत्यनेनसंबंधः॥
आसनेषष्ठ्याअपिवक्ष्यमाणत्वात्॥धर्मः॥पृच्छासस्यासनेषष्ठी
चतुर्थीचासनेमता॥अर्घ्यावनेजनंपिंडंतथाप्रत्यवनेजनं॥संबुद्धे
वानिकुर्वीतसर्वशास्त्रविशारदः॥पृच्छाब्राह्मणानुज्ञाग्रहणार्थंश्रा
द्धारंभेप्रश्नवाक्यं॥भृगुः॥आसनेतुभवेत्षष्ठीतथैवासस्यपृच्छयोः
॥आवाहनेद्वितीयास्यादेषशास्त्रविनिश्चयः॥गंधंमाल्यंचधूपंच
दीपमन्नंसदक्षिणं॥अपृथक्त्वेनदातव्यंचतुर्थ्याभूतिमिच्छता॥
अथासनेचतुर्थीषष्ठ्योर्यथाशाखंव्यवस्थितोविकल्पः॥एतावेगो

अपरेऽश्रमे परे च योऽन्यास्त्री लिंगेपि विभक्त्यंत पदप्रयोगः प्रदर्शितो नागरखंडे॥ मातर्मातेतथामातुरासने कल्पनेक्षणे॥ गोत्रे गोत्रायै गोत्रयोः प्रथमाद्या विभक्तयः॥ देविदेव्यै तथादेव्यौ एवं मातुश्च कीर्तयेत्॥ गोभिलोपि॥ गोत्रायाश्चासने कुर्याज्ञ्यन्नेचैवाध्र्ये पिंडयोः॥ गोत्रायाश्चाक्षय्यकाले गोत्रायै त्याग एव च॥ गोत्रामावाहने कुर्यात् स्त्रीलिंगे तु न संशयः॥ अथ सव्यापसव्यनिर्णयः॥ चतुर्विधं कर्म किंचित्पित्र्यैकसंबंधित्वात्पित्र्यस्वधानिनयनादि॥ किंचिद्दैवैकसंबंधित्वाद्दैवं॥ यथा विश्वेदेवाः प्रीयंतामिति वाचनं॥ किंचिदुभयसंबंधादुभयात्मकं॥ यथा पाकप्रोक्षणादि॥ किंचिच्च देवपितृसंबंधरहितत्वाल्लौकिकमेव॥ यथास्वागतप्रश्नादि॥ तत्र पित्र्ये तूभयात्मके च प्राचीनावीतिना कार्यमित्याह मनुः॥ प्राचीनावीतिना सम्यगपसव्यमतंद्रिणा॥ पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना॥ अपसव्यमप्रदक्षिणं निधनं समाप्तिः॥ अत्र पित्र्ये विहिते प्राचीनावीतं देवपितृसाधारणेपि कर्मणि भवति विप्रतिषिद्धप्रधानाप्रधानधर्मसमवाये प्रधानधर्मस्य बलीयस्त्वात्॥ दैवं तूपवीतिनैव कार्यं॥ तदुक्तं नागरखंडे॥ एवं सर्वाः क्रियाः कार्या दैविकाः सव्यपूर्विकाः॥ पैतृक्यश्चापसव्येन मुक्त्वैकं स्वस्तिवाचनं॥ स्वस्तिवाचनं स्वस्तीति ब्रूतेति प्रैषः॥ रागतः प्राप्तपुरुषार्थभोजनाश्रितत्वेनिरामिषत्वानियमस्य कर्मार्थत्वेपि भोजनस्य प्राधान्याद्यज्ञोपवीतमेव॥ अथवा पित्र्यत्वेन प्राप्तस्य प्राचीनावीतस्य कृतापसव्यः पूर्वं तु पितृपूर्वं निमंत्रयेदित्यनेन संकल्पप्रभृतिनिमंत्रणे पुनर्विधानात्तत्पूर्वं कृत्यनिरामिषभोजनादौ प्राचीनावीतं परिसंख्यायते अतो यज्ञोपवीतं देशकालसंकीर्तनादि प्रश्नदत्तं तथाकरिष्य इति वाक्यं प्राचीनावीती उच्चारयेत्॥ प्रचेताः॥ अपसव्यं ततः कुर्याज्जप्त्वा मंत्रं तु वैष्णवं॥ गायत्रीं प्रणवं चापि ततः श्राद्धमुपक्रमेत्॥ ततः ब्राह्मणोपवेशनोत्तरं प्राणायामं कृत्वा उपक्रमेत्॥ संकल्पयेदिति हेमाद्रिः॥ नीवीबंधश्चापसव्येन॥ पितृदेवत्यो वै नीवीरिति श्रुतेः॥ बृहस्पतिः॥ कृत्वा सव्येन वेदद्वा

दैवे दर्भोन्प्रदक्षिणं ॥एतच्च सव्यमाच्छादनांतेषु दैवपदार्थेषु ॥अत
एव वैश्वदेविकाच्छादनांतपदार्थकांडमुक्त्वाह याज्ञवल्क्यः ॥अ
पसव्यं ततः कृत्वा पितॄणामप्रदक्षिणं ॥द्विगुणांस्तु कुशान्दत्वा ह्युशं
तस्त्वेत्यृचा पितॄन् ॥आवाहयेदिति वक्ष्यमाणेन संबंधः ॥एतच्च अ
पसव्यं दर्भासनदानाच्छादनांतं ॥अग्नौकरणे तु कात्यायनानामनुज्ञा
भ्यर्थनात्प्रभृति प्राचीनावीतित्वं ॥आश्वलायनानां तु अनुज्ञाभ्यर्थना
त्प्रभृति तदुत्तरभाविपदार्थप्रभृति वा प्राचीनावीतित्वं ॥अथवा सर्वे
षामेवादितः प्राचीनावीतित्वं यज्ञोपवीतित्वं वा हुतशेषप्रतिपत्तिः
स्तु प्राचीनावीतिनैव कार्येत्याह शौनकः ॥हुत्वाग्नौ परिशिष्टं तु पित
पात्रेष्वनंतरं ॥निवेद्यैवापसव्येन परिवेषणमाचरेत् ॥अत्रापसव्येने
त्यस्य न परिवेषणेन संबंधः ॥अपसव्येन यस्त्वन्नं ब्राह्मणेभ्यः प्रय
च्छति ॥विद्यामप्यंति पितरस्ते च सर्वे द्विजोत्तमा इति कार्ष्णाजिनिव
चनात् ॥पाचालंभनांगुष्ठनिवेशनान्नत्यागभोजनप्रैषाः सव्येन दै
वे पित्र्ये अपसव्येन ॥अतिथेः सर्वं यज्ञोपवीतेन प्राक्क्षालीनः गायत्री
मधुमत्यादि जपश्चापसव्येन ॥कृतापसव्यः कुर्वीतेत्युक्त्वा यत्नमतां
जप इति वृद्धशातातपवचनात् ॥अपोशानार्थमुदकादाने तु यज्ञोप
वीतं ॥पित्र्यत्वाभावात् ॥भुंजानेषु पित्र्यसूक्तजपोप्युपवीतिना ॥त
था च मरीचिः ॥अदक्षिणं शिवा आपो जपाशीः स्वस्तिवाचने ॥विप्रेषु
दक्षिणादानं च सव्येन प्रचक्षते ॥प्रदक्षिणं विसर्जनानंतरं ब्राह्मण
प्रदक्षिणीकरणं ॥शिवा आप इति मंत्रेण क्रियमाणं कर्म ॥अदृष्टार्थमं
त्रोच्चारणं जपः ॥आशीः दातारो नोभिवर्द्धंतामित्यादिका ॥स्वस्ति भवं
तो ब्रुवंत्विति स्वस्तिवाचनं ॥सांगं विकिरदानमपसव्येन तृप्ताः स्थेति
प्रश्नः ॥शेषान्नविनियोगश्च दैवपित्र्यसाधारण्यात्सव्येन ॥सांगं पिं
डदानमपसव्येन ॥अपसव्येन दर्भेषु पिंडा देयास्त्रयस्तु वै ॥इति का
र्ष्णाजिनिवचनात् ॥सुप्रोक्षितमस्त्विति श्राद्धदेशप्रोक्षणकर्मैकसं
बंधात्प्राचीनावीतिनैव ॥अत्र कर्कः ॥आचांतेषूदकपुष्पाक्षतदानं ।
तच्च दैवपूर्वं ॥ततोपसव्यं पित्र्ये ॥केचित्तु सव्येनेच्छंति ॥तत्र दानसंयो
गात् ॥पिंडपितृयज्ञवदुपचारः ॥पित्र्य इति च दर्शनादिति तत्पूर्वोक्तम

रीचिवचनविरोधात्पित्राद्युद्देशमंतरेणाक्रियमाणत्वाच्चोपेक्ष्यं॥अ
क्षय्योदकं दैवे सव्येन पित्र्ये चापसव्येन॥अघोराः पितर इत्याद्युपवी
तेन॥आशीःशब्देन जयाशीः स्वस्तिवाचनमिति मरीच्युक्तेः॥स्वधा
वाचनं तु सांगपित्र्यत्वात्प्राचीनावीतेन पात्रस्थार्घसंस्रवमोचनं तु
न्युब्जपात्रोत्तानीकरणं च प्राचीनावीतिना॥नरसिंहाग्निः॥अपसव्यं ततः
कृत्वा पितुः पार्श्वे समाहितः॥सिक्त्वा दर्भपवित्राणि मोचयेत्संस्रवानि
त इति॥पिंडार्थकल्पिते देश इत्यर्थः॥जमदग्निः॥सर्वकर्मोपसव्येन
पत्किंचिदिह कीर्तितं॥विहाय दक्षिणाभेकां तथा विप्रविसर्जनं॥अप
सव्यं तु तत्रापि मात्स्ये तु भगवान्मुनेरिति॥इदं चान्यवस्थितं॥ब्राह्मणा
नामानंत्यर्थं त्वपसेसव्येन॥विश्वेदेवाःप्रीयंतामिति उपवीतेन॥भो
जनपात्रचालनं दैवे सव्येन पित्र्ये पसव्येन॥स्वस्तिवाचनं तूपवीतेन
मरीचिवचनात्॥विसर्जनं प्रदक्षिणीकरणं च सव्येनेत्युक्तं॥अनुव्र
जमपसव्येन॥ब्राह्मणादनपुच्छस्तनग्रहणादि॥अक्षय्यमेसफलं जन्मे
त्यादि च॥उच्छिष्टोद्वासनं चलौकिकत्वादुपवीतेन॥यजमानकर्तृक
स्यपत्न्यैपिंडदानस्य पितृसंबंधराहित्यादुपवीतेन॥पिंडांस्तु गोज
विप्रेभ्य इत्या- दिकाप्रतिपत्तिस्तु पित्र्यत्वात्प्राचीनावीतिनेति दिक्॥
अथ विप्रनिमंत्रणादि॥कौर्मे॥श्वो भविष्यति हि श्राद्धं पूर्वेद्युरभिपूज
येत्॥असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेदिति॥नागरखंडे॥पूर्वे
द्युःसायमासाद्य संयतानां द्विजन्मनां॥गृहं गत्वा शुचिर्भूत्वा संयतांस्ता
न्निमंत्रयेत्॥यमः॥प्रार्थयीत प्रदोषांते भुक्तानशयितान्द्विजानिति॥
निमंत्रणं स्वयमेव कार्यं॥दाताविप्रान्निमंत्रयेदिति हेमाद्रौ देवलोक्तेः
॥असंभवे तु पुत्रादयोपि॥स्वयं शिष्योथवा सुत इति तत्रैव बृहस्पत्
क्तेः॥कांश्चिन्निषेधति नारायणः॥अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रिता
यैर्निमंत्रितं॥नागरखंडे॥कुलाचारसमोपेतान् गृहीत्वा चरणौ ततः॥
प्रसादयेच्च सव्येन दिक्षुभैरेवार्चनेपुरा॥युष्मानेव वयं श्राद्धं क्वामंत्रयामह
उदीरयेत्॥आगच्छंतु महाभागा विश्वेदेवास्ततो नव॥भक्त्या हूतोम
यां चैव त्वं चापि व्रतभाग्भव॥एवं युग्मान्समामंत्र्य दैवे श्वरे वक्रतो द्विज
न॥अयुग्मानपसव्येन पित्रर्थे चाभिमंत्रयेत्॥ब्राह्मणांश्च यथाशक्त्या

एकैकस्यपृथक्पृथक्॥ एकैकंवात्रयाणांवाप्येकमेवनिमंत्रयेत्॥द्वि
जानांमातामहानामप्येषएवविधिःस्मृतः॥ततःपादौपरिस्पृश्यद्विज
स्येदमुदीरयेत्॥श्रद्धापूतेनमनसापितृभक्तिपरायणः॥पितामेतव
कार्येस्मिन्तथैवचपितामहः॥स्वपित्रासहितोभ्येतुत्वंचव्रतपरोभ
व॥एवंपितॄन्समाहूयतथामातामहानथ॥सव्यंकृत्वानमस्कृत्य
तान्विप्रान्स्वगृहंव्रजेत्॥तत्रैव॥ब्राह्मणानांगृहंगत्वातान्प्राप्यविन
यान्वितः॥अमुकस्यत्वयाश्राद्धेक्षणोवैक्रियतामिति॥वदेदभ्युप
च्छेयुर्विप्राश्चैवनथेतिच॥भूयोपिहिहरेत्कर्त्तातंप्राप्नोतुभवानिति
॥द्विजस्तुप्राप्नवानीतिविधिरेषनिमंत्रणे॥प्रचेताः॥कृतापसव्यः
पूर्वेद्युःपितृपूर्वंनिमंत्रयेत्॥भवद्भिःपितृकार्यंवःसंपाद्यंनःप्रसीद
त॥याज्ञवल्क्यः॥द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा॥माताम
हानामप्येवंतंत्रंवावैश्वदेविकं॥वसिष्ठः॥द्वौदैवेत्रयःपित्र्येत्रीनेकै
कमुभयत्रवा॥भोजयेत्सुसमृद्धोपिविस्तरंतुविवर्जयेदिति॥विस्त
रंनचावरान्भोजयेदयुजोवायथोत्साहमितिगौतमोक्तं॥तस्यत्वंस
तसमृद्धोधिकारीत्यर्थः॥अनेकविप्राभावेत्वेकमपिभोजयेत्॥भोज
येदथवाप्येकंब्राह्मणंपंक्तिपावनमितिशंखोक्तेः॥अत्रवैश्वदेवप्रका
रमाहसएव॥यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत्॥अन्नंपात्रे
समुद्धृत्यसर्वस्यप्रकृतस्यतु॥देवतायतनेकृत्वायथाविधिनिवेद
येत्॥प्रास्येदग्नौतदन्नंतुदद्याद्वाब्रह्मचारिणइति॥चतुर्विंशतिम
तेपि॥विप्राभावेस्थानस्याद्द्वारेगोजलेपिवा॥इति॥अत्रविशेषो
मात्स्ये॥पठन्निमंत्र्यनियमान्श्रावयेत्पैतृकान्बुधः॥अक्रोधनैःशौ
चपरैःसततंब्रह्मचारिभिः॥भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणे
ति॥जातूकर्ण्यः॥निरामिषंसकृद्भुक्त्वाभुक्तःसर्वजनेगृहे॥निमंत्रणी
नपूर्वेद्युरुपगम्यद्विजोत्तमान्॥आदित्यपुराणे॥तदहस्तुशुचिर्भू
त्वाक्रोधनोत्वरितोभवेत्॥अप्रमत्तःसत्यवादीयजमानोपिवर्जयेत्
अध्वानंमैथुनंचैवश्रमंस्वाध्यायमेववा॥अत्राहुः॥शब्देननिमंत्रण
प्रभृतिमुक्त्वात्रपरिणामावधिःकालोगृह्यते॥स्यादत्रपरिणामांतंब्र
ह्मचर्यंद्वयोस्ततइतिप्रचेतःस्मरणात्॥वृद्धमनुः॥निमंत्र्यविप्रांस्तद

हर्षंजयेन्मैथुनंसुरां॥क्षुरंक्षुरकर्मेएतच्चनखनिकृंतनादेरप्युपलक्षण
मितिहेमाद्रिः॥जाबालिः॥तांबूलंदंतकाष्ठंचस्नेहस्नानमभोजनं॥रत्यौ
षधपरान्नानिश्राद्धकर्त्तातुवर्जयेत्॥प्रचेताः॥श्राद्धभुक्त्वातरुत्थापप्र
कुर्याद्दंतधावनं॥श्राद्धकर्त्तानकुर्वीतदंतप्रक्षालनंबुधः॥विष्णुः॥कोपंप
रिहरेन्नाश्रुपातयेन्नत्वरांकुर्यात्॥निमंत्रितद्विजपरित्यागेदोषप्रायश्चि
त्तंचाहनारायणः॥केतनंकारयित्वातुयोनिर्वासयतिदुर्मतिः॥ब्रह्मह
त्यामवाप्नोतिशूद्रयोनौचजायते॥एतस्मिन्नेनसिप्राप्तेब्राह्मणोनिय
तःशुचिः॥यतिचांद्रायणंकृत्वातस्मात्पापात्प्रमुच्यते॥केतनमाम
न्त्रणं॥हारीतः॥दैवेवाथदिवापित्र्येनिमंत्र्यब्राह्मणंयदि॥तर्पयेन्नय
थान्यायंसतत्तस्यफलंहरेत्॥प्रमादाद्विस्मृतंज्ञात्वाप्रसाद्यैनंप्रयत्न
तः॥तर्पयित्वाविशेषेणसर्वंतत्फलमाप्नुयात्॥गौतमः॥सद्यःश्राद्धी
शूद्रातल्पगस्तत्पुरीषेमासंनयतेपितॄन्॥श्राद्धंकरिष्यमाणंकृतंवा॰
स्यविद्यतेइतिश्राद्धीज्ञातासद्यस्तत्क्षणमारभ्यएतेत्वनियमाआव
श्यकाः॥तदुक्तमग्निपुराणे॥अमैथुनादयःसर्वेनियमाःश्राद्धकारिणा
अप्रमत्तेनकर्त्तव्याःप्रमादान्निरयंव्रजेत्॥अशक्तावन्यैस्तुक्रियमाणे
श्राद्धेउभाभ्यामपिकर्त्तव्याइत्युक्तंवाराहपुराणे॥नशक्नोतिस्वयंक
र्तुंयथाह्यनवकाशतः॥श्राद्धंपुत्रेणशिष्येणतदान्येनापिकारयेत्॥नि
यमानाचरेत्सोपिविहितांश्चवसुंधरे॥यजमानोपितान्सर्वानाचरेत्सु
समाहितः॥ब्रह्मचर्यादिभिर्भूमेनियमैःश्राद्धमक्षयं॥अन्यथाक्रिय
माणंतुमोघमेवनसंशयइति॥कात्यायनः॥अनिंद्येनामंत्रितोनाप
क्रामेत्॥अनिंद्येनभोज्यान्नेननिमंत्रितः॥निमंत्र्यमाणःनापक्रमेत्
ननेच्छेत्॥किंत्वभ्युपगच्छेदेव॥तथाचशातपथे॥तस्माद्दुहानिंद्य
सवृतोनापक्रामेदितिगौतमः॥अनिंद्येनामंत्रितेशक्तेननप्रत्याख्यानं
कर्त्तव्यमिति॥अनेनार्थान्निंद्यामंत्रणेभोक्तुमसामर्थ्येचप्रत्याख्येय
मितिगम्यते॥षड्विंशन्मते॥विद्यमानधनोविद्वान्भोज्यान्नेननिमंत्रि
तः॥कथंचिदप्यतिक्रामन्नापःशूकरतांव्रजेत्॥अन्येननिर्दिष्टनस्यबहु
दक्षिणादिलाभलोभात्क्वचिदतिक्रमेनदोषइतिगम्यते॥कात्याय
नः॥आमंत्रितोन्यदन्ननप्रतिगृह्णीयात्॥अन्यदीयश्राद्धोपक्लृप्तंतंदु

लादिरूपमप्यन्नंनप्रतिगृण्हीयादितिकर्कः॥श्राद्धीयव्यतिरिक्तस्य
विनिषेधइत्यन्ये॥यमः॥अहिंसासत्यमक्रोधोदूरेचागमनक्रिया॥
अभारोद्वहनंक्षांतिःश्राद्धस्योपासनेविधिः॥दूरेसीम्नःपरस्तात्॥तथा
चब्रह्मांडपुराणे॥नसीमानमतिक्रामेच्छ्राद्धार्थेवैनिमंत्रितः।पर्यटन्
सीममध्येतुनकदाचित्सदुष्यति॥यमः॥पुनर्भोजनमध्वानंभाराध्यय
नमैथुनं॥संध्यांप्रतिग्रहंहोमंश्राद्धभुग्वर्जयेत्सदा॥होममन्येनकारये
दित्याहकात्यायनः॥सूतकेचप्रवासेचअशक्तौश्राद्धभोजने।एवमादि
निमित्तेषुहावयेदितियोजयेत्॥अन्यस्यहोतुरलाभेभविष्यत्पुराणउ
क्तं॥दशकृत्वःपिबेदापोगायत्र्याश्राद्धभुग्द्विजः॥ततःसंध्यामुपासीत
जपेच्चजुहुयादपि॥मंडलमुक्तंमत्स्यपुराणे॥भवनस्याग्रतोभुविगो
मयेनानुलिप्तायांगोमूत्रेणतुमंडलेइति।लिप्तायामितिसामान्यतःसर्व
कर्मांगतयाप्राप्तमनूद्यते॥गोमूत्रसहितेनगोमयेनमंडलेकार्यइतिशे
षः॥शंभुः॥उदक्प्लवमुदीच्यंस्याद्दक्षिणंदक्षिणाप्लवमिति॥मंडलमिति
शेषः॥तत्रउदीच्यमुदक्प्लवंदैवं॥दक्षिणंदक्षिणाप्लवंपित्र्यमितिव्य
वस्था॥बौधायनः॥प्रदक्षिणंतुदेवानांपितॄणामप्रदक्षिणं॥देवानामृज
वोदर्भाःपितॄणांद्विगुणाःस्मृताइति॥शातातपः॥उदङ्मुखस्तुदेवानां
पितॄणांदक्षिणामुखः॥कात्यायनः॥दक्षिणंपातयेज्जानुदेवान्परिच
रन्सदा॥पातयेदितरज्जानुपितॄन्परिचरन्सदेति॥मंडलेपिविशेषमा
हशंभुः॥उत्तरेक्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्॥दक्षिणेदक्षि
णाग्रांस्तुसतिलान्विन्यसेद्बुधइति॥मात्स्ये॥नामगोत्रेपितॄणांतुप्राप
कंहव्यकव्ययोरिति॥तथा॥पाद्यंचैवतथाचार्घ्यंदैवमादौप्रयोजयेत्
॥शन्नोदेवीतिमंत्रेणपाद्यंचैवमदापयेत्॥आदित्यपुराणे॥विप्रांस्तुप्रा
ङ्मुखांस्तेभ्योहोतुपूर्वंनिवेशयेत्॥उत्तराभिमुखान्वितं॥कुर्वीतभक्ति
संपन्नस्तंत्रंवावैश्वदेविकमिति॥अत्रपितृमातामहपार्वणयोरेकःप्र
योगःपृथग्वेतिपक्षद्वयं॥आद्यपक्षेवैश्वदेविकतंत्रताद्वितीयेआव
त्तिरितिमाधवादयः॥उपवेशनोत्तरंविप्राणांधर्मानाहभृगुः॥आमंत्रि
तोजपेद्दोग्ध्रींआसीनस्तुनिषंगिणः॥भुक्त्वातुवामदेव्यंचश्राद्धभोक्ता
नदुष्यति।आसीनआसनउपवेशितः॥दोग्ध्रीमुपव्हयेसुदुघामिति

य
हिंकृण्वतीमिति वा॥ यत्तु हेमाद्रिः॥ आब्रह्मण इत्यादीनि जूंष्यपि दो
हनपदो — — — पेतानि जपेदिति॥ तन्न॥ स्त्रीलिंगनिर्देशेन ऋच उ
पादानात्॥ साध्येकाकाचित् एकवचनात्॥ निषंगिणस्तु त्रयः॥ य
जूंष्यपि तत्र जप्यानि॥ निषंगिणः। इंद्र दुह्य यामेति। सइषुहस्तैरि
ति च ऋक्॥ नमः कृत्स्न वीताय। नमो वच्चते इत्यादीनि च॥ गोभिलः॥
आमंत्रितो जपेद्दोहानि युक्तस्तृषभान् जपेत्॥ अनिंद्यगांश्च तत्रैव ज
प्त्वा श्रीषाद्द्विजोत्तमः। ऋषभानिषडंगादीनि छंदोगेषु प्रसिद्धानि॥ मरी
चिः॥ पवित्रपाणयः सर्वे तेच मौनव्रतान्विता इति।। यमः॥ ब्रह्माद्याश्च
कथाः कुर्युः पितॄणामेतदीप्सितमिति॥ स एव॥ भिक्षुश्च ब्रह्मचारी च
भोजनार्थमुपस्थितः॥ उपविष्टेष्वथ प्राप्तः कामं तमपि भोजयेदिति॥
विप्रोपवेशनोत्तरकृत्यं पुराणे॥ श्राद्धभूमौ गयां ध्यात्वा ध्यात्वा देवंज
नार्दनं॥ ताभ्यां चैव नमस्कृत्य ततः श्राद्धं प्रवर्त्तयेत्॥ वस्वादींश्च पितॄन्
ध्यात्वेति वा तृतीयः पादः॥ तथा॥ उभौ हस्तौ समौ कृत्वा जानुभ्यामंत
रास्थितौ॥ सप्रयतश्चोपविष्टान् सर्वान्पृच्छेद्द्विजोत्तमान्॥ श्राद्धं करिष्य
इति पृच्छेदित्यर्थः॥ ततो विप्राः कुरुष्वेत्यभ्यनुज्ञां ब्रूयुः॥ एतदनंतरंकृ
त्यं ब्रह्मांडपुराणे॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥ नमः स्व
धायै स्वाहायै नित्यमेव नमो नमः॥ आद्यवसाने श्राद्धे सर्त्विग्वृत्तं जपे
त्सदेति॥ अयं च जपः संकल्पोत्तरमाज्ञादानोत्तरं कार्यः॥ शिष्टास्त्वा
सनोत्तरमेव कुर्वंति॥ ततः कर्त्तव्यं निगमे॥ अपहता इति तिलान् विकि
रेदिति॥ एतच्च विकिरणं जपात्प्राक्कार्यमिति केचित्॥ अनंतरकृत्यमाह
याज्ञवल्क्यः॥ पाणिप्रक्षालनं कृत्वा विष्टरार्थान् कुशानपीति॥ पुराणे
आसने चासनं दद्याद्वामे वा दक्षिणेपि वा॥ पितृकर्मणि वामे वै दैवे क
र्मणि दक्षिणे॥ दैवे दर्भाः सयवाः॥ देवानासययात्दर्भाद्इति काठकोक्तेः॥
ततः सधर्मकां द्वितीयनिमंत्रणमुक्तं संग्रहे॥ ततः पुनरपो दत्वा निमंत्र
येत्॥ दैवे क्षणः क्रियतां ततस्तथेति विप्रो ब्रूयात्॥ ॥ प्राप्नोतु भवानिति
कर्त्ता पुनर्ब्रूयात्॥ प्राप्नवानीति विप्रः पुनर्ब्रूयात्॥ अत्र विशेषः पुराणे॥
निरंगुष्ठं गृहीत्वा तु विश्वान्देवान् समाह्वयेत्॥ गृहीत्वेत्यस्यानंतरं नि
मंत्र्येति शेष इति माधवः॥ आवाहने विशेषमाह यमः॥ यव हस्तस्त

तो देवान् पृष्ट्वाभ्यावाहनं प्रति॥ आवाहयेदनुज्ञातो विश्वेदेवासइत्यृचा॥ विश्वेदेवाःशृणुतेति मंत्रं जप्त्वा ततोःक्षतान्॥ ओषधयइति मंत्रेण विकिरेत्तु प्रदक्षिणं॥ पादादिमस्तकांतमक्षतानारोपयेदित्यर्थ इति माधवः॥ अत्र श्राद्धभेदेन विश्वेदेवव्यवस्थामाह शंखः॥ इष्टिश्राद्धे क्रतुर्दक्षः संकीर्त्यौ वैश्वदेविके॥ नांदीमुखे सत्यवसू काम्ये च धुरिलोचनौ॥ पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ॥ नैमित्तिके कामकालावेवं सर्वत्र कीर्तयेत्॥ धुरिरोचनावितिक्वचित्पाठः॥ अत्रेष्टिश्राद्धशब्देन पारिभाषिकं कर्मांगश्राद्धमुच्यते॥ तच्चाह पारस्करः॥ निषेधकाले सोमे च सीमंतोन्नयने तथा॥ ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतमिति। निषेको गर्भाधानं॥ तथा चाधान सोमयाग निषेकादित्रयसंस्कारादिभूतं श्राद्धे क्रतुदक्षाविति हेमाद्रिमाधवौ॥ अत्र भ्रातृचरणाः॥ इष्टिश्राद्धशब्देन कर्मांगश्राद्धग्रहणे प्रमाणाभावाद्वाक्यसाफल्याय भाष्यकारमते पावमानेष्टीनां समप्राधान्यपक्षे आधानांगमेव श्राद्धं गृह्यते॥ तस्यापि कथं चिदिष्टिजन्याहवनीयादिजौपोर्वादिप्रयोज्यत्वेनेष्टिश्राद्धत्वात्॥ यद्वा प्रयोगपारिजाते॥ यस्य जाताः प्रमीयेरन्पुत्रा नैन भवंति वा॥ ऋतुकालेदिने षष्ठे दंपती समलंकृतौ॥ कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकमित्यादिना विहितपुत्रकामेष्ट्यंगभूतं श्राद्धं गृह्यते॥ अस्मिन्पक्षे आधानांगश्राद्धे नांदीमुखवत्सत्यपुराणीयेनउपसंहारात्॥ तेन नवान्नलाभइतिनिमित्ताधिकारक्रियमाणराहूपरागादीनामुपलक्षणमिति हेमाद्रिमतं निरस्तं॥ पितृभक्त्या नवान्नभोजनात्पूर्वं क्रियमाणं नैमित्तिकमिति तु स्मृतिचंद्रिकायां॥ एकोद्दिष्टतुयच्छ्राद्धं तन्नैमित्तिकमुच्यतइति पारिभाषितत्वेपि तस्य दैवहीनत्वान्न ग्रहणं॥ अतएव सपिंडीकरणं श्राद्धकाशिकायां॥ एकोद्दिष्टपार्वणोभयरूपत्वेन देवसत्वात्तद्ग्रहणमिति केचित्॥ एकोद्दिष्टस्थाने पार्वणरूपेणाक्रियमाणं सांवत्सरिकमित्यपि केचित्॥ पितृपक्षे चतुर्दश्यामेकोद्दिष्टे विश्वेदेवसत्वात्तस्य ग्रहणमिति तु युक्तं प्रतिभाति॥ आदित्यपुराणे॥ अपि कन्यागते सूर्ये काम्ये च धुरिलोचनौ॥ कन्यागतसूर्यनिमित्तीकृत्य विहिते भाद्रपदापरपक्षइति हेमाद्रिः। कन्यासंक्रांतिनिमित्त

कएवेतियुक्तं॥आसनदानोत्तरंचार्घपात्रासादनंकार्यंतदाहयाज्ञव
ल्क्यः।यवैरन्ववकीर्याथमार्जनेसपवित्रके॥शन्नोदेव्यापयःक्षिप्त्वा
यवोसीतियवांस्तथेति।मात्स्ये॥विश्वान्देवान्यवैःपुष्पैरभ्यर्च्यास
नपूर्वकं॥पूरयेत्पात्रयुग्मंतुस्थाप्यदर्भपवित्रकइति॥अर्घ्यदानमधि
कृत्यकात्यायनः॥सौवर्णराजतौदुंबरखड्गमयानांपात्राणामन्यतमे
षुयानिवाविद्यंतेपत्रपुटकेचेति॥मानिकांस्यादीनिअत्रराजतंपित्र्य
एवनदैवे॥शिवनेत्रोद्भवंयस्मादतस्तत्पितृवल्लभं॥अमंगलंतद्यत्ने
नदेवकार्येषुवर्जितमितिस्मृतेः॥प्रतिपात्रंचपवित्रद्वयंचस्थाप्यं॥त
थाचचतुर्विंशतिमते॥द्वेद्वेशलाकेदेवानांपात्रेकृत्वापयःक्षिपेत्॥यो
गयाज्ञवल्क्यः॥पवित्रेस्थइतिमंत्रेणद्वेपवित्रेचकारयेत्॥गार्ग्यःस्वा
हेतिचैवदेवानामिति॥अर्घ्यपात्रस्थापनेसोमंत्रोनतुदानेइतिमाधवः
॥सएव॥दत्वाहस्तेपवित्रंतुसंपूज्यार्घ्यंविनिक्षिपेदिति॥याज्ञवल्क्यः
॥यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेदिति॥अर्घ्यदानोत्तरकृ
त्यमाहसएव॥दत्वोदकंगंधमाल्यंधूपदानंसदीपकं॥अत्रगंधादिग्र
हणंवाससोप्युपलक्षणमितिमाधवादयः।एवमासनादीन्वासोंतान्
वैश्वदेविकपदार्थान्कांडानुसमयेनकृत्वापित्र्येपितथैवतान्कुर्यात
॥तथाचयाज्ञवल्क्यः॥अपसव्यंततःकृत्वापितॄणामप्रदक्षिणमिति
॥ ॥ ॥ ॥ ।अत्रततइत्यनेनवैश्वदेविकपदार्थ
कांडोत्तरंपित्र्यर्चनविधानात् कांडानुसमयोगम्यतइतिमाधवविज्ञा
नेश्वरादयः॥आसनादिदानेतिकर्तव्यतामाहसएव॥द्विगुणांस्तुकु
शान्दत्वाह्युशंतस्त्वेत्यृचापितॄन्॥आवाह्यतदनुज्ञातोजपेदायंतुन
स्ततः॥पूर्वमनंतरंचापोदेयाः॥आपःप्रदायदर्भान्द्विगुणान्भुग्नान्
॥आसनंप्रदायापःप्रदायेत्याश्वलायनोक्तेः।कुशैःसहतिला अपिदेयाः
॥तथाच काठके॥पितॄणांद्विगुणांस्तिलैरिति॥ सहार्थेतिलैरितितृती
या॥आवाहनेतिलविकरणेविशेषमाहप्रचेताः॥शिरःप्रभृतिपादां
तंनमोवइतिपैतृकेइति॥चतुर्विंशतिमतेचअर्घ्यपात्रंविधायैवंब्राह्मणा
न्पूजयेत्ततः॥विश्वेदेवास्तुपादादिशिरआदिपितामहानिति॥जप
नंतरंविशेषःपुराणे॥जपेदायंतुनइतिमंत्रंसम्यगशेषतः॥रक्षार्थंपि

तूसंस्रवस्थितिः कृत्वः सर्वतोदिशं॥तिलांस्तु प्रक्षिपेन्मंत्रमुच्चार्यापहता
इति॥अर्घ्यदानमाह याज्ञवल्क्यः॥यवार्थास्तु तिलैः कार्याः कुर्याद
र्घ्यादि पूर्ववत्॥दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः॥पितृभ्यः
स्थानमसीति न्युब्जं पात्रं करोत्यधेति॥अर्घ्यपात्राणामासादनप्र
कारमाह विष्णुः॥दक्षिणाग्रेषु दक्षिणापवर्गेषु त्रिष्वप आसिंचेच्छ
न्नोदेवीरिति अर्घ्यपात्रेषु पवित्रांतर्हितेषु जलं प्रक्षिप्य तत्र तिलान्मं
त्रेण प्रक्षेप्याः॥तथा चाश्वलायनः॥पात्रेषु दर्भांतर्हितेषु अपः प्रदाय
शन्नोदेवीरभिष्टय इति मंत्रितासु तिलानावपति॥तिलोसि सोमदेवत्यो
गोसवो देवनिर्मितः॥प्रत्नवद्भिः प्रत्तः स्वधया पितॄनिमांल्लोकान्प्रीण
याहि नः स्वधा नम इति अस्मादेव सूत्राच्छन्नोदेवीरिति मंत्रोभिमंत्र
ण एवाश्वलायनीयानां॥अन्येषां तु जलप्रक्षेपे करणं॥अर्घ्यपात्राणि
पितृसंख्ययैव न तु विप्रसंख्यया तेन पित्रादीनामेकैकस्यानेकविप्र
पक्षेपि त्रीण्येवार्घ्य पात्राणि॥स्त्रीत्वेपि पितॄणां त्रीण्येव कुर्यात्पात्राणि
धर्मवित्॥एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधीति वैजवापोक्तेः
॥स्त्रीत्वी कुशानां स्त्रीयैत्यर्थः॥अर्घ्यपवित्राणि कार्याणि॥तिस्रस्तिस्रः
शलाकाः स्युः पितृपात्रेषु पार्वण इति चतुर्विंशतिमतात्॥ब्रह्मपुराणे॥
अर्घ्याः पुष्पैश्च गंधैश्च ताः प्रपूज्याश्च मंत्रविदिति॥अर्घ्या आपः॥अ
र्घ्यदानप्रकारमाहाश्वलायनः॥ताः प्रतिग्राहयित्वा स्वधार्घ्या इति ता
आपो ब्राह्मणहस्ते पूदकपूर्वकं दर्भान्प्रदायोदकपूर्वमर्घ्यं दद्यादि
ति॥या दिव्या इत्युक्त्वा सावेतनेर्घ्योदकमिति अप उपस्पृशेदेवमे
वेतरयोरिति॥एवं विप्रहस्तेष्वर्घ्यं दत्वा तेभ्यो हस्तेभ्यः पात्रांतरेषु
तान्संस्रवान्प्रथमेर्घ्यपात्रे गृहीत्वा तत्पात्रं न्युब्जमधोमुखं पितृ
भ्यः स्थानमसीति मंत्रेण कृत्वा तथैव स्थापयेदित्यर्थः॥श्रीदत्तस्तु सं
स्रवत्यस्मादिति व्युत्पत्त्या पात्रस्थानामपां ग्रहणमित्याह॥अत्राचा
रव्यवस्था न्युब्जपात्रस्थापनानंतरं विशेषमाह वैजवापः॥तस्योप
रि कुशान्दत्वा प्रदद्यादेवपूर्वकं॥गंधपुष्पाणि धूपं च दीपं वस्त्रोपवीत
कमिति॥व्यासः॥सपवित्रकरो गंधैर्गंधद्वारेति पूजयेत्॥धूपं धूरसी
त्युक्त्वा दीपो ज्योतिरिदं च ते।यत्तु॥ललाटे पुंड्रकं दृष्ट्वा स्कंधे माल्यं त

श्चैव च॥ निराशाः पितरो यांति दृष्ट्वा वृषलीपतिमिति तद्वत्तुल
सिप्राशयमिति हेमाद्रिः॥ माल्यमपि शिरसा धार्यं न स्कंधे॥ विष्णुः
॥ घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः॥ अत्रिः॥ सुवर्णवस्त्राणीत्य
नेन दद्याद्धंसासि शांकितः॥ शातातपः॥ सुवासुवासाइति वस्त्रं
दद्यादभावे यज्ञोपवीतमिति॥ अत्र दैवपूर्वकमित्यनेन गंधादीनां
दैवे पित्र्ये च पदार्थानुसमयेन अनुष्ठानं गम्यते॥ आसनादीनामा
च्छादनांतानां सर्वेषामेव पदार्थानुसमयः॥ कांडानुसमयो वेत्युक्तं
स्मृत्यर्थसारे माधवीये च॥ अथाग्नौकरणं॥ याज्ञवल्क्यः॥ अग्नौ
करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतं॥ कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पि
तृयज्ञवत्॥ घृतेन शाकादिपरिसंख्येति विज्ञानेश्वरः॥ पितृयज्ञव
दित्यनेन अग्निमुपसमाधाय चरुं श्रपयित्वा मेक्षणेनावदाय सोमा
य पितृमते स्वधा नमो ग्नये कव्यवाहनाय स्वधा नम इति हुत्वा मेक्ष
णं च जुहुयादित्येतावदतिदिश्यते॥ ततः शेषमन्नं पितृपात्रेषु दद्या
न्न तु वैश्वदेवपात्रेषु रौप्येष्वित्युक्तत्वात्॥ अमावास्याश्राद्धे सा
ग्नेर्दर्शयागार्थं विहृतदक्षिणाग्निसद्भावात्तत्रैवाग्नौकरणं॥ अन्यश्रा
द्धेषु तदाधानिनः केवलस्मार्ताग्निमतश्चौपासने॥ तथा च विष्णु
धर्मोत्तरे॥ आहिताग्निस्तु जुहुयाद्दक्षिणेग्नौ समाहितः॥ अनाहिताग्नि
श्चौपसदे ग्न्यभावे द्विजे प्सु वेति॥ आहिताग्निः सर्वाधानी औपस
दो गृह्याग्निः॥ कात्यायनः॥ अग्नौकरणहोमं तु कुर्याद्दीक्षितयन्मतं
॥ सपत्रापां समीपे स्याच्छ्राद्धे ज्ञेयो विधिस्त्विति॥ केचित्तु श्राद्धस्य
गृह्यत्वात्कर्मस्मार्त्ते विवाहाग्नावित्युपदेशेन पितृयज्ञवदित्यतिदे
शबाधाद्दक्षिणाग्निसद्भावे प्यौपासन एवेत्याहुः॥ तन्न॥ उपदेशस्यौ
पासनहोमादिषु सावकाशतया विरोधाभावेनान्यगतिकबाधस्या
न्याय्यत्वात्॥ वाचनिकातिदेशस्योपदेशस्य तुल्यत्वाच्च॥ अपरार्के
स्तु॥ पितृयज्ञवदित्यतिदेशसामान्यवचनं कर्मस्मार्त्तमित्युपदेश
सामान्यवचनानुरोधेन दक्षिणाग्निव्यतिरिक्तप्राकृतपदार्थविषयम
तो दर्शाधानेन गृह्यसद्भावे तत्र होमः॥ अभावे तु दक्षिणाग्नौ तथा च वा
युपुराणे॥ आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः॥ अग्न्यर्थं लौकि

केनापिजुहुयात्कर्मसिद्धयइति॥अत्राग्न्यर्थमित्यनेनगृह्याग्निका
र्येदक्षिणाग्निविधानेनगृह्याभावेदक्षिणाग्निर्बोध्यइति॥तन्न॥कार्ये
विधौफलंचमसेनेवसोमस्यशरैरिवचकुशानांगृह्याग्निसत्त्वेपिद
क्षिणाग्निनातद्बाधस्यैवोचितत्वात्॥वस्तुतस्तु॥अग्न्यर्थमित्यने
नैकवाक्योपात्तदक्षिणाग्निकार्यएवलौकिकोविधीयतइतियुक्तं॥
यद्यपिस्मार्तकर्मविवाहाग्नावित्यस्याबाधायआहिताग्निस्तुजुहु
यादितिवचनंसर्वाधानेनगृह्याग्न्यभावेदक्षिणाग्निविधानपरमि
तितदप्ययुक्तं॥विशेषविषयअपवादविषयेवोत्सर्गशास्त्रस्याप्र
वृत्तेः॥लौकिकपदेनगृह्याग्निरेव॥नैपितृयज्ञियोहोमोलौकिकेग्नौ
विधीयतइत्यसंस्कृतस्यनिषिद्धत्वादितिहेमाद्रिः॥तन्न॥पितृयज्ञि
यपदस्यपिंडपितृयज्ञांगभूताग्नौकरणहोमपरत्वात्तत्रचेदंत्या
यमाप्तस्याग्निप्रतिनिध्यभावस्यानुवादकंवायुपुराणादिवचनप्रा
प्तस्यनिषेधकंवा॥अनग्निकस्यसर्वाधानिनश्चासंस्कृतेलौकिक
एव॥हस्तेग्नौकरणंकुर्यादग्नौवासाग्निकोद्विजइतिपराशरवच
नादितिवृत्तिकस्यसर्वाधानिनश्चासंस्कृतेलौकिकएव॥हस्तेग्नौ
करणंकुर्यादग्नौवासाग्निकोद्विजइतिपराशरवचनादितिवृत्तिका
रादयः॥परेत्वेतद्वचनमग्न्यसंनिधानपरमित्याहुः॥यत्तुधूर्तस्वामी
॥आपस्तंबानांमासिश्राद्धस्यापूर्वत्वेनपितृयज्ञाद्दक्षिणाग्नेरप्रा
प्तत्वात्स्मार्तस्यवाभावेनसर्वाधानिनोधिकरणाभावाद्धोमलो
पइति॥तन्न॥पितृयज्ञधर्मकत्वाभावेपिस्मृतिवचनेनदक्षिणाग्नेः
पाणिलौकिकाग्न्यादेश्चप्राप्तिसंभवात्॥आश्वलायनानामन्वष्ट
क्यंचपूर्वेद्युर्मासिमासिचपार्वणं॥काम्यमभ्युदयेष्टम्यामेकोद्दिष्ट
मथाष्टमं॥चतुर्ष्वाद्येषुसाग्नीनांवह्नौहोमोविधीयते॥पित्र्यब्राह्म
णहस्तेस्यादुत्तरेषुचतुर्ष्वपीतिपरिशिष्टाद्विहृतदक्षिणाग्न्यभावे
विहृत्यहोमःकार्यइतिहेमाद्रिः॥अनेनैवन्यायेनसर्वश्राद्धेषुदक्षि
णाग्निविहरणंकर्तव्यमितियुक्तमुत्पश्यामः॥मनुः॥अग्न्यभावेतु
विप्रस्यपाणावेवोपपादयेत्॥योह्यग्निःसद्विजोविप्रैर्मंत्रदर्शिभि
रुच्यते॥अत्राभावोभार्यापरिग्रहाभावेनतदुत्तरकालिकाग्निस्वी

काराभावेनस्वीकृतोच्छेदेनअग्न्यसंनिधानेनचकेचित्तुभार्योपरिग्र
हाभावेनैवेतिवदंति॥अग्न्यभावेतुविप्रस्यपाणौदद्यात्तुदक्षिणे
॥अग्न्यभावःस्मृतस्तावद्यावद्भार्यांनविंदतीतिगार्ग्योक्तेः॥संभ
वत्येवाग्निसंबंधेऽप्यभावइतिवक्तुंशक्यमितिमत्वासाग्नेरेवक
दाचिदग्न्यसंनिधानेपाणिविधिरितिजयंतस्वामी।शूद्रस्यामश्रा
द्धेतेनाग्नौकरणंकुर्यादित्यनेनाग्नौकरणविधानात्तत्प्रत्येवाग्न्यपा
णिविधिरितिकेचित्॥वस्तुतस्तु॥पाणावेवेत्येवकारेणयल्लौकि
काग्निजलाद्यधिकरणांतरनिराकरणंतद्भार्योपरिग्रहाभावकृते
अग्न्यभावेनान्यस्मिन्।अन्यत्रतुपाणिरपीतिगार्ग्यवचनार्थः॥वि
प्रश्चाग्नेप्यधिकरणन्यायेनप्रकृतएव॥काश्यपः॥अनग्निकोय
दाविप्रःश्राद्धंकुर्यात्तुपार्वणं॥अग्नौकरणवत्तत्रहोमोदैवकरेभवे
त्॥उपवीतस्वाहाकारादिदैविकधर्मेणजुहुतामिदमितिहेमा
द्रिः॥देवस्यकरइतिसमासः॥विवक्षितैकवचनत्वादेकस्यैव॥त
दुक्तंवायुपुराणे॥वैश्वदेवेयदेकस्मिन्भवेयुर्बहवोद्विजाः॥तदैक
पाणौहोतव्यंस्याद्विधिर्विहितस्तथा॥स्वधाकारादिपित्र्यधर्मिणां
तुकात्यायनः॥पित्र्येयःपंक्तिमूर्द्धन्यस्तस्यपाणावनग्निकः॥हुत्वा
मंत्रवदन्येषांतूष्णींपात्रेषुनिक्षिपेत्॥यत्तुहेमाद्रौ॥अग्नौकरणव
त्कुर्याद्द्विजातौवैश्वदेविके॥पाणावेवतुतद्द्यान्नतुपित्र्येकदाच
नेति॥तद्दैवपाणिस्तुत्यर्थं॥अथवादैवेकृत्वानपुनःपित्र्येकर्तव्य
मित्येतदर्थं॥यत्रचामावास्याश्राद्धादिष्वनेकपार्वणतंत्रतातत्रपा
र्वणांतरसाद्गुण्यार्थंभेदेनानुष्ठानं॥ब्राह्मणैक्येतुतंत्रेणैव॥दैवेप्ये
वमेव॥तदाहकात्यायनः॥मातामहस्यभेदेपिकुर्यात्तंत्रेणसाग्निक
इति॥मत्स्यपुराणे॥अग्न्यभावेतुविप्रस्यपाणावथजलेपिवा॥अज
कर्णेश्वकर्णेवागोष्ठेवाथशिवांतिके॥शंखः॥अप्सुचैवकुशस्तंबेअ
ग्निःकात्यायनोब्रवीत्॥रजतेचसुवर्णेचनित्यंवसतिपावकः॥सौर
पुराणे॥महादेवस्यपुरतोगोष्ठेवाश्रद्धयान्वितइति॥स्मृत्यर्थसारेतु
पाणिहोमेइध्मस्पर्णविप्राभ्यनुज्ञानंसंति॥पित्र्यविप्रपाणिंपरिस
मूह्यपर्युक्ष्यवामेनोपस्तीर्यदक्षिणेनावदायजुहुयादिति॥कर्कस्त

निचंद्रिकाकारौतुविप्रानुज्ञायांविरोधाभावादनग्निश्चेदाज्यंगृहीत्वा
भवत्स्वेवाग्नौकरणं पूर्ववदथास्त्वितिशौनकोक्तेर्विप्रानु ज्ञाग्र
हणमेक्षणमप्युपादेयं॥अवदानरूपकार्यसत्वात्॥कार्यस्यस्यवि
द्यभावाच्च॥परिसमूहनपर्युक्षणेतुनभवतः पांसुनिरसनलक्षण
दृष्टकार्यस्यलोपात्॥नियमादृष्टमात्रस्य चाप्रयोजकत्वात् इति
न्यायमाहतुः॥हेमाद्रिस्तुमतद्वयमपिलिलेख॥नतुकिंचिन्निर्णि
नाय॥पाणौहुतस्यपृथक्भक्षणंनिषेधंनिगृह्यकाराः॥अन्नंपाणि
तलेदत्तंपूर्वमश्नंत्यबुद्धयः॥पितरस्तेनतृप्यंतिशेषान्नंनलभंतिते
॥यच्चपाणितलेदत्तंयच्चान्यदुपकल्पितं॥एकीभावेनभोक्तव्यंपृथ
ग्भावोनविद्यतइति।स्मृत्यर्थसारेतुसर्वाधानीदक्षिणाग्नौजुहुया
द्विप्रपाणौवेतिविकल्पमभिधायपाणिहुतंतदैवप्राश्याचम्योप
विशेत्॥अथवाभाजनेक्षिप्त्वाचम्योपविशेत्॥विधुरादिभिरग्निही
नैर्हुतंपूर्वंनाश्नीयाद्भोजनकालेएवतदश्नीयात्॥त्यक्ताग्निहुतंतुनाश्नी
यादिति॥अथपरिवेषणं॥यथालाभंकार्यं॥तदुत्तरकृत्यमाहयाज्ञव
ल्क्यः॥दत्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणं।कृत्वेदंविष्णुरित्यं
नेद्विजांगुष्ठंनिवेशयेत्॥मनुः।विष्णोर्हव्यंकव्यंचब्रूयाद्रक्षेतिवैक्रमा
त्॥याज्ञवल्क्यः॥सव्याहृतिकांगायत्रीमधुवाताइतितृचं॥जप्त्वाय
थासुखंवाच्यंभुंजीरंस्तेपिवाग्यताइति॥तथा॥गायत्रींत्रिःसकृद्वा
पिजपेद्व्याहृतिपूर्विकां॥मधुवाताइतितृचम ध्वित्येतत्त्रिकंतथेति
॥स्मृत्यंतरे॥संकल्प्यपितृदेवेभ्यःसावित्रीमधुमज्जपः॥श्राद्धेनिवेद्या
पोशानंजुषप्रैषोथभोजनं॥अथभोजयितुर्नियमाः॥याज्ञवल्क्यः॥अ
न्नमिष्टंहविष्यंचदद्यादक्रोधनोत्वरः॥इष्टंब्राह्मणानां॥मनुः।यद्यद्रो
चेतविप्रेभ्यस्तत्तद्दद्यादमत्सरः॥ब्रह्मोद्याश्चकथाःकुर्यात्पितृणामे
तदीप्सितमिति॥निगमः॥अपेक्षितंयोनदद्याच्छ्राद्धार्थमुपकल्पितं।
अधःकृच्छ्रातिकृच्छ्रासुतिर्यग्योनिषुगच्छति॥शंखः॥श्राद्धेनियुक्ता
नभुंजानान्नपृच्छेल्लवणादिषु॥उच्छिष्टाःपितरोयांतिपृच्छतोनात्र
संशयः।दातुःपततिबाहुर्वैजिह्वाभोक्तुस्तुभिद्यते॥देवलः॥नाश्रुसं
पातयेच्छ्राद्धेनजल्पेन्नहसेन्मिथः।नविभ्रंशेन्नसंक्रुध्येन्नोद्विजेन्ना

त्रकृत्वचित्॥ प्राप्ते हि कारणे श्राद्धे नैव क्रोधं समुच्चरेत्॥ आश्रितः खि
न्नगात्रो वा न तिष्ठेत्पितृसन्निधौ॥ आश्रितस्तंभभित्त्यादिषु निहित
शरीरः॥ विष्णुः॥ नान्यमासनमारोपयेन्न पदा स्पृशेन्नावक्षुतं कुर्या
त्॥ आसनग्रहणमाधारोपलक्षणं॥ ततश्चान्नपात्रमाधारोपरिन
स्थापयेदित्यर्थः॥ अथ यजमानजप्यानि॥ शंखलिखितौ॥ दर्भेष्वा
सीनो मधुवाता ऋचो जपेत्॥ अमुं च पाठमुपवीत्येव कुर्यात्॥ कुशपा
णिः कुशासीन उपवीती जपेत्तत इति ब्रह्माण्डात्॥ मनुः॥ स्वाध्यायं श्रा
वयेत्पित्र्ये धर्मशास्त्राणि चैव हि॥ आख्यानानीतिहासांश्च पुराणा
नि खिलानि च॥ आख्यानानि॥ सौपर्णादीनि॥ पौराणानि च रामनलसा
वित्र्युपाख्यानादीनि॥ इतिहासो महाभारतं खिलानि परिशिष्टा
नि॥ श्रीसूक्तादीनि॥ श्रावणानुवृत्तौ मात्स्ये॥ ब्रह्मविष्ण्वर्करुद्राणां
स्तोत्राणि विविधानि चेति॥ श्रावणानुवृत्तौ निगमे॥ राक्षोघ्नीः पावमा
नीरुदीरतामवरमध्यन्नपतींश्च मंत्रान्द्वादशाष्टाक्षरप्रभृतीन्॥
राक्षोघ्नीः कृणुष्व पाज इति पंचदश॥ रक्षोहणमिति पंचविंशतिः॥ इं
द्रासोमा तपतमिति पंचविंशतिः॥ अग्ने हंसि न्यत्रिण इति नव॥ पा
वमान्यः पुनंतु मा पितर इत्याद्याः षोडशर्चः॥ तरत्स मंदीति वर्गः॥ पव
स्व विश्वचर्षणिरिति द्वात्रिंशदृचः॥ त्वं सोमासीति द्वात्रिंशत्॥ उदीर
तामवर इति चतुर्दश अन्नवतीः पितुं नु स्तोषमित्येकादश॥ हारीतः॥
पुनंतु मा पितर इति षोडश पावमानीर्जपेद्दादितस्त्रीन्॥ षोडशानांम
ध्ये आद्यान्त्रीन्विशेषत इत्यर्थः॥ प्रचेताः॥ यजूंषि चैव रुद्रांश्च राक्षो
घ्नीऋचसर्वशः॥ रुद्रान् शतरुद्रियादीन्जपेदिति शेषः॥ शंखलिखि
तौ॥ अप्रतिरथमध्येगायत्रीमनुश्राव्येति॥ अप्रतिरथमाशुः शिशान इ
ति द्वादशर्चं॥ सामविशेष इति भाष्ये॥ सौरपुराणे॥ धर्मशास्त्रपुराणा
नि तथाथर्वशिरस्तथा॥ ऐंद्रं च पौरुषं सूक्तं ब्राह्मणान् श्रावयेत्तत इति
॥ सुरूपकृत्नुमूतय इत्यादीनि त्रीणि सूक्तानि प्रत्येकं दशर्चानि॥ इंद्र
मिद्गाथिन इत्यादीनि त्रीणि सूक्तान्यैंद्राणि॥ मात्स्ये॥ इंद्रेशसोमसूक्ता
नि पावमानीश्च शक्तित इति॥ ईशसूक्तानि रुद्रसूक्तानि स्पष्टानि॥ स्वा
दिष्ठयेत्यादीनि चत्वारि सूक्तानि सौम्यानि॥ भविष्ये॥ पावमान्यश्च कू

खांड्यः शुद्धवत्यस्तरत्समाः॥ राक्षोघ्नानि च सूक्तानि पितृसूक्तान्य
थापि वेति॥ श्रावयेदिति शेषः॥ याज्ञवल्क्यः॥ आतृप्तेस्तु पवित्राणि ज
प्त्वा पूर्ववज्जपं तथेति पूर्वजपः॥ व्याहृतीगायत्रीमधुवाता इति तृचः मधु
मध्विति त्रिः॥ तथा अग्निमीळ इति नवर्चं॥ वायवायाहीति च॥ अनाय
ज्वरीरिष इति द्वादशर्चं गायंतित्वेति च॥ इंद्रं विश्वा इत्यष्टौ ऋचः॥ अ
स्य वामस्येति पंचाशदृचः॥ सांख्यायनीयास्तु अग्निमीळ इत्यादीन्ये
कादश सूक्तानि॥ नवा उ देवा इति नवर्चं पठंति आचारादिति हेमाद्रिः
॥ अथ यजुर्वेदजप्यानि॥ हारीतः॥ अत्र पितर इति यजुर्नमो वः पितर
इति यजुः स्यातां॥ मधुवाता इति तिस्रः पुनंतु मा पितर इत्यनुवाकः॥
त्वं सोम प्रचिकित इति चैषापि व्याससंहिता॥ एतां जपन्पितॄन्प्रीणा
तीति॥ स्मार्तं वसिष्ठाभूयाः स्मेत्येतदंतं यजुः। बौधायनः॥ राक्षोघ्नानि
च सामानि स्वधावंति यजूंषि च॥ राक्षोघ्नानि देवव्रताख्यानि। स्वधावं
ति पितृभ्यः स्वधा पितृभ्य इत्यादीनि॥ मात्स्ये॥ तथैव शांतिकाध्यायं म
धुब्राह्मणमेव च॥ मंडलब्राह्मणं तद्वत्प्रीतिकारि च यत्पुनः॥ विप्राणा
मात्मनश्चापि तत्सर्वं समुदीरयेत्॥ भारताध्ययनं कार्यं पितॄणां परमप्रि
यं॥ शांतिकाध्यायः शन्नो वात इत्यादिः॥ इयं पृथिवीत्यादि मधुब्राह्म
णं॥ यदेतन्मंडलं तपतीत्यादि मंडलब्राह्मणं॥ प्रीतिकारि इतिहासा
ख्यानादि॥ वीणावेणुध्वन्यादिकं वा॥ तथा च ब्राह्मे॥ वीणावंशध्वनिं
चापि विप्रेभ्यः सन्निवेदयेदिति॥ अन्यान्यप्याचाराज्ज्ञेयानीति हेमा
द्रौ॥ तत्र तैत्तिरीयाणां तावज्जप्यानि॥ दिवो वेत्यादि विष्णव इत्यंतानि
यजूंषि अग्न उदध इत्यादि वत्यः पंचम इत्यंतानि च॥ रक्षोहणो वो व
लगहन इत्यनुवाकः॥ इंद्रो वृत्रं हत्वेत्यनुवाकः॥ वैश्वदेवेन वै प्रजाप
तिरित्याद्यनुवाकद्वयं॥ अयं वाव यः पवत इत्यनुवाकत्रयं॥ ऋचां प्रा
चीत्यनुवाकः॥ अमृतोपस्तरणमसीत्याद्यनुवाकपंचकं॥ ब्रह्ममेतु
मामित्यनुवाकत्रयं॥ अणोरणीयानित्यनुवाकः। मेधां म इंद्रो ददात्वि
त्यादयश्चत्वारोऽनुवाकाः॥ नकंचनेत्याद्युपनिषदित्यंतं खंडं॥ अथ वा
जसनेयिनां जप्यानि॥ कात्यायनः॥ अश्नत्सु जपेद्व्याहृतिपूर्वां गायत्रीं
सप्रणवां सकृत् त्रिर्वा राक्षोघ्नं पुरुषसूक्तं अप्रतिरथं पितृमंत्रान्यानि

त्रपवित्राणि॥ अथमैत्रायणीयानां॥ इषेत्वासुभूतायत्वावायवस्थ
देवोवःसवितेत्यादयःपंचानुवाकाः॥ अथकठानां॥ सोमायपितृमते
त्याज्यंपितृभ्योबर्हिषद्भ्यइत्याद्यनुवाकः॥ उशंतस्त्वाहवामहइत्या
द्यनुवाकः॥ नमान्तिन्यापितृयत्रदस्याद्यनुवाकः॥ अथछंदोगजप्या
नि॥ गोभिलः॥ अथत्सुजपेद्व्याहृतिपूर्वांसावित्रींतस्यांचैवगायत्रीं
पित्र्यांचसंहितामधुछंदसचस्वर्गलोकेमहीयतइहचास्यांक्षयं
भवतिवरंतनुः॥ प्राणायामपूर्वकंपंचसत्यांतंकृत्वागायत्रींसप्रणवां
सव्याहृतिंपठेदिति॥ ॐभूः ॐभुवः ॐस्वः ॐतपः ॐसत्यंइतिपं
चसत्यांतंकृत्वा॥ ॐभूर्भुवःस्वरितिसप्रणवव्याहृतिकांगायत्रींज
पेदित्यर्थः॥ मात्स्ये॥ बृहद्रथंतरंतद्वज्ज्येष्ठसामसरौरवं॥ जपेदिति
शेषः॥ गायत्रंबृहद्रथंतरादीनिछंदोगानांप्रसिद्धानि॥ प्रचेताः॥ पु
रुषव्रतानिज्येष्ठसामानिविविधानिच॥ पुरुषव्रतानिपुरुषसूक्तगी
यमानानिपंचसामानि॥ ब्रह्मांडे॥ आदित्यब्रह्मणोश्चैवविष्णोरुद्र
स्यचैवहि॥ सामानिश्रावयेच्छ्राद्धेतथान्यान्यपिभूरिशः॥ आदित्य
सामान्यादित्यव्रताख्यान्येकविंशतिः॥ ब्रह्मसामब्रह्मजज्ञानंप्रथ
ममितिप्रस्तावं॥ विष्णुरुद्रयोःसामनीछंदोगानांपुष्पग्रंथेप्रसिद्धे॥
कौथुमशाखीयैर्यद्वाउपविशंतिरित्यादीनिपंचदशसामानि असौ
वाआदित्यइत्याध्यायश्चश्रावणीयः॥ राणायनीयैर्महानाम्नीसा
मशिष्टाचाराच्छ्रावणीयमितिहेमाद्रिः॥ अथर्ववेदिनांतु॥ आइंद्रस्य
बाह्वइत्यप्रतिरथंसूक्तं प्राणायनमइत्यादीनित्रीणिसूक्तानि॥ स
हस्रबाहुःपुरुषइतिपुरुषसूक्तं॥ कालोअश्वोवहतुसप्तरश्मिरिति
कालसूक्तं॥ उपनिषद्मध्यात्मं॥ प्राणाग्निहोत्रमहोपनिषदं॥ एतत्स
र्वासंभवेतुमात्स्ये॥ अभावेसर्वविद्यानांगायत्रीजपमारभेत्॥ अथ
पौराणजप्यानि॥ विष्णुधर्मोत्तरे॥ देवताभ्यःपितृभ्यश्चमहायोगि
भ्यएवच॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः॥ आद्यावसाने
श्राद्धस्यत्रिरावृत्तंजपेत्सदा॥ तथापिंडनिर्वपणेवापिजपेदेनंसमा
हितः॥ पितरस्तत्क्षिप्रमायांतिराक्षसाःप्रद्रवंतिच॥ गारुडे॥ योविष्णुहृ
दयंमंत्रंश्राद्धेषुनियतःपठेत्॥ पितरस्तर्पितास्तेनपयसाचघृतेनच॥

चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांसमेवि
ष्णुःप्रसीदतु॥यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु॥न्यूनंसं
पूर्णतांयातिसद्योवंदेतमच्युतं॥आदिमध्यावसानेषुश्राद्धस्यनिय
तःश्रुतिः॥जप्यंविष्णुहृदयंमंत्रंविष्णुलोकेसमश्नुते॥चतुर्भिरिति
शतपथे॥आश्रावयेति॥अस्तुश्रौषडितिचतुरक्षरं॥यजेतिद्व्यक्षरं
॥येयजामहइतिपंचाक्षरं॥द्व्यक्षरोवषट्कारः॥एषसप्तदशःप्रजा
पतिरधिदैवतमिति॥विष्णुधर्मोत्तरे॥अमूर्त्तानांचमूर्त्तानांपितॄणां
दीप्ततेजसां॥नमस्यामिसदातेषांध्यायिनांयोगचक्षुषां॥इत्यादिस
प्तार्चिस्तोत्रंजपोप्युक्तः॥अथभोक्तृनियमाः॥प्रचेताः॥पीत्वापोशा
नमश्नीयात्पात्रेदत्तंविगर्हितं॥सर्वेंद्रियाणांचापल्यंनकुर्यात्पाणिपा
दयोः॥मनुः॥अत्युष्णंसर्वमन्नंस्याद्भुंजीरंश्चैववाग्यताः॥नचद्विजा
तयोब्रूयुर्दात्रापृष्टाहविर्गुणान्॥दात्रेत्यविवक्षितं॥अत्रिः॥हुंकारेणा
पियोब्रूयाद्धस्ताद्वापिगुणान्वदेत्॥भूतलाच्चोद्धरेत्पात्रंमुंचेद्धस्तेन
वापिबेत्॥प्रौढपादोबहिःकच्छोबहिर्जानुकरोथवा॥अंगुष्ठेनविना
श्नातिमुखशब्देनवापुनः॥पीत्वावशिष्टतोयानिपुनरुद्धृत्यवापिबेत्
॥खादितार्द्धंपुनःखादेन्मोदकानिफलानिवा॥मुखेनवाधमेदन्नंनि
ष्ठीवेद्भोजनेपिवा॥इत्थमश्नन्द्विजःश्राद्धंदत्वागच्छत्यधोगतिं॥बौ
धायनः॥पादेनपादमाक्रम्ययोभुंक्तेनापदिद्विजः॥नैवासौभोज्यतेश्रा
द्धेनिराशाःपितरोगताः॥शंखलिखितौ॥ब्राह्मणाअन्नगुणदोषैर्नाभि
वदेयुर्नानृतंब्रूयुः॥अन्योन्यंनप्रशंसेयुः॥अन्नपानंनप्रभूतमितिब्रू
युरन्यत्रहस्तसंज्ञया॥नाधिकंदद्यान्नप्रतिगृण्हीयात्॥ददृशानात
पः॥अपेक्षितंयाचितव्यंश्राद्धार्थमुपकल्पितं॥नयाचतेद्विजोमूढः
सभवेत्पितृघातकः॥यमः॥कृच्छ्रद्वादशरात्रेणमुच्यतेकर्मणस्त
तः॥तस्माद्द्विजान्नैवदद्यान्नयाचेन्नचदापयेदितिमनुवचनंतदनु
कल्पितवस्तुविषयं॥मनुः॥यद्वेष्टितशिराभुंक्ते —— यद्भुंक्तेदक्षि
णामुखः॥सोपानत्कश्चयद्भुंक्तेतद्वैरक्षांसिभुंजते॥अतएवनिषेधा
दनवकाशेदक्षिणेतरदिङ्मुखभोजनमनुमतमितिज्ञापयतेबह्वृच
परिशिष्टे॥यच्चपाणितलेदत्तंयच्चान्यमुपकल्पितं॥एकीभावेनभोक्त

ल्यंपृथग्भावोनविद्यते॥पाणितलेदत्तमग्नौकरणान्नं॥निगमः॥मांसा
पूपफलेक्ष्वादिदंतच्छेदंनभक्षयेत्॥ग्रासशेषंनपात्रेस्येत्क्षीरशेषंतुनो
पिबेत्॥प्रमादादितरेतरस्पर्शेतुकर्त्तव्यमाहशंखः॥श्राद्धपंक्तौतुभुं
जानोब्राह्मणोब्राह्मणंस्पृशेत्॥तदन्नमत्यजन्भुक्त्वागायत्र्यष्टश
तंजपेत्॥उशना॥भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन॥अन्यत्र
दध्नःक्षीराद्वाक्षौद्रात्सक्तुभ्यएवच॥इति॥आश्वलायनः॥स्वदितं
सुभुक्तमिति॥सृष्टंबहुतरंक्षत्तुकंक्षद्रिकरमित्यर्थः॥उच्छिष्टस्यदा
सभागतामाहमनुः॥उच्छेषणंभूमिगतमजिह्मस्याशठस्यच॥दा
सवर्गस्यतत्पित्र्येभागधेयंप्रचक्षते॥ततःसर्ववर्णमन्नंगृहीत्वात
प्ताःस्थेतिविप्रान्पृष्ट्वातृप्ताःस्मइति तैरुक्तेशेषमप्यन्नमस्तिकिंक्रि
यतामितिपृष्ट्वाइष्टैःसहभुज्यतामित्यनुज्ञातःपितृस्थानविप्रोच्छि
ष्टसन्निधौदक्षिणाग्रेषुतिलोदकंप्रक्षिप्यये अग्निदग्धाइत्यनयर्चा
तदन्नंप्रक्षिप्यविप्रहस्तेषुगंडूषार्थंसकृत्सकृदुदकंदद्यात्॥हेमा
द्रौधर्मः॥केषांचिद्विकिरः पूर्वंतृप्तिप्रश्नस्तथापरः॥प्रश्नःपूर्वमथा
न्येषांविकिरस्तदनंतरं॥अमृतापिधानात्पूर्वंकेषांचिद्विकिरःस्मृतः
॥अन्येषांतुततःपश्चाद्विदुषामितिसंमतं॥गायत्र्यादिजपात्पूर्वंके
षांचित्तदनंतरं॥कात्यायनः॥तृप्तान्ज्ञात्वान्नंप्रकीर्यसकृदपोदत्वा
पूर्ववद्गायत्रींजप्त्वामधुमतीर्मधुमध्वितिचतृप्ताःस्थेतिपृच्छेत्तृप्ताः
स्मेत्यनुज्ञातःशेषमन्नमनुज्ञाप्येति॥प्रचेताः॥तृप्ताःस्थतृप्ताःस्मप्र
भूतंप्रभूतमित्युक्तेचेतइति॥विश्वाश्वलायनोसंपन्नंपृष्ट्वान्नंविकी
र्येति॥विष्णुधर्मोत्तरेत्वनयोःप्रश्नोत्तरयोःसमुच्चयोजानुपातनंचद
र्शितं॥प्रष्टव्याब्राह्मणाभक्त्याभूनिविष्टेनजानुना॥तृप्ताभवंतःसंप
न्नंभवतोकच्चिदेवतु॥तृप्ताःस्मेतिचतैरुक्ते संपन्नमितिचाप्यथ॥द
द्यादाचमनंभक्त्याश्रद्दधानःसमाहितः॥श्राद्धविशेषप्रश्नोत्तरविशे
षमाहविष्णुः॥पित्र्येस्वदितमित्येववाच्यंगोष्ठेषुसुश्रुतं॥संपन्नमि
त्यभ्युदयेदैवेरोचतइत्यपि॥हारीतः॥तृप्ताःस्थस्वदितमितिपृच्छेत्स्व
दितमितिप्रत्याहुः॥स्मृतमितिदैवेष्वाभ्युदयमितिस्वैरस्त्वाचांतेषुभूमौ
विकिरंनिनयेत्॥अथाचमनदानं॥विष्णुः॥उदङ्मुखेष्वाचमनमादौद

स्यात्ततःप्राङ्मुखेष्विति॥उदङ्मुखेषुपित्र्यविप्रेषु॥प्राङ्मुखेषुदैव-
विप्रेषु॥हस्तमप्रक्षाल्यैवगंडूषग्रहणंकर्तव्यं॥अन्यथादोषमाह
मरीचिः॥हस्तंप्रक्षाल्यगंडूषंयःपिबेद्विचक्षणः॥आसुरंतद्भवेच्छ्रा
द्धंपितॄणांनोपतिष्ठते॥गोभिलः॥भुक्त्वाचम्यपठेत्स्तोमानूजपेत्तत्रस
माहितः॥गोसूक्तंचाश्वसूक्तंचमध्येतस्यसमीनरं॥भुक्त्वासनःशु
चौदेशेवामदेव्यंततोजपेत्॥एवंसामभिराछन्नोभुंजानस्तुद्विजोत्त
रः॥श्राद्धभोजनदोषैस्तुमहद्भिर्नोपलिप्यते॥अन्यथैवहिभुंजानोह
व्यकव्येष्वमंत्रवित्॥आत्मानमन्नदातारंगमयत्यासुरींस्थितिमि
ति॥अथविकिरेतिकर्तव्यता॥पाद्ममात्स्ययोः॥तृप्तानूज्ञात्वाततः
कुर्याद्विकिरंसार्ववर्णिकं॥सोदकंचान्नमुद्धृत्यसलिलंप्रक्षिपेद्भुवि॥
ब्रह्मांडपुराणे॥उच्छिष्टेसतिलान्दर्भान्दक्षिणाग्रान्निधापयेत्॥उ
च्छिष्टेउच्छिष्टसन्निधौ॥विष्णुः॥भुक्तवत्सुब्राह्मणोमेजुषतामत्रा
न्नंसहस्रधारममृतोदकंमेपुरतस्त्वेतत्परमेव्योमन्निति॥वैश्वदे
विकविकिरमंत्रमाहगोभिलः॥असोमपाश्चयेदेवायज्ञभागविव
र्जिताः।तेषामन्नंप्रदास्यामिविकिरंवैश्वदेविकमिति॥पित्र्यविकि
रमंत्रमाहगोभिलः॥असोमपाश्चयेदेवायज्ञभागविवर्जिताः।भूमौ
दत्तेनतृप्यंतुतृप्तायांतुपरांगतिं॥बृहस्पतिः॥अनग्निदग्धायेजीवा
येग्निदग्धाःकुलेमम॥गोभिलः॥येग्निदग्धाजीवायेप्यनग्निदग्धाःकु
लेमम॥उभयत्रभूमौदत्तेनेतिशेषः॥अग्निदग्धास्तुयेजीवायेप्यदग्धाः
कुलेमम॥भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिं॥येषांनमातानपिता
नबंधुर्नचान्नसिद्धिर्नतथान्नमस्ति॥तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयांतु
लोकायसुखायतेतु॥येस्मत्कुलेषुपितरोलुप्तपिंडोदकक्रियाः।येचा
प्यकृतचूडास्तुयेचगर्भाद्विनिःसृताः॥येषांदाहोनक्रियतेअग्निद
ग्धाश्चयेपरभूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिं॥अपरार्केतु॥असं
स्कृतप्रमीतायेत्यागिनोयाःकुलस्त्रियः॥दास्यामितेभ्योविकिरंपित्र्यंभू
मौजलेनत्वित्यपिमंत्रउक्तः॥विकिरस्यप्रतिपत्तिमाहगौतमः॥विकि
रदानैतैःसहप्रतिपादनं॥पिंडसमंविकिरंदद्यात्सिंडांतेतुषडंगुलेइति॥
इदंचउच्छिष्टसन्निधौविकिरउच्छिष्टैःप्रतिपादयेत्॥उच्छिष्टैरितिसहा

थैंतृतीया॥भार्गवः॥पिंडवत्प्रतिपत्तिःस्याद्विकिरस्येतिगौलिः॥
अथपिंडदानं॥सांख्यायनगृह्ये।भुक्तवत्सुपिंडान्दद्यात्पुरस्तादेके॥
पुरस्तादितिपक्षेब्राह्मणानंतरमाहदेवलः॥अथसंगृह्यकलशंसर
भंपूर्णमंभसा॥पुरस्तादुपविश्येषांपिंडावापंनिवेदयेदित्यादिना॥अ
ग्नौकरणानंतरमाहमनुः॥अपसव्यमग्नौकृत्वासर्वमावृत्यदक्षिणं
॥अपसव्येनहस्तेननिर्वपेदुदकंभुवि॥त्रींस्तुतस्माद्धविःशेषात्पिंडा
न्कृत्वासमाहितइत्यादि॥आश्वलायनगृह्ये॥भुक्तवत्स्वनाचांतेषु
पिंडान्निदध्यादाचांतेष्वित्येकइति॥कात्यायनोपि॥कृतगंडूषेषुसम्य
गाचांतेषुब्राह्मणेषुपिंडदानमुक्ताह॥आचांतेष्वित्येकइति॥केचित्तु
भुक्तवत्स्वनाचांतेष्वेवविकिरंदत्वास्वधांवाचयित्वापिंडदानंकुर्वंति
॥तथाचशंखलिखितौ॥गायत्रींसमनुश्राव्यतृप्तानूज्ञात्वास्वदितमि
तिपृष्ट्वाशेषमन्नमनुज्ञाप्यकृतान्नाद्विकिरंकुर्यात्स्वधांवाचयित्वावि
ष्टांस्त्रीन्निदध्यादित्यादि॥विष्टराःपिंडाधस्तनादर्भाः॥बृहस्पतिनात्वा
चांतेषुपिंडदानमनाचांतेषुविकिरइत्युक्तं॥आचांतेष्वपिकुर्वाणाःके
चिदभिरमणानुज्ञावचनस्वधावाचनादिपदार्थमकृत्वैवपिंडदानंकु
र्वंति॥एतदुत्तरकालतांत्वाहयमः॥आचांतांश्चानुजानीयादभिवाद्य
कृतांजलिः॥भवंतोरमंतामित्यज्ञात्वानुज्ञातलक्षणं॥स्वधेतिचवक्तव्य
प्रीयंतांपितरस्तथा॥अस्यायमन्नदानंतुवाच्यंप्रीतैर्द्विजातिभिः॥ततो
निर्वपणंकुर्यात्पिंडानांतदनंतरमिति॥हारीतस्तुवाजेवाजेत्यनुव्रज्ये
त्यंतंभोजनोत्तरंतत्तद्भुक्तहविःशेषस्यपिंडान्पिंडपितृयज्ञवन्निदध्या
दित्याह॥एतेचपिंडदानकालाःस्वस्वगृह्यानुसारेणव्यवस्थिताज्ञेयाः
भोजनात्पूर्वकालोत्तरकालत्वयोर्व्यवस्थामाहलौगाक्षिः॥अप्रशस्ते
षुयागेषुपूर्वंपिंडावनेजनं॥भोजनस्यप्रशस्तेतुपश्चादेवोपकल्पयेत्
॥अप्रशस्तेषुसपिंडीकरणपूर्ववर्तिषुप्रेतश्राद्धेषु॥अवनेजनंअवाची
नपाणिनानिर्वपणमितिस्मृतिचंद्रिकाकारः॥अवनेजनंदानमितिहेमा
द्रिः॥प्रशस्तंसपिंडीकरणादिश्राद्धं।इयंव्यवस्थाकेषांचिदेवमन्वादि
स्मृतिषुमत्स्यादिपुराणेषुचभोजनपूर्वकालतैवोक्ता॥स्वगृह्यविशे
षानुक्तौत्वाचांतेष्वेकइतिपक्षोगृहीतुंन्याय्यः।अथपिंडदानदेशाःदे

वलः॥हुत्वैवमग्निं पिंडानां सन्निधौ तदनंतरं॥पक्वान्नेन बलिं तेभ्यः पिंडे
भ्यो दापयेद्द्विजः॥अत्राग्नौ होमस्य पिंडसंनिधानं वदतार्थात्पिंडदानमः
ग्निसन्निधानमुक्तं भवतीति हेमाद्रिः॥अग्न्यंतराभावे तु याज्ञवल्क्या
दिवचनेभ्य उच्छिष्टसन्निधौ पिंडान्दद्यात्॥अत्र विशेषमाह व्यासः।
अरत्निमात्रमुत्सृज्य पिंडांस्तत्र प्रदापयेत्॥पत्रोपस्पृशतां वापि प्रादु
र्वेति न विंदवः॥पारस्करः।विप्राणां बाहुमात्रेण पिंडदानं विधीयते॥पा
त्राणामिति पाठः॥अत्रिः।पितृणामासनस्थानादग्रतस्त्रिषु वालि
षु॥उच्छिष्टसंनिधानं तत्रोच्छिष्टासनसन्निधौ जातूकर्ण्यः।आममां
संसमुत्सृज्य तत्र पिंडान्प्रदापयेत्॥ब्राह्मणभोजनात्पूर्वकालप्रदेया
न्पिंडानप्यस्तुल्यदेशविशेषमाह देवलः॥अभ्यज्य मधुसर्पिर्भ्यां ता
न्वपेत्कुशसंचये॥छायायां हस्तिनश्चैव हस्तदेहित्रसन्निधौ॥आढ्
सन्निधौ हस्तित्वे तच्छायायां दोहित्राद्धस्ताद्यंतरालदेशे वेत्यर्थः।देव
लः॥अथ संगृह्य कलशं सदर्भं पूर्णमंभसा॥पुरस्तादुपविश्येषां पिंडा
वापं निवेदयेत्॥ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य सः॥कलशं सं
गृह्य तु॥ततः पानीयकुंभेन तर्पयेत्प्रयतः पितृनित्यादिना कलशेनैव
येषां कृत्यं विहितं तेषामेव अन्येषां त्ववनेजनादिकं श्राद्धीयेनैवोदके
न॥अत एव तत्संग्रहणांतरेणाह शालंकायनः॥पिंडावापमनुज्ञाप्य य
तवाक्कायमानसः॥सतिलेन ततोऽन्नेन पिंडान्सर्वेण निर्वपेत्॥अथ पिं
डदानस्थानकल्पना॥देवलः॥उपलिप्ते शुचौ देशे स्थानं कुर्वीत सैकतं॥
मंडलं चतुरस्रं वा दक्षिणावनतं महत्॥एतच्च सैकतस्थानकरणं केषां
चिदेव अत एवोपलिप्ते महीपृष्ठ इति मत्स्यपुराणे महीपृष्ठमेव पिंडा
धारत्वेन विहितं॥देवलः॥एकदर्भेण तन्मध्यमुल्लिखेत्त्रिश्च तं त्यजे
त्॥तन्मध्ये मंडलमध्ये। त्रिरिति मातृमातामहादीनां पिंडदानपक्षे॥
अन्यथा सकृदेव॥कंडूनेपेषणं चैव तथैवोल्लेखनक्रिया॥सकृदेव पितृ
णां स्याद्देवानां तदनंतरमिति ब्रह्मांडपुराणात्॥एतच्च स्फ्याभावे वज्रे
ण वा कुशैर्वापि उल्लिखेत्तु महीं द्विज इति ब्रह्मांडपुराणात्॥वज्रः स्फ्यः
॥वज्रो वै स्फ्य इति श्रुतेः॥तत्रैव॥सव्योत्तराभ्यां पाणिभ्यां कुर्यादुल्लेख
नं द्विजः॥सव्यः वामः उत्तरः परोस्तौ सव्योत्तरौ॥एतच्च सर्वमाग्नेयी

दिगभिमुखं॥आश्वलायनेनदक्षिणाप्राचीप्रस्तुत्यसर्वकर्माणितां
दिशमित्युक्तत्वात्॥दक्षिणादिक्पितॄणामितिस्मृतेर्दक्षिणादिगपि
विकल्पेन॥कर्त्तापिसौकर्याद्आग्नेय्यभिमुखोदक्षिणाभिमुखोवा॥
लेखाकरणेमंत्रउक्तोब्रह्मपुराणे॥निहन्मिसर्वंयदमेध्यमत्रहताश्च
सर्वेसुरदानवामया॥रक्षांसियक्षाश्चपिशाचसंघाहतामयायातुधा
नाश्चसर्वे॥एतेनमंत्रेणसुसंयतात्मादर्भेणवेदिंविलिखेत्त्रिरिति॥
पिंडपितृयज्ञेकात्यायनः॥दक्षिणेनोल्लिखत्यपहताइत्यपरेणवाअ
ग्न्यपेक्षयादक्षिणत्वेनपरस्तात्करोतियेरूपाणीति॥आश्वलायनः॥
सकृदाच्छिन्नैरवस्तीर्येति॥अथसकृदाच्छिन्नान्युपमूलंदितानिभ
वंतीतिशतपथे॥यत्समूलंतत्पितॄणामितितुतैत्तिरीये॥यमः॥विष्ट
रांस्त्रीन्वपेत्तत्रनामगोत्रसमन्वितान्॥अद्भिरभ्युक्ष्यविधिवत्तिलै
रभ्यवकीर्यच॥नामगोत्रसमन्वितान्॥अमुकगोत्रस्यास्मत्पितुर
मुकशर्मणोयंविष्टरइत्युच्चारणपूर्वमित्यर्थः॥दर्भास्तरणानंतरमा
हदेवलः॥अथसांजलिरुत्थायस्थित्वाचावाहयेत्पितॄन्॥पितरो
मेप्रसीदंतुप्रयांतुचपितामहाः॥इतिसंकीर्त्तयंस्तूष्णींतिष्ठेत्क्षणमनु
च्छ्वसन्॥आवाहयित्वादर्भाग्रैस्तेषांस्थानानिकल्पयेत्॥तेष्वासी
नेषुपात्रेणप्रयच्छेन्मार्जनोदकं॥प्रक्षाल्यविकिरेत्तत्रनानावर्णास्ति
लानपीति॥दर्भास्तरणानंतरमाहसुमंतुः॥असाववनेनिक्ष्वेतिपु
रुषंपुरुषंप्रति॥त्रिस्त्रिरेकेनहस्तेनविदधीतावनेजनम्॥असावि
तिगोत्रनाम्नामपिग्रहणं॥पिंडोदकप्रदानेतुनित्यनैमित्तिकेष्वपि॥
आलभ्यनामगोत्रेणकर्त्तव्यंसर्वदैवहीतिव्यासोक्तेः॥कात्यायने
नतुबर्हिस्तरणात्पूर्वमवनेजनमुक्तमनयोर्विकल्पोयथाशाखंव्य
वस्थावा॥इदंचोदकंसतिलमित्याहोशना॥तिलोन्मिश्रेणोदकेना
सिंच्येति॥मार्कंडेयपुराणे॥पितृतीर्थेनतोयंचदद्यात्तेभ्यःसमाहि
तइति॥कात्यायनशांखायनगोभिलादिभिस्तुअवनेजनार्थमुदक
पात्रमुक्तं॥षट्त्रिंशन्मतेसव्यंजानुनिपात्यैवभूमौपिंडान्प्रयत्नतः।
निर्वपेत्पितृतीर्थेनस्वधाकारमुदाहरन्॥मरीचिः॥पात्राणांखड्गपा
त्रेणपिंडदानंविधीयते॥राजतौदुंबराभ्यांवाहस्तेनैवाथवापुनरिति

खड्गाख्यश्वापदविशेषललाटास्थिसंभवपात्रंखड्गपात्रं॥औदुंबरं
ताम्रमयं॥सव्यपाणिसंयोजनंशंखलिखिताभ्यामुक्तंपिंडान्निदध्या
त्सव्येनपाणिनादक्षिणंपाणिमुपसंयोज्येति॥देवलः॥अपसव्यम
पांगुष्ठमिति॥ब्रह्मांडपुराणे॥उत्तानेनतुहस्तेननिर्वपेद्दक्षिणामुख
इति॥पितृतीर्थाचमनमंत्रमाहापस्तंबः॥सव्यंजान्वाच्यावाचीन
पाणिरितिउत्तानएवाधरीकृतपितृतीर्थःपाणिरवाचीनः॥अवाचीन
मेवपराचीनमेवपराचीनशब्देनाहाश्वलायनः॥तस्यांपिंडान्निपृणी
यात्पराचीनपाणिरिति॥अग्नौकरणात्पूर्वंपिंडदानपक्षेतद्दर्शेनचरु
णापिंडास्ततश्चरुमुपादायसपवित्रेणपाणिरिति॥अग्नौकरणोत्त
रमितिपक्षेतुतच्छेषादित्याहमनुः॥त्रींस्तुतस्माद्विशेषात्पिंडान्
कृत्वासमाहितः॥औदकेनैवविधिनानिर्वपेद्दक्षिणामुखइति॥भोज
नोत्तरकालीनेतुमनुः॥कात्यायनः॥सर्वमन्नमेकतउद्धृत्येति॥सर्वश
ब्दःप्रकृतान्नजातिसर्वत्वार्थः।इदंचाग्नौकरणशेषेणमिश्रणीयमि
त्याहाश्वलायनः॥यद्यदन्नमुपभुक्तंतत्तत्स्थालीपाकेनसहपिंडार्थ
मुद्धृत्यपिंडान्निदध्यादितियत्तुपठंति॥माषाःसर्वत्रवैग्राह्यानग्राह्या
स्त्वग्निपिंडयोः॥ब्राह्मणेषुयथामद्यंतथामाषोग्निपिंडयोरिति॥तन्नि
र्मूलं॥तेनमाषाअपिग्राह्याएवेतिवायुपुराणे॥मधुसर्पिस्तिलयुतान्
त्रीन्पिंडान्निर्वपेद्बुधः॥नात्रमध्वादित्रयनियमः क्रियतेकिंत्वतिश
यएव॥अतएवतिलमधुद्वययुक्तताबृहस्पतिनोक्ता॥सर्वस्मात्प्रकृ
तादन्नात्पिंडान्मधुतिलान्वितानिति॥तिलमात्रयुक्ततातुसर्वमन्नमु
पादायसतिलंदक्षिणामुखइतियाज्ञवल्क्येनोक्ता॥तेनत्रयंननियत
मितिकेचित्॥वस्तुतस्तुत्रयनियमेपिकलौमधुनदेयं।असतागोप
शुश्चैवश्राद्धेमांसंतथामधु॥देवराच्चसुतोत्पत्तिःकलौपंचविवर्जये
दितिश्राद्धदीपकलिकायांनिगमोक्तेः॥अथपिंडपरिमाणं॥व्यासः॥
द्विहायनस्यवत्सस्यविशत्यास्येयथासुखं॥तथाकुर्यात्प्रमाणंतुपिंडा
नांव्यासभाषितं॥द्विहायनःद्विवर्षः॥ब्रह्मांडपुराणे॥त्रीन्पिंडानानुपूर्व्ये
णसांगुष्ठमुष्टिवर्द्धनात्॥मुष्टौनिवेशितेपिंडेयथासांगुष्ठमुष्टिर्वृद्धिर्भ
वतीत्यर्थः॥अंगिराः॥कपित्थबिल्वमात्रान्वापिंडान्दद्यात्समाहितः॥

कुक्कुटांडप्रमाणान्वायद्वामलकैःसमान्॥ बदरेणसमान्वापिदद्या
च्छ्रद्धासमन्वितइति॥एषांचशक्तिभेदेनव्यवस्था॥व्यवस्थायुक्तानि
परिमाणान्याहमरीचिः॥ आर्द्रामलकमात्रांस्तुपिंडान्कुर्वीतपार्वणे॥ए
कोद्दिष्टेबिल्वमात्रंपिंडमेकंतुकारयेत्॥नवश्राद्धेस्थूलतरंतस्मादपि
तुनिर्वपेत्॥तस्मादपिस्थूलतरमाशौचेप्रतिवासरं॥अत्रामलमात्र
मेवपार्वणेइतिननियमः॥किंतुआमलकमात्रान्पार्वणएवेति॥अत
श्चाधिकपरिमाणपिंडाचारोनविरुध्यते॥नवश्राद्धंचस्मृत्यंतरे॥प्रथ
मेन्हितृतीयेन्हिपंचमेसप्तमेतथा॥नवमेकादशेचैवतन्नवश्राद्धमुच्य
तइति॥मैत्रायणीये॥त्रयाणांयथोत्तरंपरिमाणाधिक्यंउक्तं॥पिताम
हस्यनाम्नास्थवीयांसंमध्यमं॥प्रपितामहस्यनाम्नास्थविष्ठंदक्षिण
मिति॥आवाहनादिपिंडदानांतंकर्मोक्त्वाहयाज्ञवल्क्यः॥मातामह
नामप्येवंदद्यादाचमनंततः॥एवमित्युक्तवक्ष्यमाणपदार्थातिदेशः
॥पितृमातामहपार्वणयोरेकप्रयोगविधिपरिग्रहात्सहक्रियमाणः
योर्मिथःप्रत्यासत्त्यनुग्रहायपदार्थानामेवानुसमयोनकांडयोः॥अनंत
रकृत्यमाह।सएव॥स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवचेतिसहस
र्ववर्णमुपादायाग्निसन्निधौपिंडान्दद्यात्॥तदभावेब्राह्मणार्थसर्वव
र्णिकमन्नमुपादायउच्छिष्टसन्निधौपिंडपितृयज्ञकल्पेनपिंडान्दद्यात्
॥मातामहानामप्येवमेववैश्वदेवावाहनादिप्रदानांतंकर्मकृत्वाब्राह्म
णानामाचमनंदद्यात्॥ततःस्वस्तीतिब्रूतेतिब्राह्मणान्स्वस्तिवाचयेत्
॥तेचस्वस्तीत्युक्तेअक्षय्यमस्त्वितिब्रूतेतिब्राह्मणहस्तेषूदकदानंकु
र्यात्॥अस्त्वक्षय्यमितितेब्रूयुरित्यर्थः॥अथदक्षिणादानं॥तद्द्विविधं
विप्रोद्देश्यकं॥पित्रुद्देश्यकंच॥आद्यमाहदेवलः॥आचांतेभ्योद्विजे
भ्यस्तुप्रदद्याद्यथदक्षिणामिति॥द्वितीयमाहपारस्करः॥हिरण्यंविश्वे
भ्योदेवेभ्योरजतंपितृभ्यइति॥तत्राद्यंसव्येन॥तथाचजमदग्निः॥अप
सव्यंकर्मसर्वंदक्षिणादानवर्जितमिति॥द्वितीयंत्वपसव्येन॥तथाचद
क्षिणादानंप्रक्रम्यसएव॥अपसव्यंतत्रापीति॥तत्रापिपित्र्यदक्षिणा
दानेपीत्यर्थः॥दक्षिणादानेक्रममाहदेवलः॥दक्षिणांपितृविप्रेभ्योदद्या
त्पूर्वंततोद्वयोः॥द्वयोर्द्वाभ्यांवैश्वदेविकब्राह्मणाभ्यामित्यर्थः॥दक्षिणा

च विप्रगुणानुरोधेन विषमापि देया॥ एकपंक्त्युपविष्टानां विप्राणां
श्राद्धकर्मणि॥ भक्ष्यभोज्यं समं देयं दक्षिणा त्वनुसारत इति स्मृतेः॥ दक्षि
णां दत्वा स्वधां वाचयिष्य इत्युक्त्वा तैर्ब्राह्मणैर्वाच्यतामिति प्रत्युक्तः॥
पित्रादिभ्यः स्वधोच्यतामिति वदेत्॥ अस्तु स्वधेति विप्राः॥ ततो भूमा
वुदकमासिच्य विश्वेदेवाः प्रीयंतामिति वदेत्॥ प्रीयंतां विश्वेदेवा इति
विप्रैरुक्ते दातार इति मंत्रं जपेत्॥ पितॄणां न्युब्जं पात्रमुत्तानं कृत्वा वा
जे वाज इति मंत्रेण पितृपूर्वं विसर्जयेत्॥ तदेतत्सर्वमाह याज्ञवल्क्यः।
दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्॥ वाच्यतामित्यनुज्ञा
तः प्रकृतेभ्यः स्वधोच्यतां॥ ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं॥ वि
श्वेदेवाश्च प्रीयंतां विप्रैश्चोक्त इदं जपेत्॥ दातारो नोभिवर्द्धंतां वेदाः संत
तिरेव नः॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्त्विति॥ इत्युक्त्वोक्त्वा प्रि
या वाचः पितृपूर्वं विसर्जयेत्॥ वाजे वाज इति मंत्रेण पितृपूर्वं विसर्जनं॥ य
स्मिंस्ते संस्रवाः पूर्वं पितृपात्रे निवेशिताः॥ पितृपात्रं तदुत्तानं कृत्वा विप्रा
न्विसर्जयेदिति॥ पिंडप्रतिपत्तिमाह स एव॥ पिंडांस्तु गोजविप्रेभ्यो द
द्यादग्नौ जले पि वा॥ पत्न्याः पुत्रकामनायां तु वायुपुराणे॥ पत्न्यै प्रजार्थी
दद्यात्तु मध्यमं मंत्रपूर्वकमिति॥ मंत्रस्तु मत्स्यपुराणे॥ आधत्त पितरो
गर्भं मंत्रः संतानवर्द्धन इति॥ मध्यमपिण्डप्राशनं च केवलं काम्यमेव न
नित्यमिति द्वैतनिर्णये तातचरणाः॥ इतरत्तु पिंडद्वयं कामनाभावे त्र
यमपि गवादौ प्रतिपाद्यं॥ बृहस्पतिः॥ अन्यदेशगता पत्नी गर्भिणी रोगि
णी तथा॥ तदा तं जीर्णवृषभश्छागो वा भोक्तुमर्हति॥ तीर्थश्राद्धप्रतिप
त्त्यंतरं॥ विष्णुधर्मोत्तरे तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः॥
दक्षिणाभिमुखो भूत्वा पित्र्यादिकुलाप्रकीर्तितेति॥ उच्छिष्टमार्जने वि
शेषमाह याज्ञवल्क्यः॥ सत्सु विप्रेषु विप्रेषु द्विजोच्छिष्टं न मार्जयेदिति॥
सत्स्विति अपराह्णोपलक्षणार्थं। भृत्यवर्गवृत्तो भुंक्ते हव्यकव्यस्वगोत्रजैः
आसायं श्राद्धशालायां द्विजोच्छिष्टं न मार्जयेदिति प्रचेतो वचनात्॥ मा
त्स्ये॥ ततश्च वैश्वदेवांते सभृत्यः सहबांधवः॥ भुंजीतातिथिसंयुक्तः सर्वं
पितृनिषेवितमिति। श्राद्धशेषभोजनं तु दिवैव कार्यं इत्याह जातूकर्ण्यः
॥ अहन्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्मभिः। अन्यथा ह्यासुरं श्राद्धं पर

पाकेचसेविते॥ देवलः॥ श्राद्धंकृत्वातुयोभुंक्तेनभुंक्तेयश्चकदाचन॥ देवाह
व्यंनगृह्णंतिकव्यानिपितरस्तस्य॥ तद्दिनेनित्योपवासप्राप्तौतुआघ्र
शेषाघ्राणमेवेत्युक्तंसमयमयूखे॥ अथप्रयोगः॥ तत्रकर्त्तापूर्वेद्युःस
द्योवाचम्यप्राणानायम्यमासपक्षाद्युल्लिख्यप्राचीनावीतीसव्यंजा
न्वाच्यास्मत्पितृपितामहप्रपितामहानांमातामहप्रमातामहवृद्ध
प्रमातामहानांवामुकामुकशर्मणाममुकगोत्राणांवसुरुद्रादित्यस्व
रूपाणांसपत्नीकानांसदैवंसपिंडमपिंडंवापार्वणविधिनाश्वोऽव
दर्शश्राद्धमहंकरिष्यइतिसंकल्पयेत्॥ स्मयाहेः पत्नीकानांपि
त्रादीनामेव॥ महालयेतुयथासंभवंसर्वेषामितिविशेषः॥ ततःकर्त्ता
दक्षिणंजान्वाच्योपवीत्युदङ्मुखोऽस्मत्पित्रादीनांदर्शश्राद्धेवि
श्वेदेवस्थानेत्वामहंनिमंत्रयइत्येकंद्वौचतुरोवाप्राङ्मुखान्ब्राह्मणा
न्प्रत्येकंदक्षिणंजानुस्पृष्ट्वानिमंत्र्यदैवेक्षणःक्रियतामितिब्रूयात्॥
ॐतथेतीतरःप्रतिब्रूयात्॥ ततःकर्त्ताप्राप्नोतुभवानितिब्रूयात्॥ प्राप्न
वानीतीतरः॥ ततःकर्त्तादक्षिणामुखःसव्यंदक्षिणंवाजान्वाच्यप्राची
नावीत्यस्मिन्दर्शश्राद्धेदावस्मत्पितुरमुकशर्मणोमुकगोत्रस्यवसु
रूपस्यसपत्नीकस्यस्थानेत्वामहंनिमंत्रयइत्युदङ्मुखमेकंत्रीन्वा
ब्राह्मणान्प्रत्येकंसव्यंदक्षिणंवाजानुस्पृष्ट्वाभिमंत्रयेत्॥ एवंपिताम
हस्यरुद्ररूपस्यप्रपितामहस्यादित्यरूपस्येति॥ एवमेवमातामहा
दीनपिप्रत्येकंनिमंत्रयेत्॥ ततःपित्र्यक्षणःक्रियतामितिवदेत्॥ ॐ
तथेत्यादिपूर्ववत्॥ ततःकर्त्तोपवीत्यक्रोधनैःशौचपरैःसततंब्रह्मचा
रिभिः॥ भवितव्यंभवद्भिश्चमयाचश्राद्धकारिणा॥ सर्वायासविनिर्मु
क्तैःकामक्रोधविवर्जितैः॥ भवितव्यंभवद्भिर्नःश्वोभूतेश्राद्धकर्मणीति
भवद्भिर्नोद्यतमेतिवातान्श्रावयेत्॥ ततोद्विराचम्यपवित्रंधृत्वासौव
र्णराजतखड्गांगुलीयानिवानामिकातर्जनीकनिष्ठिकासुधृत्वासंक
ल्प्यपूर्वंश्राद्धाधिकारसिद्ध्यर्थंसहस्रशीर्षेत्यादिपवित्रमंत्रान्जपित्वा
द्विराचम्यविप्राग्रतोब्रह्मदंडार्थंसतिलंहिरण्यंकुशंवानिक्षिप्यसमस्त
संपत्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः॥ अपारसंसारस
मुद्रसेतवःपुनंतुमांब्राह्मणपादपांसवः॥ आपद्घनध्वांतसहस्रभा

नवः समीहितार्थार्पणकामधेनवः॥ समस्ततीर्थाम्बुपवित्रमूर्त्तयो र
क्षंतु मां ब्राह्मणपादपांसवः॥ विप्रौघदर्शनात्क्षिप्रं क्षीयंते पापराशयः
दर्शनान्मंगलावाप्तिरर्चनादच्युतं पदमिति तांस्तुत्वा प्राचीनावीत्यमु
कश्राद्धं कर्त्तुमस्माधिकारसंपदस्त्विति भवंतो ब्रुवंत्विति तानभ्यर्थ्य
तथास्त्विति तैरनुज्ञातो यज्ञोपवीतीति श्च्यादिसंकीर्त्य दक्षिणामु
खः प्राचीनावीती सव्यं जान्वाच्य तिलान्गृहीत्वास्मत्पित्रादीनां मा
तामहादीनां च पूर्वोपक्रांतं श्राद्धं युष्मदनुज्ञया करिष्य इति संकल्प्य
कुरुष्वेति तैरनुज्ञातो ब्राह्मणान्स्वागतमिति पृष्ट्वा तैः सुस्वागतमिति
प्रत्युक्त उपवीती। आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ ये य
त्र विहिताः श्राद्धे सावधाना भवंतु त इति पितृद्विजान् संप्रार्थ्योपवी
ती सर्वान्प्रदक्षिणीकृत्यैकस्मिन्नर्घपात्रे चंदनयवकुसुमोदकं संभृ
त्यार्घ्यमेनमिति सकृत्पठित्वा द्विजपादयोर्निमंत्रणक्रमेणार्घ्यं निनी
योदङ्मुखो द्विराचामेत्॥ ततः श्राद्धपूर्वदेशे देवे द्विहस्तं दीर्घं चतुरस्र
मुदक्प्लवं मंडलं गोमूत्रगोमयाभ्यां कृत्वा तत्र यवान्प्रागग्रकुशा
न्पंच निक्षिप्य तद्दक्षिणतः षडंगुलं विहाय प्राचीनावीती पित्रर्थं च
तुर्हस्तं समचतुरस्रं दक्षिणाप्लवं मंडलं गोमूत्रगोमयाभ्यामेव कृत्वा
तिलान्दक्षिणाग्रकुशांश्च पंच निक्षिप्योपवीती पित्रदैवमंडलात्पूर्वं प्रत्य
ङ्मुख उपविश्य देवतीर्थं ब्राह्मणमेकैकं प्राङ्मुखमुपवेश्य पवित्रकरो नि
मंत्रणक्रमेण गंधपुष्पयवकुशमिश्रं जलांजलिं विश्वेभ्यो देवेभ्य इदं पाद्य
मित्युक्त्वा शन्नो देवीरिति मंत्रांते देवतीर्थेन ब्राह्मणपादयोर्निनीया
भिवंद्य पवित्रं विस्रस्यान्यजलेन पादौ प्रक्षाल्य दक्षिणपादादिमूर्द्धांतं
गंधपुष्पाक्षतैः सह स्वशीर्षेति संपूज्य साक्षतगंधपुष्पकुशजलपूर्णं
पात्रेप विश्वेदेवा एष वोऽर्घ्य इत्यर्घ्यं निवेदयेत्॥ एवमितरत्र कृत्वा ब्रा
ह्मणान्द्विराचमय्य स्वयं पवित्रं धृत्वा सकृदाचम्य प्राचीनावीती दक्षि
णामुखो विप्रानुदङ्मुखानुपवेश्य द्विगुणभुग्नकुशतिलगंधपुष्पमि
श्रं जलांजलिमस्मत्पितरोऽमुकशर्माणोऽमुकगोत्रा वसुरूपा इदं वः
पाद्यमित्युक्त्वा शन्नो देवीरिति मंत्रेण पितृतीर्थेन ब्राह्मणपादयोः पितृती
र्थेन निषिच्याभिवंद्यान्यजलेन पादौ प्रक्षाल्य शिरःप्रभृति पादांतं चामं

गपूर्वकंपितृभ्यःस्वधापितृभ्यइतितिलचंदनपुष्पैरभ्यर्च्यास्मत्पितरमे
मुकशर्माणोमुकगोत्रावसुरूपाएषवोर्घइत्युक्त्वासतिलगंधपुष्प
कुशजलपूर्णपात्रेणार्घंब्राह्मणपादयोर्निक्षिपेत्॥एवमस्मत्पिताम
हारुद्ररूपाःप्रपितामहाआदित्यरूपाइत्युक्त्वाप्रत्येकंपाद्यार्घ्यदानं
कृत्वामातामहादीनामपितथैवकुर्यात्॥ततस्तान्द्विराचमय्यस्वयं
चपवित्रपाणिर्दक्षिणामुखोद्विराचम्यद्विजान्भोजनस्थलेनीत्वा
प्राचीनावीतीअमुकश्राद्धसिद्धिरस्त्वितिभवंतोब्रुवंत्वित्युक्त्वाऽस्त्व
मुकश्राद्धसिद्धिरितितैःप्रत्युक्तआसनान्युपकल्प्योपवीतीप्रागग्रपु
ष्पकुशयवसहितवस्त्राद्यासनंसव्यहस्तेनस्पृष्ट्वावैश्वदेविकब्राह्मण
दक्षिणहस्तेनिरंगुष्ठंधृत्वाप्राङ्मुखंॐभूर्भुवःस्वःयूयंसमाध्वमितिउ
पवेश्यॐसुसमास्महइतिप्रत्युक्तोऽपरमप्येवमुपवेश्यप्राचीनावी
तीदक्षिणाग्रपुष्पकुशतिलयुक्तासनेतथैवपित्रादिब्राह्मणमुदङ्मु
खमुपवेश्यतिलतैलदीपिकांप्रत्येकंशक्त्योपकल्प्योपवीतीस्वासने
प्राङ्मुखउपविश्यापवित्रःपवित्रोवेतिविष्णुंस्मृत्वाॐवैष्णव्यैनमः
॥जयायैनमःकाश्यप्यैनमः॥मेदिनीलोकमातात्वंक्षितिरुर्वीधराम
ही॥भूमिःशैलाशिलातलंचस्थिरातुभ्यंनमोस्तुतइतिपृथिवींस्तुत्वा
श्राद्धदेशंगयात्मकत्वेनतत्स्थंचगदाधरात्मकत्वेनध्यात्वाचम्यप्रा
चीनावीतीवैष्णवंमंत्रंगायत्रींप्रणवंमधुवाताइतित्र्यृचंजप्त्वोपवीत्या
चम्यप्राणानायम्यतिथ्यादिसंकीर्त्यप्राचीनावीतिनाप्रक्रांतंश्राद्ध
कर्मयुष्मदनुज्ञयाहंकरिष्यइतिसंकल्प्यकुरुष्वेतितैरनुज्ञातःसम
र्च्याधारइतिश्लोकद्वयंदेवताभ्यइतिसप्तार्चिर्मंत्रंचतुर्भिश्चेतिप
द्यस्मृत्यंतंचपठित्वानिहन्मीतिनीवींबध्वाऽपहताइत्यपदक्षिणं
सर्वतस्तिलैःसर्षपैश्चावकीर्यतिलारक्षंत्वितितिलकुशान्द्वारदेशे
क्षिप्त्वानिहन्मीत्यपहताइतिचप्रदक्षिणंदिक्षुविदिक्षुचदक्षिणसंस्थ
परितस्तिलैरवकीर्ययद्देवाइतिमंत्रेणजलमभिमंत्र्यतेनपाकमुप
हारांश्चप्रोक्ष्यसर्वेपाकाःशुचयःश्राद्धयोग्याभवंतुदुष्टदृष्टिदोषाद्यु
पहतिर्नश्यतूपहाराणांचपवित्रतास्त्वित्युक्त्वोपवीत्युदङ्मुखोवैश्व
देविकविप्रसन्निधौदक्षिणंजान्वाच्यतदक्षिणहस्तंसव्येनधृत्वादक्षि

णहस्तेनयवजलयुक्तंऋजुदर्भद्वयंआदायविश्वेषांदेवानांविश्वे
भ्योदेवेभ्यइतिचोक्त्वाइदमासनमित्युच्चार्यतद्धस्तेतदुदकमासिच्य
तद्दक्षिणतःप्रागग्रंकुशद्वयंप्रक्षिप्यस्वासनमित्युक्त्वाआस्यतामित्यु
क्त्वातेनधर्मोस्मिविशिराजाप्रतिष्ठितइतिमनसैवासनेप्रतिगृहीते
पुनस्तद्धस्तेपोदत्वासदर्भेणदक्षिणहस्तेननिरंगुष्ठंविप्रदक्षिणह
स्तंधृत्वापुरूरवार्द्रवसंज्ञकविश्वेदेवस्थानेक्षणःक्रियतामित्युक्त्वा
ॐतथेतितेनोक्तःप्राप्नोतुभवानित्युक्त्वाप्राप्नवानीतितेनोक्तइतरः
श्राप्येवमुदक्संस्थंकृत्वाऽपोदद्यात्।ततःप्राचीनावीतीदक्षिणामुखःस
व्यंजान्वाच्यायुग्मान्सजलतिलान्द्विगुणभुग्नान्कुशानादायास्म
त्पितॄणाममुकगोत्राणांवसुरूपाणांसपत्नीकानामिदमासनमितिस
व्यहस्तधृतेद्विजदक्षिणहस्तेतज्जलमासिच्यद्विजवामभागेदक्षिणा
ग्रान्निक्षिप्यस्वासनमितिप्रत्युक्तआस्यतामित्युक्त्वातेनधर्मोस्मिवि
शिराजाप्रतिष्ठितइतिमनसैवासनेप्रतिगृहीते॥एवंयथालिंगंसर्वत्र
कृत्वाक्रमेणापोदत्वासकुशेनदक्षिणहस्तेनविप्रदक्षिणांगुष्ठमेवगृ
हीत्वाअमुकश्राद्धेक्षणःक्रियतामित्यादिसर्वत्रकृत्वापोदद्यात्॥एवं
मातामहब्राह्मणानामपि॥ततउपवीत्युदङ्मुखःकुशयवपुष्पाण्या
दायनिश्चन्नागच्छंतुमहाभागाविश्वेदेवाइत्यादिपठित्वावैश्वदेवविप्र
दक्षिणहस्तंनिरंगुष्ठंधृत्वाविश्वान्देवान्भवत्स्वावाहयिष्यइतिपृ
ष्ट्वाॐमावाहयेत्यनुज्ञातोविश्वेदेवासइत्यनयासकृत्सर्वत्रावाह्यवि
प्रदक्षिणजानुवामहस्तेनसंगृह्यदक्षिणपादादिमूर्द्धांतंप्रदक्षिणम
ग्रेयवान्कुशांश्चविकीर्य्यविश्वेदेवाःशृणुतेममितिसकृज्जपेत्॥
कर्कस्तुतिलैरेववैश्वावाहनमिच्छतिप्रकरणानुग्रहादिति॥ततःप्राचीना
वीतीदक्षिणामुखोपःप्रदायतिलान्द्विगुणकुशानादायास्मत्पितॄन्
पितामहान्प्रपितामहानमुकशर्मणोऽमुकगोत्रान्वसुरुद्रादित्यरू
पान्भवत्स्वावाहयिष्यइतिपृष्ट्वाॐमावाहयेत्यनुज्ञातउशंतस्त्वेत्या
वाह्यविप्रवामजानुसंगृह्यमूर्द्धादिदक्षिणपादांतंदक्षिणसंस्थंतिला
न्विकीर्यापोदत्वाकृतांजलिरायंतुनःपितरइत्युपस्थायापोदत्वानमोवः
पितरइषइत्यादिजीवंतइहसंतस्यामेत्यंतेनशिरोंसजानुपादेष्वप्रद

क्षिणमभ्यर्च्यापो दद्यात्॥ एवं मातामहानां। ततोपहता इति ब्राह्मणा
न्परितो दिग्विदिक्षु अपदक्षिणं तिलान्विकिरेत्॥ अथोपवीती दैव
द्विजाग्रतः प्रोक्षितायां भुवि प्रागग्रौ कुशौ निधाय तयोर्द्वे अर्घ्यपात्रे नि
धाय तयोर्द्वे द्वे पवित्रे निधाय प्राचीनावीती पित्रादिविप्राग्रतः प्रोक्षि
तभूमौ दक्षिणाग्रदर्भेषु प्रतिवर्गं त्रीणि त्रीणि अर्घपात्राणि दक्षिण
संस्थान्यासाद्य तेषु च प्रत्येकं द्विगुणभुग्नानि दक्षिणाग्राणि त्रीणि त्री
णि पवित्राण्याधायोपवीती प्राङ्मुखो दैवपात्रयोः शन्नो देवीरिति प्र
त्येकं शन्नो जलं देवतीर्थेनासिच्य यवोसीति यवान् गंधद्वारामिति च ग
दत्वं ॐ वधयः प्रतीति पुष्पं प्रक्षिप्य दैवार्घपात्रं संपन्नमस्त्वित्युक्त्वा
प्राचीनावीती पैत्रार्घपात्रेषु शन्नो देवीरिति प्रत्येकं पितृतीर्थेन जल
मासिच्य तिलोसीति तिलान् क्षिप्त्वा प्राग्वद्गंधपुष्पं क्षिप्त्वा पैत्रा
र्घपात्रं संपन्नमस्त्वित्युक्त्वोपवीती दैवविप्राग्रतः स्वाहार्घा इत्यर्घपात्रे
प्रत्येकं निधाय प्राचीनावीती पैत्रविप्राग्रतः स्वधा अर्घा इति नदर्घपा
त्राणि प्रत्येकं न्यस्योपवीत्युदङ्मुखो दैवविप्रपाणावपो दत्वा तस्मि
न्नागग्रेऽर्घस्थपवित्रे निधाय प्राग्वत्तदर्घ्यं संपूज्य हस्ताभ्यामर्घपा
त्रमुद्धृत्य या दिव्या इत्युक्त्वा विश्वेदेवा एष वोर्घ इत्यर्घोदकं हस्ते
क्षिप्त्वा अर्घपात्रमधो निदध्यात्। तत्रैकविप्रपक्षेर्घद्वयमपि तत्रैव द
त्वा प्राचीनावीती दक्षिणामुखः पैत्रद्विजहस्ते पो दत्वा तस्मिन्नर्घ
स्थपवित्राणि दक्षिणाग्राण्याधाय प्राग्वन्मूर्द्धादि पादांतं संपूज्य
हस्ताभ्यां अर्घपात्रमादाय या दिव्या इत्युक्त्वा स्मत्पितः अमुकश
र्मन्नमुकगोत्र वसुरूप सपत्नीक एष तेर्घ इत्युक्त्वा पितृतीर्थेनार्घो
दकं हस्ते क्षिप्त्वा पो दत्वा अस्मत्पितामह रुद्ररूप प्रपितामहादित्यरू
पेत्याद्युक्त्वेतरत्राप्येवमेवार्घं दत्वा मातामहादीनामपि तथैव दद्यात्॥
वर्गद्वयेप्येकैकविप्रपक्षे त्वेकैकस्यैव हस्ते त्रीन् त्रीन् अर्घ्यान् दद्या
त्॥ वर्गद्वयेप्येकैकविप्रपक्षेप्येकमेव पित्राद्यर्थे तावद्विगृह्य दद्यात्।
वर्गद्वयेप्येकविप्रपक्षे तद्धस्त एव षडपि दद्यात्॥ एकैकस्यानेकविप्र
पक्षेप्येकमेव पित्राद्यर्थं तावद्विगृह्य दद्यात्॥ अथाद्यार्घपात्रे सर्वार्घ
संस्रवानासिच्योत्तरतः शुंधंतामिति भूमिं प्रोक्ष्य पितृषदनमसीति
दक्षिणाग्रकुशैरास्तीर्य तत्र पितृभ्यः स्थानमसीति साद्यार्घपात्रं दक्षि

पात्रंन्युब्जीकृत्यगंधपुष्पधूपदीपैस्तदर्च्योपवीतीप्राङ्मुखोमुखमा
र्जनादिकांपात्रांतरस्थापितसंस्रवप्रतिपत्तिंकृत्वोदङ्मुखोदेवद्वि
जहस्तेऽपोदत्वागंधद्वारामितिमंत्रमुक्त्वापुरूरवार्द्रवसंज्ञकाविश्वे
देवाअमीवोगंधावःस्वाहाइतिप्रतिद्विजंद्विवारंचंदनंदत्वापुनरपो
दत्वाओषधयःप्रतीतिपूर्ववत्पुष्पंदत्वाधूरसीतिधूपंदत्वोद्दीप्यस्वेति
दीपंदत्वाऽपोदत्वाऽऽच्छादनंदत्वायथाविभवमलंकारपादुकोपानहच्छ
त्रजलपात्रादीनिनाममंत्रेणयवोदकपूर्वंपदार्थानुसमयेनदत्वासु
चंदनंसुपुष्पमित्येवंप्रत्युक्तेवैश्वदेविकमर्चनंसंपूर्णमस्तुसंकल्प
सिद्धिरस्त्वितिचोक्त्वाप्राचीनावीतीदक्षिणामुखःपैत्रद्विजहस्तेऽपो
दत्वागंधद्वारामितिमंत्रंपठित्वाऽस्मत्पितरोऽमुकशर्माणोऽमुकगोत्रा
वसुरूपाःसपत्नीकाअमीगंधावःस्वधेत्येकवचनेनवागंधंदद्यादेव
मितरत्रयथालिंगं।ततःपूर्ववदोषधयःप्रतीतिपुष्पंदत्वाधूरसीतिपा
दद्देशेधूपंदत्वोद्दीप्यस्वेतिमुखदेशेदीपंदत्वायुवंवस्त्राणीत्याच्छाद
नंदत्वायथाशक्त्यलंकारादिनाममंत्रेणदद्यात्॥सुगंधाइत्यादिवि
प्रोक्तिःपूर्ववत्॥एवंमाता   महानां।ततःकर्त्तापित्र्यमर्चनंसंपूर्ण
मस्तुसंकल्पसिद्धिरस्त्वित्युक्त्वातैस्तथास्त्वितिप्रत्युक्तेचतुर्भिश्चे
तियस्यस्मृत्येतिचवदेत्॥अथोपवीतीवैश्वदेविकविप्रांतिकभूमिं
संशोध्यगोमयेननैर्ऋतींदिशमारभ्यैशानीपर्यंतंप्रादक्षिण्येनचतुर
स्रंइतस्त्रततःप्राचीनावीतीपित्र्यविप्रांतिकभूमिंसंशोध्यगोमयेनै
शानींदिशमारभ्यनैर्ऋतींदिक्पर्यंतंवृत्तंचिह्नंकृत्वातत्रदक्षिणाग्रकु
शतिलान्निक्षिप्यदशवारंभस्मादिमार्जिततैजसादिभोजनभाजना
निनिधायजलेनप्रक्षाल्यतज्जलंसतिलदर्भंपैत्रद्विजपादक्षालनमंड
लेनिनयेत्॥ततउपवीतीदेवद्विजाग्रतस्तथैवभाजनानिनिधायज
लेनप्रक्षाल्यतदुदकंसयवकुशंदेवद्विजपादक्षालनमंडलेनिनयेत्
॥ततआचारात्सर्वत्रपात्राण्यभितोभस्मनामर्यादांकृत्वाद्विजानांक
रशुद्धिंपात्रेनिधायतज्जलंसतिलकुशंमंडलोपरिनिक्षिपेत्॥ततोऽप
हताअसुराइतियज्ञोपवीतीदेवपात्रोपरिप्राचीनावीतीपितृपात्रोपरि
चतिलान्विकीर्य्यजलमुपस्पृशेत्॥ततःपात्रेऽन्नमुद्धृत्याभिघार्यापिधा

घाग्नौकरिष्य इति पृष्ट्वा कुरुष्वेति तैरनुज्ञातः स्मार्त्तोग्निं परिस्तीर्य
तत्र तिस्रः समिध आधायोपवीती अग्नये सोमायेति आहुतिद्वयं मे
क्षणेन हुत्वा प्राचीनावीती मेक्षणमग्नौ प्रक्षिप्याग्नौकरण शेषं पितृ
विप्रभाजने परिविष्यान्नं दैवपात्रेषु तत उपवीती दैवपात्रे प्राचीनावी
ती पितृपात्रेषु घृतमुपस्तीर्योपवीती स्वयं पत्नी वा दैवपूर्वं परिवेषणं
कुर्यात्॥ ततः कर्त्तोपवीत्युदङ्मुखो दर्भैः पात्राण्युपस्तीर्य यवान्विकी
र्य दक्षिणं जान्वाच्य दैवपात्रे परिविष्टमन्नं सावित्र्याभ्युक्ष्य तूष्णीं प
र्युक्ष्य वामोपरि दक्षिण इत्येवं स्वस्तिकाकाराभ्यामनुत्तानाभ्यां हस्ता
भ्यां पात्रमधोभिगृह्य पृथिवी ते पात्रमित्यादि स्वाहान्तं ब्राह्मणानां
त्वेत्यादि च जपित्वेदं विष्णुरिति मंत्रान्ते विष्णो हव्यं रक्षस्वेत्युक्त्वा द
क्षिणहस्तेन विप्रदक्षिणकराङ्गुष्ठमधोमुखमन्नेवगाह्यापहता इति
प्रदक्षिणं यवान्विकीर्य्य यवोदकमादायेदमन्नममृतरूपं परिविष्टं प
रिवेक्ष्यमाणं चातृप्ते भोजनपर्याप्तं तत्सर्वं विश्वेदेवा वः स्वाहा नमोन
ममेत्युक्त्वा वामोपरि दक्षिणकरेण विप्रदक्षिणतस्तज्जलं क्षिपेत्॥ ए
वमितरत्र कृत्वा प्राचीनावीती दक्षिणामुखः सव्यं जान्वाच्य पितृपात्र
स्थमन्नं सावित्र्याभ्युक्ष्याद्भिः पात्रेषु तिलान्विकीर्य्य तूष्णीं पर्युक्ष्य द
क्षिणोपरि वाम इत्येवं स्वस्तिकाकाराभ्यामुत्तानाभ्यां पाणिभ्यां पि
तृपात्रमालभ्य पृथिवी इत्यादि स्वधान्तं ब्राह्मणानां त्वेत्यादि च जप्त्वा
इदं विष्णुरिति मंत्रान्ते विष्णो कव्यं रक्षस्वेत्युक्त्वा दक्षिणहस्तेन विप्र
दक्षिणहस्ताङ्गुष्ठमुत्तानमन्ने निवेश्य स्वस्थाने कृत्वा सतिलकुशोद
कं खड्गपात्रं दक्षिणहस्तेन गृहीत्वा वामहस्तेन ममेत्युक्त्वा वामाधो
नीतदक्षिणकरेण विप्रवामभागे जलं क्षिपेत्॥ एवं सर्वेभ्यो यथालि
गं दत्वा ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं॥ ब्रह्मैव तेन गंतव्यं
ब्रह्मकर्मसमाधिना॥ येषामुद्दिष्टं तेषामक्षय्यातृप्तिरस्तु पितृरूपी ज
नार्दनः प्रीयतामित्युक्त्वोदकं भूमौ सिक्त्वा नमस्कृत्वेशानविष्णुकम
लासनकार्त्तिकेयवन्हित्रयार्करजनीशगणेश्वराणां॥ क्रौंचामरेंद्र
कलशोद्भवकाश्यपानां पादान्नमामि सततं पितृमुक्तिहेतून्॥ अन्न
हीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः॥ श्राद्धमच्छिद्रमस्त्वेतत्प्रसादा

द्भवतांममेतिविप्रान्संप्रार्थ्यैनथास्त्विति तैः प्रत्युक्तः पितृपूर्वं विप्रकरे
षु जलं दद्यात्॥ विप्राश्च तेन जलेनान्नं प्रोक्ष्य निर्णीयत्वामभिमंत्रयीरन्
ततः कर्त्ता पुनः पितृपूर्वकमेवापोशानार्थमुदकं दत्वामृतमस्त्विस्तु-
क्त्वा सप्रणवव्याहृतिपूर्वां गायत्रीं मधुवाताइतितृचं जप्त्वा मधुमधुइ
तिचत्रिरुक्त्वा येदेवापोशानार्थमुदकं दत्वामृतमस्त्विस्तुक्त्वा सप्रण
वव्याहृतिपूर्वां गायत्रीं मधुवाताइतितृचं जप्त्वा मधुमधुइतिचत्रिरु-
क्त्वा येदेवासइति देवद्विजाग्रतः सयवकुशं जलं निषिच्य संकल्पसिद्धि
रस्त्वित्युक्त्वा येचेहपितरइति पित्र्यद्विजाग्रतः सतिलकुशं जलं निषिच्य
संकल्पसिद्धिरस्त्वित्युक्त्वा तत्सदिति यथासुखं भुंजीध्वमिति च त्रिरु
क्त्वा प्रणम्य॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ तृप्तिं प्रयांतु वै भ
क्त्या यदिदं श्राद्धमाहृतं॥ मातामहस्तृप्तिमुपैतु तस्य तथा पिता तस्य
पिता च योऽन्यः॥ विश्वे च देवाः परमां प्रयांतु तृप्तिं प्रणश्यंतु च यातुधानाः
॥तथा॥ सप्तव्याधा० येस्मज्जाता० अमूर्त्तानांच० चतुर्भिश्च० तथा॥ यज्ञे-
श्वरो हव्यसमस्तकव्यभोक्ताव्ययात्मा हरिरीश्वरोत्र॥ तत्संनिधाना
दपयांतु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे॥ त्वां योगिनश्चिंतयंति त्वां
यजंति च याज्ञिकाः॥ हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्॥ गया
यां पितृरूपेण स्वयमेव जनार्दनः॥ तं दृष्ट्वा पुंडरीकाक्षं पितृणामनृणो
भवेदित्यादि पठेत्॥ ततो विप्राः नित्यभोजनवत् परिषेचनं कृत्वा बलि
दानमकुर्वंतोऽपः पीत्वा कर्त्ता श्रद्धायां प्राणे निविष्टामृतं जुहोमि शिवो
माविशाप्रदाहाय प्राणाय स्वाहा इत्यादिमंत्रे पठ्यमानेषु प्राणाहुतीः
पृथक् हुत्वा पुनः श्रद्धायामिति पंचयजुर्षु ब्रह्मणि म आत्मामृतत्वायेति
चोच्यमानेषु ता आहुतीराप्याय्य कृतमौनाः भूमौ पादौ निक्षिपंतः स
शेषमश्नीयुः॥ कर्त्ता प्राणाहुतिमंत्रपाठानंतरं यथासुखं जुषध्वमि
त्युक्त्वा सप्रणवां सव्याहृतिकां गायत्रीं त्रिः सकृद्वोक्त्वा कृणुष्व पाज इ
ति पंच॥ अग्नये कव्यवाहनायेत्यादि च॥ सहस्रशीर्षा इति षोडश १६
आशुः शिशान इति सप्तदश॥ रुद्रप्रभृतीन्यन्यानि च॥ पवित्राणि ब्राह्म
णान् श्रावयेत्। ततस्तृप्तान्ज्ञात्वा वैश्वदेविकमुख्यविप्रसन्निधौ प्रोक्षि
तभूमौ यवकुशान्निधाय तत्र हस्ते घृतप्लुतमन्नमादाय श्लोमपाश्वपेदे

वा यज्ञभागविवर्जिताः॥ तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकमि
ति क्षिप्त्वा प्राचीनावीती पितृसंनिधि भूमिं प्रोक्ष्य तत्र दक्षिणाग्रान्कुशा
नास्तीर्य तिलमिश्रोदकं तूष्णीमासिच्य तिलघृतप्लुतमन्नमादाय
जलेनाप्लाव्य अग्निदग्धा इति पितृतीर्थेन क्षिप्त्वा। येऽग्निदग्धाः कुले जा
ता येऽप्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिमि
ति तस्योपरि पितृतीर्थेन तिलांबु निषिच्य त्रिराचम्य पितृपूर्वं विप्रे
भ्यः सकृज्जलं दत्त्वा सप्रणवां सव्याहृतिकां गायत्रीः मधुमतीः म
ध्विति च त्रिः श्रावयित्वा तृप्ताः स्थेति विप्रान् पृष्ट्वा तृप्ताः स्म इति तै
रुक्तः श्राद्धं संपन्नमिति पृष्ट्वा सुसंपन्नमित्युक्तः शेषोऽप्यस्ति किं
क्रियतामित्युक्त्वा विप्रैरिष्टैः सह भुज्यतामित्युक्तो देवताभ्य इति
त्रिर्जप्त्वा विप्रेष्वनाचांतेष्वेव पिंडार्थं सर्वस्मादन्नात्किंचित्किंचिदु
द्धृत्य पिंडान्निर्वपेदाचांतेषु वा तथाहि राचम्य वाग्यतो दक्षिणामु
खः प्राचीनावीती पित्र्यब्राह्मणांतिक उत्तरत उपविश्य अपहता
असुरा रक्षांसि वेदिषद इति मंत्रावृत्त्या सव्योत्तरपाणिभ्यां गृही
तेन कुशमूलेन दक्षिणसंस्थं पश्चिमापवर्गं रेखाद्वयमुल्लिख्य त
त्रत्यैकमङ्गारं ये रूपाणीति मंत्रेणाग्नौकरणाधिकरणभूत
स्य दक्षिणाग्न्यादेरुल्मुकं रेखादक्षिणतो निधाय रेखां सकृदा
च्छिन्नैः कुशैराच्छाद्य वामं जान्वाच्य पितृपिंडार्थमास्तीर्णबर्हिषि
त्रिषु स्थानेष्वग्रेष्वपवर्गं पितरमुकशर्मन्नमुकगोत्र सपत्नीका
वनेनिक्ष्वेति मंत्रैः सतिलजलं पितृतीर्थेन निनीय मातामहार्थमा
स्तीर्णबर्हिषि त्रिषु स्थानेषु मातामहामुकशर्मन्नमुकगोत्रावनेनि
क्ष्वेति मंत्रैः निनीय शुक्लांबराः शुक्लगंधाः शुक्लयज्ञोपवीतिनः॥ आ
त्मनोऽभिमुखासीना ज्ञानमुद्रा निरायुधाः॥ वसवः पितरो ज्ञेया रुद्रा
स्तत्र पितामहाः। पितुः पितामहाः प्रोक्ता आदित्या बर्हिषि स्थिता इति तत्स्थान्व
स्वादिदेवान्ध्यात्वा तिथ्यादि संकीर्त्य पितृप्रीत्यर्थं पिंडदानं करि
ष्य इति संकल्प्य कुरुष्वेति तैः प्रत्युक्तः पिंडार्थमुद्धृतस्यान्नस्या
मलकप्रमाणं मधुसर्पिस्तिलसमन्वितं वर्तुलं पिंडषट्कं कृत्वा प्रत्ये
कमभिघार्यैकं पिंडमादायैतत्ते स्मत्पितरमुकशर्मन्नमुकगोत्र वसु

रूपस्य सपत्नीकविष्णो ये च त्वामत्रानु तेभ्यश्चेत्युक्त्वापजलसेचनस्था
नेपितृतीर्थेनाभिषिंच्यास्मत्पित्रेऽमुकशर्मणेऽमुकगोत्रायवसुरूपा
यसपत्नीकायपिंडःस्वधानमोनममयेचत्वामत्रानुतेभ्यश्चगयायां
श्रीरुद्रपादेदत्तमस्त्वित्युच्चरेत्।।एवंसर्वेभ्यस्तत्तज्जलसेचनस्था
नेषुयथालिंगंदद्यात्।।ततःपिंडपात्रंन्युब्जीकृत्यनिराचम्यात्रपित
रोमादयध्वंयथाभागमावृषायध्वमितिजप्त्वाचम्याप्रदक्षिणमुद
ङावृत्यप्राणानायम्यप्रत्यावृत्यामीमदंतपितरोयथाभागमावृषा
यिषतेतिजप्त्वापूर्ववत्पित्रादिपिंडेषुपितरमुकशर्मन्नमुकगोत्रस्व
वनेनिक्ष्वेतिमंत्रैस्तिलोदकंनिषिच्यपूर्ववद्धनीवींविस्रस्यनमोव
इतिषड्मंत्रान्गृहान्नइतिजप्त्वामधुघृततिलोदकयुक्तपात्रेणपिंडे
षुपर्यदत्त्वाएतद्वःपितरोवासइतिप्रतिपिंडंमंत्रावृत्यात्रिगुणसूत्रंद
द्यात्।।ततोगंधादिभिःपिंडानभ्यर्च्यपुनःपितृपूर्वविप्रेभ्यःप्रत्येक
माचमनजलंदद्यात्।।ततोविप्रभुक्तशेषमन्नंभोजनपात्रेभ्योबहिः
कृत्वाघृताभिधानमसीत्यर्द्धजलंपीत्वाद्वै।।रौरवेपुण्यनिलयेपद्मार्बु
दनिवासिनां।।अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठत्विति भूमावासि
च्यतेनचस्याएवपात्रांतरेहस्तादीन्क्षालयित्वाचमेयुः।ततःकर्तावि
प्रान्यत्पिंडान्नमस्कृत्यसुप्रोक्षितमस्त्वितिभूमिमासिच्यपितृपूर्वं
द्विजहस्तेषुप्रदक्षिणंप्रत्येकंशिवाआपःसंत्वित्युदकंदत्त्वातथैवसौम
नस्यमस्त्वितिपुष्पाणिस्वस्ताःसंत्वरिष्टंचास्त्वितियवान्तथैवदत्त्वा
विश्वेषांदेवानांयद्दत्तंश्राद्धंतदक्षय्यमस्त्वित्युक्त्वाःस्त्वक्षय्यमितिप्र
त्युक्तःप्राचीनावीत्यस्मत्पितरमुकशर्मणोऽमुकगोत्रस्यवसुरूपस्य
सपत्नीकस्ययद्दत्तंश्राद्धंतदक्षय्यमस्त्वित्येकैकंप्रत्येकमुक्त्वाःस्त्वक्ष
य्यमितितैरुक्तोयेषामुद्दिष्टमक्षय्यमस्त्वित्युक्त्वोपवीत्यघोराःपित
रःसंत्वित्युक्त्वासंत्वघोराःपितरइत्युक्तेअमुकगोत्रोहमभिवादयइ
त्यभिवाद्यास्मद्गोत्रंवर्द्धतामित्युक्त्वास्वस्तिवर्द्धतांवोगोत्रमितितैःप्र
त्युक्तोदक्षिणामुखोदातारोनोभिवर्द्धंतामितिश्लोकद्वयमुक्त्वाविप्रै
र्दातारोवोभिवर्द्धंतामितिएवंश्लोकद्वयमुक्त्वाआयुःप्रजांधनंविद्यां
स्वर्गंमोक्षंसुखानिच।।प्रयच्छंतुतथाराज्यंप्रीतानृणांपितामहाः।।

एताःसत्या आशिषःसंत्विति पठित्वाः क्षतपुष्पे दत्ते स्वस्ति तिलकं कृत्वा
तद्दक्षतपुष्पं शिरसि निक्षिप्य कुशपवित्राणि पिंडोपरि क्षिप्त्वा स्वधां वा
चयिष्य इति पृष्ट्वा वाच्यतामित्यनुज्ञातोऽस्मत्पित्रादिभ्यो मातामहादि
भ्यश्च नत्तन्नामगोत्ररूपेभ्यः सपत्नीकेभ्यः स्वधोच्यतामित्युक्त्वा
स्तु स्वधेति तैरुक्तः स्वधाः संपद्यंतामित्युक्त्वा संपद्यंतां स्वधा इत्युक्तः प
वित्रांतर्हितपिंडोपर्यवनेजनोदकशेषमूर्जं वहंतीति सर्वं निनीय प्राक्
न्युब्जीकृतमर्घपात्रं पिंडपात्रं चोत्तानं कृत्वा पित्र्यर्थविप्रेभ्यो नामगो
त्ररूपोक्तिपूर्वकं श्राद्धसाद्गुण्यार्थं दक्षिणां संप्रददे इत्युक्त्वा पितृतीर्थे
न सतिलां दक्षिणां दत्त्वा दक्षिणाः पांत्वित्युक्त्वा पांतु दक्षिणा इति तैः प्रत्यु
क्त एवं स्थानोपविष्टविप्राभ्यां देवतीर्थेन सयवोदकसुवर्णवस्त्रधान्या
दिष्वन्यतमां दक्षिणां शक्त्यनुसारतो दत्त्वा विश्वेदेवाः प्रीयंतामित्युक्त्वा
दैवद्विजहस्ते यवोदकं क्षिप्त्वा प्रीयंतां विश्वेदेवा इत्युक्तः प्राचीनावीती
पितरः प्रीयंतामित्युक्त्वा तिलोदकं पित्र्यद्विजहस्तेषु क्षिप्त्वा प्रीयंतां पि
तर इति तैरुक्तः पितृभ्यः स्वधायिभ्य इति पित्र्यपिंडान्नमो व इति माताम
हपिंडानभ्यर्च्य पिता पितामहश्चैव तथैव प्रपितामहः। तृप्तिं प्रयांतु पिं
डेन मया दत्तेन भूतले॥ मातामहस्तत्पिता च पिता तस्यापि तृप्यतु॥ द्वि
जानां तर्पणाद्धोमात्पिंडदानाच्च मे सदेति जप्त्वा क्षमध्वमिति पिंडांश्चा
लयित्वोपवीती हस्ताभ्यां पिंडानादायावघ्राय चाभ्य प्राचीनावीती
पिंडार्थदर्भान्नावसथ्ये क्षिप्त्वा स्वयं सुतः शिष्यो वा पितृपात्रं चालयि
त्वोपवीती देवपात्रं प्रक्षाल्य संचरमभ्युक्ष्य प्राचीनावीती पित्रादिभ्यो
मातामहादिभ्यः स्वस्तीति ब्रूतेत्युक्त्वा स्वस्तीति तैरुक्त उपवीती विश्वे
भ्यो देवेभ्यः भवंतो ब्रूतमित्युक्त्वा स्वस्तीति ताभ्यामुक्तो यन्न्यूनं यद
तिरिक्तं तत्सर्वं संपूर्णमस्त्वित्युक्त्वा संपूर्णमस्त्विति तैरुक्तो मंत्रही
नं क्रियाहीनं संपद्हीनं द्विजोत्तमाः। श्राद्धं संपूर्णतां यातु प्रसादाद्भवतां
मम॥ चतुर्भिश्चेति॥ यस्यस्मृत्येति च जप्त्वा देवताभ्य इति त्रिः पठित्वा
आ मा वाजस्येति कनिष्ठपूर्वकं विप्रान्त्रिः प्रदक्षिणीकृत्य नमस्कुर्यात्॥
ततस्तान्विप्रान्सुखासन उपवेश्य तांबूलादिकं दत्त्वा। अद्य मे सफलं जन्म
भवत्पादाब्जवंदनात्। अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवं॥ पत्र

शाकादिदानेन क्लेशितानुपयमीदृशाः॥ तत्क्लेशमिह संजानन्विसृष्टस्य क्षं
न्तुमर्हथेत्यादि संप्रार्थ्य जानुभ्यामवनिं गतः॥ प्रणिपत्य विसृज्य गच्छ
तो द्विजाननुव्रज्य तैरनुज्ञातः प्रत्यागत्य हस्तेन दीपानुपशमय्य द्विरा
चम्य गृहबलीन्कृत्वा बंधुभिः सहानुमोदितो भुंजीतेति दिक्॥ इति श्रा
द्धप्रयोगः॥ अथ तर्पणमार्गः॥ पूर्वेतिलोदकं कृत्वा अमाश्राद्धं तु कार
येत्॥ प्रत्यब्देन भवेत्पूर्वे परेऽह्नि तिलोदकं॥ पक्षश्राद्धे हिरण्ये च अनु
व्रज्य तिलोदकमिति॥ कारयेदित्यन्वेतयान्वाद्यकामे याजयेदिति च
स्मित विवक्षा हिरण्ये चत्वारि वाक्यानि॥ प्रत्यब्देन भवेत्पूर्वे इत्यस्या
नुवादत्वात्॥ पूर्ववाक्ये तिलोदकविशिष्टममावास्याश्राद्धं विधीय
ते॥ न चामावास्याश्राद्धे तर्पणोत्तरकालो विधीयते॥ सद्यस्कविधिप
रिगृहीतानां पुरस्तादुपसदां प्रवर्ग्येण वर्ग्येण चरतीत्यादीनां स्वतं
त्राणां दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादीनां वा दृष्टः॥ न चा
न्यांगोत्तरकालता कस्यचित्प्रधानस्य दृष्टा अन्येन यापुनराधानसं
मितयेष्ट्येष्ट्वाग्निहोत्रं जुहोतीत्यत्र ज्योतिष्टोमांगभूतोदवसनीयोत्तर
कालताग्निहोत्रस्य दृष्टेति चेत्॥ न तत्रावभृथोत्तरं दीक्षोन्मोके अग्नि
होत्रे प्राप्ते उदवसनीयोत्तरत्वमवधिमात्रं समर्थितेन तदुत्तरकालांगं॥
अन्यथाशाखापर्वंधेनोदवसानीयायामकृतायामनुपादेयकालत्वा
त्याज्यत्वादग्निहोत्रानुष्ठानप्रसंगात्॥ यदि क्वाप्यदृष्टमेवांगीक्रिये
त तदा दूरस्थश्रावपादेन कालस्य विधातुमशक्तेः प्रकरणांतरेणामा
वास्याश्राद्धं भिद्येत। अतो गर्गस्मृतावमावास्याश्राद्धं अत्र विधीयते
॥ तस्यां स्मृतावमावास्याश्राद्धविधायकं वाक्यमस्तीति चेत्॥ ताद
शस्यानुपलंभात्॥ सत्त्वे वास्य प्रयोगविधिपरत्वात्॥ अतः पूर्वोक्तमे
व युक्तं॥ तस्य तस्य प्रकृतित्वेन प्रत्यब्दे प्राप्ते तिलोदके तु व्रज्येति काल
मात्रविधिराग्निमारुतादूर्ध्वमनुयाजैश्चरंतीतिवत्॥ एवमग्रेपि॥ त
थाचानन्यगतिकं लिंगं वृहन्नारदीये दृश्यते॥ वृद्धिश्राद्धे सपिंड्यां च प्रे
तश्राद्धे तु मासिके॥ संवत्सरविमोके च न कुर्यात्तिलतर्पणमिति॥ अयं
च निषेधः प्राप्ते सत्यां घटते॥ कालार्थसंबंधे हि प्राप्त्यभावादन्यस्य वावि
धेयत्वाद्वाक्यं व्यर्थं स्यात्॥ सप्तमीवांगावस्तवद्दृष्टायेन कर्मणे तत्तत्रज

पान् जुहुयादित्यादिषु॥ एतदभिप्रायेणसंग्रहकृताप्युक्तं॥ प्रत्यब्दं
गतिलं दद्यादिति॥ तथा बृहन्नारदीये एव वार्षिकं प्रक्रम्य परेद्युः श्रा
द्धकृन्मर्त्यो योन तर्पयते पितॄन्॥ तस्य ते पितरः क्रुद्धाः शापं दत्वा व्रजंति
हीतिनिंदा दृश्यते॥ नचेयं नित्यतर्पणाकरणनिंदा अन्यप्रकरणे ऽन्य
स्याकरणनिंदाया अयोग्यत्वात्॥ पक्षश्राद्धांगतर्पणे विशेषो गार्ग्यो
क्तः॥ कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्॥ पितॄणां प्रत्यहं कार्यं
निषिद्धेह्नि पितर्पणमिति॥ प्रत्यब्देपि विशेषः स्मृत्यंतरे॥ नैवश्राद्धदि
नेकुर्यात्तिलैस्तु पितृतर्पणं॥ श्राद्धं कृत्वा परेन्ह्येव तर्पणं तु तिलैः सहेति
॥ अत्र पूर्वार्द्धं उत्तरार्द्धस्य स्तावकं॥ उत्तरार्द्धेन पूर्वार्द्धार्थस्य प्राप्ते रेकवा
क्यत्वलाभाच्च॥ तद्दयं निर्णयः श्राद्धस्य द्व्यहकालत्वे नित्यतर्पणस्य तं
त्रमध्यपातित्वात्तेनैव प्रसंगसिद्धिः॥ सद्यस्कालपक्षेप्येवं॥ अन्यांगैरन्यां
गानां प्रसंगसिद्धेः पशुपुरोडाशादावभ्युपगमात्॥ यत्तु यदात्वना पत्या
नित्यतर्पणोत्तरं श्राद्धसंकल्पस्तदा पृथक्कार्यं नित्यस्य प्रयोगानंतः
पातित्वादिति॥ तन्न॥ त्वत्प्रत्ययेन प्रयोगबहिर्भूतांगानुष्ठानस्यारंभ
णीयांगत्वस्य लिप्सयादावभ्युपगमात्॥ अतः इदमपि प्रयोगबहिर्भूतमे
वांगं पूर्वंकार्यं॥ अतश्च प्रसंगानुष्ठानमविरुद्धं॥ अतो न पृथक् तर्पणंद
र्शे॥ पक्षे तु सप्तम्यादौ नित्यतर्पणं - - - - तिलरहितं क्रियते तदा तं
त्र प्रसंगयोरभावादिदं तिलसहितं पृथक्कार्यमेवेति॥ वार्षिकदिने वि
शेषस्मृतिरत्नावल्यां वृद्धमनुराह॥ सप्तम्यां भानुवारे च मातापित्रोः
क्षयेहनि॥ तिलैर्यस्तर्पणं कुर्यात्स भवेत्पितृघातकः इति॥ इदं च तर्प
णं प्रस्तरप्रहरणे देवताकीर्तनवत् संनिपत्योपकारकं॥ अत एव यद्दे
वत्यं श्राद्धं तद्दैवत्यमेव भवति॥ वार्षिके विधिरुक्तः संग्रहे॥ स्नात्वा ती
रे समागत्य उपविश्य कुशासने॥ संतर्पयेत्तु सर्वान्वै स्नात्वा वस्त्रं च
धारयेदिति॥ अत्र स्नानोत्तरं संध्यामकृत्वैव तर्पणं कार्यमिति केचित्॥
तच्चिंत्यं॥ संध्याहीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मस्विति वाक्यात्॥ नच त
र्पणपर्यंतं श्राद्धप्रयोगानुवृत्तेर्मध्ये संध्यानानुष्ठेयेति वाच्यं श्राद्धदिने
सायं संध्यानुष्ठानप्रसक्तेः॥ ततश्च स्नानसंध्यादीनां सर्वकर्मार्थत्वेन
प्राप्तेरुपदेशानर्थक्यापि सामान्यतः प्राप्तेः कुशासनं तर्पणोत्तरं स्नानं च वि

धीयत इत्युक्तं॥यस्मिन्श्राद्धेहिरण्येनब्राह्मणविसर्जनोत्तरंतर्पणंकार्यं॥
सकृन्महालयेतुवार्षिकवत्परेद्युरेव॥सकृन्महालयेष्वः स्यादष्टकास्वं
तरेवहीतिवाक्यात्॥अंतेविसर्जनांते॥अष्टकाविकृतिभूतमाघ्याव
र्षादिश्राद्धेप्यंतएव॥अष्टकाश्राद्धानामप्यान्वष्टक्यपोर्द्वैधविकृति
त्वात्पूर्वेमेवतर्पणं॥नहिकृतित्वानंगीकारेतुतर्पणानंतुष्ठानमेव।ती
र्थादावपिदर्शवदेव॥यत्तुवाक्यं॥विवाहव्रतचूडासुवर्षमर्द्धंतदर्द्धकं
॥पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति॥तन्महालयाष्टकाव्य
तिरेकेणद्रष्टव्यं॥तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके॥निषिद्धेपि
दिनेकुर्यात्तर्पणंतिलमिश्रितमितिवचनात्॥तिथिविशेषोष्टकादिः॥
यत्तु॥पित्रोःक्षयाहेसंप्राप्तेयःकुर्यान्नित्यतर्पणं॥आसुरंतर्पणंज्ञेयंतत्तो
यंरुधिरंभवेत्॥सर्वस्नानतर्पणंकुर्याद्ब्रह्मयज्ञपुरःसरं॥मृताहेनैवक
र्तव्यंकृतंचेन्निष्फलंभवेदितिपठंति॥तन्निर्मूलमेव॥समूलत्वेपिस
तिलतर्पणनिषेधपरं॥पूर्वलिखितवाक्यानुरोधात्॥अन्योपिविशेषः
॥दक्षः॥ज्येष्ठभ्रातृपितृव्येष्ठसपत्नीमातरस्तथा॥एतेषांतुमृताहेतु
परेहनितिलोदकं॥कपिलः॥मन्वादिषुयुगाद्यासुदर्शसंक्रमणेषुच॥
पौर्णमास्यांव्यतीपातेदद्यात्पूर्वेतिलोदकं॥अर्द्धोदयेगजच्छायेषष्ठ्यां
चैवमहालये॥भरण्यांचमघाश्राद्धेपिंडांतेतर्पणंभवेदिति॥शौनकः
॥मातापित्रोःक्षयाहेतुपरेहनितिलोदकं॥कारुण्यश्राद्धविषयेसदा
दद्यात्तिलोदकमिति॥एतानिचपूर्वेतिलोदकंदत्त्वेत्यादीनिसर्वाणि
वाक्यानिमहाग्रंथेष्वदर्शनान्नविस्तरेणविचारविषयीकृतानि।कैः
श्चित्तुशिष्टैरादृतत्वात्किंचिल्लिखितानीतिदिक्॥अथवैश्वदेवका
लनिर्णयः॥तत्रानग्नेस्तावत्कालत्रयं॥ब्रह्मांडपुराणे॥वैश्वदेवा
हुतीरग्नावर्वाग्ब्राह्मणभोजनात्॥जुहुयाद्भूतयज्ञादिश्राद्धंकृत्वा
तुनस्मृतमित्येकःकालः॥अर्वाग्ब्राह्मणभोजनादित्यनेनाग्नौकरणा
नंतरंवैश्वदेवाहुतीर्जुहुयादित्युक्त[illegible]माद्रिः॥द्वितीयोभविष्य
पुराणेपितृन्संतर्प्यविधिवद्बलिंदद्याद्विधानतः॥वैश्वदेवंततःकुर्या
त्पश्चाद्ब्राह्मणवाचनमिति॥बलिशब्दार्थस्तत्रैवोक्तः॥यैअग्निदग्धा
मंत्रेणभूमौयन्निक्षिपेद्बुधः॥जानीहितंबलिंवीरश्राद्धकर्मणिसर्वदेति

तृतीयोपितरश्चैव॥ कृत्वाश्राद्धं महाबाहो ब्राह्मणांश्च विसर्ज्य च॥ वै
श्वदेवादिकं कर्म ततः कुर्यान्नराधिपेति॥ न चाग्निमदग्निमद्विषयं
पक्षत्रयमविशेषादिति वाच्यं॥ वैश्वदेवमकृत्वैव श्राद्धं कुर्यादन
ग्निकः॥ लौकिकाग्नौ हुतशेषः पितॄणां नोपतिष्ठतीति वासिष्ठे विशे
षाभिधानात्॥ अथ साग्नेर्वैश्वदेवकालः॥ तत्राह लौगाक्षिः॥ पक्षां
तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥ पितृयज्ञं ततः कुर्यात्ततोन्वाहार्य
कं बुध इति॥ पक्षांतकर्माग्न्यन्वाधानं॥ अन्वाहार्यं दर्शश्राद्धं पक्षांत
पिंडपितृयज्ञयोर्मध्यविधानाद्देव वैश्वदेवस्य साग्निककर्त्तृकत्वावगमे वै
यर्थ्यापातात्॥ साग्निकग्रहणमौपासनाग्निमतो निवृत्त्यर्थमिति
हेमाद्रिः॥ उक्तरीत्यैवाविशेषेण श्रौतस्मार्ताग्निमतोरुभयोरपि वै
श्वदेवकर्त्तृकत्वावगमात्साग्निकमदस्यानुवादकत्वमेव न तु स्मा
र्ताग्निमन्निवर्त्तकत्वं॥ श्रौताग्निमत एव निवर्त्तकत्वेन वैपरीत्यस्या
पि सुवचत्वादतोनुवादकत्वमेव युक्तं॥ एतच्चैकदिनप्रसक्तानामन्
न्वाधानादीनां क्रमाकांक्षायां तन्मात्रमेव विधत्ते न कर्मापि पदार्थं
तेन कदाचित्पिंडपितृयज्ञस्योत्तरदिनकर्त्तव्यत्वेपि न कदाचित्क्ष
तिः॥ कश्चित्त्वश्राद्धे साग्निकस्यापि पश्चादेव वैश्वदेवः॥ परिशिष्टे सं
प्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च॥ अग्रतो वैश्वदेवः स्यात्पश्चा
देकादशेहनि॥ शालंकायनः॥ श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं च सा
ग्निकः॥ एकादशाह्निकं मुक्त्वा तत्र ह्यंते विधीयत इति॥ तत्रानग्नेः
श्राद्धशेषेणैव वैश्वदेवः॥ श्राद्धान्नेन तु वैश्वदेविकं मनुश्राद्धं चरेद्धा
र्मिक इति हेमाद्र्यादिसिद्धांतात्॥ साग्निकस्य तु पूर्वं पृथक्पाकेनैवे
ति॥ यदि पृथक्पाकात् यदि वा श्राद्धशेषाद्वैश्वदेवः क्रियते उभयथा
पि भोजनं श्राद्धशेषस्यैव॥ भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवित
मिति पूर्वोक्तान्मात्स्यवाक्यात्॥ प्रदक्षिणमनुव्रज्य भुंजीत पितृ
सेवितमिति याज्ञवल्कीयाच्च॥ न चात्र रागप्राप्तभोजनानुवादेन श्रा
द्धशेषविधिः॥ भोजनस्य रागतोपि नित्यमप्राप्तेर्नित्यवच्छ्रवणायो
गात्॥ अतः प्रकरणाच्छ्राद्धांगत्वेन भोजनं क्रियैव विधीयते यो व्रतं
ब्राह्मस्येति वत् अन्यथा तत्रापि व्रतानुवादेन पयस एव विधिः स्यात्॥

द्वंद्वंच भोजनंयद्यपि पितृसेवितमिति द्वितीयश्रुतेः प्रतिपत्तिकर्मनच
प्रतिपाद्याभावेलुप्यतेन्यायात्॥तथापि श्राद्धदिने उपवासे दोषश्रव
णाद्दृष्टार्थं पुनः पक्त्वापि कार्यमेव॥स्विष्टकृद्यागइव शेषनाशआ
ज्येनयस्य सर्वाणिहवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैतादेव
ताः परिसंख्याययजेतेतिवचनात्॥अतएव देवलः॥श्राद्धंकृत्वातुयो
विप्रो नभुंक्तेथकदाचन॥देवाहव्यंनगृण्हंति कव्यानि पितरस्तथेति
॥वैधोपवासप्राप्तौ स्मृत्यंतरे॥उपवासोयदानित्यः श्राद्धं नैमित्तिकंभ
वेत्॥उपवासंतदाकुर्यादाघ्राय पितृसेवितमितिनित्य इत्यविवक्षित
मनुवाद्यविशेषणत्वात्॥अतः काम्योपवासप्राप्तावप्याघ्रेयमेव॥मा
त्स्ये॥पुनर्भोजनमध्वानंयानमायासमैथुनं॥श्राद्धकृच्छ्राद्धभुक्चैव
सर्वमेतद्विवर्जयेत्॥स्वाध्यायंकलहंचैव दिवास्वापंतथैवचेति॥बृह
स्पतिः॥तांनिशांब्रह्मचारीस्याच्छ्राद्धभुक् श्राद्धिकैः सहेति॥यमः॥पु
नर्भोजनमध्वानंभारमायासमैथुनं॥संध्यांप्रतिग्रहंहोमंश्राद्धभुक्
त्वष्टवर्जयेदिति॥संध्याहोमयोर्विशेषो माधवीये पुराणे॥दशकृत्वः पि
बेदापो गायत्र्याश्राद्धभुक् द्विजः॥ततः संध्यामुपासीतजपेच्चजुहुया
दपि॥ इतिपार्वणश्राद्धं॥अथासमर्थस्य संकल्पश्राद्धं॥तत्रस्मृत्यंत
रे॥अंगानि पितृयज्ञस्य यदाकर्तुंनशक्नुयात्॥संकल्पश्राद्धमेवासौकु
र्यादर्घ्यादिवर्जितमिति॥पितृयज्ञोत्रश्राद्धं॥नपिंडयज्ञः॥अर्घ्यपिंडादि
वर्जनासंगतेः॥नहिपिंडयज्ञेर्घ्योस्तिनापि तत्रपिंडदानमंगं॥श्राद्ध
त्वपद्यपि तत्स्वधानंतथाप्यंगपदंतदप्युपलक्षयति॥अतोनविरोधः॥अ
तएवसंवर्त्तः॥समर्थयस्तुशक्नोति कर्त्तुंचैवेहपार्वणं॥अपिसंकल्प
विधिनाकालेतस्यविधीयते॥तेषामन्नमाज्यस्यचान्नस्यत्यागः संक
ल्पउच्यते॥तत्रप्रयुक्तो विधिर्यस्तुसतेनव्यपदिश्यते॥तावन्मात्रेणसंब
द्धंसांकल्पश्राद्धमुच्यते॥छागलेयः॥पिंडंयत्रनिवर्त्तेतमघादिषुक
र्थचन॥सांकल्पंतुतदाकार्यंनियमाद्ब्रह्मवादिभिः॥सांकल्पिकप्रका
रमाहव्यासः॥संकल्पंतुयदाकुर्यान्नकुर्यात्पात्रपूरणं॥नावाहनाग्नौ
करणेपिंडांश्चैवनदापयेदिति॥स्मृतिसंग्रहे॥अग्नौकरणमर्घ्यंचविकि
रावाहनेस्वधा॥पिंडयुक्तेप्रकुर्वीतपिंडहीनेविवर्जयेदिति॥पारिजाते

पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते॥ स्वधावचनलो
वृद्धशातातपः॥ पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते॥ स्वधावाचनलो
पोत्र विकिरश्च विलुप्यते॥ अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथास्थि
तमिति॥ यत्तु स्मृतिचंद्रिकाप्रयोगपारिजातादौ॥ आवाहननिषेधेः मं
त्रकमावाहनंकार्यमन्यथा देवताया असंनिधानप्रसंगादित्युक्तं॥
आगमनरूपस्य देवतासान्निध्यस्य देवताधिकरणेनिराकृतत्वात्॥
पितृतृप्तिस्तु यद्यपि देवतातृप्तित्वेन नदधिकरणेनिराकृता तथापिश्रा
द्धफलत्वेनांगीकार्या॥ धर्मत्रिसत्राधिकरण न्यायेन विध्यपेक्षया श्राद्धफलत्वेनांगीकार्या॥ धर्म
त्रिसत्राधिकरण न्यायेन विध्यपेक्षया॥ उत्कृष्टोपकृष्टो वा विग्रहो प्यंगीकार्यः। न
फलभोगान्यथानुपपत्त्या च॥ उत्कृष्टोपकृष्टो वा विग्रहोप्यंगीकार्यः। न
तु सान्निध्यमानाभावात्॥ अतएव प्रसादफलदातृत्वे अपि न॥ यद्यपि
॥ वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः॥ तेतृप्ताःस्तर्पयंत्येनं सर्वका
मफलैः शुभैरिति॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च॥ प्रयच्छं
ति तथा राज्यं प्रीता नृणां पितामहा इति च फलदातृत्वं श्रुतं तथापि न द
र्थवादगतत्वान्न विध्यनपेक्षणाच्च नांगीक्रियते॥ विध्यनपेक्षितानां व
ज्रहस्तसहस्राक्षत्वादीनामप्यंगीकारापत्तेः॥ इष्टापत्तौ वपोत्खनना
दीनामपि तदापत्तिः॥ अतः प्रामाणिकौ तृप्तिविग्रहो अंगीकर्त्तव्यौ न
तु सांनिध्यफलदातृत्वादीनीतिदिक्॥ अथ श्राद्धे आमहेमादिविधिः॥ लघु
हारीतः॥ एकोद्दिष्टं तु कर्त्तव्यं पाकेनैव सदा स्वयं॥ अभावे पाकपा
त्राणां तदहः समुपोषणमिति॥ सुमंतुः॥ तीर्थे श्राद्धं प्रकुर्वीत पक्वान्ने
न विशेषतः॥ आमान्नेन हिरण्येन कंदमूलफलैरपि॥ एषामभावे कुर्या
च्च श्रद्धयापि जलेन वेति॥ कात्यायनः॥ आपद्यनग्नौ तीर्थे च प्रवासे
पुत्रजन्मनि॥ आमश्राद्धं द्विजः कुर्याद्भार्यारजसि संक्रमे॥ जाबालः॥ आ
पद्यनग्नौ तीर्थे च ग्रहणे चंद्रसूर्ययोः॥ आमश्राद्धं द्विजैः कार्यं शूद्रेण तु
सदैव हीति॥ तथा॥ द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि॥ हेमश्राद्धं
प्रकुर्वीत यस्य भार्या रजस्वला॥ अत्रानग्नाविति भावप्रधानो निर्देशः।
अनग्नित्व इत्यर्थः॥ श्रौतस्मार्त्ताग्न्यभाव इति यावत्॥ न त्विह पाका
द्यर्थलौकिकाग्निपरं॥ आपस्तंदेनैव सिद्धावेतस्य द्वैयर्थ्यापातात्॥ द्र
व्याभाव द्विजाभावाभ्यां चापद्युपलक्ष्यते॥ अतोपरिग्रहनाशदेशांत
रस्थत्वादिना श्रौतस्मार्त्ताग्न्यभावआमेन हेम्ना वा श्राद्धं कुर्यात्॥ आ

प्रवासपुत्रजन्मग्रहणभार्यारजोदोषेषुतुसाग्निकोप्यामेनैवेतिक
र्कस्मृतिरत्नावल्याद्यनुयायिनः॥यथाशिष्टाचारंकार्यमितिमदनपा
रिजातदिवोदासीयाःप्राच्याअप्येवंतीर्थेजलसमीपेआमेनहेम्ना
वागृहादौत्वन्नेनैवेतियुक्तं॥सदैवहिजलांतेषुआमश्राद्धंप्रशस्यते
॥गृहाद्दशगुणंपुण्यंलभेत्तीर्थेनिवापकृदितिवचनादितिभट्टचरणाः॥दा
क्षिणात्यास्तूभयथाकुर्वंति॥पक्वान्नेनविशेषइतिव्याख्यानात्॥अत्रयथा
देशाचारंव्यवस्थासुमंतुः॥सदाचैवतुशूद्राणामामश्राद्धंविदुर्बुधाः
॥नपक्वंभोजयेद्विद्वान्सच्छूद्रोपिकदाचन॥व्यासः॥आमंदद्यात्तुकौंते
यदद्यादन्नंचतुर्गुणमिति॥आमंदद्द्विकौंतेयआमंतुद्विगुणंभवेदि
तित्वशक्तौ॥हिरण्यंत्वष्टगुणंचतुर्गुणंद्विगुणंवादद्यात्॥धान्याच्चतु
र्गुणेनैवहिरण्येनसुरोचिषेतिमरीचिवचनात्॥आमंतुद्विगुणंप्रोक्तं
हेमतद्वच्चतुर्गुणमितिधर्मवचनाच्च॥अशक्तौसममप्यामंहेमवाद
द्यात्॥द्वैगुण्यादिचपुरुषाहारापेक्षयापेक्षया॥उशना॥सिद्धान्नेतु
विधिर्यःस्यादामश्राद्धेप्यसौविधिः॥आवाहनादिसर्वस्यात्पिंडदा
नंचभारत॥दद्याच्चापिद्विजातिभ्यःशृतंवाशृतमेववा॥तेनाग्नौ
करणंकुर्यात्पिंडांस्तेनैवनिर्वपेदिति॥हस्तेग्नौकरणंकुर्याद्ब्राह्मण
स्यविधानतइतिच॥षट्त्रिंशन्मते॥आमश्राद्धंप्रकुर्वीतपिंडदा
नंकथंभवेत्॥गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा॥पिंडदान
मितिशेषः॥आमगृहपाकसक्तुषुयथालाभंव्यवस्था॥यत्तु॥आ
मेनपिंडंदद्याच्चेद्विद्वान्पक्वेनयोजयेत्॥पक्वेन्नकुरुतेपिंडमामान्नं
यःप्रयच्छति॥तावुभौमनुजश्रेष्ठौनरकार्हौनसंशयइति॥तदमा
वाणादिपरमितिप्रघट्टकेपितामहचरणाः॥अत्रभोजनसंबद्धाःप
दार्थायथासुखंजुषध्वंतृप्ताःस्थेत्यादयोद्वाराभावान्निवर्त्ततइति
पारिजाते॥कृष्णलेष्ववघातवत्॥तदुक्तंतत्रैव॥तृप्तिप्रश्नोवगाह
श्चजुषप्रश्नोयथाविधि॥आमश्राद्धेभवेन्नेतदपोशानंचपंचमं॥
अवगाहोंगुष्ठनिवेशनं॥तीर्थनिमित्तामश्राद्धेएतेअर्घ्यमावाहनंचै
वद्विजांगुष्ठनिवेशनं॥तृप्तिप्रश्नंचविकिरंतीर्थश्राद्धेविवर्जयेदित्यघो
रयश्चन॥पाकश्राद्धेत्वर्घ्योदयएवनभवंतीतिविवेकः॥हेमश्राद्धेपिं

डुनिवृत्तिरपीति दिवोदासः॥स्मृत्यर्थसारेतु विकल्पः॥मरीचिः॥आ-
वाहने स्वधाकारे मंत्रा ऊह्या विसर्जने॥अन्यकर्मण्यनूह्या स्युराम श्रा-
द्धविधिः स्मृतः॥पितॄन्हविषे अत्तवे इत्यत्र स्वीकर्त्तवे इति॥नमो वः पि
तर इषे इत्यत्र आमायेति॥तृप्ता यातेत्यत्र ऋग्मत्यस्थाने तृप्यतेति लोट्
॥इति भट्टचरणाः॥न पर्यंतेतिलिङंतमूह्यमिति पारिजाते॥इदमन्नमि
त्यादौ इदमाममित्यादि अन्यकर्मविष्णो हव्यं रक्षस्वेत्यादावनूहः॥
यद्यपि प्रकृतावूहो न्यायेन न प्राप्नोति तथापि वचनेनानेन विधीयते।त
थापूयति च एतद्वचोक्षरं पदेन दूहतीति तस्मादृचं नोहेदिति सामान्यश्रु
तिः पूर्वेन या विशेषश्रुत्या बाध्यते॥इत्यपि ते॥युक्तं तु न्यायप्राप्तबाधक
त्वेनोपपन्नस्य वाक्यस्य न श्रौतनिषेधबाधकत्वमिति॥अतो नक्वापि
मंत्रेष्वेवोह इति॥आमश्राद्धे कालमाह शातातपः॥आमश्राद्धं तु पूर्वा
ह्णे परान्हे पार्वणं भवेत्॥एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तकमि
ति॥अन्नासंभवनिमित्तक आमश्राद्धे यं कालः॥शूद्रं प्रति नित्यश्राद्धे तु
स्मृत्यंतरे॥मध्यान्हात्परतो यस्तु कुतपः स उदाहृतः॥आममात्रेण तत्रै
व पितॄणां दत्तमक्षयमिति हेमाद्रावपरार्के च॥पाकाभावनिमित्ते शू
द्राधिकारिके चामश्राद्धं प्रातर्मध्यान्होत्तरं कालयोर्विकल्प इति केचि
त्॥बहूनां ब्राह्मणानामलाभे एकेनापि कार्यं॥अन्नाभावे द्विजाभावे ती
र्थरूपे महालये॥एकस्मिन्नीपत्ते चान्नम घ्योन्पिंडान्पृथक्पृथक् इति वच
नात्॥एकस्याप्यलाभे देवलः॥पात्रालाभे खिलं कृत्वा पितृयज्ञविधिं न
रः॥निधाय वा दर्भवटून्आसनेषु समाहितः॥प्रैषानुप्रैषसंयुक्तं विधा
नं प्रतिपादयेत्॥सर्वाभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वा॥नैव श्राद्धस्य
लोपोस्ति पैतृकस्य विशेषतः॥श्राद्धं संपन्नमित्याद्याः प्रैषानुप्रैषाः॥ता
न्स्वयमेव वदेदित्यर्थः॥आमहेमपक्षयोः कालांतरे ब्राह्मणायदानं॥
सर्वश्राद्धाशक्तौ देवलः॥पिंडमात्रं प्रदातव्यं अभावे द्रव्यविप्रयोः॥श्रा
द्धाहनि तु संप्राप्ते भवेन्निरशनोपि वा॥देवीपुराणे॥सक्तुभिः पिंडदानं च
संयावैः पायसेन वा॥कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा॥गुडेन
वेति वा पाठः॥संयावो गोधूमविकारः॥पिण्याकस्तिलकल्कः॥इंगुदं ता
पसतरुफलं॥अंगिराः॥कपित्थबिल्वमात्रान्वा पिंडदाने प्यशक्तौ तर्पण

मवश्यं कर्त्तव्यं॥ तिलैः सप्ताष्टभिर्वापि समवेतं जलांजलिं॥ भक्तिनम्रः
समुद्दिश्य भुव्यस्माकं प्रदास्यति॥ यतः कुतश्चित्संप्राप्य गोभ्यो वापि
गवाह्निकमित्यपि शब्दप्रयुक्तं पितृवचनात्॥ स्मृत्यंतरे॥ तृणानि वा
गवे दद्यात्पिंडान्वा विधिपूर्वकं॥ तिलोदकैः पितॄन्वापि तर्पयेत्स्नानपूर्व
कं॥ अग्निना वा दहेत्कक्षं श्राद्धकाले समागते॥ तस्मिंश्चोपवसेद्द्विज
पेह्या श्राद्धसंहितामिति॥ अथ श्राद्धे ऊहविचारः॥ तत्र मातामहानाम
प्येवं तंत्रं वा वैश्वदेविकमिति वचनात्पितृपार्वणातिदेशो मातामहपा
र्वणे प्राप्ते पूर्वप्रयुक्तत्वान्मंत्राणामूहः प्राप्नोति। आतिदेशिकस्य मंत्र
संस्कारान्यतरस्यान्यथाभाव ऊहः। सामस्तः प्रयोजनाभावादनुद्देशः
। तत्र च पितॄनहविषे अत्तवे॥ आयंतु नः पितर इत्यादि मंत्रगत पितृश
ब्दस्य प्रकृतिवन्मातामहश्राद्धेपि समवेतार्थत्वादर्थांतराभावान्नोहः
। तथाहि द्विधा हि पितृशब्दः प्रयुज्यते॥ क्वचिज्जनकत्वोपाधिना। पिता
यस्य तु वृत्तः स्यादित्यादिषु॥ क्वचित्सपिंडीकरणांतश्राद्धजन्यपितृ
त्वोपाधिना यथा प्रेते पितृत्वमापन्ने सपिंडीकरणादिति। ततः प्रभृति वै
प्रेतः पितृसामान्यमश्नुत इत्यादिषु॥ अत एव सर्वत्र पितृशब्दस्य सपि
डीशब्दः प्रयुज्यते। षड्भ्यः पितृभ्यस्तदनु भक्त्या श्राद्धमुपक्रमेत्। पि
तृपात्रेषु प्रेतपात्रं प्रसेचयेदित्यादिषु॥ एवं च पूर्वोक्ते मंत्रजाते पितृश
ब्दस्य सपिंडीकरणांतश्राद्धजन्यपितृत्वपरत्वात्तस्य च मातामहादि
ष्वपि सद्भावान्नोहः॥ तथा पूर्वमतिवाए तद्वचोक्षरं यदेन दूहति तस्मा
द्वचं नोहेदिति प्रतिषेधादपि नोहः। तथाक्षमूपेष्वपि मंत्रेषु सन्नहः पितरो
वासो। मीमदंत पितर इत्यादिष्वपि पूर्वोक्तन्यायान्नोहः। प्रतिषेधस्तु र
भ्युच्चयमात्रमत्र॥ तस्यासाधारणविषयस्तु व्रीहीणां मेध सुमनस्य
मान इत्यादि रवगंतव्यः। यत्तु विष्णुवाक्यं। मातामहानामप्येवं श्राद्धं
कुर्याद्विचक्षणः। मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति तदपि न
पूर्वोक्तेषु मंत्रेषु ऊहं विदधाति॥ यथान्यायमित्यनेन न्यायप्राप्तानुवा
दप्रतीतेः। अतो यत्र शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपिताम
हा इत्यादिषु पितामहप्रपितामहोपादानेन पितृशब्दस्य जनकपरत्वा
न्मातामहादिमातृवर्गादिषु शुंधंतं मातामहाः शुंधंतां मातर इत्यादि

ह्येणप्राप्तोहस्यानुवादः।नचप्रकृतावेकस्मिन्पितरिबहुवचनस्या
समवेतत्वाद्विकृतावेकवचनांतएवप्रयोज्यइतिवाच्यम्।प्रकृतौब
हुवचनस्यासमवेतार्थत्वेविकृतावप्यविकृतस्यैवप्रयोगइतिनवमे
षष्ठाधिकरणेस्थितत्वात्।।एवंचशुंधंतांमातामहाःशुंधंतांमातर
इत्याद्येवोह्यं।येषांचपितृभ्यःस्वधोच्यतांपितामहेभ्यःस्वधोच्यतां
प्रपितामहेभ्यःस्वधोच्यतामितिशुंधनमंत्रास्तेषामपिपूर्वोक्तन्याये
वोहः।नन्वस्त्येवमत्र।।एतद्वःपितरइत्यादिमंत्रेषुपितृशब्दगतबहु
वचनेनपितृशब्दोजनकपरोपिलिंगसमवायात्त्रिपितृसमुदाये
वर्तते।।तादृशस्यचविकृतौमातामहादिश्राद्धेऽसमर्थत्वात्प्रकृतिव
देवमातामहामातामहेषुमातामहाइत्यूहोक्तेऽमंत्रेषुवाक्यान्निषे
धोनूह्यमंत्रेषुकथं नप्राप्नोतीतिचेत्।।उच्यते।।पितृशब्दस्तावदु
भयोर्वाचकइत्युक्तं।।तत्रजनकपरत्वेंगीक्रियमाणेगौणीप्रसक्तेरि
तरपरमेवगृह्यते।।एवंचबहुवचनमप्युपपन्नंभवति।।एवंचप्रकृ
तौयादृशःशास्त्रार्थस्तादृशएवविकृताविनिनोहप्रसंगः।।अत्रपि
तामहचरणाः।।पितरेतत्तेर्घ्यमित्यादिषूहानूहविचारानवकाशः।
एतस्याभिलापमात्रत्वेनमंत्रत्वाभावात्।।अन्यथाशेषाणांमंत्रव
र्जितमित्युक्त्याशूद्रादीनांतथाभिलापाप्रसक्तेः।।अतोऽपौरुषेयवै
दिकप्रसिद्धेमंत्रशब्दोमुख्योन्यत्रगौणः।।अतएवभावार्थपादेऊ
हप्रवरनाम्नाममंत्रत्वमित्याहभगवान्सूत्रकारः।।तेषांलोकेःप्रयु
ज्यमानत्वादित्याहुः।।एकोद्दिष्टेपिशेषंपूर्ववदाचरेदितिपार्वणाति
देशात्पितृनिमांल्लोकानित्यादिष्वस्तुप्राप्तऊहोवचनाद्बाधितस्तथा
शुंधंतांपितरइत्यादिषुन्यायादेवबाधितऊहएकवन्मंत्रानूहेत्तैको
द्दिष्टइतिविष्णुवाक्येनप्रतिप्रसूयते।।अस्यार्थः।।एकोद्दिष्टश्राद्धेस
याहादौक्रियमाणेमंत्रानेकवत्।यथाभवतितथाऊहेतेतिक्रियावि
शेषणं।।एतद्वःपितरइत्यादिषुतुन्यायादेवप्राप्तऊहोनवाक्येनवि
धीयते।।इदंचपुराणश्रैतैकोद्दिष्टसाधारणंश्रैतैकोद्दिष्टेतुआश्वला
यनगृह्यपरिशिष्टेपितृपदनिवृत्तिरेवोक्ता।वैष्णवेतुएकवचनविधानं
।।एवंचएतद्वःपितरइत्यादौएततेप्रेतइत्यूहः।यत्तुकेश्चिदुक्तं।।पुरा

ष्ठेकोद्दिष्टंपार्वणवद्देवप्रेतैकोद्दिष्टेतुविष्णुवाक्येनप्रेतशब्दैकवचन
योरूहोविधीयते॥तत्रसपिंडीकरणाभावेनपितृत्वानुत्पत्तेः।अतए
वाश्वलायनेनपितृपदनिवृत्तिरुक्तेति॥तन्न।अस्यवाक्यस्यप्रेतैको
द्दिष्टविषयत्वेप्रमाणाभावात्।प्रेतशब्दोहाप्रतीतेः।उभयविधानेवा
क्यभेदात्।पुराणैकोद्दिष्टवचनस्यसार्थक्याच्च॥तस्मादस्मदुक्त
एवार्थोन्याय्यः॥एवंमुख्यदृष्टार्थतास्वार्थसमवेतार्थतादिभिर्मंत्रा
णामूहनिर्णयः॥शेषाणांमंत्रवर्जितमितिपूर्वोक्तविष्णुवचनशेषः।
एवंपितृव्याद्येकोद्दिष्टेऊहयोग्यपितृपदयुक्तमंत्रपर्युदासार्थइति
शूलपाणिः॥पितृव्याद्येकोद्दिष्टएवावाहनादिमंत्राणांपर्युदासा
र्थइतिकल्पतरौ॥उभयमप्येतत्प्रमाणशून्यं॥योगस्त्रीणांशूद्रा
पुत्रस्यचैकोद्दिष्टेमंत्रपर्युदासार्थमितिपितामहचरणाः॥स्त्रीणा
ममंत्रकंश्राद्धंतथाशूद्रासुतस्यच॥शाण्डिल्याश्वलादेशान्तेचकु
र्युःसदैवतदितिमरीचिस्मरणात्।स्त्रीणांसुतस्यचेतिसंप्रदानेष
ष्ठी।द्विजाउपनयनात्प्राकृतेचस्त्रीशूद्रासुताअमंत्रकंकुर्युरित्य
र्थः।अत्रस्त्रीणामित्यकृतविवाहस्त्रीपरमितिहेमाद्रिः।अमंत्रक
मितिवैदिकमंत्रनिषेधोनतुपौराणानामितिदिक्॥इत्यूहविचारः।
अथैकोद्दिष्टं॥तत्स्वरूपमाहयाज्ञवल्क्यः।एकोद्दिष्टंदैवहीनमेका
र्घैकपवित्रकं॥आवाहनाग्नौकरणरहितंह्यपसव्यवत्॥उपतिष्ठ
तामित्यक्षय्यस्थानेविप्रविसर्जने॥अभिरम्यतामितिवदेद्ब्रूयुस्ते
भिरताःस्महेतिकात्यायनः॥स्वदितमितितृप्तिप्रश्नःसुस्वदितमि
त्यनुज्ञेति॥आश्वलायनसूत्रानुसारिणांतुएकोद्दिष्टेप्यग्नौकरणा
दयोधर्माःपार्वणवत्भवंति॥तत्सूत्रेअथातःपार्वणेश्राद्धेकाम्य
आभ्युदयिकएकोद्दिष्टेवेतिचत्वारिश्राद्धानिप्रक्रम्याग्नौकरणादिध
र्माणांसमानविधानतयोक्तत्वात्॥अतएवगृह्यकारिकायां॥आ
न्वष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणं॥काम्यमभ्युदयेष्टम्यामेको
द्दिष्टमथाष्टमं॥चतुर्ष्वाद्येषुसाग्नीनांवन्हौहोमोविधीयते॥पित्र्यब्राह्म
णहस्तेस्यादुत्तरेषुचतुर्ष्वपीतिएकोद्दिष्टेपाणिहोमउक्तःसंगच्छते॥
सपिंडीकरणान्तर्गतेएकोद्दिष्टेपाणिहोमोन्यत्रहोमएवनभवतीति

केचित्॥ तच्च त्रिविधं॥ नवं नवमिश्रं पुराणं चेति। तत्र नवमाहांगिराः॥ प्रथमेह्नि द्वितीयेह्नि पंचमे सप्तमे तथा॥ नवमैकादशे चैव तन्नवश्राद्धमुच्यत इति। वसिष्ठः॥ सप्तमेह्नि तृतीयेह्नि द्वितीये प्रथमे तथा॥ एकादशे पंचमे स्युर्नवश्राद्धानि षट् सदेति॥ षण्णां नवश्राद्धानामनंतरं कर्तव्यं मासिकं नवमिश्रं तदाहाश्वलायनः॥ नवमिश्रं षडुत्तरमिति॥ प्रत्याब्दिकादि पुराणं॥ चांद्रायणं नवश्राद्धे प्राजापत्यं तु मासिके॥ एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयत इति हारीतेन मासिकोत्तरभाव्याब्दिकादेः पुराणपदेन व्यवहृतत्वात् एवं पार्वणमेकोद्दिष्टं चोक्तं॥ संप्रत्युभयरूपं सपिंडनमुच्यते॥ लौगाक्षिः॥ श्राद्धानि षोडशापाद्य विदधीत सपिंडनमिति॥ षोडशश्राद्धान्याह जातूकर्ण्यः॥ द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा॥ त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडशेति॥ आद्यं ऊनमासिकं॥ एवं च षाण्मासिकाब्दिकशब्दावपि ऊनषाण्मासिकोनाब्दिकपरौ॥ द्वादशमासिकाभ्यां भिन्नतयोक्तत्वात्॥ तेषां तु कालमाह याज्ञवल्क्यः॥ मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरं॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेहनीति सत्याषाढः शौचे क्षत्रियादिरेकादशेह्नि श्राद्धं कार्यं। आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि॥ कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव स इति शंखस्मृतेः॥ एकादशेह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं॥ सूतकं तु पृथक् पृथगिति पैठीनसिवचनादाशौचांते ततः पिंडदानं समाप्यते॥ ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरिति तन्न सर्वे॥ वर्णानां दशाहाशौचपरं पैठीनसिः॥ मासिकानि स्वकाले तु दिवसे द्वादशेपि चेति आद्यमासिकं मरणदिने प्राप्तमेकादशे न्युत्कृष्यते। एवं सांवत्सरिकमपि मासपक्षतिथिस्पृष्टे यो यस्य म्रियते हनि॥ प्रत्यब्दं तु तथाभूते क्षयाहं तस्य तं विदुरिति स्मृत्या मरणतिथौ प्राप्तमेकादशे न्युत्कृष्यते॥ संप्रति केषांचित् द्वितीयवर्षाद्यतिथौ क्रियमाणे प्रथमाब्दिकव्यवहारस्तु भ्रमात्॥ नवाब्दांते भवमाब्दिकमिति व्युत्पत्या व्यवहारोपपत्तिः मासपक्षतिथिस्पृष्ट इति वाक्यस्य प्रथमवर्षीयमृततिथौ प्रवृत्तो बाधकाभावात्॥ नवाब्दांते भवमाब्दिकमिति व्युत्पत्या

व्यवहारोपपत्तिः।मासिकेषुमासादौभवमासिकमित्याद्यद्वितीयादि
मासिकव्यवहारस्यसर्वैरपिप्रतिपत्त्यांगीकाराच्च॥एतेनपत्न्याधवा
दिभिर्द्वितीयाब्दाद्यदिनक्रियमाणस्याब्दिकत्वभ्रमान्मलमासेप्र
थमाब्दिकंकार्यमितिवाक्यानुसारेणमलमासेकर्तव्यत्वमुक्तंत
दप्यपास्तम्॥यत्तुप्रत्यब्दंद्वादशेमासिकार्यापिंडक्रियासुतैः।क्व
चित्त्रयोदशेपिस्यादाद्यंमुक्त्वातुवत्सरमितिवचः।द्वादशेमास्यती
तेप्रत्यब्दंपिंडक्रियाश्राद्धंकार्यं॥क्वचिन्मलमासवत्तिवर्षेत्वाद्यं
वत्सरमाद्याब्दिकंमुक्त्वात्रयोदशेमास्यतीतेकार्यं॥आद्याब्दिकंतुत्र
योदशमासमध्यएवकार्यमितियावदितिव्याख्यायान्यसाधकमुक्तं
।तदपिन।एतद्वचनेहिमलमासवत्तिवर्षेसतित्रयोदशेतीतेआब्दि
कंकार्यमित्येवविधीयते॥नान्यत्किंचित्॥अन्यत्तुमासपक्षवाक्ये
नप्राप्तं॥मलमासमृतस्याद्याब्दिकंतुसत्यपिमलमासेप्रथमदिन
एवकार्यं॥दाहादिसपिंडनांतकृत्यस्यमलमासेपिप्रतिप्रसूतत्वा
त्।यत्तुमिताक्षरायामाद्यमेकादशेहनीत्यत्राद्यपदेनैकोद्दिष्टांतर
प्रकृतिभूतमेकोद्दिष्टमुच्यतइति॥तत्रप्रमाणंचिंत्यं॥अतआद्याब्दि
कमाद्यमासिकंचैकादशेन्हिमहैकोद्दिष्टेनसहतंत्रेणकार्यं।द्वितीया
द्यदिनकार्यंतथाविहितंचशुद्धमासएवेतिदिक्॥द्वादशाहकर्तव्यै
कोद्दिष्टप्रक्रमे॥कौर्मे॥एकादशेन्हिकुर्वीतप्रेतमुद्दिश्ययावतः।द्वाद
शेवाथकर्तव्यमनिंद्येप्यथवाहनि॥तत्रक्रमएवबौधायनः।तदेकोद्दि
ष्टमेवस्याद्द्वादशेहनिवापुनः॥इदंपुत्रविषयं॥अथवोर्ध्वमपुत्रेषु
कुर्वीताहस्तुशक्तितः।अर्द्धमासेथवामासेऋतौसंवत्सरेपिवेपि।।ऊ
नमासिककालमाहश्लोकगौतमः॥एकद्वित्रिदिनैरूनेत्रिभागेनाधि
केनच॥श्राद्धान्यूनाब्दिकादीनिकुर्यादित्याहगौतमइति।एकद्वित्रि
दिनैस्त्रिभागेनवाषष्ठेद्वादशेचमास्यूनइत्यर्थः।केचित्तुएकदि
नन्यूनतापक्षमाश्रित्यषष्ठ्यादौमृतस्यपंचम्यादावूनमासिकाद्या
चरंति॥तद्भ्रममूलकं॥षष्ठ्यांमृतस्यपंचम्यांमासपक्षयोःसमाप्तिरेव
भवतितत्रैकदिनन्यूनतास्ति।ऊनमासिकेकालांतरमाहगालवः।मरणा
द्द्वादशाहेस्यादूनमास्यूनवोनमासिकमिति॥ऊनेषुकेचित्कालंनिषेध

धतिगार्ग्यः॥नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे॥ ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति॥पुराणे॥ सपिंडीकरणादर्वाक्कुर्याच्छ्राद्धानि षोडश॥एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ इति॥ षोडशश्राद्धेष्वाहिताग्नेर्विशेषमाह जातूकर्ण्यः॥ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत्॥अधस्तु कारयेच्छ्राद्धमाहिताग्नेर्द्विजन्मनः॥ निरग्निषोडशश्राद्धानि यद्वा सपिंडनार्थं ततः॥ आकृष्याथ मुत्तरं वैकदिने पकृष्यंते॥ मासिकं चोदकुंभं च यद्यदंतरितं भवेत्॥ तत्तदुत्तरसातंत्र्यादनुष्ठेयं प्रचक्षते इति वाक्यात्पूर्वमुत्तरेण सहोत्कृष्य नैवात्र दार्शिकादिपितृमातामहादिपार्वणादिवत्सर्वेषामाराद्‌पकारकाणां संभवतां पाकादिसन्निपातिनां च तंत्रं निर्विवादं॥ देशकालकर्तृैः क्यात्॥ द्वंद्वपक्षे तु सान्नाय्यप्राजापत्येष्विव संप्रतिपन्नदेवतावत्प्रधानरूपविप्रभोजनपिंडदानानामपि तंत्रतेत्यन्ये। भ्रातृचरणास्तु॥ संख्यान्यशब्दांतरादिना सप्तदशप्राजापत्यानित्यादिद्रव्यसमानाधिकरणसंख्ययान्यावगतभेदानां कर्मणां देशकालाद्यैक्ये यद्यपि तंत्रतास्ति तथापि कर्मसमानाधिकरणसंख्यावगतभेदानां न शास्त्रेक्लृप्तिर्यानंगीकारादित्याहुः॥ अयं च तदाशयः॥ औत्पत्तिककर्मसमानाधिकरणसंख्याश्रुतौ पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्यादिति सूत्रानुसारात्। पृथक्त्वगुणविशिष्टान्यस्मिन्पृथक्त्वाति संख्यामात्रविशिष्टान्येव वा कर्माणि विहितानि॥तंत्रतायां तु तद्बाधः स्यात्। अभ्यासादिभिस्तु वैलक्षण्यमात्रावगतेस्तंत्रत्वे न कस्यचिद्बाधः॥सप्तदशप्राजापत्यान्पशूनित्यादि द्रव्यसमानाधिकरणसंख्यावगतभेदेषु तु कर्मसु पृथक्त्वस्य संख्यायावा अश्रुतत्वान्न तद्बाधः॥श्रुतापश्वादिद्रव्यगता सप्तदशादिसंख्या तु यागतंत्रत्वेपि नैव बाध्यते॥ अथ वृषोत्सर्गः॥ तत्कालः षड्शीत्यां मृते॥एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः॥पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥कार्त्तिक्यामथवामाघ्यामयने वा युधिष्ठिर। चैत्र्यां वा पितृतीयायां वैशाख्यां तु दृष्टोऽन्हि वा॥विष्णुधर्मोत्तरेपि। अश्वयुक्शुक्लपक्षस्य पंचदश्यां नराधिप। कार्त्तिक्यामथवा मासि वृषोत्सर्गं तु कारयेत्। कारयेदिति णिज विवक्षा। ग्रहणे तु महामुख्येतथा चैवायनद्वये। वि

षुवह्निनयेचैवमृताहेबांधवस्यच॥उत्सृजेन्नीलकंठंवैकौमुद्याःसमु
पागमे॥नीलकंठोनीलवृषस्तल्लक्षणंवक्ष्यते॥कौमुदीआश्विनकार्त्ति
कयोःपूर्णिमा॥अकरणेनिंदामत्स्यपुराणे॥नकरोतिवृषोत्सर्गंतीर्थेवा
पिजलांजलिं॥नददातिसुतोयस्तुपितुरुच्चारएवसः॥पुरीषोत्सर्गतुल्य
इत्यर्थः॥नदेशःकालिकापुराणे॥अरण्येचतरेवापिगोष्ठेवामोचयेद्वृ
षं॥नगृहेमोचयेद्विद्वान्कामयन्पुष्कलंफलं॥ब्राह्मेपि॥सागुरुस्नवणेदे
शेमनोज्ञेनिर्जनेवने॥कार्यइतिशेषः॥वृषलक्षणंब्राह्मे॥वृषभःकृष्ण
सारस्तुप्रत्यक्षस्तुत्रिहायनः॥मनोज्ञोदर्शनीयश्चसर्वलक्षणसंयुतः॥
विष्णुरप्याह॥तत्रादावेववृषभंपरीक्षेतजीववत्सायाःपुत्रंसर्वलक्षणो
पेतंनीलंलोहितंवामुखपादेषुसर्वेशुक्लंपुच्छस्याच्छादकं॥नीललक्ष
णंरेवाखंडेब्रह्मांडपुराणे॥लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडु
रः॥श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते॥चरणाश्चमुखं
पुच्छंयस्यश्वेतानिगोपतेः॥लाक्षारससवर्णंचतंनीलमितिनिर्दि
शेत्॥वृषःसएवमोक्तव्योनसधार्योगृहेभवेत्॥एष्टव्याबहवःपु
त्रायद्येकोपिगयांव्रजेत्॥यजेतवाश्वमेधेननीलंवावृषमुत्सृजे
त्॥इदंत्वर्थवादमात्रं॥अथविधिर्भविष्योत्तरेकृष्णः॥सांडंनील
शंखपादंसर्पांडुंश्वेतपुच्छकं॥गोभिश्चतुर्भिःसहितमुत्सृजेत्तंवि
धिंशृणु॥मातरःस्थापयित्वाचपूजयेत्कुसुमाक्षतैः॥मातृश्राद्धं
ततःकुर्यात्सदाभ्युदयकारकं॥अकालमूलंकलशमश्वत्थदल
शोभितं॥तत्ररुद्रान्जपित्वातुस्थापयेद्रुद्रदैवतं॥रुद्रान्रुद्रा
ध्यायंजप्त्वारुद्रदैवतकलशंस्थापयेदित्यर्थः॥सुसमिद्धेततःकृत्वा
वन्हिंमंत्रपुरस्सरं॥आज्येनजुहुयात्षड्भिःपृथगाहुतिसंस्कृतैः॥पौ
ष्णमंत्रैस्ततःपश्चाद्धुत्वावन्हिंयथाविधि॥एकवर्णंद्विवर्णंवालोहि
तंश्वेतमेववा॥चतस्रोवत्सतर्यश्चताभिःसार्द्धमलंकृतं॥तासांकर्णे
जपेद्विप्रःपतिंवोबलिनंशुभं॥दशमिनेनसहिताःक्रीडध्वंहृष्टमा
नसाः॥ततोवामेत्रिशूलंचदक्षिणेशंखमालिखेत्॥अंकितंशंखचक्रा
भ्यांचर्चितंकुसुमादिना॥पुष्पमालावृतग्रीवंश्वेतछत्रेणच्छादितं॥कि
मुपेद्वृत्तिकाभिश्चचतस्रभिर्बलिनंवृषं॥देवालयेगोकुलेवानदीनां

सेगमेतत्थेति॥जपेविशेषोविष्णुधर्मोत्तरे॥रुद्रजपमुक्त्वा।तथैवपौ
रुषंसूक्तंकूष्मांडानितथैवचेति॥पौरुषंसहस्रशीर्षेतिषोडशर्चं॥
यद्देवादेवहेडनमितिकूष्मांडाः॥आदित्यपुराणे॥सावित्रींचजपेत्त
त्रतथैवचाघमर्षणमिति।पारस्करोपिविशेषमाह॥अथालंकृत्य
तान्सर्वान्रुद्रांध्यायंसमाहितः।श्रावयेत्पौरुषंसूक्तंतथाप्रतिर
थानिचेति॥अप्रतिरथान्याशुःशिशानइतिद्वादशऋचः।विष्णुध
र्मोत्तरेपि॥मंत्रंपितावत्सइतिव्रतीतंजपेत्पश्चाद्वृषभस्यकर्णे।
अपसव्येदक्षिणे॥पितावत्सेतिमंत्रोथर्ववेदे॥वत्सरीसंख्यायांवि
शेषआदित्यपुराणे॥अष्टौवाथचतस्रोवायथालाभमथापिवेति।
यथालाभंद्वेएकांवेति॥तथाचदेवीपुराणे॥चतस्रोवत्सिकाभद्रे
द्वेवासंभवतोपिवा।वत्सःसर्वांगसंपूर्णःकन्यकावत्सिकाभवेत्॥
एकेत्वर्थः।विवाहस्त्वेकवत्सर्यानीलेनभवनास्पदेति॥एकवत्सरी
एकवर्षा॥तथात्रैव॥त्रिहायनीभिर्धन्याभिःसुरूपाभिश्चशोभित
इति॥एवंयदैकावत्सतरीतत्राएकवर्षा॥यद्वाद्वैवर्षोषानस्त्रिहा
यन्यइतिविवेकः॥ताश्चगुर्विण्यः॥विसर्ज्यस्थाप्यगुर्विण्योदेयाश्चा
वोद्वृषस्यचेति सौरपुराणोक्तेः॥होमेविशेषंविष्णुराह॥गवांमध्ये
सुसमिद्धमग्निंपरिस्तीर्यपौष्णंचरुंश्रपयित्वापूषागाअन्वेतुनःइ
हरतिरितिचहुत्वावृषभमानीयायस्कारमावाहयेदिति।होमानंतर
कृत्यंसौरपुराणे॥ततोवृषंसमानीयअग्नेरुत्तरतःस्थितं॥सव्यस्फि
जिस्थेचक्रंशूलंबाहौतुदक्षिणे॥कुंकुमेनांकयित्वादौब्राह्मणः
सुसमाहितः॥स्फिजिवामकटिभागे॥तप्तेनधातुनापश्चादयस्का
रोंकयेद्वृषं कुंकुमेनांककरणंब्राह्मणस्यतप्तलोहेनायस्कारस्येतिभे
दः॥तदुत्तरकृत्यंविष्णुधर्मोत्तरे॥अंकितंस्थापयेत्सम्यक्स्थानेतस्य
तथापठेत्॥हिरण्यवर्णेतिचऋचश्चतस्रोमनुजेश्वर॥आपोहिष्ठेति
तिस्रश्चशन्नोदेवीरितिचश्रावयेदितिविष्णूक्तेः॥स्नानेजलमाह
पारस्करः।अकालमूलान्कलशानष्टौस्रग्दामवेष्टितान्।सरत्नांश्च
सवस्त्रांश्चचूतपल्लवशोभितान्॥स्थापयित्वाचतुर्भिस्तुसंस्नाप्यो
वृषभस्ततः॥चतुर्भिर्वत्सिकाःस्नाप्यास्ततःसर्वान्विभूषयेत्॥ऋचः

समुद्रज्येष्ठाद्याः कीर्त्तयेदभिषेचने इति॥ अनंतरकृत्यं विष्णुधर्मोत्त
रे॥ अलंकुर्यात्ततः पश्चाद्गंधमाल्यैश्च शक्तितः। किंकिणीभिश्चरम्या
भिस्तथा चीनांशुकैः शुभैः॥ आदित्यपुराणेपि॥ घंटां लोहकृतां दद्या
च्छृंगे च पटलं शुभं॥ पटलं सुवर्णादिनिर्मितः कोशः॥ शिवधर्मोत्तरे॥
रक्तपीतैश्च कुसुमैः कुंकुमाद्यैश्च वर्णकैः॥ यथाशोभं समालभ्य विभवैः
पूजयेद्वृषं॥ अष्टांगुलिप्रविस्तीर्णां हेमपट्टविनिर्मितां॥ राजतीं च मे
जोवापि मालामुरसि विन्यसेत्॥ तद्विधां पृष्ठमालां च पुच्छांतिकमुदं
चितां॥ घंटां कांस्यमयीं शुभ्रां गले बध्नीत सुस्वनां॥ खुरैः सौवर्णरौप्यै
श्च केयूरांगदभूषितं॥ पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलंकृतं॥ उत्सृ
जेदित्यर्थः॥ अतः श्राव्याणि जप्यानि च सूक्तानि। विष्णुधर्मोत्तरे। ततो
किते जपेन्मंत्रमिमं प्रयतमानसः। वृषो हि भगवान्धर्मश्चतुष्पादः प्रकी
र्तितः॥ वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः॥ इति प्रार्थ्य वृषेंद्रं तं गृ
हीतकुसुमांजलिः॥ त्रिः प्रदक्षिणमावृत्य नमस्कुर्याद्यथाविधि॥ प्र
त्यङ्मुखीनां तु गवामेतावान्विधिरिष्यते॥ अथैशान्याभिमुखतः
कुर्याद्गावो वृषं तथा॥ गावो वृषस्योभयतो वृषं मध्ये निवेश्य च। सर्वे
षां कंठवस्त्राणि श्लेषयेत्तु परस्परं॥ अयं हि वो मया दत्तः सर्वासां प
तिरुत्तमः॥ तुभ्यं चैता मया दत्ताः पत्न्यः सर्वा मनोरमाः। संयोज्येति वृ
षं गाभिः पितृभ्यस्तं निवेदयेत्॥ सव्येन पाणिना पुच्छं समालभ्य वृ
षस्य तु॥ दक्षिणेनाप आदाय सकुशाः सतिलास्ततः॥ ततो गोत्रं स
मुच्चार्य अमुकस्मा इति ब्रुवन्॥ वृष एष मया दत्तस्तं तारयतु सर्वदा
स हेमसलिलं भूमावित्युच्चार्य विनिक्षिपेत्॥ अत्रायं हि वो मया दत्त
इति मंत्रो बहुगोपक्षे समवेतः सन् एकद्विपक्षे ऊहनीय इति केचित्
॥ अन्ये तु बहुगोयुक्तप्रयोगस्यैकद्विगोयुक्तप्रयोगस्य प्रकृतिवि
कृतिभावाभावात् व्रीहीणां मेध इत्यस्येव यवप्रयोगे बहुमंत्रस्य
लोपमाहुः। युक्तं चैतत्॥ अमुकस्मा इत्यत्रैकोद्देशेन क्रियमाणे एक
स्य नामग्राह्यं बहुपित्रुद्देशेन तु क्रियमाणे बहूनां नामेति॥ अनंतर
कृत्यमाह विष्णुः। वृषं वत्सतरीयुक्तमैशान्यां कालयेद्दिशीति कालये
त्क्षणोदयेत्। तत्र मंत्रमाह स एव॥ एतं युवानं पतिं वो ददामि तेन क्रीडं

तीश्वरश्यप्रियेण॥माहास्महीत्यादिकात्यायनस्तुमाहास्महीस्यादेः
स्थानेमानःसाप्तजनुषासुभगारायस्पोषेणसमिषामदेमेतिपपाठ
ब्राह्मे॥अथवनेवृषोत्सर्गेवातावक्रोक्तिभिःपद्यैः।ब्राह्मणानाह
यत्किंचिद्येनोत्सृष्टंतुनिर्जने॥तत्कश्चिदन्योननयेद्धिभाज्यंनयथा
क्रममिति॥निर्जनेकेनविद्यात्किंचिदुत्सृष्टंतदन्येननेयंनचविभा
ज्यमिति॥ब्राह्मणान्प्रतिदातावदेदित्यर्थः।पारस्करः॥बहुतोयतृ
णेरण्येक्षेपणीयःसगोपतिः।वत्सतर्यश्चताःसर्वास्तेनैवसहकाल
येत्॥अथवागोकुलेक्षेप्याबहुगोधनसंकुले॥शिवधर्मोत्तरे॥निर्ग
तेगोपतौतत्रब्राह्मणान्स्वस्तिवाचयेत्॥दद्याच्चदक्षिणांतेषांब्रा
ह्मणान्भोजयेत्ततः।सहिरण्यंरुद्रकुंभंतथास्नानघटानपि॥होत्रे
भ्यश्चदद्यात्तत्सर्वंधेनुंचैवपयस्विनीं॥मुक्तवृषस्यधारणादिनिषेधति
पारस्करः॥विधारयेन्नतंकश्चिन्नचकश्चनवाहयेत्।नदोहयेच्चतां
धेनूंनैवकश्चनबंधयेत् इति॥ब्राह्मे॥नासौवाह्योनतत्क्षीरंपातव्यं
केनचित्क्वचित् इति॥वृषोत्सर्गफलमुक्तंदेवीपुराणे॥एवंकृत्वाप
वाप्नोतिफलंवाजिमखोदितं॥यमुद्दिश्यसृजेद्वत्संसलभेताविचारणा
दिति॥तत्रैव॥एवंवृषोत्सर्गविधिंनरोयःकुरुतेभक्त्यानिजपूर्वजा
नां॥उद्धृत्यतान्दुर्गतिपंकमग्नान्स्वयंसलोकंसमुपैतिशंभोः॥इति
वृषोत्सर्गविधिः॥अथसपिंडनं॥भारते॥सपिंडीकरणंकुर्याद्यजमान
स्त्वनग्निमान्॥अनाहिताग्नेःप्रेतस्यपूर्णेब्देभरतर्षभ॥द्वादशेहनि
षष्ठेवात्रिपक्षेवात्रिमासिवा॥एकादशेवापिमासेमंगलंस्यादुपस्थि
तं॥षष्ठस्त्यत्रव्यवहितमपिमासीत्यनुषज्यते।सन्निहितपक्षपरा
नुषंगेत्रिमासीत्यनेनपौनरुक्त्यापातात्॥हेमाद्रौतुत्रिमासंविहाय
षड्ढेवानाहिताग्नेःकालस्तत्रापिअब्दांतेभ्युदयागमेचेति द्वौमुख्या
वन्येनुकल्पाइत्युक्तं।पराशरः॥प्रेतोग्निमान्कर्त्तात्रिमासेचैवसपिंडनं।लघुहारीतः॥अन
ग्निस्तुपरावीरभवेत्कुपात्तदागृही॥प्रेतश्चेदग्निमांस्तुस्यात्त्रिपक्षेवै
सपिंडनमिति॥तादृशस्त्रिपक्षएवकुर्यान्नान्यत्रेतिनियमः।अत्रहेमा
द्रिणापूर्णेसंवत्सरेषण्मासेत्रिपक्षेवेतिगोभिलवाक्यपूर्णपदंषण्मा
सादिष्वप्यन्वेतीत्युक्तं।तदनुषंगेप्रमाणाभावात् उपेक्ष्यं।पूर्णेब्देइत्य

अतत्तरेऽन्हि॥ततःसपिंडीकरणंवत्सरपूर्णेतःस्थितमितिनागरखं
डोक्तेः॥पितुःसपिंडीकरणंवार्षिकेमृतवत्सरइत्युशनःस्मृतेश्च।
अन्वयंसाग्निकोनिरग्निकस्यद्वादशाहेकुर्यात्॥तथाचभविष्यपुरा
णे॥यजमानोग्निमान्राजन्प्रेतश्चानग्निमान्भवेत्॥द्वादशाहेत
दाकार्यंसपिंडीकरणंसुतैः॥कात्यायनः॥एकादशाहंनिर्वर्त्यपूर्वं
दर्शाद्यथाविधि॥प्रकुर्वीताग्निमान्विप्रोमातापित्रोःसपिंडनं॥हारी
तः॥यानुपूर्वममावास्यामृताहाद्दशमीभवेत्॥सपिंडीकरणंतस्यांकु
र्यादेवसुतोग्निमानिति॥दशमीरात्रिस्ततःपरायामावास्यातस्या
मित्यर्थः॥अतःसाग्निकर्तृकेसपिंडीकरणेद्वादशाहोदशाहात्परतो
यत्किंचिद्दिनंदशाहात्परतोमावास्याचेतित्रयःकालाइतिहेमाद्रौ॥
कालादर्शमाधवयोस्तुमृताहादूर्ध्वंदिनमारभ्यदशमीतिव्याख्या
नादेकादशाहामावास्येति॥द्वावेवकालाविति॥उभयोःसाग्नित्वेद्वा
दशाहएव॥साग्निकस्तुयदाकर्ताप्रेतश्चाप्यनग्निमान्भवेत्॥द्वादशे
ह्नितदाकार्यंसपिंडीकरणंपितुरितिविज्ञानेश्वरमाधवाभ्यांस्मरणादि
त्युदाहृतत्वात्॥हेमाद्रिणात्विदंनालेखि॥अत्रचसाग्न्यनग्निपदा
भ्यांहिताग्न्य   नाहिताग्निपराणि॥प्रेतश्चेदाहिताग्निःस्यात्कर्तान
ग्निर्यदाभवेत्॥इतिसोमंतवात्॥एवंचौपासनाग्निमतोननियमेनद्वा
दशाहेकिंतुयस्मिन्कस्मिंश्चित्कालेइति॥तदापिहिपितृयज्ञोलुप्यते
दशाहमध्यवर्तिवत्॥तथापितद्व्यतिरिक्तस्यानग्नेःसपिंडीकरणेसा
ग्नेःकर्तुर्नद्वादशाहनियमः॥यायेपितृयज्ञपातएवमपुत्राहिताग्नेर्य
दापत्नीकुर्वीततदापिनायंनियमः॥एवमाधानेसहाधिकृतायाःपत्न्याः
पतिःकरोतितदापिनत्रिपक्षनियमः॥सर्वेषुवाक्येषुकस्मिंश्चित्तुःकचि
त्तुकैःकचित्त्रिरितिश्रवणात्॥अतोनतत्रनियमः॥अंत्येष्टिपद्धतौ
व्यासः॥आनंत्यात्कुलधर्माणांपुंसांचैवायुषःक्षयात्॥अस्थितेश्च
शरीरस्यद्वादशाहःप्रशस्यतेइति॥इदंवचनंकर्तृप्रेतयोरुभयोरनग्नि
त्वेसाग्नित्वे।कर्तृमात्रस्यवासाग्नित्वेद्वादशाहस्यपूर्वोक्तवचनैःप्राप्त
त्वात्प्राशस्त्यंबोधयति॥प्रेतमात्रस्यसाग्नित्वेतुत्रिपक्षएवनियतः
पूर्वोक्तवचनात्॥प्राप्तोनतत्रद्वादशाहप्राशस्त्यं॥एतेचकालास्त्रैव

र्णिकान्प्रति॥शूद्रस्यतुद्वादशाहएव॥तथाचसपिंडनमधिकृत्यवि
ष्णुः॥मंत्रवर्जंतुशूद्राणांद्वादशेहनिकीर्तितमिति॥अब्दांतात्पूर्वंमे
वसपिंडनेक्रियमाणेषोडशश्राद्धान्यपकृष्टव्यानि॥तथाचवृद्धव
सिष्ठः॥श्राद्धानिषोडशाकृत्वानतुकुर्यात्सपिंडनमिति॥सपिंडीक
रणोत्तरंचस्वकालेनान्यावर्त्तयानि।यस्यसंवत्सरादर्वाग्विहितातु
सपिंडता।विधिवत्तानिकुर्वीतपुनःश्राद्धानिषोडशेतिगोभिलोक्तेः।
तानितुवार्षिकवत्कार्याणि॥सपिंडीकरणादर्वाक्कुर्याच्छ्राद्धानिषो
डश॥एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु॥सपिंडीकरणादू
र्ध्वंयदाकुर्यात्तदापुनः॥प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपि॥
पैठीनसिस्मृतेः॥सपिंडीकरणप्राग्भाविनांतुनावृत्तिः॥अर्वागब्दा
द्यत्रयत्रसपिंडीकरणंकृतं॥तदूर्ध्वंमासिकानिस्युर्यथाकालमनु
ष्ठितिरितिकार्ष्णाजिनिस्मृतेः॥सपिंडीकरणोत्तरंकर्त्तव्यान्येवचा
तुर्मासिकसंज्ञानितान्यपिवृद्धिप्राप्तावपकृष्टव्यानि॥तथाचमाध
वीयेशाट्यायनिः॥सपिंडीकरणादर्वागपकृष्यकृतान्यपि॥पुन
रप्युपकृष्यंतेवृद्ध्युत्तरनिषेधनादिति।निषेधस्तुनिर्वर्त्त्येवृद्धिस्तत्र
तुर्मासिकानिनतंत्रयेदिति॥अयातयामंमरणंनभवेत्परस्परमिति
कात्यायनेनोक्तेः॥यत्तुमिताक्षरायां॥अब्दांतःसपिंडनेषोडशश्रा
द्धानिसपिंडनोत्तरंकार्याणीतिमुख्यःपक्षःप्रागितितुगौणइत्युक्तंत
न्न॥पूर्वोक्तवृद्धवसिष्ठशाट्यायन्यादिवचोविरोधात्॥वर्षांतरदिने
ष्वपकृतेसपिंडनेगौणकालादर्शेऋष्यशृंगः॥सपिंडीकरणश्राद्ध
मुक्तकालेनचेत्कृतं॥रौद्रेहस्तेचरोहिण्यांरौद्रभेवासमाचरेदितिरौ
द्रमार्द्रामित्रमनुराधा॥सपिंडीकरणप्रकारमाहयाज्ञवल्क्यः॥गंधो
दकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयं।अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्र
सेचयेत्॥येसमानाइतिद्वाभ्यांशेषंपूर्ववदाचरेदिति॥प्रेतपात्रोद
कंसावशेषंत्रिष्वपिपितृपात्रेष्वासिच्यप्रेतार्घ्यपात्रोदकावशिष्टेन
प्रेतस्थानविप्रहस्तेर्घ्योदेयइतिपितामहचरणाः॥कात्यायनोपि॥त
तःसंवत्सरेपूर्णेचत्वारिपात्राणिसतिलगंधोदकैःपूरयित्वात्रीणिपि
तृणामेकंप्रेतस्यप्रेतपात्रंपितृपात्रेष्वासिंचतियेसमानाइतिद्वाभ्यांए

तेनपिंडोव्याख्यातइति॥चतुर्विंशतिमतेच॥चत्वारीहार्घपात्राणि
अर्चयेत्पूर्ववच्छिशुः॥प्रेतपात्रंपितृणांतुपात्रेषुनिर्वपेद्बुधः॥मधुवा
ताऋतंजलत्वासंगच्छध्वमितिब्रुवन्॥येसमानाइतिद्वाभ्यांकेचिदि
च्छंतिसूरयः॥एवंपिंडेषुकर्त्तव्यंचरमंतुविसर्जयेदिति॥व्युत्क्रममृत
स्यगोब्राह्मणादिहतस्यचसपिंडनंनास्ति॥व्युत्क्रमाच्चप्रमीतानांनै
वकार्यासपिंडतेतिमिताक्षरोदाहृतस्मृतेः॥व्युत्क्रममृतपुत्रेणादर्शा
दौपितामहादीनामेवपार्वणंकार्यं॥ब्राह्मणादिहतेतातेपतितेसंगव
र्जिते॥व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददात्यसावितिकात्यायनोक्तेःय
तुमनुः॥पितायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः॥पितुःसनाम
संकीर्त्यकीर्तयेत्प्रपितामहमिति॥तन्न॥पितृप्रपितामहवृद्धप्रपिता
महोद्देश्यकपार्वणविध्यर्थंकिंतुपितुःपितामहप्रपितामहवृद्धप्रपि
तामहेभ्यइतिप्रयोगनियमार्थं॥पितुर्नामगृहीत्वातत्संबंधित्वेनस्व
प्रपितामहाद्याउद्देश्याइत्यर्थः॥एतादृशपार्वणेनचसहपितुरेको
द्दिष्टमपिकार्यं॥यस्यपिताप्रेतःस्यात्सपित्रेपिंडंनिधायपितामहा
त्पराभ्यांदद्यादितिविष्णूक्तेरितिमिताक्षरायां॥एताभ्यामेवमनुवि
ष्णुवचोभ्यांव्युत्क्रममृतादीनामपिसपिंडनंभवतीतिस्मृतिचंद्रिका
दिषु॥पितुर्नामसंकीर्त्यपितरंदैवतात्वेनोद्दिश्यप्रपितामहंतदादिकां
स्त्रीनुद्दिशेदितितन्मतेमानवस्यार्थः॥पित्रेपिंडंनिधायप्रपितामहा
त्पराभ्यामितितृतीयस्याप्युपलक्षणमितिवैष्णवस्यार्थः॥स्मृत्यर्थसा
रेतुएतद्द्वयमप्युक्तं॥विभक्तैरप्येतन्नपृथक्कार्यंकिंतुज्येष्ठेनैव॥नवश्रा
द्धंसपिंडत्वंश्राद्धान्यपिचषोडश॥एकेनैवतुकार्याणिसंविभक्तधने
ष्वपीतिस्मृतेः॥ज्येष्ठप्रवसतितुतद्भिन्नेनयेनकेनापिदशाहांतंअव
श्यंकार्यं॥कनिष्ठपुत्रपौत्रप्रपौत्रदौहित्रादिभिस्त्वेकादशाहिकमपि
कार्यं॥यत्त्वंत्येष्टिपद्धतौ॥कनीयसाकृतंकर्मसपिंडीकरणंपुनः॥तज्ज्या
यसापिकर्त्तव्यंप्रेतशब्दंविहायतदिति॥प्रेतेपितृत्वमापन्नेसपिंडी
करणादनु॥आहिताग्नेःसिनीवाल्यांपितृयज्ञःप्रवर्ततइतिमनुवच
साग्निककनीयांसप्रतिपिंडपिंडपितृयज्ञानुरोधेनसपिंडनापकर्षवि
धानात्तंप्रतिबोध्यं॥इदंहिवचःपितृयज्ञस्यप्रमाणांतराप्राप्तसपिंड

नप्रयोजकत्वबोधनैवार्थवत्॥ नप्रकारांतरेण॥ अन्यस्यैतद्वाक्यो
पात्त स्यार्थस्य प्रमाणांतरैःप्राप्तत्वादितिकेचित्॥ तन्न॥ सत्यमेवम
र्थवदेतद्वाक्यं परंतुकृताधिकारं ज्येष्ठं प्रत्येवचरितार्थं नाकृतं कनी
यसोधिकारमपिकल्पयतिगौरवात्॥ अतोभ्राता वा भ्रातृपुत्रोवा
सपिंडः शिष्य एव च॥ सह पिंडक्रियां कृत्वा कुर्यादभ्युदयं ततः इति पू
र्वलिखितवाक्येन भ्रातृपुत्रादिपदैः स्वेमनर्वादिभिनोत्तीत्यादिवल्लक्ष
णयाभ्युदयिककर्तृमात्रस्य सपिंडनाधिकारबोधेन कनीयसोपिप्रा
प्तेस्तद्विषयं कनीयस इति वाक्यं तद्विकामस्य कनीयसोपि स्मृत्यर्थसा
रे पृथगधिकारबोधनात्तद्विषयं वा॥ परंतु कनीयसेत्यादिवाक्यम
लं मृग्यं॥ नगिरा गिरेति ब्रूयादैरं कृत्वा ह्येयमिति वदतां नामैकोद्दिष्ट
स्थाने पार्वणमाहोशना। एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा॥ अ
हन्येकादशे प्राप्ते पार्वणं तु विधीयते॥ इति ब्राह्मदैवार्षप्राजापत्या
न्यतमविवाहोढायास्तु सपिंडनं तच्छ्वश्र्वादिभिः सह आसुरगांधर्व
राक्षसपैशाचान्यतमोढायास्तु मातामहादिभिः सहेति मिताक्ष
रादिषु स्पष्टं॥ सहगमने तु विवाहभेदमनंगीकृत्य भर्त्रा सह कार्यं
भर्त्रा चैकेन कर्तव्यं सपिंडीकरणं पुनः॥ सा मृतापि हि तेनैक्यं गता
मंत्राहुतिव्रतैरिति स्मृतेः॥ तत्र सहगमनमित्र प्रकारेण प्रकारेण म
रणेपुरूरवार्द्रवदेवसंयोजनादि॥ सहगमने तु विश्वेदेवस्थाने एकवि
प्रं द्वौ वोपवेश्य भर्तुः स्थान एकं तत्स्थाने परं पितामहादीनां
चत्रीनेकं वोपवेश्य द्वयोः प्रेतयोर्द्वयं पितामहादीनां च त्रयमिति पंचा
र्घ्यपात्राण्यासाद्य जलेनापूर्य पत्नीपात्रोदकं सशेषं भर्तृपात्र आ
सिच्य भर्तृपात्रोदकं च सशेषं पितामहादिपात्रेष्वासिच्य भर्तृपात्र
शेषेण भर्त्रे पत्नीपात्रशेषेण पत्न्यै पितामहादिपात्रोदकैश्च पिताम
हादिभ्योर्घ्यं दद्यात्॥ एवं भर्त्रे तत्पत्न्यै पितामहादिभ्यश्चेति पंच
पिंडान्दत्वा पत्नीपिंडं संपूर्णं भर्तृपिंडेन संपूर्णेन संपूर्णेन संयोज्य सं
योजितं च संपूर्णं च त्रेधा विभज्य शकलत्रयं पितामहादिपिंडेषु यो
जयेत्॥ न च पितृभावापन्ने नैव सपिंडनं न प्रेतेनेति नियमः मानाभा
वात् इति संक्षेपः। यदि मृतस्य भिन्नमातृका अनेके पुत्राः स्युस्तदा सर्वे

ज्येष्ठ एव पितुरौर्ध्वदेहिकं कुर्यात्॥अन्वारूढायास्तु कनीयानपि सा
क्षात्पुत्र एव स सर्वं पृथक्कुर्यात्॥न सपत्नीपुत्रो ज्येष्ठ एव॥तस्मिंस्तु नि
रूपितपुत्रत्वाभावात्। दाहस्त्वेकस्यामेव चितौ सपिंडनं तु ज्येष्ठेन
पितुरेव केवलं पितामहादिभिः। कनिष्ठेन तु मातुः पितृसपिंडनदि
न एव दिनांतरे वा कार्यं॥अत्र एकदिनसपिंडनपक्षे दिनांतरपक्षे वा
पितृसपिंडनोत्तरमेव संभवति पितृभावापन्नेन संयोजने प्रेत
संयोजनायोगादिति केचित्॥तत्रापि मातुः पितुश्चैकोद्दिष्टद्वयमे
व॥मातुरेकोद्दिष्टं पित्रादौ नापार्वणमिति तु सांप्रदायिकाः। अयं स
र्वोपि सपिंडनविधिरमंत्रकः शूद्राणामपि भवति॥इति सपिंडनं॥
अथाभ्युदयिकश्राद्धं॥मार्कंडेयपुराणे॥नैमित्तिकमथो वक्ष्ये श्राद्ध
मभ्युदयात्मकं॥पुत्रजन्मनि तत्कार्यं जातकर्मसमं नरैः॥नैमित्तिक
जातकर्मपदाभ्यां पुत्रजन्मनिमित्तकमेव श्राद्धं न तु जातकर्मांगमि
त्युच्यते॥अत एव कर्मप्रदीपे॥नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्ध
मिष्यते॥न सोष्यंतीजातकर्मप्रोषितागतकर्मसु।सुखप्रसवार्थं सो
ष्यंतीकर्म॥प्रोषितागते च पुत्रे पितुः कर्म छंदोगसूत्रे प्रसिद्धं॥यत्तु
हेमाद्रौ॥वृद्धिश्राद्धं तु कर्तव्यं जातकर्मादिकेषु वै इति॥तत्राप्यत
द्गुणसंविज्ञानो बहुव्रीहिः।अतः पुत्रजनने केवलं नैमित्तिकमेव श्रा
द्धं न जातकर्मांगं॥अन्येषु तु कर्मस्वंगं तथा च हेमाद्रौ जाबालिः।यज्ञो
द्वाहप्रतिष्ठासु मेखलाबंधमोक्षयोः॥पुत्रजन्मवृषोत्सर्गे वृद्धिश्रा
द्धं समाचरेदिति विष्णुपुराणे॥कन्यापुत्रविवाहेषु प्रवेशे नववेश्म
नः॥नामकर्मणि बालानां चूडाकर्मादिके तथा॥सीमन्तोन्नयने चै
व पुत्रादिमुखदर्शने॥नांदीमुखं पितृगणमर्चयेत्प्रयतो गृहीति।
तत्रैव कालादर्शे लौगाक्षिः॥नामान्नचौलगोदानसीमोपनयपुंस
वे॥स्नानाधानविवाहेषु नांदीश्राद्धं विधीयते।वृद्धगार्ग्यः॥अग्न्या
धानाभिषेकादि इष्टापूर्तस्त्रियाकृतौ॥वृद्धिश्राद्धं प्रकुर्वीत आश्रम
ग्रहणे तथा॥जातस्य जातकर्मादिक्रियाकांडमशेषतः।पुत्रस्य कु
र्वीत पिता श्राद्धं चाभ्युदयात्मकं॥जातकर्मादिक्रियाकांडमपत्यसं
स्कारः॥पुत्रस्येति पुंस्त्वमविवक्षितं॥न कर्मांगतामपि॥अतोनसं

ध्याचेद्वादावतिप्रसंगः॥पक्षद्वयेपिताष्टकासुतच्छ्राद्धमित्यादि
पूर्वोक्तकर्मप्रदीपवचो अनुवाद्यगतत्वात्। अतःकन्यायाअपिभव
ति॥तच्चसमंत्रकमेव॥मंत्रबाधेमानाभावात्॥यत्तुजातकर्मादिसं
स्कारानुक्त्वायाज्ञवल्क्यः॥तूष्णीमेताःक्रियाःस्त्रीणामितितत्प्र
धानांगमंत्रबाधार्थं॥यदिहिअवभृथेनचरंतीतिवत्तूष्णींयांतेनसांग
भावनामुक्त्वातस्यातूष्णीत्वंविधीयेततततःस्यादंगमंत्रबाधःइह
तुयस्त्राथर्वणंवैकाम्यइष्टयस्ताउपांशुकर्त्तव्याइत्यत्रेष्टीनामिव
क्रियाणांप्रथमांतपदोपात्तत्वात्प्रधानस्यैवतूष्णींत्वंविधिर्योगेपि
तेनकन्याजातकर्मादौवृद्धिश्राद्धंसमंत्रकमेवभवतीतिदिक्॥यत्तु
शातातपः॥नानिष्ट्वातुपितॄन्श्राद्धेकर्मवैदिकमारभेदितितद्यत्र
प्रातिस्विकवाक्यैर्नांदीश्राद्धमुक्तंतत्रैवोपसंह्रियते॥अथवावा
क्यांतरप्राप्तकर्मांगत्वस्यतत्पूर्वकालतामात्रमेवबोधयतीत्यनुवा
दकमेव॥ननिषेधकंप्राप्त्यभावात्॥प्रधानावृत्त्यांप्राप्तायांनांदीश्रा
द्धावृत्तेरपवादःकर्मप्रदीपे॥असकृद्यानिकर्माणिक्रियेरन्कर्मका
रिणः॥प्रतिप्रयोगंनैताःस्युर्मातरःश्राद्धमेवच॥आधानहोमयोश्चै
ववैश्वदेवेतथैवच॥बलिकर्मणिदर्शेचपौर्णमासेतथैवच॥नवय
ज्ञेचयज्ञज्ञावदंत्येवंमनीषिणः॥एकमेवभवेच्छ्राद्धमेतेषुनपृथ
क्पृथगिति॥असकृत्पुनःपुनरित्यर्थः॥प्रतिदिनंप्रतिमासंप्रत्यब्दं
चेतियावत्॥नवयज्ञआग्रयणेष्टिः॥आधानइत्यादिश्लोकद्वयं
पूर्वोक्तकर्मणामेवविवरणार्थंनपृथक्वाक्यं॥अतोज्योतिष्टोमा
दिषुप्रतियोगंभवत्येववृद्धिश्राद्धं।होमादिनवयज्ञपर्यंतेषुनपृथ
क्श्राद्धंकिंत्वाधानादौकृतमेकमेवश्राद्धमुपकरोतीतिनारायणः
॥यदातुनामकर्मान्नप्राशनचौलोपनयनकर्माण्येकस्यशिशोरेक
कालेक्रियंतेतदावृद्धिश्राद्धंतंत्रेणैवकार्यं॥तथाचतत्रैव॥गणशः
क्रियमाणेषुमातृभ्यःपूजनंसकृत्॥सकृदेवभवेच्छ्राद्धमादौनपृ
थगादिषु॥यत्रयत्रभवेच्छ्राद्धंतत्रतत्रचमातरः॥पूज्याइतिशेषः॥
अनेकेषांपुंरूपाणांस्त्रीरूपाणांवापत्यानांसजातीयविजातीयाने
कोपनयनोद्वाहादिसंस्कारेदेशकालैक्याद्वृद्धिश्राद्धंतंत्रेणेति

कश्चित्तन्तुच्छं।यथायोगसिद्ध्यधिकरणेसर्वफलार्थेतयावृद्धस्यापि
ज्योतिष्टोमादिरेकःस्यान्नप्रयोगादेकमेवफलंनानेकानि।।एकप्रासा
मग्र्याएकमेवकार्यंजन्यतइतिनियमादित्युक्तं।।तथेहाप्युपनयन
विवाहादिजन्यपरमापूर्वाणामनेकतत्संस्कार्यैकनिष्ठत्वेनतदंगाभ्यु
दयिकश्राद्धजन्यानामंगापूर्वाणामपितन्निष्ठतापत्तेः।।नचतत्संभ
वति।।पूर्वोक्तनियमविरोधात्।।अतःपृथगेववृद्धिश्राद्धमितिदिक्।।
तत्रैव।।कर्मादिषुचसर्वेषुमातरःसगणाधिपाः।।पूजनीयाःप्रयत्नेन
पूजिताःपूजयंतिताः।।ताश्चविशिष्यस्मृत्यंतरेउक्ताः।।गौरीपद्माश
चीमेधासावित्रीविजयाजया।।देवसेनास्वधास्वाहामातरोलोकमा
तरः।धृतिःपुष्टिस्तथातुष्टिःकुलदेवतयासह।।विनायकेनसहिताः
पूजनीयाःप्रयत्नतइति।अत्रविशेषःकर्मप्रदीपे।।प्रतिमासुचशुभ्रा
सुलिखित्वावापटादिषु।।अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः।।
कुड्यलग्नांवसोर्धारांसप्तवारंघृतेनतु।।कारयेत्पंचवारान्वानातिनी
चांनचोच्छ्रितां।।आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः।।षड्भ्यः
पितृभ्यस्तदनुश्राद्धदानमुपक्रमेत्।।वसोर्धारासुच।।ब्राह्मीमाहेश्वरी
कौमारीवैष्णवीवाराहींद्राणीचामुंडाख्यादेवताःपूजयंतिशिष्टाः।
षड्भ्यइतिगोभिलीयानांत्रितत्त्वेपार्वणद्वयमात्रादितिनाराय
णवृत्तिकृत्।।कात्यायनानामप्येवमितिकेचित्।।मत्स्यपुराणे।।उत्सवा
नंदसंतानेयज्ञोद्वाहादिमंगले।।मातरःप्रथमंपूज्याःपितरस्तदनंत
रं।।ततोमातामहाःपूज्याविश्वेदेवास्तथैवच।।चतुर्विंशतिमते।।मा
तामहास्ततःकेचिद्युग्माभोज्याद्विजातयइति।।ततोमातामहपार्व
णानंतरं।।अत्रबहुवचनांतैःशब्दैस्तदाद्यास्त्रयउच्यंते।।मात्राद
यश्चमनुष्यपितरःप्राधान्येनोद्देश्याः।ऊर्ध्ववक्त्रास्त्वयेतत्रतेनांदी
मुखसंज्ञिताइतिनांदीमुखादिव्यपितरस्त्वभेदविवक्षयोद्देश्यत्वेनां
तर्भावनीयाःकर्मांगाभ्युदयिकेप्येताएवदेवताः।।निषेककालेसो
मेचसीमंतोन्नयनेतथा।।ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतमिति
वचनेनगर्भाधानाद्यंगभूतपारिभाषिककर्मांगश्राद्धेवृद्धिश्राद्धदे
वताद्यतिदेशात्।।पौष्ठपदपौर्णमासीश्राद्धेतुविशेषउक्तोब्रह्मपुराणे

पितापितामहश्चैवतथैवप्रपितामहः॥त्रयोह्यश्रुमुखाह्येतेपितरः
संप्रकीर्त्तिताः॥तेभ्यःपूर्वेत्रयोयेतु——नेतुनांदीमुखाःस्मृताइति॥
अन्यकर्त्तृकेतुकात्यायनः॥स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्म
सु॥पिंडानोद्वाहनात्तेषांतस्याभावेतुतत्क्रमात्॥अत्रपितामहादिः
कन्याप्रदःस्वपितृभ्यएवदद्यात्॥तस्याभावेतुतत्क्रमादित्यत्रस्वपि
तृभ्यइत्यस्यानुषंगात्इतिहेमाद्रिः।तंपितरमारभ्ययःसंस्कार्यस्य
पितृणांक्रमस्तेनक्रमेणदद्यान्नतुस्वकीयेभ्यःपितृभ्यइतिवाच
स्पतिमिश्राद्याः।येपुनराहुस्त्वयवचनेनानुक्ताधिकारास्तेतदीयेभ्य
एवपितृभ्योदद्युः।कालादर्शेहारीतः।अनग्निकोपिकुर्वीतजन्मा
दौवृद्धिकर्मणि॥येभ्यएवपितादद्यात्तानेवोद्दिश्यपार्वणं।अत्रच
साग्निकस्यैवजीवत्पितृकाधिकारबोधकेवाक्येसाग्निकग्रहणमुपल
क्षणं॥वसिष्ठः।पूर्वेद्युर्मातृकश्राद्धंत्रपंप्रकुर्वीतवैभ्यदेवंतुतांत्रिकं॥
वृद्धमनुः।अलाभेभिन्नकालानांनांदीश्राद्धत्रयंबुधः।पूर्वेद्युर्वैप्रकु
र्वीतपूर्वाण्हेपितृपूर्वकं॥छागलेयः।एकैकस्यतुवर्गस्यद्वौद्वौविप्रौ
समर्चयेत्॥विश्वेदेवेतथाह्येवनप्रसज्येतविस्तरे॥भविष्ये।पूर्वा
ण्हेभोजयेद्विप्रान्अष्टौसर्वेप्रदक्षिणं॥तथाचनवमंविप्रंचतुरस्रे
खगेश्वर॥चतुरस्रंपार्श्वमंडलं॥तदुपलक्षितपात्रंतस्मिन्क्रिय
माणेयोतिथिरागच्छेत्तंनवमंभोजयेदित्यर्थः।तत्रैवपक्षांतरं।नांदी
मुखान्समुद्दिश्यपितॄन्पंचद्विजोत्तमान्॥भोजयेद्विधिवत्साक्षाद्वृद्धि
श्राद्धेप्रदक्षिणं॥वृद्धवसिष्ठः।मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि
॥पतिपुत्रान्विताभव्यायोषितोष्टौमुदान्विताः।कात्यायनः।सदा१
रिचरेद्भक्त्यापितॄनप्यत्रदेववत्॥निपातोनहिसव्यस्यजानुनोविद्य
तेक्वचित्॥मधुमध्वितियस्तत्रत्रिर्जपोश्चितुमिच्छतां॥गायत्र्यनंत
रःसोत्रमधुमंत्रविवर्जितः॥अल्पएवजपःकार्यःसोमसामादिकः
शुभः।यस्तत्रविकिरोन्नस्यतिलवान्यववांस्तथा॥उच्छिष्टसन्निधौ
सोन्नत्यागेषुविपरीतकः॥देवपात्राणिकेतिलवान्पितृपात्राणिकेय
ववान्इत्यर्थः।पद्मपुराणे॥तिलार्थस्तुयवैःकार्यःसव्येनैवानुपूर्वशः
।ब्रह्मांडे॥स्वाहाशब्दंप्रयुंजीतस्वधास्थानेचबुद्धिमान्॥वृद्धिश्राद्धे

सदासव्यंयज्ञसूत्रंचकारयेत्॥कुशस्थानेचदूर्वाःस्युर्मंगलस्या
भिवृद्धये॥प्राङ्मुखोदेवतीर्थेनवृद्धौपरिचरेत्पितॄन्॥सव्येनैवोपवी
तेनक्षिप्रंदेशविमार्जनं॥पार्वणवदासायनप्रतीत्यमुच्छिष्टदेशमा
र्जनमित्यर्थः॥कात्यायनः॥प्रात — रामंत्रितान्विप्रान्युग्मानुभयत
स्तथा॥उपविश्यकुशान्दद्यादृजुनैवहिपाणिना॥उभयतःप्राङ्मु
खानुदङ्मुखांश्च॥तथाचभविष्यपुराणे॥प्राङ्मुखांश्चतुरश्चैवच
तुरश्चउदङ्मुखान्॥छांदोग्ये॥चत्वार्येवार्घपात्राण्याभ्युदयिकेइ
ति॥ब्रह्मपुराणे॥नांदीमुखान्पितॄन्भक्त्यासांजलिश्चसमाह्वयेत्
॥पठेत्पवित्रंतुविश्वेदेवासआगत॥कात्यायनः॥पात्राणांपूरणादी
निदैवेनेहतुकारयेत्॥ज्येष्ठोत्तरकरान्युग्मान्कराग्राग्रपवित्रकान्
॥युग्ममध्येज्येष्ठस्यकरोद्वितीयविप्रकरस्योत्तरोयेषुतेतथाकराग्रे
ग्रंपवित्रंयेषु॥आश्वलायनगृह्यपरिशिष्टे॥सोपयामानिचत्वा
रिपात्राणि॥शन्नोदेवीरित्यनुमंत्रितासुयवानावपति॥यवोसिसो
मदेवत्योगोसवोदेवनिर्मितः॥प्रत्नवद्भिःप्रत्तःपुष्ट्यानांदीन्लोकान्
प्रीणयाहिनःस्वाहा॥विश्वेदेवाइदंवोर्घ्यंनांदीमुखाःपितरइतिय
थालिंगमर्घ्यदानंपितरःप्रीयंतामितिअपांप्रतिग्रहणंचैवसूक्तयो
रपिपितामहप्रपितामहयोरिति॥सोपयामानिसहायभूतपात्रांत
रसहितानीत्यर्थः॥एवंद्विर्द्विरितिगंधादिकमेकैकत्रद्विर्द्विर्देयं॥नि
त्यंवाग्नौकरणंस्वाहाकारेणहोमश्च॥अग्नौकरणमित्यस्याग्रेपाठां
तरं॥पाणौहोमोग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेति
॥तथापृषदाज्यमिश्रओदनोहविःसर्वत्रतस्माद्द्वेद्वेआहुतीजुहु
यादितिसर्वत्रअन्नकार्येदधिमिश्रमाज्यंपृषदाज्यं॥भविष्यपुरा
णे॥पृषदाज्येनसंयुक्तंदद्यादोदनमादितः॥पायसंचतथाभक्ष्यमो
दकादिरसोत्तरं॥मधुरंभोजनंदद्यादन्नचामूपरिवेषयेत्॥चंद्रिकायां
प्रचेताः॥नजपेत्त्येतत्कंजप्यंनमांसंतत्रदापयेत्॥प्राङ्मुखोदेवतीर्थे
नक्षिप्रंदेशनिमार्जनमिति॥आश्वलायनगृह्यपरिशिष्टे॥अतोदेवाअ
वंतुनइत्यस्यशुद्धग्रहणमिति॥पावमानीःशंवतीरौद्रींचाप्रतिरथंचश्रा
वयेदितिचवृद्धवसिष्ठः॥तृप्तिप्रश्नेतुसंपन्नंदैवेरोचतइत्यपि॥संपन्नं

पित्र्येइतिशेषः॥ दधिकर्कंधुसहिताःपिंडाःकार्यायथाक्रममितिवा॥
वृद्धशातातपः॥ प्रदद्यात्प्राङ्मुखःपिंडान्वृद्धौनाम्नासवाह्यतः॥सश्रा
द्धकर्त्तावाह्यतःभोजनशालायाबहिःनतूच्छिष्टसमीपे॥वृद्धवसिष्ठः॥
प्राङ्मुखोदैवतीर्थेनप्राक्कूलेषुकुशेषुच॥दत्वापिंडान्नकुर्वीतपिंडपा
त्रमधोमुखं॥भविष्योत्तरे॥पिंडनिर्वपणंकुर्यान्नवाकुर्यान्नराधिप॥वृ
द्धिश्राद्धेमहाराजकुरुधर्ममवेक्ष्यवै॥ब्रह्मपुराणे॥योग्नौतुविषमा
नेपित्र्येहौपिंडान्निर्वपेत्॥पतंतिपितरस्तस्यनरकेसतुपच्यते॥चतु
र्विंशतिमते॥द्वौद्वौचाभ्युदयेपिंडावेकैकस्मैचनिर्वपेत्॥एकंनामपरं
तूष्णींदद्यात्पिंडान्पृथक्पृथक्॥ब्रह्मपुराणे॥प्राङ्मुखोस्त्वथदर्भेस्तु
दद्यात्क्षीरावनेजनं॥मार्कंडेये॥नांदीमुखानांकुर्वीतप्राज्ञःपिंडोदक
क्रियां॥प्राजापत्येनतीर्थेनयच्चकिंचित्प्रजापतेः॥पिंडान धिकृत्यो
क्तं॥ब्रह्मपुराणे॥अर्घ्यंपुष्पंचधूपंचप्रशस्तमनुलेपनं॥वासःसाध्वह
तंशुद्धंदेयंचसदशंसमं॥द्राक्षामलकमूलानियवांश्चाथनिवेदयेत्
॥तान्येवदक्षिणार्थंतुदद्याद्विप्रेषुसर्वदा॥अथाक्षय्योदकस्थानेदत्वा
क्षीरयवारिकं॥नांदीमुखेभ्यश्चाक्षय्यमिदमस्त्वितिसंजपेत्॥का
त्यायनः॥अक्षय्योदकदानंचअर्घ्यदानवदिष्यते॥षष्ठ्यैवनित्यंतकु
र्यान्नचतुर्थ्याकदाचन॥प्रपितामहसंज्ञाश्चनांदीमुख्यश्चमातरः॥
मातामह्यःपितामह्यःप्रपितामह्यएवच॥मातामहेभ्यश्चतथानांदी
वक्त्रेभ्यएवच॥प्रमातामहसंज्ञेभ्योभवद्भिश्चस्वधोच्यतां॥अस्तुस्व
धेतितेतंचजल्पंतिप्रहसंतिच॥स्वाहाशब्दंप्रयुंजीतस्वधास्थानेषु
बुद्धिमान्॥इतित्वेतद्व्यतिरिक्तविषयं॥शातातपः॥नांदीमुखास्तुपि
तरःप्रीयंतामितिवाचयेत्॥चतुर्विंशतिमते॥प्रीयंतामितिचब्रूयात्पिं
डान्स्वाहेतिचक्षिपेत्॥ब्रह्मपुराणे॥त्यमूषुवाजिनमितिपठंस्ताश्च
विसर्जयेत्॥दातारइतिप्रार्थनातः॥पूर्वप्रयोज्यंश्लोकांनरमुक्तंभवि
ष्यत्पुराणे॥मातापितामहीचैवतथैवप्रपितामही॥एताभवंतुमेप्री
ताःप्रयच्छंतुचमंगलं॥चतुर्विंशतिमते॥शेषमन्नमनुज्ञाप्यवैश्वदे
वक्रियांततः॥श्राद्धान्तिश्राद्धशेषेणवैश्वदेवंसमाचरेत्॥पद्मपुराणे॥
एवंश्राद्धोपिसामान्यंवृद्धिश्राद्धेतुसर्वदा॥नमस्कारेणमंत्रेणकुर्यादेवा

द्विवैबुधः॥ इत्याभ्युदयिकश्राद्धं॥ अथनित्यश्राद्धं॥ मनुः॥ पयोमूलफलैर्वापिपितृभ्यस्तृप्तिमाहरन्॥ कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा॥ पितॄनुद्दिश्यविप्रांस्तुभोजयेद्विप्रमेववा॥ एतच्चपंचमहायज्ञांतर्गतं॥ एकमप्याशयेद्विप्रंपितृयज्ञार्थसिद्धये॥ इतिकात्यायनोक्तेः॥ एकस्यापिविप्रस्यभोजनपर्याप्तस्यान्नस्यालाभेकात्यायनः॥ अदैवं नास्तिचेदन्नंभोक्ताभोज्यमथापिवा॥ अभ्युद्धृत्ययथाशक्त्याकिंचिदन्नंयथाविधि॥ पितृभ्यइदमित्युक्त्वास्वधाकारमुदाहरेत्॥ एतच्चब्राह्मणायदेयं॥ उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः॥ विदितत्वार्थविदुषेब्राह्मणायोपपादयेत्॥ इतिकूर्मपुराणात्॥ इदंचषड्दैवत्यं॥ एकमप्याशयेद्विप्रंषण्णामप्यन्वहंगृहीतिव्यासोक्तेः॥ पार्वणश्राद्धमुक्त्वादेवलः॥ अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंपृथक्॥ द्विस्त्रतुर्वायथाश्राद्धंमासेमासेदिनेदिने॥ हारीतः॥ नित्यश्राद्धमदैवंस्यादर्घपिंडादिवर्जितं॥ प्रचेताः॥ ना मंत्रणंनहोमंचनाह्वाननविसर्जनं॥ नपिंडदानंनसुरान्नित्येकुर्याद्विजोत्तमः॥ भविष्योत्तरे॥ आवाहनस्वधाकारपिंडाग्नौकरणादिकं॥ ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच॥ नित्यश्राद्धेत्यजेदेतान्भोज्यमन्नंप्रकल्पयेत्॥ भोज्यमन्नंस्वस्यनिःशेषः॥ मध्यान्हेवेदविदुषेदक्षिणापिंडवर्जितं॥ नित्यश्राद्धेततोदद्यादुक्तेयत्नयमेवहीतिब्रह्मांडपुराणात्॥ अनेनतैलाद्यनुज्ञापिकृताभवति॥ देवलः॥ अघृतंभोजयन्विप्रंस्वेगृहेसतिसर्पिषि॥ परत्रनिरयंघोरंगृहस्थःप्रतिपद्यते॥ मिष्टमन्नंस्वयंभुक्त्वापश्चात्कदशनंलघु॥ ब्राह्मणंभोजयन्विप्रोनिरयेचिरमावसेत्॥ सएव॥ उपवेश्यासनंदत्वासंपूज्यकुसुमादिभिः॥ निर्दिश्यभोजयित्वातुकिंचिद्दत्वाविसर्जयेत्॥ भविष्योत्तरे॥ प्रदद्याद्दक्षिणांशक्त्यानमस्कारैर्विसर्जयेत्॥ दक्षिणापिंडवर्जितमितिब्रह्मांडपुराणाद्विहितप्रतिषिद्धत्वाद्दक्षिणाविकल्पः॥ इतिनित्यश्राद्धं॥ अथसंन्यासांगश्राद्धं॥ बौधायनीये॥ संन्याससंकल्पपूर्वंमष्टम्याआरभ्यश्राद्धाष्टकंकुर्यात्॥ पूर्णमास्यंतं॥ अमावास्यांतंवा॥ शौनकः॥ पूर्वेद्युर्नांदीमुखश्राद्धंकुर्यादिति॥ दैवश्राद्धेब्रह्मविष्णुमहेश्वराः॥ ऋषिश्राद्धेदेवर्षिब्रह्मर्षिक्षत्रियर्षयः॥ शौनकेतु॥ दे

वर्षिक्षत्रर्षिमनुष्यर्षय इत्युक्तं॥ दिव्यश्राद्धे वसुरुद्रादित्याः॥ मनुष्य
श्राद्धे सनकसनंदनसनातनाः॥ भूतश्राद्धे पृथिव्यादीनि भूतानि च
क्षुरादीनि करणानि॥ चतुर्विधो भूतग्रामः पित्रादित्रयं पितृश्राद्धे मा
त्रादित्रयं मातृश्राद्धे आत्मपितृपितामहाः॥ इत्यष्टौ श्राद्धानि॥ अ
नंतरं पुण्याहं वाचयेदिति॥ इदं च अग्निमान् पार्वणविधिना कुर्यात्
॥ अनग्निमानेकोद्दिष्टविधिना॥ अत्र संन्यासिपद्धतौ विशेषः॥ सर्वे
षु श्राद्धे युग्मविप्रभोजनं॥ दैवश्राद्धे भवब्राह्मणाः निपतामिसादिप्र
योगः॥ तिलार्थे यवाः॥ सर्वं सव्येन प्राग्दक्षिणेन कार्यं॥ ततो ब्रह्मार्प
णं तत्कृत्वा यस्य स्मृत्येति जपित्वा अमृतमस्त्वित्युक्त्वा भोजनस
माप्तिपर्यंतं विष्णुं स्मरन् पुरुषसूक्तादीनि जपेत्॥ विप्रांस्तृप्तान् ज्ञा
त्वा प्राङ्मुखः प्रागग्रानुदगपवर्गान् वेदिरेखा लिखित्वा तासु प्रागग्रा
न्दर्भानास्तीर्य दैवतादिपंचस्थानेषु तूष्णीमुदकं पितृमात्रात्ममा
तामहानां स्थानेषु मार्जयंतां मम पितर इत्युदकं निषिंचेत्ततो देवा
दिपंचस्थानेषु नक्नामान्युक्त्वा पृथक्प्रागपवर्गान् पिंडान् दद्यात्॥
पित्रादिषु त्रिषु प्रतिस्थानं स्वगृह्योक्तविधिना पिंडान् दद्यात्॥ पित
रि मातरि मातामहे वा जीवति तत्स्थानेपणलोपः॥ सर्वत्र पूर्ववदक्षय्यो
दकं दद्यात्॥ ततो यस्य स्मृत्येत्युक्त्वा ब्राह्मणान्विसर्जयेदिति॥ अ
थ जीवच्छ्राद्धं॥ आदित्यपुराणे॥ देशकालधनश्रद्धाव्यवसायसमु
च्छ्रये॥ जीवते वाथ जीवाय दद्याच्छ्राद्धं स्वयं नरः॥ कर्त्रंतराभावे स्व
यमेव स्वस्य श्राद्धं कर्तव्यमिति हेमाद्रिः॥ बौधायनीये तु॥ अथाप्यु
दाहरंति जीवन्नेवात्मनः श्राद्धं कुर्यादन्येषु सत्स्वपि॥ यथाविधि प्रद
द्यात्स्वसपिंडीकरणादृत इति॥ कृतोपवासः सुस्नातस्त्रयोदश्यां
समाहितः॥ यद्यपि त्रयोदशी सामान्यमुक्तं तथाप्यपरपक्षे त्रयोद
शीमुपेत्येति बौधायनोक्तेः कृष्णपक्षस्य ग्राह्या॥ कर्तारमथ भो
क्तारं विष्णुं सर्वेश्वरं यजेत्॥ जले स्थंडिले वेरे मूर्तौ कलशे पुष्करे रवौ॥
रविप्रतिमायां॥ चंद्रार्कगुरुगोविप्रभाजापितृषु सर्वगं॥ सदक्षिणा
स्तु सजलास्तिलास्तु जलधेनवः॥ निवेदयेत्पितृभ्यश्च नरश्चैतु समाहि
तः॥ एवं संपूज्य पितुरुद्देशेन तिलोजलधेनूर्दद्यात्॥ तत्र मंत्रानाह॥

सोमायत्वापितृमतेस्वधानमइतिब्रुवन्॥अग्नयेकव्यवाहनायस्व
धानमइतिस्मरन्॥दक्षिणेननिदध्याच्चतृतीयांदक्षिणायुतां॥य
मायांगिरसेवायस्वधानमइतिस्मरन्॥जलधेनुविधिर्दानमयूखे
द्रष्टव्यः॥तयोर्मध्येतुनिक्षिप्यविप्रान्पंचोपवेशयेत्॥प्रथमामुत्तर
तःद्वितीयांदक्षिणतः।तृतीयांमध्येनिक्षिप्यइत्यर्थः॥आवाहनादि
नापूर्वंविश्वेदेवान्प्रपूज्यच॥वसुभ्यस्त्वामहंविप्ररुद्रेभ्यस्त्वाम
हंततः॥सूर्येभ्यस्त्वामहंविप्रभोजनीयानीतिनान्वदेत्॥आवाह
नादिकंसर्वंकुर्याच्चपितृकर्मवत्॥वसुभ्यस्त्वामहंविप्रभोजनानि
॥एवंरुद्रेभ्यःसूर्येभ्यइत्युक्त्वावाहनादिश्राद्धविधिनाभोजयित्वा
वस्वादिभ्यस्त्रीन्पिंडान्दद्यादित्यर्थः।सौम्याधेनुस्ततोदेयावासवा
यद्विजायतु॥वासवायचरक्षोहृशेनोपवेशिताय॥आग्नेयीवाथरौ
द्राययाम्यासूर्यद्विजायतु॥विश्वेभ्यश्चाथदेवेभ्यस्तिलपात्रंनिवेदये
त्॥तिलपात्रंकांसस्येतिकेचित्॥स्वस्त्युदकमथाक्षय्यजलंदत्वाथ
तान्द्विजान्॥विसर्जयेत्स्मरन्विष्णुंदेवमष्टाक्षरंविभुं॥ॐनमो
नारायणायेत्यष्टाक्षरः॥ततःकामकुलेशानंनिशिनारायणंस्मरेत्
॥कामकुलेशानविशेषणकंनारायणमित्यर्थः॥चतुर्दश्यांततोग
च्छेद्यथाप्राप्तांसरिद्वरां॥पूर्वेणविप्रःसौम्येनराजावैश्यापरेणच।
दक्षिणेनतथाशूद्रोमार्गेणविकिरन्यवान्॥गच्छेदितिशेषः॥सौ.
म्यमुत्तरं॥वस्त्राणिलोहखंडानिजितंतइतिसंस्मरन्॥जितंतेपुंड
रीकाक्षजितंतेविश्वभावन॥नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज
इति॥ततोनदीतीरेदक्षिणामुखःस्मार्तंलौकिकंवाग्निंस्वयंप्रज्वा
ल्यचित्यर्थंगर्तखननभूमिप्रार्थनादिप्रत्यक्षमरणवत्सर्वंकुर्या
त्॥जीवच्छ्राद्धेसर्वत्रप्रेतशब्दोनप्रयोज्यः॥ततःप्रत्यक्षशववद्दाह
कर्तव्यंस्वशाखोक्तपूर्णाहुत्यंतंहोमंकृत्वाप्रधानहोमस्थानेनिर
ग्निभूम्येषमायरुद्रायचस्वाहेतिसंस्कृताज्येनाहुतित्रयंहुत्वा
पंचाशत्कुशैरात्मप्रकृतिमन्येनक्रव्यादमग्निमित्यादिनास्वस्वमंत्रे
णदाहयेत्॥ततोवातास्तइत्यादिशववदाहवत्॥ततोमुद्गमिश्रंतिल
मिश्रंचतंडुलचरुद्वयमन्यस्मिन्नग्नौसपवित्रकंश्रपयेत्।तदग्निसमी

पेकपूर्वत्रयं कृत्वा प्रत्येकं मधुक्षीरघृतोदकैः पूरयेत् ॥ तथा तेषु क्रमपूरि
तानि त्रीणि शरावाणि ॥ ॐ पृथिव्यै नमस्तुभ्यं ॥ ॐ यमाय नमस्तुभ्यं ॥
ॐ रुद्राय श्मशानपतये नमस्तुभ्यमिति प्रत्येकं निवेदयेत् ॥ ततो
दीप्तं प्रतिकृतिदाहार्थमग्निं ॐ क्रव्यादमग्निं नमस्यामि भूम्यै नम इति प
ठन् क्षीरान्तजलकुंभेन जलेन निर्वापयेत् ॥ ततः स्नात्वा नाभिमात्रे
जले स्थित्वा यमादिभ्यः सप्ततिलांजलीन् दद्यात् ॥ तत्रायं क्रमः ॥
ॐ यमाय स्वधा नमः ॥ एवं मृत्यवे ऽन्तकाय वैवस्वताय धर्मराजाय का
लाय सर्वप्राणिहरायेति ॥ तत ॐ नमो रुद्राय श्मशानपतये नम इति
मंत्रेण लाजोदकपूर्णकुंभं भुवि विकिरेत् ॥ ततो दक्षिणाग्रेषु दर्भेषु स
धामुकगोत्रामुकैतत्तिलोदकं तुभ्यमस्त्विति तिलोदकं दद्यात् ॥ भू
मौ स्वधास्थाने नमः ॥ ततः पूर्वकृतचरुभ्यां पंच पंच पिंडान् प्रत्येकं द
त्येवं दशपिंडान् स्वोद्देशेन पिंडदानविधिना दत्वा गंधपुष्पधूपदी
पबलीन् दत्वा प्रत्येकं सर्वेषामक्षय्यमस्त्विति ब्रूयात् ॥ ततो विष्णुं
सौम्यमुखं स्मरेत् ॥ पिंडानामूष्मणि निवृत्ते एकैकं पिंडं जलपूर्णकुं
भे निधाय नाभिमात्रे जले प्रविश्यैकैकं सकुंभं जलमध्ये क्षिपेत् ॥ तत
एकैकं जलपूर्णकुंभमेकैकं च तिलजलांजलिमित्येवं पंचपंचाशत्
कुंभा जलांजलयश्च देयाः ॥ ततः स्नात्वा गृहे आगत्य गृहद्वारोपांते
पात्रद्वये क्षीरजले निवेद्य दुग्धं पिबेति दुग्धं निवेदयेत् ॥ तस्मिन्दि
ने आशौचं ॥ ततो रात्रौ दक्षिणामुखदर्भेषु उदङ्मुखः स्वपेत् ॥ प्रात
रमावास्यायां स्नात्वा जीवच्छ्राद्धं करिष्य इति संकल्प्य सपिंडकं
स्वस्यैकोद्दिष्टं श्राद्धं कुर्यात् ॥ सर्वत्र जीवच्छ्राद्धे प्रेतशब्दोच्चारणं ना
स्ति ॥ अत्रोक्तजलधेनुविधिर्विष्णुधर्मोत्तरे ॥ जलधेनुं प्रवक्ष्यामि प्री
यते दत्तया यया ॥ देवदेवो हृषीकेशः सर्वेशः सर्वभावनः ॥ जलकुंभं
नरव्याघ्र सुवर्णरजतान्वितं ॥ रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वि
तं ॥ सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितं ॥ कुष्ठमांसीमुरोशीरवा
लकामलकैर्युतं ॥ प्रियंगुपत्रसहितं सितवस्त्रोपवीतिनं ॥ सच्छत्रं स
उपानत्कं दर्भविष्टरसंस्थितं ॥ चतुर्भिः संवृतं भूप तिलपात्रैश्चतुर्दि
शं ॥ स्थगितं दधिपात्रेण घृतक्षौद्रवता मुखे ॥ उपोषितः समभ्यर्च्य

वासुदेवंजलेशायं॥पुष्पधूपोपहारैश्चयथाविभवमादृतः॥संकल्प्य
जलधेनुंचकुंभंतमभिपूज्यच॥पूजयेद्वत्सकेनद्वत्कृतंजलमयं
बुधः॥एवंसंपूज्यगोविंदंजलधेनुंसवत्सकां॥सितवस्त्रधरःशां
तोवीतरागोविमत्सरः॥दद्याद्द्विजायराजेंद्रप्रीत्यर्थंजलशायिनः॥
जलशायीजगद्योनिःप्रीयतांममकेशवः॥इतिचोच्चार्यभूनाथवि
प्रायप्रतिपाद्यतां॥अपक्वान्नाशिनास्थेयमहोरात्रमतःपरं॥अने
नविधिनादत्वाजलधेनुंनराधिप॥सर्वान्कामानवाप्नोतियेदिव्या
येचमानुषाः॥शारीरारोग्यमाबाधाप्रशमःसार्वकामिकः॥नृणां
भवतिदत्वायांजलधेन्वांसमाहितः॥अत्रजलकुंभेशक्त्यापरिमा
णं॥सुवर्णाध न्विततत्वंचसुवर्णशृंगाकृति॥रजतंखुराकृति॥तिल
पात्रकटिगतांवपादि॥दधिपात्रंकांस्यमयं॥धान्यानिपार्श्वेद्वयं
कुशादीनिघ्राणदेशे॥प्रियंगुपत्रंश्रवणेयज्ञोपवीतंशिरसि॥व
त्सश्चतुर्थांशेनदक्षिणाचसुवर्णमारभ्ययथाशक्तिएतच्चेतर
धेनुवदविरोधात्सामान्यादितरेषुतथात्वमितिन्यायेनज्ञेयम्।
॥इतिश्रीसकलशास्त्राभिज्ञानकविरणपणसूरिसूनुमीमांस
कशंकरभट्टात्मजनीलकंठकृतेभास्करेश्राद्धमयूखश्चतुर्थः४

अथश्राद्धमयूखस्यसूचीपत्रं

इतिसूचीपत्रम्

॥श्री॥

अथसंस्कारमयूखः प्रारभ्यते

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ ॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥

श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकपर
श्रीविश्वनाथजीकेपास
महाराजशिवलालदुबेजीकेमकानमे
काशीसंस्कृतयन्त्रालयमेछपी
जिनकोलेनाहोयउनकोइसकार्यकेसंपादक
श्रीयुत्बाबूवाराणसीप्रसादजीकेपास
याकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी
मितिज्येष्ठकृष्ण५शनिवार
संवत१९२६
तारीख१०माहेमईसन्१८७९ई०

अथसंस्कारमयूखःप्रारभ्यते॥

श्रीगणेशायनमः॥यतःसर्वंविश्वंभजतिजनिसत्तालयमिदंयआत्मासर्वे
षांस्थिरचरजडानामपिविभुः॥तमेतंभास्वंतंविधिहरिमहेशानवपुषंन
मस्यामःकामंपरमकमनीयंसुकृतिनां॥श्रीभास्करंशिवकरंसहस्राप्र
णम्यश्रीनीलकंठपितरंजननींचगंगां॥तत्पादचिंतनबलोबुधशंकराख्यः
संस्कारभास्करममुंवितनोतिकाश्यां॥ ॥तत्रास्यधर्मप्रमाणविवेचक
त्वात्प्रथमंधर्मप्रमाणान्युच्यंते॥तान्याहयाज्ञवल्क्यः॥श्रुतिःस्मृतिः
सदाचारःस्वस्यचप्रियमात्मनः॥सम्यक्संकल्पजःकामोधर्ममूलमि
दंस्मृतमिति॥सदाचारःश्रुतिस्मृत्यविरुद्धोऽदृष्टार्थोवसंतोत्सवादिः
धर्मेमूलंप्रमाणमित्यर्थः।सम्यक्संकल्पाज्जातःकामोयथाभोजन
व्यतिरेकेणजलंनपातव्यमिति॥एतेषांचविरोधेपूर्वंपूर्वंबलीयः॥त
थाचप्रयोगपारिजातेसंग्रहे।श्रुतिस्मृतिपुराणेषुविरुद्धेषुपरस्परं।पूर्वं
पूर्वंबलीयस्यादितिन्यायविदोविदुः॥स्मृतिष्वपिमनुस्मृतिःप्रबलेति॥
तथाचांगिराः॥मन्वर्थविपरीतातुयास्मृतिःसाविनश्यतीति।अनादर
णीयेत्यर्थः।तथामनोर्ऋचःसामिधेन्योभवंतीत्यस्यवाक्यशेषेश्रूयते।य
द्वैकिंचमनुरवदत्तद्भेषजमिति।स्मृतिप्रवर्त्तकाउक्तायाज्ञवल्क्येन॥म
न्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥यमापस्तंबसंवर्ताःका
त्यायनबृहस्पती।पराशरव्यासशंखलिखितादक्षगौतमौ।शातात
पोवसिष्ठश्चधर्मशास्त्रप्रवर्त्तकाइति।अन्येप्युक्ताःपैठीनसिना।तेषां
मन्वंगिरोव्यासगौतमात्र्युशनोयमाः।वसिष्ठदक्षसंवर्त्तशातातपपरा
शराः।विष्णवापस्तंबहारीताःशंखःकात्यायनोगुरुः।प्रचेतानारदोयो
गीबौधायनपितामहौ।सुमंतुकाश्यपौबभ्रुःपैठीनोव्याघ्रएवच।स
त्यव्रतोभरद्वाजोगार्ग्यःकात्यायनस्तथा।जाबालिर्जमदग्निश्चलौगा
क्षिर्ब्रह्मसंभवः।इतिधर्मप्रणेतारःशट्त्रिंशदृषयःस्मृताः।षट्त्रिंशदि
तिनपरिसंख्या।तेनविश्वामित्रादीनामपिधर्मप्रणेतृत्वंसिद्धं।एवमापु
वैदादीनामपिस्मृतित्वं।तत्रकेचनदृष्टमूलाःकेचनश्रुतिमूलअर्थाः॥

एवंपुराणादीनामपि।अस्माभिस्तुप्रामाणिकानांवराहमिहिरादीनांव
चांसिप्रमाणत्वेनोपन्यस्यंते।संहिताउक्ताहेमाद्रौभविष्यत्पुराणे॥भार्ग
वानारदीयाचबार्हस्पत्यांगिरस्यपि।स्वायंभुवस्यशास्त्रस्यचतस्रःसं
हितामताः।यत्तुसूतसंहितायां।आद्यासनत्कुमारोक्ताद्वितीयासूतसं
हिता।तृतीयाशांकरीविप्राश्चतुर्थीवैष्णवीमता॥ततस्तासंहिताब्रा
ह्मीसौर्येत्यासंहितातथेतिसंहिताउक्तास्ताःस्कांदांतर्गतानस्तत्राः
अन्येपिसंहिताकर्तारःकश्यपेनगणिताः।सूर्यःपितामहोव्यासोवसि
ष्ठोत्रिःपराशरः।कश्यपोनारदोगर्गोमरीचिर्मनुरंगिराः।रोमशःपौल
शिश्चैवच्यवनोयवनोभृगुः।शौनकोष्टादशैवैतेज्योतिःशास्त्रप्रवर्त्त
काइति॥संहितालक्षणंच॥आदेशशास्त्रोपनयनंखेटचारोब्दलक्षणं।
तिथिवारसनक्षत्रयोगतिथ्यर्द्धलक्षणं॥मुहूर्त्तोपग्रहःसूर्यसंक्रांति
गोचरक्रमः॥चंद्रताराबलंचैवक्रियाषोडशकर्मणां।नृपाभिषेचनंदेव
प्रतिष्ठासद्मलक्षणं॥अग्न्याधानंमेघगर्भनिखिलोत्पातलक्षणं।तं
क्रांतिर्मिश्रकाध्यायस्तृतीयस्कंधसंभवः।तृतीयःस्कंधःसंहिता।सं
भवोरचना॥महापुराणान्युक्तानिवैष्णवे।ब्राह्मंपाद्मंवैष्णवंचशैवंभा
वगतंतथा।तथान्यंनारदीयंचमार्कंडेयंचसप्तमं॥आग्नेयमष्टमंचैव
भविष्यंनवमंतथा।दशमंब्रह्मवैवर्त्तंलैंगमेकादशंस्मृतं॥वाराहंद्वाद
शंचैवस्कांदंचात्रत्रयोदशं॥चतुर्दशंवामनंचकौर्मंपंचदशंस्मृतं॥मात्स्यं
चगारुडंचैवब्रह्मांडंचततःपरं॥अष्टादशपुराणानिकीर्तितानिमयात
वेति।उपपुराणानिकौर्मे।अन्यान्यपिपुराणानिमुनिभिःकथितानितु।आ
द्यंसनत्कुमारोक्तंनरसिंहमतःपरं॥तृतीयंनारदमुद्दिष्टंकुमारेणतुभाषितं
॥दुर्वाससोक्तमाश्चर्यंनारदोक्तमतःपरं।कापिलंमानवंचैवतथैवोशन
सेरितं।ब्रह्मांडंवारुणंचैवकालिकाह्वयमेवच॥माहेश्वरंतथासांबं
सौरंसर्वार्थसंचयम्॥पराशरोक्तंप्रथमंतथाभागवताह्वयम्॥इद
मष्टादशंप्रोक्तंपुराणंकौर्ममुत्तमम्॥ ॥महापुराणमध्येगणितानाम
प्युपपुराणेषुगणनायांनकोपिविरोधः।एकस्यैवोभयसंज्ञाकरणे
विरोधाभावात्॥इत्युपपुराणानि॥धर्मलक्षणंजैमिनिराह।चोदना
लक्षणोऽर्थोधर्मः।विधिश्चोदनाशब्देनोच्यते।तत्प्रमाणकइत्यर्थः॥ध

र्माधर्मयोरुपादानपरित्यागावुक्तौस्कांदे॥धर्माद्राज्यंधनंसौख्यमधर्माद्दुः
खसंभवः।तस्माद्धर्मंसुखार्थायकुर्यात्पापंविसर्जयेत्।धर्मेणपापमपनु
दतीतिचश्रुतिः॥धर्मश्चद्विविधः।श्रौतःस्मार्तश्च।श्रौतोग्निहोत्रज्योतिष्टो
मादिः।स्मार्तोऽष्टकादिः।अस्मिंश्चग्रंथेस्मार्तधर्मःक्रियते॥अथदेशाः।वि
ष्णुपुराणे।उत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणं।वर्षंतद्भारतंनामभारती
यत्रसंततिः।अत्रजन्मसहस्राणांसहस्रैरपिसत्तम॥कदाचिल्लभतेजंतु
र्मानुष्यंपुण्यसंचयात्।मनुः।आसमुद्रात्तुवैपूर्वादासमुद्रात्तुपश्चिमात्॥
तयोरेवांतरंगिर्योरार्यावर्तंविदुर्बुधाः।तयोर्हिमवद्विंध्ययोः।विष्णुर्विशे
षमाह।चातुर्वर्ण्यव्यवस्थानंयस्मिन्देशेनविद्यते॥तंम्लेच्छदेशंजानीयादा
र्यावर्तमतःपरं।मनुः।कृष्णसारस्तुचरतिमृगोयत्रस्वभावतः।सज्ञेयो
यज्ञियोदेशोम्लेच्छदेशस्ततःपरः॥तथा॥सरस्वतीदृषद्वत्योर्देवनद्योर्य
दंतरं।तंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते।तथा॥हिमवद्विंध्ययोर्मध्यं
यत्प्राग्विनशनादपि॥प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्तितः।विनशनं
सरस्वत्याः।तथा॥कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनिकाः।एष
ब्रह्मर्षिदेशोवैब्रह्मावर्तादनंतरः।एतान्द्विजातयोदेशान्संश्रयेयुःप्रय
त्नतः।शूद्रस्तुयस्मिन्कस्मिन्वानिवसेद्वृत्तिकर्षितः।एषधर्मस्यवैयोनिः
समासात्कथितःकिल॥सर्वपापहरःपुण्यसाधनंसर्वकर्मणां॥अनंतर
ईषन्न्यूनः।मत्स्याविराटदेशाः।पंचालाःकान्यकुब्जदेशाः।शूरसेनि
कामथुरादेशाः॥व्यासः॥सर्वेशिलोच्चयाःपुण्याःसागराःसरितस्तथा॥अ
रण्यानिचपुण्यानिविशेषान्नैमिषंतथा।तथा।आर्यावर्तसमुत्पन्नोद्वि
जोवायदिवाद्विजः।कर्मदांसिंधुपारंचकरतोयान्नलंघयेत्।आर्यावर्तम
तिक्रम्यविनातीर्थक्रियांद्विजः।आज्ञांचैवतथापित्रोरैंदवेनविशुध्यतीति
॥इतिनिबंधोपयोगीविचारः॥ ॥अथसंस्कारोपयोगिविनायकपूज
नस्वस्तिवाचनाद्युच्यते।गृह्यपरिशिष्टे।आदौविनायकःपूज्यअंतेतु
कुलदेवताः।तथा।अथस्वस्तिवाचनमृद्धिपूर्तेषुकर्मसुविवाहोत्ताअप
त्यसंस्काराःप्रतिष्ठास्थापनेपूर्तेकर्मण्याद्यंतयोःकुर्यादिति।शौनकः।
पुण्याहवाचनविधिंवक्ष्यामोऽथयथाविधि।प्रयोक्तुःकर्मणांचादावंते
चोदयसिद्धयइति।व्यासः।संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचये

त्॥धर्मकर्मणिमांगल्येसंग्रामेऽद्भुतदर्शने।तच्चप्रधानप्रयोगांतर्गतमितिके
चित्॥प्रयोगबहिर्भूतमितितुबहवः।तत्राद्येप्रधानसंकल्पंकृत्वातत्कार्यं
॥द्वितीयेतुतत्कृत्वाप्रधानसंकल्पइतिप्रयोगरत्ने भट्टचरणाः॥कर्मप्रदी
पे।कर्मादिषुचसर्वेषुमातरःसगणाधिपाः।पूजनीयाःप्रयत्नेनपूजिताःपू
जयंतिताः॥प्रतिमासुचशुभ्रासुलिखित्वावापटादिषु।अपिवाक्षतपुंजेषु
नैवेद्यैश्चपृथग्विधैः।कुड्यलग्नांवसोर्धाराःसप्तवारंघृतेनतु।कारयेत्सं
चधारावानातिनीचानचोच्छ्रिता।आयुष्याणिचशांत्यर्थंजप्त्वातत्र
समाहितः॥षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदिति॥मातरो
गौर्यादयःषोडश।वसोर्धारादेवताब्राह्मीमाहेश्वरीत्याद्याःसप्तस्मृत्यं
तरप्रसिद्धाज्ञेयाः।षड्भ्यइतिसतीपक्षद्वयपरा।अन्येषांतुनवदैवत्यं
।महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच॥नवदैवतमत्रेष्टंशेषंषाट्
पौरुषंविदुरितिहेमाद्रौवचनादितितातचरणाः।ममतुप्रतिभाति।म
हालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच।तेषुद्वादशदैवत्यंतीर्थेप्रोष्ठपदा
सुचेतिद्वादशदैवत्यविधानात्स्वत्रयमपियथासंभवंव्यवतिष्ठ
तइति।नांदीश्राद्धनिमित्तान्याह।लौगाक्षिः।नामान्नचौलगोदानसीमो
पनयपुंसवे।स्नानाधानविवाहेषुनांदीश्राद्धंविधीयते।वृद्धगार्ग्यः।अ
ग्न्याधानाभिषेकादिष्विष्टापूर्तेस्त्रियाःकृते।वृद्धिश्राद्धंप्रकुर्वीतआ
श्रमग्रहणेतथेति।विष्णुपुराणेपि।कन्यापुत्रविवाहेषुप्रवेशेनववे
श्मनः।नामकर्मणिबालानांचूडाकर्मणिकेतथा।सीमंतोन्नयनेचैवपु
त्रादिमुखदर्शने॥नांदीमुखंपितृगणमर्चयेत्प्रयतोगृही॥तथा।जा
तस्यजातकर्मादिक्रियाकांडमशेषतः।पुत्रस्यकुर्वीतपिताश्राद्धंचा
भ्युदयात्मकं।जातकर्मादिक्रियाकांडमपत्यसंस्काराः।पुत्रस्येतिपुं
स्त्वमविवक्षितमनुवाद्यविशेषणत्वात्।तेनकन्याया अपिसंस्कारां
गमाभ्युदयिकंसमंत्रकमेवभवति।मंत्रबाधमानाभावात्॥यत्तुपुं
जातकर्मादिसंस्कारानुक्त्वायाज्ञवल्क्यवचः।तूष्णीमेताःक्रियाः
स्त्रीणांविवाहस्तुसमंत्रकइतितत्प्रधानांगमंत्रबाधपरं।यदिहिप्र
त्यक्षश्रुत्यैनचरतीतितृतीयांतेनैवसांगभावनामुक्तातस्यांतूष्णींत्वं
विधीयेततदास्यादंगभूतमंत्रबाधः।इहतुयज्ञाथर्वणवैकाम्याइष्ट

स्तोउपांशुकर्त्तव्याइत्यत्रेष्टीनामिवक्रियाणांप्रथमांतपदोपात्तत्वात्
प्रधानएवतूष्णींत्वंविधिर्नांगेष्वितिवृद्धिश्राद्धंसमंत्रकमेवभवतीति
श्राद्धमयूखेतातचरणाः।यत्तुनानिष्ट्वातुपितॄन्श्राद्धेकर्मवैदिकमार
भेत्।तद्यत्रप्रातिस्विकवाक्येनांदीश्राद्धमुक्तंतत्रैवोपसंह्रियते।यद्वा।
वाक्यांतरप्राप्तकर्मांगत्वएतत्पूर्वकालतामात्रमेवबोधयतिनकर्मां
गतामपि।अतोनसंध्यावंदनादावतिप्रसंगः।यत्तुवृद्धेपिनाष्टकासु
भवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते॥नसोष्यंतीजातकर्मप्रोषितागतक
र्मस्वितिकर्मप्रदीपवचोनुवादकमेवननिषेधकंप्राप्त्यभावात्।सो
ष्यंतीकर्मसुखप्रसवार्थं।प्रोषितागतेचपुत्रेपितुःकर्मच्छंदोगपरिशि
ष्टप्रसिद्धमतएवनैमित्तिकमथोवक्ष्येश्राद्धमभ्युदयात्मकं।पुत्रजन्म
नितत्कार्यंजातकर्मसमंनरैरितिमार्कंडेयपुराणवचनेनैमित्तिकजात
कर्मसमपदाभ्यांपुत्रजन्मनिमित्तकमेवश्राद्धंनतुकर्मांगमित्युक्तंसं
गच्छते॥यत्तुहेमाद्रौ॥वृद्धिश्राद्धंतुकर्त्तव्यंजातकर्मादिकेष्विति।त
त्रापिजातकर्मादीयेषामित्यतद्गुणसंविज्ञानबहुव्रीहिणानामकर्मादी
नामेवग्रहणं।नजातकर्मणइति।एवंचजातकर्मातिरिक्तसंस्कारेषुनां
दीश्राद्धस्यांगत्वेसिद्धेयद्येकसंस्कार्यस्यानेकसंस्कारेष्वेककर्तृकेष्वेक
स्मिन्कालेयुगपदुपस्थितेषुदेशकालैक्यंस्याद्गृह्यमाणस्तंत्रन्या
यादेवमातृपूजनाभ्युदयिकयोःसकृदनुष्ठानप्राप्तेर्गणशःक्रियमाणेषु
मातृभ्यःपूजनंसकृत्।सकृदेवभवेच्छ्राद्धमादौनपृथगादिष्वितिश्राद्ध
वचनमनुवादकमेवनसकृत्त्वविधिपरं।अन्येतु।अनेनैवन्यायेनानेक
संस्कार्याणांसजातीयविजातीयानेकसंस्कारेष्वपिसकृदेवततइत्या
हुः।तन्नसंस्कारजन्यचरमापूर्वाणामनेकसंस्कार्यनिष्ठत्वेनतदंगाभ्यु
दयिकश्राद्धजन्यांगापूर्वाणामपितन्निष्ठत्वस्यावश्यकत्वात्।नचतत्सं
भवति।एकयासामग्र्याएकमेवकार्यंजन्यतइतिनियमस्ययोगसि
द्धाधिकरणेस्थापितत्वान्नसकृदनुष्ठितेनाभ्युदयिकेनानेकापूर्वोत्पत्ति
रितिअनेकसंस्कार्येषुपृथगेववृद्धिश्राद्धमितितातचरणाः॥ननुसत्रादि
ष्वनेकयजमानगतान्यनेकान्यपूर्वाण्येकस्मात्प्रयोगादुत्पद्यंतइति
उक्तनियमेव्यभिचारात्सकृतेपितथास्त्वितिचेन्न।तत्रापिस्वस्वांशघटि

तत्सामग्रीभेदात्॥प्रधानावृत्त्याप्राप्तायानांदीश्राद्धावृत्तेरपवादःकर्मप्र
दीपे।असकृद्यानिकर्माणिक्रियेरन्कर्मकारिणा।प्रतिप्रयोगंनैतास्युर्मा
तरःश्राद्धमेवचेति।तान्येवकर्माण्याह।आधानहोमयोश्चैववैश्वदेवेतथै
वच।बलिकर्मणिदर्शेचपौर्णमास्यांतथैवच।नवयज्ञेचयज्ञज्ञावदंत्ये
वंमनीषिणः॥एकमेवभवेच्छ्राद्धमेतेषुनपृथक्पृथक्।असकृत्सुनःपुनः
॥प्रतिदिनंप्रतिमासंप्रत्यब्दंचेतियावत्।नवयज्ञोनवान्नेष्टिः।पूर्वश्लोक
स्यकर्मशब्दस्यउत्तरश्लोकपरिगणितेषुकर्मसुउपसंहारस्तेनाऽपरि
गणितज्योतिष्टोमादिषुभवत्येवप्रतिप्रयोगंवृद्धिश्राद्धमितिनानवरणाः
होमादिनवयज्ञपर्यंतेषुनपृथक्श्राद्धं किंत्वाधानादौकृतमेवश्राद्धमुप
करोतीतिकेचित्।आभ्युदयिकेकालमाहवसिष्ठः।पूर्वेद्युर्मातृकंश्राद्धं
कर्माहेपैतृकंतथा।उत्तरेद्युःप्रकुर्वीतमातामहगणस्यतु।अलाभेभिन्न
कालानांनांदीश्राद्धत्रयंबुधः।पूर्वेद्युर्वैप्रकुर्वीतपूर्वाण्हेमातृपूर्वकमिति
मातृपूर्वकमेवश्राद्धत्रयंविवृतमाश्वलायनेन।मातापितामहीचैवसप्र
ज्याप्रपितामही॥पित्रादयस्त्रयश्चैवमातुःपित्रादयस्त्रयः।एतेनवा
चैनीयाःस्युःपितरोभ्युदयेद्विजैरिति।यत्तुवृद्धवसिष्ठवचनं।नांदीमु
खेविवाहेचप्रपितामहपूर्वकं।नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकमि
ति।स्मृत्यर्थसारेच।वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतइति॥तदा
श्वलायनान्यपरं।आश्वलायनानांत्वाश्वलायनवचनादानुलोम्येनत
न्मात्रादिपूर्वकमितिभट्टचरणप्रभृतयोबह्वृचः।मात्रादीन्विशिनष्टिवि
ष्णुः।नांदीमुखान्पितॄन्नांदीतर्पयेत्पितृदेवताइति।अत्रपितृशब्दोनज
नकपरःकिंतुसपिंडीकरणजन्यपितृभावपरः।पितॄनितिबहुवचनात्
।यत्तुब्राह्मे।पितापितामहश्चैवतथैवप्रपितामहः।त्रयोह्यश्रुमुखाए
तेपितरःसंप्रकीर्तिताः।तेभ्यःपूर्वेत्रयोयेतुतेतुनांदीमुखाःस्मृताइति
।तन्महालयप्रकरणपठितत्वादितिहेमाद्र्यादयः।विभक्त्यादिविषय
विशेषःप्रयोगरत्नसंग्रहे।शुभायप्रथमांतेनवृद्धौसंकल्पमाचरेत्।
नषष्ठ्यायदिवाकुर्यान्महादोषोभिजायते।अनस्मद्दुशब्दानामरू
पाणामगोत्रिणां।अनाम्नावातिलाद्यैश्चनांदीश्राद्धंचसव्यवत्।कारिका
यांच।संबंधनामरूपाणिवर्जयेदत्रकर्मणि।पिंडदानव्यवस्थोक्ताभवि

भ्यत्पुराणे। पिंडनिर्वपणंकुर्यान्नवाकुर्यान्नराधिप। वृद्धिश्राद्धेमहाबाहो
कुलधर्माननवेक्ष्यत्विति। पिंडदानपक्षेविशेषमाहवृद्धवसिष्ठः। दधिकर्कंधु
संमिश्रान्पिंडान्दद्याद्यथाक्रमं। कर्कंधुर्बदरीफलं। एकैकस्मैपिंडद्वयंतुदे
यं। एकंनाम्नापरंतूष्णींतथापिंडद्वयंबुधइति। चतुर्विंशतिमतात्। अत्र
कर्तृव्यवस्थोक्ताकात्यायनेन। स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु
॥ पिंडानोद्वहनात्तेषांतस्याभावेतुतत्क्रमात्। तेषांसुतानामोद्वहनात्प्र
थमविवाहपर्यंतंपितास्वपितृभ्यःपिंडदानोपलक्षितंवृद्धिश्राद्धंकुर्यात्
। तस्यपितुरभावेतस्यसंस्कार्यस्यपितृणांयःक्रमस्तेनक्रमेणपितृव्यभ्रा
तुलादिर्दद्यान्नस्वपितृभ्यइतिहेमाद्रिः। अत्रपितुरभावोध्वंसएव। नत
त्संताभावः। तथात्वेप्रतिनिधित्वाद्देवतदीयेभ्यएवपित्रादिभ्योनदद्यात्ये
वेतिवचनवैयर्थ्यंस्यात्तंपितरमारभ्यस्वस्यपितृणांयःक्रमस्तेनक्र
मेणदद्यात्। तथाचतेषामितितच्छब्देनस्वपितरःपरामृश्यंतइतिव्या
ख्यानमयुक्तं। तस्याभावेतेषांदद्यादित्यनेनैवसाकांक्ष्यात्तत्क्रमादित्यस्य
वैयर्थ्यापत्तेः। ओद्वहनादित्यत्रविशेषःसायणीये। नांदीश्राद्धंपिताकु
र्यादाद्येपाणिग्रहेपुनः। अतऊर्ध्वंसुतःकुर्यात्स्वयमेवतुनांदिकमिति।
अन्नलक्षण्यांस्त्रियमुद्वहेत्। अरोगामुपयच्छेतेत्यादौसांगोद्वाहभाव
नापावरस्यकर्तृत्ववचनांदीश्राद्धेपितृकर्तृत्वप्राप्तमपिपिंडानोद्वहना
दित्यनेनापोदितमतऊर्ध्वमित्यनेनप्रसूयइतिविधिलाघवायातऊर्ध्व
मित्येवविधीयतेनतुपिताकुर्यादित्यपि। तेनप्रथमोद्वाहेपितुरभावेवरः
स्वयमेवकुर्यादित्युक्तं। जीवत्पिताकथंकुर्यादित्यपेक्षायामाहकात्या
यनः। वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति। येभ्यएवपितादद्यात्तेभ्यो
दद्यात्स्वयंसुतइति॥ तातेसतीतिवृद्धितीर्थसंन्यस्तपतितपदैःप्रत्येकं
संबध्यते। तत्रापिवृद्धौतीर्थेचेत्यनेकनिमित्तसमावेशेवाच्यभेदापत्ते
र्वृद्धिमंतर्वेदिमिनोत्यर्द्धंबहिर्वेदीत्यंतर्वेदिपदेइवसंधिदेशस्यजातपु
त्रःकृष्णकेशोऽग्निमादधीतेतिजातपुत्रादिपदानीववयोविशेषस्य।
वृद्धितीर्थपदेजीवत्पितृकाधिकारिकश्राद्धमात्रोपलक्षकेइतिश्राद्धम
यूखेतातच्चरणाः। येभ्यएवेत्येवकारेणमृतमातृमातामहस्यापितृत्वा
वैणेनभवतइतिबोध्यं॥ पितामहप्रपितामहयोर्जीवतोर्विशेषउक्तोवि

ष्णुपुराणे॥ पितरिजीवति यःश्राद्धंकुर्यात्सएषांपिताकुर्यात्तेषांकुर्यादि
तरिपितामहेचयेषांपितामहःपितरिपितामहेप्रपितामहेचनैवंदद्या
दिति। आश्वलायनानांविशेषस्तुगृह्यपरिशिष्टे। जीवत्पितासुनसंस्का
रेषुमातृमातामहयोस्तस्यांजीवत्यांमातामहस्यकुर्यादिति॥ अनयो
योरन्यतरजीवनेतुसवर्गईज्यः। उभयोर्जीवनेतुवर्गत्रयमपिपितृनिवृ
त्तिरेव। केचित्तुएतदूचसापिस्त्रीयमातृमातामहपार्वणएवभवतो
नपितृपार्वणमित्याहुरितिदिक्॥ ॥अथसंस्काराः॥ ॥तानुद्दिशति
गौतमः। गर्भाधानंपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्रा
शनचौलोपनयनानिचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणीसंयो
गः। पंचानांयज्ञानामनुष्ठानमष्टकापार्वणश्राद्धंश्रावण्याग्रहायणी
चैत्रीआश्वयुजीतिसप्तपाकयज्ञसंस्थाअग्न्याधेयमग्निहोत्रंदर्शपू
र्णमासौचातुर्मास्यानिआग्रयणेष्टिर्निरूढपशुबंधःसौत्रामणीति
सप्तहविर्यज्ञसंस्थाअग्निष्टोमोऽत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयो
तिरात्रोप्तोर्यामइतिसप्तसोमसंस्थाइत्येतेचत्वारिंशत्संस्काराइति
यस्यैतेचत्वारिंशत्संस्काराअष्टावात्मगुणाश्चसब्रह्मणःसायुज्य
माप्नोतीति॥ पार्वणस्थालीपाकश्रावणीतत्रक्रियमाणंश्रवणाकर्म।
आग्रहायणीतत्रक्रियमाणंप्रत्यवरोहणं। चैत्रीतत्रक्रियमाणःशूलग
वः। आश्वयुजीतत्रक्रियमाणंआश्वयुजीकर्म। अष्टावात्मगुणाः। दयास
र्वभूतेषुक्षांतिरनसूयाशौचमनायासोमंगलमकार्पण्यमस्पृहेति।
हारीतः। द्विविधएवसंस्कारोभवतिब्राह्मोदैवश्च। गर्भाधानादिस्मार्तो
ब्राह्मः। पाकयज्ञाहविर्यज्ञाश्चेतिदैवः। ब्राह्मेणसंस्कारेणसंस्कृतऋ
षीणांसलोकतांगच्छति। दैवेनोत्तरेणसंस्कृतोदेवानांसमानतांसलो
कतांगच्छतीति। अंगिरास्तुपंचविंशतिसंस्कारानाह। गर्भाधानंपुंस
वनंसीमंतोबलिरेवच॥ जातकृत्यंनामकर्मनिष्क्रमोन्नाशनंपरं। चौ
लकर्मोपनयनंतद्व्रतानांचतुष्टयं। स्नानोद्वाहौवाग्रहणमष्टकाश्चय
थायथं। श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं॥ उत्सर्गश्चाप्युपा
कर्ममहायज्ञाश्चनित्यशः। संस्कारानियताह्येतेब्राह्मणस्यविशेषतः॥
पंचविंशतिसंस्कारैःसंस्कृतायेद्विजातयः। तेपवित्राश्चयोग्याश्चश्राद्ध

दिषुसुयंत्रिताइति॥बलिर्विष्णुबलिः॥आश्वलायनस्तुसंज्ञाविशेष
मप्याह॥नैमित्तिकाःषोडशोक्ताःसमुद्वाहवसानकाः॥सप्तैवाग्रय
णाद्याश्चसंस्कारावार्षिकामताः॥मासिकंपार्वणंप्रोक्तमशक्तानांतु
वार्षिकं॥महायज्ञाश्चनित्याःस्युःसंध्यावच्चाग्निहोत्रवदिति॥पार्वण
श्राद्धंमासिकंमासिमासिकर्त्तव्यं।अशक्तानांवार्षिकंवर्षेएकवारंक
र्त्तव्यमिति॥संस्कारानुक्त्वायमः॥शूद्रोप्येवंविधःकार्योविनामंत्रे
णसंस्कृतइति॥होमोपिद्विजानामेव॥गार्भैर्होमैर्जातकर्मचूडामौं
जिनिबंधनैः॥बैजिकंगार्भिकंचैनोद्विजानामपमृज्यतइतिमनुवा
क्येद्विजग्रहणादितिधर्मप्रकाशे॥बीजंशुक्रशोणितेतत्संबंधिनि
षिद्धकालमैथुनादिप्रयुक्तंबैजिकं॥अशुचिगर्भकोशस्थितिजंगा
र्भिकं॥तदपगच्छतीतिकुल्लूकभट्टः॥बीजगर्भयोःपापनिमित्तत्वा
भावादुभयसंसर्गादशुचित्वमात्रमेनः॥शब्दार्थोनपापमितितुमे
धातिथिः॥विज्ञानेश्वरस्तुएवमेनःशमयतिबीजगर्भसमुद्भवमित्ये
तद्व्याख्यानेगोत्रव्याधिसंक्रांतिनिमित्तमेनोनतुपतितोत्पन्नत्वादि
त्याहपापनिरासार्थत्वाच्चनित्यतापि॥याज्ञवल्क्यः॥ब्रह्मक्षत्रियवि
ट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः॥निषेकाद्याःश्मशानांतास्तेषांवैमं
त्रतःक्रियाइति॥तेषांमंत्रतःक्रियाइत्युक्तेःशूद्रस्यामंत्रकाइतिग
म्यते॥तत्रतस्याध्ययनाभावात्तदंगभूतोपनयनवेदव्रतादीनांनिवृ
त्तिः॥जातकर्माद्याःस्त्रीणामप्यमंत्रकाः।तूष्णीमेताःक्रियाःस्त्रीणां
विवाहस्तुसमंत्रकइतिस्मृतेः।अत्रचोपनयनांतानामावश्यकत्वंन
स्नानादीनां।तेनयमिच्छेत्तुतमावसेद्ब्रह्मचर्यादेवप्रव्रजेदित्यादिसं
गच्छते॥आश्वलायनेनतुउपनिषद्गर्भलंभनंपुंसवनमनवलोभन
मप्युक्तं॥अन्येपिकर्णवेधादयःसंस्काराज्योतिःशास्त्रोक्तास्तत्रत
त्रवक्ष्यंते॥ ॥इतिसंस्कारोद्देशः॥तत्रगर्भाधानहेतुरजोदर्शनेप्रशस्ता
प्रशस्तकालानाहनारदः।कुलीरवृषचापांत्यद्वादशीप्रतिपत्स्वपि।प
रिघस्यचपूर्वार्द्धेव्यतीपातेचवैधृतौ॥संध्यासूपप्लवेविष्ट्यामशुभं
प्रथमार्त्तवं।उपप्लवोग्रहणं।तथा।रोगीपतिव्रतादुःखीपुत्रिणीभोग
भागिनी।पतिव्रताक्लेशयुक्तासूर्यवारादिषुक्रमात्॥गर्गः॥सुभगाचै

दुःशीलावंध्यापुत्रसमन्विता॥ धर्मयुक्ताव्रतश्रीचपरसंतानमोहि
नी॥सुपुत्राचैवदुःपुत्रापितृवेश्मरतासदा॥ दीनाप्रज्ञावतीचैवपुत्रा
ढ्याचित्रकारिणी॥साध्वीपतिव्रतानित्यंसुपुत्राकष्टचारिणी॥स्वक
र्मनिरताहिंस्रापुण्यापौत्रादिसंयुता॥नित्यंधनकथासक्तापुत्रधान्य
समन्विता॥मूर्खाःश्रीढ्यागुणवतीदस्रर्क्षादिःक्रमात्फलम्॥स्मृति
रत्ने॥शुभंचैवतुपूर्वाण्हेमध्यान्हेमध्यमफलं॥ अपराण्हेतुवैधव्यंपूर्वे
रात्रौशुभंभवेत्॥कश्यपः॥मलिनामंदवारेतुरात्रावपितथैवचेति॥त
था॥अमासंक्रांतिविष्ट्यांचव्यतीपातेचवैधृतौ॥परिघस्यचपूर्वार्द्धे
षट्चगंडातिगंडयोः॥व्याघातेनवशूलेतुनाड्यःपंचचतुर्दशीने॥वैधव्य
मर्थहानिंचसुतनाशंमहद्भयं॥वैधव्यंशत्रुवृद्धिंचदारिद्र्यंक्षीणजीवनं
॥तेजोहानिंसमायातिसदापुष्पवतीक्रमात्॥स्थलविशेषेणफलमाह
वसिष्ठः॥ग्रामाद्वहिःपरग्रामेचेत्स्यात्साव्यभिचारिणी॥पतिव्रतापतिस्था
नेसुशीलागृहमध्यके॥ग्राममध्येचवृद्धिस्थविधवाचदिगंबरा॥परा
गारेचदुःशीलाआयुष्यंजलसन्निधौ॥परगृहइत्यनेनपित्रादिगृहमपि
गृह्यते॥वस्त्रविशेषेणफलभेदमाहवसिष्ठः॥सुभगाश्वेतवस्त्रास्याद्दृ
ढवस्त्रापतिव्रता॥क्षौमवस्त्राक्षितीशस्यान्नववस्त्रासुखान्विता॥दु
र्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा॥नीलांबरधरानारीविधवापु
ष्पितायदि॥मलिनांबरतोनारीदरिद्रास्याद्रजस्वला॥देवरातः॥संमा
र्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधानाकुलटातदास्यात्॥तल्पोपभोगे
नपसिस्थिताचेद्दृष्टंरजोभाग्यवतीतदास्यादिति॥इदंफलंप्रथमरजोद
र्शनएव॥रजोबिन्दुफलमाहवसिष्ठः॥वस्त्रेस्थुर्विषमास्तत्रविधवःपुत्र
माप्नुयात्॥समास्त्रेत्कन्यकाचेतिफलंस्यात्स्वशभात्तवे॥शांतिमाहना
रदः॥निंद्यर्क्षेतिथिवारेषुयदिस्युष्पंप्रदृश्यते॥तत्रशांतिप्रकुर्वीतघृतदू
र्वातिलाक्षतैरिति॥शांतिस्तुशांतिमयूखेवक्ष्यते॥वसिष्ठः॥प्रसूतदो
षंयदिदृश्यतेतत्पुष्पंततःशांतिककर्मकार्यं॥विवर्जयेद्देवतदैकशय्यां
यावद्द्रजोदर्शनमन्यपक्षे॥ अथरजस्वलानियमाः॥दक्षः॥अंजनाभ्यं
जनेस्नानंप्रवासंदंतधावनं॥नकुर्यात्सार्तवानारीग्रहाणामीक्षणंतथा॥
नखानांछेदनंरज्जुतालुपत्रादिबंधनं॥दृष्येशरावेभुंजीतपेयंचांजलिना

पिबेत्॥वसिष्ठः॥त्रिरात्रंरजस्वलाऽस्नानाच्छुचिर्भवति॥नांज्यान्नाभ्यं-
ज्यान्नाप्सुस्नायादधःशायीतनदिवास्वप्यान्नाग्निंस्पृशेन्नरज्जुंसृजेन्न
दंतान्धावयेन्नमांसमश्नीयादिति॥चतुर्थदिनेचस्नानादिनाशुद्धात
थाचस्मृत्यर्थसारे॥ब्राह्मणीरजस्वलाचतुर्थेन्हिषष्टिमृत्तिकाभिःशौ
चंकृत्वाक्षत्रियादिस्त्रीपादपादन्यूनमृत्तिकाभिर्विधवाद्विगुणाभिः
शौचंकृत्वामलंप्रक्षाल्यसचैलंसंगवेस्नायादिति॥अतःसूर्योदयात्पू
र्वंस्नानाचरणंदुराचारएव॥इतिरजस्वलानियमाः॥अथगर्भाधानं॥त
च्चऋतौकार्यं॥तदाहयाज्ञवल्क्यः॥षोडशर्त्तुनिशाःस्त्रीणांतस्मिन्युग्मा
सुसंविशेत्॥ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत्॥निशाग्रहणं
दिवसनिषेधार्थं॥तथाचश्रुतिः॥प्राणंवाएतेप्रस्कंदंतियेदिवारत्यासंयु
ज्यंतेब्रह्मचर्यमेवतद्यद्रात्रौसंयुज्यंतइति॥पर्वस्विस्त्रिवलावपि॥ना
र्त्तावपिदिवाव्रजेदिति॥आद्याश्चतस्रइतिचतुर्थदिनेरजसोनिवृत्तौ
ज्ञेयं॥रजोनिवृत्तौतुदेवलः॥तस्मात्त्रिरात्रंदारान्वैपुष्पितान्परिवर्जयेदि
ति॥हिरण्यकेशिसूत्रमपि॥चतुर्थ्यांस्नातांप्रयतवस्त्रामलंकृतांब्राह्म
णसंभाषामान्वस्योपह्वयतइति॥ब्राह्मणसंभाषांप्रशस्तब्राह्मणेनकृ
तसंभाषणां॥आपस्तंबः॥स्नानेरजस्वलायास्तुचतुर्थेहनिशस्यते॥गम्या
निवृत्तेरजसिनानिवृत्तेकथंचनेति॥युग्मासुफलमाहमनुः॥युग्मासुपु
त्राजायंतेस्त्रियोयुग्मासुरात्रिष्विति॥एकस्यांसकृदेवगच्छेत्॥यथोक्तं॥
एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्॥सुस्थइंदौसकृत्पुत्रंलक्ष
ण्यंजनयेत्पुमानिति॥सुस्थेएकादशादिस्थानस्थिते॥क्षामत्वाच्चस्नि
ग्धभोजनाकार्यारजःक्षयार्थं॥यथोक्तं॥पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्य
धिकेस्त्रियाइति॥नन्वयुग्मासुशोणिताधिक्येपुरुषाकृतिःस्त्री॥अयु-
ग्मासुशुक्राधिक्येस्त्र्याकारःपुमानितिज्ञेयं॥शुक्रशोणितयोरुपादान
कारणत्वात्॥ब्रह्मचार्येवेतियत्रब्रह्मचर्यंविहितंश्राद्धभोजनादौतत्रग
मनेनदोषः॥पर्वाणिविष्णुपुराणे॥चतुर्दश्यष्टमीचैवअमावास्याचपू-
र्णिमा॥पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवचेति॥अगमनेदोषमाहपरा
शरः॥ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति॥घोरायांभ्रूणहत्यायां
युज्यतेनात्रसंशयइतिक्वचित्स्वस्थःसन्नितिपाठः॥अथगमनेनिषिद्धका-

लाः मनुः। अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्य
मप्यृतौ स्नातको द्विज इति॥ ज्योतिःशास्त्रे। पित्र्यपोर्ण्याने ऋतं चैव विधिवं
त्यक्त्वा नारीं सुप्रसन्नः प्रसन्नां। पुष्टः स्वामां पुत्रकामोऽभिगच्छन् सल्लक्षण्यं
पुत्रमाप्नोति पित्र्यं। योगपद्ये देवलः। योगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजे
त्। रक्षणार्थमपुत्रां वा ग्रहणक्रमतोऽपि वेति। तीर्थं रजः। विशेषमाह याज्ञव
ल्क्यः। यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति। यथाकामी ऋतुं वि
नापि स्त्रीकामनायां स्त्रियमभिरमयेत्॥ एवं च। ऋतुं नोपैति यो भार्यामनृ
तौ यश्च गच्छति। तुल्यमाहुस्तयोः पापमयोनौ यश्च सिंचतीति। बौधाय
नीयेनर्तुगमननिषेधः स स्त्रिया अकामनायां ज्ञेयः। गर्भिणीगमनमप्य
नुजानात्यत्रिः। षण्मासात्कामयेन्मर्त्यो गर्भिणीं स्त्रियमेव हि॥ आदंतज
ननादूर्ध्वमेवं धर्मो न हीयत इति। बालके जाते तस्य दंतजननादूर्ध्वं ग
च्छेदित्यर्थः। स्त्रीणामप्यगमने दोष इति हेमाद्रौ॥ ऋतुस्नातां तु या ना
री भर्त्तारं नोपगच्छति। तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेदिति
। अत्र ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायत इति॥ कूर्मपुराणवा
क्येनैकपुत्रोत्पादनेन शास्त्रार्थस्य कृतत्वादानृण्ये च जाते न पुत्रांतरो
त्पादनमावश्यकमिति केचित्। तन्न। यद्यप्यानृण्यं जातं तथापि एकपु
त्रनिंदापूर्वकं बहुपुत्रप्राशस्त्यमुक्तं। भारते। अपत्यं तु ममैवैकं कुलेमह
ति भारत। अपुत्रं चैकपुत्रत्वमित्याहुर्धर्मवादिनः। चक्षुरेकं च पुत्रश्च अ
स्ति नैकं च भारत। चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलस्य च इति। तथा ऋ
तुस्नातां तु यो भार्यामित्यस्य एकपुत्रानंतरं ऋतौ जाते प्रत्यविधानात्।
तथार्थवादेऽपि। एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाश्वमे
धेन नीलं वा वृषमुत्सृजेदिति॥ अतो बहुपुत्रोत्पत्तिरप्रतिषेधाच्छास्त्री
यकर्त्तव्या। अथ गर्भिणीपतिधर्माः॥ आश्वलायनः। वपनं मैथुनं तीर्थं व
र्जयेद्गर्भिणीपतिः। श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित्। श्राद्ध
भोजनमिति केचित्॥ अत्र प्रमाणं मृग्यं। अन्यत्कालविधानव्याख्यातं
सप्तमान्मासादिति सर्वत्र ज्ञेयं। क्षौरं शवानुगमनं नखकृंतनं च श्राद्धं च वा
स्तुकरणं त्वति दूरयानं। उद्वाहमंबुधिजले गमनं तथैव मायुः क्षयं भवति ग
र्भिणिकापतीनां। क्वचित्तु उद्वाहमौपनयनं जलधेश्च गाहमिति पाठः॥

ज्योतिषरत्नेगालवः॥दहनंवपनंचैवचौलंवैगिरिरोहणं॥नावआरोहणं
चैववर्जयेद्गुर्विणीपतिः॥प्रव्यक्तगर्भापतिरब्धियानंमृतस्यवाहंक्षुरक
र्मसंगं॥तस्यांतुपत्नेनगयादितीर्थेयागादिकंवास्तुविधिंनकुर्यात्
॥आयुःक्षयंतत्साधनं॥अथगुर्विणीपतिनियमाः॥पद्मपुराणेऽदि
तिंप्रतिकाश्यपः॥नावस्करेषूपविशेन्मुसलोलूखलादिषु॥जलं
चनावगाहेतशून्यागारंचवर्जयेत्॥विलिखेन्ननखैर्भूमिंनांगारेण
नभस्मना॥नशयालुःसदातिष्ठेद्व्यायामंचविवर्जयेत्॥नतुषांगा-
रभस्मास्थिकपालेषुचसंविशेत्॥वर्जयेत्कलहंलोकैर्गात्रभंगंत
थैवच॥नप्राचीनोत्तरशिरानचैवाधःशिराःक्वचित्॥नवस्त्रहीनानो
द्विग्नानचार्द्रचरणासती॥मात्स्ये॥संध्यायांहिनभोक्तव्यंगर्भिण्या
वरवर्णिनि॥नस्थातव्यंनगंतव्यंवृक्षमूलेषुसर्वदा॥नशयालुःसदा
तिष्ठत्वद्वाछायांविवर्जयेत्॥सर्वौषधीभिःकोष्णेनवारिणास्नानमा
चरेत्॥स्नानशीलातृतीयायांपार्वत्याभक्तिमाचरेत्॥गर्भिणीकुंजरा
श्वादिशैलहर्म्यादिरोहणं॥व्यायामंशीघ्रगमनंशकटारोहणंत्य
जेत्॥शोकरक्तविमोक्षंचसाध्वसंकुक्कुटासनं॥व्यवसायंदिवास्वा
पंरात्रौजागरणंत्यजेत्॥अतिक्षारंतुनाश्नीनादत्यम्लमतिभूरिच॥
अत्युष्णमतिशीतंचगुर्वाहारंपरित्यजेत्॥यस्तुतस्याभवेत्सुतःस्थि
रायुर्वृद्धिसंयुतः॥अन्यथागर्भपतनंसाचाप्नोतिनसंशयइति॥यात्रावि
षयेबृहस्पतिः॥चतुर्थेमासिषष्ठेवाप्यष्टमेगर्भिणीयदा॥यात्रानित्यंवि
वर्ज्यास्यादाषाढेतुविशेषतः॥चतुर्थात्सप्तमादष्टमादारभ्येत्यर्थः॥इदंच
समर्थासमर्थस्त्रीपरं॥अत्यसमर्थायास्तुचतुर्थमासा दारभ्यैव
यात्रावर्ज्येत्यर्थः॥आषाढेतुसर्वमासेषुदोहदमप्यवश्यंप्रदेयमित्या
हयाज्ञवल्क्यः॥दोहदस्याप्रदानेनगर्भोदोषमवाप्नुयात्॥वैरूप्यंम
रणंवापितस्मात्कार्यंप्रियंस्त्रियाः॥इतिगर्भाधानं॥अथपुंसवनं॥या
ज्ञवल्क्यः॥गर्भाधानमृतौपुंसःसवनंस्पंदनात्पुरेति॥गर्भचलनका
लश्शारीरके॥तस्माच्चतुर्थेमासिचलनादावभिप्रायंकरोतीति॥पारस्क
रः॥मासेद्वितीयेवायदहःपुंसानक्षत्रेणचंद्रमायुक्तःस्यादिति॥पुनस्स
भाणितु॥हस्तोमूलःश्रवणःपुनर्वसुर्मृगशिरास्तथापुष्यः॥पुंसंज्ञकेषु

कार्येष्वेतानिशुभानिधिष्ण्यानि॥ विशेषमाहजातूकर्ण्यः॥ द्वितीयेवा
तृतीयेवामासिपुंसवनंभवेत्॥व्यक्तेगर्भेथवाकार्यंसीमंतेनसहाथवे
ति॥व्यक्तेअन्येनानुक्तेपिज्ञातुंशक्ये॥ अत्रसतिसंभवेशुक्रास्तमल
मासादिवर्ज्यं असंभवेतत्रापिकार्यमावश्यकत्वात्॥इदंचचंद्रताराबले
कार्यं॥पुंसवनंप्रकृत्यबलोपपन्नेदंपत्योश्चंद्रताराबलान्विते इतिना
रदवचनात्॥इदंचपुमान्सूयतअनेनेतिव्युत्पत्त्याकर्मनामधेयं॥
तच्चकर्मपंचसहितमाषद्वययुक्तदधिप्राशनं॥अत्रकोष्ठिकालनि
र्णयेबृहस्पतिः॥कुलीरमिथुनंकन्यांहित्वाशेषाःशुभावहाः॥इति॥
इतिपुंसवनं॥अथानवलोभनं॥वैजवापगृह्ये॥अथपुंसवनानवलो
भनंकरोतिमासिद्वितीयेवातृतीयेवेति॥इदंचपुंसवनदिनएवतदु
त्तरंकार्यम्॥पुंसवनमुक्त्वाऽथास्यैमंडलागारच्छायायामानीतामोष
धींनस्तःकरोत्याश्वलायनगृह्येऽम्नानात्॥इदमपितस्यस्कक
र्मणोनअवलुप्यतेगर्भोनेनेतिव्युत्पत्त्यागर्भाविनाशफलकंयत्कर्म
तस्यनामधेयंअकारश्छांदसः॥तथाचमंत्रलिंगमाह॥पौत्रमघमानि
मायामिति॥पुत्रसंबंधिअघंपापंमानिमायांमाप्राप्नुयामिति॥एवं
चनाशकारणपापाभावाद्गर्भोनाशइति॥एतेचकर्मणीगर्भसंस्का
रत्वात्प्रतिगर्भमावर्तेते इतिनारायणः॥तन्मतेसकृत्संस्कृतानारी
सर्वगर्भेषुसंस्कृतेतिदेवलवाक्यंसीमंतोन्नयनविषयमेवेतिप्रती
मः॥विज्ञानेश्वरस्तुपुंसवनस्यापिसकृदनुष्ठानमिच्छति॥तत्रयुक्ति
श्चिंत्यः॥इत्यनवलोभनं॥अथसीमंतोन्नयनं॥आपस्तंबः॥सीमंतो
न्नयनंप्रथमेगर्भेचतुर्थेमासीति॥सांख्यायनगृह्येपि॥सप्तमेमासि
प्रथमेगर्भेसीमंतोन्नयनमिति॥याज्ञवल्क्यः॥षष्ठेष्टमेवासीमंत
इति॥आश्वलायनः॥आपूर्यमाणपक्षेयदापुंसानक्षत्रेणचंद्रमायुक्तः
स्यादिति॥पूर्यमाणपक्षःशुक्लपक्षः॥पुंनक्षत्राण्युक्तानि॥इदंचसकृ
देवकार्यम्॥प्रथमेगर्भइतिसांख्यायनापस्तंबोक्तेः॥स्त्रीसंस्कारत्वा
च्चसकृत्संस्कृतानारीसर्वगर्भेषुसंस्कृतेतिवचनेप्रवृत्तेः॥यत्तुस्मृति
चंद्रिकायांविष्णुः॥सीमन्तोन्नयनंकर्मतत्स्त्रीसंस्कारइष्यते॥गर्भेगर्भेप्रयुंजते
इति॥तत्रकेचिद्गदाधरनारदःस्पष्टः॥हारीतस्तुस्पष्टमेवाह॥सकृत्संस्कृ

तसंस्काराः सीमंतेन द्विजस्त्रियः॥ यंयं गर्भं प्रसूयंते स सर्वः संस्कृतो भ
वेदिति॥ इदं च दैवज्ञोदितेशुभमुहूर्ते कार्यं॥ यथाह गर्गः॥ सीमंतोन्न
यनं कार्यं शुभांशे शुभलग्नके॥ कुलीरमृगकन्याश्च वर्ज्याः शेषास्तु
शोभना इति॥ अत्रापि शुक्रास्तादिव्यतिरिक्तकाललाभेन तन्न का
र्यमन्यथास्तादावपि। इति। नियतकालत्वात्॥ सीमंते च भोक्तुर्दो
षमाह धर्मप्रकाशे धौम्यः॥ ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा॥
जीवश्राद्धे नवश्राद्धे भुक्त्वा चांद्रायणं चरेदिति ब्रह्मौदनसाधनांग
भूतं जातश्राद्धे पुत्रे जाते वृद्धिश्राद्धं॥ अजातसीमंतायाः प्रसूतौ सत्य
व्रत आह॥ स्त्री यदा कृतसीमंता प्रसूयेत कदाचन॥ गृहीतपुत्रा विधि
वत्पुनः संस्कारमर्हति॥ पुनः पादपूरणार्थः। यः संस्कारो तिक्रांतः स क
र्तव्य इत्यर्थः॥ इति सीमंतोन्नयनं॥ सूतिकागृहमाह वसिष्ठः॥ ऐंद्रे तु
विक्रमस्थानमाग्नेये सूतिकागृहं॥ याम्यायां शयनस्थानं वायव्यां
पशुमंदिरं। कौबेर्यां तु धनस्थानमैशान्यां देवतालय इति। पद्मपुरा
णे पारस्करः॥ प्रविशेत्सूतिकागारं कृतरक्षं समंततः॥ प्राग्द्वारमुत्त
रद्वारमथवा सुदृढं शुभं। देवानां ब्राह्मणानां च गवां कृत्वा च पूजनं॥
एरंडमूलचूर्णेन सघृतेन तथैव तां॥ सुखप्रसवनार्थाय पश्चात्कायं
नुलेपयेदिति॥ अथ जातकर्म॥ तत्र पितुः पुत्रे जाते स्नानमाह संवर्तः॥
जाते पुत्रे पितुः स्नानं सचैलं तु विधीयत इति॥ इदं च शीताद्भिः कान्य
मेव चेति॥ इदं च रात्रावपि कार्यमित्याह। रात्रौ स्नानं न कुर्वीत दानं चै
व विशेषतः॥ नैमित्तिके च कुर्वीत स्नानं दानं च रात्रिष्विति॥ ग्रहणो
द्वाहसंक्रांतियात्रार्तिप्रसवेषु च॥ दानं नैमित्तिकं ज्ञेयं रात्रावपि न दु
ष्यतीति। संवर्तः॥ माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः॥ जैमिनिः
॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं॥ छिन्ने नाले ततः पश्चात्सू
तकं च विधीयत इति॥ अस्माद्यावन्नालच्छेदोत्तरमेवाशौचप्रवृत्ति
रिति भाति॥ यं चस्तु यावन्न छिद्यते नालं तावच्छिशुमृतौ पूर्णं सूत
कं नाप्नोति॥ नालच्छेदोत्तरं तु शिशुमृतौ संपूर्णं प्राप्नोतीति व्याचख्युः।
एवं च जायते तेषां जन्मोत्तरमेवाशौचप्रवृत्तिरिष्टेति युक्तं चेदं॥ आशौ
चं जननोत्तरमेव प्रवर्तते॥ जातकर्म वृद्धिश्राद्धं नादौ तु नालकालिकी

शुद्धिर्वचनेन बोध्यते॥ कर्त्तुस्तात्कालिकी शुद्धिरितिवत्॥ एवं च स्नानो
त्तरं संध्यादिकं न भवत्येवेति दिक्॥ दानार्थं दिनमनुज्ञातमादिपुराणे
॥ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनां॥ आयांति तस्मात्तदहः पु
ण्यं पूज्यं च सर्वतः॥ तत्र दद्यात्सुवर्णं तु भूमिं गां तुरंगं रथमिति॥ पुत्र
मुखावलोकनस्य फलमाह वसिष्ठः॥ जातमात्रकुमारस्य मुखमस्या
वलोकयेत्॥ पिता ऋणाद्विमुच्येत पुत्रस्य मुखदर्शनादिति॥ आशौ
चांतरेपि पुत्रे जाते तात्कालिकीं शुद्धिमाह प्रजापतिः॥ सूतके तु सपु
त्न्ये पुत्रजन्म यदा भवेत्॥ कर्त्तुस्तात्कालिकी शुद्धिरिति॥ जातकर्मणि
प्रधानमाहाश्वलायनः॥ कुमारं जातं पुराऽन्यैरालंभात्सर्पिर्मधुनी हि
रण्यनिकषं हिरण्येन प्राशयेदिति॥ कात्यायनसूत्रे तु विशेषः॥ अना
मिकया सुवर्णांतर्हितया मधुघृते प्राशयति घृतं वेति॥ तत्कालमाह
गर्गः॥ जातमात्रकुमारस्य जातकर्म विधीयते॥ स्तनप्राशनतः पूर्वं ना
भिकर्त्तनतो पि वेति॥ पूर्वमित्यर्थः॥ अत्र च वृद्धिश्राद्धमामेन कार्यं
मित्याह प्रचेताः॥ स्त्रीशूद्रः श्वपचश्चैव जातकर्मणि चाप्यथ॥ आ
मश्राद्धं सदा कुर्याद्विधिना पार्वणेन तु॥ यदा तु पुत्रजन्म मूलादिन
क्षत्रेषु तदा मुखावलोकनजातकर्मादि शांतिं विना न कुर्यात्॥ एवं संक्रां
तिविष्ट्यादावपि॥ शांतिस्तु शांतिमयूखे वक्ष्यते॥ पुरुषापराधेन का
ले जातकर्माननुष्ठाने कालांतरमाह बैजवापः॥ जन्मनोऽनंतरं कार्यं जा
तकर्म यथाविधि॥ दैवादतीतकाले चेदतीते सूतके भवेदिति॥ अस्य फ
लमाहाश्वलायनः॥ गर्भांबुपानदोषाणामपनुत्त्यै शिशुं पिता॥ प्राशये
न्मधुना सार्द्धं साज्यं हेमरसं शुभमिति॥ स्त्रीणामप्येतदमंत्रकं कार्यं
॥ इति जातकर्म॥ दशदिनमध्ये विशेषमाह व्यासः॥ सूतिकावासनि
लया जन्मदानाम देवताः॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता
॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा॥ त्रिष्वाशौचं न कुर्वीत सूतके पु
त्रजन्मनीति॥ दद्यात्तु प्रथमे हेम षष्ठे वासः सप्तमे पि वा॥ बलिदानं तु द
शमे दिवसे षष्ठे स्वर्णदानं प्रशस्यत इति॥ अत्राशौचाभावो दानादिवि
षय एव न संध्यादिविषये॥ मार्कंडेयोपि॥ रक्षणीया तथा षष्ठी निशा त
त्र विशेषतः॥ रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः॥ पुरुषाः श

हस्ताश्वनृत्यगीतैश्चयोषितः॥रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके
नारदोपि॥जननात्सप्तमेचाह्निमृत्युरायातिघातकः॥दिनेदिनेचरक्षे
यंकर्त्तव्यायुर्विवृद्धये॥इतिप्रथमादिदिनकृत्यं॥आश्वलायनगृह्ये॥
जातकर्मोत्तरंकालांतरमनुक्त्वानामचास्मैदध्युर्घोषवदाद्यंतरंतस्थम
भिनिष्ठानांतंद्व्यक्षरंचतुरक्षरंवाद्व्यक्षरंप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्च
सकामोयुग्मानित्वेवपुंसामयुग्मानिस्त्रीणामभिवादनीयंचसमीक्षे
तत्तन्मातापितरौविद्यातामोपनयनादितिनामकरणमुक्तं॥तेनज्ञाय
तेजातकर्मोत्तरमेवकालः॥अस्यार्थः॥वर्गाणांप्रथमद्वितीयाःजिह्वा
मूलीयोपध्मानीयौशषसाश्चेत्यघोषाअन्येघोषवंतः।यरलवाअंत
स्थाः।अभिनिष्ठानोविसर्जनीयः॥अक्षराणिस्वराः।पुनर्युग्मानीति
ग्रहणंषडक्षरादिग्रहणार्थं।अभिवादनीयंअवकहडचक्रप्रमाणेनन
क्षत्रं।मनुः।नामधेयंदशम्यांतुद्वादश्यांवापिकारयेत्॥पुण्येतिथौमु
हूर्तेवानक्षत्रेवागुणान्वितइति॥दशम्यामतीतायामितिव्याख्यातारः
णिजविवक्षितः॥अहन्येकादशेनामेति॥याज्ञवल्क्योपि॥कालांतरंभ
विष्य त्पुराणे॥नामधेयंदशम्यांतुकेचिदिच्छंतिपार्थिव॥द्वादश्यामप
रेरात्र्यांमासेपूर्णेतथापरे॥अष्टादशेहनितथावदंत्यन्येमनीषिणइ
ति॥गृह्यपरिशिष्टे॥जननाद्दशरात्रेसंवत्सरेनामकरणमिति॥व्युष्टेती
तेविशेषमाहपतंजलिः॥घोषवदाद्यंतरंतस्थमवृद्धंत्रिपुरुषानूकमिति
॥नामकरणयोरधिकारीतस्ययेत्रयःपुरुषास्ताननुकापत्यभिधत्तेइ
तित्रिपुरुषानूकंअन्येषामपीतिदीर्घइतिप्रदीर्घइतिप्रदीपकारः॥प्रयो
गपारिजातेकपिलसंहितायां॥एकादशेन्हिविधिवन्नामकुर्यात्कुलो
चितम्॥देवतानांविशेषेणपित्रोर्वानामशस्यते॥नैवकार्यंनृपादीनां
नामजीवनहेतुतः॥पूर्वःपरस्यवर्णस्यहीनस्यापिनधारयेदिति॥कर्तुः
पित्रोरित्यर्थः।इदंचदाक्षिणात्यशिष्टाआचरंति॥मनुः॥मंगल्यंब्राह्म
णस्यस्यात्क्षत्रियस्यबलान्वितं॥वैश्यस्यधनसंयुक्तंशूद्रस्यतुजु
गुप्सितमिति॥स्त्रीषुविशेषमाह॥गोभिलः॥अयुग्दांतंस्त्रीणामि
ति॥दांतंयशोदाशर्मदेत्यादिकेचित्तुयन्नामतदाशब्दांतंवर्णयंति।त
थाचपार्वतितदागंगदेत्येवप्रयोज्यंतथाचतेषांमतेयशोदेत्यादिप्रय

शोदाद्इतिप्रयुज्येत॥इदंचव्याख्यानंनक्कापिनिबंधेषुदृष्टम्॥अ
तःपूर्वोक्तमेवज्यायइति॥शंखलिखिताभ्यांनामोक्तामाससंबंध
मपिनामकार्यमितिकेचिदित्युक्तं॥तत्रमासनामानिवसिष्ठआह॥
चैत्रादिमासनामानिवैकुंठोथजनार्द्दनः॥उपेंद्रोयज्ञपुरुषोवासुदे
वस्तथाहरिः॥योगीशःपुंडरीकाक्षःकृष्णोनंतोऽच्युतस्तथा॥चक्र
धारीतिचैतानिक्रमादाहुर्मनीषिणइति॥अत्रकेचिन्मासानांमार्ग
शीर्षादिमितिसामान्यलिंगान्मार्गशीर्षमारभ्यमासनामानिकल्प
यंति॥तद्वसिष्ठेचैत्रग्रहणेनविशेषाभिधानादुपेक्ष्यं॥मलमासेज
न्मचेदुत्तरमासनाम॥षष्ट्यातुदिवसैर्मासःकथितोबादरायणैः॥
पूर्वमर्द्धंपरित्यज्यकर्त्तव्याचोत्तरेक्रियेत्युत्तरमासशेषत्वेनाभिधा
नात्॥विष्टिव्यतीपातादौकर्त्तव्यमित्याहगर्गः॥व्यतीपातेचसंक्रा
न्तौग्रहणेवैधृतावपि॥श्राद्धंविनाशुभंकर्मप्राप्तकालेपिनाचरेदिति
॥अतःशुभेमुहूर्त्तेपूर्वोक्तान्यतमकार्यंशुक्रास्तादीनांतुनैवविचा
रः॥विशेषमाहकश्यपः॥उक्तकालेप्रकर्त्तव्याद्विजानामखिलाःक्रि
याः॥अतोन्येषुतुकालेषुकर्त्तव्याश्चोत्तरायणे॥सुरेज्येप्यसुरेज्येवा
नास्तगेनचवार्द्धके॥शुभलग्नेशुभांशेचशुभेन्हिशुभवासरे॥चंद्रता
राबलोपेतेनैधनादृपवर्जिते॥नाममंगलघोषेणरहस्यंदक्षिणश्रु
तौ॥बृहस्पतिः॥पूर्वाण्हःश्रेष्ठइत्युक्तोमध्यान्होमध्यमःस्मृतः॥अ
पराण्हंचरात्रिंचवर्जयेन्नामकर्मणीति॥इदंचपितुरन्येनापिसंनि
हितेनकार्यम्॥इतिनामप्रकरणं॥कर्णवेधमाहबृहस्पतिः॥जन्म
तोदशमेचान्हिद्वादशेवाथषोडशे॥सप्तमेमासिवापुनरिति॥गर्गः
मासेषष्ठेसप्तमेवाप्यष्टमेमासिवत्सरे॥कार्त्तिकेपूर्णमासेवाचैत्रेवा
फाल्गुनेपिवा॥कर्णवेधंप्रशंसंतिशुक्लपक्षेशुभेदिनेइति॥कार्त्तिका
दिकंपूर्वकालापेक्षयाभिन्नं॥पूर्णमासइतिस्वतंत्रःकालः॥नविशेष
णविशेष्यभावः॥व्यासः॥योजन्ममासेक्षुरकर्मयात्रांकर्णस्यवेधंकु
रुतेतिमोहात्॥मूढःसरोगीधनपुत्रनाशंप्राप्नोतिमूढंवधबंधनानि
॥अन्येविधिनिषेधाज्ज्योतिःशास्त्रादवसेयाः॥विशेषउक्तःसुबोधः॥
शातकुंभमयीसूचीवेधनेतुशुभप्रदा॥राजतीवाऽयसी वापियथा

विभवतःशुभाइति॥इतिकर्णवेधः॥निष्क्रमणमाहतुःशंखलिखि
तौ॥अतऊर्ध्वंतृतीयेमासिनिष्क्रमणिका॥याज्ञवल्क्यः॥चतुर्थेमा
सिनिष्क्रमइति॥कर्त्तुमाहशंखः॥चतुर्थेमासिकर्त्तव्यंबालस्यादित्य
दर्शनमिति॥मुहूर्त्तसंग्रहे॥पूर्वपक्षःशुभःप्रोक्तःकृष्णोप्यंत्यत्रिकंवि
नेति॥अत्रदिवसानुपादानाद्दैवज्ञोदितंतन्मासस्थंशुभंदिनंग्राह्यं॥
कारिकायांविशेषः॥आदायगेहान्निष्क्रम्यगच्छेयुर्देवतालयं॥अ
भ्यर्च्यदेवतांसम्यगाशिषोवाचयेत्तथा॥कृत्वाप्रदक्षिणंगेहमानयं
तिततःस्वकं॥मातृष्वसृगृहंवापिमातुलादेर्गृहंनयेत्॥तदाशीर्वादाद्यैः
स्याद्दीर्घायुरभिनंदितः॥जयंतस्यमतेनापिलिखितःशिशुनिष्क्रम
इति॥मातुलादिर्बालस्य॥इतिनिष्क्रमणं॥उपवेशनमुक्तंपद्मपुराणे
॥अष्टमेचतथामासिभूमौतमुपवेशयेत्॥तत्रसर्वेग्रहाःशस्ताभौ
मोत्रविशेषतः॥वराहंपूजयेद्देवंपृथिवींचतथाद्विजः॥पूजनंपूर्व
वत्कृत्वागुरुदेवद्विजन्मनां॥भूभागमुपलिप्याथकृत्वातत्रतुमंड
लं॥शंखपुण्याहशब्देनभूमौतमुपवेशयेत्॥तत्रमंत्रउक्तस्तत्रैव॥
रक्षैनंवसुधेदेविसदासर्वगतंशिशुमिति॥आयुःप्रमाणंनिखिलंनि
क्षिपस्वहरिप्रिये॥अचिरादायुषस्त्वस्ययेकेचित्परिपंथिनः॥जीवि
तारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्॥धारिण्यशेषभूतानांमातस्त्व
मधिकाह्यसि॥कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतामिति॥इत्यु
पवेशनं॥अन्नप्राशनमाहयमः॥ततोन्नप्राशनंमासिषष्ठेकार्यंयथा
विधि॥अष्टमेवाथकर्त्तव्यंयद्वेष्टंमंगलंगृहेइति॥कुलेयद्दैवमंगलंत
दैवकार्यमितिकालांतरं॥लौगाक्षिः॥षष्ठेमासेन्नप्राशनंजातेतुवापू
र्णेसंवत्सरेवेति॥अत्रापिदिनविशेषानुपादानाद्दैवज्ञोदितंशुभंदि
नंग्राह्यं॥कर्त्तव्यमाहमार्कंडेयः॥देवतापुरतस्तस्यधात्र्युत्संगगत
स्यच॥अलंकृतस्यदातव्यमन्नपात्रेथकांचने॥मध्वाज्यकनकोपेतं
प्राशयेत्पायसंतुतमिति॥आश्वलायनगृह्येतुविशेषः॥षष्ठेमास्यन्न
प्राशनमाजमन्नाद्यकामस्तैत्तिरंब्रह्मवर्चसकामोघृतौदनंतेजस्कामो
दध्योदनमिंद्रियकामोभवतीतिविज्ञायते॥आजंमांसं॥तित्तिरसमभि
व्याहारात्॥तत्रव्यंजनस्थानीयत्वान्मांसस्थानेग्राह्यमेव॥अन्नप्राश

नेफलाधिक्यमाश्वलायनस्मृतौ॥स्वमलप्राशनाच्छुद्धौप्राशयेद्वा
युषेपिवेति॥इत्यन्नप्राशनं॥तदुत्तरंजीविकापरीक्षोक्तामार्कंडेये
न॥देवाग्रतोथविन्यस्यशिल्पभांडानिसर्वशः॥वस्त्राणिचैवशस्त्रा
णिततःपश्येत्तुलक्षणं॥प्रथमंयत्स्पृशेद्बालस्ततोभांडंस्वयंतदा॥
पात्रादि॥शस्त्रंयुद्धवस्तु प्रथमंयत्स्पृशेद्बालस्ततोभांडंस्वयंतदा॥
जीविकातस्यबालस्यतेनैवतुभविष्यतीति॥इतिजीविकापरीक्षा॥
चूडाकर्मोहमनुः॥चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः॥प्रथमे
ब्देतृतीयेवाकर्तव्यंश्रुतिचोदनात्॥यमः॥द्वितीयेवातृतीयेवाकर्त
व्यंश्रुतिचोदनादिति॥आश्वलायनः॥तृतीयेवर्षेचौलंयथाकुलध
र्मंवेति॥तथाउदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मो
पनयनगोदानविवाहाइति॥कारिकायां॥यथाकुलंचकेषांचिदुप
नीत्यासहेष्यतइति॥आश्वलायनस्मृतौ॥तृतीयेवत्सरेचौलंकुर्वी
तास्योत्तरायणे॥शुक्लपक्षेशुभर्क्षेतुकृत्वाभ्युदयिकंतथा॥शुभर्क्षे
इतिज्योतिर्विदुपदिष्टमुहूर्तेइत्यर्थः॥विवाहेचंडेश्वरः॥मार्गमासित
थाज्येष्ठेक्षौरंपरिणयंव्रतं॥ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत्॥
वृत्तशते॥नजन्मधिष्ण्येनचजन्ममासेनजन्मकालीयदिनेविदध्या
त्॥ज्येष्ठेनमासेप्रथमस्यसूनोस्त्वाद्यासुनाया अपिमंगलानीति॥नक्ष
त्राणिनिषेधतिव्यासः॥नक्षत्रेतुनकुर्वीतयस्मिन्जातोभवेन्नरः॥नचै
ष्ठपद्योःकार्यंनैवाग्नेयेचभारत॥तिथिंप्रतिपदंरिक्तांविष्टिंचैवविवर्ज
येत्॥विहितान्यपितेनैवोक्तानि॥अश्विनीश्रवणःस्वातीचित्रापुष्यः
पुनर्वसुः॥धनिष्ठारेवतीज्येष्ठामृगहस्तेषुकारयेदिति॥क्षौरमितिशे
षः॥अन्येचनक्षत्रयोगकरणविधिनिषेधाज्योतिःशास्त्रादवसेयाः
॥गोत्रविशेषणविशेषमाहलौगाक्षिः॥दक्षिणतःकमुंजावसिष्ठानामु
भयत्रिकश्यपानांमुंडाभृगवःपंचचूडाअंगिरसोबालिमेकेमंगला
र्थंशिखिनोन्येयथाकुलधर्मं॥कमुंजाचूडाक्वचित्कुमुंजेतिपाठः॥
अन्येबालिकेशपंक्तिंकुर्वंतिअंतेसमरेखयामुंडनंकृत्वासर्वएवके
शाःस्थाप्याइतिस्मृतिचंद्रिकायां॥आपस्तंबस्तुविशेषमाह॥केशा
न्निनीययथार्षेशिखांनिदधाति॥येषांकुलधर्मःस्यादिति॥यथामवरं

एतेसंस्काराःस्त्रीणांमंत्ररहिताः॥एतेषांजातकर्मादीनांलोपेप्रायश्चि
त्तमाहशौनकः॥एतेष्वेकैकलोपेपिपादकृच्छ्रंसमाचरेत्॥चूडायाअ
र्द्धकृच्छ्रंस्यादापदित्वेवमीरितं॥अनापदितुसर्वत्रद्विगुणंद्विगुणंचरेदि
ति॥अतीतानांकालमाहमनुः॥जातकर्मादिसंस्काराःस्वकालेनभवंति
चेत्॥चौलादर्वाक्प्रकुर्वीतप्रायश्चित्तादनंतरं॥गृह्यकारिकायांविकल्प
उक्तः॥प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै॥कार्यमित्येकआचार्या
नेत्यन्येतुविपश्चितइति॥शिष्टानांतुकरणपक्षएवसंमतं॥विशेषांत
रमाहनारदः॥शिशोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्॥पंचमाब्दा
दूर्ध्वंतुगर्भिण्यामपिकारयेत्॥सहोपनीत्याकुर्याच्चेन्नत्रदोषोनवि
द्यतइति॥इतिचूडाकर्म॥विद्यारंभमाहमार्कंडेयः॥प्राप्तेथपंचमेवर्षे
विद्यारंभंतुकारयेत्॥ततःप्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेदिति॥
विद्यारंभश्चात्रअक्षरपरिचितिः॥यथाहश्रीधरः॥उदगयनेभास्वतिपंचमेऽ
ब्दे प्राप्तेक्षरस्वीकरणंशिशूनां॥सरस्वतींविघ्नविनायकंचगुडोदनाद्यैर
पिपूज्यकुर्यात्॥विष्णुधर्मोत्तरेपुष्करः॥प्राप्तेतुपंचमेवर्षेअप्रसुप्तेजना
र्दने॥षष्ठींप्रतिपदंचैववर्जयित्वातथाष्टमीं॥रिक्तांपंचदशींचैवसौरभौ
मदिनेतथा॥एवंसुनिश्चितेकालेविद्यारंभंतुकारयेत्॥इतिविद्यारंभः॥
अथानुपनीतधर्माः॥गौतमः॥प्रागुपनयनात्कामचारकामवादकाम
भक्षाइति॥कामचारोऽगादिदेशगमनं॥कामवादोऽश्लीलादिभाषण
मनृतभाषणंच॥कामभक्षोलशुनपर्युषितभक्षणं॥कामभक्षादिकं
महापातकातिरिक्तविषयं॥स्यात्कामचारभक्षोपिमहतःपातकादृ
तइतिषट्त्रिंशन्मतात्॥गौतमः॥नपादमूत्रपुरीषोभवतिनतस्याच
मनकल्पोविद्यतेनतस्योदङ्मुखोदिवारात्रौदक्षिणामुखइत्यादयो
नियमाः॥सएव॥अन्यत्रावमार्जनप्रक्षालनप्रोक्षणेभ्योनतस्यस्प
र्शनादशौचमिति॥इदंकृत्वास्पर्शनंकार्यमित्यर्थः॥स्मृतिदीपिकायां
॥शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतमिति॥रजस्वलादिसंस्प
र्शेस्नानमेवविधीयतइति॥तल्लक्षणानितत्रैव॥प्राक्चूडाकरणाद्बा
लःप्रागन्नप्राशनाच्छिशुः॥कुमारकस्तुविज्ञेयोयावन्मौंजीनबध्यते
इति॥बालंप्रकृत्यगौतमः॥नत्वेवैनमग्निहवनबलिहरणयोर्नियुंज्या

दिति॥मनुः॥नह्यस्मिन्विद्यतेकर्मयावन्मौंजीनबध्यते॥नातिव्या २
रयेद्ब्रह्मस्वधानिनयनादृते॥ब्रह्मवेदः॥स्वधानिनयनंप्रेतकर्म॥इत्यनु
पनीतधर्माः। उपनयनमुक्तंश्रुतौ॥अष्टवर्षंब्राह्मणमुपनयीतेति।या
ज्ञवल्क्यः॥गर्भाष्टमेष्टमेवाब्दे ब्राह्मणस्योपनायनं॥राज्ञामेकादशेसैकेवि
शामेकेयथाकुलमिति॥सैकेद्वादशे॥गर्भैकादशेगर्भद्वादशेद्वादशेवैश्य
स्येत्याह॥पैठीनसिरपि॥गर्भपंचमेब्राह्मणमुपनयेदिति॥गुणफल
माहमनुः॥ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे॥राज्ञोबलार्थिनः
षष्ठेवैश्यस्येहार्थिनोष्टमेइति॥आपस्तंबः॥सप्तमेब्रह्मवर्चसकाम
मष्टमआयुःकामंनवमेतेजस्कामंदशमेऽन्नाद्यकाममेकादशइंद्रियका
मंद्वादशेपशुकाममिति॥वर्णविशेषेणऋतुनियमउक्तःश्रुतौ॥वसंते
ब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्यमिति।कालांतरमुक्तंज्यो
तिःशास्त्रे॥माघादिषुतुमासेषुमौंजीपंचसुशस्यते॥ज्येष्ठमासेज्ये
ष्ठोपनयनंनकार्यं॥तथाचगर्गः॥ज्येष्ठमासेविशेषेणसर्वज्येष्ठस्य
चैवहि॥उपनीतस्यज्येष्ठत्वंमृत्युरेवचेति॥जन्ममासेनकार्यमित्यु
क्तंसंग्रहे॥विवाहेचोपनयनेजन्ममासंविवर्जयेत्॥जन्ममासल
क्षणमुक्तंवृद्धगर्गेण॥आरभ्यजन्मदिवसंयावत्त्रिंशद्दिनंभवेत्॥ज
न्ममासःसविज्ञेयोगर्हितःसर्वकर्मसु॥एवंचाष्टम्यादितिथिमारभ्या
ष्टम्यंतोजन्ममासोभिमतः॥नतुदर्शांतःपूर्णिमांतोवा॥विशेषमाह
चंडेश्वरः॥माघेद्रविणशीलाढ्यःफाल्गुनेचदृढव्रतः॥चैत्रेभवतिमे
धावीवैशाखेकोविदोभवेत्॥ज्येष्ठेतुगृह्यनीतिज्ञआषाढेक्रतुभा
ग्भवेत्॥मार्गशीर्षेभवेद्भ्रष्टःशेषेदुःखमवाप्नुयात्॥आषाढस्तुवि
ष्णुशयनात्प्रागेवतदूर्ध्वं।तत्रसर्वेषांनिषिद्धत्वात्॥विशेषमाहुर्वसि
ष्ठादयः॥आर्द्रादिकेस्वातिविरामकालेनक्षत्रवृंदेदशकेरविश्चेत्॥वि
वाहचौलव्रतबंधनाद्यंसुरप्रतिष्ठादिनकार्यमेव॥आपूर्यमाणपक्षइ
तिसूत्रआश्वलायनेनोक्तोमुख्यः।अनुकल्पमाहबृहस्पतिः॥शुक्लप
क्षःशुभःप्रोक्तःकृष्णश्चांत्यत्रिकंविनेति॥अथगौणकालः॥गृह्ये॥आ
षोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्यआचतुर्विंशा
द्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंति॥नोपनयेन्नाध्यापयेन्नयाज

येन्नैभिर्व्यवहरेयुः॥अत्रव्रात्यताप्रक्रम्य।सावित्रीपतितायस्यदशव
र्षाणिपंचच॥सशिरस्कंवपनंकृत्वाव्रतंकुर्यात्समाहितइति।यमेनस्य
ष्टंपंचदशवर्षोत्तरंप्रायश्चित्ताभिधानात्षोडशादिर्बाड्मर्यादार्थ
कः॥एवंपंचदशवर्षोत्तरमेवव्रात्यस्तोमादिकंजायतइति॥यत्तुऔ
पनायनिकःकालःपरःषोडशवार्षिकः॥द्वाविंशतिःपरोन्यस्यचतुर्विं
शतिमःपरइतिव्यासवाक्येसंपूर्णषोडशवर्षग्रहणाद्विरोधमुपन्य
स्यति॥तत्रधर्मप्रकाशेवंव्यवस्थोक्ता।यमवाक्यंजन्मप्रभृतिपंचदव
र्षातिक्रमेप्रायश्चित्तविधिपरं॥व्यासवाक्यत्वाधानप्रभृतिषोडशव
र्षातिक्रमेप्रायश्चित्तपरमितिनद्वयोरपिविरोधः।ईदृशीचसरणिःप्रा
कृक्वचिदाश्रितैवं॥यथाष्टादशदिनादर्वागशुचित्वंनविद्यते।चतुर्द
शदिनादर्वागशुचित्वंविधीयतइतिवाक्ययोःपूर्वंरजोदर्शनात्प्रभृ
त्युत्तरंतुस्नानादारभ्येति॥याज्ञवल्क्यः॥अतऊर्ध्वंपतंत्येतेसर्वध
र्मबहिष्कृताः॥सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोरिति॥तं
विनोपनयनेधिकारोनास्तीत्यर्थः।सचानुपनीतेनाऽनाहिताग्निना।
विहितापिअवकीर्णिपशुवत्कार्यः॥पातोपयुक्ताध्यापनमगत्याकर्त
व्यं॥ततःस्मृत्युक्तंप्रायश्चित्तंकृत्वाउपनयनमिति॥अथनिषिद्धका
लः॥रत्नकोशे॥नष्टेचंद्रेऽस्तगेशुक्रेनिरंशेचैवभास्करे।कर्तव्यंनो
पनयनमनध्यायेगलग्रहे॥राशिप्रथमांशगःसूर्योनिरंशः॥अन॰
ध्यायान्विस्तरेणाग्रेवक्ष्यामः।गलग्रहास्तत्रैव।त्रयोदशीचतुष्कंतुस
प्तम्यादित्रयंतथा॥चतुर्थ्येकाकिनीप्रोक्ताअष्टावेतेगलग्रहाइति।
वक्ष्यमाणानध्यायप्रतिपत्प्रसवमाहतुर्भरद्वाजवसिष्ठौ॥याचैत्र
वैशाखसितात्तृतीयामाघस्यसप्तम्यथफाल्गुनस्य।कृष्णेद्वितीयो
पनये प्रशस्ताःप्रोक्ताभरद्वाजमुनींद्रमुख्यैरिति।चैत्रवैशाखशुक्ल
तृतीयेमन्वादियुगादी।माघसितसप्तम्यपिमन्वादिः।एतासामनध्या
यत्वंवक्ष्यते॥टोडरानंदेकारिकानिबंधेविशेषः॥अनध्यायास्त्वपूर्वेद्यु
रनध्यायात्परेहनि॥द्वितीयाःसुरेश्वरेणप्रतिपदोक्तत्वादित्यपिव्या॰
ख्यानंतत्रैव॥ननुनवम्यादित्रयमितिनवम्याअपिनिषेधात्काम्यविष
यः॥उच्यते॥निषेधद्वयवशाद्दोषाधिक्यकल्पना।मान्यास्तुयदानवमी

दशाहंङ्गातदानिषेधःकालमात्रकइतिवचनात्तदुत्तरमुपनयनंशास्त्र
मेनननिषिध्यतइत्याहुः॥पूर्वाण्हादिप्रशस्त्यमाह॥धर्मप्रकाशेज्यो
तिर्मनुः॥सर्वदेशेषुपूर्वाण्हेमुख्यंस्यादुपनायनं।मध्यान्हेमध्यमंप्रो
क्तमपराण्हेतुगर्हितमिति॥भरद्वाजः॥विनर्तुनावसंतेनकृष्णपक्षेग
लग्रहे॥अनध्यायेचोपनीतःपुनःसंस्कारमर्हतीति॥पुनरुपनयननि
मित्तानिचाग्रेविस्तरेणवक्ष्यामः॥विशेषमाहव्यावहारचंडेश्वरः
केतोरस्तदिनादूर्ध्वंसप्ताहानिपरित्यजेत्॥यावत्केतूदयस्तावदशुद्
समयेभवेदिति॥इदंब्रह्मपुत्राख्योग्रकेतुविषयमितिधर्मप्रकाशे॥गर्गः
॥चंद्रसूर्योपरागेषुत्र्यहंप्रागशुभंपश्चात्स्मृतंग्रहणशूलकं॥खंडग्र
हेगिरः॥सर्वग्रासेतुसप्ताहमर्द्धग्रासेदिनत्रयं॥त्रिद्व्येकांगुलतोग्रासे
दिनमेकंतुवर्जयेदिति॥विवाहचंडेश्वरः॥ग्रहेखीहोरवनिप्रकंपेकेतू
द्गमोल्कापतनादिदोषे॥व्रतेदशाहानिवदंतितज्ज्ञास्त्रयोदशाहानि
वदंतिकेचित्॥ज्योतिर्निबंधेऽनुकल्पोप्युक्तः॥पंचदिनानिवसिष्ठस्त्रि
दिनंगर्गस्तुकौशिकस्त्वेकं॥यवनाचार्यस्यमतंपंचमुहूर्त्तान्नृपतिराहुः
॥एवंसर्वमालोक्यज्योतिर्विदुपदिष्टेमुहूर्त्तेउपनयनंकुर्यात्॥अत्रच
माणवककर्त्तृकंगुरुसमीपगमनंप्रधानमितिजरन्मीमांसकाः॥नः
व्यास्तुणिजविवक्षायामानाभावादाचार्यकर्त्तृकंमाणवकाधिकारिक
मुपनयनमेवविधीयतइत्याहुः॥युक्तंचेदं॥स्मृत्यर्थसारेतु॥आचार्य
समीपनयनमग्निसमीपनयनंवागायत्रीवाचनंवाप्रधानमित्युक्तं॥अ
थोपनेतुरुभयोरधिकारसंपादनार्थंप्रायश्चित्तमाहहविष्णुः॥कृ
त्रयंचोपनेतात्रीन्कृच्छ्रांश्चबटुश्चरेदिति॥आचार्यस्यविशेषंसए
वाह॥सावित्रीमभ्यसेदग्निंपवित्राणिचसंस्मरन्॥सहस्रंद्वादशाब्दं
चसावित्रींप्रजपेद्बुधः॥स्वाधिकारार्थमेवास्याःप्रदानार्थंहिनत्स्मृत
मिति॥षंढादीनामप्युपनयनमुक्तंब्रह्मांडे॥ब्राह्मण्यांब्राह्मणाजा
तोब्राह्मणःसदितिश्रुतिः॥तस्माच्चषंढबधिरकुब्जवामनपंगुषु॥जड
गद्गदरोगार्त्तशुष्कांगविकलांगिषु॥मत्तोन्मत्तेषुमूकेषुशयनस्थेनिरिं
द्रिये॥ध्वस्तपुंस्त्वेषुचैतेषुसंस्काराःस्युर्यथोचितं॥यथोचितमितिअ
शक्यांगहीनेनेत्यर्थः॥मत्तोन्मत्तौनसंस्कार्याविति केचित्प्रसते॥कर्म

स्वनधिकाराच्चपातित्यंनास्तिचैतयोः॥तदपत्यंचसंस्कार्यमपरेत्वा
हुरन्यथा॥संस्कारमंत्रहोमादीन्करोत्याचार्यएवतु॥उपनेयांश्च
विधिवदाचार्यस्यसमीपतः॥आनीयाग्निसमीपंवासावित्रींस्पृश्य
वाजपेत्॥कन्यास्वीकरणादन्यत्सर्वंविप्रेणकारयेदिति॥उपनेतृक्र
ममाहगर्गः॥पितापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः॥उपायने
धिकारीस्यात्पूर्वाभावेपरःपरः॥तथा॥पितैवोपनयेत्पुत्रंतदभावेपितुः
पिता॥तदभावेपितुर्भ्रातातदभावेतुसोदरइति॥इतिकालादिनि
र्णयः॥अथपरिधानोत्तरीयनिर्णयः॥तत्रगृह्यं॥अहतेनवाससासं
वीतमैणेयेनवाब्राह्मणंरौरवेणक्षत्रियमाजेनवैश्यं॥यदिवासांसि
वसीरन्रक्तानिवसीरन्काषायंब्राह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवैश्यइति
॥अहतलक्षणंप्रचेताआह॥ईषद्धौतंनवंश्वेतंसदशंयन्नधारितं॥अह
तंतद्विजानीयात्सर्वकर्मसुपावनमितिपूर्वंगृह्यार्थः॥तत्रवासःसाधार
णंयद्वात्वजिनंप्रावरणंतद्ब्राह्मणादीनि॥एणीबिंदुसहितामृगी॥ए
ण्यादरुम्॥यदिवासांसीत्यत्रवाक्यभेदव्यवहितान्वयौ॥वासांसिव
सीरन्नित्येकंवाक्यं॥यदिरक्तानिवसीरन्तदाकाषायमित्यादिवान्व
त्॥मनुर्विशेषमाह॥कार्ष्णरौरववास्तानिचर्माणिब्रह्मचारिणः॥व
सीरन्नानुपूर्व्येणशाणक्षौमाविकानिचेति॥कार्ष्णरौरववास्तान्युत्त
रीयाणिकृष्णरुरुवस्ताजिनान्युत्तरीयाणीतिशंखवचनात्॥वस्त्रे
षुविशेषमाहवसिष्ठः॥शुक्लमहतंवासोब्राह्मणस्यकार्पासंमांजिष्ठं
क्षौमंक्षत्रियस्य॥पीतंकौशेयंवैश्यस्येति॥इतिवस्त्रादिनिर्णयः॥मे
खलाव्यवस्थामाहमनुः॥मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमे
खला॥क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशणतांतवी॥ज्याकदाचिच्च
र्ममयीभवतिकदाचित्तृणमयी॥तत्रचर्ममयीव्यावृत्त्यर्थंमौर्वीतिमे
धातिथिः॥ज्यायाश्चस्वरूपनाशप्रसंगात्त्रिवृत्त्वादिगुणोनेतिधर्मप्र
काशेनातचरणाः॥शाणेतुत्रिवृत्त्वादिगुणोस्त्येव॥गृह्येविशेषः॥तेषां
मेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्येति॥अप्यूर्णे
कृतेत्यर्थः॥अनुकल्पमाहमनुः॥मुंजालाभेतुकर्तव्याःकुशाश्मंतकबल्व
जैः॥त्रिवृताग्रंथिनैकेनत्रिभिःपंचभिरेववेति॥अत्रकुल्लूकभट्टः॥आदिश

त्त्वस्यलोपमंगीकृत्याकांक्षितविधानान्मुंजादीनांतिसृणांमेखला
नामलाभेक्रमेणकुशाश्मंतकबल्वजाग्राह्या इत्याह।ग्रंथयश्च
शिष्टाचारात्प्रवरसंख्ययाकार्याः॥तथाचमनूक्तोविकल्पोव्यवस्थि
तः।एकप्रवरस्यैकोग्रंथिस्त्रिप्रवरस्यत्रयः पंचप्रवरस्यपंचेति॥इ
तिमेखलाव्यवस्था॥दंडाउक्तागृह्ये।तेषांदंडःपालाशोब्राह्मण
स्यौदुंबरःक्षत्रियस्यबैल्वोवैश्यस्य।केशसंमितोब्राह्मणस्यललाट
संमितःक्षत्रियस्य।प्राणसंमितोवैश्यस्य।सर्वेवासर्वेषामिति॥प्रा
णोनासा।मनुर्विशेषमाह।ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखा
दिरौ॥पैप्पलौदुंबरौवैश्योदंडानर्हंति धर्मतइति॥नचात्रद्वंद्वनिर्देशा
त्समुच्चयइतिवाच्यं॥दंडंप्रदायेतिसूत्रेगुणभूतदंडैकत्वश्रवणा
त्॥मनुस्मृतावेवगुणविधिवाक्येकेशांतकोब्राह्मणस्येत्येकवचन
श्रवणात्॥वसिष्ठस्मृतौ॥स्पष्टमेवबैल्वःपालाशोवेतिविकल्पा
भिधानाच्च॥अतोविकल्पितयोरेवद्वंद्वनिर्देशइति।सर्वेषामला
भेयमआह॥एतेषामप्यलाभेतुसर्वेषांसर्वयज्ञियाइति॥दंडां
न्विशिनष्टिश्लोकगौतमः॥ऋजवस्तेतुसर्वेस्युरव्रणाःसौम्यदर्शनाः
॥अनुद्वेगकरादंडाःसत्वचोनाग्निदूषिताइति॥इतिदंडनिर्णयः॥य
ज्ञोपवीतमाहमनुः॥कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत्॥
शणसूत्रमयंराज्ञोवैश्यस्याविकमुच्यते॥शाणसूत्रमयमित्यत्रा
पिऊर्ध्ववृतंत्रिवृदितिसंबध्यते॥आविकमव्यूर्णासंभवं॥एवंच
यदिदानींतनानांक्षत्रियवैश्यानांकार्पासोपवीतधारणंतत्रमूलं
नविद्मः॥विशेषउक्तःछंदोगपरिशिष्टे॥त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रय
मधोवृतं॥त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते॥कर्तव्यतामा
हदेवलः॥ग्रामान्निष्क्रम्यसंख्यायषण्णवत्यंगुलीषुतत्॥ताव
त्त्रिगुणितंसूत्रंप्रक्षाल्याब्लिंगकैस्त्रिभिः॥देवागारेथवागोष्ठेनद्यां
वान्यत्रवाशुचौ॥सावित्र्यात्रिवृतंकुर्यान्नवसूत्रंतुतद्भवेत्॥हरिब्रह्मे
श्वरेभ्यश्चप्रणम्याबध्नात्यथ॥यज्ञोपवीतमित्यादिव्याहृत्याचा
पिधारयेत्॥तथा॥यज्ञोपवीतंकुर्वीतसूत्राणिनवतंतवइति॥वसि
ष्ठस्तुविशेषमाह॥नाभेरूर्ध्वमनायुष्यमधोनाभेस्तपःक्षयः॥तस्मा

न्नाभिसमंकुर्यादुपवीतंविचक्षणः॥कात्यायनोपि॥पृष्ठदेशेचनाभ्यांच
धृतंयद्विंदतेकटिम्॥तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितमिति
धारणेविशेषमाहभृगुः॥उपवीतंबटोरेकंद्वेतथेतरयोःस्मृते॥एक
मेवयतीनांस्यादितिशास्त्रस्यनिश्चयः॥इतरयोर्गृहस्थवनस्थयोः
॥यतीनांत्रिदंडिनां॥स्नानोत्तरमेवद्वेइत्याहवसिष्ठः॥स्नातकानांद्विती
यंस्यादंतर्वासस्तथोत्तरमिति॥एतद्धारणंनित्यं॥बहूनिचायुष्काम
स्येतिदेवलवचनाद्बहून्यपिधार्याणि॥बहुत्वावधिमाहकश्यपः॥त्री
णिचत्वारिपंचाष्टगृहिणःस्युर्दशापिवा॥सर्वैर्वाशुचिभिर्धार्यमुप
वीतंद्विजातिभिः॥इदंच।सदोपवीतिनाभाव्यंसदाबद्धशिखेनच॥
विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमितिभृगुस्मृतेर्नित्यं॥तत्र
पूर्वार्द्धेनपुरुषार्थत्वमुत्तरार्द्धेनक्रत्वंगत्वमिति॥विशेषमाहमनुः॥उ
द्धृतेदक्षिणेपाणावुपवीत्युच्यतेद्विजः॥सव्येप्राचीनआवीतीनिवी
तीकंठसज्जने॥असमासश्छांदसः॥स्मृतिसारेशूद्रान्यमन्यकृतमपिग्रा
ह्यमित्युक्तं॥छेदेविनाशेवास्नातःकन्ययानिर्मितंशुभं॥विधवाद्याभि
रथवासूत्रंगृण्हीतवैमुनिरिति॥मेखलादीनांछेदेजलमध्येप्रक्षेपःका
र्यइत्याहमनुः॥मेखलामजिनंदंडमुपवीतंद्विजातिभिः॥अप्सुप्रास्यवि
नष्टानिगृण्हीतान्यानिमंत्रवदिति॥मंत्रवदिति॥उपनयनकालेयेमंत्रै
र्धृतानितैर्मंत्रैर्गृह्यंते॥इत्युपवीतनिर्णयः॥इत्युपनयनं॥अथपुनरु
पनयनेविशेषमाहाश्वलायनः॥अथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननं
चानिरुक्तंपरिदानंकालश्चतत्सवितुर्वृणीमहइतिसावित्रीमिति॥कृताकृतंवै
कल्पिकं॥अथोपेनिरुक्तंनकर्तव्यमित्यर्थः॥कालनियमोपिनास्तीत्यर्थः॥पराशरः
॥अजिनंमेखलादंडोभैक्ष्यचर्याव्रतानिच॥निवर्त्तंतेद्विजातीनांपुनःसंस्का
रकर्मणीति॥इदंचपुनरुपनयनंवेदान्तराध्ययनंचिकीर्षुःकुर्यादितिहरद
त्तः॥आहाश्वलायनः॥अध्वर्यूणांसामगानामृचमध्येतुमिच्छतां॥
क्रियास्यात्तौरिदानांतादीक्षादिनेविधीयते॥ऋचंऋग्वेदं॥परिदानमादि
त्यायव्रतपतयेबटुंतेददामीतिविहितं॥अन्येतुयत्रपुनःसंस्कारोविधी
यतेतत्रापीयमेवेतिकर्तव्यतेति॥अथपुनरुपनयननिमित्तानि॥भर
द्वाजः॥विनर्तुनावसंतेनकृष्णपक्षेगलग्रहे॥उपनीतस्त्वनध्यायेपुनः

संस्कारमर्हति॥अपराण्हे चोपनीतः पुनःसंस्कारमर्हतीति॥पराशरः
अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च॥पुनःसंस्कारमर्हंति त्रयो
वर्णा द्विजातयः॥विष्णुः॥विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु द्वि
जातीनां प्रायश्चित्तांते पुनःसंस्कारं कुर्यादिति॥लशुनं गृंजनं जग्ध्वा
पलांडुं च तथा शुनः॥उष्ट्रमानुषकेभाश्वान्नरासभीक्षीरभोजनात्
॥उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः॥देशांतरंगतस्यौर्ध्वदेहिके
कृते पश्चात्सौ पुनरायाति तत्रोक्तं संग्रहे॥जीवन् यदि समागच्छेद्घृत
कुंभे निमज्य तं॥पुनरुत्थापयित्वाऽस्य जातकर्मादि कारयेदिति॥
बौधायनः॥सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः॥अगमनेतु
न दोषः॥अंगवंगकलिंगांश्च सौराष्ट्रमगधांस्तथा॥तीर्थयात्रां वि
ना गत्वा पुनःसंस्कारमर्हतीति श्लोकगौतमोक्तेः॥इति पुनरुपनय
ननिमित्तानि॥अथ ब्रह्मचारिधर्माः॥याज्ञवल्क्यः॥गुरुं चैवाप्युपासी
त स्वाध्यायार्थं समाहित इति॥आश्वलायनः॥अंजनाभ्यंजने स्त्रीं
गंधपुष्पास्तरान्व्रती॥वर्जयेत्पादुके छत्रं यानोष्णीषवरादिकान्॥
नशयीतांतरिक्षे तु नाश्नुवीत परैः सह॥नवासीत न नग्नश्च नालोकं
बिभृयाद्व्रती॥नालीकं नालिकेरकमंडलुं विना॥धर्मप्रकाशे॥मनसा
पि न चोल्लंघ्या गुरोराज्ञा कथंचन॥गुरुवद्गुरुपत्नीषु तत्सुतादिषु सर्व
दा॥प्रत्यक्षे वा परोक्षे वा चरेत्प्रथमाश्रमी॥वेदोदितव्रतैरन्यान्व्रता
नन्यान्न संचरेत्॥स्नात्वा यात्सर्वतीर्थेषु नभुंजीयादितस्ततः॥तीर्थया
त्रां न कुर्यादित्यर्थः॥भैक्ष्यमाहृत्य भुंजीयात्सायंप्रातर्गुरोर्वसन्॥दे
वर्षिपितृपूजां च कुर्याद्वा गुर्वनुज्ञया॥अच्छिन्नान्धारयेन्नित्यं दंडा
जिनकमंडलून्॥यज्ञसूत्रपवित्रे च मेखलां च गुरौ वसन्॥नशावः
सूतके स्यातां मातापित्रोर्मृतौ व्रते॥व्रतिनश्चोत्सवालोकः श्राद्धं
च न शस्यते॥नभक्षयेच्च तांबूलमद्यमैथुनमेव च॥वर्जयेल्लशुनं ला
जान्लाजापूपादिकान्व्रती॥चरित्वा चतुरो वेदांस्त्रीन्द्वौ चैकमथापि वा
॥तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षण इति॥सुमंतुः॥ब्रह्मच
र्येण यो भैक्ष्यं संध्याग्निकर्म च॥स्वाध्यायो गुरुवृत्तिश्च चर्यं ब्र
ह्मचारिणः॥व्यासः॥जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनीति॥

गुरुसेवायाः फलमाह शंखः॥ न स्नानेन न होमेन नैवाग्निपरिचर्यया॥ ब्र
ह्मचारी दिवं याति स याति गुरुपूजनात्॥ मनुः॥ अधःशय्यासनं चास्य
नित्यं स्याद्गुरुसन्निधौ॥ गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥ प्रसा
रणादिकं न कुर्यादित्यर्थः॥ अत्र नित्यग्रहणाद्ब्रह्मचर्योत्तरकालमप्येते
ऽनुवर्त्तन्त एव॥ समासनमप्यनुजानाति क्वचिद्विष्णुः॥ नास्यैकासनो
भवेदन्ते शिलाफलकनौयानेभ्य इति मनुः॥ गुरोर्यत्र परीवादो निंदा वापि
प्रवर्त्तते॥ कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यतः॥ सदोषकीर्त्तनं परी
वादः॥ असद्दोषोक्तिर्निंदा॥ निंदादिकरणे फलमाह स एव॥ भवेत्खरः प
रीवादाच्छ्वा वै भवति निंदकः॥ परिभोक्ता कृमिर्भवति कीटो भवति मत्स
री॥ परिभोक्ता अदत्तगुरुदानभोक्ता॥ हारीतः॥ ऋचं वा यदि वार्द्धर्चं पा
दं वा यदि वाऽक्षरं॥ सकाशाद्यस्य गृह्णीयान्नियतं तस्य गौरवं॥ मनुः॥
नोदाहरेदस्य नाम परोक्षमपि केवलं॥ न चैवास्यानुकुर्वीत गतिभाषि
तचेष्टितमिति॥ केवलं नाम न ग्राह्यं किंतु उपाध्यायादिविशिष्टं॥ उक्तं च गौ
तमेन॥ नाम गोत्रे गुरोः समानतो निर्दिशेदिति॥ मानेन सहितं समानं॥
याज्ञवल्क्यः॥ मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं॥ भास्करा
लोकनाश्लीलपरिवादादि वर्जयेदिति॥ मधु क्षौद्रं॥ आम्लपनस्पृतौ
क्षौद्रग्रहणात्॥ शुक्तं निष्ठुरवाक्यं॥ यदि मांसभक्षणान्निवर्त्त्यो व्याधिस्त
दा गुरोरुच्छिष्टं भक्षणीयं॥ स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजा
र्थं सर्वं प्राश्नीयादिति॥ आपस्तंबोपि॥ पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भो
क्तव्यमिति॥ मनुः॥ वर्जयेन्मधुमांसं च गंधमाल्यरसान्स्त्रियः॥ शुक्ता
नि चैव सर्वाणि प्राणिनां चैव हिंसनं॥ अभ्यंगमंजनं चाक्ष्णोरुपानच्छ
त्रधारणं॥ कामनमुपधानं परस्य चेति॥ प्रेक्षणालंभमिति मैथुनशंका
यामेव॥ यथोक्तं गौतमेन॥ प्रेक्षणालंभने मैथुनशंकायामिति॥ एवं च
मान्यस्त्रीणां प्रेक्षणमालंभः संभाषणं वा न दोषाय॥ आलंभः स्पर्शः॥
मनुर्विशेषमाह॥ मुंडो वा जटिलो वा स्यादथ वा स्याच्छिखाजटी इति॥ अ
त्रयः पक्षः मुंडः॥ जटी॥ शिखाजटी चेति॥ गौतमोपि॥ मुंडी शिखी वेति॥
कात्यायनोपि॥ सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिण इति॥ सर्वमुंडत्वं
सामगविषयमिति केचित्॥ तथा च विष्णुपुराणे ज्ञापकं॥ एते लूनशिखास्त

स्यदशनैरविरोह्लैः।।कुशकाशाविराजंतेवटवःसामगाइवेति।।यमः।
खट्वासनंचशयनंवर्जयेद्दंतधावनं।।स्वपेदेककुशेष्वेवनरेतःस्कंदये
त्क्वचित्।।कूर्मपुराणे।।नाऽदृष्टंवैसमीक्षेतनाचरेद्दंतधावनमिति।।या
ज्ञवल्क्यः।।ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि।ब्राह्मणःकाममश्नी
यात्श्राद्धेव्रतमपीडयन्निति।ब्रह्मचर्येस्थितोब्राह्मणादिरेकमेकसंब
धिअन्ननाद्यात्।।एकस्यान्नंनगृण्हीयात्।किंतुबहूनांब्रह्मचारीतुश्रा
द्धेनिमंत्रितःसन्मधुमांसादिवर्जमेकस्यापिगृहेऽश्नीयात्।।अनेनज्ञा
यतेश्राद्धव्यतिरेकेणैकस्यान्नंनगृण्हीयादिति।।तथा।।अग्निकार्यंततः
कुर्यात्संध्ययोरुभयोरपीति।ततःसंध्योत्तरंसंध्याविधिश्चाचारमयू
खेविस्तरेणवक्ष्यते।।कदाचित्प्रातःसंध्योत्तरमकृतस्याग्निकार्यस्यप
वङ्गोजनंगौणकालमाहसएव।।कृताग्निकार्योभुंजीतवाग्यतोगुर्वनु
ज्ञयेति।।सायमेवाग्निकार्यमित्याहापस्तंबः।।सायमेवाग्निपूजेत्येक
इति।।समित्साहरणमनुराह।पुरादाहृत्यसमिधःसन्निदध्याद्विहाय
सि।।सायंप्रातश्चजुहुयात्ताभिरग्निमतंद्रितइति।।विहायसिमंडपा
द्यावितिधर्मप्रकाशे।।आपस्तंबः।नास्तमितेसमिद्धारोगच्छेदिति।
समित्परिमाणमाहकात्यायनः।।नांगुष्ठादधिकाकार्यासमित्स्थू
लतयाक्वचित्।।नविहीनात्वचाचैवनसकीटानपाटिता।।प्रादेशा
न्नाधिकानोनातथानस्याद्विशाखिका।।विशीर्णाविदलाह्रस्वावक्राः
ससुषिराःकृशाः।दीर्घाःस्थूलाश्चसमिधोवर्जनीयाःप्रयत्नतइति।अग्निका
र्याऽकरणेप्रायश्चित्तमृग्विधाने।।मानस्तोकेजपेन्मंत्रंशतसंख्यंशिवा
लये।अग्निकार्यंविनाभुंक्तेनपापंब्रह्मचारिणइति।।इत्यग्निकार्यं।।त
तोभिवादनमुक्तंयाज्ञवल्क्येन।।ततोभिवादयेद्वृद्धानसावहमितिब्रुव
न्निति।।ततोग्निकार्यानंतरं।।अत्राग्निकार्याभिवादनयोरंगांगित्वाभा
वात्कदाचिदग्निकार्याकरणेपिअभिवादनंकार्यमेव।।वृद्धामान्याःत
त्रमान्योगुरुः।तंविशिनष्टियाज्ञवल्क्यः।।सगुरुर्यःक्रियाःकृत्वावेद
मस्मैप्रयच्छतीति।।क्रियानिषेकाद्याः।।मनुरपि।।निषेकादीनिकर्मा
णियःकरोतियथाविधि।।संभावयतिचान्नेनसविप्रोगुरुरुच्यतइति।
एवंचपितैवगुरुः।।निषेकादिक्रियाकर्तृत्वात्तस्य।।एवंचोपनीयपक्ष

श्वेदमाचार्यः सउदाहृतइति॥आचार्यस्योपनेतृत्वंपित्रभावेद्रष्टव्यं॥
यद्यपिक्षत्रियस्यवृत्त्यर्थत्वेनाप्राप्तमध्यापनंतथाप्यापद्धिधर्मार्थप्रा
प्तमेव॥अतश्चपितैवोपनयेत्पुत्रमितिक्षत्रियादिप्रत्यापद्दिप्रवर्त्तत
एवअयंपरंविशेषः।याज्ञवल्क्यवाक्यंसंज्ञासंबंधस्त्रैवर्णिकान्वि
षयीकरोति।मनुवाक्यंतुविप्रग्रहणात्तमेवविषयीकरोति॥एवंचवि
प्रसाम्भसंभावनाकरणेगुरुत्वंयद्यपिमनुवाक्यं नप्रतिपादयतित
थापियाज्ञवल्क्यवचनात्तत्सिद्धिः॥एवंवर्णिकानांमध्येयस्यैवैतद्व
चनद्वयप्रतिपादितानिनिमित्तानिनसंतिनतस्यगुरुशब्दवाच्यत्वं॥
शूद्राणांतुनकदाप्येतद्वचनद्वयप्रतिपादितंगुरुत्वंसंभाव्यते।नन्वेवं
शूद्राणांगुरुतल्पगमनप्रायश्चित्तंनस्यादितिचेत् यद्यपिगुरुतल्प
गमनजन्यंनस्यात्तथापिमातृगमनजन्यंस्यादेवेतिनविरोधः॥यद्व॥
उपाध्यायःपिताज्येष्ठोभ्राताचैवमहामतिः॥मातुलश्चगुरुस्तथातामा
तामहपितामहौ॥वर्णज्येष्ठःपितृव्यश्चपुंस्येतेगुरवःस्मृताः॥मातामा
तामहीगुर्वीपितुर्मातुश्चसोदराः॥पितामहीस्वसाज्येष्ठाधात्रीचगुर
वःस्त्रियइति।देवलवाक्येनकेवलस्यापिपितुर्गुरुसंज्ञाकरणात्त
ज्जायागमनेभविष्यत्येव॥गुरुतल्पगमनप्रायश्चित्तं।आचार्यविशि
नष्टिमनुः॥उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः॥संकल्पंस रह
स्यंचतमाचार्यंप्रचक्षतइति॥रहस्यमुपनिषदः॥उपाध्यायंविशि
नष्टिसएव॥एकदेशंतुयोवेदंवेदांगान्यथवापुनः॥योध्यापयतिवृत्त्य
र्थमुपाध्यायः सउच्यतइति॥धारेवापि॥भृतकाध्यापकोयस्तुसउपा
ध्यायउच्यतइति॥मासेदिनेवर्षेवाएतावद्देयमितिपरिच्छिद्ययोध्या
पयतिसभृतकाध्यापकः॥विष्णुरपि।यस्त्वेनमूल्येनाध्यापयेत्तमु
पाध्यायमिति॥विद्यादितिशेषः॥एषुचमध्येमातामान्यतरेत्युक्तं
याज्ञवल्क्येन॥एतेमान्यायथापूर्वमेभ्योमातागरीयसीति॥धर्मप्र
काशेपुराणेतु॥द्वौगुरूपुरुषस्येह पितामाताचधर्मतः॥तयोरपिपिता
श्रेयान्बीजप्राधान्यदर्शनात्॥अभावेबीजिनोमातातदभावेतुपूर्वज
इति॥पितुर्गरीयस्त्वमुक्तं॥अत्रेच्छयाविकल्पः तुल्यकल्पत्वंवा।अ
न्यंविशेषमाहविष्णुः॥बालेसमानवयस्यध्यापकेगुरुवद्वर्त्तेतेति॥बा

लंइतिनावगणनीयइत्यर्थः॥इतिगुर्वादिनिरूपणं॥अभिवादनप्रका
रमाहमनुः॥अभिवादात्परंविप्रोज्यायांसमभिवादयन्॥असौनामा
हमस्मीतिस्वंनामपरिकीर्त्तयेत्॥अभिवादादभिवादयेइतिपदात्प
रंस्वंनामदेवदत्तोहंभोइत्युल्लेखः॥एकहस्तेनाभिवादनकरणेदोष
माहविष्णुः॥जन्मप्रभृतियत्किंचिच्चेतसाधर्ममाचरेत्॥धर्मंतन्नि
ष्फलंयातिएकहस्ताभिवादनेइति॥विशेषमाहात्रिः॥दक्षिणंपाणिमु
द्धृत्यसकाममभिवादयेत्॥श्रोत्रियेप्यंजलिःकार्यःपादोपग्रहणंगुरो
रिति॥एतस्माच्चवाक्यादेकहस्तेनाप्यभिवादनंगम्यते॥एवंचपूर्वो
क्तदोषश्रवणंश्रोत्रियादेतरेषु॥पादोपसंग्रहणप्रकारमाहमनुः॥व्य
स्तपाणिनाकार्यमुपसंग्रहणंगुरोः॥सव्येनसव्यःस्प्रष्टव्योदक्षिणेन
तुदक्षिणः॥गुरुचरणादितिशेषः॥बौधायनः॥श्रोत्रेसंस्पृश्येतिविशेष
माह॥अन्यविशेषमाहमनुः॥गुरोर्गुरौसन्निहितेगुरुवद्वृत्तिमाचरे
दिति॥अथप्रत्यभिवादनमुक्तंमनुना॥आयुष्मान्भवसौम्येतिवा
च्योविप्रोभिवादने॥अकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः॥अत्र
ननाम्नोंतेऽकारोविधीयते॥किंतुयोनामांतेऽकारस्तस्यैवप्लुतमात्रं
विधीयते॥नाम्नांचसर्वेषामकारांतत्वाभावादकारग्रहणंनामांतस्व
रोपलक्षणमितिव्याख्यातृसंप्रदायः॥सौम्येतिनामग्रहणार्थंतथा
चनामांत स्वरःप्लुतोभवतिशर्मादिप्रयोगोपिकार्यइतिकेचित्॥ए
वंचायुष्मान्भवदेवदत्ता३शर्मन्नितिप्रयोगः॥केचित्तुशर्मशब्दांतर्ग
तःकारंप्लुतंपठंति॥तच्चिन्त्यं॥शर्मशब्दस्यनामांतर्गतत्वाभावात्॥तदं
तर्गतत्वेकेवलशर्मप्रयोगाभावादवश्यवक्तव्येउपपदेच्छास्वरनामानु
पपत्तिः॥इदंचशूद्रस्यनभवति॥प्रत्यभिवादेऽशूद्रेइतिस्मृतिस्वपा
णिनिसूत्रात्॥अनेनचज्ञायतेशूद्रंप्रत्यपिप्रत्यभिवादनंप्राप्तमिति
॥ब्राह्मणस्यक्षत्रियादीनामभिवादनेप्रायश्चित्तंकथंभवेत्॥ब्राह्म
णानांदशाहेवाअभिवाद्यविशुद्ध्यति॥अभिवाद्यद्विजःशूद्रंसचैलं
स्नानमाचरेत्॥ब्राह्मणोभिवादयेत्॥क्वचिदभिवादनमाहशातातपः
॥उदक्यांसूतिकांनारींभर्तृघ्नींगर्भघातिनीं॥अभिवाद्यद्विजोमोहाद
होरात्रेणशुद्ध्यति॥अनेननिषेधेनज्ञापतेस्त्रियोप्यभिवाद्याइति॥य

थोक्तंमनुना॥कामंतुगुरुपत्नीनांयुवतीनांयुवाभुवि॥विधिवद्वंदनंकु
र्यादसावहमितिब्रुवन्निति॥विशेषउक्तस्तेनैव॥योनवेत्त्यभिवादस्यवि
प्रःप्रत्यभिवादनं॥नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः॥एतच्चा
भिवादनमधिकवयसामेवकार्यं॥ज्यायांसमभिवादयेदितिस्मृतेः॥त
था॥कुशलंब्राह्मणंपृच्छेत्क्षत्रबंधुमनामयं॥वैश्यंक्षेमंसमागम्यशू
द्रमारोग्यमेवचेति॥ब्राह्मणेनस्वस्मात्कनिष्ठानांक्षत्रियादीनांवाऽशी
र्दयेत्युक्तंभविष्यत्पुराणे॥ब्राह्मणःसर्ववर्णानांस्वस्तिकुर्यादितिस्थि
तिरिति॥विशेषउक्तःशातातपेन॥पाखंडंपतितंव्रात्यंमहापातकिनंश
ठं॥नास्तिकंचकृतघ्नंचनाभिवादेत्कथंचन॥धावंतंचप्रमत्तंचमंत्रोच्चा
रकृतंतथा॥भुंजानमाचमनार्हंनाभिवादेत्कथंचन॥वमंतंजृंभमाणंच
कुर्वंतंदंतधावनं॥अभ्यक्तशिरसंचैवस्नास्यंतंनाभिवादयेत्॥जम
दग्निः॥देवताप्रतिमांदृष्ट्वायतिंचैवत्रिदंडिनं॥नमस्कारंनकुर्याच्चेद
होरात्रेणशुद्ध्यति॥इत्यभिवादनप्रत्यभिवादननिर्णयः॥अथमान्य
तानिमित्तानि॥याज्ञवल्क्यः॥विद्याकर्मवयोबंधुवित्तैर्मान्यायथाक्रमं
॥अत्रपूर्वपूर्वस्यगरीयस्त्वंज्ञेयं॥उक्तंचगौतमेन॥श्रुतंसर्वेभ्योगरी
यस्तन्मूलत्वाद्धर्मस्येति॥मनुरपि॥पंचानांत्रिषुवर्णेषुभूयांसिगुण
वंतिच॥यत्रस्युःसोत्रमानार्हःशूद्रोपिदशमींगतइति॥दशमींगत
इतिनवतेरूर्ध्वावस्थांप्राप्तइत्यर्थः॥पंचानांविद्यादीनां॥याज्ञवल्क्यो
पि॥एतैःप्रभूतैःशूद्रोपिवार्द्धकेमानमर्हतीति॥मार्गापसारणेविशेषमा
हमनुः॥चक्रिणोदशमीस्थस्यरोगिणोभारिणःस्त्रियाः॥स्नातकस्य
चराज्ञश्चपंथादेयोवरस्यच॥वरोविवाहोद्यतः॥भारतेपि॥अष्टाव
क्रःपथिराज्ञासमेत्यप्रोत्सार्यमाणोवाक्यमिदंबभाषे॥अंधस्यपंथा
बधिरस्यपंथाःस्त्रियःपंथाभारवाहस्यपंथाः॥राज्ञःपंथाब्राह्मणेनासमे
त्यस्नातस्यपंथाब्राह्मणस्यैवपंथाः॥इति॥इतिमान्यतानिमित्तं॥अथा
ध्ययनधर्माः॥मनुः॥चर्याविशेषैर्विविधैर्व्रतैश्चश्रुतिचोदितैः॥वेदःकृ
त्स्नोऽधिगंतव्यःसरहस्योद्विजन्मनेति॥रहस्यमुपनिषत्॥श्रुतौ॥तस्मा
त्स्वाध्यायोऽध्येतव्यइति॥स्वःस्वकीयोऽध्यायःशाखा॥तदुक्तं॥अत्रस्वा
ध्यायशब्देनस्वशाखैवतुगृह्यतेइति॥अनेनचस्वाध्यायाध्ययनस्य

प्राथम्यमावश्यकंचोक्तंनतुद्वितीयवेदाध्ययनं।एवंचावेदानधीत्यवे
दौवावेदंवापियथाक्रममित्यविरुद्धं॥अत्रकेचित्॥बहूनांवेदानाम
ध्ययनेपिस्ववेदसंबंधिनीद्वितीयाशाखानाध्येतव्येतिव्याचक्षते॥
यथा आश्वलायनेनशांखायनशाखेति॥तदयुक्तं॥आश्वलायनेन
यजुःशाखाध्येतव्यानशांखायनशाखेत्यत्रमानाभावात्॥नचस्वा
ध्यायइत्यत्रैकवचनान्नसाध्वरमीमांसारीत्योपादेयगतत्वात्समुदाय
त्रैवद्वितीयपक्षवालंभवत्द्वितीयशाखाऽनध्ययनमिति वाच्यं॥तत्र
हिएकत्वंप्रकृत्यत्वपिव्यावर्तकंसंभवतिनत्वेवमत्राःस्वाध्यायस्यैक
त्वेनपरिज्ञातत्वात्॥नह्याकाशइत्यत्रैकत्वंव्यावर्तकंभवति॥अतोत्र
एकवेदस्यशाखानामध्येयोऽन्यांसमाश्रयेत्॥स्वशाखांसंपरित्यज्य
शाखारंडःसउच्यतइति॥अन्यांस्वशाखाभिन्नांयत्रहिएकवेदशाखा
नांमध्येस्वीयांपरित्यज्ययोऽन्यामधीतेसशाखारंडइतिवदतातामधी
त्यअन्यशाखाध्ययनमनुज्ञातंभवति॥सएव॥अधीत्यशाखामात्मी
यांपरशाखांततःपठेदिति॥तथाषडंगोवेदोध्येयोज्ञेयश्चेति॥विशेष
माहकात्यायनः॥स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंतुयः॥कर्तुमिच्छ
तिदुर्मेधामोघंतस्यविचेष्टितमिति॥इदंस्वशाखोक्तविरुद्धंनकार्यमित्ये
वंपरं॥यथोक्तंतेनैव॥यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्॥वि
द्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकंयथेति॥अध्ययनधर्ममाहमनुः॥प्रा
क्कूलान्पर्युपासीनःपवित्रैश्चैवपावितः॥प्राणायामैस्त्रिभिःपूतस्ततओं
कारमर्हतीति॥प्राक्कूलान्प्रागग्रान्॥पवित्रमाहगौतमः॥प्राणोपस्पर्श
नंदर्भैरिति॥प्राणाइंद्रियाणिसंवर्त्तः॥प्रणावंप्राक्प्रयुंजीतव्याहृतीस्त
दनंतरं॥सावित्र्याश्चानुवचनंततोवृत्तांतस्यापिते॥ओंकारपूर्विकास्ति
स्रोमहाव्याहृतयोव्ययाः॥त्रिपदाचैवगायत्रीविज्ञेयंब्रह्मणोमुखं॥ति
स्रःभूर्भुवःस्वः॥ब्रह्मणोवेदस्य।मुखंआरंभेपठनीयमित्यर्थः॥ब्राह्म
णःप्रणवंकुर्यादादावंतेचसर्वदा॥इतिवचनादंतेप्रणवमात्रं॥गौतमः
प्राङ्मुखोदक्षिणतःशिष्यउदङ्मुखोवेति॥मनुः॥अ ेष्यमाणस्त्वाचां
तोयथाशास्त्रमुदङ्मुखः॥ब्रह्मांजलिकृतोऽध्याप्योलघुवासाजितेंद्रि
यइति॥लृदप्रयोगेणाचमनमध्ययनांगं॥शूद्रसंनिधौनाध्येयमित्या

हव्यासः॥अनध्यायेष्वधीतंयच्चशूद्रस्यसंनिधौ॥प्रतिग्रहनिमित्तं
यन्नरकायतदुच्यतइति॥अस्मादध्ययनेलब्धिर्भविष्यतीत्याशयाय
पठितं॥नारदः॥पुस्तकप्रत्ययाधीतंनाधीतंगुरुसन्निधौ॥भ्राजतेनस
भामध्येजारगर्भइवस्त्रियाः॥नाविस्पष्टमधीयीतनशूद्रजनसन्नि-
धौ॥ननिशांतेपरिश्रांतोब्रह्माधीत्यपुनःस्वपेत्॥नारदः॥हस्तेनाधीय
मानस्तुस्वरवर्णान्प्रयोजयन्॥ऋग्यजुःसामभिःपूतोब्रह्मलोकेमही
यते॥हस्तस्वराध्ययनंतुसामयजुर्वेदिनां॥व्यासः॥मेखलाजिनदंडानां
धारणैर्ब्रह्मचारिभिरिति॥शुश्रूषाफलमाहसएव॥यथाखनन्खनि
त्रेणनरोवार्यधिगच्छति।तथागुरुगतांविद्यांशुश्रूषुरधिगच्छति॥नार
दः॥अहेरिवक्रणाद्भीतःसौहित्यान्नरकादिव॥राक्षसीभ्यइवस्त्रीभ्यः
सविद्यामुपगच्छतीति॥सौहित्यंतृप्तिः॥लघुव्यासः॥ऋक्पादमप्य
धीयीतमार्गेणोक्तेनधर्मवित्॥नत्वेवचतुरोवेदानन्यायेनकदाचन॥वे
दविप्लावनात्तेनवरंमौनंसमाश्रितं॥वेदविप्लावनाद्भीतोनरकंयात्यधो
मुखइति॥वेदविप्लोक्तंधर्मप्रकाशे॥योर्थार्थीमांद्विजेद्द्यात्स्थैचैवाः
विधानतः॥अनध्यायेचतंप्राहुर्वेदविप्लावकंद्विजाः॥विद्यानाशहेतू
न्नारदआह॥द्यूतंपुस्तकशुश्रूषानाटकासक्तिरेवच॥स्त्रियस्तंद्रीच
निद्राचविद्याविघ्नकराणिषट्॥पुस्तकस्यपुराणादेःशुश्रूषाश्रोतुमि
च्छा॥अन्यान्यपिलोकतोविद्यानाशकारणान्यवगंतव्यानि॥इत्य
ध्येतृधर्माः॥गुरुधर्मानाहयाज्ञवल्क्यः॥कृतज्ञाद्रोहिमेधाविशुचि
कल्यानसूयकाः॥अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः॥क
ल्योनीरोगइति॥धर्मप्रकाशेमनुः॥आचार्यपुत्रःशुश्रूषुर्ज्ञानदोधा
र्मिकःशुचिः॥आप्तःशक्तोर्थदःसाधुःस्वाध्याप्यादशधर्मतः॥तथा॥
धर्मार्थौयत्रनस्यातांशुश्रूषावापितद्विधा॥नतत्रविद्यावक्तव्याशुभंबी
जमिवोखरे॥यत्रविहिताःनतुष्टापकायनास्तिकायचाध्यापयतितत्र
धर्माभावः॥नारदः॥गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा॥अथवावि
द्ययाविद्याचतुर्थंनोपलभ्यतइति॥चतुर्थंसाधनं॥यमः॥सततंप्रातरुत्था
यदंतधावनपूर्वकं॥स्नात्वाहुत्वाचशिष्येभ्यःकुर्यादध्यापनंद्विजइति।
आपस्तंबः॥शयानश्चाध्यापनंवर्जयेदिति॥मनुः॥अध्येष्यमाणस्तुगु

रुर्नित्यकालमतंद्रितः॥अधीष्व भोइतिब्रूयाद्विरामोस्त्विति वारमेत्॥ताडनंतु शिरसि न कार्यं॥यथोक्तं मनुना॥पृष्ठतस्तु शरीरस्य नोत्तमांगे कथंचन॥अतोन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषं॥विद्यावतः शार्थितस्याऽध्यापनमावश्यकं॥येहि विद्यामधीत्यार्थिनेन प्रदद्युर्न स धर्मस्याद्विजातयः॥प्रब्रूयाद्ब्राह्मणस्तेषां नेतरा विति निश्चय इति मनुवचनाद्ब्राह्मणेनैव कार्यं॥इतरौ राजवैश्यौ॥अत्रवाक्यत्रयं॥त्रयो वर्णा ब्राह्मणादधीयीरन्॥वक्ष्यमाणवचनस्वरसाद्ब्राह्मणादित्यध्याहार्यः॥ब्राह्मण एव प्रब्रूयादिति द्वितीयं॥नेतरा विति प्रतिषेधरूपं तृतीयं॥एवं यदा सत्रियादिरध्यापयति तदा तस्याऽध्येतुश्च दोषः॥आपद्युभयोर्दोषो नास्तीत्याह मनुः॥अब्राह्मणादध्ययनमापत्काले विधीयते॥अनुव्रज्यंतु शुश्रूषा यावदध्ययनं गुरोरिति॥अनुव्रज्य शुश्रूषे स्तु गमनमात्रं॥कार्यं न पादप्रक्षालनादि॥इयं चापद्ब्राह्मणाध्यापकाभावरूपाऽध्येतुः॥गौतमोपि॥आपत्कल्पोऽब्राह्मणाद्ब्राह्मणस्य विद्योपयोगोनुगमनं शुश्रूषा समाप्ते ब्राह्मणो गुरुरिति॥मनुरपि॥श्रद्दधानः शुभां विद्यामाददीतावरादपि॥अंत्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपीति॥वेदाध्ययनस्य श्रैष्ठ्यमाह॥याज्ञवल्क्यः॥यज्ञानां तपसश्चैव शुभानां चैव कर्मणां॥वेद एव द्विजातीनां निःश्रेयसकरः पर इति॥विद्यादानस्य फलमाह स एव॥सर्वधर्ममयं ब्रह्म प्रदानेभ्योधिकं यतः॥तद्ददत्समवाप्नोति ब्रह्मलोकं सनातनमिति॥इति शिष्यधर्माः॥अथानध्यायाः॥ते च नित्यनैमित्तिकभेदेन द्विधा॥तत्र नित्यास्तावदुच्यंते॥मनुः॥अमावास्या गुरुं हंति शिष्यं हंति चतुर्दशी॥ब्रह्माऽष्टमीपौर्णमास्यौ तस्मात्ताः परिवर्जयेदिति॥तथा॥अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु चेति॥अष्टमीत्वेनाष्टकानामुपादानाद्दोषातिशयार्थं पुनर्ग्रहणं॥केचित्तु॥अष्टमीष्विति व पठंति॥अहोरात्रं चायमनध्यायः॥याज्ञवल्क्येन तु निशास्वित्यनुवृत्तौ चतुर्दश्यादीनामुपादानात्॥रामायणे हनुमद्वाक्यं॥सा स्वभावेन तन्वंगी तद्वियोगाद्विशेषतः॥प्रतिपत्पाठशीलस्य विद्येव तनुतां गतेति॥हारीतोपि॥प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः॥श्वोऽनध्यायेद्यशर्वर्यां नाधीयीत कदाचनेति॥तथा॥प्रदोषेषु त्रयोद

श्यांनाध्येयंप्रतिपत्सुचेति॥त्रिमुहूर्त्तःप्रदोषःस्याद्भानावस्तंगतेसतीसु
क्तप्रदोषे॥यद्वाप्रदोषउक्तोऽहन्मनुना॥चतुर्थ्यांचत्रयोदश्यांसप्तम्या
मर्धरात्रतः॥अर्वाक्नाध्ययनंकुर्याद्यदीच्छेत्तस्यधारणं॥स्मृत्यर्थ
सारेविशेषः॥चतुर्थ्याःपूर्वरात्रेतुनवनाडीषुदर्शने॥नाध्येयंपूर्वरात्रेस्या
त्सप्तमीचत्रयोदशी॥अर्धरात्रात्सुरान्वेत्स्यान्नाध्येयंपूर्वरात्रकेइति॥
पूर्वंचतुर्थ्यामर्द्धरात्रतोऽर्वाक्नाध्येयमितितावत्सर्वत्रचतुर्थीसत्वे॥अ
न्यथानवनाडीपर्यंतं॥यद्वापूर्ववचनेनार्द्धरात्रात्प्राक्प्रदोषेऽवगतेपुनर
त्रनवनाडीग्रहणंदोषातिशयार्थं॥दक्षः॥प्रदोषपश्चिमौयामौवेदाभ्या
सेनतौनयेत्॥यामद्वयंशयानस्तुब्रह्मभूयायकल्पते॥बौधायनः॥प्रातः
संध्यात्रिनाडीस्यात्सायंसंध्यातथाविधा॥महानिशातुविज्ञेयाचतस्रोघ
टिकास्तथा॥सायंप्रातःसंध्ययोश्चनाधीयीतमहानिशि॥तथा॥महानि
शातुविज्ञेयारात्रेर्मध्यमयामयोः॥तस्यांस्नानंनकुर्वीतस्वाध्यायंपितृ
तर्पणमिति॥अत्रापिघटिकाचतुष्टयंदोषातिशयार्थंस्मृतिचंद्रिकायां
पुराणे॥महानवम्यांद्वादश्यांभरण्यांचमहाद्युते॥तथाक्षयतृतीयायां
शिष्यान्नाध्यापयेद्बुधः॥माघमासस्यसप्तम्यांरथाख्यायांविवर्जयेदि
ति॥महच्छब्दस्यद्वादश्यांभरण्यांचसंबन्धइतिधर्मप्रकाशे॥महान
वमीआश्विनशुक्ला॥महाद्वादशीकार्त्तिकशुक्लद्वादशी॥महाभरणीप्रो
ष्ठपद्यनंतरेतितत्रैव॥नारदीये॥अयनेविषुवेचैवशयनेबोधनेहरेः॥
अनध्यायस्तुकर्त्तव्योमन्वादिषुयुगादिषु॥तथा॥युगादिषुचसर्वासु
तथामन्वंतरादिषु॥अनध्यायंप्रकुर्वीतयाचसोपपदातिथिः॥मन्वंत
रादयोयुगादयश्चश्राद्धमयूखेवक्ष्यंते॥सोपपदाउक्ताःकालादर्शे॥
सिताज्येष्ठेद्वितीयाचआश्विनेदशमीसिता॥चतुर्थीद्वादशीमाघेएताः
सोपपदाःस्मृताइति॥यदिकदाचिदनध्यायतिथिःप्रातःसायंवातदा
प्यनध्यायइत्याहबौधायनः॥यद्यनध्यायतिथिर्हिमुहूर्त्तापरिदृश्येतत
मनध्यायंप्राहुरिति॥दिनमध्येपरिदृश्येतेत्यर्थः॥कालादर्शेस्मृतिः॥चा
तुर्मास्यद्वितीयासुवेदाध्यायंविवर्जयेदिति॥ताआहगार्ग्यः॥शुचावूर्जेत
पस्येचयाद्वितीयाविधुक्षये॥चातुर्मास्यद्वितीयास्ताःप्रवदन्तिमनीषिणः॥

इति॥ विधुसयः कृष्णपक्षः॥ आषाढ्युत्तराकार्त्तिक्युत्तराफाल्गुन्युत्तरा
चेत्यर्थः॥ इति नित्यानध्यायाः॥ अथ नैमित्तिकेषु तात्कालिकानध्यायानाह
याज्ञवल्क्यः॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिस्वने॥ अमेध्यशव
शूद्रांत्यश्मशानपतितांतिके॥ देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे
॥ भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते॥ पांसुवर्षे च दिग्दाहे संध्यानी
हारभीतिषु॥ धावतः पूतिगंधे च शिष्टे च गृहमागते॥ खरोष्ट्रयानहस्त्य
श्वनौवृक्षेरिणरोहणे॥ सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरि
ति॥ बाणो वंशः॥ शिष्टागमने पि शिष्टाज्ञायां नानध्यायः॥ यथाह यमः॥
आगते वा तिथिं दृष्ट्वा नाधीयीत वै बुद्धिमान्॥ अथानुज्ञापिते तस्मि
न्नध्येतव्यं प्रयत्नत इति॥ यानं रथादि॥ इरिणमूषरं मरुभूमिर्वा॥ पा
वनिमित्तं शब्दादितावदेवानध्याय इत्यर्थः॥ मनुः॥ नित्यानध्याय ए
व स्याद्ग्रामेषु नगरेषु च॥ धर्मनैपुणकामानां पूतिगंधे च सर्वत इति॥ धर्म
स्य नैपुणं संपूर्णत्वं तत्कामयंतीति॥ वसिष्ठो विशेषमाह॥ नगरेषु कामं
गोमधूकस्य कोविदारकपित्थयोः॥ श्लेष्मातकस्य छायायां चेति तात्का
लिकान्विदुः॥ श्राद्धपंक्तिषु विहितमंत्रभिन्नेषु श्राद्धभागेष्वनध्यायः॥
विहितमंत्राः श्राद्धमयूखे वक्ष्यंते॥ मनुः॥ शयानः प्रौढपादश्च कृत्वा चैवा
वसक्थिकां॥ नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव चेति॥ प्रौढपादः
प्रसारितपादः॥ पादारोपितपादो वा॥ अवसक्थिका जानुनोर्मध्यस्य च
बंधः॥ स एव॥ नाधीयीत श्मशानांते ग्रामांते गोव्रजेपि वा॥ वसित्वा मैथु
नं वासः श्राद्धिकं प्रतिगृह्य च॥ न विवादे न कलहे न सेनायां न संगरे॥ न भु
क्तमात्रे ना जीर्णे न वमित्वा न मुक्तके॥ शस्त्रेण च क्षते गात्रे रुधिरे च प
रिस्रुते॥ मुक्तकं सुखोद्गार इति धर्मप्रकाशे यमः॥ सामशब्दे नाथर्वयजु
षी ति॥ नाधीयीतेत्यर्थः॥ आपस्तंबः॥ शाखांतरध्वनौ साम्नामनध्याय
इति गौतमः॥ अभ्रदर्शने चापर्त्तौ॥ अपर्त्तौ प्रावृड्भिन्नर्त्तौ॥ हेमाद्रौ स्मृ
तिः॥ गजगंडसारससिंहव्याघ्रमहापापिकृतघ्नावेक्षणमनध्याय इति
॥ एषां यावद्देवेक्षणं तावदनध्याय इत्यर्थः॥ प्रचेताः॥ चतुष्पथवर्त्मसु हा
थरा जो वा न तेषु नाधीयीतेति॥ शंखः॥ नाधानमभियुक्तोपि यानगो न च गोगतः
॥ देवायतनवल्मीकश्मशानवनसन्निधौ॥ आपस्तंबः॥ ब्राह्मणः श्येय्यमाणो

मलवद्वाससेत्युन्संभाषितुंब्राह्मणेनसंभाष्यतयासंभाषेतब्राह्मणेने
वसंभाष्याधीयीतेति॥यावद्ब्राह्मणसंभाषणंनकृतंतावदनध्यायमाह
मनुः॥प्रादुष्कृतेष्वग्निषुतुविद्युत्स्तनितनिस्वने॥सज्योतिःस्यादनध्या
यःशेषेरात्रौयथादिवा॥प्रादुष्कृतेष्विनिसंध्योपलक्षणं॥सज्योतिरिति
सायंसंध्यायांरात्रौ॥पूर्वंविद्युत्स्तनितवर्षाणिप्रक्रांतानि॥तत्रोभयोरु
क्तं॥शेषेवर्षेयथादिवातथारात्रौ॥अहोरात्रमित्यर्थः।वर्षसंध्यायामेव।
अयंसज्योतिरनध्यायःप्रावृट्काले।यथाहपैठीनसिः॥यदावर्षास्ववि
द्युत्स्तनितंवातदासज्योतिरिति॥अवर्षासुविद्युदादौत्रिरात्रंवक्ष्यते॥
इदंसायंसंध्यायांहारीतेन।प्रातःसंध्यास्तनितेहोरात्रमित्युक्तत्वात्॥
स्मृत्यर्थसारे॥काकोलूकमूषककुक्कुटमंडूकाद्यंतरागमने।दिनेचेद्दिनां
तंरात्रौचेद्रात्र्यंतमनध्यायइति॥गौतमः॥श्मशानग्रामांतमहापथाशौ
चेष्वनध्यायइति।इतिसज्योतिरनध्यायः।अहोरात्रानध्यायमाहया
ज्ञवल्क्येन॥संध्यागर्जितनिर्घातभूकंपोल्कानिपातने॥समाप्यवेदंद्यु
निशमारण्यकमधीत्यच॥पशुमंडूकनकुलश्वाहिमार्जारमूषकैः॥कृ
तेंतरेत्वहोरात्रंशक्रःपार्वणसंबंधि।एकोद्दिष्टेवक्ष्यते॥नवश्राद्धेत्वजर
णपर्यंतमनध्यायः॥शातातपः॥अष्टकासुत्वहोरात्रमुल्कासुचमहो
त्सवेइति॥गौतमः॥सकलोपाहितेवेदसमाप्तिःछर्दिःश्राद्धेमनुष्यय
ज्ञभाजनेष्वहोरात्रमिति॥सकलोपाहितोग्न्युत्पातः॥छर्दौविशेषमा
हापस्तंबः॥छर्दयित्वास्वप्नांतेघृतंवाप्राश्येति॥अधीयीतेत्यर्थःस्व
प्नांतंमोहनादि।धर्मप्रकाशे॥अहोरात्रानुवृत्तोगोभिलः॥सब्रह्मचारि
णिमृतेश्मेत्तेभूमिपतावपीति॥अनध्यायइत्यर्थः।गौतमः।ऊर्ध्वंभोजना
दुत्सवेप्राधानस्येति।अस्यार्थः।उत्सवेविवाहादावूर्ध्वंभोजनादहोरात्र
मनध्यायः।प्राधानस्यप्रथमाध्ययनेअनुत्सवेपिभोजनादूर्ध्वमनध्या
यइति॥इत्यहोरात्रानध्यायाः।आकालिकानध्यायमाहमनुः।विद्युत्स्त
नितवर्षेषुमहोल्कानांचसंप्लवे॥आकालिकमनध्यायमेतेषुमनुरब्रवीदि
ति।विद्युदादित्रयसाहित्यमत्रज्ञेयं॥इहनिर्देशादितिमेधातिथिः।प्रत्येकं
निमित्ततेतिहेमाद्रिः।इदंचवर्षाकालेतद्भिन्नेवक्ष्यते॥यस्मिन्समयेनि
मित्तंजातंतंकालमारभ्यश्वस्तावत्कालपर्यंतंविद्युदादीनांनिमित्तत्वंसं

ध्यायामेव। यथाह स एव। एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु॥ त
दा विद्यादनध्यायमनृतौ चाभ्रदर्शने॥ एवं चाकृताव भ्रदर्शने नानध्यायः
। अभ्रदर्शनेपि प्रादुष्कृताग्न्वय इति धर्मप्रकाशे। आपस्तंबः। उल्कापातम
भ्युत्सातं च सर्वासां विद्यानामाकालिकमिति॥ अनध्याय इत्यर्थः। हेमाद्रौ
स्मृत्यंतरे॥ अभ्युत्साते चाकालवृष्टौ चाकालिकोनध्याय इति॥ अभ्युत्सा
तश्च समानग्रामभवः॥ आपस्तंबः। विद्युत्स्तनयित्नुवृष्टयोः पर्तौ यत्र स
न्निपतेयुस्त्र्यहमनध्यायो यावद्भूमिर्व्युदकेत्येके॥ एकेन द्वाभ्यां चैतेषामा
कालमिति॥ अपरत्तुमाह गार्ग्यः। अनूराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः।
यावत्प्रवर्त्तते तावदकालं मुनयो विदुरिति॥ एवं च मृगमारभ्य विशाखां
तं कालः। इत्याकालिकानध्यायः। पक्षिण्यनध्यायमाह मनुः॥ यथा शा
स्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः। विरमेत्पक्षिणीं रात्रिं यद्वाप्येकमहर्नि
शमिति॥ कालादर्शे मनुः। उत्सर्गे प्रथमे ध्याये त्वनध्यायस्त्र्यहं भवेत्॥
धारणाध्ययनादौ तु पक्षिणी दिनमेव चेति। इति पक्षिण्यनध्यायः। त्रि
दिनाःनध्यायमाह मनुः। प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनं॥ त्र्य
हं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतक इति। अत्र केचिन्नवश्राद्धेऽज
रणपर्यंतमनध्याय एकोद्दिष्टे तु त्र्यहमित्यनौचित्यं मन्वाना नवश्राद्धे
यामतिपूर्वान्नभोजनेऽजरणपर्यंतमेकोद्दिष्टेषु मतिपूर्वे त्र्यहमि
ति व्यवस्थापयंति॥ मनूक्तैकोद्दिष्टशब्देन नवश्राद्धान्यपि गृह्यंते। शंखः।
राहुदर्शने शक्रध्वजपतने आचार्ये च मृते त्रिरात्रमिति। इदं च संपूर्णग्रहे
। खंडग्रहे तु गौतमोक्तमाकालिकमनध्यायं विद्यादिति तत्रैव॥ विज्ञाने
श्वरस्तु ग्रस्तास्ते त्रिरात्रमन्यथाऽकालिकमित्याह। शक्रध्वजकालमा
ह गार्ग्यः। द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे तथा॥ शक्रयष्टिनिपातन
मिति। पौर्णमास्यामिति केचित्। मनुः। उपाकर्मणि चोत्सर्गे त्रिरात्रं स
क्षपणं स्मृतमिति। याज्ञवल्क्यः। त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबं
धुषु॥ विश्वामित्रः॥ समाप्य वेदं त्रिदिनं वेदानध्ययनं भवेदिति॥ हारी
तः। आरण्यसूकरस्य त्र्यहं ग्राम्यस्याहरिति। अंतरागमन इत्यर्थः। इ
ति त्र्यहानध्यायाः॥ महागुरुनिपाते ब्राह्मणस्य द्वादशरात्रमध्यय
नादिनिषेधात्सोप्यनध्यायः। त्रिमासानध्याय उक्तो हेमाद्रौ॥ अथ

गवयाजव्याघ्रनास्तिकादौविमासमिति॥षण्मासानध्यायउक्तः॥
श्लोकगौतमेन॥गुर्वंतेवासिनांवेदमध्येतॄणांचमध्यतः॥पशुःश
शाःश्वपाकाःजानाधीयीताहंवत्सरमिति॥पूर्वमजेमासत्रयमुक्तं॥
अतोऽत्रप्रथमारंभेजगमनेषण्मासंज्ञेयं॥संवत्सरानध्यायापवादमा
हमनुः॥वेदोपाकरणेचैवस्वाध्यायेचैवनैत्यके।नानुरोधोऽस्त्यनध्यायेहो
ममंत्रेषुचैवहीति॥नित्यस्वाध्यायोब्रह्मयज्ञः॥शौनकः॥नित्येजपेच
काम्येचवेदपारायणेतथा॥नाऽनध्यायोऽस्तिवेदानांग्रहणेग्राहणेस्मृतः
॥तथा॥देवतार्चनमंत्राणांनानध्यायःस्मृतस्तथा॥नाऽनध्यायेजपेहे
तान्रुद्रांश्चैवविशेषतःपौरुषंपावमानंचगृहीतनियमादृतेइति।
यदिमंवेदमपठित्वानभोक्तव्यमितिनियमस्तदाऽध्येयमित्यर्थः।त
था॥चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेवसर्वदा।दुर्मेधसामनध्यायस्त्वंतराग
मनेषुच॥तत्रविस्मृतिशीलानांबहुवेदप्रपाठिनां॥चतुर्दश्यष्टमीपर्वप्र
तिपद्वर्जितेषुच॥वेदांगन्यायमीमांसाधर्मशास्त्राणिवाभ्यसेदितिपठि
तं॥इत्यपवादाः।भिक्षाप्रकारमाहमनुः॥प्रतिगृह्येप्सितंदंडमुपस्थाय
चभास्करं॥प्रदक्षिणंपरीत्याग्निंचरेद्भैक्षंयथाविधि॥भवत्पूर्वंचरेद्भैक्ष
मुपनीतोद्विजोत्तमः॥भवन्मध्यंतुराजन्योवैश्यस्तुभवदुत्तरः।वेदयज्ञै
रहीनानांप्रशस्तानांस्वकर्मसु।ब्रह्मचार्याहरेद्भैक्षंगृहेभ्यःप्रयतोऽन्वह
मिति॥भवत्पूर्वमितिभवतीभिक्षांददातुभिक्षांभवतीददातुभिक्षांददातु
भवतीति॥व्यासः॥ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहं॥सजातीय
गृहेष्वेवसार्ववर्णिकमेववेति॥शूद्रादामंग्राह्यंनतुपक्वं।तस्मादामंगृही
तव्यंशूद्रादप्यंगिराब्रवीदित्यंगिरःस्मृतेः॥यस्तुवेदमधीयानःशूद्रान्न
मुपजीवति।शूद्रोवेदफलंयातिशूद्रत्वंचाधिगच्छतीतिपराशरेणासिद्धा
न्नस्यनिंदितत्वाच्च॥एतच्चापद्विषयं॥चातुर्वर्ण्यंचरेद्भैक्षमलाभेकुरुनंद
नेतिभविष्यत्पुराणोक्तेः॥मनुरपि॥सर्वंवापिचरेद्ग्रामंपूर्वोक्तानामसंभवे॥
नियम्यप्रयतोवाचमभिशस्तांस्तुवर्जयेदिति॥अभिशस्तवर्ज्जनेनैवप
तितवर्जनंसुतरांसिद्धं।विशेषमाहमनुः॥गुरोःकुलेनभिक्षेतनज्ञातिकु
लबंधुषु।यत्तु।मातरंवास्वसारंवामातुर्वाभगिनींनिजां॥भिक्षेतभिक्षांप्र
थमंयाचैनंननिवारयेदिति॥तथाप्रत्याख्यायिनमग्रेभिक्षेत॥प्रत्याख्या

यिमंचेतितदुपनयनांगभिक्षापरमितिनविरोधः। एतच्चसायंप्रातःका
र्यं॥ सायंप्रातरमंत्रेणभिक्षांचरेदित्यापस्तंबोक्तेः। अमंत्रेविशेषमाह
हारीतः॥ लोहेमृन्मयेवापात्रेभुंजीतेति॥ विशेषमाहमनुः॥ भैक्षेणवर्त्त
येन्नित्यंनैकान्नाशीभवेद्व्रतीति। यमः। आहारमात्रादधिकंनक्वचिद्भैक्ष
माहरेत्॥ युज्यतेस्तेयदोषेणकामतोधिकमाहरन्निति। कामतइत्युक्त्या
ऽज्ञानादधिकाहरणेनदोषः। अज्ञानादधिकाहरणे आपस्तंबः। नचोच्छि
ष्टंकुर्यादशक्तौभूमौनिखनेदप्सुवाप्रवेशयेदिति॥ गुरवेनिवेद्यमित्याहम
नुः। समाहृत्यतुतद्भैक्षंयावदर्थममायया॥ निवेद्यगुरवेश्नीयादाचम्य
प्राङ्मुखःशुचिरिति॥ अमाययागुरुर्ग्रहीष्यतीतिभियास्वादुनगोपनी
यमित्यर्थः। याज्ञवल्क्यः॥ कृताग्निकार्योभुंजीतवाग्यतोगुर्वनुज्ञया॥
अपोशानक्रियापूर्वंसत्कृत्यान्नमकुत्सयन्निति। गुरोरसन्निधौतत्पुत्रा
दिभ्योनुज्ञाग्राह्या॥ असन्निधौतद्भार्यापुत्रसब्रह्मचारिसद्भ्यइतिगौतम
स्मरणात्॥ आपस्तंबः। भुक्त्वास्वयममत्रंप्रक्षालयेदिति॥ नच्चभोजन
मपरिमितमित्याहवसिष्ठः। अष्टौग्रासामुनेर्भैक्ष्यंवानप्रस्थस्यषोडश
। द्वात्रिंशत्तुगृहस्थस्याऽपरिमितं ब्रह्मचारिणइति॥ आपस्तंबः। आहि
ताग्निरनड्वांश्चब्रह्मचारीतितेत्रयः। अश्नंतएवसिध्यंतिनैषांसिद्धिरनश्न
तामिति॥ आहिताग्नेर्बर्हिःसमिदाहरणादेरवश्यकर्त्तव्यत्वाद्ब्रह्मचारिण
श्चगुरुसेवायाअवश्यकर्त्तव्यत्वात्तद्धि रोधिशरीरनैर्बल्यापादकंकाम्य
व्रतादिनानुष्ठानार्हमित्यर्थः। इतिभिक्षाटनं। ब्रह्मचर्यावधिमाह॥ अव
श्यकर्त्तव्यत्वात्तद्विरोधिशरीरनैर्बल्यापादकंकाम्यव्रतादि। याज्ञवल्क्यः
॥ प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानिपंचवा। ग्रहणांतिकमित्येकइति॥ या
वद्ग्रहणंस्वाधीनोच्चारणक्षमत्वंतावद्वा॥ यमः॥ वसेद्द्वादशवर्षाणिच
तुर्विंशतिमथवा॥ षट्त्रिंशतंवावर्षाणिप्रतिवेदव्रतंचरेदिति। यस्तु। चतुरो
वेदानध्येतुमिच्छतितस्याष्टाचत्वारिंशद्वर्षाणि। यथाहापस्तंबः। उपेत
स्याचार्यकुलेब्रह्मचारिण्यष्टाचत्वारिंशद्वत्सरानिति। अत्रचपक्षविकल्पे
अध्ययनकालएववैकल्पिकानामादितोपधारणमितिन्यायेनैकःपक्षःपरि
ग्रहीतव्यः। नत्स्मिंश्चद्वादशवर्षपक्षादौपरिगृहीतेमध्येगृहीतेपिवेदेकालः
पूरयितव्यइतिमेधातिथिः। इतिब्रह्मचर्यावधिः। द्विविधोब्रह्मचारीउपकुर्वा

णिकोनैष्ठिकश्च॥तत्रनैष्ठिकस्यविशेषउक्तोयाज्ञवल्क्येन॥नैष्ठिकोब्रह्म
चारीतुवसेदाचार्यसन्निधौ॥तदभावेस्यतनयेपत्न्यांवैश्वानरेपिवेति॥
वसिष्ठः।संयतवाक्चतुर्थषष्ठाष्टमकालभोजनखट्वाशयनदंतप्रक्षाल
नांजनाभ्यंजनवर्जःस्थानासनशीलस्त्रिरन्होभ्युपेयादिति।त्रिकालंस्
नायादित्यर्थः।देवलेनतुसकृदवगाहनंसकृद्भोजनमुक्तंतदशक्तपरं
।केषांचिन्नैष्ठिकब्रह्मचर्यमेवेत्याह॥विष्णुः॥कुब्जवामनजात्यंधक्ली
बपंग्वार्त्तरोगिणां।व्रतचर्याभवेत्तेषांयावज्जीवमनंशतइति।अत्रानंश
तइतिहेतुवचनाद्दृष्टमूलत्वमुक्तं।अतःप्रतिग्रहादिनाद्रव्यसद्भावेभवत्ये
वविवाहः।इष्टंचधृतराष्ट्रसंग्रहेपि॥पंग्वादीनामनंशत्वादसामर्थ्याच्चशा
स्त्रतः।नियतंनैष्ठिकत्वंस्यात्कर्मस्वनधिकारतइतिचेवंसर्वेनैष्ठिकवि
धीनांकुब्जादिपरत्वेनोपसंहारादन्येषामनधिकारइतिवाच्यं।यदित्वा
त्यंतिकोवासोवसतोस्यगुरोःकुले॥युक्तःआपस्तंबवचनविरोधः।द्वि
तीयोनैष्ठिकश्चैवतस्मिन्नेवाश्रमेस्थितइतिदक्षिणेकाश्रमत्वोक्तेः।अ
स्यफलमाहयाज्ञवल्क्यः॥अनेनविधिनादेहंसाधयन्विजितेंद्रियः।
ब्रह्मलोकमवाप्नोतिनचेहाजायतेपुनरिति॥इदंचफलंब्रह्मविद्विषय
मब्रह्मविधिः।व्रतान्युक्तान्याश्वलायनस्मृतौ॥प्रथमंस्यान्महानाम्नी
द्वितीयस्यान्महाव्रतं।तृतीयंस्यादुपनिषद्गोदानाख्यंततःपरमिति।स्मृ
त्यादौगोदानस्यैवकेशांतइतिसंज्ञा॥तत्कालमाहमनुः॥केशांतःषोड
शेवर्षेब्राह्मणस्यविधीयते॥राजन्यबंधोर्द्वाविंशेवैश्यस्यद्व्यधिकेतत
इति॥द्व्यधिकेचतुर्विंशेइत्यर्थः।एवंचव्रतानांवर्षव्यवधानेनानुष्ठेय
त्वाद्ब्राह्मणस्यत्रयोदशवर्षादारभ्यव्रतानिभवंति॥राजन्यस्योनविं
शवर्षादारभ्यवैश्यस्यैकविंशादारभ्येति॥एषुचव्रतेषुचौलवत्कालनि
र्णयः॥तदुक्तंश्रीधरीये॥तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणं॥चौल
वत्सर्वमाख्यातंसगोदानव्रतेषुचेति॥तैत्तिरीयाणांनामभेदःप्राजाप
त्यंसौम्यमाग्नेयंवैश्वदेवमिति॥तेषुचव्रतेषुदंडादीनाहपराशरः॥यस्य
स्यविहितंकर्मयत्तत्त्वंयाचमेखला॥योदंडोयच्चवसनंतत्तदस्यव्रतेष्व
पीति॥स्वकालेव्रतलोपेप्रायश्चित्तमाहात्रिः॥पिताभ्रातापरोवापिप्राजा
पत्यत्रयंचरेदिति।वटोरशक्तौपित्रादीनामनुष्ठानं।शक्तौतुतेनैवकार्यं॥

यथाह शौनकः ॥ प्रत्येकं कृच्छ्रमेकैकं चरित्वाज्याहुतीः शतं ॥ हुत्वाचैव
तु गायत्र्या स्नायादित्याह शौनक इति ॥ अत्र प्रायश्चित्ते स्नानसमानक
र्तृकत्वश्रवणादूटोरेव कर्तृत्वं प्रायश्चित्तोत्तरकालमेतानि समावर्तने
न सह कर्त्तव्यानीति प्रयोगपारिजाते ॥ तत्र मूलं मृग्यं ॥ इति व्रतलोपप्रा
यश्चित्तं ॥ अथाश्रमविकल्पसमुच्चयौ ॥ समुच्चयस्तावदादित्यपुराणे
॥ ब्रह्मचारिगृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥ सर्वेपि क्रमशस्त्वेते
यथाशास्त्रं निषेविताः ॥ यथोक्तकारिणं विप्रं नयंति परमां गतिमिति ॥ गृह
स्थप्रभवा गृहस्थोपजीविनः । अध्वस्तनव्रतादीनां गृहस्थानामपि गृ
हस्थोपजीवित्वाच्चतुर्णां ग्रहणं । क्रमश इति प्रातिलोम्यनाभीष्टं । तथा
च दक्षः ॥ त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ॥ प्रातिलोम्येन
यो याति न तस्मात्पापकृत्तरः ॥ त्रयाणामिति ब्रह्मचर्योत्तरेषां ग्रहणं । त
स्यावश्यकत्वादित्यर्थः । मनुर्विशेषमाह ॥ चतुर्थमायुषो भागं वसित्वा
द्यं गुरोः कुले ॥ द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ वनेषु च विहृ
त्यैवं तृतीयं भागमायुषः ॥ चतुर्थमायुषो भागं त्यक्त्वा संगान्परिव्रजेदि
ति ॥ अत्र शतायुर्वै पुरुष इति श्रुतेः । पंचविंशतिवर्षपर्यंतमेकैकस्मिन्ना
श्रमेऽवस्थातव्यमिति निबंधकृतः ॥ एवं क्रमे स्थिते यदापस्तंबेनोक्तं । च
त्वार आश्रमा गार्हस्थ्याश्रमानुपसेवते ॥ स सर्वलोकान्विजित्य ब्रह्मलो
काय कल्पत इति । विकल्प उक्तो जाबालश्रुतौ ॥ यदि चेतरथा ब्रह्मचर्या
देव प्रव्रजेद्गृहाद्वा वनाद्वेति । भविष्यत्पुराणेपि ॥ गार्हस्थ्यमिच्छन्भूपा
लः कुर्याद्दारपरिग्रहं ॥ ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकं ॥ वैखानसो
वापि भवेत्परिव्राडथवेच्छयेति ॥ वसिष्ठेन गार्हस्थ्यस्य स्तुतिरुक्ता ॥ गृ
हस्थ एव प्रव्रजेद्गृहस्थस्तत्र यतेयतः ॥ चतुर्णामाश्रमाणां तु गृहस्थस्तु
विशिष्यते ॥ सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ॥ गृहस्थ उच्यते श्रेष्ठः
स त्रीनेतान्बिभर्ति हीति । ततश्चैवमुक्तं । प्रथमं ब्रह्मचर्यमावश्यकं ॥ त
तो यदि तत्रैव ह विरक्तो ब्रह्मचर्येणैवाजीवं तिष्ठेत् ॥ यदि न ह विरक्तो
गृही वनी यती वा भवेदिति ॥ ततो गार्हस्थ्ये नैवायुः क्षपयेत् ॥ वनाश्रमेण
वा यत्याश्रमेणास्य चतुर्विध इति मनुवाक्ये ब्राह्मणग्रहणं द्विजोपलक्ष
णमिति ॥ प्रवनस्पतीन ॥ न तु मेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु ॥ न प्र

त्यम्यर्कं गोसोमसंध्यांवुस्त्रीद्विजन्मनः॥नेक्षेतार्कं ननग्नांस्त्रीं नचसंसृष्टमै
थुनं॥नचमूत्रंपुरीषंवानाशुचीराहुतारकाः॥अयंमेवज्र इत्येवंसर्वमंत्र
मुदीरयन्॥वर्षतिप्रावृतोगच्छेत्स्वपेत्प्रत्यक्शिरानच॥अयंमेवज्रःपा
प्मानमपहंत्विति मंत्रः॥गच्छेन्नधावेत्॥ष्ठीवनासृक्शकृन्मूत्ररेतांस्य
प्सुननिक्षिपेत्॥जलमितिपेयमात्रोपलक्षणं॥नांजलिनापिबेदितिगौत
मेनपेयविशेषानुपादानादितिकश्चित्तन्न॥सामान्यस्यापिगौतमीयस्य
विशेषेणयाज्ञवल्क्येनोपसंहर्तुंशक्यत्वात्॥अतोजलमेवचपेयमात्र
मिति॥शयानंश्रेष्ठंनप्रबोधयेदिति॥नैकःस्वप्याच्छून्यगृहेश्रेयांसनप्र
बोधयेदितिमनूक्तेः॥विरुद्धंवर्जयेत्कर्मप्रेतधूमंनदीतरं॥केशभस्म
तुषांगारकपालेषुचसंस्थितिं॥विरुद्धंजनपदकुलविरुद्धं।नदीतरणं
बाहुभ्यां।अतउडुपादिनापारगमनेनदोषः॥नदीमितितडागाद्युपल
क्षणमितिकश्चित्॥तत्रप्रमाणंमृग्यं॥यदिपरंमीमांसाभिज्ञःसन्नुद्दे
श्यविशेषणमविवक्षितमितिनीत्यानदीग्रहणमविवक्षितमेवंजलग्र
हणमितियदिमन्यसेतर्हिश्रेयांसमितिविशेषणविवक्षाहेतोःकिमिति
मूकोसि॥एवंनब्राह्मणंहन्यादित्यत्राप्यतिप्रसंगः॥नाचक्षीतधयंतीं
गांनाःद्वारेणविशेत्क्वचित्॥नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रव
र्तिनः॥परस्यक्षीरादिधयंतींगांतस्मैनाचक्षीत॥यद्वावत्संधापयंतींअं
तर्भाविणर्थंतात्त्वत्प्रत्ययः॥नविनिवर्त्तयेदपि॥नवारयेद्गांधयंतीं
नवाचक्षीतकस्यचिदितिमनूक्तेः॥प्रतिग्रहेसूनिचक्रिध्वजिवेश्यान
राधिपाः॥दुष्टादशगुणंपूर्वात्पूर्वादेतेयथाक्रमं॥सूनीहिंसाशीलः॥
चक्रीतिलपीडकः॥ध्वजीसुरयाचक्रेणजीवी।देवर्तिकुश्यालकाचार्यश
तम्भ्वायापरस्त्रियाः॥नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानिच।विप्राहि
क्षत्रियात्मानोनावज्ञेयाःकदाचन॥आमृत्योःश्रियमाकांक्षेन्नकंचिन्म
र्मणिस्पृशेत्॥दूरादुच्छिष्टविण्मूत्रपादांभांसिसमुत्सृजेत्॥पादांभःपा
दप्रक्षालनोदकं॥श्रुतिस्मृत्युदितंकर्मनित्यंसम्यक्समाचरेत्॥गोब्राह्म
णानलान्नानिनोच्छिष्टोनपदास्पृशेत्॥ननिंदाताडनेकुर्यात्पुत्रंशिष्यंच
ताडयेत्॥कथंतर्हिकेवलेगृहीतउच्छिष्टेनपुनःपात्रस्थंस्पृशते॥भोजना
र्थपात्रस्थेनदोषइतिशिष्टविगानाभावात्कल्प्यते॥कर्मणामनसावा

चापलाद्धर्मं समाचरेत्॥ अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु॥ अ
ननुज्ञातमपि भोजनाद्युच्छिष्टमांसभक्षणादिकं लोकविद्विष्टमत एवास्व
र्ग्यं नाचरेत्॥ धर्मपदेनापिनायोगान्न स्वार्थे तात्पर्यं। केचित्त्विदानींतनानां
नां मधुपर्के पशुवधादीनामेतद्वचनमूलकत्वमिति वदंति॥ तन्न॥ क
लिनिषिद्धत्वेनैवानाचरणात्॥ विधिविहितबाधकत्वायोगाच्च॥ मात
पितृतिथिभ्रातृजामिसंबंधिमातुलैः॥ वृद्धबालातुराचार्यवैद्यसंश्रित
बांधवैः॥ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः। विवादं वर्जयित्वा
तु सर्वान्लोकान्जयेद्गृही॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु॥ स्ना
यान्नदीदेवखातह्रदप्रस्रवणेषु च॥ परवार्यनुत्सृष्टोदकं॥ परशय्यास
नोद्यानगृहयानानि वर्जयेत्॥ अदत्तान्यग्निहीनस्य नान्नमद्यादनाप
दि॥ अदत्तान्यननुज्ञातानीति ग्रंथकृतः॥ कदर्यबद्धचोराणां क्लीबरंगा
वतारिणां॥ वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां॥ चिकित्सका
तुरक्रुद्धपुंश्चलीमत्तविद्विषां॥ क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजि
नां॥ अवीरास्त्रीजितग्रामयाजिनां॥ शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्ति
नां॥ नृशंसराजरजककृतघ्नवधजीविनां॥ चैलधावकसुराजीवसहोपप
ते॥ लोभाद्यःपितरौ भृत्यान्स कदर्य इति लक्षितः॥ वैणो वेणुच्छेदनजीवी
॥ वीणावादनजीवीति केचित्॥ गणदीक्षी बहुयाजकः॥ पराशरस्मृति
व्याख्याने तु गणान्नं। दीक्षी दीक्षितस्तस्यान्नं चेति व्याख्यातं॥ गणान्नं च
आचार्यास्तु वदंति॥ उभयोरपि श्रुतिस्त्वापि शेषणाबाधान्नाप्रामाण्यं॥ त
दुक्तं क्रीतराजकभोज्यान्नवा क्यं चाथर्ववैदिकं। न च तस्याप्रमाणत्वे किंचि
दप्यस्ति कारणमिति। तथोभयोर्विषयोपि प्रदर्शितः॥ आपद्धर्मा यथैवान्ये
मुख्यासंभवहेतुकाः॥ तथैव प्राणपीडायां क्रीतराजकभोजनं॥ सामान्ये
नाभ्यनुज्ञाता द्विशेषश्च विशिष्यते॥ विशेषोत्यंत निर्दोषः। शाकदोषेतर
क्रियेति प्रपंचितं चैतद्वार्त्तिककारैरिति कान्यभिया नेह विस्तरेण प्रपंचितं
राजपुरोहितान्नानि वर्जयेदिति शंखस्मृतेः॥ कदर्योदयश्च द्विजातय ए
व॥ शूद्राणां वक्ष्यमाणदासादिव्यतिरेकेणाभोज्यान्नत्वात्॥ शूद्रेषु दा
सगोपालकुलमित्रार्द्धसीरिणः। भोज्यान्ना नापितश्चैव यश्चात्मानं निवे
दयेदिति॥ अर्द्धसीरी कृषिफलभागग्राही॥ अहं त्वदेकाश्रित इति यो निवेद

नमात्मनः करोति॥शूद्रादीनां भोज्यान्नत्वमापद्विषयमितिहरदत्तः॥चतुर्विंशतिटीकायां तु॥कंदुपक्वं स्नेहपक्वं पायसं दधिसक्तवः॥एतानि शूद्राद्ग्राह्याणि भोज्यानि मनुरब्रवीदितिवचनोपात्तपरमिति॥शूल्पक्वमस्पृष्टमित्यर्थः॥परंतु कलावेतेषां भोज्यान्नत्वनिषेधान्नातीव परिच्छेदोस्माभिः क्रियते॥कलिवर्ज्यानि च समयमयूखे वदर्शयिष्यामः॥माधवीये मार्कंडेयः॥नम्लेच्छभाषां शिक्षेत न पश्येदात्मनः शकृत्॥वर्जयेन्मार्जनीरेणुं नापेयं च पिबेद्द्विजइति॥अपेयं कांजिकादि॥वयसः कर्मणोर्थस्य श्रुतस्याभिजनस्य च॥नोपरिक्तं न वारिस्थं न मध्यंन भसोगतं॥नलंघयेद्वत्सतंतीं न प्रधावेच्च वर्षति॥वत्सतंती वत्सबंधनरज्जुः वत्सग्रहणं च गोत्वजातेरुपलक्षणमितिहरदत्तः॥न चोदके निरीक्षेत स्वं रूपमितिधारणा॥नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीं॥क्षुवंतीं जृंभमाणां वा न चासीनां यथासुखं॥नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृतां॥नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्॥न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे॥न फालकृष्टे न जले न चित्यां न च पर्वते॥नोदक्यया भिभाषेत यज्ञं गच्छेन्न वाकृतः॥ अवृतो यजमानेनाकारितो लोभान्न गच्छेत् द्रष्टुं तु कामं गच्छेत्॥न यज्ञमवृतोगच्छेद्दर्शनाय तु काममितिगौतमोक्तेः॥स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्॥नदीमिंद्रायुधं द्दृष्ट्वा कस्यचिद्दर्शयेद्बुधः॥न भुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्॥अनेन चोद्धृतस्नेहतक्रादिभोजनमनाचारः॥यत्तु तक्रादिभिन्नपिण्याकादिपरत्वं कल्पयन्ति तन्न किंचिन्मूलं॥सौहित्यं अत्यशनं नन्त्येद्थवा गायेन्नवादित्राणि वादयेत्॥न पादौ धावयेत्कांस्ये कदाचिदपि भाजने॥न भिन्नभांडे भुंजीत न भावप्रतिदूषिते॥उपानहौ च वासश्च धृतमन्यैर्न धारयेत्॥उपवीतमलंकारं स्रजं करकमेव च॥बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनं॥बालातपः शरत्कालातपः संगवातपइत्यन्ये॥न कर्म निष्फलं कुर्यान्नापत्याय सुखोदयं॥गवां पृष्ठे न यानं तु सर्वथैव विगर्हितं॥रथादियोगे त्वापद्विगर्हितमिति ज्ञेयं॥गोचरसमूलानि दूरतः परिवर्जयेत्॥सर्वं च तिलसंबद्धं नाद्यादस्तमये प्रति॥आर्द्रपादस्तु भुंजीत नार्द्रपादस्तु संविशेत्॥न शूद्राय मतिं द-

शान्नोच्छिष्टंनहविःकृतं॥अयंचसाक्षादुपदेशनिषेधः।श्रावयेच्चतु
रोवर्णान्कृत्वाब्राह्मणमग्रतः॥इतिकरणेतुनदोषः।उच्छिष्टंभुक्ताव
शिष्टंनदद्यात्॥शूद्रस्यगौतमेनोच्छिष्टाशनंशिल्पवृत्तिश्चेति॥उच्छि
ष्टाशनस्याभ्यनुज्ञानान्नदोषः॥दातुस्तुभवत्येव॥एवंचयदिप्रत्यवा
यमंगीकृत्योच्छिष्टंददाति तदातेनभक्षणीयं॥यथाकुरुसेनादेदा
रभ्युदयःप्रतिग्रहीतुर्दोषएवमत्रापीतिकेचित्॥सांप्रदायिकास्तूउ
च्छिष्टदानप्रतिषेधोगृहस्थशूद्रविषयः॥तद्भिन्नायनुदेयं॥तथाच
व्याघ्रः॥उच्छिष्टमन्नंदातव्यंशूद्रायागृहमेधिने॥गृहस्थायतुदात
व्यमनुच्छिष्टंदिनेदिनइति॥नचास्योपदिशेद्धर्मंनचास्यव्रतमादिशे
त्॥धर्मंधर्मशास्त्रं॥पूर्वधर्मनिषेधस्तुदंडनीतिविषयइतिव्याख्याता
रः॥नसंहताभ्यांपाणिभ्यांकंडूयेतात्मनःशिरः॥नस्पृशेच्चैतदुच्छिष्टो
नचस्नायाद्विनाततः॥एततशिरः।इदंचशिरःस्नानंशक्तस्य।नस्नानमा
चरेद्भुक्त्वानातुरोनमहानिशि॥भोजनोत्तरंस्नानस्यनिषेधोरागप्राप्त
स्य॥भद्रंभद्रमितिब्रूयाद्भद्रमित्येववादयेत्॥शुष्कवैरंविवादंचनकु
र्यात्केनचित्सह॥शुष्कंफलशून्यं॥एवंविवादोपि॥नाऽज्ञातेनसमंग
च्छेन्नैकोनवृषलैःसह॥अनातुरःस्वानिखानिनस्पृशेदनिमित्ततः॥
खानिछिद्राणि॥रोमाणिशवरास्यानिसर्वाण्येवविवर्जयेत्॥प्रतिग्रहस
मर्थोपिप्रसंगंतत्रवर्जयेत्॥ नधर्मस्यापदेशेनपापंकृत्वाव्रतंचरेत्॥
यमान्सेवेतनियतंनित्यंचनियमान्बुधः॥आनृशंस्यंक्षमासत्यमहिंसाद
ममस्पृहा॥ध्यानंप्रमादोमाधुर्यमार्जवंचयमादश॥शौचमिज्यातपोदा
नंस्वाध्यायोपस्थनिग्रहः।व्रतोपवासौमौनंचस्नानंचनियमादश॥नाद्या
च्छूद्रस्यपक्वान्नंविद्वानश्राद्धिनस्तथा॥श्राद्धिनःश्रद्धारहितस्य॥आद
दीतामभेवास्मादवृत्तावेकरात्रकं॥उत्तमैरुत्तमैर्नित्यंसंबंधानाचरेत्तद
निनीषुःकुलमुत्कर्षमधमानधमांस्त्यजेत्॥गुरून्भृत्यांश्चोज्जिहीर्ष
न्नर्चिष्यन्देवतातिथीन्॥सर्वतःप्रतिगृह्णीयान्नतुतृप्येत्स्वयंततः॥ये
नास्यपितरोयातायेनयाताःपितामहाः॥तेनयायात्सतांमार्गंयेनगच्छं
स्तरिष्यति॥एषोदितागृहस्थस्यवृत्तिर्विप्रस्यशाश्वती॥स्नातकव्रतक
ल्पश्चसत्यवृत्तिकरःशुभइति॥अत्रस्वर्गीयपुण्ययशस्यानिव्रतानीमा

निधारयेदित्युपक्रमात्स्नातकव्रतकल्पश्चसत्यइतिकरःसुभइत्युप
संहाराच्चमध्येश्रुतानांनञामुपपदेनान्वयात्पर्युदासा अंगीक्रियंते॥
तदुक्तंभगवताजैमिनिना॥तदुत्सर्गेकर्मणिपुरुषार्थायेतितथाउपक्र
मेश्रुतंकर्मचाविव्रतपदं यतः॥तदन्वयबलात्कर्मविशेषोनात्रविद्यते
॥तेनलक्षणयाप्यत्रपर्युदासःसर्वक्रतोः॥वह्निःश्रुतःफलाकांक्षीपुरु
षार्थत्वमृच्छतीति॥संकल्पएववात्रलक्ष्यते॥उदाहृतश्चतत्ररत्नेस्मृ
तिः॥त्रिसंध्यंजपतातेनसावित्रीनेक्षइत्ययं॥आदित्येध्यायतानाकार्यः
संकल्पःपापनाशनइति॥विस्तरस्तुतत्ररत्नादौद्रष्टव्योदुर्गमत्वभि
यानेहप्रपंचितः॥अन्येचस्नातकधर्मामानवगौतमीयादिशास्त्रेद्रष्ट
व्याविस्तरभयात्तुनेहप्रपंचिताः॥इतिस्नातकधर्मप्रकरणं॥स्नातक
भेदाउक्तागोभिलेन॥विद्यास्नातकोव्रतकोविद्याव्रतःस्नातकश्चेति॥
विद्यामेवाधीत्यस्नानंकृतवानिति॥विद्यास्नातकः॥व्रतान्येवकृत्वा
स्नानंकृतवानितिव्रतस्नातकः॥विद्यामधीत्यव्रतानिकृत्वाचयःस्ना
तिसउभयस्नातकः॥तेषामंत्यःश्रेष्ठः॥उभौतुल्यौ॥इतिस्नातकभेदाः॥
उपकुर्वाणकस्यगार्हस्थ्यंकर्तुंविवाहउक्तोयाज्ञवल्क्येन॥अविप्लुतब्र
ह्मचर्योलक्षण्यांस्त्रियमुद्वहेत्॥अनन्यपूर्विकांकांतामसपिंडांयवी
यसीं॥अरोगिणींभ्रातृमतीमसमानार्षगोत्रजामिति॥अस्यार्थः॥ल
क्षण्यांबाह्याभ्यंतरलक्षणैर्युक्तां॥बाह्यानिमनुनोक्तानि॥अव्यंगांगीं
सौम्यनाम्नींहंसवारणगामिनीं॥तनुलोमकेशदशनांमृद्वंगीमुद्वहेत्स्त्रि
यमिति॥वर्ज्यामाह॥सएव॥नोद्वहेत्कपिलांकन्यांनाधिकांगींनरोगि
णीं॥नर्क्षवृक्षनदीनाम्नींनांत्यपर्वतनामिकां॥नपक्ष्यहिप्रेष्यनाम्नींन
विभीषणनामिकामिति॥विष्णुपुराणे॥नश्मश्रुव्यंजनवतींनचैवपुरु
षाकृतिं॥नघर्घरस्वरांक्षामांतथाकाकस्वरांनच॥नानिबद्धेक्षणांतद्व
द्वृत्ताक्षींनोद्वहेद्बुधः॥अनिबद्धेक्षणांमनोनुरंजनेक्षणरहितां॥यस्याः
श्चरोमशेजंघेगुल्फौयस्यास्तथोन्नतौ॥गंडयोःकूपकौयस्याहसंत्या
स्तांचनोद्वहेत्॥नातिरूक्षछविंपांडुकरजामरुणेक्षणां॥आपीनहस्त
पादांचनकन्यामुद्वहेद्बुधः॥नवामनींनातिदीर्घांनोद्वहेत्संगतभ्रुवं॥न
चातिछिद्रदशनांनकरालमुखींनरइति॥आभ्यंतराण्युक्तान्याश्वलाय

नेन॥ अष्टौपिंडान्कृत्वाऋतमग्रेप्रथमंब्रह्मऋतेसत्यंप्रतिष्ठितं॥यदि
यंकुमारीयेभिजातातदियमिहप्रतिपद्यतां॥यत्सत्यंतद्दृश्यतामिति
पिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहाणेतिक्षेत्राच्चेदुभयतःसस्या
न्प्रतिगृण्हीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्याद्गोष्ठात्पशुमतीवे
दिपुरीषाद्ब्रह्मवर्चस्विन्यविनाशिनोह्रदात्सर्वसंपन्नाद्देवनात्कितवाच्च
तुष्पथात्प्रव्राजिनीरिणादन्याश्मशानात्पतिघ्नीति॥देवनंद्यूतं॥ईरिण
मूषरं।नःअन्यःपूर्वोयस्याःसाऽनन्यपूर्विका॥दानेनोपभोगेनवा॥कां
तांमनोनयनानंदकारिणीं॥यथोक्तमापस्तंबेन।यस्यांमनश्चक्षुषोर्नि
बंधस्तस्यामृद्धिरिति॥इयंचपरीक्षाकुलपरीक्षोत्तरंकार्या।कुलमग्रे
परीक्षेतेत्याश्वलायनस्मृतेः॥मनुः।उत्तमैरुत्तमैर्नित्यंसंबंधानाचरेत्स
हेति॥उत्तमानाहसएव।विप्रमुख्याःकर्मभिश्चैवतथाश्रुतिनिदर्शितैः।अ
विप्लुतब्रह्मचर्यामहाकुलसमन्विताः।अक्रोधनाःसुप्रसादाःकार्याःसं
बंधिनःसदा॥नीचानाहसएव॥येस्तेनाःपिशुनाःक्लीबायेचनास्तिकवृत्त
यः॥विकर्मणाचजीवंतोविकृताकृतयस्तथा॥प्रवृद्धवैराःशूरैर्येराजकि
ल्बिषिणस्तथा॥ब्रह्मस्वादननिंद्याश्चकदर्याश्चविगर्हिताः॥अप्रजाये
षुवंशेषुस्त्रीप्रजाप्रसवास्तथा॥पतिघ्न्यश्चसुवासिन्यस्तांश्चयत्नेन
वर्जयेत्॥तान्वंशान्॥महांत्यपिसमृद्धानिगोजाविधनधान्यतःस्त्री
संबंधेदशैतानिकुलानिपरिवर्जयेत्॥हीनक्रियंनिःपुरुषंनिश्छंदोरो
मशार्शसं।क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानिच॥तथा।कुवि
वाहैःक्रियालोपैर्वेदानध्ययनेनच॥कुलान्यकुलतांयांतिब्राह्मणाति
क्रमेणच॥शिल्पेनव्यवहारेणशूद्रापत्यैश्चकेवलैः॥गोभिरश्वैश्च
यानैश्चकृष्याराजोपसेवया॥अयाज्ययाजनैश्चैवनास्तिक्येनच
कर्मणा॥कुलान्यकुलतांयांतियानिहीनानिमंत्रतइति॥विष्णुःअ
श्वंपित्रापरीक्षेतमात्राकन्यांपरीक्षयेत्॥कृष्याभूमिंपरीक्षेतआचा
रेणकुलंतथेति॥नारदेनकन्यालक्षणान्युक्तानि॥पूर्णचंद्रमुखीक
न्याबालसूर्यसमप्रभा॥विशालनेत्रारक्तोष्ठीसाकन्यालभतेसुखं॥
अंकुशंकुंडलंचक्रंयस्याःपाणितलेभवेत्॥पुत्रंप्रसूतेसानारीनरे
द्रंलभतेसुतं॥यस्याःपाणितलेरेखाप्राकारंतोरणंतथा॥अपिदास

कुलेजातारांजपत्नीभविष्यति॥ यस्याःसंकुंचिताःकेशामुखंचपरिमंडलं॥नाभिश्चदक्षिणावर्त्तासानारीप्रियभाग्भवेत्॥दीर्घांगुलीचयानारीदीर्घकेशाचयाभवेत्॥दीर्घमायुरवाप्नोतिधनधान्यविवर्द्धिनीति॥अन्यान्यपिसामुद्रिकलक्षणानितद्ग्रंथतोवगंतव्यानि॥विस्तरभयान्नेहलिख्यंते॥ असपिंडामिति॥ अत्रकेचित्॥लेपभाजश्चतुर्थाद्याःपित्राद्यांपिंडभागिनः॥पिंडदःसप्तमस्तेषांसापिंड्यंसाप्तपौरुषमिति॥मातृत्वात्सप्तपुरुषपर्यवसायिनीसपिंडता॥तथाचदेवदत्तस्यपित्रादिभिःषड्भिःसापिंड्यंपुत्रादिभिश्चषड्भिरिति॥साप्तपौरुषमितिसप्तपुरुषानभिव्याप्येत्यर्थः।इत्याहुः।नन्वेवंभगिन्यादिभिःसापिंड्यंनस्यात् अत्रसमादधिरेमाधवाचार्याः॥उद्देश्यदेवतात्वेनसापिंड्यनिर्वाहइति। तथाच देवदत्तकर्त्तृकेश्राद्धेभगिन्यादीनामप्युपोष्यत्वात्तास्त्येवसापिंड्यं॥तथासतिमहालयादिश्राद्धेगुरुशिष्यादीनामपिसापिंड्यंस्यात्॥अतोनिर्वाप्यपिंडान्वयपक्षंविहायअवयवानुवृत्तिपक्षमंगीचक्रुर्विज्ञानेश्वरादयः॥ तथाहि।समानःपिंडोदेहोदेहावयवायस्याःससपिंडानसपिंडेति॥तथाहि॥पितुरवयवानांरक्तमज्जादीनांपुत्रशरीरेसाक्षात्प्रवेशःपितामहस्यपितृद्वाराएवंप्रपितामहादिष्वपियथाकथंचित्परंपरयाऽवयवानुवृत्तिरस्त्येवेति॥एवंमात्रादिभिरपि॥एवंपत्यापत्न्याःएकशरीरारंभकत्वेन॥क्वचित्त्वेकावयवाधारत्वेनापिसापिंड्यंयथामात्रोभर्तृद्वाराश्वशुरावयवाधारत्वं।यएवंयथाकथंचित्सापिंड्यमन्यत्राप्यूह्यं॥यद्वायत्राभियुक्तानांसपिंडइतिप्रसिद्धिस्तत्रसापिंड्यमिति॥अत्रयद्यप्यसपिंडामितिनञ्समासेनपर्युदासस्तथाप्ययंनिषेधफलकःसपिंडापरिणयनेप्रायश्चित्ताम्नानात्॥एवमेकशरीरा वयवान्वयरूपेसापिंड्येविधातृशरीरेणापिपरंपरयासपिंडापत्तिरतःसंकोचोयाज्ञवल्क्येन॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति॥मातृतःपंचमात् पितृतःसप्तमादिति॥एतन्निष्कर्षेश्चाभियुक्तैःकृतः।वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः॥पंचमीचेत्तयोर्मातातत्सापिंड्यंनिवर्त्ततइतिकूटस्थोमूलपुरुषः॥यतःज्ञानभेदांस्ततोगणयेत्॥नारदोपि॥मातृतःपंचमादूर्ध्वंपितृतःसप्तमात्तथा॥ग

हस्थउद्वहेत्कन्यामन्यथागुरुतल्पगइति॥पैठीनसिरपि॥पंचमींमातृतः परिहरेत्सप्तमींपितृतइति॥यत्तुविष्णुपुराणे॥पंचमींमातृपक्षाच्चपि तृपक्षात्तुसप्तमीं॥गृहस्थउद्वहेत्कन्यांन्याय्येनविधिनानृप॥यच्चवसि ष्ठे॥पंचमींसप्तमींचैवमातृतःपितृतस्तथेतिनदुभयमप्यतीत्येतिव्या ख्येयं॥पूर्वोक्तवचनविरोधात्॥सप्तमेपंचमेचैवयेषांवैवाहिकीक्रि या॥क्रियापराअपिहितेपतिताःशूद्रतांगताइतिमरीचिनादोषोक्तेश्च॥यत्तुषट्त्रिंशन्मते॥तृतीयांमातृतःकन्यांतृतीयांपितृतस्तथा॥विवा हयेन्मनुःप्राहपाराशर्योगिरायमइति॥यदपिपैठीनसिस्मृतौत्रीन तीत्यमातृतःपंचातीत्यपितृतइति॥तद्दोषातिशयार्थं॥अन्य थापंचमात्सप्तमादूर्ध्वमित्यनेनपंचमषष्ठादौक्रियमाणोविवाहोनि ष्टसाधनंषट्त्रिंशन्मतादिभिस्त्विष्टसाधनमितिविरुद्धबोधद्वयस्याश क्यत्वात्॥दोषातिशयार्थत्वंकथमितिचेदुच्यते॥पंचमात्सप्तमादू र्ध्वमित्यनेनपूर्वबोधितोदोषःक्वचिदल्पःक्वचिद्भूयानितिबोधयितुं शक्यत्वात्॥तस्यचप्रयोजनंप्रायश्चित्तात्यल्पत्वबहुत्वादि॥नहिसा पिंड्याविशेषेभगिनीगमनेयावानेवदोषस्तावानेवपंचम्यामितिव क्तुंशक्यं॥अतःपूर्वोक्तमेवज्याय इति॥षट्त्रिंशन्मतादिवाक्यान्या पद्विषयाणि॥अनुज्ञानंचनिषिद्धमप्यापदिचातुर्वर्ण्येभैक्ष्यादि दोषाभावोप्युक्तस्तत्रनिबंधकृद्भिरितिचेन्न॥तत्रापिआपत्कल्पाद्वि जःकृत्वाप्रायश्चित्तंपुनश्चरेदितिवचनेनदोषस्योक्तत्वात्॥स्तोक दोषाच्चदोषाभाववचनं॥यद्येवमंगीकृत्यतृतीयापरिणयनमिष्टंयदा क्रियतांनामनतुसर्वथादोषाभावः॥अत्रविंध्यदक्षिणवासिनःके चित्॥मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच॥समानप्रवरांचैवत्य क्त्वाचांद्रायणंचरेदित्यादिबहुस्मृतिनिषिद्धमपिमातुलकन्यापरि णयनमाचरंति॥सचदुराचारइतिभट्टपादादयः॥भट्टसोमेश्वर स्मृतिचंद्रिकाकारमाधवादयस्तुदुराचारत्वंनास्तीत्याहुः॥बलाधि करणेश्रुत्यालिंगंबाध्यतइत्युक्त्वाक्वचिच्छ्रौतेनविरोधाधिकरणरी त्यासंभवदन्यमूलायाःस्मृतेर्बाधः॥यथागर्भेतुनोजनिताद्ंपतीकर्दे वस्त्वष्टासविताविश्वरूप इतिदाघातथ्यांश्रुतंतस्यार्थः॥यमीयमंस्वभ्रा

तदंगोवाच॥साचयमेनभ्रात्रेदमयुक्तमितिप्रत्याख्यातावदति॥कः
प्रजापतिर्विश्वरूपोविश्वात्मात्वष्टासवितानौआवयोर्गर्भेदंपतीजनि
ताजनयिष्यति॥आवयोरपत्ययोरवश्यंदंपतीत्वंभावितद्दूरमावामे
वदंपती भवावइतिलिंगमनन्यगतिः।तथा आयाहींद्रपथिभिरीळि
तेभिर्यज्ञमिमंनोभागधेयंजुषस्व।तृप्तांजहुर्मातुलस्येववपाभाग
त्तेपैतृष्वसेयीवपामिव॥अस्यार्थः॥हेइंद्रत्वंईडितेभिःप्रशस्तैर्मा
र्गैर्नोअस्माकंयज्ञमायाहिआगच्छ आगत्यतृप्तामाज्यसिक्तांवपांभा
गधेयंवपारूपंभागंजुषस्वसेवस्व॥तत्रवपाभागत्वेदृष्टांतद्वयं॥य
थामातुलस्यजहुरपत्यरूपायास्त्रीकन्येत्यर्थः।मामातुःशब्दस्य
संबंधिशब्दत्वाद्भागिनेयोपस्थितेस्तस्यभागंसेवस्व।एतेयजमाना
स्त्वामुद्दिश्यवपांजहुस्त्यक्तवंतःशेषाद्दुहिता॥अन्यत्पूर्ववत्॥तथा
वाजसनेयिश्रुतौस्त्रुग्व्यूहनार्थवादेतृतीयेसंगच्छावहैचतुर्थेसंग
च्छावहैइत्यर्थलिंगं॥नचास्यार्थवादत्वात्स्वार्थपरत्वमितिवाच्यं।
अभावार्थस्योपरिहिदेवेभ्योधारयतीत्यादिवद्विधिपरत्वात्॥एवंस्थि
तेमातुलकन्यापरिणयनेयत्प्रायश्चित्तादिस्मरणंतदासुरादिविवा
होत्पन्नाविषयं द्रष्टव्यं किंतत्रप्रमाणमितिचेदुच्यते॥गोत्ररिक्थे
जनयितुर्नभजेत्ज्ञानकुलेसंबंधमात्रनिवृत्त्यासापिंड्यस्यापिनि
वृत्तिःप्रतीयते।अतःकन्यायाअपिब्राह्मादिविवाहचतुष्टयेदानस्य
ज्ञावातत्रचसापिंड्यस्यनिवृत्तेस्तत्परंमातुलकन्यापरिणयनं।आ
सुरादिविवाहेषुदानाभावात्सपिंड्यानिवृत्तेस्तत्परोनिषेधइति॥
कथमिदानींमातुलकन्यावत्पैतृष्वस्रेयीदौहित्रीवानपरिणीयते
।अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्वितिनिषेधादतोनदुरा
चारत्वमियाति।अत्रोच्यते॥गर्भेतुनावित्यस्यामृचिपूर्ववाक्या
चरितंस्मृत्यनुमेयश्रुतिविरोधान्नतादृशविधिकल्पकः।यत्रहि
नान्यविरोधःस्वार्थकत्वंचतत्रैवविधिनिषेधककल्पनं यथोल्मुकेह
तस्यपूर्वेसभाजग्मुरित्यादिषु॥अन्यथाप्रजापतिरुषसमभ्येत्स्वांदु
हितरमित्याद्यर्थवाददर्शनादन्यैरपिदुहितृगमनंकर्तव्यमितिकल्पनं
तद्दुष्करीत्याकेननिवार्येत॥भिन्नार्थवादेषुचबहवोर्थाःकेचनसिद्धा

र्थानुवादका यथाग्निर्हिमस्य भेषजं वायुर्वैक्षेपिष्ठा देवतेति॥ केचनराग
प्राप्तानुवादकाः यथा तस्माद्बस्तो मातरं स्वसारं चाधिरोहति॥ यथा च
तस्माज्ज्येष्ठं श्वश्रूस्वशुरश्च पुत्रश्च दुहिता च सुरां पीत्वा विलपंतश्चास
त इत्यादि॥ केचन प्रायोदृष्टानुवादकाः यथा तस्मात्प्रजा दशमासान्ग
र्भे धृत्वा एकादशमनुप्रजायत इत्यादयः नैतावता विध्यादिकल्पनं।
अत एव स्वार्थे तात्पर्याभावान्न विधिपरत्वमंगीकृतं सोऽरोदीदित्येव
मादीनां मीमांसकैः॥ एवमत्रापि गर्भे तु नाविस्यस्याः पूर्वाचरितमात्रं
कीर्त्यते॥ आषाढीं द्वे त्यस्यां च रागप्राप्तस्यानुवादः॥ कथमनियतप्रा
प्तस्य नित्यवदनुवाद इति चेत्। तस्मात्प्रजा इत्यस्य वाक्यस्य नित्यप्रा
प्तिः॥ तत्र यथैवानियतप्राप्तिमुपजीव्यानुवादोपपत्तिरेवमत्रापि। यत्तु
नेन सापिंड्यं निवर्त्तत इति॥ तत्रोच्यते॥ मातापि ताबाद्यो तां यमद्भिःपु
त्रमापदि॥ सदृशं प्रीतिसंयुक्तं सज्ञेयो दत्रिमः सुत इति पुंस्त्वविशिष्टानु
वादेन संज्ञाकरणात्कन्यायाश्च दत्रिमसंज्ञाभावाद्दत्रिमानुवादेन वि
धीयमानापि सापिंड्यनिवृत्तिर्न कन्याया भवति॥ नन्वेवं दत्रिमस्य सा
पिंड्यनिवृत्तौ जनककन्यादिपरिणयनं स्यादेव यदूर्ध्वं सप्तमासि
त्रबंधुभ्यो मातृबंधुभ्यः पंचमाद्बीजिनश्च सप्तमादिति वाक्यं नाभवि
ष्यत्। अत्र हि बीजिग्रहणेन दत्रिमस्य जनककुले सापिंड्यमस्तीति
ज्ञायते॥ गोत्रनिवृत्तिस्तु। स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे इ
त्यनेन वचनेन नत्वन्येन। अतो मातुलकन्यापरिणयनं दुराचारः॥ अत
एव भट्टपादैरुक्तं। वसुदेवांगजानां च कौंतेयस्य विरुध्यते इति॥ बौधा
यनेन च दुराचारपरिगणनया तास्पष्टमेवोक्तं॥ पंचधा विप्रतिपत्तिर्दक्षि
णतस्तथोत्तरतो यानि दक्षिणत स्तान्यनुव्याख्यास्यामो तथैतदनु
पदेन सहभोजनं स्त्रिया सह भोजनं पर्युषित भोजनं मातुलपितृष्वसृ
दुहितृगमनमिति॥ अथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतोदद्भि
र्व्यवहार आयुधीयकं समुद्रयानमिति॥ तत्रेतरस्मिन्कुर्वन्दुष्यति
तद्देशप्रामाण्यात् मिथ्यैतदिति गौतमः॥ उभयमेव नाद्रियेत शिष्टस्मृ
ति विरोधदर्शनादिति ग्रंथेन॥ बृहस्पतिरपि॥ उद्वाह्यते दाक्षिणात्यैर्मा
तुलस्य सुता द्विजैः॥ मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः॥ अ

रेमद्यपाश्चैवस्पृश्यान्नृणांरजस्वलाः॥सजाताश्चापि — गृण्हंतिभात
भार्यामभर्त्तृकां॥सर्वदेशेष्वनाचारोरथ्यातांबूलचर्वणमिति॥विशेषः
स्मृत्यंतरे॥गायत्र्याउपदेष्टुश्चकन्यांनैवोद्वहेद्द्विजः॥ गुरोश्चकन्यां
शिष्योवातत्संतत्यापिनेष्यते॥पुरुषत्रयपर्यंतंभ्रात्रादेर्नैतदिष्यतइ
ति॥सपत्नमातामहकुलेसापिंड्यमाहसुमंतुः॥पितृपत्न्यःसर्वामा
तरस्तद्भ्रातरोमातुलास्तद्भगिन्योमातृष्वसारस्तद्दुहितरश्चभगिन्यस्त
दपत्यानिभागिनेयान्यन्यथासंकरकारिणःस्युरिति॥द्वितीयतच्छब्दे
नमातृपरामर्शः॥अत्रयावद्वचनंवाचनिकमितिन्यायात्परिगणितेष्वे
वसापिंड्यंनसप्तमादिपर्यंतमेतत्सापिंड्यविषयमेव॥असपिंडाच
यामातुरसपिंडाचयापितुः॥साप्रशस्ताद्विजातीनांदारकर्मणिमैथुन
इतिमनुवाक्यमितिनिबंधकृतः।एतदुपपत्तिश्चद्वैतनिर्णयेउक्ता।अ
त्रासपिंडानिषेधःसार्ववर्णिकः॥ असमानार्षगोत्रजामितित्रयाणां
तत्रक्षत्रियवैश्ययोःपुरोहितगोत्रंनस्वतइतिपवीयसामिति॥वय
सापरिमाणेनचन्यूनां॥वयोन्यूनायांविशेषमाहमनुः॥त्रिंशद्वर्षोद्व
हेत्कन्यांहृद्यांद्वादशवार्षिकीं॥त्र्यष्टवर्षोष्टवर्षांवाधर्मेसीदतिसत्व
रइति॥अष्टवर्षश्चतुर्विंशतिवर्षः॥बृहस्पतिर्विशेषमाह॥त्रिंशद्वर्षो
दशाब्दांतुभार्यांविंदेतनग्निकां॥एकविंशतिवर्षोवासप्तवर्षामवाप्नु
यादिति॥भ्रातृमतीमिति॥अनेनपितुरपिआयमात्रेणापरिभावि
तापिपुत्रिकाभवतीतिगम्यते॥अतएवगौतमः॥अभिसंधिमात्रा
त्पुत्रिकेत्येकेषांतत्संशयान्नोपयच्छेदभ्रातृकामिति॥पुत्रिकाकर
णप्रकारादिकंव्यवहारमयूखेदर्शयिष्यामः असमानार्षगोत्रजामि
ति॥आर्षंचगोत्रंचसमानार्षगोत्रेजातासमानार्षगोत्रजानतादृशा
असमानार्षगोत्रजा।अत्रचप्रत्येकंप्रतिषेधः।समानार्षानोद्वाह्या॥
सगोत्राचनोद्वाह्येतिप्रत्येकंप्रायश्चित्ताम्नानात्॥तच्चप्रायश्चित्तम
ग्रेवक्ष्यते॥आर्षप्रवरः।गोत्रप्रवर्त्तकस्यऋषेर्व्यावर्त्तकोमुनिविशे
षः।।वत्सार्ष्टिषेणयोःगोत्रभेदेप्रवरैक्यात्॥द्व्यामुष्यायणानांसंत
तीनांप्रवरभेदेपिसगोत्रत्वादुभयोपासनं॥मातामहगोत्रमप्यपरि
णेया॥तथाचमनुः॥मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच॥स

मानप्रवरांचैवत्यक्त्वा चांद्रायणंचरेदिति॥ अत्रसगोत्रानोद्वाहयेत्यनेनै वमातृगोत्रपर्युदासेसिद्धेमातृगोत्रग्रहणंमातुर्विवाहात्पूर्वगोत्रनिर त्यर्थं। तथाचमातामहगोत्रानोद्वाह्येतिफलितं॥ तच्चमाध्यंदिनीयानां ॥ तथाचचतुर्विंशतिमतटीकायांसत्याषाढवचनं॥ मातृगोत्रंमाध्यं दिनीयानामिति॥ अथगोत्रप्रवरनिर्णयः॥ तत्रस्मृत्यर्थसारेगोत्र लक्षणमुक्तं। जमदग्निभरद्वाजविश्वामित्रात्रिगोतमाः। वसिष्ठक श्यपागस्त्यामुनयोगोत्रकारिणः॥ एतेषांयान्यपत्यानितानिगोत्रा णिमन्वतइति॥ अपत्यानीतितल्लक्षणात्॥ किंतुपुत्रपौत्रादिपरया। तथाबोधायनोप्याह॥ एतेषामगस्त्याष्टमानांयदपत्यंतद्गोत्रमित्या चक्षतइति॥ एवमुच्यमानेभृग्वादीनांगोत्रत्वंनस्यात्॥ तत्रकेचिद ष्टापत्यापरिहरेति॥ अपरेभृग्वादिषुअनादिशिष्टानांगोत्रत्वसमा ख्यानात्प्रवरमंजरीप्रयोगपारिजातमदनरत्नानारूढत्वात्तल्ल वत्वंगोत्रलक्षणंयुक्तमुत्पश्यामः॥ तथाचसत्याषाढसूत्रेप्रवरानु क्त्वातेगोत्राणीत्युक्तं॥ तथाचतद्वत्गोत्रमित्युक्तंभवति। एवंचशि ष्टाचारोप्यनुगृहीतोभवतिबहुग्रंथविरोधश्चपरिहृतोभवति। यत्तुबोधा यनादिभिरगस्त्याष्टमपत्यंगोत्रमित्युक्तं। नतल्लक्षणाभिप्रायेणोक्तं ।नचैवंवत्सविदयोरार्ष्टिषेणादिभिःसगोत्रतापत्तिरितिवाच्यम्‌। एक एवऋषिर्यावत्प्रवरेष्वनुवर्त्तते॥ तावत्समानगोत्रत्वमन्यत्रभृग्वंगिर संगणादिति॥ बोधायनेनपर्युदासात्॥ अनेनचपर्युदासेनज्ञायतेभृ ग्वंगिरोगणेप्यस्तिसगोत्रत्वमिति। यत्तुप्रवरमंजरीकृताकेचिन्नस एवेषांगोत्रतेत्युक्तंतत्पूर्वापरग्रंथविरोधात्परमतानभिप्रायेण। यत्तुविश्व नाथेनोक्तं। भृग्वंगिरोन्यद्यलिंचिदृषेर्यावत्सुवर्त्तनं॥ तावत्समानगो त्रत्वमितिकेचित्समूचिरे॥ तन्नैवं॥ सर्वत्रगोत्रत्वनिबंधने॥ अनुद्वाहे तुकुत्रस्यासवरैस्यंप्रयोजकमिति। तदस्माभिःपूर्वमसंकीर्णोदाहर णोपन्यासादपास्तंतस्मादस्तिहरितादीनामपिगोत्रत्वं। यद्यपिगोत्रा णामानंत्यंतथापितन्मध्येणाएकोनपंचाशत्॥ उक्तंचबोधायनेन॥ गो त्राणांचसहस्राणिप्रयुतान्यर्बुदानिच। ऊनपंचाशदेतेषांप्रवराऋषिद र्शनादिति॥ तेगणायथा॥ भृगूणांसप्त। जमदग्नेस्तादेत्तभार्गवः। विश्वामि

त्राणांदश।१०।अत्रेश्चत्वारः४ अंगिरसांसप्तदश१७ अत्रैवगौतमभर
द्वाजयोरंतर्भावः।कश्यपास्त्रयः।३।चत्वारोत्रवसिष्ठाःस्युर्विश्वामि
त्रास्ततोदश।।अगस्त्य यस्तुचत्वारइतिसंग्रहकृद्वचः।प्रवराःशिष्ट
परंपराप्रसिद्धाः।।इतिगोत्रप्रवरलक्षणं।।अथोद्दिष्टगणक्रमेणबौधा
यनादिसूत्रोक्तानिगोत्राणिप्रदश्यंते।।तत्रतावत्केवलभार्गवाःपंच।
आर्ष्टिषेणाःयस्काःमित्रयुवोवैन्याःशुनकाइति।।तद्यथा।।आर्ष्टिषेणा
नैरथयोग्राम्यायणयःकात्यायनाश्चांद्रायणाःपैठकलायनाःसिद्धाः
सुमनायनाःगौरांभिराभिरित्येते आर्ष्टिषेणाः।तेषांपंचार्षेयाः।भार्गव
च्यावनाप्नवानार्ष्टिषेणानूपेति।।एषामविवाहः।इत्यार्ष्टिषेणगणः।
यस्कोमौनोमूकोवाधूलोवर्षपुष्पःमापाराजनैनोभास्करोदेवंताय
नोजैवंतायनोवाकलयोमाध्यमयावासयःकौशांबेयाःकौटिल्याःसा
त्यकेयाःकौंचिल्याःसत्यकयष्ठिप्रसेनाःभागंतयस्ताकम्बिकेयाः
औन्त्याःऔर्गवित्रतयःभागुरिश्चइत्येतेयस्काः।तेषांत्र्यार्षेयः।प्र
वरोभार्गववैतहव्यसावेतसेति।इतियस्कगणः।।मित्रयवोरौक्षा
यणाःनाशायजनाःरोक्ष्यायनाःरौक्यायनाःसरबंडिनाःसुरभिनेया
माल्यायायाबाल्यायायामहावाल्यास्ताक्ष्यायणाऔरक्षायणामाजाध
यःकैतवायनाइत्येतेमित्रयुवस्तेषांत्र्यार्षेयःप्रवरः।भार्गववैन्यपा
र्थेति।।इतिवैन्यगणः।शुनकाःसमदायज्ञपथःसौगंधयःस्वार्दमाय
नार्गांगायनामत्स्यगंधाभार्गायणाःआग्नियास्तैत्तिरीयाइत्येतेशुन
कास्तेषामेकार्षेयःप्रवरः शुनकेतिगृत्समदेतिवा।।इतिशुनकग
णः।इतिकेवलभृगवः।अथगणद्वयसमष्ट्यंतर्गतंवत्सविदाख्यंत
दुच्यते।।मार्कंडेयामांडव्यामांडूकेयाःकांसयआलेखनरयोवैही
नरयोविरोहिताबाह्यागोह्नायणाष्टेकयःकाशकृत्स्नावाह्रतकाःस्क
तभागाएतिशायनासौकृतयोमंडवित्सोविस्तयःहस्त्यग्नयोहस्ता
मयशौह्यायकः।वैकषायःद्रोणजिह्वयः।औरसयःकावरोदरयःकं
ठेरकृद्धेहलिविरूपाक्षामिकाश्चाउद्ध्वेर्मन्यवःवैमत्स्याःआर्यायणाःमा
यणाकाव्हायनाःवायवाःदैवमत्याःआर्कयणाःकांकायनावायानिनः
शांकरवश्चांद्रमसाःगांगेयातोयेयामाज्ञियायावतिर्बाहुमित्रायणा

आपिशलयःवैष्टपुरेयालोहितायनाउच्छ्रायानिनःशांकरद्वंलायनाशाजि
तवाहाःवात्साःवात्स्यायनाइत्येतेवत्सास्तेषांपंचार्षेयःप्रवरोभार्गवच्या
वनाप्नवानौर्वजामदग्न्येति॥इतिवत्सगणः।विदाःशैलाअवटयःशैलाःप्राची
नयोग्याअभयज्ञानाःकांडरथ्यावैनभृताःपुलस्तयःआर्कायणास्तां
आयणाःकामलाइत्येतेविदास्तेषांपंचार्षेयःप्रवरोभवतिभार्गवच्या
वनाप्नवानौर्ववैदेति॥इतिविदगणः॥आपस्तंबगणाः।आपस्तंबस्तु
विशेषमाहसउच्यते॥तत्रयस्कगणोबाह्यगणत्वेनव्यपदिष्टः॥
सावेतसेत्यत्रसावेदसेतिमुनकगणोगार्त्समदत्वेनव्यपदिष्टःमित्र
युगणोबाह्यगणत्वेनव्यपदिष्टःविदगणेनोक्तः।कात्यायनेनभृगो
र्द्वादशगणाउक्ताः॥तद्यथावात्स्यायनाःआवाच्याःवैजवाःशाठर
माठराःविदाःआर्ष्टिषेणाःवत्साःवैदविश्वज्योतिषःपार्श्वश्वेनाःआ
पिशायनाःवीतहव्याःगृत्समदाश्चेति।वात्स्यायनानांपंचार्षेयाभा
र्गवच्यावनाप्नवानौर्वजामदग्न्येति॥आवाच्यानांभार्गवच्यावना
वाच्येति॥वैजवानांभार्गवच्यावनाप्नवानवैजवनैमथितेति।शाठर
माठराणांभार्गवशाठरमाठरेति॥विदानांभार्गवच्यावनाप्नवानेति।
आर्ष्टिषेणानांपूर्वोक्तः।वत्सपुरोधसांभार्गवच्यावनाप्नवानवैजवनै
मथितेति॥शाठरमाठराणांभार्गवशाठरमाठरेति॥विदानांभार्गव
च्यावनाप्नवानेति॥आर्ष्टिषेणानांपूर्वोक्ताः।वत्सपुरोधसांभार्गवच्या
वनाप्नवानवात्सपौरोधसेति॥भार्गववत्सपौरोधसेतिवा।वैदविश्व
ज्योतिषाणांभार्गववैदवैश्वज्योतिषेति॥पार्श्वश्वेनानांभार्गववैन्यपार्थेति
॥आपिशायनानांभार्गववाध्यश्वदैवोदासेति॥वीतहव्यानांभार्गव
वैतहव्यसावेधसेति॥गृत्समदानांगार्त्समदेति॥भार्गवगार्त्समदेति
वा॥लौगाक्षिस्तुसप्तगणेषुविशेषमाह॥गणास्तावत्॥वत्साविदा
वात्स्याआर्ष्टिषेणाःस्वालायनावीतहव्यागार्त्समदाश्चेति॥तत्रवा
त्स्यानांपूर्ववत्॥विदानांत्र्यार्षेयाभार्गवौर्वजामदग्न्येति।वात्स्यानां
भार्गवच्यावनाप्नवानेति ॥आर्ष्टिषेणानांपूर्ववत्॥स्वालायनानांमि
त्रयुवत्।वीतहव्यानांभार्गववैतहव्यसावेतसेति।एवंपूर्वोक्तेषुवत्स
विदार्ष्टिषेणानामन्योन्यमविवाहः।गोत्रप्रवरैक्यात्॥यस्कमित्रयु

वैन्यशुनकाःपरस्परंनविवहेयुः॥बौधायनमतेप्रवरैक्यात्पूर्वोपपा
दितप्रकारेणगोत्रैक्याच्च॥यस्कादिचतुर्भिर्विदादित्रिभिर्भवत्येववि
वाहः॥सगोत्रत्वाभावात्॥ननुभार्गवरूपैकप्रवरसाम्यात्कथंविवा
हः उच्यते॥पंचानांत्रिषुसामान्यादविवाहस्त्रिषुद्वयोः।भृग्वंगिरोग
योस्त्वेवंशेषस्त्वेकोपिवारयेदितिबोधायनवचनेनभृगुगणेएकानुवृत्ते
रप्रयोजकत्वात्॥एवमग्रेपिद्रष्टव्यं॥इतिभार्गवनिर्णयः।अथांगि
रोनिर्णयः॥तत्रतद्गणास्त्रयः॥केवलांगिरसोगौतमाभरद्वाजाश्चे
ति॥तत्रकेवलांगिरसःषट्॥चत्वारोभरद्वाजाःसप्तगौतमाइत्येवंस
प्तदश।तत्रकेवलांगिरसांषट् गणमध्येएकःसंकृतिर्द्व्यामुष्यायणः
तत्तत्प्रकरणेनिरूपयिष्यामः॥अवशिष्टाःपंचतद्यथा॥विष्णुवृद्धक
ण्वहरितरथीतरमुद्गलाख्याः।तेउच्यंते॥विष्णुवृद्धाःशठामठाःभद्र
णामद्रणाबादरायणाःसात्यकिःशालंकायनानैतुद्याःस्तुस्ताःभारु
ण्यावैहोढादेवस्थातयःइत्येतेविष्णुवृद्धास्तेषांत्र्यार्षेयःप्रवरःआंगि
रसपौरुकुत्सत्रासदस्यवेति॥इतिविष्णुवृद्धगणः।कण्वाःऔपमः
कठायनाबाष्कलाःपौलाःहलिनोमांजिः।मांजयःमौञ्जिगधाविजिवा
जथावाजश्रवसइत्येतेकण्वास्तेषांत्र्यार्षेयःप्रवरःआंगिरसाजमी
ढकाण्वेति॥इतिकाण्वगणः॥हरिताःकौत्सःसांख्योदाभ्योभैम्यो
भैमगवोमलायुर्लंबोदरोबलोदरोमहोदरोनैमिश्रयोमिश्रोदनाभि
श्रपःकौतपाःकारीषयःकौलयःपौलयःमौद्गलोमाधूपमाधातमांड
कारयइत्येतेहरितास्तेषांत्र्यार्षेयःआंगिरसांबरीषयौवनाश्वेति
।इतिहरितगणः॥रथीतराहास्तिदासिकाव्हायनानैतिरक्षयःऐ
शानयःशैलालयःमिलैभिलाभायसावद्भवाःभैक्षवाह्यहैमगवा
इत्येतेहरितास्तेषांत्र्यषःप्रवराःआंगिरसवैरूपराथीतरेति॥इतिर
थीतरगणः॥मुद्गलाहिरण्याक्षाःकृषभामिनाःक्षपासस्याःक्षपाय
णाःदीर्घजंघाःप्रबलजंघाःस्तरणाभिंदवइत्येतेमुद्गलास्तेषांत्रयःप्र
वराःआंगिरसभार्म्यश्वमौद्गल्येति॥इतिमुद्गलगणः॥इतिकेवलांगिर
सः।एषुपंचसुस्वंस्वंगणंहित्वापरस्परंविवाहः।यद्यप्यांगिरसेतिप्रवरै
क्यंसर्वत्रतथाप्यंगिरोगणत्वाददोषः।अथभरद्वाजांगिरसः।तद्गणाश्चत्वा

रः॥भरद्वाजाःकपयःगर्गारौक्षायणाइति॥तेउक्ताबौधायनेनभरद्वाजाःक्षा
म्यायणाःसंगडादेवाम्बाःउद्दह्न्याःप्रागवंशयःवाह्लभावाद्योगावसाना
यनावैदेहाआत्राःऔक्षाःभूरयःपरिणद्धयाःकेशखेयाःशौद्धयःउरुद्धाःखा
रिग्रीवयःऔपसयःवयोक्षिभेदाअग्निवेश्याव्ययाःशठाःगौरिवाःलेखा
यनास्तनकर्णाःऋक्षामाणिमिंद्याःकठोदकाःसौह्लयोवैल्वाखारुडाद्रे
योभाद्रपद्यःसौरभराःशुंगादेवमतयःइषुमताऔदमेधयःप्रवाहणे
याःकुल्माषाःराजस्तंभिःसुधापक्तःवाराहयःवल्मीकयःरुक्मांगपथ्याः
शालाहलयः।वैरवेलानृत्यायनाःशालालयःशार्दूलयःशाकलाबाष्कलाः
सत्यकेयाःक्रोडायनाकौंडिन्याब्रह्मस्तंभाराजस्तंभाआपस्तंभायेचा
न्येस्तंभशब्दाआरणसिंधुकौमुद्गंधयःशिखायनाआत्रेयायणाभा
माण्याःकुक्षाःकौकक्षिपोनैतुंतयोदार्भयःश्यामेयाःमत्सकाद्याःकारु
णायनाःकारूपथयःकारिषायणाःकावल्याइत्येतेभरद्वाजास्तेषांत्र्या
र्षेयःप्रवरःआंगिरसबार्हस्पत्यभारद्वाजेति॥इतिभरद्वाजगणः॥
रौक्षायणाःकपिलाःशफिलावैकिडाकौथुमोग्निजिव्होवर्णिस्वसूति
श्चेति॥रौक्षायणास्तेषांपंचप्रवराःआंगिरसबार्हस्पत्यभारद्वाजवांद
नमातवचसेति।इतिरौक्षायणगणः॥गर्गाःसांभराःवणाःसारव्यना
यणागंधरायणावालुकयोभ्राष्ट्रकाभ्राष्ट्रविंदवःक्रोष्टुकयःसौपामु
निःआजिनास्यसयोहोत्राग्यःसख्यायवयःयवाःनवपलाशाःशाखावन
यःसंग्रहकल्याःवेणुभिरिःसौहग्रकारिःरौतिक्रोंचाल्याःराजवल्मी
लथाःइत्येतेगर्गास्तेषांपंचप्रवराःआंगिरसबार्हस्पत्यभारद्वाजगा
र्ग्यसैन्येतित्रयोवा आंगिरससैन्यगार्ग्येति॥इतिगर्गगणः॥का
यःवैतलायनानांपतंजलीनांतरस्विनांताडिनांभोजसानांसारंगरवा
णांस्वरशिखंडिनांमौशितकिःसंघ्रायःपौष्ययरेतिशायनाइत्येतेक
पयस्तेषांत्रयःप्रवराःअंबसामहीयवऔरुक्षयसेति॥भरद्वाजानां
चतुर्णामविवाहः।इतिकपिगणः॥इतिभरद्वाजांगिरसः॥गौतमांगि
रसाःसप्तगणाः।आयास्याःशरद्वताःकौमंडादीर्घतमसःकारेणुपाल
यःवामदेवाऔशनसाश्चेति॥तउच्यंते॥आयास्याआणिवेयामूढ
रथ्याःकावास्ययःवैदेहाकौमारवसांडिर्दर्भिर्दैवकिःसात्यमुग्रिःकौबा

ल्वावैभ्यानैकरुधिष्टैकपिःकिरालयः काहृणिःकठोरिःकाशीवाकासी
वाइत्येते आयास्यास्तेषांत्रयःप्रवराआंगिरसायास्यगौतमेतिशर
द्वंतःअभिजितोरौहिण्याःक्षीरकरभाःसौमुचपःसौयामुनाःकौपविंद
वोराहूगणाःगणयोमयणाःइत्येतेशरद्वंतास्तेषांत्रिप्रवराःआंगिरसगौ
तमशारद्वंतेति॥कौमांडामानसरेषणाःमासुराक्षाःकाण्वरेभयःआ
जायनावाजायनाइत्येतेकौमांडास्तेषांपंचार्षेयःआंगिरसौचथ्यका
क्षीवतगौतमकौमंडेति।।दीर्घतमसांपंचआंगिरसौचथ्यकाक्षीवत
गौतमदैर्घतमसेति।।कारेणुपालयोवास्तव्याःश्वेतीयाःपौंजिष्ट्यःऔ
दजायनामाधुक्षाराअजगंधयइत्येतेकारेणुपालयस्तेषांत्रिप्रवराः
आंगिरसगौतमकारेणुपालेति।वामदेवानांत्रयःआंगिरसगौतमौ
शनसेति॥गौतमानांसप्तानामविवाहः॥इतिगौतमांगिरसः।अथ
विश्वामित्रास्तेषांगणादश॥कुशिकरौहितरौक्ष्यककामकायनक
थधनंजयआजअघमर्षणपूरणोंद्रकौशिकाख्याः।तउच्यंते।कुशि
काःपार्णजंघावालुक्याऔदरिमौंथिर्हृद्हदग्निरालशाद्यहिरापद्य
व्याःकामंदैनकाबद्धकथ्याश्चिकिताःकामकायनाःशांकायनाःयम
दूताआनतिन्नास्तारकायणाश्वार्वासाजाबालयोयाज्ञवल्क्या
विदंडाभुवनयनाःसौश्रुतयऔघदहनयःऔदुंबरिश्रौष्ट्र्याःश्यामेया
श्चौत्रेयासाश्वतामयूराश्चित्रेभायनाअनुतंतवामांतबोपचान्येव्रत
शब्दाःबाभ्रव्याःकालेत्सराइत्येतेकुशिकास्तेषांत्रिप्रवराःवैश्वा
मित्रदेवरातऔदलेतिरौहितादंडकयश्चाक्रवर्मपिणाजह्नयिणा
बोजायनावासयइत्येतेरौहितास्तेषांत्रयःवैश्वामित्राष्टकरौहिते
ति॥रौक्ष्यकाःरवोहूहावलारेवणाश्चतेषांत्रयःवैश्वामित्ररौक्ष्यकरै
वणेति॥वैश्वामित्रदैवश्रवसदैवतरसऔमनज्याःकामकायनास्ते
षांत्रयःवैश्वामित्रकात्यात्कीलेति॥धनंजयाःपारिजामयःआश्रयेना
वायव्याःसैंधवायमयःपुष्कराक्षास्तेषांत्रयःवैश्वामित्रमाधुछंदस
धानंजयेति॥आजानांत्रयःवैश्वामित्रमाधुछंदसआजेति॥अघम
र्षणाःकौशिकास्तेषांत्रयोवैश्वामित्राघमर्षणकौशिकेति।।पूरणा
वारिधापयस्तेषांद्वौवैश्वामित्रपौरणेति।।इंद्रकानांद्वौवैश्वामित्रेंद्र

कौशिकेति॥सर्वेषां वैश्वामित्राणामविवाहः।अथात्रयश्चतुर्भेदा आ
त्रेयास्त्रयः वाद्भूतका गविष्ठिरा मुद्गलाश्चेति। तउच्यंते।भूरयः छांदि छौ
द्गोग्गिपौष्टिकामौद्गलयः सौपानच्छरालाः छागलास्तृणविंदुर्भोगंत
योमालरुचः व्यालयः सांभव्यायनाः सावव्यायनाः कर्मधीयानांका
मर्यायनपद्मास्त्रिस्तेदेहागणपतयः औद्दालकिर्द्रोणभावागौरिग्रीवयो
गाविष्ठिराः शिम्भुपालाः कृष्णात्रेयागौरात्रेयात्तृणात्रेया अरुणात्रेयाः
गोपवनाः कालापयवयआनीलायना आनीश्चायना आनंदि आनंदिः
गौरंदिः सैरंदिपुष्पयः शैफयः साकेतायनाशाकटायना भरद्वाजनय
इंद्रातिथिरित्येते त्रयस्तेषां त्रयः प्रवराः आत्रेयार्चनानसश्यावाश्वेति
॥वाद्भूतकानां त्रयः आत्रेयार्चनानसवाद्भूतकेति।गविष्ठिराणां त्रयः आ
त्रेयार्चनानसगाविष्ठिरेति॥मुद्गलाव्यालिसंधिरर्णवाबोधास्सावाजकिर्गा
विष्ठिराः शिरीपयः शालिमताव्रीहिमतागौरितोगौरवयोवायवनाबाष्कल
इत्येते मुद्गलास्तेषां त्रयः प्रवराः आत्रेयार्चनानसपौर्वातिथेति।अत्रीणांस
र्वेषामविवाहः।इत्यत्रयोनिर्णीताः॥अथवसिष्ठास्तेषां चत्वारो गणा आद्य
वसिष्ठाः कुंडिना उपमन्यवः पराशराश्चेति॥ते उच्यंते॥वैतलकिर्वारकिः
सारवलागौरिश्रवसः आश्वलायनाः कपिष्ठाः शौविवृक्षाः व्याघ्रपादैः
वात्यकायनिर्वोढव्याजातूकर्ण्या औडुलोमिः कौभोजिः कौलायनाः सुद्
हरितः कांडवृद्धिः सौवत्सायना आलंभायना लोमन्यः स्वस्तिकर्षिताः पार्ण
कायनाः पार्णवल्कोदेवलकानव्याविशवावनावाहुकयः आविसिपयः वं
श्यजपयः पूर्णवेलाविशिखा इत्येते वसिष्ठास्तेषामेकः प्रवरो वासिष्ठेति
।कुंडिना होलायना गोणा आश्वत्थावैकर्णेय आविल्वाबद्रा आश्मरथ्या
वाहकः कौंकोक्याः सांगलिनः कापटवः पैटकानव ग्रामाः हिरण्याक्षाः पैप्या
पैप्पल्यादयमाध्यंदिनाः शांतिसौपत्तिरितिकुंडिनास्तेषां त्रयः प्रवराः वा
सिष्ठमैत्रावरुणकौंडिन्येति॥उपमन्यव औपगवामांडलेखयः कापिंज
लाः जलागृहास्तपोलोकास्तैत्रेणांस्ववेषास्तागिरिः स्ववास्सरामो लयश्चे
लहलिनो महाकर्णायनाबालशिखा औदाहमानयश्वलायनाभागुरि
थायनाः कुंडोदरायणाकावाधयोवाकौम्भयः आनुसारव आलवयाः कपि
केशा इत्येते उपमन्यवस्तेषां त्रयः प्रवराः वासिष्ठेंद्रप्रमदाभरद्वस्वेति।पर

शशाःकंडुशयोवाजयोवाजिमंतयः।वैमातायनागोबाल्लिःश्रोहयोवैक
लयःक्लाक्ष्यःकौसुरादयोहार्यश्विखल्वायनागोपायनाःश्यातयः।आरु
णिर्वीरुणिर्मौलुक्यावाजसिश्वक्राव्हयनाःकौंकलयःकैमतिःकृष्णाजि
नाःकपिसुखास्वरणायनयःश्वेतयूपयःपौष्कलसाविगौग्यायनयोवार्ण
यःश्यामेयाःकौनुहिःसहवौलिस्तेषांत्र्यार्षेयःवासिष्ठशाक्त्यपाराशर्ये
ति॥अत्रगौवाल्यंताःकृष्णाःपराशराहार्यश्वंतागौराःवारुण्यंताअरुणाः
कैमत्यंतानीलाःपौष्कलसाद्यंताःश्वेताःसहवौल्यंताःश्यामाइतिसंज्ञा
।वासिष्ठानांसर्वेषांपरस्परमविवाहः॥आपस्तंबस्तुआद्यवसिष्ठानाम
पिवासिष्ठशाक्त्यपाराशर्येतित्रिप्रवरानप्याह॥अथकश्यपास्तेषांत्रयो
गणानिध्रुवारेभाःशांडिलाश्चेति।तउच्यंते॥कश्यपाःछागलेयामाठरा
ऐतिशायनाआभूत्याःवैशिखाधूम्रायणाःसौम्यधन्यायणाऔदवृत्ति
राश्रायणाःपैंसाधकयःप्रावयेदद्रोणाआनयाःपांचापतिकामेषीतकिःसन
सप्यामार्षेशाबयःसौधवयःसापस्थाआसुरायणाःछागव्याःसोमपाः
स्थौलकेशयःवार्द्धकयःऔपव्याःलासायणाःकौष्ठाजीवनयःखाद्रीय
नारौहितायनामितकुंभाःपिंगाक्षयऔडलयःमारयणाःप्न्वयःवैकर्णयाः
कौषीनकेयाःधूमलक्ष्मणयःसुरागौरिवायनाःनिमव्याःअग्निशर्मीला
यनाऔसायनयःकांवोदरयःदेवरातोवैदूराःवावेलामहावक्रेयाःपैठीन
स्याःपानस्यावृषगणादाक्षमाणयःभालंदनाःशांखमित्रेयाहिरण्यया
वालाजारमण्योरमाणिसाविश्रवसोवैशंपायनाःस्वैरकिकांसतयःउत्का
यनिर्मार्जलायनाःकांसलायनाःदेवोहोतास्तूवयःस्वैरेभापस्थूणाभा
गुरयःपार्थिकाव्यागोपायनाहिरण्मयाआग्निदेविस्तव्यशौर्यस्तुसलाआ
विश्रेण्याउत्तरतोगंडूषाःदलामंत्रिताःवैकर्णयःस्थूलबिंदवइत्येतेनिध्रु
वास्तेषांत्रयःप्रवराःकाश्यपावत्सारनैध्रुवेति।रेभाणांत्रयःकाश्यपाव
त्साररैभ्येति॥शांडिलाःकौहलाःपार्थिकावाऔदमेधयःसौसानवःसौपश
वःकारेयाःकौशल्यःशैशिकयःमाहकपलहोदेहगोमूत्रावाक्यशठाजा
लंधरिधैन्वंतरिरित्येतेशांडिलास्तेषांत्रयःप्रवराःकाश्यपावत्सारशांडि
ल्येतिवा१काश्यपावत्सारदैवलेतिवा।२काश्यपावत्सारासितेतिवा३शांडि
ल्यासितदेवलेतिवा४काश्यपासितदैवलेतिवा॥आपस्तंबसूत्रेनिरूप

प्रवराःकश्यपा उक्ताः।रेभशांडिलास्तु द्व्यार्षेयास्त्र्यार्षेयावादेवलासिते।
ति॥काश्यपदेवलासितेति।कश्यपानांसर्वेषामविवाहः।इतिकश्यपनि
र्णयः।अथागस्तयः।तेत्रयः।आद्यागस्तयःसांभवाहाःसोमवाहाश्चेति॥
तउच्यंते॥ अगस्तयोविशालाद्याःशालंकायनाओदहनयःकुल्माषदेहि
नाःपर्णाय्यःसावर्णिर्वैदयोवैरणयोत्तुधोदरयःसौचपथयःशाल्मात
यामैंजिकराःशत्रयोहद्योमाःशांडिभाराःपथोद्भताःसोमवाहायज्ञवा
हाश्चेति॥इध्मवाहानांत्रयःआगस्त्यदार्ढ्यच्युतेध्मवाहेति॥सांभवा
हानामागस्त्यदार्ढ्यच्युतसांभवाहेति॥सोमवाहानामागस्त्यदार्ढ्यच्यु
तसोमवाहेति॥यज्ञवाहानामागस्त्यदार्ढ्यच्युतेध्मवाहेति॥कात्याय
नलौगाक्षिभ्यामगस्तिगणमध्येपुलस्त्यःपुलहःक्रतुरित्याद्युक्त्वा आग
स्त्यमाहेंद्रमायोभुवेति प्रवराउक्ताः॥ततःपूरणादीनुक्त्वा आगस्त्यपौर्ण
मासपौरणेति प्रवराउक्ताः।सत्याषाढस्तु आद्यागस्तीननुक्रम्यआग
स्त्यदार्ढ्यच्युतेध्मवाहेतित्रीन्।अगस्तीनांसर्वेषामविवाहः।इत्यगस्त्य
निर्णयः॥अथद्व्यामुष्यायणाः॥तत्रभरद्वाजानांकेवलांगिरसामत्रीणां
कश्यपानांवसिष्ठानांविश्वामित्राणांचद्व्यामुष्यायणानान्येषांतउच्यंते
।तत्रसंकृतिगणानांद्व्यामुष्यायणाः।सयथा।संकृतयोमलकाःपैला
स्तडिशंबुशैवगवाःपरिभवास्तारकाव्याह्निग्रीवाएतरेयाःवेणायाःआ
रायणाआश्वलायनाःश्रौतायनाआग्रायणाआर्षभयश्चांद्रायणाअ
घ्रापयःपूतिमाषाइत्येतेसंकृतयस्तेषांत्र्यार्षेयःआंगिरससांकृत्यगौरि
वीतेति।आश्वलायनस्तुशाक्त्यगौरवीतसांकृत्येतिप्रवरानाह।एतैःपूर्वो
क्तैःपरस्परंचतुर्विधवसिष्ठैश्चसहनविवाहः।चतुर्विंशतिटीकायांतुक
श्यपैस्त्रिभिरविवाहइत्युक्तं।श्लोकेप्युक्तःकाश्यपेयगणस्यापिवसि
ष्ठस्यगणस्यच॥संकृतिपूतिमाषाभ्यांविवाहोनपरस्परमिति।तत्राक
रोमृग्यः।लौगाक्षीणांत्रयःप्रवराःकाश्यपावत्सारवासिष्ठेति॥एषांवासि
ष्ठकश्यपैरविवाहः॥तथाधनंजयानांविश्वामित्रात्रिभिरविवाहः।एवंवा
मरथानांजातूकर्ण्यानांवसिष्ठात्रिभिरविवाहः।विश्वामित्रभरद्वाजैःशौं
गशैशिरिणांनविवाहः।अस्यप्रवराः।आंगिरसबार्हस्पत्यभारद्वाजका
त्यात्कीलेति।कचित्तुदेवरातेनविश्वामित्रजमदग्निभिःसहनविवाहइ

त्युक्तं॥तत्रकेषांचित्काशीस्थानामनादरः।विपरीतानुष्ठानात्।दक्षिण
देशेतुनकुर्वंति।तत्रमूलंमृग्यं॥इतिद्व्यामुष्यायणाः।यत्तुमानवेतिवास
वैषामितिप्रवरउक्तः।सवरणेनतुविवाहादौतस्योपयोगः॥राजन्यवै
श्यानांसमानार्षेयत्वादिकंपुरोहितगोत्रादिभिर्विवारणीयं॥अथकश्चि
द्विशेषोमृग्यमूलोपिलिख्यते॥शैंगशैशिरीणांपंचोक्ताः।आंगिरसबा
र्हस्पत्यभारद्वाजशैंगशैशिरेतिवा॥त्रयोवा॥आंगिरसकात्यात्कीलेति
।भारद्वाजकात्यात्कीलेतिवा॥कपिलानामांगिरसबार्हस्पत्यभारद्वाजवां
दनमातवचसेति॥एषांविश्वामित्रभरद्वाजैर्नान्वयः॥धनंजयानांवै
श्वामित्रमाधुच्छंदसधानंजयेति।एषामत्रिविश्वामित्रैर्नान्वयः॥लौगा
क्षीणांकाश्यपावत्सारवासिष्ठेति॥वासिष्ठावत्सारकाश्यपेति।एषांवासि
ष्ठकाश्यपैरविवाहः।यस्यविस्मरणादिनागोत्रनाशस्तस्यकाश्यपगो
त्रं।गोत्रनाशेतुकाश्यपमितिहेमाद्रौव्याघ्रोक्तेः।अथात्रस्मृत्यर्थसारस्थ
श्लोकाःसंग्रहार्थंलिख्यंते॥अथात्रगोत्रप्रवरनिर्णयोवर्ण्यतेंजसा॥
जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः१वसिष्ठकश्यपागस्त्यामु
नयोगोत्रकारिणः।एतेषांयान्यपत्यानितानिगोत्राणिमन्वते॥२म्रि
यमाणतयावापिसतयावानुवर्त्तनं॥एकस्यदृश्यतेयत्रतद्गोत्रंतस्यक
थ्यते।३समानमुनिभूयस्त्वएकप्रवरनामपि॥समानप्रवरत्वंचद्वेधा
बौधायनोब्रवीत्।४।मुनिप्रणीतप्रवरैरूनपंचाशतावयं।अनंतान्यपि
गोत्राणिचांगीकृत्याभिदध्महे।५।जामदग्न्यैर्वत्सविदावार्ष्टिषेणाःप
रस्परं॥नान्वियुःप्रवरैक्येनसगोत्रत्वेनचादिमौ॥६।यस्कामित्रयुवोवै
न्याःशुनकाःप्रवरैक्यतः॥स्वंस्वंहित्वागणंसर्वैविवहेयुःपरावरैः।७।
उक्ताःसप्तभृगोर्वंशावक्ष्यंतेंगिरसोगणाः॥गौतमाःसप्तचायास्याःशरद्व
तास्तथापरे॥८॥कौमांडादीर्घतमसस्ततःकारेणुपालयः॥वामदेवाऔ
शनसागोत्रैक्यान्नान्वियुर्मिथः॥९॥केवलांगिरसाश्चैवकेविष्णुवृद्धाःस
कण्वजाः॥हरितारथीतराश्चमुद्गलाःप्रवरैक्यतः॥१०॥स्वंस्वंहित्वागणं
सर्वैविवहेयुःपरावरैः॥षोडशांगिरसस्त्वेधाप्रोक्ताःसंकृतयस्तथा॥११
संकृतीनांद्विवंश्यत्वाद्वासिष्ठैश्चचतुर्विधैः।स्ववर्गीयैःसगोत्रत्वात्प्रवरै
क्याच्चनान्वियुः॥१२॥चत्वारोत्रयआयास्त्रिकाद्भूतेकणषिष्ठिराः।मुद्गलाः

ष्वेति गोत्रैक्यात्प्रवरैक्याच्च नान्वियुः॥१३॥ त्रयश्च कश्यपगणा निध्रुवा
रैभशांडिलाः॥ गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परं॥१४॥ वासिष्ठैः क
श्यपैर्नित्यं लौगाक्षीणामनन्वयः। अहं वसिष्ठतो किंतु भरद्वाजाद्यादिगो
त्रा॥१५॥ वसिष्ठाः कुंडिनाश्चैव मुपमन्युपराशराः॥ वसिष्ठा इति चत्वारो
गोत्रैक्यान्नान्वियुर्मिथः॥१६॥ कुशिकारोहितगणा रौक्षकाकामकाय
नाः। कता धनंजया आजा अघमर्षणपूरणाः॥१७॥ इंद्रकौशिकजाश्चे
ति विश्वामित्रगणा दश॥ नोद्वहेयुः सगोत्रत्वात्कचित्प्रवरैक्यतः॥१८॥
अगस्तयः सांभवाहाः सोमवाहा इति त्रयः। गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः प
रस्परं॥१९॥ वर्गा एकोनपंचाशत्प्रसिद्धा मुनिभिः स्मृताः। अप्रसिद्धाः प्रे
वंश्या अंतर्भूता इहैव ते॥२०॥ विश्वामित्रा त्रिगोत्रेण नोद्वहेयुर्धनंजयाः
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा॥२१॥ नैव कन्यां तु कण्वाश्च वसि
ष्ठैरत्रिभिः सह॥ भरद्वाजेन शुंगेन विश्वामित्रस्य शैशिरैः॥२२॥ क्षेत्रेजाता
द्विगोत्रर्षिः प्रोच्यते शौंगशैशिरिः॥ विश्वामित्रभरद्वाजैस्तज्जानां तेन ना
न्वयः॥२३॥ कपिलानां भरद्वाजैर्विश्वामित्रैश्च नान्वयः। गुरोः सगोत्रप्रव
रा नोद्वाह्यास्तत्र विद्वणैः २४॥ सगोत्रास्तु न भिद्यैश्च विप्रैराचार्यगोत्रजाः
दानादिनान्यगोत्राः स्युरज्ञातगुरुगोत्रिणः॥२५॥ समानप्रवरोद्वाहनि
षेधः क्षत्रवैश्ययोः। प्रवरान्मानवेत्यस्मात्प्रवराश्चान्यगोत्रजः॥२६॥ इत्थं
सगोत्रसंबंधविवाहविषये स्थिते॥ यदि कश्चिदज्ञानतस्तां कन्यामूढ्वो
पगच्छति॥२७॥ गुरुतल्पव्रतं कुर्याद्गर्भस्तज्जोऽन्त्यतां व्रजेत्॥ भोगत
स्तां परित्यज्य पालयेज्जननीमिव॥२८॥ अत्र प्रायश्चित्तप्रपंचः प्राय
श्चित्तमयूखे वक्ष्यते॥ जामदग्न्या वत्सविदा आर्ष्टिषेणास्तथैव च॥ पं
चावत्तिन एवैते अन्ये चतुरवत्तिनः॥२९॥ अर्थतः पूर्वमेव व्याख्यातानि
पद्यानि॥ इह कपिलानामित्यर्द्धं प्रक्षिप्तमिति टीकाकृतः॥ अत्र गोत्रप्रव
रनिर्णये बहु वक्तव्यमप्युपयोगाभावाद्विस्तृतिभयाच्च नोक्तं। विचारबा
हुल्यजिज्ञासुना द्वैतनिर्णये द्रष्टव्यं॥ इति कन्यालक्षणादि॥ एतानेव धर्मा
तरे ऽतिदिशति याज्ञवल्क्यः॥ एतैरेव गुणैर्युक्तः सुवर्णः श्रोत्रियो वरः॥ ब
लात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रिय इति॥ अत्र भ्रातृमदनन्यपू
र्वयवीयस्त्वरूपगुणत्रयभिन्नाः सर्वे गुणा अतिदिश्यंते॥ सवर्ण उत्तमव

र्णोवा॥ असपिंडादिगुणातिदेशादुभयतः सापिंड्यनिवृत्तिरभिप्रेता॥ पुं
स्त्वपरीक्षोक्ता नारदेन॥ यस्याप्सु प्लवते बीजं ह्लादि मूत्रं च फेनिलं। पुमा
न्स्याल्लक्षणैरेतैर्विपरीतस्तु षंढक इति॥ गृह्येतु द्विमते कन्यां प्रयच्छेदि
ति॥ यमोप्याह॥ कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च॥
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीयमिति॥ सामुद्रि
के॥ पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत्॥ आयुर्हीननराणां हि लक्ष
णैः किं प्रयोजनमिति॥ अन्यानि सामुद्रिकलक्षणानि विस्तरभियानोक्ता
नि॥ इति वरगुणाः॥ अथ विवाहक्रमः॥ याज्ञवल्क्यः॥ तिस्रो वर्णानुपूर्व्ये
ण द्वे तथैका यथाक्रमं॥ ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः॥ ति
स्र इत्यादिसंख्यासवर्णाव्यतिरेकेण मनुः॥ सवर्णाग्रे द्विजातीनां प्रशस्ता
दारकर्मणि॥ कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोवराः॥ अत्र प्राचः पु
त्रधर्मार्थत्वेन विवाहस्त्रिविधः॥ पुत्रार्थो द्विविधः॥ नित्यः काम्यश्च॥ अ
पुत्रस्य यः सुतार्थो विवाहः स काम्यः॥ नात्र नित्ये सवर्णैव॥ काम्यपुत्रोत्पा
दने शूद्राव्यतिरिक्ताः॥ रत्यर्थमनाश्रमित्वदोषपरिहारार्थं वा शूद्रापि परि
णेया॥ ननु पुत्रोत्पत्त्युद्देशेन॥ यदुच्यते द्विजातीनां शूद्रा दारोपसंग्रहः॥
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयमिति॥ हेत्वभिधानात्॥ नैवं
शूद्रापुत्रस्य विभागो न संगच्छत इति वाच्यं॥ रत्यर्थं प्रवृत्तस्यानुषंगे
ण पुत्रे जाते वचनस्यार्थवत्त्वात्॥ यदि नित्यपुत्रोत्पादनार्थं सवर्णा न ल
भ्यते तदानुकल्पार्थमप्यसवर्णापरिणयनमित्याहुः॥ विशेषउक्तो
याज्ञवल्क्येन॥ पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरं॥ वैश्या प्रतो
दमादद्याद्वेदने त्वग्रजन्मन इति॥ तथा॥ वसनस्य दशा ग्राह्या शूद्रयोत्कृ
ष्टवेदने इति च॥ अत्र जन्मग्रहणेन उत्तमवर्णग्रहणं॥ वैश्यायाः क्षत्रि
येण सह विवाहे प्रतोद एव॥ इति विवाहक्रमः॥ अथ विवाहभेदाः॥
मनुः॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव
पैशाचश्चाष्टमः स्मृत इति॥ तत्र क्रमेणैवाष्टानां स्वरूपं फलं चाहाश्वला
यनः॥ अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहस्तस्यां जातो
द्वादशावरान्द्वादशपरान्पुनात्युभयतोऽथ ऋत्विजे वितते कर्मणि दद्या
दलंकृत्य स दैवो दशावरान्दशपरान्पुनात्युभयतः सह धर्मं चरत इ

निप्राजापत्योष्टावरानष्टपरान्पुनात्युभयतोगोमिथुनंदत्त्वोपयच्छेत
सआर्षः।सप्तावरान्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयच्छे
तसगांधर्वोधनेनोपतोष्योपयच्छेतसआसुरः।सुप्तानांप्रमत्तानांवापह
रेत्सपैशाचोहत्वाभित्वाचशीर्षाणिरुदतींरुदद्भ्यो पहरेत्सराक्षसइति।त
तेषुगुणदोषानाहमनुः॥ब्राह्मादिषुविवाहेषुचतुर्ष्वेवानुपूर्वशः।ब्रह्मव
र्चस्विनःपुत्राजायंतेशिष्टसंमताः।इतरेष्ववशिष्टेषुनृशंसानृतवादिनः
।जायंतेदुर्विवाहेषुब्रह्मधर्मद्विषःसुताः।नृशंसाहिंस्त्राःब्रह्मद्विषोवेद
द्विषः।गांधर्वादिष्वनंतरंहोमादिकर्मापिकार्यं।तद्विनाभार्यात्वानुत्प
त्तेः।तथाहदेवलः।गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः।कर्त्तव्यश्च
त्रिभिर्वर्णैःसमर्थेनाग्निसाक्षिकः॥वसिष्ठोपि॥बलादपहृताकन्यामंत्रै
र्यदिनसंस्कृता॥अन्यस्मै विधिवद्देयायथाकन्यातथैवसा॥अत्रव्य
वस्थामाहमनुः॥चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः।राक्ष
संक्षत्रियस्यैवमासुरंवैश्यशूद्रयोरिति॥राक्षसःक्षत्रियस्यमुख्यः।
आसुरोवैश्यशूद्रयोर्मुख्यः।अनुकल्पमाहसएव॥षडानुपूर्व्याद्विप्र
स्यक्षत्रस्यचतुरोवरान्॥विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसा
न्।इति।अस्यार्थः।ब्राह्मणस्यब्राह्माद्यागांधर्वान्ताःषडेवनेतरे।एवंच
क्षत्रियादेर्ब्राह्माद्यनुज्ञा॥आसुरादयश्चत्वारःक्षत्रियस्यधर्मावैश्यशू
द्रयोरपिराक्षसवर्जमेतएव॥एवंचराक्षसंक्षत्रियस्यैव।ब्राह्मणस्यष
डेनेतरे॥ क्षत्रियस्यसर्वे।आसुरंनिंदतिकाश्यपः॥क्रीताद्रव्येणयाना
रीनसापत्नीविधीयते॥नसादैवेनसापित्र्येदासींतांकवयोविदुरिति॥
यमः॥कन्याविक्रयिणोमूर्खोरहःकिल्बिषकारिणः॥पतंतिनरकेघो
रेदहंत्यासप्तमंकुलमिति॥एवंचात्मार्थेधनग्रहणेकन्यार्थेतुनदोषः।
यथाहमनुः॥यासांनाददतेशुल्कंज्ञातयोनसविक्रयः।अर्हणंतत्कुमा
राणांननृशंस्यंतुकेवलं॥आनृशंस्यसमापित्वंब्राह्मणस्यापिपैशा
चमनुजानातिवत्सः॥सर्वोपायैरसाध्यास्यात्तुकन्यापुरुषस्यया॥
चौर्येणापिविवाहेनसाविवाह्यारहस्थितेति।विवाहमध्येस्त्रीणांरजो
दर्शनेविशेषमाहयत्नपार्श्वः।विवाहेवितनेतंत्रेहोमकालउपस्थिते
॥कन्यायामृतुरागच्छेत्कथंकुर्वंतियाज्ञिकाः।स्नापयित्वातुतांकन्या

मर्चयित्वायथाविधि॥ युंजानामाहुतिंहुत्वाततस्तंत्रंप्रवर्तयेदिति॥
॥इतिविवाहभेदः॥ अथकालः॥अत्रगृह्यं।उदगयनआपूर्यमाणपक्षेक
ल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाइति॥यत्तुसार्वकालमेके
विवाहमितितद्दक्षिणायनप्राप्त्यर्थमितिधर्मप्रकाशेनारदः॥माघफाल्
गुनवैशाखज्येष्ठमासाःशुभप्रदाः॥मध्यमःकार्त्तिकोमार्गशीर्षकोनिंदि
ताःपरे।नकदाचिद्दशर्क्षेषुभानोरार्द्राप्रवेशनात्॥विवाहंदेवतानांचप्र
तिष्ठांनोपनायनं॥ अत्रयद्यपिशेषानिंदितास्तथापि भानोरार्द्राप्रवेशना
दितिपुनः श्रुत्याषाढेभ्यनुज्ञातःसचार्द्राप्रवेशनात्पूर्वमिति॥ अत्रचवि
धिनिषेधाःसौरमानाभिप्रायेण।यथोक्तंगर्गेण॥सौरोमासोविवाहादौ
यज्ञादौसावनःस्मृतइति॥ अतःकश्यपेनचांद्रमानमप्युक्तं॥उपवास
व्रतोद्वाहयात्राक्षौरोपनायनं॥तिथिवर्षादिनिखिलंचांद्रमानेनगृह्यत
इति॥मदनरत्ने मिहिरः॥ज्येष्ठस्यज्येष्ठकन्यायाविवाहोनप्रशस्यते।
तयोरन्यतरेज्येष्ठेज्येष्ठमासोनशस्यते॥द्वौज्येष्ठौमध्यमौप्रोक्तावेकः
ज्येष्ठःशुभावहः॥ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतं॥ज्येष्ठाकन्यावरो
पिज्येष्ठःज्येष्ठमा सश्चेतित्रिज्येष्ठं।ज्येष्ठानक्षत्रेणवात्रिज्येष्ठं।ज्ये
ष्ठानक्षत्रंज्येष्ठमासःज्येष्ठाकन्येत्यपित्रिज्येष्ठं॥यत्तुज्यैष्ठेत्रिज्येष्ठस्य
सद्भावान्निषेधप्रवृत्तिरस्त्येव॥ज्येष्ठशब्देनक्षत्राद्यगर्भोत्पन्नमपत्यंन
दाहश्रीपतिः॥आद्यगर्भदुहितुःसुतस्यवाज्येष्ठमासिनतुजातुमंगलमि
ति॥तथापक्षोपि॥पूर्वस्मापूर्यमाणउक्तः।बृहस्पतिःकृष्णमप्याह॥शु
क्लपक्षःशुभःप्रोक्तःकृष्णोप्यन्त्यत्रिकंविनेति॥जन्मपक्षस्तुनिषिद्धः॥वि
वाहेचोपनयनेजन्ममासंविवर्जयेत्॥विशेषाज्जन्मपक्षंतुवसिष्ठादी
रुदाहृतमिति॥तिथ्यादिप्राशस्त्यनिषेधादिज्योतिःशास्त्रादवगंतव्यं
॥इतिविवाहेकालनिर्णयः॥अथविवाहकालः।बौधायनः।दद्याद्गुणव
तेकन्यांनग्निकांब्रह्मचारिणे॥अपिवागुणहीनायनोपरुंध्याद्रजस्वला
मिति॥उपरोधनेनरजस्वलाप्रयोजकानभवेदित्यर्थः॥पुराणेपि॥याच
नलज्जयायातिकन्यापुरुषसन्निधौ।योन्यादीन्नावगूहेततावद्भवति
कन्यका॥यमः।अष्टवर्षाभवेद्गौरीनववर्षातुरोहिणी॥दशवर्षाभवेत्क
न्याअतऊर्ध्वंरजस्वलेति॥ऊर्ध्वंद्वादशेवर्षइत्यर्थः।उक्तंचसंवर्तेन॥अ

ष्टमेतुभवेद्गौरीनवबर्षातुरोहिणी॥दशमेकन्यकाप्रोक्ताद्वादशेतुवृषली
भवेत्॥वृषलीस्तुरजस्वला॥यथोक्तंदेवलेन॥वंध्यातुवृषलीज्ञेयावृषलीच
मृतप्रजा॥अपरावृषलीज्ञेयाकुमारीयारजस्वलेति॥यमस्तुदोषमाह॥
प्राप्तेद्वादशमेवर्षेयःकन्यांनप्रयच्छति॥मासिमासिरजस्तस्याःपितापि
बतिशोणितं॥द्वादशवर्षग्रहणंप्रायिकं॥कस्याश्चित्तत्रापितद्दर्शनाभाव
त्॥अतोरजोदर्शनेविवाहात्पूर्वंयथाकुर्यादित्युक्तंभवति॥अतश्चत्रिंशद्व
र्षोद्वहेत्कन्यांहृद्यांद्वादशवार्षिकीमित्यादिमनूक्तिःसंगच्छते॥अस्या
श्चग्रहणेपिदोषमाहयमः॥यस्तांसमुद्वहेत्कन्यांब्राह्मणोमदमोहितः॥
असंभाष्योह्यपांक्तेयःसविप्रोवृषलीपतिः॥यत्तुमनुः॥काममामरणा
त्तिष्ठेद्गृहेकन्यर्तुमत्यपि॥नत्वेवैनांप्रयच्छेत्तुगुणहीनायकर्हिचिदिति
॥तदपिशब्दात्कामशब्दाच्चनस्वार्थपरं॥किंतुगुणवद्दानप्रशंसार्थं॥अ
ग्रेस्वयमेवबाहुल्येनदोषाभिधानात्॥कन्यादानेफलमाहमनुः॥अ
ग्निहोत्रादिभिस्तत्स्यात्पूर्णतोब्राह्मणस्यवा॥यत्कन्यांविधिवद्दत्वा
फलमाप्नोतिमानवइति॥सालंकृतिकन्यादानेविशेषमाहसंवर्तः॥कू
पदश्चाश्वमेधीचप्राणदाताभयेषुच॥समेयांतिरथापृष्ठास्त्वर्योवैनात्र
संशयइति॥सत्कृत्यालंकृतांकन्यांयोददातिसकूपदइतिकोशः॥नचे
दंफलश्रवणात्काम्यमेवेतिवाच्यं॥अप्रदानेदोषश्रवणात्॥अतोज
तिष्टिवन्नित्यंकाम्यंच॥तथाकालांतरमपिवैवाहिकोविधिःस्त्रीणा
मौपनायनिकःपरइति॥येउपनयनेकालाःपंचमवर्षादयस्तएवकन्या
विवाहेमनुर्विशेषमाह॥उत्कृष्टायानुरूपायवरायसदृशायच॥अ
प्राप्तामपितांतस्मैकन्यांदद्याद्विचक्षणः॥अप्राप्तकालमप्राप्तामित्य
र्थः॥वरानुरोधेनदेयेत्यर्थः॥इतिविवाहकालः॥अथदातृक्रमः॥याज्ञ
वल्क्यः॥पितापितामहोभ्रातासकुल्योजननीतथा॥कन्याप्रदःपूर्वना
शेप्रकृतिस्थःपरःपरः॥अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ॥
नारदेनत्वन्येप्युक्ताः॥पितादद्यात्स्वयंकन्यांभ्रातावानुमतेपितुः॥
मातामहोमातुलश्चसकुल्योबांधवस्तथा॥मातात्वभावेसर्वेषांप्र
कृतौयदिवर्त्तते॥तस्यामप्रकृतिस्थायांकन्यांदद्युःस्वजातयः॥प्रकृ
तिस्थःउन्मादादिदोषशून्यः॥वयोविशेषेणफलमाहमरीचिः॥गौरीं

दद्न्नाकपृष्ठंवैकुंठंरोहिणींददत्॥कन्यांदद्ब्रह्मलोकंरौरवंतुरजस्व
लामिति॥गोयोदिस्वरूपमुक्तंप्राकृयदिऋतुदर्शनेपिताचनददातित
दाकन्यावर्षत्रयंप्रतीक्ष्यस्वयमेववरयेत्॥तदाहबौधायनः॥त्रीणि
वर्षाण्यृतुमतीकांक्षेतपितृशासनं॥ततश्चतुर्थेवर्षेतुविंदेत्सदृशं
पतिं॥यत्तुविष्णुः॥ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरमितितत्गुण
वद्वरविषयं॥इयंप्रतीक्षादातृसद्भावे॥यदातुकोपिदातानास्तितदारा
जादद्यात्॥यथाहनारदः॥यदातुकश्चिन्नैवस्यात्कन्याराजानमाव्र
जेदिति॥यदाराजापिनददातितदास्वयंवरंकुर्यात्॥याज्ञवल्क्यः॥ग
म्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरमिति॥गम्यंगमनार्हं॥तथापि
आज्ञयापिस्वयंवरउक्तोभारतेसावित्र्युपाख्याने॥पुत्रिप्रदानकाल
स्तेनचकश्चिद्वृणोतिमां॥स्वयमन्विच्छभर्तारंगुणैःसदृशमात्मनः॥
तथानलोपाख्यानेपि॥ससमीक्ष्यमहीपालःस्वांसुतांप्राप्तयौवनां॥
अपश्यदात्मनःकार्यंदमयंत्याःस्वयंवरमिति॥स्कांदेविशेषः॥आत्मी
कृत्यसुवर्णेनपरकीयांतुकन्यकां॥धर्मेणविधिनादातुमसगोत्रापि
युज्यतइतितत्फलंतत्रैव॥अनाथांकन्यकांदृष्ट्वासदृशायाधिकेवरे
॥द्विगुणंफलमाप्नोतिकन्यादानेयदीरितमिति॥अतोऽन्यकन्याऽन्ये
नापिधर्मार्थंदेया॥इतिदातृस्वयंवरनिर्णयः॥अथदत्तापहारः॥तत्र
दत्तापहारेदंडमाहयाज्ञवल्क्यः॥सकृत्प्रदीयतेकन्याहरंस्तांचौरदंड
भागिति॥नारदोपि॥दत्वान्यायेनयःकन्यांवरायनददातितां॥अदुष्ट
श्चेद्वरोराज्ञासदंड्यस्तत्रचोरवत्॥दत्तांवाग्दत्तां॥अदुष्टश्चेदित्यनेनदु
ष्टायनदेयेतिगम्यते॥उक्तंचगौतमेन॥प्रतिश्रुत्याप्यधर्मसंयुक्तायन
दद्यादिति ॥याज्ञवल्क्योपि॥दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्र
जेदिति॥यत्तुमनुनोक्तं॥एतत्तुनपरेचक्रुर्नापरेजातुसाधवः॥यदन्य
स्याभ्यनुज्ञायनरस्यान्यस्यदीयते॥यच्चसकृदंशोनिपततिसकृत्क
न्याप्रदीयतइतितद्दोषवर्जितविषयं॥दुष्टेनापियदिपाणिग्रहणस
मयात्प्राक्क्रियतेततोनैवग्राह्या॥अतएवनारदः॥स्त्रीपुंसयोस्तुसंबंधा
द्वरणंप्राग्विधीयते॥वरणाद्ग्रहणंपाणेःससंस्कारोद्विलक्षणः॥तयोर
नियतंप्रोक्तंवरणंदोषदर्शनादिति॥तयोर्वरणपाणिग्रहणयोर्मध्येव

रणामनियतंयतोतद्दोषदर्शनात्सत्यावर्त्तनइत्यर्थः॥यमोपि॥नोदके
ननवाचावाकन्यायाःपतिरुच्यते॥पाणिग्रहणसंस्कारात्पतिःस्यात्स
प्तमेपदेइति॥अनेनसप्तपद्याःप्राग्वरमरणेनवैधव्यमितिगम्यते॥वसि
ष्ठेनाप्युक्तं॥अद्भिर्वाचाचदत्तायांम्रियेतादौवरोयदि।नचमंत्रोपनी
तास्यात्कुमारीपितुरेवसेति॥वरणोत्तरंदेशांतरगमनेआहकात्यायनः
॥वरयित्वातुयःकश्चित्प्रणश्येत्पुरुषोयदा॥ऋत्वागमांस्त्रीनतीत्य
कन्यान्यंवरयेत्पतिमिति॥प्रणश्येद्देशांतरंगच्छेदितिमाधवः।अन्यथा
परीक्षावैयर्थ्यात्॥एवंतुचप्रतिगृह्यचयःकन्यांवरोदेशांतरंव्रजेत्॥
त्रीनृतूनसमतिक्रम्यकन्यान्यंवरयेद्वरमिति।नारदीयेनाप्येकार्थताभ
वति।शुल्कदातुर्देशांतरमृतौकात्यायनआह।प्रदायशुल्कंगच्छेद्यःक
न्यायाःस्त्रीधनंतथा॥धार्यासावर्षमेकंतुदेयान्यस्मैविधानतइति॥शु
ल्कदमरणेमनुराह॥कन्यायांदत्तशुल्कायांम्रियेतयदिशुल्कदः।देवरा
यप्रदातव्यायदिकन्यानुमन्यते॥यदिकन्यानुमन्यतइत्यनेनकन्यानु
मतौकश्चिन्नत्वननुमतौवादेवराययदितुदेवरातिरिक्तमेवानुमन्य
तेतदातस्माएव।बहुभिर्निर्दोषैर्वरणेकृतेविशेषमाहकात्यायनः॥अने
केभ्योहिदत्तायामनूढायांतुनत्रवै॥परागतश्चसर्वेषांलभेतादिवरः
सुतां॥अथागच्छेतवोढायांदत्तंपूर्ववरोहरेत्॥अन्यस्मैदत्तायांतस्मै
यच्छुल्कंतदेवलभेतेत्यर्थः।सदोषायप्रथमंप्रतिश्रुतापिनदेया॥दत्ता
मपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्रजेत्॥इतिस्मृतेः॥वसिष्ठस्तुपाणिग्र
हणोत्तरमपिग्राह्येत्याह॥पाणिग्रहेकृतेकन्याकेवलंमंत्रसंस्कृता॥सा
चेदक्षतयोनिःस्यात्पुनःसंस्कारमर्हति॥नारदोपि॥उद्वाहितापिसाक
न्यानचेत्संप्राप्तमैथुना॥पुनःसंस्कारमर्हेत्सायथाकन्यातथैवसा॥
अयंचोद्वाहोत्तरमपहारःकलौनिषिद्धः॥कलिनिषिद्धानिचसमयम
यूखेवक्ष्यंते।वाग्दानोत्तरंतुकन्यादोषोपलंभेगृहीतायाअपित्यागमा
हमनुः॥विधिवत्प्रतिगृह्यापित्यजेत्कन्यांविगर्हितामिति॥विगर्हितां
दुष्टां।नारदः।नदुष्टांदूषयेत्कन्यांनादुष्टांदूषयेद्वरं॥दोषेसतिनदोषः
स्यादन्योन्यंत्यजतोर्द्वयोः॥कन्यादोषानारदेनदर्शिताः।दीर्घकुत्सितरो
गार्त्ताव्यंगासंस्पृष्टमैथुना॥धृत्याऽन्याहितभावावाकन्यादुष्टाप्रकीर्ति

तेति॥अन्यस्मिन्पुरुषांतरे आहितः कृतोभावोमानसाभिलाषोयया सा
तथोक्ता॥अदुष्टात्यागेदोषमाह याज्ञवल्क्यः॥अदुष्टांचत्यजन्दंड्योदू
षयंस्तुमृषाशतमिति॥कन्यादोषमनाख्यायददत्पित्रादिरपिदंड्य
इत्याहसएव॥अनाख्यायददद्दोषंदंड्यउत्तमसाहसमिति।इतिदत्ता
पहारनिर्णयः॥अधिवेदनेनिमित्तान्याह याज्ञवल्क्यः।सुरापीव्याधि
ताधूर्तावंध्यार्थघ्न्यप्रियंवदा॥स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीत
था॥धूर्त्ताविसंवादशीला॥अधिवेदनंभार्यांतरपरिग्रहः॥विशेषमा
हमनुः॥मद्यपासत्यवृत्ताचप्रतिकूलाचयाभवेत्॥व्याधिताचाधिवे
त्तव्याहिंस्राऽर्थघ्नीचसर्वदा॥वंध्याष्टमेधिवेद्याब्दे दशमेतुमृतप्रजा
॥एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी॥एतेषुनिमित्तेष्वधिवेत्त
व्येत्यभ्यनुज्ञामात्रं॥ननुअधिवेदनेकंसमं॥नदत्तस्त्रीधनंयासांदत्तेः
लर्ध्दंप्रकल्पयेदिति॥इत्यधिवेदनं॥अथविवाहोपनयनादौनिषेधास्त
उच्यंते॥सारावल्यां॥एकमातृप्रसूतानामेकस्मिन्वत्सरेयदि॥विवा
हंनैवकुर्वंतिकुर्वंतितुततोन्यथा॥भिन्नमातृकपार्वत्सरभेदेनवा॥प्र
योगपारिजातेस्मृत्यंतरे॥विवाहस्त्वेकजन्यानामेकस्मिन्पुरुषेकु
ले॥नाशंकरोत्येकवर्षेस्यादेकाविधवातयोः।उदयोलग्नं॥क्वचिदप
वादस्तत्रैव॥एकोदरीकसंभवंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेदिति॥
मंगलेविवाहादौ।अमंगलेश्राद्धादि॥अनुकल्पमाह गर्गः।पुत्रीपरिण
यादूर्ध्वंयावद्दिनचतुष्टयं॥पुत्र्यंतरस्यकुर्वीतनोद्वाहमितिसूरयः॥अ
नुकल्पांतरमाहसएव॥भ्रातृयुग्मेस्वसृयुग्मेचभ्रातृस्वसृयुगेतथा॥
नजातुमंडनेकार्यमेकस्मिन्मंडपेहनीति॥भ्रातृयुग्मस्यस्वसृयुग्म
स्यभ्रातृस्वसृयुग्मस्यचएकस्मिन्नहनिएकस्मिन्मंडपेमंडनंनकुर्या
त्पृथगयंनिषेधःसमुच्चयेमानाभावात्॥इदंचवचनद्वयंभिन्नमातृ
जविषयमितिकेचित्॥तन्नमानाभावात्।एकोदराद्दितेकभ्रुकजन्या
पत्ययोर्मुख्यस्यभ्रातृशब्दस्यान्यगौणत्वाच्च॥अन्यविशेषमाहनार
दः॥प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं॥नचैकजन्मनोःपुंसोरेकज
न्येतुकन्यके॥नूनंकदाचिदुद्वाहोनैकदामुंडनद्वयमिति॥नूनंकदाचि
दुद्वाहावितिसापत्नपरं॥मुंडनद्वयंसापत्नयोरपिनभवति॥दुहितृद्वयं

नदेयमित्यध्याहारः॥कन्यकेनदेयेद्गूनिच॥विशेषांतरंसंहितासारावल्यां
॥सापत्नतोमुंडनमूर्ध्वमिष्टंनपुत्रयोर्मुंडनमेकवर्षे।नशुविवाहोर्ध्वम्
तुत्रयेपिविवाहकार्यंदुहितुःप्रकुर्यात्॥नमंडनाख्यापिहिमुंडनंतुगोत्रे
कलायांयदिनाब्दभेदइत्यपिक्वचित्।मुंडनंचौलं।मुंडनंचौलमित्युक्तंप्रतोद्वा
होतुमंडनमिति।ऋतुत्रयापवादउक्तःसारावल्यां॥फाल्गुनेचैत्रमासेतुपु
त्रोद्वाहोपनायने॥भेदादब्दस्यकुर्वीतिनर्तुत्रयविलंघनमिति॥हारी
तोन्यविशेषमाह॥स्पर्शितास्याद्यदाकन्यावाचापितुस्ववेनच॥अंतरा
प्रातिकूल्यंचेत्पूर्वोढाविधवाभवेत्॥अचिरेणैवकालेनपशुभृत्यधन
क्षयइति॥प्रातिकूल्यंमरणं॥दक्षः॥दंपत्योःपितरौभ्रातासोपनीतःस
होदरः॥पितृव्यसदृशश्चैवपितामहपितामही॥एषामन्यतमेनष्टेनो
द्वहेत्तावधूवरः॥ज्योतिःप्रकाशे॥प्रतिकूलेपिकर्तव्योविवाहोमासतःप
रं॥शांतिंविधायगांदत्वावाग्दानादिचरेत्पुनरिति शांतिर्नवग्रहयज्ञादिः
॥अथाशौचनिर्णयः॥याज्ञवल्क्यः॥दानेविवाहयज्ञेचसंग्रामेदेशविप्
लवे॥आपद्यपिचकष्टायांसद्यःशौचंविधीयते॥विष्णुः॥ब्रह्मयज्ञविवाहे
षुश्राद्धेहोमेर्चनेजपे॥प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं॥प्रारंभोव
रणंयज्ञेसंकल्पोव्रतसत्रयोः॥नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रि
येति॥विष्णुः॥नदेवप्रतिष्ठाविवाहयोःपूर्वसंभृतयोरिति॥बृहस्पतिः॥
विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके॥पूर्वसंकल्पितार्थेषुनदोषःपरिकी
र्तितइति॥आरंभाभावेप्यग्रेकालांतराभावे आशौचापवादउक्तोवि
ष्णुना॥आरब्धस्यविशुद्ध्यर्थंकूष्मांडैर्जुहुयाद्घृतं॥गांदद्यात्पंचगव्या
शीततःशुद्ध्यतिसूतकी॥सूतकीतिजननाशौचंनेत्यर्थः॥इत्याशौचनि
र्णयः॥रजोदोषेमेधातिथिः॥चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि॥भा
र्यारजस्वलायस्यप्रायस्तस्यनशोभनं॥वधूवरान्यतमयोर्जननीचेद्र
जस्वला॥तस्याःशुद्धेःपरंकार्यंमांगल्यंमनुरब्रवीत्॥बृहस्पतिः॥वैध
व्यंचविवाहेस्याज्जडत्वंव्रतबंधने॥चूडायांचशिशोर्मृत्युर्वितंयात्राप्रवे
शयोः॥तथा॥सूतिकोदक्ययोःशुद्ध्यैगांदद्याद्धोमपूर्वकं।प्रोक्तकर्मणिशु
द्धिःस्यादित रस्मिन्नशुद्ध्यति।अलाभेसुमुहूर्तस्यरजोदोषेचसंगते॥
श्रियंसंपूज्यतत्कुर्याद्ब्रह्महत्याभयंनहि॥हैमींमाषमितांपद्मांश्रीसूक्ते

धिनार्चयेत्॥ मस्पृत्वंपायसंहुत्वा अभिषेकंसमाचरेदिति॥ अस्यमूलं
मृग्यं॥ विवाहवेदिमाहनारदः॥ हस्तोच्छ्रितांचतुर्हस्तैश्चतुरस्रांसमं
ततः॥ स्तंभैश्चतुर्भिःसुश्लक्ष्णैर्वामभागेस्वसद्मनः॥ विचित्रितांचित्रकुं
भैर्विविधैस्तोरणांकुरैः॥ एवंविधामारोहेन्मिथुनंसाग्निवेदिकमिति॥
इतिवेदिः॥ अथकन्यादानार्थंरात्रावपिस्नानमाहवृद्धयाज्ञवल्क्यः॥ ग्र
हणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषुच॥ स्नानंनैमित्तिकंज्ञेयंरात्रावपित
दिष्यते॥ विवाहेपिरात्रिमनुजानात्यत्रिः॥ मुख्योविवाहःपूर्वाह्णेमध्या
ह्नेचोत्तमोत्तमः॥ निशायांमध्यमःप्रोक्तस्त्वपराह्णेतुगर्हितइति॥ वि
वाहश्चकन्यापितरंप्रतिदानं॥ वरंप्रतिपाणिग्रहणादिकन्याभुक्त्वता
पिप्रातर्ग्रोह्येत्याहव्यासः॥ भुक्त्वासमुद्वहेत्कन्यांसावित्रीग्रहणंतथा।
उपोषितःसुतांदद्याद्दिनेतायद्विजायत्विति॥ सर्वेषुदानेषुप्राङ्मुखोदा
तोदङ्मुखःप्रतिगृहीता॥ कन्यादानउदङ्मुखोदाताप्राङ्मुखंसंप्रदान
मितिवक्ष्यते॥ दानमयूखे॥ मधुपर्कमाहाश्वलायनः॥ ऋत्विजोवृत्वाम
धुपर्कमाहरेत्स्नातकायोपस्थितायेतिउपस्थितायकन्याप्रतिग्रहार्थमा
गताय। अस्मिन्मधुपर्केगवालंभःकलौनकार्यः। पादप्रक्षालनेमधुपर्के
विशेषेणविशेषमाहाश्वलायनः॥ दक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यं
शूद्रायेति॥ अग्रेप्रथमंस्वंचवैश्यशूद्रयोरनियमः। ब्राह्मणग्रहणंद्विजो
पलक्षणमितिकेचित्॥ मधुपर्कस्यभोजनं॥ नारायणेननामांसोमधु
पर्कोभवतीतिसूत्रव्याख्यानेउक्तं॥ मांसस्यलोकेव्यंजनस्थानीयत्वा
त्तत्सहितोमधुपर्कोभोजनमिति। अयंचार्यशाखयाकार्यः। तदुक्तंपरि
शिष्टे॥ अर्च्यस्ययस्ययाशाखातच्छाखागृह्यचोदितः। मधुपर्कःप्रदात
व्योप्यन्यशाखेपिदातरीति। याज्ञिकास्तुज्योतिष्टोमादावन्यशाखीयो
पियच्छाखीयमार्त्विज्यंकरोतितच्छाखयाकुर्वंति॥ नत्वेसंप्रदायमात्रं॥
कन्यादानेतुदानमयूखेवक्ष्यते॥ अथवधूगृहप्रवेशः॥ मिहिरः॥ विवा
हस्यनिवृत्तिस्तुचतुर्थेहनिरात्रिषु॥ तासुनागबलिःकार्योविप्राशीर्वा
चनंतथा॥ नागानांहस्तिनांबलिःपूजा॥ विधिमाहपत्तपार्श्वः॥ चतुर्थे
दिवसेरात्रौलिखेन्नागान्सरोवरं॥ हिरण्यगर्भंतन्मध्येगंधपुष्पाक्षता
दिभिः॥ संपूज्याप्सरसश्चैवसोमगंधर्वपावकान्॥ संपूज्यवाश्वहस्त्या

द्वीनारोप्यस्वगृहंप्रति॥संवेशनादिकंकर्मअन्यथातुव्रजेद्द्वयं॥संवेशनं
गृहप्रवेशः॥कालदीपे॥शुभकालेगृहेप्राप्तौवर्द्धतेसंपदःसदा॥अस
त्कालेगृहप्राप्तौसर्वनाशोगृहेभवेत्॥नारदः॥आरभ्योद्वाहदिवसात्ष
ष्ठेवाप्यष्टमेदिने॥वधूप्रवेशःसंपत्त्यैदशमेथसमेदिने॥तथा॥समवर्षेस
मेमासिसमदिनारीगृहंव्रजेत्॥आयुष्यंहरतेभर्त्तुःसानारीमरणंव्रजेदि
ति॥तथा॥वधूप्रवेशःप्रथमेतृतीयेशुभप्रदःपंचमकेथवाब्दे॥द्विती
यकेवाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यादिति॥तथा॥ज्योतिः
प्रकाशे॥वामेशुक्रेनवोढायाःसुखंहानिश्चदक्षिणे॥धनंधान्यंचपृष्ठ
स्थेसर्वनाशःपुरःस्थिते॥नवोढायास्तुवैधव्यंयदुक्तंसंमुखेभृगौ॥न
देवंविबुधैर्ज्ञेयमन्यथातुद्विरागमेइति॥अन्यत्तुमुहूर्त्तादिदैवज्ञोदितं
ग्राह्यं॥मंडपोद्वासनकालःप्रयोगरत्ने॥अष्टमेदिवसेकुर्यान्मंडपोद्वास
नंबुधः॥षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ॥षष्ठंनेष्टमित्यर्थः॥वि
षममपिनेष्टंपंचमसप्तमेदिनेमुक्त्वाइतिमंडपोद्वासनं॥अथतृतीय
मानुषीविवाहनिषेधोमात्स्ये॥तृतीयांमानुषींनैवचतुर्थींयःसमुद्वहे
त्॥पुत्रपौत्रादिसंपन्नःकुटुंबीसाग्निकोन्वरः॥उद्वहेदितिसिद्ध्यर्थंतृ
तीयांनकदाचन॥मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं॥नश्यत्ये
वनसंदेहोगर्गस्यवचनंयथेति॥संग्रहे॥चतुर्थादिविवाहार्थंतृतीये
र्कंसमुद्वहेदिति॥अर्कविवाहप्रकारःशांतिमयूखेवक्ष्यते॥ज्येष्ठभ्रात
र्यकृतविवाहेकनिष्ठोनविवहेदित्युक्तं॥चतुर्विंशतिमते॥जीवत्पितरि
नादध्याद्धिताग्निःसनोयदि॥तथैवभ्रातरिज्येष्ठेनयजेन्नविवाहये
त्॥ज्येष्ठभ्रात्रात्वनुज्ञातःकुर्यादग्निपरिग्रहं॥अनुज्ञातोपिसन्मित्रान
दध्यान्मनुरब्रवीत्॥क्वचिददोषइत्याहकात्यायनः॥देशांतरस्थक्लीबै
कवृषणानसहोदरान्॥वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥ज
डमूकांधबधिरकुब्जवामनकुंडकान्॥अतिवृद्धानभार्यांश्चकृषिस
क्तान्नृपस्यच॥धनवृद्धिप्रसक्तांश्चकामतोऽकारिणस्तथा॥कुहकांस्त
स्करांश्चापिपरिविंदन्नदुष्यति॥अभार्यान्नैष्ठिकादीन्॥अन्यथादोष
इतिगम्यते॥यमलयोर्मध्येजन्मनैवज्यैष्ठ्यता॥केचिदाधानक्रमेणज्ये
ष्ठ्यंवर्णयंतःपश्चाज्जातस्यपूर्वमाधानंभवतीतितस्यैवज्येष्ठतामाहुः॥

॥तन्न॥आधानप्राथम्ये नज्येष्ठतायांमानाभावात्॥अन्यथापत्नीनांपू
र्वापरभावेनाधानेजातेउत्तराहितस्यप्रथमोत्पत्तौज्येष्ठतानस्यात्॥आ
धानेजन्मशब्दाभावाच्च॥अतएवाहमनुः॥यमयोश्चैवगर्भेषुजन्मतो
ज्येष्ठतामतेति॥मेधातिथिनापिजन्मतएवज्यैष्ठ्यमित्युक्तं अस्मिन्वि
षये॥तथाग्रेदिधिषूविषयेभूयान्प्रपंचःप्रायश्चित्तमयूखेनिरूपयिष्यते
॥पुनर्विवाहेग्निमाहकात्यायनः॥सदारोन्यान्पुनर्दारानुद्वोढुंकारणांतरा
त्॥यदीच्छेदग्निमान्कुर्वन्क्वहोमोस्यविधीयते॥स्वाग्नावेवभवेद्धोमोलौ
किकेनकदाचनेति॥इदंचाग्निसन्निधाने॥अग्निसन्निधानाभावेतुलौकि
केकृत्वाग्निद्वयसंसर्गंकुर्यात्॥संसर्गंचाहशौनकः॥अथाग्न्योर्गृह्ययोर्योगं
सपत्नीभेदजातयोः॥सहाधिकारसिध्यर्थमहंवक्ष्यामिशौनकः॥पृथक्
स्थंडिलयोरग्निंसमाधाययथाविधि॥तंत्रंकृत्वाज्यभागांतमग्न्याधाना
दिकंततः॥जुहुयात्पूर्वपत्न्यग्नौतयान्वारब्ध आहुतीः॥अग्निमीळेपुरो
हितंसूक्तेनत्ववर्चेनतुसमिध्येनंसमारोप्यायंतेयोनिरित्यृचा॥प्रत्यवरो
हेत्यनयाकनिष्ठाग्नौविधीयते॥आज्यभागांततंत्रादिकृत्वारभ्यनस
दितः॥समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धृतं॥चतुर्गृहीतेनैताभि
रृग्भिःषड्भिर्यथाक्रमं॥अग्नावग्निश्चरतीति अग्निनाग्निःसमिध्यते॥अ
स्तीदमितितिसृभिःपाहिनोअग्नएकया॥ततःस्विष्टकृदारभ्यहोमशेषं
समापयेत्॥गोयुग्मंदक्षिणादेयाश्रोत्रियायाहिताग्नये॥पत्न्योरेकायदि
मृतादग्ध्वातेनैवतांपुनः॥आदधीतान्ययासार्द्धमाधानविधिनागृहीति
॥इत्यग्निद्वयसंसर्गः॥अथसायंप्रातर्होमः॥तत्रसायंकालादारंभः॥त
त्कर्तृनाहाश्वलायनः॥पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रः
कुमार्यंतेवासीवेति॥दक्षः॥ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः
॥एतैरेवहुतंयत्तुतद्धुतंस्वयमेवत्विति॥एतैश्चयजमानस्यपत्न्यावा
अनुज्ञयातत्सन्निधौचहोतव्यंनान्यथापर्वणितुसायंहोमःस्वयमेवका
र्योनान्येन॥तत्रप्रादुष्करणकालमाहकात्यायनः॥हृद्यैतुशैलमप्राप्तेत
हृत्षड्भिरिहांगुलैः॥प्रादुष्करणमग्नीनांप्रातर्भासामदर्शने॥उक्तकाला
तिक्रमेव्याहृतिभिरेकाज्याहुतिः॥होमकालमाहमनुः॥लेखामात्रस्तुदृश्ये
तरश्मिभिस्तुसमन्वितः॥उदितंतंविजानीयात्तत्रहोमंप्रकल्पयेत्॥अनु

कल्पोपि॥प्रदोषांतोहोमकालः संगवांतःप्रातस्तमतिनीयचतुर्गृहीत
माज्यंजुहुयाद्व्याहृतिभिः।होमद्रव्याणिगृह्यपरिशिष्टे।।पयोदधिस
र्पिर्यवागूरोदनंतंडुलाःसोमस्तैलमापोव्रीहयोयवास्तिलाइतिहोम्या
निसंग्रहे।द्रवंहविःस्रुवेणैवपाणिनाकठिनंहविः॥अंगुल्यग्रैर्नहोतव्यं
नकृत्वांगुलिनोदनमिति॥आयतनंचोक्तं।अरत्निमात्रमग्न्यर्थेकार्यमा
यतनंबुधैः।पशीलमात्रमित्येकेतदभ्यासांतरंभवेदिति॥अपत्नीकोपि
पूर्वमृतायैपत्न्यैअर्द्धाग्निंदत्वाऽवशिष्टार्द्धाग्नौपूर्ववत्सायंप्रातर्होमंकु
र्यादिष्टिंतुनेति॥इतिनित्यहोमः॥अथस्त्रीधर्माः॥मनुः।बालयावायु
वत्यावावृद्धयावापियोषिता।।नस्वातंत्र्येणकर्त्तव्यंकिंचित्कार्यंगृहे
ष्वपि॥पित्राभर्त्रासुतैर्वापिनेच्छेद्विरहमात्मनः॥एषांहिविरहेणस्त्रीणां
गर्ह्येकुर्यादुभेकुले॥याज्ञवल्क्यः॥संयतोपस्करादक्षाहृष्टाव्ययपराङ्मु
खी॥कुर्याच्छ्वशुरयोःपादवंदनंभर्तृतत्परा॥नास्तिस्त्रीणांपृथग्यज्ञोन
व्रतंनाप्युपोषणं॥पतिंशुश्रूषतेनारीतेनस्वर्गेमहीयते॥पाणिग्राहस्य
साध्वीस्त्रीजीवतोवामृतस्यवा।।पतिलोकमभीप्संतीनाहितंकिंचिदा
चरेत्॥स्कान्दे॥प्रसुप्तंतुसुखासीनंरममाणंयदृच्छया॥आतुरेष्वपि
कार्येषुपतिंनोत्थापयेत्क्वचित्॥स्त्रीधर्मिणीत्रिरात्रंतुस्वमुखंनैवदर्शये
त्॥स्ववाक्यंश्रावयेन्नापियावत्स्नानाविशुद्ध्यति॥सुस्नाताभर्तृवदन
मीक्षेन्नान्यस्यकस्यचित्॥अथवामनसिध्यात्वापतिंभानुंविलोकयेत्
॥नरजक्यानकारुक्यानचश्रमणयापिच॥नचदुर्भगयावापिसखित्वं
कुरुतेतुसा॥भर्तृविद्वेषणीनारीनसंभाषेतकर्हिचित्॥तथा॥उक्ताप्रत्यु
त्तरंदद्यान्नारीक्रोधतत्परा॥साशुनीजायतेग्रामेसृगालीनिर्जनेवने॥प
तिंयाताडितुंचेच्छेत्साव्याघ्रीवृषदंशिकेति॥शंखः॥नानुक्त्वागृहान्निर्ग
च्छेन्नानुत्तरीयानत्वरितंव्रजेन्नपरपुरुषंभाषेतान्यत्रवणिक्प्रव्रजित
वृद्धवैद्येभ्योननाभिंदर्शयेदागुल्फाद्वासःपरिदध्यान्नस्तनौविवृतौकुर्या
न्नहसेदनपावृतंनभर्तारंतद्बंधून्वाद्विष्यात्॥मनुः॥तस्मात्सर्वंपरित्य
ज्यपतिमेकंसमर्चयेत्॥भुंक्तेभुक्तेपतौयातुह्यासीनावापिवासिते॥वि
निद्रेचविनिद्रायाप्रथमंप्रतिबुध्यते॥अनलंकृतमात्मानंपत्युर्नोदर्श
येत्क्वचित्॥आक्रुष्टावापिनाक्रोशेत्ताडितापिप्रसीदति।सेवतेभर्तुरुच्छि

ष्टमिष्टमन्नंफलादिकं॥ महाप्रसादइत्युक्तापतिदत्तंप्रतीच्छति॥ एतेपू
र्वोक्तानियमाविवाहोत्तरमेव॥ अथप्रोषितपतिकाधर्माः॥ याज्ञवल्क्यः
॥क्रीडाशरीरसंस्कारंसमाजोत्सवदर्शनं॥ हास्यंपरगृहेयानंत्यजेत्प्रोषि
तभर्तृका॥ तथाप्रोषितेमलिनाकृशेति॥ अथविधवाधर्माः॥ मनुः॥ कामंतु
क्षपयेद्देहंपुष्पमूलफलैःशुभैः॥ नतुनामापिगृह्णीयात्पत्यौप्रेतेपरस्य
तु॥ आसीतामरणात्क्षांतानियताब्रह्मचारिणी॥ तथा॥ विधवाकबरीबं
धोभर्तृबंधायजायते॥ शिरसोवपनंतस्मात्कार्यंविधवयासदा॥ एका
हारःसदाकार्योनद्वितीयःकदाचन॥ कृच्छ्रंपराकंकुर्याच्चतप्तकृच्छ्रम
थापिवा॥ यवान्नेनफलाहारैःशाकाहारैःपयोव्रतैः॥ प्राणयात्रांप्रकुर्वी
तयावत्प्राणःस्वयंव्रजेत्॥ पर्यंकशायिनीनारीविधवापातयेत्पतिं॥ तस्मा
द्भूशयनंकार्यंपतिसौख्यसमीहया॥ नैवांगोद्वर्तनाभ्यंगंस्त्रियाविधव
याक्वचित्॥ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः॥ तर्पणंपुत्रपौत्राभा
वे॥ नाधिरोहेदनड्वाहंप्राणैःकंठगतैरपि॥ कंचुकंनपरीदध्याद्वासोनवि
कृतंवसेत्॥ एवंधर्मसमायुक्ताविधवापिपतिव्रता॥ पतिलोकमवाप्नो
तिनभवेत्क्वापिदुःखितेति॥ यत्तुब्रह्मचर्यंवासहवैकल्पिकंसहगमन
मुक्तंतद्विस्तरेणशुद्धिमयूखेप्रपंचयिष्यामः॥ इतिस्त्रीधर्माः॥ अथविवा
होत्तरंपंचयज्ञानुष्ठानमुक्तमाचारमयूखेदर्शयिष्यामः॥ अष्टकादिश्रा
द्धज्ञानंश्राद्धमयूखे॥ सप्तपाकसंस्थानित्याः॥ आधानादीनिनित्यानि॥
यथाहवसिष्ठः॥ अवश्यंब्राह्मणोग्नीनादधीतअग्निहोत्रदर्शपूर्णमासा
ग्रयणेष्टिपशुसोमांश्चयजते॥ याज्ञवल्क्योपि॥ प्रतिसंवत्सरंसोमःपशुः
प्रत्ययनंतथा॥ कर्तव्याग्रयणेष्टिश्चचातुर्मास्यानिचैवहीति॥ तथानित्या
निकर्माण्युक्त्वाबौधायनेनोक्तं॥ तस्मात्कंदैःफलैर्मूलैर्मधुनाज्यरसोद्ग
वा॥ नित्यंनित्यानिकुर्वीतनतुनित्यानिलोपयेत्॥ यानितुत्रैवार्षिकान्नोयः
सहिसोमंपिबेद्द्विजः॥ प्राक्सौमिकीःक्रियाःकुर्याद्यस्यान्नंवार्षिकंभवेत्
॥ तथा॥ पुण्यान्यन्यानिकुर्वीतश्रद्दधानोजितेंद्रियः॥ नत्वल्पदक्षिणैर्य
ज्ञैर्यजेतायकथंचन॥ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्त्वृत्विजं॥ आत्मानं
दक्षिणाहीनोनास्तियज्ञसमोरिपुरित्यादीनितानिकाम्यपराणि॥ नित्ये
षुयथाशक्त्यंगहीनेनाधिकारस्यषष्ठेस्थितत्वात्॥ कंदैर्मूलैरित्यादिच

संगच्छतेनसख्वसिदेवताभिशब्दःक्षत्रियाणांप्रतिनिधिर्नास्तितथाःशु
पादेयानांकालादीनांनत्यागइत्यादिस्थितंषष्ठे॥इतिसंस्काराः॥ब्रा
ह्मणस्यचतस्रोभार्याःक्षत्रियस्यतिस्रोवैश्यस्यद्वेशूद्रस्यैकेतिस्थिते॥
तत्रसमानजातिभ्यांपितृभ्यांजातानामपत्यानांसमानजातित्वंमातापि
त्रोर्वैजात्याज्जात्यंतरंचभवतीतिस्पष्टं॥लोकेनाजातीराहयाज्ञव
ल्क्यः॥सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः॥अनिंद्येषुविवाहेषु
पुत्राःसंतानवर्द्धनाः॥विप्रान्मूर्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां
॥अंबष्ठःशूद्राज्जातोनिषादःपारशवोपिवा॥एकस्यैवनामद्वयं॥वैश्या
शूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ॥वैश्यात्तुकरणःशूद्र्यांवि
नास्वेषविधिःस्मृतः॥प्रतिलोमजाअप्युक्तास्तेनैव॥ब्राह्मण्यांक्षत्रि
यात्सूतोवैश्याद्वैदेहकस्तथा॥शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृ
तः॥क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच॥शूद्रादायोगवंवैश्या
जनयामासवैसुतं॥माहिष्येणकरण्यांतुरथकारःप्रजायते॥असत्सं
तस्तुविज्ञेयाःप्रतिलोमानुलोमजाइति॥प्रतिलोमाअसंतोऽनुलोमाः
संतइत्यर्थः॥एतेषांसंकीर्णसंकरभेदादिकमनुपयोगाद्विस्तृतिभयाच्च
नोक्तं॥एतासांचजातीनामंगत्वाद्विजातिस्थितंचान्नेके॥क्वचिज्जाते
शास्त्रगम्यतानि॥यथोक्तंयाज्ञवल्क्येन॥जात्युत्कर्षोयुगेज्ञेयःसप्तमे
पंचमेपिवा॥व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरमिति॥अस्यार्थो
मिताक्षरायांसप्तमेपिवाशब्दात्षष्ठेपंचमेयुगेजन्मनिजातेरुत्कर्षःपू
र्वजात्यपगमोन्यजातिप्राप्तिश्चब्राह्मणेनोढेत्येवंपरंपरयाषष्ठंब्राह्म
णंजनयति॥एवमुग्राक्षत्रियोढामाहिष्यायथाष्टमंषष्ठंपंचमंक्षत्रि
यंजनयति॥तथाकरणीयोढापंचमंवैश्यमिति॥इयंचदिक्॥तद्यथामू
र्द्धावसिक्तेनक्षत्रियोढातत्पुत्रेणापिक्षत्रियेत्येवंक्रमेणपंचमंक्षत्रियं
जनयति॥एवमंबष्ठेनोढावैश्यातत्पुत्रेणापिसत्येवंक्रमेणषष्ठंवैश्यंज
नयति॥एवंनिषादेनशूद्रोढातत्पुत्रेणापिशूद्रेत्येवंक्रमेणसप्तमेशू
द्रंजनयति॥एवंमूर्द्धावसिक्तादिष्वपियोज्यं॥तथाकर्मणांस्वस्थाना
मपकृष्टकर्मणांव्यत्ययेसाम्यंयज्जातीयवृत्तिपरिग्रहस्तज्जातिभवती
त्यर्थः॥तद्यथाब्राह्मणःस्ववृत्त्याजीवन्नापदिक्षत्रवृत्तिंकरोति॥गता

सामप्याप द्यतानजहाति। तस्युत्रोप्येवमितिक्रमेणपंचमःक्षत्रियएवजायः ते॥ तथापि आपद्विवैश्यवृत्त्याजीवत्तस्यांगता यामपितांवृत्तिंनजहात्ये वंतत्पुत्रोपीत्येवंक्रमेणषष्ठेवैश्यएवजायते॥ एवंशूद्रवृत्त्यापिजीवतः एवंक्षत्रियवैश्ययोरपियोज्यं॥ अस्मिन्व्याख्यानेपिशब्दस्यषष्ठपर त्वमूलंमृग्यं। एतेषांवृत्तयस्तदुपयोगान्नोक्ताः॥ इतिवर्णजातिविवेकः ॥ अथासाधारणावर्णधर्माः॥ तत्रब्राह्मणस्यषट्कर्माणियजनाध्य यनदानयाजनाध्यापनप्रतिग्रहाख्यानि। तेषुत्रीणिवृत्त्यर्थानि॥ यथा हमनुः॥ षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका॥ याजनाध्याप नेचैवविशुद्धाच्चप्रतिग्रहइति॥ यजनेसत्रंतत्रस्यष्टं। याजनंकेषांचि त्प्रतिषिद्धं॥ यथाहदेवलः॥ यःशूद्रान्पतितांश्चापियाजयेदर्थकारणा त्॥ याजिनोवापुनस्ताभ्यांब्राह्मणोयाज्ययाजकइति॥ सुमंतुरप्यया ज्यानाह॥ अभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिवस्त्रकार तैलिकचाक्रिकध्वजिसुवर्णकारवर्मकारवेधकिगणगणगणिकसौनि कव्याधनिषादरजकबुरुडचर्मकाराअभोज्यान्नाअप्रतिग्राह्याअया ज्याश्चेति॥ तथाभिचारयाजनमपिप्रतिषिद्धंयथाहमनुः॥ ब्रात्यानांया जनंकृत्वापरेषामंत्यकर्मच। अभिचारमहीनंचत्रिभिःकृच्छ्रैर्व्यपोहति॥ ... जनंकृत्वाचनेपूर्वमुक्ते॥ अथब्राह्मणस्यापत्कल्पः॥ तत्रपूर्वोक्तवृत्ति त्रयासंभवेमनुः॥ अजीवंस्तुस्वधर्मेणब्राह्मणःस्वेनकर्मणा॥ जीवेत्क्ष त्रियधर्मेणसह्यस्यप्रत्यनंतरइति॥ पुनःस्वकर्मग्रहणंविगुणकर्मसंग्र हार्थं। एतदुक्तंभवति॥ यथोक्तैःप्रतिग्रहादिभिरजीवन्दुःप्रतिग्रहादिक मपिकुर्यात्॥ नत्वन्यवृत्तिं॥ यथोक्तंभगवता॥ श्रेयान्स्वधर्मोविगुणः परधर्मात्स्वनुष्ठितादिति॥ मनुरपि॥ वरंस्वधर्मोविगुणोनपारक्यंन॥ वि शोवाप्यापदिद्विजइति॥ वैश्यवृत्तावपिकृषिःकारणीयास्वयंनकार्या ।यथोक्तंबृहस्पतिना॥ कुसीदकृषिवाणिज्यंप्रकुर्वीतास्वयंकृतं॥ आ पत्कालेस्वयंकुर्वन्नैवसायुज्यतेद्विजइति॥ तत्रापिनीलीकृषिर्वर्ज्या॥ नीलीकर्षणकर्तातुचंडालसदृशोहिसइत्यापस्तंबेननिंदितत्वात्॥ कृषिधर्मोन्यत्रवक्ष्यामः॥ वाणिज्येपिविशेषमाहयाज्ञवल्क्यः॥ फलोपल क्षौमसोममनुष्यापूपवीरुधः॥ तिलौदनरससारान्दधिक्षीरंघृतंज लं॥ रसासवमधूच्छिष्टमधुलाक्षाःसबर्हिषः॥ मृच्चर्मपुष्पकुतपकेश

तत्रविषस्थितीः॥कौशेयनीलीलवणमांसैकशफसीसकान्॥शाकार्द्रौ
षधिपिण्याकपशुगंधांस्तथैवच॥वैश्यवृत्त्यापिजीवन्नोविक्रीणीतक
दाचनेति॥मनुरपि॥अश्मनोलवणंचैवपशवोयेचमानुषाः॥सर्वंचतां
तवंरक्तंशाणक्षौमाविकानिच॥अपिचेत्स्युररक्तानिफलमूलेतथौष
धीः॥अपःशस्त्रंविषंमांसंसोमंगंधांश्चसर्वशः॥क्षीरंक्षौद्रंदधिघृतं
तैलंमधुगुडंकुशान्॥आरण्यांश्चपशून्सर्वान्दंष्ट्रिणश्चवयांसिच॥
मद्यंनीलींचलाक्षांचसर्वांश्चैकशफांस्तथा॥नविक्रीणीयादितिशेषः
।तथा।भोजनाभ्यंजनाद्दानाद्यदन्यत्कुरुतेतिलैः॥कृमिभूतःश्वविष्ठायांपितृ
भिःसहमज्जति॥सद्यःपततिमांसेनलाक्षयालवणेनच॥त्र्यहेणशूद्रो
भवतिब्राह्मणःक्षीरविक्रयात्॥इतरेषांतुपण्यानांविक्रयादिहकामतः॥
ब्राह्मणःसप्तरात्रेणवैश्यभावंनियच्छति॥इतरेषांपूर्वोक्तानांक्षीरव्यति
रिक्तानां॥इदमनापदि॥रसेषुविशेषमाहमनुरेव॥रसारसैर्निमातव्यान
त्वेवलवणंरसैः॥कृतान्नंचाकृतान्नेनतिलाधान्येनतत्समाइति॥वाणि
ज्यमप्यस्यपंकृतमित्याहगौतमः॥वाणिज्यंकृषिवदेवेति अत्यंतापदि
तुस्वयमपिकुर्यात्॥सर्वासंभवेसेवामप्यनुजानातिप्रचेताः॥महदाप
द्गतोविप्रःक्षत्रसेवांसमाश्रयेत्॥शूद्रसेवानकर्त्तव्याप्राणैःकंठगतैर
पि॥शूद्रसेवायांप्रायश्चित्ताम्नानादत्यंतापदिकार्येत्येवंगम्यते॥तथा
प्यत्यंतापदिचौर्यमनुजानातियाज्ञवल्क्यः॥बुभुक्षितस्त्र्यहंस्थित्वा
धान्यमब्राह्मणाद्धरेत्॥प्रतिगृह्यतदाख्येयमभियुक्तेनधर्मतः॥अब्रा
ह्मणादितिशूद्राद्धरेत्तदलाभेक्षत्रियादितिनिबंधकृतः॥मनुः॥द्विजोध्व
गःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके॥आददानःपरक्षेत्रान्नदंडंदातुमर्हति
॥तथैवसप्तमेभक्तेभक्तानिषडनश्नता॥अश्वस्तनविधानेनहर्त्तव्यंहीन
कर्मणइति॥राजानंप्रत्याहमनुः॥तस्यवृत्तंकुलंशीलंश्रुतमध्ययनंतथा॥
ज्ञात्वाराजाकुटुंबंचधर्म्यांवृत्तिंप्रकल्पयेदिति॥एवंक्षत्रियस्यापदिवैश्य
वृत्तिः।शूद्रवृत्तिस्तदसंभवे॥वैश्यस्यापदिशूद्रवृत्तिःक्षत्रवृत्तिर्वानतु
ब्राह्मणवृत्तिः।शूद्रस्यापदिवैश्यवृत्तिस्तदसंभवेक्षत्रवृत्तिः।नतुविप्र
वृत्तिः।यथोक्तं।उत्कृष्टंवापकृष्टंवातयोःकर्मनविद्यते॥मध्यमेकर्मणीहि
त्वासर्वसाधारणेहिते॥एवंयथाकथंचिदप्यापदंहित्वाप्रायश्चित्तंकुर्यात्

यथोक्तं॥ याज्ञवल्क्येन॥ निस्तीर्य्यैनामथात्मानं पावयित्वान्यसेत्पथि॥
पराशरोपि॥ अशक्तोनिंदितं कुर्यात्प्रायश्चित्तं पुनश्चरेदिति॥ अतो ज्ञाय
तेनुज्ञानेपि ईषद्दोषोस्त्येव॥ यत्तु॥ आपद्गतः संप्रगृण्हन् भुंजानो वा यत
स्ततः॥ नलिप्येतैनसा विप्रो ज्वलनार्कसमोहि स इति तन्न सर्वथा दोषा
भावप्रतिपादनपरं किंतु सर्वतएवात्मानं गोपयेदिति गोपनस्य पापाभा
वार्थत्वादेनावश्यकत्वार्थं अग्रेप्रायश्चित्ताम्नानात्॥ एतावानयं विशे
षो यदनापदि कृतानां निंदितानां कर्मणां बहुप्रायश्चित्तमापदित्वल्प
मिति॥ इत्यापत्कल्पनिरूपणं॥ क्षत्रियधर्मा अपि गीतायां॥ शौर्यं तेजो
धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावज
मिति॥ अन्येच उक्ता नीतिमयूखादौ विस्तरेण वक्ष्यंते च॥ वैश्यधर्मा उक्ता
याज्ञवल्क्येन॥ कुसीदकृषिवाणिज्यं पाशुपाल्यं विशः स्मृतमिति॥ भा
रते वैश्यवाक्यं॥ यद्ददामि न तन्न्यूनं यद्गृण्हामि न चाधिकं॥ विक्रीणामि र
सांश्चाहं मद्यवर्जं महायशेति॥ कृष्युपयुक्तहले विशेषमाह हारीतः॥
अष्टगवं धर्म्यहलं षड्गवं जीवितार्थिनां॥ चतुर्गवं नृशंसानां द्विगवं ब्र
ह्मघातिनामिति॥ द्विगवं ब्रह्मघातवन्निंदितमित्यर्थः॥ इदं च कठिनभू
मिविषयत्वेन योज्यं॥ योज्यवृषान् पराशर आह॥ स्थिरांगं नीरुजं तृप्तं
सुनर्दं षंढवर्जितं॥ वाहयेद्दिवसस्यार्द्धं पश्चात्स्नानं समाचरेत्॥ सुनर्दं
श्रांतः॥ स्नानं वृषाणां॥ वर्ज्यानाह स एव॥ क्षुधितं तृषितं श्रांतं बलीवर्दं
न योजयेत्॥ हीनांगं व्याधितं क्लीबं वृषं विप्रो न वाहयेदिति॥ विप्रइत्यु
पलक्षणं॥ भारते॥ वाहमेद्धुं कृतेनैव शास्त्रप्रावासमग्रया॥ नदंडेन न य
ष्ट्या वा न पाशेन न दारुणा॥ खलयज्ञमाह पराशरः॥ वृक्षांश्छित्वा महीं भि
त्वा हत्वा च कृमिकीटकान्॥ कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते॥ ख
लयज्ञः खलस्थधान्यदानं॥ धान्यभाग उक्तः शैवपुराणे॥ राज्ञे दत्वा तु
षड्भागं देवानां चैकविंशकं॥ विप्राणां त्रिंशकं भागं सर्वपापैः प्रमुच्यते॥ दे
वग्रहणं पितॄणामुपलक्षणमिति धर्मप्रकाशे॥ एतद्दाने दोष उक्तस्तत्रै
व॥ अदत्वा कर्षको दैविपस्तु धान्यं प्रवेशयेत्॥ मरुदेशे भवेद्वृक्षः सपुष्पः
फलवर्जित इति॥ एतादृशस्य फलमुक्तं भारते॥ वणिग्धर्ममसुंचन्वै देव
ब्राह्मणपूजकः॥ स वणिक् स्वर्गमाप्नोति पूज्यमानोप्सरोगणैः॥ वैश्यस्य भ

वत्स्येवेति॥ इति वैश्यधर्माः॥ शूद्रधर्ममाह मनुः॥ विप्रसेवैव शूद्रस्य वि॰ शिष्टं कर्म कथ्यत इति विष्णुपुराणे॥ द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान्॥ निजान्जयति वै लोकान्शूद्रो धन्यतरः स्मृत इति॥ द्विजेष्व॰ शूद्रवृत्तिः कार्येत्युक्तं भारते॥ यश्चकश्चिद्विजातीनां शूद्रः शुश्रूषुराव्रजेत्॥ कल्प्या तस्य वृत्तिस्तु हृष्टेनिधर्मविदोजनाः॥ गौतमः॥ जीर्णान्युपानच्छत्रवासांसि कूर्चानीति देयानीति शेषः॥ कूर्चं तृणमयमासनं॥ उपलक्षणं चैतत्॥ अतश्चापेक्षितं जीर्णं शय्याकंबलाद्यपि देयं॥ वृत्त्यंतरमाह याज्ञवल्क्यः॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत्॥ शिल्पैश्च विविधैर्जीवेद्द्विजातिहितमाचरन्निति॥ शूद्रस्य वाणिज्ये प्रसक्ते पूर्वोक्तानां फलोपलादीनां विक्रयेन दोषः॥ लवणं दधिनक्तं च तैलं दधि घृतं पयः॥ न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयमिति वृहत्पराशरोक्तेः॥ क्वचिद्विशेषमाह स एव॥ विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणं॥ कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥ कपिलाक्षीरपानेन ब्राह्मणीगमनेन च॥ वेदाक्षरविचारेण शूद्रश्चांडालतां व्रजेदिति॥ एवं च मद्यमांसातिरिक्तं विक्रयमिति॥ पुराणादिश्रवणे शूद्रस्याधिकारो नाध्ययने॥ तथा च भारते॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा॥ तेन भारतमाख्यानं मुनिना कृपया कृतं॥ श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रत इति॥ शूद्रं प्रति विशेषमाहांगिराः॥ तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितं॥ प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति॥ स्वयं कर्तृकयोर्जपहोमयोर्निषेधः॥ अतो ब्राह्मणेन जपहोमेवा कारिते न दोषः॥ तदुक्तं धर्मप्रकाशे धर्मविवृतौ॥ उपवासो व्रतं होमस्तीर्थस्नानजपादिकं॥ विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति॥ शूद्रस्य पंचगव्याशनमाह पराशरः॥ स्त्रीशूद्रस्य विशुद्ध्यर्थं प्राजापत्यं समाचरेत्॥ पंचगव्यं तु कुर्वीत स्नात्वा पीत्वा शुचिर्भवेदिति॥ पत्रिणोक्तं॥ पंचगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्॥ उभौ तौ पापकर्माणौ पूयारब्धे नरके वसेदिति॥ तद्विकल्पार्थमिति केचित्तत्प्रायश्चित्तांगं पंचगव्यप्राशनं गमनं तु नेति व्यवस्थेति धर्मप्रकाशे॥ युक्तं तु कलौ पाराशराः स्मृतिरित्यनेनान्यस्मृतिविरोधे कलौ पराशरस्मृतिर्बलीयसीत्युच्यते॥ अ

तःकलौप्राशनमेव॥युगांतरेतुविकल्पइति॥शूद्रस्यसर्वसंस्कारप्रा
प्तौकेषांचिद्बाधः॥तत्रगर्भाधानप्रभृत्यन्नप्राशनांताःसंस्काराःशूद्रस्य
भवंति।यत्तुब्राह्मणक्षत्रियवैश्यानांगर्भाधानसीमंतोन्नयनजातकर्म
नामकरणान्नप्राशनचूडोपनयनव्रतचर्याध्ययनसमावर्त्तनविवाह
यज्ञदानानिसमानानीतिसुमंतुवाक्यं॥तत्त्रयाणांमंत्रवत्संस्कारंन
शूद्रपरिसंख्यार्थं॥तथासतितस्यविवाहाप्रसक्तेः।चूडाकरणंतु।चू
डाकर्मद्विजातीनांसर्वेषामेवधर्मतइतिमनुवचनेद्विजातिग्रहणात्
शूद्रस्यनेतिमेधातिथिः।अपरार्कस्तु।चूडाकरणंमंत्रसहितंनभवती
त्याह॥वसिष्ठस्तुस्पष्टंविकल्पमाह॥परिचर्यातुशूद्रस्यानियतःकेश
वेष इति॥अस्यार्थोधर्मप्रकाशे॥केशवेषएकाशिखासोऽनियतोवै
कल्पिकः॥तस्माच्छिखामात्रधारणंमुंडनंवेत्यर्थइति॥उपनयनं
त्वध्ययनाभावान्नास्ति॥मनुरपि॥चतुर्थएकजातिर्जननंयस्येत्यर्थः
॥शूद्रस्यपंचमहायज्ञमंत्रमाहयाज्ञवल्क्यः॥नमस्कारेणमंत्रेणपं
चयज्ञान्नहापयेदिति॥स्वाहास्थानेनमःशब्दप्रयोक्तव्यइत्यर्थः
देवताभ्यःपितृभ्यश्चेतिवानमस्कारमंत्रइतिविज्ञानेश्वरः।भारतेतु
॥स्वाहाकारोनमस्कारोमंत्रःशूद्रेविधीयतइतिस्वाहाशब्दस्यापि
विधानाद्विकल्पः॥अत्रचशूद्रावाजसनेयिनइतिवसिष्ठवाक्याद्या
नितेषांकर्माणितानिकातीयसूत्रानुसारेणकार्याणीति।वैश्वदेवा
द्यैल्लौकिकाग्निर्द्विपः॥तथाशूद्रस्यागमोक्तादीक्षापूजाचभवति।वरा
हपुराणेत्रैवर्णिकानांदीक्षाविधिरुक्त्वा॥शूद्रस्यापिप्रवक्ष्यामिमद्भ
क्तस्यवरांगने॥यांतुदीक्षांसमासाद्यमुच्यतेसर्वकिल्बिषैरित्युक्त
त्वात्॥सूतसंहितायामपित्रैवर्णिकानांमंत्रपूजाद्युक्त्वासन्यासिनां
प्र णवेनपूजामुक्त्वा।नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते॥शिव
मंत्रेणशूद्राणामेवंपूजाप्रकीर्त्तितेत्युक्तं॥तत्रैव॥शूद्रःकर्मरतस्ते
नस्पृश्यमानोद्विजन्मना॥दृष्ट्वाम्यहंचसुतरांपूज्यमानश्चसुंदरि।व
र्णत्रयस्यशुश्रूषांशुचिःशूद्रःकरोतियः॥स्वयंवापिदीक्षयेत्सूर्यमं
डले॥आराध्यदेवतांसूर्यमंडलेत्वयापूज्यावेत्युपदिश्यदीक्षयेदित्य
र्थः।वराहपुराणे॥ब्राह्मणक्षत्रियविशांपंचरात्रंविधीयते॥शूद्रादीनां

चतच्छ्रोत्रपदवीमुपयास्यतीतिपंचरात्रश्रवणविधानाच्चसौरवैष्णवशै
वशाक्तवैनायकमंत्रेष्वधिकारःसिद्धः॥यत्तुपूर्वस्मृतसंहितायांपूजनं
स्पर्शनंचोक्तंतत्स्वकृतपार्थिवादिविषयं॥स्थावरेस्फाटिके॥केशवंवा
शिवंवापिस्पृष्ट्वानरकमश्नुतइतिनिषेधात्॥दीक्षितानांस्थावरेब्रा
ह्मणद्वारापूजाभवतीति॥विशेषस्त्वाचारमयूखेवक्ष्यते॥तथाशू
द्रस्यज्ञानेधिकारीमहाभारते॥श्राव्यंज्ञानंब्राह्मणात्क्षत्रियाद्वावैश्याः
शूद्राअपिनीचाअभीक्ष्णं॥श्रद्धातव्यंश्रद्दधानेननित्यंतंश्रद्धातुंजन्म
गृह्याविशेषामिति॥यत्तूत्तरमीमांसायांकपशूद्राधिकरणेशूद्रस्यब्र
ह्मविद्यानधिकारउक्तःसत्रैवर्णिकादिवदुपनिषच्छ्रवणादिनानभव
तीत्येवंपरः।पुराणादिश्रवणेनतुब्रह्मज्ञानंकेनवार्यते॥तेनसर्वैर्ब्र
ह्मणउत्सन्नंब्रह्मण्यध्यस्तंमिथ्याब्रह्मैवसत्यमित्येवंरूपेणनिदि
ध्यासनेनज्ञानंसंपादनीयं।अतएवगीतायां॥मामुपाश्रित्यकौंतेय
येपिस्युःपापयोनयः॥स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगति
मित्युक्तं॥तथाशूद्रेणक्रियमाणेश्राद्धेब्राह्मणेनमंत्राःपठनीयाः॥
अमंत्रस्यतुशूद्रस्यविप्रामंत्रेणगृण्हतइतिवाराहोक्तेः॥यत्तुमात्स्ये
॥शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाततइति॥तत्स्वयंमंत्रप्रयोगेनक
र्तव्यइत्येवंपरं॥सर्वश्राद्धानिवामेनभवेति॥शूद्रःकुर्यात्सदैवही
त्युक्तेः॥यत्तुवाराहेश्राद्धंप्रकृत्य।त्रिषुवर्णेषुकर्त्तव्यंपाकभोजनमे
वतु॥शुश्रूषामभिपन्नानांशूद्राणांचवराननेइतिपाकश्राद्धमुक्तंत
च्छूद्राणांद्विजोत्पन्नविषयमितिकेचित्॥युक्तंतुतस्मिन्शूद्रत्वाभा
वाच्छूद्राश्चपा ककर्त्तारइत्यापस्तंबोक्तपाककर्तृगोपालादिसच्छू
द्रपरमिति॥तच्चकलियुगातिरिक्तयुगविषयमितिवक्ष्यते॥यत्तुभ
विष्यत्पुराणे॥आवाहनादिकर्तव्यंयथाशूद्रेणतच्छृणु॥देवानां
देवनाम्नातुपितॄणांनामगोत्रतः॥पिंडांश्चनिर्वपेद्वीरनामतोगोत्र
तस्तथेतिशूद्राणांगोत्रमुक्तंतत्रकेचिद्वदंति॥तस्मादाहुःसर्वाःप्र
जाःकाश्यप्यइतिसामान्यदर्शनात्सर्वशूद्राणांकाश्यपंगोत्रं॥तस्य
चश्राद्धएवोत्कीर्त्तनंनान्यत्रयावद्वचनंवाचनिकमितिन्यायात्॥अन
थासर्वशूद्राणामेकगोत्रत्वाद्विवाहःप्रसज्येतेति।अन्येतुमुख्यशूद्र

स्यसमर्थ्येन्यतमापत्यत्वाभावाच्छूद्रायामुत्पन्नः पारशवोगृह्यतइ
त्याहुः। पुत्रंतुब्राह्मणेनोत्पादितः पारसवस्तेनशूद्रोढातदुत्पन्नेनपु
नः शूद्रोढेत्येवंसप्तमेशूद्रोभवति॥ तस्यपरंपरयासप्तर्ष्यन्यतमाप
त्यत्वेनगोत्रसत्वात्तत्सरमेवेति।। अन्येशूद्रधर्माआशौचापवादस्त
त्रतत्रवक्ष्यंतेशांतिकादावप्यधिकारः शांतिमयूखेस्थापयिष्यते॥
अन्येच॥अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः॥दानंदमोदया
क्षांतिः सर्वेषांधर्मसाधनमितिसाधारणधर्माअपिज्ञेयाः॥इतिशूद्र
धर्माः। अथाश्रमधर्माः। तत्रब्रह्मचारिधर्माउक्ताः॥गृहस्थोद्विविधउ
क्तोदेवलेन॥द्विविधोगृहस्थोयायावरः शालीनश्च॥ तयोर्यायावरः प्र
वरोयाजनाध्यापनप्रतिग्रहवर्जनादिति॥तस्यजीवनोपायमाहयाज्ञ
वल्क्यः॥जीवेद्वापिशिलोंछेनेति॥ गृहीतधान्येक्षेत्रेपतितमंजरीग्रह
णंउंछं॥ धान्यस्यसंचयउक्तस्तेनैव॥कुसूलकुंभीधान्योवात्र्याहिको
ऽश्वस्तनोपिवेति॥स्वकुटुंबपोषणपरिमितेद्वादशदिनपर्यायमन्नंयः
संगृण्हातिसकुसूलधान्यः॥षड्दिनपर्याप्तसंगृहीतः कुंभीधान्यः।
त्र्याहिकः। श्वस्तनोस्पष्टो॥एषांमध्येपरःपरःश्रेष्ठः॥शालीनमाहदेव
लः॥षट्कर्माधिष्ठितःश्रेष्ठचतुष्पदगृहग्रामधनधान्ययुक्तोलोका
नुवर्तीशालीनइति॥सचतुर्विधः॥यथोक्तंमनुना॥षट्कर्मैकोभव
त्येषांत्रिभिरन्यः प्रवर्त्तते॥द्वाभ्यामन्यश्चतुर्थस्तुब्रह्मसत्रेणजीवती
ति॥अस्यार्थः॥कश्चिद्याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपा
लैःषड्भिर्जीवति॥अन्यस्त्रिभिः। प्रतिग्रहाध्यापनयाजनैः॥तृतीयो
द्वाभ्यांयाजनाध्यापनाभ्यांचतुर्थस्त्वध्यापनेनैवेति॥एतेष्वपिपरः
परःश्रेष्ठः॥अन्येगृहस्थधर्माउक्तावक्ष्यंतेच॥इतिगृहस्थधर्माः।
तृतीयाश्र मंमाहयाज्ञवल्क्यः॥वानप्रस्थोब्रह्मचारीतदारण्यंस
माश्रयेदिति॥सुतनिक्षेपेपारिपत्न्यांविद्यमानायां। तत्रकृत्यमाहम
नुः॥वैतानिकंचजुहुयादग्निहोत्रंयथाविधि॥दर्शप्रभृदात्मवान्। मनुः
।संत्यजग्राम्यमाहारंसर्वंचैवपरिछदमिति॥अन्नसंचयमाहयाज्ञव
ल्क्यः। अन्होमासस्यषण्णांवातथासंवत्सरस्यवा॥अर्थस्यसंचयंकु
र्यात्कृतमाश्वयुजेत्यजेत्॥ दांतस्त्रिषवणस्नायीति॥वृत्तश्चप्रतिग्र

हात्॥स्वाध्यायवान्दानशीलःसर्वसत्वहितेरतः॥दंतोलूखलिकः
कालपक्वाशीवाश्मकुट्टकः॥श्रौतस्मार्त्तफलस्नेहैःकर्मकुर्यात्क्रिया
स्तथा॥क्रियाःव्रतादिक्रियाअंजनादयः॥तथाचांद्रायणैर्नयेत्कालंकृ
च्छ्रैर्वावर्तयेत्सदा॥पक्षेगतेवाप्यश्नीयान्मासेवाऽहनिवागते॥स्व
प्याद्भूमौशुचीरात्रौदिवसंप्रपदैर्नयेत्॥स्थानासनविहारैर्वायोगा
भ्यासेनवातथा॥रात्रावपिदिवसव्यावृत्यर्थं॥प्रपदैरटनैः॥ग्रीष्मेपं
चाग्निमध्यस्थोवर्षासुस्थंडिलेशयः॥पंचाग्निप्रकारश्चतुर्दिक्षुअग्न
यःएकःसूर्यइतिपंच॥अन्यत्रद्वादशाग्निप्रकारोपि॥तद्यथा॥स्वस्य
परितएकादशाग्न्यायतनानि॥एकःसूर्यश्चेतिस्थंडिलेशयइति॥
आवरणरहितेदेशेस्थेयमित्यर्थः॥शयनमुपलक्षणं॥तेनोपवेशनाद्य
पिग्राह्यं॥आर्द्रवासास्तुहेमंतेशक्त्यावापितपश्चरेत्॥कंटकैर्यश्चतुद
तिचंदनैर्यश्चलिंपति॥अक्रुद्धोपरितुष्टश्चसमस्तस्यचतस्यच॥पूर्व
वन्याहारतोक्ता॥इदानींग्रामादाहृत्यापिआहारंकुर्यादित्याहसए
व॥ग्रामादाहृत्यवाग्रासानष्टौभुंजीतवाग्यतः॥वायुभक्षःप्रागुदीचीं
गच्छेद्वावर्ष्मसंक्षयादिति॥प्रागुदीचीऐशानी॥इतिवानप्रस्थधर्माः॥सं
न्यासमाहयाज्ञवल्क्यः॥वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणां॥प्रा
जापत्यांतदंतेतानग्नीनारोप्यचात्मनि॥अधीतवेदोजपकृत्पुत्रवानन्न
दोग्निमान्॥वेदाध्ययनमात्रं॥वैराग्यंचाधिकारिविशेषणं॥यदहरेव
विरजेत्तदहरेवप्रव्रजेदितिश्रुतेः॥याज्ञवल्क्यः॥अवेक्ष्यागर्भवासांश्च
कर्मजागतयस्तथा॥आधयोव्याधयःक्लेशाजरारूपविपर्ययः॥भवो
जातिसहस्रेषुप्रियाप्रियविपर्ययइति॥एतद्विचारेक्रियमाणेवैराग्यं
भवतीतितत्राद्ययोर्द्वयोःशिखासूत्रधारणंपुत्रदत्तान्नभोजनंभवति॥
परंतुसर्वव्यासंगान्विहायाध्यात्मविद्याभ्यसनीयाहंसस्तुपुत्रादीनां
त्यागंकृत्वावनादौवसेत्॥शिखासूत्रेवैकल्पिके॥परमहंसोमुंडःसू
त्ररहितश्च॥सर्वेषांब्रह्मविद्याभ्यासस्तुल्यः॥अस्माभिस्तुप्रायशःप
रमहंसधर्माएवोच्यंतेतउक्ताः॥श्रुतौ॥सोऽथपरिव्राडेकशाटीपरि
हितोमुंडोऽदरअरण्यनित्योभिक्षार्थंग्रामंप्रविशेदासायंप्रदक्षिणेनाऽवि
चिकित्सन्सार्ववर्णभैक्षचर्यमभिशस्तपतितवर्जमयज्ञोपवीतीशौचनि

ष्टुःकाममेकंवैणवंदंडमाददीतेति॥सार्ववर्णमापदि॥तत्रशूद्रादीनामग्रह
णंकाममिति वैकल्पिकदंडग्रहणं॥परमहंसस्यापमेकएवदंडः॥त्रिदं
डादिकंहंसादीनां॥अतएवपरमहंससंन्यासग्रहणेतेषांत्यागउक्तः।
अतऊर्ध्वंयज्ञोपवीतमासनंशिखांयष्टयःशिक्यमित्येतानिवर्जयि
त्वाःथदंडमादत्तेसरवामांगोपायतीति॥संन्यासस्यज्ञानप्रतिबंधकदु
रितनाशद्वाराज्ञानसाधनमितिस्थितमुत्तरमीमांसायां।कश्चिज्जन्मा
न्तरीयःसंन्यासोन्यजन्मन्युपयुज्यते॥तथाचश्रूयते॥यद्यातुरःस्यान्म
नसावाचावासंन्यसेदिति॥अयंचसंन्यासोनपूर्वसन्यासापेक्षयाक
र्मांतरं॥पूर्वस्योपस्थितत्वाङ्गेरवाक्यमाणाभावाच्च।अतःपूर्वोत्पन्नस्य
संन्यासस्ययदिब्राह्मणोयजेतेत्यादिवदातुरकर्तृकप्रयोगांतरंविधी
यते॥तत्रापिवैराग्यमपेक्षितमेव॥तच्चातुरस्यवैराग्यसत्वे॥यदहरेव
विरजेत्तदहरेवप्रव्रजेदित्यनेनैवप्राप्तेरनर्थकंपुनर्विधानमितिवाच्यंस
न्यासस्यकाम्यत्वेनसर्वांगोपसंहारासमर्थमातुरंप्रत्यप्राप्तेः॥अतोर्थव
त्त्वमिति॥विस्तरस्तुदुर्गमत्वभियानेहप्रतन्यते॥अंगिराअपि॥अंधः
पंगुर्दरिद्रोवाविरक्तःसंन्यसेद्द्विजः।सर्वेषामेववैराग्यंसंन्यासेतुविधीय
तइति॥सुमंतुः।आतुराणांचसंन्यासेनविधिर्नैवचक्रिया॥प्रैषमात्रंस
मुच्चार्यसन्यासंतत्रकारयेदिति॥तत्रसन्यासांगभूतंश्राद्धमयूखेवक्ष्य
ते॥गोभिलः।ततःसमाचरेत्स्नानंहेमरूप्यकुशांभसा॥कृत्वातुवपनं
विद्वान्भवेन्मुंडोथवाशिखी॥बह्वृचगृह्यपरिशिष्टे॥अथपुत्रान्सुहृ
दोबंधून्प्रत्याहनमेकश्चिन्नाहंकस्यचिदिति॥मनुः।ततःपुत्रैषणायाश्च
वित्तैषणायाश्चव्युत्थितोहमिति अपःपाणिनाहुत्वाशिखार्थंरक्षितान्
केशानुत्पाट्याथयज्ञोपवीतंभूमावप्सुवानिक्षिपेत्।ततःप्राङ्मुखस्तिष्ठ
न्नूर्ध्वबाहुर्ब्रूयात्संन्यस्तंमयेतित्रिः॥अभयंसर्वभूतेभ्योमत्तइतिउद
कपूर्णमंजलिंनिनयेत्॥अथनामानि।तीर्थाश्रमवनारण्यगिरिपर्वतसा
गराः॥सरस्वतीभारतीच पुरीनामयतेर्दशेति॥ततोगुरुरद्वैतब्रह्मोपदे
शंकुर्यात्॥ततोनप्रउदीचींदिशंगच्छेत्॥यदिविविदिषुस्ततःश्रवणा
यार्थंगुरुसमीपआगच्छेत्॥उक्तंच॥तद्विज्ञानार्थंसगुरुमेवाभिगच्छे
त्समित्पाणिः॥श्रोत्रियंब्रह्मनिष्ठमितिततःकौपीनंकटिसूत्रंचोपादद्यात्।

अत्रविशेषमाह॥कौपीनाच्छादनंवासःकंथाशीतनिवारिणी॥पादुकेचापिगृण्हीयात्कुर्यान्नान्यस्यसंग्रहमिति॥गुरोश्चसेवाकायवाङ्मनोभिःकार्या॥एवंसन्यस्तस्यधर्मानाहपराशरः॥एकाकीनिस्पृहस्तिष्ठेन्न केनापिसहालपेत्॥दद्यान्नारायणेत्येवंप्रतिवाक्यंसदायतिः॥दक्षः॥एकोभिक्षुर्यथोक्तस्तुद्वावेवमिथुनंस्मृतं॥त्रयोग्रामःसमाख्यातऊर्ध्वंतुनगरंस्मृतमिति॥याज्ञवल्क्यः॥अप्रमत्तश्चरेद्भैक्षंसायान्हेनाभिलक्षितः॥रहितेभिक्षुकैर्ग्रामेयात्रामात्रमलोलुपः॥यात्रामात्रंकुर्यात्॥प्राणयात्रांअतितत्स्याभुंजीतेत्यर्थः॥वसिष्ठः॥सप्तागाराण्यसंकल्पितानिचरेद्भैक्षमेकवारमितितत्कालमाहमनुः॥विधूमेसन्नमुशलेव्यंगारेभुक्तवज्जने॥वृत्तेशरावसंपातेनित्यंभिक्षांयतिश्चरेदितितथाष्टौमासान्कीटवत्संचरेत्॥चतुरोवार्षिकान्मासानेकत्रतिष्ठेदिति॥चत्वारःश्रावणादिकार्त्तिकांताः॥तत्रचमासचतुष्टयपर्यंतंकेशनखादिधारणं॥अन्यत्रतुऋतुसंधिषुवापयेदितिमासद्वयोत्तरं॥केचित्तत्रापिपक्षावेवमासइतिलिंगदर्शनान्मासद्वयोत्तरमेवाहुरितिष्ठंति॥पात्राण्याहयाज्ञवल्क्यः॥यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच॥सलिलैःशुद्धिरेतेषांगोबालैश्चावघर्षणमिति॥यतेस्तांबूलंनिषिद्धंवायुपुराणे॥द्ववेतौसमवीर्यौतुसुरातांबूलमेवच॥तस्मात्सर्वप्रयत्नेनतांबूलंवर्जयेद्यतिः॥तथासर्वदाप्रणवजपपूर्वंब्रह्मानुध्यानरतोभवेत्॥गयायांयतेर्विशेषः॥गयायांमुंडपृष्ठेचकूपेयूपवटेतथा॥दंडंप्रदर्शयेद्भिक्षुःपितृभिःसहमुच्यते॥प्रदर्शयेत्स्पर्शयेत॥एवंसंन्यासपूर्वकंजातस्यज्ञानत्वमुक्तंश्रुतौ॥ब्रह्मसंस्थोमृतत्वमेतीतिजाबालश्रुतौ॥शतंकुलानांपुरतोबभूवतथापराणांत्रिशतंसमग्रं॥एतेभवंतिसुकृतस्यलोकेयेषांकुलेसंन्यसतीहविप्रइति॥यतिमरणेविशेषः॥सर्वसंगनिवृत्तस्यध्यानयोगपरस्यच॥नतस्यदहनंकार्यंनाशौचंनोदकक्रिया॥निदध्यासेप्रणवेनैवध्यानभिक्षोःकलेवरं॥प्रोक्षणंखननंचैवसर्वंतेनैवकारयेदिति॥एतच्चसंक्षेपेणोक्तायतिधर्माः॥विस्तरस्तुविश्वेश्वरनिबंधादौद्रष्टव्यः॥इतिभगवंतभास्करेसंस्कारनिरूपणं॥अथपूर्वोद्दिष्टानांसंस्काराणांकातीयसूत्रानुसारेणप्रयोगो

लिख्यते॥ तत्रपरिभाषासूत्रं॥ अथातोगृह्यस्थालीपाकानांकर्मपरि॰
समूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधायदक्षिणतोब्रह्मास
नमास्तीर्य्यप्रणीयपरिस्तीर्यार्थवदासाद्यपवित्रेकृत्वाप्रोक्षणीसंस्कृ॰
त्यार्थवत्प्रोक्ष्यनिरूप्याज्यमधिश्रित्यपर्य्यग्निकुर्यात्।स्रुवंप्रतप्यसं
मृज्याभ्युक्ष्यपुनःप्रतप्यनिदध्यादाज्यमुद्वास्योत्पूयावेक्ष्यप्रोक्षणी
श्चपूर्ववदुपयमनान्कुशानादायसमिधोभ्यादायपर्युक्ष्यजुहुयादे
षएवविधिर्यत्रक्वचिद्धोमइति॥ब्रह्मासनेब्रह्मोपवेशनीयः॥अथस
र्वत्रोपयुक्तःस्थालीपाकप्रयोगः॥तत्रप्रथमारंभेपुण्याहमातृपूजाभ्यु
दयिकानिकृत्वादेशकालौस्मृत्वाअमुकस्थालीपाकेनयक्ष्यइतिसंक
ल्प्यअमुककर्मणिकृताकृतप्रत्यवेक्षणार्थंब्रह्माणंत्वांवृणेइतिब्रह्माणं
वृत्वाभ्युक्षायांभूमौदर्भैस्त्रिःपरिसमुह्योपलिप्यस्फ्येनोल्लिख्यानामिका
ङ्गुष्ठेनोद्धृत्याद्भिरभ्युक्ष्याग्निमुपसमाधायदक्षिणतोब्रह्मासनमास्ती॰
र्य्यतत्रब्रह्माणमुपवेश्यप्रणीताःप्रणयेत्॥तद्यथा॥वामहस्तेवारुणंच
मसमादायदक्षिणेनजलंसंपूर्याग्नेरुत्तरतोनिधायजलंस्पृष्ट्वाग्नेरीशा
न्यांस्थापयेत्॥ ततःप्रागग्रैःकुशैःपरिस्तरणं॥ततउत्तरतोग्नेरर्थवतां
पात्राणामासादनं॥तद्यथा॥पवित्रच्छेदनकुशाःपवित्रेतुप्रोक्षणीपात्र
माज्यस्थालीचरुस्थालीसंमार्गकुशाउपयमनकुशाःसमिधस्तिस्रः
प्रादेशमात्र्यःखादिरःस्रुवःआज्यंतंडुलाःपूर्णपात्रंचेत्येतान्यासादयेत्
॥ततस्त्रिभिःकुशैःकुशाद्वयंछित्वाप्रादेशमात्रंस्थापयेत्॥ततःप्रोक्षणी
पात्रेप्रणीतोदकमासिच्यपवित्राभ्यामुत्पवनं॥तदेवपात्रंसव्यहस्तेनि
धायसव्यहस्तस्थितस्यैवदक्षिणेनोद्दिंगनं॥ततोभूमौनिधायप्रणी॰
तोदकेनप्रोक्षेत्॥ततआसादितानामेकैकस्यप्रोक्षणंप्रोक्षण्युदकेन॥
ततःप्रणीताग्न्योर्मध्येप्रोक्षणीपात्रस्यनिधानं॥ततआज्यस्थाल्यामा
ज्यनिर्वापः॥चरुस्थाल्यांतंडुलप्रक्षेपः॥त्रिःप्रक्षालनं॥आज्याधिश्र
यणं॥आज्यादुत्तरतश्चरोरधिश्रयणं।उभयोःपर्य्यग्निकरणं॥उदकोप
स्पर्शनं॥चरुश्रपणंकृत्वाईघृतेचरौस्रुवप्रतपनंसंमार्गकुशैःसंमार्ज
नं॥अग्रैरग्रंमूलैर्मूलंप्रणीतोदकेनाभ्युक्ष्यपुनःप्रतप्यनिदधाति।आ
ज्योद्वासनं॥ततश्चरोरुद्वासनं॥घृतानांतुपूर्वेणोद्वासितानांतुपश्चतःप

वित्राभ्यामाज्योत्पवनं॥ततोवेक्षणं॥ततआज्यमध्येपतितानामन्यनि
रसनं॥प्रोक्षण्युत्पवनं॥उपयमनकुशादानं॥ततस्तिष्ठत्समिधोभ्या
धायप्रोक्षण्युदकेनाग्निंपर्युक्षेत्॥पवित्रयोःप्रणीतामध्येनिधानं॥त
तोदक्षिणंजान्वाच्यस्रुवेणाज्यमादायजुहोतिप्रजापतयेस्वाहेतिप
श्चिमतआरभ्यपूर्वपर्यंतमाघारयेत्॥इदंप्रजापतयेनममेतित्यागः॥
संस्रवंप्रोक्षणीमध्येस्थापयेत्॥एवंसर्वत्रइंद्रायस्वाहेतितथैव॥इद
मिंद्रायनममेति॥एतावाघारौ॥अग्नयेस्वाहेतिपूर्वोत्तरतःसोमायस्वा
हेतिपूर्वदक्षिणतः॥एतावाज्यभागौ॥ततोयथाप्रधानहोमः॥ततोग्न
येस्विष्टकृतेस्वाहेतिस्विष्टकृत्॥आज्यहोमेस्विष्टकृत् सर्वहोमांते
भवति॥ततोव्याहृतिभिराज्यंजुहुयात्॥भूःस्वाहाइदमग्नये॥भुवःस्वा
हाइदंवायवे॥स्वःस्वाहाइदंसूर्याय॥भूर्भुवःस्वःस्वाहा॥इदंप्रजापत
ये॥ततस्त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेलोवयासिसीष्ठाः॥यजि
ष्ठोवन्हितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा॥इदमग्
नीवरुणाभ्यां॥सत्वंनोअग्नेवमोभवोतीनेदिष्ठेतेअस्याउषसोव्युष्टौ
॥अवयक्ष्वणोवरुणꣳराणोवीहिमृळीकꣳसुहवोनएधिस्वाहा॥इ
दमग्नीवरुणाभ्यां नमम॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्व
मयाअसि॥अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा॥इदमग्नये
अयसे॥येतेशतंवरुणंयेसहस्रंयज्ञियाःपाशाविततामहांतः॥तेभि
र्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा॥इदंवरुणायस
वित्रे॥विष्णवेविश्वेभ्योमरुद्भ्यःस्वर्केभ्योनमम॥उदुत्तमंवरुणपाशम
स्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदि
तयेस्यामस्वाहा॥इदंवरुणायादितये॥प्रजापतयेस्वाहाइदंप्रजापतये
॥एताआज्याहुतीर्ब्राह्मणान्वारब्धोजुहोति॥ततःसंस्रवप्राशनं॥पवि
त्रेग्नौप्रहरति॥ब्रह्मणेपूर्णपात्रंदक्षिणा॥प्रणीताविमोकः॥उपयमन
स्याग्नौप्रक्षेपः॥यत्रब्राह्मणभोजनमाम्नातंतत्रतत्कुर्यात्॥इतिसक
लस्थालीपाकेतिकर्तव्यता॥आज्यहोमेचरुसंबद्धपदार्थनिवृत्तिः॥
अन्यत्समानं॥अथपुंसवनं॥गर्भाधानोत्तरंद्वितीयेतृतीयेवामासिपू
र्वोक्तकालेकर्ताशुचिर्गर्भिणींसुपवासंकारयित्वास्नापयित्वाऽहतेवास

सींपरिधाप्यकालाद्युल्लिख्यास्यगर्भस्यबीजगर्भसमुद्भवैनोनिबर्ह
णार्थंपुंसवनंकरिष्ये इतिसंकल्प्यपुण्याहमातृपूजाभ्युदयिकानिकृ
त्वाःवरोहाग्रपल्लवानुदकेनपिष्ट्वाहिरण्यगर्भोद्भःसंभृतइतिद्वाभ्यामृ
ग्भ्यांपत्न्यानासिकादक्षिणपुटेआसिंचेत॥ अथयदिमेवीर्यवान्पुत्रो
भवत्वितिकामनातउदकपूर्णंशरावंवध्वाउपस्थेस्थापयित्वासुप
र्णोसीतिविष्णुस्तिष्ठंस्वयास्त्वःपतत्त्यंतयागर्भीशपंस्पृष्ट्वाअभिमंत्रये
त्॥इतिपुंसवनं॥ अथसीमंतोन्नयनं॥कर्ताशुचिर्दर्भपाणिर्देशकालौ
स्मृत्वाबीजगर्भसमुद्भवैनोनिबर्हणार्थंपरमेश्वरप्रीत्यर्थंसीमंतोन्नयनं
करिष्य इतिसंकल्प्यपुण्याहवाचनमातृपूजाभ्युदयिकानिकृत्वापं
चभूसंस्कारान्कृत्वालौकिकाग्निमुपसमाधायाज्यभागांतंकृत्वातिल
मुद्गमिश्रेणचरुणाप्रजापतयेस्वाहेतिजुहुयात्॥इदंप्रजापतयइतित्या
गः॥ततउत्तरार्द्धात्स्विष्टकृतंहुत्वाव्याहृत्यादिनवाहुतीर्हुत्वासंस्रवंप्रा
श्यब्रह्मणेपूर्णपात्रंवरंवादत्वाग्नेःपश्चात्कोमला — — — — —
सनेभद्रपीठाख्येगर्भिणींस्नातामहतवस्त्रामुपवेश्यऔदुंबरेणयुग्मफ
लवताअपक्वस्तबकेनअश्वत्थशंकुनात्रिभिश्चदर्भपिंजूलैस्त्रेण्याशल
स्यासूत्रकर्तनार्थयाचसूच्या इत्येतैरेकीकृतैस्ततःसीमंतंविनयतिभू
र्भुवःस्वर्विनयामीतिमंत्रेणयद्वा॥भूर्विनयामिभुवर्विनयामिस्वर्विनया
मीति त्रिभिर्मंत्रैस्त्रिभिर्विनयति॥ततस्तत्सर्वंवेण्यांबध्नाति॥अयमूर्जा
वतोवृक्षऊर्जीवफलिनीभवेतिमंत्रेण॥ततोवीणागाथिनौप्रतिराजानं
संगायेतामितिप्रेषंदद्याति॥यद्वासोमराजानंसंगायेतामितिप्रैषः॥तौच
प्रेषितौसोमएवनोराजेमामानुषीप्रजाः॥अविमुक्तचक्रआसीरंस्तीरे
तुभ्यमसावितिगाथांगायतः॥असौस्थानेसमीपावस्थितायागंगा
प्रमुखानद्यानामगृह्णातिस्त्री॥इतिसीमंतः॥ अथसोष्यंतीकर्ताशुचिः
प्रसूतिशूलवतींस्त्रियं॥एजतुदशमास्यइत्यृचा॥ अवैत्वजरायुणासह
त्यंतयाद्भिरभ्युक्षति॥ततःस्त्रीसमीपेअवैतुपृश्निशेवलंशुनेजरायुत्वे
नैवमांसेनपीवरीनकस्मिंश्चनायतमवजरायुपद्यतामितिमंत्रंजपेत्॥
अथकुमारेजातेनालच्छेदात्पूर्वंस्नात्वापुण्याहवाचनवृद्धिश्राद्धादिकृत्वा

ज्ञातकर्मकरिष्येइतिसंकल्प्यमेधाजननायुष्येकुर्यात्॥मेधाजननंयथा
॥अनामिकयासुवर्णांतर्हितयामधुघृतेमिश्रयित्वाकेवलंवाघृतं॥भूस्त्व
यिदधामि॥भुवस्त्वयिदधामिस्वस्त्वयिदधामिभूर्भुवःस्वस्त्वयिदधा
मीतिमंत्रेणसकृत्प्राशयेत्॥आयुष्यंयथा॥कुमारस्यनाभिसमीपेकर्ण
समीपेवाग्निरायुष्मानित्यष्टौमंत्रान्निर्जपेत्॥तेयथा॥अग्निरायुष्मा
न्सवनस्पतिभिरायुष्मांस्तेनत्वायुषाऽयुष्मंतंकरोमि॥सोमआयुष्मा
न्सओषधीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि॥ब्रह्मायुष्मत्तद्ब्राह्म
णैरायुष्मत्तेनत्वायुषायुष्मत्करोमि॥देवाआयुष्मंतस्तेऽमृतेभिरायुष्मं
तस्तेनत्वायुषायुष्मंतंकरोमि॥ऋषयआयुष्मंतस्तेव्रतैरायुष्मंतस्तेन
त्वायुषायुष्मंतंकरोमि॥पितरआयुष्मंतस्तेस्वधाभिरायुष्मंतस्तेनत्वा
युषायुष्मंतंकरोमि॥यज्ञआयुष्मान्सदक्षिणाभिरायुष्मांस्तेनत्वायुषा
युष्मंतंकरोमि॥समुद्रआयुष्मान्स्रवंतीभिरायुष्मांस्तेनत्वायुषायुष्मंतंक
रोमि॥ततस्त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं॥यद्देवेषुत्र्यायुषंतन्नोअ
स्तुत्र्यायुषमितिमंत्रंजपति॥यदिपिताकामयेतायंकुमारःसर्वमायुरिया
दितितदाकुमारमभिमृशेद्दिवस्परीत्यनुवाकेन॥अथचतुरोब्राह्मणान्
कुमारस्यचतुर्दिक्षुस्थापयित्वाइमंसमनुप्राणितेतितान्प्रेष्यति॥ततःपू
र्वादिदिगवस्थिताब्राह्मणाःक्रमेणैवकुमारंलक्षीकृत्यचतुरोमंत्रान्
वंतिप्राणःव्यानःअपानःउदानःमध्यस्थःपंचमःउपरिष्टादवेक्षमाणो
ब्रूयात्समानइति॥ब्राह्मणाभावेस्वयमेवतस्यांदिशिस्थित्वामंत्रान्ब्रू
यात्॥नदात्रप्रैषाभावः॥ततोयस्मिन्देशेकुमारोजातस्तंदेशंवेदतेभूमि
हृदयंदिविचंद्रमसिश्रितं॥वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशतंजीवे
मशरदःशतंशृणुयामशरदःशतमितिमंत्रेणकुमारमभिमृशति॥त
तःकुमारस्यमातरंइडासिमैत्रावरुणीवीरेवीरमजीजनथाः॥सात्वं
वीरवतीभवयास्मान्वीरवतोकरदितिमंत्रेणाभिमंत्रयेत्॥अथसूतिका
यादक्षिणंस्तनंप्रक्षाल्यइमंस्तनमित्यृचाकुमारायप्रयच्छति॥ततोय
स्तेस्तनइत्यृचाद्वयेनवामंप्रक्षाल्यप्रयच्छति॥ततःकुमारस्यशिरःप्र
देशेजलपूर्णपात्रंआपोदेवेषुजाग्रथयथादेवेषुजाग्रथ॥एवमस्यांसू
तिकायांसपुत्रिकायांजाग्रथेतिमंत्रेणस्थापयेत्॥तदुदपात्रंयावत्सूति

कोत्थानंतावत्तिष्ठेत्॥ ततःसूतिकागृहद्वारे पूर्वोक्तान्पंचभूसंस्कारान्कृ
त्वाग्निंस्थापयेत्॥ ततःतंडुलकणमिश्रान्सायंप्रातर्जुहोति॥ सायमाहु
तिद्वयंप्रातश्चेतितद्यथा॥ शंडामर्का उपवीरःशौंडिकेय उलूखलः॥ म
लिम्लुचोद्रोणासश्च्यवनोनश्यतादितिस्वाहा॥१ आलिखन्ननिमिषः
किंवदंत उपश्रुतिः॥ हर्यक्षःकुंभीशत्रुःपात्रपाणिर्नृमणिर्हंत्रीमुखःसर्ष
पारुणश्च्यवनोनश्यतादितिस्वाहा॥ २॥ इदमग्नयइत्युभयत्रत्यागइ
तिहरिहरः॥ अथनैमित्तिकं॥ यदिकुमारग्रहोबालमभिभवेत्तदाम
त्स्यग्रहणजालेनोत्तरीयेणवातंप्रच्छाद्यांकेगृहीत्वावक्ष्यमाणंजपेत्॥
कूर्कुरःसकूर्कुरःकूर्कुरोबालबंधनः॥ चेच्चेच्छुनकसृजनमस्ते अस्तुसीस
रोत्वपेतापह्वरतत्सत्यं॥ तत्तेदेवावरमदुःसत्वंकुमारमेवावृणीथाः॥ चे
च्चेच्छुनकसृजनमस्ते अस्तुसीसरोत्वपेतापह्वरतत्सत्यं॥ यत्तेदेवावर
मदुःसत्वंकुमारमेवावृणीथाः॥ चेच्चेच्छुनकसृजनमस्ते अस्तुसीस
रोलपेतापह्वरतत्सत्यं॥ यत्तेसरमामातासीसरःपिताश्यामशबलौभ्रा
तरौ॥ चेच्चेच्छुनकसृजनमस्ते अस्तुसीसरोलपेतापह्वरेति॥ ततोनना
मयतिनरुदतिनहृष्यतिनग्लापयति॥ यत्रवयंवदामोयत्रचाभिमृशा
मीत्यनेनबालमभिमंत्रयेत॥ इतिजातकर्मादि॥ सूतकांतेसूतिकामु
त्थाप्यनामकरणांगतयाचीन्ब्राह्मणान्भोजयित्वाशुचिर्देशकालौस्मृ
त्वाबालस्यबीजगर्भसमुद्भवैनोनाशार्थंनामकरिष्यइतिसंकल्प्यपु
ण्याहवाचनंनांदीश्राद्धादिकृत्वानामकुर्यात्॥ अत्रायंशिष्टाचारःपि
प्पलपत्रादौकरिष्यमाणनामलिखित्वासंपूज्यब्राह्मणानुज्ञातोबाल
स्यदक्षिणेकर्णेकथयेत्॥ चैत्रनामासीति॥ अथनिष्क्रमणं॥ चतुर्थेमासि
शुभेऽह्निशुचिर्नारीश्चाङ्केकृत्वाबालकंतच्चक्षुरितिमंत्रेणसूर्यंदर्शयति॥
यदिपिताप्रोषितःपुत्रजन्मोत्तरंगृहेआगच्छतितदागृहोपस्थापनंकुर्या
त्॥ गृहामाबिभीतेति॥ ततःपुत्रंदृष्ट्वाअंगादंगात्संभवसिहृदयादधिजा
यसे॥ आत्मावैपुत्रनामासिसंजीवशरदःशतमितिजपेत्॥ ततःप्रजाप
तेस्त्वाहिंकारेणावजिघ्रामि॥ सहस्रायुषाऽमुकशर्मन्संजीवशरदःश
तमितिमंत्रेणकुमारस्यमूर्द्धानं जिघ्रेत्॥ ततःपुनर्गवांत्वाहिंकारेणाव
जिघ्रामिसहस्रायुषामुकशर्मन्जीवशरदःशतमितिमंत्रेणसकृन्मूर्द्धा

नमवज्जिघ्रतिहिस्तूष्णीं ततोबालस्यदक्षिणेकर्णे अस्मे प्रयंधिमघव
न्नृजीषिन्निंद्ररायोविश्ववारस्य भूरेः॥ अस्मेशतंशरदोजीवसेधाअ
स्मेवीरांछश्वतइंद्रशिप्रिन्निति मंत्रंजपेत्॥ ततःसव्येइंद्रश्रेष्ठानिद्र
विणानिधेहिचित्तिंदक्षस्यसुभगत्वमस्मे। पोषंरयीणामरिष्टिंतनूनां
स्वाद्मानंवाचःसुदिनत्वमन्हामितिजपेत्॥ कन्यायास्तुमूर्द्धावघ्राणमात्रं
नमंत्रजापः॥ अथान्नप्राशनं॥ पूर्वोक्तेदैवज्ञोदितेमुहूर्त्तेशिशोरस्याबी
जगर्भसमुद्भवैनोनिबर्हणार्थं अन्नप्राशनमहंकरिष्येइतिसंकल्प्यपु
ण्याहाभ्युदयिकांतंकृत्वापंचभूसंस्कारचरुश्रपणादि आज्यभागांतं
पूर्ववत्कुर्यात्॥ तत्रप्रधानं॥ देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवो
वदंति।सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतुस्वाहा॥ इदं
देव्यैवाचे॥ देवींवाचमितिमंत्रंपुनःपठित्वावाजइत्यस्यमरा त्रिष्टुप्छंदःअ
न्नदेव होमे॰ वाजोनोअद्यप्रसुवातिदानंवाजोदेवांऋतुभिःकल्पयाति
॥वाजोहिमासर्ववीरंजजानविश्वाआशावाजपतिर्जयेयंस्वाहा॥ इदंवा
चेवाजायचेतित्यागः॥ इदमाहुतिद्वयमाज्येन॥ ततःस्थालीपाकेनजुहु
यात्॥ तद्यथा॥ प्राणेनान्नमशीयस्वाहा॰ इदंप्राणाय। अपानेनगंधा
नशीयस्वाहा। इदमपानाय। चक्षुषारूपाण्यशीयस्वाहा। इदंचक्षुषे
॥श्रोत्रेणयशोशीयस्वाहा॥ इदंश्रोत्राय। एवंचतस्त्र आहुतीर्हुत्वासि
ष्टद्रव्यादिदक्षिणांतंसमाप्यैकस्मिन्पात्रेसर्वान्रसानसमुद्धृत्यसकृ
त्तूष्णींप्राशयेत्॥ हंतेतिमंत्रेणवातच्चकाम्यता॥ तत्रयदिबालस्यवा
ग्मित्वमिच्छेत्तदाभरद्वाजपक्षिविशेषमांसंप्राशयेत्॥ यद्यन्नाद्यत्वंत
र्हिकपिंजलमांसंयदिजवनत्वंतदामत्स्यमांसंयदिदीर्घायुष्यंतर्हिकृक
षामांसं॥ कृकषागृहगोधिका यदिसर्वाणितदासर्वमांसानिप्राशयेत्
ततःकर्मसमृद्ध्यर्थंब्राह्मणभोजनं॥ इत्यन्नप्राशनं॥ अथचूडाकरणं॥
तत्रकर्त्ताकान्यतमकालेमातृपूजाभ्युदयिकेकृत्वाब्राह्मणान्संभो
ज्यास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्ध्यर्थं
चौलकर्मकरिष्येइतिसंकल्प्यशुद्धभूमौलौकिकाग्निंसंस्थाप्यमातृके
कुमारमग्नेःपश्चिमतउपवेश्यब्रह्मोपवेशनाद्याज्यभागांतंकृत्वाशी
तोष्णोदकेनवनीतघृतदध्यन्यतमंनिक्षिप्यतांशलालींपृथक्पृथक्त्रि

ह्वानित्रीणित्रीणिकुशतरुणानितान्यपरिस्कृतमायसंक्षुरमानडुहंगो
मयंचेत्युपकल्प्यपवित्रकरणादिपर्युक्षणांतंकृत्वाआघारादिस्वि
ष्टकृदंतंहोमंविधायसंस्रवान्प्राश्यपूर्णपात्रंवरयोरन्यतरंब्रह्मणेद
त्वाउष्णेनवायउदकेनेधदितेकेशान्वपामीत्यनेनमंत्रेणशीतास्व
प्सुउष्णाआपआसिच्यनवनीताद्यन्यतमंचताप्सुप्रक्षिप्यतदुदकमा
दायसविताप्रसूतादैव्याआपउदंतुतेतनूंदीर्घायुत्वायवर्चसइत्यनेन
मंत्रेणदक्षिणंशिरःप्रदेशंक्लेदयित्वात्र्येण्याशलल्याकेशान्विनीयॐ
षधेत्रायस्वेतिमंत्रेणकुशतरुणान्यंतर्धायशिवोनामासिस्वधितिस्ते
पितानमस्तेअस्तुमामाहिंसीरित्युपकल्पितक्षुरमादायकुशतरु
णांतर्हितेषुनिवर्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय
सुवीर्यायेत्यनेनमंत्रेणक्षुरमभिनिधाययेनावपत्सविताक्षुरेणसोम
स्यराज्ञोवरुणस्यविद्वान्तेनब्रह्माणोवपतेदमस्यायुष्यंजरदष्टिर्य
थासदित्यनेनमंत्रेणसकेशानिकुशतरुणानिप्रक्षिप्यानडुहेगोम
यपिंडेउत्तरतोध्रियमाणेप्रक्षिप्यमेवंतूष्णींवारद्वयंकुर्यात्॥एवमे
वंपश्चिमोत्तरयोःशिरप्रदेशयोःसकृत्समंत्रंद्विस्तूष्णींकुर्यात्॥पश्चि
मेत्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं॥यद्देवेषुत्र्यायुषंतन्नोअस्तु
त्र्यायुषमितिछेदनं॥उत्तरतोयेनभूरिश्चरादिवंज्योक्चपश्चाद्धिसू
र्य्यं॥तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तयइ
तिछेदनं॥ अन्यद्विशिष्टं।ततोयत्क्षुरेणमज्जयतासुपेशसावप्ता
वावपतिकेशांश्छिंधिशिरोमास्यायुःप्रमोषीरित्यनेनमंत्रेणशिरःसमंता
त्प्रदक्षिणं॥क्षुरंभ्रामयेद्विस्तूष्णीं॥ततस्तेनैवोदकेनसमस्तंशिरआ
प्लाव्याक्षण्वंपरिवपेत्यनेनमंत्रेणनापिताय क्षुरंप्रयच्छेत्॥ततो
नापितकेशान्वपन्यथोक्तकेशशेषकरणंकुर्यात्॥अथसकेशंगोम
यपिंडमुदकादौप्रक्षिप्याचार्यायवरंदद्यादिति॥इयमेवकर्तव्यताके
शांतेपिज्ञेया॥इयांस्तुविशेषः॥उष्णोदकासेकमंत्रेउष्णेनवायउद
केनेधदितेकेशश्मश्रुवपनार्थेक्षुरपरिहरणेमुखसहितंशिरःपरिहरेत्
मंत्रेवपत्क्षुरेणमज्जयितेत्यादिमास्यायुःप्रमोषीर्मुखमितिस्वाचा
र्यायचगोर्देयेति॥अथोपनयनं॥यथोक्तकालेमातृपूजाभ्युदयिकेकृ

त्वाकुमारंवापयित्वात्रीन्ब्राह्मणान्संभोज्यपंचभूसंस्कारान्विधायपलौ
किकाग्निंसंस्थाप्यकुमारमाचार्यसमीपमानीयतद्दक्षिणतोवस्थाप्या
चार्येणब्रह्मचर्यमागामीतिब्रूहीत्युक्तोबटुर्ब्रह्मचर्यवाचार्योयेत्ताब्रह्म
तिब्रूहीत्युक्तोबटुर्ब्रह्मचर्यमागामीतिब्रूयात्॥ततोब्रह्मचर्यसानीति
ब्रूहीत्युक्तोब्रह्मचर्यमसानीतिब्रूयात्॥अथवासःपरिधाप्यइयंदुरु
क्तंपरिबाधमानावर्णंपवित्रंपुनतीमआगात्।प्राणापानाभ्यांबलमा
दधानास्वसादेवीसुभगामेखलेयमितिमंत्रं॥युवासुवासाःपरिवीत
आगात्सउश्रेयान्भवतिजायमानः तंधीरासःकवयउन्नयंतिस्वाध्यो
मनसादेवयंतइतिवामंत्रंपठति॥तूष्णींवाबटोःकटिप्रदेशेमेखला
माबध्ययज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्॥आयुष्य
मग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजइतिमंत्रंपठतोयज्ञोपवीतं
निवेश्यतूष्णीमजिनंपरिधाप्यदंडंदद्यात्॥ततोबटुर्योमेदंडःपरापत
द्विहायसोधिभूम्यां॥तमहंपुनरादद्आयुषेब्रह्मवर्चसायेत्यनेनमंत्रे
णदंडंपरिगृह्णीयात्॥अथाचार्यःस्वांजलिंजलेनापूर्य्यापोहिष्ठेतिति
सृभिर्माणवकांजलिंनैवपूरयित्वासूर्यमुदीक्षस्वेतिबटुंवदेत्॥बटु
श्चतच्चक्षुरितिमंत्रेणसूर्यमुदीक्षेत॥अथाचार्योबटोर्दक्षिणांसोपरि
स्वदक्षिणहस्तंनीत्वाममव्रतेहृदयंतेदधामि॥ममचित्तमनुचित्तंतेअ
स्तु॥ममवाचमेकमनाजुषस्वबृहस्पतिष्ट्वानियुनक्तुमह्यमितिमंत्रेणहृ
दयमालभ्यबटोर्दक्षिणंहस्तं सांगुष्ठंगृहीत्वाकोनामासीतिवदेत्॥बटु
रमुकशर्माहंभोइतिप्रतिवदेत्॥ततःकस्यब्रह्मचार्यसीत्युक्तोबटुर्भवत
इतिब्रूयात्॥अथाचार्यइंद्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्य
स्तवामुकशर्मन्नितिपठित्वाप्रजापतयेत्वापरिददामिदेवायत्वासवित्रे
परिददामिअद्भ्यस्त्वौषधीभ्यस्त्वापरिददामिद्यावापृथिवीभ्यांपरि
ददामिविश्वेभ्यस्त्वाभूतेभ्यःपरिददामिसर्वेभ्यस्त्वाभूतेभ्यःपरिददा
मिअरिष्ट्याइतिमंत्रेणभूतेभ्योबटुंत्वाददामिप्रदक्षिणीकृत्यस्वोत्तर
तोबटावुपविष्टेब्रह्मोपवेशनादिपर्युक्षणांतंकृत्वाआघाराःस्विष्टकृदंताश्च
तुर्दशाज्याहुतीर्हुत्वाहुतशेषंप्राश्यपूर्णपात्रंवरंवाब्रह्मणेदद्यात्॥अथा
चार्येणब्रह्मचार्यसीत्युक्तोबटुरसानीतिब्रूयात्॥अपोशानेत्युक्तःअ

शानीति कर्म कुर्वित्युक्तः करवाणीति॥ मा दिवा सुषुप्थेत्युक्तो न स्वप्स्यामीति
वाचं यच्छेत्युक्तो यच्छामीति॥ समिधमाधेहीत्युक्त आदधामीति॥ अ
पोशानेत्युक्तः अशानीति ब्रूयात्॥ अथाचार्योऽग्नेरुत्तरतो दक्षिणतो वा
प्रत्यङ्मुखायोपविष्टाय तिष्ठते वा पादोपसंग्रहपूर्वकमुपसन्नायाचार्या
भीक्षमाणस्वयमीक्षिताय वटवे ॐकारव्याहृतिपूर्वकं प्रथमं पच्छः द्वितीय
मर्धर्चशस्तृतीयं सर्वामृचं च पठन्सावित्रीमुपदिशेत्॥ अथ वटुः पूर्वदक्षि
णहस्तेन अग्ने सुश्रवः सुश्रवसं मा कुरु यथा त्वमग्ने सुश्रवः सुश्रवा असि
॥ एवं मां सुश्रवः सौश्रवसं कुरु॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि
॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासमित्येतैः पञ्चभिर्मन्त्रैः परिस
मिंधनप्रक्षेपेणाग्निं संधुक्ष्याद्भिः पर्युक्ष्य तिष्ठन् अग्नये समिधमाहार्षं बृह
ते जातवेदसे॥ यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया व
र्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्य
निराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहेत्यनेन मं
त्रेणोक्तलक्षणामेकां समिधमग्नावादध्यादनेनैव द्वितीयां तृतीयां चादध्या
त्। एषा ते अग्ने समिदित्यादिना वा मन्त्रेण॥ अग्नये समिधमाहार्षमिति एषा
ते अग्ने समिदित्येताभ्यां समुच्चिताभ्यां मन्त्राभ्यां वा एकैकशस्तिस्रः स
मिध आदध्यात्॥ अथोपविश्य पूर्ववदग्ने सुश्रव इत्यादिभिरग्निं संधुक्ष्य
पर्युक्ष्य तूष्णीं पाणी प्रताप्य तनूपा अग्नेऽसि तन्वं मे पाहि। आयुर्दा अग्ने
ऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृ
ण। मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु। मेधां
मे अश्विनौ देवावाधत्तां पुष्करस्रजौ॥ इति सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं वि
मार्ष्टि। ततः शिष्टाचारादङ्गानि च म आप्यायन्तामित्यनेन शिरःप्रभृतिपाद
ान्तं सर्वाङ्गानि स्पृशेत्॥ वाक् च म आप्यायतामिति मुखं। प्राणश्च म आप्या
यतामिति नासारंध्रे युगपत्॥ चक्षुश्च म आप्यायतामिति चक्षुषी युगपत्
श्रोत्रं च म आप्यायतामिति दक्षिणं श्रोत्रं। ततोऽनेनैव वामं॥ यशो बलं च
म आप्यायतामिति मन्त्रं पठित्वा युगपद्बाहू स्पृशेत्॥ अथ तन्नो अस्तु आयु
षमिति हृदि स्पृशेत्॥ ततोऽमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं भो अमुकश
र्मन् त्वामभिवादये इत्युक्त्वा गुर्वादिकमभिवादयेत्॥ ततो गुर्वादिरा

गुष्मान्भवानमुकशर्मन् भो इत्यभिवादयेत्॥ ततो भवति भिक्षां देहीति ब्रा
ह्मणो भिक्षेत्॥ भिक्षां भवति देहीति राजन्यः भिक्षां देहि भवतीति वैश्यः ए
वं भिक्षित्वा भैक्ष्यं गुरवे निवेद्याहः शेषं वाग्यतस्तिष्ठेदासीन वेति नियमः॥ त
त उपास्तमयं संध्यामुपास्य पूर्ववदग्निकार्यं कृत्वा वाचं विसृजेदिति उप
नयनं॥ अथ समावर्त्तनं॥ तत्राचार्यो मातृपूजाभ्युदयिके कृत्वा बटुना
भो आचार्याऽहं स्नास्य इत्युक्तः स्नाहीत्युक्त्वा पंच भूसंस्कारान्कृत्वा लौ
किकाग्निं संस्थाप्य ब्रह्मोपवेशनाद्याज्यभागांतं कृत्वा ऋग्वेदमधीत्य स्ना
ति तदा पृथिव्यै स्वाहा अग्नये स्वाहेति द्वे आज्याहुतीर्जुहुयात्॥ यदि यजुर्वे
दं तदांतरिक्षाय स्वाहेति द्वे। यदि सामवेदं तदा दिवे स्वाहा सूर्याय स्वाहे
ति द्वे यद्यथर्ववेदं तदा दिग्भ्यः स्वाहा चंद्रमसे स्वाहेति द्वे यद्येकदा वेदच
तुष्टयं तत्र यं द्वयं वा तदा तद्देवताहुतीर्हुत्वा ब्रह्मणे छंदोभ्य इति वै द्वे हुत्वा प्रजा
पतय इत्याद्याः समंत्रेण जुहुयात्॥ ततो ब्रह्मणे छंदोभ्य इत्याद्या नवाहु
तीर्हुत्वा महाव्याहृत्यादि स्विष्टकृदंता दशाहुतीर्हुत्वा संस्रवप्राशन पूर्ण
पात्रं वरयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात्॥ ततो ब्रह्मसंग्रहणपूर्वकं गुरुं
नमस्कृत्य परिसमूहनादि ध्यायुष्करणांतं तस्मिन्नग्नौ समिदाधानं कु
र्यात्॥ ततोऽग्नेरुत्तरतोऽष्टौ कलशान्दक्षिणोत्तरायतान्संस्थाप्य तत्पूर्व
भागे प्रागग्रकुशेषूदङ्मुखः स्थित्वा ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगो
ह्यो मयूखो मनोहास्खलो विरुजस्तनूदूषुरिंद्रियहा तान्विजहामि यो
रोचनस्तमिह गृह्णामीति मंत्रेणाद्य कुंभादुदकमादाय तेन स्नानमभिषिं
चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति मंत्रेणात्मानमभिषिच्यैवम
न्येभ्यः प्रत्येकं समंत्रकं जलमादाय येन श्रियमकृणुतां येनावमृशतां
सुरां॥ येनाक्षानभ्यषिंचतां यद्वां तदश्विना यश इति॥ आपो हि ष्ठा म
यो भुवः। यो वः शिवतमो रसः। तस्मा अरंगमाम वः। इत्येतैश्चतुर्भिर्मंत्रैः
प्रतिमंत्रमात्मानमभिषिंच्य त्रिस्तूष्णीमभिषिंचेत्॥ तत उदुत्तममिति
मंत्रेण मेखलां शिरोमार्गेण निःसार्य भूमौ निधायाऽन्यद्वासः परिधा
याचम्योद्यन्भ्राजन्भृष्णुरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दश
निरसि दशसनिं मा कुर्वाविदन्मागमयेत्यनेनादित्यमुपस्थाय दधि
तिलान्वा दक्षिणहस्तमध्यगतसोमतीर्थेन प्राश्य जटालोमनखानि

वापयित्वास्नात्वाचम्योक्तलक्षणेनौदुंबरकाष्ठेनान्नाद्यायव्यूहध्व
ꣳसोमोराजायमागमत्समेमुखंप्रमार्क्ष्यतेयशसाचभगेनचेत्यनेनमं
त्रेणदंतान्प्रक्षालयित्वाचम्यसुगंधिद्रव्यमिश्रितेनयवादिचूर्णेनतैल
स्नीतेनशरीरमुद्वर्त्यपुनःसशिरस्कंस्नात्वाचम्यचंदनाद्यनुलेपनं
पाणिभ्यांगृहीत्वामुखंनासिकेचप्राणापानौमेतर्पयचक्षुर्मेतर्पयश्रो
त्रंमेतर्पयेत्यनेनमंत्रेणालभ्यपाणीप्रक्षाल्यतदुदकमंजलिनाऽपा
पसव्यंकृत्वादक्षिणामुखोभूत्वापितरःशुंधध्वमित्यनेनमंत्रेणपितृ
तीर्थेननिषिच्ययज्ञोपवीतीभूत्वोदकमुपस्पृश्यचंदनादिनासुचक्षा
अहमक्षिभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितिमंत्रे
णात्मानमनुलिप्यपरिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि
शतंचजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्यइतिमंत्रेणा
हतंधौतंवासःपरिधायपूर्वधृतमुपवीतमुत्तार्यजलेप्रक्षिप्यपदंनवमु
क्तलक्षणामुपवीतंयज्ञोपवीतमित्यादिनामंत्रेणपरिधाययशसामा
द्यावापृथिवीयशसेंद्राबृहस्पतीयशोभगश्चमाविदद्यशोमापेंद्रिया
यताअहंप्रतिगृह्णामियशसाचभगेनचेतिपुष्पाण्यतःप्रतिगृह्यय
द्यशोप्सरसामिंद्रश्चकारविपुलंपृथुतेनसंग्रथिताःसुमनआबध्नामि
यशोमयीतिमंत्रेणाशिरसिबध्वायुवासुवासाइत्यनयर्चोष्णीषेण
शिरोवेष्टयित्वालंकरणमसिभूयोलंकरणंभूयादितिमंत्रेणदक्षिणक
र्णेकुंडलेकृत्वातेनैववामकर्णेधृत्वावृत्रस्यासिकनीनकश्चखवि
लोक्यबृहस्पतेश्छदिरसिपाप्मनोमामंतर्द्धेहितेजसोयशसोमामंत
र्द्धेहीत्यन्यस्मात्छत्रंप्रतिगृह्यप्रतिष्ठेस्थोविश्वतोमापातमित्युपान
हौयुगपत्पादयोःप्रतिमुच्यविश्वाभ्योमानाष्ट्राभ्यस्परिपाहिसर्वतइ
तिवैणवंदंडमादध्यात्॥अथाचार्यःस्नातकस्ययमान्त्रिरात्रव्रतानि
चश्रावयेत्सचतानियथोक्तानिकुर्यादिति॥समावर्त्तनं॥अथविवा
हः॥तत्रपुण्येहनिवरःपितामातृपूजाभ्युदयिकेकृत्वासुतंकन्यापितृ
गृहमानयेत्॥ततःकन्यापितामातृपूजाभ्युदयिकेकृत्वागृहगतंवरं
मधुपर्केणार्चयेत्॥तद्यथाचार्यमितिकमानीयविष्टरोविष्टरोविष्टरइत्यन
न्यश्राविते प्रतिगृह्यतामित्यन्येहस्तेविष्टरंदद्यात्॥अथाचार्योवर्ष्मोस्मि

समानानामुद्यतामिवसूर्यः॥इमंतमभितिष्ठामियोमाकश्चाभिदास
तीत्यनेनमंत्रेणासनाध्योविष्टरंकृत्वातत्रोपविशेत्॥ततोर्चकःपाद्यंपा
द्यंपाद्यमित्यनेनश्राविते प्रतिगृह्यतामितिपाद्यार्थोदकमर्च्यायसमर्प
येत्॥ततोर्च्यस्तस्यात्रं भूमौनिधायांजलिनाजलमादायविराजोदो
होसिविराजोदोहमशीयमयिपाद्यायैविराजोदोहइतिमंत्रेणदक्षि
णंपादंप्रक्षाल्यतेनैवमंत्रेणवामंप्रक्षालयेत्॥ब्राह्मणःक्षत्रियवैश्यौ
तुपूर्वंसव्यंततोदक्षिणमितिविशेषः॥ततोर्चकेनपुनःपूर्ववद्दत्तंविष्टरम
र्च्योवर्ष्मोसीत्यादिमंत्रेणपादयोरधस्तान्निदध्यात्॥ततोर्चकोऽर्घोऽर्घो
ऽर्घइतिइत्यनेनश्राविते प्रतिगृह्यतामित्युक्तो आपस्थयुष्माभिःसर्वान्
कामानवाप्नवानीतिमंत्रमुक्तवतेऽर्च्यायार्घंप्रयच्छेत्॥ततोर्च्योर्घंप्रति
गृह्यमूर्ध्नपर्यंतमानीयसमुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छत॥अरि
ष्टाअस्माकंवीरामापरासेचिमत्पयइत्यनेनमंत्रेणनिनयन्नभिमंत्रये
त्॥ततोर्चकआचमनीयमाचमनीयमित्यनेनश्रावितेप्रतिगृह्यता
मित्युक्तोर्च्यहस्तेआचमनीयंप्रयच्छेत्॥अथार्च्यःप्रतिगृह्यामाग
न्यशसासंसृजवर्चसातंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टिं
तनूनामितिमंत्रेणसकृदाचम्यस्मार्तमाचमनंकुर्यात्॥ततोर्चकोमधु
पर्कोमधुपर्कोमधुपर्कइत्यन्येनोक्तेप्रतिगृह्यतामितिब्रूयात्॥ततोर्च्यो
र्चकहस्तस्थितमुद्घाटितंमधुपर्कंमित्रस्यत्वाचक्षुषाप्रतीक्षइतिमंत्रे
णावेक्ष्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृ
ह्णामीतिमंत्रेणसकृदालोड्यतूष्णींसकृदनामिकांगुष्ठाभ्यामादायब
हिर्निक्षिप्यपुनर्द्विरालोड्यनिरीक्ष्ययन्मधुनोमधव्यंपरमंरूपमन्ना
द्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोस
नीतिमंत्रेणानामिकांगुष्ठाभ्यामादायत्रिःप्राश्नीयात्॥मधुवाताऋता
यतइत्यादिभिस्त्रिभिर्ऋग्भिःप्रत्यृचंत्रिःप्राश्नीयाच्छेषंशिष्यादिभ्यो
दद्यात्सर्वंवाभक्षयेत्॥प्राकृदिश्यसंचरेवाप्रक्षिपेत्॥अथाचम्यवाङ्
मनसोस्त्वितिकराग्रेणमुखंस्पृशेत्॥नसोर्मेप्राणोस्त्वितिदक्षिणवाम
नासारंध्रे अक्ष्णोर्मेचक्षुरितिदक्षिणोत्तरेचक्षुषीकर्णयोर्मेश्रोत्रमस्त्वि
तिमंत्रावृत्त्यादक्षिणोत्तरौकर्णौस्पृशेत्॥एवंबाह्वोर्मेबलमस्त्वितिद

क्षिणोत्तरौबाहू॥ऊर्वौर्मेओजोस्त्वितियुगपदूरूअरिष्टानिमेंगानित
नूस्तन्वामेसहसेत्विति शिरःप्रभृतिपादांतंसर्वांगमुभाभ्यांहस्ताभ्यांस्पृ
शेत्॥ततःखड्गहस्तोर्चकःगौर्गौर्गौरालभ्यतामितिब्रूयात्॥अथाच्योंमा
तारुद्राणामित्यादिपाप्माहतः॥ॐमित्युपांशूक्त्वोत्सृजततृणान्यत्तु
इत्युच्चैःप्रतिब्रूयात्॥ततोवरईशान्यांदिशिचतुर्हस्तायांवेदिकायांलौ
किकंनिर्मथ्यवाग्निंस्थापयित्वापश्चादग्नेस्तृणपूलकंकटंवास्थापयेत्
॥ततःकन्यापितावस्त्रचतुष्टयंवरायप्रयच्छेत्॥वरश्चतेषुमध्येजरांग
च्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावाशतंचजीवामिशरदः
सुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववासइतिमंत्रेणा
परमितिवासोयुगंकुमारींपरिधाप्यपरिधास्येयशोधास्येदीर्घायुत्वाय
जरदष्टिरस्मिशतंचजीवामिशरदःपुरुचीरायस्पोषमभिसंव्ययिष्य
इत्यनेनैकंयशसामाद्यावापृथिवीयशसेंद्राबृहस्पती॥यशोभगश्चमा
विदद्यशोमाप्रतिपद्यतामित्यपरमितिवासोयुगंपरिदध्यात्॥अथवधू
पिताघरस्परंसमंजेथामितिसंप्रेष्यवधूवरौसमंजयतिततोवरःसमंज
तुविश्वेदेवाःसमापोहृदयानिनौ॥संमातरिश्वासंधातासमुदेष्ट्रीदधा
तुनाविति पठेत्॥अथकन्यापितोदङ्मुखःकुशजलाक्षतपाणिरमुक
गोत्रस्यामुकप्रवरस्याऽमुकशर्मणःप्रपौत्रायामुकशर्मणःपौत्रायामुक
शर्मणःपुत्रायेतिवरपक्षेअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःप्रपौ
त्रीममुकशर्मणःपौत्रीममुकशर्मणःपुत्रीमितिकन्यापक्षेएवंपुनर्वारद्व
यमुक्त्वाप्राङ्मुखोपविष्टायामुकगोत्रायामुकप्रवरायाऽमुकशर्मणेप्र
त्यङ्मुखोपविष्टाममुकगोत्राममुकप्रवराममुकनाम्नीमिमांकन्यांसाल
कारांप्रजापतिदैवत्यांपुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसम
फलप्राप्तिकामोभार्यात्वेनतुभ्यमहंसंप्रददइत्युक्त्वासकुशाक्षतजलं
कन्याहस्तेवादक्षिणहस्तेदद्यात्॥वरश्चद्यौस्त्वाददातुपृथिवीत्वाप्र
तिगृह्णात्वितिमंत्रेणतांप्रतिगृह्यकोदादित्यादिकामस्तुतिंपठेत्॥अथ
कन्यापिताकन्यादानप्रतिष्ठासिद्ध्यर्थंसुवर्णंगोमिथुनंचदक्षिणांदत्वा
यौतकत्वेनगोमहिष्यश्वग्रामादियथासंभवंदद्यात्॥ततोवरोपदेषि
मनसादूरंदिशोनुपवमानोवाहिरण्यपर्णोवैकर्णःसत्वामन्मनसांकरो

त्वमुकिइत्यनेनमंत्रेणप्रतिग्रहस्यानाहूधूंगृहीत्वानिष्क्रम्याग्निसमी
पमागच्छेत्॥अत्रावसरेकश्चिज्जलपूर्णकुंभंस्कंधेनिधायाग्नेर्दक्षिण
तउत्तरतोवाभिषेकपर्यंतंवाग्यतऊर्ध्वंतिष्ठेत्॥ततोवधूपित्रापरस्परंस
मीक्षेथामितिप्रेषितोवरःसमीक्षमाणांसमीक्षमाणअघोरचक्षुरपति
घ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाःवीरसूर्देवकामास्योनाशन्नोभवद्वि
पदेशंचतुष्पदेसोमःप्रथमोविविदेगंधर्वोविविदउत्तरःतृतीयोअग्निष्टेप
तिस्तुरीयस्तेमनुष्यजः॥सोमोददद्गंधर्वायगंधर्वोददग्नये॥रयिं
चपुत्रांश्चादादग्निर्मह्यमथोइमांसानःपूषाशिवतमामासानऊरूउशती
विहर॥यस्यामुशंतःप्रहरामशेपंयस्यामुकामाबहवोनिविष्ट्यैइतिप
ठित्वाप्रदक्षिणमग्निंपरीत्यपश्चादग्नेःपूर्वस्थापिततेजनीकटयोर
न्यतरस्मिन्दक्षिणपादमग्रेःकृत्वोपविशेत्॥स्वदक्षिणतोवधूंचोप
वेश्यब्रह्मोपवेशनादिचरुवर्जपर्युक्षणांतंकर्मकुर्यात्॥इयांस्तुविशे
षः॥शमीपलाशमिश्रालाजाःअश्माअश्वंलोहितमानडुहंचर्मवधू
भ्राताशूर्पंदृढपुरुषआचार्योयवरद्रव्यमित्येतावंतिवस्तून्युपकल्प
येत्॥नप्रोक्षेत्॥ततःस्रुवमादायदक्षिणंजान्वाच्यब्राह्मणान्वारब्धः
प्रजापतयेस्वाहाइदंप्रजापतये॥इंद्रायस्वाहाइदमिंद्रायेत्याघारौ॥
अग्नयेस्वाहाइदमग्नये॥सोमायस्वाहाइदंसोमायेत्याज्यभागौ॥
ॐभूःस्वाहाइदमग्नये॥ॐभुवःस्वाहाइदंवायवे॥ॐस्वःस्वाहाइ
दंसूर्याय॥त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः
॥यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा
इदमग्नीवरुणाभ्यां॥सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसो
व्युष्टौ॥अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा
इदमग्नीवरुणाभ्यां॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमया
असि॥अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहाइदंवरुणायस
वित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः॥उदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसो
अदितयेस्यामस्वाहाइदंवरुणायब्रह्मणान्वारब्धोजुहुयात्ततोराष्ट्र
भृतोयथा॥ऋताषाड़ृतधामाग्निर्गंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैं

स्वाहावाट्॥इदमृताषाहेऋतधाम्नेऽग्नयेगंधर्वाय॥ऋताषाडृतधामा
ग्निर्गंधर्वस्तस्यौषधयोप्सरसोमुदोनामताभ्यःस्वाहा।इदमोषधिभ्यो
प्सरोभ्योमुद्भ्यः॥संहितोविश्वसामासूर्योगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहावाट्॥इदंसंहितायविश्वसाम्नेसूर्यायगंधर्वाय॥संहितोवि
श्वसामासूर्योगंधर्वस्तस्यमरीचयोप्सरसआयुवोनामताभ्यःस्वाहा
वाट्।इदंसुषुम्णेसूर्यरश्मयेचंद्रमसेगंधर्वाय॥सुषुम्णःसूर्यरश्मिश्चं
द्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहा॥इदंनक्षत्रे
भ्योप्सरोभ्योभेकुरिभ्यः।इषिरोविश्वव्यचावातोगंधर्वःसनइदंब्रह्मक्ष
त्रंपातुतस्मैस्वाहावाट्॥इदमिषिरायविश्वव्यचसेवातायगंधर्वाय।इ
षिरोविश्वव्यचावातोगंधर्वस्तस्यापोअप्सरसऊर्जोनामताभ्यःस्वाहा
इदमद्भ्योप्सरोभ्यऊर्ग्भ्यः॥भुज्युःसुपर्णोयज्ञोगंधर्वःसनइदंब्रह्मक्षत्रं
पातुतस्मैस्वाहावाट्।इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय।भुज्युःसुप
र्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसस्तावानामताभ्यःस्वाहा॥इदंद
क्षिणाभ्योप्सरोभ्यस्तावानामताभ्यःप्रजापतिर्विश्वकर्मामनोगंधर्वःस
नइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंप्रजापतयेविश्वकर्मणेमनसे
गंधर्वाय।प्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामान्यप्सरसए
ष्टयोनामताभ्यःस्वाहाइदमृक्सामभ्योप्सरोभ्यएष्टिभ्यः॥अथजया
होमः॥चित्तंचस्वाहाइदंचित्ताय।चित्तिश्चस्वाहाइदंचित्त्यै॥आकूतंच
स्वाहाइदमाकूताय॥आकूतिश्चस्वाहाइदमाकूत्यै॥विज्ञातंचस्वाहाइ
दंविज्ञाताय।विज्ञातिश्चस्वाहाइदंविज्ञात्यै।मनश्चस्वाहाइदंमनसे॥श
क्वरीश्चस्वाहाइदंशक्वरीभ्यः॥दर्शश्चस्वाहाइदंदर्शाय॥पूर्णमासश्च
स्वाहाइदंपूर्णमासाय॥बृहच्चस्वाहाइदंबृहते।रथंतरंचस्वाहाइदंरथं
तराय॥प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाजयेषु॥तस्मैविशः
समनमंतसर्वाःसउग्रःसइहव्योबभूवस्वाहाइदंप्रजापतयेजयानिंद्रा
य।अथाभ्यातानाः।अग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मि
न्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांस्वाहा॥इ
दमग्नयेभूतानामधिपतये।एवंसमामवधित्सेवमादिस्वाहाकारांतस्यो
त्तरत्राप्यनुषंगः।इंद्रोज्येष्ठानामधिपतिः।इदमिंद्रायज्येष्ठानामधिपत

ये॥यमःपृथिव्याअधिपतिः॥इदंयमायपृथिव्याअधिपतये॥वायुरं
तरिक्षस्याधिपतिः॥इदंवायवेंतरिक्षस्याधिपतये॥सूर्योदिवोधिप
तिः।इदंसूर्यायदिवोधिपतये॥चंद्रमानक्षत्राणामधिपतिः॥इदंचंद्र
मसेनक्षत्राणामधिपतये॥बृहस्पतिर्ब्रह्मणोधिपतिः।इदंबृहस्पत
येब्रह्मणोधिपतये।मित्रःसत्यानामधिपतिः।इदंमित्रायसत्यानाम
धिपतये।वरुणोपामधिपतिः।इदंवरुणायाःपामधिपतये॥समुद्रः
स्रोतानामधिपतिःइदंसमुद्रायस्रोतानामधिपतये॥अन्नंसाम्रा
ज्यानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्०।इदमन्नायसाम्रा
ज्यानामधिपतये॥सोमोषधीनामधिपतिः॥इदंसोमायौषधीनामधि
पतये॥सविताप्रसवानामधिपतिः॥इदंसवित्रेप्रसवानामधिपतये
॥रुद्रःपशूनामधिपतिः।इदंरुद्रायपशूनामधिपतये॥उदकोपस्पर्श
नं॥त्वष्टारुद्राणामधिपतिः॥इदंत्वष्ट्रेरुद्राणामधिपतये॥विष्णुःपर्व
तानामधिपतिः०।इदंविष्णवेपर्वतानामधिपतये॥मरुतोगणानाम
धिपतिःसमावत्वस्मिन्०।इदंमरुद्भ्योगणानामधिपतिभ्यः।पितरः
पितामहाःपरेवरेततामहाइहमावत्वस्मिन्०।स्वाहा।इदंपितृभ्यःपि
तामहेभ्यःपरेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः॥उदकस्पर्शनं॥अ
ग्निरैतुप्रथमोदेवतानांसोस्यैप्रजांमुंचंतुमृत्युपाशात्॥तदयंराजा
वरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदात्स्वाहा॥इदमग्नये॥इमा
मग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः।अशून्योपस्था
जीवतामस्तुमातापौत्रमानन्दमभिविबुध्यतामियंस्वाहा॥इदमग्न
ये॥स्वस्तिनोअग्नेदिवापृथिव्याविश्वानिधेह्ययथायजत्र।यदस्यांम
हिदिविजातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्रंस्वाहा॥इदमग्नये
॥सुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजरन्नआयुः॥अपैतुमृ
त्युरमृतंमआगाद्वैवस्वतोनोअभयंकृणोतुस्वाहाइदंवैवस्वताय॥प
रंमृत्योअनुपरेहिपंथांयस्तेअन्यइतरोदेवयानात्॥चक्षुष्मतेशृण्वते
तेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्स्वाहाइदंमृत्यवे॥उदकोप
स्पर्शनं॥ततोवधूभ्राताशूर्पेपकल्पितान्शमीपलाशमिश्रान्लाजान्
शूर्पेधृतानंजलिनादायवधूंजलावावपेत्॥ततःप्राङ्मुखीवधूस्तिष्ठ

नीअर्यमणंदेवंकन्याअग्निमयक्षत॥सनोअर्यमादेवःप्रेतोमुंचतु
मापतेःस्वाहेत्यनेनमंत्रेणांजलिस्थान्लाजान्ततीयांशंहुत्वाइदमर्य
म्णे इत्युक्त्वाइयंनार्युपब्रूतेलाजानावपंतिकाआयुष्मानस्तुमेपतिरे
धंतांज्ञातयोममस्वाहेत्यनेनांजलिस्थलाजाहुत्वाइदमग्नये॥इ
त्युक्त्वा॥इमान्लाजानावपाम्यग्नौसमृद्धिकरणंतव॥ममतुभ्यंचसं
वदनंतदग्निरनुमन्यतामियंस्वाहेत्यनेनसर्वान्लाजान्हुत्वाइदमग्न
यइतिब्रूयात्॥ततोवरोगृह्णामितेसौभगत्वायहस्तंमयापत्याजरद
ष्टिर्यथासः।भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः
अमोहमस्मिसात्वंसात्वमस्यमोअहं।सामाहमस्मिऋक्त्वंद्यौरहंपृ
थिवीत्वं॥तावेवविवहावहैसहरेतोदधावहैप्रजांप्रजनयावहैपुत्रां
न्विदावहैबहून्तेसंतुजरदष्टयः।संप्रियौरोचिष्णूसुमनस्यमानौ।प
श्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतमित्यनेनमंत्रेण
वध्वासांगुष्ठंदक्षिणकरंगृह्णीयात्॥ततोवध्वादक्षिणंपादंधृत्वाआरो
हेममश्मानमश्मेवत्वंस्थिराभव॥अभितिष्ठपृतन्यतोबाधस्वपृतना
यतइतिमंत्रेणाग्नेरुत्तरस्थिताश्मोपरिसंस्थाप्य॥सरस्वतिप्रेदमवसु
भगेवाजिनीवति॥यांत्वांविश्वस्यभूतस्यप्रजायामस्याग्रतः॥यस्यांभूतं
समभवद्यस्यांविश्वमिदंजगत्॥तामद्यगाथांगास्यामियास्त्रीणामुत्त
मंयशइतिप्रगीयतुभ्यमग्नेपर्यवहन्त्सूर्यांवहतुनासह।पुनःपतिभ्यो
जायांदाग्नेःप्रज यासहेतिमंत्रंपठित्वावध्वासहाग्निंपरिक्रम्यैवं
पुनर्द्विवारंलाजावपनादिपरिक्रमणांतंकुर्यात्॥ततोवधूभ्रातासूर्प
कोणप्रदेशेनसर्वान्लाजान्वध्वंजलावावपेत्॥अथास्यापवध्वाभ
गायस्वाहेत्यनेनहुत्वेदंभगायेतित्यागेकृतेवरस्तयासहाचारात्तूष्णीं
चतुर्थपरिक्रमणंकृत्वाब्रह्मणान्वारब्धःप्रजापतयेस्वाहेतिहुत्वेदंप्र
जापतयइतित्यागंकुर्यात्॥ततोवधूर्वरेणेकमिषेविष्णुस्त्वानयत्वित्युक्ते
एकंपदमुदक्दद्यात्॥द्वेऊर्जेविष्णुस्त्वानयत्वित्युक्तेद्वितीयं।त्रीणि
रायस्पोषायविष्णुस्त्वानयत्वित्युक्तेतृतीयं।चत्वारिमायोभवायवि
ष्णुस्त्वानयत्वित्युक्तेचतुर्थं।पंचपशुभ्योविष्णुस्त्वानयत्वित्युक्तेपंच
मं॥षडृतुभ्योविष्णुस्त्वानयत्वित्युक्तेषष्ठं॥सखेसप्तपदीभवसामाम

सुव्रताभवविष्णुस्त्वानयत्वित्युक्तेसप्तमंपदंदद्यात्॥अथवरःपूर्णाभि
षेकार्थंधृतकुंभादुदकमादायापःशिवाःशिवतमाःशांताःशांततमा
स्तेकृण्वंतुभेषजमित्यनेनमंत्रेणवधूमूर्द्धन्यभिषिंच्यपुनरुदकमादा
यापोहिष्ठेतितृचंपठित्वाभिषिच्यसूर्यमुदीक्षस्वेतिवधूंसंप्रेष्यतच्चक्षु
रित्यादिशृणुयामशरदःशतमित्यंतंमंत्रंपठित्वासूर्यमुदीक्षतेतस्याद
क्षिणांसस्योपरिहस्तंनीत्वा।ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तं
तेअस्तु।ममवाचमेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यमि—
तिमंत्रेणतद्धृदयमालभ्यसुमंगलीरियंवधूरिमांसमेतपश्यत।सौभा
ग्यमस्यैदत्वायाथास्तंविपरेतनेत्यनेनतामभिमंत्र्याचारात्तद्वामभा
गेउपवेश्यतस्याःसीमंतेवरःसिंदूरंदद्यात्॥अथाग्नेःप्रागुदग्वापूर्वक
ल्पितेउत्तरलोम्निप्राग्ग्रीवेआनडुहेचर्मणिइहगावोनिषीदंत्विहाश्वा
इहपूरुषाः।इहोसहस्रदक्षिणायज्ञइहपूषानिषीदत्विति।इतिमंत्रेणव
धूंहृष्टपुरुषोवरोवोत्थाप्योपवेशयेत्।ततोवरःपूर्ववत्स्वस्थानमुप
विश्यब्रह्मान्वारब्धोग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृते।इति
स्विष्टकृद्धोमंकृत्वासंस्रवप्राशनब्रह्मणेपूर्णपात्रंवरयोरन्यतरंदक्षि
णात्वेनदत्वास्वाचार्यायवरंदत्वाभूयसींसंकल्प्यादित्यस्तमितेध्रु
वमीक्षस्वेतिवधूंप्रेष्यध्रुवमसिध्रुवंत्वापश्यामिध्रुवैधिपोष्येमयिम
ह्यंत्वादाद्बृहस्पतिः॥मयापत्याप्रजावतीसंजीवशरदःशतमितिमंत्रं
वाचयित्वाध्रुवमीक्षयीततोदंपतीविवाहादारभ्यत्रिरात्रमक्षारल
वणाशिनावधःशायिनौसंवत्सरंद्वादशरात्रंषड्रात्रंत्रिरात्रंवाब्रह्म
चारिणौस्यातामिति॥इतिविवाहप्रयोगः॥चर्मण्वतीतरणिजाशुभसं
गमस्यसान्निध्यभाजिकृतशालिनिमध्यदेशे॥ रम्या ताभरेहनगरी
किलतत्रराजाराजीवलोचनरतोभगवंतदेवः॥ ॥इतिश्रीसेंगरवंशाव
तंसश्रीमहाराजाधिराजश्रीभगवंतदेवादिष्टमीमांसकभट्टशंकरा
त्मजभट्टनीलकंठकृतेभगवंतभास्करेसंस्कारमयूखःसमाप्तः॥ ॥

इति सूचीपत्रम् सं०

अथशांतिमयूखः प्रारभ्यते

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः ॥
काशीसंस्कृतमुद्रापामंकितोयंशिलाक्षरैः १

श्रीकाशीजीमे
ज्ञानवापीकेपूर्वफाटकपर
श्रीविश्वनाथजीकेपास
महाराजशिवलालदुबेजीकेमकानमे
काशीसंस्कृतयंत्रालयमेछपी
जिनकोलेनाहोयउनकोइसकार्यकेसंपादक
श्रीयुतबाबूवाराणसीप्रसादजीकेपास
याकचौरीगलीमे
भाईप्रतापसिंहजीकेदुकानपरमिलेगी
मिति आश्विनकृष्ण ७ सोमवार
संवत १९३६
तारीख ८ माहसितंबर सन् १८७९ ईसवी

दनुनिगदिताशांतिरेवंक्रमेणख्याताग्रंथेन्मुदेबुधजनसुखदाह्लाद
शेतेमयूखाः॥१३॥भगवंतभास्कराख्येग्रंथेस्मिन्शिष्टसंमतेवचनतः॥शां
तिविवेकमयूखःप्रतन्यतेनीलकंठेन॥१४॥अस्यष्टपापनिदानकैहिकमा
त्रानिष्टनिवर्त्तकंपापाप्रयोजकंवैधंकर्मशांतिकं॥स्याद्विह्रद्दानादाव
तिप्रसंगंवारयितुंनिदानकांतं॥आमुष्मिकानिष्टनिवर्त्तकेतंवारयितुमै
हिकेति॥प्रायश्चित्तंवारयितुंमात्रपदं॥प्रायश्चित्तंत्वामुष्मिकानिष्टनिव
र्त्तकमपि॥अभिचारमप्यभिचारादौवारयितुंपापाप्रयोजकमिति॥त
योःफलतोहिंसात्वेनतदनुष्ठानेप्रायश्चित्तोक्तेश्च पापप्रयोजकत्वात्
॥अनिष्टनिवर्त्तकत्वंचशांतिकस्यतन्निदानपापनाशरूपसामग्रीविघ
टकत्वेनपुष्टिफलकंवैधंकर्मपौष्टिकं॥तत्रपरिभाषामार्कंडेयपुराणे॥
शिरःस्नानश्चकुर्वीतदैवंपित्र्यमथापिवा॥प्राङ्मुखोदङ्मुखोवापिश्म
श्रुकर्मचकारयेत्॥तत्रैव॥देवार्चनादिकर्माणितथागुर्वभिवादनं॥कु
र्वीतसम्यगाचम्यप्रयतोपिसदाद्विजः॥वृहन्मनुः॥प्राणानायम्यकुर्वीत
सर्वकर्माणिसंयतः॥मार्कंडेयः॥संकल्प्यविधिवत्कुर्यात्स्नानदानव्रतादि
कं॥देवलः॥मासपक्षतिथीनांचनिमित्तानांचसर्वशः॥उल्लेखनमकुर्वा
णोनतस्यफलभाग्भवेदिति॥मासपक्षतिथयःप्रयोगाधिकरणभूताः
सर्वेपि॥यत्तुअनेकदिनसाध्येकर्मण्याद्यदिनेसंकल्पकालीनांतिथि
मधिकरणत्वेनोल्लिख्यज्योतिष्टोमेनाहंयक्ष्यइत्यादिसंकल्पवाक्यं
प्रयुंजतेयायजूकाः॥तत्तुपदानामन्वयायोगादनादर्त्तव्यं॥यदपिकेचि
त्तेनतेनरूपेणप्रयोगांगतयाविहितानामेवमासादीनामुल्लेखइति॥
तदपिनःमानाभावात्॥अविहितमासादिकआधानादौमासपक्षतिथी
नांज्योतिष्टोमएकादशीव्रतादौचमासपक्षयोरुल्लेखाभावप्रसंगाच्च॥
अतोज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुल्लेखः॥एवमन्यत्रापी
तिदिक्॥अत्रचशूद्राणामप्यधिकारः॥श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्म
णमग्रतइत्यादिवाक्येषुश्रावणस्यदृष्टार्थतयारागप्राप्तत्वेनतद्बुध्यै
वधर्म्योपपत्तेर्निजविवक्षयाश्रवणविधानात्तेषांपुराणश्रवणेधिकारेणज्ञा
नसद्भावात्॥वैदिकमंत्राभावेकथंतत्कर्मण्यधिकारइतिचेत्शृणु
धर्मेप्सवस्तुधर्मज्ञाःसतांधर्ममनुष्ठिताः॥मंत्रवर्जंनदुष्यंतिप्रशंसांप्रा

कुर्वंतिचेतिमनुनामंत्रवर्जनात्॥यत्तु॥मेधातिथिर्मंत्रवर्जितेषूपवा
सादिष्वधिकारार्थमिदंनतुसमंत्रकेषुमंत्रपर्युदासेनाधिकारार्थमि
तितन्न॥अमंत्रकोपवासादिषुश्रवणविधिनैवाधिकारसिद्धावेतद्वा
क्यानर्थक्यापत्तेः॥अतएव॥मोक्षधर्मेपि॥मंत्रवर्जंनदुष्यंतिकुर्वाणाः
पौष्टिकींक्रियामिति॥अत्रैतद्वाक्यस्यपौराणत्वेनतत्सामान्योपस्थि
तपौराणक्रियोद्देशेनमंत्रवर्जनविधौपौष्टिकीमित्यस्योद्देश्यविशेष
णत्वेनाविवक्षितत्वं॥एवंमनुवाक्यस्यैतस्यचैकेवक्ष्युनिर्मूलत्वेनक
ल्प्यते॥गृह्यपरिशिष्टे॥आदौविनायकःपूज्यअंतेतुकुलदेवताः॥शौ
नकः॥पुण्याहवाचनविधिंवक्ष्यामोऽथयथाविधि॥मयोक्तुःकर्मणामा
दावंतेचोदयसिद्धये॥कर्मप्रदीपे॥कर्मादिषुतुसर्वेषुमातरःसगणा
धिपाः॥पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः॥प्रतिमासुचशुद्धासु
लिखित्वावापटादिषु॥अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः॥कुड्य
लग्नांवसोर्धाराःसप्तवारंघृतेनतु॥कारयेत्पंचधारावानातिनीचानचो
च्छ्रिताः॥आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः॥षड्भ्यःपितृभ्य
स्तदनुश्राद्धदानमुपक्रमेदिति॥षड्भ्यइतिकानीयछंदोगपरे॥अन्येषां
तुनवदैवत्यं॥अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि॥अत्रमातुःपृ
थक्श्राद्धमन्यत्रपतिनासहेतिवचनात्॥सर्वत्राचार्योयजमानसम
शाखीयएव॥अन्यथाचार्यस्ययजमानशाखाध्ययनाभावेतच्छाखी
यपदार्थानांनिर्वाहएवनस्यात्॥स्वशाखीयेनानुष्ठानेतुवैगुण्यं॥तथा
चपराशरः॥यःस्वशाखांपरित्यज्यपरशाखांसमाश्रयेत्॥अप्रमाण
मृषिंकृत्वासोंधेतमसिमज्जतीति॥ऋत्विजस्तुभिन्नशाखीयाअपि
सर्वेप्याचार्यब्रह्मर्त्विजोमधुपर्केणपूज्याः॥ऋत्विजोवृत्वामधुपर्कमाहरे
दित्याश्वलायनोक्तेः॥संपूज्यमधुपर्केणऋत्विजःकर्मकारयेदिति वि
श्वामित्रोक्तेश्च॥योऋत्विक्यच्छाखीयंकर्मकरोतितच्छाखोक्तेनप्र
कारेणकांडानुसमयेनमधुपर्कंकुर्वंतीतियाज्ञिकाःकेचित्॥परेयजमान
शाखोक्तेन॥यजमानेनस्वशाखीयाऋत्विग्भिश्चस्वस्वशाखीयाःप
दार्थाअनेकेषुऋत्विक्षुपदार्थानुसमयेनानुष्ठेयाइतितुयुक्तंनतच्छा
खाध्ययनजन्यज्ञानस्यांगत्वादेकप्रयोगविधिपरिग्रहाच्च॥ऋत्विग्भ्यो

देयमुक्तं लिंगपुराणे॥ वस्त्रयुग्मं तथा ऽप्यूरं केयूरं कर्णभूषणं॥ अंगुलीभूषणं चैव मणिवंधस्य भूषणं॥ कंठाभरणयुक्तानि शास्त्रे धर्मज्ञ भूषणः पुरोहिताय दत्वाथ स्मृतिग्भ्यश्चापि दापयेदिति॥ आपः पूर्यंते स्मिन्नित्यपूर्जलपात्रं॥ मत्स्यपुराणे॥ यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः॥ पश्चिमद्वारमाश्रित्य प्रविशेद्यागमंडपं॥ संग्रहे॥ समंततश्च सिद्धार्थान्किरेद्रक्षोघ्नमंत्रतः॥ प्रतिष्ठासारे॥ सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं॥ आपोहिष्ठा तृचेनैव ततः स्वस्त्ययनं जपेत्॥ अत्र हेमाद्रौ वास्तुपूजाप्युक्ता॥ स मंडपं प्रविश्याथ तोरणादि प्रपूज्य च॥ वास्तुयागं ततः कुर्यात्प्रासादे मंडपे ऽथवा॥ वास्तुमंडलेच नैरृत्यां दिशि वास्त्वीशं ब्रह्माद्यांश्च समर्चयेदिति शारदोक्तेः॥ वास्तुहोमस्तु भिन्नस्थंडिले कार्यः॥ मुख्यायतने वा॥ तत्र प्यादौ पृथक् प्रयोगतया प्रधानसमतंत्रतया वा॥ शारदातिलके तु होमस्त्वनोक्तः॥ सर्वत्र शांतिकं पौष्टिकं महादानादि लौकिकाग्नौ कार्य्यं॥ श्रौतस्मार्ताग्निप्राप्तेर्मानाभावात्॥ यत्तु मनुः॥ वैवाहिके ग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि॥ पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृहीति तत्स्पष्टं गृह्योक्तपरं॥ वैवाहिक इति च दारदायाद्यकालिकयोरप्युपलक्षकं॥ तत्सजातीयसंस्कारस्यैव साधनतावच्छेदकत्वात्॥ यदपि याज्ञवल्क्यः॥ स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही॥ दायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति॥ तत्रापि सामान्यं स्मार्तपदं गार्ह्ये उपसंह्रियते॥ एतेनाहवनीयादयो निरस्ताः॥ यदाहवनीये जुहोतीत्यादावश्वप्रतिग्रहेष्टौ वैदिकत्वसाम्येन वैदिकाश्वदानप्रतिग्रहोपस्थितिवत्वैदिकहोमोपस्थितेश्च॥ यद्यप्यत्र गार्ह्यस्मार्त्तएव श्रौतं च वैतानिकएवेति नियमनस्मृत्युक्तेपि कर्मणि श्रौतस्मार्त्तयोरग्न्योः प्राप्तिः संभव्यते॥ तथापि न साहवनीयावसथ्यत्वादिरूपेण॥ किंतु लौकिकसाधारणज्वलनत्वेनैव॥ अवेधाहुति प्रक्षेपे आहवनीयत्वादि विघातापत्तेश्च॥ अतएव सर्वाधानिन औपासनाभावाद्वैतानिकाग्नावेश्च तेन गार्ह्ये लौकिकएव कार्य्यं॥ अमुमेव सर्वमर्थं स्मृत्यर्थसारकृदपि संजग्राह॥ गार्ह्यमौपासने कुर्यात्सर्वाधानी तु लौकिके॥ स्मार्त्तं च लौकिके कुर्याच्छ्रौतं वैतानिकाग्निष्विति॥ यत्तु नारायणवृत्तौ॥ सर्वाधानिनासीमंतोन्नयनादिगा

लौकिकमोर्थस्मार्त्ताग्निरुत्पादनीयइति॥तत्रमूलमन्वेष्यं॥यदपिविज्ञाने
श्वरोग्रहयज्ञऔपासनइत्यूचे॥तत्रापिमूलमन्वेष्यं॥कात्तीयपरंवात
नत्सूत्रेतथाम्नानात्॥अतएवसविनायकशांतौलौकिकाग्निमेवाऽवो
चत्॥अतःस्मृत्युक्तंलौकिकएवेतिकृत्यरत्नाकरे।शुभपात्रंतुकांस्यं
स्यात्तेनाग्निंप्रणयेद्बुधः।तस्याभावेशरावेणनवेनाभिमुखंचतं॥गोभि
लीये॥आहूयचैवहोतव्योयोयत्रविहितोनलः॥तथा॥लक्षहोमेचव
न्हिःस्यात्कोटिहोमेहुताशनः॥पूर्णाहुत्यामृडोनामशांतिकेवरदःस
दा॥अन्येषुसंस्कारादिकर्मस्वग्नेर्नामविशेषाःप्रयोगरत्नेज्ञेयाः॥हो
मेविशेषोगोभिलीये॥नमुक्तकेशोजुहुयान्नातिपातितजानुकः॥उत्ता
नेनैवहस्तेनअंगुष्ठाग्रेणपीडितं॥संहतांगुलिपाणिस्तुवाग्यतोजुहु
याद्धविरिति॥बहुकर्तृकेहोमेप्रत्याहुतित्यागाशक्तौहोमारंभएवसर्वा
देवताश्चतुर्थ्यंतेनोद्दिश्यसर्वाणिद्रव्याणित्यजेदितिहेमाद्र्यादयः॥अथ
विनायकस्नपनं॥याज्ञवल्क्यः॥विनायकःकर्मविघ्नसिद्ध्यर्थंविनियोजि
तः॥गणानामाधिपत्येचरुद्रेणब्रह्मणातथा॥तेनोपसृष्टोयस्तस्यल
क्षणानिनिबोधत॥स्वप्नेऽवगाहतेत्यर्थंजलंमुंडांश्चपश्यति॥काषाय
वाससश्चैवक्रव्यादांश्चाधिरोहति॥अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्राऽवति
ष्ठति॥व्रजन्नपितथात्मानंमन्यतेऽनुगतंपरैः॥उपसृष्टःउपद्रुतः॥स्व
नेऽत्योतसाऽपङ्क्तिमतेतत्रमज्जनितावानत्ववगाहनमात्रंविवक्षितंतस्य
शुभसूचकत्वात्॥अंत्यजैश्चंडालैः॥अत्यदनलक्षणान्याह॥विमना
विफलारंभःसंसीदत्यनिमित्ततः॥तेनोपसृष्टोलभतेनराज्यंराजनंद
नः॥कुमारीनैवभर्तारमपत्यंगर्भमंगना॥आचार्यत्वंश्रोत्रियश्चनशि
ष्योऽध्ययनंतथा॥वणिक्लाभंनचाप्नोतिकृषिंचापिकृषीवलः॥संसी
दतिकारणंविनादीनमनस्कोभवति॥एतदुपलक्षणंयस्ययदिष्टंसचे
दिष्टसामग्रीसत्वेतन्नप्राप्नोतितदातदुपद्रुतोबोध्यः॥एतदुपद्रवपरिहा
रार्थंचकर्माह॥स्नपनंतस्यकर्तव्यंपुण्येऽह्निविधिपूर्वकं॥अत्रपुण्ये
ऽह्नीत्यविशेषेपिविशेषोऽपरार्केभविष्ये॥शुक्लपक्षेचतुर्थ्यांचवारेणाधि
षणस्यच॥तिष्येचवीरनक्षत्रेतस्यैवपुरतोनृपेति॥अत्रादौदेवतापू
जोक्तातत्रैव॥व्योमकेशंतुसंपूज्यपार्वतींभामजंतथा॥कृष्णस्यपित

रंकेतुंअर्क्कमारंसितंतथा॥धिषणंकुंदपुत्रंचकोणंलक्ष्मंचभारत॥वि
धुंतुदंवाहुलेयंनंदकस्यचधारिणमिति॥व्योमकेशःशिवः॥भाधजो
गणेशः॥आरोभौमः॥सितःशुक्रः।धिषणोगुरुः।कुंदपुत्रोबुधः।कोणःश
नैश्चरः।लक्ष्मतद्वांश्चंद्रः।वाहुलेयःस्कंदः।नंदकधारीकृष्णः॥गौरसर्ष
पकल्केनसाज्येनोत्सादितस्यच॥सर्वौषधैःसर्वगंधैर्विलिप्तशिरस
स्तथा॥भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजैःशुभाः॥गौरसर्षपपि
ष्टेनगोघृतयुक्तेनोत्सादितस्योद्वर्तितस्य॥सर्वौषधानिछंदोगपरिशि
ष्टे॥कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं॥वचाकर्चूरमुस्तेचसर्वौषध्यः
प्रकीर्त्तिताःइति॥सर्वगंधैश्चंदनकुंकुमागरुकस्तूरिकाजातीफलादि
भिः।विद्वांसितवस्त्रप्रच्छादितश्रीपर्णीपीठभद्रासनंस्वस्तिवाच्याःस्व
स्तिवाचनीयाः॥ब्राह्मणद्वारास्वस्तिवाचनंकारयेदित्यर्थः॥अश्वस्था
नाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥मृत्तिकांरोचनांगंधंगुग्गुलुं
चाप्सुनिक्षिपेत्॥याआहृताएकवर्णैश्चतुर्भिःकलशैर्ह्रदात्॥चर्मण्या
नडुहेरक्तेस्थाप्यभद्रासनंततः॥आनडुहंचर्मचवेद्यांप्राग्ग्रीवमूर्ध्वलो
मचस्थाप्यमितिविज्ञानेश्वरः॥याआपःतेचत्वारोपिकलशाभद्रासना
त्पूर्वादिचतुर्दिक्षुस्थाप्याइतिसांप्रदायिकाः।पूर्वादिदिक्क्रमावस्थि
तकलशोदकेनाभिषेकक्रमेणमंत्रानाह॥सहस्राक्षंशतधारमृषिभिः
पावनंकृतं॥तेनत्वामभिषिंचामिपावमानीःपुनंतुते॥भगं तेवरुणो
राजाभगंसूर्योबृहस्पतिः॥भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः॥
यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि॥ललाटेकर्णयोरक्ष्णोरापस्त
द्घ्नंतुतेसदा॥सहस्राक्षंबहुशक्तिकं॥पावमानीइत्यनंतरमापइति
शेषः॥भगंकल्याणं॥दौर्भाग्यमकल्याणं॥उदग्दिग्वस्थितेनाभिषेके
पूर्वोक्तास्त्रयएवमंत्राः॥सर्वैश्चतुर्थमितिविज्ञानेश्वरोक्तलिंगात्॥
किंच॥स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणतु॥जुहुयान्मूर्द्धनिकुशान्
सव्येनपरिगृह्यच॥सव्यपाणिगृहीतकुशांतर्हितेसार्षपंतैलमुदुंबरनि
र्मितेनस्रुवेणयजमानमूर्द्धनिजुहुयादाचार्यः।मितश्चसंमितश्चैवत
थाशालकटंकटौ॥कूष्मांडोराजपुत्रश्चेत्येतेस्वाहासमन्विताः॥नाम
भिर्बलिमंत्रैश्चनमस्कारसमन्वितैः ॥नमःस्वस्तिस्वाहेतिचतुर्थीए

तानिषट्विनायकनामानिइतिविज्ञानेश्वरः॥अपरार्केस्तुशालकटंक
टइत्येकवचनांतंपपाठ॥तेनतन्मतेपंचैवाहुतयोभवंति॥अत्रलौकिके
ग्नौस्थालीपाकविधिनाचरुंकृत्वातेभ्यएवाहुतिषट्कंहुत्वेंद्रादिदशलो
कपालेभ्यस्तत्तन्नाम्नाबलिंदद्यात्॥इतिमिताक्षरायां॥तत्रचरुहोमे
इंद्रादिभ्योबलिदानेचमूलंचिंत्यं॥अंतेस्वाहासमन्वितैर्नामभिर्जुहु
यात्॥नमस्कारसमन्वितैश्चेत्यादिभ्यएवबलिंदद्यादितिवक्ष्यमाणे
नसंबध्यतइतितुयुक्तं॥दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वशः॥
कृताकृतांस्तंडुलांश्चपललौदनमेवच॥मत्स्यान्पक्वांस्तथैवामान्मांस
मेतावदेवतु॥पुष्पंचित्रंसुगंधिंचसुरांचत्रिविधामपि॥मूलकंपूरिकापू
पांस्तथैवोंडेरकस्रजः॥दध्यन्नंपायसंचैवगुडपिष्टंसमोदकं॥एता
न्सर्वान्समाहृत्यभूमौकृत्वाततःशिरः॥कृताकृतान्सकृद्वहतान्प
ललौदनः॥तिलपिष्टमिश्रओदनइतिमिताक्षरायां॥अपक्वमांसमिश्र
ओदनइतितुयुक्तं॥पललंक्रव्यमामिषमितिकोशात्॥आमान्पक्वान्
मांसमेतावदेवतु।पक्वमपक्वंमांसमन्यदित्यर्थः॥त्रिविधासुरागौडी
पैष्टीमाध्वीच॥मूलकंकंदाकारोभक्ष्यविशेषइतिमिताक्षरायां॥स्वरू
पतएवग्राह्यमितितुयुक्तं॥उभयमपिग्राह्यमितिमहार्णवे॥अपूपाः
स्नेहपक्वागोधूमविकाराइतिविज्ञानेश्वरः॥उंडेरकाःपिष्टविकारना
नाविधास्तेस्रजइत्युच्यंते॥गुडपिष्टंगुडमिश्रंशाल्यादिपिष्टंअत्रसु
रामांसेवाऽब्राह्मणविषये॥ब्राह्मणेस्तुमांससुरास्थानेतुसलवणंपा
यसंदुग्धंचग्राह्यं॥पायसंलवणोपेतंमांसस्थानेप्रकल्पयेत्॥दुग्धंल
वणसंमिश्रंसुरास्थानेप्रकल्पयेदितिस्मरणादितिमहार्णवादिषुवि
नायकांबिकागायत्रीभ्यांविनायकमंबिकांचनमस्कृत्यपूर्वोक्तद्रव्य
जातंतयोरग्रतउपहृत्यतच्छेषंशूर्पेनिधायचतुष्पथेशूर्पंसंस्थाप्यब
लिंदद्यादेतैर्मंत्रैः॥बलिंगृण्हंत्विमंदेवाआदित्यावसवस्तथा॥मरुतो
श्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥असुरायातुधानाश्चपिशाचाः
मातरोरगाः॥शाकिन्योयक्षवेतालायोगिन्यःपूतनाशिवाः॥जंभकाःसि
द्धगंधर्वानागाविद्याधरानगाः॥दिक्पालालोकपालाश्चयेचविघ्नविना
यकाः॥जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः॥माविघ्नंमाचमेपापंमा

संतुपरिपंथिनः॥सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः॥इत्यादि
त्यत्रापिदेहलीदीपवदन्वेति॥विनायकस्यजननीमुपतिष्ठेत्ततोंबिकां
॥दूर्वासर्षपपुष्पाणांदत्वार्घपूर्णमंजलिं॥अनंतरंविनायकमंबिकां
चदूर्वाद्यंजलिमर्घंचदत्वोपतिष्ठेत॥उपस्थानमंत्रमाह॥रूपंदेहिय
शोदेहिभगंभगवतिदेहिमे॥पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदे
हिमे॥भगवन्नित्यूह्यविनायकमप्युपतिष्ठेतेनिर्विघ्नानेश्वरः॥अत्रम
दनः॥विनायकोपस्थानंकृत्वांऽबिकोपस्थानंकार्य्यमित्याह॥किंच॥
ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥ब्राह्मणान्भोजयेद्दद्याद्वस्त्र
युग्मंगुरोरपि॥गुरोराचार्याय॥अपिशब्दाद्दक्षिणामपि॥एवंविधक
र्मकुर्वतः॥एवंविनायकंपूज्यग्रहांश्चैवविधानतः॥कर्मणांफलमाप्नो
तिश्रियमाप्नोत्यनुत्तमां॥अस्याःकर्मांगत्वेनपौष्टिकत्वेनचवर्णचतु
ष्टयस्याप्यत्राधिकारः॥शूद्रस्यतुमंत्रवर्जंतान्त्रिकम्य॥मंत्रवर्जंन
दुष्यंतिकुर्वाणाःपौष्टिकींक्रियामितिमोक्षधर्मश्रवणादितिवदंति॥
महार्णवोपि॥यजमानस्तुशूद्रश्चेदितिवदन्तस्याधिकारमभिप्रैति॥
इतिविनायकशांतिः॥अथप्रयोगः॥कर्त्तादेशकालौसंकीर्त्यांऽमुककर्मणो
निर्विघ्नतासिद्ध्यर्थमुपसर्गनिवृत्त्यर्थंवाविनायकस्नपनंकरिष्यइति
संकल्पयेत्॥ततःपुण्याहवाचननांदीश्राद्धांतंयथोक्तंकुर्यात्॥अ
परेपुण्याहवाचनंनेच्छंति॥अग्रेतस्यकर्त्तव्यत्वात्॥अथाचार्यमृ
त्विक्चतुष्टयंवृणुयात्॥ऋत्विजोनसंतीतिकेचित्॥तदाचार्यएववक्ष्य
माणमभिषेकंकुर्यात्॥यजमानःप्रतिमास्वक्षतपुंजेषुवा।शिवं।पार्वतीं
।गणेशं।वसुदेवं।केतुंअर्कं।भौमं।शुक्रं।गुरुं।बुधं।शनिं।चंद्रं।राहुं।स्कंदं
।कृष्णं।चावाह्यपूजयेत्॥तथाचार्यःपंचवर्णैःपूर्वादिचतुर्दिक्षुचत्वारि
मध्यस्थवेद्यांचैकमितिस्वस्तिकपंचकमालिख्यमध्यस्थस्वस्तिकोपरि
आनडुहंरक्तंचर्मप्राचीनग्रीवमूर्ध्वलोमसंस्थाप्यतस्योपरिश्रीपर्णी
पीठंसंस्थाप्यसितेनवाससासंछादयेत्॥एतद्भद्रासनमिति।अथच
तुर्षुस्वस्तिकेषुपूर्वादिदिक्षुचत्वारोपिऋत्विजःकलशान्संस्थापये
युः॥आचार्योवा॥तत्रायंप्रकारः॥महीद्यौःपृथिवीचनइतिभूमिंस्पृशन्स
प्रार्थ्यओ॰षधयःसमितियवान्सिक्त्वाआकलशेष्वितितेषुकलशान्संस्था

व्यद्मंमेगंगेतितीर्थोदकेनापूरयेत्गंधद्वारामिति चंदनागरुकस्तूरीक
र्पूरगोरोचनादीन्गंधादीन्गुग्गुलुंचनिक्षिपेत्॥ याओषधीरितिसर्वौ
षधीः॥ कांडात्कांडादितिदूर्वाः। अश्वत्थेवइतिपंचपल्लवान्॥ स्योनापृ
थिवीत्यनेन। उद्धृतासिवराहेणकृष्णेनशतबाहुना॥ मृत्तिकेहरमेपापंय
न्मयादुष्कृतंकृतमित्यनेनपंचमृदःक्षिपेत्॥ याःफलिनीरितिफलं॥ सहि
रत्नानीतिपंचरत्नानिहिरण्यरूपमितिहिरण्यं॥ युवासुवासाइत्यनेनव
स्त्रेणरक्तसूत्रेणचवेष्टयेत्॥ पूर्णादर्वीतिधान्यपूर्णपात्रंकलशोपरिनिद
ध्यात्॥ अत्रवरुणावाहनपूजनेअपिकेचिदाहुः॥ ततःकलशेसर्वेसमु
द्राइतिगंगाद्यावाहनं॥ ततःकुंभाभिमंत्रणं॥ कलशस्यमुखेविष्णुःकंठे
रुद्रःसमाश्रितः। मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥ कुक्षौ
तुसागराःसप्तसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः
॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताइति॥ ततःकुंभप्रार्थना॥ देव
दानवसंवादेमथ्यमानेमहोदधौ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुना
स्वयं॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥ त्वयितिष्ठंतिभूतानि
त्वयिप्राणाःप्रतिष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥ आ
दित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥ त्वयितिष्ठंतिसर्वेपियतःकाम
फलप्रदाः॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥ सान्निध्यंकुरुमेदेव
प्रसन्नोभवसर्वदेति॥ ततोऋत्विजआनोभद्रेतिशांतिसूक्तंपठेयुरिति
केचित्॥ आनोभद्रेतिशांतिसूक्तस्यराहूगणोविश्वेदेवास्त्रिष्टुप् आद्या
सप्तमीचजगत्यःषष्ठीविराट्शेषास्त्रिष्टुभःशांतिसूक्तजपेविनियोगः
॥ आनोभद्राः॥ शन्नोवातःपवतामित्यादिकंवा॥ तस्मिन्नेवसमयेआचा
र्यौभद्रासनस्योत्तरईशान्यांवावस्त्राच्छादितपीठादौविनायकप्रतिमा
मंबिकाप्रतिमांचाग्न्युत्तारणपूर्वंप्रतिष्ठाप्यषोडशोपचारैःपूजयेदिति
निबंधकृतः॥ तत्रविनायकमंत्रः॥ गणानांत्वागृत्समदोगणपतिर्जग
तीगणपत्यावाहनेविनियोगः॥ ॐगणानांत्वा। ॐतत्पुरुषायविद्महेव
क्रतुंडायधीमहि॥ तन्नोदंतिःप्रचोदयादितिवा। गौर्यास्तुगौरीर्मिमायदीर्घ
तमाउमाजगतीगौर्य्यावाहनेविनियोगः॥ गौरीर्मिमायसुभगायैविद्महे
काममालिन्यैधीमहि॥ तन्नोगौरीप्रचोदयादिति। अत्रमिताक्षरायांचरु

होमोप्युक्तः॥शिरश्चकुर्वेतितस्मिन्पक्षे आचार्योगृह्योक्तविधिनाकुंडे
स्थंडिलेवाऽग्निंप्रतिष्ठाप्यप्रादेशमात्रंसमिद्द्वयमादायास्मिन्होमेदेवता
परिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्यचक्षुषीआज्येनेत्यंतमुक्त्वा
अत्रप्रधानंमितंसंमितंशालंकटंकटंकूष्मांडराजपुत्रमेताःप्रधानदेव
ताएकैकयाचर्वाहुत्यायक्ष्ये॥शेषेणस्विष्टकृतमित्याद्युक्त्वाग्न्यावाद्य
त्॥अपरार्केमनेतुपंचैवाहुतयस्तन्मतेत्वाधानेहोमद्रव्यंचतथैवानुसं
धेयं॥ततःपरिसमूहनादिचरुश्रपणांतंकृत्वागोघृततैलालोडितेनगौर
सर्षपकल्केनोद्वर्तितांगंसर्वौषधिचूर्णैःकस्तूरिकागरुचंदनादिभिर्वि
लिप्तशिरसंयजमानमाचार्योभद्रासनेउपवेशयेत्॥ततोयमानःस्व
स्तिवाचनंकुर्यात्॥अनंतरंरूपगुणशालिनीभिःसुवासिनीभिर्नीरा
जनंकारयेत्॥ततोभद्रासनात्पूर्वदेशावस्थितंकलशमादायाभिषिं
चेदाचार्यः॥मंत्रश्च॥सहस्राक्षंशतधारमृषिभिःपावनंकृतं॥तेनत्वा
मभिषिंचामिपावमानीःपुनंतुते॥ततोदक्षिणदेशावस्थितंकलशमा
दायभगंतेवरुणोराजाभगंसूर्योबृहस्पतिः॥भगमिंद्रश्चवायुश्चभगं
सप्तर्षयोददुरित्यनेनाभिषिंचेत्॥ततःपश्चिमदिगवस्थितंकलशमा
दाययत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि॥ललाटेकर्णयोरक्ष्णोरा
पस्तद्घ्नंतुतेसदेति॥ततउदक्देशावस्थितंकलशमादायपूर्वोक्तैस्त्रि
भिर्मंत्रैरभिषिंचेत्॥बृहत्पराशरेणान्येपिमंत्राउक्ताः॥एतद्धिपावनंस्नानंस
हस्राक्षमृषिस्मृतं॥तेनत्वाशतधारेणपावमान्यःपुनंतुमां॥शक्रादिद
शदिक्पालाब्रह्माद्याकेशवादयः॥आपस्तद्घ्नंतुदौर्भाग्यंशांतिंयच्छंतु
सर्वदा॥सुभिक्ष्यानआपओषधयःसंतु दुर्भिक्ष्यास्तस्मैसंतुयोस्मान्
द्वेष्टियंचवयंद्विष्मः॥समुद्रागिरयोनद्योमुनयश्चपतिव्रताः॥दौर्भाग्य
घ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा॥पादगुल्फोरुजंघादौनितंबोदरनाभि
षु॥स्तनोरुबाहुहस्ताग्रग्रीवाअंसांघ्रिसंधिषु॥नासाललाटकर्णभ्रूके
शांतेषुचयत्स्थितम्॥तदापोघ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा॥इत्येतै
रप्यभिषिंचेदितिकेचित्॥चतुर्थकलशाभिषेचनएवैतेपठनीयाः॥अ
थाचार्योयजमानस्यपश्चिमतस्तिष्ठन्सव्यपाणिगृहीतकुशांतर्हितेय
जमानशिरसिऔदुंबरेणस्रुवेणसार्षपतैलंजुहुयात्॥ॐमितायस्वाहा

यजमानोमितायेदंनममेतित्यजेदेवंसर्वत्रापि॥ॐसंमितायस्वाहा॥ॐशालाय०॥ॐकटंकटाय०॥ॐकूष्मांडाय०॥ॐराजपुत्रायेति॥अथाचार्योग्यचेनाद्याज्यभागांतंकृत्वाचरुणामितादिभ्यएवजुहुयाद्यजमानस्तुपूर्ववत्यजेत्॥आचार्यःस्विष्टकृदादिप्रणीताविमोकांतंकर्मशेषंसमापयेत्॥यजमानस्त्वभिषेकशालायामिंद्रादिदशलोकपालेभ्योनाम्नादिक्षुविदिक्षुचबलीन्दद्यात्॥एतानिअग्निस्थापनचरुहोमदिक्पालबलिदानानिमिताक्षरामनुरुध्योक्तानि॥ततोमितायएवबलिंनममेतिपायसेनमाषभक्तेनवाबलिं दत्वाविनायकांबिकयोरग्रतःसकृद्वहततंडुलानांमांसेनतिलपिष्टेनवामिश्रमोदनमत्स्यमांसंपक्वमपक्वंचगौडीपैष्टीमाध्वीतित्रिविधांसुरांच॥ब्राह्मणस्यमांसस्थानेसलवणंपायसंसुरास्थानेसलवणंदुग्धंचित्रंपुष्पंसुगंधिद्रव्यंमूलकेपूरिकाःअपूपाःउंडेरकस्रजःदध्यन्नंपायसंगुडमिश्रतंडुलादिपिष्टंमोदकांश्चपात्रेसंस्थाप्यतत्पुरुषायविद्महइतिमंत्रेणविनायकायसुभगायैविद्महइतिमंत्रेणांबिकायैनिवेदयेत्॥अथाचार्योनूतनशूर्पेसर्वमुपहारशेषंसंस्थाप्यचतुष्पथंगत्वातत्रगोमयेनोपलिप्यकुशानास्तीर्यतत्रशूर्पंशाड्मुखंसंस्थापयेत्॥यजमानस्त्वेतैर्मंत्रैर्बलिंदद्यात्॥बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा॥मरुतोश्चाश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥असुरायातुधानाश्चपिशाचामातरोरगाः॥शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः॥जंभकाःसिद्धगंधर्वानागाविद्याधरानगाः॥दिक्पालालोकपालाश्चयेचविघ्नविनायकाः॥जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः॥माविघ्नंमाचमेपापंमासंतुपरिपंथिनः॥सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाःइति।देवादित्यवसुमरुदश्विरुद्रसुपर्णपन्नगग्रहासुरयातुधानपिशाचमातुरगशाकिनीयक्षवेतालयोगिनीपूतनाशिवजंभकसिद्धगंधर्वनागविद्याधरनगदिक्पाललोकपालविघ्नविनायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्यइदंनममेतित्यागः॥ततःशिरसाभूमिंगत्वापुष्पयुतमर्घंतत्पुरुषायेतिमंत्रेणविनायकायसुभगायैइत्यंबिकायैचदद्यात्॥ततोदूर्वासर्षपपुष्पाणांपूर्वोक्तविनायकमंत्रेणविनायकायांजलिंदद्यात्॥अंबिकायैतन्मंत्रेणतथैवदद्यात्॥ततोविना

यकमंबिकांचोपतिष्ठेत्॥मंत्रस्तु॥रूपंदेहियशोदेहिभगंभगवतिदेहि
मे॥पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे॥अस्मिन्मंत्रेभगंभग
वन्देहिमइत्यूह्यविनायकमुपतिष्ठेत्॥अनंतरंयजमानःप्राङ्मुखो
पविष्टउदङ्मुखानाचार्यादीन्पूजयित्वादक्षिणांदद्यात्॥ततउत्तिष्ठ
ब्रह्मणस्पतइत्यनेनयांतुदेवगणाइत्यनेनचविनायकमंबिकांचो
त्थाप्यविसृज्यप्रतिमादिसर्वांसामग्रीमाचार्यायदद्यात्॥ततोयथाश
क्तिभूयसींदक्षिणांदीनानाथेभ्योदत्वायथाशक्तिविनायकप्रीत्यर्थमं
बिकाप्रीतयेचब्राह्मणान्भोजयित्वासंकल्प्यवायस्यस्मृत्येत्याद्युक्त्या
न्यूनातिरिक्तंसर्वंसंपूर्णमस्त्वितितान्संप्रार्थ्यतैरनुज्ञातःसुहृद्युतोभुं
जीत॥ ॥इतिश्रीमच्छंकरभट्टसूरिसूनुभट्टनीलकंठकृतेभगवंतभास्क
रेशांतिमयूखेविनायकशांतिपद्धतिःसमाप्ता॥ ॥अथग्रहयज्ञः॥स्कांदे
देवदानवगंधर्वायक्षराक्षसकिन्नराः॥पीड्यंतेग्रहपीडाभिःकिंपुनर्भु
विमानवाः॥शनैश्चरेणसौदासोनरमांसेनियोजितः॥राहुणापीडितो
राजानलोभ्रांतोमहीतले॥अंगारकविरोधेनरामोराष्ट्रान्निवासितः॥
अष्टमेनशशांकेनहिरण्यकशिपुर्हतः॥रविणासप्तमस्थेनरावणोवि
निपातितः॥गुरुणाजन्मसंस्थेनहतोराजासुयोधनः॥पांडवाबुधपीडि
याविकर्मणिनियोजिताः॥षष्ठेनोशनसाप्युद्धेहिरण्याक्षोनिपातितः॥ए
तेचान्येचबहवोग्रहदोषैस्तुपीडिताः॥याज्ञवल्क्यः॥ग्रहाधीनानरेंद्रा
णामुच्छ्रायाःपतनानिच॥भावाभावौचजगतस्तस्मात्पूज्यतमाग्रहाः॥
प्रयोगपारिजातेतुत्सरपरिमले॥कार्यारंभेषुसर्वेषुप्रतिष्ठास्वध्वरेषुच
॥नववेश्मप्रवेशेचगर्भाधानादिकर्मसु॥आरोग्यस्नानसमयेसंक्रांतौ
रोगसंभवे॥अभिचारेचयःकुर्याद्ग्रहपूजांविधानतः॥सोभीष्टफलमा
प्नोतिनिर्विघ्नेननसंशयइति॥श्रीकामःशांतिकामोवाग्रहयज्ञंसमाच
रेत्॥वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्नपि॥मात्स्ये॥ग्रहयज्ञस्त्रि
धाप्रोक्तःपुराणश्रुतिकोविदैः॥प्रथमोऽयुतहोमःस्याल्लक्षहोमस्ततःपरः
॥तृतीयःकोटिहोमस्तुसर्वकामफलप्रदः॥ग्रहस्योत्तरपूर्वेणमंडपंका
रयेद्बुधः॥रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवं॥दशहस्तमथाष्टौवा
हस्तान्कुर्याद्विधानतः॥तस्यद्वाराणिचत्वारिकर्त्तव्यानिविचक्षणैः॥स्कांदे

नवग्रहमखेकुंडंहस्तमात्रंसमंभवेत्॥चतुरस्रमथोहस्तंयोनिवक्रंसमे
खलं॥योनिरेववक्रंयस्यतत्॥पुत्रादिकामनयातुयोन्याद्याकाराअपि
भवंति॥चतुरंगुलविस्तारामेखलातद्वदुच्छ्रिता॥अत्रविशेषोपदेशादे
कैवमेखलामात्स्ये॥वितस्तिमात्रायोनिःस्यात्षट्सप्तांगुलविस्तृता॥
कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिता॥गजोष्ठसदृशीतद्वदायता
च्छिद्रसंयुता॥मेखलोपरिसर्वत्रअश्वत्थदलसन्निभा॥एकंकुंडंचमेऽ
पेशानभागेउदीच्यांवेतिहेमाद्रिः॥अयुतादिहोमंप्रकृत्यवसिष्ठस्तु॥
कुंडंतन्मध्यभागेतुकारयेच्चतुरस्रकम्॥कुंडस्यैशानभागेतुपूजावेदिं
प्रकल्पयेदित्याह॥अत्रचतुरस्रमित्यनेनक्षत्रियादिपुरस्कारेणविहि
तानामाकारविशेषाणांस्त्रीपुरस्कारेणविहितस्ययोन्याकारस्यनिवृ
त्तिर्योनौपुत्राःप्रभंदलेलाभइत्याद्याःकाम्यास्त्वाकाराभवंत्येव॥वेद्यां
विशेषमाहगोभिलः॥कुंडस्यप्रागुदीच्यांवाप्राच्यामुत्तरतोपिवा॥चतुर
स्रंचतुर्द्वारंकर्तव्यंग्रहपीठकं॥श्रीकामःपूर्वतःकुर्यात्पुष्ट्यर्थंदक्षिणे
नतु॥पश्चाद्द्विजन्मसिद्ध्यर्थंशांत्यर्थंचोत्तरेणतु॥ऐशान्यांसर्वकामा
यत्ताग्नेय्यांत्वभिचारके॥नैरृत्यांपुत्रलाभायपुष्ट्यर्थंवायवेनतिति
॥ग्रहवेदीतुस्थंडिलपक्षेपिकार्या॥वसिष्ठः॥लिखेदष्टदलंपद्मंवेदि
कोपरितंडुलैः॥अत्रैकाग्निप्रशस्त्याच्चाप्येपक्षमुक्तातेषांनसंख्याकुंडे
षुतत्तद्ग्रहाकारांश्चाहप्रयोगपारिजातेभगवान्॥मनोरमेशुचौदेशेहो
मशालामलंकृताम्॥कृत्वातुसंवृतांप्राज्ञोग्रहस्थानंप्रकल्पयेत्॥तन्म
ध्येभास्करस्थानंभवेत्पूर्वोत्तरेबुधः॥पूर्वस्मिन्भार्गवस्थानंसोमोद
क्षिणपूर्वके॥दक्षिणस्यांकुजस्थानंराहोर्दक्षिणपश्चिमे॥शनेस्तुपश्चि
मेस्थानंकेतोरुत्तरपश्चिमे॥उत्तरस्यांगुरोःस्थानमेवंचस्थंडिलंभवेत्॥
स्थंडिलमध्यर्थं॥भास्करस्यचवृत्तंस्याच्चंद्रस्यचतुरस्रकं॥कुजस्यतुत्रि
कोणंस्याद्बाणाकारंबुधस्यतु॥गुरोर्दीर्घंचतुष्कोणंपंचकोणंसितस्य
तु॥चापाकारंशनेराहोःशूर्पंकेतोर्ध्वजाकृतिं॥नवधाविभजेदग्निंश्रौत
कर्मविधानतः॥ऋत्विजश्चयथायोगंकुंडेषुब्राह्मणाःपृथक्॥अथस्रु
वेणजुहुयात्स्रुव्येपावकदारुकान्॥ऋत्विजोजुहुयुःसर्वेस्रुवेणैवपृथक्
पृथक्॥अष्टौतुशकलान्गृह्यसमारोपणमग्निषु॥प्रधानाग्नौनिधायैमा

नित्यंहोमंसमाचरेदिति॥अत्रैवचस्थंडिलं भवेदित्यनेनस्थंडिलानां
कुंडानांचसमआकारस्तत्तद्दिक्षुनिवेशश्चोक्तः॥ब्राह्मणाःपृथगित्यने
ननवाचार्योब्राह्मणाश्चनवेत्युक्तं॥अत्रार्थसंक्षेपःप्रयोगपारिजाते॥मध्य
कुंडेस्मार्त्ताग्निंप्रणीयततोनवाचार्याअष्टसुकुंडेष्वग्निंप्रणीयाज्यभागां
तेःकोदिसमिद्भिर्गुडौदनादिहविर्भिराज्येनचग्रहादिमंत्रैर्हुत्वाव्यस्तसमस्त
व्याहृतिभिश्चतिलान्हुत्वास्विष्टकृदादिहोमशेषंकृत्वापूर्णाहुतीर्जुहु
युरिति॥कुंडमुक्त्वास्कांदे॥तस्यचोत्तरपूर्वेणस्थंडिलंहस्तमात्रकं॥त्रि
वप्रंचतुरस्रंचवितस्त्युच्छ्रायसंमितम्॥स्थंडिलंवेदिः॥वप्रोमेखला॥
मात्स्ये॥द्व्यंगुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः॥त्र्यंगुलोच्छ्रायसंयु
क्तंवप्रद्वयमथोपरि॥द्व्यंगुलस्तत्रविस्तारःसर्वेषांकथितोबुधैः॥तत्रग्र
हानाहयाज्ञवल्क्यः॥सूर्यःसोमोमहीपुत्रःसोमपुत्रोबृहस्पतिः॥शुक्रः
शनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः॥स्कांदे॥नवग्रहमखेकुर्यादृत्वि
जश्चतुरःशुभान्॥अथवाचैकमभ्यर्च्यविधिनाब्राह्मणासह॥त्रिविध
मपिनवग्रहमुपक्रम्यवसिष्ठस्तु॥षोडशब्राह्मणान्शुद्धान्दंभानृतवि
वर्जितान्॥तेषांमध्येश्रेष्ठतममाचार्यंतंप्रकल्पयेदिति॥अत्रपारिजाते
नवाचार्याएकोब्रह्माषडृत्विजः॥आचार्येभ्योनवभ्यश्चग्रहार्चनफलं
ततइत्युक्तेः॥आचार्यःकर्मएवकुर्यात्॥परेत्वारंभमात्रं॥धेन्वाद्याग्रह
दक्षिणाअपितेभ्यएवदेयाइत्याद्युक्तं॥तदयुक्तं॥उपक्रमएकाचार्य
स्यसंस्कार्यत्वेनैकत्वमविवक्षितं॥तथाप्याचार्यस्यभूतभाव्युपयोगाभा
वात्संस्कार्यत्वानुपपत्तेर्वृतआचार्यःस्वकर्मकुर्यादितिकल्पितेवाक्ये
उपादेयत्वादाचार्यस्यभवत्येकत्वंविवक्षितम्॥उपपादितंचेदमध्व
र्युंवृणीतेहोतारंवृणीतेपुरोहितंवृणीतइत्यत्रमिश्रैः॥जन्मभूर्गोत्रम
ग्निश्चवर्णस्थानमुखानिच॥योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमा
निताः॥तत्रवर्णजन्मनिआहदामोदरीयेवृद्धपराशरः॥रक्तःकश्यपजो
भानुःशुक्लोब्रह्मसुतःशशी॥रक्तोरुद्रसुतोभौमःपीतःसोमसुतोबुधः॥
पीतोब्राह्मसुराचार्यःशुक्लःशुक्रोभृगूद्वहः॥कृष्णःशनीरवेःपुत्रःकृष्णो
राहुःप्रजापतेः॥कृष्णःकेतुःकृशानूत्थःकृष्णाःपापास्त्रयोप्यमी॥स्कांदे
॥उत्पन्नोऽर्कःकलिंगेषुयमुनायांचचंद्रमाः॥अंगारकस्त्ववंत्यांमगधा

यांहिमांमुजः॥सैंधवेषुगुरुर्जातः शुक्रोभोजकटेतथा॥शनैश्वरस्तु
सौराष्ट्रेराहुर्वैराठिनापुरे॥अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः॥यस्य
यस्यच यद्गोत्रं तत्तेषस्याम्यतःपरं॥आदित्यःकाश्यपेगोत्रेआत्रेयश्चं
द्रमाभवेत्॥भरद्वाजोद्भवोभौमस्तथात्रेयश्चसोमजः॥शक्रपूज्योंगि
रोगोत्रः शुक्रोवैभार्गवस्तथा॥शनिःकाश्यपएवाथराहुःपैठीनसिस्त
था॥केतवोजैमिनेयाश्चग्रहाग्निस्तदनंतरम्॥आदित्यःकपिलोनाम
पिंगलःसोमउच्यते॥धूमकेतुस्तथाभौमोजाठराग्निर्बुधःस्मृतः॥गुरौ
श्चैवशिखानाम शुक्रोभवतिहाटकः॥शनैश्वरोमहातेजाराहुकेत्वोर्हु
ताशनः॥एतानिग्रहविशेषतोग्निनामानि॥कर्मविशेषतोपिदेवीपुराणे॥
शुभोग्रहविधौवह्निर्लक्षहोमेपराजितः॥कोटिहोमेशिवोवन्हिःसर्वकाम
प्रदायकः॥क्वचित्तु॥लक्षहोमेतुवन्हिःस्यात्कोटिहोमेहुताशन इति॥स्कां
दे॥भास्करांगारकौरक्तौश्वेतौशुक्रनिशाकरौ॥सोमपुत्रोगुरुश्चैवता
वुभौपीतकौस्मृतौ॥कृष्णंशनैश्वरं विद्याद्राहुंचित्राश्वकेतवः॥मध्येतुभा
स्करंविद्याच्छशिनंपूर्वदक्षिणे॥दक्षिणेलोहितंविद्याद्बुधंपूर्वोत्तरेणतु॥
उत्तरेणगुरुंविद्यात्पूर्वेणैवतुभार्गवं॥पश्चिमेनशनिंविद्याद्राहुंपश्चिमद
क्षिणे॥पश्चिमोत्तरतःकेतुंस्थापयेच्छुक्लतंडुलैः॥अथवावर्णकैःकार्याः
कार्याःस्वर्णादिधातुभिः॥याज्ञवल्क्यः॥ताम्रकास्फटिकाद्रक्तचंदनात्स्व
र्णजाद्गुभौ॥रजताद यसःसीसात्कांस्यात्कार्याग्रहास्तथा॥वसिष्ठः॥यथा
रुचिप्रमाणेनप्रतिमाःकल्पयेत्सुधीः॥अत्रसर्वत्रग्रहाणांसूर्यादिःक्रमः
स्पष्टः॥बौधायनस्तु॥सूर्यांगारकशुक्रचंद्रबुधगुरुशनयइत्याह॥स्कांदे
॥भानुंतुमंडलाकारंसोमंतुचतुरस्रकं॥अंगारकंत्रिकोणंचबुधंबाणाकृ
तिंतथा॥दीर्घचतुरस्रंगुरुंपंचास्रंभार्गवंतथा॥धनुस्तुल्यंशनिंविद्याद्रा
हुंसूर्पाकृतिंतथा॥ध्वजाकाराःकेतवश्चगणेशंतत्ररूपिणं॥रूपिणंहस्त
पादाद्यवयवयुक्तं॥स्थापयेच्छुक्लतंडुलैर्वर्णकैर्लेख्याइत्येतत्सर्वंमं
डलाद्याकारतेतिहेमाद्रिः॥तत्रैव॥शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावु
दङ्मुखौ॥प्रत्यङ्मुखःशनिःसोमःशेषादक्षिणतोमुखाः॥इदंचशुक्रादीनां
प्राङ्मुखत्वादिआदित्याभिमुखाःसर्वइति ——— मात्स्योक्तादि
त्याभिमुखत्वेनविकल्पते॥यत्तु॥हेमाद्रिर्विकल्पपरिजिहीर्षयाप्राङ्मुखा

वृहद्दृष्टी उदङ्मुखौ वामहष्टी प्रत्यङ्मुखो घोरदृष्टिर्दक्षिणतोमुखाः दक्षिणदृष्टय इति व्याचष्ट॥ तन्मूलं चिंत्यं॥ विरोधतादवस्थ्यं च। वर्णरूपगुणैर्युक्तान् व्याहृत्यावाहयेत्तु तान्॥ मात्स्ये॥ पुण्येन्हि विप्रकथिते कृत्वा ब्राह्मणवाचनं॥ अग्निप्रणयनं कृत्वा वेद्यामावाहयेत्सुरान्॥ देवानां तत्र संस्थाप्या विंशतिर्द्वादशाधिका॥ आदित्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः॥ विष्णुधर्मोत्तरे॥ अतःपरं प्रवक्ष्यामि यो देवो यो ग्रहः स्मृतः॥ अग्निर्कः स्मृतः सोमो वरुणः परिकीर्त्तितः॥ अंगारकः कुमारश्च बुधश्च भगवान् हरिः॥ बृहस्पतिः स्मृतः शक्रः शुक्रो देवी च पार्वती॥ प्रजापतिः शनिश्चैव राहुर्त्तै योगणाधिपः॥ विश्वकर्मा स्मृतः केतुर्ये ग्रहास्ते सुराः स्मृताः॥ अत एवाग्न्यादिलिंगका मंत्राः सूर्यादिस्थापने उक्ताः॥ स्कांदे॥ अग्निं दूतं दिनेशाय चंद्राय अप्स्वंत इत्यपि॥ स्योना पृथिवि भौमाय इदं विष्णुर्बुधाय च॥ इंद्र आसां सुरेज्याय शुक्रज्योतिः सिताय च॥ प्रजापतेति सौराय आयं गौरिति राहवे॥ केतवे ब्रह्मज ज्ञानं स्वे स्वे मंत्रैः प्रतिष्ठिताः॥ एतेषां च मंत्राणां व्याहृत्यावाहयेत्तु तानित्युक्ताभिर्व्याहृतिभिरावाहने विकल्पः॥ मदनरत्ने आवाहनस्थापनयोर्भेदाद्व्याहृतिभिरावाहनं॥ एतैर्मंत्रैः स्थापनमित्यूचे पारिजाते वामनस्तु॥ प्रणवं त्वादितः कृत्वा भूर्भुवस्वस्ततः परम्॥ चतुर्थ्यां नाम संयुक्तं नमस्कारांत योजितं॥ एष मंत्रः समाख्यातो ग्रहपूजाविधायकः॥ अनेनावाहनं कुर्याद्देनैनैव विसर्ज्जनमित्यूचे॥ अत्रावाहनवाक्येषु विशेषमाह बोधायनः॥ किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमद्युतिं सप्ताश्वं सप्तरज्जुं कलिंगदेशजं काश्यपगोत्रं विश्वामित्रार्षं त्रिष्टुप्छंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्त गंधानुलेपनं रक्तछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताग्निसहितं प्रत्यधिदेवतेश्वरसहितं रक्तवृत्तमंडले पूर्वमुखमादित्यमावाहयामि॥ किरीटिनं रक्तमाल्यांबरं रक्तशूलगदाधरं चतुर्भुजं मेषगमनमवंतिदेशजं वासिष्ठगोत्रजं जमदग्न्यार्षं जगतीछंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्तमाल्यानुलेपनं रक्तछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारुह्य रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताभूमिसहितं प्रत्यधिदेवतास्कंदसहितं त्रि

कोणरक्तमंडलेदक्षिणामुखमंगारकमावाहयामि॥किरीटिनंश्वेतवर्णं
चतुर्भुजंदंडिनंवरदंकाव्यंसाक्षसूत्रकमंडलुंकीकटदेशजंभार्गवगोत्र
जंशौनकार्षंपंक्तिछंदसंश्वेतांबरधरंश्वेताभरणभूषितंश्वेतंश्वेतगंधा
नुलेपनंश्वेतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारूढरथंदि
व्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतेंद्राणीसहितंप्रत्य
धिदेवेंद्रसहितंशुक्लंपंचकोणमंडलेप्राङ्मुखंभगवंतंशुक्रमावाहया
मि॥किरीटिनंश्वेतांबरधरंदशाश्वंश्वेतभूषणंपाशपाणिंद्विबाहुंवनायुदे
शजमत्रिगोत्रमात्रेयार्षंगनुष्टुप्छंदसंश्वेतांबरधरंश्वेतगंधानुलेपनं
श्वेतछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारूढरथंदिव्यंमेरुं
प्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवता सहितंप्रत्यधिदेवतो
मासहितंचतुरस्रमंडलेप्रत्यङ्मुखंसोममावाहयामि॥किरीटिनंपी
तमाल्यांबरधरंपीतवर्णंकर्णिकारसमद्युतिंखड्गचर्मगदापाणिंसिं
हस्थंवरदंमगधदेशजमत्रिगोत्रजंभारद्वाजार्षंबृहतीछंदसंपीतांब
रधरंपीताभरणभूषितंपीतगंधानुलेपनंपीतछत्रध्वजपता किनंमु
कुटकेयूरमणिशोभितमारूढरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमं
डलेप्रविष्टमधिदेवताविष्णुसहितंप्रत्यधिदेवताविष्णुसहितंपीतवर्णमंडलेउद
ङ्मुखंबुधमावाहयामि॥किरीटिनंपीतवर्णंचतुर्भुजंदंडिवरदंसाक्षसूत्रकमंडलुं
सिंधुदेशजमांगिरसगोत्रंवासिष्ठार्षमनुष्टुप्छंदसंपीतांबरधरंपीताभरणभूषितं
पीतगंधानुलेपनंपीतछत्रध्वजपताकिनंमुकुटकेयूरमणिभूषितमारूढरथंदि
व्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टअधिदेवतेंद्रसहितंप्रत्यधिदेवताब्र
ह्मसहितंपीतदीर्घचतुरस्रमंडलेउदङ्मुखंगुरुमावाहयामि।किरीटिनमिंद्रनील
समद्युतिंशूलधरंवरदंगृध्रवाहनंसबाणशरधरंसौराष्ट्रदेशजंकाश्यपगोत्रजंभृ
ग्वार्षंगायत्रीछंदसंकृष्णांबरधरंकृष्णाभरणभूषितंकृष्णगंधानुलेपनंकृष्ण
छत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारूढरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणं
ग्रहमंडलेप्रविष्टमधिदेवताप्रजापतिसहितंप्रत्यधिदेवतायमसहितंकृष्णधनुर्मं
डलेप्रत्यङ्मुखंशनैश्चरमावाहयामि।किरीटिनंकरालवदनंखड्गचर्मशूलधरंसिं
हासनस्थंपूर्वदेशजंपाटलिगोत्रमांगिरसार्षमनुष्टुप्छंदसंकृष्णांबरधरंकृष्णाभर
णभूषितंकृष्णगंधानुलेपनंकृष्णछत्रध्वजपताकिनंमुकुटकेयूरमणिशोभितमारू
ढरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणंग्रहमंडलेप्रविष्टमधिदेवतासर्पसहितंप्रत्यधिदेव
ताकालसहितंकृष्णशूर्पमंडलेदक्षिणामुखंराहुमावाहयामि।धूम्रान्द्विबाहू

नृपाशधरान् विकृताननान् गृध्रवाहनान् किरीटिनो मध्यदेशजान् जैमिनिगोत्रजा
न् गोतमार्पितान्नानाछंद स्सम्भिन्नांबरधरांश्चित्राभरणभूषितांश्चित्रगंधानुले
नान् धूम्रपिंगलध्वजपताकिनो मुकुटकेयूरमणिशोभितानारुह्यरथंदिव्यंमेरुंप्र
दक्षिणीकुर्वाणान् ग्रहमंडले प्रविष्टानधिदेवताब्रह्मसहितान् प्रत्य
धिदेवताचित्रगुप्तसहितान् धूम्रपिंगलध्वजमंडले दक्षिणामुखान्
केतूनावाहयामि॥स्कांदे॥ईश्वरं भास्करे विंद्यादुमां विंद्याच्छशांकरे॥
स्कंदमंगारके विंद्याद्बुधे नारायणं विदुः॥गुरौ वेदनिधिं विंद्यात्शुक्रेश
क्रो विधीयते॥शनैश्चरे यमं विंद्याद्राहौ कालस्तथैव च॥चित्रगुप्तोधिपः
केतोरित्येता ग्रहदेवताः॥वेदनिधिर्ब्रह्मा॥तत्रैव॥वक्ष्ये स्थानानि देवा
नामीश्वरादि यथाक्रमं॥सूर्यस्योत्तरे शंभुमुमां सोमस्य दक्षिणे॥स्कं
दमंगारकस्यैव दक्षिणस्यां निवेशयेत्॥सौम्यास्पश्चिमतो विष्णुं ब्रह्मा
जीवस्य पूर्वतः॥इंद्रमैंद्र्यां सिताद्विद्यान्मंदादाग्नेयतो यमं॥राहोः पूर्वोत्तरे
कालं सर्वभूतभयावहं॥केतोर्नैर्ऋत्यदिग्भागे चित्रगुप्तं निधापयेत्॥स्कां
दे॥अतः स्थापनमंत्रांश्च कथयाम्यनुपूर्वशः॥ईश्वरं त्र्यंबकं चेति श्रीश्च
तेचेति पार्वतीं॥यदक्रंदेति च स्कंदं विष्णुं विष्णोरराटेति॥आब्रह्मन्निति
ब्रह्माणं सजोषेंद्रेति वासवं॥यमाय त्वेति च यमं कालं कार्षिरसीति च॥
चित्रावसो स्वस्तीति मंत्रेण चित्रगुप्तं निधापयेत्॥अग्निरापः क्षितिर्विष्णुरिंद्र
श्चैंद्री प्रजापतिः॥सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमं॥अग्निं दू
तमितित्वग्नेर्वरुणस्य उदुत्तमम्॥स्योना पृथिवि मेदिन्या इदं विष्णुस्तु वि
ष्णवे॥इंद्रायेंदो इतींद्रस्योत्तानपर्णे शचीस्थितौ॥प्रजापते प्रजेशस्य
एष ब्रह्मेति वेविधेः॥मंत्रो नमोस्तु सर्पेभ्यः सर्पाणां स्थापने मतः॥ग्रहदे
वाधिदेवानां नैवेद्यं कुसुमानि च॥ग्रहवस्त्रासनं दानं स्थापनं चानुपूर्वशः
॥सूर्यादयो ग्रहा ईश्वरादयो देवाः अग्न्यादयोधिदेवाः॥तत्रेश्वरादिदेव
तानां सूर्यस्योत्तरे शंभुमित्यादिना पूर्वस्थलान्युक्तानि॥अग्न्यादयोधि
देवास्तु ग्रहदेवयोर्मध्ये स्थाप्याः॥तथा च मदनरत्ने गोभिलवसिष्ठौ॥ग्र
हदेवतयोर्मध्ये अधिदेवान्निधापयेत्॥तत्रैव संग्रहे तु॥ईश्वरादयो देवा
अधिदेवतात्वेन व्यवहृताः॥अग्न्यादयस्तु प्रत्यधिदेवतात्वेन॥ ॥
॥ ॥ ॥तेषां स्थानांतरं चोक्तं॥अधिदेवाद्दक्षिणतो वामे प्रत्यधिदे

ताः॥ स्थापनीयाः प्रयत्नेन व्याहृतीभिः पृथक्पृथक्॥ तत्रैव वासिष्ठीयेतु ॥ देवतानां स्थानांतरं चोक्तं॥ रुद्रं त्र्यंबकमंत्रेण रवेरुत्तरतो न्यसेत्॥ सोमस्याग्नेयदिग्भागे श्रीश्च ते मेनकात्मजां॥ यदक्रंदेति भौमस्य स्कंदं चाप्यप्रदापयेत्॥ विष्णुं विष्णोरराटेति यजेत्सूर्यं बुधस्य च॥ गुरोरुत्तरतोप्यथो ब्रह्मा ब्रह्मेति मंत्रतः॥ सजोषइंद्रेति शुक्रस्य प्राच्यां शक्रं निधापयेत्॥ शनेः पश्चिमतः स्थाप्यो यमाय त्वेत्यृचा यमः॥ कार्षिरसीति मंत्रेण राहोः कालं तथोत्तरे॥ चित्रगुप्तं तु केतूनां चित्रावस्वेति नैर्ऋते॥ ग्रहाश्च देवताः स्थानाः शृणुष्वातोधिदेवताः॥ अग्निरापो धरा विष्णुरिंद्र इंद्राणी प्रजापतिः सर्पा ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्रमं॥ ग्रहदेवतयोर्मध्ये अधिदेवान्निवेशयेत्॥ एतानि च वासिष्ठीयवचांसि कैश्चिन्नाद्रियंते॥ पारिजाते ॥ पद्मप्राग्दलमारभ्य दलाग्रेषु क्रमान्न्यसेत्॥ इंद्रादिलोकपालांश्च तत्तन्मंत्रैः प्रपूजयेत्॥ विनायकं तथा दुर्गां वायुमाकाशमेव च॥ आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ॥ एते च विनायकाद्याः पंच ग्रहेभ्य उत्तरतः स्थाप्या इति सांप्रदायिकाः॥ दक्षिणपश्चिमवायव्योत्तरपूर्वेषु यथाक्रममित्यन्ये॥ राहुमंददिनेशानामुत्तरस्यां यथाक्रमं॥ गणेशं दुर्गां वायुं च राहुकेत्वोश्च दक्षिणे॥ आकाशमश्विनौ चेति पंचैतान् स्थापयेद्बुध इति संग्रहवचनानुसारेणेति पितामहचरणा रूपनारायणश्च॥ स्कांदे॥ उत्तरे शनिसूर्याभ्यां गुरुकेत्वोश्च दक्षिणे॥ गणाधिपं प्रतिष्ठाप्य सर्वदेवनमस्कृतं॥ रविशनिकेतुगुरूणां मध्य इति फलितोर्थः॥ विनायकपदमुपलक्षणं॥ तेन दुर्गादयोप्यत्रैव स्थाप्या इति केचित्॥ चंदनादिनियमस्तत्रैव॥ दिवाकरकुजाभ्यां हि दापयेद्रक्तचंदनं ॥ चंद्रे च भार्गवे चैव सितवर्णं प्रदापयेत्॥ कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः॥ अगुरुं चंदनं दद्याद्राहुकेत्वर्कजेषु च॥ ग्रहवर्णानि पुष्पाणि गायत्र्या धूपमादहेत्॥ रवेः कुंदुरुकं धूपं शशिनस्तु घृतासनाः॥ भौमे सर्जरसं चैव अगुरुं च बुधे स्मृतम्॥ सिल्हकं गुरवे दद्याच्छुक्रे बिल्वागुरुं तथा॥ गुग्गुलं मंदवारे तु लाक्षा राहोश्च केतवे॥ कुंदुरुकः सल्लकीनिर्यासः॥ सिल्हकं सिल्हा इति मध्यदेशे प्रसिद्धम्॥ बिल्वागुरुं बिल्वफलनिर्याससहितमगुरु॥ मंदवारः शनिः॥ उद्दीप्यस्वेति मंत्रेण दीपं दद्या

दनं द्विजः॥ विहितधूपदीपगंधादीनामसंभवे तु याज्ञवल्क्यः॥ यथावर्णं
प्रदेयानि वासांसि कुसुमानि च॥ गंधाश्च वलयश्चैव धूपो देयश्च गुग्गुलः
॥ स्कांदे॥ गुडोदनं रवेर्दद्यात्सोमाय घृतपायसं॥ लोहिताय हविष्यान्नं बु
धाय क्षीरषाष्टिकम्॥ दध्योदनं गुरोर्दद्याच्छुक्राय च घृतोदनं॥ मिश्रितं
तिलमाषैश्च नैवेद्यं तु शनैश्चरे॥ राहोर्मांसोदनं दद्यात्केतोश्चित्रोदनं
था॥ चित्रोदनं॥ तिलतंडुलमिश्रं स्यादजाक्षीरं च शोणितं॥ कर्णनासागृ
हीतं स्यादेतच्चित्रोदनं स्मृतमिति दामोदरः॥ एतैरेव द्रव्यैर्ब्राह्मणा अ
पि भोज्याः॥ तथा च याज्ञवल्क्यः॥ गुडोदनं पायसं च हविष्यं क्षीरषाष्टिकं
॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥ दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो
भोजनं बुधः॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम्॥ वसिष्ठः॥ उ
पचाराणि सर्वेषामपि युक्त्यास तैः सदा॥ गंधाभावे शुक्लगंधं पुष्पाभावे सु
गंधकं॥ धूपाभावे गुग्गुलुः स्याद्द्रव्याभावे तु मिश्रकं॥ पंचामृतं गवामेव
मिश्रकं नक्तदाच्चनेति॥ मात्स्ये॥ प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषि
तम्॥ चूतपल्लवसंयुक्तं फलवस्त्रयुगान्वितम्॥ पंचरत्नसमायुक्तं पंचभं
गयुतं तथा॥ स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत्॥ गंगाद्याः सरितः
सर्वाः समुद्राश्च सरांसि च॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुला
त्॥ मृदमानीय विप्रेंद्र सर्वौषधिसमन्विताम्॥ स्नानार्थं विन्यसेत्तत्र य
जमानस्य धर्मवित्॥ याज्ञवल्क्यः॥ अर्कः पलाशः खदिरः अपामार्गोऽथ
पिप्पलः॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥ ईश्वरादिदेवानां
स्वस्वग्रहसमिद्भिरेव होमः॥ हेमाद्रौ देवीपुराणे॥ गणाधिपतये देयाप्रथ
मा तु वराहुतिः॥ अन्यथा विफलं विप्र भवतीह न संशय इति॥ आश्वला
यनः॥ जुहुयात्समिदन्नाज्यैनाभिर्ऋग्भिर्यथाक्रममिति॥ समित्सु विशे
षमाह याज्ञवल्क्यः॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युता इति न
चात्र संप्रतिपन्नदेवताकानेकद्रव्याणामेकैवाहुतिः सान्नाज्यवत्तदि
ति वाच्यं॥ आसीतु समिदन्नाज्यैः पृथगष्टोत्तरं शतमिति वासिष्ठात्॥ अ
न्यत्रापि संप्रतिपन्नदेवताकस्मान्नैककर्मण्यनेकद्रव्यके पृथगेव होम इ
ति सांप्रदायिकाः॥ बहुषु कर्मसु प्रायो वचनान्यप्येवं॥ स्कांदे॥ आकृष्णेन
सह स्यां शोरिमं देवा तथैव च॥ अग्निर्मूर्द्धेति भौमाय उद्बुध्यस्व बुधाय च॥

बृहस्पतेतिच गुरोःशुक्रायाःस्वात्परिश्रुतः॥शनैश्चरस्यमंत्रोयंशन्नोदे
वीरुदाहृतः॥कयानइतिराहोश्चकेतुंकृण्वंस्तुकेतवे॥मात्स्ये॥आवोराजे
तिरुद्रस्यबलिंहोमंसमाचरेत्॥आपोहिष्ठेत्युमायास्तुस्योनेतिस्वामिन
स्तथा॥विष्णोरिदंविष्णुरितित्वमित्येतिस्वयंभुवः॥इन्द्रमिद्देवतातयइ
तींद्रस्यप्रकीर्तितः॥तथायमस्यचायंगौरितिहोमःप्रकीर्तितः॥काल
स्यब्रह्मजज्ञानमितिमंत्रःप्रशस्यते॥चित्रगुप्तस्यचाज्ञातमितिपौराणि
काविदुः॥अग्निंदूतंवृणीमहइतिविष्णोरुदाहृतः॥इंद्रायेंदोमरुत्वतइ
तिशक्रस्यशस्यते॥उत्तानपर्णेसुभगेइतिशच्याःसमाचरेत्॥प्रजापतेः
पुनर्होमंप्रजापतइतिस्मृतः॥नमोस्तुसर्पेभ्यइतिसर्पाणांमंत्रउच्यते॥पू
षब्रह्मायज्ञऋत्विजइतिब्रह्मण्युदाहृतः॥विनायकस्यचानूनइतिमंत्रोबु
धैःस्मृतः॥जातवेदसेसुनवामइदुर्गामंत्रोत्रउच्यते॥पूर्णाहुतिंचमूर्द्धानंदिव
इत्यभिमातयेत्॥स्कांदे॥नैवेद्यशेषंहुत्वाचहोमंमंत्रादनंतरं॥अथव्या
हृतिभिर्हुत्वाएकैकस्ययथाक्रमं॥अष्टोत्तरंचसाहस्रंशतमष्टादिकं
तथा॥अष्टाविंशतिरष्टौवाएकैकस्यतुहोमयेत्॥होतव्यंचघृतंतत्रच
रुर्लक्षादिकंपुनः॥मंत्रैर्दशाहुतीर्हुत्वाहोमोव्याहृतिभिःस्मृतः॥अथे
तिअथवेत्यर्थः॥गृहीत्वातामथांबिकामितिवत्॥मदनस्त्वथवेत्येवप
पाठतत्तन्मंत्राणांव्याहृतीनांचपरस्परंविकल्पः॥अथाष्टोत्तरसहस्रादि
संख्यातुपक्षद्वयेपिनैवेद्यशेषहोमस्तुशाखाविशेषपरइत्यपिसएवल
क्षादिकःपुनर्व्याहृतिभिर्होमोमंत्रैर्दशाहुतीर्हुत्वास्मृतइत्यन्वयः॥मंत्रैर्ग्र
हमंत्रैः॥व्याहृतिभिर्व्यस्ताभिःसमस्ताभिश्च॥तातचरणास्तु॥अथव्या
हृतिभिर्हुत्वेतिपृथग्वाक्यं॥एकैकस्येतितुप्रतिदैवतमष्टादिसंख्यान्व
यार्थं॥एकैकस्यतुहोमयेदित्येकैकपदंतुचर्वादिद्रव्यपरं॥नदैवतापरं
॥अस्मिन्नेवहोमेघृतचरुद्रव्यविधिरयं॥लक्षादिकइत्येतत्तु अथव्याहृ
तिविहितहोमेलक्षादिसंख्याविध्यर्थं॥मंत्रैरित्यादितुचरुहोमोनंतरंसो
मंराजानमितिमंत्रेणयथाप्रकृतिस्विष्टकृद्धुत्वासूर्यादिमंत्रैर्दशदशा
हुतीःप्रतिदैवतंलक्षहोमादिद्रव्येणहुत्वाव्याहृतिभिर्लक्षादिहोमःकार्य
इत्याहुः॥यद्वायन्यतमद्रव्येणग्रहादिभिःप्रत्येकंदशाहुतीस्तन्मंत्रैर्हु
त्वातेनैवद्रव्येणव्यस्तसमस्तव्याहृतिभिरयुतलक्षकोट्यन्यतमसंख्य

याजुहुयादितिहेमाद्रिमदनौ ॥ तानिचद्रव्याणिदेवीपुराणे ॥ यवव्री
हिघृतक्षीरतिलकंगुप्रसारिकाः ॥ पंकजोशीरबिल्वार्कदलाहोमेप्रकी
र्त्तिताः ॥ उदङ्मुखाः प्राङ्मुखावाकुर्युर्ब्राह्मणपुंगवाः ॥ मंत्रवंतश्चकर्तव्या
श्चरवःप्रतिदैवतं ॥ हुत्वाचतांश्चरून्सम्यक्ततोहोमंसमारभेत् ॥ च
र्वादिकंचघृताद्यक्तंहोतव्यं ॥ होतव्यंचघृताद्यक्तंचरुभक्ष्यादिकंपुनी
तिमात्स्यात् ॥ भक्ष्यंद्राक्षादि ॥ चरुर्नैवेद्यशिष्टोशुद्धोदनादिः ॥ तानिद्र
व्याण्युक्त्वाद्वयेतानिहवींषिस्युःसमित्संख्यासमाहुतीरित्याश्वला
यनोक्तेः ॥ अधिदेवतादिभ्योपिहोमोहेमाद्रौ ॥ चरुणाचसमिद्भिश्चस
र्पिषाचतिलैःक्रमात् ॥ तत्तन्मंत्रैश्चहोतव्याःक्रमादत्राधिदेवताः ॥ गृ
ह्यपरिशिष्टे ॥ प्रधानदशांशेनपार्श्वदेवतयोरिति ॥ अधिदेवतादिहो
मेसंख्यावासिष्ठेद्वित्र्येकेवाधिदेवताःपंचानांत्वेवपंचधेति ॥ द्वित्राः
च ॥ पंचा नांगणेशादीनांपंचधाप्रत्येकमित्यर्थः ॥ केचित्तुहोत्रयोवा
द्वित्राः ॥ विनायकादीनांपंचधाएकैकमितिकेचित् ॥ प्रयोगपारिजा
ते ॥ इंद्रादिलोकपालांश्चतत्तन्मंत्रैःप्रपूजयेत् ॥ तत्तन्मन्त्रैर्जपंकुर्यात्त
तोहोमंसमारभेत् ॥ नृसिंहपुराणे ॥ ततोव्याहृतिभिःपश्चाज्जुहुयाच्च
तिलादिकं ॥ यावत्प्रपूज्यतेसंख्यालक्षंवाकोटिरेववा ॥ वाशब्दादयु
तमपि ॥ ग्रहयज्ञश्चनियतकालीनः ॥ स्वेच्छायज्ञःसमुच्यतइतिभवि
ष्योत्तरात् ॥ ततोव्याहृतिभिःकुर्यात्तिलहोमंप्रयत्नतः ॥ प्रथमोऽयुतहो
मःस्याल्लक्षहोमोद्वितीयकः ॥ तृतीयःकोटिहोमःस्यात्त्रिविधोग्रहय
ज्ञकः ॥ एकरात्रंत्रिरात्रंवापंचरात्रमथापिवा ॥ शिवगाथांविष्णुगा
थांशांतिंब्राह्मणभोजनं ॥ समापयेत्प्रतिदिनमेवंभक्तिसमन्वितइ
तिवासिष्ठेप्येकरात्रादिग्रहणं नियमानादरार्थं। अत्रसूक्तादिजपो
पितुल्यासनवदितिकेचित् ॥ वासिष्ठे। अथाभिषेकमंत्रेणवाद्यमंग
लगीतकैः ॥ पूर्णकुंभेनतेनैवहोमांतेप्रागुदङ्मुखैः ॥ अव्यंगावयवै
र्ब्राह्मणैर्हेमस्रग्दामभूषितैः ॥ यजमानस्यकर्तव्यंचतुर्भिःस्नपनंद्विजैः
॥ अभिषेकमंत्राःप्रयोगेवक्ष्यंते ॥ वसिष्ठः ॥ स्वस्तिकंकल्पयेत्सम्यक्कुं
डस्येशानभागतः ॥ यजमानाभिषेकार्थंतत्रभद्रासनंन्यसेत् ॥ प्राङ्मुख
स्योपविष्टस्ययजमानस्यतत्रच ॥ अभिषेकंततःकुर्युःसाचार्याःषोड

श्चर्त्विजः॥ विविधैर्मंगलैर्घोषैः सूतमागधजैः सह॥ ततस्तस्याभिषि
क्तस्य रक्षार्थं बलिमुत्क्षिपेत्॥ दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्त
तः॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः॥ ततो मंडपमागत्य ध्याये
दग्निं सुरान् ग्रहान्॥ प्रत्येकं प्रतिमंत्रैश्च दद्यात्पुष्पांजलिं ततः इति॥ वा
मनः॥ आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः॥ समिदाज्यचरूणां च
तिलहोमफलं च यत्॥ ब्रह्मत्वे कुंभपूजायां चाऽर्चनस्य फलं च यत्॥ गणप
क्षेत्रपाश्वीश दुर्गादेर्व्यंगदेवताः॥ तासां जपफलं सम्यक् गृह्णीयाज्ज
लपूर्वकं॥ एतानि च वामनवचांसि निर्मूलानीति पितामहचरणाः॥ वासि
ष्ठेऽभिलवच साम पिके चिदाहुः॥ वसिष्ठः॥ ततो जपादीन् जुहुयात्पू
र्णाहुतिमथाचरेत्॥ तत्रैव॥ मंत्रेण सप्त ते अग्न इति पूर्णाहुतिं चरेत्॥ अ
ग्निपुराणे॥ मूर्ध्नानं दिव मंत्रेण संस्रवेणाच धारया॥ दद्यादुत्थाय पूर्णां
वै नोपविश्य कदाचनेति॥ मात्स्ये॥ पूर्णाहुतेरेकत्वान्मंत्राणां विकल्पः॥
उपांशु यजत्वृक्शाखाभेदभिन्नानां याज्यानुवाक्यानां समुच्चये नतु
पठंति॥ वसोर्द्धारा लक्षहोमे नास्ति॥ प्रमाणाभावात्॥ ततः शुक्लांबरध
रः शुक्लगंधानुलेपनः॥ सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः॥ यजमा
नः सपत्नीक ऋत्विजस्तान् समाहितः॥ दक्षिणाभिः प्रयत्नेन पूजयेद्ग
तविस्मयः॥ सूर्याय कपिलां धेनुं दद्याच्छंखं तथेंदवे॥ रक्तं धुरंधरं द
द्याद्भौमाय कुजाधिकं॥ बुधाय जातरूपं तु गुरवे पीतवाससी॥ श्वेता
श्वं दैत्यगुरवे कृष्णां गामर्कसूनवे॥ आयसं राहवे दद्यात्केतवे छाग
मुत्तमं॥ सुवर्णेन समाः कार्या यजमानेन दक्षिणाः॥ बुधप्रीत्यर्थं देय
हेम्नास्सह सर्वा मूल्यतः समा इति केचित्॥ अस्मिन् पक्षे षोडशमाषवि
शिष्टहेमवाचि सुवर्णपदाः समंजसस्यापत्तेस्तादृशसुवर्णमूल्यं
प्रत्येकमिति परे वह्वल्पमूल्येषु तथा हेमाः पि देयं यथा सर्वाः प्रत्ये
कं दशमाषसुवर्णेन समा भवंतीति तु सम्यक्॥ सर्वेषामथ वा गावो गु
रवे येन तुष्यति॥ स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः॥ स्कांदे॥
केतवे छागमांसानि सर्वेषामेव कांचनमिति॥ तत्रैव॥ यस्तु पीडाकरो
नित्यं स्वल्पवित्तस्य वा ग्रहः॥ तमेव पूजयेद्भक्त्या दक्षिणाभिः स्वशक्ति
तः॥ दानोद्योते आश्वलायनः॥ यथाशक्ति ततो विप्रान् ऋत्विजश्चेतरान्

पि॥एकमेकाहुतौविप्रंहोमेत्वन्नेनभोजयेत्॥अत्यर्थीमध्यमश्चा
पिविप्रमेकंशताहुतौ॥सहस्रस्यहुतेर्वैकंजघन्योपित्रभोजयेत्॥त
त्रैव॥तस्माद्दातुमशक्तोपिदक्षिणांचान्नमेववा॥जपैःप्रणामैःस्तोत्रै
श्चतोषयेत्तर्पयेद्गुरुं॥स्कांदे॥यथाग्रहोद्विजस्तद्वद्द्विद्वेयोवेदपारगः
॥तोषयन्मृदुवस्त्राद्यैस्तुष्टमेनंविसर्जयेत्॥अन्नहीनोदहेद्राष्ट्रं
मंत्रहीनश्चऋत्विजः॥यजमानमदक्षिण्योनास्तियज्ञसमोरिपुः॥तै
व॥यथासमन्वितंयंत्रंयंत्रेणप्रतिहन्यते॥एवंसमुत्थितंघोरंशीघ्रं
शांत्याविनश्यति॥अहिंसकस्यदांतस्यधर्मार्जितधनस्यच॥नित्यं
चनियमस्थस्यसदासानुग्रहाग्रहाः॥ग्रहागावोनरेंद्राश्चब्राह्मणा
श्चविशेषतः॥पूजिताःपूजयंत्येतेनिर्दहंत्यपमानिताः॥ग्रहाणामिद
मातिथ्यंकुर्यात्संवत्सरादपि॥आरोग्यबलसंपन्नोजीवेच्चशरदांशतं
मात्स्ये॥एवंसमग्रान्निष्पाद्यसर्वान्देवान्विसर्जयेत्॥तत्रमंत्रः॥यां
तुदेवगणाःसर्वेपूजामादायपार्थिवीं॥इष्टकामप्रदानार्थंपुनरागम
नायच॥भविष्योत्तरे॥ततःसमाप्तेयज्ञेतुकारयेत्तुमहोत्सवं॥शंख
तूर्यनिनादेनब्रह्मघोषरवेणच॥मात्स्ये॥अनेनविधिनायस्तुग्रह
पूजांसमारभेत्॥सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते॥सेदेवा
युतहोमोयंनवग्रहमखःस्मृतः॥विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुक
र्मसु॥निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच॥वश्यकर्माभिचारादि
तथैवोच्चाटनादिकं॥नवग्रहमखंकृत्वाततःकाम्यंसमारभेत्॥अ
न्यथाफलदंपुंसांनकाम्यंजायतेक्वचित्॥तस्मादयुतहोमस्यवि
धानंतुसमाचरेत्॥विवाहेत्यादिना — चविवाहादिषुकाम्येषुकर्म
स्वंगत्वमुक्तं॥अत्रग्रहस्वरूपवर्णदेशगोत्राग्निस्थानमुखाकारस्था
पनहोममंत्रचंदनधूपदीपनैवेद्यसमिद्दक्षिणाधिदेवताप्रत्यधिदेव
तोपदेशकवाक्येषुग्रहाणांस्वरूपनिर्देशस्थापनहोममंत्रोपदेशक
वाक्येषुवाधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालानाम
नेकस्मृतिपुराणभेदेनभूयोविसंवादिभिरनेकैःपर्यायशब्दैरुपस्थि
तैर्नात्रैकैवेधशब्दनियमः॥नापिमंत्रवर्णेनैकशब्दोपस्थितिः॥शब्द
विशेषैर्देवताअनूद्यततत्स्मारकतयामंत्रविनियोगेनमंत्राणांदेवताप्र

पकत्वायोगात्॥ तेषांबाहुल्येनास्पष्टलिंगकत्वाच्च॥ अतोद्रव्यत्यागादि
षुस्वरूपातिनिर्देशकस्मृतिमंत्रवर्णोपस्थितशब्दानामन्यतमेनशब्दे
नोद्देशोग्रहादीनामितिशिष्टाचारोप्येवं॥ अत्रव्याहृतिकरणकेयुतहो
मेऽग्निवायुसूर्यप्रजापतयएवदेवताः॥ ननवग्रहाः॥ ऐंद्र्यादिवत्तत्प्रकाश
कत्वेनविनियोगाभावात्॥ अतएवपारिजाते॥ ॐभूर्भुवःस्वश्चेतिति
स्रोव्याहृतयोजपेत्॥ आभिश्चहोमेतिसृभिश्चतुर्थीस्यात्समासतइति
समस्ताभिरेवहोमःसचाग्निवायुसूर्यदैवत्यइतितुमदनः॥ सर्वव्याहृ
तिहोमेनग्रहादेवताइति॥ प्रधानंचात्रग्रहपूजातद्धोमोयुतहोमादिश्च॥
श्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरेदित्यादिनातत्पूजातद्धोमयोःफ
लसंबंधात्॥ ग्रहयज्ञस्त्रिधेत्युक्त्वाप्रथमोयुतहोमइत्यादिनाऽयुतल
क्षकोटिहोमानांग्रहयज्ञविशेषकत्वेनोपक्रमात्॥ तस्मादयुतहोमस्य
विधानंतुसमाचरेदित्युपसंहाराच्च॥ ग्रहाग्रहदेवत्यकर्मसमूहेप्राणभृ
तउपदधातीतिवल्लिंगसमवायेनग्रहयज्ञशब्दः॥ तातचरणास्त्वयुत
होमादीनामेवप्राधान्यंग्रहहोमस्त्वंगमित्याहुः॥ तदाशयंनजानेयो
हिकामशब्देनफलसंबंधःश्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरे
दित्यादिःसतावद्ग्रहपूजाहोमयोरेवान्वितः॥ ग्रहसंबंधप्राप्तेर्ग्रहयज्ञ
शब्दस्यतन्नामत्वात्॥ नचायुतहोमादीनांफलसंबंधेतत्प्रकरणपाठा
द्ग्रहपूजाहोमयोरंगतेतिवाच्यं वैपरीत्यस्यापिसुवच त्वात्॥ अयुतहो
मादिशब्दानांग्रहयज्ञसामानाधिकरण्येनग्रहयज्ञनामत्वेतुलिंगसम
वायेनआर्थवादिकःफलसंबंधस्तु॥ अनेनविधिनायस्तुग्रहपूजांसमाचरे
त्॥ सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयतइत्यत्रयजदेवपूजासंगति
करणदानेष्वित्यनुशिष्टयोःपूजाहोमयोःसदैवायुतहोमोयमित्याद्युप
क्रम्यनिर्विघ्नार्थीमुनिश्रेष्ठइत्यादिनात्वयुतहोमादीनामपिस्मृतिषुस्तु
प्रायआर्थवादिकमेवफलं॥ अत्रकामशब्दोपनीतेफलेसत्यार्थवादि
कसंबंध्यतेनवेतितुविचारांतरं॥ किंचयाज्ञवल्क्यादिस्मृतिषुनतावद
युतहोमादीनांविधिर्नाप्यनुवादःअतोग्रहपूजाहोमयोःप्राधान्याभा
वेतत्रत्येतिकर्त्तव्यतासंबंधोनस्यात्॥ अतोग्रहपूजाहोमयोरपिप्राधा
न्यंभाति॥ अतएवक्वचित्केवलग्रहमखेषुतदंगकेषुचशांतिकादिकर्मे

स्वैकस्मृत्युक्तांगप्रधानादरेणस्मृत्यंतरोक्तप्रधानभूतायुतादिहोमंवि
नापिशाखांतरोक्तग्रहयागाभ्यासेविनैकशाखीयग्रहयागाभ्यांसमा
त्राणामिवपूजाग्रहदैवत्यहोमयोरेवानुष्ठानंकथंचित्शिष्टानांसंगच्छते
ग्रहपूजाहोमयोरंगत्वेत्वंगमात्रानुष्ठानमेवस्यात्॥अथग्रहादीनांल
क्षणानि॥मात्स्ये॥पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥सप्ताश्वरथसं
स्थश्चद्विभुजःस्यात्सदारविः॥श्वेतःश्वेतांबरधरोदशाश्वःश्वेतभूषणः
॥गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी॥रक्तमाल्यांबरधरःशक्तिशू
लगदाधरः॥चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥पीतमाल्यांबरध
रःकर्णिकारसमद्युतिः॥खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः॥देव
दैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ॥दंडिनौवरदौकार्यौसाक्षसूत्रकमं
डलू॥इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः॥बाणबाणासनधरःकर्त
व्योऽर्कसुतःसदा॥करालवदनःखड्गचर्मशूलीवरप्रदः॥नीलःसिंहास
नस्थश्चराहुरत्रप्रशस्यते॥धूम्राद्विबाहवःसर्वेगदिनोविकृताननाः॥गृ
ध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः॥सर्वेकिरीटिनःकार्याग्रहालोका
हितावहाः॥अंगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरंसदेति॥अथाधिदेवता
प्रत्यधिदेवतालक्षणानि॥विष्णुधर्मोत्तरे॥पंचवक्त्रोवृषारूढःप्रति
वक्त्रंत्रिलोचनः॥कपालीशूलखट्वांगीचंद्रमौलिःसदाशिवः॥अक्षसू
त्रंचकमलंदर्पणंचकमंडलुं॥उमाबिभर्तिहस्तेषुपूजितात्रिदशैरपि॥
कुमारःषण्मुखःकार्यःशिखंडकविभूषणः॥रक्तांबरधरोदेवोमयूर
वाहनः॥कुक्कुटश्चतथाघंटातस्यदक्षिणहस्तयोः।पताकावैजयंती
स्याच्छक्तिःकार्याचवामयोः॥विष्णुःकौमोदकीपद्मशंखचक्रधरः
क्रमात्॥प्रदक्षिणंदक्षिणाधःकरादारभ्यनित्यशः॥पद्मासनस्थोजटि
लोब्रह्माकार्यश्चतुर्भुजः॥अक्षमालांस्रुवंबिभ्रत्पुस्तकंचकमंडलुं॥च
तुर्दंतगजारूढोवज्रीकुलिशभृत्करः॥शचीपतिःप्रकर्तव्योनानाभरण
भूषितः॥ईषन्नीलोपमःकार्योदंडहस्तोविजानता॥रक्तदृक्पाशहस्त
श्चमहामहिषवाहनः।कालःकरालवदनोनीलांगश्चविभीषणः॥पाश
हस्तोदंडहस्तःकार्योवृश्चिकरोमवान्॥अपीच्यवेषस्याकारंद्विभुजंसौ
म्यदर्शनं॥दक्षिणेलेखनींचित्रगुप्तंवामेतुपात्रकं॥पिंगलश्मश्रुकेशाक्षः

पीनांगजठरोरुण॥च्छागस्थःसाक्षसूत्रोग्निःसप्तार्चिःशक्तिधारकः
॥चिन्हितंचमरेणास्यकरमन्यंप्रकल्पयेत्॥आपःस्त्रीरूपधारिण्यः
श्वेतामकरवाहनाः॥दधानाःपाशकलशौमुक्ताभरणभूषिताः॥शु
क्लवर्णामहीकार्यादिव्याभरणभूषिता॥चतुर्भुजासौम्यवपुश्चंडां
शुसदृशांबरा॥रत्नपात्रंसस्यपात्रंपात्रमोषधिसंयुतं॥पद्मंकरेच
कर्त्तव्यंभुवोयादवनंदन॥दिग्नागानांचतुर्णांसाकार्यापृष्ठगतात
था॥विष्णोरिंद्रस्यचोक्तं॥वामेशच्याःकरेकार्यासौम्यासंतानमं
जरी॥वरदामंडिताकार्याद्विभुजाचतथाशची॥यज्ञोपवीतीहंसस्थए
कवक्त्रश्चतुर्भुजः॥अक्षस्रुवंस्रुचंबिभ्रत्कुंडिकांचप्रजापतिः॥अक्षं
अक्षमालां॥कुंडिकांकमंडलुं॥अक्षसूत्रधराःसर्पाःकुंडिकापुच्छभूष
णाः॥एकभोगास्त्रिभोगावासर्वेकार्याश्चभीषणाः॥ब्रह्मलक्षणमुक्तं
॥ग्रहाणांदक्षिणेपार्श्वेस्यापयेदधिदेवताः॥ग्रहाणामुत्तरेपार्श्वेन्य
सेत्प्रत्यधिदेवताः॥अथविनायकादिलक्षणानि॥चतुर्भुजस्त्रिनेत्रश्च
कर्त्तव्योवगजाननः॥नागयज्ञोपवीतश्चशशांककृतशेखरः॥दक्षेदं
तंकरेदद्याद्द्वितीयेचाक्षसूत्रकं॥तृतीयेपरशुंदद्याच्चतुर्थेमोदकंतथा
॥शक्तिंबाणंतथाशूलंखड्गंचक्रंचदक्षिणे॥चंद्रबिंबमधोवामेखेट
मूर्ध्वेकपालकं॥सुकेकटंचबिभ्राणासिंहारूढातुदिग्भुजा॥एषादेवी
समुद्दिष्टादुर्गादुर्गार्त्तिहारिणी॥धावद्धरिणपृष्ठस्थोध्वजधारीसमी
रणः॥वरदानकरोधूम्रवर्णःकार्योविजानता॥नीलोत्पलाभंगगनंत
द्वर्णांबरधारिच॥चंद्रार्कहस्तंकर्त्तव्यंद्विभुजंसौम्यखंडवत्॥द्विभुजौ
देवभिषजौकर्त्तव्यौरूपसंस्थितौ॥तयोरोषधयःकार्यादिव्यादक्षिण
हस्तयोः॥वामयोःपुस्तकौकार्यौदर्शनीयौतथाद्विजाः॥एकस्यदक्षिणे
पार्श्वेवामेचान्यस्ययादव॥नारीयुगंप्रकर्त्तव्यंसुरूपंचारुदर्शनं॥रत्न
भांडकरेकार्यंचंद्रश्शुक्लांबरस्तथा॥अथलोकपालरूपाणि॥तत्रेंद्राग्निय
मरूपाण्यधिप्रत्यधिदेवतोक्तानि॥खड्गचर्मधरोबालोनिऋतिर्नरवा
हनः॥ऊर्ध्वकेशोविरूपाक्षःकरालःकालिकाप्रियः॥नागपाशधरोरक्त
भूषणःपद्मिनीप्रियः॥वरुणोंबुपतिःस्वर्णवर्णोमकरवाहनः॥वायुर्विना
यकादिःपंचकेउक्तः॥सोमोग्रहेषु॥अनंतःसर्पःसप्रत्यधिदेवतासु॥इत्यपु

नहोमः॥अथलक्षहोमः॥तत्रग्रहपीडादीनिनिमित्तान्युक्तान्यपुनर्होमा
र्थंभोदेवीपुराणे॥लक्षहोमंप्रवक्ष्यामियथाप्रोक्तंतुशंभुना॥भूमिकंपेदि
ग्दाहेग्रहयुद्धउपस्थिते॥केतुसंदर्शनेचैवआदित्यस्यचकंपने॥क
न्धावर्णेथवासूर्येतथाछिद्रसमन्विते॥रक्तवृष्टिस्तथानद्योविपरीतांव
हंतिच॥निर्गतंगगनाद्भूमंवारिमध्येचसंस्थितं॥उपसर्गास्तथालोकेस
तुक्षयकारकाः॥यस्यराशौग्रहाःपंचअथसप्तसुराशिषु॥ग्रहणंचंद्रसू
र्ययोस्वग्रहेवीष्टमसंस्थितेरित्यादि॥तथा॥कंपनंस्वेदनंगात्रेअंबुपानार्धज
ल्पनं॥देवतानांसुराध्यक्षउत्पाताःक्षयकारकाः॥लक्षहोमंप्रकुर्वीतकोटि
होममथापिवेति॥मात्स्ये॥अस्मादशगुणःप्रोक्तोलक्षहोमःस्वयंभुवा॥
आहुतीभिःप्रयत्नेनदक्षिणाभिस्तथैवच॥द्विहस्तविस्तृतंतत्रचतुर्हस्ता
यतंपुनः॥लक्षहोमेभवेत्कुंडयोनिवक्त्रत्रिमेखलं॥व्यासतोद्विहस्तंफल
नश्चतुर्हस्तायतंभवतीत्यर्थः॥तथा॥तस्यचोत्तरपूर्वेणवितस्तित्रयसं
मितं॥प्रागुदक्प्रवणंतद्वच्चतुरस्रंसमंततः॥विष्कंभार्धोच्छ्रितंप्रोक्तंस्थं
डिलंविश्वकर्मणा॥संस्थापनायदेवानांवप्रत्रयसमावृतं॥तस्मिंस्तावा
ह्येद्देवान्पूर्ववत्पुष्पतंडुलैः॥गरुत्मानधिकस्तत्रसंपूज्यःश्रियमिच्छता
॥सामध्वनिशरीरस्त्वंवाहनंपरमेष्ठिनः॥विषपापहरोनित्यमतःशांतिं
प्रयच्छमे॥अयंगरुडावाहनमंत्रः॥पूर्ववत्कुंभमामंत्र्यततोहोमंसमाच
रेत्॥सहस्राणांशतंहुत्वासमित्संख्याधिकंपुनः॥पूर्ववद्देवसमिदाज्यच
रुहोमंपूर्वोक्तैरेवमंत्रैःकुर्यात्॥गुरुत्मतः।सुपर्णोसिगरुत्मानितिइंद्रमि
त्रमितिवामंत्रः॥घृतकुंभवसोर्धारांपातयेदनलोपरि॥उदुंबरीमथार्द्रांच
ऋज्वींकोटरवर्जितां॥बाहुमात्रांस्रुचंकृत्वाततःस्तंभद्वयोपरि॥घृत
धारांतथासम्यगग्नेरुपरिपातयेत्॥श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैं
दं॥महावैश्वानरंसम्यग्ज्येष्ठसामचपाठयेत्॥स्नानंचयजमानस्यपूर्व
वत्स्वस्तिवाचनं॥दातव्यायजमानेनपूर्ववद्दक्षिणापृथक्॥कामक्रोध
विहीनेनऋत्विग्भ्यःशांतचेतसा॥तद्वद्द्वादशचाष्टौवालक्षहोमेपिऋत्वि
जः॥कर्तव्याःशक्तितस्तद्वच्चतुरोवाविमत्सराः॥ब्रह्माचार्यसहितानामे
वेयंसंख्येतिकेचित्॥नवग्रहमखात्सर्वंलक्षहोमेदशोत्तरं॥दद्याच्चमुनि
शार्दूलभूषणान्यपिशक्तितः॥शयनानिचवस्त्राणिहैमानिकटकानिच॥

कर्णांगुली पवित्राणि कंठसूत्राणि प्रान्कितः॥ नकुर्याद्दक्षिणाहीनं वित्तशा
ठ्येनमानवः॥ अदत्वा होमलोपाद्वा कुलक्षयमवाप्नुयात्॥ अन्नदानं य
थाशक्त्या कर्त्तव्यं भूतिमिच्छता॥ मंत्रहीनंकृतोयस्माद्दुर्भिक्षफलदोभ
वेत्॥ तथा॥ तस्मात्पीडां करोतीव यस्त्वेव भवति ग्रहः॥ तमेव पूजयेद्भक्त्या
हुत्वा नीत्वा यथाविधि॥ तथा॥ पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः
॥ यावत्कल्पशतान्यष्टौ अश्वमेधमवाप्नुयात्॥ तथा॥ पुत्रार्थी लभते पु
त्रं धनार्थी लभते धनं॥ भार्यार्थी लभते भार्यां कुमारी च शुभं पतिम्॥ भ्रष्ट
राज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात्॥ यं यं प्रार्थयते कामं तं तं प्रा
प्नोति पुष्कलम्॥ निष्कामः कुरुते यस्तु परं ब्रह्मसगच्छति॥ इति लक्षहोमः
॥ अथ कोटिहोमः॥ तत्राप्ययुतलक्षहोमप्रकरण एव निमित्तान्युक्तानि
॥ भविष्योत्तरेपि॥ संव — रण उवाच॥ भगवन्ब्रह्मवुत्पातसंभवे भूप्रकं
पने॥ निर्घातेपांसुवर्षे च ग्रहभंगे तथैव च॥ जन्मनक्षत्रपीडासु अनावृ
ष्टिभयेषु च॥ क्रूरासु ग्रहपीडासु दुर्भिक्षे राष्ट्रविप्लवे॥ व्याधीनां संभवे जा
ते शरीरे वतिपीडिते॥ क्लेशे महति चोत्पन्ने किं कर्त्तव्यं नरोत्तमैः॥ स्वर्ग
स्य साधनं यत्तत्कीर्त्तिदं धनदं तथा॥ प्रब्रूहि मनुजश्रेष्ठ तथारोग्यप्रदं
नृणां॥ सनत्कुमार उवाच॥ शृणु राजन् प्रवक्ष्यामि शांतिकर्मण्यनुत्तमं
॥ कोटिहोमाख्यमतुलं सर्वकामफलप्रदं॥ ब्रह्महत्यादिपापानि येन न
श्यंति तत्क्षणात्॥ उत्पाताः प्रशमं यांति महत्संपद्यते शुभं॥ विधानं त
स्य वक्ष्यामि शृणुष्वैकमना भव॥ देवागारे च भवने तीर्थे वा शिवसन्नि
धौ॥ पर्वते वाथ कुर्वीत यदिच्छेत्क्षेममात्मनः॥ शुभनक्षत्रयोगे च वारे स
र्वगुणान्विते॥ यजमानस्यानुकूले कोटिहोमं समाचरेत्॥ पूजयित्वा
प्रयत्नेन ब्राह्मणं वेदपारगं॥ वस्त्रैर्विभूषणैश्चैव गंधमाल्यानुलेपनैः॥
प्रणम्य विधिवत्तस्मै चात्मानं विनिवेदयेत्॥ त्वं मे यतः पिता माता त्वं ग
तिस्त्वं परायणं॥ त्वत्प्रसादेन विप्रर्षे सर्वं मे स्यान्मनोगतं॥ आपद्विमोक्ष
यत्वं मे कुरु यज्ञमनुत्तमं॥ कोटिहोमाख्यमतुलं शांत्यर्थं सार्वकामिक
॥ पुरोहितस्ततः शांतः शुक्लांबरधरः शुचिः॥ ब्राह्मणैः संवृतः पुण्यैः सपुनः
सुसमाहितैः॥ भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा॥ पुण्याहं वाचये
त्पूर्वं कृत्वा विप्रांस्तु पूजयेत्॥ ततः समाहितो विप्रैः सूत्रयेन्मंडपं शुभम्।

उत्तमंशतहस्तंतुतदर्द्धेनतुमध्यमं॥अधमंतुतदर्द्धेनशक्तिकालाद्य
पेक्षया॥मध्येतुमंडपस्यापिकुंडंकुर्याद्विचक्षणः॥अष्टहस्तप्रमाणेन
आयामेनतथैवच॥मेखलात्रितयंतस्यद्वादशांगुलविस्तरं॥तत्प्रमा
णंतथायोनिंकुर्वीतसुसमाहितः॥कुंडस्यपूर्वभागेतुवेदींकुर्याद्विचक्ष
णः॥चतुर्हस्तांसमांचैवहस्तमात्रोच्छ्रितांनृप॥स्थापनंचसदेवानांकु
र्याद्यत्नेनबुद्धिमान्॥उपलिप्यततोभूमिंमंडपस्यप्रकल्पयेत्॥स्था
पयेद्दिक्षुसर्वासुतोरणानिविचक्षणः॥एवंसंभृतसंभारःपुरोधाःसुस
माहितः॥पुण्याहजयघोषेणहोमकर्मसमाचरेत्॥स्थापयित्वासु
रान्वेद्यांवक्ष्यमाणान्नरेश्वर॥ब्रह्माणंपूर्वभागेतुमध्येदेवंजनार्दनं॥प
श्चिमेतुतथारुद्रंवसूंस्तुनरतस्तथा॥ईशान्यांचग्रहान्सर्वानाग्नेय्यां
मरुतस्तथा॥वायुभूम्यांतथैशान्यांलोकपालान्क्रमेणतु॥एवंसंस्था
प्यविबुधान्यथास्थानंनृपोत्तम॥पूजयेद्विधिवद्वस्त्रैर्गंधमाल्यानु
लेपनैः॥वेदोक्तमंत्रैस्तल्लिंगैःपुराणोक्तैःपृथक्पृथक्॥आदित्यावस
वोरुद्रालोकपालास्तथैवच॥ब्रह्माजनार्दनश्चैवशूलपाणिर्महेश्वरः॥
अत्रसन्निहिताःसर्वेभवंतुसुखभागिनः॥पूजांगृण्हंतुसर्वेत्रमयाभ
क्त्योपपादितां॥प्रकुर्वंतुशुभंसर्वेयज्ञकर्त्तुःसमाहिताः॥एवंतुपूजयि
त्वातान्देवान्यत्नेनशुद्धधीः॥नैवेद्यैर्विविधैर्भक्ष्यैःफलैश्चैवसुशोभि
तैः॥ततस्तुनैर्द्विजैःसर्वैःकुंडस्यविधिपूर्वकं॥कुर्यात्संस्कारकरणंय
थोक्तंवेदवित्तमैः॥ततःसमाव्हयेद्वन्हिंनाम्नाख्यातंघृतार्चितं॥नियो
जयेद्द्विजांस्तत्रशतसंख्यान्नृपोत्तम॥अलाभेचबहूनांचयथालाभं
नियोजयेत्॥विद्यावित्तवयोवृद्धान्गृहस्थान्संयतेंद्रियान्॥स्वकर्म
निरतान्बुद्ध्याज्ञानशीलान्प्रयत्नतः॥चिंतयेत्तत्रदेवेशंपंचास्यंनृपपा
वकं॥मुखानितस्यचत्वारिसप्तजिह्वानिपार्थिव॥एकजिह्वमथैकंतु
तत्स्मृतंसार्वकामिकं॥धूमायमानेनवृथाहोतव्यंज्वलितेनते॥ऋग्भिः
पूर्वमुखैःकार्योयजुर्भिश्चोत्तरामुखैः॥सामभिःपश्चिमेकार्यःपूर्ववद्दक्षि
णामुखैः॥आघारावाज्यभागौतुपूर्वंहुत्वाविचक्षणाः॥परितश्चपरि
स्तीर्णकल्पितेनचतथासने॥ब्राह्मणाःपूर्वमेवात्रसर्वंपश्चात्समाचरेत्
॥होमोव्याहृतिभिश्चैवसर्वस्तत्रविधीयते॥प्रणवादिभिश्चतल्लिंगैः

स्वाहाकारांतयोजितैः।जुहुयात्सर्वदेवानांवेद्योपेचावकल्पिताः।एवं
प्रकल्पयेद्यज्ञंकोटिहोमाख्यमुत्तमं॥तिलाःकृष्णाघृताभ्यक्ताःकिंचि
द्व्रीहिसमन्विताः॥किंचिद्यवसमायुक्ताइतिकपिलादः।होतव्याःको
टिहोमेतुसमिधःस्युःपलाशजाः॥पूर्णेपूर्णेसहस्रेतुदद्यात्पूर्णाहुतिंशु
भाम्॥पंचमेतन्मुखेराजन्सर्वकामार्थसिद्धये॥पूर्णाहुत्यःसमाख्या
ताःकोटिहोमेनराधिप॥सहस्राणिनृपश्रेष्ठदशशास्त्रविशारदैः॥प्रा
रंभदिनमारभ्यब्राह्मणैर्ब्रह्मवादिभिः॥होतव्यंयजमानैश्चअथवासु
पुरोहितैः॥क्रोधलोभादयोदोषावर्ज्जनीयाश्चयत्नतः॥यजमानेन
राजेंद्रसर्वकामानभीप्सता॥मात्स्ये॥अस्माच्छतगुणःप्रोक्तःकोटिहो
मःस्वयंभुवा॥आहुतीभिःप्रयत्नेनदक्षिणाभिःफलेनच॥पूर्ववद्ग्रहदे
वानामावाहनविसर्ज्जनं॥होममंत्रास्तएवोक्ताःस्नानदानेतथैवच॥
कुंडमंडपवेदीनांविशेषोयंनिबोधमे॥कोटिहोमेचतुर्हस्तंचतुरस्रं
चसर्वशः॥योनिवक्त्रद्वयोपेतंतदप्याहुस्त्रिमेखलं॥सर्वशःचतुर्हस्त
मितिविस्तारायामखातेष्वित्यर्थः।योनिवक्त्रद्वयोपेतमित्येकायोनिः
पश्चिमतोन्यादक्षिणतइतिहेमाद्रिः॥वक्त्रंकंठः॥योनिकंठयुतमिति
पितामहचरणाः।वेदिश्चकोटिहोमेस्याद्वितस्तीनांचतुष्टयं॥चतुर
स्रासमाहूतात्रिभिर्वप्रैःसमावृता॥वप्रमानंयथाप्रोक्तंवेदिकायास्त
थोच्छ्रयः॥उत्तमयुतहोमे॥तथाषोडशहस्तःस्यान्मंडपश्चचतुर्मु
खः॥पूर्वद्वारेचसंस्थाप्यबह्वृचंवेदपारगं॥याजुर्वेदंतथायाम्येपश्चि
मेसामवेदिनं॥अथर्ववेदिनंतद्वदुत्तरेस्थापयेद्बुधः।अष्टौतुहोमकाःका
र्यावेदवेदांगवेदिनः।एवंद्वादशतान्विप्रान्वस्त्रमाल्यानुलेपनैः॥पूर्व
वत्पूजयेद्भक्त्यासर्वाभरणभूषितैः॥रात्रिसूक्तंचरौद्रंचपावमानंसुमं
गलं॥पूर्वतोबह्वृचःशांतिंपठन्नास्तउदङ्मुखः॥शाक्तंरौद्रंचसौम्यं
चकौष्मांडंशांतिमेवच॥पठेत्तुदक्षिणेद्वारियाजुर्वैदिकसुत्तमः॥सौपर्ण
मथवैराजमाग्नेयंरौद्रसंहितां॥ज्येष्ठसामतथाशांतिंछंदोगःपश्चिमे
पठेत्॥शांतिसूक्तंचतथातथाशाकुनकंशुभं॥पौष्टिकंचमहाराजउ
त्तरेणाप्यथर्ववित्॥पंचभिःसप्तभिर्वाथहोमःकार्योत्रपूर्ववत्॥स्नाने
दानेचमंत्राःस्युस्तएवमुनिसत्तम॥वसोर्द्धाराविधानंतुलक्षहोमवद्

ष्यते॥ अनेनविधिनायस्तुकोटिहोमंसमाचरेत्॥सर्वान्कामानवाप्नोति
ततोविष्णुपदंव्रजेत्॥ यःपठेच्छृणुयाद्वापिग्रहशांतिमिमंनरः।सर्वपा
पविशुद्धात्मापदमिंद्रस्यगच्छति॥अश्वमेधसहस्राणिदशपाठेन
धर्मवित्॥कृत्वायत्फलमाप्नोतिकोटिहोमात्तदश्नुते॥ब्रह्महत्यासह
स्राणिभ्रूणहत्यार्बुदानिच॥नश्यंतिकोटिहोमेनयथावद्देवभाषितं
॥इतिकोटिहोमः॥ अथशतमुखकोटिहोमः॥ संवरणउवाच॥बहु
त्वात्कर्मणोब्रह्मन्कोटिहोमःसुदुष्करः॥कालेनमहतानैवकर्तुंशक्यः
कथंचन॥नियमाब्रह्मचर्याद्यादुष्करास्इतिमेमतिः॥निरोधो ब्राह्मणा
नांचभूशय्यादिसुदुष्करं॥कार्याणामलघीयस्त्वात्सर्वकालाद्यपेक्षया
॥एतद्विज्ञायतंब्रह्मन्सर्वशास्त्रेषुपठ्यते॥कोटिहोमस्यसंक्षेपंवद
मेब्रह्मसंभव॥सनत्कुमारउवाच॥शताननोदशमुखोद्विमुखैकमु
खस्तथा॥चतुर्विधोमहाराजकोटिहोमोविधीयते॥कार्यस्यगुरुतां
ज्ञात्वानेकद्व्यमथपर्वणः॥यथासंक्षेपतःकार्यःकोटिहोमस्तथाशृ
णु॥कृत्वाकुंडशतंदिव्यंयथोक्तमानसंमितं॥एकैकस्मिंस्तथाकुंडेद
शविप्रान्नियोजयेत्॥सद्यःपक्षेतुविप्राणांसहस्रंपरिकीर्तितं॥एक
स्थानप्रणीतेग्नौसर्वतःपरिभाविते॥एकस्थानात्सर्वतःसर्वतःसर्व
स्मिन्कुंडेपरिभावितेसंस्कृतेग्नौप्रणीतइत्यर्थः॥होमंकुर्युर्द्विजाःसर्वे
कुंडेकुंडेयथोदितं॥यथाकुंडबहुत्वेपिराजसूयेमहाक्रतौ॥नचान्य
ग्निबहुत्वंस्यान्नचपत्न्यादिभिद्यते॥तथाकुंडशतेप्यत्रपृथग्विधिनियो
जिते॥एकएवभवेद्यज्ञःकोटिहोमोनसंशयः॥एवंयैःक्रियतेसिप्रंव्या
कुलैःकार्यगौरवात्॥शताननःसविज्ञेयःकोटिहोमोनसंशयः॥स्वल्पै
र्होभिःकार्यस्त्वादीर्घकालादिकेपिवा॥तस्माद्दशमुखःकार्यःकोटिहोमः
शुभेमते॥विप्राणांहिशतेतत्रप्रविभज्यनियोजयेत्॥तेपिविज्ञातशी
लाःस्युर्वृत्तवंतोजितेंद्रियाः॥पद्मकुंडद्वयंकृत्वाविभज्यचविभावसुं
॥होमंकुर्युर्द्विजाभूयःसंस्कृत्यविधिपूर्वकम्॥शतंतत्रनियोज्यंचवि
प्राणांप्रविभज्यवै॥मासेऽथवाऽर्द्धमासेवाकार्यःकालेह्युपस्थिते॥त
दापिद्विमुखःकार्यःकोटिहोमोविचक्षणैः॥तदनुत्वेच्छयायतंयज
मानःसमापयेत्॥कालेनबहुनाराजंस्तदाचैकमुखोभवेत्॥एककुं

स्थितोवन्हिरेकचित्तैःसमाहितैः॥यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्वि-
चक्षणैः॥नसंख्यानियमस्त्वत्रब्राह्मणानांनरोत्तम॥नकालनियमश्चै
कस्वेच्छायज्ञःसउच्यते॥आवृत्याकर्त्तुकामस्यचातुर्मास्यादिकर्मव
त्॥तदाप्रसक्तःकर्त्तव्योयज्ञोयंसर्वकामिकः॥अथयेकमुखोराजन्
कालेनबहुनाभवेत्॥बहुविघ्नश्चकालोवैतस्मात्संक्षेपमाचरेत्॥यतो
वैवित्तमायुश्चवित्तंचैवाःस्थिरंसदा॥अतःसंक्षेपतःकार्यंधर्मकार्यंप्र
शस्यते॥ततःसमाप्तेयज्ञेतुकारयेत्सुमहोत्सवं॥शंखतूर्य्यनिनादेनब्र
ह्मघोषरवेणच॥ततस्तुदक्षयेद्विप्रान्ऋत्विजःश्रद्धयान्वितः॥एकैकं
कनकैश्चैवकुंडलैर्विविधैर्नृप॥गोशतंचैवदातव्यमश्वानांचशतंतथा॥
सहस्रंतुसुवर्णस्यसर्वेषामपिदापयेत्॥ग्रामैर्गजैरथैरश्वैःपूजयेच्चपु
रोहितं॥दीनांधकृपणान्सर्वान्वस्त्रैरन्नैश्चापिपूजयेत्॥ततश्चावभृ
थेस्नायात्तैर्घटैःपूर्वकल्पितैः॥कलशहोमोक्तमंत्रेणसदाविजयकारिणा
॥एवंसमापयेद्यस्तुकोटिहोमंमखंशुभम्॥तस्यारोग्यंप्रियाःपुत्राआ
युर्वृद्धिस्तथैवच॥सर्वपापक्षयश्चैवजायतेनृपसत्तम॥अनावृष्टिभयं
चैवउत्पातभयमेवच॥दुर्भिक्षग्रहपीडाश्चप्रशमंयांतिभूतले॥एतत्पु
ण्यंपापहरंसर्वकामफलप्रदं॥सनत्कुमारमुनिनापार्थिवायनिवेदि
तं॥सर्वोपसर्गशमनंभवनाशनंवायेकारयंतिमनुजानृपकोटिहोमं॥
भोगानवाप्यमनसोभिमतान्प्रकामंतेयांतिशक्रसदनंभुविमुक्तस
त्वाः॥अथयद्यैतेसाहस्राःसायस्काइत्येकसंज्ञयोपक्रांतेषुकमाम्ना
तेषुचनिकायिसंज्ञकेषुयागेषुप्रथमस्याम्नातधर्मकस्यधर्माउत्तरेष्व
नाम्नातधर्मकेषुनिकायित्वावांतरसामान्यात्साहस्रसाद्यस्काद्येकना
मकत्वाच्चप्रवर्त्तेतइत्यष्टमेनिकायिनांतुपूर्वस्योत्तरेषुप्रवृत्तिःस्यादि
त्यत्रनिरणायि॥तथेहचतुर्विधोमहाराजकोटिहोमइतिचतुर्णांकोटि
होमनामत्वावांतरसामान्येनसधर्मकस्यैकमुखस्यधर्माअनाम्नातध
र्मकेषुद्विमुखादिषुप्रवर्त्ततेतेनतेषांविकृतित्वं॥तत्रद्विमुखेतावत्कुंडद्व
यंप्रकृतिप्राप्तेषुशतपंचाशत्पंचविंशतिहस्तमंडपेषुमध्यमनवमांशेका
र्यंतस्यैवमध्यमेनवमांशेतुकुंडकुर्याद्विचक्षणइतिप्रकृतौवचनेनात्रा
पितथाप्राप्तेः॥तच्चकुंडद्वयंषट्हस्तंदशलक्षमितेहोमेषट्करंसंप्रचक्षतइ

तिभविष्यत्पुराणात्॥ पंचहस्तं वा॥ कुंडं पंचकरं प्रोक्तं दशलक्षाहुतौ न
मादितितत्वांतराच्च॥ दशलक्षोत्तरमेकोनकोटिपर्यंतं पंचषट्करेत्यर्थः
॥ अयुतहोमतः प्राप्तं एकहस्तत्वं प्राकृतं परिमाणं त्वादृष्टार्थत्वापत्त्याः
प्राकृतकार्यत्वाद्बाध्यते॥ अर्थात्परिमाणमिति कात्यायनोक्तेश्च॥ तत्र
पंचविंशतिहस्ते मंडपे मध्यनवांशे दक्षिणोत्तरयोः कुंडद्वयं निविशते॥
कथंचित्प्रकृतितो द्वादशांगुलमेखलाप्राप्तेः॥ इतरयोस्तु मंडपयोः सुग
मएव निवेशः॥ एवं दशमुखेपि प्राप्ते तैकहस्तत्वबाधेन पंचकराणि ष
ट्कराणि वा दशकुंडानि॥ तेषु प्रत्येकं दशलक्षा आहुतयः॥ तत्र पंचविं
शतिहस्ते मंडपे मध्यमांशेषु पूर्वादिषु चतुर्षु दिक्षु मध्ये संलग्नानि च
त्वारि कुंडानि॥ प्राकृतमध्यमांशाधिकरणत्वस्य यावत्संभवमनुग्रह
स्य न्याय्यत्वात्॥ प्राचि नवमांशे तु प्राकृता चतुःकरा वेदी॥ सप्तस्वंशेषु
षट्कुंडानि यः कश्चिदेकोंशस्तु रिक्तएव॥ कुंडद्वयं मध्यमांशे॥ अष्टसं
शेष्वष्टाविति केचित्॥ शतमुखेपि पंचविंशतिहस्ते तावन्मंडपे शतकुं
डनिवेशो बाधितएव॥ पंचाशद्धस्ते यद्यपि संभवति तथापि सहस्रविप्रा
णां सुखेन निवेशो बाधितः॥ अतः शतहस्तएव निवेशउच्यते॥ तत्र मध्य
मांशे प्राग्भागे उदक्संस्था पंचानामेका पंक्तिः॥ तेषां च कुंडानां प्रत्येकमंत
रं सार्द्धसप्तहस्ताः सप्तांगुलानि च॥ ततः प्रतीच्यामेतादृशैवान्यपंक्ति
त्रयं कार्यम्॥ पंक्तीनामंतरं चाष्टौ हस्ताः॥ सप्तांगुलानि च॥ एवं विंशतिकुं
डानि मध्यभागे अन्येष्वष्टसु भागेषु मध्ये द्वे द्वे ऽष्टसु दिक्ष्वष्टावष्टाविति
॥ प्रत्येकं दशदशेति॥ ननु शतकुंडेषु प्रत्येकं लक्षाहुतिप्राप्तिः॥ नैवं तत्
यः कोटिहोमपक्षे संभवति॥ कृत्वा कुंडशतं दिव्यं यथोक्तं हस्तसंमित
मिति शतमुखप्रकरणे कुंडानां हस्तपरिमाणोक्तेरिति चेत् तत्र केचित्
हस्तसंमितमित्यत्र हस्ताभ्यां हस्तैर्वा संमितमिति विग्रहेण त्रिचतुर्ह
स्तेनापि युज्यते॥ द्विहस्तेपि तु लक्षमाहुतयः संमांत्येव॥ अतएव हेमा
द्रौ॥ अयुते तत्प्रहोतव्ये कुंडं स्याद्धस्तमात्रकं॥ द्विगुणं लक्षहोमे तु कोटि
होमे चतुर्गुणमिति॥ यद्यप्यौत्सर्गिकएकवचनांते नैव विग्रहस्तथाप्यु
पपत्त्या द्विबहुवचनांतेनापि क्रियते॥ यथा सप्तदश प्राजापत्यान् पशूना
लभत इत्यत्र चोदकप्राप्तैकपशुनिष्पन्नहृदयाद्येकादशावदानगणानुरोधे

न्प्रजापतिर्देवता यस्यासौ प्राजापत्यः प्राजापत्यश्च प्राजापत्यश्च प्राजापत्य
इति कृत्तद्धितानामेकशेष एव प्रयोगो न तु अपवादपञ्चैक इत्येकशेषोत्तरं त
द्धितं चोदकबाधापत्तेरित्युक्तं॥ एवं हि चतुर्हस्तकुंडसंपत्त्या युज्यंत एकैक
स्मिन् कुंडे लक्षमाहुतय इत्याहुः॥ तानचरणास्तु॥ व्यासतुल्यखातेनष
ट्पंचचतुस्त्रिंशदंगुलानां पंचमेखलानां विंशत्यंगुलोच्चतया च मध्या
वकाशविवृध्या एकैकहस्तेष्वपि शक्या एव लक्षमाहुतयः कर्तुं॥ अनार
भ्याम्नातपंचमेखलापक्षेण प्राकृतमेखलात्रयबाधस्तूपदिष्टैकहस्तत्वा
नुरोधेनेति युक्तमाहुः॥ अन्ये एकस्मिन्कुंडे आज्यभागांतं कृत्वाऽन्यकुंडेष्वग्नि
प्रणयनमिति केचित्॥ तन्न॥ वरुणप्रघासिकदक्षिणोत्तरवेद्योरनुष्ठीय
मानायामाहुत्यामाग्नेयाद्यष्टहविष्षु वाधाराज्यभागप्रयाजाद्यंगानां
पृथगनुष्ठानवदाज्यभागांतं स्विष्टकृदाद्यंगानुष्ठानवदिहापि तिस्र आ
हुतीति वत्संख्यया भिन्नेषु कोटिसंख्याकेषु होमेषु लक्षशः शतकुंडेष्व
नुष्ठीयमानेष्वाज्यभागांतस्विष्टकृदाद्यंगानुष्ठानभेदस्यैव न्याय्यत्वात्
॥ किंच अप्रमादार्थं न दीक्षाकालीनजागरणेन दीक्षोपयुक्तसंभारसंर
क्षणेपि प्रायणीयाद्यर्थसंभारसंरक्षणार्थोतिदेशिकजागरणावृत्तिवदि
हाप्यग्निसमिंधनार्थं प्राधानावृत्तिः कृत्स्नमप्यनिवार्यैव॥ नहि आचार्य
कुंडस्थेग्नौ समिद्धे कुंडांतरस्थानां समिंधनं भवति॥ अत एव द्युतहोमेपू
र्वैर्लिखितं तत्र हस्ताकारवज्रकुंडीपक्षे प्रधानाय तनादग्निं विभज्य आ
चार्यकुंडेषु प्रणीय न वाचार्यो आज्यभागांतं कृत्वेत्यादिना होमशेषं समा
प्य पूर्णाहुतीर्हुत्वेत्यंते नाज्यभागांतानां स्विष्टकृदादीनां चांगानामावृत्ति
र्लिखनं प्रयोगपारिजातीयं संगच्छते तदेव च कोटिहोमे चोदकात्प्राप्तं
॥ प्राकृताष्टसंख्याबाधेन नवतिसंख्यामात्रं विधीयते॥ यद्यपि प्रणयनं
तरं तथापि तद्धर्मकमेवं सर्वेषामंगानामावृत्तिरेव एतावान् विशेषः शतसं
ख्यपाकुंडेषु नवसंख्याग्रहाद्याकारास्थलविशेषाश्च निवर्तंते॥ अतोग्नि
स्थापनोत्तरमेव प्रणयनं॥ यत्तु पारिजाते मध्यकुंडात्प्रणयनमुक्तं। तं
न प्रागुदगपवर्गप्रचारबाधात्॥ तेन तत्संरक्षणार्थं नैर्ऋत्यकुंडादेव प्र
णयनं कार्यं॥ अस्तु वा कथंचिद्युतहोमे मध्यकुंडसद्भावात्तस्य च स
र्वप्रधानभूतसूर्यदेवत्यत्वात् कथंचित्ततः प्रणयनं शतमुखे तु मध्ये कुं

डुनिवेशाभावान्नततोग्निप्रणयनंमध्यस्थलसमीपवर्त्तिष्वनेककुंडेषु
तुविनिगमनाविरहः॥सर्वोप्ययंकोटिहोमविचारस्तावत्तच्चरणे हैंतनि
र्णयेसुविवृतइतिनेहविस्तरः॥अथप्रायोमात्स्यानुसारिणींभट्टकृतांप
द्धतिमनुसृत्यग्रहमखप्रयोगः॥कर्त्ताप्रारंभदिनात्पूर्वंसुदिनेदानमयू
खीयास्मदुक्तप्रकाराणामन्यतमप्रकारेणप्राचींसंसाध्यतत्रवितस्त्य
च्छ्रायंमंडपनिवेशयोग्यंचतुरस्त्रंचत्वरंकृत्वापूर्वाण्हेदेशकालौस्मृत्वा
ऽमुककर्मकर्त्तुंमंडपंकरिष्यइतिसंकल्प्यगणेशंकूर्मंशेषंवासुकिंद्विजां
श्चसंपूज्यआगच्छसर्वकल्याणिवसुधेलोकधारिणि॥उद्धृतासिवराहे
णसशैलवनकानना॥मंडपंकारयाम्यत्रत्वदूर्ध्वेशुभलक्षणं॥गृहा
णार्घ्यंमयादत्तंप्रसन्नाशुभदाभवेतिवसुधायाअर्घ्यंदत्त्वास्योनापृ
थिवीतितांप्रार्थ्यमंडपंतदुदीच्यांमध्येवाकुंडंवेदिंचकुर्यात्॥मंडपश्चा
युतहोमेष्टहस्तोदशहस्तोवाकुंडंहस्तमितंचतुरंगुलैकमेखलंवेदीमं
डपांतरभागेहस्तविस्तृताबितस्त्युच्छ्रितावप्रत्रयवतीकार्या॥तत्र
प्रथमोवप्रस्त्र्यंगुलोच्छ्रायः॥तदुपरितनौप्रत्येकंद्व्यंगुलोच्छ्रितौ॥वि
स्तारस्तुसर्वेषामपिप्रत्येकंत्र्यंगुलः॥लक्षहोमेतुमंडपोद्वादशचतुर्दश
षोडशहस्तोपिकुंडंक्षेत्रफलतश्चतुःकरं॥तदेवव्यासतोद्विकरं॥द्वित्रि
चतुरंगुलोच्चत्रिमेखलं॥तत्रोपरितनीचतुरंगुलविस्तारा अधोगतेद्वे
अपिप्रत्येकंद्व्यंगुलविस्तारे॥कुंडादीशान्यांसार्द्धहस्तविस्तृतातदर्द्धो
च्छ्रितेशानप्रवणापूर्ववत्त्रिवप्रावेदी॥कोटिहोमेतुशततदर्द्धतदर्द्धषो
डशान्यतमहस्तोमंडपःकुंडंतु अष्टहस्तंदशहस्तंषोडशहस्तंवाफ
लतः॥तच्चव्याससमखातंमंडपमध्येतस्यदक्षिणपश्चिमयोर्योनि
रूपं॥वेदीचप्राच्यांद्विहस्तविस्तृतेतिविशेषः॥द्विमुखदशमुखशत
मुखेषुतुनिर्णयावसरेसन्निवेशउक्तः॥कर्त्तासुदिनेमासपक्षादिसंकी
र्त्यश्रीकामादिर्ग्रहपीडानिवारणकामोवाऽयुतहोमंलक्षहोमंवाक
रिष्यइतिसंकल्प्य॥गणेशपूजास्वस्तिवाचनमातृपूजावृद्धिश्राद्धा
चार्यादिवरणानिकुर्यात्॥तत्रायुतहोमेचत्वारऋत्विजोद्वौवा॥लक्ष
होमेद्वादशाष्टौचत्वारोवा॥कोटिहोमेष्टौहोमार्थंचत्वारोद्वारजापका
इतिद्वादश॥अयुतलक्षकोटिहोमेषुत्रिष्वपिषोडशवा॥ब्रह्माचार्यौवप्य

तन्मध्यएवसर्वत्र॥वरणमंत्रास्तु॥आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः॥तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत॥यथाचतुर्मुखोब्रह्मास्वर्गलोकेपितामहः॥तथास्मिन्ममयज्ञेत्वंब्रह्माभवद्विजोत्तम॥अस्ययागस्यनिष्पत्तौभवंतोऽभ्यर्थितामया॥सुप्रसन्नाःप्रकुर्वंतुशांतिकंविधिपूर्वकं॥कोटिहोमेतुगुरुप्रार्थना॥त्वंमेयतःपितामातात्वंगतिस्त्वंपरायणं॥त्वत्प्रसादेनविप्रर्षेसर्वमेस्यान्मनोगतं॥आपद्धिमोक्षायचमेकुरुयज्ञमनुत्तमं॥कोटिहोमाख्यमतुलंशांत्यर्थंसार्वकामिकमिति।ततःसर्वानाचार्यादीन्स्वशाखीयानामृत्विक्शाखीयानांचपदार्थानामनुसमयेनमधुपर्केणसंपूज्यवस्त्रकुमाल्यांवरानुलेपनःसपत्नीकऋत्विक्सहितोभद्रंकर्णेभिरितिवेदघोषेणमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत्॥ततआचार्योयदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा॥स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु॥अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥सर्वेषामविरोधेनब्रह्मकर्मसमारभेइतिसर्षपान्विकीर्यशुचीवोहव्येतिएतोन्विंद्रमितिचतृचाभ्यांआपोहिष्ठेत्यादिभिश्चभुवंप्रोक्ष्यस्वस्त्ययनंतार्क्ष्यमितिऋग्द्वयंपठेत्॥ततोमंडपनिर्ऋतिभागेहस्तमितांवेदिंकृत्वातस्यांवस्त्रंप्रसार्यतत्रसुवर्णादिशलाकयानवरेखाःप्राक्पश्चिमायतानवचदक्षिणोत्तरायताःकृत्वामध्यकोष्ठचतुष्टयमेकीकृत्यप्रतिकोणंत्रिषुपदेषुसूत्रंदद्यात्॥तथाचतुर्विंशतिरुद्रपदानिसंपद्यंते॥मंडलस्याग्नेयादिषुकोणेषुशंकुचतुष्टयं॥विशंतुभूतलेनागालोकपालाश्चसर्वतः॥मंडपेत्रावतिष्ठंतुआयुर्बलकराःसदेतिमंत्रेणनिखाय॥अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः॥तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमं॥नैर्ऋत्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः॥बलिंतेभ्यःप्रयच्छामिसर्वेगृह्णंतुमंत्रितं॥ॐनमोवायुरक्षोभ्योयेचान्येतान्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामिपुण्यमोदनमुत्तमं॥रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतान्समाश्रिताः॥बलिंतेभ्यःप्रयच्छामिगृण्हंतुसततोत्सुकाइतिमंत्रैःशंकुपार्श्वेषुयथाक्रमंप्रतिमंत्रंमाषभक्तबलीन्दत्वा॥शांतिर्यशोवतीकांतिर्विशालाप्राणवाहिनीसतीसुमनानंदासुभद्राइतिनवप्रागायतरेखादेवताःपूजयित्वाहिरण्यासुप्रभालक्ष्मीर्विभूतिर्वि

मल्लाप्रिया जया कालाविशोका इतिन वद्क्षिणोत्तरायतरेखादेवता
श्चसंपूज्य मध्येव्यस्तसमस्तव्याहृतिभिर्वास्तुपुरुषमावाह्य वास्तो
ष्पते प्रतीति संपूज्य बलिं च दत्वा मध्यपद चतुष्टये वास्तोर्हृदये ब्रह्म
णमावाह्य पूजयित्वा ॐ ब्रह्मणे नमो बलिं समर्पयामीति पायसादिब
लिं दद्यात्॥ ततः पूर्वपदद्वये दक्षिणस्तने ऽर्यम्णे नमः॥ दक्षिणपदद्वये
जठरदक्षिणभागे विवस्वते नमः॥ पश्चिमपदद्वये वामभागे मित्राय।
वामस्तने पृथ्वीधराय नम इत्युदक्पदद्वये॥ आग्नेयकोण सूत्रद्विधा
कृतपदद्वयोत्तरार्द्धद्वये दक्षिणहस्ते सावित्राय॥ दक्षिणार्द्धद्वये सवि
त्रे च॥ एवं नैरृत्यपदद्वय पूर्वार्द्धद्वये वृषणयोर्विबुधाधिपाय॥ तत्प
श्चिमार्द्धद्वये उरसि अद्भ्यः दक्षिणार्द्धद्वये मुखे आपवत्साय॥ ततोंत्यपं
क्तिगते ईशानपददक्षिणार्द्धे शिरसि शिखिने॥ तद्दक्षिणबाहौ सूर्याय
॥ तद्दक्षिणयोर्दक्षिणबाहावेव सत्याय॥ तद्दक्षिणे स्यार्द्धे दक्षिणकूर्परे भ
शाय। तद्दक्षिणप्रबाहौ आकाशाय। तत्पश्चिमार्द्धे दक्षिणप्रबाहावेव वायवे॥
तत्पश्चिमद्वये दक्षिणोरसे यमाय॥ तत्पश्चिमयोर्दक्षिणजानौ गंधर्वाय
॥ तत्पश्चिमे सार्द्धपदे दक्षिणजंघायां भृंगराजाय॥ तत्पश्चिमे नैरृत्य
पदार्द्धे दक्षिणस्फिचि मृगाय॥ तदुत्तरार्द्धे पादयोः पितृभ्यः। तदुत्तरे सा
र्द्धपदे वामस्फिचि दौवारिकाय॥ तदुत्तरयोर्वामजंघायां सुग्रीवाय॥ त
दुत्तरयोर्वामजानौ पुष्पदंताय॥ तदुत्तरयोर्वामोरौ वरुणाय॥ तदुत्तरयो
वामपार्श्वेसुराय॥ तदुत्तरे सार्द्धपदे वामपार्श्वे शोषाय॥ तदुत्तरे वायव्या
र्द्धे वाममणिबंधे पापाय॥ तत्प्रागर्द्धे वामप्रबाहौ रोगाय॥ तत्प्राक्सार्द्धे
वामप्रबाहावेव वाहवे॥ तत्प्राक्द्वये वामकूर्परे मुख्याय॥ तत्प्राक्द्वये वा
मबाहौ भल्लाटाय॥ तत्प्राक्द्वये वामबाहावेव सोमाय॥ तत्प्राक्द्वये वा
मांसे सर्पाय॥ तत्प्राक्सार्द्धे वामश्रोत्रे अदित्यै॥ तत्प्रागर्द्धे वामनेत्रे दित्यै
॥ तत उत्तरे वास्तोष्पत इति वास्तोष्पतये॥ ततो मंडलाद्बहिरीशानादि
षु चरक्यै विदार्यै पूतनायै॥ पापराक्षस्यै॥ ततः पूर्वादिषु स्कंदायअ
र्यम्णे॥ जंभकाय पिलिपिच्छाय॥ पुनः पूर्वादिषु इंद्रादीन्॥ ततो मंडला
दीशाने कलशं संस्थाप्य तत्र वरुणं तत्वायामीत्यावाह्य पूजयेत्। यथा
मेरुगिरेः शृंगं देवानामालयः सदा॥ तथा ब्रह्मादिदेवानां मम यत्ने स्थि

गो भवेतिप्रार्थयेदिति॥ततउदुंबरादिसमित्तिलाज्यैः स्वतंत्रस्थंडिलेष्ट
विंशतिरष्टौ वा प्रत्येकं तत्तन्नाममंत्रैर्हुत्वा वास्तोष्पतइति चतुर्भिश्च
हुत्वा ॐ वास्तोष्पतये इति मंत्रेण पंचबिल्वफलानि हुत्वा स्विष्टकृदा
दि पूर्णाहुत्यंतं कुर्यात्॥ततो मंडलदेवताभ्यः पायसबलिं दत्वा कृणुष्व
पाजइति सूक्तादिना मंडपं त्रिसूत्र्या वेष्टयित्वा वास्तुकलशेन यजमान
मभिषिच्य पुनः संपूज्य यथाशक्ति दक्षिणां दत्वा ब्राह्मणान् भोजयेदिति
॥शारदातिलके तु होमो नोक्तः॥तिलाज्यादिद्रव्याणां विकल्पस्तु ग्रंथां
तरे॥इति वास्तुपूजा॥मात्स्ये॥उपोषितास्ततः सर्वे कुर्युरेवमधिवासन
मिति॥पाद्मे॥उपवासी भवेदेवमशक्तौ नक्तमिष्यतइति॥सद्योधिवास
नं वाथ कुर्याद्यो वित्तवान्नरइति तत्रैवोक्तं॥अधिवासनं चैवं तत्र द्वार
पूजा॥पूर्वद्वारे द्वारश्रियै नमः॥ऊर्ध्वे देहल्यै अधः वामदक्षिणस्तंभयो
र्गणेशाय स्कंदाय नमः। द्वारस्थितकलशद्वये गंगायै यमुनायै॥दक्षिण
द्वारे द्वारश्रियै नमः॥ऊर्ध्वे देहल्यै॥अधस्तंभयोः पुष्पदंताय॰ कपर्दिने॰
कलशद्वये गोदावर्यै कृष्णायै इति। पश्चिमे द्वारश्रियै। ऊर्ध्वे देहल्यै। अधस्तंभ
योर्नंदिने। चंडाय नमः॥कलशद्वये रेवायै॥ताप्त्यै॥उत्तरे द्वारश्रियै। ऊर्ध्वे
देहल्यै अधःस्तंभयोर्महाकालाय नमः॥भृंगिणे नमः। कलशद्वये वा
नैव वेण्यै॥इति द्वारपूजा॥अथ तोरणपूजा॥तत्र पूर्वबहिर्हस्तमात्रे वटः
तोरणमश्वत्थं वा सुहृदनामकं सुशोभननामकं वा शंखांकितमग्निमी
ळे इति मंत्रेण न्यस्य संपूज्य राहुबृहस्पती तत्र न्यसेत् पूजयेच्च॥तत्रै
कः कलशः स्थाप्यः॥तत्र मही द्यौरिति भूप्रार्थना॥ओषधयः समिति यव
प्रक्षेपः॥आकलशेष्विति कलशनिधानं॥इमं मे गंगइति जलपूरणं॥गंध
द्वारामिति गंधं प्रक्षिपेत्॥याओषधीरिति सर्वौषधीः॥ओषधयः समि
ति यवान्॥कांडात्कांडादिति दूर्वाः॥अश्वत्थेवइति पंचपल्लवान्॥स्योना
पृथिवीति पंचमृदः॥याः फलिनीरिति फलं॥सहिरत्नानीति पंचरत्नानि
॥हिरण्यरूपइति हिरण्यं॥युवा सुवासाइति वस्त्रादिनावेष्टयेत्॥पूर्णा
दर्वीति पूर्णपात्रमुपरि निदध्यात्॥तत्र ध्रुवावाहनं पूजनं च॥ततो दक्षिणे
औदुंबरं प्लाक्षं वा सुभद्रविकटं वा चक्रांकित तोरणमिषेत्वोर्जेत्वेति नि
धाय। चंदनादिचर्चितं कृत्वा सूर्यमंगारकं च तत्र न्यसेत्। ततः पूर्ववत्क

लशंस्थापयित्वातत्रधरामावाह्यपूजयेत्॥ ततःपश्चिमेप्रासमीपेइंदुवरंवासुकमेसुभीमंवागदांकितंतोरणमन्त्रआयाहीतिन्यस्यसंपूज्यचंदनादिचर्चितंकृत्वाश्रुकंबुधंतत्रन्यसेत्॥ततःपूर्ववत्कलशंस्थापयित्वातत्रवाकूपत्यावाहनपूजनादि॥ततउत्तरेन्यग्रोधमाश्वत्थपालाशंवासुहेत्रंसुप्रभंवापद्मांकिततोरणंशन्नोदेवीरितिनिधायपूजितंकृत्वासोमकेतुशनिंचतत्रन्यसेत्॥ततःकलशंस्थापयित्वातत्रविघ्नेशावाहनपूजनादि॥ततःपूर्वद्वारशाखाद्वयेकलशद्वयंदध्यक्षतादियुक्तंपूर्ववत्स्थापयेत्॥ऐरावतंकलशद्वयेन्यस्यार्चयेत्॥तत्रपूर्वस्मिन्नृग्वेदिनाऋत्विजौद्वौएकंवाशांतिसूक्तजपार्थत्वेनत्वामहंवृणइतिप्रत्येकमृग्वेदःपद्मपत्राक्षोगायत्रःसोमदेवतः। अत्रिगोत्रस्तुविप्रेंद्रऋत्विकुलंमेमखेभवेतिरत्वाग्निमीळइतिपूजयेत्॥एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश॥संवीज्यमानोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते॥भोइंद्रइहागच्छइहतिष्ठेतींद्रंसांगंसपरिवारंसायुधंसशक्तिकंद्वारकलशे आवाह्यत्रातारमिंद्रमितिपूजयित्वाशुशिशानइतिपीतांपताकांपीतंध्वजंचोच्छ्रयेत्॥ततऐरावतस्थंपीतवर्णंसहस्राक्षंदक्षिणवामहस्तस्थवज्रोत्पलमिंद्रंध्यात्वा।इंद्रःसुरपतिःश्रेष्ठोवज्रहस्तोमहाबलः॥शतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमइतिनत्वाइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायेतंमाषभक्तबलिंसमर्प्पयामीतिबलिंदद्यात्॥ततआचम्याग्नेयकोणेपूर्ववत्कलशंस्थापयित्वातत्रपुंडरीकममृतेचसंपूज्यएह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरभितोभिजुष्ट॥तेजोवतालोकगणेनसार्द्धममाध्वरंपाहिकवेनमस्ते॥भोअग्नेइहागच्छेहतिष्ठेतिसांगादिकमग्निंकलशेआवाह्यत्वन्नोअग्नेत्यग्निंसंपूज्याग्निंदूतमितिरक्तांपताकांरक्तंध्वजंचोच्छ्रयेत्॥ततश्छागस्थंरक्तंदक्षिणवामकरधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा॥आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः।धूमकेतुरजोध्यक्षस्तस्मैनित्यंनमोनमइतिनत्वा। अग्नयेसांगायएतंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ ततःकृताचमनोदक्षिणेगत्वाप्रतिद्वारशाखंपूर्ववत्कलशद्वयंस्थापयित्वावामनंदिग्गजंतत्रार्चये

त्॥ततो यजुर्वेदिनौ द्वावेकं वा दक्षिणद्वारे शांतिसूक्तजपार्थं त्वेन त्वामहं वृणइत्युक्त्वा॥कातराक्षो यजुर्वेदस्त्वं हे भो विष्णुदेवनः॥काश्यपेयस्तु विप्रेंद्र ऋत्विक्त्वं मेमखे भवेति प्रत्येकं संप्रार्थ्य ये ते लोकेत्वेति पूजयेत्॥ततः एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते॥शुभाशुभानंद शुचामधीश शिवाय नः पाहि मखं नमस्ते॥भो यम इहागच्छेह तिष्ठेति सांगादिं यममावाह्य यमाय सोममिति संपूज्य कृष्णां पताकां कृष्णं ध्वजं चापं गौरित्युच्छ्रयेत्॥ततो महिषारूढं धृतदंडपाशं दक्षिणवामकरं अंजनपर्वततुल्यरूपं मग्निसमलोचनं यमं ध्यात्वा॥महामहिषमारूढं दंडहस्तं महाबलं॥आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा सांगाय यमायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥ततआचम्य नैर्ऋत्यां पूर्ववत्कलशं स्थापयित्वा कुमुदं गजं दुर्गे यच्च संपूज्य॥एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते॥भो निर्ऋते इहागच्छेह तिष्ठेति सांगमावाह्य मोषुणइत्युच्छ्रयेत्॥नरारूढं खड्गहस्तं नीलवर्णं महाबलं महाकायं बहुराक्षससंयुतं निर्ऋतिं ध्यात्वा॥निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनं॥आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा सांगाय निर्ऋतय एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥ततआचम्य पश्चिमे प्रतिद्वारशाखं कलशद्वयं निधाय अंजनं दिग्गजं न्यस्य अर्चयेत्॥ततः सामगावृत्विजावृत्विजं वाहूत्वा॥सामवेदस्त्वं पिंगाक्षो जागतः शक्रदैवतः॥भारद्वाजस्तु विप्रेंद्र शांतिपाठं मखे कुर्विति प्रार्थ्यः॥अग्न आयाहीति पूजयित्वा ततएह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः॥विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते॥इत्युक्त्वा भो वरुण इहागच्छेह तिष्ठेति सांगं वरुणमावाह्य तत्त्वायामीति संपूज्य श्वेतां पताकां ध्वजं चेमं मे वरुण इत्युच्छ्रयेत्॥मकरस्थं पाशहस्तं किरीटिनं श्वेतवर्णं वरुणं ध्यात्वा॥पाशहस्तं च वरुणमपांपतिमीश्वरं॥आवाहयामि यज्ञेस्मिन् वरुणाय नमो नम इति नत्वा सांगाय वरुणायैतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥ततोप उपस्पृश्य वायव्यां पूर्ववत्कलशं स्थापयित्वा पुष्पदंतं सिद्धार्थं च तत्र पूजयि

त्वा।एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः॥प्राणाधिपः
कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते॥भो वायो इहागच्छेह
तिष्ठेति सांगं वायुमावाह्य तत्ववायवे नमस्य तद्दृति संपूज्य वायोशतमि
ति धूम्रां पताकां ध्वजं चोच्छ्रित्य मृगारूढं चित्रांबरधरं युवानं वरध्वज
धरं दक्षिणवामहस्तं वायुं ध्यात्वा।वायुमाकाशगं चैव पवनं वेगवद्ग
तिं॥ आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां॥ अनाकारो महोजा
श्च यस्यादृष्टगतिर्दिवि॥तस्मै पूज्याय जगतो वायवेहं नमामि ते इति न
त्वा सांगाय वायवे एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात्॥तत
आचम्योत्तरे प्रतिद्वारशाखं कलशद्वयं स्थापयित्वा सार्वभौमं दिग्गजं
न्यस्य पूजयित्वाऽथर्ववेदविदार्त्विजावुत्तरद्वारे शांतिसूक्तजपार्थं त्वेना
हं वृण इत्युक्त्वा।बृहन्मित्रोऽथर्ववेदोनुष्टुभो रुद्रदैवतः॥वैशंपायनविप्रे
न्द्र शांतिपाठं मखे कुर्विति प्रार्थ्य शन्नो देवीरिति पूजयेत्॥एह्येहि यज्ञेश्व
र यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धं॥सर्वौषधीभिः पितृभिः सहैव गृह
ण पूजां भगवन्नमस्ते॥भो सोम इहागच्छेह तिष्ठेति सांगं सोममावाह्य
वयं सोमेति संपूज्य हरितां पताकां ध्वजं चाप्यायस्वेति न्यस्य।नरयुक्त
कविमानस्थं कुंडलहारकेयूरसंशोभितं वरदगदाधरं दक्षिणवामह
स्तं मुकुटिनं महोदरं स्थूलकायं ह्रस्वं पिंगलनेत्रं पीतविग्रहं शिवस
खायं सोमं ध्यात्वा॥सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः।तस्मै
सोमाय देवाय नक्षत्रपतये नम इति नत्वा सांगाय सोमायैतं माषभक्त
बलिं समर्पयामीति बलिं दद्यात्॥तत ईशान्यां गत्वाचम्य पूर्ववत्कलशं
स्थापयित्वा सुप्रतीकनामानं दिग्गजं मंगलं च तत्र पूजयित्वा एह्येहि वि
श्वेश्वर नस्त्रिशूलकपालखट्वांगधरेण सार्द्धं॥लोकेन यज्ञेश्वर यज्ञसि
द्ध्यै गृहाण पूजां भगवन्नमस्ते ईशानेहागच्छेह तिष्ठेति तमावाह्य तमी
शानमिति संपूज्य श्वेतां सर्ववर्णां वा पताकां ध्वजं चाभि त्वा देव सवित
रित्युच्छ्रित्य वृषारूढं वरदत्रिशूलयुतदक्षिणवामहस्तद्वयं त्रिनेत्रं
स्फटिकवर्णमीशानं ध्यात्वा।वृषस्कंधसमारूढं शूलहस्तं त्रिलोचनं॥
आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां।।सर्वाधिपो महादेव ईशानः
शुक्ल ईश्वरः।शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नम इति नत्वा सांगाये

शानायैतंमाषभक्तबलिंसमर्पयामीति बलिंदद्यात्॥ततआचम्येशा
नपूर्वयोर्मध्येगत्वा।एह्येहिपातालधरामरेंद्रनागांगनाकिंनरगीयमा
न।यक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्वरमस्मदीयं॥ओअनंतइहा
गच्छेहतिष्ठेतिसांगमनंतमावाह्यायंगौरितिसंपूज्यमेघवर्णांश्वेतां
वापताकांध्वजंचायंगौरित्युच्छ्रित्यअनंतंशयनासीनं फणसप्तकमं
डितं॥पद्मशंखधरोर्ध्वाधोदक्षिणकरद्वयंचक्रगदाधरोर्ध्वाधोवाम
करद्वयंनीलवर्णमनंतंध्यात्वा।योसावनंतरूपेणब्रह्मांडंसचराचरं
।पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमइतिनत्वासांगायानंतायैतं
माषभक्तबलिंसमर्पयामीतिबलिंदद्यात्॥ततआचम्यनैर्ऋत्यपश्चि
मयोर्मध्येगत्वाएह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्द्धंपितृदेवताभिः।
सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशिवाय॥ओब्रह्मन्नि
हागच्छेहतिष्ठेतिब्रह्माणमावाह्यब्रह्मजज्ञानमितिसंपूज्यरक्तांपता
कांध्वजंचब्रह्मजज्ञानमित्युच्छ्रित्यचतुर्मुखंहंसारूढमक्षमालाकु
शमुष्टिधरोर्ध्वाधोदक्षिणकरद्वयंस्रुवकमंडलुधरोर्ध्वाधोवामकर
द्वयंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वा।पद्मयोनिश्चतु
र्मूर्तिर्वेदावासःपितामहः।यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनम
इतिनत्वासांगायब्रह्मणएनंमाषभक्तबलिंसमर्पयामीतिबलिंदद्या
त्॥नैर्ऋत्यपश्चिमांतरालेऽनंतबलिदानमीशानपूर्वांतरालेब्रह्मबलि
दानंचेतिरूपनारायणः।ततआचम्यमंडपमध्येस्तुच्चदंडोदशहस्तदीर्घस्त्रि
हस्तविस्तृतःपंचहस्तविस्तारोवायंमहाध्वजःकिंकिण्यादियुक्तस्तइंद्रस्य
वृक्षइतिस्थाप्यः॥तत्रैवब्रह्मपूजनंच॥ततोमंडपषोडशस्तंभेषुसर्वे
भ्योदेवेभ्योनमः॥वंशेषुकिंनरेभ्योनमः।पृष्ठेपन्नगेभ्योनमइत्यर्चये
त्॥ततःपूर्वभागेउपलिप्तभूमावुपविश्यत्रैलोक्येयानिभूतानिस्थाव
राणिचराणिच॥ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिमे॥देवदानवगं
धर्वायक्षराक्षसपन्नगाः॥ऋषयोमनवोगावोदेवमातरएवच॥सर्वेम
माध्वरेरक्षांप्रकुर्वंतुमुदान्विताः।ब्रह्माविष्णुश्चरुद्रश्चसेंद्रपालगणैः
सह॥रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतइतिपठित्वात्रैलोक्यस्थेभ्यःस्था
वरेभ्योभूतेभ्योनमस्त्रैलोक्यस्थेभ्यश्चरेभ्योभूतेभ्योनमः।ब्रह्मणेविष्णु

वेशिवायदेवेभ्योदानवेभ्योगंधर्वेभ्योराक्षसेभ्यःपन्नगेभ्यऋषिभ्योम
नुष्येभ्योगोभ्योदेवमातृभ्योनमइतिप्रत्येकंसंपूज्यभूमौमाषभक्तबलिं
दद्यात्॥ततोयजमानःसर्वैर्ऋत्विग्भिःसहप्राग्द्वारेणमंडपंप्रविश्यद
क्षिणद्वारपश्चिमदेशेउपविश्यगुर्वादयोयथाविहितंकर्मकुरुध्वमिति
वदेत्॥प्रतिकुंडमेकैकःकलशऋत्विग्भिःस्थाप्यइतिकेचित्॥गुरुणा
स्थाप्यइत्यन्ये॥ततोऋग्वेदादिक्रमात्प्रागादिकुंडेषुऋत्विजोऽग्निं
स्थापयेयुः॥ततोगुरुर्यजमानान्वितोग्रहवेद्यांसर्वतोभद्रमंडलदेवताः
स्थापयेदितिपितामहचरणाः॥यथा॥अद्येहेत्यादिमंडलदेवतास्था
पनंकरिष्यइतिसंकल्प्यस्थापयेत्॥तत्रमध्येब्रह्माणं॥ब्रह्मजज्ञानं
गौतमोवामदेवोब्रह्मात्रिष्टुप्स्थापनेपूजनेचविनियोगः॥एवमुत्तर
त्र॥ॐब्रह्मजज्ञानं॥ततउदीचीमारभ्यवायव्यपर्यंतंकुबेरादीन्वाम्नंता
नष्टौलोकपालान्तत्राप्यायस्वगोतमःसोमोगायत्री।ॐआप्यायस्व२
अभित्वाजीगर्त्तःशुनःशेपईशानोगायत्री।ॐअभित्वादेवसवितः३
॥इंद्रंवोमधुच्छंदाइंद्रोगायत्री॥ॐइंद्रंवोपश्यत४॥अग्निंकाण्वोमेधा
तिथिरग्निर्गायत्री॥ॐअग्निंदूतंवृणीमहे५यमायसोमंयमोयमोनुष्टु
प्॥ॐयमायसोमं॥६॥मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री।ॐमोषुणः
७॥तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्ॐतत्वायामि।८॥वायोशतंगौ
तमोवामदेवोवायुरनुष्टुप्।ॐवायोशतं।९॥वासुसोममध्येःशैवस्तून्
ज्मयाअत्रमैत्रावरुणोवसिष्ठोवसवस्त्रिष्टुप्॥ॐज्मयाअत्र।१०।सोमे
शानमध्येएकादशरुद्रान्॥आरुद्रासःश्यावाश्वएकादशरुद्राजगती
॥ॐआरुद्रासः।११॥ईशानेंद्रमध्येद्वादशादित्यान्॥त्यान्नुसोमदेवम
त्स्योद्वादशादित्यागायत्री॥ॐत्यान्नुक्षत्रियान्।१२॥इंद्राग्निमध्येश्वि
नावाकृष्णोगौतमोश्विनावुष्णिक्॥ॐअश्विनावर्त्तिः।१३॥अग्नियम
मध्येविश्वेदेवान्सप्तकान्॥ओमासोमधुच्छंदासिविश्वेदेवागायत्री
॥ॐमासः।१४॥यमनिर्ऋतिमध्येसप्तयक्षान्॥अभित्यंवामदेवःसप्त
यक्षाःप्रकृतिः॥अभित्यंदेवंसवितारमोण्योःकविक्रतुमर्चामिसत्यसवं
रत्नधामभिप्रियंमतिंकविं॥ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहि
रण्यपाणिरमिमीतसुक्रतुःकृपास्वः॥१५॥निर्ऋतिवरुणमध्येभूतना

गान्॥आयंगौःसार्पराज्ञीसर्पागायत्री।ॐआयंगौः॥१६॥वरुणवायुमध्ये
गंधर्वाप्सरसः।अप्सरसामैतसऋष्यशृंगोगंधर्वाप्सरसोनुष्टुप्।ॐअप्स
रसांगंधर्वाणां॥१७॥ब्रह्मसोममध्येस्कंदनंदीश्वरशूलमहाकालान्॥कु
मारस्कंदस्त्रिष्टुप्।ॐकुमारंमाता॥१८॥ऋषभमृषभोवैराजोऋषभो
नुष्टुप्॥ॐऋषभंमा॥१९॥ब्रह्मेशानमध्येदक्षादीन्सप्त॥अदितिर्लौक्यो
बृहस्पतिर्दक्षोनुष्टुप्॥ॐअदितिर्ह्यजनिष्ठः२०।२१ब्रह्मेंद्रमध्येदुर्गांवि
ष्णुंच॥नामग्नवर्णासौभरिर्दुर्गात्रिष्टुप्॥ॐतामग्निवर्णां॥२२॥इदंवि
ष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री॥ॐइदंविष्णुः॥२३॥ब्रह्माग्नेयम
ध्येस्वधां॥उदीरतांशंखःस्वधात्रिष्टुप्॥ॐउदीरतांसूनृताः॥२४॥ब्रह्म
यममध्येमृत्युरोगान्॥परंमृत्योःसंकुसुकोमृत्युरोगास्त्रिष्टुप्॥ॐपरं
मृत्योअनु॥२५॥ब्रह्मनिरृतिमध्येगणपतिं॥गणानांत्वागृत्समदोगण
पतिर्जगती॥ॐगणानांत्वा॥२६॥ब्रह्मवरुणमध्येअपः॥शन्नोंवरीषसिं
धुद्वीपआपोगायत्री॥ॐशन्नोदेवीः॥२७॥ब्रह्मवायुमध्येमरुतः॥मरु
तोयस्यराहूगणोगौतमोमरुतोगायत्री।ॐमरुतोयस्य॥२८॥ब्रह्मणः
पादमूलेकर्णिकाधःपृथ्वीं।स्योनामेधातिथिर्भूमिर्गायत्री।ॐस्योनापृथिवि
॥२९॥तत्रैवगंगादिनद्यः॥इमंमेसिंधुक्षित्प्रैयमेधोगंगायमुनासरस्व
त्योजगती।ॐइमंमेगंगे॥३०॥तत्रैवसप्तसागरान्॥धाम्नोधाम्नोरा
जन्नितोवरुणनोमुंच॥यदापोअघ्न्याइतिवरुणेतिशपामहेततोवरुण
नोमुंच॥मयिवायोमोषधीर्हिंसीरतोम्नच्यवाभूस्त्वेतोवरुणनोमुंच।त
दुपरिमेरुंनाम।ब्राह्मेसोमादिसमीपेक्रमेणायुधानि।गदांत्रिशूलंव
ज्रंशक्तिंदंडंखड्गंपाशंअंकुशं।तद्बाह्येउत्तरादितः।गौतमं।भरद्वाजंवि
श्वामित्रं।कश्यपंजमदग्निं॥वसिष्ठं।अत्रिं।अरुंधतीं।तद्बाह्येपूर्वादिऐं
द्रीं॥कौमारीं॥ब्राह्मीं।वाराहीं।चामुंडां।वैष्णवीं।माहेश्वरीं।विनायकीमि
त्यष्टौशक्तयःप्रतिष्ठाप्यप्रत्येकंसहचावाह्यपूजयेत्॥ततस्तस्यामेववे
द्यांवस्त्रलिखितवक्ष्यमाणमंडलेष्वादित्यादिदेवताःस्थापयेत्पूजये
च्च।अस्मिन्कर्मणिग्रहादिस्थापनंपूजनंचकरिष्ये।प्रणवस्यब्रह्माऋ
षिःपरमात्माग्निर्देवतादेवीगायत्रीछंदः।व्याहृतीनांक्रमेणजमदग्निभ
रद्वाजभृगवोऋषयः।अग्निवायुसूर्यादेवताःदैवीगायत्रीदैवीउष्णिक्

दैवीबृहत्यश्छंदांसि सूर्यावाहने विनियोगः॥ केचिन्मंत्रानप्यावाहने आ
हुः॥ तत्र ग्रहपीठमध्ये वर्तुले प्राङ्मुखं सूर्यं रक्ताक्षतैः आकृष्णेनेति हिरण्य
स्तूपः सविता त्रिष्टुप्॥ सूर्यावाहने विनियोगः॥ ॐ आकृष्णेन रजसा॰ ॐ
भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपगोत्र सूर्य इहागच्छेत्यावाह्य इह तिष्ठेति
स्थापयेत्॥ एवं सर्वत्र मंत्रांते व्याहृतीरुक्त्वेह गच्छेह तिष्ठेति स्थापयेत्॥ त
त आग्नेये चतुरस्रे प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः आप्यायस्व गोतमः सोमो
गायत्री सोमावाह॰ यमुनातीरोद्भव आत्रेयगोत्र सोम॥ २॥ ततो दक्षिणे
त्रिकोणे दक्षिणामुखं भौमं रक्तपुष्पाक्षतैः अग्निर्मूर्द्धा विरूपोंगारको गायत्री।
अंगारकावाह॰॥ अवंतीसमुद्भव भारद्वाजगोत्र भौम॥ ३॥ तत ईशान्यां बाणा
कारे उदङ्मुखं बुधं पीतपुष्पाक्षतैः उद्बुध्यध्वं बुधः सौम्यो बुधस्त्रिष्टुप् मगध
देशोद्भव आत्रेयसगोत्र बुध॥ ४॥ तत उत्तरतो दीर्घचतुरस्रे उदङ्मुखं बृहस्प
तिं पीतपुष्पाक्षतैः बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप् सिंधुदेशोद्भव आं
गिरसगोत्र बृहस्पते॥ ५॥ ततः पूर्वे पंचकोणे प्राङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः शुक्रः
पाराशरः शुक्रो द्विपदा विराट्। भोजकटदेशोद्भव भार्गवसगोत्र शुक्र॥ ६॥ त
तः पश्चिमे धनुषि प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैः शमग्निरिरिंबिठिः शनि
रुष्णिक् सौराष्ट्रज काश्यपगोत्र शनैश्चर॥ ७॥ ततो नैर्ऋत्ये शूर्पाकारे दक्षि
णामुखं राहुं कृष्णपुष्पाक्षतैः कया नो वामदेवो राहुर्गायत्री राह्वावाह॰॥
राठिनापुरोद्भव पैठीनसिसगोत्र राहो॥ ८॥ ततो वायव्ये ध्वजाकारे दक्षिणामु
खं केतुं धूम्रपुष्पाक्षतैः केतुं मधुच्छंदाः केतवो गायत्री अंतर्वेदिसमुद्भव जै
मिनिसगोत्राः केतवो इहागच्छेह तिष्ठेति॥ ९॥ सर्वे वा आदित्याभिमुखाः॥ अ
थाधिदेवताः श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनां दक्षिणतः स्थाप्याः। त्र्यंबकं व
सिष्ठो रुद्रोऽनुष्टुप् विनियोगः सर्वत्र ज्ञेयः। त्र्यंबकं॰ ॐ भूर्भुवः स्वः ईश्वरं १॥ गौ
रीर्मिमाय दीर्घतमा उमा जगती। सोमदक्षिणे २॥ यदक्रंदो दीर्घतमाः स्कंद
स्त्रिष्टुप् ३॥ विष्णोर्दीर्घतमा विष्णुस्त्रिष्टुप् ४॥ ब्रह्मजज्ञानं गौतमो वामदेवो
ब्रह्मा त्रिष्टुप् ५॥ इंद्रं वो मधुच्छंदा इंद्रो गायत्री ६॥ यमाय सोमं यमो नुष्टुप् ७॥
मो षु णो घोरः कण्वः कालो गायत्री॥ ८॥ उषो वाजं प्रस्कण्वश्चित्रगुप्तो बृहती॥
९॥ एवमेव शुक्लपुष्पाक्षतैर्ग्रहाणां वामे मंत्रांते व्याहृतीरिहागच्छेह तिष्ठेति चो
क्त्वा प्रत्यधिदेवताः स्थापयेत्॥ अग्निं काण्वो मेधातिथिरग्निर्गायत्री॥ ॐ अग्निं

दूतं॥१॥ अप्सु मेमे धातिस्थिरापोनुष्टुप्॥२॥ स्योनामे धातिस्थि भूमिर्गायत्री ३
इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री ४॥ इंद्रश्रेष्ठानिगृत्समद इंद्रस्त्रिष्टुप्॥
५॥ इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः॥६॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रि
ष्टुप् ७॥ आयंगौः सार्पराज्ञी सर्पो गायत्री॥८॥ ब्रह्मजज्ञानं गौतमो वामदेवो
ब्रह्मा त्रिष्टुप्॥९॥ ततः शुक्लपुष्पाक्षतैर्विनायकादीन्पंचगणानां त्वा गृ
त्समदो गणपतिर्जगती॥ राहोरुत्तरतो विनायकं॥ जातवेदसे कश्यपो
दुर्गा त्रिष्टुप्॥ शनेरुत्तरतो दुर्गां॥२॥ तववायवृतस्पते व्यश्व आंगिरसो
वायुर्गायत्रीछंदः॥ रवेरुत्तरतो वायुं॥ एतान्मंत्रान्पठंति सांप्रदायिकाः॥
तन्त्रेषु चित्रमंत्रेषु मूलं चिन्त्यं॥३॥ आदित्प्रत्नस्य वत्स आकाशो गायत्री
॥राहोर्दक्षिणे आकाशं॥४॥ एषोउषा प्रस्कण्वोऽश्विनौ गायत्री॥ अश्विना
विहागच्छतामिह तिष्ठतामिति केतोर्दक्षिणेऽश्विनौ॥५॥ एतानि विनाय
कादिस्थानानि चिंतामणौ॥ विनायकादीन्पंच उत्तरत एवेति संप्रदायः
॥एवं द्वात्रिंशद्देवता इति रूपनारायणादयः॥ हेमाद्रौ तु लोकपालादीना
मपि सूर्याभिमुखानां दिक्षु स्थापनमुक्तं॥ तद्यथा॥ इंद्रं विश्वा जेता माधु
च्छंदस इंद्रोनुष्टुप्॥ इंद्र इहागच्छ इह तिष्ठेति पूर्वे इंद्रं॥ एवमुत्तरत्र॥१
॥अग्निर्मेधातिथिरग्निर्गायत्री॥२॥ यमाय सोमं यमो यमोनुष्टुप् ३ मोषु
णो घोरः कण्वो निर्ऋतिर्गायत्री ४ तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप्
५ तववायो व्यश्वो वांगिरसो वायुर्गायत्री ६ सोमो धेनुं गौतमः सोमस्त्रि
ष्टुप्॥७॥ तमीशानं गौतम ईशानो जगती॥८॥ सहस्रशीर्षा नारायणो
नंतोनुष्टुप्॥ ईशानपूर्वयोर्मध्येऽनंतं॥९॥ ॐ ब्रह्मजज्ञानं गौतमो वाम
देवो ब्रह्मा त्रिष्टुप्॥ नैर्ऋत्यपश्चिमयोर्मध्ये ब्रह्माणं॥१०॥ तत उत्तरे क्षे
त्रस्य वामदेवः क्षेत्रपालोऽनुष्टुप्॥ वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रि
ष्टुप्॥ तनोलक्ष्म होमश्चेदिंद्रं मित्रमित्यनेन। सामध्वनिशरीरस्त्वं वाहनं
परमेष्ठिनः॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे इत्यनेन चोत्तरे॥
गरुत्मंतमावाह्य रवेः पूर्वे शेषं सोमस्याग्रे वासुकिं भौमाग्रे तक्षकं बुधो
तेरग्रे कर्कोटकं। गुरु हस्पतेरग्रे पद्मं शनिपश्चिमे शंखपालं राहोः पुरः कंब
लं केतोः पुरः कुलिकं। पीठात्प्राच्यामश्विन्यादिसप्तनक्षत्राणि॥ विष्कुंभा
दिसप्तयोगान्॥ ववबालवकरणे॥ सप्तद्वीपानिऋग्वेदं च॥ दक्षिणे पुष्या

दिसप्तनक्षत्राणि॥धृत्यादिसप्तयोगान्॥कौलवतैतिलकरणे॥सप्तसाम
गान्।यजुर्वेदंच पश्चिमेस्वात्यादिसप्तनक्षत्राणि॥वज्रादिसप्तयोगान्
॥गरवणिजकरणे॥सप्तपातालानिसामवेदंच।उत्तरे॥अभिजिदादिस
प्तनक्षत्राणिसाध्यादिषड्योगान्विष्टिकरणं॥भूरादीन्सप्तलोकान्॥
अथर्ववेदंच॥वायव्ये ध्रुवंसप्तर्षीश्च॥अथयथावकाशंगंगादिसप्तसरि
तः॥सप्तकुलाचलान्।अष्टौवसून्द्वादशादित्यान्॥एकादशरुद्रान्॥
मरुतः॥षोडशमातॄः।षडृतून्॥द्वादशमासान्॥द्वे अयने।पंचदशतिथी
न्।षष्टिसंवत्सरान्।सुपर्णान्।नागान्।सर्पान्।यक्षान्।गंधर्वान्।विद्याधरान्॥अ
प्सरसः।रक्षांसि।भूतानि।।मनुष्यानिति।कोटिहोमेतुवेदेः पूर्वेब्रह्माणं
॥मध्येजनार्दनं॥पश्चिमेरुद्रं।उत्तरेस्कंदमित्येतानप्यावाहयेत्॥ततो
स्मिन्कर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्यचक्षुषीआ
ज्येनेत्यंतमुक्त्वासूर्यादीन्ग्रहादीन्समिदाज्यनैवेद्यशेषचरुभिरष्ट
ष्टत्वाष्टशताष्टाविंशत्यष्टान्यतमसंख्ययाऽधिदेवताप्रत्यधिदेवताविना
यकादीन्लोकपालांश्चामुकसंख्ययाएतैरेवद्रव्यैःक्षेत्रपालादींश्चा
मुकसंख्ययासूर्याद्याःसर्वादेवतादशसंख्याकतिलाहुतिभिःअग्निंवा
युंसूर्यंप्रजापतिंचप्रत्येकंपंचविंशतिशतमिताभिस्तिलाहुतिभिर्य
क्ष्ये॥लक्षहोमेपंचविंशतिसहस्रमिताभिः॥कोटिहोमेपंचविंशति
लक्षमिताभिरितिविशेषः॥ततःशेषेणस्विष्टकृतमित्यादियक्ष्यइत्यं
तमुक्त्वासमिद्वयमाधायनिर्वापादिक्रमेणगुडोदनादीन्नवान्यांश्च
हांस्त्रयोविंशतिमितिहाविंशत्नैवेवाचरून्श्रपयित्वापंचभिःषो
डशभिर्वोपचारैःसंपूजयेत्॥तत्रवस्त्राणिग्रहवर्णानि॥रविभौमयो
रक्तचंदनं॥चंद्रशुक्रयोःश्वेतचंदनं॥बुधगुर्वोःकुंकुमयुतं॥शनिरा
हुकेतूनांकृष्णागुरुपुष्पाणितत्तद्वर्णानि॥धूपास्तु॥सल्लकीनिर्यासं
॥घृताक्तयवाः।रालमगुरुंसिल्हकंबिल्वयुतागुरुंगुग्गुलुं।लाक्षाकृष्णा
गुरुयुक्तांदत्वाउद्दीप्यस्वेतिसर्वेभ्योदीपान्दत्वागुडोदनंपायसंनीवारौ
दनंक्षीरयुतषाष्टिकौदनंदध्योदनंघृतौदनंतिलमाषयुतमोदनंमांसौद
नंचित्रौदनंचक्रमान्निवेदयेत्॥अधिदेवतादिभ्यस्तुवासोगंधपुष्पाणि
श्वेतानि।गुग्गुलुर्धूपः।नैवेद्यंपायसादियथालाभं।सूर्यादिद्वात्रिंशताम

न्येषांचसर्वेषांपूजापदार्थान्नुसमयेनैव॥ततोवेदीशान्यांकलशंसंस्था
प्यतत्रवरुणमावाह्यसंपूज्याभिमंत्रयेत्॥तद्यथा॥कलशस्यमुखेवि
ष्णुःकंठेरुद्रःसमाश्रितः॥मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः
॥कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदो
ह्यथर्वणः॥अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसा
वित्रीशांतिःपुष्टिकरीतथा॥आयांतुयजमानस्यदुरितक्षयकारकाः॥
देवदानवसंवादेमथ्यमानेमहोदधौ॥उत्पन्नोसितदाकुंभविधृतोवि
ष्णुनास्वयं॥त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥त्वयितिष्ठं
तिभूतानित्वयिप्राणाःप्रतिष्ठिताः॥शिवःस्वयंत्वमेवासिविष्णुस्त्वंच
प्रजापतिः॥आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः॥त्वयितिष्ठंति
सर्वेपियतःकामफलप्रदाः॥त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव॥
सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति॥ततःफलपुष्पमालाशोभि
तंवितानंबृहस्पतिदैवतंसूर्यादिभ्यइदंनममेत्युक्त्वाग्रहवेद्युपरि
बध्नीयात्॥ततश्चर्वासादनाद्याज्यभागांतेयजमानस्त्र वी आवाहिताः
सूर्यादिदेवताः अग्निवायुसूर्यप्रजापतीश्चोद्दिश्यसमिदाज्यचरुति
लान्होतुमुत्सृजेनममेतित्यजेत्॥ततोऋत्विजःसमिदाज्यनैवेद्यशे
षचरून्क्रमेणावाहिताभ्योदेवताभ्योष्टसहस्राद्यन्यतमसंख्य
यासमस्तव्याहृतिभिर्वक्ष्यमाणतत्तन्मंत्रैर्वाहुत्वाघृताक्ततिलैःताभ्य
एवदेवताभ्यःप्रत्येकंदशदशाहुतीर्हुत्वासोमंराजानमितिस्विष्टकृतं
हुत्वाज्यस्तत्समस्तव्याहृतिभिस्तिलैरयुतंलक्षंकोटिंवाजुहुयुः॥तत्र
होमेऋग्वेदिनस्तावदावाहनोक्तानेवमंत्रान्पठंति॥यजुर्वेदिनांतूच्य
ते।आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्सूर्यप्रीतयेतिलाज्यहोमेवि
नियोगः॥ॐआकृष्णेन०पश्यन्स्वाहाइदंसूर्याय॥एवंसर्वत्र॥इमंदे
वावरुणःसोमोयजुःइमंदेवा०राजा२॥अग्निर्मूर्द्धाविरूपोंगारकोगा
यत्री३॥उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप्४॥बृहस्पतेगृत्समदोबृहस्प
तिस्त्रिष्टुप्॥५॥अन्नात्प्रजापतिअश्विसरस्वतीन्द्राःशुक्रोजगती॥६
शन्नोदेध्यङ्ङाथर्वणःशनिर्गायत्री॥७॥कयानोवामदेवोराहुर्गायत्री॥
८॥केतुंमधुच्छंदाःकेतवेगायत्री॥९॥अथाधिदेवतानां॥त्र्यंबकंवसिष्ठो

रुद्रोनुष्टुप्॥१॥ अत्रप्रणीतोदकंस्पृशेत्॥ श्रीश्चेत्युत्तरनारायणउमात्रि
ष्टुप्॥२॥ यदक्रंदो भास्करजमदग्निर्दीर्घतमास्क्रंदस्त्रिष्टुप्॥३॥ विष्णो
रराटमुतथ्योविष्णुर्यजुः॥ विष्णोरराट०वेत्वा॥४॥ आब्रह्मन्प्रजापतिर्ब्र
ह्मायजुः॥ आब्रह्मन्०कल्पतां॥५॥ सजोषाविश्वामित्रइंद्रस्त्रिष्टुप्॥ स
जोषाइंद्र०॥६॥ असियमोभास्करजमदग्निर्दीर्घतमसोयमस्त्रिष्टुप्॥७॥
अत्रप्रणीतोदकंस्पृशेत्॥ काषिरसिदध्यङ्ङाथर्वणःकालोनुष्टुप्॥८॥
अत्रापिप्रणीतोदकंस्पृशेत्। चित्रावसोर्ऋषयश्चित्रगुप्तोजगतीचित्रा
वसो०शीयः॥९॥ अथप्रत्यधिदेवतानां॥ अग्निंदूतंविरूपोग्निर्गायत्री
॥१॥ अप्स्वंतर्बृहस्पतिरापःपुरउष्णिक्॥२॥ स्योनामेधातिथिःपृथिवीगा
यत्री॥३॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥४॥ त्रातारंगार्ग्यइंद्रस्त्रिष्टु
प्॥५॥ अदित्यैदध्यङ्ङाथर्वणइंद्राणीयजुः॥ अदित्यैरास्नासि॥६॥ प्र
जापतेवरुणःप्रजापतिस्त्रिष्टुप्॥७॥ नमोस्तुदेवाःसर्पानुष्टुप्॥८॥ ब्रह्मप्रजा
पतिर्ब्रह्मात्रिष्टुप्॥९॥ अथविनायकादिपंचानां॥ गणानांप्रजापतिर्गणप
तिर्यजुः॥ गणानांत्वा०मम॥१॥ अंबेप्रजापतिर्दुर्गानुष्टुप्॥२॥ वातोवागप
र्वावातउष्णिक्प्रमाणतआवाहनेविनियुक्तानप्येतान्होमेपठंति॥ तत्र
ग्रहाणांसप्रमाणकाएव॥ अन्येषांतूच्यंते॥ आवोराजानंवामदेवोरुद्र
स्त्रिष्टुप्॥ आपोहिष्ठाआंबरीषःसिंधुद्वीपउमागायत्री॥ स्योनामेधाति
थिःस्कंदोगायत्री॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ त्वमित्सप्रथागौ
तमोब्रह्माबृहती॥ इंद्राग्निर्देवता नयउक्तस्तुगिंद्रस्त्रिष्टुप्॥ आयंगौःसा
र्पराज्ञीयमोगायत्री॥ ब्रह्मजज्ञानंगौतमोवामदेवःकाल स्त्रिष्टुप्॥ यदा
ज्ञातंकौशिकःचित्रगुप्तोनुष्टुप्॥ अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री
॥ उदुत्तमंगौतमोवामदेवआपस्त्रिष्टुप्॥ पृथिव्यांतरिक्षंविष्णुःपृथिव्यु
ष्णिक्॥ सहस्रशीर्षानारायणोविष्णुरनुष्टुप्॥ इंद्रायेंद्रोमरुत्वतउत्तान
पर्णेसुभगेप्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥ नमोस्तुसर्पेभ्योदे
वाःसर्वानुष्टुप्॥ एषब्रह्माप्रजापतिर्ब्रह्माद्विपदागायत्री॥ आतूनइंद्रकु
त्सीदःकाण्वोगणपतिर्गायत्री॥ जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥ आदिद्
त्सआकाशोगायत्री॥ कृणान्वितोवायुरुष्णिक्॥ आकाशादिभ्यस्तुस्था
पनमंत्राएव॥ शेषवासुक्यादिभ्यस्तुप्रणवाद्याःस्वाहांतानाममंत्राएव॥

लक्षकोटिहोमयोरिंद्रंमित्रमित्यनेनगरुत्मद्धोमः॥कोटिहोमेतुब्रह्मजना
ईनरुद्रस्कंदेभ्योपिनाममंत्रैर्होमः॥ततोयजमानोमंडपप्राग्द्वारकलशस
मीपेत्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप्। इंद्रप्रीत्यर्थंबलिप्रदानेविनियोगः।त्रा
तारमिंद्रंइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायामुंसदीप
माषभक्तबलिंसमर्पयामिनमइतिसदीपमाषभक्तबलिंदत्वाभोइंद्रदि
शांरक्षबलिंभक्षममसकुटुंबस्यायुःकर्त्ताक्षेमकर्त्ताशुभकर्त्ताशांतिकर्त्ता
पुष्टिकर्त्तातुष्टिकर्त्ताभवेतिप्रार्थयेत्॥एव ― माग्नेय्यादिषुहोमांतेऽ
ग्न्यादिमंत्रैर्बलिदानंप्रार्थनंच॥एवमधिदेवताप्रत्यधिदेवतासहितेभ्यः
सूर्यादिग्रहेभ्योपिहोमांतेतत्तन्मंत्रैर्विनायकदुर्गावाय्वाकाशाश्विवा
स्तोष्पतिक्षेत्राधिपतिभ्यश्चतत्तन्मंत्रैर्होमोक्तेरेव॥ततआचार्योयजमा
नान्वारब्धःस्रुचिस्रुवेणद्वादशवारं ― नारिकेलादिफलयुक्ताज्यंगृही
त्वापूर्णाहुतिंजुहुयात्॥तत्रमंत्राः॥समुद्रादूर्मिरितितृचस्यगौतमोवा
मदेवोग्निस्त्रिष्टुप्पूर्णाहुतौविनियोगः।एवमग्रेपिविनियोगः।मूर्द्धानंदिवो
भरद्वाजोवैश्वानरस्त्रिष्टुप्॥पुनरग्निर्वसुरुद्रादित्यास्त्रिष्टुप्॥पूर्णादर्वि
विश्वेदेवाःशतक्रतुरनुष्टुप्॥सप्ततेअग्नेसप्तवानग्निर्जगती॥धामंतेवाम
देवआपोजगती॥धामंते० स्वाहेति॥यजमानस्तुइदमग्नयेवैश्वानरायव
सुरुद्रादित्येभ्यःशतक्रतवेसप्तवतेअग्नयेऽद्भ्यश्चनममेतित्यजेत्॥का
तीयानांतुमूर्द्धानंदिवइत्येवपूर्णाहुतिमंत्रः।अग्नयइदंनममेतित्यागः
।सामगानांतुप्रजापतिऋषिर्गायत्रीछंदइंद्रोदेवतायशस्कामस्ययज
मानस्ययजनीयप्रयोगेविनियोगः॥पूर्णहोमंयशसाजुहोमियोस्मैजु
होतिवरमस्मैददाति॥वरंवृणेयशसामामिलोकेस्वाहेत्यनेनस्रुवेणैव
होमः।इंद्रायेदंनममेतित्यागः॥ततोवसोर्द्धारयाहोष्यामीतिसंकल्प्यय
जमानोवसोर्द्धारांजुहुयात्॥मंत्रास्तु॥अग्निमीळइतिनवानांमधुच्छंदा
अग्निर्गायत्रीवसोर्द्धारायांविनियोगः।विष्णोर्नुकमितिषण्णांदीर्घतमा
विष्णुस्त्रिष्टुप्॥आतेपितरितिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप्॥स्वादि
ष्ठयेतिनवानांमधुच्छंदःपवमानसोमोगायत्री।महावैश्वानरसाम्नोम
हावैश्वानरऋषिर्वैश्वानरोदेवतापथ्याबृहतीछंदः।ज्येष्ठसाम्नोभरद्वा
जोऋषिर्वैश्वानरोदेवतात्रिष्टुप्छंदः।वसोर्द्धारांजुहोतीत्यनुवाकमपिप

ठंतिशिष्टाः॥एवंवसोर्द्धारांहुत्वापूर्णपात्रविमोकादि च यथाशास्त्रंसमा
प्याचार्यसहिताऋत्विजःसर्वौषधीभिरनुलिप्तांगंपत्नीपुत्रादिसहितंय
जमानंस्वस्वशाखीयैर्मंत्रैर्नवग्रहपीठसमीपस्थकलशोदकेनसंपात
कलशोदकेनवाऽभिषिंचेयुःपौराणैश्च।तेच।सुरास्त्वामभिषिंचंतुब्रह्म
विष्णुमहेश्वराः।वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः।प्रद्युम्नश्चा
निरुद्धश्चभवंतुविजयायते॥आखंडलोग्निर्भगवान्यमोवैनिरृति
स्तथा।वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताःसर्वे
दिक्पालाःपांतुतेसदा॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥बु
द्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमातरः॥एतास्त्वामभिषिंचंतुदेवप
त्न्यःसमागताः॥आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥ग्रहास्त्वा
मभिषिंचंतुराहुःकेतुश्चतर्पिताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः
॥ऋषयोमनवोगावोदेवमातरएवच॥देवपत्न्योद्रुमानागादैत्याश्चा
प्सरसांगणाः॥अस्त्राणिसर्वशास्त्राणिराजानोवाहनानिच।औषधानि
रत्नानिकालस्यावयवाश्चये।सरितःसागराःशैलास्तीर्थानिजलदानगाः।ए
तेत्वामभिषिंचंतुसर्वकामार्थसिद्धयइति।।तच्छंयोरावृणीमहइति।
ततोयजमानःस्नात्वाशुक्लगंधमाल्यांबरधरआचार्यादीन्संपूज्यतेभ्यो
दक्षिणांदद्यात्।।तत्राचार्यायधेनुं॥ब्रह्मणेकृष्णमनड्वाहं।एवंसदस्य
र्त्विग्द्वारपालादिभ्योयथाशक्ति॥तथा॥धेनुःशंखस्तथानड्वान्हेमवा
सोहयःक्रमात्॥कृष्णागौरायसंछागएतावैदक्षिणाःक्रमाद्ग्रहाणांदि
ष्टदेयाः॥ततःशक्त्याब्राह्मणान्भोजयेत्संकल्पयेद्वाऽशक्तो॥ततोदी
नानाथेभ्योभूयसींदक्षिणांदत्वामंडपदेवतानांग्रहपीठदेवतानांचो
त्तरपूजांकृत्वायांतुदेवगणाः॥अभ्यारमिदद्र्यो॥उत्तिष्ठब्रह्मणस्पतइ
तिताउत्थाप्यविसृज्यमंडपादीन्प्रतिमादींश्चसर्वान्संभारानाचा
र्यायप्रतिपाद्ययस्यस्मृत्याचनामोक्त्या।प्रमादात्कुर्वतामितिपठित्वाक
र्मेश्वरार्पणंकृत्वाविप्राशिषोगृहीत्वानान्नमस्कृत्यसुहृद्युतोभुंजीतेति
सर्वेशिवं॥इतिश्रीभट्टशंकरात्मजनीलकंठकृतेशांतिपरिभाषाप्रयोगः॥
अथग्रहयोगशांतिः॥यामले॥दुर्भिक्षादिभयंचैवचतुर्ग्रहसमन्वये॥म
हारोगभयंराष्ट्रसंयोरष्टिविनाशनं॥पंचग्रहसमायोगेदुर्भिक्षंसंकरा

द्विकं॥ जनक्षयो नृपवैरं गर्भनाशस्तु जायते॥ ग्रहषट्कसमायोगे मंत्रि
णो मरणं भवेत्॥ पश्चाद्यादिभयं सर्वं संकराद्विजनक्षयः॥ पट्टराज्ञीवि
नाशो वा महाभयमथापि वा॥ सप्तग्रहसमायोगे क्षितीशमरणं ध्रुवं॥
जगत्प्रलयमेवापि न दृष्टा निर्मानुषं जगत्॥ अत ऊर्ध्वं महोत्पातं नानादुः
खमहाकुलं॥ सूर्यः स्याद्व्यतिरिक्तश्चेत्तदा योगो महाद्भुतः॥ विना चंद्रेण
योगोपि जगत्प्रलयकारणं॥ तद्दृष्टजातजंतूनां महारोगो महाभयं॥ अ
र्थनाशः स्थाननाशो मानहानिर्नृपीडनं॥ वातपित्तादिसंभूतमहापीडा
महद्भयं॥ समायोगग्रहा नृणां दोषान्कुर्वंति सर्वदा॥ षण्मासाभ्यंत
रे वापि आयुर्हानिः श्रियस्तथा॥ जन्माष्टद्वादशे राशौ चतुर्थे पंचमेपि
वा॥ पूर्वोक्तफलमेवात्र तस्माच्छांतिं प्रयत्नतः॥ कुर्याद्दोषानुसारेण
वित्तशाठ्यं न कारयेत्॥ तत्तद्ग्रहाकृतिं कृत्वा सौवर्णेन प्रयत्नतः॥ सुव
र्णेन तदर्द्धेन पादेनापि कनीयसी॥ वित्तशाठ्यं न कर्तव्यं कर्तव्यं शक्ति
तो नरैः॥ पूर्वोक्तलक्षणेनैव ग्रहमूर्तिं च कारयेत्॥ ग्रहस्यैकैककल
शं ग्रहयोगप्रमाणतः॥ कारयेत्कुंभमेकं वा निर्व्रणं सुदृढं नवं॥ ग्रह
स्येशानदिग्भागे शुद्धदेशे समस्थले॥ कुंडे वा स्थंडिले वापि होमं कुर्या
द्विधानतः॥ तस्य पूर्वोत्तरे देशे पूजास्थानं प्रकल्पयेत्॥ चतुरस्रं हस्त
मात्रं स्थंडिलं तंडुलेन तु॥ लिखेद्ग्रहाकृतिं तत्र स्थापयेत्प्रतिमां ततः॥
अधिप्रत्यधिदेवादीन्दक्षिणोत्तरतः क्षिपेत्॥ उक्तगंधैस्तथा पुष्पैस्त
त्माल्यैः फलैरपि॥ तत्तद्ग्रहोक्तमंत्रेण पूर्वोक्तेनैव पूजयेत्॥ स्वस्ति
वाचनपूर्वेण आचार्यऋत्विजैः सह॥ ग्रहपूजादिकं कृत्वा नैवेद्यं तं स
मर्पयेत्॥ ततो होमं प्रकुर्वीत स्वगृह्योक्तविधानतः॥ चतुर्थ्यंतं प्रकुर्वी
त कलशस्थापनं ततः॥ पूर्वोक्तेन विधानेन शुद्धतोयेन पूरयेत्॥ पं
चामृतं पंचगव्यं पंचत्वक्पंचपल्लवं॥ तत्र मंत्रैर्विनिक्षिप्य औषधानि
विनिक्षिपेत्॥ तत्तद्ग्रहोक्तविधिना मूलान्यादाय निःक्षिपेत्॥ अब्लिं
गैर्वारुणैर्वापि कलशं पूरयेद्गुरुः॥ तत्तद्ग्रहोक्तविधिवैस्तत्तन्मंत्रैर्हुनेद्द
थ॥ चर्वाज्ये तु जुहुयात्सम्यक्तिलाहुतिमथाचरेत्॥ अथ स्विष्टकृतं हु
त्वा होमशेषं समापयेत्॥ भद्रासनोपविष्टस्य यजमानस्य ऋत्विजैः
॥ कलशस्योदकेनैवमभिषेकं समाचरेत्॥ योगग्रहोक्तमंत्रैश्च अ

धिप्रत्यधिमंत्रतः॥नवग्रहोक्तमंत्रैश्चजातवेदादिपंचकैः॥त्र्यंबके
नमंत्रेणक्षेत्रस्यपतिनाअपि॥यतइंद्रद्रूयैनेवलोकपालाष्टकैरपि॥सु
रास्त्वाइतिमंत्रेणयेनदेवादयःक्रमात्॥अन्यैश्चपुण्यसूक्तैश्चअभिषे
कंसमाचरेत्॥अभिषेकाप्लुतंवस्त्रमाचार्यायनिवेदयेत्॥ततःशुक्लांब
रधरःकुर्यादाज्यावलोकनं॥ऋत्विग्भ्योदक्षिणांदद्याद्धेनुंशंखादिकान
पि॥तदभावेयथाशक्तिहिरण्यमपिदापयेत्॥ब्राह्मणान्भोजयेत्पश्चा
द्यथाविभवसारतः॥एवंयःकुरुतेभक्त्याग्रहदोषविवर्जितः॥पूर्वोक्त
सर्वदोषैश्चविमुक्तःपुत्रवान्सुखी॥आयुरैश्वर्यसंपन्नोजीवेद्वर्षशतं
नरः॥इहलोकेसुखीभूत्वापश्चाच्छिवपुरंव्रजेत्॥इतिग्रहयोगशांतिः
॥अथग्रहस्नानानि॥विष्णुधर्मोत्तरे॥मंजिष्ठामदमातंगंकुंकुमंरक्तचं
दनं॥पूर्णकुंभेकृतंताम्रेसूर्यस्नानंविधीयते॥मदमातंगजगमदः॥उ
शीरंचशिरीषंचकुंकुमंरक्तचंदनं॥शंखन्यस्तमिदंस्नानंचंद्रदोषवि
९ नाशनं॥खदिरंदेवदारुंचतिलानामलकानिच॥पूर्णकुंभेकृतंरौप्ये
भौमपीडाविनाशनं॥नदीसंगमतोयानितन्मृदासहितानिच॥न्यस्ता
निकुंभेमाहेयेबुधपीडाविनाशनम्॥माहेयेमृन्मये॥औदुंबरंतथा
बिल्वंवटमामलकंतथा॥न्यस्तंतुकुंभेसौवर्णेजीवपीडाविनाशनं॥
गोरोचनानागमदःशतपुष्पाशतावरी॥विन्यस्ताराजतेकुंभेशुक्र
पीडाविनाशनम्॥तिलान्माषान्प्रियंगुंचगंधपुष्पंतथैवच॥न्यस्तं
कार्ष्णायसेकुंभेसौरिपीडाविनाशनं॥गुग्गुलंहिंगुलंतालंशुभांचैव
मनःशिलां॥शृंगेचमाहिषेन्यस्येद्राहुपीडाविनाशनं॥तालंहरिता
लं॥वराहनिहतांराजन्पर्वताग्रमृदंतथा॥छागक्षीरंखड्गपात्रेके
तुपीडाविनाशनम्॥वराहनिहतावराहोत्खाता॥खड्गोगंडकः॥
उक्तंग्रहस्नानमिदंसर्वपीडाविनाशनं॥इतिग्रहस्नानानि॥अथादि
त्यशांतिः॥भविष्ये॥आदित्यवारंहस्तेनपूर्वंगृह्यविचक्षणः॥मंत्रोक्त
विधिनासर्वंकुर्यात्पूजादिकंरवेः॥प्रत्यर्कंसप्तनक्तानिकृत्वाभक्तिप
रोनरः॥ततस्तुसप्तमेप्राप्तेकुर्याद्ब्राह्मणभोजनं॥भास्करंसुदृसौव
र्णंकृत्वायत्नेनमानवः॥ताम्रपात्रेस्थापयित्वारक्तपुष्पैःप्रपूजयेत्॥
रक्तवस्त्रयुगच्छन्नंश्रीपानसुगान्वितं॥घृतेनस्नापयित्वाचलड्डुका

न्विनिवेद्यच॥ होमंघृततिलैःकुर्याद्रविनाम्नाचमंत्रवित्॥ समिधोःष्टोत्तरशतमष्टाविंशतिरेवच॥ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेन च॥ मंत्रेणानेनविदुषेब्राह्मणायप्रदापयेत्॥ आदिदेवनमस्तुभ्यंसप्तसप्तेदिवाकर॥ त्वंरवेतारयस्वाःस्मांस्तस्मात्संसारसागरात्॥ व्रतेनानेनराजेंद्र भवेदारोग्यमुत्तमम्॥ द्रव्यसंपत्सुतप्राप्तिरितिपौराणिकाविदुः॥ अपिसंवादिनीचेयंशांतिःपुष्टिःसदानृणां॥ सूर्यपीडासुघोरासुकृताशांतिःशुभप्रदा॥ अथचंद्रशांतिस्तत्रैव॥ तद्दिन्त्वितासुसंगृह्यसोमवारंविचक्षणः॥ अनेनैवोक्तविधिनाकुर्यात्पूजादिकंविभोः॥ सप्तमेतुततः प्राप्तेकुर्याद्ब्राह्मणभोजनं॥ कांस्यपात्रेथसंस्थाप्यसोमंरजतसंभवम्॥ श्वेतवस्त्रयुगच्छन्नंश्वेतपुष्पैःप्रपूजितम्॥ पादुकोपानहच्छत्रभोजनासनसंयुतं॥ होमंघृततिलैःकुर्यात्सोमनाम्नाचमंत्रवित्॥ समिधोःष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनवा॥ दध्यन्नंघिरवरेकृत्वाब्राह्मणायनिवेदयेत्॥ मंत्रेणानेनराजेंद्रसम्यग्भक्त्यासमन्वितः॥ महादेवजातिवल्लीपुष्पगोक्षीरपांडुर॥ सोमसौम्योभवाःस्माकंसर्वदातेनमोनमः॥ अथमंगलशांतिः॥ स्वात्यामंगारकंगृह्यक्षमायांनक्तभोजनं॥ क्षमाभूः॥ सप्तमेत्वथसंप्राप्तेहैमंताम्रेनिवेश्यवै॥ रक्तवस्त्रयुगच्छन्नंकुंकुमेनानुलेपितं॥ निवेद्यभक्तकंसारंपुष्पधूपाक्षतादिभिः॥ होमंघृततिलैःकुर्यात्कुजनाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच॥ मंत्रेणानेनतंदद्याद्ब्राह्मणायकुटुंबिने॥ कुजकुमभवोपित्वंमंगलःपरिपठ्यसे॥ अमंगलंनिहत्याशुसर्वदायच्छमंगलं॥ एवंकृतेभौमकृतंदुष्कृतंशांतिमाप्नुयात्॥ कर्तव्यंभौमपीडासुतस्मात्प्रयतमानसैः॥ अथबुधशांतिः॥ विशाखासुबुधंगृह्यसप्तनक्तान्यथाचरेत्॥ बुधंहेममयंकृत्वास्थापितंकांस्यभाजने॥ शुक्लवस्त्रयुगच्छन्नंशुक्लमाल्यानुलेपनं॥ गुडौदनोपसंहारंब्राह्मणायनिवेदयेत्॥ बुधत्वंबुद्धिजननोबोधवान्सर्वदानृणां॥ तत्वाःवबोधंकुरुमेसोमपुत्रनमोनमः॥ होमंघृततिलैःकुर्यात्बुधनाम्नाचमंत्रवित्॥ समिधोःष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्याम

धुसर्पिभ्यांदध्नाचैवघृतेनच॥बुधशांतिरियंप्रोक्ताबुधवैकृतनाशिनी
॥बुधदोषेषुकर्त्तव्यातथाशांतिकपौष्टिके॥अथगुरोः शांतिः॥गुरुंचैवा
नुराधासुपूजयेद्भक्तितोनरः॥पूर्वोक्तविधियोगेनसप्तनक्तान्यथाचरे
त्॥हैमंहेममयेपात्रेस्थापयित्वाबृहस्पतिं॥पीतांबरयुगच्छन्नंपीत
यज्ञोपवीतिनं॥पादुकोपानहच्छत्रकमंडलुविभूषितं॥पूजयेत्पीत
कुसुमैः कुंकुमेनविलेपितं॥धूपदीपादिभिर्दिव्यैः फलैश्चंदनतंडुलैः
खंडखाद्योपहारैश्चगुरोरग्रेनिवेदयेत्॥धर्मशास्त्रार्थतत्वज्ञज्ञानवि
ज्ञानपारग॥विबुधार्त्तिहराचिंत्यदेवाचार्यनमोस्तुते॥होमंघृततिलैः
कुर्याद्गुरुनाम्नाचमंत्रवित्॥समिधोऽष्टोत्तरशतमष्टाविंशतिरेववा॥
होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥समिधोत्राऽश्वत्थस्य॥एत
द्व्रतंमहापुण्यंसर्वपापहरंशिवम्॥तुष्टिपुष्टिकरंनृणांगुरुवैकृतना
शनं॥विषमस्थेगुरौकार्यामहाशांतिरियंनृभिः॥अथगुरुपूजा॥स्कां
दे॥कन्याविवाहकालेतुशुद्धिर्यस्यानविद्यते॥ब्राह्मणस्योपनयनेय
स्यस्यादुत्थितोगतः॥उत्थितःप्राप्तः॥एभिःपूजागुरोःकार्याविधिवद्भ
क्तिभावितः॥मदंतीकामपुष्पाणिपात्रंपालाशसर्षपाः॥मदंतीयूथि
का॥कामोमदनवृक्षाख्यः॥गुडूचीवालपामार्गविडंगंशंखिनीवचा॥
सहदेवीविष्णुक्रांतासर्वौषध्यःशतावरी॥कुष्ठंमांसंहरिद्रेद्वेमुराशैले
यचंदनं॥वचाकर्चूरमुस्तंचसर्वौषध्यःप्रकीर्त्तिताः॥तथैवाऽश्वत्थशृं
गाच्चपंचगव्यंजलंतथा॥नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं॥पंच
रत्नैःसमायुक्तमीशान्यांस्थापितेःनलात्॥याॐषधीतिमंत्रेणस
र्वास्तवस्मिन्विनिक्षिपेत्॥कुंभस्योपरिभागेतुस्थापयित्वाबृहस्प
तिं॥सुवर्णपात्रेसौवर्णींप्रतिमांतुयुधिष्ठिर॥कारयेत्तुयथाशक्त्यावि
त्तशाठ्यविवर्जितः॥पीतवस्त्रयुगच्छन्नांपीतयज्ञोपवीतिनीं॥पू
जयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत्॥समिधोऽश्वत्थवृक्षस्यहो
तव्याष्टोत्तरंशतं॥तिलव्रीहियवोन्मिश्रंहोतव्यंचयथाक्रमं॥बृह
स्पतेतिमंत्रेणऋषिछंदःसमन्वितः॥मंत्रेणानेनजुहुयाद्धान्यपूगंच
यत्नतः॥ततोहोमावसानेतुपूजयेच्चबृहस्पतिं॥पीतगंधैस्तथापुष्पै
र्धूपैर्दीपैश्चभक्तितः॥दध्योदनंचनैवेद्यंफलतांबूलसंयुतं॥मंत्रेणा

नेनकौंतेयसमभ्यर्च्य पुनःपुनः॥ नमस्तेंगिरसांनाथवाक्पतेथबृहस्पते॥ क्रूरग्रहैः पीडितानाममृतायनमोनमः॥ पूजयित्वासुराचार्यं पश्चादर्घं निवेदयेत्॥ गंभीरदृढरूपांगदेवेज्यसुमतेप्रभो॥ नमस्तेवाक्पतेशांतगृहाणार्घंबृहस्पते॥ अर्घमंत्रः॥ अर्घंदत्वासुरेशस्य जपहोमंसमापयेत्॥ भक्त्यायत्तेसुराचार्यहोमपूजादिसंस्कृतं॥ तत्तं गृहाणशांत्यर्थंबृहस्पतेनमोनमः॥ संकल्पमंत्रः॥ मंत्रेणानेनसंकल्प्य पश्चात्संप्रार्थयेन्नृप॥ जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः॥ वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम॥ प्रार्थनामंत्रः॥ एवंसंप्रार्थयेद्देवमाचार्यंचप्रपूजयेत्॥ सर्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर॥ प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत्॥ अथाचार्यस्तुनियतोवेदवेदांगपारगः॥ यजमानंसपत्नीकंशांतचित्तंजितेंद्रियं॥ कुंभोदकं गृहीत्वातुमंत्रैरेतैःप्रसिंचयेत्॥ इदमापोथमंत्रेणाजामदग्निमृचातथा॥ याऔषधीरश्वावतीःकूष्मांडैश्चाभिषेचयेत्॥ पश्चात्संभोजयेद्विप्रान्यथाशक्त्यायुधिष्ठिर॥ एवंकृत्वागुरोःपूजांसर्वान्कामानवाप्नुयात्॥ संक्रांतावपिकौंतेयतथास्त्वाभ्युदयेषुच॥ कुर्वन्बृहस्पतेःपूजामभीष्टफलमाप्नुयात्॥ संक्रांतौगुरुसंक्रांतौ॥ इतिगुरुपूजा॥ अथशुक्रशांतिर्भविष्ये॥ शुक्रेज्येष्ठासुसंगृह्यक्षमापानक्तभोजनं॥ क्षमाभूः॥ गुरूक्तक्रममार्गेणद्विजसंतर्पणेनच॥ सप्तमेत्वथसंप्राप्तेरौप्यंशुक्रंतुकारयेत्॥ वंशपात्रेचसंस्थाप्यपूजयेत्सितपंकजैः॥ तदभावेसितैःपुष्पैस्तांबूलैश्चंदनेनवा॥ अग्रतस्यप्रदातव्यंपापसंघृतसंयुतं॥ दद्यादनेनमंत्रेणब्राह्मणायकुटुंबिने॥ भार्गवोभर्गशुक्रस्यशुचिःश्रुतिविशारदः॥ हित्वाग्रहकृतान्दोषानापुरारोग्यदोस्तुसः॥ होमंघृततिलैःकुर्याच्छुक्रनाम्नाचमंत्रवित्॥ समिधोष्टोत्तरशतमष्टाविंशतिरेववा॥ होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच॥ अथप्रतिशुक्रादिशांतिः॥ तत्रैवमात्स्ये॥ अथातःशृणुभूपालप्रतिशुक्रप्रशांतये॥ यात्रारंभेवसानेचतथाशुक्रोदयेसति॥ शुक्रपूजाप्रकर्त्तव्यातांनिशामयभारत॥ राजतेवाथसौवर्णेकांस्यपात्रेथवापुनः॥ शुक्लपुष्पांबरयुतेश्वेततंडुलपूरिते॥ निधायराजतंशुक्रंमुक्ताफलान्वितं॥ महाश्वेतसमायुक्तसामगायनिवेदयेत्॥

नमस्तेसर्वलोकेशनमस्ते भृगुनंदन॥ देवस्सर्वार्थसिध्यर्थं गृह्णाणार्घ्यं नमोस्तुते॥ दत्वैवमर्घ्यंकौंतयप्रणिपत्यविसर्ज्जयेत्॥ एवंमुक्तोस्यै. कुर्योद्यात्रादिषुचभारत॥ तदृह्वाचस्पतेः पूजांप्रवक्ष्यामियुधिष्ठिर॥ सौवर्णपात्रेसौवर्णममरेशपुरोहितं॥ पीतपुष्पांबरधरंकृत्वास्नात्वा श्वसर्षपैः॥ पालाशाश्वत्थभंगेनपंचगव्यतिलेनतु॥ भंगःपल्लवः॥ पीतांगरागवसनोघृतहोमंतुकारयेत्॥ प्रणम्यतांगवासाद्वंब्राह्मणाय निवेदयेत्॥ नमस्तेगिरसांनाथवाक्यतेनेवृहस्पते॥ क्रूरग्रहैःपीडितानाममृतायनमोनमः॥ संक्रांतावपिकौंतेययात्रास्वभ्युदयेषुच॥ कुर्वन्वृहस्पतेःपूजांसर्वान्कामान्समश्नुते॥ अथवा मौक्तिकान्येवसुव्रतानि वृहे तिच॥ भार्गवांगिरसौचिंत्यतान्येवप्रतिपादयेत्॥ इतिप्रतिमुक्तादिशांतिः॥ अथशनिराहुकेतुशांतयः॥ भविष्ये॥ शनैश्चरंराहुकेतूलोहपात्रेषुनिक्षिपेत्॥ कृष्णागुरुःस्मृतोधूपोदक्षिणाचस्वशक्तितः॥ यथार्कमंशमीदूर्वाकुशानांसमिधःस्मृताः॥ सप्तमेत्वथसंप्राप्तेनवर्णान्वाथकारयेत्॥ कृष्णवस्त्रयुगच्छन्नमेकैकंकारयेद्बुधः॥ मृगनाभ्यासमालभ्यकृशरान्विनिवेद्यच॥ होमावसानेतत्सर्वंब्राह्मणायोपपादयेत्॥ शनैश्चरनमस्तेस्तुनमस्तेराहवेतथा॥ केतवेचनमस्तुभ्यं सर्वेशांतिंप्रयच्छतु॥ एवंकृतेभवेद्यत्तुतन्निबोधनृपोत्तम॥ यद्भौमोरविसुतोभास्करोराहुणासह॥ केतुश्चमूर्तौतिष्ठंतिसर्वेपीडाकराग्रहाः॥ अनेनकृतमात्रेणसर्वेशाम्यंत्युपद्रवाः॥ इतिशन्यादिशांतिः॥ भविष्योत्तरे॥ ततोमंदस्यदिवसेस्नानमभ्यंगपूर्वकम्॥ कार्यंदेयंच विप्रायतैलमभ्यंगहेतवे॥ यस्तुसंवत्सरंयावत्प्राप्तेशनिदिनेनरः॥ तैलंददातिविप्राणांस्वशक्त्याभ्यज्यतेपिवा॥ ततःसंवत्सरस्यांतेप्राप्तेतस्यदिनेपुनः॥ लोहंघटार्पितंसौरिंतैलकुंभेविनिक्षिपेत्॥ लोहेवामृन्मयेवाथकृष्णवस्त्रयुगान्वितं॥ कृष्णगोदक्षिणायुक्तंकृष्णकंबलप्रापितं॥ स्वयमभ्यंगतःस्नात्वाकृष्णपुष्पैस्तमर्चयेत्॥ सुगंधिगंधपुष्पैश्चकृशरान्नैस्तिलोदनैः॥ पूजयित्वासूर्यपुत्रंक्षमस्वेतिपुनःपुनः॥ कृष्णाय द्विजमुख्यायतदभावेनरायच॥ देयःशनैश्चरोभक्त्यामंत्रेणानेनवैद्विज॥ क्रूरावलोकनवशाद्भवनंनाप्नोतियोग्रहोरुष्टः॥ तुष्टोधनकनकसु

स्वंददातिसोऽस्मान्शनैश्वरःपातु॥यःपुनर्नष्टराज्यायनलायपरितोषि
तः॥स्वप्नेददौनिजंराज्यंसमेसौरिःप्रसीदतु॥कोणंनीलांजनप्रख्यंमं
दचेष्टाप्रसारिणं॥छायामार्तंडसंभूतंनमस्यामिशनैश्वरं॥नमोऽर्कपु
त्रायशनैश्वरायनीहारवर्णांजनमेचकाय॥श्रुत्वारहस्यंभववकामदस्त्वं
फलप्रदोमेभवसूर्यपुत्र॥नमोस्तुप्रेतराजायकृशदेहायवैनमः॥शनै
श्वरायक्रूरायशुद्धबुद्धिप्रदायिने॥यएभिर्नामभिःस्तौतितस्यतुष्टोद
दात्यसौ॥तदीयंतुभयंतस्यस्वप्नेपिनभविष्यति॥इतिशनिव्रतं॥स्कां
दे॥श्रावणेमासिसंजातेशोभनेशनिवासरे॥लोहरूपंशनिंकृत्वास्नाप्य
पंचामृतैर्नवैः॥पुष्पैरष्टविधैर्धूपैःफलैश्चैवविशेषतः॥मंत्रैःसंपूजयेद्दे
नैःक्रमेणग्रहमुत्तमं॥कोणस्तुपिंगलोबभ्रुःकृष्णोरौद्रोयमोंतकः॥
सौरिःशनैश्वरोमंदःपिप्पलादेनसंस्तुतः॥शन्नोदेवीतिसर्वत्रवैदिके
नचपूजयेत्॥पूजयित्वाचनैवेद्यंतत्कुर्यात्क्रमेणतु॥समाषभक्तंप्र
थमेद्वितीयेपायसंशुभं॥तृतीयेत्वविलीकार्याचतुर्थेपूरिकाशुभा॥
अंविलीतक्रतंडुलपिष्टादिनिर्मितोलेह्यविशेषः॥इतिशनिस्तोत्रं॥
ततःकृतांजलिर्भूत्वास्तुतिंचक्रेसबालकः॥पिप्पलादोद्विजश्रेष्ठःप्र
णिपत्यमुहुर्मुहुः॥नमस्तेकोणसंस्थायपिंगलायनमोस्तुते॥नमस्ते
बभ्रुरूपायकृष्णायचनमोस्तुते॥नमस्तेरौद्रदेहायनमस्तेचांतकाय
च॥नमस्तेयमसंज्ञायनमस्तेसौरयेविभो॥नमस्तेमंदसंज्ञायशनैश्व
रनमोस्तुते॥प्रसादंकुरुदेवेशदीनस्यप्रणतस्यच॥शनैश्वरउवाच
॥परितुष्टोस्मितेवत्सस्तोत्रेणानेनसांप्रतं॥वरंवरयभोवत्सयेनयच्छा
मिवांछितम्॥पिप्पलादउवाच॥अद्यप्रभृतिनोपीडाबालानांरविनंद
न॥त्वयाकार्यामहाभागनस्वकीयाकथंचन॥यावद्वर्षाष्टकंजातंम
मबाल्येनसूर्यज॥स्तोत्रेणानेनयोन्यस्त्वांब्रूयात्प्रातरुपस्थितः॥तस्य
पीडानकर्त्तव्यात्वयाभास्करनंदन॥तस्यपीडानकर्तव्यादेयोलाभोम
हाभुज॥अर्द्धाष्टमिकयायोगेनावकेसंस्थितेनरः॥सार्द्धसप्तवर्षपर्यंतंद्वादश
जन्मद्वितीयराशिभिर्यःशनैश्वरयोगःसोऽर्द्धाष्टमिकयायोगइत्यु
च्यते॥नववारेतुसंप्राप्तेयस्तिलान्होमसंयुतान्॥शन्यादद्दातिनोतस्य
पीडाकार्यात्वयाविभो॥कृष्णांगांयस्तुविप्रायतवोद्देशेनयच्छति॥अ

द्वौष्टमिकयापीडातस्यकार्यात्वयानच॥शमीसमिद्भिर्योहोमंतवोद्देशे
ननिर्वपेत्॥तथाकृष्णतिलैश्चैवकृष्णपुष्पानुलेपनैः॥पूजांकरोतियः
स्तुभ्यंधूपंवैगुग्गुलंदहेत्॥कृष्णवस्त्रेणसंवेष्ट्यत्याज्यानस्यत्वयाव्य
था॥सूतउवाच॥एवमुक्तःशनिस्तेनबाढमित्यवजल्प्यच॥नारदंसम
नुज्ञाप्यजगामनिजसंश्रयं॥इतिशनैश्चरशांतिः॥अथार्कविवाहः॥प्र
योगरत्नेमात्स्ये॥तृतीयांमनुषींनैवचतुर्थींयःसमुद्वहेत्॥पुत्रपौत्रादि
संपन्नःकुटुंबीसाग्निकोवरः॥उद्वहेदितिसिद्ध्यर्थंतृतीयांनकदाचन॥
मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं॥नश्यत्येवनसंदेहोगर्गस्य
वचनंयथेति॥तत्रैवसंग्रहे॥तृतीयांयदिचोद्वाहेत्तर्हिसाविधवाभवेत्
चतुर्थादिविवाहार्थंतृतीयेऽर्कंसमुद्वहेत्॥आदित्यदिवसेवापिहस्तर्क्षे
वाशनैश्चरे॥शुभेदिनेवापूर्वाह्णेकुर्यादर्कविवाहकं॥व्यासः॥स्नात्वा
लंकृतवासास्त्रक्गंधादिभूषितं॥सपुष्पफलशाखेकमर्कगुल्मंसमा
श्रयेत्॥सल्लक्षणेनसंयुक्तमर्कंसंस्थाप्ययत्नतः॥अर्ककन्याप्रदानार्थं
माचार्यंकल्पयेत्तुरा॥अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत्नांदी
श्राद्धंहिरण्येनअष्टवर्गांश्चपूजयेत्॥पूजयेन्मधुपर्केणवरंविप्रस्यह
स्ततः॥यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषणं॥उष्णीषगंधमाल्यादि
वरायास्मैप्रदापयेत्॥स्वशाखोक्तप्रकारेणमधुपर्कंसमाचरेत्॥बाह्ये
॥ग्रामात्प्राच्यामुदीच्यांवासुपुष्पफलसंयुतं॥परीक्ष्ययत्नतोधस्तात्स्थं
डिलादियथाविधि॥कुर्यादितिशेषः॥कृत्वार्कंपुरतस्तिष्ठन्प्रार्थयेतद्वि
जोत्तमः॥त्रिलोकवासिन्सप्ताश्वच्छाययासहितोरवे॥तृतीयोद्वाह
जंदोषंनिवारयसुखंकुरु॥तत्र व्यारोप्यदेवेशंछाययासहितंरविं
॥वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणैवपूजयेत्॥तत्रैवश्वेतवस्त्रेणतथा
कार्पासतंतुभिः॥गंधपुष्पैःसमभ्यर्च्यअर्कलिंगैरभिषिच्यच॥गुडौद
नंतुनैवेद्यंतांबूलंचसमर्पयेत्॥व्यासः॥अर्कंप्रदक्षिणीकुर्वन्जपेन्मं
त्रमिमंबुधः॥ममप्रीतिकरायेयंमयासृष्टापुरातनी॥अर्कजाब्रह्मणास
ष्टाअस्माकंप्रतिरक्षतु॥पुनःप्रदक्षिणींकुर्यान्मंत्रेणानेनमंत्रवित्॥नम
स्तेमंगलेदेविनमःसवितुरात्मजे॥त्राहिमांकृपयादेविपत्नीत्वंमेइ
हागता॥अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच॥वृक्षाणामादिभूत

स्त्वं देवानां प्रीतिवर्द्धनः॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ त
तश्च कन्यावरणं त्रिपुरुषं कुलमुद्वहेत्॥ आदित्यः सविता चार्कः पुत्रीपौ
त्री च नप्त्रिका॥ गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत्॥ सुमुहूर्ते
निरीक्षेत स्वस्तिसूक्तमुदीरयन्॥ आशीर्भिः सहितैः कुर्यादाचार्यप्रमु
खैर्द्विजैः॥ अथाचार्यं समाहूय विधिना तन्मुखाच्च तां॥ प्रतिगृह्य ततो हो
मं गृह्योक्तविधिनाचरेत्॥ व्यासः॥ अर्ककन्यामिमां विप्र यथाशक्ति
विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ अंजल्पस्ततक
र्माणि कृत्वा कंकणपूर्वकं॥ यावत्संचवृता सूत्रं तावदर्कं प्रवेष्टयेत्॥ स्व
शाखोक्तेन मंत्रेणागायत्र्या वाथ वाजपेत्॥ पंचीकृत्य पुनः सूत्रं स्कंधेव
ध्नाति मंत्रतः॥ बृहत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत्॥ अर्कस्य पुर
तः पश्चाद्दक्षिणोत्तरतस्तथा॥ कुंभांश्च निक्षिपेत्पश्चादाग्नेयादि चतुष्ट
ये॥ सवस्त्रं प्रतिकुंभं च त्रिसूत्रेण ववेष्टयेत्॥ हरिद्रागंधसंयुक्तं पूरयेच्छी
तलं जलं॥ प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं॥ पाद्यार्घादि निवेद्यांतं
कुर्यान्नाम्नैव मंत्रवित्॥ अत्र शौनकोक्तो होमप्रकारः॥ तृतीये स्त्रीविवाहे
तु संप्राप्ते पुरुषस्य तु॥ अर्कविवाहं वक्ष्यामि शौनकोहं विधानतः॥ अर्क
सन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत्॥ नांदीश्राद्धं प्रकुर्वीत स्थंडि
लं च प्रकल्पयेत्॥ अर्कमभ्यर्च्य सौर्या च गंधपुष्पाक्षतादिभिः॥ सौर्या
सूर्यदेवत्यया॥ आकृष्णेनेत्यनया॥ स्वयं वालंकृतस्तद्वत् वस्त्रमाल्यादि
भिः शुभैः॥ अर्कस्योत्तरदेशे तु समन्वारब्ध एतया॥ एतया अर्ककन्य
या॥ उल्लेखनादिकं कुर्याद्दाघारांतमतः परं॥ आज्याहुतिं च जुहुयात्सं
गोभिरनयैकया॥ यस्मै त्वा काम कामायेत्येतयर्चा ततः परं॥ व्यस्ताभि
श्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत्॥ परिषेचनपर्यंतमयाश्चेत्यादि
कं क्रमात्॥ मार्थनामंत्रादिविशेषमाह व्यासः॥ पुनः प्रदक्षिणं कृत्वा मंत्र
मेतमुदीरयेत्॥ मया कृतमिदं कर्म स्थावरेषु जरायुणा॥ अर्कापत्यानि
नो देहि तत्सर्वं क्षंतुमर्हसि॥ इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पु
नः॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः॥ इतरेभ्योपि विप्रेभ्यो
दक्षिणां चापि शक्तितः॥ तत्सर्वं गुरवे दद्यादंते पुण्याहमाचरेत्॥ अथ
प्रयोगः॥ तृतीयोद्वाहात्प्राग्दिनचतुष्टयाधिकव्यवहितरविवारे शनि

वारेहस्तनक्षत्रेशुभदिनांतरेवाग्रामात्प्राच्यामुदीच्यांवापुष्पफल
युतार्कस्याधस्तात्स्थंडिलंकृत्वार्कपश्चिमतउपविश्यमासपक्षाद्युल्लि
ख्यममतृतीयमानुषीविवाहजदोषापनुत्त्यर्थमर्कविवाहंकरिष्यइ
तिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यव
णानिकुर्यात्॥तत्रवृद्धिश्राद्धेहेम्ना॥अथाचार्येणपूजितोवरः॥त्रिलो
कवासिन्सप्ताश्वछाययारहितोरवे॥तृतीयोद्वाहजंदोषंनिवारयसु
खंकुरु॥इत्यर्कसंप्रार्थ्यार्कं॥आकृष्णेनेतिछायासहितंरविमावाह्य
श्वेतवस्त्रसूत्राभ्यामावेष्ट्यसंपूज्यापोहिष्ठेत्यादिभिरभिषिच्यगुडो
दनतांबूलादिसमर्प्यप्रदक्षिणीकुर्वन्ममप्रीतिकरायेयंमयासृष्टापुरा
तनी॥अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षत्वितिपठेत्॥द्वितीयप्रद
क्षिणायांतु॥नमस्तेमंगलेदेविनमःसवितुरात्मजे॥त्राहिमांकृपयादेवी
पत्नीत्वंमेइहागता॥अर्कत्वंब्रह्मणासृष्टःसर्वप्राणिहितायच॥वृक्षा
णामादिभूतस्त्वंदेवानांप्रीतिवर्द्धनः॥तृतीयोद्वाहजंपापंमृत्युंचाशुवि
नाशयेति॥ततआचार्योमासपक्षाद्युल्लिख्यकाश्यपगोत्रामादित्य
स्यपुत्रींसवितुःपौत्रीमर्कस्यप्रपौत्रीमिमामर्ककन्यामित्युक्तेवरःस्व
स्तिनइंद्रोवृद्धश्रवाइतिसूक्तंपठन्नर्कंनिरीक्षेत॥ततआचार्योविप्रैःस
हाशिषोदत्वामुकगोत्रामुकशर्मणेसंप्रददेइत्यर्ककन्यांदत्वा॥अर्कक
न्यामिमांविप्रयथाशक्तिविभूषितां॥गोत्रायशर्मणेतुभ्यंदत्तांविप्रस
माश्रयेतिपठेत्॥वरस्तुयशोमेकामःसमृध्यतामितिप्रथमांधर्मोमे
इतिद्वितीयांयशोमेइतितृतीयामितित्रीनक्षतांजलीनर्कोपरिक्षित्वा
गायत्र्यापरित्वेत्यादिनावापंचावृतासूत्रेणार्कमावेष्ट्यतत्सूत्रंपुनःपं
चगुणंकृत्वावरस्यस्कंधेबध्वाबृहत्सामेतिरक्षांपरिकल्प्यार्कस्यदि
ग्विदिक्ष्वष्टौकुंभान्संस्थाप्यवस्त्रेणत्रिसूत्रेणचावेष्ट्यहरिद्रागंधाक्षतैः
सिक्तांस्तेषुनाम्नामहाविष्णुमावाह्यषोडशोपचारैःसंपूज्यस्थंडिलेग्निंप्र
तिष्ठाप्यआघारावाज्येनेत्यंतमुक्त्वात्रप्रधानंबृहस्पतिमग्निंवायुंसूर्यंप्र
जापतिंचाज्येनशेषेणेत्याद्युक्त्वाघारांतेसंगोभिरंगिरसबृहस्पतिस्त्रि
ष्टुप्॥अर्कविवाहहोमेविनियोगः॥ॐसंगोभिरांगिरसोनक्षमाणोभग
इवेदर्यमणंनिनाय॥जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूरिव

ओस्वाहाबृहस्पतयइदंनममेतित्यजेत्॥यस्मैत्वावामदेवोग्निस्त्रि
ष्टुप्विनियोगःप्राग्वत्॥ॐयस्मैत्वाकामकामायवयंसम्राड्यजामहे।
तमस्मभ्यंकामंदत्त्वाथेदंत्वंघृतंपिबस्वाहाग्नयइदं॥ततोव्यस्त
समस्तव्याहृतिभिर्हुत्वास्विष्टकृदादिकर्मशेषंसमाप्यार्कंप्रदक्षिणी
कृत्य॥मयाकृतमिदंकर्मस्थावरेणजरायुणा॥अर्कापत्यानिनोदेहि
तत्सर्वंक्षंतुमर्हसीतिप्रार्थ्याचार्यायगोयुग्ममन्येभ्यश्चविप्रेभ्योय
थाशक्तिदक्षिणांदत्वाशांतिसूक्तंजप्त्वापूज्योपस्करानाचार्यायदत्वा
दिनचतुष्टय मग्निंकुंभांश्चरक्षेत्॥कुंभेषुमहाविष्णुंपूजयेच्च॥पं
चमदिनकृत्यंब्राह्मे॥चतुर्थेदिवसेप्राप्तेपूर्ववत्तांप्रपूज्यच॥विसृज्य
होममग्निंचविधिनामानुषींपरां॥उद्वहेदन्यथानैवपुत्रपौत्रसमृद्धि
मान्॥ ॥इतिश्रीभट्टनीलकंठकृतेभगवंतभास्करेशांतिमयूखे
र्कविवाहः॥नारदः॥कुलीरवृषचापांत्यनृयुक्कन्यातुलाघटाः॥रा
शयःशुभदाह्येषानारीणांप्रथमार्त्तवे॥कुलीरःकर्कटः॥चापंधनुः॥अं
त्योमीनः॥नृयुङ्मिथुनं॥घटःकुंभः॥स्मृतिचंद्रिकायां॥शुक्लपक्षेसुशी
लास्यात्कृष्णेसाकुलटाभवेत्॥कृष्णस्यदशमींयावत्मध्यमंफलमा
दिशेत्॥तत्रानैव॥अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि॥परि
घस्यचपूर्वार्द्धेव्यतीपातेचवैधृतौ॥संध्यासूपप्लवेविष्ट्यामशुभंप्रथ
मार्त्तवं॥रोगीपतिव्रतादुःखीपुत्रिणीभोगभागिनी॥पतिव्रताक्लेशयु
क्तासूर्यवारादिषुक्रमात्॥कश्यपस्तु॥अष्टमीषष्ठ्यमारिक्ताद्वादशी
संक्रमेपिवा॥वैधृतौव्यतिपातेचग्रहणेचंद्रसूर्ययोः॥विष्ट्यांसंध्या
सुनिद्रायांदुर्भगाप्रथमार्त्तवा॥नक्षत्रफलमाहगर्गः॥सुभगाचैवदुःशी
लावंध्यापुत्रसमन्विता॥धर्मयुक्ताव्रतस्त्रीचपरसंतानमोदिनी॥सुपु
त्राचैवदुःपुत्रापित्रवेश्मरतासदा॥दीनाप्रज्ञावतीचैवपुत्राढ्याचित्र
कारिणी॥साध्वीपतिव्रतानित्यंसुपुत्राकष्टचारिणी॥स्वकर्मनिरताहि
त्वापुण्यापौत्रादिसंयुता॥नित्यंधनकथासक्तापुत्रधान्यसमन्विता॥पू
र्वार्धाद्याधनवतीदस्रमार्देःक्रमात्फलं॥स्मृतिरत्ने॥शुभंचैवतुपूर्वा
ह्णेमध्याह्नेमध्यमंफलं॥अपराह्णेतुवैधव्यंपूर्वरात्रेशुभंभवेत्॥मध्य
रात्रेतुमध्यंस्यात्पररात्रेशुभान्विता॥कश्यपः॥मलिनामंदवारेतुरात्राव

पितथैवचेति॥स्मृत्यंतरे॥मध्यान्हेतुभवेद्वेश्यानिशीथेविधवाभवेत्॥
तथा॥अमासंक्रांतिविष्ट्यांचव्यतीपातेचवैधृतौ॥परिघस्यतुपूर्वार्धे
षट्षष्ठ्गंडांतिगंडयोः॥व्याघातेनवमूलेतुनाड्यःपंचचतुर्दश॥वैध
व्यमर्थहानिंचसुतनाशंमहद्भयं॥वैधव्यंशत्रुवृद्धिंचदारिद्र्यंक्षीणजी
वनं॥तेजोहानिंसमायातिसदापुष्पवतीक्रमात्॥स्थलभेदेफलभेद
माहवसिष्ठः॥ग्रामाद्बहिःपरग्रामेचान्येत्स्याद्व्यभि चारिणी॥पतिव्रता
पतिस्थानेसुशीलागृहमध्यके॥ग्राममध्येतुवृद्धिःस्याद्विधवाचदिगंब
रा॥परागारेचदुःशीलाआयुष्यंजलसन्निधौ॥वनमध्येतुकन्यायाध
नधान्यसमृद्धिदा॥परागारइत्यनेनैवपितृभ्रातृगृहेनिषिद्धं॥तथा
चशिष्टाचारः॥विशेषनिषेधस्तुनदृश्यते॥तथा॥चंद्रेसद्गुणसंयुक्ते
देवरातमताच्छुभं॥श्वावाशौचेपि अशुभमितिगुरवः॥वस्त्रफल
माहवसिष्ठः॥सुभगाश्वेतवस्त्रास्याद्दृढवस्त्रापतिव्रता॥क्षौमवस्त्रा
क्षितीशास्यान्नववस्त्रासुखान्विता॥दुर्भगाजीर्णवस्त्रास्याद्रोगिणी
रक्तवाससा॥नीलांबरधरानारीविधवापुष्पितायदि॥मलिनांबरतो
नारीदरिद्रास्याद्रजस्वला॥रजोबिंदुफलमाहसएव॥वस्त्रेस्तुर्विष
मारक्तबिंदवःपुत्रमाप्नुयात्॥समास्वेलक्रन्यकाचेतिफलंस्यात्स्वयमा
नवे॥देवरातः॥संमार्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधानाकुलटात
वेस्यात्॥तत्रोपभोगेनपतिस्थितावेद्दृष्टंरजोभाग्यवतीतदास्यात्
॥नारदः॥तिथ्यृक्षवारानिंद्याश्चेत्शेषःकर्मनिवारयेत्॥दोषाधिके
गुणाल्पत्वेतत्तथापिनकारयेत्॥दोषाल्पत्वेगुणाधिक्येशेषःकर्मसमा
चरेत्॥निंद्यर्क्षतिथिवारेषुयदिपुष्पंप्रदृश्यते॥तत्रशांतिंप्रकुर्वीतघृत
दूर्वातिलाक्षतैः॥प्रत्येकंशतमष्टौचगायत्र्याजुहुयात्ततः॥स्वर्णगोभू
तिलान्दद्यात्सर्वदोषापनुत्तये॥भर्त्तातत्राभिगमनंवर्जयेच्चक्षुस्तद्दर्श
नात्॥वसिष्ठोपि॥प्रभूतदोषंयदिदृश्यतेतत्पुष्पंततःशांतिककर्मका
र्यं॥विवर्जयेद्दंपतीदैकशय्यांयावद्रजोदर्शनमन्यघस्रे॥आर्त्तवानां
तुनारीणांशांतिंवक्ष्यामिशौनकः॥तिथिवारर्क्षयोगेभ्योलग्नेशसनवां
शकात्॥ग्रहेभ्योदुःस्थितेभ्यश्चतत्तद्दोषस्यशांतये॥अत्रपुत्रस्यला
भायदंपत्योरभिवृद्धये॥पंचमेन्हिचतुर्थेवाग्रहयज्ञपुरःसरः॥तस्मि

न्महनिकर्त्तव्यमृत्युहोमंविधानतः॥आचार्यंवरयेत्प्रातर्भुवनेश्वरितुष्
ये॥होमार्थंचजपार्थंचवरयेदृत्विजोबहून्॥यजमानोद्विजैःसार्द्धंशांति
होमंसमाचरेत्॥गृहादीशानदिग्भागेदेवतापूजनायच॥द्रोणप्रमा
णधान्येनव्रीहिराशित्रयंभवेत्॥कुंभत्रयंन्यसेद्राशौतंतुवस्त्रादिवेः
ष्टितं॥पूरयेत्तीर्थसलिलैःप्रतिकुंभंपृथक्पृथक्॥सूक्तेनाश्वनवर्चेनप्र
हवआपइत्यथ॥ऋचायाःप्रवतस्तद्वद्गायत्र्याचततःक्रमात्॥मध्य
कुंभेक्षिपेद्धान्यमौषधानिचहेमच॥ततश्चपंचरत्नानिगंधपुष्पाक्षता
युतान्॥औषधानिचवक्ष्यंतेमुनिभिःशांतिकारणात्॥औदुंबरंकुशा
दूर्वाराजीवंचंपविल्वकाः॥विष्णुक्रांताश्वतुलसीवर्हिषंशंखपुष्पि
का॥शतावर्येश्वगंधाचनिर्गुंडीसर्षपद्वयम्॥अपामार्गःपलाशश्च
पनसोजीवनस्तथा॥प्रियंगवश्चगोधूमाव्रीहयोःश्लक्ष्णएवच॥क्षीरा
न्नंदधिसर्पिश्चपर्णंचैवतथोत्पलान्॥कुरंटकश्चगुंजाचवचामुस्त
कभद्रकाइति॥द्वात्रिंशदौषधानीहगायत्र्यासर्वमाहरेत्॥गजाश्व
रथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृद्मानीय
निक्षिपेत्॥कुंभस्थापनमित्याहतत्तन्मंत्रेणकारयेत्॥मृत्तिकाऔष
धादीनिमंत्रेणप्रक्षिपेत्क्रमात्॥कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमे
वच॥मृन्मयंवेणुपात्रंवास्वस्वचित्तानुसारतः॥पात्रोपरिन्यसेद्धैमं
प्रतिमांभुवनेश्वरीं॥तन्मूल्यंवान्यसेत्पात्रेइंद्राणींचपुरंदरं॥आ
चार्यःपूजयेद्देवींमंगाद्यावरणानिच॥अन्योवापूजनंकुर्याज्ज्ञापत्न्याम
प्रसारया॥इंद्राणींपूजयेद्देवीमिंद्राणीमासुनारिषु॥क्रमेणपूजयेदि
दमिंद्रंत्वावृषभंवयं॥अनेनविधिनाचार्यःपूजयेद्देवतात्रयं॥आवाह
नादिसकलैरुपचारैःपृथक्पृथक्॥तन्मध्यमंस्पृशन्कुंभंमंत्रेणभु
वनेश्वरीं॥जपेदाचार्यआहोमाल्लक्ष्मीसूक्तंचजपेत्ततः॥स्पृशन्वैदक्षि
णंकुंभंमृत्विगेकोजपेदथ॥चत्वारिरुद्रसूक्तानिचतुर्मंत्रात्तराणिच॥
संस्पृशन्नुत्तरंकुंभंश्रीसूक्तंरुद्रसंख्यया॥शन्नइंद्राग्नीसूक्तंचतत्र
चैवंस्पृशन्जपेत्॥कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत्॥अन्वा
धानंततःकुर्याद्धोमतंत्रंसमाचरेत्॥पूर्णपात्रनिधानांतंकृत्वाकार्यंद्वि
जैःसह॥दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच॥पायसंश्रपयेत्तत्रसा

वित्रंचहविश्चतत्॥कृत्वाज्यभागपर्यंतंहविरुद्वासनादिकं॥तिस्र
भिश्चैवदूर्वाभिरेकैकाचाहुतिर्भवेत्॥आभिर्मंत्रप्रयुक्ताभिर्गायत्र्या
जुहुयात्क्रमात्॥अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा॥तिलमिश्रैश्च
गोधूमैर्द्रव्येणाप्याहुतीर्हुनेत्॥जुहुयात्पायसेनैव आज्येनचहुनेत
क्रमात्॥हविश्चतुष्टयेनैवप्रत्येकंशतसंख्यया॥गायत्र्यैवतुहोत
व्यंहविरत्रचतुष्टयं॥ततःस्विष्टकृतंहुत्वारज्जुग्रहणंतथा॥अया
श्चेत्यादिभिर्हुत्वासमुद्रादूर्मिसूक्ततः॥संततामाज्यधारांतांपूर्णा
हुतिमथाचरेत्॥परिषेचनपर्यंतंहोमशेषंसमापयेत्॥सहौषधिस्थि
तेस्तत्रप्रतिकुंभस्थितोदकैः॥ऋतुमत्याःस्त्रियाःशांतिंदंपतीभ्यांसुखा
यच॥अथाभिषेकमंत्राश्चप्रोच्यंतेशौनकादिभिः॥आपोहिष्ठेतिनवभिः
सूक्तेनचततःपरं॥इंद्राअंगतृचेनैवपावमानीःक्रमेणतु॥उभयंशृण
वच्चनःस्वस्तिदाविशएकया॥त्र्यंबकेनमंत्रेणजातवेदसएकया
॥समुद्रज्येष्ठाइत्यादिचतुर्भिश्चप्रसिद्धकैः॥आयंतामितिमंत्रैश्चत्रि
भिश्चापियथाक्रमं॥इमाआपस्तृचेनैवदेवस्यत्वेतिमंत्रतः॥मंत्रेण
चतमीशानत्वमग्नेरुद्रइत्यथ॥नमुष्टुहीतिमंत्रेणभुवनस्यपितुस्त
था॥यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः॥इंद्रत्वावृषभंवयंमंत्रैश्चै
वाभिषेचयेत्॥साचवस्त्रांतरंधृत्वापुनश्चैवोपवासिनी॥उपवासोत्र
समीपावस्थानं॥विप्रानभ्यर्च्यविधिवद्गंधपुष्पाक्षतादिभिः॥धेनुं
पयस्विनींदद्यादाचार्यायचभूषणैः॥सदक्षिणमनड्वाहंप्रदद्यादृद्र
जापिने॥ऋत्विग्भ्यश्चाथसर्वेभ्योदद्याद्दक्षिणांततः॥महाशांतिं
प्रयच्छाथविप्राशीर्वचनंततः॥ब्राह्मणान्भोजयेच्चैवभुंजीयात्स्व
जनैःसह॥स्मृतौ॥ब्राह्मणान्भोजयित्वातुदैवज्ञंभोजयेत्ततः॥एवं
यःकुरुतेशांतिंशौनकोक्तप्रकारतः॥नदनिष्टंतुसकलंसर्वंचापि
विनश्यतीति॥ ॥इतिशौनकोक्तरजोदर्शनदोषशांतिः॥अथप्रयोगः॥
कर्त्तादेशकालौस्मृत्वाममपत्न्याःप्रथमरजोदर्शनेःमुकदुष्टमासा
दिसूचितारिष्टनिरसनार्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनं
स्वस्तिवाचनमातृकापूजनाभ्युदयिकाचार्यर्त्विग्वरणानिकुर्यात्॥
अथाचार्योगृहेशान्यांप्रत्येकंमंत्रावृत्यापदार्थानुसमयेनकुंभत्रयं

स्थापयेत्॥ तद्यथा॥ महीद्यौरिति मध्येतद्दक्षिणोत्तरतश्चस्पृष्ट्वाॐ
षधयइतिस्पर्शक्रमेणतेषुस्थानेषुद्रोणप्रमाणान्व्रीहीन्राशीकृत्य
तेनैवक्रमेणराशित्रयेआकलशेष्विति कुंभत्रयंसंस्थाप्यमध्येप्रसुव
आपइतिनवभिर्मंत्रैस्तद्दक्षिणेयाप्रव तइत्यृचातदुत्तरेगायत्र्याजलं
क्षिप्त्वात्रिष्वपिगंधद्वारामिति गंधं। याॐषधीरिति सर्वौषधी
रोषधयःसमितियवान्क्षिप्त्वामध्यमएवयवव्रीहितिलमाषकंगु
श्यामाकमुद्गान्क्षिप्त्वोदुंबरकुशदूर्वारक्तोत्पलपंचविल्वविष्णुक्रां
तातुलसीवर्हिषशंखपुष्पीशतावर्यश्चगंधानिगुंडीरक्तपीतसर्षपापा
मार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीह्यश्वत्थदधिदुग्धघृतपद्म
पत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचाभद्रकमुस्तकाख्यानि
द्वात्रिंशदौषधानियथासंभवंवागायत्र्याक्षिप्त्वात्रिषुदूर्वापंचपल्लव
सप्तमृत्तिकाफलपंचरत्नसुवर्णानिक्षिप्त्वायुवासुवासाइतिवाससा
सूत्रेणवाकुंभकंठान्वेष्टयित्वागंधादिभिरलंकृत्यपूर्णादर्वीतियवा
दिपूर्णपात्राणिनिधायतेषुसाष्टदलंश्वेतंवस्त्रत्रयंन्यस्यमध्यमेगा
यत्र्याविश्वामित्रोभुवनेश्वरीगायत्रीभुवनेश्वर्यावाहनेविनियोगः॥
तत्सवितुरितिभुवनेश्वरींतद्दक्षिणकुंभेइंद्राणींवृषाकपिरिंद्राणीपंक्तिः
इंद्राण्यावाहनेविनियोगः॥इंद्राणीमास्वितींद्राणीमुत्तरकुंभेइंद्रत्वा
विश्वामित्रइंद्रोगायत्रीइंद्रावाहनेविनियोगः॥ इंद्रत्वेतींद्रंप्रतिमासु
स्थाप्यषोडशभिःपंचभिर्वोपचारैरभ्यर्च्यमध्यमेष्टसहस्रमष्टशतं
वागायत्रींश्रीसूक्तंचजपेत्॥ ततएकऋत्विक् दक्षिणकुंभेरुद्रसूक्ता
निजपेत्॥ तानिचकद्रुद्रायेत्येकादशर्चं॥इमारुद्रायतवसइत्येका
दशर्चं॥इमारुद्रायस्थिरधन्वनइतिपंचर्चं॥ आतेपितरितिपंचदश
र्चं॥ तमुष्टुहीत्येका॥भुवनस्यपितरित्येका॥ अथान्यऋत्विगुत्तरकुं
भेएकादशावृत्तिभीरुद्रंशन्नइंद्राग्नीतिपंचदशर्चंचजपेत्॥अथाचा
र्यःकुंभपश्चिमेग्निंप्रणीयतदीशान्यांग्रहस्थापनादिपूजांतंकृत्वातदी
शान्यामेकंकुंभंसंस्थाप्यतत्रवरुणावाहनादिपूजांतंकृत्वाऽन्वाध्यात् ८
॥तत्रास्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाभुवनेश्व
रीमिंद्राणीमिंद्रंचप्रत्येकममुकसंख्ययादूर्वातिलमिश्रगोधूमपाय

साज्यैर्ग्रहांश्चामुकसंख्यासमिच्चर्वा ज्यैःशेषेणस्विष्टकृतमित्या
दिपस्यइत्यंतमुक्त्वापरिस्तरणाद्याज्यभागांतंकृत्वायजमानेनांग
प्रधानदेवताउद्दिश्येताभ्य इदंनममेत्युक्तेऋत्विग्भिःसहान्वाधाने
क्तक्रमेणजुहुयात्॥अन्येतुगायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयं॥
ततःस्विष्टकृतंहुत्वेत्यत्रैंद्राणी इयोर्होमानभिधानान्नतयोर्होमो
ऽन्वाधानेचाकीर्त्तनमित्याहुः॥ततःस्विष्टकृदादिबलिदानांतंकृत्वा
समुद्रादूर्मिरितितृचेनपूर्णाहुतिंहुत्वाप्रणीताविमोकंकृत्वाऋत्वि
ग्भिःसहसभार्ययजमानंकुंभोदकैरभिषिंचेत्॥तत्रमंत्राः॥आपो
हिष्ठेति ९ ऋचः॥यदकइदंयत इ तित्रिभिष्टुंदेवेति॥७॥ऋचः॥
उभयंशृणवच्चनेनिस्वस्तिदाविशांपमिति॥त्र्यंबकमिति॥जातवे
दसइति॥समुद्रज्येष्ठाइति॥४॥ऋचः॥आयंतामिति।२ऋचः इमा
आपइति॥३॥ऋचः॥देवस्यत्वेति॥३॥मंत्रैः॥तमीशानंजगतः॥तमग्ने
रुद्रइत्येकंयजुः॥तमुष्टुहीतिभुवनस्यपितरं॥यातेरुद्रेति॥यज्जाग्र
तइति॥६॥एतेयाजुषाः॥इंद्रत्वावृषभंवयमिति॥५॥ऋचः॥सुरास्त्वा
मभिषिंचंत्विस्यास्याः॥९॥पौराणाः॥एवमभिषिक्तःसुस्नातोधृतशु
क्लवासाःसपत्नीकोयजमानोग्निमाचार्यादींश्चसंपूज्याचार्यायधेनुं
ब्रह्मणेऋत्विग्भ्यश्चयथाशक्तिदक्षिणांरुद्रजापिनेसदक्षिणमनड्वा
हंभूयसींचदत्वाग्रहपीठदेवतानांभुवनेश्वर्यादीनांचोत्तरपूजांकृत्वा
यांतुदेवगणाइतिविसृज्याचार्यायप्रतिपाद्यगच्छगच्छेत्यग्निंविस
र्जयेत्॥ततोब्राह्मणाःशांतिंपठेयुः॥तत्रमंत्राः॥आनोभद्राइति॥१०
॥ऋचः स्वस्तिनोमिमीतामिति॥१५॥ऋचः त्यमूष्विति॥३॥ऋचः
तच्छंयोरितिच॥ततोयजमानोद्वादशब्राह्मणान्भोजयित्वासंकल्प्य
वाविप्राशिषोगृहीत्वासुहृद्युतोभुंजीत॥अथचंद्रार्कोपरागकालीना
द्यरजोदर्शनेविशेषः॥कर्त्तोक्तकालेमासपक्षाद्युल्लिख्यममपत्न्याश्च
इस्यरूपस्यवाउपरागेप्रथमरजोदर्शनसूचितानिष्टनिरासार्थंशां
तिंकरिष्य इतिसंकल्प्यप्राग्वत्ऋत्विक्पूजांतंकुर्यात्॥अथाचार्यो
गोमयोपलिप्तेदेशेपंचवर्णैरष्टदलंकृत्वातत्रश्वेतवस्त्रमुदग्दशंप्रसा
र्यतत्रचंद्रोपरागेआप्यायस्वेतिराजतांप्रतिमांचंद्रंसूर्योपरागेतु

आकृष्णेनेतिसौवर्णीवासूर्यप्रतिमायामावाह्यतदुत्तरतःस्वर्भानो
इतिसैंह्यांप्रतिमायांराहुमावाह्ययस्मिन्नक्षत्रेग्रहणंतन्नक्षत्रदेवता
यांसौवर्णप्रतिमायांतत्तन्मंत्रैःप्रणवादिनमोंतैर्नाममंत्रैर्वाऽऽवाह्यकां
डानुसमयेनषोडशोपचारैःपूजयेत्॥तत्रचंद्रायनक्षत्रदेवताभ्यश्च
श्वेतानिगंधादीनि।सूर्यायरक्तानि।राहवेकृष्णानि॥ततःपश्चिमतोग्निं
प्रतिष्ठाप्यपक्षेग्रहावाहनादिपूजांतंकृत्वाऽन्वादध्यात्॥तत्रचक्षुषी
आज्येनेत्यंतमुक्त्वाचंद्रसूर्यवाराहुनक्षत्रदेवतापक्षेग्रहांश्चामुकसं
ख्ययासमिदाज्यचरुतिलाहुतिभिःशेषेणेत्यादिसमित्सुविशेषः।चं
द्रस्यदेवतयोःपालाशःसूर्यस्यार्कः॥राहोर्दूर्वातास्वतिस्रएकाहुतिः॥
अथाज्यभागांतंकृत्वायजमानेनद्रव्येत्यक्तेन्वाधानक्रमेणलिंगैः
सहहुत्वास्विष्टकृदादिपूर्णाहुत्यंतंप्राग्वत्कृत्वैकस्मिन्कुंभेजलंप
चगव्यरत्नत्वक्पल्लवसर्वौषधिकल्कदूर्वाकुशान्निक्षिप्यसर्त्विक्दंप
तीपूर्ववदभिषिंचेत्॥तत्रमंत्राः॥आपोहिष्ठेति॥३॥ऋचः इमंमेगंगे
त्येका॥तत्त्वायामीत्येका॥अन्येपिसमुद्रज्येष्ठासुरास्त्वामित्यादयश्च
शेषंपूर्ववत्॥इतिदुष्टरजोदर्शनशांतिप्रयोगः।गर्गः।पितरिष्टेसुतारि
ष्टेमात्ररिष्टेतथैवच॥प्रायश्चित्तंतदाकुर्यात्तत्रदोषस्यशांतये॥तादृश
नक्षत्रोत्पत्त्यासूचितेपित्राद्यरिष्टेप्रायश्चित्तमित्यत्रापितत्रदित्य
न्वेति।देहलीदीपवत्॥तत्तद्दोषशांत्येतत्तत्प्रायश्चित्तंकुर्यादित्यर्थः॥
पूषाश्विनोर्गुरौसर्पमघाचित्रेंद्रमूलभे।एषुऋक्षेषुजातस्यकुर्याज्ज्ञो
जननंतथा॥जन्मर्क्षेवाद्विजन्मर्क्षेशुभवारेशुभेदिने॥कृत्वाभ्यंगादि
कंसर्वंगृहालंकारपूर्वकं॥गोमयेनोपलिप्याथगृहस्येशानभागके॥
पंकजंकर्णिकायुक्तंरजोभिःश्वेतवर्णकैः॥व्रीहींस्तत्रविनिक्षिप्ययथा
वित्तानुसारतः॥नवशूर्पंतुतन्मध्येरक्तवस्त्रंप्रसारयेत्॥स्थापयित्वा
शिशुंतत्रपुनःसूत्रेणवेष्टयेत्॥प्राङ्मुखंतमवाक्पादंतिलगर्भगतं
शिशुं॥गोमुखंदर्शयित्वाथपुनर्जातंतुगोमुखात्।विष्णुर्योनिमिति
सूक्तेनगव्येनस्नापयेच्छिशुं॥गवामंगेतिमंत्रेणगवामंगेषुसंस्पृशे
त्॥विष्णोःश्रेष्ठेनमंत्रेणगोप्रसूतंतुबालकं॥आचार्यस्तुसमादायप
श्चान्मात्रेददेत्तथा॥मातातुजघन्यभागस्थाशिशुमानीयतंमुखात्॥

ततःपित्रेतदा दद्यात्ततो मात्रे प्रदापयेत्॥ वस्त्रे स्थाप्यपिताःस्याथपुत्र
स्य मुखमीक्षयेत्॥ गोमूत्रं गोमयं क्षीरं दधिसर्पिश्च संयुतं॥ आपोहि
ष्ठादिभिर्मंत्रैरभिषिंचेत्ततः शिशुं॥ मूर्ध्नि चाघ्रापयेत्पुत्रं तन्मंत्रेण तदा
पिता॥ अंगादंगात्संभवसि हृदयादभिजायसे॥ आत्मा वै पुत्रनामासि
संजीव शरदः शतं॥ मूर्द्धनि त्रिरवघ्रायतं शिशुं स्थापयेत्ततः॥ पुण्याहं
वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः॥ दरिद्रायाथ विप्राय तां गामभ्यर्च्य दा
पयेत्॥ गोवस्त्रस्वर्णधान्यानि दद्यादकोष्ठितः क्रमात्॥ यथाशक्ति प्रद
द्याद्ब्राह्मणेभ्यस्तदा पिता॥ ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः॥
उल्लेखनादिकं कृत्वा चाज्यभागांतमाचरेत्॥ होमस्येशानदिग्भागे धा
न्योपरि शुभं घटं॥ पंचगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत्॥ क्षीरि
द्रुमकषायांश्च पंचरत्नानि निक्षिपेत्॥ वस्त्रयुग्मेन संछाद्य गंधादिभि
रथार्चयेत्॥ विष्णुं वरुणमभ्यर्च्य प्रतिमां च विधानतः॥ प्रतिमाग्रह
णः अग्रे तद्देवस्य होमविधानात्॥ चकाराच्च यत इंद्रादिभिर्मंत्रैः कुंभस
ष्ठाभिमंत्रयेत्॥ दधिमध्वाज्ययुक्तेन होमं कुर्याद्विधानतः॥ आपोहिष्ठे
तितिसृभिरप्सु मे सोम इत्यथ॥ तद्विष्णोः परमं पदमक्षीभ्यां तेथ सूक्त
तः॥ ऋग्भिराभिः प्रत्यृचं वाष्टाविंशति संख्यया॥ अशक्तश्चाष्टसंख्यं
वा दधिमध्वाज्यसंयुतं॥ आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं
॥ इति गोमुखप्रसवविधिः॥ अथ प्रयोगः॥ मासपक्षाद्युल्लिख्यास्य शि
शोरमुकर्क्षसन्निसूचितारिष्टशांत्यर्थं गोमुखप्रसवं करिष्य इत्युक्त्वा
गणेशपूजनाचार्यवरणे कुर्यात्॥ अथाचार्यः श्वेताष्टदले व्रीहिस्थप
पैरक्तवस्त्रं विन्यस्य तिलान्विकीर्य तत्र प्राङ्मुखं शिशुं संस्थाप्य वस्
त्रेणावेष्ट्य गोमुखात् प्रसवं विचिंत्य विष्णुर्योनिमिति सूक्तेन पंचग
व्येन शिशुं संस्नाप्य गवामंगेष्विति गां स्पृष्ट्वा विष्णोः श्रेष्ठेनेति शिशुं
गृहीत्वा मात्रे दद्यात्॥ माता पित्रे दद्यात्॥ पिता च मात्रे दत्वा तन्मुखं
समीक्ष्य पंचगव्येनापोहिष्ठेति तिसृभिरभिषिच्यांगादिति मूर्द्धि त्रिरव
घ्रायमात्रे दत्वा पुण्याहवाचयित्वा गामाचार्याय दत्वा ग्रहप्रीत्यर्थं गो
वस्त्रस्वर्णधान्यादि दत्वा भूयसीं दद्यात्॥ अथाचार्योऽग्निं प्रतिष्ठाप्य च
क्षुषी आज्येनेत्यंते अप आपोहिष्ठेति तृचेन अप्सु मे इत्यृचा च विष्णुत

द्विष्णोरित्यृचायस्मद्दणमक्षीभ्यामितिसूक्तेनग्रहांश्चप्रत्येकमष्टादि
संख्ययाद्धिमध्वाज्यैःशेषेणस्विष्टकृतमित्याद्युक्ताज्यभागांतंकृत्वा
ग्रैरीशान्यांकुंभंसंस्थाप्यतत्रपंचगव्यतिलव्रीहिक्षीरद्रुमकषायान्क्षि
प्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रोपरितद्विष्णोरितिविष्णोस्त्वायामी
तिवरुणस्याक्षीभ्यामितियस्मद्दणश्चप्रतिमाअभ्यर्च्यइंद्रेतिषडृचो
जप्त्वान्वाधानक्रमेणहुत्वाकर्मशेषंसमापयेदितिगोमुखप्रसवप्रयो
गः॥अथसदंतोत्पत्तिशांतिः॥विष्णुधर्मोत्तरे॥उपरिप्रथमंयस्यजा
यंतेचशिशोर्द्विजाः॥द्विजादंताः॥दंतैर्वासहयस्यस्याज्जन्मभार्गवस
त्तम॥मातरंपितरंवाथखादेदात्मानमेववा॥तत्रशांतिंप्रवक्ष्यामितांमे
निगदतःशृणु॥गजपृष्ठगतंबालंनौस्थंवास्नापयेद्विज॥तदभावेच
सर्वज्ञकांचनेचवरासने॥सर्वौषधैःसर्वबीजैःसर्वपुष्पैःफलैस्तथा
पंचगव्येनरत्नैश्चमृत्तिकाभिश्चभार्गव॥सर्वौषधानिसर्वगंधाश्चवि
नायकस्नपनविधौदर्शिताः॥स्थालीपाकेनधातारंपूजयेत्तदनंतरं
॥सप्ताहंचात्रकर्त्तव्यंततोब्राह्मणभोजनम्॥अष्टमेहनिविप्राणांत
थादेयाचदक्षिणा॥कांचनंरजतंगाश्चभुवमागारमेवतु॥दंतजन्म
निसामान्येशृणुस्नानमतःपरं॥भद्रासनेनिवेश्यैनंमूर्द्धिमूलैःफलैस्त
था॥सर्वौषधैःसर्वगंधैःसर्वबीजैस्तथैवच॥स्नापयेत्पूजयेच्चात्रव
न्हिंसोमंसमीरणं॥पर्वतांश्चतथाख्यातान्देवदेवंचकेशवं॥एते
षामेवजुहुयाद्धुतमग्नौयथाविधि॥ब्राह्मणानांतुदातव्यायथाश
क्त्यातुदक्षिणा॥ततस्त्वलंकृतंबालमासनेचोपवेशयेत्॥आसीनं
सूर्यसंतानबीजैःसुस्नापयेत्ततः॥सुविप्रबालुकानांचतैश्चकार्यं
चपूजनं॥पूज्यश्चविधिनाचार्योब्राह्मणाःसुहृदस्तथा॥इतिसदंतो
त्पत्तिशांतिः॥अथकृष्णचतुर्दशीजननशांतिः॥गर्गः॥कृष्णपक्षेच
तुर्दश्यांप्रसूतेःषड्विधंफलं॥चतुर्दशींचषड्भागांकुर्यादाद्यंशुभंस्मृतं
॥द्वितीयेपितरंहंतितृतीयेमातरंस्मृतं॥चतुर्थेमातुलंहंतिपंचमेवं
शनाशनं॥षष्ठेतुधनहानिःस्यादात्मनोवंशनाशनं॥तस्मात्सर्वप्रय
त्नेनशांतिंकुर्याद्विधानतः॥आचार्यंवरयेद्धीमान्पुत्रदारसमन्वितं॥
स्वकर्मनिरतंशांतंश्रोत्रियंवेदपारगं॥सर्वालंकारसंयुक्तंसर्वलक्षण॰

संयुतं॥ वृषभेचसमासीनंवरदाभयपाणिनं॥ शुद्धस्फटिकसंकाशं श्वेतमाल्यांबरान्वितं॥ त्र्यंबकेनचमंत्रेण पूजांकुर्याद्विधानतः॥स्था पयेच्चतुरःकुंभांश्चतुर्दिक्षुयथाक्रमं॥ पुण्यतीर्थजलोपेतान्धान्य स्योपरिविन्यसेत्॥ तन्मध्येस्थापयेत्कुंभंशुद्धिद्रुमसमन्वितं॥ पंचमृत्सं चरत्नानिपंचत्वक्पंचपल्लवान्॥ पंचधान्यंसुवर्णंचतन्मध्येविनिक्षि पेत्॥ सर्वौषधानिनिक्षिप्यश्वेतवस्त्रेणवेष्टयेत्॥ सुरभीणिचपुष्पाणि श्वेतानिपरिवेष्टयेत्॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः॥ आ यांतुयजमानस्यदुरितक्षयकारकाः॥ आवाह्यवारुणैर्मंत्रैरनेनचवि धानतः॥ इमंमेवरुणेत्यनयातत्वायामिऋचातथा॥ त्वन्नोअग्नइत्य नयासत्वन्नइतिमंत्रतः॥ आग्नेयकुंभमारभ्यपूजांकुर्याद्यथाक्रमं॥ आनोभद्राख्यसूक्तंचभद्राअग्नेश्वसूक्ततः॥ जप्त्वातुपौरुषंसूक्तंरु द्रंतुक्रमाज्जपेत्॥ ईश्वरस्याभिषेकंचग्रहपूजांचकारयेत्॥ पूजा कर्मसुनिर्वर्त्यहोमंकुर्याद्विधानतः॥ गृहादीशानदिग्भागेकुंडंकार्यं विधानतः॥ विस्तारायामखातंचअरत्निद्वयसंमितं॥ समित्सज्यचरू श्चैवतिलमाषांश्चसर्षपैः॥ अश्वत्थप्लक्षपालाशसमिद्भिःखादिरैः शुभैः॥ अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥ अष्टाविंशतिमेतेषां होमंकुर्यात्पृथक्पृथक्॥ त्र्यंबकेनमंत्रेणतिलान्व्याहृतिभिःक्रमात् ॥ कृत्वाहोमाश्चकर्तव्याअस्मदुक्तविधानतः॥ एवंक्रमेणकर्तव्यंहो मशेषंसमापयेत्॥ सर्वालंकारयुक्तानांत्रयाणामभिषेचनं॥ त्रयाणां मातापितृशिशूनां॥ चतुर्भिःकलशैरद्भिर्रुद्रकुंभसमन्वितं॥ धौतांब राणिधृत्वाथकुर्यादाज्यावलोकनं॥ पूर्णाहुतिंचजुहुयाद्यजमानःस माहितः॥ तत्सर्वंपरयाभक्त्याईश्वरायनिवेदयेत्॥ सर्वालंकारसंयुक्तां सवत्सांगांपयस्विनीं॥ प्रतिमांवस्त्रयुग्मंचआचार्यायनिवेदयेत्॥ अ न्येषांचैवसर्वेषांकुर्याद्ब्राह्मणवाचनं॥ तस्मादनेनविधिनावित्तशाठ्य विवर्जितः॥ एवंयःकुरुतेशांतिंसर्वपापैःप्रमुच्यते॥ सर्वान्कामानवा प्नोतिस्थिरजीवीसुखीभवेत्॥ इतिकृष्णचतुर्दशीशांतिः॥ अथसिनी वालीकुहूशांतिः॥ गार्ग्यः॥ सिनीवाल्यांप्रसूतास्याद्यस्यभार्यापशुस्त था॥ गजाश्वामहिषीचैवशक्रस्यापिश्रियंहरेत्॥ येसंतिसकलाःपश्वा

तत्प्रसादोपजीविनः॥वर्ज्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान्॥कुहू
प्रसूतिरत्यर्थं सर्वदोषकरी स्मृता॥यस्य प्रसूतिरेतेषां तस्यायुर्धनना
शनं॥सर्वगंडसमस्तत्र दोषस्तु प्रबलो भवेत्॥तत्र शांतिविशेषेण परि
त्यागो विधीयते॥ परित्यागात्तत्र शांतिं कुर्याद्धोमान् विचक्षणः॥परि
त्यागादिति ल्यप्लोपे पंचमी॥परित्यागं कृत्वेत्यर्थः तत्काले तत्क्षणा
द्वैन पुनरेवाऽनुलेपनं॥न त्यजेत्पंडितो मोहाद्यथाद्ज्ञानतोपि वा॥तद्दो
गं नाशयेत्किंचित्स्वयं वा नाशमश्नुते॥कल्पोक्तशांतिः कर्तव्या शीघ्रं
दोषापनुत्तये॥रुद्रः शक्रश्च पितरः पूज्याः स्युर्देवताः क्रमात्॥कर्षे
मात्रसुवर्णेन तदर्द्धार्द्धेन वा पुनः॥अथवा शक्तितः कुर्याद्वित्तशाठ्यवि
वर्जितः॥प्रतिमां कारयेच्छंभोश्चतुर्भुजसमन्वितां॥त्रिशूलखड्गवर
दाभयहस्तां यथाक्रमं॥श्वेतपुष्पांबरधरां श्वेतांबरवृषस्थितां॥त्रि
यंबकेन मंत्रेण पूजां कुर्याद्यथाविधि॥इंद्रश्चतुर्भुजो वज्रांकुशचापः
ससायकः॥रक्तवर्णो गजारूढो यतइंद्रेतिमंत्रतः॥पितरः कृष्णव
र्णाश्च चतुर्हस्ता विमानगाः॥गदाक्षसूत्रकमंडल्वभयस्यैव धारि
णः॥येसत्याइति मंत्रेण पूजां कुर्यादनंतरं॥आग्नेयीं दिशमारभ्य कुंभा
न्कोणेषु विन्यसेत्॥येसत्यासोहविरदइत्यादिमंत्र ऋग्वेदे प्रसिद्धः॥
तन्मध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं॥निक्षिपेत्पंचगव्यादींस्तत्त
न्मंत्रैश्च निक्षिपेत्॥कल्पोक्तशांतिः कर्तव्या कुर्याच्छीघ्रं स्वशक्तितः॥
गोदानं वस्त्रदानं च सुवर्णं चोर्वरां शुभां॥दशदानानि चोक्तानि क्षीरमा
ज्यं गुडं तथा॥आज्यावेक्षणपात्राणि तत्तन्मंत्रैश्च कारयेत्॥सामदा
ज्यं च होमं च तिलहोमं च सर्षपैः॥अश्वत्थप्लक्षपालाशसमिद्भिः
खादिरैः शुभैः॥अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयाद्द्विजैः॥त्र्यंबकेन
मंत्रेण तिलान् व्याहृतिभिः पुनः॥चतुर्भिः कलशैर्युक्तं बृहत्कुंभसम
न्वितम्॥शांतिवत्सकलं कार्यमभिषेकं च कारयेत्॥शांतिवत्पूर्वोक्त
शांतिवत्॥माता पितृशिशूनां च अभिषिंचेत्तु वारुणैः॥शंकरस्या
भिषेकं च कुर्याद्ब्राह्मणभोजनम्॥ अन्येषां चैव सर्वेषां ब्राह्मणानां च
तर्पणं॥यथाशक्त्यनुसारेण द्विजवाचनपूर्वकं॥ अथ प्रयोगः॥तत्र
चतुर्दश्याः षडंशेषु द्वितीयतृतीयषष्ठांशेषु जन्म चेत्तदा गोमुखप्रसवोपि

कार्यः॥ कर्त्रा मासपक्षाद्युल्लिख्यास्य शिशोश्चतुर्दश्याद्य भागादिषु सि
नीवाल्यां कुह्वां वोत्पन्नस्य सूचितस्यानिष्टस्य निरासार्थं शांतिं करिष्य
इति संकल्प्य गणेशपूजा स्वस्तिवाचन मातृपूजा वृद्धिश्राद्धाचार्यादि
वरणानि कुर्यात्॥ तत आचार्यः सर्षपविकिरणादि कृत्वा पीठादौ वरद
भयहस्तां वृषस्थां हैमीं रुद्रप्रतिमां त्र्यंबकमंत्रेण संपूजयेत्॥ सिनी
वालीकुह्वोस्तु रुद्रेंद्रपितरः॥ तत्र रुद्र ईशानोर्ध्वकरः कमाक्षिशूलख
ट्वरदाभयहस्तो वृषस्थः त्र्यंबकमंत्रेण॥ इंद्रो वज्रांकुशधनुःशरक
रो रक्तो गजस्थो यत इंद्रेति मंत्रेण पितरः कृष्णावर्णा गदाक्षसूत्रक
मंडल्वभयकरा विमानस्था ये सत्या इति मंत्रेण पूज्या इति विशेषः॥
ततस्तस्याग्न्यामीशान्यामुदीच्यां वाग्नेयादिषु चतुर्षु कुंभान् मध्ये च शत
छिद्रं संस्थाप्य तेषु पंचमृत्संच रत्नपंचत्वक्पल्लवधान्यानि सुवर्णं सर्वौ
षधीश्च क्षिप्त्वा शुक्लवस्त्रमालाभिरावेष्ट्य सर्वे समुद्रा इत्यभिमृश्य इ
मंमे वरुण तत्त्वायामि त्वन्नो अग्ने स त्वन्न इति क्रमेण वरुणमावाह्य
संपूज्य क्रमेणा नो भद्रा भद्रा अग्ने सहस्रशीर्षा कद्रुद्रायेति सूक्तानि
क्रमाज्जप्त्वा महादेवं यथाशक्ति रुद्राध्यायादिनाभिषिच्य ग्रहाना
वाह्य संपूज्य गृह्ये शान्यामग्निं संस्थाप्यान्वाद्ध्यात्॥ तत्र चक्षुषीआ
ज्येनेत्यंते चतुर्दशीप्रांतौ रुद्रमश्वत्थप्लक्षपलाशखदिरसमिद्भिरा
ज्यचरुतिलमाषसर्षपैः प्रत्येकममुकसंख्यया व्यस्तसमस्तव्याहृ
तिभिस्तिलैश्चामुकसंख्यया यस्य इत्यादि सिनीवाल्यां कुह्वां च रु
द्रमिंद्रं पितरश्च प्रधानदेवताः त्र्यंबकमंत्रेण च शान्तिकतस्तिलहोमो
धिक इति विशेषः॥ तत आज्यभागांते ऽन्वाधानोक्तक्रमेण होमः॥ सि
नीवालीकुह्वोस्तु गोवस्त्रसुवर्णभूमीराज्यगुडान् दत्त्वा गोभूतिल
हिरण्याज्यवस्त्रधान्यगुडरूप्यलवणदानानि च दश कृत्वा होमः का
र्य इति विशेषः॥ ततो बलिदानांते कलशोदकैः शतछिद्रेणाऽब्दैवत्यमंत्रैः
पत्नीशिशुसहितोऽभिषिक्तो यजमान आज्यमवेक्ष्य पूर्णाहुतिं हुत्वा गुर
वे धेनुं वासोयुग्मं कलशांश्च दक्षिणां दत्त्वा स्वस्ति वाच्य कर्मेश्वरार्प
णं कुर्यादिति कृष्णचतुर्दशीसिनीवालीकुहूशांतिप्रयोगः॥ अथ दर्शज
ननशांतिः॥ नारदः॥ अथातो दर्शजातानां मातापित्रोर्दरिद्रता॥ तद्दोष

परिहारार्थंशांतिंवक्ष्यामिनारद ॥ पुण्याहंवाचयित्वादौक्रतुसंकल्प
पूर्वकं ॥ कुंडंवामंडलंकुर्यात्तद्देशेस्थापयेत् घटं ॥ मंडलंस्थंडिलं ॥ तत्कुं
भेनिक्षिपेद्द्रव्यंदधिक्षीरघृतादिकं ॥ न्यग्रोधोदुंबराश्वत्थाः सचूताः
प्लक्षकस्तथा ॥ एतेषांवृक्षमूलानांत्वचादीन्पल्लवांस्तथा ॥ पंचरत्ना
निनिक्षिप्यवस्त्रयुग्मेनवेष्टयेत् ॥ सर्वेसमुद्राः सरितस्तीर्थानिजलदा
नदाः ॥ आयांतुयजमानस्यदुरितक्षयकारकाः ॥ आपोहिष्ठेतितच्चेना
श्चकयानश्चित्रइत्यृचा ॥ पत्निकेचेदमृचाचैवसमुद्रज्येष्ठइत्यृचा ॥ अ
भिमंत्र्योदकंपश्चादग्नेः पूर्वप्रदेशके ॥ हारिद्रंरक्तकंचैवकृष्णंश्वेतंच
जीरकं ॥ एतेषांतंदुलैश्चैवसर्वतोभद्रमुद्धरेत् ॥ दर्शस्यदेवतायाश्चसो
मसूर्यस्वरूपकं ॥ प्रतिमांस्वर्णजांनित्यंराजतींताम्रजांतथा ॥ सर्वतो
भद्रमध्येतुस्थापयेद्दर्शदेवताः ॥ ग्रहवर्णवस्त्रयुग्मंतद्वर्णगंधपुष्प
कं ॥ आप्यायस्वेतिमंत्रेणसवितायत्तथैवच ॥ उपचारैः समाराध्यत
तोहोमंसमाचरेत् ॥ कृत्वावह्निंप्रतिष्ठाप्यक्रतुसंकल्पमीदृशं ॥ आयु
रारोग्यसिध्यर्थंसर्वारिष्टप्रशांतये ॥ पुत्रस्यदर्शजननदोषनिर्हरणा
यच ॥ मातापित्रोः कुमारस्यसर्वारिष्टप्रशांतये ॥ तेषामायुःश्रियंचैव
शांतिहोमंकरोम्यहं ॥ समिधश्चचरुंद्रव्यंक्रमेणजुहुयात्कृती ॥ हुने
त्सवितृमंत्रेणसोमोधेनुश्चमंत्रतः ॥ एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरंश
तं ॥ दर्शस्यदेवताहोमअष्टाविंशतिसंख्यया ॥ होममेवंतुकृत्वाथकु
र्यादाराभिषेचनं ॥ श्रीसूक्तमायुष्यंचसमुद्रज्येष्ठइत्यृचा ॥ एतैर्मं
त्रैरभिषेकंमातापित्रोः शिशोस्तथा ॥ ततः स्विष्टकृतंदद्याद्धोमशेषंस
मापयेत् ॥ हिरण्यरजतंचैवकृष्णांधेनुंसदक्षिणां ॥ अन्येभ्योपियथा
शक्त्यादातव्यादक्षिणातथा ॥ ब्राह्मणान्भोजयेदन्न — — — का
रयेत्स्वस्तिवाचनं ॥ इतिदर्शजननशांतिः ॥ अथसिनीवालीकुह्वोर्दर्शे
चोक्तयोः शांत्योर्व्यवस्थोक्ताछंदोगपरिशिष्टभाष्ये ॥ चतुर्दश्याअं
त्योः यामयामाश्चाष्टावितिनवप्रहराश्चंद्रक्षयकालः ॥ चतुर्दश्यष्टमेयामे
क्षीणोभवतिचंद्रमाः ॥ अमावास्याष्टमेयामेपुनः किलभवेदणुरितिवा
क्यात् ॥ अत्रेंदुराद्येप्रहरेवतिष्ठतेचतुर्थभागेनकलावशिष्टः ॥ तदंतएव
क्षयमेतिकृत्स्नाज्योतिर्विदश्चक्रविदोवदंतीतिचवाक्यात् ॥ अत्रचतु

दृश्यंत्याःमाद्ययामयोरणुश्चंद्रःशास्त्रस्यचक्षुषोर्वागोचरोभवति
सकालोदृष्टचंद्रत्वात्सिनीवाली॥अमांत्योपांत्ययामयोःशास्त्रचक्षु
षोरगोचरइतिक्षीणश्चंद्रःसकालःकुहूर्मध्यमाःपंचयामादर्शइतिव्य
वस्थयाशांतिव्यवस्थेति॥परंतुचतुर्दशीमात्रयुक्तेऽहोरात्रेवर्तिन्यमा
सिनीवालीप्रतिपन्मात्रयुतेतिकुहूः॥वारत्रयस्पर्शिमध्यमाहोरात्रव
र्तिन्यमादर्शः।तस्मिंश्चतुर्दशीप्रतिपदोरभावेनोभयलक्षणानाक्रां
तत्वात्॥ ॥तथाऽवमवतीचामादर्शः।केवलचतुर्दशीकेवलप्रति
पद्युक्तत्वाभावात्॥अतस्त्रिस्पर्शिन्याममवमत्यांवासिनीवालीकुहू
शांतिप्राप्त्यभावाद्दर्शशांतिप्राप्तिरितियुक्तमाहुः॥अथदर्शजननशां
तिप्रयोगः॥कर्त्ताऽस्यकुमारस्यकुमार्यावादर्शजन्मसूचितानिष्टनिवृ
त्त्यर्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनाचार्यादि
वरणानिकुर्यात्॥अथाचार्यःसर्षपविकिरणप्रोक्षणादिकृत्वाशुद्धभू
मौजलपूर्णंपंचगव्यपल्लवत्वक्रत्नयुतंवासोयुग्मवेष्टितंकुंभंधान्यो
परिसंस्थाप्यसर्वेसमुद्राइतितीर्थान्यावाह्यापोहिष्ठेतितृचेनकया
नश्चित्रइत्यृचायत्किंचेदमितिऋचासमुद्रज्येष्ठाइतितृचेनचाभिमंत्र्य
तन्नैऋत्यदेशेपंचरंगरंजितैस्तंडुलैःसर्वतोभद्रंकृत्वातत्रस्वर्णप्र
तिमायांयेसत्यासइतिपितॄन्तद्दक्षिणेरूप्यप्रतिमायामाप्यायस्वे
तिसोमंतदुत्तरेताम्रप्रतिमायांसवितापश्चात्तादितिसूर्यंचावाह्य
संपूज्यआयुरारोग्यसिद्ध्यर्थंसर्वारिष्टप्रशांतयेऽतेषामायुःश्रियेचै
वशांतिहोमंकरोम्यहमित्युक्त्वातत्पश्चिमेकुंडेस्थंडिलेवाग्निंप्रतिष्ठा
प्यतदीशान्यांग्रहान्संपूज्यान्वाधानआघारावाज्येनेत्युक्त्वापितृ
न्समिच्चरुभ्यामष्टाविंशतिवारंसोमंसूर्यंवाऽष्टोत्तरशतवारंशेषेणे
त्याद्याज्यभागांतेऽन्वाधानक्रमेणपूजामंत्रैर्हुत्वामातापितृशिशून्
हिरण्यवर्णामितिपंचदशर्चेनायुष्यंवर्चस्यमितिदशर्चेनसमुद्रज्येष्ठा
इत्यृचाचजलधारयाभिषिच्यस्विष्टकृदादिसमापयेत्॥यजमानोब
लिदानपूर्णाहुत्यंतेहेमरूप्यकृष्णधेनूराचार्यायऋत्विग्भ्यश्चयथाश
क्तिदक्षिणांदत्वाविप्रान्संभोज्यस्वस्तिवाचनंकुर्यादितिदर्शशांतिः।घटि
कैकाचमेषांतेज्येष्ठादौघटिकाद्वयं॥तयोःसंधिरितिज्ञेयंशिशुगंडसमी

रितं॥प्रथमेचद्वितीयेचज्येष्ठर्क्षेचतृतीयके॥पादत्रयेजातनरोज्येष्ठो
ष्वत्रमजायते॥ज्येष्ठांत्यपादजातस्तुपितुःस्वस्यविनाशकः॥जायते
नात्रसंदेहोदशाह्नाभ्यंतरेतथा॥ज्येष्ठर्क्षेकन्यकाजाताहंतिशीघ्रंध
वाग्रजं॥तच्छांतिंतस्यवक्ष्यामिगंडदोषप्रशांतये॥सुदिनेशुभनक्षत्रे
चंद्रताराबलान्विते॥सूतकांतेतथाकुर्याज्ज्येष्ठाशांतिंविधानतः॥व
ज्रांकुशधरंदेवंऐरावतगजान्वितं॥कुर्याच्छचीपतिंरम्यंदेवेंद्रंसुरनाय
कं॥कर्षमात्रसुवर्णेनकर्षार्द्धेनाथपादतः॥तद्विधानंप्रकुर्वीतवित्तशा
ठ्यंनकारयेत्॥शालितंडुलसंपूर्णकुंभस्योपरिपूजयेत्॥इंद्रायेंद्रोम
रुत्वतइतिमंत्रेणवाग्यतः॥गंधपुष्पैर्धूपदीपैर्नानाभक्ष्यनिवेदनैः॥पू
जयेद्विधिनाविप्रलोकपालगणान्वितं॥रक्तवस्त्रद्वयोपेतंपूजयेत्सुर
नायकं॥तत्रसंस्थापयेत्कुंभांश्चतुर्दिक्षुविशेषतः॥तन्मध्येस्थापये
त्कुंभंशतच्छिद्रसमन्वितं॥पुष्पैरक्तसमायुक्तान्वस्त्रयुग्मेनवेष्टिता
न्॥कुंभेषुविन्यसेद्धीमान्पंचगव्यंसमंत्रकं॥पंचामृतंपंचरत्नंमृत्ति
काःपंचसंख्यकाः॥पंचवृक्षकषायांश्चपंचपल्लवकांस्तथा॥सुवर्णं
कुशदूर्वाश्चशतौषधिविनिक्षिपेत्॥पूजयेद्वारुणैर्मंत्रैःकुंभान्धीमा
न्प्रयत्नतः॥त्वन्नोअग्नेजपेदादौसत्वन्नोअग्नेद्वितीयकम्॥समुद्रज्येष्ठा
इतिचतृतीयमेगंगेचतुर्थकं॥पूजयेद्वस्त्रयुग्माढ्यैश्चतुरःकलशान
पि॥जपंकुर्युःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमाः॥आनोभद्राजपेच्चादौभद्रा
अग्नेद्वितीयकं॥इंद्रसूक्तंरुद्रजाप्यंजपंमृत्युंजयंततः॥इत्थंसंपूज्य
देवेशंवरुणंकुंभसंस्थितं॥सुसंकल्पविधानेनहोमकर्मततश्चरेत्
॥समिद्भिर्ब्रह्मवृक्षस्यशतमष्टोत्तरंतथा॥सर्पिषाचरुणाचैवमूलमं
त्रेणवाग्यतः॥हुनेज्जाप्यंचतेनैवयतइंद्रभयेतिच॥तिलान्व्याहृति
भिर्हुत्वाशतमष्टोत्तरंपृथक्॥भार्याशिशुसमोपेतंयजमानंविशेषतः
॥अभिषेकंप्रकुर्वीतसूक्तैर्वारुणसंज्ञितैः॥समुद्रज्येष्ठादिभिर्मंत्रैरिमं
मेवरुणस्तथा॥द्यौःशांतिरित्यादिभिर्मंत्रैरभिषेकंसमाचरेत्॥अभिषे
कनिवृत्तौतुयजमानःसमाहितः॥शुक्लांबराणिधृत्वाथकुर्यात्संध्यावलो
कनं॥रूपंरूपमितिमंत्रेणचित्रंतच्चक्षुरेवच॥देवतापुरतःस्थित्वाधूपदी
पनिवेदनं॥दद्याच्चाचमनंसम्यक्तांबूलार्घ्यंतथैवच॥नमस्तेसुरनाथा

य नमस्तुभ्यं शचीपते॥ गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये॥ का
र्यं तत्पूजकादीनां कारिणं यत्फलं शुभं॥ लब्ध्वा तु तत्फलं सर्वं दैवज्ञाय
समर्पयेत्॥ आचार्याय च गां दद्यात्सुशीलां च पयस्विनीं॥ रक्तवर्णां
वस्त्रयुतां सर्वालंकारभूषितां॥ वस्त्रयुग्माभिधानं च यथाविभवसा
रतः॥ यक्षगंधर्वसिद्धैश्च पूजितोसि शचीपते॥ दानेनानेन देवेश गं
डदोषं विनाशय॥ अष्टोत्तरशतं संख्यान्कुर्याद्ब्राह्मणभोजनम्॥ ते
भ्योपि दक्षिणां दत्वा प्रणिपत्य क्षमापयेत्॥ इमां कृत्वा ज्येष्ठाशांतिं
यथाविध्युक्तमार्गतः॥ गंडदोषं विनिर्जित्य आपृच्छ्यानुज्ञापयेन्नरः॥ इ
त्युक्तं वृद्धगार्ग्येण शौनकाद्यविशेषतः॥ ज्येष्ठानक्षत्रसंभूतगंडदोष
प्रशांतये॥ अज्ञानाद्यच्च वाज्ञानाद्वैकल्पाद्वाधनस्य च॥ यन्न्यूनमति
रिक्तं वा तत्सर्वं क्षंतुमर्हसि॥ अथ प्रयोगः॥ गोमुखप्रसवं कृत्वा अस्य
शिशोर्ज्येष्ठाजननसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्य
र्थं शांतिं करिष्य इति संकल्प्य। गणपतिपूजनपुण्याहवाचननांदीश्रा
द्धाचार्यर्त्विक्चतुष्टयवरणानि कुर्यात्॥ तत आचार्यः सर्षपविकिर
णभूमिप्रोक्षणे कृत्वा महीद्यौरित्यादिविधिना शालितंडुलपूर्णकुंभं सं
स्थाप्य पूर्णपात्रोपरि हैमीमिंद्रप्रतिमां इंद्रायेंद्रो मरुत्वत इति मंत्रेण र
क्तवस्त्रद्वयेन गंधादिभिश्च वाग्यतः पूजयेत्॥ तत इंद्र भित्वान्लोक
पालान्समंतादावाह्य पूजयेत्॥ ततः पूर्वादिदिक्षु चतुरः कुंभान्मध्ये
शतच्छिद्रं पुण्योदकवस्त्रमाल्ययुतं संस्थाप्य दिक्कुंभेषु पंचगव्यपंचा
मृतपंचरत्नपंचमृत्तिकापंचवृक्षकषायपंचपल्लवसुवर्णकुशदूर्वाश
तौषधीश्च दत्वा पूर्वकलशे त्वन्नो अग्न इति स त्वन्नो अग्न इति दक्षिणे
इमं मे वरुण इति पश्चिमे तत्वा यामीत्युत्तरे च वरुणमावाह्य वस्त्रपुष्पा
द्यैः पूजयेत्॥ ततश्चत्वार ऋत्विजः॥ आ नो भद्रा ने अग्ने पुरुषसूक्तं व
द्रुद्रायेति सूक्तानि जपेयुः॥ आचार्यो मूलमंत्रं इंद्रं विश्वा अवीवृधन्निति
ष्टर्वे इंद्र सूक्तं रुद्रं मृत्युंजयं च जपेत्॥ ततोग्निं ग्रहांश्च प्रतिष्ठाप्या न्वा
दध्यात्॥ अत्र प्रधानमिंद्रं पलाशसमिदाज्यचरुद्रव्यैरष्टशतसंख्य
याष्टसहस्रसंख्यया वा प्रजापतिं तिलद्रव्येणाष्टशतसंख्ययान्याहुति
भिः शेषेण स्विष्टकृतमित्यादि वल्यंते पूर्णाहुतिं पूर्णपात्रविमोकं च कु

त्वासभार्यसशिशुंयजमानंवारुणैःसूक्तैःसमुद्रज्येष्ठाइमंमेवरुण
द्यौःशांतेत्यादिभिरभिषिंचेत्॥ततोरूपंरूपमित्याज्यमवलोक्यत
त्पात्रंसदक्षिणंब्राह्मणायदत्वाइंद्रंसंपूज्यनमस्तेसुरनाथायनमस्तु
भ्यंशचीपते॥गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये॥इत्यर्घ्यंदत्वाचा
र्यर्त्विगादिभ्यःश्रेयोगृहीत्वाइंद्रायसमर्प्याचार्यायपयस्विनींगांरक्त
वस्त्रद्वयंचदत्वोत्तरपूजांतेइंद्रंविसृज्यप्रतिमां॥यक्षगंधर्वसिद्धैश्चपू
जितोसिशचीपते॥दानेनानेनदेवेशगंडदोषंविनाशय॥अज्ञानाद्वाथ
वाज्ञानाद्वैकल्याद्वाधनस्यच॥यन्न्यूनमतिरिक्तंवातत्सर्वंसंतुमर्हसी
तिमंत्रेणाचार्यायैवदत्वान्यर्त्विग्भ्योपियथाशक्तिदत्वाग्निंविसृज्याष्ट
शतंब्राह्मणान्भोजयेत्॥अथमूलशांतिः॥शौनकः॥अथातःसंप्रवक्ष्या
मिमूलजातहितायवै॥मातापित्रोर्धनस्यापिकुलज्ञातिहितायच॥या
गोवामूलजातस्यस्याददृष्टाब्दात्स्वदर्शनं॥अभुक्तमूलजातानांपरित्या
गोविधीयते॥अदर्शनाद्वापिपितुःसतुतिष्ठेत्समाष्टकं॥एवंदुहितरि
प्रोक्तंमूलजायांफलंबुधैः॥कन्यायांतुविशेषः॥नबालाहंतिमूलस्थैपि
तरंमातरंतथा॥मूलजाश्वशुरंहंतिव्यालजाचतदंगनां॥माहेंद्रजा
ग्रजंहंतिदेवरंचद्विदैवजा॥व्यालआश्लेषा॥माहेंद्रज्येष्ठा॥द्विदैवंवि
शाखा॥शांतिर्वापुष्कलाचेत्स्यात्तर्हिदोषोनकश्चनेति॥मुख्यकालप्र
वक्ष्यामिशांतिहोमजपंततः॥जातस्यद्वादशाहेचजन्मर्क्षेवाशुभेदिने
॥समाष्टकेद्वादशाब्देकुर्याच्छांतिकमादरात्॥यदैवशांतिकंकुर्यात्त
मेतत्रप्रवक्ष्महे॥संस्कृतेपुण्यदेशेतुमंडपंकारयेद्बुधः॥पुण्याभिमं
त्रितैस्तोयैःप्रोक्षितायांक्षितौततः॥तत्रोदकुंभंसुश्लक्ष्णंरक्तंव्रणविव
र्जितं॥सुवर्तुलंचनिर्णिक्तं पूरयेन्निर्मलांभसा॥वस्त्राववगुंठितंकुर्या
त्पूरयेत्तीर्थवारिणा॥कूर्चंहेमसमायुक्तंचूतपल्लवसंयुतं॥स्वस्तिकोप
रिविन्यस्यसक्षीरद्रुमपल्लवैः॥द्रोणंव्रीहीश्चनिक्षिप्यईशानेचनिधाप
येत्॥पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं॥अर्चितंपुष्पगंधाद्यैःश्री
रुद्रंचपृथग्जपेत्॥षडंगसहितंसम्यक्जपेद्वैरुद्रसंख्यया॥बह्वृचारु
द्रसूक्तैर्वाछंदोगारुद्रसामभिः॥सूक्तानिसामानिचत्रीण्येव॥कपिंजल
न्यायात्॥एकादशाष्टत्रिद्व्येकसंख्ययाशक्तितोजपेत्॥तत्राप्रतिरथंसूक्तं

शतरुद्रानुवाकके॥रुद्रानुवाकंतथापुण्यंरक्षोघ्नंचस्पृशञ्जपेत्॥त्र
यंबकंजपेल्लक्ष्यकृअष्टोत्तरसहस्रकं॥एकवारंतथाचापिपावमानीं
स्पृशञ्जपेत्॥जपस्यपंचकुंभाःस्युर्द्वयंवातद्गलाभतः॥श्रीरुद्रस्यैक
कुंभश्चसर्वसूक्तानितत्रतु॥तथान्यंचशुभंकुंभंपूर्वोक्तैर्लक्षणैर्युतं॥च
तुःप्रस्थवर्णंकुर्यात्तंचवक्त्रंतुतद्भवेत्॥अत्रायंसांप्रदायिकोर्थः॥आद्य
पक्षेषट्कुंभाः॥एकोरुद्रस्यतस्मिन्शतरुद्रियंरुद्रसूक्तानिसामानिच
जप्यानि॥अभिषेकार्थंपंचकुंभाःतत्रपूर्वादिकुंभचतुष्टयेनाप्रतिरथवि
स्यादिनाक्रमात्सूक्तचतुष्टयविधिः॥मध्येचत्र्यंबकमंत्रपावमानीज
पविधिः॥एवंपंचकुंभाशान्तौचतुःप्रस्थवर्णएकएव॥द्वयमितिद्वितं
तुरुद्रकुंभमादाय॥अतएवश्रीरुद्रस्येतिश्लोकार्द्धेनरुद्रकुंभएवपू
र्वोक्तोद्वित्वसंख्यापूरणायानूद्यते॥चतुःप्रस्थवर्णएवतुपंचकुंभ
स्थानेविधीयते॥एवंपंचवक्त्रंतुतद्भवेदितिपंचवक्त्रोक्तिरपिपंच
कुंभस्थानापत्त्यासंगच्छते॥वस्त्रावगुंठितंकुर्यात्पूरयेत्तीर्थवारि
णा॥पंचरत्नंसमादायताम्रपल्लवसंयुतं॥गजाश्वरथ्यावल्मीक
संगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत्॥
कुंभस्यनैर्ऋतेदेशेहोमदेशंप्रकल्पयेत्॥गोमयालेपितेदेशेकुर्या
त्स्थंडिलमुत्तमं॥कृत्वाग्निमुखपर्यंतमुल्लेखादिस्वशक्तितः॥पू
र्णपात्रनिधानांतंकृत्वापूजांसमाचरेत्॥नक्षत्रदेवतारूपंसुवर्णेन
प्रयत्नतः॥निष्कमात्रेणवार्द्धेनपादेनाथस्वशक्तितः॥प्रतिमांलक्ष
णोपेतांकारयित्वाविचक्षणः॥यद्वामूलंसुवर्णस्यस्थापयित्वाप्र
पूजयेत्॥मूलंमूलाकारंमूल्यमितिकेचित्पाठः॥तदाप्रतिमामू
ल्यमित्यर्थः॥सुवर्णंसर्वदैवत्यंसर्वदेवात्मकोनलः॥सर्वदेवात्म
कोविप्रःसर्वदेवमयोहरिः॥संस्मरेन्निर्ऋतिंश्यामांसुमुखंनरवाह
नं॥रक्षोधिपंखड्गहस्तंदिव्याभरणभूषितं॥प्रतिमापूजनार्थायच
स्त्रयुग्मंप्रकल्पयेत्॥पंकजंकारयेद्भूमौरक्ताभैर्व्रीहितंडुलैः॥चतु
र्विंशद्दलोपेतंशुक्लैर्वाकर्णिकान्वितं॥तस्योपरिन्यसेत्पात्रंस्वर्णंवा
रौप्यमृन्मयं॥शुद्धवस्त्रेणसंछाद्यतत्रमूलानिनिक्षिपेत्॥मूलानिश
तमूलानितानिचवक्ष्यंते॥स्वपमुस्तादयेस्मात्तोमूलानांचशतंपिता॥

मंगल्याश्चपवित्राश्चॐषध्यःकथयाम्यहं॥लक्ष्मणाशतमूलाच
शिरीषोवेतसस्तथा॥सहाकाश्वेतमूलाचविष्णुक्रांताथशंखिनी॥स
र्पाक्षीमीननेत्राचपुत्रपारीकृतांजली॥पालाशोबिल्वकश्चैवरोचना
चंदनद्वयं॥कृष्णामांसीमुरोशीरंवालकंचतथामली॥गोजिव्हातु
लसीईर्ष्याशतपुष्पीसलांगली॥ब्रह्मदंडीद्रोणपुष्पीप्रियंगुःसितस
र्षपाः॥पिप्पलीकाकजंघाचत्रायमाणाहुहूस्तथा॥ज्योतिष्मतीचगं
धारीनिर्गंधापूर्णकोशिका॥भगक्षमासुभद्राचगुडूचीसेंद्रवारुणी
॥अलंबुकारुदंतीचकदलीकेतकीतथा॥गोक्षुरंशतपर्वाचअरिष्टि
काःपराजिता॥छिन्नरुहाशतपर्वानिकुंभाचसुवर्चला॥अश्वगंधा
हस्तिकर्णाहरिद्राहितयंतथा॥उष्ट्रवोमधुकारश्चअश्वत्थोबकुल
स्तथा॥सर्पाक्षीराह्यपामार्गोमंदारश्चातिमुक्तकः॥मालतीस्वर्णपु
ष्पाचश्रीपर्णीश्रीफलंतथा॥दर्भमूलंकरवीरंमदयंतीविकंकतः
पाटलासुरदारुश्चअर्द्धसूदनिकस्तथा॥फलंमन्मथवृक्षस्यपला
शस्यचपल्लवाः॥रास्नानदीवृक्षमूलंसुरदारुविदारिका॥श्वेतवीर्या
श्वेतपाकानीलोत्पलंतथैवच॥नागकेशरसिंदूरीकुमारीचैवनिक्षि
पेत्॥तीर्थांबुपंचगव्यंचसर्वौषध्यश्चकांचनं॥यथासंभवतोवापि
ग्राह्यमूलंशतमुभं॥वीरत्वचासमेतंचशतच्छिद्रेघटेन्यसेत्॥शत
मूलाशतावरी॥वेतसोवंजुलः॥सहकासहदेवी॥श्वेतमूलापुनर्नवा।
मीननेत्रामत्स्याक्षी॥पुत्रपारापुत्रजीवा।कृतांजलीॐजलिनीहाथा
होडाइतिप्रसिद्धा।बिल्वः।चंदनद्वयंश्वेतंपीतंच॥आमलाभूम्यामल
की॥गोजिव्हागजलिंभीतिप्रसिद्धा॥लांगलीकलिहारीतिप्रसिद्धा॥
ब्रह्मदंडीअधःपुष्पी॥करंबुकःकाकजंघाकाकांगीज्योतिष्मतीकंगुका
॥गांधारीदेवगांधारी॥पूर्णकोशिकाकोशातकी॥भगक्षमाशिग्रुःसु
भद्रासारिवा।अलंबुकातुंबी॥विशाखपर्वीवचा॥अरिष्टकानागव
लोछिन्नरुहापिंडगुडूची॥शतपत्राकमलिनी।निकुंभादंतीभेदःसु
वर्चलासूर्यभक्ता।हस्तिकर्णीएरंडः।उष्ट्रवःपीलुः।मधुकारोमधूकः।स
र्गराबीजकः॥अतिमुक्तकोमाधवीमालतीजाती॥स्वर्णपुष्पाकुशली॥
श्रीफलंबिल्वं।मदयंतीयूथिका।विकंकतःस्रुववृक्षः।अर्द्धसूदनिकापा

लज्या॥मन्मथवृक्ष आम्रः॥सुरद्रुर्देवदारुः॥विदारिका भूकूष्मांडी॥श्वेत वीर्या गिरिकर्णी॥श्वेतपाका गुंजा॥शेषाणि स्पष्टानि॥विष्णुक्रांता सहदेवी तुलसी तु शतावरी॥मूलानीमानि गृह्णीयाच्छक्तः लाभे विशेषतः॥स्थापयेत्कर्णिकामध्ये वस्त्रगंधाद्यलंकृतं॥कुंभं हेमजलोपेतं कुंभौषधिसंयुतं॥कुंभोपरि न्यसेद्विद्वान्मूलनक्षत्रदेवतं॥अधिप्रत्यधिदेवौ चद्क्षिणोत्तरदेशयोः॥अधिदेवं यजेदादौ ज्येष्ठानक्षत्रदैवतम्॥उत्तराषाढऋक्षादि अनुराधांतमर्चयेत्॥ऐंद्र्यादीशानपर्यंतं पूजयेत्स्वस्वनामतः॥स्वलिंगोक्तैश्च मंत्रैश्च यथा नादींश्च पूजयेत्॥पंचामृतेन संस्थाप्य आवाह्याथ समर्चयेत्॥उपचारैः षोडशभिर्यद्वा पंचोपचारकैः॥रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः॥मेषशृंगादि धूपैश्च घृतदीपैस्तथैव च॥सुरापोलिकमांसाद्यैर्नैवेद्यैरोदनादिभिः॥मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत्॥सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं॥पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत्॥उक्ताधाद्यलाभे तु यथालाभं समर्चयेत्॥पुष्पांतं तु समभ्यर्च्य होमं कुर्याद्यथोदितं॥निर्वापप्रोक्षणादीनि चरोः कुर्याद्यथाविधि॥हविर्गृहीत्वा विधिवन्नैऋत्यं वक्र्यचाहुनेत्॥मोषुणः परापरेति यत्नेद्वीनि वा पुनः॥पायसं घृतसंमिश्रं हुनेदष्टोत्तरं शतं॥समिदाज्यचरून्पश्चाच्छ्रांतितः संख्यया हुनेत्॥अधिदैवतयोश्चापि जुहुयात्स्वस्वमंत्रतः॥चतुर्थ्यंतैर्नामैस्तैश्च स्वाहांतैः स्वस्वमंत्रकैः॥नक्षत्रदेवताभ्यश्च पायसेन तु होमयेत्॥कृणुष्वेति पंचदशभिर्जुहुयात्कृशरं ततः॥जातवेदसे नैवेद्यकमिति क्रमात्॥सीरायुंजंतिना मग्निर्वास्तोष्पत्यमिमेव च॥क्षेत्रस्य पतिना गृणानामग्निं दूतं तथैव च॥श्रीसूक्तेन तथा विद्वान्समिदाज्यचरून्क्रमात्॥अष्टोत्तरशतेनापि अष्टाविंशतिभिः क्रमात्॥अष्टसंख्यया वापि जुहुयाच्छक्तितो बुधः॥त्वन्नः सोमेन पायसं जुहुयात्तु त्रयोदश॥चतुर्गृहीतमाज्यं च यातेरुद्रेति मंत्रतः॥स्रुवेण जुहुयादाज्यं महाव्याहृतिभिः क्रमात्॥हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतीर्हुनेत्॥आचार्यो यजमानो वा अग्नौ पूर्णाहुतिं हुनेत्॥समुद्रादिति सूक्तेन प्राजापत्यऋचा तथा॥पूर्णादर्विसप्ततेरतैः पूर्णाहुतिं हुनेत्॥हो

मशेषंसमाप्याथ वन्हिमारोपयेद्बुधः॥कुंभमभिमंत्रणंकुर्याद्दक्षिणेनाभि
मर्शयेत्॥मृत्युप्रशमनार्थाय जपेत्र्यंबकंशतं॥रुद्रकुंभोक्तमार्गेण
रुद्रमंत्रंस्तुशान्जपेत्॥धूपंदीपंचनैवेद्यंकुंभयुग्मेनिवेदयेत्॥प्रसाद
येनतोदेवमभिषेकार्थमादरात्॥तस्मिन्कालेगृहातिथ्यंकर्त्तव्यंभूति
मिच्छता॥पृथक्प्रशस्तंतेनैवनक्षत्रेष्वासहैवच॥अभिषेकविधिंव
क्ष्येपूर्वोक्तार्थैरुदाहृतं॥भद्रासनोपविष्टस्ययजमानस्यऋत्विजः॥दा
रपुत्रसमेतस्यकुर्युःसर्वेभिषेचनं॥अक्षीभ्यामितिसूक्तेनपावमानी
भिरेवच॥आपोहिष्ठेतिनवभिर्यतइंद्रहवेनच॥सहस्राक्षतुवेनापि
देवस्यत्वेतिमंत्रकैः॥शिवसंकल्पमंत्रैश्च वक्ष्यमाणैश्चमंत्रकैः॥यो
सौवज्रधरोदेवोमहेंद्रोगजवाहनः॥मूलजातशिशोर्दोषंमातापित्रो
र्व्यपोहतु॥योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः॥सप्तजिह्वःसदे
वोग्निर्मूलदोषंव्यपोहतु॥योसौदंडधरोदेवोधर्मोमहिषवाहनः॥मूल
जातशिशोर्दोषंव्यपोहतुयमस्तथा॥योसौखड्गधरोदेवोनिर्ऋतीरा
क्षसाधिपः॥प्रशामयतुमूलोत्थंदोषंबालस्यशांतिदः॥योसौपाशध
रोदेवोवरुणश्चजलेश्वरः॥नक्रवाहःप्रचेताव्होमूलोत्थाघंव्यपोह
तु॥योसौदेवोजगत्प्राणोमारुतोमृगवाहनः॥प्रशामयतुमूलोत्थंदो
षंगंडांतसंभवं॥योसौनिधिपतिर्देवोगदाभृन्नरवाहनः॥मातापित्रोः
शिशोश्चैवमूलदोषंव्यपोहतु॥योऽसौपशुपतिर्देवःपिनाकीवृषवाह
नः॥आश्लेषामूलगंडांतदोषमाशुव्यपोहतु॥विघ्नेशःसोभयोदेवोपि
नाकीवृषवाहनः॥आश्लेषामूलगंडांतदोषमाशुव्यपोहतु॥सर्वदोष
प्रशमनंसर्वेकुर्वंतुशांतिदाः॥तच्छ्वयोरभिषेकंतुसर्वदोषोपशांतिदं
॥सर्वकामप्रदंदिव्यंमंगलानांचमंगलं॥वस्त्रांतरितकुंभाभ्यांपश्चा
त्तुतर्पयेद्बुधः॥ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनः॥यजमानोद
क्षिणाभिस्तोषयेदृत्विगादिकान्॥धेनुंपयस्विनींदद्यादाचार्यायसवत्स
कां॥निर्ऋतिप्रतिमांवस्त्रंकुंभंहेमचदापयेत्॥गृहार्थंवस्त्रप्रतिमांत
त्तन्होभूश्चदापयेत्॥ग्रहहोतश्चुतापयेदितिक्वचित्पाठः॥श्रीरुद्रजापि
नेदेयःकृष्णोनड्वान्प्रयत्नतः॥तत्कुंभवस्त्रप्रतिमांतस्मैदद्यात्प्रयत्नतः
॥इतरेभ्योपिविप्रेभ्यःशक्त्यादद्याच्चदक्षिणां॥उक्तालाभेतयोर्द्यादाना

र्थ्ये ब्रह्मऋत्विजां॥ तत्तन्मूल्यं प्रदातव्यं शक्त्या वा परिदापयेत्॥ आचार्यो
यत्र पट्टं तत्तदूर्ध्वं ब्रह्मणे भवेत्॥ सदस्याय न ब्रह्मणोर्द्धं ऋत्विग्भ्यश्च ततर्द्धके
॥ गृह्णीयादाशिषस्तेभ्यः प्रणम्याथ क्षमापयेत्॥ दद्याद्दत्तं पायसादि ब्रा
ह्मणान् भोजयेच्छतं॥ अलाभे सति पंचाशद्दशकं तदभावतः॥ सर्वशांते
ष्वपठनं ब्राह्मणैराशिषस्तथा॥ गृह्यसमापयेद्विप्रान् निष्कृतिः श्रीपत
मिति॥ विधाने चरितेऽस्मिंस्तु ततो शांतिर्भवेद्ध्रुवं॥ गंडांतेष्वेवमेवं स्यात्सु
ष्वाश्लेष्वेवमेव तु॥ समाष्टके द्वादशाहे कुर्याद्धि शांतिमादरात्॥ अथ मूला
श्लेषाशांत्योः प्रयोगः॥ तत्र कर्त्तोक्तकाले मासपक्षाद्युल्लिख्य मम अस्य शि
शोः कुमार्या वा मूलाद्यपादादि ब्राश्लेषांत्यपादजन्मनाऽसूचितं पित्राद्यरि
ष्टशांत्यर्थं शांतिं करिष्य इत्युक्त्वा गणेशपूजनस्वस्तिवाचनमातृकापू
जनाभ्युदयिकानि कृत्वाऽऽचार्यब्रह्मसदस्यान् ऋत्विजश्चाष्टौ षट् चतु
रो वा वृत्वा यथाविभवमर्चयेत्॥ तथा आचार्य आचार्यकर्म करिष्य इत्यु
क्त्वा यदत्र संस्थितमिति सर्षपान्विकीर्य आपो हि ष्ठेत्यादिभिर्भुवं प्रोक्ष्यैशा
न्यां मही द्यौरिति स्पृष्ट्वौषधयः समिति द्रोणपरिमितं व्रीह्यादि क्षिप्त्वा क
लशेष्विति रुद्रकुंभं संस्थाप्येमं गंगे इत्युदकेनापूर्य गंधद्वारामिति गंधं प
ॐषधीरित्योषधीरोषधयः समिति यवान् कांडात्कांडादिति दूर्वा अश्वत्थे
व इति पंचपल्लवान् रुवती भीम इति पंचत्वचः स्योना पृथिवीति सप्तमृ
दो याः फलिनीरिति फलं सहिरत्नानीति पंचरत्नानि हिरण्यरूप इति हि
रण्यं गायत्र्या गोमूत्रं पुनर्मनेति गोमयमाप्यायस्वेति पयः दधिक्राव्ण
इति दधि तेजोसीत्याज्यं देवस्य त्वेति कौशं कूर्चं मधुवातेति मधु स्वादुरि
ति शर्करां क्षिप्त्वा युवा सुवासा इति वस्त्रेण --- सूत्रेण वा कुंभकंठमावे
ष्ट्य पूर्णा दर्वीति पूर्णपात्रेण पिधाय ततः प्रागुदग्वा चतुर्दिक्षु चतुरः कुंभा
न्मध्ये चैकं कुंभं प्रत्येकं मंत्रावृत्त्या पदार्थानुसमयेन जपार्थं संस्थाप्य रुद्र
कुंभे सौवर्णप्रतिमायां त्र्यंबकं वसिष्ठो रुद्रोऽनुष्टुप् रुद्रावाहने विनियोगः
॥ त्र्यंबकमिति रुद्रमावाह्य पूजयेत्॥ ततो रुद्रकुंभं स्पृष्ट्वैकर्त्विग्यजुष
श्चेद्रुद्रैकादशिनीं बह्वृचश्चेत्त्रीणि रुद्रसूक्तानि छंदोगश्चेद्रुद्रसामानि
जपेत्॥ सूक्तसाम्नामेकाह्येकादशावृत्तिः शान्तिर्नो ज्ञेया॥ कद्रुद्राय
घोरः कण्वो रुद्रो गायत्री इमा रुद्राय कुत्सो रुद्र आद्या नव जगत्यांते त्रिष्टुभौ

आते पितर्गृत्समदो रुद्रस्त्रिष्टुप् जपे विनियोगः॥ सामानिति आ चोरा
जामंवामदेवो रुद्रस्त्रिष्टुप् तमुष्टुहि भौमो त्री रुद्रस्त्रिष्टुप् भुवनस्य पि
तर भृजिम्भा रुद्रस्त्रिष्टुप् जपे विनियोगः॥ ततोन्यकृत्विक् जपार्थं कुंभ
पंचके भा कृत्क्रमेण जपेत्॥ आमुःशिशानेति त्रयोदशर्चस्यैंद्रो प्रति
रथऋषिरिंद्रो देवता चतुर्थ्या बृहस्पतिस्त्रिष्टुप् जपे विनियोगः॥ त्वम
ग्ने रुद्र इत्यनुवाकस्य हव्यवाड् रुद्रो जगती जपे वि० त्वमग्ने वामदेवो
ग्निस्त्रिष्टुप् जपे विनियोगः। रक्षोहणमिति पंचविंशर्चस्यांगिरसः वा
युरग्निस्त्रिष्टुप् जपे० ततो मध्यकुंभे जपेत्॥ त्र्यंबकं वसिष्ठोनुष्टुप् जपे०
॥११॥ अग्ने पवमानमपि सकृज्जपेत्॥ एवं षट्कुंभाशक्तौ रुद्रकुंभ
चतुःप्रस्रवणं चेति कुंभद्वयं संस्थाप्य रुद्रैकादशिन्यादि रुद्रकुंभे जपं
स्याः प्रतिरथादीनि चत्वारि प्रस्रवणे कुंभे तक मंत्रपावमानीश्च मध्य
मुखे जपेत्॥ अथाचार्यो रुद्रकुंभान्नैरृत्ये स्थंडिलेग्निं प्रतिष्ठाप्य तदीशा
न्यां नवग्रहस्थापनं कृत्वान्वादध्यात्॥ तद्यथा॥ समिद्धूयमादायास्यां
मूलशांतौ देवतापरिग्रहार्थमन्वाधास्येऽस्मिन्नन्वाहितेग्नावित्यादि
चक्षुषी आज्येनेत्यंतमुक्त्वा नवग्रहानधिदेवताप्रत्यधिदेवतालोकपा
लान्विनायकादींश्च प्रत्येकममुकसंख्यया समिच्चर्वाज्यैर्निरृतिं प्र
ति द्रव्यमष्टोत्तरशतसंख्यया इंद्रमपश्च प्रत्येकमष्टाविंशतिसंख्य
या घृताक्तपायससमिदाज्यचरुभिर्विश्वेदेवाद्याश्चतुर्विंशत्यृसदे
वता अष्टाष्टसंख्यया पायसेन रक्षोहणं कृणुष्वेति पंचदशभिः कृश
ान्नेन सविता रं दुर्गाजातवेदाग्निं रुद्रं कृत्विक्श्रुतिं दुर्गा वास्तोष्पति
मभिंद्रे त्राधिपतिं मित्रावरुणौ अग्निमेताश्चाष्टाष्टसंख्यया कृसरा
न्नेनग्निं यंता मग्निवर्णामिति पंचदशर्ग्भिः प्रत्यृचमष्टसंख्यया समि
दाज्यचरुभिः सोमं त्रयोदशवारं पायसेन रुद्रं चतुर्गृहीतेनाज्येन अ
ग्निं वायुं सूर्यं प्रजापतिं बृहस्पतिमिंद्रं विश्वान्देवान्महाव्याहृतिभिरा
ज्येनग्नीषेण स्विष्टकृतमित्यादि सद्यो यक्ष्य इदं स तमुक्त्वा समस्तव्याहृ
तिभिः समिद्धूयमन्वादध्यात्॥ आश्लेषाशांतौ तु सर्पप्रधानदेवता
मधिदेवतां बृहस्पतिं प्रत्यधिदेवतान्पितॄन्भगाद्यदित्यसदेवताश्चे
तिविशेषः॥ ततः परिसमूहनादि पूर्णपात्रनिधानांतं कृत्वाऽग्नेः प्रागुद

ग्वारत्नैः शुक्लैर्वातंडुलैश्चतुर्विंशद्दलपद्मं कृत्वा तत्र प्राग्वत्कुंभंसंस्था
प्यतस्मिन्सप्तौषधीरितिशतमूलानि नद्वलाभे विष्णुक्रांतासहदे
वीतुलसीशतावरीकुशमूलानि क्षिप्त्वापूर्णपात्रंनिधायतत्रसाष्टद
लंवासोवितत्यतत्कर्णिकायांनिष्कंतदर्द्धमितांनिर्ऋतिप्रतिमामग्न्यु
त्तारणपूर्वकंपंचामृतस्नापितांमोषुणोघोरःकण्वोनिर्ऋतिर्गायत्रीमोषु
णइतिसंस्थाप्यसंस्पर्शेन्निर्ऋतिंश्यामंसुमुखंनरवाहनं॥रक्षोधिपं
खड्गहस्तंदिव्याभरणभूषितमितिध्यात्वातद्दक्षिणात इंद्रंवोमधुछंदा
इंद्रोगायत्रीतींद्रस्यतदुत्तरतश्चाप्सुमेमेधातिथिरापोनुष्टुविल्यपांचसो
वर्णप्रतिमेसंस्थाप्यपदार्थानुसमयेनस्वस्वमंत्रैस्ताःपूजयेत्॥तत्रव
स्त्रयुग्मं॥रक्तचंदनं॥कृष्णपुष्पाणि॥मेषशृंगस्यधूपः॥आज्यस्यदीपः
पोलिकोदनादिनैवेद्यंब्राह्मणानांसुरास्थानेसैंधवमिश्रंक्षीरंमांसस्थाने
लवणयुक्तंपायसं।सन्निपातीनांतुमुख्यमेवततःचतुर्विंशद्दलेषुप्राग
दितोविश्वेदेवाः॥विष्णुः।वसवः।वरुणः।अजैकपात्।अहिर्बुध्न्यः।पूषा।अश्वि
नौ।यमः।अग्निः।प्रजापतिः।सोमः।रुद्रः।अदितिः।बृहस्पतिः।सर्पाः।पितरः।भगः।
अर्यमा।सविता।त्वष्टा।वायुः।इंद्राग्नी।मित्र इत्येताश्चतुर्थ्यंतनमोंतैर्ना
मभिःक्रमेणावाह्यपूजयेत्॥आश्लेषाशांतौतुसर्पप्रतिमांनमोस्तुस
र्पेभ्यइत्यावाह्य।सर्पोरक्तस्त्रिनेत्रश्चद्विभुजःपीतवस्त्रकः॥फलकासं
सिधरस्त्रीस्रग्दिव्याभरणभूषितइतिध्यात्वातद्दक्षिणतोबृहस्प
तेयुक्ष्वमदोबृहस्पतिस्त्रिष्टुविति॥बृहस्पतिं॥तदुत्तरतश्चोदीरतां
शंखःस्वधास्त्रिष्टुविति पितॄनावाह्यचतुर्विंशतिदलेषुप्रागादितोभगा
द्यदित्यंतसर्वदेवताआवाह्यपूजयेत्॥ततोन्वाधानक्रमेणपायसच
रुकृसरान्श्रपयित्वाऽऽज्यभागांतंकृत्वायजमानेनसर्वदेवतोद्देशेन
द्रव्येत्यक्तेसत्तिंगन्वाधानोक्तक्रमेणसर्वदेवतांतत्तन्मंत्रैर्हुत्वारक्षोह
ग्नात्रस्यमाणर्भिर्जुहुयात्॥ताश्च।कृणुष्वेतिपंचदशर्चस्यवामदेवो
रक्षोहाग्निस्त्रिष्टुप्कृसरहोमेविनियोगः॥एवंसर्वत्र गायत्र्याविश्वामित्रः
सविता गायत्री॥जातवेदसेकश्यपोदुर्गास्त्रिष्टुप्॥त्र्यंबकंवसिष्ठोरुद्रोऽनु
ष्टुप्सीरायुंजतीबुधःक्षेत्रकृत्पुतिर्गायत्री॥तामग्निवर्णांसौभरिदुर्गाऽनु
ष्टुप्॥वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥अग्नेनयानस्त्योग्निस्त्रिष्टु

पू॥ क्षेत्रस्य वामदेवः क्षेत्रपालोनुष्टुप्॥ गृणानाजमदग्निर्मित्रावरुणौ
गायत्री॥ अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री॥ हिरण्यवर्णामिति
पंचदशर्चस्यकर्दमानंदचिक्लीतेंदिरासुताऋषयः श्रीर्देवताआद्यास्ति
स्त्रोनुष्टुभःतुर्याप्रस्तारपंक्तिः पंचमीषष्ठ्यौत्रिष्टुभौततोष्टावनुष्टुभा
वंत्याप्रस्तारपंक्तिः प्रत्यृचंसमिदाज्यचरुहोमेविनियोगः॥ त्वंनःसो
मेतित्रयोदशर्चस्यप्रगाथःसोमस्त्रिष्टुप्पायसहोमेवि०॥ मातेरुद्रेति
कश्यपोरुद्रस्वराडनुष्टुप्चतुर्गृहीताज्यहोमेवि० सप्तमहाव्याहृती
नांविश्वामित्रादयऋषयोग्न्यादयोदेवताःगायत्र्यादीनिछंदांसि
आज्यहोमेवि०॥ एवंहुत्वास्विष्टकृदादिप्रायश्चित्तांहुत्वातंक्षेत्राले
कपालनवग्रहविनायकादिभ्योनिर्ऋतीन्द्राद्योरुद्रक्षेत्रपालयोर्ब
लीन्दत्वापूर्णाहुतिंजुहुयात्॥ तत्रमंत्राः॥ समुद्रादूर्मिरित्येकादश
र्चस्यवामदेवआपस्त्रिष्टुप् अंत्याजगतीप्रजापतेहिरण्यगर्भःप्रजा
पतिस्त्रिष्टुप्॥ पूर्णादर्विविश्वेदेवाःशतक्रतुरनुष्टुप्॥ सप्तते अग्नेसप्तवा
नग्निर्जगतीपूर्णाहुतिहोमेविनियोगः॥ एवंसर्वत्र॥ ततोहोमशेषंस
माप्यप्रधानकुंभंदक्षिणतःस्पृष्ट्वाशतवारंत्र्यंबकमंत्रंजप्त्वातथैवरु
द्रकुंभंचस्पृष्ट्वोक्तरीत्यारुद्रैकादशिन्यादिजप्त्वागंधादिभिःकुंभद्वय
गतंनिर्ऋतिरुद्रावभ्यर्च्यसर्त्विगाचार्यःसर्वकुंभोदकेर्भद्रासनोपवि
ष्टंसापत्यकलत्रंयजमानमभिषिंचेत्॥ तत्रमंत्राः॥ अक्षीभ्यामितिष
ण्णांकाश्यपोयक्ष्महानुष्टुप् अभिषेकेविनियोगः सर्वमुत्तरत्र॥ पव
स्वविश्वचर्षणइतित्रिंशदृचस्यशतंवैखानसाःपवमानसोमोगायत्री
॥ आपोहिष्ठेतिनवर्चस्यांबरीषःसिंधुद्वीपआपोगायत्र्यंत्येद्वेनुष्टुभौ
पंचमीवर्द्धमानासप्तमीप्रतिष्ठा॥ यतइंद्रेतिद्वयोःसप्तर्षयोविश्वेदेवा
अनुष्टुप्सहस्राक्षेणेतितृचस्यप्राजापत्योयक्ष्मनाशनोयक्ष्महात्रि
ष्टुप्॥ द्वयोरंत्यानुष्टुप्॥ देवस्यत्वेतित्रिभिर्यजुर्भिश्च यज्जाग्रतेतिष
ण्णांशिवसंकल्पमंत्राणांप्रजापतिर्मनस्त्रिष्टुप्॥ योसौवज्रधरोदे
वोमहेंद्रोगजवाहनः॥ मूलजातशिशोर्दोषंमातापित्रोर्व्यपोहतु॥ यो
सौशक्तिधरोदेवोहुतभुङ्मेषवाहनः॥ सप्तजिह्वश्चदेवोग्निर्मूलदो
षंव्यपोहतु॥ योसौदंडधरोदेवोधर्मोमहिषवाहनः॥ मूलजातशिशोर्दो

षंमातापित्रोर्व्यपोहतु॥योसौखड्गधरोदेवोनिऋतीराक्षसाधिपः॥प्र
शामयतुमूलोत्थंदोषंगंडांतसंभवं॥योसौपाशधरोदेवोवरुणश्च
जलेश्वरः॥नक्रवाहःप्रचेताख्योमूलोत्थाघंव्यपोहतु॥योसौदेवोज
गत्प्राणोमारुतोमृगवाहनः॥प्रशामयतुमूलोत्थंदोषंबालस्यशां
तिदः॥योसौनिधिपतिर्देवःखड्गभृद्वाजिवाहनः॥मातापित्रोःशिशो
श्चैवमूलदोषंव्यपोहतु॥योसौपशुपतिर्देवःपिनाकीवृषवाहनः॥
आश्लेषामूलगंडांतंदोषमाशुव्यपोहतु॥विघ्नेशःक्षेत्रपोदुर्गालो
कपालानवग्रहाः॥सर्वेदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः॥आश्लेषा
शांतौतु॥आश्लेषाऋक्षजातस्यमातापित्रोर्धनस्यच॥भ्रातृज्ञातिकु
लस्थानांदोषंसर्वंव्यपोहतु॥योसौवागीश्वरोनामअधिदेवोबृहस्प
तिः॥मातापित्रोःशिशोश्चैवगंडांतस्यव्यपोहतु॥पितरःसर्वभूतानां
रक्षंतुपितरंसदा॥सर्पनक्षत्रजातस्यवित्तंचज्ञातिबांधवान्॥इतिवि
शेषः॥ततःतच्छुपोःशंपुर्विश्वेदेवाःशङ्करीअभिषे० ततोवस्त्रांतरित
निऋतिरुद्रकुंभोदकेनस्नापितोयजमानोधृतधौतवासाःसापत्यक
लत्रःकांस्यपात्रस्थाज्यंरूपंरूपमित्यवेक्ष्यविप्राय दत्वाचार्यादीन
भ्यर्च्याचार्याययगांब्राह्मणेवृषंसदस्यायाश्वंरुद्रजापिनेकृष्णवृषंधे
न्वायलाभेतत्तन्मूल्यंवादत्वास्वशक्त्याऋत्विग्भ्योभूयसींचदत्वो
त्तरपूजांकृत्वायांत्विति विसृज्याचार्यायनिऋतिग्रहप्रतिमाकुंभादि
रुद्रजापिनेरुद्रप्रतिमाकुंभादिसंकल्पपूर्वकंदत्वाग्निमभ्यर्च्यगच्छ
गच्छेतिविसृज्यशतंतदर्द्धंदशवाब्राह्मणान्भोजयित्वाशांत्याशीर्वा
चयित्वाथस्यस्मृत्येत्याद्युक्त्वासस्वजनोभुंजीत॥ ॥इतिश्रीभट्टनी
लकंठकृतेभगवंतभास्करेशांतिमयूखेमूलाश्लेषाशांतिप्रयोगः॥
अथवैधृतिव्यतीपातसंक्रांतिशांतिः॥शौनकः॥कुमारजन्मकाले
तुव्यतीपातश्चवैधृतिः॥संक्रमश्चरवेस्तत्रजातोदारिद्र्यकारकः॥
दरिद्राणांमहादुःखंव्याधिपीडासमुद्भवं॥अप्रियोमृत्युमाप्नोति
नात्रकार्याविचारणा॥स्त्रीणांचशोकंदुःखंचसर्वनाशकरोभवेत्॥
शांतिर्वापुष्कलाकार्यातस्यदोषोनकश्चन॥गोमुखप्रसवंकुर्याच्छां
तिंकुर्यात्प्रयत्नतः॥जपाभिषेकदानैश्चहोमादपिविशेषतः॥नवग्र

इमुखंकुर्यात्तस्यदोषोपशांतये॥प्रथमेगोमुखंजन्मततःशांतिंसमा
चरेत्॥गृहस्यपूर्वदिग्भागेगोमयेनानुलिप्यच॥अलंकृतेसुदेशेतुव्री
हिराशिंप्रकल्पयेत्॥पंचद्रोणमितंधान्यंतदर्धंतंडुलेनच॥तदर्धंतु
तिलैःकुर्यादन्योन्योपरिकल्पयेत्॥द्रव्यत्रितयराशौतुअष्टपत्रंलि
खेद्बुधः॥पुण्याहंवाचयित्वातुआचार्यंवृणुयात्पुरा॥आचारवंतधर्म
ज्ञंकुलीनंचकुटुंबिनं॥मंत्रतत्त्वार्थतत्त्वज्ञंशांतिकर्मणिकोविदं॥पंचां
गभूषणंदद्यात्सदृढस्यांगुलीयकं॥राशौप्रतिष्ठितंकुंभमव्रणंसुमनो
हरं॥तीर्थोदकेनसंगृह्यसमृदौषधिपल्लवं॥सगव्यगंधरत्नंचवस्त्रयु
ग्मेनवेष्टयेत्॥तस्योपरिन्यसेत्पात्रंसूक्ष्ममव्रणसंयुतं॥प्रतिमांस्था
पयेद्धीमान्साधिप्रत्यधिदेवतां॥चंद्रादित्याकृतीपार्श्वेमध्येवैधृति
मर्चयेत्॥एवमेवव्यतीपातेशांतौसंक्रमणस्यतु॥भानोरुत्तरतोरु
द्रमग्निंदक्षिणतोयजेत्॥निष्कमात्रेणवार्द्धेनपादेनापिस्वशक्तितः॥प्र
तिमांकारयेद्धीमान्तत्तल्लक्षणलक्षितां॥प्रतिमापूजनार्थायवस्त्रयु
ग्मंनिवेदयेत्॥अधिदेवोभवेत्सूर्यश्चंद्रस्त्वधिदैवतं॥ततोव्याहृति
पूर्वेणतत्तन्मंत्रेणपूजयेत्॥त्र्यंबकेनमंत्रेणप्रधानप्रतिमांयजेत्॥त
त्सूर्यइतिमंत्रेणसूर्यपूजांसमाचरेत्॥आप्यायस्वेतिमंत्रेणसोमपूजां
समाचरेत्॥उपचारैःषोडशभिर्यद्वापंचोपचारकैः॥अर्चित्वागंधपुष्पौ
घैःफलैर्नैवेद्यमर्पयेत्॥मृत्युंजयेनमंत्रेणप्रधानप्रतिमांस्पृशेत्॥अ
ष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥अष्टाविंशतिवाचाथपूजायांचस्व
शक्तितः॥सर्वंसौरंप्रजप्याथसोमोथसोममंत्रतः॥आनोभद्रेतिसूक्तं
चभद्राअग्नेश्चसूक्तकं॥जपेत्तुपौरुषंसूक्तंत्र्यंबकमतःपरं॥कुंभस्तु
चतुर्दिक्षुजपंकुर्युस्त्वथर्त्विजः॥कुंभस्यपश्चिमेदेशेस्थंडिलेग्निंप्रक
ल्पयेत्॥स्वगृह्योक्तविधानेनकारयेत्संस्कृतानलं॥त्र्यंबकेनमंत्रेण
समिदाज्यचरूनहुनेत्॥अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥अष्टा
विंशतिवाकुर्यात्स्वस्यशक्त्यनुसारतः॥मृत्युंजयेनमंत्रेणतिलहोमंस
माचरेत्॥ततःस्विष्टकृतंहुत्वाअभिषेकंचकारयेत्॥समुद्रज्येष्ठासू
क्तेनआपोहिष्ठेत्यृचेनच॥अक्षीभ्यामितिसूक्तेनपावमानीभिरेवच॥
त्र्यंबकेनतत्सूर्यआप्यायस्वेतिमंत्रतः॥सुरास्त्वामितिमंत्रेणअभि-

षेकंसमाचरेत्॥सुरास्त्वामभिषिंचंत्वित्यादिकोभिषेकमंत्रसमुदायो
द्भुतहोमविधानेद्रष्टव्यः॥अभिषेकाप्लुतंवस्त्रमाचार्यायनिवेदयेत्॥श्वे
तवस्त्रधरोभूत्वाभूषणाद्यैरलंकृतः॥यजमानःस्त्रियायुक्तआज्यावेक्ष
णमाचरेत्॥आचार्यंपूजयेत्पश्चाद्दत्त्वाहेमांगुलीयकैः॥गोदानंवस्त्र
दानंचस्वर्णदानंविशेषतः॥तद्दोषशमनार्थायआचार्यायप्रदापयेत्॥प्र
च्छादनपटंदद्यात्ततःशांतिर्भवेदिति॥जापकेभ्योब्राह्मणेभ्योदक्षिणाःप्र
तिपादयेत्॥दीनांधकृपणेभ्यश्चप्रदद्याद्भूरिदक्षिणां॥ब्राह्मणान्शत
संख्याकान्मिष्टान्नैर्भोजयेच्चतान्॥बंधुभिःसहभुंजीतयथाविभवसा
रतः॥एवंयःकुरुतेमर्त्योनैवदुःखमवाप्नुयात्॥आयुरारोग्यमैश्वर्यंमा
तापित्रोःशिशोरपि॥अथप्रयोगः॥कन्यागोमुखप्रसवंकृत्वामासपक्षा
द्युल्लिख्यास्यशिशोर्वैधृतौव्यतीपातेसंक्रांतौवोत्पत्त्यासूचितस्यानि
ष्टस्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमा
तृपूजानांदीश्राद्धाचार्यादिवरणानिकुर्यात्॥अथाचार्यःसर्षपविकिरणा
दिकृत्वाप्राच्यांगोमयोपलिप्तभुविपंचद्रोणतदर्धमितव्रीहितंडुलति
लानन्योन्योपरिराशीकृत्यतत्राष्टदलंविरच्यतत्कर्णिकायांकुंभंसंस्था
प्यतीर्थोदकेनापूर्यतत्रसप्तमृत्तंचपल्लवरत्नगव्याष्टगंधसर्वौषधीःक्षि
प्त्वावस्त्रयुग्मेनावेष्ट्यपूर्णपात्रंनिधायतत्रैवधृतिशांतौमध्येत्र्यंबकमि
तिरुद्रंतद्दक्षिणतउद्वयमितिसूर्यमुत्तरतआप्यायस्वेतिसोमंव्यतीपा
तसंक्रांतिशांत्योस्तुमध्येसूर्यंतद्दक्षिणतोग्निंदूतमित्यग्निमुत्तरतोरु
द्रंतत्त्वतिमास्वावाह्यषोडशभिःमंत्रैर्भिर्वोपचारैःसंपूज्यरुद्रसूर्य
सोमप्रतिमाःस्पृष्ट्वाष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्ययामृत्यु
जयमंत्रमुद्यन्नद्येत्यादिसर्वसौरमंत्रानाप्यायस्वेतिचक्रमाज्जपेत्॥
व्यतीपातसंक्रांतिशांत्योस्तुपूर्वंसौरजपस्ततोमृत्युंजयजपः॥ततो
ऋत्विजःप्रागादिदिक्षुचतुर्ष्वक्रमेणानोभद्राभद्राअग्नेसहस्रशीर्षाक
दुद्रायेतिसूक्तानिजप्त्वाआचार्यस्तुकुंभात्पश्चिमेग्निंप्रतिष्ठाप्यग्रहा
वाहनादिपूजांतंकृत्वान्वादध्यात्॥तत्रचक्षुषीआज्येनेत्यंतेरुद्रसू
र्यसोमान्समिच्चर्वाज्यैस्तत्तन्मंत्रैर्मृत्युंजयमंत्रेणचतिलाहुतिभिरष्ट
सहस्राष्टशताष्टाविंशतिअन्यतरसंख्ययाशेषेणस्विष्टकृतमित्यादि

व्यतीपातसंक्रांतिशांत्योस्तु सूर्याग्निरुद्रानिति विशेषः॥ ततआज्यभा
गांतेन्वाधानोक्तक्रमेण हुत्वा बलिदानांते कलशोदकैः समुद्रज्येष्ठाइ
ति सूक्तेनापो हिष्ठेति तृचेनाक्षीभ्यामिति सूक्तेन पावमानीभिः प्रधाना
धिप्रत्यधिदेवतामंत्रैः सुरास्त्वेत्यादि पौराणैश्चाभिषिक्तो यजमानोभि
षेकवस्त्रमाचार्याय निवेद्याज्यमवेक्ष्य पूर्णाहुतिं हुत्वाचार्याय धेनुं व
स्त्रयुग्मांगुलीयकादि ऋत्विग्भ्यश्च दक्षिणां दत्वान्येभ्यश्च भूरिदक्षि
णां दत्वा शतं शक्त्या वा ब्राह्मणान्भोजयित्वा बंधुभिः सह भुंजीतेति वै
धृतिव्यतीपातसंक्रांतिशांतयः॥ अथैकनक्षत्रजन्मशांतिः॥ गर्गः॥ ए
कस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः॥ प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेक
स्य निश्चयः॥ तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्यादभिषेचनं च॥
संपूज्य ऋक्षप्रतिमां तदग्रे दानं च कुर्याद्धि भयानुरूपं॥ तत्र शांतिं प्रव
क्ष्यामि सर्वाचार्यमतेन तु॥ शुभर्क्षे शुभवारे च चंद्रताराबलान्विते॥
रिक्ताविष्टीविवर्ज्यैतु प्रारंभे हि भवेत्सुधीः॥ आचार्यं वरयेत्पूर्वं चतुर
श्च द्विजोत्तमान्॥ पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत्॥ अग्नेरी
शानदिग्भागे नक्षत्रप्रतिमां ततः॥ तन्नक्षत्रोक्तमार्गेण अर्चयेत्कल
शोपरि॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत्॥ स्वशाखोक्तेन मा
र्गेण कुर्यादग्निमुखं ततः॥ अनेनैव तु मंत्रेण हुनेदष्टोत्तरं शतं॥ प्रत्येकं द
समिदन्नाज्यैः प्रायश्चित्तांतमेव च॥ अभिषेकं ततः कुर्यादाचार्यः पि
तृपुत्रयोः॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्ततः॥ ऋत्विजां दक्षिणां
दद्यान्माषत्रयसुवर्णकं॥ देवताप्रतिमादानं धान्यवस्त्रादिभिः सह
धानशय्यासनादीनि दद्यात्तद्दोषशांतये॥ भोजयेद्ब्राह्मणान्सर्वान्
वित्तशाठ्यविवर्जितः॥ अथ प्रयोगः॥ कर्ता मासपक्षाद्युल्लिख्यास्य
कुमारस्य पित्राद्येकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थमेकनक्षत्रशांतिं
करिष्य इति संकल्प्य गणेशपूजनस्वस्तिवाचनाभ्युदयिकाचार्य
र्त्विग्वरणानि कुर्यात्॥ अथाचार्योग्नेरीशान्यां कुंभं संस्थाप्य रक्त
वस्त्रयुग्मेनाच्छाद्य तस्मिन्पूर्णपात्रोपरि तन्नक्षत्रोक्तमंत्रेण प्रति
मायां तन्नक्षत्रं तद्देवतां चावाह्य संपूज्याग्निं प्रतिष्ठाप्यान्वाधाया
ज्यभागांतं कृत्वा तत्तन्नक्षत्रमंत्रेण समिच्चर्वाज्यानि प्रत्येकमष्टोत्त

२शतंहुत्वाहोमशेषंसमाप्य शिशुंतत्पित्रादींश्चाभिषिंचेत्॥ततस्त
तोंतरपूजांकृत्वाविसृज्यप्रतिमादिकंगवादिंचाचार्यायदत्वाऽऽर्त्वि
ग्भ्यश्च प्रत्येकंसौवर्णमाषत्रयात्मिकांयथाशक्ति दक्षिणांदत्वाय
थाविभवंयानशय्यासनादीनिचदत्वाब्राह्मणान् भोजयित्वास
यंभुंजीतेत्येकनक्षत्रशांतिप्रयोगः॥अथग्रहणोत्पत्तौशांतिः॥शौ
नकः॥ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते॥व्याधिपीडातदास्त्री
णामादौतुऋतुदर्शनात्॥इत्थंसंजायतेयस्तुतस्यमृत्युर्नसंशयः॥
व्याधिपीडाचदारिद्र्यंशोकश्चकलहोभवेत्॥शांतिंतेषांप्रवक्ष्या
मिनराणांहितकाम्यया॥यस्मिन्ऋक्षेविशेषेणग्रहणंसंप्रजाय
ते॥तदृक्षाधिपतेरूपंसुवर्णेनप्रकल्पयेत्॥यथाशक्त्यनुसारेणवि
त्तशाठ्यंनकारयेत्॥सूर्यग्रहेसूर्यरूपंसुवर्णेनविशेषतः॥चंद्रंचं
द्रग्रहेधीमान्रजतेनविशेषतः॥राहुरूपंप्रकुर्वीतनागेनैवविच
क्षणः॥शुचौदेशेप्रयत्नेनगोमयेनप्रलेपयेत्॥नागेनसीसेन॥त
स्योपरिन्यसेद्धीमान्नववस्त्रंसुशोभनं॥त्रयाणांचैकरूपाणांस्था
पनंतत्रकारयेत्॥रक्ताक्षतंरक्तगंधंरक्तपुष्पांबराणिच॥सूर्यग्रहे
प्रदातव्यंसूर्यप्रीतिकरायच॥श्वेतवस्त्रंश्वेतमाल्यंश्वेतगंधाक्षतादि
भिः॥चंद्रग्रहेप्रदातव्यंचंद्रप्रीतिकरायच॥राहवेचैवदातव्यंकृष्ण
पुष्पांबराणिच॥दद्यान्नक्षत्रनाथायश्वेतगंधानुलेपनं॥सूर्यसंपूज
येद्धीमानाकृष्णेनेतिमंत्रतः॥चंद्रग्रहेचपालाशैःसमिद्भिर्जुहुयान्न
रः॥दूर्वाभिर्जुहुयाद्धीमान्राहोःसंप्रीणनायच॥समिद्भिर्जलवृक्षो
त्थैर्भेशायजुहुयाद्बुधः॥भेशायनक्षत्राधिपतये॥आज्येनचरुणाचै
वतिलैश्चजुहुयात्ततः॥पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः॥जलै
रौषधकल्कैश्चसहितैःकलशोदकैः॥औषधकल्कैःसर्वौषधिकल्कैः
॥अभिषेकंप्रकुर्वीतयजमानेप्रयत्नतः॥मंत्रैर्वरुणदैवत्यैरापोहि
ष्ठादिभिस्त्रिभिः॥इमंमेगंगेपितरस्तत्वायामीतिमंत्रकैः॥अभिषेके
निवृत्तेतुयजमानःसमाहितः॥आचार्यंपूजयेत्पश्चात्सुशांतोनियते
न्द्रियः॥तस्मैदद्यात्प्रयत्नेनभक्त्याप्रतिकृतित्रयं॥दक्षिणाभिश्चसंयुक्तं
यथाशक्त्यनुसारतः॥ब्राह्मणान्भोजयित्वातुप्रणिपत्यक्षमापयेत्॥

तेभ्योपिदक्षिणांदद्याद्यजमानःसमाहितः॥अनेनविधिनाशांतिंकृ
त्वासम्यग्विशेषतः॥अकालमृत्युशोकंचव्याधिपीडांनचाप्नुयात्।सौ
ख्यंसौमनसंनित्यंसौभाग्यंलभतेनरः॥इत्थंग्रहणजातानांसर्वारिष्ट
विनाशनं॥कथितंभार्गवेणेदंशौनकायमहात्मने॥इतिचंद्रसूर्यग्र
हणप्रसूतिशांतिः॥अथविषघटिकाशांतिविधिः॥तत्रवृद्धगार्ग्यः।
विषनाडीषुसंजातःपितृभ्रातृधनात्मनां॥नाशकृद्दूषयत्याद्यैःक्रूर
लग्नेष्टमेपिवा॥तद्दोषपरिहारायशांतिकर्मसमारभेत्॥रुद्रोयमोपि
मृत्युश्चदेवताःपरिकीर्तिताः।सुवर्णेनयथाशक्त्यातत्तल्लक्षणसंयु
ताः॥प्रतिमाःकारयित्वातुआढकव्रीहिभिःस्थले॥स्थंडिलेपरिक
ल्प्याथकुंभमौषधिसंयुतं॥जलैःसंपूर्यसंस्थाप्यमृदादिप्रक्षिपेत्त
तः॥वस्त्रद्वयेनसंवेष्ट्यपंचरत्नानिनिक्षिपेत्॥कुंभोपरितुसंस्थाप्य
चतस्रःप्रतिमास्तथा॥तत्तन्मंत्रैश्चसंपूज्यगंधपुष्पोपहारकैः।कद्रु
द्रायेतिमंत्रेणयमायसोममित्यथ॥अग्निर्मूर्द्धेतिमंत्रेणपरंमृत्योरि
तित्वथ॥एतैश्चतुर्भिर्मंत्रैस्तुक्रमाद्वैहुनेत्तथा॥समिच्चरुघृतद्रव्यैः
प्रत्येकंचयथाक्रमं॥ऋत्विग्भिश्चसहाचार्योहुनेदष्टसहस्रकं॥अ
ष्टोत्तरशतंवाथअष्टाविंशतिमेववा॥ततस्तिलैर्हुनेद्वास्तत्तन्मंत्रै
श्चकल्पवित्॥ततोभिषिंचयेदेनंमंत्रैःपौराणिकैःक्रमात्॥प्रार्थ्यतां
भगवानीशःपिनाकीसर्वतोमुखः।तवमूर्तिप्रदानेनसमस्ताभीष्टदोभ
व॥ईषत्पीनोयमःकालोदंडहस्तःप्रशांतधीः॥रक्तदृक्पाशभृत्कृ
ष्णोमहिषस्थःशिवंकुरु॥पिंगलश्मश्रुकेशाक्षःपिंगास्यश्चतुरोरुणः।
छागस्थःसाक्षसूत्रश्चसप्तार्चिःशक्तिधारकः॥तवमूर्तिप्रदानेनमम
पापंविनाशय॥दंष्ट्राकरालवदनोनीलांजनसमाकृतिः॥वृकखड्गगदा
पाणिर्मृत्युर्मांपातुसर्वदा॥इत्थमेवंविधैर्मंत्रैर्यथाविधिसमाहितः॥
गोभूहिरण्यवस्त्रैश्चआचार्यंपूजयेत्सुधीः॥एवंकुर्यात्प्रदानेनविष
दोषःप्रशाम्यति॥इतिविषघटीशांतिः॥अथभगंडांतशांतिः॥गर्गः।
अश्विनीमघमूलादौत्रिवेदनवनाडिकाः॥रेवतीसर्पशक्रांतेमासकृ
द्रसाःक्रमात्॥अश्विनीमघमूलादौनाडिकाद्वितयंतथा॥अश्विनी
मघमूलानांपूर्वार्द्धेबाध्यतेपिता॥पूषादिसर्पपश्चार्द्धेजननीबाध्य

तैशिशो॥पितृभ्रष्वरिवाजातोराश्रिजातस्तुमातृहा॥आत्महाभ्रं
ष्यथोजातोनास्तिगंडेनिरामयः॥सर्वेषांगंडजातानांपरित्यागोविधी
यते॥वर्जयेद्दर्शनंयावद्बर्षषाण्मासिकंभवेत्॥तस्यशांतिंप्रवक्ष्या
मिसोममंत्रेणभक्तिमान्॥कांस्यपात्रंप्रकुर्वीतपलैःषोडशभिर्नवं॥अ
ष्टभिश्चचतुर्भिश्चद्वाभ्यांवाशोभनंतथा॥तन्मध्येपायसंशुभ्रंनवनीतेन
पूरितं॥राजतंचंद्रमर्चेतसितपुष्पसहस्रकैः॥देवतःक्षौमवासाश्चशु
क्लमाल्यांबरार्चितः॥सोमोहमितिसंचिंत्यपूजांकुर्यादतंद्रितः॥जपे
त्साहस्रकंमंत्रंश्रद्दधानःसमाहितः॥आप्यायस्वेतिमंत्रेणपूजांकु
र्यात्समाहितः॥दद्याद्दक्षिणामिष्टांगंडदोषप्रशांतये॥शुक्लांवागी
श्वरंचैवताम्रपात्रसमन्वितं॥गंडदोषोपशांत्यर्थंदद्याद्दैवविद्भुविः
॥इतिभगंडांतशांतिः॥अथदिनक्षयादिशांतिः॥गर्गः॥दिनक्षयेव्य
तीपातेव्याघातेविष्टिवैधृतौ॥मूलेगंडेतिगंडेचपरिघेयमघंटके॥का
लदंडेमृत्युयोगेदुष्टयोगेसुदारुणे॥तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्य
दिजायते॥अतिदोषकरीप्रोक्तातत्रपापयुतेसति॥विचार्यतत्रदैवज्ञं
शांतिंकृत्वायथाविधि॥यजमानोदेवतानांग्रहाणांचैवपूजनं॥दीपं
शिवालयेभक्त्याघृतेनपरिदापयेत्॥अभिषेकंशंकरस्यअश्वत्थस्य
प्रदक्षिणं॥आयुर्वृद्धिकरंजाप्यंसर्वारिष्टविनाशनं॥गुरुदेवतविप्रा
णांपूजनंगोश्चवर्द्धनं॥पुष्ट्यायुस्तुष्टिशांत्यर्थमभीष्टफलसिद्धये॥
सर्वारिष्टहरार्थायग्रहयज्ञंसमाचरेत्॥शिवापविधिवद्भक्त्यादीपदा
नंकरोतियः॥अखंडेगोघृतेनैवसवैमृत्युंजयेन्नरः॥विष्णुमूर्तिंमहापु
ण्यमश्वत्थंश्रीकरंसदा॥प्रदक्षिणंनरोभक्त्याकृत्वामृत्युंजयेन्नरः
॥सर्वसंपत्समृध्यर्थंनित्यंकल्याणवृद्धये॥अभीष्टफलसिध्यर्थंकु
र्याद्ब्राह्मणभोजनं॥अभिषेकंशिवेशांतिंकृत्वाभक्त्यानरोत्तमः॥अका
लमृत्युनिर्जित्यदीर्घायुर्जायतेनरः॥गाणपत्यंपुरुषसूक्तंसौरंमृत्युं
जयंशुभं॥शांतिजाप्यंरुद्रजाप्यंकृत्वामृत्युंजयोभवेत्॥मूलेवासर्पे
गंडेवाकुर्यादेतानियत्नतः॥आयुर्वृद्धिकरार्थायगंडदोषप्रशांतये॥इ
तिगर्गोक्तगंडजननशांतिः॥अथत्रिकशांतिः॥शांतिसर्वस्वे॥सुतत्रये
सुताचेत्स्यात्तत्रयेवासुतोयदि॥मातापित्रोःकुलस्यापितदानिष्टंमह

द्भवेत्॥ ज्येष्ठनाशो धनेहानिर्दुःखंवासुमहद्भवेत्॥ तत्रशांतिंप्रकुर्वीत वित्तशाठ्यविवर्जितः॥ जातस्यैकादशाहेवाद्वादशाहेशुभेदिने॥ आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरःसरं॥ सहवाग्रहयज्ञःस्यात्स्वस्यवित्तानुसारतः॥ ब्रह्मविष्णुमहेशेंद्रप्रतिमाःस्वर्णतःकृताः॥ पूजयेद्धान्यराशिस्थकलशोपरिशक्तितः॥ पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया॥ रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः॥ द्विजएकोजपेद्धोमकालेश्रुचिःसमाहितः॥ आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चरुं॥ अष्टोत्तरसहस्रंवाशतंवाविंशतिंतुवा॥ देवताभ्यश्चतुर्वक्त्रादिभ्योग्रहपुरःसरं॥ ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभजामहे॥ ततःस्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः॥ अभिषेकंकुटुंबस्यकृत्वाचार्यंप्रपूजयेत्॥ हिरण्यंधेनुरेकाचऋत्विजांदक्षिणाततः॥ प्रतिमागुरवेदेयाउपस्कारसमन्विताः॥ कांस्याज्यवीक्षणंदत्वाशांतिपाठंतुकारयेत्॥ ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत्॥ एवंशांतिविधानेनसर्वारिष्टंविलीयते॥ इतित्रिकशांतिः॥ अथप्रसवैकृतशांतिविधिरुच्यते॥ अकालप्रसवानार्यःकालातीतप्रजास्तथा॥ विकृतप्रसवाश्चैवयुग्मप्रसवनास्तथा॥ अमानुषाअखंडाश्चअजातव्यंजनास्तथा॥ हीनांगाअधिकांगाश्चजायंतेयदिवास्त्रियः॥ पशवःपक्षिणश्चैवतथैवचसरीसृपाः॥ विनाशंतस्यदेहस्यकुलस्यचविनिर्दिशेत्॥ निर्वासयेत्तांनृपतिःस्वराष्ट्रात्स्त्रियश्चपूज्याश्चततोद्विजेंद्राः॥ चिकित्सनेब्राह्मणतर्पणेश्चततोस्यशांतिंसमुपैतिपापं॥ अथयमलशांतिविधिः॥ अत्रब्राह्मणं तदाहुर्यआहिताग्निर्यस्यभार्यागौर्वायमौजनयेत्कातत्रप्रायश्चित्तिरिति॥ सोग्नयेमरुत्वतेत्रयोदशकपालंपुरोडाशंनिर्वपेत्तस्ययाज्यानुवाक्येमरुतोयस्यहिक्षयेराड्वेदृचरमाअहेवसाहुतिंवाहवनीयेजुहुयादग्नयेमरुत्वतेस्वाहेतिसातत्रप्रायश्चित्तिरिति॥ कारिका॥ अथयस्यवधूर्गौवाजनयेद्वैयमौततः॥ समरुत्वाग्नयेकुर्यात्पूर्णाहुतिमथापिवेति॥ अथप्रथमदिनादिषुदेवीगृहीतवालकरक्षणं॥ मदनरत्नेयोगसागरे॥ प्रथमेहनिगृण्हातिबालकंबालिनीग्रही॥ पाथिनीग्रहीतिनारायणीयेपाठः॥ गंधिनीतिग्रंथांतरे॥ तयाग्र

हीतमात्रस्य चेष्टितान्युपलक्षयेत्॥गात्रोद्वेगो निराहारो बालग्रीवा
निवर्त्तनं॥लिंपेत्तथातकीलोध्रमंजिष्ठातालचंदनैः॥धूपयेन्महिषाक्ष
णा ततो मुंचति सा ग्रही॥लेपनधूपने बालस्य नारायणीये बलिस्नाना
वृत्तौ॥मत्स्यमांससुराभक्ष्यगंधाःस्रक्धूपदीपकैः॥बलिं दद्यादिति
शेषः॥बलिमंत्रः॥प्रयोगसारे॥ॐनमश्चामुंडे भगवति विद्युज्जिह्वे
ह्रां२ह्रीं२अपसरंतु दुष्टग्रहा हुं॥तद्यथा गच्छंतु यातान्यतः स्थाने रुद्र
ज्ञापयति स्वाहा॥विद्युज्जिह्वे ह्रां ह्रीं हुं हुं मुंच मुंच स्वाहेति॥बालग्रह
णां विद्येयं शस्ता बलिनिवेदने॥बलिश्च रवे रुदये स्ते दिनाद्दैवादेयः
॥बलिस्थानानि प्रयोगसारे॥कदंबश्च करंजश्च विनीतो निंबएव च॥
अश्वत्थोदुंबरश्चैव श्लेष्मातकवटौ तथा॥मातृरक्षाः क्रमेणोक्ताः पूर्वा
दीशांतदिग्गताः॥तेषामेकं समाश्रित्य बलिं दद्याद्यथोदितमिति॥प्रति
स्थूलं प्रत्युदकं प्रतिवृक्षमथापि वा॥स्थूलं तटं॥क्वचित्तु कूलमित्यपपा
ठः॥अत्राशायामनूक्तायां प्राक्प्रोक्ताशानुसारतः॥यत्र वा रोचते तत्र
मातृणां बलिमाहरेत्॥कृत्वा नीराजनं तं बलिमिति विधिवद्बालमा
हूय संस्पृश्याङ्गिस्ततः सर्वगात्रं शिरसि सकुसुमैरक्षतैर्भ्रामयित्वा॥दि
त्वाग्रे देवतायाविधिवदुपहितैस्तत्र गीतैः सुमंत्रैः कुर्याद्रक्षां समीरस्पृश
णमिव विलयं याति दुष्टग्रहार्त्तिः॥नीराजनमंत्रो द्वारो नारायणीये॥ब्र
ह्मा विष्णुश्च रुद्रश्च स्कंदो वैश्रवणस्तथा॥रक्षंतु त्वरितं बालं मुंच मुंच
कुमारकं॥कल्पगुणोत्तरे॥पलाशाश्वत्थकपित्थबिल्वोदुंबरपल्लवाः
पंचभंगाः स्मृता ह्येते बालानां हितकारकाः॥स्नापितं भूषितं बालं त
तो मुंचति सा ग्रही॥प्रयोगसारेपि॥पलाशोदुंबराश्वत्थबिल्वन्यग्रोध
पल्लवाः॥क्वथितेन कषायेन परिषिंचेत्स शांतये॥परिषिंचेत्स्नापयेदिति
मदनः॥अत्र मंत्रः॥ॐनमश्चामुंडे इत्यादिर्बलिदाने पूर्वमुक्तः॥रक्षाम
त्रः प्रयोगसारे॥रक्ष रक्ष महादेव नीलग्रीव जटाधर॥ग्रहैस्तु सहितो र
क्ष मुंच मुंच कुमारकं॥अमुं मंत्रं भूर्जपत्रे विलिख्य तत्पत्रं भुजे बध्नीया
दिति मदनः॥बालकशिरवास्पर्शपूर्वकं जपेन्मंत्र उक्तः॥प्रयोगसारे॥ॐ
सर्वे मातर इमं ग्रहं संहरंतु हुरोदय॥२॥स्फोटय२॥स्वाहा गर्ज२॥सर
हल२आग्नेय२हिम२हन॥एवं सिद्धिं रुद्रो ज्ञापयति स्वाहा॥अत्र होमो

क्रिभृयोगसारे।ॐकूष्मांडि भगवतिसुरागिणिसमुड्डिनेमुंच२ह्रह्र२पचस२२ग
ह्रस्वाहा२।कृत्वाचतुष्पथेकुंडंमंत्रेणानेनमंत्रवित्॥त्रिरात्रंपंचरात्रंवास
हस्रंजुहुयात्तिलैः॥यांतिदुष्टग्रहाःशांतिंबलिनाचाऽनुमोदिताः॥बाल
रोदनपरिहारार्थंयंत्रमुक्तंप्रयोगसारे॥षडस्रमध्येह्रींकारस्तन्मध्ये
शिशोर्नामविलिख्यषट्सुअस्रेषुॐलुलुवस्वाहेतिमंत्रस्यषडक्षरा
णिविलिख्यतद्बहिर्नेमिवह्नितयंविलिख्यतद्बहिरधोमुखेरर्दचंद्रेरावे
ष्ट्यपंचोपचारैःसंपूज्यबालहस्तेबध्नीयादिति॥अथबालग्रहस्तवःप्र
योगसारे॥प्रणम्यशिरसाशांतंगणेशानंतमीश्वरं॥बालग्रहस्तवंव
क्ष्येसमस्ताभ्युदयप्रदं॥तपसायशसादीप्त्यावपुषाविक्रमेणच॥नि
र्दिष्टोयःसदास्कंदःसनोदेवःप्रसीदतु॥रक्तमाल्यांबरधरोरक्तगंधानु
लेपनः॥रक्तादित्योज्ज्वलःशांतःसनोदेवःप्रसीदतु॥योनंदनःपशुपतेर्भ
र्तृणांपावकस्यचागंगोमाकृत्तिकानांचसनोदेवःप्रसीदतु॥देवसेनाप
रिवृतोदेवसेनार्चितःसदा॥देवसेनापतिःश्रीमान्सनो०॥शक्तिःशक्तिध
राभूरःकुमारःशिखिवाहनः॥सुरारिहामहासेनःसनो०॥प्रकृत्यासुंद
रोदांतोदैवैश्चर्यौदयान्वितः॥नानाविनोदसंपन्नःसनो०॥प्रबोधासुप्र
बोधाचबोधनासुप्रबोधना॥प्रबुद्धाचप्रबोधाचसुप्रीतासुमनास्तथा
॥मनोन्मनीतिविख्यातायोगिन्यःपातुबालकं॥सुप्रतारुक्मिणीचैवमं
दवेगाबिभीषणा॥विद्युज्जिह्वामहानासाशतानंदातथापरा॥बाल
दाप्रमदाचेतियोगिन्यःपांतुबालकं॥हरिणीचाथवाराहीवानरीक्रोष्टु
कीतथा॥कुबेरीकोटराक्षीचकुंभकर्णाचचंडिनी॥बलाहिकारिणीचे
तियोगिन्यःपांतुबालकं॥प्रबुद्धाविमुद्धाप्रहृष्टाचयोगासिद्धामितंवदा॥
सुभगासुभदागौरीबलाविकरणीतिच॥नानाविज्ञानविख्यातायोगि
न्यःपांतुबालकं॥लंबाप्रलंबाचतथालंबकर्णाचलंबिका॥ज्वालाकरा
लीकालिंदीकालिकेतियथोदिताः॥स्वच्छंदाचारसंपन्नायोगिन्यःपांतु
बालकं॥प्रणीतासुप्रणीताचमालिनीविश्वमालिनी॥विमलाकमलाऽ
मालीलोलारौद्रीचविश्वदा॥विचरंत्योयथाकामंयोगिन्यःपांतुबालकं
॥वायुवेगामहावेगासुवेगावेगवाहिनी॥शशिनीहंसिनीहर्षिःपुष्टिःपौ
ष्टिकसिद्धिदा॥दिव्यानुभाववाहिन्योयोगिन्यःपांतुबालकं॥भ्रमिनी

भामिनी नित्या निर्भिन्ना सुभगा गुहा॥ क्लेदिनी द्राविणी बाणा योगिन्यः पांतु बालकं॥ रुद्रशक्तिविनिष्क्रांता मेकाशीतिक्रमोदितं॥ योगिनीवृंदमेतद्धि सिद्धविद्याधरार्चितं॥ स्कंदग्रहाधिदेवं तद्बालकं पातु सर्वदा॥ शकुनी रेवती देवी शिखा च मुखमंडिका॥ अलंबा पूतनाख्या च कटपूतनिका पुनः॥ विजया गोमुखी धूम्रा मुंडमाला तथापरा॥ अधोलंबा च पद्मा च कुमुदा व्यय चांबिका॥ भामिनी चैव काली च देवी प्रेतमुखी तथा॥ ऐंद्री मार्जारिका भूयः कुरुणी च शुभाननाकृशा॥ कालरात्रिश्च माया च लोहिता पिच्छिपिंछिका॥ भीतारणी चक्रवादा भीषणा दुर्जया परा॥ तापनी कटकोली च मुक्तकेशी महाबला॥ अहंकारी जया तद्वद् जमेधा त्रिदंडिका॥ शंखनी मुकुटा भिख्या ललाटा पिंगला तथा॥ शीतला बालिनी चैव तापसी पापराक्षसी॥ मानसा धनदा देवी वला नावर्त्तिनी तथा॥ यमुना जातवेदा च मानिनी कलहंसिनी॥ बालिका देवदूती च वायसी यक्षिणी तथा॥ स्वच्छंदा पालिका चैव वासिनी चांबिके निचये पंचाशच्च कुलोत्पन्नाश्च तुष्विसमीरिताः॥ योगिन्यो नित्यसंतुष्टाः स्कंदापस्मारदेवताः॥ नानारक्षाधिकारस्था बालकं पांतु सर्वदा॥ महालक्ष्मी महातंगा महासेना महाबला॥ महाकंपा महाभीमा महातेजा महोत्सवा॥ महासेना महाचंडा मोहिनी वीरनायका॥ एकवीरा विशालाक्षी सुकेशी सुमनास्तथा॥ सुकेशिनी वसंतुष्टा दंडिनी च विलंबिनी॥ भामिनी चाथ सौवर्णी सिंहवक्त्रा कटंकिनी॥ भ्रमरा चंचला चंपा सिद्धिदा च तथापरा॥ शांतोदरी धृतिः स्वाहा स्वधाख्या च सनातनी॥ शंबरा च तथा देवी नीलग्रीवा तथांबिका॥ वितलागंधिनी वामा क्रोडुंती चैव वाहिनी॥ कर्षिणी मालती फुल्ला कारुकर्णी च चंडिका॥ चित्रानना गुहा चैव निपावेनी संगतिर्गता॥ पंचाशन्नव संपन्ना शकुनी दैवतप्रिया॥ योगिन्यः कामरूपिण्यो बालकं पांतु सर्वदा॥ विश्वतपा प्रभावज्ञा सर्वज्ञा सर्वगा गुहा॥ दुर्गा सरस्वती ज्येष्ठा श्रेष्ठा पद्मापरा॥ प्रमदा रोहिणी प्रीता प्रह्वी प्रह्लादिनी विभा॥ विभूतिर्विततिः प्रीतिः प्रकृतिः प्रमतिः पथ्या॥ एता भगवतः सप्त योगिन्यो योगसिद्धिदाः॥ पंचविंशतिराख्याता रेवती शक्तिगोचरा॥ जगदाप्यायनकरा बालकं पांतु सर्वदा॥ नरश्चैवोपनंदश्च गोमतिः सुमतिस्तथा॥ विद्युज्जिह्वो महाकालः

कुमूलस्तिमिलोचनः॥तेजहोडाविरूपाक्षोगोमुखोवडवामुखः॥काला
ननःकरालश्चशंकुकर्णोविभीषणः॥एतेशकुंदनोत्पन्नावीराःषोडशरा
क्षसाः॥पूतनादेवतास्तुष्टाबालकंपांतुसर्वदा॥वज्रिणीशक्तिनीचाद्या
दंडिनीखड्गिनीतथा॥पाशिनीध्वजिनीदेवीगदिनीशूलिनीपरा॥पविनी
चक्रिणीचेतिसर्वाकाराभयप्रदाः॥एतादिङ्भिर्मितादेव्योयोगिन्योदेवकी
र्त्तिताः॥अधिभूतप्रधानायापायात्साशंतपूतना॥प्रसन्नामातरःसर्वाः
बालकंपांतुसर्वदा॥अर्थकोजलकोभूमाउग्रःस्कंदश्चकीर्त्तितः॥वीरेशाः
पितृभिःस्रष्टानेजमेषाधिदेवताः॥पंचशक्तिप्रधानास्तेबालकंपांतुसर्व
दा॥आदित्यावसवोरुद्राःपितरोमरुतस्तथा॥मुनयोमनवःकालाग्रह
योगाःसनातनाः॥सिद्धाःसाध्याश्चगंधर्वादेव्यश्चाप्सरसांवराः॥विद्या
धरामहादैत्याबालकंपांतुसर्वदा॥सहजायोगजाश्चैववीरजामंत्रजात
था॥योगिन्योयोगवनितानानाविभवगोचराः॥भवानीनामसंतुष्टाबाल
कंपांतुसर्वदा॥भूर्लोकेचभुवर्लोकेस्वर्लोकेयाश्चमातरः॥अधश्चोर्ध्वंच
तिर्यक्चक्रीडंत्योऽनंतमूर्त्तयः॥प्रसन्नयोगसंपन्नादिव्यैश्वर्यसमन्विताः
॥स्वच्छंदपदसंभूतैर्भैरवैःपरिवारिताः॥रक्षंतुबालकंप्रीताःशांतिनैवतु
चेतसा॥दिव्यंस्तोत्रमिदंपुण्यंबालरक्षाधिकारकं॥जपेत्संतानरक्षार्थं
बालद्रोहोपशांतिदं॥इतिबालस्तवः॥इदंचस्तवांतंकृत्यमाद्यमासव
र्षयोर्द्वितीयादिदिनमासवर्षेष्वपिकार्यंविशेषस्तूच्यते॥कुमारतंत्रे॥प्र
थमेदिवसेमासेवर्षेवायोगिनीतदा॥अथवानंदिनीनाम्नापूतनाक्रमतेः
शिशुं॥तद्गृहीतस्यबालस्यज्वरःस्यात्प्रथमंततः॥गात्रशोषश्चवैवर्ण्यं
नाहारेच्छाभृशंभवेत्॥छर्दिर्मूर्छाचकंपश्चहीनज्वरपुनस्तथा॥विधा
नंतत्रवक्ष्यामियेनमुंचतिपूतना॥नदीमृत्तिकयाकुर्याच्छोभनांपुत्रिकांत
तः॥शुक्लोदनंशुक्लगंधस्तथाशुक्लानुलेपनं॥शुक्लपुष्पाणिवैपंचध्वजाः
पंचप्रदीपिकाः॥स्वस्तिकाःपंचपूर्वाण्हेपूर्वस्यांदिशिसंपतः॥बलिंद
द्याद्धोश्वेतसर्षपोशीरमेववा॥शिवनिर्माल्यमार्जारनृकेशान्निंबप
त्रकं॥गव्यंघृतंचेत्येतेनधूपयेच्चैवबालकं॥एवंदिनत्रयंकृत्वाचतुर्थे
शांतिवारिणा॥स्नापयेद्बालकंपश्चाद्भोजयेच्चापिभिक्षुकं॥क्षीरेणभो
जयेद्देवंसुस्थोभवतिबालकः॥शांतिवारिणेतिशन्नइंद्राग्नीशन्नोवा

तइत्यादिकैःस्वस्वशाखापठितैर्मंत्रैरभिमंत्रितंवारिशांतिवारि॥अथ
वावक्ष्यमाणमंत्रेणशतकृत्वोभिमंत्रितंवारिशांतिवारि॥द्वितीयदिव
सेमासेहायनेवासुनंदना॥गृण्हातिपूतनाबालंयोगिनीस्वस्तनापि
बा॥ततोभवेज्ज्वरःपूर्वंसंकोचोहस्तपादयोः॥दंतान्खादत्यनिशं
निमीलयतिचक्षुषी॥आहारंचनगृण्हातिदिवारात्रंचरोदिति॥अक्षि
रोगंकुर्द्दनंचभवेद्भीतिःपुनःपुनः॥कृशत्वंचप्रजायेतइत्येतच्छिशुल
क्षणं॥तंडुलप्रस्थपिष्टेनविनिर्मायाथपुत्रिकां॥त्रयोदशध्वजादीपाः
स्वस्तिकायवलोदना॥प्रस्थप्रमाणपिष्टेनसिद्धापूपाश्चमत्स्यकाः॥मां
संचैतेनतदखिलंपश्चिमायांदिशिक्षिपेत्॥पश्चिमायांचसंध्यायामेत
द्व्यादिनत्रयं॥धूपशांतिस्नानब्राह्मणभोजनानिपूर्ववत्॥तृतीयेदिव
सेमासेवर्षेवापूतनाभिधा॥गृण्हीयाद्योगिनीबालंततःपूर्वंज्वरोभवे
त्॥प्रस्थप्रमाणपिष्टेनपुत्रिकांकारयेत्ततः॥रक्तोदनंध्वजौरक्तःस्व
स्तिकोरक्तएवच॥रक्तपुष्पंरक्तगंधस्तथारक्तानुलेपनं॥पश्चिमायां
चसंध्यायामुदीच्यांनिक्षिपेद्बलिं॥धूपशांतिस्नानब्राह्मणभोजनानि
पूर्ववत्॥चतुर्थेह्निमासेतुवर्षेगृण्हातिबालकं॥तुषमंडनिकानामपू
तनाख्याथयोगिनी॥भीषणास्यातततस्तस्यजायतेप्रथमंज्वरः॥गात्र
भंगोस्थितिर्मूर्छावैवर्ण्यंचाक्षिमीलनं॥वैकल्यंश्यामताश्वासःकासो
रुचिरितीरितं॥तिलपिष्टमयींकृत्वापुत्रिकांबिल्वकंटकैः॥अष्टांगंरच
येत्सुष्ठुयुक्तंशुक्लध्वजोर्जुनः॥स्वस्तिकोर्द्धप्रस्थसिद्धंभक्तंतावदपूप
काः॥त्रिसंध्यंपश्चिमाशायांबलिंदद्यात्प्रयत्नतः॥तावदपूपकाइति
अर्द्धप्रस्थपरिमितेनान्नेनकृताइत्यर्थः॥गोश्रृंगंसर्पनिर्मोकंलशुनंनिं
बपत्रकं॥मनुष्यकेशमार्जारलोमान्याज्यघृतंतथा॥एतैश्चधूपयेद्दे
कनिशिसंध्यात्रयेपिच॥एकनिशिएकस्मिन्नेवदिनेबलिरित्यर्थः॥शां
तिस्नानमंत्रब्राह्मणभोजनानिचपू०॥पंचमेदिवसेमासेवर्षेवापूतना
शिशुं॥विडालिकाख्यागृह्णीयात्प्रथमंजायतेज्वरः॥हिक्काश्वासश्चशू
लंचगात्रभंगोरुचिस्तथा॥तंडुलप्रस्थपिष्टेननिर्मायाथोरुपुत्रिकां॥शु
क्लोदनंध्वजाःपंचस्वस्तिकाःपंचचोज्वलाः॥पंचदीपास्तथाशुक्लानिकुसु
मानिचचंदनं॥अपराण्हेवृक्षमूलेपश्चिमायांदिशिक्षिपेत्॥धूपस्तु

शृंगलशुनमित्यादिकः॥ शांतिस्नानमंत्रब्राह्मणभोजनानि॥ षष्ठेह्नि
षष्ठमासे हायनेचापिबालकं॥ पूतनाशकुनिर्नामगृण्हीयात्तदनंतरं
॥ज्वरउद्वेजनंगात्रेशोषःश्वासोरुचिस्तथा॥ काशश्चहस्तपादाक्षिसं
कोचश्चेतिलक्षणं॥ तंडुलप्रस्थपिष्टेन विनिर्मायाथपुत्रिकां॥ कृष्णोद
नंध्वजाःपंचकृष्णाःस्वस्तिकपंचकं॥ कृष्णमेवाथमत्स्यांश्चपायसंदु
ग्धमेवच॥ मांसंचापूपकास्तद्वत्प्रस्थपिष्टविनिर्मिताः॥ अपराण्हेप
श्चिमायांनिक्षिपेद्बलिपुत्रिकां॥ पुत्रिकांपूर्ववत्कृत्वापललंमूलपाचि
तं॥ मत्स्याःपर्पटिकाश्चैवरक्तंचप्रस्थसंमितं॥ उदीच्यांपूर्वसंध्यायां
बलिर्देयःप्रशांतये॥ अत्रबलिदानयोर्विकल्पः॥ तयोरेवकालयोर्बाल
कस्यधूपोदेयःगोशृंगलशुनमित्यादिकः॥ तथाशांतिस्नानंब्राह्मणभो
जनंच॥ बलिदानपूजायांमंत्रस्तु॥ ॐ फट् फट् स्वाहा॥ सप्तमेदिवसे
मासेवर्षेवाशुष्करेवती॥ गृण्हातिपूतनाबालंततःस्यात्प्रथमंज्वरः।
गात्रभंगोश्रुविद्वेषआहारेकंपरोदने॥ इत्येतल्लक्षणंतत्रबलिर्देयः
प्रशांतये॥ प्रस्थसम्मितपिष्टेनसम्यक्कृत्वाथपुत्रिकां॥ सप्तध्वजाः
सप्तदीपाःस्वस्तिकाःसप्तवैतथा॥ पुष्पाणिमत्स्यमांसंचभक्तंचैत्युद
गाहरेत्॥ धूपस्तुगोशृंगलशुनमित्यादिकः॥ शांतिस्नानंब्राह्मणभो
जनं॥ मंत्रस्तु॥ ॐ ह्रीं फट् स्वाहा॥ अष्टमेदिवसेमासेवर्षेचाक्रमतेशि
शुं॥ बिडालिकानामधेयापूतनास्यन्ततोज्वरः॥ गात्रभेदोत्ररुदितंरोद
नंनेत्रमीलनं॥ जिव्हाशोषःशिरस्फोटआहारद्वेषएवच॥ असिरोगो
भवेदेतद्दिंगितंतन्मुहुर्मुहुश्चिह्नशोः॥ तंडुलप्रस्थपिष्टेनपुत्तलांकारयेत्ततः।
पायसंमधुसर्पिश्चक्षीरलाजाश्चशष्कुली॥ गुग्गुलुंमेषमांसंचतथापर
र्पटिकाअपि॥ ध्वजादीपाश्चचत्वारोगंधानानाविधाअपि॥ सुमनांसि
चरक्तानीत्येवंमंत्रोदितोबलिः॥ अमुंसमाहरेत्पूर्वसंध्यायांदक्षिणा
दिशि॥ कृष्णाष्टम्यांवक्ष्यमाणमंत्रेणानेनसंयतः॥ ॐ नमोनारायणा
यत्रैलोक्यविद्रावणाय॥ ॐ ह्रीं फट् स्वाहा॥ अनेनैवचमंत्रेणपूजादि
बलिहरणांतंकर्मकुर्यात्॥ धूपस्तुगोशृंगलशुनमित्यादिकः॥ शांतिस्ना
नंब्राह्मणभोजनंच॥ अत्रकृष्णाष्टम्यांबलिहरणमितिननियमार्थं॥ किं
तुसतिसंभवेप्राशस्त्यार्थं॥ अन्यथातत्प्रतीक्षायांशिशुविनाशापत्तेः॥

नवमे दिवसे मासे हायने वापि बालकं॥ गृण्हाति मदनानाम्नी पूतना॥
हनंतरं॥ ज्वरश्छर्दिर्ब्रणा ध्मानं कासश्वासश्च तृष्णता॥ गात्रभंगश्च
शूलं च चिन्हान्येतानि बालके॥ मसूरमात्रेण पिष्टेन विनिर्मायपुत्र
त्रिकां॥ ओदनं मत्स्यमांसं च पर्पटीं चेक्षु शूलिकां॥ निक्षिपेत्पूर्वसंध्या
यामुत्तरस्यां बलिं दिशि॥ अत्र मंत्रः॥ ॐ नमो भगवते वासुदेवाय रक्ष
ष्यामंडले बलिमादाय हर हुं फट् स्वाहा॥ धूपस्तु गोश्रृंगलशुनमित्या
दिकः॥ शांतिस्नानं ब्राह्मणभोजनं च॥ दशमे दिवसे मासे हायने वापि
बालकं॥ पूतना रेवती नाम्नी गृण्हीयाद्बालकं ततः॥ ज्वरश्छर्दिः कास
श्वासौ शूलं चेत्येतदीरितं॥ यत्नेष्टेषु ततो यं बलिर्देयो विचक्षणैः॥
मसूरप्रमाणपिष्टेन पुत्रिकां तत्र कल्पयेत्॥ अष्टांगलेखयेत्तत्र बिल्व
वृक्षस्य कंटकैः॥ गुडौदनं च सर्पिश्च ध्वजानां पंचविंशतिः॥ स्वस्तिका
नां प्रदीपानां पंचविंशतिरेव च॥ चत्वारि रक्तपुष्पाणि होत दक्षिणदिग्
तः॥ संध्यात्रये वक्ष्यमाणमंत्रेणानेन निक्षिपेत्॥ ॐ नमो भगवते वा
सुदेवाय हन हन हुं फट् स्वाहा॥ धूपो गोश्रृंगलशुनमित्यादिकः॥ शांति
स्नानं ब्राह्मणभोजनं च॥ एकादशदिने मासे हायने पूतनार्चिका॥ गृ
ण्हाति बालकं पश्चाज्ज्वरस्तस्य प्रजायते॥ अन्नद्वेषो मुखे शोषो गा
त्रभंगश्च रोदनं॥ ऊर्ध्वदृष्टिरथीत्येतल्लक्षणं तद्ग्रहाच्छिशोः॥ पुत्रिका
माषपिष्टेन रचिता शुक्लमोदनं॥ पुष्पाण्यपि च शुक्लानि ध्वजानां पंच
विंशतिः॥ स्वस्तिकानां प्रदीपानां पंचविंशतिरेव च॥ एतत्सर्वं पमाश
पां संध्यायां प्रातराहरेत्॥ अत्र मंत्रः॥ ॐ नमो भगवते नारायणं ब्रह्म
सवज्रहस्ताय ज्वलदुग्रग्रहाय ॐ फट् स्वाहा॥ धूपस्तु गोश्रृंगलशु
नमित्यादिकः॥ शांतिस्नानं ब्राह्मणभोजनं च॥ प्रथमदिवसमासव
र्षग्रहीन पूतना हरोक्तं द्रष्टव्यं॥ द्वादशे दिवसे मासे वर्षे या पूतना शि
शुं॥ अद्भुताख्या प्रगृण्हाति ज्वरः स्यात्प्रथमं ततः॥ रोदनं सर्वदा दंत
खादनं रक्तनेत्रता॥ रोमांचस्ताप इत्येतदखिलं तस्य लक्षणं॥ तंडुल
मस्य पिष्टेन कृत्वा तन्मास पुत्रिकां॥ त्रयोदश स्वस्तिकाश्च ध्वजादीपा
स्त्रयोदश॥ अपूपा मत्स्यमांसं च तथा पर्पटिकापि॥ एतत्सर्वं दक्षि
णस्यां दिशि मंत्रेण निक्षिपेत्॥ मंत्रस्तु॥ ॐ नमो नारायणाय ज्वलव

ग्रहस्तायहरहरशोषय२मर्दय२पातय२हनहनदुष्टसत्वान्हुं
फट्स्वाहा॥गोशृंगमित्यादिकोधूपः॥शांतिस्नानंब्राह्मणभोजनंच
॥अथबौधायनोक्ताज्वराद्युत्पत्तौशांतयः॥प्रतिपदिकष्टंसंदेहो
वादिनान्यष्टादश॥अग्निर्देवता अग्निरस्मीतिपूजामंत्रः॥हैमीप्रति
मा॥घृतधूपोघृतदीपश्च॥यथासंभवंनैवेद्यंघृतंहोमद्रव्यंशांति
र्भवति॥अत्रसर्वत्रप्रथमंतत्तत्तिथिदेवतामंत्रजपः॥सहस्रादि
संख्याकःपश्चात्पूजाहोमदानादिहोमसंख्याचाष्टोत्तरशतादिर्बो
धितारतम्येनकल्प्या॥सहस्रमृत्युनिर्देशोद्वितीयायांदिनानिषोड
शब्रह्मादेवताब्रह्मजज्ञानमितिजपपूजाहोममंत्रः॥अगुरुर्धूपःघृ
तदीपःसर्वत्रशर्करानैवेद्यंतिलयवाज्यानिहोमद्रव्यंप्रतिमाचहैमी
॥तृतीयायांदिनानिनवपार्वतीदेवतागौरीर्मिमायेतिमंत्रः॥दूर्वाभिः
पूजाकुंकुमधूपः॥गुग्गुलुर्वाधूपोघृतदीपः॥द्राक्षासौराज्यंनैवेद्यं॥
पायसंमधुराक्तदूर्वाश्चहोमद्रव्यंप्रतिमाहैमी।चतुर्थ्यांदिनानिषो
डशगणपतिर्देवतागणानांत्वेतिपूजाहोमादिमंत्रः॥हैमीप्रतिमाकुं
कुमंरक्तचंदनंगंधःकरवीरादीनिपुष्पाणिअगुरुर्धूपोघृतदीपोल
ड्डुकाइक्षुखंडानिनैवेद्यंनारिकेरशकलानिकदलीफलानिचहोम
द्रव्यं॥पंचम्यांदिनान्येकविंशतिर्नागादेवताःहैमीप्रतिमानमोस्तु
सर्पेभ्यइतिमंत्रः॥चंदनंगंधःसुरभिपुष्पाणिघृतधूपःपयोनैवेद्यंति
लयवाज्यपायसशर्करामधूनियथायोगंहोमद्रव्यं॥षष्ठ्यांदिनानि
द्वादशस्कंदोदेवताइस्मश्चस्कंदेतिपूजामंत्रः॥पीतंचंदनंरक्तंवागं
धःरक्तानिपुष्पाणिजातीपुष्पाणिवा॥जटामांसीधूपः॥लड्डुकादिनै
वेद्यंफलानिवातिलयवाज्यंहोमद्रव्यंहैमीप्रतिमाशांतिर्भवति॥स
प्तम्यांदिनान्यष्टौदिननाथोदेवता॥आसत्येनआकृष्णेनेतिवामंत्रः
हैमीताम्रजावाप्रतिमाकुंकुमंगंधःकरवीरादीनिपुष्पाणिगुग्गुलोधूपः
शर्कराघृतसंयुतपायसंनानाफलानिचनैवेद्यंअर्कसमिधःपायसंहो
मद्रव्यं॥अष्टम्यांदिनानित्रयोदशईश्वरोदेवतातमीशानमितिपूजा
मंत्रः॥राजतीप्रतिमाकर्पूरमिश्रितंचंदनंगंधःबिल्वदलानिअर्कपु
ष्पाणिनीलोत्पलानिचपुष्पाणि॥जटामांसीधूपःपायसंनानाभक्ष्याश्च

नैवेद्यंमधुरान्नास्तिलाहोमद्रव्यंसांगशांतिर्भवति॥नवम्यादिना न्यष्टादशभगवतीदुर्गादेवता॥जातवेदसइतिपूजामंत्रः॥हैमीप्र तिमारक्तचंदनंगंधःकुंकुमादिकंवा॥जपाकुसुमादिकंपुष्पंगुग्गुल धूपःघृतपक्वंनैवेद्यंत्रिमधुरान्नंपायसंहोमद्रव्यंदेव्यैरुधिरक्तपात्र दानंतद्भक्तायवा॥दशम्यादिनानिपंचविंशतिःयमोदेवताहैमीलो हीवाप्रतिमायमायत्वेतिपूजामंत्रः॥चंदनमृगमदश्चगंधःमधुसर्जे रसश्चधूपःतिलतैलदीपः॥बिल्वपत्राणिकृष्णतिलाश्चपूजाद्रव्यं कृशरान्नं नैवेद्यंघृतंमधुतिलमुद्गाहोमद्रव्यं॥एकादश्यादिनानि सप्तविश्वेदेवादेवताविश्वेदेवासइतिमंत्रःहैमीप्रतिमाश्वेतचंदन गंधः कृष्णागुरुधूपःघृतदीपःतुलसीपत्राणिपूजायावमोदकंनैवे द्यंतिलयवमध्वाज्यंहोमद्रव्यं॥द्वादश्यादिनानि दशरुद्रोदेवताया तेरुद्रेतिमंत्रः॥हैमीप्रतिमाचंदनंश्रीखंडंअगुरुधूपोघृतदीपःपाय संनैवेद्यंचंपकंपुष्पंकमलंवापूजायांतिलयवाज्यव्रीहिमधूनिहोम द्रव्यंशांतिर्भवति॥त्रयोदश्यादिनान्यष्टौशशीदेवतारौक्मीराजती वामूर्त्तिःआप्यायस्वेतिमंत्रः॥पूजादौश्वेतचंदनंगंधःचंदनधूपः घृतदीपःदधिशर्करानैवेद्यंतिलयवास्त्रिमध्वक्ताहोमद्रव्यंशांतिर्भ वति॥चतुर्दश्यादिनानिद्वाविंशतिःशंभुर्देवताशंभवायेतिमंत्रः॥रौ क्मीराजतीवामूर्त्तिःश्वेतचंदनंगंधःअर्कपुष्पंबिल्वदलानिवाअगु रुधूपःपायसंनैवेद्यंत्रिमध्वक्तास्तिलाहोमद्रव्यं॥अमायांदिनान्य ष्टादशशचीदेवताहोतायक्षदितिमंत्रः॥हैमीप्रतिमाकुंकुमादिगंधः नानासुगंधपुष्पाणिकृष्णागरुधूपःफेणिकापूरिकादिनैवेद्यंशर्क राघृतपायसंहोमद्रव्यं॥पूर्णिमायांदिनानिषोडशचंद्रोदेवतादमन कंपूजार्थमन्यत्सर्वंत्रयोदशीशांतावुक्तंग्राह्यं॥इतितिथिदोषशांतिः ॥अथाश्वलायनोक्तावारशांतिः॥आदित्यवारस्यरुद्रोदेवतायाते रुद्रेतिमंत्रः हैमीराजतीवामूर्त्तिःचंदनंगंधःअगुरुधूपःघृतदीपःपा यसंनैवेद्यंहोमद्रव्यंच॥सोमवारस्यपार्वतीदेवतागौरीर्मिमायेतिमंत्रः हैमीराजतीवामूर्त्तिःकुंकुमगंधःसुगंधिपुष्पं॥अगुरुधूपःघृतदीपःना नाभक्ष्याणिनैवेद्यंतिलयवाहोमद्रव्यंदेवभक्तसंतर्पणंच॥भौमस्यस्कं

होदेवतान्यत्सर्वंषष्ठीशांतिवत्॥बुधवारस्यविष्णुर्देवताविष्णोरराट
मसीतिमंत्रः॥हैमंस्वरूपंपीतचंदनंपीतपुष्पाणिकमलानिचअ
गुरुर्धूपोघृतदीपः यवलड्डुकानैवेद्यंतिलयवाज्यहोमः॥गुरुवासर
स्यब्रह्मादेवताब्रह्मजज्ञानमितिमंत्रः हैमीप्रतिमाकुंकुमगंधःपर्ण
पुष्पंगुग्गुलुधूपःशर्कराज्यंनैवेद्यंतिलयवधानाघृतंहोमद्रव्यं॥शु
क्रवासरस्यइंद्रोदेवतात्रातारमिंद्रमितिमंत्रःहैमीराजतीवामूर्त्तिःचं
दनंगंधःचंपकंपुष्पंअगुरुधूपःघृतपक्वंनैवेद्यंतिलयवाज्यमधूनिहो
मद्रव्यं॥शनिवासरस्ययमोदेवतायमेनदत्तमितिमंत्रःहैमीलौहीवा
मूर्त्तिः॥ताम्रजेतिकेचित्चंदनगंधःपुष्पंकृष्णंमधुधूपःतिलतैलदी
पः॥मधुमत्स्याज्यनैवेद्यंतिलामधुचहोमद्रव्यंशांतिर्भवति॥इतिवा
रशांतयः॥अथनक्षत्रशांतयः॥वृद्धवसिष्ठः॥रोगशांतिंप्रवक्ष्यामिरो
गार्त्तानांशरीरिणां॥बलिपूजाग्रहोमैश्चजपब्राह्मणभोजनैः॥यस्मि
न्धिष्ण्येयदानृणांरोगःसंजायतेतदा॥तद्धिष्ण्यपूजाकर्त्तव्यातत्तदी
श्वरतुष्टये॥सुवर्णेनप्रमाणेनतदर्द्धार्द्धेनवापुनः॥धिष्ण्येशप्रतिमा
कल्प्यायथावित्तानुसारतः॥ईशान्यामथवाप्राच्यामुदीच्यांदिशि
संलिखेत्॥तंडुलोपर्यष्टदलंपद्मंगोमयमंडले॥पंचामृतैःसलिलैश्च
तत्तन्मंत्रैःपृथक्पृथक्॥स्नाप्यकल्पोक्तमंत्रेणप्रतिमांस्थापयेत्पुनः
॥कर्णिकायांसुसंस्थाप्यध्यात्वादेवंसमर्चयेत्॥तद्वर्णवस्त्रगंधा
द्यैरक्तधूपोपहारकैः॥आरक्तवर्णंकुंभंचपंचत्वक्पल्लवैर्युतं॥शुक्ल
वस्त्रस्वर्णरत्नसर्वौषधिसमन्वितं॥मृत्स्नंचगव्यसद्बीजफलक्षौद्रकु
शान्वितं॥देवस्यपूर्वतःस्थाप्यंजलमंत्रैःसमर्चयेत्॥प्रतीच्यांस्थंडि
लेवन्हिंविधिवत्स्थापयेत्ततः॥मुखांतेजुहुयाद्युक्तद्रव्येणाष्टसहस्र
कं॥तिलहोमंव्याहृतिभिरष्टोत्तरसहस्रकं॥पूर्णाहुतिंचजुहुयात्सम्य
क्जपादिपूर्वकं॥ततःशुद्धोपविष्टस्यरोगिणःप्राङ्मुखस्यच॥मंत्रपूतैः
कुंभजलैरब्लिंगैर्वारिमंत्रकैः॥मार्ज्जनंकारयेत्तस्यसम्यक्संकल्पपू
र्वकं॥नीराजनंचमुद्रात्मापूजास्थानंसमागतः॥देवंहुताशनंभक्त्या
प्रणम्यप्रार्थयेदिति॥अमृतोद्भवधिष्ण्येशपतस्त्वंशंकरात्मकः॥रोगा
दस्मात्त्वमांरक्षतववश्यश्चधिष्ण्यपः॥इतिप्रार्थ्यततोदद्यात्प्रतिमांच

स्त्रसंयुतं॥दक्षिणासहितं भक्त्या आचार्याय कुटुंबिने॥ब्राह्मणा
यथाशक्त्या ब्राह्मणान् भोजयेत्ततः॥कृत्वा नक्षत्र पूजां तां तिथिवासर
योरपि॥सर्वान्कामानवाप्नोति रोगी रोगात्प्रमुच्यते॥अश्विन्यामुत्थि
तो व्याधिर्नवरात्रेण मुंचति॥देवस्य त्वेति मंत्रस्य गायत्री कश्यपोऽश्वि
नौ॥श्वेतवर्णौ सुधापूर्णकलशांभोजधरौ पृथक्॥चंदनोत्पलपुष्पा
ज्यगुग्गुलौ तु गुडप्रियौ॥क्षीरलड्डुकभोक्तारौ समिधः क्षीरवृक्षजाः॥
गुडोदनबलिं दद्याद्दीपैः सार्द्धनि शामुखे॥भरण्यामुत्थितो व्याधिर
त्रिरात्रिं धनप्रदः॥मासेन मुंचत्यथवा दैवस्य कुटिला गतिः॥त्र्यंब
कस्य मंत्रस्य प्रोक्तामुष्टुं दर्षिं देवता॥गंधो गरुकरवीरं पुष्पं धूपश्च गु
ग्गुलः॥अष्टरी पंच सर्वेषां नैवेद्यं च गुडोदनं॥पाशदंडधरो रक्तस्त्व
ज्यमध्वाक्षते हविः॥महिषीनायकारूढः क्षेसरान्नं बलिं हरेत्॥यस्य
मायेन मंत्रेण बलिं सम्यक्प्रदापयेत्॥कृत्तिकासूत्थितो व्याधिर्दश
रात्रेण मुंचति॥स्रुक्स्रुवा भयवरदः स्वर्णो मेषवाहनः॥मेधातिथि
र्जगत्यग्नीपुनंतु मामित्यस्य च॥चंदनं यूथिकापुष्पं घृतदीपः सगुग्गु
लुः॥नैवेद्यं तिलमाषान्नं वरकान्नेन संयुते॥गुडोदनं हविस्तत्र पायसे
न बलिं हरेत्॥रोहिण्यामुत्थितो व्याधिर्दशरात्रेण मुंचति॥नमो ब्र
ह्मणमंत्रस्य गायत्री विधिरीश्वरः॥मुक्कुः कमंडलुस्त्वक्षसूत्रं भयव
रप्रदः॥चंदनं कमलपुष्पं सदशांगं च गुग्गुलं॥नैवेद्यं पायसं साज्य
सर्वेदा तेहि विर्भवेत्॥दधिक्षीरघृतक्षौद्रशाल्यन्नेन बलिं हरेत्॥चंद्र
मेचोत्थितो व्याधिः पंचरात्रेण मुंचति॥गदावरदपाणिश्च श्वेतो सौर
थवाहनः॥नवो नवो भवत्यस्य गायत्री गौतमः शशी॥चंदनं कुमुदं
पुष्पं दशांगं पायसोदनं॥नैवेद्यं मंडकापूपघृतक्षौद्रसमन्वितं॥शर्क
रादधिमिश्रेण सक्तान्नेन बलिं हरेत्॥आर्द्रायामुत्थितो व्याधिरत्रि
रात्रिं धनप्रदः॥मासेन मुंचत्यथवा दैवस्य कुटिला गतिः॥शुद्धस्फटि
कसंकाशः शूलखड्गाभयेष्टदः धनधः शंकरायेत्यस्य बृहतीशो विधी
ऋषिः॥चंदनं सौरभं पुष्पं दशांगं पायसोदनं॥समध्वाज्यं हविस्तत्र
दध्योदनबलिं हरेत्॥पुनर्वसौ भवेद्व्याधिर्नवरात्रेण मुंचति॥कमंडल
सूत्रे धारणौ स्रुक्स्रुव भूसुरः॥अदितिर्द्यौरस्य मंत्रस्य त्रिष्टुभौह

हिणोद्दितिः॥ हरिद्राकुंकुमंगंधंपुष्पंसेवंतिकाह्वयं॥धूपोमलयजं
पिष्टंघृतान्नंपीतवर्णकं॥घृताक्ततंडुलहविः पीतान्नेनबलिंहरेत्
॥पुष्येसमुत्थितोव्याधिःसप्तरात्रेणमुंचति॥पीतोदंडकमंडलुवस
सूत्राभयवरोद्यतः॥बृहस्पतेपरीत्यस्यत्रिष्टुप्जीवोंगिरऋषिः॥
कुंकुमंवारिजंपुष्पंनैवेद्यंघृतपायसं॥मंडकागुडसंयुक्तमेतदेवहवि
र्भवेत्॥समंडकघृतान्नेनबलिंतत्रप्रदापयेत्॥आश्लेषासूत्थितो
व्याधिःक्लेशान्मासेनमुंचति॥नमोअस्त्वितिमंत्रस्यविराडग्निश्वस
र्पाट्॥मधुवर्णोभोगयुक्तःखड्गचर्मधरःशुभः॥सकुंकुमागरुगंधः
पुष्पंचागस्तिसंभवं॥घृतगुग्गुलधूपोत्रनैवेद्यंक्षीरसर्पिषा॥हविः
साज्यंमुदध्यन्नंदध्योदनबलिंहरेत्॥मघायांचोत्थितोव्याधिरचिरा
न्निधनप्रदः॥अथवासार्द्धमासेनधूम्रोदंडपवित्रधृक्॥आयंतुनस्त्वि
तिचास्यजगतीपितरोक्षजः॥चंदनंचंपकंपुष्पंधूपःसघृतगुग्गुलः
नैवेद्यंघृतपिष्टान्नंतिलाज्यंसघृतंहविः॥सतिलान्नंचमुद्गान्नंब
लिंचपितृतृप्तये॥पूर्वाफाल्गुनभेव्याधिरर्द्धमासेनमुंचति॥भगए
वभगवानित्यस्यानुष्टुप्भगोविधिः॥यथाभयकरःपद्मवर्णःसिंहा
सनेस्थितः॥चंदनंमालतीपुष्पंबिल्वदीपोघृतोदनं॥नैवेद्यंशर्करापू
पलड्डुकामिश्रसंयुतं॥घृतोदनंहविस्तत्रपायसेनबलिंहरेत्॥अर्य
मर्क्षेभवेद्व्याधिरर्द्धमासेनमुंचति॥पद्मवर्णःपद्मसंस्थःपद्मगर्भसम
द्युतिः॥अर्यमायातिमंत्रस्यअर्यमात्रिष्टुवज्वनः॥कर्पूरंकुंकुमंगंधं
पुष्पंधूपकसंज्ञकं॥घृतगुग्गुलधूपोत्रनैवेद्यंघृतपायसं॥होमद्रव्यं
घृतान्नंस्याच्छाल्यन्नेनबलिंहरेत्॥हस्तेसमुत्थितोव्याधिर्नवरात्रे
णमुंचति॥उदुत्यमितिहिरण्यस्तूपोगायत्र्यादितिर्जपेत्॥रक्तगंधं
कुंकुमंचपुष्पंराजीवसंज्ञकं॥सगंधगुग्गुलोधूपोनैवेद्यंघृतपायसं
॥मधुपुष्पंतिलाज्यान्नंदूर्वाभिःसहितंहविः॥गुडशर्करमध्वाज्यपि
ष्टान्नेनबलिंहरेत्॥चित्रायामुत्थितोव्याधिर्दशरात्रेणमुंचति॥विश्वदे
वानामित्यस्यत्वष्टानुष्टुप्पितामहः॥अक्षसूत्राभयकरश्चित्रवर्णः
शिवेरतः॥सकुंकुमागरुगंधकुसुमंचित्रवर्णकं॥नैवेद्यंमोदकान्नाज्यं
चित्रान्नंसघृतंहविः॥तदन्नेनबलिंदद्यात्सर्वरोगापनुत्तये॥स्वात्यृक्षे

चोत्थितो व्याधिः सर्वदा निधनप्रदः॥ एकाह्नि त्रिचतुःपंचमासैर्वा विमि
मुंचति॥ त्वनःपितेति मंत्रस्य गायत्री मरुद्गिराः॥ खड्गचर्मधरः कृ
ष्णो गंधः कृष्णागरुर्भृशं॥ पुष्पं दमनकं धूपः चंदनागुरुगुग्गुलुः॥ नै
वेद्यं पायसं साज्यं हविस्तेन बलिं हरेत्॥ द्वितैवभे भवेद्व्याधिर्मासैके
केन मुंचति॥ इंद्राग्नी आगतमिति गायत्री वास्य चैव हि॥ मधुकं इन्
षींद्राग्नीनयोर्ध्यानं च पूर्ववत्॥ श्रीखंडं कुंकुमं गंधं तयोः पुष्पं सरोरुहं
देवदारुस्तयोर्धूपो — नैवेद्यं घृतपायसं॥ तदेवान्नं हविस्तत्र चित्रा
न्नेन बलिं हरेत्॥ मित्रभे चोत्थितो व्याधिर्दशरात्रेण मुंचति॥ मित्रस्य
चर्षणीरेति गायत्री चास्य चैव हि॥ ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रो
धिदेवता॥ द्विभुजः पद्मगर्भाभः पद्मभृत्पद्मसंस्थितः॥ कुंकुमं पुंडरी
काख्यं पुष्पं धूपं च चंदनं॥ नैवेद्यं पायसं साज्यं हविः कंदं च सूरणं॥ ब
लिस्तत्र प्रदातव्यो मधुशर्करपायसं॥ घृतपूरकमाषान्नं मुद्गगर्भैश्च
संयुतं॥ ज्येष्ठायामुत्थितो व्याधिर्मृत्युरेव न संशयः॥ अथवा मासमे
केवा मुंचत्येव न संशयः॥ इंद्रं च इति मंत्रस्य गायत्रीज्ञो गिराऋषिः॥
इंद्राय पूर्ववद्गंधं चंदनं कुसुमं शुभं॥ कर्पूरधूपो नैवेद्यं चित्रान्नं सुमनो
हरं॥ हविस्तु सूरणं कंदं मधुकं दं सुपायसं॥ विचित्रपुष्पगंधेन दध्यन्ने
न बलिं हरेत्॥ मूलभे चोत्थितो व्याधिर्मासार्द्धेन विमुंचति॥ खड्गचं
र्मधरः कृष्णः करालवदनः प्रभुः॥ मोषुणोस्य च गायत्री घोरः कण्वोऽथ
नैरृतिः॥ गंधः कृष्णागरुः पुष्पं पद्मं नीलोत्पलं शुभं॥ धूपः कृष्णाग
रुर्माषमिश्रान्नमुपहारकं॥ तदेवान्नं हविस्तत्र माषान्नेन बलिं हरे
त्॥ वारिभे चोत्थितो व्याधिरोगिणो निधनप्रदः॥ विमुंच सथवा मा
सैर्द्वित्रिषड्वसप्तभिः॥ आप्यायस्वेति मंत्रस्य गायत्री पद्मजो जलंगु
वर्णो द्विभुजः पद्मपाणिर्गंधस्तु चंदनं॥ पद्मं शैलेयधूपोऽत्र नैवेद्यं घृतपा
यसं॥ हविर्मसूरपिष्टान्नं तदन्नेन बलिं हरेत्॥ विश्वभे चोत्थितो व्याधिः
सार्द्धमासेन मुंचति॥ विश्वे देवास इत्यस्य गायत्र्या विश्वदेवता॥ कमं
डलुभवांभोजवरदश्च कुशासनः॥ चंदनं कमलं पुष्पं धूपं स घृतगुग्गु
लुः॥ नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि॥ समिद्भिर्निचुलैः सार्द्धं तद
न्नेन बलिं हरेत्॥ श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुंचति॥ अतो देवेति

मंत्रस्य गायत्रीपञ्चजोहरिः॥ पीतांबरः कृष्णवर्णः शंखचक्रगदांबुजः ॥ चंदनं मालतीपुष्पं धूपः कर्पूरगुग्गुलः॥ शाल्यन्नं षड्रसोपेतं भक्ष्यभोज्यादिभिः सह॥ नैवेद्यं हविरप्येतत्पायसेन बलिं हरेत्॥ वसुभेचोत्थितो व्याधिर्दशरात्रेण मुंचति॥ शंपंतामिति मंत्रस्यानुष्टुब्व्यासो वसुस्ततः॥ चापबाणधरः शुक्लगंधकर्पूरचंदनं॥ वारितं गुग्गुलुर्धूपो नैवेद्यं घृतपायसं॥ हविस्त्वौदुंबरसमिद्गुडपायससंयुतं॥ लड्डुका धूपमध्वाज्यतिलपिष्टबलिं हरेत्॥ वारुणे चोत्थितो व्याधिरष्टरात्रेण मुंचति॥ इमंमेवरुण इत्यस्य गायत्री कण्वबाटिपः॥ नागपाशधरः श्रीमान्वररत्नविभूषितः॥ मकरस्थो गुरुर्गंधः पुष्पं च कमलोत्पलं॥ कर्पूरं चंदनं धूपो नैवेद्यं घृतपोलिका॥ हविरश्वत्थसमिधश्चिमान्नेन बलिं हरेत्॥ अजपाद्भे भवेद्व्याधिः सर्वदा निधनप्रदः॥ अथवा बहुभिर्मासैर्दिवसैर्वा विमुंचति॥ वामपादकरं भूम्यामाकाशोत्त्वपरं हूयं॥ प्रसार्य प्रांजलिः साक्षादीश्वरं न्नितयेत्स्थितः॥ शमग्निरित्यस्याजपाद्गायत्रीचतुराननः॥ कुंकुमं चंदनं गंधं पुष्पं श्वेतार्कसंभवं॥ धूपः शतौषधीमिश्रो नैवेद्यं दधिपायसं॥ हविः कूष्मांडगंधः स्याद्दध्यन्नेन बलिं हरेत्॥ अहिर्बुध्न्ये भवेद्व्याधिः सार्द्धमासेन मुंचति॥ नमस्ते रुद्र इत्यस्य सर्वेतत्रैव संस्थितं॥ गंधचंदनकर्पूरैः पुष्पपद्मोत्पलं शुभं॥ सबिल्वगुग्गुलुर्धूपो नैवेद्यं घृतपायसं॥ मुद्गमाषतिलान्नाज्ययवव्रीहिमयं हविः॥ पूषा च देवता भोजवर्णो भोजधरः शुभं॥ रक्तचंदनगंधो न पुष्पं मंदारसंज्ञकं॥ धूपस्तु गुग्गुलुः साज्यो नैवेद्यं घृतपायसं॥ हविस्तदेव सजलं दध्यन्नेन बलिं हरेत्॥ भूतेशानुगतो यस्माद्रोगनाथमहाज्वरः॥ रोगादस्मान्च मां त्राहि त्वं गृहीत्वोत्तमं बलिं॥ जन्मसंपिशुनक्षत्रराशिलग्नेषु यमघंटेषु मत्स्यरे नैधनतारके ष्टमचंद्रे रोगोत्पत्तौ मृत्युः॥ रविमघाद्वादशी सोमविशाखैकादशीनां भौमार्द्रा पंचमीनां बुधोत्तराषाढा तृतीयानां गुरुशतभिषक्षष्ठीनां शुक्राश्विन्यष्टमीनां शनिपूर्वाषाढा नवमीनां च योगे मृत्युः॥ भरण्यनुराधा वा चंद्रे आर्द्रोत्तराषाढा वा सोमे मघा शतभिषग्वा भौमे अश्विनी विशाखा बुधे ज्येष्ठा मृगशिरो वा गुरौ॥ श्रवण आश्लेषा वा भृगौ पूर्वाभाद्रपदा शनौ चेन्मृत्युयोगः॥ अतो त्रोक्तास्तिथिवारनक्षत्रशां

तयोविस्तृताःकार्याः॥ अथातिथिवारर्क्षेषुसाधारणःप्रयोगः॥आसप
क्षाद्युल्लिख्यममोत्पन्नस्यव्याधेर्जीवच्छरीराविरोधेनसमूलनाशार्थ
ममुकनक्षत्रामुकदेवताख्यंजपंकरिष्यइतिसंकल्प्याष्टशताष्टसह
स्राद्युतान्यतमसंख्ययातत्तदेवतामंत्रस्यजपंकृत्वान्येनकारयित्वा
वामासपक्षाद्युल्लिख्यममोत्पन्नव्याधेर्जीवच्छरीराविरोधेनसमूल
निवृत्तयेमुकशांतिंकरिष्यइतिसंकल्प्य॥गणेशपूजाचार्यवरणांतंकृत्वा
चार्यंपूजयेत्॥ततआचार्योभूमौतंडुलैश्चतुरस्रंमंडलंकृत्वातत्रहै
मींतत्तन्नक्षत्रदेवतांवस्त्रद्वयपरिवृतांवक्ष्यमाणतत्तद्गंधधूपादिभिः
पूजयेत्॥तदीशान्यांधान्येकुंभंसंस्थाप्यजलेनापूर्य्यगंधसर्वौषधिदू
र्वापल्लवपंचत्वक्सप्तमृत्फलंपंचरत्नपंचगव्यहिरण्यानितत्रन्यस्यै
सितांवस्त्रद्वयेनावेष्ट्यसर्वेसमुद्राइतितत्रतीर्थान्यावाह्यतत्राय
मीनितत्रवरुणमावाह्यसंपूज्याग्निंग्रहांश्चप्रतिष्ठाप्याज्यभागांतेत
त्तन्नक्षत्रदेवतामंत्रेणतत्तद्द्रव्येणचाष्टोत्तरसहस्रमष्टोत्तरशतमष्टावि
शत्यन्यतरसंख्ययाहोमंकृत्वाशांतिकलशेनयजमानाभिषेकेवि
हितेतांप्रतिमांरोगीब्राह्मणायदद्यात्॥उक्तगंधाभावेचंदनंपुष्पा
भावेशतपत्रंधूपाभावेगुग्गुलुः॥नैवेद्याभावेघृतोदनंहोमद्रव्याभा
वेतिलाःमंत्राविज्ञानेगायत्रीअष्टोत्तरसहस्रंमृत्युनिर्देशेअष्टोत्तरश
तमन्यत्रजुहुयात्॥ततःकुशोदकैर्वरुणसूक्तैःपुराणमंत्रैश्चाभिषे
कंकुर्यात्॥पूर्णाहुतिंवसोर्द्धारांचकृत्वाशांतिपाठंकृत्वा आशिषंदद्या
त्॥अतःसर्वशांतिर्भवति॥ततआचार्यायसुवर्णप्रतिमांवस्त्रयुग्मेन
वेष्टितांसवत्सांगांसालंकारांदद्यात्इतरेभ्योपिदक्षिणांदद्याद्ब्राह्मणां
श्चभोजयेत्॥इतिरोगोत्पत्तिशांतिप्रयोगः॥मदनरत्ने॥त्रिषुसर्वेन
क्षत्रशांतिषुगायत्र्यापमोहेशेनहोमोष्टसंख्यः बलिश्चतत्तन्नक्षत्र
देवतायै।सोपिहोमावशिष्टद्रव्येणक्वचिदन्येन॥तच्चतत्रवक्ष्यतेभ
त्ररोहिणीपुष्यआश्लेषा·पूर्वा· हस्तस्वातीविशाखानुराधाज्येष्ठामू
लोत्तराषाढापूर्वाभाद्रपदोत्तराभाद्रपदासुघृतमेवहोमद्रव्यंअनुराधा
बलिरपितेनैवान्यत्रतुहोमेबलौचविशेषस्तत्रवक्ष्यते॥द्रव्येतुविशे
षोश्विन्यादिक्रमेणदुग्धान्नःक्षीरवृक्षसमिधोहोमेदध्योदनंबलौम

ध्वक्तास्तिलाः। घृतंदध्योदनंचक्षीरान्नंबलौ ४ मुद्गतिलाघृ---
तमधुघृताक्ताअक्षता ६ होमेगंधंशाल्योदनंबलौ॥७॥ गंधमाल्योदनं
बलौभिक्षान्नंबलौ॥९॥ घृताक्ताअक्षततिलाहोमे॥ अक्षततिलाबलौ॥
१०॥गंधपुष्पाणिबलौ॥११॥ तिलमाषाः १२ गंधपुष्पंबलौ १३। जलपुष्पंहो
मे॥सघृतामुद्गाबलौ १४। गंधपुष्पाणिबलौ १५। दुग्धाक्तान्नगंधमाल्या
निबलौ॥१६।१७। गंधमाल्यंबलौ॥१८। पायसंबलौ १९। शालयोहोमे।
पायसंबलौ॥२०॥ होमेपायसंबलौ २१। बीजाक्षताहोमे॥ गंधपुष्पाणि
बलौ॥२२। अश्वत्थसमिधोहोमेघृताक्तमुद्गाबलौ॥२३॥ जलपुष्पा
णिहोमे॥ पायसंबलौ २४। गंधमाल्योदनंबलौ २५। एकविंशतिः २१ एक
विंशतिः २१ नव ९ नव ९ दश १० मृत्यु १० विंशतिः एकविंशतिः एकविंशतिः विकल्प
तो मासाब्दौ सप्तविंशति २७ सप्त ७ अष्टौ ८ दश १० अष्टौ ८ अष्टाविंश
तिः २८ एकविंशतिः विंशतिः विंशतिः २० विंशतिः पंचविंशतिः २५ विक
ल्पतः पक्षत्रयोदशदिनमासाः द्वादश २१ दश १० दश १० अष्टाविंशतिः
२८ दिनानिक्रमात्पीडा अंतेसुखं आश्लेषामघापूर्वापूर्वाभाद्रपदासु
पक्षेमृत्युरपिसंभाव्यते॥ अथग्रहणशांतिः॥ मत्स्यपुराणे॥ होराग्रं
ग्रस्यते यस्य नक्षत्रे वा निशाकरः॥ प्राणसंदेहमाप्नोतिसवामरणमृ
च्छति। यस्याश्च जन्मनक्षत्रेग्रस्येते शशिभास्करौ॥ तज्जनानां भवेत्पी
डा येजनाः शांतिवर्जिताः॥ यस्य राशिं समासाद्य भवेद्ग्रहणसंभवः॥ त
स्य स्नानं प्रवक्ष्यामि मंत्रौषधिसमन्वितं॥ चंद्रोपरागेसंप्राप्ते कृत्वाब्रा
ह्मणवाचनं॥ संपूज्य चतुरोविप्रान्शुक्लमाल्यानुलेपनैः॥ पूर्वमेवोप
रागस्य समानीयौषधादिकं॥ स्थापयेच्चतुरः कुंभानग्रतः सागरानिव
॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वारप्रदेशाच्च मृद
मानीय निक्षिपेत्॥ पंचगव्यं पंचरत्नं पंचत्वक्पंचपल्लवं॥ रोचकं पद्मकं
शंखं कुंकुमं रक्तचंदनं॥ शुद्धस्फटिकतीर्थांबुसितसर्षपगोकुलान्॥ म
धुकं देवदारुंच विष्णुक्रांतां शतावरीं॥ बलांचसहदेवींच निशाद्वितय
मेवच॥ एतत्सर्वं विनिक्षिप्य कुंभे ष्वावाहयेत्सुरान्॥ सर्वे समुद्राः सरि
तस्तीर्थानि जलदानदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः। यो
सौवज्रधरोदेव आदित्यानां प्रभुर्मतः॥ सहस्रनयनश्चेंद्रो ग्रहपीडांव्य

पोहतु॥मुखंयःसर्वदेवानांसप्तार्चिरमृतद्युतिः॥चंद्रोपरागसंभूतां
ग्रहपीडांव्यपोहतु॥यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः॥यम
श्चंद्रोपरागोत्थांग्रह०॥रक्षोगणाधिपःसाक्षीनीलांजनसमप्रभः॥ख
ड्गहस्तोऽतिभीरश्चग्रह०॥नागपाशधरोदेवःसदामकरवाहनः॥चं
द्रोपरागकलुषंवरुणोमेव्यपोहतु॥प्राणरूपोहिलोकानांसदाकृष्ण
मृगप्रियः॥वायुश्चंद्रोपरागोत्थांग्रह०॥योसौनिधिपतिर्देवःखड्ग
शूलगदाधरः॥चंद्रोपरागदुरितंधनदोमेव्यपोहतु॥योसाविंदुध
रोदेवःपिनाकीवृषवाहनः॥चंद्रोपरागपापानिनिवारयतुशंकरः॥
त्रैलोक्येयानिभूतानिस्थावराणिचराणिच॥ब्रह्मविष्ण्वर्करुद्रा
श्चदहंतुममपातकं॥एवमावाहयेत्कुंभान्मंत्रैरेभिश्चवारुणैः॥ए
तानेवतथामन्त्रान्स्वर्णपट्टेविलेखयेत्॥ताम्रपट्टेथवालेख्यन
व्यवस्त्रेतथैवच॥मस्तकेयजमानस्यनिदध्युस्तेद्विजोत्तमाः॥क
लशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान्॥गृहीत्वास्थापयेद्दूं
भद्रपीठोपरिस्थितं॥पूर्वोक्तैरेवमंत्रैश्चयजमानंद्विजोत्तमाः॥अ
भिषेकंततःकुर्युर्मंत्रैर्वरुणसूक्तकैः॥ततःशुक्लांबरधरःशुक्लमाल्या
नुलेपनः॥आचार्यंवरयेत्तस्मात्स्वर्णपट्टंनिवेशयेत्॥आचार्यदक्षि
णांदद्याज्ज्ञोदानंचस्वशक्तितः॥गंधमाल्यधूपदीपैःपूजयेद्देवतुष्टये
॥होमंचैवप्रकुर्वीततिलैर्व्याहृतिभिस्तथा॥निवृत्तेग्रहणेसर्वब्रा
ह्मणेभ्योविशेषतः॥दानंचशक्तितोदद्याद्दीच्छेदात्मनोहितं॥
सूर्यग्रहेसूर्यनामयुक्तान्मंत्रांश्चकीर्तयेत्॥चंद्रपदस्थानेसर्वत्रसू
र्यपदमूहनीयमित्यर्थः॥अनेनविधिनायस्तुग्रहणेस्नानमाचरेत्॥
नतस्यग्रहणेदोषःकदाचिदपिजायते॥अथजलाशयवैकृतशांतिः
गर्गः॥नगरादुपसर्पंतेसमीपउपयांतिच॥नद्योह्रदप्रस्रवणाविरसा
वैभवंतिच॥विवर्णकलुषंतप्तंफेनवज्जंतुसंकुलं॥क्षीरंस्नेहंसुरां
स्रंवहंतेव्याकुलोदकं॥षण्मासाभ्यंतरेतत्रपरचक्रभयंविदुः॥
जलाशयानदंतेचप्रज्वलंतिक्वथंतिच॥विमुंचंतितथाब्रह्मन्ज्वा
लाधूमंरजांसिच॥अखातेवाजलोत्पत्तिःससत्वावाजलाशयाः॥
संगीतिशब्दाःश्रूयंतेजनमारभयंविदुः॥दिव्यंमहाभयंविद्धिमधु

मात्रावसेचनं॥जप्तव्यावारुणामंत्रास्तैश्चहोमोजलेभवेत्॥मध्वा
ज्ययुक्तंपरमान्नमत्रदेयंद्विजानामथभोजनार्थं॥गावश्चदेयाःसि
तवस्त्रयुक्तास्तथोदकुंभाःसकलाश्चशांत्यै॥इतिजलाशयवैकृति
शांतिः॥अथवृष्टिवैकृतशांतिः॥गर्गः॥अतिवृष्टिरनावृष्टिर्दुर्भिक्षा
दौभयंमतं॥अनृतौतुदिवानंतावृष्टिर्व्याधिभयायतु॥अनभ्रेवैकृ
तामेघमंतरेणगर्जितादयः॥शीतोष्णानांविपर्यासेनृतूनांरिपुजं
भयं॥शोणितंवर्षतेयत्रतत्रशस्त्रभयंभवेत्॥अंगारपांसुवर्षेण
नगरंतद्विनश्यति॥मज्जास्थिस्नेहमांसानांजनमारभयंभवेत्॥फ
लंपुष्पंतथाधान्यंपरेणातिभयायतु॥पांसुजंतूपलानांचवर्षतोरो
गजंभयं॥छिद्राद्वान्नप्रवर्षेणसस्यानामीतिवर्द्धनं॥विरजस्केर
वौव्यभ्रेयदाछायानदृश्यते॥दृश्यतेतुप्रतीपावातत्रदेशेभयंभवे
त्॥प्रतीपाप्रतिकूलाछायाविपरीतछायेत्यर्थः॥निरभ्रेवातथारा
त्रौश्वेतंयाम्योत्तरेणतु॥इंद्रायुधंतथादृष्ट्वाउल्कापातंतथैवच॥दि
ग्दाहोपरिघोवोन्वगंधर्वनगरंतथा॥परचक्रभयंविंद्यादेशोपद्र
वमेवच॥सूर्येंदुपर्जन्यसमीरणानांयागस्तुकार्योविधिवद्विजेंद्र॥
धान्यानिगोकांचनदक्षिणाश्चदेयाद्विजानामघनाशहेतोः॥इतिवृ
ष्टिवैकृतशांतिः॥अथाग्निवैकृतशांतिः॥गर्गः॥अग्निःप्रदीप्यतेय
त्रराष्ट्रेभृशमनिंधनः॥नदीप्यतेवेंधनवांस्तद्राष्ट्रंपीड्यतेनृप॥ज्वले
दार्द्रश्चवंशोवातथाद्रीन्नंमृदःसुधा॥प्रासादतोरणंद्वारंनृपवेश्म
सुरालयं॥एतानियत्रदह्यंतेतत्रराजभयंवदेत्॥विद्युतावाप्रदह्यते
तत्रापिनृपतेर्भयं॥अनेशानितमांसिस्युर्विनापांसुरजांसिच॥धूम
श्चानग्निजोयत्रतत्रविद्यान्महाभयं॥तडिद्विनाभ्रंगगनेभयंस्याद्वृ
ष्टिवर्जिते॥दिवासतारेगगनेतथैवभयमादिशेत्॥ग्रहनक्षत्रवैकृ
त्येताराविकृतिदर्शने॥पुरवाहनदारेषुचतुष्पदगृहेषुच॥स्वभावा
द्यापिहीयेतधेनुवत्सादिकंचयत्॥लोहायुधविकारःस्यात्तत्रसंग्राम
मादिशेत्॥त्रिरात्रोपोषितस्तत्रपुरोधाःसुसमाहितः॥समिद्भिरर्क
वृक्षाणांसर्षपैश्चघृतेनच॥होमंकुर्यादग्निमंत्रैर्ब्राह्मणांश्चैवभोजये
त्॥दद्यात्सुवर्णंचतथाद्विजेभ्योगाश्चैववस्त्राणितथाभुवंच॥एवंकृ

तैतत्समुपैति नाशं यदग्निवैकृत्यभयं द्विजेंद्र॥ इत्यग्निवैकृत्यशांतिः
॥अथ प्रतिमादिवैकृत्यशांतिः॥गर्गः॥देवता यात्र नृत्यंति वेपंते प्रज्व
लंति वा॥आरटंति चरोदंति प्रस्विद्यंति हसंति च॥उत्तिष्ठंति निषीदंति
प्रधावंति रमंति च॥भजंति विकृतिं भूम्ना मानुषाणां भयावहाः॥अथवा
ह्युरवावतिष्ठंति स्थानात्स्थानं भ्रमंति च॥वमंत्यग्निं तथा धूमं स्नेहं र
क्तं तथा वसां॥एवमादीनि दृश्यंते विकाराः सहजो स्थिताः॥लिंगायत
नचित्रेषु तत्र वासं न रोचयेत्॥राज्ञो वा व्यसनं तत्र स च देशो विनश्यति
॥देवयात्रासु चोत्पातान् दृष्ट्वा देशभयं वदेत्॥ देवयात्रोत्पाता वराहसं
हितोक्ता ज्ञेयाः॥विना साहसधर्मेण तत्र वासं न रोचयेत्॥पशूनां रु
द्रजं ज्ञेयं नृपाणां लोकपालजं॥रुद्रजं रुद्रप्रतिमासूत्पन्नं वैकृत्यं पशु
भयदमित्यर्थः॥एवं सर्वत्रापि ज्ञातव्यं॥ज्ञेयं सेनापतीनां च यत्स्यात्स्कं
दविशाखजं॥लोकानां विश्ववस्विंद्रविश्वकर्मसमुद्भवं॥विनायकोद्भ
वं ज्ञेयं गणानां सेवकाय च॥देवदूतेन या ऽप्रेष्याः देवस्त्रीषु नृपस्त्रियः
वासुदेवेषु विज्ञेयं गृहाणामेव नान्यथा॥देवतानां विकारेषु शुचिर्वेत्ता
पुरोहितः॥देवतार्चां तु गत्वा वै स्नात्वा तामाच्छाद्य भूषयेत्॥पूजयेत्तां महा
भागां गंधमाल्यान्नसंपदा॥मधुपर्केण विधिवदुपतिष्ठेदनंतरं॥तल्लिं
गेन च मंत्रेण स्थालीपाकं यथाविधि॥पुरोधा जुहुयादह्नो सप्तरात्रम
तंद्रितः॥विप्राश्च पूज्या मधुरान्नपानैः सदक्षिणैः सप्तदिनं नरेंद्र॥प्राप्ते
ऽष्टमेऽह्नि क्षितिगोप्रदानैः सकांचनैः शांतिमुपैति पापं॥इत्यद्भुतशांतिषु
देवताप्रतिमावैकृत्यशांतिः॥अथाकस्मिकप्रासादपतनादिशांतिः॥
गर्गः॥प्रासादतोरणाट्टालद्वारप्राकारवेश्मनां॥अनिमित्तं तु पतनं दृ
ढानां राजमृत्यवे॥रजसा वाथ धूमेन दिशो यत्र समाकुलाः॥आदित्य
श्चंद्रतारा च विवर्णा भयवृद्धये॥राक्षसा यत्र दृश्यंते ब्राह्मणाश्च वि
धर्मिणः॥ऋतवश्च विपर्यस्ता अपूज्यं पूजयेज्जनः॥नक्षत्राणि वियो
गीनि तन्महद्भयलक्षणं॥केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः॥
ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत्॥स्त्रियश्च कलहायंते बालाः
घ्नंति बालकान्॥क्रियाणामुचितानां च विच्छित्तिर्यत्र दृश्यते॥अग्निर्य
त्र न दृश्येत हूयमानोथ शाम्यति॥क्रव्यादा वायसा बाह्या यांति वोत्तर

नस्तथा॥पूर्णकुंभाःस्रवंतेचवन्हयोवाविलुंपते॥मंगल्यध्वनयोयत्र
नश्रूयंतेसमंततः॥क्षवथुर्वाधतेवाथयोत्साहेसतिनिंदिताः॥नदैवते
षुवर्त्तंतेयथाब्रह्महणेषुच॥मंदघोषाणिवाद्यानिवाद्यंतेविस्वराणिच॥गु
रुमित्रद्विषोयत्रशत्रुभूपारताःसदा॥ब्राह्मणान्सुहृदोमात्यान्जनोय
त्रावमन्यते॥शांतिमंगलहोमेषुनास्तिकंयत्रमन्यते॥राजावाम्रियते
तत्राथवादेशोविनश्यति॥राज्ञोविनाशेसंप्राप्तेनिमित्तानिनिबोधमे॥
ब्राह्मणान्प्रथमंद्वेष्टिब्राह्मणांश्चविनिंदति॥ब्राह्मणस्वानिचादत्तेब्रा
ह्मणांश्चजिघांसति॥नैतान्स्मरतिकृत्येषुयाचितश्चाभ्यसूयति॥र
मतेनिंदयाचैषांप्रशंसांनाभिनंदति॥अपूर्वंतुकरंलोभात्तथापातय
तेजने॥एतेष्वभ्यर्चयेत्सम्यक्सपत्नीकान्द्विजोत्तमान्॥भोज्यानि
चैवकर्त्तव्यासुराणांबलयस्तथा॥गावश्चदेयाद्विजपुंगवेभ्योभुवंत
थाकांचनमंबराणि॥होमंचकुर्याद्द्विजपूजनंचएवंकृतेशांतिमुपैतिः
पापं॥अद्भुतेतुसमुत्पन्नेयदिवृष्टिःप्रजायते॥सप्ताहाभ्यंतरेज्ञेयमद्भु
तंविफलंहितत्॥इत्याकस्मिकप्रासादपतनादिशांतिः॥अथवृक्षवि
कारशांतिः॥गर्गः॥रुदतोव्याधिरभ्येतिहसतोदेशविभ्रमः॥शाखाप्रप
तनेकुर्यात्संग्रामंयोधमात्तनं॥बालानांमरणंकुर्याद्बालानांफलपुष्पतः
॥स्वराष्ट्रभेदंकुरुतेफलपुष्पमनार्त्तवं॥क्षीरंसर्वत्रगंभीरस्नेहंदुर्भिक्ष
लक्षणं॥वाहनानामयंमद्येरक्तेसंग्राममादिशेत्॥मधुस्रावेभवेद्व्या
धिर्जलस्रावेचवर्षति॥अरोगशोषणंज्ञेयंब्रह्मन्दुर्भिक्षलक्षणं॥शु
ष्केषुसंप्ररोहस्तुवीर्यमंतेचहीयते॥उत्थानेपतितानांचभयंभेदक
रंभवेत्॥स्थानात्स्थानेतुगमनेदेशभंगंतथादिशेत्॥अन्येषुचैववृ
क्षेषुवृक्षोत्पातेष्वतंद्रितः॥आच्छाद्यपित्वातंवृक्षंगंधमाल्यैर्विभू
षयेत्॥वृक्षोपरितथाछत्रंकुर्यात्पापप्रशांतये॥शिवमभ्यर्चयेद्देवं
पशुंचास्मैनिवेदयेत्॥मूलेभ्यदितिवृक्षेषुहुत्वारुद्रंजपेत्ततः॥मध्वा
ज्यमुक्तेनतुपायसेनसंपूज्यविप्रांश्चभुवंचदद्यात्॥गीतेननृत्येनत
थार्चयेत्तंदेवंहरंपापविनाशहेतोः॥इतिवृक्षोत्पातशांतिः॥अथोत्पा
तशांतिः॥नारदसंहितायांचतुस्त्रिंशेध्याये॥उत्पाताविविधालोके
दिव्यभौमांतरिक्षगाः॥तेजोनामानितांशांतिंसम्यग्वक्ष्येपृथक्पृथक्॥

देवताद्याः प्रनृत्यंति पतंति प्रज्वलंति वा॥ मुहुर्गायंति रोदंति प्रस्विद्यं
तिहसंति च॥ वमंत्यग्निं तथा धूमं स्नेहं रक्तं पयो जलं॥ अधोमुखं तु ति
ष्ठंति स्थानात्स्थानं व्रजंति वा॥ एवमाद्याश्च दृश्यंते विकाराः प्रतिमादि
षु॥ गंधर्वनगरं चैव दिवा नक्षत्रदर्शनं॥ महोल्कापतनं काष्ठे नृणां रक्त
प्रवर्षणं॥ गांधर्वगेहदिग्दाहं भूमिकंपं दिवा निशि॥ अनग्नौ च स्फुलिं
गाः स्युर्ज्वलनं च विनेंधनं॥ निशींद्रचापं मंडूकशिखरे श्वेतवायसं॥
दृश्यंते विस्फुलिंगाश्च गोगजाश्वोष्ट्रगास्ततः॥ जंतवो द्वित्रिशिरसो जा
यंते च्चा वियोनिषु॥ प्रतिसूर्याश्च तिस्रश्चस्युर्द्विक्षु युगपद्रवेः॥ जंबूको
ग्रामसंवेशः केतूनां च प्रदर्शनं॥ काकानामाकुलं रात्रौ कपोतानां दि
वा यदि॥ एवमेते महोत्पाता बहवः स्थाननाशकाः॥ केचिन्मृत्युप्र
दाः केचिच्छत्रुभ्यश्च भयप्रदाः॥ देवालये स्वगेहे वा ऐशान्यां पूर्वतो
पि वा॥ कुंडं लक्षणसंयुक्तं कल्पयेन्मखलायुतं॥ गृह्योक्तविधिना त
त्र स्थापयेच्च हुताशनं॥ जुहुयादाज्यभागांत मष्टवा ष्टोत्तरं शतं॥ यत
इंद्रभयामहे स्वस्तिये न च मंत्रकैः॥ समिदाज्यचरुव्रीहितिलैर्व्याहति
भिस्ततः॥ कोटिहोमं तदर्द्धं वा लक्षहोममथापि वा॥ यथावित्तानुसारे
ण पादहोममथापि वा॥ एकविंशतिरात्रं वा पक्षं पक्षार्द्धमेव वा॥ त्रि
रात्रमेकरात्रं वा होमकर्म समाचरेत्॥ गणेशः क्षेत्रपालाकै दुर्गाख्या
अंगदेवताः॥ तासां प्रीत्यै जपः कार्यः शेषं पूर्ववदाचरेत्॥ ऋत्विग्भ्यो
दक्षिणां दद्यात्षोडशेभ्यः स्वशक्तितः॥ इति नानोत्पातशांतिः॥ अथप
ल्लीसरटशांतिः॥ वृद्धगर्गः॥ पल्त्याः प्रपातस्य फलं सरटस्य तथैव च॥
शीर्षे राज्यश्रियः प्राप्तिर्भाले चैश्वर्यवर्द्धनं॥ कर्णयोर्भूषणावाप्तिर्नेत्र
योर्बंधुदर्शनं॥ नासिकायां तु सौभाग्यं वक्त्रे मिष्टान्नभोजनं॥ कंठेनि
त्यं प्रियाश्लेषः स्कंधयोर्विजयो ध्रुवं॥ धनलाभो बाहुयुग्मे करयोरर्थ
संक्षयः॥ जंघयोश्च निरुद्योगः पादयोर्भ्रमणं भवेत्॥ एवं पल्त्याः प्रपा
तस्य फलं ज्ञेयं विचक्षणैः॥ एतदेव फलं विद्याच्छरटस्य प्ररोहणे॥ प
ल्त्याः प्रपतने चैव सरटस्य प्रपातने॥ पंचरात्रं भवेत्तस्य व्याधिपीडा
विशेषतः॥ पतनानंतरं तस्य रोहणं यदि जायते॥ पतने फलमुत्सृष्टं रो
हणे स्वल्पफलं भवेत्॥ आरोहणं चोर्ध्ववक्त्रे अधोवक्त्रे निपातनं॥ भवेद्

रिसुशीघ्रेणतत्फलंजायतेध्रुवम्॥मृत्युयोगेऽग्धदिनेपातेचयमघंट
के॥चंद्राष्टमेनैधनेचजन्मर्क्षेविषनाडिके॥क्रूरलग्नेक्रूरयुतेक्रूरेणच
निरीक्षिते॥अष्टमेतेक्रूरयुतेविष्टिवैधृतिसंयुते॥दुर्निमित्तेतयोःपा
तेनिधनंजायतेध्रुवं॥तयोःस्पर्शनमात्रेणसचैलंस्नानमाचरेत्॥गव्यं
पंचविधंप्राश्यकुर्यादाज्यावलोकनं॥शास्त्रवाप्यथवाशास्त्रेयदीच्छेदा
त्मनःशुभं॥पुण्याहंवाचयित्वातुशांतिकर्मततश्चरेत्॥प्रतिरूपंतयोः
कुर्यात्सुवर्णेनस्वशक्तितः॥रक्तवस्त्रेणसंवेष्ट्यगंधपुष्पैःप्रपूजयेत्॥
कलशेवस्त्रयुग्मेनपूजयेद्विधिनाततः॥अग्निसंस्थापनंकृत्वाहोमंकु
र्याद्विधानतः॥मृत्युंजयेनमंत्रेणसमिद्भिःखादिरैःशुभैः॥तिलैर्व्याहृ
तिहोमंचअष्टोत्तरसहस्रकं॥महाव्याहृतिहोमंचसर्पिःक्षीरेणकारये
त्॥अभिषेकंततःकुर्याद्यजमानस्यमूर्द्धनि॥पुण्यैर्वारुणसूक्तैश्चवोः
शांतादिकमंत्रकैः॥इत्थमेवविधानेनयःकुर्याच्छांतिमुत्तमां॥तस्यायु
र्विजयोलक्ष्मीःकीर्तिःपुष्टिश्चजायते॥इतिपल्ल्यादिपतनशांतिः॥अथ
ग्राम्यारण्यादिशांतिः॥गर्गः॥प्रविशंतियदाग्राममारण्यामृगपक्षिणः
॥अरण्यंयांतिवाग्राम्याःस्थलंयांतिजलोद्भवाः॥स्थलजावाजलंयां
तिघोरंवासंतिनिर्भयाः॥राजद्वारेपुरद्वारेशिवाश्चाप्यशिवप्रदाः॥दि
वारात्रिंचरावापिरात्रौवापिदिवाचराः॥ग्राम्यास्त्यजंतिग्रामंवातच्चो
त्पातस्यनिर्दिशेत्॥उत्पातस्यलक्षणमितिशेषः॥दीप्तावासंतिसंध्या
सुमंडलानिचकुर्वते॥वासंतेविस्तरंयत्रतत्राप्रेतफलंलभेत्॥प्रदोषे
कुक्कुटोवासेद्धेमंतेवापिकोकिलः॥अर्कोदयेर्कोभिमुखस्तदामात्यभ
यंवदेत्॥गृहंकपोतःप्रविशेत्क्रव्यादस्तुविलीयते॥मधुवामक्षिकाः
कुर्युर्मृत्युर्गृहपतेर्भवेत्॥प्राकारद्वारगेहेषुतोरणापणवीथिषु॥के
तुच्छत्रायुधाग्रेषुक्रव्यास्तेश्रयनेयदि॥जायतेवाथवल्मीकोमधुवा
दृश्यतेयदि॥सदेशोनाशमाप्नोतिराजाचम्रियतेतदा॥मूषिकाःश
लभान्दृष्ट्वाप्रभूतंक्षुद्भयंवदेत्॥काष्ठोल्मुकास्थिशृंगास्याश्वानोमर
केवादिनः॥दुर्भिक्षवेदिनोज्ञेयाःकाकाधान्यक्षुपेयदि॥जनामभिभवंत
श्चनिर्भयारणवेदिनः॥काकोमैथुनयुक्तश्चेत्श्वेतःसयदिदृश्यते॥
राजाचम्रियतेतत्रतदादेशोविनश्यति॥उलूकोवासतेयत्रनिपतेद्वा

गृहेयदि॥ द्वेषोगृहपतेर्मृत्युर्धननाशस्तथैवच॥वासतेशब्दंकरोति
॥मृगपक्षिविकारेषुकुर्याद्धोमंसदक्षिणं॥ देवाःकपोतइतिचजप्तव्यं
पंचभिर्दिनैः॥सुदेवइतिवैकेनदेयागावस्तुदक्षिणा॥जपेच्छाकुनसू
क्तंचनमोवेदशिरांसिच॥देवाःकपोतइत्यादयोमंत्राऋग्वेदप्रसिद्धाः॥
नमोनमोब्रह्मणेनमइति॥वेदशिरांसिउपनिषदः॥गावश्चदेयाविधि
वद्द्विजानांसकांचनावस्त्रयुगोत्तरीयाः॥एवंकृतेशांतिमुपैतिपापम्
गेहेद्विजैर्वापिनिवेदितंयत्॥इतिग्राम्यारण्यादिशांतिः॥अथकपोतशां
तिः॥नारदः॥आरोहयेद्गृहंयस्यकपोतोवाप्रवेशयेत्॥स्थानहानिर्भ
वेत्तस्ययद्वानर्थपरंपरा॥दोषायधनिनांगेहेदरिद्राणांशिवायच॥त
स्यशांतिश्चकर्त्तव्याजपहोमविधानतः॥ब्राह्मणान्वरयेत्तत्रस्वस्ति
वाचनपूर्वकं॥षोडशद्वादशाष्टौवाश्रौतस्मार्तक्रियापराः॥देवाःकपो
तइत्यादिऋचाभिःपंचभिर्जपं॥कृत्वासंकल्पंप्रयत्नेनस्वगृह्योक्तविधा
नतः॥ऐशान्यांस्थापयेद्वह्निंमुखांतेष्टोत्तरंशतं॥मुखांतेअग्निमुखां
ते॥प्रत्येकंसमिदाज्यान्नैःप्रतिप्रणवपूर्वकं॥यतइंद्रभयामहेस्वस्ति
देतित्रिपंचकैः॥त्रिभिर्मंत्रैश्चजुहुयात्तिलान्व्याहृतिभिस्तथा॥जपा
हुतीस्ततोहुत्वाकुर्यात्पूर्णाहुतिंस्वयं॥विप्रेभ्योदक्षिणांदद्यात्द्यौः
शांतिंचततोजपेत्॥ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतबंधुभिः॥ए
वंयःकुरुतेसम्यक्तस्माद्दोषात्प्रमुच्यते॥पिंगलायाःस्वरेप्येवंमधु
वल्मीकयोरपि॥संपूर्णेमंदिरेहानिःशून्यसद्मनिमंगलं॥प्राकारेच
पुरद्वारेरथ्यादिषुचवीथिषु॥ग्रामस्यतत्फलंचैवगुरुकल्पनयात
तः॥शांतिकर्माखिलंकार्यंपूर्वोक्तेनक्रमेणतु॥इतिकपोतादिशांतिः
॥अथकाकवैकृत्यशांतिः॥गर्गसंहितायां॥काकस्यमैथुनंपश्येत्का
कःशिरसिचेद्विशेत्॥शिरस्युरसिवाकुर्यात्पक्षघातंनखैस्तथा॥वि
दारणंचकुरुतेशयानंचस्पृशेद्यदि॥तदावदेत्तुमरणंमहारिष्टमथा
पिवा॥मध्यरात्रेयदाकाकोवासतेहेतुनाविना॥तद्गृहारिष्टमाच
ष्टेग्राममारिष्टमथापिवा॥शांतिंतत्रप्रकुर्वीतविधानेनयथोदितं॥
उद्दिष्टयारिष्टशमनंकुर्यात्संकल्पमादितः॥शुचौदेशेरत्निमात्रेस्थं
डिलेग्निंनिधायच॥तदीशानेस्थलेकुंभोपरिस्वशक्तितः॥हिरण्य

निर्मितं त्विंद्रं लोकपालसमन्वितं॥ पूजयित्वा स्वशास्त्रोक्तविधिना
श्रपयेच्चरुं॥ कृत्वाज्यभागपर्यंतं जुहुयात्क्रमशो हविः॥ पालाशीः स
मिधो व्रीहीश्चरुमाज्यमिति क्रमात्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरश
तं तु वा॥ यत इंद्रेति मंत्रेण लोकपालेभ्य एव च॥ शक्त्या हुत्वा स्वशा
स्त्रोक्तप्रायश्चित्ताहुतीर्हुनेत्॥ लोकपालबलिं दत्वा इंद्राद्यैश्चरुशेष
तः॥ वायसेभ्यो बलिं दद्यादैंद्रवारुणमंत्रतः॥ ऐंद्रवारुणवायव्यायाम्या
वै नैर्ऋतास्च ये॥ ते काकाः प्रतिगृण्हंतु भूम्यां पिंडं मयार्पितं॥ पूर्णाहु
तिं ततो हुत्वा आचार्यं पूजयेत्ततः॥ कुंभोदकेनाभिषेको यजमानस्य
विस्तरात्॥ आचार्यायेंद्रप्रतिमां दद्यात्सोपस्करां ततः॥ शक्त्या च भू
यसीं दद्यात् द्विजानां भोजनं दिशेत्॥ शतं तदर्द्धमर्द्धं वा शक्त्यभावे
दशापि वा॥ स वै शांतिं पाठयित्वा गृण्हीयाच्च द्विजाशिषः॥ एवं कृते
भवेच्छांतिः काकारिष्टविनाशिनी॥ इति काकमैथुनदर्शनादिशांतिः
॥प्रकारांतरेण काकमैथुनदर्शनशांतिः॥ नारदः॥ दिवा वा यदि वा रा
त्रौ यः पश्येत्काकमैथुनं॥ स नरो मृत्युमाप्नोति ह्यथवा स्थाननाश
नं॥ काकघातव्रतं यद्वा चीर्यात्तावद्वत्सरं॥ पितृवद्द्विजान्भक्त्या
प्रत्यहं चाभिवादयेत्॥ जितेंद्रियो जितक्रोधः सत्यधर्मपरायणः॥
तद्दोषशमनार्थाय शांतिकर्म समारभेत्॥ गृहस्येशानदिग्भागे हो
मस्थानं प्रकल्पयेत्॥ गृह्योक्तविधिना तत्र प्रतिष्ठाप्य हुताशनं॥ मु
खांते समिदाज्यान्नैर्हुनेदष्टोत्तरं शतं॥ प्रतिमंत्रं त्र्यंबकेन अथ मृ
त्युंजयेन च॥ व्याहृतिभिर्व्रीहितिलैर्जपाद्यंतं प्रकल्पयेत्॥ पूर्णाहु
तिं च जुहुयात्कर्ता शुचिरलंकृतः॥ स्वर्णशृंगीं रौप्यखुरां कृष्णां धेनुं
पयस्विनीं॥ वस्त्रालंकारसंयुक्तां निष्कद्वादशसंयुतां॥ तदर्द्धेन तद
र्द्धेन दद्याद्दक्षिणया युतं॥ यथावित्तानुसारेण न्यूनाधिक्यस्य कल्प
ना॥ आचार्याय श्रोत्रियाय तां गां दद्यात्कुटुंबिने॥ यस्मात्त्वं पृथिवी स
र्वा धेनो वै कृष्णसन्निभे॥ सर्वमृत्युहरे नित्यमतः शांतिं प्रयच्छ मे॥
ब्राह्मणेभ्यो विशिष्टेभ्यो यथाशक्त्या च दक्षिणां॥ ब्राह्मणान्भोजये
त्पश्चाच्छांतिवाचनपूर्वकं॥ एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमु
च्यते॥ इति काकमैथुनशांतिः॥ नारदः॥ सूर्यास्तमनवेलायां वायसः

संस्पृशेद्यदि॥निःशब्दोवासशब्दोवापुंसोमृत्युप्रदायकः।अंगनां
चस्पृशेत्काकोवैधव्यंतत्रनिर्दिशेत्॥नदीतीरेगवांगोष्ठेक्षीरवृक्षे
सुरालये॥नरोवायससंस्पृष्टोवधबंधनमाप्नुयात्॥प्रतिचंद्रंप्रति
सूर्यंवायसःस्पृशतेयदि॥अर्थहानिंतथामृत्युंशस्त्रेणचविनिर्दि
शेत्॥मासैःपंचभिरेवास्यनिशाभिःफलमादिशेत्॥तद्दिनादिफलं
सद्भिःप्रोक्तमत्रशुभाशुभम्॥शांतिंतत्रप्रकुर्वीतशास्त्रदृष्टेनकर्मणा
॥महानद्यंभसिस्नात्वाशिवलिंगंनिरीक्षयेत्॥नत्वासंपूज्यलिंगंतु
स्तुत्वाचद्विजपतीनपि॥आरभ्यतद्दिनादेववायसेभ्योबलिंक्षिपेत्॥
शनैश्वरदिनेप्राप्तेएकांतेशुभमंदिरे॥कृष्णानिनववस्त्राणिअह
तानिनवानिच॥पूर्वदिक्क्रमयोगेनस्थापयेच्च पृथक्पृथक्॥माष
प्रस्थप्रमाणेनस्थापयेत्तत्रवायसान्॥पूर्वस्यांकपिलंतत्रस्थापये
न्मंत्रपूर्वकं॥नीलग्रीवमथाग्नेय्यांयाम्यांचविकृतस्वरं॥नैरृत्यांच
न्यसेत्क्रौंचमपमृत्युविनाशनं॥विद्युज्जिह्वंचवारुण्यांवायव्यां
कृष्णकर्बुरं॥कौबेर्य्यांकालनामानमैशान्यांश्वेतमेवच॥अहते
कृष्णवस्त्रेतुयमंमध्येप्रपूजयेत्॥महिषंकृष्णवर्णंचयमंमाषैश्च
पूजयेत्॥रक्तोत्तमांगंसर्वत्रआयुधैश्चसमन्वितं॥लोहदंडंचतु
र्बाहुंपूजयेन्मंत्रपूर्वकं॥यस्मिन्हंसेपरेपिवांसंयुगेनःपंथानमेव
च॥एतेमंत्राःसमाख्याताःशूद्राणांनाममंत्रतः॥अकालकलशं
तत्रस्थापयेत्तस्यसन्निधौ॥जलपूर्णंरत्नगर्भंपूर्णपात्रसमन्वितं
॥स्थापयेत्तत्रदेवेशंशूलपाणिंमहेश्वरं॥प्रतिष्ठाप्यचतान्सर्वानथ
मंत्रैःप्रपूजयेत्॥कपिलस्त्वंचवर्णेनशुभाशुभनिवेदकः॥गृहाणा
र्घ्यंमयादत्तंभवाशुभविनाशनः॥नीलग्रीवगृहाणार्घ्यंमयादत्तंख
गेश्वर॥अल्पमृत्युविनाशायददामिबलिमुत्तमं॥क्रूरस्त्वंपापिनांनि
त्यंसौम्यस्त्वंधार्मिकेजने।विकृतस्वरगृहाणार्घ्यंमयादत्तंशुभायनः
॥क्रूरस्त्वंपापिनांनित्यंवधशुभंनकृच्छसि॥गृहाणार्घ्यंमयादत्तंक्रौं
चसौम्यप्रदोभव॥विद्युज्जिह्वनमस्तेस्तुशोकव्याधिविनाशन॥बलिं
पूजांमयादत्तांगृहाणसुखदोभव॥कृष्णकर्बुरनामात्वंभूतभव्य
निवेदक॥गृहाणार्घ्यंमयादत्तंभववैधव्यनाशन॥काकत्वंकालना

मासिदुष्टकालनिवेदकः॥गृहाणबलिपूजांमेदत्तांदुःखविनाशिनीं॥ध्येनत्स्वंसितपर्णोसिमृत्युभावस्यसूचकः॥गृहाणार्घ्यंमयादत्तंभवमृत्युविनाशनः॥तन्मध्येपूजयेद्देवंधर्मराजंचतुर्भुजं॥यमायधर्मराजायमृत्यवेचांतकायच॥वैवस्वतायकालायसर्वभूतक्षयायच॥औदुंबरायदध्नायनीलायपरमेष्ठिने॥वृकोदरायचित्रायचित्रगुप्तायवैनमः॥नीलग्रीवायलोकेशदंडहस्तायतेनमः॥पाशहस्तायसायुधायसपरिवारायतेनमः॥चंदनैश्चसुगंधैश्चवासोभिःपूजयेद्यमं॥आदावेत्र्यंबकमंत्रेणईश्वरंचप्रपूजयेत्॥मृत्युविनाशिनींविद्यांकुंभेचैवनियोजयेत्॥शतमष्टोत्तरंचैवआचार्योहृष्टमानसः॥स्वगृह्योक्तविधानेनचरुंचयमदैवतं॥संश्रप्यजुहुयाहुन्हें॥समिदाज्यचरूंस्तिलान्॥तद्देवत्यासमित्कार्याशतमष्टोत्तरंतथा॥समित्क्रमेणजुहुयात्स्वतिद्रव्येशतंहुनेत्॥सुगन्धुपंथामंत्रेणहोतव्यंसर्वमत्रतु॥भद्रासनंप्रकर्त्तव्यंपंचवर्णकसंयुतं॥तस्योपरिन्यसेत्सद्वंयजमानमथाह्वयेत्॥निवेश्याच्छादितेपट्टेअभिषेकंचकारयेत्॥पावमानीभिस्तुतल्लिंगैर्मंत्रैर्वारुणसंभवैः॥तल्लिंगैःसुगन्धुपंथामित्यादिभिः॥तत्रस्नानंप्रकर्त्तव्यंतीर्थानीलेनवारिणा॥सहस्राक्षादिभिर्मंत्रैःस्नानंकार्यंद्विजोत्तमैः॥ततोन्यद्वस्त्रमादायधर्मराजंतुपूजयेत्॥उक्तैःषोडशभिर्मंत्रैःसुगन्धित्यर्घ्यंप्रदापयेत्॥ततउत्थायसंप्रार्थ्यंभक्तिभावसमन्वितः॥रक्षमांपुत्रपौत्रांश्चरक्षमांपशुबांधवान्॥रक्षपत्नींपतिंचैवपितरंमातरंधनं॥अग्नितोमेभयंमास्तुरोगाच्चव्याधिबंधनात्॥शस्त्रतोविषतोघोघाद्भयंनाशयमेसदा॥प्रार्थनाचप्रकर्त्तव्यानमस्कारसमन्विता॥काकस्पृष्टंचयद्वस्त्रंस्नानक्लिन्नंचयद्भवेत्॥सहिरण्यंचतत्कृत्वाब्राह्मणायनिवेदयेत्॥मंत्रः॥यत्किंचित्स्पर्शदोषोत्थंदुष्कृतंअपिविद्यते॥तत्सर्वंनाशमायातुवस्त्रदानेनसूर्यज॥वायसास्नानंयमंचैतमाचार्यायनिवेदयेत्॥माषान्वासांसिकृष्णांतुधेनुंचैवपयस्विनीं॥शनिवारेचतत्कार्यंरविवारेथवापुनः॥घृतपात्रेससौवर्णेदृष्ट्वेदात्मनस्तनुं॥ब्राह्मणेभ्योदद्देदन्नंभूयसींचैवशक्तितः॥पश्चात्कांदक्षिणांदद्याद्वित्तशाठ्यंनका

रयेत्॥ स्थानेयत्र स्पृशेत्काकस्तत्स्थानं पूजयेत्तदा॥ एवंकुर्वीत सतो नेन ध्वांक्षदोषः प्रशाम्यति॥ इति काकस्पर्शशांतिः॥ अद्भुतसागरे नारदः॥ भानौ सिंहगते चैव यस्य गौः संप्रसूयते॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥ ततः शांतिं प्रवक्ष्यामि येन संपद्यते शुभं॥ प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्॥ ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः॥ आहुतीनां घृताक्तानामयुतं जुहुयात्ततः॥ सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणां॥ वस्त्रयुग्मं पयश्चैव समवर्णं प्रदापयेत्॥ इष्टदैवतमंत्रेण ततः शांतिर्भवेद्द्विज॥ गर्गः॥ दिवाप्रसूता वडवाश्वा वणे च विशेषतः॥ माघमासे तु पौषे चैव प्रसवेन्महिषी यदि॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायकाः॥ जंगमे स्थावरं जातं स्थावरे वाथ जंगमं॥ तस्मिन् योनिविपर्यासे परचक्रागमो भवेत्॥ त्यागो विवासो दानं वा कृत्वा प्राप्नुं शुभं लभेत्॥ वडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते॥ विजात्यं विकृतं वापि षड्भिर्मासैर्म्रियेत वा॥ वियोनिषु च गच्छंति मैथुने देशनाशनं॥ अन्यत्रैव सरोत्तते नृपं वा जाति मैथुनात्॥ सर्पमूषकमार्जारमत्स्यश्वानविवर्जिताः॥ ज्ञेया दुर्भिक्षकर्तारः स्वजातिपिशिताशनाः॥ अकालजो मदोद्घोरश्च पुष्पान्मृगपक्षिणः॥ अन्यजाति भयं तस्मात् धेनुश्वानौ विशेषतः॥ अथानड्वानड्वाहं धेनुर्धेनुं पिबेद्यदि॥ मुनी बाधयते धेनुं मुनीं धेनुरथा पिबा॥ तिर्यग्यो नौ मानुषी वा परचक्रागमो भवेत्॥ अमानुषा मानुषाणि जल्पंति प्राणिनो यदि॥ विकृतं वा प्रसूयते परचक्रागमं वदेत्॥ त्यागो विवासो दानं वा तेषां कार्यं विजानता॥ तर्पयेद्ब्राह्मणांश्चैव जपहोमांश्च कारयेत्॥ मृदंगवाद्यैः पटहैः सुशोभनैः पूजा च कार्या त्रिदिवौकसानां॥ धातुस्त येज्या विधिना च कार्या देयं तथान्नं बहु च द्विजेभ्यः॥ गर्गः॥ वृंतं वा मुशलं वापि स्फुटते वाप्युलूखलं॥ वृंतं दलनयंत्रं॥ भूतानां चैव विभ्येत गृहे देवकुलेथवा॥ दर्षद्वा भद्रपीठं वा आसनं शयनं तथा॥ अकस्मात्स्फुटते यत्र कंपते वा वसुंधरा॥ इत्यादीनि निमित्तानि चुक्ष्का शांतिरप्युक्ता तेनैव॥ अश्वत्थसमिधो हुत्वा घृताक्ता मधुसंयुताः॥ सावित्र्या षट्सहस्रेण प्राजापत्यास्तु मंत्रयेत्॥ प्राजापत्याः प्रजापतिर्देवत्याः॥ पायसं भोजयेद्द्विजा

न्हुतांतेभूरिदक्षिणा॥ ततस्तच्छाम्यतेपापंधर्मराजमतंयथा॥ सए
व॥ कृष्णाःपिपीलिकायत्रग्रामेषुनगरेषुवा॥ अतिमात्रंतुदृश्यंतेऊ
र्ध्वंवंशाकुलालयाः॥ शांतिगृहेदेवगृहेतथानरपतेर्गृहे॥ उपर्युपरिमा
त्रंतुदृश्यतेवेश्मवत्तदा॥ मक्षिकामशकादंशाअतिमात्रंभयावहाः
। ईदृशैर्लक्षणोत्पातैर्महाचौरभयंभवेत्॥ द्रव्याणांहरणंब्रूयात्परच
क्रस्यचागमं॥ तत्रशांतिंप्रवक्ष्यामिविश्वामित्रोपदर्शितां॥ अश्वत्थ
समिधश्चैवहुत्वाचाष्टोत्तरंशतं॥ पूर्णपात्राणिदातव्याहुतांतेभू
रिदक्षिणा॥ दासीदाससमायुक्तंगृहंदद्याद्द्विजातये॥ तिलपात्रंप्रदा
तव्यंतिलान्जुहुयात्ततःसंयतः॥ मृतःश्मशानंनीतःपुनर्जीवतिमान
वः॥ गृहेयस्यप्रविष्टोसौतिष्ठेदथकदाचन॥ अचिराच्छून्यतांयातिहृ
तदारपरिग्रहः॥ तत्रशांतिंप्रवक्ष्यामिधर्मराजमतंयथा॥ सक्षीराणां
घृताक्तानामग्नौहुत्वासुखंबुधः॥ उदुंबरीणांविधिवत्ततःशांतिःकृ
ताभवेत्॥ सावित्र्यष्टसहस्रेणक्षीरशांतिंचकारयेत्॥ रक्तानामेकेः
स्यादिवक्ष्यमाणाक्षीरशांतिः॥ कपिलंचतथाकांस्यंहुतांतेभूरिदक्षि
णा॥ ततस्तच्छाम्यतेपापंधर्मराजमतंयथा॥ सएव॥ अनारोग्यमना
वृष्टिर्दुर्भिक्षंजनमारकं॥ ज्वरःकासस्तथाश्वासःकंडूर्देहविकोचिकाः॥
शिरोरोगोक्षिरोगश्चपांडुरोगोगलग्रहः॥ व्याधयश्चप्रवर्तंतेदुर्दृष्टैः
स्वप्नलक्षणैः॥ तत्रशांतिंप्रवक्ष्यामिबृहस्पतिमतंयथा॥ त्रिरात्रोपो
षितोभूत्वाहविष्याशीपुरोहितः॥ सक्षीराणांघृताक्तानांसमिधानां
शतंसहेत्॥ पलाशस्येतिशेषः॥ ततस्तच्छाम्यतेपापंबृहस्पतिमतं
यथा॥ सएव॥ वज्रमिंद्राशनिर्वापिज्वलन्वापततेयदि॥ पुरेजन
पदेवापितत्रविद्यान्महद्भयं॥ संवत्सरेतताघोरेविंद्याच्चैवजनक्ष
यं॥ राजामात्यविनाशंचनिर्दिशेन्नात्रसंशयः॥ तत्रशांतिंप्रवक्ष्या
मिइंद्राग्निवचनंयथा॥ अपामार्गस्यसमिधांसहस्राष्टोत्तरंभवेत्
पायसंभोजयेद्विप्रान्क्षीरशांतिंचकारयेत्॥ रक्तानामेकवर्णाः
नांगवांक्षीरंसमादिशेत्॥ समादिशेद्धोमार्थंसंपादयेत्॥ हुत्वा
हुतिशतंविप्रोमहेंद्रैणैवमंत्रवित्॥ महेंद्रेणमहांइंद्रायओज
सेत्यादिना॥ सुवर्णमपिसंकाशाहुतांतेभूरिदक्षिणा॥ गोरितिशे

षः॥ततस्तच्छाम्यतेपापमिंद्राग्निवचनंयथा॥शौनकः॥अथयस्
स्यमणिककुंभस्थालीदर्पणमायासोराजकुलविवादोवायानच्छ
त्रशय्यासनावसथध्वजगृहैकदेशप्रभंजने॥गजवाजिमुख्याः
प्रमीयंतेवाहस्तिनोवामाद्यंति॥इत्येवमादीनि॥तान्येतानिसर्वा
णिइंद्रदैवत्यान्यद्भुतानिप्रायश्चित्तानिभवंतिइंद्रोदेवताकर्त्ताहर्त्ता
चयेषांतानींद्रदैवत्यानिअद्भुतानितेषुप्रायश्चित्तान्यपींद्रदैवत्या
निभवंति॥इंद्रंविश्वेतिस्थालीपाकंहुत्वापंचभिराज्याहुतीर्जुहोति
इंद्रायस्वाहा॥शचीपतयेस्वाहा॥सर्वपापशमनायस्वाहेतिव्याहृ
तिभिश्चपृथक्पृथक्॥सएव॥गृहद्वारेणवासर्पोगच्छतिकपोतंप्र
विशतिशरीरेरोहतिकृष्णस्त्रीदर्शनमेवमादीनितान्येतानिसर्वाणि
यमदैवत्यानिअद्भुतानिप्रायश्चित्तानिभवंति॥नाकेसुपर्णमितिस्था
लीपाकंहुत्वा पंचभिराज्याहुतीर्जुहुयात्॥यमायस्वाहा॥प्रेताधिप
तयेस्वाहा॥दंडपाणयेस्वाहा॥सर्वपापनाशनायस्वाहेतिव्याहृति
भिश्चपृथक्पृथक्जुहोति॥सएव॥दिशोदशदह्यंति॥केतवश्चो
त्तिष्ठंति॥गवांशृंगाद्रुधिरंस्रवति॥अत्यर्थंहिमांशुस्तपति॥इत्येवमा
दीनिसर्वाणिसोमदैवत्यान्यद्भुतानिप्रायश्चित्तानिभवंतिसोमंराजा
नमितिस्थालीपाकंहुत्वापंचभिराज्याहुतिभिरभिजुहोतिसोमाय
स्वाहा॥नक्षत्राणांपतयेस्वाहा॥सीरपाणयेस्वाहा॥ईश्वरायस्वाहा॥
सर्वपापशमनायस्वाहा॥व्याहृतिभिश्चपृथक्पृथक्जुहोति॥अथा
श्वशांतिः॥गर्गः॥अश्वशांतिंप्रवक्ष्यामिशृणुशौनकयत्नतः॥अश्वशा
लासमीपेतुकुंडंकुर्याद्विधानतः॥उत्खातंहस्तमात्रंचआयामंचतथा
भवेत्॥मेखलात्रयसंयुक्तंयोनिरश्वत्थपत्रवत्॥कुंडस्योत्तरपूर्वेतु
वेदिंकुर्यात्सुशोभनां॥सार्द्धहस्तंतथायाममुत्सेधंहस्तमात्रकं॥वर्तु
लांचतुरस्रांचदेवानांस्थापनायच॥कुर्यादष्टदलंपद्मंतंदुलैर्वेदिको
परि॥तन्मध्येपूजयेद्देवंसुवर्णेनप्रकल्पितं॥अश्वारूढंमहातेजंस
शहस्तंमहाबलं॥अश्वारिष्टहरंशूरंदेवंतंहयवल्लभं॥देवेंद्रंचधराधी
शंसुवर्णेनप्रकल्पयेत्॥वरुणंचतथेशानंरजतेनप्रकल्पितं॥यमंच
काललोहेनताम्रेणापितथैवच॥निरृतिंचतथावायुंनागेनैवप्रकल्प

येत्॥सोमंचयजतेनैवकल्पयेत्सुसमाहितः॥कृत्वैवंलोकपालांश्च
स्वेषुस्थानेषुविन्यसेत्॥आवाहैर्घ्नैपाद्याद्यैर्गंधपुष्पादिकैःशुभैः॥धू
पदीपैश्चनैवेद्यैःपूजयेन्मंत्रपूर्वकं॥पंचामृतेनस्नपनंकुर्याद्देवस्यमं
त्रकैः॥त्यमूषुवाजिनमितिमंत्रेणावाहनंचरेत्॥अश्वस्तूपरोगवेति
कुर्यात्संस्थापनंबुधः॥मानस्तोकेतिमंत्रेणस्नानंसम्यक्प्रकल्पये
त्॥युवंवस्त्राणीतितथावस्त्रंचैवप्रदापयेत्॥यज्ञोपवीतंदातव्यंदे
वस्यत्वेतिमंत्रतः॥विन्तदापेतिमंत्रेणअर्चयेत्सुसमाहितः॥गंधद्वारे
तिवैगंधंपुष्पंश्रीश्चतथैवच॥धूरसीतितथाधूपंदीपंचापिविशेषतः
॥अन्नपतेतिमंत्रेणनैवेद्यंवहुकल्पयेत्॥एवंसंपूज्यविप्रेंद्रस्तिपुत्रं
हयाधिपं॥ततःसंपूजयेद्धीमान्लोकपालान्समंत्रतः॥इंद्रंवोविश्व
तःशक्रंअग्निंदूतेतिपावकं॥यमायसोमेतियमंनिर्ऋतिंमोषुणेतिच
॥त्वन्नोअग्नेतिवरुणंतववायेतिचानिलं॥सोमोधेनुंतथासोमंकद्रुद्रे
तितथाशिवं॥पूजयेद्गंधपुष्पाद्यैर्धूपदीपनिवेदनैः॥क्रमेणपूजयेद्दि
श्यंदेवान्संपूजयेत्ततः॥अश्वारूढमहावीरतुरंगेशमहाबल॥अश्वा
रूढंचरेवंतंशान्त्याचाश्वविनाशय॥आखंडलगजारूढवज्रहस्तसुरे
श्वर॥वज्रेणतुरगारिष्टंभिन्नंकुरुशचीपते॥मेषारूढमहातेजोज्वल
ज्ज्वालाविभूषितः॥तीक्ष्णासिनाहुतवहअश्वारिष्टंविनाशय॥काल
दंडधरोदेवमहामहिषवाहन॥कालदंडेनदंडोत्थमश्वारिष्टंविनाश
य॥खड्गहस्तमहाभीमनिर्ऋतेप्रेतवाहन॥छिन्नंकुरुहयारिष्टंती
क्ष्णखड्गेनशीघ्रतः॥पाशहस्तजलाधीशसदामकरवाहन॥पाशेनचह
यारिष्टंभिन्नंकुरुजलाधिप॥ध्वजहस्तमहाकायमृगारूढमहाबल॥
ताडयस्वहयारिष्टंध्वजदंडेनवानिल॥शक्तिहस्तमहाराजकुबेरनरवाह
न॥अश्वारिष्टंचयक्षेशशक्त्याचाशुविनाशय॥शूलहस्तमहारौद्रपिना
किन्वृषवाहन॥नाशयाशुहयारिष्टंत्रिशूलेनत्रिलोचन॥एवंसंप्रार्थ्य
विप्रेंद्रलोकपालक्रमेणच॥अग्नेःसंस्थापनंकृत्वाकुंडेहोमंचकारयेत्॥
तिलव्रीहियवैश्चैवप्रत्येकंचाढकाढकं॥होमंकुर्यादश्वकामश्चरुणाघृ
तपूर्वकं॥स्थापयित्वाज्यसंस्थालींतस्येनाज्येनयत्नतः॥इत्यंसर्वैश्चमंत्रै
श्चदेवमुद्दिश्यकारयेत्॥अग्नयेस्वाहा॥सोमायस्वाहा॥वायवेस्वाहा॥वि॰

ष्यावे स्वाहा॥ सर्वज्ञाय स्वाहा॥ सर्वदुरितनाशाय स्वाहा॥ रेवंताय स्वा
हा॥ सर्वकामप्रदाय स्वाहा॥ प्रजापतये स्वाहा॥ सर्वत्र होमः कार्यः॥
अग्निरन्नादोन्नपतिरन्नाद्यमस्मिन् यज्ञे यजमानाय ददातु स्वाहा॥ सो
मो राजा राजपतिं एवं सर्वत्र होमविधिः॥ इत्थं कृत्वा होमकर्म आचा
र्यो विधिवत्ततः॥ शन्नो भवंतु मंत्रेण अश्वशालां प्रवेशयेत्॥ पवित्रंतेति
मंत्रेण अश्वान् संप्रोक्षयेद्द्विजः॥ एषवाजीति मंत्रेण तथाश्वांश्च विस
र्जयेत्॥ मानो मित्रेति मंत्रेण तुरंगान् स्थापयेत्सुधीः॥ पूर्णाहुतिं च जुहु
याद्विच्छिन्नघृतधारया॥ भूतेभ्यश्च बलिं दद्यात् छिन्नांतं मंत्रपूर्वकं॥
असुराः पन्नगा यक्षा यातुधानाश्च राक्षसाः। पिशाचाः सिद्धगंधर्वा वेता
ला योगिनी शिवा॥ डाकिनी लाकिनी चैव शाकिन्या जंबुकादयः॥ अश्वारि
ष्टप्रशांत्यर्थं बलिं गृण्हंत्वमी ग्रहाः॥ इत्थं दत्वा बलिं सम्यक् भूतेभ्यश्च वि
धानतः। अश्वं च दक्षिणायुक्तं घृतिनीं वत्ससंयुतां॥ उद्दिश्य भास्करं देवमा
चार्याय प्रदापयेत्॥ आकृतीर्दैवतानां च द्विजेभ्यो वस्त्रसंयुताः। दद्यान्ना
दक्षिणायुक्ताः श्रद्धापूतः समाश्रितः। आकृतीः प्रतिमाः॥ देवानामिंद्रादी
नां। अनेन विधिना कृत्वा हयानां शांतिकं महत्॥ अश्वानां नीरुजत्वं च ब
लं पुष्टिबलं तथा॥ लक्ष्मीः स्थिता मनूनां च संग्रामे विजयो भवेत्॥ ब्राह्म
णान् भोजयेत्पश्चात्ततः शांतिर्भविष्यति॥ इत्यश्वशांतिः॥ अथ गजशांतिः
॥ सनत्कुमार उवाच॥ अथ राजा प्रकुर्वीत चतुर्थ्यां गजवाजिनां॥ शांतिमा
मयतप्तानां तदुत्पातोदये सति॥ कवलानि च नादत्ते यदा त्वश्रूणि मुंचति
॥ स्तब्धः प्रशांतो निर्वेदो स्यान्मदेन विवर्जितः॥ विहीनमतिरत्यर्थं परि
क्षीणतनुर्द्विपः। विमानात्वस्तसर्वांगगुप्तो नष्टपराक्रमः। नष्टशोभः स
दाहीनो नष्टसंज्ञो रुषान्वितः॥ नानाव्याधिसमुत्थाभिः पीडाभिः पीड्यते
यदा॥ अरिष्टोपनिपातेषु तस्योत्सातभयेषु च॥ तदा शांतिं प्रकुर्वीत गजर
क्षापरो नृपः॥ अरिष्टाद्यशुभं त्वेवं वाजिनां लक्ष्यते यदा॥ युद्धारंभेषु च
तथा तेषां शांतिं च कारयेत्॥ शांत्यर्थं गजवाजीनां मंडपं चतुरस्रकं॥ द्वाद
शारत्निमानेन संमितं कारयेत्सुधीः॥ बाहुप्रमाणं मध्ये तु वेदिं नाभिस
मुज्ज्वलं॥ कुंडं त्रिमेखलं कुर्यात् वृत्तं वा चतुरस्रकं। तत्पुरस्ताद्दक्षिणतः
पश्चिमे चोत्तरे तथा॥ चतुरस्रं ततः कुर्यात् कुंडं हस्तप्रमाणकं॥ कोणेषु च

तथाकुर्याद्वृत्तंचाष्टत्रिकोणकं॥अर्कस्वादिरपालाशबिल्वाश्वत्थवटेऽपि
॥औदुंबरअपामार्गसमिद्भिस्तत्रतत्रच॥मध्येसर्वसमिद्भिर्वापालाशैर्वा
ज्यबिल्वकैः॥तिलतंडुललाजाभिःसक्तुसिद्धार्थशालिभिः॥यवैरेभिस्त्रि
मध्वक्तैर्मध्येसर्वैरितिस्थितिः॥दत्वाचपयसाचैवघृतेनमधुनापिवा॥
कोणेषुचतथाज्येनमध्येतुकलशैरपि॥स्थापयेत्ततःकुंभानष्टावष्टासु
दिक्षुच॥वस्त्रयुग्मेनसंछन्नान्सर्वौषधिसमन्वितान्॥सर्वरत्नयुतान्
युग्मान्गंधपुष्पोदकैरपि॥हस्तावरप्रमाणंतुबृहत्कुंभंतुमध्यमे॥तीर्थो
दकेनसंपूर्णसर्वरत्नौषधैरपि॥चतुरःकलशांस्तत्रचतुर्थस्यसमंततः
कोणेषुचयथान्यायंजलवस्त्रादिकैर्युतान्॥स्मरेत्प्रधानंकुंभेतुनरसिं
हाकृतिंहरिं॥चक्रशंखगदापद्मचर्मासिशरशक्तयः॥पूर्वादिक्रमयोगे
नध्यातव्यंकलशेष्वपि॥वह्निःशक्रादिदिक्पालांस्तत्रतत्रचसंस्मरेत्
प्रधानकुंभात्पुरतःकुर्याच्चकंतुमंडलं॥तत्रसंपूज्यदेवेशंपश्चाद्धोमादि
साधयेत्॥मंडलाग्रेतदाकुंभंकुंभाग्रेकुंडमेवच॥सर्वत्रानलसंस्कारान्
स्वगृह्योक्तेनकर्मणा॥जुहुयादग्निसिध्यर्थमाज्याहुतिसहस्रकं॥आ
नुष्टुभेनमंत्रेणगुरुर्वास्यपुरोहितः॥आनुष्टुभोनृसिंहमंत्रोदशसाहस्र
मिष्यते॥समिद्भ्यश्चरूण्येवंहुत्वामंत्रीसमाहितः॥संपल्याज्याहुती
नांचसहस्रंवाःयुतंचरेत्॥ततःस्विष्टकृदित्यादिसमापनविधिःक्रमा
त्॥एवंसमाप्यविधिवद्धोमंतत्रपुरोहितः॥संस्पृशेद्रुद्रकुंभंचजपेद्दश
सहस्रकं॥पर्यंतकलशान्स्पृष्ट्वाजपेत्तत्रसहस्रकं॥अनंतरेषुकुंडेषुगायत्र्या
प्रणवेनवा॥ऋत्विग्भिर्युगपत्कार्यंहोमंतत्रंतुपूर्ववत्॥प्रतिकुंभंसहस्रंचजपेत्तान
प्युपस्पृशन्॥पूजयेल्लोकपालादीन्गंधादिभिरलंकृतः॥अथराजानमाकार्यस्ना
स्तीर्णेसिंहविष्टरे॥समाप्यचशुचिस्नानंसर्वालंकारसंयुतं॥कुंभोदकेनदेवाग्रे
तन्मंत्रेणाभिषेचयेत्॥पर्यंतकलशैश्चापिनृपंपश्चाद्गजादिकं॥अन्यां
श्चवाहनान्पूज्यदिव्यलक्षणसंयुतान्॥गजादिनावशिष्टेनतोयेनस्ना
पयेद्बुधः॥अन्यवाहान्हिपायातान्सर्वानेवसमाहितः॥बाह्यकुंभोद
के नैवस्नापयेच्छत्रसाधकः॥राज्ञोनीराजनंकुर्याद्वाहनेषुचमंत्रवित्॥
अन्येष्वेवंविधिःकार्य्यःसहिरत्नकरःपरः॥राजानंवाहनादींश्चतथान्यां
श्चपुरोहितः॥सर्वालंकारसंयुक्तान्सर्वमंगलसंयुतान्॥कृत्वातुवाचये

तस्माद्ब्राह्मणे राशिषो बद्धु॥ दक्षिणामप्यलं दत्वा ऋत्विग्भ्यो गुरवे नृपः॥
वाहनं वस्त्रभूषाया मा चार्याय निवेदयेत्॥ दासदासीषु भृत्येषु ग्रामादि
षु च सर्वशः॥ सर्वालंकारसंयुक्तं राजवाहोपरिस्थितं॥ मंत्रहीपैर्हयैश्चै
व ब्राह्मणैः स्वस्ति वाचनैः॥ सानंदैश्चैव ऋत्विग्भिर्वृद्धैर्मंत्रवरैस्तथा॥
आचार्यो राजभवने नृपं संवेशयेत्स्वयं॥ पूर्वं स्नानावशिष्टेन कुंभतोये
न मंत्रवित्॥ गजशालां च संप्रोक्ष्य वाजिशालां तथैव च॥ सिद्धार्थतंडु
ल तिलैः पुष्पैर्वाप्यवकीर्य च॥ शाला मध्ये नृपः सिंहं सुदर्शनमनामयं॥
पूजयेद्गंधपुष्पाद्यैः सर्वालंकारसंयुतैः॥ सक्तुभिः कृसरान्नेन कुर्याद्भू
तबलिं बहिः॥ ततः शालासु सर्वासु ब्राह्मणान् भोजयेद्बहून्॥ ततः सं
वेशनं कुर्यादाचार्यो गजवाजिनां॥ एवं शांतिं प्रकुर्वीत निमित्ते सति तद्गु
रुः॥ सपरिच्छदस्य नृपतेर्मंत्रवित्सुसमाहितः॥ सर्वकल्याणसंपूर्णः स
र्वबाधाविवर्जितः॥ सपुत्रो राजमंत्रस्तु नृपस्तेन महीयते॥ इति गजशांतिः
॥ अथ महाशांतिः॥ श्रीकृष्ण उवाच॥ महाशांतिं प्रवक्ष्यामि महादेवेन भाषि
तां॥ पार्थिवानां हितार्थाय महादुस्तरतारिणीं॥ नृपाभिषेके सा कार्या
यात्राकाले नृपस्य तु॥ दुःस्वप्ने दुर्निमित्ते च ग्रहवैगुण्यसंभवे॥ विद्युदुल्कानिपाते च
जन्मर्क्षे ग्रहभेदने॥ केतूदये च निर्घाते क्षितिकंपस्य संभवे॥ प्रसूतौ मूलगंडांते यम
लस्य च संभवे॥ छत्राणां च ध्वजानां च स्वस्थाना त्पतने भुवि॥ काकोलूककपोतानां
प्रवेशे वेश्मनस्तथा॥ क्रूरग्रहाणां चक्रेषु जन्मादिषु विशेषतः॥ जन्मनि
द्वादशे चैव चतुर्थे वाष्टमे तथा॥ यदा स्युर्गुरुमंदाराः सूर्यश्चैव विशे
षतः॥ मंदः शनिः॥ आरो भौमः॥ युद्धे ग्रहाणां सर्वेषां सूर्ये शीतांशुकीलके॥ वस्त्रायुधगवाश्वेषु संस्थिते शयनासने॥ यदाग्निः परिदृश्येत वा
चाविद्ध धनुस्तथा॥ वेश्मनश्च तुलाभंगे गर्भे च स्वस्तरीषु च॥ रविबिं
बे दृश्यते दृष्टे महाशांतिः प्रशस्यते॥ सर्वाणि दुर्निमित्तानि प्रशमं यांति
सर्वशः॥ तां कुर्युर्ब्राह्मणाः संच कुलशीलसमन्विताः॥ चतुर्वेदास्त्रिवेदा
श्च द्विवेदाश्चापि पांडव॥ आथर्वणा विशेषेण बद्धचास्तु सुसंयताः
शुचयः श्रुतसंपन्ना जपहोमपरायणाः॥ कृच्छ्रोपवासनक्ताद्यैः कृत
कायविशोधनाः॥ पूर्वमाराध्य मंत्रांस्तु प्रारभेत ततः क्रियाः॥ मंत्रान्वि
नियोक्ष्यमाणान्॥ दशाहं द्वादशाहं स्तं वा मंडपं कारयेच्छुभं॥ तन्मध्ये वेदि

कांकुर्याञ्चतुर्हस्तप्रमाणतः॥आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभ
नं॥मेखलात्रयसंयुक्तं योन्या चापि समन्वितं॥रवींदोरुपरागेषु महो
ल्कापतनेषु च॥उत्पातेषु तथान्येषु निमित्तेषु च सर्वशः॥सर्वारिष्टोपश
मनाम महाशांतिः प्रशस्यते॥चारुचंदनमालैश्च तोरणालंकृतेन तथा॥गो
मयेनोपलिप्ते च मंडपे वै द्विजातयः॥शुक्लांबरधराः स्नाताः शुक्लमाल्या
नुलेपनाः॥कर्म कुर्युरिति शेषः॥ततश्च पंच कलशांस्तस्यां वेद्यां निवेश
येत्॥आग्नेयादिषु कोणेषु पंचमं मध्यतस्तथा॥अष्टपत्रकृते पद्मे चू
तपल्लवधारिणं॥ब्रह्मकूर्चविधानेन पंचगव्यं तु कारयेत्॥ब्रह्मकूर्चविधा
नं गोमूत्रं ताम्रवर्णाया इत्यादिना ब्रह्मकूर्चप्रकरणे चोक्तं॥औषधीः पंचर
त्नानि रोचनां चंदनं तथा॥सिद्धार्थकान् शमीं दूर्वां कुशान् व्रीहियवांस्त
था॥अपामार्गफलवतीं न्यग्रोधोदुंबरौ तथा॥प्लक्षाश्वत्थकपित्थांश्च
प्रियंगूश्चूतपल्लवान्॥हस्तिदंतमृदं चैव कोणकुंभेषु विन्यसेत्॥फलवती
गंधप्रियंगुः॥प्रियंगुकंगुः॥पुण्यतीर्थोदकोपेतं पंचगव्यं च मध्यमे॥कृत्वं
वाचमितीदं च वन्हिकुंभाभिमंत्रणं॥आप्युः शिशानं नैर्ऋत्ये यद्देवा वायु
गोचरे॥ईशावास्यं चतुर्थस्य कुंभस्य त्वभिमंत्रणं॥मध्यमे त्वथ जप्तव्या रु
द्राः कुंभे यजुर्भवाः॥गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः॥फलैश्च नालि
केराद्यैर्दीपकैः कुंभपूजनं॥स्वस्तिवाचनकं चैव कारयेत्तदनंतरं॥क्रमेणानेन
शनैरग्निकार्यं च योजयेत्॥अनेन वक्ष्यमाणेनाग्निं दूतमिहाग्निं च पूर्वमेव निधापये
त्॥पूर्वं कलशस्थापनात्॥हिरण्यगर्भः समितिब्रह्मासननियोजने॥कुशा
नसाप्रणीताश्च मंत्रेण विनिवेशयेत्॥कृत्वा चास्तरणं वन्हेराज्यसंस्कारमे
व च॥अथवा सादयेद्वन्हिं द्रव्यं यस्य प्रयोजनं॥ततः पुरुषसूक्तेन पायसश्र
पणं भवेत्॥अभिघार्याग्नसंसिद्धं पायसं स्थापयेद्भुवि॥अष्टादशप्रमाणे
ध्मान्दद्यादश्वशमीमयान्॥पालाशीः समिधः सप्त सप्तैतद्वि निदापयेत्॥आघा
रावाज्यभागौ तु हुत्वा पूर्वक्रमेण तु॥जुहुयादाहुतीः सप्त जातवेदस इत्यृचा
॥स्थालीपाकस्य जुहुयात्तु नैर्वै जातवेदसे॥तरत्समंदीसूक्तेन च तस्रो जुहुया
त्ततः॥यमायेति सप्तान्याः स्वाहांता जुहुयात्ततः॥स्वाहांता इति सर्वत्र योज्या इ
दं विष्णुस्ततः सप्त जुहुयादाहुतीर्नृप॥नक्षत्रेभ्यस्ततः स्वाहा सप्तविंशतिरा
हुतीः॥नक्षत्राहुतयश्च कृत्तिकाभ्यः स्वाहेत्यादिभिर्मंत्रैः कार्याः॥तत्र रो

हिणीद्वयपुष्यहस्तादित्रयानुराधात्रियाभिजिद्वयशतभिषक्रेवती ष्वेकवचनं॥ पुनर्वसुफाल्गुनीद्वयविशाखाश्विनीषुद्विवचनंशेषेषुबहु वचनं॥ यत्कर्मणेतिजुहुयात्ततःस्विष्टकृतंपुनः॥ ग्रहहोमस्ततःकार्यस्तिलैराज्यपरिप्लुतैः॥ अत्रतिलविधानंवैकल्पिकायवादिनिवृत्यर्थं॥ प्रायश्चित्तंततोहुत्वाहोमकर्मसमापयेत्॥ ततस्तुतूर्यनिर्घोषैःकाहलाशंखनिस्वनैः॥ यजमानस्यकर्त्तव्योह्यभिषेकोद्विजोत्तमैः॥ काश्मर्यवृक्षसंभूतेसमेभद्रासनेस्थितं॥ काश्मर्यवृक्षःश्रीपर्णी॥ भद्रासनंवेदीमध्यगतंकुलादुर्निमित्तप्रशांतये॥ पंचभिःकलशैःपूर्णैर्मंत्रैरेतैर्यथाक्रमं॥ सहस्राक्षेणप्रथमंततश्चैवशतायुषा॥ सजोषसा इंद्रइतिचविश्वानिवरुणेतिच॥ द्रुपदादिवेतिचततःस्नापयेयुःसमाहिताः॥ ततोदिशांबलिंदद्याद्विचित्रान्नसमाश्रितान्॥ नमोस्तुसर्वरूक्षेभ्यइतिमंत्रमुदाहरेत्॥ स्नातस्यब्राह्मणाःसर्वेपठेयुःशांतिमुत्तमां॥ शांतितोयेनधारांचपातयित्वासमंततः॥ पुण्याहवाचनंकृत्वाशांतिकर्मसमापयेत्॥ तीर्थेदेवालयेवापिगोदोहंकारयेद्बुधः॥ क्षितिंहिरण्यंवासांसिग्रायनान्यासनानिच॥ विप्रेभ्योदक्षिणांदद्याद्यथाशक्त्याविमत्सरः॥ दीनानाथविशिष्टेभ्योदद्याच्चैवयुधिष्ठिर॥ भोजनंचानिशंदत्वाततःसर्वप्रसिद्ध्यति॥ आयुश्चलभतेदीर्घंशत्रून्विजयतेक्षणात्॥ दुर्गाणिचास्यसिद्ध्यंतिपुत्रांश्चलभतेशुभान्॥ यथाशस्त्रमहाराणांकवचंवारणंभवेत्॥ तथादैवोपघातानांशांतिर्भवतिवारणं॥ अहिंसकस्यदांतस्यधर्मार्जितधनस्यच॥ दयादाक्षिण्ययुक्तस्यसर्वेसानुग्रहाग्रहाः॥ अर्थान्समर्द्धयतिवर्द्धयतेचधर्मंकामंप्रसाधयतितस्यपिनष्टिपापं॥ यःकारयेत्सकलदोषहरींमहार्थांशांतिंप्रशांतहृदयःपुरुषःसदैव॥ चर्मण्वतीतरणिजाशुभसंगमस्यसान्निध्यभाजिकृतशालिनिमध्यदेशे॥ ख्यातामरेहनगरीकिलतत्रराजाराजीवलोचनरतोभगवंतदेवः॥ ॥१॥ ॥ इतिश्रीसेंगरवंशावतंसमहाराजाधिराजश्रीभगवंतदेवाज्ञाजितेमीमांसकभट्टशंकरात्मजभट्टनीलकंठकृतेभगवंतभास्करेशांतिमयूखोद्वादशःसमाप्तः॥

अथशांतिमयूखस्यसूचीपत्रं

इति सूचीपत्रम्

॥ श्री ॥

अथ नीतिमयूखः प्रारभ्यते

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ॥ ॥
काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः १
श्रीकाशीजीमे
ज्ञानवापीके पूर्वफाटकपर
श्रीविश्वनाथजीके पास
महाराजशिवलालदुबेजीके मकानमे ।
काशीसंस्कृतयंत्रालयमे छपी
जिनको लेना होय उनको इसकार्यके संपादक
श्रीयुतबाबू वाराणसीप्रसादजीके पास
याकचौरीगलीमे
भाईप्रतापसिंहजीके दुकानपर मिलेगी
मिति चैत्र शुक्ल ५ गुरुवार ॥
संवत १९३७
तारीख १५ माहे अप्रेल सन १८८० ईसवी ।

॥अथनीतिमयूखःप्रारभ्यते

श्रीगणेशायनमः॥श्रीहरिःशरणम्॥देवर्षिरक्षःसंघानामवाङ्मनस
गोचरम्।प्रत्यक्षमपितद्धामसर्वदासमुपास्महे॥१॥विरोधिमार्गेद्वयद
र्शनार्थंद्वेधाबभूवात्रपरःपुमान्यः॥श्रीशंकरोभट्टइहैकरूपोमीमांसका
द्वैतमुरीचकार॥पितृसौहित्यसंसिद्धिहेतुमुक्त्वाथतत्सुतः।नीलकंठः
प्रकुरुतेराजनीतिंनृपाहृतां॥२॥तत्रराजशब्दःक्षत्रियमात्रेशक्तोनरा
ज्ययोगिनि।अभिषेकोत्तरभाविराज्ययोगात्प्रागपिराजानमभिषिंचे
दित्यादेःशास्त्रीयप्रयोगस्यक्षत्रियमात्रेपिसद्भावादितिनिर्णयःष्व
ष्ट्यधिकरणे॥तस्यचविधिवदभिषिक्तस्यप्रजापालनंधर्मइत्याहम
नुः॥ब्राह्मंप्राप्तेनसंस्कारंक्षत्रियेणयथाविधि॥सर्वस्यास्ययथान्यायं
कर्तव्यंपरिरक्षणं।ब्राह्मसंस्कारोब्राह्मणैःकृतोभिषेकः।अभिषेकविधि
श्चविष्णुधर्मोत्तरे॥इतिसंभृतसंभारोराज्ञःसांवत्सरस्ततः॥कालेभिषे
चनंकुर्यात्तंकालंकथयामिते॥सांवत्सरोज्योतिर्वित्।मृतेराज्ञिनकाल
स्यनियमोत्रविधीयते॥तत्रास्यस्नपनंकार्यंविधिवत्तिलसर्षपैः।घोषयि
त्वाजयंचास्यसांवत्सरपुरोहितौ।अन्यासनोपविष्टस्यदर्शयेत्ताजनं
शनैः॥सम्सांत्वयित्वातुजनंमुक्त्वाबंधनगांस्ततः।अभयंघोषयित्वातु
कालाकांक्षीततोभवेत्॥अत्रयदापूर्वराजनिमृतेन्योभिषिच्यतेत
दासौतिलसर्षपस्नानाद्यभयघोषांतेकृतेन्यासनस्थःप्रजाःपालय
न्नभिषेककालमाकांक्षेत्॥प्राप्तकालेचात्मानमभिषेचयेत्।यदा
तुपूर्वराजनिजीवत्येवकारणांतरादन्योभिषिच्यतेतदाकालप्रती
क्षांतमकृत्वाकालएवाभिषेकःकार्यः।तमेवकालमाह।नाभिषेच्योनृ
पश्चैत्रेनाधिमासेचभार्गव।नप्रसुप्तेतथाविष्णौविशेषात्प्रावृषिद्वि
ज॥प्रावृषोविशेषतोनिषेधोःगतौतद्भिन्नविष्णुशयनकालाभ्यनु
ज्ञानार्थः।नचभौमदिनेरामचतुर्थ्यांचतथैवच।नवम्यांनाभिषेक्त
व्यश्चतुर्दश्यांचभार्गव।ध्रुवाणिवैष्णवंशाक्रंदस्रपुष्योतथैवच।न
क्षत्राणिप्रशस्यंतेभूमिपालाभिषेचने।वैष्णवंश्रवणः।शाक्रंज्येष्ठा।दा

स्त्वमश्विनी। कार्यापौरंदरीशांतिःप्रागेवास्यपुरोधसा॥पौरंदरीयैंद्रीसा
चवक्ष्यते।प्राग्भिषेकादिवसेसोपवासःपुरोहितः।सितमाल्योपवीतश्च
सर्वाभरणभूषितः।वेदिमुल्लिख्यमंत्रेणहुत्वाचविधिवत्ततः।शर्मवर्म
पं
चैवतथास्वस्त्ययनंगणं।आयुष्यमभयंचैवतथैवचापराजितम्।ए
तेपंचगणाअग्रेवक्ष्यंते।संपातवंतंकलशंतथाकुर्याच्चकांचनम्।व
दक्षिणपार्श्वस्थः श्वेतचंदनभूषितः।श्वेतानुलेपनःस्रग्वीसर्वाभरणभू
षितः। आसनस्थःसुखंपश्येन्निमित्तानिहुताशने।पश्येत्पुरन्येचतथा
नृसिंहाद्दैवज्ञवाक्यंनिपुणंचभूयः।सांवत्सरस्याथसदस्यमुख्यःसद
स्यमुख्यस्यपुरोहितश्च।प्रदक्षिणावर्त्तशिखस्तप्तजांबूनदप्रभः॥र
थौघमेघनिर्घोषोविधूमश्चहुताशनः। अनुलोमःसुगंधश्चस्वस्तिका
कारसन्निभः।वर्द्धमानाकृतिश्चैवनंद्यावर्त्तनिभस्तथा।स्वस्तिकवर्द्ध
माननंद्यावर्त्ताराजगृहभेदाः।प्रसन्नार्चिर्महाज्वालःस्फुलिंगरहितो
हि सः।स्वाहावसानेज्वलनःस्वयंदेवमुखंहविः।यदाभुंक्तेमहाभागतदा
राज्ञोहितंवदेत्। हविषश्चयदावह्नेर्नस्याद्विस्त्रमिशिमायितं।शब्दानुक
रणमात्रमेतत्।नव्रजेयुश्चमध्येनमार्ज्जारमृगपक्षिणः। पिपीलिकाश्च
धर्मज्ञतदाकुर्याज्जयंनृपे॥अंगहारादिलाभेनुवन्हेराज्ञोजयंवदेत्॥
तथैवचजयंब्रूयात्प्रस्तरस्याप्यदाहिनि। स्नानंसमारभेद्राज्ञोहोमका
लेपुरोहितः।आदौतुस्वेच्छयास्नातःपुनर्कभिःसमारभेत्। ऋचःप्रयो
गवक्ष्यंते।पुनर्मृद्भिरितिक्वचित्पाठः।पर्वताग्रमृदातावन्मूर्द्धानंशोधयेन्नृपः
।वल्मीकाग्रमृदाकर्णौवदनंकेशवालयात्। इंद्रालयमृदाग्रीवांहृदयंतु
नृपाजिरात्।करिदंतोधृतमृदादक्षिणंतुतथाभुजं। सरोमृदातथापृष्ठं
उदरंसंगमान्मृदा। नदीकूलद्वयमृदापार्श्वौसंशोधयेत्तथा। वेश्याद्वा
रमृदाराज्ञःकटिशौचंविधीयते।गजस्थानात्तथैवोरूगोस्थानाज्जानुनी
तथा।अश्वस्थानात्तथाजंघेराज्ञः संशोधयेद्बुधः।रथचक्रोद्धृतमृदात
थैवचचरणद्वयं।तथैवचकरद्वयमितिक्वचित्पाठः। मृत्स्नातःस्नपनीयः
स्यात्पंचगव्यजलेनतु। ततोभद्रासनगतंमुख्यामात्यचतुष्टयं।बलप्र
धानंभूपालमभिषिंचेद्यथाविधि।पूर्वतोहेमकुंभेनघृतपूर्णेनवाडवः॥
वाडवोविप्रः।दक्षिणेक्षीरपूर्णेनरौप्यकुंभेनक्षत्रियः। दध्नाचताम्रकुंभेन

वैश्यःपश्चिमतोद्विज।माहेयेनजलेनोदक्कुम्भाद्यमात्योभिषेच येत्।
माहेयंगोशृंगपुच्छसंबंधि।ततोभिषेकंनृपतेर्बह्वृचप्रवरोद्विजः।कौ
बेर्यांमधुनारामछंदोगोथकुशोदकैः।संपातवंतंकलशंतथाहृत्यपुरो
हितः।विधायवन्हिरक्षांतुसदस्यैर्यथाविधि।वन्हिंरक्षध्वमितिप्र
श्येत्यर्थः।राजसूयाभिषेकेतुयेमंत्राःपरिकीर्तिताः।तैस्तुदद्यान्महा
भागब्राह्मणानांस्वरेणतु।तेचमंत्राःप्रयोगेज्ञेयाः॥ततःपुरोहितोग
च्छेद्वेदिमूलंतदैवतु॥विभूषितंतुराजानंसंस्थितंभद्रआसने॥भद्रा
सनलक्षणंदेवीपुराणे॥हैमंचराजतंताम्रंक्षीरिवृक्षमयंचवा॥भद्रा
सनंतुकर्त्तव्यंसार्द्धहस्तसमुच्छ्रितम्।सपादहस्तमानंचराज्ञोमांड
लिकांतरान्॥वराहसंहितायां।त्रिविधस्तस्योच्छ्रायोहस्तःपादाधि
कोर्द्धयुक्तश्च।मांडलिकानंतरजित्समस्तराज्यार्थिनांशुभदः॥विष्णु
धर्मोत्तरे।शतछिद्रेणपात्रेणसौवर्णेनयथाविधि।अभिषिंचेतधर्मज्ञः
सम्यग्वेदविशारदः॥याओषधीरोषधिभिःश्रुताभिःसुसमाहितः।
रथेतिष्ठतिगंधैश्चआब्रह्मन्ब्राह्मणेतिच॥बीजैःपुष्पैस्तथासोमं
राजपुष्पवतीतिच।तेनैवचैवमंत्रेणफलैस्तमभिषेचयेत्॥आशुःशि
शानइत्येवंसर्वरत्नैश्चभार्गव।येदेवाःपुरःसदेतिकुशाद्भिःपरिमार्ज
येत्।ऋग्वेदवित्ततोरात्रौरोचनयायथाविधि।मूर्द्धानंचतथाकंठं
धह्वारेतिसंस्पृशेत्॥ततोब्राह्मणमुख्याश्चक्षत्रियाश्चविशस्तथा॥शू
द्राश्चावरमुख्याश्चनानातीर्थसमुद्भवैः।नादेयैःसारसैःकौपैर्नाना
कलशसंस्थितैः॥चतुःसागरजैर्लाभादलाभेद्विजकल्पितैः।गंगायमु
नयोश्चैवनिर्झरैश्चतथाद्रिजैः।छत्रपाणिर्भवेत्कश्चित्केचिच्चामर
पाणयः॥अमात्यमुख्यास्तत्कालेकेचिद्वेत्रधरास्तथा॥शंखभेरीनि
नादेनबंदिनांनिस्वनेनच॥गीतवादित्रघोषेणद्विजकोलाहलेनच॥
राजानमभिषिंचेयुःसमेत्यसहिताजनाः।सर्वलोकाभिषिक्तस्यसंमि
श्रजलसंयुतं।सर्वौषधियुतंपुण्यंसर्वगंधयुतंतथा।रत्नबीजसमायुक्तं
फलपुष्पसमन्वितं।पूजितंसितसूत्रेणवेष्टितग्रीवमेवच।श्वेतवस्त्रा
वकीर्णैश्चसंवीतंसुविभूषितं।वस्त्रावकर्तैश्चेतिक्वचित्पाठः।बिल्वप
त्रकुरादिपुष्पकमलाद्याकारतयाकर्त्तितवस्त्रैरितितदर्थः।क्षीरस

लताछन्नंसुदृढंकांचनंनवं॥आदायकलशंराज्ञःस्वयंसांवत्सरस्ततः
मंत्रावसानेकलशंदद्याद्गुरुकुलोद्वह। मंत्राअशीत्युत्तरंशतंवक्ष्यंते
सुरास्त्वामित्याद्याः। दद्यादभिषिंचेत्॥ ततःपश्येन्मुखंराजादर्पणेवा
ज्यसर्पिषि॥ सोष्णीषःसितवस्त्रश्चमंगलालंभनंततः। ततःसंपूजये
द्विष्णुंब्राह्मणांश्च समर्चयेत्॥राजाहौत्राचार्येत्तत्रसांवत्सरपुरोहि
तौ॥ मधुपर्केणधर्मज्ञस्ततस्तस्यसदैवविित्॥ पट्टबंधंप्रकुर्वीततत
स्तस्यचबंधनम्॥ पट्टलक्षणंतुदेवीपुराणे॥ सर्वस्वानमलंकारंसौव
र्णाख्यंचपट्टकं॥ वृद्ध्याग्रं गुलमंगुल्याषड्विंशदंगुलावधि। रत्नं
चतुरस्त्रंवाप्यंकत्रिकगर्भितं। वत्सेशपद्मामस्ये ‾ भगोस्वस्तिक
विनायकैः॥ श्रीश्रीवृक्षवराहेणस्वामिदेवीभुपान्वितम्॥ अग्रं गु
लंसप्तांगुलंएकांगुल्यासहितमष्टांगुलमित्यर्थः॥ ततआषड्विंशदं
गुलंसप्तसप्तांगुलवृद्धिर्वातेनाष्टौपंचदशद्वाविंशतिरेकोनत्रिंशत्ष
ड्विंशद्वांगुलानिदैर्घ्यं। दैर्घ्यार्द्धेनमध्येविस्तारः। तदर्द्धेनांतयोः। सच
तापत्रश्चतुरस्त्रायतोवा॥ पद्मत्रिकंपद्मत्रयं। वत्सः श्रीवत्सः। ईशःशि
वः। इभगौर्वृषदेहंजगन्मुखं। वराहेभोव्येवाकेवलयोर्गजवृषयोर्विश्वक
र्मणानिषेधात्। वाराद्यामपिमध्यविस्तारमुक्त्वासर्वेद्विगुणायामम
ध्यार्द्धेनपार्श्वविस्ताराः। सर्वेविशुद्धकांचनविनिर्मिताःश्रेयसेवृद्धैः।
पंचशिखोभूमिपतेस्त्रिशिखोयुवराजराजमहिष्योः। एकशिखःसे
न्यपतेःप्रसादपट्टोविनाशिखया। विश्वकर्मापि। व्याघ्रव्यालगजाः
सिंहाअश्वोष्ट्रमहिषावृषः। भूषणेषुत्यजेदृष्टीयदीच्छेद्दीर्घजीवितं।
वनेचराजलचराः कृमिकीटपतंगकाः। नतानाभरणेकुर्याद्यदीच्छे
ज्जीवितंचिरं। एवंपट्टबंधानंतरंकार्यमुक्तंविष्णुधर्मोत्तरे। ततःसब
द्धमुकुटः कालेपूर्वमपोदिते। पराद्ध्यास्तरणोपेतेमंचेबद्धोत्तरछदे।
ध्रुवाद्यौरितिमंत्रेणसोपवेश्यःपुरोधसा। वृषस्यवृषदंशस्यद्वीपिनश्च
भृगूद्वह। तेषामुपरिसिंहस्यव्याघ्रस्यचततःपरं। वृषदंशोमार्जारः। द्वी
पीद्वीपांतरगतोव्याघ्रइतितात्वरणाः। नरक्षुरितिकेचित्। तत्रोपवि
ष्टस्यतदाप्रतीहारःप्रदर्शयेत्। अमात्यांश्चततःपौरान्नैगमांश्चापणे
श्वरान्। तथाप्रकृतयश्चान्यायथावदनुपूर्वशः। ततोग्रहारवस्त्रेभतुरंग

कनकोत्तमैः॥ गोजाविगृहदानैश्च सांवत्सरपुरोहितौ॥ पूजयित्वा ततः
पश्चात्पूजयेद्ब्राह्मणत्रयं। अनेनैव विधानेन येन राजाभिषेचितः। ततः
शरद्यागन्तं पूज्य सांवत्सरपुरोधसः। ततो ब्राह्मणमुख्यानां पूजनं तु स
माचरेत्॥ गोवस्त्रतिलरूप्यान्नफलकांचनगोरसैः। मोदकैश्चैव पुष्पै
श्च महादानैश्च पार्थिवः। मंगलालंभनं कृत्वा गृहीत्वा सशरं धनुः। वह्निं
प्रदक्षिणीकृत्य प्रणिपत्य तथा गुरून्। पृष्ठतो वृषमालभ्य गां सवत्सां
च पार्थिवः। पूजयित्वा तु तुरगं मंत्रितं चाभिषेचितं। तमारुह्य ततो नागं
पूजयेच्चाभिषेचितं। मंत्रितं दक्षिणे कर्णे स्वयं दैवविदा ततः। आरुह्य रा
जमार्गेण स्वपुरं तु परिभ्रमेत्। मुख्यामात्यैः ससामंतैः सांवत्सरपुरो
हितैः। सहितः कुंजरारूढैरभिगच्छेच्च देवताः। तासां संपूजनं कृत्वा
नगरं याति वेष्टितः। प्रविश्यात्मगृहं राजा प्रहृष्टनरवाहनः। दानमाना
दिसत्कारैर्गृण्हीयात्प्रकृतीस्ततः। संपूजितास्ताश्च विसर्जयित्वा गृ
हे स्वके स्यान्मुदितो महात्मा॥ विधानमेतत्समवाप्य राजा कृत्स्नां तु धा
त्रीं वशगां विदध्यादिति संक्षेपस्तु गोपथब्राह्मणे॥ अथ राज्ञोभिषे
कविधिं व्याख्यास्यामो बिल्वप्रभृतीन्संभारान्संभृत्य षोडशकल
शान्षोडश बिल्वानि वल्मीकस्य च मृत्तिकां सर्वान्नं सर्वरसान्सर्वबी
जानि। तत्र चत्वारः सौवर्णाश्चत्वारो राजताश्चत्वारस्ताम्राश्चत्वारो मृ
न्मयास्तान्ह्रदे सरसि वा ध्रुवस्तुतो नामैनाम इत्युदकेन पूरयित्वा वे
दिपृष्ठे संस्थाप्य कुंभे बिल्वमेकैकं दद्यात्सर्वान्नं सर्वरसान्सर्वबीजानि
च प्रक्षिप्योभयैरपराजितैरायुष्यैः स्वस्त्ययनैः सौवर्णेषु संपातान्सं
श्राव्यैः संसिक्तायैश्च राजतेषु भैषज्यैर्वैरंहोमुचैस्ताम्रेषु संवेशसं
वर्ग्याभ्यां तातीयैः प्राणसूक्तेन च मृन्मयेषु ततस्तान्कलशान्गृही
त्वास्तैस्त्रिचैः पवित्रैरभिषुयेराजानमभिषिंचेत्॥ भूमिमिंद्रियं चवे
र्द्धयसन्त्रियंम इति सिंहासनमारूढमभिमंत्रयेत्॥ एवमभिषिक्तस्तु
रसान्प्राश्नीयाद्विप्रेभ्यश्च दद्यात्सहस्रं सदस्येभ्यः कर्त्रे ग्रामवरं
विपुलं यशः प्राप्नोति भुंक्ते धरां जितशत्रुः सदा भवेदिति॥ अन्नं तंडु
लादि यत्तु न प्ररोहति। बीजं प्ररोहार्हं व्रीह्यादि। ऊर्ध्वस्तुक्सुख
येषां ते ऊर्ध्वस्तुतः। नामैनाम अभयापराजिताद्या मंत्राः प्रयोगे वक्ष्य

न्ते॥अत्रबहुवचनेत्रयस्त्रयोग्राह्याःकपिंजलन्यायात्।संवर्त्तःसंवे
शप्राणसूक्तेष्वेकैकएवेतिनातचरणाः॥अथप्रयोगः॥तत्रयस्तु
पूर्वराजनिमृतेन्योभिषिच्यतेतदासांवत्सरपुरोहितौतंनित्यस्नान
प्रकारेणतिलसर्षपैःसंस्नाप्यराष्ट्रेयंराजेतितस्यजयमुद्घोष्यपूर्व
राजासनादासनांतरउपवेश्यमंत्र्यादिकंनगरजनांश्चदर्शयेतां
राजाचतान्सत्कृत्यकारागृहनिगडबद्धान्मुक्त्वाऽभयंदत्वातदा
सनस्थएवराज्यंकुर्वन्कालंप्रतीक्षेत।प्राप्तेचाभिषेककालेआत्मान
मभिषेचयेत्।पूर्वस्मिन्राजनिजीवतिकारणांतरेणान्याभिषेके
तुनकालप्रतीक्षातोविधिः॥किंत्वभिषेककालेभिषेकएव।अभि
षेकदिनात्पूर्वमेवकस्मिंश्चिच्छुभदिनेपुरोधाऐन्द्रींशांतिंकुर्यात्।साचैवं।
अथैंद्रीशांतिः।पुरोधाःसुदिनेमासपक्षाद्युल्लिख्यकरिष्यमाणराज्याभि
षेकांगतयाऐन्द्रींशांतिंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाच
नर्त्विग्वरणानिकुंडलांगुलीयकवासआदिभिस्तत्पूजांचकुर्यात्
।ततः।अव्यसश्चव्यचसश्चबिलंविष्यामिमायया।ताभ्यामुद्धृत्य
वेदमथकर्माणिकृण्महे।प्रपन्नःपरशुंलंरयाहरोषमहिषतइतिर
त्रंगृह्णाति॥ओषधाहन्तुपर्वमितिमूलादुपरिबर्हिर्लुनाति।ॐग्रीष्म
स्तेभूमेवर्षाणिशरद्धेमंतःशिशिरोवसंतः।ऋतवस्तेविहिताहायनी
रहोरात्रेपृथिवीनोदुहानमितिभुवमुपस्थाय।विभिर्ब्रह्मैर्यस्वतींघृत
चींदेवान्पंधेनुरपस्पृगेषा।इंद्रःसोमेपि तुरक्षेमोआग्निःप्रस्तोतुवि
मृधोनुदस्वेतिद्वादशांगुलांशमीसमिधमनुमंत्रयते।अथवेदिः।सा
च।षट्समिदायतापूर्वपश्चिमयोः।पश्चिमदिशिचतुःसमिद्विस्ता
रापूर्वपश्चिमयोःप्रत्येकंसमिद्वयंत्यक्त्वामध्यभागेदक्षिणोत्तरयोः
प्रत्येकमर्द्धसमित्त्यागेनसमित्त्रयविस्ताराग्रेसंनमनक्रमेणसार्द्ध
समित्त्रयविस्तारा।तन्मध्येपश्चिमतःसमित्त्रयंपूर्वतःसमिन्मात्रं
त्यक्त्वासमिद्वयचतुरस्राउत्तरवेदिःसाचकुंडात्मिकास्थंडिलात्मिका
वा।उत्तरवेदितःप्राच्यादक्षिणोत्तरयोश्चवेदितोर्द्धसमिन्मितैवभू
मिरस्तिश्रुतिः।ततईशानकोणा त्प्रदक्षिणक्रमेणवालुकयातूष्णीं
हावेदिसामरेखांकुर्यात्।ततःॐबृहस्पतेपरिगृहाण वेदिंसुगावो

देवाःसदनानिसंतु।अस्यांबर्हिःप्रथतांसाध्वंतरहिंस्राणःपृथिवी
देवीदेव्यस्त्कं।इतिरेखांत्रिरनुमंत्रयेत्।ततःप्रथमंमहावेदिमध्ये
।ग्रीष्मस्तेभूमेवर्षाणिशरद्धेमंतःशिशिरोवसंतः।ऋतवस्तेविहि
तानीरहोरात्रेपृथिविनोदुहाना।यत्तेभूमेविखनामिक्षिप्रंतदपिरोह
तु।मातेमर्मविमृग्वरिमातेहृदयमर्पिपंइतिभूमिखननं।ततःॐय
तऊनंतन्नआपूरयातिप्रजापतिःप्रथमजाऋतस्येतिखनितपूरणं
।ततःॐत्वमस्यावपनीजनानामदितिःकामदुघापप्रथानेतिवालु
काभिर्महावेदिंपूरयति।पुनःकुंडात्मिकांस्थंडिलात्मिकांवोत्तरवेदिंप
रिमायपूर्ववद्रेखांकृत्वाबृहस्पतेपरिगृहाणेतिमंत्रेणत्रीन्वारान्संस्पृ
श्यपूर्ववदनुमंत्रयेत्।ततः।असंबाधंबध्यतोमानवानांयस्याउद्वतःप्रव
तःसमंबहुनानावीर्याॐओषधीर्याबिभर्तिपृथिवीनःप्रथतांराध्यतांनःइ
त्युत्तरवेद्यांवालुकांविस्तारयति।ततोयस्याश्चतस्रःप्रदिशःपृथि
व्यांयस्यामन्नंकृष्टयःसंबभूवुः।याबिभर्तिबहुधाप्राणदेजत्सानोभू
मिर्गोष्वप्यन्नेदधात्वितिवालुकाभिर्वेदिंचतुरस्रांकरोति।ततोदेव
स्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रसूतःप्रशिषा
परिगृह्णामीत्यनेनलेखनींगृह्णाति।ततःइंद्रःसीतांनिगृह्णातुतां
पूषाभिरक्षतु।सानःपयस्वतीदुहामुत्तरामुत्तरांसमामित्युत्तरवेद्यां
आग्नेयकोणादारभ्यवामावर्त्तेनचतुर्दिक्षुरेखाःकृत्वापुनरप्याग्नेय
कोणादारभ्यईशानकोणपर्यंतंपूर्ववदुल्लिख्यतन्मध्येपिपूर्वाग्रास्ति
स्रोरेखाःकरोति।अथतस्यांव्रीहियवौतूष्णींविकीर्यवेषणाभूमिःपृथिवीव
तारतासानोदधातुभद्रयाश्रियेधामनि इत्यनेनसंप्रोक्ष्य।ॐयस्याम
न्नंव्रीहियवौयस्याइमाःपंचकृष्टयः।भूम्यैपर्जन्यपत्न्यैनमोस्तुवर्षमे
धसेइतिभुवंनत्वा।ॐत्वामग्नेभृगवोनिषत्तामंगिरसःसदनेप्रियएवहि।
विश्वकर्मापुरएतुप्रजानंधिष्ण्यंपंथानमनुतेतिदिशास्तेभद्रंपंथामनुतेदि
शामःश्रेयंपंथामनुतेदिशामःस्वस्तिपंथामनुतेदिशामइत्यग्निसंनिधा
पनं।ततोभद्राभवश्रेयोभवस्वस्त्योभवेतिव्रीहियवौकांस्यादिपात्रस्थ
एवाग्नौप्रक्षिप्य॥ॐविश्वंभरावसुधानीप्रतिष्ठाहिर— वक्षाजगतो
निवेशनी।वैश्वानरंबिभ्रतीभूमिरग्निमिंद्रऋषभाद्रविणेनोदधात्विस्यु

नरवेद्यामग्निं स्थापयति। ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधाना स्तन्वं
पुषेम। मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेति समि
त्त्रयं जुहुयात्। एवं व्रतग्रहणं तं कृत्वा तेन त्वा व्रतपतइत्येकां समिधं स्वा
हाकारवर्जं हुत्वाग्नेरीशानभागे सौवर्णं रौप्यं ताम्रं वा जलपूर्णं गंध
सर्वौषधिदूर्वापंचपल्लवपंचत्वक्पंचगव्यपंचामृतसप्तमृत्तिका
पुष्पफलपंचरत्नसुवर्णशकलवासोयुतं कलशमक्षतेषु संस्थाप्य
तदुपरि अग्नेः पुरस्ताद्वा चर्ममात्रं गोमयेनोपलिप्य तद्दहतेनोद्गद
शेन वाससा संछाद्य तदुपरि ष्टदलं पद्ममालिख्य तत्र वा पलतदर्द्धत
दर्द्धसुवर्णनिर्मितमिंद्रं संस्थाप्य राजोपचारैः पूजयेत्। तत्रेमा आप इ
ति स्नानं। मधुपर्ककुंडलांगुलीयकाद्याभरणछत्रचामरध्वजपताका
दीन्यर्पयेत्। त्रातारमिंद्रमिति पुष्पांजलिः। ततस्तूष्णीं पवित्रे कृत्वा
विष्णोर्मनसा पूते स्थ इति प्रथमं पवित्राभ्यामिध्मप्रोक्षणं विष्णोर्मन
सा पूतमसीति द्वितीयम्। देवस्त्वा सवितोत्पुनात्वच्छिद्रेण त्वा पवित्रे
ण शतधारेण सहस्रधारेण सुतोत्पुनामीति तृतीयं। चतुर्थं तूष्णीं।
अग्नये त्वा जुष्टं प्रोक्षामीत्यनेनेध्मसंनिधापनं। अथेध्ममादाय ॐ अ
ग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु। अग्निरंतः पुरुषेषु गो
ष्वश्वेष्वग्नयः।१। अग्निर्दिव्य आतपत्यग्नेर्देवस्योर्वंतरिक्षं। अग्निं मर्ता
स इंधते हव्यवाहं घृतप्रियं।२। अग्निवासाः पृथिव्यसितज्ञूस्त्विषी
मंतं संशितमाकृणोतु। भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतं॥ भू
म्यां मनुष्या जीवंति स्वधयान्नेन मर्त्याः। सा नो भूमिः प्राणमायुर्दधातु
जरदष्टिं पृथिवी माकृणोतु॥३॥ एतमिध्मं समाहितं जुषाणो अग्ने प्र
तिहर्य होमैः। तस्मिन्विधेम सुमतिं स्वस्ति प्रजां चक्षुः पशून्समिद्धे जा
तवेदसि ब्रह्मणः॥४॥ अस्मैक्षत्राणि धारयंतमग्ने युनज्मि त्वा ब्रह्मण
त्वा दैव्येन। दीदिह्यस्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दां देवतासु॥
५॥ एभिः पंचभिर्मंत्रैर्जुहोति। ततः त्वं भूमिमत्येष्योजसा त्वं वेद्यां सीद
सि चारुरध्वरे। त्वां पवित्रमृषयो भरंत त्वं पुनीहि दुरितान्यस्मदिति
बर्हिः प्रोक्षणं। ततः ऋषीणां प्रस्तरोसि नमोस्तु दैवाय प्रस्तरायेति दक्षि
णतो ब्रह्मासनं निदधाति। ततोस्मिन्कर्मणि त्वं भूपते भुवनपते भुवांपते

महतोभूतस्यपतेब्रह्माणंत्वांवृणीमहे॥इतिवरणमंत्रंब्रह्माणमुद्दिश्य
कर्त्तापठति॥ततः अहंभूपतिरहंभुवनपतिरहंभुवांपतिरहंमहतोभू
तस्यपतिस्तदहंमनसेप्रब्रवीमिमनोवाचेवाग्गायत्रीगायत्र्युष्णिह
उष्णिगनुष्टुभेअनुष्टुब्बृहत्यैबृहतीपंक्तयेपंक्तिस्त्रिष्टुभेत्रिष्टुब्जग
त्यैजगतीप्रजापतयेप्रजापतिर्विश्वेभ्योदेवेभ्यः ॐभूर्भुवःस्वर्ज्जनदे
इतिब्रह्माजपति।ततः ॐअहेदैधिषव्योदतस्तिष्ठान्यस्यसदनेसीद
योस्मत्पाकतरइतिब्रह्मास्वासनमन्वीक्षते।ॐनिरस्तःपरावसुःसह
पाप्मनानिरस्तःसोस्तुयोस्मान्द्वेष्टियंचवयंद्विष्मः इतिब्रह्मासना
द्दक्षिणेतृणंनिरस्यति॥अथासनमालभ्यजपति॥इदमहमर्वाव
सोःसदनेसीदाम्यृतस्यसदनेसीदामिसत्यस्यसदनेसीदामीष्टस्य
सदनेसीदामिपूर्तस्यसदनेसीदामिमामृषदेवबर्हिःस्वासस्थत्वाध्या
सदेयंतूर्णमृदमनभिशोकं।विमृग्वरींपृथिवीमावदामिक्षमांभू
मिंब्रह्मणावावृधानां॥ऊर्ज्जंपुष्टिंबिभ्रतीमन्नभागंघृतंत्वाभिनिषी
देवभूमे॥अथोपविश्यासनेब्रह्माजपति।बृहस्पतिर्ब्रह्माब्रह्मसदन
आशिष्यतेबृहस्पतेयज्ञंगोपाय।ततः यउद्दृतउत्त्रिवतः शकेयंपात
मंद्यावापृथिवीद्यानइतिद्यावापृथिव्यौसमीक्षते।अथहोतावर्हिर्मु
ष्टिमादायस्तृणानि त्रीन्वारानाग्नेयेत्रीन्दक्षिणतःत्रीन्पश्चिमायांस
कलांस्त्रीनूवायव्येपूर्वेनोमूलानिच्छादयन्स्त्रीनुत्तरतस्त्रीनीशानेयत्रस
मागच्छतितत्रदक्षिणोत्तरंकरोति॥इतिभाष्यम्॥ब्रह्मानापीदेवस्यत्वास
वितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रसूतःप्रशिषापरिस्तृणा
मिइतिपठित्वाआग्नेयकोणादीशानपर्यन्तंपंक्तित्रयंपूर्वाग्रान्दर्भा
नास्तृणाति।एवंप्रथमास्तृतदर्भाग्राच्छादितमूलानुत्तरतोदर्भाना
स्तीर्यनिर्ऋतिकोणादारभ्यपूर्ववत्पंक्तित्रयेणप्रागग्रानाग्नेयपर्यन्तं
॥तथैवनिर्ऋतिकोणादारभ्यवायव्यपर्यन्तंतथैववायव्यकोणादार
भ्यप्रागैशानपर्यन्तंपरिस्तीर्यचरमंईशानपरिस्तीर्णदर्भाग्रान्प्रथ
मनइशानपरिस्तृतदर्भाग्राणांअधःस्थापयेत्।ततःहविषात्वाजु
ष्टंप्रोक्षामीत्यनेनास्तीर्णदर्भाभ्युक्षणं॥अथहोताआस्तीर्णदर्भम
ध्येकांश्चिद्दर्भानादायतान्स्वासनेसमास्तीर्य॥अहेदैधिषव्यइत्यने

नस्वासनमन्वीक्षते॥ निरस्तइत्यादिनातृणंनिरस्यति आसनमाल
भ्यइदमहमित्यादिजपति॥ उपविश्यबृहस्पतिर्ब्रह्मेत्यादिजपति।
परित्वाग्नेपुरंवयंविप्रंसहस्य धीमहि॥ धृषद्वर्णंदिवेदिवे हंतारंभंगु
रावतः इतिउपहूतइत्यादिना द्यावापृथिव्योसमीक्षते ॐ यथाग्ने
ब्रह्मणस्पतिःसत्यधर्माअदीधरद्देवस्यसवितुः सवइत्युक्त्वा ब्रह्मणो
रुत्तरतःस्थापयति॥ ततःपवित्रेनिक्षिप्य ॐ इहैतदेवीरमृतंवसा
नाहिरण्यवर्णाश्चानवद्यत्वयाः। आपःसमुद्रोवरुणाश्चराजासंप
तभागान्हविषोजुषंतां। इंद्रप्रशिष्टावरुणप्रसूता आपःसमुद्रादिव
मुद्धहंतु। इन्द्रप्रशिष्टावरुणप्रसूतांदिवस्पृथिव्याः श्रियमावहंतु॥
अनेनमंत्रेणोदपात्रेउदकंक्षिपति॥ विलीनपूतमाज्यमग्नावधिश्रि
त्यपरित्वाग्नेपुरंवयंविप्रंसहस्यधीमहि। धृषद्वर्णंदिवेदिवे हंतारंभं
गुरावतः इतित्रिःपर्यग्निकृत्वाउद्गुद्वास्यपश्चादग्नेरासाद्यपवित्रा
भ्यामुत्पुनाति॥ ततोदर्भाग्रेणस्रुवसंमार्जनं॥ ततोनिष्टप्तंरक्षोनि
ष्टप्ताअरातयः इतिस्रुवप्रतपनं॥ अथ ॐ विष्णोर्हस्तोसिदक्षिणः
पूष्णोदत्तंबृहस्पतेर्नत्वाहंस्रुवमाददेदेवानांहव्यवाहनंअयंस्रुवो
निदधातिहोमाच्छतान्नरच्छंदसाजागतेन। सर्वयज्ञस्यसमनक्ति
विश्वावाहस्यत्येनशर्मणादैव्येनेति॥ स्रुवाभिमंत्रणं। ततःसंस्कृत
मेवघृतंस्ववामभागेग्नेःपश्चात्स्थापितान्यधानीनामकपात्रांत
रेस्रुवेणकुर्यात् ॐ भूःशंभूत्यैत्वागृह्णेभूतयेइतिप्रथमंगृह्णाति
ॐ भुवःशंपुष्ट्यैत्वागृह्णेपुष्टयेइतिद्वितीयं॥ ॐ स्वःशंत्वागृह्णेस
हस्रपोषायइतितृतीयं। ॐ जनःशंत्वागृण्हेपरिमितपोषायेतिचतु
र्थं। ततःस्रुवेणतत्घृतंजुहुयात्॥ अग्नावग्निश्चरतिप्रविष्टऋषीणां
पुत्रोअभिशस्तिपाउ॥ नमस्कारेणनमसातेजुहोमिमादेवानांमिथु
याकर्मभागंस्वाहा। हृदापूतंमनसाजातवेदोविश्वानिदेववयुनानि
विद्वान्। सप्तास्यानितवजातवेदस्तेभ्योजुहोमिसजुषस्वहव्यंस्वाहा
॥ पुरस्ताद्युक्तोवहजातवेदोग्नेविद्धिक्रियमाणंयथेदं। त्वंभिषग्भेष
स्यासिकर्तात्वयागामश्वंपुरुषंसनेमस्वाहा॥ यज्ञस्यचक्षुःप्रति
ष्ठा मुखंचवाचाश्रोत्रेणमनसाजुहोति। इमंयज्ञंविततंविश्वकर्मणादेवा

यंतुसमनस्यमानाः स्वाहा। इतिहुत्वा। ॐ वृष्णोवृहतेस्वर्विदे अग्न येशुक्रंहरामित्विषीमते। सनः स्थिरान्बलवतः कृणोतुज्योक्चरो जीवानवेत्यंदद्दात्वमग्नयेस्वाहा। इत्युत्तरपूर्वार्द्धे। अथदक्षिणपूर्वार्द्धे। ॐ त्वंसोमदिव्योनृचक्षाः सुगंअस्मभ्यंपथोअनुख्यः। अभिनोगोत्रविदुषइवनेशोच्छानोवाचमुशती जिगायसोमायस्वाहा। इत्याज्यभागौहुत्वा अभ्यातानहोमंकुर्यात्। तद्यथा। सविताप्रसवानामधिपतिः समावतु अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यांपुरोधायामस्यांप्रतिष्ठायामस्यां वित्त्यामस्यामाकूत्यामाशिष्यस्यांदेवहूत्यां स्वाहा॥ सवित्रेप्रसवानामधिपतये॥ अग्निर्वनस्पतीनामधिपतिः इत्यादिपूर्ववत् २ एवंसर्वत्राप्यग्रे॥ द्यावापृथिवीदात्वणामधिपती ३ वरुणोपामधिपतिः ० ४ मित्रावरुणौवृष्ट्या अधिपती ५ मरुतःपर्वतानामधिपतयस्तेमावंतु ६ सोमोवीरुधामधिपतिः ० ७ वायुरंतरिक्षस्याधिपतिः ८ सूर्यश्चक्षुषामधिपतिः ९ चंद्रमानक्षत्राणामधिपतिः १० इंद्रोदिवोधिपतिः ११ मरुतांपिताप्शूनामधिपतिः १२ मृत्युःप्रजानामधिपतिः ० १३ यमःपितृणामधिपतिः १४ ततअवतरेतेमावंत्विति पूर्ववत् १५ ततस्तनामहास्तेमावंत्विति पूर्ववत्॥ अथोत्तरांगानि॥ तत्रपूर्ववत्सप्तदशाहुत्यात्मकं अभ्यातानहोमंकृत्वा शुक्लपक्षश्चेत् पूर्णापश्चादुत पूर्णापुरस्तादुन्मध्यतः पौर्णमासीजिगाय॥ तस्यांदेवाअधिसंवसंतो महित्वानाकस्यपृष्ठेसमिषामदेमस्वाहेतिजुहोति। कृष्णपक्षश्चेत्। यत्तेदेवाअकृण्वन्भागधेयममावास्येसंवसंतो महित्वा तेनोयज्ञंपिपृहिविश्ववारे रयिंनोधेहिसुभगेसुवीरंस्वाहा ॥अथआहूत्यैस्वाहा। कामायत्वास्वाहा। समृधेत्वास्वाहा। आहूत्यैत्वाकामायत्वासमृधेत्वास्वाहा॥ ऋचास्तोमंसमर्धयगायत्रेणरथंतरं। बृहद्गायत्रवर्तनिस्वाहा॥ इत्याहुतिपंचकंजुहुयात्। इतिसमृद्धिहोमः॥ ततः ॐ पृथिव्यामग्नयेसमनमन्त्सआर्ध्नोत्॥ यथापृथिव्याग्नयेसमनमन्नेवामह्यसन्नमःसंनमंतु॥ ततःपृथिवीधेनुस्तस्याअग्निर्वत्सः समेऽग्निनावत्सेमूर्जंकामंदुहाआयुःप्रथमंप्रजांपोषं रयिंस्वाहा॥ अंतरिक्षेवायवेसमनमन्त्सआर्ध्नोत्यथांतरिक्षेवायवेसमनम

न्नेवामह्यंसन्नमःसंनमंतु॥अंतरिक्षंधेनुस्तस्यावायुर्वत्सःसामेवा
युनावत्सेनेषमूर्जंकामंदुहां॥आयुःप्रथमंप्रजांपोषंरयिंस्वाहा॥
दिव्यादित्यायसमनमत्सआप्नोतियथादिव्यादित्यायसमनमन्ने
वामह्यंसन्नमःसंनमंतु।द्यौर्धेनुस्तस्याआदित्योवत्सः।सामआदि
त्येनवत्सेनेषमूर्जंकामंदुहां।आयुःप्रथमंप्रजांपोषंरयिंस्वाहा।दि
क्षुचंद्रायसमनमत्सआप्नोतियथादिक्षुचंद्रायसमनमन्नेवामह्यं
सन्नमःसन्नमंतु।दिशोधेनुवस्तासांचंद्रोवत्सःतामेचंद्रेणवत्सेने
षमूर्जंकामंदुहांआयुःप्रथमंप्रजांपोषंरयिंस्वाहा॥इत्याहुतिचतु
ष्टयंसेननिहोमः॥प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिभूर्जजा
न॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणांस्वाहा॥
इत्युपस्तीर्यहोमः।ततोग्नेरुत्तरपूर्वार्धे।आदेवानामपिपंथामगन्म
यच्छक्नवामतदनुप्रवोढुं।अग्निर्विद्वान्सयजात्सइद्धोतासोध्वरा
न्सऋतून्कल्पयात्यग्नयेस्विष्टकृतेस्वाहाइतिमंत्रेणजुहुयादिति
स्विष्टकृत्।अथैकादशप्रायश्चित्ताहुतीः।स्वाहेष्टेभ्यःस्वाहा।वष
ण्निष्टेभ्यःस्वाहा।भेषजंस्विष्टैस्वाहा॥निष्कृतिर्दुरिष्टैस्वाहा।दै
वीभ्यस्तनूभ्यःस्वाहा।अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमया
असि।अयासामनसाकृतोयासन्हव्यमूहिषेस्वाहा॥ॐस्वाहा
भूः।स्वाहाभुवः।स्वाहास्वःस्वाहाॐभूर्भुवःस्वःस्वाहेतिप्रतिप्रायश्चि
त्तहोमःततःयन्मेस्कन्नमनसोजातवेदोयद्वास्कंद्धविषोयत्रयत्र॥
उत्सुरुषोविप्रुषःसंजुहोमिसत्याःसंतुयजमानस्यकामाःस्वाहेतिस्क
न्नहोमः।यदस्मृतिचकृमकिंचिदग्नउपारिमचरणेजातवेदः॥ततः
पाहित्वंततःप्रचेतःशुभेसखिभ्योयअमृतत्वमस्तुतःस्वाहा।इत्य
स्मृतिहोमः॥ततःमहद्यत्वाप्रयतियज्ञेअस्मिन्होतश्चिकितन्नवृणी
महीह।ध्रुवमयोध्रुवंहुताशाविद्वप्रजानन्यज्ञमुपयाहिसोमंस्वाहा॥स
मिद्धणोमनसानेषगोभिःसंसूरिभिर्हरिवःसंस्वस्त्या।संब्रह्मणादे
वहितंयदस्तिसंदेवानांसुमतौयज्ञियानांस्वाहा।यानावहउशतो
देवदेवांस्तान्प्रेरयस्वेअग्नेसधस्थे।यक्षिवांसःपपिवांसोमधून्यस्मै
धत्तवसवोवसूनिस्वाहा॥सुगावोदेवाःसदनाअकर्मयआजग्मसव

नेमाजुषाणः। वहमाणांभरमाणाः स्वावसूनिवसुंघर्मींदिवमारोहतां
नुस्वाहा॥ यज्ञयज्ञंगच्छयज्ञपतिंगच्छ। स्वांयोनिंगच्छस्वाहा। एषते
यज्ञोयज्ञपतेसहसूक्तवाकः सुवीर्यः स्वाहा। वषट्कृतेभ्योवषड्हुतेभ्यः
॥देवागातुविदोगातुंवित्वागातुमितस्वाहा॥ इत्याहुतिसप्तकंसंस्थिति
होमः॥ ततः समनस्पत इमंनोदिविदेवेषुयज्ञंस्वाहा। दिविस्वाहा। पृ
थिव्यांस्वाहा। अंतरिक्षेस्वाहा। वातेधाःस्वाहेत्याहुतिपंचकंहुत्वाआ
ज्यस्थालीघृतमुत्तमंचतुर्वारंस्रुवेणगृहीत्वाआज्यधान्यांसंस्थाप्य
स्रुवेणैकवारंतूष्णींजुहुयात्॥ इतिसमानहोमः॥ अथस्तरणक्रमेण
बर्हिरुत्थाप्यत्रिगुणीकृत्याज्यधान्याघृतेनाभ्यनक्ति। पृथिव्यैत्वेतिमं
त्रेणग्रसंमूलेयुनक्ति। अंतरिक्षायत्वेतिमध्यंयुनक्ति दिवेत्वाइत्यग्रं
युनक्ति। एवंत्रिःकृत्वा ॐ संबर्हिरंक्तांहविषाघृतेनसमिन्द्रेणवसुना
संमरुद्भिः। संदेवैर्विश्वदेवेभिरक्तमिंद्रंगच्छतुबर्हिः स्वाहेत्यनेनब
र्हिर्जुहोति॥ अथसंस्रावभागास्तविषाबृहंतः। प्रस्तरेष्ठाबर्हिषदश्च
देवाः इमंयज्ञमभिविश्वेगृणंतः स्वाहा। देवाअमृतामादयंतांस्वाहा।
इतिसंस्रवभागहोमः॥ स्रुवोसीतिस्रुवंप्रागदंडंनिदधाति। स्रुवप्रति
ष्ठापनान्ते इंद्रंचंदनपुष्पधूपदीपनैवेद्यतांबूलदक्षिणाभिः पूजयेत्।
त्रातारमिंद्रेतिपुष्पांजलिंदद्यात्। ततोग्न्यायतनस्यसमंतादिक्षुवि
दिक्षुचमाषभक्तबलीन्सदीपान्दिक्पालेभ्योदद्यात्। त्रातारमिंद्र
मितिइन्द्रायसांगायसपरिवारायसायुधायसशक्तिकायएषमाष
भक्तबलिर्नमः। भोइंद्रदिशंरक्षबलिंभक्ष यजमानस्यायुःकर्त्ताक्षे
मकर्त्तासुभकर्त्ताशांतिकर्त्ताभवेतिप्रार्थयेत् एवंसर्वत्र। अग्नेर्मन्वे
इत्याग्नेये। यममंत्रेणयाम्ये। नमोस्तुतेनिर्ऋतइतिनैर्ऋत्ये येपश्चा
दितिपश्चिमे। वायोः सवितुरितिवायव्ये। यउत्तस्तंरत इत्युत्तरे। ईशा
नात्वा ईशानेइतिदिक्पालेभ्योबलिंदद्यात्। ततोमहाबलिंकुंकुमादि
रक्तंरक्तपुष्पादियुतंसदीपंसदक्षिणंक्षेत्रपालायदद्यात्। क्षेत्रियात्व
वाक्षेत्रस्यपतिमाक्षेत्रपालायभूतप्रेतपिशाचराक्षसशाकिनीडाकि
नीवेतालादिपरिवारयुतायेत्यादिइमंबलिंगृह्णेणदुर्बोधाणेनवाच
तुष्पथेन्यत्रवानाययेत्॥ ततः प्रक्षालितपाणिपाद आचांतोदेशका

त्वैस्मृत्वाकृतायाऐंद्र्याःशांतेःपूर्णतासिद्ध्यर्थंपूर्णाहुतिंहोष्यामीति
संकल्प्यस्रुचिद्वादशगृहीतंचतुर्गृहीतंवाज्यंकृत्वाग्नस्त्रयुतनारिके
रादिफलचंदनादियुतंतदुपरिनिधायपूर्णाहुतिंअभिमृश्यतस्ङ्घसेने
त्रिभिःसूक्तैराज्ञान्वारब्धोहुत्वाकर्मशेषसमापयेदाचार्यःविमुञ्चा
मीत्यादिसमिन्नयहोमः।तेजोसीतिमुखंविमार्ष्टि।दक्षिणेनाग्निंवि
ष्णुक्रमान्क्रमतेविष्णोःक्रमोसीति।सूर्यस्यावृतमित्यभिदक्षि
णमावर्त्तते।अगन्मस्वरित्यादित्यमीक्षेत।इंद्रवयंवसावयमिंद्र
स्यवरुणस्यच।ब्रह्मणःस्थापितपात्रंपुनरुत्थापयामसि।अपरेणा
ग्निमुदपात्रंपरिहृत्योत्तरेणाग्निंआपोहिष्ठामयोभुवइतिमार्जयित्वा
बर्हिषिपल्यंजलौनिनयति।समुद्रंवःप्रहिणोमीति।वीरपत्न्यहंभूया
संयदायजमानस्तदावीरपुरुषोहंभूयासमितिमुखंनिमार्ष्टि।व्रता
निव्रतपतइतिसमिधमादधाति।सत्यंत्वर्तेनेतिसहहविर्भिःपर्युक्ष्या
उदंचिहविरुच्छिशन्युद्वासयति।पूर्णपात्रंदक्षिणा।ब्रह्मोत्थापनं।उ
त्तिष्ठब्रह्मणस्पतइतियस्मात्कोशादितिनमस्कारः।ततःकलशोद
केनशांत्युदकेनचदूर्वापल्लवैरुदङ्मुखआचार्यऋत्विजश्चतिष्ठ
तःप्राङ्मुखंसकुटुंबमुपविष्टंराजानमभिषिंचेयुः।अभिषेकेपत्नी
वामभागे।पंक्तिंशतधारं।प्रपतेतःपापिलक्ष्मीतिचतस्रः।हिरण्यवर्णाः
।एवमभिषेकानन्तरंसर्वौषधीभिरनुलिप्यशुद्धोदकेनस्नात्वापरिध
तेवाससीपरिधायशुक्लमाल्यांबरानुलेपनःसपत्नीकोयजमानआ
चार्यादीन्संपूज्यतेभ्योदक्षिणांदद्यात्।ब्राह्मणोदशगादद्यादनडु
हंततोधिकं।सीराधिकंततोवैश्यस्तथाप्रादेशिकोहयं।राजादद्या
द्वरंग्रामंसमूहोराजवत्तथा।।यथोक्तांदक्षिणांदद्यात्सकलंफलमश्नु
ते।अद्येत्यादिसमयमुच्चार्यैकृतस्यऐंद्रशांत्याख्यकर्मणःप्रतिष्ठासि
द्ध्यर्थंएकादशधेनूरुद्रदेवत्याःअमुकगोत्रायब्राह्मणायतुभ्यमहंसंप्र
ददे।एवमनडुद्ग्रामभूमिहस्त्यश्वरथरत्नादिदद्यात्।।स्थापितदे
वतापूजननमस्कारौ।आवाहनंनजानामि।अपराधसहस्राणिक्रि
यंतेहर्निशंमया।यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु।।न्यू
नं०।यांतुदेवगणाइतिपीठदेवताविसृज्य।प्रतिमांसोपस्करामाचार्या

यदत्वाग्निं संपूज्य गच्छ गच्छ सुरश्रेष्ठेति विसृज्य यथाशक्ति ब्राह्म
णान् भोजयित्वा। चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वा
भ्यां स मे विष्णुः प्रसीदत्विति पठेत्। इत्यैंद्रशांतिप्रयोगः॥ अभिषेक
दिने च कृतनित्यक्रियो दर्भपाणी राजा प्राङ्मुख आसन उपविश्येष्टदे
वता ध्यात्वा नमस्कृत्य मासपक्षाद्युल्लिख्य सकलराष्ट्रवश्यताकामो
ऽहं सांवत्सरपुरोहिताभ्यामात्मानमभिषेचयिष्य इति संकल्प्य ग
णेशपूजा स्वस्तिवाचन मातृकापूजा वसोर्धारापूजाऽभ्युदयिकश्रा
द्धानि कृत्वा सांवत्सरपुरोहितौ त्रीन् ऋग्यजुर्विदो विप्रान् क्षत्रियवैश्या
नमात्यान् सामगं चैकं विप्रममात्यमन्यञ्चैकं अन्यतमवेदविदं वृत्वा
मधुपर्ककुंडलकेयूरकटककंठाभरणांगुलीयकवस्त्रादिभिस्तान् संपू
ज्य चतुर्वर्णमुख्याननुप्रवेशयेत्॥ अथ पूर्वदिने कृतोपवासः पुरोहितः
सितमाल्यचन्दनवासाः सौम्यो घोहोमदेशं परिकल्प्य तस्मादुत्त
रतो रणकदलीस्तंभमंडितायां स्नानशालायां व्रीहिषु यवेषु वा सौ
वर्णं नवकलशं यथाविधि संस्थाप्य यथासंभवमनेकतीर्थजलेना
पूर्य सर्वौषधिसर्वगंधसर्वरत्नसर्वबीजफलक्षीरिवृक्षक्षीरिलता
पल्लवान् क्षिप्त्वा बहुभिः सितवस्त्रैर्माल्यैश्चाभिवेष्ट्य तत्समीप एकं पं
चगव्ययुतजलपूर्णं मृन्मयं घृतेन पूर्णं हैमं कुंभं दुग्धेन राजतं दध्ना
ताम्रं मधुना मार्त्तिकं कुशोदकेन च मार्त्तिकं शतछिद्रं च सौवर्णमन्यां
श्च यथालाभं नदीसरःकूपचतुःसमुद्रोदकपूर्णान् मार्त्तिकान् स्थापयेत्
॥ सर्वेषां च कलशानामुच्चता षोडशांगुला। वैपुल्यं हि पंचाशदंगुलसू
त्रेणेष्टं न योग्यं। ततः पुरोहितो होमदेशे आथर्वणगृह्योक्तेनाभ्यस्य
त्यैंद्रशांतिप्रयोगलिखितेन प्रकारेणाग्निस्थापनादि संप्रदशाहुत्या
त्मकाभ्यांतानहोमांतानि पूर्वांगानि कृत्वा शर्म वर्म २ स्वस्त्ययनाऽभ
य ३ अभ ४ यापराजिता ५ ख्यैः पंचभिर्गणैराथर्वणपरिशिष्टोक्तैरा
ज्यं जुहुयात्। ते च गणा वक्ष्यंते॥ होमदेशस्थापितहैमकलशे च सं
पातान् क्षिपेत्॥ राजा च सितचंदनपुष्पवासाः सर्वालंकारयुतोऽग्ने
र्दक्षिणतः उपविश्य सांवत्सरप्रभृतिभिर्दैवज्ञैः सदस्यमुख्यैः पुरोहि
तैश्च हूयमानाग्नेर्निमित्तानि पश्येत्॥ तानि च निमित्तानि प्रमाणनिर्ण

येदक्षिणावर्त्तशिखइत्यादिनोक्तानि।एवंपुरोहितःप्रधानहोमंस
माप्यैन्द्रशांत्युक्तेनैवप्रकारेणसप्तदशाहुत्यात्मकाभ्यानानहोमा
दिग्रहोत्थापननमस्कारांतं(ता)त्युत्तरांगानिकृत्वासुगंधतैलादिनास्वेच्छ
याकृतस्नानंस्नानशालायामानीयासनउपवेश्यमृद्भिःस्नपयेत्॥
तत्रसहस्रशीर्षेतिपर्वताग्रमृदाशिरः।अक्षीभ्यांतइतिवल्मीका
तमृदाकर्णौ॥तेनैवबिल्वालयमृदामुखंग्रीवाभ्यस्तइतींद्रध्वज
स्थानमृदाग्रीवां॥आंत्रेभ्यइतिराजांगणमृदाहृदयं। यस्याविश्वा
निहस्तयोरितिगजदंतोद्धृतमृदादक्षिणवामभुजौ॥बह्वीनांपिते
तिसरोमृदापृष्ठं॥नाभानाभिंइतिसंगममृदोदरं॥आतेसिंचामी
तिनदीकूलद्वयमृदापार्श्वौ।सोमानंस्वरणंइतिवेश्याद्वारमृदाकटिं
॥ऊरुभ्यांतइतिगजस्थानमृदोरू॥मेहनाद्वलमितिगोष्ठमृदाजा
नुनी॥तेनैवाश्वस्थानमृदाजंघे॥एतावानस्येतिरथचक्रोद्धृतमृ
दापादौ॥अंगादंगादितिसर्वमृद्भिःसर्वांगानि॥ततःपूर्वस्थापितेन
पंचगव्ययुतेनजलकुंभेनस्नपयेत्।मंत्रास्तु।गंधद्वारां आप्यायस्व
दधिक्राव्णः।तेजोसिशुक्रं॥आपोहिष्ठेत्याद्याश्च।ततोराजातदा
सनंत्यक्त्वाभद्रासनउपविशेत्॥भद्रासनंतुहैमंराजतंताम्रंक्षीरि
द्रुमजंवामांडलिकस्यहस्तेनोच्चमायतंच॥अनंतरंजितःसपादह
स्तेन।महाराजस्यसार्द्धहस्तेन।ततोविप्रामात्यस्तेजोसीतिपूर्वस्था
पितेनघृतपूर्णहैमकुंभेनप्राच्यांस्थित्वाभिषिंचेत्॥क्षत्रियामात्यआ
प्यायस्वेतिदुग्धपूर्णेनरौप्यकुंभेनदक्षिणतःस्थित्वा।वैश्यामात्योदधि
क्राव्णेतिदधिपूर्णेनताम्रकुंभेनपश्चिमतःस्थित्वा।शूद्रामात्योम
धुवाताइतित्यृचेनमधुपूर्णेनमृत्कुंभेनोत्तरतःस्थित्वासएवदेव
स्यत्वेतिकुशोदकपूर्णेनमृत्कुंभेनतत्रैवस्थित्वा।देवस्यत्वेत्यस्यांते
अभिषिंचामीतिवाक्यशेषः।ततःपुरोहितोग्निरक्षध्वमितिसदस्यै
स्त्रैर्घ्यसंपातयुतेनहेमकुंभेनराजसूयाभिषेकमंत्रैरभिषिंचेत्।ते
चयजुषास्तावत्।सोमस्यत्वाद्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसासू
र्यस्यवर्चसेंद्रस्येंद्रियेणक्षत्राणांक्षत्रपतिरेध्यतिदिद्यून्पाहि।इमं
देवाअसपत्नंसुवध्वंमहतेक्षत्रायमहतेज्येष्ठ्यायमहतेजानरा

ज्यायेन्द्रस्येंद्रियायइममसुष्यपुत्रममुष्यैपुत्रमस्यैविशएषवोमी
राजासोमोस्माकंब्राह्मणानांराजेति। इममित्यस्यस्थानेद्वितीयां
तंराज्ञोनामअमुष्येत्यत्रषष्ठ्यंततत्पितुःअमुष्याइत्यत्रषष्ठ्यंतंत
न्मातुः इमाआपःशिवतमाइतितृचआग्वेदिकः। देवस्यत्वासवितुः
प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्यवर्चस्य
वर्चसेंद्रस्येंद्रियेणाभिषिंचामीतियजुः॥भूर्भुवःस्वरितिव्याहृतय
श्च। एवमन्येपितत्तच्छाखीयाबोध्याः॥ततःपुरोहितोवह्निसमीपं
गच्छेत्॥ततोवेदशास्त्राभिज्ञोन्योविप्रोभद्रासनगतमेवराजानंश्र
तच्छिद्रसौवर्णकुंभेनाभिषिंचेत्॥ततःयाओषधीरितिसर्वौषधीना
मुदकंक्षिपेत्॥रथेतिष्ठतियजुषासूक्तेनगंधस्योदकं। आब्रह्मन्ब्रा
ह्मणेतियजुषाबीजानां॥पुष्पवतीत्यथर्वणमंत्रेणपुष्पाणां। तेनैव
मंत्रेणानेकफलानां। आशुःशिशानइतिसूक्तेनरत्नानां। येदेवाःपुरः
सदइतिकुशानामुदकेन। केचित्तुकुशदूर्वापल्लवैरनेनमंत्रेणराज्ञाग
निमार्जयेदित्याहुः॥ततोन्यऋग्वेदीविप्रोगोरोचनयागंधद्वारेतिमं
त्रेणराज्ञःशिरःकंठंचलिंपेत्। ततःसमीचीनाविप्राःक्षत्रियावैश्याःशू
द्राःअनुलोमाश्चयथालाभंगंगायमुनाद्यनेकनदीसरःकूपचतुःस
मुद्रनिर्झरजलपूर्णैःपूर्वासादितैरनेककलशैःस्वस्वशाखीयैर्मंत्रैःशू
द्रानुलोमादयश्चतूष्णीमेवाभिषिंचेयुः॥एतस्मिन्नेवकालेऽमात्यमु
ख्याश्छत्रचामरव्यजनान्धारयेयुः॥ वादकाःशंखभेर्यादीनिवाद
येयुःविप्रामंत्रपाठंवंदिनश्चस्तुतिंकुर्युः॥ततःसांवत्सरःसर्वकुंभ
मध्यआसादितहेमकुंभोदकंकुशैर्गृहीत्वावक्ष्यमाणैः सुरास्त्वामभि
षिंचंत्वित्यादिभिरशीत्युत्तरशतैःश्लोकैरभिषिंचेत्। मंत्रातेमंत्रास्तु
अभिषिंचंत्वितिक्रियापदानुसारेणैकसार्द्धद्वित्रिश्लोकात्मकाज्ञे
याः॥सर्वमंत्रांतेसर्वकलशस्थंजलंक्षिपेत्॥तेचश्लोकाःसमाप्तौ
वक्ष्यंते॥ततोराजासुगंधितैलोद्वर्तनशुद्धोदकैःस्नात्वाश्वेतोष्णीषा
दिवस्त्राणिधृत्वा। दर्शेआज्येचप्रतिबिंबंदृष्ट्वातदाज्यपात्रंससुवर्णं
ब्राह्मणायदत्वाचन्दनकुंकुमदधिदूर्वादिमंगलद्रव्याण्यालभ्यश्रीवि
ष्णुंसुवर्णादिप्रतिमायांपूर्वमंडलेक्षतपुंजेवाषोडशोपचारैःब्राह्म

णान्वस्त्रालंकारादिभिः सांवत्सरपुरोहितौ च मधुपर्कैर्वस्त्रालंकारा
दिभिः पूजयेत्॥ अथ दैवज्ञः प्रागुक्तलक्षणं पट्टं ललाटे मुकुटं च मूर्ध्नि
बध्नीयात्॥ ततः पुरोधा राजानं सुभलग्ने उत्तरोत्तरक्रमेण वृषमार्जा
रतरक्षुसिंहव्याघ्रचर्मबहुमूल्यवस्त्रोत्तरच्छदेन चोपर्युपर्याच्छादिते
मंचे उपवेशयेत्॥ ततो द्वारपालस्तत्रोपविष्टाय राज्ञे मात्यान्पौरान्व
णिजः प्रकृतीश्च क्रमेण दर्शयेत्॥ राजा तु ग्रामवासोगजाश्वसुव
र्णगोजादिगृहैरभिषेचकौ सांवत्सरपुरोहितौ संपूज्य ऋग्यजुःसा
मविदः त्रीन्विप्रांश्च तथैव संपूज्यान्यांश्च ज्योतिर्विदः पुरोहितं विप्र
मुख्यांश्च यथाविभवं संपूज्य गोरसमोदकादिभिः संभोज्य गोवस्त्र
तिलरूप्यान्नफलहेमसुपुष्पभूम्यादीनि तेभ्यो दत्वा चन्दनकेस
रादिभिरलंकृतो दधिदूर्वादीनि मंगलद्रव्याण्यालभ्य सशरचापह
स्तोऽग्निं प्रदक्षिणीकृत्य गुर्वादीन्नत्वा महावृषं गां च सवत्सां पृष्ठदेशे
स्पृशेत्॥ ततः पुरोधाः सलक्षणं जात्यश्वं महागजं च तत्स्नानायतोस
र्वौषधिकलशेन या ओषधीरिति संस्नाप्य वस्त्र पर्याणसुवर्णरूप्या
लंकारादिभिरलंकृत्याश्वं राज्ञः पुरत आनीयाभिमंत्रयेत्॥ ते च मंत्रा
अश्वशान्तौ॥ जयाश्व त्वं मया राज्ञस्तुरंगाग्र्यः प्रतिष्ठितः॥ स्मराचल
स्याः पुत्रस्त्वं गंधर्वत्वं तथा स्मर॥ यथा नृणामयं राजा तथा त्वं भव
वाजिनां॥ यथा भवंतं नृपतिर्नित्यमेवारुरुक्षति॥ तथा त्वं रक्ष राजा
नं सर्वावस्थागतं हय। दर्शयाश्वं तथा स्व प्रदैवदोषमुपागतं॥ तुरंगा
न्सकलान्रक्ष त्वयि भारो यमर्पितः॥ अद्य प्रभृति राजा त्वामग्रेण
ऽभ्येति भक्तितः॥ अभ्यर्चयिष्यति सदा गंधमाल्यानुलेपनैः॥ आशी
र्भिश्च द्विजातीनां तथा च स्वस्तिवाचनैः॥ रक्षतु त्वां महेन्द्रस्तु पूर्वेण
त्रिदशाधिपः॥ दक्षिणेन यमो देवः पश्चिमेन जलाधिपः॥ उदग्वैश्रवणो
देवः सर्वे रक्षंतु सर्वतः॥ इति॥ ततो गजमपि दक्षिणे कर्णे दैवविदामंत्रि
तं राजारोहेत्॥ तन्मंत्रास्तु गजशांत्युक्ताः॥ श्रीगज त्वं कृतो राज्ञा भ
वान्स्य गजाग्रणीः॥ गंधमाल्यान्नभक्ष्यैस्त्वां पूजयिष्यति पार्थिवः॥ लो
कः सदा भयं पूजां करिष्यति यथा तव॥ पालनीयस्त्वया राजा युद्धे
ऽवनि तथा गृहे॥ तिर्यग्भावं समुत्सृज्य दिव्यभावमनुस्मर॥ देवासुरे

रायुद्धेश्रीगजस्त्विद्वैःकृतः।ऐरावणसुतःश्रीमानरिष्टोनामवारणः।
श्रीगजानांतुयत्तेजःसर्वमेवोपतिष्ठतु।।तत्तेजस्तवनागेंद्रदिव्यभाव
समन्वितम्।।उपतिष्ठतुभद्रंतेरक्षराजानमाहवेइति।।अथराजानंगज
मारुह्यगजारूढैरेवमुख्यामात्यसामंतसांवत्सरपुरोहितादिभिः
सहमहापथेनस्वपुरंपरिभ्रम्यदेवतायतनानिगत्वायथाविभवंदे
वताःसंपूज्यगजारूढोगजारूढैरेवतैःसहगृहमागत्यगजादवती
र्यगजावतीर्णैरमात्यादिभिःसहांतर्गृहंप्रविश्यतान्सर्वानन्यांश्च
लोकान्यथाविभवंदानमानसत्कारप्रियवचोभिःसत्कृत्यकोटिलक्षा
युतान्यतमसंख्ययाविप्रान्संभोज्यदीनानाथेभ्योभूयसींदक्षिणां
दत्वास्वस्तिवाचनंकारयित्वासर्वान्विसृज्यसुहृदादियुतोऽतिहृष्ट
मनाभुंजीत।। इतिराज्याभिषेकप्रयोगः।।अथपूर्वोपयुक्ताःशर्मवर्मा
दिगणाः।।यथाद्यौश्चपृथिवीचनबिभीतोनरिष्यतः।।एवामेप्रा
णमाबिभेः१यथाहश्चरात्रीचनबिभीतोनरिष्यतः।।एवामे यथासू
र्यश्चचंद्रश्च३यथाब्रह्मचक्षत्रंच४यथासत्यंचानृतंच०५यथाभूतं
चभव्यंच६प्राणापानौमृत्योर्मापातंस्वाहा।द्यावापृथिवीउपश्रुत्या
मा०सूर्यचक्षुषामापाहि०अग्नेवैश्वानरविश्वैर्मादेवैःपाहि।विश्वं
भरविश्वेनमाभरसापाहि५ॐओजोस्योजोमेदाःस्वाहा।सहोसिसहो
मेदा।बलमसिबलंमेदाः।आयुरस्यायुर्मेदाः।श्रोत्रमसिश्रोत्रंमेदाः
।चक्षुरसिचक्षुर्मेदाः।परिपाणमसिपरिपाणंमेदाः।तुभ्यमेवजरि
मन्वर्धतावयंमेममन्येमृत्यवोहिंसिषुःशतंये।।मानेवपुत्रंप्रमना
उपस्थेमित्रएनंमित्रियात्पात्वंहसः।मित्रएनंवरुणोवारिषादजरा
मृत्युंकृणुतांसंविदानौ।।तदग्निर्होतावयुनानिविद्वान्विश्वादेवानां
जनिमाविवक्ति।त्वमीशिषेपशूनांपार्थिवानांयेजाताउतवाये
जनित्राः।मेमंप्राणोहासीन्मोअपानोमेमंमित्रावधिषुर्मोअमित्रैः
।।द्यौष्ट्वापितापृथिवीमाताजरामृत्युंकृणुतांसंविदाने।।यथाजी
वाअदितेरुपस्थेप्राणापानाभ्यांगुपितःशतंहिमाः।इममग्नआयु
षेवर्चसेकृधिप्रियंरेतोवरुणमित्रराजन्।।मातेववास्माअदितेशर्मयच्छन्विश्वे
देवाजरदष्टिर्यथासत्।अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांचुबुकादधि।

यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते। ग्रीवाभ्यस्त उष्णि
हाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मं दोषण्य मंसाभ्यां बाहुभ्यां
विवृहामि ते २ हृदयात्ते परि क्लोम्नो हलीक्ष्णात्पार्श्वाभ्यां। यक्ष्मम
तस्ताभ्यां प्लीन्हो यक्नस्ते विवृहामसि॥ आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठो
रुदरादधि॥ यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या विवृहामि ते॥ ऊरुभ्यां ते अ
ष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां। यक्ष्मं भसद्यां श्रोणिभ्यां भ सदं भंस
सो विवृहामि ते। अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः। यक्ष्मं
पाणिभ्यामंगुलिभ्यो नखेभ्यो विवृहामि ते॥ अंगे अंगे लोम्नि लोम्नि
यस्ते पर्वणि पर्वणि। यक्ष्मं त्वचस्यं ते वयं कश्यपस्य विबर्हेण विष्वं
चं विवृहामसि॥ ७ मुंचामि त्वा हविषा जीवनाय कमज्ञात यक्ष्मादुत
राजयक्ष्मात्॥ ग्राहिर्जग्राह यद्येतदेनं तस्या इंद्राग्नी प्रमुमुक्तमेनं॥ १
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरंतिकं नीत एव। तमाहरामि नि
र्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय २ सहस्राक्षेण शतवीर्येण श
तायुषा हविषाहार्षमेनं॥ इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरि
तस्य पारं॥ शतं जीव शरदो वर्द्धमानः शतं हेमंतान् शतमु वसंतान्॥
शतं त इंद्रो अग्निः सविता ––– वृहस्पतिः शतायुषा हविषाहार्षमे
नं॥ प्रविशतं प्राणापानावनड्वाहाविव व्रजं। व्यन्ये यंतु मृत्यवो यान्
हुरितरान् शतं॥ इहैव स्तं प्राणापानौ माप गातमितो युवं। शरीरमस्यां
गानि जरसे वहतं पुनः॥ जरायै त्वा परिददामि जरायै नि धुवामि त्वा॥
जरा त्वा भद्रा नेष्ट व्यन्ये यंतु मृत्यवो यानाहुरितरान् शतं। उत देवा अव
हितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः॥ द्वा
विमौ वातौ वात आसिंधोरा परावतः। दक्षं ते अन्य आवातु व्यन्यो वातु
यद्रपः॥ आवात वाहि भेषजं विवात वाहि यद्रपः। त्वं हि विश्वभेष
जो देवानां दूत ईयसे॥ त्रायंतामिह देवास्त्रायतां मरुतां गणः॥ त्रा
यंतां विश्वा भूतानि यथायमरपा असत्॥ आ त्वागमं शंतातिभि
रथो अरिष्टतातिभिः। यक्ष्मं त उग्रमाभारिषं परा यक्ष्मं सुवामि ते॥
अयं मे हस्तो भगवानयं मे भगवत्तरः॥ अयं मे विश्वभेषजोयं शिवा
भिमर्शनः। हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी। अनाम

थिलुभ्यां हस्ताभ्यां ताभ्यां त्वाभिमृशामसि॥ आवतस्त आवतः परा
वतस्त आवतः इहैव भव मानुगा मा पूर्व्याननुगाः पुत्रेन सुबध्नामि ते
दृढं॥ यस्त्वाभिचेरुः पुरुषः स्वो यदरणो जनः॥ उन्मोचनप्रमोचने उभे
वाचा वदामि ते॥ यद्दुद्रोहित शेपिषे स्त्रियै पुंसे अचित्या॥ उन्मो० यदे
नसो मातृकृताच्छेषे पितृकृताच्च यत्॥ उन्मो० यत्ते माता यत्ते पिता जा
मिर्भ्राता च सर्जतः॥ प्रत्यक्सेवस्व भेषजं जरदष्टिं कृणोमि त्वा॥ इहै
वधि पुरुष सर्वेण मनसा सह॥ दूतौ यमस्य मानुगा अधि जीवपु
रा इहि॥ अनुहूतः पुनरेहि विद्वानुदयनं पथः॥ आरोहणमाक्रमणं
जीवतो जीवतोयनं माविभेर्न मरिष्यसि जरदष्टिं कृणोमि त्वा निरवोच
महं यक्ष्ममंगेभ्यो अंगज्वरं तव॥ अंगभेदो अंगज्वरो यश्च ते हृदया
मयः यक्ष्मः श्येन इव प्रापप्तद्वाचा साढः परस्तरां॥ ऋषी बोधप्रती बो
धावस्वप्नो यश्च जागृविः॥ तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृ
तां॥ अयमग्निरुपसद्य इह सूर्य उदेतु ते॥ उदेहि मृत्योर्गंभीरात्कृष्णा
च्चित्तमसस्परि॥ नमो यमाय नमो अस्तु मृत्यवे। नमः पितृभ्य उत ये
नयंति॥ उत्पारणस्य यो वेद तमग्निं पुरो दधे स्मा अरिष्टतातये॥ ऐ
तु प्राण ऐतु मन ऐतु चक्षुरथो बलं॥ शरीरमस्य संविदां तत्पद्भ्यां प्रति
तिष्ठतु॥ प्राणेनाग्ने संसृजतु धातः प्राणो न संदितः। प्राणेन विश्वतो
मुखं सूर्यं देवा अजयन्नायुषायुः कृतां जीवायुष्मान् जीव मा मृथाः॥
प्राणेनात्मन्वतां जीव मा मृत्योरुदका वशं देवानां निहितं निधिं यमिंद्रो
न्वविंदत्पथिभिर्देवयानैः। आपो हिरण्यं जुगुपुस्त्रिवृद्भिस्तास्त्वा र
क्षंतु त्रिवृता त्रिवृद्भिः॥ त्रीन्नाकांस्त्रीन्समुद्रांस्त्रीन्ब्रध्नांस्त्रीन्वैष्टपां
स्त्रीन्मातरिश्वनस्त्रीन्सूर्यान् गोप्तृन्कल्पयामि ते॥ उपप्रियं पनिप्नतं
युवानं माहुतीवृधं। अगन्म बिभ्रतो नमो दीर्घमायुः कृणोतु मे॥ अंतका
य मृत्यवे नमः प्राणापाना इह ते रमंतां। इहायमस्तु पुरुषः सहासुना
सूर्यस्य भागे अमृतस्य लोके॥ उदेनं भगो अग्रभीदुदेनं सोमो अंशु
मान् उदेनं मरुतो देवा उदिंद्राग्नी स्वस्तये॥ इह तेसुरिह प्राण इहायु
रिह ते मनः। उत्वा निर्ऋत्याः पाशेभ्यो दैव्या वाचा भरामसि। उत्क्रामातः
पुरुष माव पत्था मृत्योः पड्वीशमवमुंचमानः। मा छित्था अस्माल्लोका

दग्नेःसूर्यस्यसंदृशः। तुभ्यंवातःपवतांमातरिश्वातुभ्यंवर्षंत्वमृता
न्यापः॥ सूर्यस्ते तन्वे शंतपातित्वांमृत्युर्दयतांमाप्रमेष्ठाः। उद्यानंते
पुरुषनावयानंजीवातुंतेदक्षतातिंकृणोमि। आहिरोहेममृ
तंसुखंरथमथजिर्विर्विदथमावदासि। मातेमनस्तत्रगान्मातिरोभू
न्माजीवेभ्यः प्रमदोमानुगाःपितॄन्॥ विश्वेदेवाअभिरक्षंतुत्वेहमा
गतान्मादीधीथायेनयंतिपरावतं॥ ७ आरोहतमसोज्योति
रेह्यातेहस्तौरभामहे। श्यामश्चत्वामाशबलश्चप्रेषितौयमस्ययौप
थिरक्षीश्वानौ। अर्वाङेहिमाविदीध्योमात्रतिष्ठःपराङ्मनाः॥ मैतंपं
थामनुगाभीमएषयेनपूर्वंनेयथतंब्रवीमि॥ तमएतत्पुरुषमाप्रपत्था
भयंपरस्तादभयंतेअर्वाक्॥ १०॥ द्विपदाः। रक्षंतुत्वाग्नयोयेअप्स्व
तारक्षंतुत्वामनुष्यायमिंधते॥ वैश्वानरोरक्षतुजातवेदादिव्यस्त्वा
माप्रधाग्विद्युतासह। मात्वाक्रव्यादभिमंस्तारात्संकसुकाच्चर। र
क्षंतुत्वाद्यौरक्षतुपृथिवीसूर्यश्चत्वारक्षतांचंद्रमाश्च। अंतरिक्षंरक्ष
तुदेवहेत्याः। बोधश्चत्वाप्रतीबोधश्चरक्षतामस्वप्नश्चत्वानवद्राण
श्चरक्षतां। गोपायंश्चत्वाजागृविश्चरक्षतां। तेत्वारक्षंतुतेत्वागोपायं
तुतेभ्योनमस्तेभ्यःस्वाहा॥ जीवेभ्यस्त्वासमुदेवायुरिंद्रोधातादधातु
सवितात्रायमाणः॥ मात्वाप्राणोबलंहासीदसुंतेनुह्वयामसि। मात्वा
जंभःसंहनुर्मातमोविदन्माजिह्वाबर्हिःप्रमयुःकथास्याः। उत्त्वादित्यावसवो
भरंतूदिंद्राग्नीस्वस्तये॥ उत्त्वाद्यौरुत्पृथिव्युत्प्रजापतिरग्रभीत्॥ उत्त्वा
मृत्योरोषधयःसोमराज्ञीरपीपरन्॥ अयंदेवाइहैवास्त्वयंमामुत्रगा
दितः। इमंसहस्रवीर्येणमृत्योरुत्पारयामसि॥ उत्त्वामृत्योरपीपरंसं
धमंतुवयोधसः। मात्वाव्यस्तकेश्योमात्वाघरुदोरुदन्॥ आहार्षमवि
दंत्वापुनरागाःपुनर्णवः। सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं॥ व्य
वात्तेज्योतिरभूदपत्वत्तमोअक्रमीत्॥ अपत्वन्मृत्युंनिर्ऋतिमपय
क्ष्मंनिदध्मसि॥ आरभस्वेमाममृतस्यश्नुष्टिमच्छिद्यमानाजरदष्टिरस्तु
ते। असुंतआयुःपुनराभरामिरजस्तमोमोपगामाप्रमेष्ठाः। जीवतां
ज्योतिरभ्येह्यर्वाङात्वाहरामिशतशारदाय। अवमुंचन्मृत्युपाशान
शस्तिंद्राघीयआयुःप्रतरंतेदधामि॥ वातात्तेप्राणमविदंसूर्याच्चक्षुर

दंतव यत्तेमनस्त्वयितद्धारयामिसंवित्स्वांगैर्वद्जिह्वयालपन्॥ प्राणे
नत्वाद्विपदांचतुष्पदामग्निमिवजातमभिसंधमामि॥ नमस्तेमृत्यो
चक्षुषेनमः प्राणायतेकरन्॥ अयंजीवतुमामृतेयंसमीरयामसि। कृ
णोम्यस्मैभेषजंमृत्योमापुरुषंवधीः। जीवलांनघारिषांजीवंतीमोष
धीमहं॥ त्रायमाणांसहमानांसहस्वतीमिहहुवेस्मा अरिष्टतातये।
अधिब्रूहिमारभथाःसृजेमंतवैवसंत्सर्वहायाइहास्तु॥ भवाशर्वौ
मृडतंशर्मयच्छतमपसिध्यदुरितंधत्तमायुः। अस्मैमृत्योअधिब्रू
हिमंदयस्वोदितो॥ यमेतु। अरिष्टःसर्वांगःसुश्रुज्जरसाशतहायनआ
त्मनाभुजमश्नुतां। देवानांहेतिःपरित्वावृणक्तुपारयामित्वारजसउ
त्वामृत्योरपीपरन्। आरादग्निंक्रव्यादंनिरूहंजीवातवेतेपरिधिंद
धामि॥ यत्तेनिपातंरजसंमृत्योअनवधृष्यं। पथइमंतस्माद्रक्षंतो
ब्रह्मास्मैवं——मकृण्मसि॥१॥ कृणोमितेप्राणापानौजरांमृत्युं
दीर्घमायुःस्वस्ति॥ वैवस्वतेनप्रहितान्यमदूतांश्चरतोपसेधामि
सर्वान्। आरादरातिंनिर्ऋतिंपरोग्राहिंक्रव्यादःपिशाचान्। रक्षोय
त्सर्वंदुर्भूतंतत्तमइवापहन्मसि॥ अग्नेष्टेप्राणममृतादायुष्मतोव
न्वेजातवेदसः। यथानरिष्याअमृतःसजूरसस्तत्तेकृणोमितदुते
समृध्यतां। शिवेतेस्तांद्यावापृथिवीअसंतापेअभिश्रियौ॥ शंतेसू
र्यआतपतुशंवातोवातुतेहृदे। शिवाअभिक्षरंतुत्वाआपोदिव्याः
पयस्वतीः॥ शिवास्तेसंत्वोषधयउत्त्वाहार्षमधरस्याउत्तरांपृथिवी
मभि। तत्रत्वादित्यौरक्षतांसूर्याचंद्रमसावुभा॥ यत्तेवासःपरिधानं
यान्नीविंकृणुषेत्वं। शिवंतेतन्वे३तत्कृण्मःसंस्पर्शोद्रूक्ष्णमस्तुते
। यत्क्षुरेणमर्चयतासुतेजसावप्तावपसिकेशश्मश्रु। शुभंमुखं
मानआयुःप्रमोषीः॥ शिवौतेस्तांव्रीहियवावबलासावदोमधौ॥
एतौयक्ष्मंविबाधेतेएतौमुंचतोअंहसः॥ यदश्नासियत्पिबसिधा
न्यंकृष्याःपयः। यदाद्यंयदनाद्यंसर्वंतेअन्नमविषंकृणोमि॥ अन्हे
चत्वारात्र्येत्वोभाभ्यांपरिदद्मसि॥ अरायेभ्योजिघत्सुभ्यइमंमे
परिरक्षधः। शतंतेयुतंहायनान्द्वेयुगेत्रीणिचत्वारिकृण्मः। इंद्राग्नीवि
श्वेदेवास्तेनुमन्यंतामहृणीयमानाः। शरदेत्वाहेमंतायवसंतायग्री

श्यायपरिदध्मसि। वर्षाणितुभ्यंस्योनानियेभ्युवर्धंतऊषधीः॥ मृत्यु
रीशेद्विपदांमृत्युरीशेचतुष्पदां। तस्मात्वांमृत्योर्गोपतेरुद्धरामि
समाबिभेः। सोरिष्टनमरिष्यसिनमरिष्यसिमाबिभेः। नवैतत्रम्रि
यंतेनोयंत्यधमंतमः। सर्वोवैतत्रजीवतिगोरश्वःपुरुषःपशुः। यत्रेदंब्र
ह्मक्रियतेपरिधिर्जीवनायकं॥ परित्वापातुसमानेभ्योअभिचारा
त्सबंधुभ्यः। अपम्रिर्भवामृतोतिजीवोवात्तेहासिषुरसवःशरीरं।
येमृत्यवएकशतंयानाष्ट्राअतितार्याः। मुंचंतुतस्मात्वांदेवाअग्ने
वैश्वानरादधि। अग्नेःशरीरमसिपारयिष्णूरक्षोहासिसपत्नहा॥
अथोअमीवचातनःपूतुद्रुर्नामभेषं। प्राणायनमोयस्यसर्वमिदं
वसो। योभूतःसर्वस्येश्वरोयस्मिन्सर्वंप्रतिष्ठितं। नमस्तेप्राणक्रंद
यनमस्तेस्तनयित्नवे। नमस्तेप्राणविद्युतेनमस्तेप्राणवर्षते। यत्प्रा
णस्तनयित्नुनाभिक्रंदत्योषधीः। प्रवीयंतेगर्भंदधतेथोबव्हीर्विज
यंते। यत्प्राणऋतावागतेअभिक्रंदत्योषधीः॥ सर्वंतदाप्रमोदतेयत्किं
चभूम्यामधि। यदाप्राणोअभ्यवर्षीद्वर्षेणपृथिवींमहीं। पशवस्त
त्प्रमोदंतेमहोवैनोभविष्यति॥ अभिवृष्टऊषधयःप्राणेनसम
वादिरन्। आयुर्वैनःप्रातीतरःसर्वानःसुरभीरकः॥ नमस्तेअस्त्वा
यतेनमोअस्तुपरायते॥ नमस्तेप्राणतिष्ठआसीनायोतत्तेनमः॥
नमस्तेप्राणप्राणतेनमोअस्त्वपानते। पराचीनायतेनमःप्रती
चीनायतेनमःसर्वस्मैतइदंनमः॥ यातेप्राणप्रियातनूर्यातेप्राणप्रे
यसी॥ अथोयद्भेषजंतवतस्यनोधेहिजीवसे। प्राणप्रजाअनुवस्ते
पितापुत्रमिवप्रियं॥ प्राणोहसर्वस्येश्वरोयच्चप्राणतियच्चन॥ प्रा
णोमृत्युःप्राणस्तक्मप्राणंदेवाउपासते। प्राणोहसत्यवादिनमु
त्तमेलोकआदधत्। प्राणोविराट्प्राणोदेष्ट्रीप्राणंसर्वउपासते॥
प्राणोहसूर्यश्चंद्रमाःप्राणमाहुःप्रजापतिं॥ प्राणापानौव्रीहियवाव
नड्वान्प्राणउच्यते॥ यवेहप्राणआहितोअपानोव्रीहिरुच्यते॥ अ
पानतिप्राणतिपुरुषोगर्भेअंतरा। यदात्वंप्राणजिन्वस्यथसजाय
तेपुनः॥ प्राणमाहुर्मातरिश्वानं वातोहप्राणउच्यते॥ प्राणेहभूतं
भव्यंचप्राणेसर्वंप्रतिष्ठितं। आथर्वणीरांगिरसीर्दैवीर्मनुष्यजा

उत॥ॐषधयः प्रजायंते यदात्वं प्राणजिन्वसि॥ यदाप्राणो अभ्यव
र्षीद्वर्षेण पृथिवीं महीं॥ ॐषधयः प्रजायंते थोयाः काश्च वीरुधः॥ यस्ते
प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितं। सर्वे तस्मै बलिं हरानमुष्मिंल्लोक उ
त्तमे॥ यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः॥ एवा बलिं हरान्यस्त्वा
शृणवत्सुश्रवः॥ अंतर्गर्भश्चरति देवतास्वाभूतो भूतः स उजायसे पुनः
। सभूतो भव्यं भविष्यत्पिता पुत्रं प्रविवेशा शचीभिः॥ एकं पादं नोत्खिद
ति सलिलाद्धंस उच्चरन्। यदंग सतमुत्खिदेन्नैवाद्य न श्वः स्यान्न रात्री
नाहः स्यान्न व्युच्छेत्कदाचन॥ अष्टाचक्रं वर्तत एकनेमि सहस्राक्षरं प्र
पुरो नि पश्चात्॥ अर्धेन विश्वं भुवनं जजान यदस्यार्द्धं कतमः स केतुः
यो अस्य विश्वस्य जन्मन ईशे विश्वस्य चेष्टतः। अन्येषु क्षिप्र धन्वने प्रा
ण नमोस्तु ते॥ यो अस्य सर्वस्य जन्मन ईशे सर्वस्य चेष्टतः॥ अतंद्रो ब्र
ह्मणा धीरः प्राणो मानुतिष्ठतु। ऊर्ध्वः सुप्तेषु जागार ननु तिर्यङ् निपद्यते
। न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन। प्राण मा मत्पर्यावृतो न मदन्यो भ
विष्यति। अपां गर्भमिव जीवसे प्राण बध्नामि त्वा मयि॥ इत्यायुष्यगणः
॥२५॥ विषासहिं सहमानं सासह्वानं सहीयांसं॥ सहमानं सहोजितं स्व
र्जितं गोजितं संधनाजितं। ईड्यं नाम ह्व इन्द्रमायुष्मान् भूयासं॥ विषास
हिमितिसंपूर्णः पुनः। ईड्यं नाम ह्व इंद्रं प्रियो देवानां भूयासं। विषासहिं॰
ईड्यं॰ इंद्रं प्रियः प्रजानां॥ विषा॰ ईड्यं॰ इंद्रं प्रियः पशूनां॰। विषा॰ ईड्यं॰
इंद्रं प्रियः समानानां॰।उदिह्युदिहि सूर्य वर्चसा माभ्युदिहि। द्विषंश्च म
ह्यं रध्यतु मा चाहं द्विषते रधं। तवेद्विष्णो बहुधा वीर्याणि त्वं नः प्रणीहि
पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन्। उदिह्युदि॰ यांश्च प
श्यामि यांश्च न तेषु मा सुमतिं कृधि तवे॰ त्वं न॰ मा त्वा दभन्सलिले अप्
स्वं १ तर्ये पाशिन उपतिष्ठंत्यत्र त्वं तदिन्द्रोतिभिः शिवाभिः शंतमो भव
॥ आरोहं स्त्रि दिवं दिवो गृणानः सोमपीतये। प्रियधामा स्वस्तये तवे॰ त्वं
न॰॥१०॥ हित्वा शस्तिं दिव सारुक्ष मेतां स नो मृड सुमतौ ते स्याम तवे॰
त्वं न॰। त्वं न इन्द्र महते सौभगायादब्धेभिः परि पाह्यक्तुभि स्तवे॰
त्वमिंद्रासि विश्वजित्सर्ववित्पुरुहूतस्त्वमिंद्र। त्वमिंद्रेमं सुहवं स्तोम
मेरयस्व स नो मृड सुमतौ ते स्याम तवेद्वि॰ त्वं न॰ प्र॰। अदब्धो दिव अर्

ओदिविपृथिव्यामुतासिनत आयुर्महिमानमंतरिक्षे अदब्धेन ब्रह्मणा
वावृधानः। सत्वंनइंद्रदिविषंशर्मयच्छ तवेद्वि० त्वंनः०। यातइंद्रतनू
रप्सुयापृथिव्यांयांतरग्नौ यातइंद्रपवमाने स्वर्विदि। येंद्रतन्वंतरिक्ष
व्यापिप्यतयानइंद्रतन्वाउग्रमीयच्छ तवेद्वि० त्वंनः०। त्वामिंद्रब्रह्मणा
वर्द्धयंतः सत्रंनिषेदुर्ऋषयोनाधमानास्तवेद्वि० त्वंन०। त्वंततत्वंपर्य
ष्युक्षंसहस्रधारंविदथंस्वर्विदं तवेद्वि०।५।त्वंन० त्वंरक्षसे प्रदिशश्चत
स्रस्त्वंशोचिषानभसिविभासि॥ त्वमिमाविश्वाभुवनानितिष्ठसऋत
स्यपंथामन्वेषिविद्वांस्तवे० त्वंन०६। पंचभिःपराङ्तपस्येकयावाङ्श
स्तिमेसुदिभेवाधमानस्तवेद्वि० त्वंन०७ त्वमिंद्रस्त्वंमहेंद्रस्त्वंलोकस्त्वं
प्रजापतिः तुभ्यंयज्ञोविजायतेतुभ्यंजुह्वतिजुह्वतस्तवेद्वि० त्वंन०
असतिसत्प्रतिष्ठितंसतिभूतंप्रतिष्ठितं॥ भूतंहभव्यआहितंभूतंभ
व्येप्रतिष्ठितंतवेद्वि० त्वंन० पृणाहिपशुभिर्विश्वरूपैःसुधायांमाधेहि
परमेव्योमन्॥१०॥ शुक्रोसिभ्राजोसि। यथात्वंभ्राजताभ्राजोस्येवाहंभ्रा
जताभ्राज्यासं। रुचिरसिरोचोसि। सयथात्वंरुच्यारोचोस्येवाहंपशुभि
श्चब्राह्मणवर्चसेनचरुचिषीय। उद्यतेनमउद्यायतेनमउदिताय नमः
॥ विराजेनमःस्वराजेनमःसंम्राजेनमः। अस्तंयतेनमोस्तमेष्यतेनमो
स्तमिताय नमः विराजेनमःस्वराजेनमःसम्राजेनमः। उद्गादयमा
दित्योविश्वेनसहसासह। सपत्नान्मह्यंरंधयन्माचाहंद्विषतेरधंत
वेद्वि० त्वंनः आदित्यनावमारुक्षः शतारित्रां स्वस्तये अहर्मात्यपीप
रोरात्रिंसत्रातिपारय। सूर्यनावमारुक्षः शतारित्रां स्वस्तयेरात्रिंमात्य
पीपरोहःसत्रातिपारय। प्रजापतेरावृतोब्रह्मणावर्मणाहंकश्यपस्यज्यो
तिषावर्चसाच। जरदष्टिःकृतवीर्योविहायाःसहस्रायुःसुकृतश्चरेयंप
रीवृतोब्रह्मणा०। मामाप्रापन्निषवोदैव्यायमामनुषीरवसृष्टावधाय॥
ऋतेनगुप्तऋतुभिश्चसर्वैर्भूतेनगुप्तोभव्येनचाहं। मामाप्रापत्पाप्मामो
तमृत्युरंतर्दधेहंसलिलेनवाचः। अग्निर्मागोप्तापरिपातुविश्वतउद्य
न्सूर्योनुदतांमृत्युपाशान्। व्युच्छंतीरुषसःपर्वताध्रुवाःसहस्रंप्राणा
मय्यायतंतां॥ इत्यायुष्यगणः॥ अथसर्वस्यगणः॥ येत्रिसप्ताःपरियं
तिविश्वारूपाणिबिभ्रतः। वाचस्पतिर्बलातेषांतन्वोअद्यदधातुमे॥

पुनरेहि वाचस्पते देवेन मनसा सह॥ वसोष्पते निरमय मय्येवास्तु
मयि श्रुतं॥ इहैवाभिवित नूतेआत्नींद्वव्यथा॥ वाचस्पतिर्नियच्छतु
मय्येव०।उपहूतो वाचस्पतिरुपास्मान्वाचस्पतिर्ह्वयतां संश्रुतेन गमे
महि माश्रुतेन विराधिषि॥ अस्मिन्वसुवसवो धारयंत्विंद्रः पूषा वरु
णो मित्रो अग्निः। इममादित्या उत विश्वे च देवा उत्तरस्मिन्ज्योतिषि धा
रयंतु। अस्य देवाः प्रदिशि ज्योतिरस्तु सूर्यो अग्निरुत वा हिरण्यं सप
त्ना अस्मदधरे भवंतूत्तमं नाकमधिरोहयेमं। येनेंद्राय समभरः पयां
स्युत्तमेन ब्रह्मणा जातवेदः। तेन त्वमग्न इह वर्धयेमं सजातानां श्रैष्ठ्य
आधेह्येनं। एषां यज्ञमुत वर्चो ददेहं रायस्पोषमुत चित्तान्यग्ने॥ सप
त्ना अस्मदधरे भवंतूत्तमं नाकमधिरोहयेमं॥ प्रातरग्निं प्रातरिंद्रं हवामहे सप्तऋचः ॥७॥ प्रथमा
याहुती यां हुवेमेत्यत्र हुवामहे॥ उतोदितौ मघवन्॥ अस्तु देवस्तेना
वयं॥ वसुविदं भगं मे॥ हस्तिवर्चसं प्रथतां बृहद्यशो अदित्या यत्तन्वः
संबभूव तत्सर्वे समदुर्मह्यमेतत् विश्वे देवा अदितिः सजोषाः। मित्रव
रुणश्चेंद्रो रुद्रश्च चेततुः॥ देवासो विश्वधायसस्ते मांजंतु वर्चसा। येन
हस्ती वर्चसा संबभूव येन राजा मनुष्येष्वप्स्वंतः। येन देवा देवतामग्र
आयंतेन मामद्य वर्चसाग्ने वर्चस्विनं कृणु। यत्ते वर्चो जातवेदो बृहद्भवत्या
हुतेः। यावत्सूर्यस्य वर्च आसुरस्य च हस्तिनः। तावन्मे अश्विना वर्च आ
धत्तां पुष्करस्रजा। यावच्चतस्रः प्रदिशश्चक्षुर्यावत्समश्नुते। तावत्समै
त्विंद्रियं मयि तद्धस्तिवर्चसं। हस्ती मृगाणां सुषदामतिष्ठावान्बभूव
हि। तस्य भगेन वर्चसाभिषिंचामि मामहं। सिंहे व्याघ्र उत या पृदाकौ
त्विषिरग्नौ ब्राह्मणे सूर्ये या॥ इंद्रं या देवी० सा न एतु वर्चस० यशो हविर्वर्ध
तामिंद्रजूतं सहस्रवीर्यं सुभृतं सहस्कृतं॥ यः प्रसर्स्राणमनु दीर्घाय
चक्षसे हविष्मंतं मा वर्धय ज्येष्ठतातये॥ अच्छा म इंद्रं यशसं यशोभिर्य
शस्विनं नमसा मा विधेम। नो राष्ट्रमिंद्रजूतं तस्य ते रातौ यशसः स्याम यशा
इंद्रो यशा अग्निर्यशाः सोमो अजायत। यशा विश्वस्य भूतस्याहमस्मि
यशस्तमः। यशसं मेंद्रो मघवान्कृणोतु यशसं द्यावापृथिवी उभे इमे॥
यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणाया इह स्यां। यथेंद्रो द्या
वापृथिव्योर्यशस्वान्। यथाप ओषधीषु विभ्रती ॥ एवा विश्वेषु देवेषु

वयंसर्वेषुयशसःस्याम।।यथाइंद्रोयथाअग्निः॰॥गिरावरगराटेषुहि
रण्येगोषुयद्यशः।सुरायांसिच्यमानायांकीलालेश्रोमधुतन्मयि॥
अश्विनासारघेणमामधुनातंक्तुभस्पती।यथामर्मस्वतीवाचमाव
दामिजनांअनु॥मयिवर्चोअथोयशोथोयज्ञस्यपत्ययः।तन्मयिप्र
जापतिर्दिविद्यामिवदृंहतु।यथासोमःप्रातःसवनेअश्विनोर्भवति
प्रियः।एवामेअश्विनावर्चसात्मनिध्रियतां।यथासोमोद्वितीयेस
वनइंद्राग्न्योर्भवतिप्रियः।एवामइंद्राग्नीवर्चआत्मनिध्रियतां।यथा
सोमस्तृतीयेसवनऋभूणांभवतिप्रियः।एवामेऋभवोवर्चस्वाध्रि
यतां।यद्गिरिषुपर्वतेषुगोष्वश्वेषुयन्मधु॥सुरायांसिच्यमानायांय
त्तत्रमधुतन्मयि॥अश्विनासारघेणवामधुनांगंक्तुभस्पतीयथावर्च
स्वतींवाचमावदानिजनांअनु॥स्तनयित्नुस्तेवाक्प्रजापतेवृषाशु
ष्मंक्षिपसिभूम्यांदिवि।तांपशवउपजीवंतिसर्वेतेनोसेषमूर्जंपिप
र्ति।पृथिवीदंडोंतरिक्षंगर्भोद्यौःकषाविद्युत्प्रकषोहिरण्ययोबिंदुः
यैवैकषायाःसप्तमधूनिवेदमधुमान्भवति॥ब्राह्मणश्चराजाचधे
नुश्चानड्वांश्चव्रीहिश्चयवश्चमधुसप्तमं।मधुमान्भवतिमधुमद
स्याहार्यंभवति।मधुमतोलोकान्जयतियएवंवेद।यद्वीध्रेस्तनयति
प्रजापतिरेवतत्प्रजाभ्यःप्रादुर्भवतितस्मात्प्राचीनोपवीतस्तिष्ठेत्प्र
जायतेनुमाबुध्यस्वेति।अन्वेनंप्रजाअनुप्रजापतिर्बुध्यतेयएवंवेद।
यच्चवर्चोअसेषुसुरायांचयदाहितं।यद्गोष्वश्विनावर्चस्तेनमांवर्च
सावतं।येनमहानघ्न्याजघनमश्विनायेनवासुरा।येनाक्षाअभ्यसि
च्यंतेतेनेमांवर्चसावतं॥योनिध्मोदीदयदप्स्वंतर्यंविप्रासईडते॥
अध्वरेषु॥अपांनपान्मधुमतीरपोदायाभिरिन्द्रोवावृधेवीर्यावान्इद
महंरूपंतेअद्यभंतनूंदूषिमपोहामियोभद्रोरोचनस्तमुदचामि॥आ
स्येब्राह्मणास्नपनीर्हरंत्ववीरघ्नीरुदजंत्वापः।अर्यम्णोअग्निंपर्येतुपू
षन्प्रतीक्षंतेश्वशुरोदेवरश्च।शंतेहिरण्यंशमुशंत्वापः।शंमेधिर्भ
वतुशंयुगस्यतृद्म।शंतआपःशतपवित्राभवंतुसंपत्यातन्वंसंस
दस्व॥वर्चस्यगणःसमाप्तः॥अमूःपारेपृदाक्वस्त्रिषप्तानिर्जराय
वः।तासांजरायुभिर्वयमक्ष्यावपिव्ययामस्यघायोपरिपंथिनवि

ज्येतुर्केततीपिनाकमिवबिभ्रतीविष्वक्पुनर्भुवामनोअसमृद्धाअ
घायवेनबहकःसमेवेकेनार्भकाअभिदाधृष्णुः॥वेणोरद्गाइवाभि
नोमासृद्धाअघायवः॥प्रेषैप्रस्फुरंतंवहतंपृणतोगृहात्॥ इंद्राण्येतु
प्रथमाजीतामुषितापुरः॥पातंनइंद्रापूषणादितिःपांतुमरुतः।अपां
नपात्सिंधवःसप्तपातनउपातुनोविष्णुरुतद्यौः॥पातंनोद्यावापृथिवी
अभिष्टये॥पातुग्रावापातुनोमोनोअंहसः पातुनोदेवीसुभगासरस्व
तीपात्व ग्निःशिवायेअस्यपायवः।पातंनोदेवाश्विनाशुभस्पतीउ
षासानक्तोतनउरुष्यतां॥अपांनपादभिह्रुतीगयस्यचिद्देवत्वष्टर्व
र्धयसर्वतातये।त्वष्टामेदैव्यंवचःपर्जन्योब्रह्मणस्पतिः॥पुत्रैर्भ्रातृभि
रदितिर्नोनुपादनोदुस्तरंत्रायमाणंसहः॥येनसोमादितिःपथामित्रा
वायंत्यद्रुहः॥तेनानोवसागहि।येनसोमसाहंत्यासुरान्रंधयासिनः॥
तेनानोअतिवोचलानः॥येनदेवाअसुराणामोजांस्यवृणीध्वं।तेनानः
शर्मयच्छथ॥यथाहृक्षंजिंबुजासमंतपरिशस्वते॥एवापरिष्वपस्वमां
यथामांकामिन्यसोयथामानापगाअसः।नमोदेवदेवेभ्योराजवधे
भ्यः।यथोयंविष्वानांवधास्तेभ्योमृत्योनमोस्तुते॥नमस्तेअधिवाका
यपरावा कायतेनमः।सुमत्यैमृत्योतेनमोदुर्मृत्योनइदंनमः॥नम
स्तेयातुधानेभ्योनमस्तेभेषजेभ्यः॥नमस्तेमृत्योमूलेभ्योब्राह्मणेभ्यइ
दंनमः।अभयंमित्रावरुणावि हास्तुनोअभयंसोमसवितानःकृणो
तु॥अभयंनोस्तूर्वंतरिक्षंसप्तऋषीणांचहविषाभयंनोअस्तु।अन
मित्रंनोअधरादनमित्रंनउत्तरात्॥इंद्रासमि त्रंनःपश्चादनमित्रंपु
रस्कृधि।उपप्रागात्सहस्राक्षोयुक्त्वाशपथोरथं।शप्तारमन्विच्छन्म
वृकइवाविमतोगृहं।परिणोवृङ्धिशपथहृदमग्नीरिवादहन्।शप्तारम
त्रनोजहिदिवोवृक्षमिवाशनिः।योनःशपादशपतोयश्चनःशपतःश
पात्॥वृक्षइवविद्युताहतआमूलादनुशुष्यतु॥अनमित्रंनोअधरा
दनमित्रंनउत्तरात्॥इंद्रासमित्रंनःपश्चादनमित्रंपुरस्कृधि॥मनसेचे
तसेधियआकूतयउतचित्तये।मत्यैश्रुतायचक्षसेविधेमहविषावयम्।
अपानायव्यानायप्राणायभूरिधायसे।सरस्वत्याउरुव्यचेविधेमहवि
षा वयं।यमोमृत्युरघमारोनिर्ऋत्योबभ्रुशर्वोस्तानीलशिखंडः।देवज

नाःसेनन्योंनस्थिवांसतिअस्माकंपरियंतुवीरान्॥ मनसाहोमैर्हवि
षाघृतेनपर्याथास्मउतराज्ञेभयाय। नमस्येभ्योनमसएभ्यःकृणो
म्यन्यात्रास्मदघविषानयंतु॥ त्रायध्वंनोअघविषाभ्योवधाद्विश्वेदेवा
मरुतोविश्ववेदसः॥ अग्नीषोमावरुणःपूतदक्षावातापर्जन्ययोःसुम
तौस्यामः। बृहस्पतिमं० त्वमृषु० त्रातारमिंद्र० इंद्रःसुत्रामा। अभयंनः
कृणोत्वितिविशेषः। मसुत्रामास्ववां० तस्यवयं। विपरीते १ आमंद्रै
रिंद्रहरि० वर्ममेद्यावापृथिवीवर्माहर्वर्मसूर्यः। वर्ममेविश्वेदेवाःक्रन्
माप्राथस्त्रथीचिकाः। ऐंद्राग्नंवर्मबहुलंविश्वेदेवानातिविध्यंतिसर्वे।
तन्मेतन्वंत्रायतांसर्वतोबृहदायुष्माञ्जरदष्टिर्यथासत्॥ गिरयस्ते
पर्वताहिमवंतोरण्यंतेपृथिविस्योननमस्तु। भ्रुवंकृष्णांरोहिणींवि
श्वरूपांध्रुवांभूमिंपृथिवीमिन्द्रगुप्तां॥ यत्तेमध्यंपृथिवियच्चनभ्यंयास्त
ऊर्जस्तन्वःसंबभूवुस्तासुधेह्यभिनःपवस्वमाताभूमिःपुत्रोअहंपृथि
व्याः॥ यास्तेप्राचीःप्रदिशोयाउदीचीर्यास्तेभूमेअधराद्याश्चपश्चात्।स्यो
नास्ता मह्यंचरतेभवंतुमानिपप्तंभुवनेशिश्रियाणः॥१॥ मानःपश्चा
न्मापुरस्तान्नुदिष्ठोत्तरादधरादुतस्वस्तिभूमेनोभवमाविदन्परिपंथि
नोवरीयोयावयावधं॥ स्वस्त्ययनगणः॥ स्वस्तिदाविशांपतिर्वृत्रहा १ ब्रा
ह्मणेनपर्युक्तासिकण्वेननार्षदेन। सेनेवैषित्विषीमतिनतत्रभयमस्ति
यत्रप्राप्नोष्योषधे॥१॥ नताअर्वारेणु० १ अभयंमित्रावरुणा० १ अभ
यंद्यावापृथिवीइहास्तुनोर्विंद्राग्निमोनुदद्तंनः प्रतीचः। माज्ञातारंमा
प्रतिष्ठांविदंतमिथोविघ्नानाउपयंतुमृत्युं १ हृतंतदंसमंकुमारस्तुपश्चि
नाच्छिन्नंशिरोअविपृष्ठीश्रिणीतं॥ यत्रान्नेदद्नयिनक्षतंमुखंमयाभ
यंकृ पुतंधाप्याय १ पूर्वेमाआसइंद्रःसुत्रामा २ मेवंयथामनुगाभी
मसघायेनपूर्वेन्येयथतंयवीमि। नमएतत्पुरुषमाप्रपत्यामयंपरस्ता
दभयंतेअर्वाक् १ स्वस्तिदाविशांपतिः १ नमस्तेघोषिणीभ्योनमस्तेके
शिनीभ्योनमोनमस्कृताभ्योनमःसंभुंजतीभ्यः। आतेराष्ट्रमिहरोहि
तोहार्षीद्व्यास्तवन्मृधोअभयंतेअभूत्। तस्मैतेद्यावापृथिवीरेवती
भिःकामंदुहाथामिहशक्करीभिः १ इदमुच्छ्रेयोवसानमागांशिवेमेद्या
वापृथिवीअभूतां। असपत्नाःप्रदिशोभवंतुनवैत्वाद्विष्मोअभयंनोअ

स्क्त॥यत इन्द्र भयामहे० ऊतिभिः॥ अभयप्रगणः॥ मानोविदन्वि०
व्याधिनोमोअभिव्याधिनोविदन्॥आरात्शरव्याअस्मद्विषूचीरि
न्द्रपातय॥विष्वंचोअस्मच्छरवःपतंतुयेअस्तायेचास्याः।दैवीर्मनु०
विष्यप्रदोममामित्रान्निर्विध्यत।योनःस्वोयोअरणःसजातउतनिष्ट्योयो
अस्मांअभिदासति।इन्द्रःशरव्ययैतान्ममामित्रान्विविध्यतु०पः
सपत्नोयोऽसपत्नःयश्चद्विषच्छपातिनः॥देवास्तंसर्वेधूर्वंतु०४॥अ
दारसृद्भवतयो०१योअद्यसेन्योवधोघायूनामुदीरते।युवंतंमित्रा
वरुणावस्मद्यावयतंपरि१इतश्चयदमुतश्चयद्वधंवरुणयावयः॥
विमहच्छर्मयच्छवरीयोयावयावधं॥शासइत्थामहांअसिअमित्रसाहो
अस्तृतः॥नयस्य०४स्वस्तिदाविशांपतिः०१विनइन्द्र०१अधमंगम
यातमोयोअस्मांअभिदासति।पादव्यत्ययः।विरक्षोविमृ०।अपेन्द्र
द्वि०विमहःशर्म०संशितंमइदंब्रह्मसंशितंवीर्यं१बलंसंशितंक्षत्रम
जरमस्तुजिष्णुर्येषामस्मिपुरोहितः समहमेषांराष्ट्रंस्यामिसमोजो
वीर्यंबलं।वृश्चामिशत्रूणांबाहूननेनहविषाहं।नीचैःपद्यंतामधरेभ
वंतुयेनःसूरिंमघवानंपृतन्यान्॥क्षिणामिब्रह्मणामित्रानुन्नयामि
स्वानहं॥तीक्ष्णीयांसःपरशोरग्नेस्तीक्ष्णतराउत॥इन्द्रस्यवज्रात्ती
क्ष्णीयांसोयेषामस्मिपुरोहितः॥एषामहमायुधासंस्याम्येषांराष्ट्रं
सुवीरंवर्धयामि।एषांक्षत्रमजरमस्तुजिष्ण्वेषांचित्तंविश्वेऽवं
तुदेवाः॥उद्धर्षंतांमघवन्वाजिनान्युद्वीराणांजयतामेतुघोषः॥पृ
थग्घोषाउलुलयःकेतुमंतउदीरतां।देवाइन्द्रज्येष्ठामरुतोयंतुसेन
या॥प्रेताजयतानरउग्रावःसंतुबाहवः।तीक्ष्णेषवोऽबलधन्वनोहतोग्रा
युधाअबलानुग्रबाहवः।अवसृष्टापरापतशरव्येब्रह्मसंशिते।ज
यामित्रान्प्रपद्यस्वजह्येषांवरंवरंमामीषांमोचिकश्चन।त्वयामन्योस
रथमारुजंतोहर्षमाणासोः।संशितामरुत्वीइतिविशेषः।सूक्तं०यस्ते
मन्योविधद्वज्रसायकसहओजःपुष्यतिविश्वमानुषक्।साह्यामदास
मार्यंत्वयायुजावयंसहस्कृतेनसहसासहस्वता॥एनादेवसेनाःसू
र्यकेतवःसचेतसः।अमित्रान्नोजयंतुस्वाहा॥अवमन्युरवायतावबा
हूमनोयुजा॥पराशरत्वंतेषांपरांचंशुष्ममर्दयाधानोरयिमाकृधि।

निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ। वृश्चामि शत्रूणां बाहून
नेन हविषाहं। इंद्रश्च गारं प्रथमं नैर्हस्तममुं नेभ्यः। जयंतु सत्व
नो मम स्थिरेणेंद्रेण मेदिना॥ निर्हस्तः शत्रुरभिदासंनस्तु ये सेनाभि
र्यधमायंत्यस्मान्॥ समर्पयेंद्र महता वधेन द्रात्वेषामघहारो विवि
द्धः १ आतन्वाना आयच्छंतोस्यंतो ये च धावत। निर्हस्ताः शत्रवः
स्थनेंद्रो वोद्य पराशरीत्॥ निर्हस्ताः शत्रवः स्थ नोंगैषां म्लापयामसि॥
यथैषामिंद्र वेदांस्य तशो विभजामहे॥ परिवर्त्मानि सर्वत इंद्रः पूषा
च तस्तुतुः। मुह्यंत्वद्यामूः सेना अमित्राणां परस्परां॥ मूढा अमित्रा
श्चरताशीर्षाण इवाहयः। तेषां वो अग्निमूढानामिंद्रो हंतु वरंवरं॥ ए
षु नह्य वृषाजिनं हरिणस्याभियं कृधि। पराङमित्र एषत्वर्वाची गौ
रुपेसतु॥ अभिभूर्यज्ञो अभिभूरग्निरभिभूः सोमो अभिभूरिंद्रः। अभ्यहं विश्वाः
पृतना यथासान्येवा विधेमाग्निहोत्रा इदं हविः॥ स्वधास्तु मित्रावरु
णा विपश्चिता प्रजावत्क्षत्रं मधुनेह पिन्वतं॥ याधेथां दूरं निर्ऋ
तिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत्॥ इमं वीरमनु हर्षध्वमुग्रमिंद्रं
सखायो अनु संरभध्वं॥ ग्रामजितं गोजितं वज्रबाहुं जयंतमज्म प्र
मृणंतमोजसा॥ इन्द्रो जयाति न पराजयाता अधिराजो राजसु
राजयातै। चर्कृत्य ईड्यो वंद्यश्चोपसद्यो नमस्यो भवेह॥ त्वमिंद्रा
धिराजः श्रवस्युस्त्वं भूरभिभूतिर्जनानां। त्वं दैवीर्विश इमा विरा
जायुष्मत्क्षत्रमजरं ते अस्तु॥ प्राच्या दिशस्त्वमिंद्रासि राजोतो
दीच्या दिशो वृत्रहञ्छत्रुहासि। यत्र यंति स्रोत्यास्तज्जितं ते दक्षिण
तो वृषभ एषि हव्यः॥ अजित्वेंद्र वरिमतः पुरा त्वा हूरणा हुवे॥ इन्द्र
म्युग्रं चेत्तारं पुरुकृपाणामासेकृजं। यो अद्य सेन्यो वधो जिघांसन्न उदीरते।
इंद्रस्य तत्र बाहू समंतं परि दद्मः। परि दद्म इंद्रस्य बाहू समंतं त्रा
तुस्त्रायतां नः॥ देव सवितः सोम राजन्सुमनसं मा कृणु स्वस्तये॥ ॥
अपराजितगणः॥ यः सपत्नो योऽसपत्नो यश्च द्विषञ्छपाति नः॥ देवास्तं सर्वे धूर्व
तु ब्रह्म॰। शर्म वर्मैतदाहरास्यै नार्या उपस्तरे सिनीवालि प्रजायतां
भगस्य सुमतावसत्॥ उद्धर्षिणी शम्या हन्त्वा यो पापकानि मुंचत
। मा दुष्कृतौ व्येनसा वश्याव मुनमारता। अघोरचक्षुरपतिघ्नी स्योना श

ग्मास्कशेवास्तु यमागृहेभ्यः॥ वीरसूर्दैवकामासत्वयीधिषीमहिसुम
नस्यमाना॥ इतश्चयदमुतश्चयद्वधंवरुणयावय॥ विमहच्छर्मयच्छ
वरीयोयावयावधं॥ अपेंद्रद्विष० जासतोवधं० विमहच्छर्मन्यूयंनःअ
वतोनयान्मरुतः सूर्यत्वचसः॥ शर्मयच्छाथसप्रथाः॥ इममग्नआयु
षेवर्चसेनयप्रियंरेतोवरुणमित्र।माते०। निस्त्रोदेवीर्महिनः शर्मयच्छ
तुप्रजायैनस्तन्व३यच्छपुष्टं। माहास्महिप्रजया०। उरुव्यचानामहिषः
शर्मयच्छत्वस्मि० इंद्रस्यशर्मासि। तंत्वाप्रपद्येतंत्वाप्रविशामिसर्व
गुः सर्वपूरुषः सर्वात्मासर्वतनूःसहयन्मेस्थितेन। अश्मवर्ममेसियो
माप्राच्यादिशोघायुरभिदासात्। एतत्सऋच्छात्। योमांदक्षिणाभ्यः।
यो माप्रतीच्याः० योमोदीच्याः। योमाध्रुवायाः। योमोर्ध्वायाः० बृहता
मनउपह्वयेमातरिश्वनाप्राणापानौ॥ सूर्याच्चक्षुरंतरिक्षाच्छ्रोत्रंपृथि
व्याःशरीरं। येनदेवाअसुराणामोजांस्यवृणीध्वंतेनानःशर्मयच्छथ
। यथावृक्षं लिबुजासमंतंपरिषस्वजे। एवापरिष्वजस्वमांयथामांका
मिन्यसोयथामन्नापगा असः॥ यथेमेद्यावापृथिवीसद्यःपर्येतिसू
र्यः। एवापर्येमितेमनोयथामांकाम० यथासुपर्णःप्रपतन्पक्षौनिहंति
भूम्यां। एवानिहन्मितेमनोयथामांकाम० आंजमेतन्व३यदेवाञ्जाक्षौ
३आंजनावथौ। अक्षौवृषण्यंत्याःकेशामांतेकामेनशुष्यतु॥ ममत्वा
दोषणिःश्रिशंकृणोमिहृदयश्रिशं। यथावतःपराग सोमाम्नुष्याहं
कदाचन॥ अनडुद्भ्यस्त्वंप्रथमंधेनुभ्यस्त्वमरुंधतिः॥ अधेनवेयवसे
शर्मयच्छचतुष्पदे॥ शर्मयच्छत्वोषधिःसहदेवीररुंधती॥ करत्पयस्वं
तंगोष्ठमयक्ष्माउतपुरुषात्॥ निस्वरूपांसुभगामत्स्याददामिजीवलां
॥ मानोरुद्रस्यास्तांहेतिंदूरंनयतुगोभ्यः तनूष्टेवाजितन्वाशमभ्यधा
वतुशर्मतुभ्यं। अपद्भुतामहोधरुणायपदेवोदिवीवज्योतिस्वामिमी
मात्॥ वाजस्यनुप्रसवेमातरंमहीमदितिंनाम वचसाकरामहे॥ यस्य
उपस्थाउर्व१न्तरिक्षंसानःशर्मत्रिवरूथं नियच्छात्। देवानांपत्नीरु
शती०१यच्छंतुसमाश्नो। अधिब्रूहिमारभथासृजेमंतवैवसंसर्वहाया
इहास्तु॥ भवाशर्वौमृडतंशर्मयच्छमयसिध्यदुरितंधत्तमायुः॥ रक्षो
हणंवाजि०१स्वस्तिंमेद्यावापृथिवीस्वस्तिमित्रोअकरयं॥ स्वस्तिंमे

ब्रह्मणस्पतिः स्वास्तिं सविताकरत्। वर्ममेद्यावापृथिवीस्वस्त्ययनो
क्ता१ऐंद्राग्नंवर्म०१ इयमपितत्र। वर्ममह्यमयंमणिः फालाज्जातः
करिष्यति॥पूर्णोमंथेनमागमद्रसेनसहवर्चसा।मित्रःपृथिव्योद
क्रामत्तांपुरंप्रणयामिवः॥तामाविशतांप्रविशतसावःशर्मचव
र्मयच्छतु॥वायुरंतरिक्षेणोद०सूर्योदिवो०चंद्रमानक्षत्रैरु०सोम
ओषधीरु०यज्ञोदक्षिणाभिरु०समुद्रोनदीभिरु०ब्रह्मब्रह्मचारिभि
रु०इन्द्रोवीर्येणो०देवाअमृतेणो०प्रजापतिःप्रजापतिभिरु०अपन्न
धुपोरुषेयेवधंयमिंद्राग्नीधीनासविताबृहस्पतिः।सोमोराजावरु
णाअश्विनायमःपूषास्मान्परिपातुमृत्योः॥यानिचकारपुनर्बृह
स्पतिः॥प्रजापतिर्मातरिश्वाप्रजाभ्यः।प्रदिशोयानिवसतेदिशश्चता
निमेवर्माणिबहुलानिसंतुयत्तेतनूष्वनह्यंतदेवाधिराज्ययोधेह्नि।
इंद्रोयच्चक्रेवर्मतदस्मान्पातुसर्वतः॥वर्ममेद्यावापृथिवीस्वस्त्यय
नोक्ता।अपसपत्नंपुरस्तात्पश्चान्नोअभयंकृतं।सवितादक्षिणउ
त्तरान्माशचीपतिः दिवोदित्यारक्षंतुभूम्यारक्षंत्वग्नयः।इंद्राग्नीर
क्षतांमापुरस्तादश्विनावभितःशर्मयच्छतां।तिरश्चीनघ्न्यारक्षतुजा
तवेदाभूतकृतोमेसर्वतःसंतुवर्महृपदाः ३॥ इतिशर्मवर्मगणः
॥ ॥अथपूर्वोक्ताअशीत्युत्तरशतंश्लोकाः॥सुरास्त्वामभिषिंचंतुब्र
ह्मविष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥१॥प्र
द्युम्नश्चानिरुद्धश्चभवंतुविजयायते॥आखंडलोग्निर्भगवान्यमो
वैनिर्ऋतिस्तथा॥२॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्म
णासहिताःशेषोदिक्पालाःपांतुतेसदा॥३॥रुद्रोधर्मोमनुर्दक्षोरु
चिःश्रद्धातुपार्थिव॥भृगुरत्रिर्वसिष्ठश्चसनकश्चसनंदनः॥४॥सन
त्कुमारश्चतथाभगवानपिचांगिराः॥पुलहश्चपुलस्त्यश्चमरीचिः
कश्यपःप्रभुः॥५॥एतेत्वामभिषिंचंतुप्रजाध्यक्षाःसमागताः॥प्रभा
कराबर्हिषदोअग्निष्वात्तास्तथैवच॥क्रव्यादाश्चोपहूताश्चआज्यपा
श्चसुकालिनः॥एतेत्वामभिषिंचंतुपितरश्चाग्निभिःसह॥७॥लक्ष्मी
र्वेदीशचीख्यातिरनसूयातथास्मृतिः॥संभूतिःसन्नतिश्चैवसमाप्ती
तिस्तथैवच॥८॥स्वाहास्वधाचतेराजन्नभिषिंचंतुमातरः॥कीर्तिर्ल

ह्रीधृतिर्मेधापुष्टिर्लक्ष्मीस्तस्याक्रिया॥९॥बुद्धिर्लज्जावपुःशांतिस्तु
ष्टिःसिद्धिश्चपार्थिव॥एतास्त्वामभिषिंचंतुधर्मपत्न्यःसमागताः॥
१०॥अरुंधतीवसुर्यामीलंबाभानुर्मरुत्वती॥संकल्पाचमुहूर्त्ताचसा
ध्याविश्वातथैवच॥११॥धर्मपत्न्योदशान्यास्त्वामभिषिंचंतुपार्थिव
॥अदितिर्दितिर्दनुःकालासुहृष्टानाप्रुषामुनिः॥१२॥कद्रूःक्रोध
वशाप्राचीविनतासुरभिस्तथा॥एतास्त्वामभिषिंचंतुकश्यपस्य
प्रियाःस्त्रियः॥१३॥पत्नीतेबहुपुत्रस्यसुपुत्रायाचभामिनी॥समा
यात्वभिषेकायविजयायचपार्थिव॥१४॥कृशाश्वपत्नीचतथासुप्र
भातुजयानघा॥सुदर्शनातयोःपुत्रोविजयंविदधातुते॥१५॥मनो
रमाभानुमतीविशालायाचबाहुदा॥अरिष्टनेमिपत्न्यस्त्वामभिषिं
चंतुपार्थिव॥१६॥कृत्तिकारोहिणीदेवीविशाखाचतथानृप॥अनूरा
धातथाज्येष्ठामूलंचवसुधाधिप॥१७॥आषाढाचतथापूर्वातथा
न्याचोत्तराह्वया॥अभिजिच्चतथाश्रुत्याधनिष्ठाचतथैवच॥१८॥त
थाशतभिषक्चैवपूर्वाभाद्रपदातथा॥उत्तरारेवतीराजन्अश्विनीभ
रणीतथा॥१९॥एतास्त्वामभिषिंचंतुसोमपत्न्यःसमागताः।मृगी
चमृगचर्माचश्वेतभद्रचराहरिः॥पूताचकपितादंष्ट्रासुरभासुलभा
तथा॥एताःपुलस्त्यपत्न्यस्त्वामभिषिंचंतुपार्थिव॥२१॥श्येनीभासी
तथाक्रौंचीधृतराष्ट्रीतथाशुकी॥पत्न्यस्त्वामभिषिंचंतुअरुणस्यार्कसा
रथेः॥आयतिर्नियतिश्चैवरात्रिर्निद्राचपार्थिव॥एतास्त्वामभिषिंचं
तुलोकसंस्थानहेतवः॥२३॥उमासेनाशचीचैवधूमोर्णानिर्ऋतिस्त
था॥गौरीशिवाचबुद्धिश्चवलयाचैवनंदना॥२४॥आनृक्याचतथा
ज्योत्स्नायाचदेवीवनस्पतिः॥एतास्त्वामभिषिंचंतुकालस्यावयवाश्च
भाः॥२५॥आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥ग्रहास्त्वाम
भिषिंचंतुराहुःकेतुश्चतर्पिताः॥स्वायंभुवोमनोःपुत्रोमनुःस्वारोचि
षस्तथा॥औत्तमस्तामसश्चैवरैवतश्चाक्षुषस्तथा॥वैवस्वतोथ
सावर्णोदक्षब्रह्मसुतावुभौ॥धर्मपुत्रोरुद्रपुत्रोरौच्योभौत्यश्चयो
मनुः॥एतेत्वामभिषिंचंतुमनवश्चचतुर्दश॥विश्वभुग्विश्वपश्चि
च्चसुशांतःसुसुखीविभुः॥मनोजवस्तथौजस्वीबलिरंकतमांतिको॥

वृषश्चकतिधामाच दिविसक्रमुचिरेवच॥एते त्वामभिषिंचंतुरुद्र
पालाश्चतुर्दश॥रेवंतश्चकुमारश्चतथावर्चाःकुमारकः॥वीरभद्रश्च
हीचविश्वकर्मापुरोजवः॥एतेत्वामभिषिंचंतुसुरश्रेष्ठाःसमागताः॥
आत्माह्यायुसुमंतोदक्षःपटुःप्राणस्तथैवच॥हविष्मश्चगविष्ठश्चन
तःसत्यश्चपार्थिव॥अभिषिंचंतुराजंस्त्वांदेवाह्यंगिरसोदश॥क्रतु
र्दक्षोवसुःसत्यःकालकामोमुनिस्तथा॥धृतिमान्मनुजश्चैवरोचमा
नस्तथैवच॥एतेत्वामभिषिंचंतुविश्वेदेवास्तथादश॥अजैकपाद
हिर्बुध्न्यःपुष्पकेतुस्तथाबुधः॥भरतश्चतथामृत्युःकापालिरथकिंकि
णिः॥एकादशैतेरुद्रास्त्वामभिषिंचंतुपार्थिव॥भुवनोभावनश्चैवसु
जन्यःसुजनस्तथा॥क्रतुःसुवर्णवर्णश्चव्यजश्चव्यसुतस्तथा॥प्रसव
श्चाव्ययश्चैवदक्षश्चमनुजाधिप॥एतेत्वामभिषिंचंतुभृगवोनाम
देवताः॥मनोग्रहश्चप्राणश्चनरोपानश्चवीर्यवान्॥चितिर्हयोनय
श्चैवहंसोनारायणस्तथा॥विभुश्चापिदिविश्रेष्ठस्तथान्यश्चजगद्धि
तः॥एतेत्वामभिषिंचंतुसाध्याद्वादशपार्थिव॥धातामित्रोर्यमापूषा
शक्रोंशोवरुणोभगः॥त्वष्टाविवस्वान्सविताविष्णुर्द्वादशमःस्मृतः
॥एतेत्वामभिषिंचंतुकाश्यपादितिसंभवाः॥एकाद्वित्रिचतुर्ज्योतिः
पंचज्योतिस्तथैवच॥एकशक्रोद्विशक्रश्चत्रिशक्रश्चमहाबलः॥इं
द्रश्चगत्यादृश्यंनेततःप्रतिसकृत्तथा॥मितश्चसंमितश्चैवअमितश्च
महाबलः॥ऋतजित्सत्यजिच्चैवसुषेणःश्येनजित्तथा॥अतिमित्रस्त
थामित्रःपुरुजिच्चापराजितः॥ऋतश्चऋतवान्धातावरुणोविधृतो
ध्रुवः॥विधारणोमहातेजावासवस्यपरःसखा॥ईदृगन्यादृशश्चैव
एतादृगमिताशनः॥क्रीडनश्चतथाशक्तिःसभरश्चमहायशाः॥धातु
रुग्रोमुनिर्भीमोअतिमुक्तःक्षिपःसहः॥द्युतिर्वपुरनाधृष्योवासःका
मोजयोविराट्॥एतेत्वामभिषिंचंतुमरुतश्चसमागताः॥देवाह्येको
नपंचाशन्महाबलपराक्रमाः॥चित्रांगदश्चित्ररथश्चित्रसेनश्चवीर्य
वान्॥ऊर्णायुरनघश्चैवउग्रसेनश्चवीर्यवान्॥धृतराष्ट्रश्चसोमश्च
सूर्यवर्चास्तथैवच॥दुराधस्तृणपःकार्ष्णिर्नंदिश्चित्रस्तथैवच॥क
लिश्चाप्यंगिराराजन्पर्जन्योनारदस्तथा॥वृषपर्वाचहंसश्चतथा

चैवहाहाहूहूः॥ विश्वावसुस्ताम्रकश्च तथा चसुरुचिश्च यः। एते
त्वामभिषिंचंतु गंधर्वाः पृथिवीपते॥ आह्वृत्यः शोभयंत्यश्च वेगवत्य
स्तथैव च॥ आप्लुवत्यस्तथोर्जश्च तथा वैकुरुपस्तु भाः॥ वभ्रवश्चा
मृतरुचो भुवश्चैव रुचस्तथा॥ भीरवः शोचयंत्यश्च दिव्याह्यप्सरसां
गणाः॥ एतास्त्वामभिषिंचंतु कामिन्यस्तरुणप्रियाः॥ अनुत्तमास्त
रूपा च सुकेशी च मनोवती॥ मेनका सहजन्या च पर्णा शापुंजिकास्थ
ला॥ क्रतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि॥ प्रम्लोचा याप्यनु
म्लोचा रंभा चैवोर्वशी तथा॥ पंचचूडा सामवती चित्रलेखा तु पार्थि
व॥ मिश्रकेशी सुगंधिश्च विद्युत्पर्णा तिलोत्तमा॥ अदूलक्ष्मणाक्षेमा
असिता रुच्चिका तथा॥ सुव्रता च सुबाहुश्च सुबोधा सुवपुस्तथा। पुं
डरीका सुदारा च सुराधा सुरसा तथा॥ हेमा सरस्वती चैव कामला
सूनृता लया॥ सुमुखा हंसपादी च वासोलीरतिलालसा॥ एतास्त्वा
मभिषिंचंतु राजन्नप्सरसः शुभाः॥ प्रह्लादश्च महातेजास्तथा राजन्वि
रोचनः॥ धन्वी बाणस्तथान्ये च दितिपुत्राः समागताः॥ अभिषिंचंतु
दैत्याश्च दिव्येन्याप्यंभसा स्वयं॥ विप्रचित्तिमुखाः सर्वे दानवास्त्वां
समागताः॥ अभिषिंचंतु राजानं राज्यं कर्त्तुं सुसत्वराः॥ हेत्यश्चैव
प्रहेत्यश्च सलिलैर्दूरस्तथैव च॥ सुकेशी पौरुषेयश्च यज्ञहा पुरुषाद
कः॥ विद्युत्सूर्यस्तथा व्यासो वधश्चासनस्तथा॥ एते त्वामभिषिंचं
तु समागम्याद्य राक्षसाः॥ सुसिद्धो माणिभद्रश्च सुमनो नंदनस्तथा॥ कं
डूतिः पंचगश्चैव मणिमान्वसुमांस्तथा॥ सर्वानुभूतिः शंखश्च पिंगा
क्षश्च तुरस्तथा॥ यमो मंदरसो भीमः पद्मचंद्रः प्रभाकरः॥ मेघवर्णश्च
भव्यश्च प्रद्योतश्च महायशाः॥ भूतिमान्केतुमांश्चैव मौलिमांश्च चतु
र्दशः॥ श्वेतश्च विपुलश्चैव प्रद्युम्नश्च जयावहः। पसयसो वलाकश्च
कुमुदश्च बलाहकः॥ पद्मनाभः सुगंधश्च सुवीरो विजयाकृतिः॥ पौर्ण
मासो हिरण्याक्षः शतजिह्वश्च वीर्यवान्॥ एते त्वामभिषिंचंतु राजव
द्वाश्च सत्तमाः॥ शंखपद्मश्च राजेंद्र मकरः कच्छपस्तथा॥ महापद्म
श्च नीलश्च खर्वः कुंदो मुकुंदकः॥ एते त्वामभिषिंचंतु निधयस्तु समागताः
॥ कुगलाश्चैकवक्त्राश्च ये च सूचीमुखा नृपाः॥ दुःपूरणा विषादाश्च जव

लनांगारकास्तथा॥कुंभमात्राःप्रतुंडाश्चउपवीराउलूखलाः॥अक
र्णाश्चक्रखंडाश्चतथायेपात्रपाणयः॥पांसवश्चनितुंडाश्चविप्रुणाः
स्कंदनास्तथा॥एतेत्वामभिषिंचंतुपिशाचानांतुजातयः॥ब्रह्मचर्यस्थि
तादांताःसर्वज्ञाःसर्वदर्शिनः॥नानाप्रकारवदनानानाबाहुशिरोधराः
॥चतुष्पथपराट्टालशून्यालयनिकेतनाः॥त्रिपुरारिंभवंदेवंयेगता
मनुजेश्वर॥तेत्वामद्याभिषिंचंतुगणाभूतपतेःस्वयं॥महाकालंपु
रस्कृत्यनरसिंहंचमातरः॥सर्वास्त्वामभिषिंचंतुराजराज्येनराधिप॥
ग्रहाःस्कंदोपिशाचश्चनैगमेयस्तथैवच॥अभिषिंचंतुराजंस्त्वांसर्वेसं
धरग्रहाःशुभाः॥डाकिन्योयाश्चयोगिन्यःखेचर्योभूचरास्तथा॥सर्वाः
स्त्वामभिषिंचंतुसमेत्यमनुजेश्वर॥गरुडश्चारुणश्चैवआरुणिश्चम
हाखगः॥संपातीविनतश्चैवविष्णुर्गंधकुमारकः॥एतेत्वामभिषिंचंतु
सुपर्णाःपृथिवीपते॥अनंतश्चमहानागोवासुकिःशंखतक्षकौ॥सुपर्णी
रिश्चकुंभश्चवामनोथांजनोत्तमः॥ऐरावतोमहापद्मःकंबलाश्वतरा
वुभौ॥एलापत्रश्चखंडश्चकर्कोटकधनंजयौ॥महाकर्णोमहानीलो
धृतराष्ट्रबलाहकौ॥कुमारःपुष्पदंतश्चगंधर्वश्चमनस्विकः॥नहुषः
खररोमाचशंखपालस्तथैवच॥पद्मश्चकुलिकश्चैवपाणिरित्येवमा
दयः॥नागास्त्वामभिषिंचंतुराजराज्येनराधिप॥कुमुदैरावतौपद्मःपु
ष्पदंतोथवामनः॥सुप्रतीकोंजनोनीलःपांतुत्वांसर्वतोद्विपाः॥पैताम
हास्तथाहंसावृषभःशांकरस्तथा॥उच्चैःश्रवाश्चाश्वपतिस्तथाधन्व
न्तरिर्नृप॥कौस्तुभःशंखराजश्चपांतुत्वांसर्वतःसदा॥चक्रंत्रिशूलंव
ज्रश्चनंदकोस्त्राणिचाप्यथ॥सर्वेभिषेकंदत्वाचदिशंतुविजयंध्रुवं॥
धर्मश्चवृद्धशाखाश्चसत्यंदानंतपस्तथा॥यशोयज्ञास्तथैवायुर्ब्रह्म
चर्यंदमःशमः॥एतेत्वामभिषिंचंतुचित्रगुप्तश्चपार्थिव॥दंडःपिंगल
श्चैवमृत्युःकालांतकावुभौ॥वालखिल्यास्तथासर्वेभवंतुविजयायते
॥दिव्येनवश्चतस्मात्त्वांस्करभिश्चतथानृप॥अभिषिंचंतुसर्वाभिर्गोभिः
सार्द्धंनरेश्वर॥वेदव्यासश्चवाल्मीकिःशमनोथपराशरः॥देवलःप
र्वतश्चैवदुर्वासाभागुरिःमुनिः॥याज्ञवल्क्यःसजावालिर्जमदग्निःशु
चिश्रवाः॥विश्वामित्रःस्थूलकच्छोवर्द्धनोत्रिर्विदूरथः॥एकतश्चद्वि

तश्चैवत्रितोगौतमगालवौ॥शांडिल्यश्चभरद्वाजोमौद्गल्योवेदवाह्
नः॥बृहदश्वःकुदिमद्रोजपजानुर्घंटोदरः॥यवक्रीतोथरैभ्यश्चआ
त्माधामश्चजैमिनिः॥ऋषिःसारंगवश्चैवतथागस्त्योमहातपाः॥दुदु
र्मुद्गुर्मिश्चैवदृढबाहुर्महोदयः॥कात्यायनश्चकण्वश्चबलाक
श्चभनंदनः॥एतेत्वामभिषिंचंतुमुनयःपार्थिवोत्तम॥पृथुर्दिलीपोभर
तोदुःष्यंतःशत्रुजिद्बली॥मनुःककुत्स्थश्चानेनायुवनाश्वोजयद्रथः
॥मांधातामुचुकुंदश्चतथाराजापुरूरवाः॥इक्ष्वाकुश्चयदुश्चैवपुरु
र्भूरिश्रवास्तथा॥अंबरीषश्चनाभागोबृहदश्वोमहाहनुः॥प्रद्युम्नः
श्चाथसुद्युम्नोभूरिद्युम्नश्चसंजयः॥एतेचान्येचराजानस्तवराजन्दि
वंगताः॥समायांत्वभिषेकायविजयायनधाश्रिये॥पर्जन्याद्यास्तथाभू
पमेघाःसर्वेसमागताः॥द्रुमाश्चौषधयोरत्नंबीजानिविविधानिच॥स
र्वेत्वामभिषिंचंतुराजराज्येसुसत्वराः॥पुरुषश्चाप्रमेयात्मामहाभूता
नियानिच॥पृथिवीवायुराकाशमापोज्योतिस्तथैवच॥मनोबुद्धिस्तथै
वात्माअव्यक्तश्चमहीपते॥एतेत्वामभिषिंचंतुसमेतावसुधाधिप
॥रुक्मभौमःशिलाभौमःपातालोनीलमृत्तिकः॥पीतरक्तासिताश्चैव
श्वेतभौमास्तथैवच॥एतेत्वामभिषिंचंतुविजयायमहीपते॥जंबूशा
कःकुशःक्रौंचःशाल्मलीद्वयएवच॥प्लक्षश्चपुष्करश्चैवस्वस्वाम्यंप्र
दिशंतुते॥उत्तराःकुरवःपुण्यारम्याहैरण्वतास्तथा॥भद्राश्वःकेतुमा
लश्चवर्षश्चैवइलावृतः॥हरिवर्षःकिंपुरुषोवर्षोभारतसंज्ञकः॥ए
तेत्वामभिषिंचंतुसमेत्यवसुधाधिप॥इक्षुद्वीपःकसेरुश्चताम्रवर्णो
गभस्तिमान्॥नागद्वीपस्तथासौम्योगंधर्वोवरुणस्तथा॥अयंचन
वमस्तेषांस्वस्वाम्यंप्रदिशंतुते॥हिमवान्हेमकूटश्चनिषधोनीलए
वतु॥श्वेतश्शृंगोऽगवान्मेरुर्माल्यवद्गंधमादनौ॥महेंद्रोमलयःसह्यः
शुक्तिमानृक्षवांस्तथा॥विंध्यश्चपारियात्रश्चसर्वएवमहीधराः॥स
मागम्याभिषिंचंतुत्वामद्यवसुधाधिप॥ऋग्वेदोथयजुर्वेदःसामवेदस्त
थैवच॥अथर्ववेदोवेदास्त्वांअभिषिंचंतुपार्थिव॥इतिहासोधनुर्वेदो
गांधर्वश्चायुसंज्ञितः॥सप्तोपवेदाश्चतथाविजयायभवंतुते॥शिक्षा
कल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः॥छंदोविचितिषष्ठानिविजयाय

भवंतुते॥ अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः। धर्मशास्त्रंपुराणं
चविद्याह्येताश्चतुर्दश॥ सांख्ययोगःपांचरात्रोवेदःपाशुपतंतथा॥
कृतांतपंचकंचैवशास्त्राणिविविधानिच॥ गायत्रीपापशमनीगंगा
देवीमहाशिवा॥ गांधारीचतथानारीविजयंप्रदिशंतुते॥ देवदानवगं
धर्वायक्षराक्षसपन्नगाः॥ ऋषयोमनवोगावोदेवमातरएवच॥ देव
पत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः॥ अस्त्राणिसर्वशस्त्राणि
राजानोवाहनानिच॥ औषधानिचरत्नानिकालस्यावयवाश्चये॥
स्थानानिचसमस्तानिपुण्यान्यायतनानिच॥ जीमूतानिचसर्वाणि
तद्विकाराश्चसर्वशः॥ उक्तानिचाप्यनुक्तानिविजयायभवंतुते॥ ल
वणक्षीरतोयाश्चघृतमंडोदकास्तथा॥ दधिमंडोदकाश्चैवसुरोदश्च
नराधिप॥ तथैवेक्षुरसोदश्चतथास्वादूदकश्चयः॥ गर्भोदकश्चतोयै
स्त्वामभिषिंचंतुपार्थिव॥ चत्वारःसागराश्चैवस्वेनतोयेनपार्थिव॥ स
मागम्याभिषेकेतुविजयंप्रदिशंतुते॥ पुष्करश्चप्रयागश्चप्रभासोनै
मिषंतथा॥ तथाब्रह्मसरःपुण्यंगयाशीर्षंचपार्थिव॥ कालोदकोनंदि
कुंडस्तथैवोत्तरमानसः॥ स्वर्गमार्गप्रदश्चैवतथापंचनदश्चयः॥ भृ
गुतीर्थंप्रभासश्चतथैवामरकंटकः॥ आश्रमःकालिकायाश्चतृणबिं
दोस्तथाश्रमः॥ गोतीर्थंचाग्नितीर्थंचविमलःस्वर्गएवच॥ जंबूमार्गश्च
विमलःपुण्यस्तंडुलिकाश्रमः। कपिलश्चतथातीर्थौतीर्थौवातिकखंदि
कौ॥ महासरस्तथागस्त्यकुमारीतीर्थमेवच॥ अंगद्वारःकुशावर्तौ
बिल्वकोनीलपर्वतः॥ वाराहःपर्वतश्चैवतीर्थंकनखलंतथा॥ सुगंधा
चधाराकुंभास्तथाशाकंभरीतथा॥ भृगुतुंगःसकुब्जाम्रःकपिलस्यत
थाश्रमः॥ चमसोद्भेदनःपुण्यस्तथाविनशनंशुभः॥ अजतुंगश्चगो
चश्चअश्वगंधश्चपार्थिव॥ कालंजरःसकेदारोरुद्रकोणिस्तथैवच
॥ महालयश्चराजेंद्रवदर्याश्रमएवच॥ नंदाचसोमतीर्थंचसूर्यती
र्थंशतक्रतोः॥ अश्विनोर्वरुणस्याथवायोर्वैश्रवणस्यच॥ ब्रह्मणश्च
शर्वस्ययमस्यच्यवनस्यच॥ विरूपाक्षस्यधर्मस्यतथाचाप्सरसां
नृप॥ ऋषीणांचवसूनांचसाध्यानांमरुतांतथा॥ आदित्यानांचरुद्रा
णांतथाचांगिरसांनृप॥ विश्वेदेवभृगूणांचतथान्येषांचमानद॥ ग्रह

प्रस्रवणश्चैवसुप्रभाचनराधिप॥शालग्रामसरश्चैववाराहोमान
सस्तथा॥कामाश्रमस्त्रिकूटश्चचित्रकूटस्तथैवच॥सपूर्वःक्रतुसार
श्चतथाविष्णुपदंसरः॥कापिलंचतथातीर्थंवासुकेस्तीर्थमेवतु॥सिं
धूत्तमस्तपोह्वारोप्यथस्तूर्पारकुंभकः॥पुंडरीकश्चराजेन्द्रगंगासागर
संगमः॥सिंधुसागरयोश्चैवसंगमःसुमनोहरः॥तथाकुंभावसुदश्चमा
नसंचतथासरः॥तथाबिंदुसरःपुण्यंसरस्त्वच्छोदकंतथा॥धर्मार
ण्यंफल्गुतीर्थमविमुक्तंतथैवच॥लौहित्यश्चतथापुण्यंबदरीपावनः
शिवः॥तीर्थंसप्तऋषीणांचवन्हितीर्थंतुपार्थिव॥पुण्यवस्त्रापथोमे
षस्थागलेशस्तुपार्थिव॥पुष्पन्यासस्तथाचैवतीर्थंहंसपदस्तथा॥
अश्वतीर्थश्चकर्णाश्चोमणिमंथस्तथैवच॥देविकाइंद्रमार्गश्चस्वर्ण
बिन्दुस्तथैवच।आहल्यकस्तथातीर्थंस्तीर्थश्चैरावतस्तथा॥ऐरावतीसमुद्भ
हेतीर्थंभोगवशःपरं।करवीराल्हयंचैवनागमोक्षणिकस्तथा।पापमो
चनिकश्चैवऋणमोचनिकस्तथा॥उद्वेजनस्तथापुण्यःसंपूज्यःसरसो
वरः॥देवब्रह्मसरःपुण्यंसर्पिर्दधितुपार्थिव॥एतेचान्येचबहवःपुण्य
संकीर्त्तनाशुभाः॥तीर्थैस्त्वामभिषिंचंतुसर्वपातकनाशनैः॥गंगामहानदी
पुण्याह्रदिनीह्रादिनीतथा॥पावनीचतथासीताचक्षुःसिंधुश्चनर्मदा
॥सुप्रभाकांचनाक्षीचविशालामानसीह्रदा॥सरस्वत्योघनादीचसुवे
षाविमलोदका॥शिप्राशोणश्चतर्षश्चसरयूर्गंडकीतथा॥अच्छोदाच
विपाशाचचंद्रभागाइरावती॥वितस्तादेविकारंभाकेशादेवह्रदाशि
वा॥तथाचेक्षुमतीपुण्याकौशिकीयमुनातथा॥गोमतीधूतपापाचबा
हुदातुसरस्वती॥निर्विंध्याचत्रतीयाचलोहितश्चमहानदः॥देवस्मृ
तिर्वेदमातावेदघुर्घुरदातथा॥पर्णशाबंदनाचैवसदानीराकुमुद्वती॥
पीताचर्मण्वतीधूमाविदर्भावेणुमत्यपि॥अवंतीचतथाकुंतीसुरसाच
पलाशिनी॥मंदाकिनीदशार्णाचसिंधुरेखाकुमुद्वती॥नपतीपिप्पली
श्येनीकरतोयापिशाचिका॥चित्रोपलाचित्रवर्णामंजुलाबाकुलामती
॥शुक्तिमतीसिनीवालीमडूणीतपिकाकपूः॥तापीपयोष्णीनिर्विंध्या
सिताचनिषधावती॥वेणावैतरिणीभीमामंदएवतथाकुहूः॥तोयाचै
वमहागौरीदुर्गतिर्मिगिलातथा॥गोदावरीभीमरथीकृष्णावर्णाभपंक

रा॥ तुंगभद्रासुप्रकारावाल्पाकावेरिरेवच॥ कृतमालाताम्रवर्णीपु
ष्पभद्रोत्पलावती॥ नृसमाऋषिकुल्याचइक्षुकान्निदिवालया॥ लां
गुलिनीवंशधरीजंबूश्चसुकलावती॥ ऋषिकावरकेगाचमंदगामंदवा
हिनी॥ क्षमादेवीदयाव्योमापयोष्णीकालवाहिनी॥ कंपनाचविशाला
चकरतोयासुवाहिनी॥ ताम्रारुणावेत्रवतीसुभद्राचाश्ववत्यपि॥ अद्रि
काचइमाचैवसुप्रकाराहिरण्मयी॥ आपगालोपलाभासीसंध्यातुवडवा
नदी॥ महेंद्रवाणीशालाचमालिकावलयावती॥ नीलोद्भूतकराचैवबा
हुदावनवासिनी॥ नंदाचापरनंदाचसुनंदावसुवासिनी॥ एताश्चान्या
श्चराजेंद्रनद्यस्त्वांविविधोदकाः॥ सर्वपापप्रशमनाः सर्वलोकस्यमात
रः॥ सतोयपूर्णैःकलशैरभिषिंचंतुपार्थिव॥ एतैर्यथोक्तैर्नृपराजराज्ये
दत्ताभिषेकःपृथिवींसमग्रां॥ ससागरांभुंक्ष्वचिरंचजी — वधर्मेचते
बुद्धिरतीवचास्तु॥ ॥ इतिश्रीभट्टशंकरात्मजभट्टनीलकंठकृतेरा
जनीतिमयूखेराजाभिषेकप्रयोगः॥ ॥ एवंकृताभिषेकोराज्यंकुर्यात्॥
तच्चसप्तांगं॥ तानिचस्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिचेति॥ का
मंदकोपि॥ स्वाम्यमात्यश्चराष्ट्रंचदुर्गंकोशोबलंसुहृत्॥ एतावदुच्यते
राज्यसत्वबुद्धिव्यपाश्रयं॥ नीतिशास्त्रस्यदृष्टार्थत्वान्नक्रमेभिनिवेशः
कार्यः॥ तत्रस्वामीराजा॥ तत्रदेवानामंशाःसंतीत्याहमनुः॥ इंद्रानि
लयमार्काणांअग्नेश्चवरुणस्यच॥ इंद्रवित्तेशयोश्चैवमात्रानिर्हृत्य
शाश्वतीः॥ यस्मादेषांसुरेंद्राणांमात्राभ्योनिर्गतोनृपः॥ तस्मादभिभव
त्येषसर्वभूतानितेजसा॥ सोग्निर्भवतिवायुश्चसोर्कःसोमःसधर्मराट्॥
समहेंद्रःसईशःसकुबेरश्चप्रभावतइति॥ कामंदकोपि॥ राजास्यजग
तोहेतुर्वृद्धेर्वृद्धाभिसंमतः॥ नयनानन्दजननःशशांक — इवतोयधेः
॥ यदिनस्यान्नरपतिःसम्यङ्नेताततःप्रजा॥ अकर्णधाराजलधौवि
प्लवेतेहनौरिव॥ धार्मिकंपालनेपरंसम्यक्परपुरंजयं॥ राजानमभिम
न्यंतेप्रजापतिमिवप्रजाः॥ न्यायप्रवृत्तोनृपतिरात्मानमथचप्रजाः॥ त्रि
वर्गेणोपसंधत्तेनिहंतिध्रुवमन्यथा॥ धर्माद्धियवनोराजाविधायबुभुजे
भुवं॥ अधर्माच्चैवनहुषःप्रतिपेदेरसातलं॥ तस्माद्धर्मंपुरस्कृत्ययतेता
र्थायपार्थिवः॥ धर्मेणवर्द्धतेराष्ट्रंतस्यस्वादुफलंश्रियः॥ राजगुणास्तद

तंचनीतिसारे॥ न्यायेनार्जनमर्थस्यरक्षणंवर्धनंतथा॥ सत्पात्रप्रति
पत्तिश्चराजवृत्तंचतुर्विधं। नयस्यविनयोमूलंविनयःशास्त्रनिश्चयः।
विनयोहीन्द्रियजयस्तद्युक्तःशास्त्रमृच्छति। तथा॥ शास्त्रंप्रज्ञाधृतिर्दा
क्ष्यंप्रागल्भ्यंधारयिष्णुता॥ उत्साहोवाग्मितादार्ढ्यमापत्क्लेशसहि
ष्णुता॥ प्रभावःशुचितामैत्रीत्यागःसत्यंकृतज्ञता॥ कुलंशीलंदमश्चे
तिगुणाःसंपत्तिहेतवः॥ आत्मानंप्रथमंराजाविनयेनोपपादयेत्॥ ततो
मात्यांस्ततोभृत्यान्ततःपुत्रांस्ततःप्रजाः॥ सदानुरक्तप्रकृतिःप्रजापा
लनतत्परः॥ विनीतात्माहिनृपतिर्भूयसींश्रियमश्नुते॥ प्रकीर्णविषया
रण्येधावंतंविप्रमाथिनं॥ ज्ञानांकुशेनकुर्वीतवश्यमिंद्रियदंतिनं। त
था॥ विषयामिषलोभेनमनःप्रेरयतींद्रियं॥ तन्निरुध्यात्प्रयत्नेनजिते
तस्मिन्जितेंद्रियः॥ एवंकरणसामर्थ्यात्संयम्यात्मानमात्मना॥ नया
यनयविद्राजाकुर्वीतहितमात्मनः॥ एकस्यैवहियोशक्तोमनसःसन्निब
र्हणे॥ महींसागरपर्यंतांसकथंह्यवजेष्यति॥ क्रियावसानविरसैर्विष
यैरपहारिभिः॥ गच्छत्याक्षिप्तहृदयःकरीवनृपतिर्ग्रहं॥ शब्दःस्पर्श
श्चरूपंचरसोगंधश्चपंचमः॥ एकैकमलमेतेषांविनाशप्रतिपत्तये॥
पंचानांनिदर्शनमाह॥ शुचिदर्भांकुराहारोविदूरभ्रमणक्षमः॥ लुब्धका
गीतलोभेनमृगोमृगयतेवधं॥ गिरींद्रशिखराकारोलीलयोन्मूलितद्रुमः
॥ करिणीस्पर्शसंमोहादालानंयातिवारणः॥ स्निग्धदीपशिखालोके
विलोकितविलोचनः॥ मृत्युमृच्छतिसंमोहात्पतंगःसहसापतन्॥ दू
रेपिहिभवन्दृष्टेरगाधसलिलेवसन्॥ मीनस्तुसामिषंलोहमास्वादय
तिमृत्यवे॥ द्विरेफोगंधलोभेनकमलेयातिबंधनं। एकैकशोविनिघ्नंति
विषयाविषसन्निभाः॥ क्षयीतुसकथंनस्याद्युगपत्पंचसेवते॥ सेवेतवि
षयान्कालेमुक्त्वातत्परतांवशी॥ सुखंहिफलमर्थस्य तन्निरोधेवृथा
श्रियः॥ धर्मादर्थोर्थतःकामःकामात्सुखफलोदयः॥ आत्मानंहंतितौ
हत्वायुक्त्यायोननिषेवते॥ सकामासक्तमनसांकांतामुखविलोक
ने॥ गलंतिगलिताश्रूणांयौवनेनसहश्रियः॥ नामापिस्त्रीतिसंल्हादि
विकरोत्येवमानसं॥ किंपुनर्दर्शनंतस्याविलासोल्लसितभ्रुवः॥ रहःप्र
चारकुशलामृदुगद्गदभाषिणी॥ कंननारीरमयतिरक्तरक्तांतलोचना॥

मुनेरपिमनोवश्यंसरागंकुरुतेंगना॥ तत्रकानिचिन्निंदति॥ मृगया
क्षास्तथापानंगर्हितानिमहीभुजां॥ दृष्टास्तेभ्यस्तुविपदः पांडुनैषध
वृष्णिषु॥ कामःक्रोधस्तथामोहोलोभोमानोमदस्तथा॥ षड्वर्गमु
त्सृजेदेनमस्मिन्त्यक्तेसुखीनृपः॥ दंडक्योनृपतिःकामात्क्रोधाच्च
जनमेजयः॥ लोभादैलस्तुराजर्षिर्वातापीमोहतोसुरः॥ पौलस्त्यो
राक्षसोमानान्मदाद्दंभोद्भवोनृपः॥ प्रयातानिधनंह्येतेशत्रुषड्वर्गमाश्रि
ताः॥ शत्रुषड्वर्गमुत्सृज्य जामदग्न्योजितेंद्रियः॥ अंबरीषोमहाभागो
बुभुजातेचिरंमहीं॥ वर्धयन्निहधर्मार्थौसेवितोसद्भिरादरात्॥ नि
गृहीतेंद्रियग्रामःकुर्वीतगुरुसेवनं॥ शास्त्रायगुरुसंयोगःशास्त्रंवि
नयवृत्तये। विद्याविनीतोनृपतिःसतांभवतिसंमतः॥ प्रेर्यमाणोप्यस
द्वृत्तैर्नाकार्येषुप्रवर्त्तते॥ आददानःप्रतिदिनंकलाःसम्यक्महीपतिः॥
जितेंद्रियस्यनृपतेर्नीतिशास्त्रानुसारिणः॥ भवंत्युज्वलितालक्ष्म्यः
कीर्त्तयश्चनभस्पृशः॥ तथा॥ इयंहिलोकेव्यतिरेकवर्त्तिनीस्वभाव
तः पार्थिवतासमुद्धता॥ बलात्तदेनांविनये नियोजयेन्नयस्यसिद्धौ
विनयःपुरस्सरः॥ गुरुस्तुविद्याधिगमायसेव्यतेश्रुतान्चविद्यामतयेम
हात्मनां॥ श्रुतानिपुण्यानिमतानिवेधसामसंशयंसाधुभवंतिभूतये
॥वेधसांपूर्वपुरुषाणां। विद्यानिरूपणंनीतिसारे॥ आन्वीक्षिकीत्रयी
वार्त्तादंडनीतिश्चशाश्वती॥ विद्याश्चतस्रएवैताइतिनोगुरुदर्शनं॥
आन्वीक्षिक्यात्मविज्ञानंधर्माधर्मौत्रयीस्थितौ॥ अर्थानर्थौतुवार्त्तायां
दंडनीतौनयानयौ॥ आन्वीक्षिक्यांतर्कशास्त्रवेदांताद्यंतर्भावः त्रय्यां
मीमांसास्मृत्यादेः। तथा। वर्णाःसर्वाश्रमाश्चैवविद्यास्वासुप्रतिष्ठिताः
॥ ईक्षणाद्रक्षणात्तासांतद्धर्मस्यांशभाक्नृपः॥ आन्वीक्षिक्यात्मविद्या
स्यादीक्षणात्सुखदुःखयोः॥ ईक्षमाणस्तयातत्त्वंहर्षशोकौव्युदस्यति
॥ ऋग्यजुःसामनामान स्त्रयोवेदास्त्रयीमता॥ उभौलोकाववाप्नोतित्र
य्यांतिष्ठन्यथाविधि॥ अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः॥ धर्म
शास्त्रंपुराणंचत्रयीदंसर्वमुच्यते॥ पाशुपाल्यंकृषिःपण्यंवार्त्तावार्त्तानु
जीव्यपि। संपन्नोवार्त्तयासाधुर्नवृत्तेर्भयमृच्छति। दमोदंडइतिख्यात
स्तस्माद्दंडेनमहीपतिः॥ तस्यनीतिर्दंडनीतिर्नयनान्नीतिरुच्यते॥ ॥

तयात्मानंचशेषांश्चविद्याः पायान्महीपतिः॥विद्यालोकोपकारिण्य
स्तस्यातांहिमहीपतिः॥अहिंसासूनृतावाणीसत्यंशौचंदयाक्षमा
॥वर्णिनांलिंगिनांचैवसामान्योधर्मउच्यते॥स्वर्गानंत्यायधर्मोयंस
र्वेषांसर्वलिंगिनां॥तथा॥सर्वस्यास्ययथान्यायंभूपतिःसंप्रवर्त्तकः॥
तस्याभावेधर्मनाशस्तदभावेजगच्च्युतिः॥वर्णाश्रमाचारयुक्तोवर्णा
श्रमविभागवित्॥पातावर्णाश्रमाणांचपार्थिवःसर्वलोकभाक्॥तथा।
आनृशंस्यंपरोधर्मःसर्वप्राणभृतांयतः॥तस्माद्राजानृशंस्येनपाल
येत्कृपणंजनं॥नहिस्वसुखमन्विच्छन्पीडयेत्कृपणंनृपः॥कृपणः
पीड्यमानोहिमन्युनाहंतिपार्थिवं॥कोहिनामकुलेजातःसुखलेशोप
रंहितः।अल्पसाराणिभूतानिपीडयेदविचारयन्।आधिव्याधिपरी
तायअद्यश्वोवाविनाशिने॥कोहिनामशरीरायधर्मापेतंसमाचरेत्।
तथा।स्वजनैःसज्जनंकुर्याद्धर्मायचसुखायच॥सेव्यमानस्तुस्वजनै
र्महान्तिविराजते।हिमांशुमालीनतथानचोत्फुल्लोत्पलंसरः॥आनं
दयतिचेतांसियथासज्जनवेष्टितः॥ग्रीष्मसूर्यांशुसंतप्तमुद्वेजनमना
श्रयं॥मरुस्थलमिवोदग्रंत्यजेद्दुर्जनसंगतं॥निःश्वासोद्गीर्णहुतभु
क्धूमधूम्रीकृताननैः॥वरमाशीविषैःसंगंकुर्यान्नत्वेवदुर्जनैः॥क्रियते
भ्यर्हणीयायस्वजनाययथांजलिः॥ततःसाधुतरःकार्योदुर्जनायहिता
र्थिना॥नित्यंमनोपहारिण्यावाचाप्रल्हादयेज्जगत्॥उद्वेजयतिभूता
निक्रूरवाक्धनदोपिसन्॥हृदिविद्धइवात्यर्थंयथासंतप्यतेजनः॥पी
डितोपिहिमेधावीनतांवाचमुदीरयेत्॥प्रियमेवाभिधातव्यंनित्यंस
त्सुद्विषत्सुच॥शिखीवकेकांमधुरांवाचंब्रूतेजनप्रियः॥मदरक्तस्यहं
सस्यकोकिलस्यशिखंडिनः॥हरंतिनतथावाचोयथासाधुविपश्चितां
॥येप्रियाणिप्रभाषंतेप्रियमिच्छंतितत्कृतं॥श्रीमंतोवंद्यचरितादेवा
स्तेनरविग्रहाः॥तथा॥शुचिरास्तिक्यपूतात्मापूजयेद्देवतांसदा॥देव
तावद्गुरुजनमात्मवच्चसुहृज्जनं॥प्रणिपातेनहिगुरून्सतोनूचानचे
ष्टितैः॥कुर्वीताभिमतान्भूत्यैदेवान्सुकृतकर्मणा॥अनूचानःश्रोत्रिय
स्तस्यचेष्टितानितत्क्रियाइत्यर्थः॥सद्भावेनहरेन्मित्रंसद्भावेनचबांध
वान्॥स्त्रीभृत्यान्प्रेममानाभ्यांदाक्षिण्येनेतरंजनं॥प्राणैरप्युपकारि

त्वंमित्रास्वव्यभिचारित्वं॥गृहागतेपरिष्वंगःशक्त्यादानंसहिष्णुता॥
स्वसमृद्धिष्वनुत्सेकःपरवृद्धिष्वमत्सरः॥बंधुभिर्बंधुसंयोगःस्वजनेच
तुरस्वता॥तच्चिन्तानुविधायित्वमितिवृत्तंमहात्मनां॥अनेनगच्छति
यतंमहात्मनामिमंचलोकंत्वपरंचविंदतीति।अन्यानपिगुणानाह
याज्ञवल्क्यः।महोत्साहःस्थूललक्षःकृतज्ञोवृद्धसेवकः॥विनीतःसत्त्व
संपन्नःकुलीनःसत्यवाक्शुचिः।अदीर्घसूत्रःस्मृतिमान्अक्षुद्रोऽप
रुषस्तथा॥धार्मिकोऽव्यसनश्चैवप्राज्ञःशूरोरहस्यवित्।स्वरंध्रगोप्तान्वी
क्षिक्यांदंडनीत्यांतथैवच॥विनीतस्त्वथवार्त्तायांत्रय्यांचैवनराधिपः॥
स्थूललक्षःस्थूलंमहत्लक्ष्यमुद्देश्यमस्यासौ।कुलीनः।कन्यादानग्रह
णयोःसत्कुलसंबंधेनकुलमर्यादारक्षणपरः॥अदीर्घसूत्रःकार्येषुत्वर
वान्॥स्मृतिमानविस्मरणशीलः॥अक्षुद्रोदोषद्वेषी।अपरुषःपर
दोषापकीर्त्तनः।अव्यसनःव्यसनहीनः॥व्यसनानिचाष्टादशाहमनुः।
मृगयाक्षादिवास्वापःपरिवादःस्त्रियोमदः।तौर्यत्रिकंवृथाट्याचकाम
जोदशकोगणः।पैशुन्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं॥वाग्दंडजंच
पारुष्यंक्रोधजोपिगणोष्टकः॥तत्रसप्तकष्टतमान्याहमनुः।पानमक्षाः
स्त्रियश्चैवमृगयाचयथाक्रमं॥एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे
॥दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे।क्रोधजेपिगणेविद्यात्कष्ट
मेतत्त्रिकंसदा॥सप्तकस्यास्यवर्गस्यसर्वत्रैवानुषंगिणः॥पूर्वंपूर्वंगु
रुतरंविद्याद्व्यसनमात्मनः॥परिवादःपरनिंदा॥वृथाट्यावृथाटनं॥पै
शुन्यमज्ञातपरदोषज्ञापनं॥साहसंसाधोर्बंधनादिनिग्रहः॥द्रोहश्छ
द्मवधः॥ईर्ष्यापरगुणासहिष्णुता॥परगुणेषुदोषाविष्करणमसूया
॥अर्थदूषणमर्थापहारोदेयानामदानंच॥वाक्पारुष्यंआक्रोशादि॥
मद्येदोषाधिक्यमाहवराहमिहिरः॥पत्नीयत्यपिमातरंमदवशात्सती
चमात्रीयतिस्वभ्रीयत्यपिमंदिरंहृढशिलंकूपंचगेहीयति॥स्वल्पंवायु
रधी यतीश्वरमयामोहात्स्थलीयत्यपिमित्रीयत्यपिविद्विषंकिम
परंकुर्यान्नयन्मद्यपः॥नीतिसारे॥वमनंनिर्गुणत्वंचसंज्ञानाशोविव
स्त्रता॥असंबद्धप्रलापित्वमकस्माद्व्यसनंमुहुः।सद्भिर्वियोगःसद्भि
श्चसंयोगोनर्थसंगमः॥स्खलनंवेपथुस्तंद्राचिंतातत्स्त्रीनिषेवणं॥सं

ल्पेनैवस्त्रीसंगः॥इत्यादिपानव्यसनमत्यंतंसद्भिर्गर्हितं॥तथाश्रुतबलो
पेताःपानदोषेणभूयसा॥क्षयमक्षीणनामानोजग्मुरंधकवृष्णयः॥एवं
पानेवर्जितेऽपवादोयोगयात्रायां॥अभ्यासनोत्सवभिषग्वचनोपदे
शैःकामंपिबेद्मतिलोपहृद्प्रकाशं॥तदेकनाश्यरोगादौतद्वचनैरित्यर्थः
॥द्यूतेदोषानाहकामंदकः॥लोभोधर्मक्रियालोपःकर्मणामप्रवर्त्तनं॥स
त्समागमविच्छित्तिरसद्भिःसहवर्त्तनं॥स्वल्पेप्यर्थेनिराशित्वमसत्यपि
वसाशता॥प्रतिक्षणंक्रोधहर्षौविषादश्चप्रतिक्षणं॥प्रतिक्षणंचसंक्ले
शःसाक्षिप्रश्नःप्रतिक्षणं॥अन्याबाधोंगदौर्बल्यंशास्त्राभ्यासोप्रत्यवेक्षणं
॥गूहनंमूत्रशकृतोःक्षुत्पिपासोपपीडनं॥इत्यादीन्शास्त्रनिपुणाद्यूते
दोषान्प्रचक्षते॥पांडवोधर्मराजस्तुलोकपालद्युतापरः॥द्यूतेनहिष
ताविद्वान्कलत्रमण्यपहारितः॥नलश्चराजाद्यूतेनहृतेराज्यमहोदये
॥धर्मदारान्वनेत्यक्त्वापरकर्माकरोत्प्रभुः॥द्यूतादनर्थसंरंभोद्यूता
त्स्नेहक्षयोमहान्॥पक्षाणांसंहतानांचद्यूताद्भेदःप्रवर्त्ततइति॥मृगया
दोषाउक्तानीतिसारे॥स्थानक्षोभोपानपातोयानाभिहरणंतथा॥क्षुत्पि
पासाश्रमायासशीतवातोष्णपीडनं॥अभियानस्यसंपत्त्यायानव्यस
नजंमहत्॥दुःखंप्रतप्तसिकताकुशकंटकभूमयः॥ऋक्षाजगरमातंग
सिंहव्याघ्रभयानिच।इत्यादिपृथिवींद्राणांमृगयाव्यसनंमहदिति।
अन्येष्वपिव्यसनेषुलोकतोयथायथंदोषाऊह्याः॥विस्तरभयात्तुन
तेसर्वेप्रपंचिताः॥गुणेषुकेषांचिद्भावस्यामाहमनुः॥स्वराष्ट्रेन्यायवृ
त्तःस्याद्भृशदंडश्चशत्रुषु॥सुहृत्स्वजिह्मःस्निग्धेषुब्राह्मणेषुक्षमान्वितः
॥याज्ञवल्क्यः॥स्याद्राजाभृत्यवर्गेचप्रजासुचयथापिता॥अन्येपिगु
णाउक्तायोगयात्रायां॥मेधावीमतिमानदीनवचनोदक्षःक्षमावानृजु
र्धर्मात्माप्यनसूयकोलघुकरःषाड्गुण्यविद्भक्तिमान्॥उत्साहीपररंध्रवि
त् कृतधृतिर्वृद्धिक्षयस्थानविच्छूरोनव्यसनीस्मरत्युपकृतंवृद्धोपसे
वीचयः॥तथा॥परीक्ष्यकारीनविकत्थनश्चदृढप्रतिज्ञोतिदृढप्रहारी
॥जितेंद्रियःस्याज्जितकोपलोभनिद्रालसःस्यानपरिग्रहश्च॥त्यागी
विनीतःप्रियदर्शनश्चव्यपेतमोहःप्रतिपत्तियुक्तः॥देशस्यकालस्यच
भागवेत्तास्वयंचयःस्याद्व्यवहारदर्शी॥शब्दार्थविज्ञानपटुःप्रगल्भः

संग्रामविद्याकुशलोभिजातः॥मितामिभाषीमितसत्यवक्तादैवान्वितोप
श्वसधानलक्ष्म्याः॥त्यागीत्युक्तंतत्रपात्रेदातव्यमपात्रेदातुरनिष्टमुक्तं
मिहिरेण॥गुणैःसमस्तैरपिसंप्रयुक्ताकन्येवपित्राविगुणायदत्ता॥क
रोत्यकीर्त्तिसुखवित्तहानिंशास्त्रेतरज्ञानजडायदातुः॥अपात्रेपिक्व
चिद्दानमुक्तंभारते॥योज्ञातिमनुगृण्हातिदरिद्रंदीनमातुरं॥सपुत्रप
त्युवृद्धिंचश्रेयश्चानन्त्यमश्नुते॥ज्ञातयोवर्द्धनीयास्तैर्यइच्छंत्यात्मनःशु
भं॥विगुणाश्चापिसंरक्ष्याज्ञातयोभरतर्षभ॥किंपुनर्गुणवन्तस्तेत्वत्प्र
सादाभिकांक्षिणः॥ज्ञातिभिर्विग्रहस्तातनकर्त्तव्योभवार्थिनेति॥तस्य
कृत्यमुक्तंमिहिरेण॥विचिन्त्यकार्याणिनिशावसानेद्विषत्सुहृन्मंडल
संश्रितानां॥बलार्थदेशेषुनियोजितानांसमाश्रितानांचकृताकृतानि
॥तथा॥सवेणुवीणापटहस्वनेनगीतेनपूर्वंव्य १ नीतनिद्रः॥शय्यांत्यजे
त्तूर्यरवावसानेशृण्वन्गिरोमंगलपाठकानां॥तदुत्तरमाचारमयू
खोक्तप्रकारेणशौचदंतधावनेकुर्यात्॥तत्रदंतधावनस्यागेपरीक्षो
क्तायोगयात्रायां॥अभिमुखपतितंप्रशांतदिक्स्थंशुभमतिशोभन
मूर्ध्वसंस्थितंच॥अशुभकरमतोन्यथाप्रदिष्टंस्थितपतितंचकरो
तिमिष्टमन्नं॥श्मश्रुकर्मणिविशेषः॥१राज्ञःकार्यंपंचमेपंचमेन्हिः
क्षौरर्क्षेवाश्मश्रुतस्योदयेवा॥त्यक्त्वाताराःसप्तपंचत्रिपूर्वायात्राकाले
नैवकार्यंनयुद्धे॥ततश्चपंचांगादिश्रवणमुक्तम्॥श्रुत्वातिथिंभग्रहंवा
सरंचप्राप्नोतिधर्मार्थयशांसिसौख्यं॥आरोग्यमायुर्विजयंशुभंच
दुःस्वप्ननाशंचतथाविदध्यात्॥आयुर्जनकंविजयार्थंदुःस्वप्ननाश
कंचकर्मकुर्यादित्यर्थः॥दुःस्वप्नाश्चाःचारमयूखउक्ताः॥तच्छांतयःशां
तिमयूखेवक्ष्यंते॥ततःकृत्यं॥प्रणम्यदेवांश्चगुरूंश्चपूर्वंदत्वाचगां
वत्सयुतांद्विजाय॥दृष्ट्वामुखंसर्पिषिदर्पणेचसर्पिश्चदद्यात्सहिरण्य
मेवं॥ततश्चपर्वादौभूदानंनिबंधादिदानंचकुर्यादित्याहयाज्ञवल्क्य
॥दत्वाभूमिंनिबंधंवाकृत्वालेख्यंचकारयेत्॥आगामिभद्रनृपति परि
ज्ञानायपार्थिवः॥निबंधोवृत्तिः॥भद्रोधार्मि कः॥लेख्यप्रकारमपिस
एवाह॥पटेवाताम्रपट्टेवास्वमुद्रोपरिचिन्हितं॥अभिलेख्यात्मनोवं
श्यान्आत्मानंचमहीपतिः॥प्रीतिग्रहपरीमाणंदानच्छेदोपवर्णनं॥

स्वहस्तकालसंपन्नंशासनंकारयेत्स्थिरं। प्रतिगृह्यतइतिप्रतिग्रहो
भूनिबंधादितस्यपरिमाणं॥ दानंदीयमानक्षेत्रादितस्यछेदोमर्यादा
॥स्वहस्तेनस्वहस्तलिखितेनकालेनचशकवर्षमासपक्षदिनरूपेण
कारयेत्संधिविग्रहादिकारिणा॥ संधिविग्रहकारीतुभवेद्यस्तस्यलेखकः
स्वयंराज्ञासमादिष्टःसलिखेद्राजशासनमितिस्मरणात्॥ तथा। प्रे
षयेच्चतथाचारान्स्वेष्वन्येषुचसादरं॥ ऋत्विक्पुरोहिताचार्यैराशी
र्भिरभिनंदितः॥ दृष्ट्वाज्योतिर्विदोवैद्यान्दद्याद्गांकांचनंमहीं॥ नैवेशि
कानिचतथाश्रोत्रियाणांगृहाणिच॥ नैवेशिकानिविवाहोपयोगीनि
॥ ततश्चसभांप्रविशेदित्युक्तंमिहिरेण॥ स्मितप्रसन्नप्रथमाभि
भाषितैः प्रसादहृष्ट्याकरसंग्रहैश्च॥ यथानुकूलंहृदयान्यपिद्विषां
प्रसादयन्धर्मसभांसमाश्रयेत्॥ सभाप्रवेशनानन्तरमाहमनुः।
तत्रस्थितःप्रजाःसर्वाःप्रतिनंद्यविसर्जयेत्॥ विसृज्यचप्रजाःसर्वामं
त्रयेत्सहमंत्रिभिः॥ तत्रचदंड्यान्दंडयेदित्याहवराहमिहिरः॥ स
मान्वितोस्मीतिविचिंत्यचैवंदंड्येषुदंडक्षमणंनधर्मः॥ दंडप्रभावो
हिसदुर्जनस्यहस्तेनयोजीवतिजीववर्गः। सुतरामभिवर्द्धतेभिमानोनी
चानांक्षमयान्वितेनृपेच॥ अतउग्रतरेणतेनिवर्त्यायेनान्येपिख
लास्तथानभूयः॥ यस्मिन्गृहीतेसदृशापराधोमहाजनस्तामुपैतितस्मिन्॥ दंडोनिपात्योमनुजेश्वरेणकालांतरेन्यद्व्यपदिश्यका
र्यं। दंडाकरणेचानिष्टं। यथोक्तं॥ द्विरदइवमदेनविप्रयुक्तोविषरहि
तोभुजगोव्यसिश्चकोशः॥ परिभवमुपयातिनापराधेयदिमनुजा
धिपतिःकरोतिदंडं॥ दंडश्चयोग्यएवकार्यइत्युक्तंयोगयात्रायां॥
एकस्यतुल्योदरपाणिपाददंडायभीताःप्रणमंतिमर्त्याः॥ अत्युग्रदं
डादपिचोद्विजंतेदंडोपराधप्रतिमःशिवाय। केषांचिच्चपंचयज्ञवदा
वश्यकत्वमुक्तंमिहिरेण॥ दुष्टस्यदंडःसुजनस्यपूजान्यायेनकोश
स्यचसंप्रवृद्धिः॥ अपक्षपातोर्थिषुराष्ट्ररक्षापंचैवयज्ञाः कथितान्
पाणां॥ मनुः। कन्यानांसंप्रदानंचकुमाराणांचरक्षणं। दूतसंप्रेषणं
चैवकार्यशेषंतथैवच॥ अंतःपुरप्रचारंचप्रणिधीनांचचेष्टितं॥ कृ
त्स्नंचाष्टविधंकर्मपंचवर्गंचतत्वतः। अनुरागापरागौचप्रचारंमंडल

स्यच॥ अष्टविधंकर्मप्रचेताआह॥ आदानेचविसर्गेच्चतथाप्रैषनिषे
धयोः॥ पंचमेचार्थवचने व्यवहारस्यचेक्षणे॥ दंडशुद्ध्योःसदायु
क्तस्तेनाष्टगतिकोनृपः॥शुद्धिःप्रायश्चित्तं॥पंचवर्गः॥सहायाःसाध
नोपायाविभागोदेशकालयोः॥विनिपातप्रतीकारःसिद्धिःपंचांगमि
ष्यते॥ मनुः॥उपेतारमुपायंचसर्वोपायांश्चकृत्स्नशः॥एतत्त्रयंस
माश्रित्यप्रयतेतार्थसिद्धये॥ततश्चभोजनमुक्तंयोगयात्रायां॥अ
नश्चतस्मिन्विनियुज्यसाधून्संग्रामविद्यादिविभक्तकालः॥सर्वा
णिकार्याणियथाक्रमेणकृत्वागृहंभोक्तुमथोविशेत्सः॥मनुरपि॥ए
वंसर्वमिदंराजासहसंमंत्र्यमंत्रिभिः॥ व्यायम्याप्लुत्यमध्याह्ने भो
क्तुमंतःपुरंव्रजेत्॥विषघ्नैरगदैश्चास्यसर्वद्रव्याणियोजयेत्॥विष
घ्नानिचरत्नानिनियतोधारयेत्सदा॥भोजनमाहसएव॥तत्रात्मभू
तैःकालज्ञैरहार्यैःपरिचारकैः॥सुपरीक्षितमन्नाद्यमद्यान्मंत्रैर्विषा
पहैः॥कामंदकोपि॥ यानेशय्यासने पाने भोज्यवस्त्रविभूषणे॥स
र्वत्रैवाप्रमत्तःस्याद्बुध्येतविषदूषितं॥विषघ्नैरगदैःस्नातोविषघ्नम
णिभूषितः॥परीक्षितंसमश्नीयाज्जांगलीविद्भिषग्वृतः॥जांगलीआ
रण्यवृश्चिकादिविषंतद्वित्तत्परिहारविदित्यर्थः॥तत्रभोजनसम
येविषदिग्धान्नपरीक्षार्थेपक्षिणःस्थाप्याः॥तेषांचचेष्टयाविषंज्ञेयं॥
यथोक्तंनीतिसारे॥भृंगराजःशुकश्चैवसारिकाचेतिपक्षिणः॥क्रोश
तिभृशमुद्विग्नाविषपन्नगदर्शनात्॥चकोरस्यविरज्येतेनयनेविष
दर्शनात्॥विरज्येतेनिमीलितेभवतः॥व्यक्तंचमाद्यतिक्रौंचोम्रियते
मत्तकोकिलः॥जीवंजीवस्यचग्लानिर्जायतेविषदर्शनात्॥ग्लानी
रोगाद्रवता॥एषामन्यतमेनापिसमश्नीयात्परीक्षितं॥परीक्षामाहका
मंदकः॥भोज्यमन्नंपरीक्षार्थंप्रदद्यात्पूर्वमग्नये॥वयोभ्यश्चततोदद्या
त्तच्चलिंगानिलक्षयेत्॥अग्निमध्येक्षिपेदित्यर्थः॥धूमार्चिर्नीलतावन्हेः
शब्दस्फोटश्चजायते॥अन्नेनविषदग्धेनवयसांमरणंभवेत्॥द्रव्यवि
शेषेणपरीक्षामाहसएव॥रसस्यनीलापयसश्चताम्रामद्यस्यतोय
स्यचकोकिलाभा॥श्यामाचदध्नोविषदूषितस्यवन्हौभवत्यूर्ध्वगता
चलेखा॥विषदिग्धवस्त्रपरीक्षोक्तानीतिसारे॥प्रावाराभरणानांच

धूयाममंडलकीर्णता॥ तत्तूलीपक्ष्मणांलोम्नांस्याद्भ्रंशश्चविषाश्रया
त्॥ ऊर्णावस्त्राणांलोम्नांभ्रंशःस्यादित्यर्थः॥ विषदायिनांचपुरुषाणां
लक्षणमुक्तंनारदेन॥ मुखस्यश्यामवर्णत्वंत्वमेदोजृंभणंमुहुःस्ख
लनंवेपथुःस्वेदआवेशोदिग्विलोकनं॥ स्वकर्मणिस्वभूमौस्यादन
वस्थानमेवच॥ लिंगान्येतानिनिपुणंलक्षयेद्विषदायिनामिति॥ गृहे
सर्पाद्युपद्रवनिरासार्थमुपायमाहकामंदकः॥ मयूरपृषतोत्संगेन
भवंतिभुजंगमाः॥ तस्मान्मयूरपृषतान्भवनेनित्यमुत्सृजेत्॥ शय
नस्यगृहेतद्वन्नकुलंस्थापयेन्नृपइति॥ ॥ इतिविषपरीक्षा॥ पूर्वंपरी
क्षितमन्नमनेकविधंभक्ष्यभोज्यादिकमाचारमयूखोक्तरीत्याभुंजी
त॥ तत्रचमक्षिकानिवारणार्थंव्यजनार्थंचस्त्रीभिःस्पर्शमनुजानाति
मनुः॥ परीक्षिताःस्त्रियश्चैवंव्यंजनोदकधूपनैः॥ वेषाभरणसंयुक्ताः
संस्पृशेयुःसमाहिताः॥ एवंप्रयत्नंकुर्वीतपानशय्यासनाशने॥ स्ना
नेप्रसाधनेचैवसर्वालंकारकेषुच॥ इतिभोजनम्॥ मनुः॥ भुक्तवां
न्विहरेच्चैवस्त्रीभिरंतःपुरेसह॥ विहृत्यचयथाकामंपुनःकार्याणिचिं
तयेत्॥ अलंकृतश्चसंपश्येदायुधीयंपृथग्जनं॥ वाहनानिचसर्वाणि
वस्त्राण्याभरणानिच॥ ततःपुनःप्रसाधनादिकार्यं। प्रसाधनादिष
त्किंचित्परिचारकाः॥ उपनिन्युर्नरेन्द्रायसुपरीक्षितमुद्गितं॥ परस्य
रागतंयच्चतत्त्वसर्वंपरीक्षयेत्॥ सदास्वेभ्यःपरेभ्यश्चरक्षेद्राजासुर
क्षितः॥ अनंतरंचमृगयाद्यर्थंयानाद्यारोहेदितिकामंदकः॥ यानंवाह
नमारोहेत्तूज्ञातंयात्रोपपादितं॥ अविज्ञातेननतथासंकटेननसं
व्रजेत्॥ ज्ञातमन्यैःपरीक्षितं॥ यात्रोपपादितंतत्तद्यात्रायांयोग्यं॥ य
थाव्याघ्रादिमृगयायांहस्त्यादि॥ तदाचखड्गाद्यपिबिभृयात्॥ तत्रख
ड्गलक्षणंयोगयात्रायां॥ अंगुलशतार्द्धमुत्तमऊनःस्यात्तंचविंशतिः
खड्गः॥ अंगुलमानात्ज्ञेयःसमांगुलस्थोव्रणःशुभदः॥ केचनव्रणाः
शुभदाइत्युक्तं॥ श्रीवृक्षवर्द्धमानातपत्रशिवलिंगकुंडलाब्जानां॥ ए
तेव्रणाप्रशस्ताःध्वजायुधस्वस्तिकानांच॥ व्रणानामशुभत्वंतत्रैव॥ कृ
कलासकाककंसकक्रव्यादकबंधवृश्चिककाकृतयः॥ खड्गेव्रणानशुभदा
वंशानुगताःप्रभूताश्चेति॥ तदाकारस्तत्रैव॥ गोजिह्वासंस्थानोनीलो

त्पलवंशसदृशश्च॥करवीरपत्रसदृशश्चंडकरो मंडलाग्रः प्रशस्तश्च॥मंडलाग्रःखड्गः॥तथा॥नाकारणंनविवृणुयात्तन्नविघट्टयेच्चपश्येन्न तत्रवदनंनवदेच्चमूल्यं॥देशंनचास्यकथयेत्प्रतिमानयेच्चनैवस्पृशेन्नृपतिरप्रयतोसियष्टिं।प्रतिमानयेत्पूजयेत्॥अप्रयतोऽशुचिः॥खड्गादिसंस्कारमाहवराहमिहिरः॥अर्कपयोहुडविषाणमषीसमेतंपारावतारवुशकृतान्वयुतप्रलेपः॥शस्त्रस्यतैलमथितस्यततोस्यपानंपश्चास्थितस्यनशिलासुभवेद्विघातः॥क्षारेकदल्यामथितेनयुक्तेदिनोषितेपायितमायुधंयत्॥सम्यक्स्थितंचाश्मनिनैतिभंगंनचान्यलोहेष्वपितस्यकौंठ्यं॥इतिखड्गलक्षणं॥अश्वादिलक्षणानिबलनिरूपणेवक्ष्यामः॥अथमृगया॥सात्रिविधा॥जलस्थलांतरिक्षभेदात्॥साचयद्यपिपूर्वंव्यसनमध्येपरिगणितातथापिअन्यकार्याविरोधेनकुर्यादाखेटकंनृपइत्यादिवचनादत्यनासक्तेनकार्या॥अस्यांचगुणाप्युक्ताःकालिदासेन॥मेदश्छेदकृशोदरंलघुभवत्युत्थानयोग्यंवपुःसत्वानामपिलक्ष्यतेविकृतिमच्चित्तंभयक्रोधयोः॥उत्कर्षःसचधन्विनांयदिषवःसिध्यंतिलक्ष्येचले मिथ्यैवव्यसनंवदंतिमृगयामीदृग्विनोदःकुतः॥कामंदकोपि॥आमात्योहिजीर्यतेसायोग्येवदिवानिशं॥चोषुयत्रलक्ष्येषुबाणसिद्धिश्चजायतइति॥तत्रजलमृगयामाहकामंदकः॥परितापिषुवासरेषुपश्यन्तटलेखास्थितमाप्तसैन्यचक्रं॥सुविशोधितनक्रमीनजालंव्यवगाहेतजलेसुहृत्समेतः॥तथा॥अथामिकांश्चक्रूरांश्चदृष्टदोषान्निराकृतान्॥परेभ्योभ्यागतांश्चैवदूरेणैवसमाचरेत्।तथा।महावातसमुद्भूतामपरीक्षितनाविकां॥अन्यनौभतिबद्धांवालोपयेन्नावमातुरां॥लोपयेन्नांगीकुर्यात्इत्यर्थः॥तत्रचजालैश्चबडिशैश्चैवशक्तिभिःकंटकैस्तथा॥मत्स्यकच्छपराजीवान्हन्याद्विगतसंभ्रमः॥इतिजलमृगया॥स्थलमृगयामाहबाणकक्षसुपरीक्षितरक्षितांतुसीमांलघुयानस्तुमृगाटवीमुपेयादिति॥कामंदकोपि॥अथचेन्मृगयाक्रीडांवांछेत्तन्नगरांतिके।कारयेन्मृगयारण्यक्रीडाहेतोर्मनोरमं॥अकंटकलतागुल्मंविषपादपवर्जितं।शोधितग्राहसलिलंसुगंभीरजलाशयं॥नानापुष्पसमाकीर्णंहस्तिनीक

लभान्वितम्॥अगम्यंरिपुसैन्यानांमनःप्रीतिविवर्द्धनं॥तद्वनेचरश्चिन्
नैः क्लेशायासससहैर्दृढैः॥मृगयारक्षिभिःस्वाप्तैःप्रक्रीडेद्धीरमानसः॥
वनेचरामृगादयस्तेषांक्रोधभयाविष्टंचित्तंजानंतितैः॥तत्कर्मातुनरे
न्द्रस्यजनोज्झितपरिश्रमः॥क्रीडनायास्यविविधामृगजातीःप्रवेशयेत्
।यदाचप्रविशेद्राजाक्रीडनार्थंतथाबहिः।सन्नद्धंपत्तनास्तिष्ठेत्सैन्यं
दूरांतगोचरं।विधिरेवंसमादिष्टोमृगयाक्रीडनेवरः।नगच्छेदन्यथा
राजामृगयांमृगयुर्यथा॥लुब्धकवदेकाकीनगच्छेदित्यर्थः।एवम
नासक्तःश्येनादिक्रूरपक्षिभिरंतरिक्षमृगयामपिकुर्यात्॥ इतिमृगया
निरूपणं॥ततोगृहमागत्यसायंकृत्यंकार्यमित्याहमनुः॥संध्यांचो
पास्यशृणुयादंतर्वेश्मनिशस्त्रभृत्।रहस्याख्यायिनांचैवप्रणिधीनां
चचेष्टितं।गत्वाकक्ष्यांतरंसम्यक्समनुज्ञाप्यतंजनं॥प्रविशेद्भोजना
र्थंतुस्त्रीभिरंतःपुरंपुनः॥तत्रभुक्त्वापुनःकिंचित्तूर्यघोषैःप्रहर्षितः॥सं
विशेच्चयथाकालमिति॥विविक्तेचमंत्रंकुर्यादित्याहमनुः॥सर्वेषांतुवि
शिष्टेनब्राह्मणेनविपश्चिता॥मंत्रयीतपरंमंत्रंराजाषाड्गुण्यसंयुतं॥
अन्यानपिप्रकुर्वीतशुचीन्प्राज्ञानवस्थितान्॥सम्यगर्थसमाहर्तॄन्
सामान्यान्सुपरीक्षितान्॥निवर्तेतास्ययावद्भिरितिकर्तव्यतानृभिः
॥तावतोतंद्रितान्दक्षान्प्रकुर्वीतविचक्षणान्॥तेषामध्येनियुंजीत
शूरान्दक्षान्कुलोद्गतान्॥शुचीनाकरकर्मांतेभीरूनंतर्निवेशने॥
आकराःसुवर्णाद्युत्पत्तिस्थानानि।कर्मांतेधान्यादिसंग्रहस्थाने॥अ
न्तर्निवेशनेशयनादिगृहेभीरून्शूराहितत्रैकांतेकदाचित्राजानं
निहन्युः॥अध्यक्षान्विविधान्कुर्यात्तत्रतत्रविपश्चितः॥तत्रतत्रह
स्त्यश्वादौ॥दूतंचैवप्रकुर्वीतसर्वशास्त्रविशारदं॥इंगिताकारचेष्ट
ज्ञंशुचिंदक्षंकुलोद्गतं॥अनुरक्तःशुचिर्दक्षःस्मृतिमान्देशकालवित्
॥वपुष्मान्वीतभीर्वाग्मीदूतोराज्ञःप्रशस्यते॥पूर्वश्लोकोक्तयोःशुचि
दक्षत्वयोरत्रपुनरुक्तिःप्रशंसार्था।तत्रैवविविक्तेशस्त्रधरस्त्र्यादीनाम
शस्त्रधराणांवाक्यानिशृणुयात्॥तदुक्तं।तत्रशस्त्राणिधार्याणिचा
राणांभेदशंकयेति॥तत्रसर्वदाराजसमीपवर्तिनांसेवकानांलक्षण
माह।कामंदकः॥भर्तुरर्द्धासनेदृष्टिंमुहूर्त्तान्यत्रनिक्षिपेत्॥कोन्येत्यह

मितिब्रूयात्सभ्यगाज्ञापयेतिच॥आज्ञांचावितथांकुर्याद्यथाशक्त्यवि
लंबितं॥उच्चैःप्रहसनंकासंष्ठीवनंकुत्सनंतथा॥जृंभणंगात्रभंगंचपर्व
स्फोटंचवर्जयेत्॥प्रविश्यसानुरागस्यचित्तज्ञस्यचसंमतः॥समर्थ
यंश्चसतत्संसाधुभाषेतभाषिते।तन्नियोगेनवाब्रूयादर्थंसुपरिनि
श्चितं।सुखप्रबंधगोष्ठीषुविवादेवादिनांमतः।विजानन्नपिनब्रूयाद्भर्तुः
क्षिप्रोत्तरंवचः॥प्रवीणोपिचमेधावीवर्जयेदभिमानितां॥यदप्युच्चैर्वि
जानीयान्नीचैस्तदपिकीर्त्तयेत्॥कर्मणांतस्यवैशिष्ट्यंकथयेद्विनया
न्वितः॥आपद्युन्मार्गगमनेकार्यकालात्ययेषुच॥अपृष्टोपिहितान्वे
षीब्रूयात्कल्याणभाषितं॥प्रियंतथ्यंचपथ्यंचवदेद्धर्मार्थमेवच॥परा
र्थंदेशकालज्ञोदेशेकालेचसाधयेत्।संतोषाद्यवसरेपरोपकारमपि
कुर्यादित्यर्थः।तथा॥अपिस्थाणुवदासीतशुष्यन्परिगतःक्षुधा॥न
त्वेवानर्थसंपन्नांवृत्तिमीहेतपंडितः।तथा॥गुह्यंकर्मचमंत्रंचनभर्तुः
संप्रकाशयेत्॥विद्वेषंचविनाशंचमनसापिनचिंतयेत्॥स्त्रीभिस्तद
र्शिभिःपापैर्वैरिभूतैर्निराकृतैः॥एकार्थचर्यांसाहित्यंसंसर्गंचविवर्ज
येत्॥वेषभाषानुकरणंनकुर्यात्पृथिवीपतेः।संपन्नोपिचमेधावीस्प
र्द्धेतनचतद्गुणैः॥रागापरागौजानीयाद्भर्तुःकुशलकर्मवित्॥इंगिता
कारचेष्टाभ्यस्तदभिप्रायविन्नथा॥तदर्थांतत्कृतांवोच्चैराकर्णयति
तत्कथां॥श्लाघतेश्लाघनीयेषुश्लाघमानंचनंदति॥राज्ञाकस्यचि
त्तुनीतिप्रमाणायांस्वयमभ्यभिनंदनंकार्यमित्यर्थः॥कथांनराणि
स्मरतिप्रकृष्टान्कीर्त्तयेद्गुणान्॥निर्गुणंह्यपिभर्त्तारंआपत्सुनपरित्य
जेत्॥भारते।अग्निंदीप्तमिवासीदेद्राजानमुपशिक्षितः॥आशी
विषमिवक्रुद्धंप्रभुंप्राणधनेश्वरं॥यत्नेनोपचरेन्नित्यंनाहमस्मीतिचिं
तयेदिति॥राजास्निग्धतीतिमत्वानावगणनीयः॥किंतुयथासर्पसाव
धानंतथाप्रभौकार्यमित्यर्थः।ततःपरतरोनास्तियआपत्सूपतिष्ठते॥
स्वस्थवृत्तेषुसत्त्वाद्यानैवयांत्यभिलक्ष्यते॥विपत्सुधर्मधुर्याणांतेषां
नाम्नातिरिच्यते।श्लाघ्यायानंदनीचैवमहतामुपकारिता॥कालेक
ल्याणमाधत्तेस्वल्पापिसुमहोदयं॥जयाज्ञापयजीवेतिनाथदेवेति
चादरात्॥रक्षास्यपिहितंतेनित्यंछंदानुवृत्तिभिः॥धीसत्त्वोद्योग

युक्तानां किं दुरापं महात्मनां॥ छंदानुवर्त्तिनां लोके कः परः प्रियवादि
नां॥ अलसस्याल्पदोषस्य निर्विद्यस्याकृतात्मनः॥ प्रदानकाले भवति
माता पि हि पराङ्मुखी॥ ये भूरा ये च हि द्वांसो ये च सेवाविपश्चितः॥ ते
षामेव विकाशिन्यो भोग्या नृपतिसंपदः॥ आजीव्यः सर्वभूतानां राजा
पर्जन्यवद्भुवि॥ अनाजीव्यं त्यजंत्येनं शुष्कं वृक्षमिवांडजाः॥ चाणा
क्योपि॥ सुवर्णपुष्पितां पृथ्वीं विचिन्वंति त्रयो जनाः॥ शूरश्च कृतवि
द्यश्च यश्च जानाति सेवितुं॥ तथा॥ कुलं वृत्तं तथा शौर्यं सर्वमेतन्न गः
ण्यते॥ दुर्वृत्तेप्यकुलीनेपि जनो दातरि रज्यते॥ इत्यादि सेवकलक्ष
णम्॥ अथ स्वामिकृत्यं नीतिसारे॥ अपेक्ष्य हि नृपः कालं भृत्यानाम
नुजीविनां॥ कर्मणामानुरूप्येण वृत्तिं समनुकल्पयेत्॥ स्थाने काले
च पात्रे च न हि वृत्तिं विलोपयेत्॥ एतद्वृत्तिविलोपेन राजा भवति गर्हितः
॥ अपात्रवर्षणं जातु न कुर्यात्सुविगर्हितं॥ अपात्रवर्षणाद्न्यत्किं स्या
त्कोशस्याहृते॥ कुलं विद्यां श्रुतं शौर्यं सौशील्यं भूतपूर्वतां॥ वयोवस्थां
च संप्रेक्ष्य आद्रियेत महात्मनः॥ कुलीना — न्नावमन्येत सम्यग्वृत्ता
न्मनस्विनः॥ त्यजंत्येते च भर्त्तारं घ्नंति चामानहेतुना॥ निरालोके हि लोके
स्मिन्नासते तत्र पंडिताः॥ जात्यस्य हि मणेर्यत्र काचेन समता मता॥
कृशोपि हि विवेकज्ञो याति संश्रयणीयतां॥ यथा॥ सर्वैर्गुणैर्विहीनोपि
स राजा यः प्रतापवान्॥ प्रतापयुक्तास्त्रस्यंते परे सिंहान्मृगा इवेति॥ वि
रक्तस्वामिलक्षणमुक्तं कामंदकेन॥ अकोपोपि सकोपाभः प्रसन्नोप्य
पि निःफलः॥ वदत्यकृत्या दृष्ट्वैति रूक्षं च मुहुरीक्षते॥ विज्ञाप्यमानो वृ
त्यर्थं सहसोत्थाय गच्छति॥ संभावयति दोषेण वृत्तिच्छेदं करोति च॥ सा
धूक्तमपि न ह्याकर्त्यं समर्थयति चान्यथा॥ आचक्षाणकथाभंगकरो निवि
रसी भवन्॥ उपास्यमानः शयने सुप्तवत्तत्र तिष्ठति॥ यत्नेन बोध्यमानो
पि सुप्तवच्च विचेष्टते॥ इत्यादि ह्यनुरक्तस्य विरक्तस्य च लक्षणं॥ रक्ता हृतिं
समीहेत विरक्तं च परित्यजेदिति॥ अत्र षाड्गुण्यसंयुतमिति मंत्रविशे
षणमुक्तं तानाह मनुः॥ संधिं च विग्रहं चैव यानमासनमेव च॥ द्वैधीभा
वं संश्रयं च षाड्गुण्यं चिंतयेत्सदा॥ तत्र कामंदकः संधिं निरूपयति॥ बलीय
साभियुक्तस्तु नृपोनन्यप्रतिक्रियः॥ आपन्नः संधिमन्विच्छेत्कुर्वाणः॰

कालुष्यापनामिति॥ तत्र नीतिसारे यद्यप्यनेकविधस्तथाप्युपहारसं
धिमैत्रीसंध्योरेव प्राधान्यमुक्तं॥ एक एवोपहारस्तु संधिरेष मतो हि नः
॥ उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः॥ अभियोक्ता बलीयस्त्वाद
लब्ध्वा न निवर्त्तते॥ उपहारादृते यस्मात्संधिरन्यो न विद्यते॥ मैत्रीसंधि
स्तु समयोरेव॥ क्वचिदन्यजयार्थं विषमयोरपि भवति। कन्यादानाद्युप
कारसंधयस्तु अनयोरेवांतर्भवंति॥ अतो न ते पृथक् निरूपिताः॥ अ
त्रासंधेयानाह कामंदकः॥ बालो वृद्धो दीर्घरोगस्तथा ज्ञातिबहिष्कृतः
॥ भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा॥ विरक्तप्रकृतिश्चैव विष
येष्वतिसक्तिभाक्॥ दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः॥ अदेश
स्थो बहुरिपुर्युक्तः कालेन यश्च न॥ एतैः संधिं न कुर्वीत विगृह्णीयात्तु के
वलं॥ एते विगृह्यमाणा हि क्षिप्रं यांति रिपोर्वशं॥ तथा॥ संधिः कार्योप्य
नार्येण संप्राप्योत्सादयेद्धि सः॥ संघातवान्यथा वेणुर्निबिडैः कंटकैर्वृ
तः॥ न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा॥ बलिना सह योद्धव्य
मिति नास्ति निदर्शनं॥ प्रतिवातं हि न घनः कदाचिदुपसर्पति। बलीयसि
प्रणमतां काले विक्रमतामपि॥ संपदो न विसर्पंति प्रतीपमिव निम्नगाः
॥ राजा न गच्छेद्विश्वासं संधितोपि हि बुद्धिमान्॥ अद्रोहसमयं कृत्वा
वृत्रमिंद्रः पुरावधीदिति॥ इति संधिः॥ ॥ अथ विग्रह उक्तो नीतिसारे।
आत्मनोऽभ्युदयाकांक्षी पीड्यमानः परेण वा। देशकालबलोपेतः प्रार
भेतेह विग्रहं॥ तत्र विग्रहकारणान्याह कामंदकः॥ राज्यस्त्रीस्थानदे
शानां यानस्य च धनस्य च॥ अपहारो मदो मानः पीडा वैषयिकी तथा।
वैषयिकी देशसंबंधिनी। मित्रार्थं चापमानश्च तथा बंधुविनाशनं॥ भूता
नुग्रहविच्छेदस्तथा मंडलदूषणं॥ एकार्थाभिनिवेशित्वमिति विग्रह
योनयः॥ कर्त्तव्याकर्त्तव्यविग्रहावाह स एव॥ तदात्वफलसंयुक्तमाय
त्यां फलवर्जितं॥ आयत्यां फलसंयुक्तं तदात्वे विफलं स्मृतं॥ उभयोः फल
वानुत्तमः॥ एवं त्रैविध्यं॥ उभयमपि मध्यमं॥ यस्तु तदात्वायत्योरफलः
सोऽधमः॥ विग्रहशमनं चावश्यं कुर्यादित्याह स एव॥ कुर्यादर्थपरित्यागं
एकार्थाभिनिवेशिने। धनापचारजाते तु विरोधं न समाचरेत्॥ कदाचि
द्विग्रहे पुंसां सर्वनाशस्तु जायते॥ सर्वोपायैरतो राजा विग्रहं न समाच

रेत्॥ उपायांतरनाशेतुसंतंविग्रहमाचरेदिति॥ इतिविग्रहः॥ यानमाह
कामंदकः॥ गुणानुरागप्रकृतेर्यात्रायानमितिस्मृतमिति॥ तत्कालंम
नुराह॥ मार्गशीर्षेशुभेमासेयायाद्यात्रांमहीपतिः॥ फाल्गुनेवाथचैत्रे
वामासंप्रतियथाबलं॥ अन्येष्वपिचमासेषुयदापश्येद्ध्रुवंजयं॥ तदा
यायाद्विगृह्यैवव्यसनेचोत्थितेरिपोः॥ वर्षादिष्वपीत्यर्थः॥ मिहिरोपि॥
यात्रानृपस्यशरदीष्टफलामधौच्छिद्रेरिपोर्ननियमोस्तितुकेचिदाहु
रिति॥ तद्भेदाउक्तानीतिसारे॥ विगृह्यसंधायतथासंभूयाथाप्रसंगतः॥
उपेक्षयाचनिपुणैर्यानंपंचविधंस्मृतं॥ विगृह्ययातिहियदासर्वान्श
त्रुगणान्बलात्॥ विगृह्ययानंयानज्ञास्तदाचार्याःप्रचक्षते॥ अरिमि
त्राणिसर्वाणिस्वमित्रैःसर्वतोबलात्॥ विगृह्यचारिभिर्गंतुविगृह्यगम
नंस्मृतं॥ संधायान्यत्रयात्रायांपार्ष्णिग्राहेणशत्रुणा॥ संधायगमनंप्रोक्तं
तज्जिगीषोःफलार्थिनः॥ एकीभूययदेकत्रसामंतैःसांपरायिकैः॥ श
क्तिशौर्ययुतैर्यानंसंभूयगमनंहितत्॥ अन्यत्रप्रस्थितःसंगादन्यत्रैव
चगच्छति॥ प्रसंगयानंतत्प्रोक्तमत्रशल्योनिदर्शनं॥ रिपुंयातस्यब
लिनःसंप्राप्याविकृतंफलं॥ उपेक्ष्यतस्मिन्यद्यानमुपेक्षायानमुच्य
ते॥ निवातकवचान्हित्वाहिरण्यपुरवासिनः॥ उपेक्षायानमास्थायनि
जघानधनंजयइति॥ यानंचाग्रेपुनर्निरूपयिष्यामः॥ इतियानं॥ आ
सनमुक्तंनीतिसारे॥ परस्परस्यसामर्थ्याद्विघातादासनंस्मृतमि
ति॥ तथा। यस्यदुर्गस्थितःशत्रुर्गृहीतुंनैवशक्यते॥ विगृह्यैनंतदा
सीतच्छित्वास्यासारवीवधान्॥ विच्छिन्नवीवधासारंप्रक्षीणयवसें
धनं॥ विगृह्यमाणप्रकृतिंकालेनैवशमंनयेत्॥ अरेश्चविजिगीषोश्च
विग्रहेहीयमानयोः। संधायपदवस्थानंसंधायासनमुच्यते॥ सर्वत्र
चरेशकालानुरोधेनासनंकार्यमिति॥ ॥ इत्यासनं॥ द्वैधीभावोप्यु
क्तोनीतिसारे॥ द्वैधीभावेननिह्नुतकाकाक्षिवद्लक्षितइति॥ तथा। द्वैधी
भावोद्विधाप्रोक्तःस्वतंत्रपरतंत्रयोः॥ स्वतंत्रउक्तोह्यन्यस्तुयःस्यादुभ
यवेतनः॥ इतिद्वैधं॥ आश्रयउक्तःकामंदकेन॥ उच्छिद्यमानोबलिनानि
रुपायप्रतिक्रियः। कुलोद्भूतंसत्यमार्यमाश्रयेतबलोत्कटं॥ बुध्यैवोप
क्रमःश्रेयान्फलनिष्पत्तयेसदा॥ उपायेनपदंमूर्ध्निन्यस्यतेमत्तहस्ति

नां॥अयोभेद्यमुपायेनद्रवतामुपनीयते॥लोकप्रसिद्धमेवैतत्कारिव
न्हेर्नियामकं॥उपायोपगृहीतेनत्तेनैतत्परिशोष्यते॥उपायः कटाह
दिप्रक्षेपः॥अतःसर्वमुपायेनकुर्यादित्यर्थः॥मनुः॥यदितत्रापिसंप
श्येद्दोषंसंश्रयकारितं॥सुयुद्धमेवतत्रापिनिर्विशंकःसमाश्रयेत्॥
इत्याश्रयः॥एवंविधंमंत्रंमंत्रिभिःषाड्गुण्यविदाब्राह्मणेनचसह
येत्॥मनुः॥सर्वोपायैस्तथाकुर्यान्नीतिज्ञःपृथिवीपतिः॥यथास्या
भ्यधिकानस्युर्मित्रोदासीनशत्रवइति॥तान्द्वादशराजमंडलो
क्त्याहयाज्ञवल्क्यः॥अरिर्मित्रमुदासीनोऽनंतरस्तत्परःपरः॥क्र
मशोमंडलंचिंत्यंसामादिभिरुपक्रमैः॥तेन्वत्रयस्त्रिविधाःसह
जाःकृत्रिमाःप्राकृताश्चेति।तत्रसहजोऽरिःसापत्नभ्रातृपितृव्यत
त्पुत्रादिः॥कृत्रिमोरिपुर्यस्यापकृतंयेनापकृतंवा॥प्राकृतश्चानंत
रदेशाधिपतिः॥सहजंमित्रंभागिनेयपैतृष्वस्रीयमातृष्वस्रीयादि॥
कृत्रिमंमित्रं॥येनोपकृतंयस्यचोपकृतं॥प्राकृतं॥प्राकृतंमित्रमेकां
तरितदेशाधिपतिः॥सहजकृत्रिमशत्रुमित्रलक्षणरहितौसहजकृ
त्रिमोदासीनौ॥प्राकृतोदासीनोद्व्यंतरदेशाधिपतिः॥अरिःपुनश्चतुर्वि
धः॥पातव्योछेत्तव्यपीडनीयकर्शनीयभेदेन॥तत्रपातव्योनंतरदेशा
धिपतिः॥व्यसनीहीनबलोरिक्तप्रकृतिःविदुर्गोमित्रहीनोदुर्बलश्चो
छेत्तव्यः॥पीडनीयोमंत्रबलहीनः॥प्रबलमंत्रयुक्तःकर्शनीयः॥तथा
चराजमानसोल्लासे॥निर्मूलनाशमुच्छेदंपीडनंबलिनिग्रहं॥कर्शनं
तुपुनःप्राहुःकोशदंडापकर्शनादिति।मित्रंचद्विविधं॥बृंहणीयंकर्शनी
यमिति॥कोशबलहीनंबृंहणीयं॥कोशबलाधिकंकर्शनीयं॥प्राकृता
रिमित्रोदासीनानाह॥अनंतरस्तत्परःपरइति॥अनंतरःप्राकृतोरि
स्तत्परःप्राकृतंमित्रं।तस्मात्परःप्राकृतउदासीनः।शेषाःपुनःप्रसिद्धत्वा
न्नोक्ताः॥एतद्राजमंडलंक्रमशःपूर्वादिक्रमेणचिन्त्यं॥एवंचतुर्दिक्षु
।त्रयस्त्रयआत्माचैकइतित्रयोदशराजकंमंडलंपद्माकारं॥येचपार्ष्णि
ग्राहादयस्तेप्यत्रैवांतर्भवंति॥सामादिभिरित्युक्तंतान्सामादीनुपाया
नाहयाज्ञवल्क्यः।उपायाःसामदानंचभेदोदंडस्तथैवच॥सम्यक्प्रयु
क्ताःसिद्ध्येयुर्दंडस्त्वगतिकागतिः॥भेदःशत्रुसामंतादीनांपरस्परंवैरो

त्पादनं॥स एव॥सजेतुंन्यायतोशक्योलुब्धेनाकृतबुद्धिना॥सत्यसं
धेनशुचिनासुसहायेनधीमता॥यथाशास्त्रंप्रयुक्तःसन्सदेवासुरमानु
षं॥जगदानंदयेत्सर्वमन्यथातुप्रकोपयेत्॥अधर्मदंडनंस्वर्गकीर्त्ति
लोकविनाशनम्॥सम्यक्तुदंडनंराज्ञःस्वर्गकीर्त्तिजयावहं॥मनुः॥अ
दंड्यान्दंडयन्राजादंड्यांश्चैवाप्यदंडयन्॥अयशोमहदाप्नोतिनर
कंचैवगच्छतीति॥दंडप्रकारंदंड्यादंड्यव्यवस्थांव्यवहारमयूखेद
र्शयिष्यामः॥एवंमंत्रयित्वांतःपुरंशोधयित्वाप्रविशेत्॥यथोक्तं॥का
रयेद्भवनशोधनमादौमातुरंतिकमपिप्रविविक्षुः॥आप्तशस्त्र्यनुगत
श्चविशेच्चसंकटेचगहनेचनतिष्ठेत्॥तथा॥निर्गमेचप्रवेशेचराजा
मार्गेसमंततः॥प्रोत्सारितजनंगच्छेत्सम्यगाविष्कृतोन्नतिः॥यात्रो
त्सवसमाजेतुजनसंबाधशालिनः॥प्रदेशान्नावगाहेतनातिवेलंच
संपतेत्॥निषेवितोवर्षधरैःकंचुकोष्णीषशालिभिः॥अंतःपुरेचविच
रेत्कुब्जकैरात्तवामनैः॥नीचैरंतःपुरामात्याःशुचयश्चित्तवेदिनः॥
शस्त्राग्निविषवर्जंहिनर्मयेयुर्महीपतिं॥अंतःपुरशोधनमाहकामंद
कः॥आशीतिकाश्चपुरुषाःपंचाशीत्यश्चयोषितः॥बुध्येरन्नवरोधानां
शौचमागारिकाश्चये॥अभ्यंतरगतोपीहविश्वासंस्त्रीषुनव्रजेत्॥
देवीगृहगतंभ्राताभद्रसेनमहारयत्॥मातुःशय्यांतरेलीनःकारूषं
चौरसःसुतः॥नहिदेवीगृहंगच्छेदात्मीयात्संनिवेशनात्॥तथास्त्री
णांचरितमुक्तंनीतिसारे॥विशेषेणतुसंयोज्यमधुनेतिविलोभितं॥दे
वीतुकाशिराजेंद्रंनिजघानरहोगतं॥विषाक्तेनचसौवीरंमेखलाम
णिनानृपं॥वेण्यांशस्त्रींसमादायतथाचापिविदूरथं॥इतिवृत्तंपरि
हरेत्तांश्चापिप्रयोजयेत्॥यस्यदाराःसुगुप्ताःस्युःपौरुषैराप्तकारि
भिः॥सर्वलोकान्वितंतस्यहस्तेलोकद्वयंस्थितं॥एवंसावधानोंतःपु
रंप्रविशेत्॥अथभार्यागमनमुक्तंकामंदकेन॥धर्ममिच्छन्नरपतिःस
र्वान्दाराननुक्रमं॥गच्छेदनुनिशंनित्यंवाजीकरणबृंहितः॥वाजीकर
णादिकंचकामशास्त्रादवगंतव्यंविस्तृतिभयान्नेहनिरूपितं॥नीति
सारे॥विचार्यकार्यावमेवान्दिनसयेविसृज्यलोकंप्रमदादृतक्रियः॥
सशस्त्रबंधेनहिसाधुपाणिनास्वपित्यसक्तःपरमात्तरक्षितः॥तथा॥नये

नजाग्रत्यनिशंनरेश्वरेस्फरंस्वपंतीहनिराधयःप्रजाः॥प्रमत्तेविनेश
तिजायतिप्रजाःप्रजागरेणास्यजगत्सबाधनइति॥एवंनिष्ठतःफलमाहव
राहमिहिरः॥आचारस्थःसागरांतांधरित्रींभुंक्तेदीर्घकालमुत्खातश
त्रुः।यत्राचारस्तत्रधर्मस्यवृद्धिर्धर्मोद्गोगान्देहभेदेपिभुंक्ते॥भारते॥
धृतिःशमोदमःशौचंकारुण्यंवागनिष्ठुरा॥मित्राणांचानभिद्रोहःसप्त
श्वसमिधःश्रियः॥समिधोवर्द्धनानि॥इतिसपरिकरस्वामिनिरूपणं
॥अथामात्यः॥तत्रपुत्रोप्यमात्यमध्येपरिगणितोनीतिसारे॥अमा
त्योयुवराजश्चभुजावेतौमहीपतेरिति॥राजपुत्रस्यकृत्यमुक्तं॥पि
तृसेवापरस्तिष्ठेत्कायवाङ्मानसैःसदा॥तत्कर्मकुर्यान्नियतंयेनतुष्टो
भवेत्पिता॥तन्नकुर्याद्येनपितामनागपिविषीदति॥तथा।यस्मिन्पि
तुर्भवेत्प्रीतिःस्वयंतस्मिन्प्रियंचरेत्॥यस्मिन्द्वेषंपिताकुर्यात्तं
स्यापिद्वेष्यएवसः॥असंमतंविरुद्धंचपितुर्नैवसमाचरेत्॥प्राप्यापि
युवराजत्वंप्राप्नुयाद्विकृतिंनच॥स्वसंपत्तिमदान्नैवमानरेत्पितरंत
था॥भ्रातरंभगिनींचापिअन्यान्वाराजवल्लभान्॥महाजनांस्तथा
राष्ट्रेनावमन्येन्नपीडयेत्॥प्राप्यापिमहतींवृद्धिंवर्त्तेतपितुराज्ञया
॥पुत्रस्यपितुराज्ञाहिपरमंभूषणंस्मृतं॥सोदरेषुचसर्वेषुनाधिक्यं
संप्रदर्शयेत्॥भ्रातृणामवमानेनबहवोहिविनाशिताः॥पितुराज्ञो
ल्लंघनेनप्राप्यापिपदमुत्तमं॥तस्माद्भ्रष्टाभवंतीहदासवद्राजपुत्र
काः॥एवंगृहाविरोधेनराजपुत्रोवसन्गृहे॥त्यागीचसत्वसंपन्नः
सर्वान्कुर्याद्वशेस्वके॥शनैःशनैःप्रवर्द्धेतशुक्लपक्षमृगांकवत्॥एवं
वृत्तोराजपुत्रोराज्यंप्राप्याप्यकंटकं॥सहायवान्महामात्योचिरंभुं
क्तेवसुंधरां॥एतच्चराजपुत्रेविशेषमात्रमुक्तं॥सामान्यास्तुपूर्वोक्ता
वक्ष्यमाणाश्चगुणाःसर्वेअपेक्षिताएव॥तेषांराजपुत्राणांरक्षणंप्रय
त्नतःकुर्यादित्याहकामंदकः॥प्रजार्थश्रेयसेराजाकुर्वीतात्मजरक्ष
णं॥लोलुभ्यमानास्तेर्थेषुहन्युरेनमरक्षिताः॥राजपुत्रामदोद्धता
गजाइवनिरंकुशाः॥भ्रातरंवाभिनिघ्नंतिपितरंवाभिमानिनः॥राजपु
त्रैर्मदोद्धूतैःप्रार्थ्यमानमितस्ततः॥दुःखेनरक्ष्यतेराज्यंव्याघ्राघ्रात
मिवामिषं॥रक्ष्यमाणायदिच्छिद्रंकथंचित्प्राप्नुवंतिते॥सिंहशावाइव

घ्नंतिरक्षितारमसंशयं॥विनयोपपन्नान्भृत्यैःकुर्वीतनृपतिःसुतान्। अविनीतकुमारंहिकुलमाशुविनश्यति।विनीतमौरसंपुत्रंयौवराज्येऽभिषेचयेत्॥दुष्टंगजमिवोद्दान्तंकुर्वीतसुखबंधनं॥तथा॥लालनीयःपालनीयोभूषणीयस्तथैवच॥अर्थशास्त्रंशिक्षणीयोयथास्याद्विनयीकृतः॥दुर्वृत्तंप्रत्याह॥राजपुत्रःसुदुर्वृत्तःपरित्यागंहिनार्हति॥क्लिश्यमानःसपितरंपरानाश्रित्यहंतिहि॥व्यसनेसज्जमानंहिक्लेशयेद्व्यसनाश्रयैरिति॥ इतिराजपुत्रनिरूपणम्॥अमात्यस्त्रिविधः।उत्तममध्यमाधमभेदात्॥ तदुक्तंमहाभारते॥त्रिविधाःपुरुषालोके उत्तमाधममध्यमाः॥तेषांचसमवेतानांगुणदोषान्वदाम्यहं॥मंत्रिभिर्हितसंयुक्तैःसमर्थैरर्थनिश्चये॥मित्रैर्वापिसमानार्थैर्बांधवैरप्यगर्हितैः॥संमंत्रयित्वायःकर्मप्रारंभेसंप्रवर्तते॥धैर्याच्चकुरुतेयत्नंतमाहुःपुरुषोत्तमं॥एकोर्थान्विमृशत्येकोधर्मेचकुरुतेमतिं॥एकःकार्याणिकुरुतेतमाहुर्मध्यमंनरं॥गुणदोषावनिश्चित्यदैवमेवव्यपाश्रितः॥करिष्यामीतियःकार्योपेक्षकःसनराधमइति॥याज्ञवल्क्यः॥समंत्रिणःप्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन्॥तैःसार्द्धंचिंतयेद्राज्यंविप्रेणाथ ततःस्वयमिति॥मनुःसंख्यामप्याह॥मौलान्शास्त्रविदःशूरान्लब्धलक्षान्कुलोद्भवान्॥सचिवान्सप्तचाष्टौवाकुर्वीतसुपरीक्षितानिति॥लब्धलक्षांश्चानुरान्मौलान्स्ववंशपरंपरायातान्॥ नीतिसारे॥कुलीनाःशुचयःशूराःश्रुतवंतोनुरागिणः॥दंडनीतेःप्रयोक्तारःसचिवाःस्युर्महीपतेः॥तथा॥स्मृतिस्तत्परतार्थेषुवितर्कोज्ञाननिश्चयः॥दृढतामंत्रगुप्तिश्चमंत्रिसंपत्प्रकीर्तिता॥सज्जमानमकार्येषुनिरुंध्युर्मंत्रिणोनृपं॥गुरूणामिववैतेषांशृणुयाद्वचनंनृपः॥पुरोहितकृत्यंतत्रैव॥त्रय्यांचदंडनीत्यांचकुशलोस्यपुरोहितः॥अथर्वविहितंकर्मकुर्याच्छांतिकपौष्टिकं॥तादृक्सांवत्सरोप्यस्यज्योतिःशास्त्रस्यचिंतकः।प्रश्नाभिधानकुशलोहोरागणिततत्त्ववित्॥इत्यमात्यादिनिरूपणम्॥सुहृन्निरूपणंतुप्रायशःपूर्वंकृतमेव॥गुणास्तुकेचनोच्यन्ते।अमात्यानांसेवकमध्येंतर्भावः।सुहृदस्तुमित्राणीतिभेदः तेषांकृत्यमुक्तंकामंदकेन॥नृपस्यतेहिसुहृदस्तएवगुरवोमताः॥

यस्मिन्नसुखं स्थगितं वारयंत्यनिवारिताः॥सज्जमानमकार्येषु सुहृदो धारयंति ये। सत्यं तेनैव सुहृदो गुरवो गुरवो हिते॥कृतविद्योपि वहि नात्यक्तरागेण रज्यते॥रागानुरक्तचित्तः सन्किं न कुर्यादसांप्रतं॥ तथा।त्यागविज्ञानसत्याढ्यं महापक्षं प्रियंवदं। आयतिक्षममद्वैध्यं मित्रं कुर्वीत सत्कुलं॥समुत्पन्नेषु कृच्छ्रेषु दारुणेष्वप्यसंशयं॥ दर्शयत्यच्छहृदयः कुलीनश्चतुरस्रतां॥धर्मार्थकामसंयोगो मित्रात्तु त्रिविधं फलं॥यस्मादेतत्त्रयं न स्यात्तन्न सेवेत पंडितः॥ शुचिता त्यागिता शौर्यं समानसुखदुःखता॥अनुरागश्च दाक्ष्यं च सत्यता च सुहृद्गुणाः॥तदर्थे ह्यनुरागश्च संक्षिप्तं मित्रलक्षणं॥यस्मिन्नैतन्न तन्मित्रं तत्रात्मानं न निक्षिपेत्॥न विश्वसेदित्यर्थः॥प्रायो मित्राणि कुर्वीत सर्वावस्थासु भूपतिः॥बहुमित्रो हि शक्नोति वशे स्थापयितुं रिपून्॥न तत्र तिष्ठति भ्राता न पिता नापि वा जनः॥पुंसामापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति॥ अमित्रान्सर्वतो मित्रैर्निगृह्णीयाद्दृढव्रतैरिति॥ ॥इति सुहृन्निरूपणं॥ अथ कोशः॥तस्य मुख्यत्वमाह वराहमिहिरः ॥कोशो हि राज्यतरुमूलमतो हि शाखाः पक्षी विपक्ष इव किं निधनं करोति॥अन्नादिवेंद्रियगणो वसुतस्तथान्नं तस्मात्स्विरक्षणविवृद्धिषु यत्नवान्स्यात्॥ भारते॥मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपं॥वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत्॥विकुट्टयेन्न शोषयेत्॥तथा॥यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः स मानवः॥यो राजकोशं नश्यंतमाचक्षीत युधिष्ठिर॥श्रोतव्यमस्य च रहो रक्ष्यश्चामात्यतो भवेत्॥अमात्या ह्युपहर्तारं ज्ञातिं वा घ्नंति भारत॥ उपहर्तारं राज्ञे निवेदयितारं ॥राजकोशस्य गोप्तारं राजकोशाधिगोपकाः॥सर्वे तमनु धावंति स विनश्यत्यरक्षितः॥ अनुधावंति मारयितुं धावंतीत्यर्थः॥कामंदकः ॥वर्द्धमानोल्पनिस्रावः ख्यातः पूजितदैवतः॥ ईप्सितद्रव्यसंपूर्णो हृद्य आप्तैरधिष्ठितः॥मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः॥ग जेष्वारोपितः साधुशीघ्रयानैरधिष्ठितः॥यत्र राजा तत्र कोशः कोशाधीना हि राजता।तथा॥ धर्मार्जितो व्ययसहः कोशः कोशज्ञसंमतः॥ धर्महेतोस्तथार्थाय भृत्यानां भरणाय च॥आपदर्थं च संरक्ष्यः कोशः को॰

शवतासदा॥पुत्रादपिहिसंरक्ष्यो भार्यायाःसुहृदस्तथा॥नीतिसारे॥
नान्यायव्ययंकुर्यात्प्रत्यवेक्षेतचान्वहं॥कृषिर्वणिक्पथोदुर्गंसे
तुःकुंजरबंधनं॥खन्याकरधनादानंस्वस्यचित्तोपिवर्द्धयेदिति॥भागा
उक्ताःशिवधर्मे॥तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत्॥भाग
द्वयंतुधर्मार्थमनित्यंजीवितंयतः॥भागत्रयंवित्तस्यएकोजीवनाय
द्वौधर्माय॥भागपंचकंकृत्वात्रितयंजीवनायभागद्वयंधर्मायेतिहेमा
द्रिः॥कृपणाशक्तविषयेभारते॥एकांगांदशगुर्दद्याद्दशदद्याच्चगोशती॥शतं
सहस्रगुर्दद्यात्सर्वेसमफलाःस्मृताइति॥दशांशंदद्यादितिभावः॥
इतिकोशः॥राष्ट्रमुक्तंनीतिसारे॥राज्यांगानांतुसर्वेषांराष्ट्राद्भवतिसं
भवः॥तस्मात्सर्वप्रयत्नेनराजाराष्ट्रंप्रसाधयेत्॥तस्मात्साधून्पापिष्ठा
न्निघ्नन्पापैर्नलिप्यते॥येयेप्रजाःप्रबाधेरंस्तांस्तान्छिद्यान्महीप
तिः॥यमार्याःक्रियमाणंहिशंसंत्यागमवेदिनः॥सधर्मोयंविगर्हंतितम
धर्मंप्रचक्षते॥धर्माधर्मौविजाननहिशासनेभिरतःसतां॥प्रजारक्षेन्नृ
पःसाधुहन्याच्चपरिपंथिनः॥राष्ट्रोपघातंकुर्वीरन्येपापाराजवल्लभाः
॥एकैकशःसंहतान्वादूष्यांस्तान्परिचक्षते॥दूष्यानुपांशुदंडेनहन्या
द्राजाविलंबितं॥अदृश्यंवाप्रकाशंवालोकद्वेषंसमाश्रितान्॥तथा॥
अरक्ष्यमाणाःकुर्वंतियत्किंचित्किल्बिषंप्रजाः॥तस्मात्तुनृपतेरर्द्धंय
स्मात्कृण्हात्यसौकरान्॥सर्वतोधर्मषड्भागोराज्ञोभवतिरक्षितः॥अ
धर्मादपिषड्भागोभवत्यस्यह्यरक्षितुः॥यथाबीजांकुरःसूक्ष्मःपरिपुष्टो
भिरक्षितः॥कालेफलायभवतिसाधुस्तद्वद्धि यंप्रजा॥उद्वेजयतितीक्ष
क्ष्णोनमृदुनापरिभूयते॥तस्माद्यथार्हतोदंडंनयेत्पक्षमनाश्रितः॥
याज्ञवल्क्यः॥पीड्यमानाःप्रजारक्षेत्कायस्थैश्चविशेषतइति॥भारते
पि॥उच्छिद्यतेधर्मवृत्तमधर्मोवर्त्ततेमहान्॥भयमाहुर्दिवारात्रंयदा
पापोनवार्यतइति॥राजधर्मेषु॥विक्रयंक्रयमध्वानंभक्तंचसपरि॥
व्ययं॥योगक्षेमंसंप्रेक्ष्यवणिजःकारयेत्करान्॥उत्पत्तिंदानवृत्तिंच
शिल्पंसंप्रेक्ष्यवासकृत्॥शिल्पंप्रतिकरानेवशिल्पिनःप्रतिकारयेत्
॥तथायथानहीयेरन्प्रजाःकुर्यान्महीपतिः॥संत्यजंतिपरिख्यातंराजा
नमतिखादिनं॥नकर्मकुरुतेवत्सोभृशंदुग्धोयुधिष्ठिर॥राष्ट्रमप्यतिदु

ध्यंहिनकर्मकुरुतेमहत्॥योराष्ट्रमनुगृण्हातिपरिगृह्यस्वयंनृपः॥सं
जातमुपजीवन्सलभतेसुमहत्फलं॥पौरान्जानपदान्सर्वान्संश्रि
तोयाश्रितांस्तथा॥यथाशक्त्यानुकंपेतसर्वानल्पधनानपि॥तथा॥प्र
चारंभृत्यभरणंव्यसनंग्रामतोभयं॥योगक्षेमंचसंप्रेक्ष्यगोमिनःका
रयेत्करं॥तथा॥दयावानप्रमत्तश्चकरान्संप्रणयेन्मृदूनिति॥इतिरा
ष्ट्रं॥दुर्गकरणार्थंभुवमाहकामंदकः॥भूगुणैर्वर्धतेराष्ट्रंनहृद्धिर्नपक्ष
ये॥तस्माद्गुणवतींभूमिंभूत्यैभूपस्तुकारयेत्॥सस्याकरवतीपुण्या
खनिद्रव्यसमन्विता॥गोहिताभूरिसलिलापुण्यैर्जनपदैर्वृता॥रम्या
सकुंजरवना वारिस्थलपथान्विता॥अदेवमातृकाचेतिशस्यतेभू
र्विभूतये॥निषिद्धभूमिमाहसएव॥सशर्करासपाषाणासाटवीनि
त्यतस्करा॥रूक्षासकंटकवनासव्यालाचेतिभूरभूः॥रूक्षान्यदेशा
पेक्षयाचतुर्गुणपंचगुणादिजलसेकेनसस्यजननी॥जनपदमाह
सएव॥स्वाजीव्योभूगुणैर्युक्तःसानूपःपर्वताश्रयः॥शूद्रकारुवणि
क्प्रायोमहारंभकृषीवलः॥सानुरागोरिपुद्वेषीपीडाकरसहःपृथुः
॥नानादेशैःसमाकीर्णोधार्मिकःपशुमान्धनी॥तंवर्द्धयेत्प्रयत्नेनत
स्मात्सर्वंप्रवर्त्तते॥पुरमाह॥पृथुसीममहाखातमुच्चप्राकारगोपु
रं॥समावसेत्पुरंशैलंसरिन्मरुवनाश्रयं॥याज्ञवल्क्यः॥रम्यंपश
व्यमाजीव्यंजांगलंदेशमावसेत्॥तत्रदुर्गाणिकुर्वीतजनकोशात्म
गुप्तये॥पशव्यंपशुवृद्धिकरं॥कंदमूलफलादिभिराजीव्यं॥जांगलं
सजलतरुपर्वतं॥दुर्गमाहमनुः॥धन्वदुर्गंमहीदुर्गमब्दुर्गंवार्क्षमेव
च॥नृदुर्गंगिरिदुर्गंचसमाश्रित्यावसेत्पुरं॥कामंदकस्तुऐरिणमपि
पपाठ॥औदकंपार्वतंवार्क्षमैरिणंधन्वमानवं॥प्रशस्तंशास्त्रमतिभि
र्दुर्गंदुर्गोपचिंतकैः॥इरिणमूषरं॥धन्वनिरुदकंस्थलमरुभूमिरि
त्यर्थः।महीदुर्गमित्यत्रमल्यांदुर्गंमहीरूपमेववा॥तच्चमार्त्तिकंपाषा
णमैष्टकंवा॥तथाचमहाभारते॥महीदुर्गापेक्षयासुदुर्गस्यपृथङ्नि
र्देशःकृतः॥धन्वदुर्गंमहीदुर्गंगिरिदुर्गंतथैवच॥मनुष्यदुर्गंमृद्दुर्गं
वनदुर्गंचतानिषडिति॥बंधुदुर्गंसोदरादिबंधूनांराजगृहस्यपरितः
स्थानानि॥तत्रबंधुदुर्गमनुष्यदुर्गयोःपृथग्ग्रहणंगोवलीवर्दन्यायेन

॥अंतरंगत्वाच्छूरत्वाच्चबंधूनांपृथग्भिर्देशः॥तथा॥यावद्बंधुदुर्गंसंभव
तितावदितरमनुष्यदुर्गंनकुर्वीतेति॥एवंचदुर्गस्यनवत्वंसंपद्यते॥ध
न्वदुर्गंमहीदुर्गमित्यत्राब्दु।जलदुर्गं।वृक्षदुर्गं।नृदुर्गं।गिरिदुर्गं।बंधुदु
र्गं।ऐरिणदुर्गं।महीदुर्गंतुमृदादीनांविशेषः पूर्वमुक्तएव।दुर्गस्यगुण
माहमनुः॥एकःशतंयोधयतिप्राकारस्थोधनुर्धरः।शतंदशसहस्रा
णितस्माद्दुर्गंसमाश्रयेत्।दशगुणाअपिपराभवंप्राप्नुवंतीत्यर्थः॥तत्र
सर्वदुर्गाणांप्राशस्त्येचगिरिदुर्गविशेषमाहमनुः॥सर्वेणतुप्रयत्नेन
गिरिदुर्गंसमाश्रयेत्॥एतेषांबाहुगुण्येनगिरिदुर्गंविशिष्यते॥एतेषा
मितिनिर्द्धारणेषष्ठी॥तद्विशिनष्टिमनुः।तत्स्यादायुधसंपन्नंधनधान्ये
नवाहनैः॥ब्राह्मणैःशिल्पिभिर्मंत्रैर्यवसेनोदकेंधनैः॥मंत्रैःसर्पादिमंत्र
विद्भिर्मनुष्यैरित्यर्थः।भारतेदुर्गंप्रकृत्य॥शूरान्यजनसंपन्नंब्रह्मघोषा
नुनादितं॥वश्यामात्यबलोराजातत्पुरंस्वयमाविशेत्॥तत्रकोशंबलं
मित्रंव्यवहारंचवर्द्धयेत्इति॥मनुः॥तस्यमध्येतुपर्याप्तंकारयेद्गृहमा
त्मनः॥गुप्तंसर्वर्तुकंशुभ्रंजलवृक्षसमन्वितमिति॥सर्वर्तुकंआरामा
दिषुतत्तदृतुफलिवृक्षसहितं॥तत्तदृतूद्भवफलपुष्पादिसहितंवा॥त
त्तदृतूपयोगिसामग्रीसहितंसर्ववस्तुसमन्वितमित्यर्थः॥इतिदुर्गं॥
॥अथबलम्॥तत्रमुहूर्त्ताद्यपेक्षयाबलस्यप्राधान्यमाहवराहमिहिरः।
ग्रहर्क्षतिथ्युद्गमराशिहोराद्रेक्काणभागाद्यनुकूलमात्रं।भवेद्वियासो
र्येदिसिद्धिहेतुःस्वयंभवेद्दैवविदेवराजा।मंत्राभिषेकमणिबंधनशां
तिकर्महोमोपवासस्सुरथागजपादिमात्रं॥स्यात्सिद्धिहेतुरथचेद्वि
जिगीषतोरीन्कस्मात्तदानरपतिर्नभवेत्पुरोधाः॥तथा॥बुध्वार्थशास्त्रा
ण्यपिमंत्रिणोपिकुर्युःप्रणामंननरेश्वराणां॥यद्याभिजात्यद्विपवाजि
पत्तिकोशाद्यपेक्षानभवेत्प्रधानं॥अतोवश्यंबलकोशाधीनंराज्यं।
ननु।जयपराजयादिकंसर्वंकर्माधीनंतत्रकिंबलादिनेतिचेत्॥उच्य
ते।नकेवलंसर्वंकर्माधीनंकिंतुपुरुषकाराधीनमपि।उक्तंचयाज्ञवल्क्ये
न।यथाह्येकेनचक्रेणनरथस्यगतिर्भवेत्॥एवंपुरुषकारेणविनादैवं
नसिद्ध्यतीति॥माघेपि॥नालंबतेदैष्टिकतांननिषीदतिपौरुषे॥शब्दा
र्थौसत्कविरिवद्वयंविद्वानपेक्षतइति॥कथंतर्हिकश्चित्पुरुषकारेह

तेपिनफलप्राप्तिः॥उच्यते॥नवयंकर्मणःकारणत्वमेवखंडयामः।किं
तुतन्मात्रस्य।वस्तुतस्तु॥नहिकर्मपुरुषकारापेक्षयाभिन्नमस्ति।पू
र्वजन्मार्जितःपुरुषकारोहिकर्मोच्यते॥अतोयदिहजन्मनिद्वाभ्यामे
कजातीयेप्रयत्नेकृतेफलावाप्तिरेकस्यैकस्यनततोनूनमेकस्यप्रा
क्तनःपुरुषकारोनास्ति।पापरूपोवासप्रतिबंधकइतिकल्प्यते।अतः
सर्वंकर्मापरपर्यायपुरुषकाराधीनमेव।अतएवोक्तंभारते।स्वकर्म
णाशुभेनापिशुभेनाप्यथवाजनः॥फलंतदनुरूपंहिप्राप्नोतिभरतर्ष
भ।अतएवोत्तरमीमांसायांकस्यचिदिहजन्मानजन्मनिकर्मभिःपापक्ष
येजातेसंन्यासोत्तरंमुक्तिः॥यत्रतुकर्मस्वकृतेषुसंन्यासोत्तरंमुक्ति
स्तत्रपूर्वजन्मार्जितानिकर्माणिकल्प्यंते।अतएवक्षत्रियजनकस्यज्ञा
नोत्पत्तिंदृष्ट्वाप्राक्तनःसंन्यासोपिकल्प्यतइत्युक्तं।अतोयत्रलोकतः
शास्त्रतोदृढतरःकार्यकारणभावोऽवगतस्तत्रकार्यंदृष्ट्वा कारणम
नुमीयतेति।अतःसर्वत्रप्राक्तनऐहिकोवापुरुषकारःकारणमिति
॥अतःपुरुषकारएवराज्ञाकर्तव्यइति॥सचबलाधीनइत्यवश्यं
बलसंग्रहःकार्यः।अत्रबलंषड्विधमाहकामंदकः॥षड्विधंतुबलंव्यू
ह्यद्विषतोभिमुखंव्रजेदिति॥षड्विधंबलमादायप्रतस्थेदिग्जिगीषये
तिकालिदासोपि॥तद्भेदाउक्तानीतिसारे॥मौलंभूतंश्रेणिसुहृद्द्वि
षदाटविकंबलं।पूर्वंपूर्वंगरीयस्तुबलानांव्यसनंस्मृतमिति।पूर्वपूर्वस्य
नाशःकठिनइत्यर्थः।तत्रमौलंनामपरंपरागतं।भूतंयावद्दिवसस्था
यि।श्रेणिःगमनमार्गेस्थानेस्थानेनिवेशितं॥सुहृन्मित्रबलं॥द्वि
षतांस्वाधीनंयज्जातंतद्द्विषद्बलं॥आटविकंअरण्यसंबंधि॥तत्रदूरे
शादौमूलसहितोगच्छेदित्याह।प्रकृष्टेध्वनिकालेवागच्छेन्मौलैःसम
वृतः।मौलास्तुदीर्घकालेपिसमव्ययसहिष्णवः॥एषुवस्तुषुमेधा
वीभूतादीनिविवर्जयेत॥दीर्घाध्वकालखिन्नेषुतेषुभेदभयंभवेत
॥बहुत्वाद्भूतसैन्यानांदीर्घकालाध्वखेदतः।नित्यंप्रवासायासाभ्यांभे
दोवश्यंप्रजायते॥भेदःस्वामिपरित्यागः॥एवमन्येषामपिबलानांगु
णदोषाऊहनीयाः।तत्रकस्मिन्कालेकिंबलंग्राह्यमित्याहकामंदकः॥
स्फीतसारानुरक्तेनबलेनोपचितःपरः।तत्तुल्येनैवयातव्यःसपत्न

यसहिष्णुना। क्वचिद्भूतमपि ग्राह्यमित्याह स एव॥ प्रभूतं स्वं भूतबलं
मौलमल्पमसारवत्॥ अरेर्वा स्यात्मनस्तद्धि विपरीतं जयेदरीन्। भू
तबलेन मौलं जयेदिति विपरीतं। श्रेणिबलस्योपयोगमाह। स्फीतं श्रे
णिबलं शस्यमाधातुयानवर्त्मनि॥ निःसंप्रयासव्यायामामिति श्रेण्या
समुत्पतेत्॥ मित्रबलस्योपयोगमाह। मित्रसाधारणे कार्ये मित्रायत्ते
फलोदये॥ अनुग्राह्ये च पीड्ये च मित्रेणैव सह व्रजेत्॥ अरिसैन्यस्योप
योगमाह। प्रभूतेनारिसैन्येन योधयेन्महतोरिपून्॥ अत्युच्छ्रितं कोप
नयादभ्यासेन रिपोर्बलं॥ वासयेत्कर्षयेच्चैनं दुर्गकंटकशोधनैः॥ आ
टविकस्योपयोगमाह। नित्यमाटविकं सैन्यं दुर्गकंटकशोधने॥ परदे
शप्रवेशे च पुरः कुर्वीत पंडित इति। पूर्वोक्तबलस्य चतुरंगतामाह। ह
स्त्यश्वरथपादातं सेनांगं स्याच्चतुर्विधमिति॥ ॥अथ गजनिरूपणम्
॥ चतुर्विधा गजाः॥ भद्रा मंदा मृगा मिश्राश्चेति॥ तल्लक्षणमाह वराहमि
हिरः॥ मध्वाभदंताः सुविभक्तदेहाः नचोपदिग्धा न कृशाः क्षमाश्च। गा
त्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः॥ चापं वंशस्य त
त्तुल्यपृष्ठाः॥ वक्षोथ कक्षावलयः श्लथाश्च लंबोदरस्त्वग्बृहती ग
लश्च। स्थूला च कुक्षिः सह पेचकेन सैंही च दृक् मंदमतंगजस्य। कृ
शाग्रिमपादहृद्योरुसंधिः। सैंही सिंहसदृशछविरित्यर्थः॥ मृगास्तु ह्र
स्वाधरवालमेढ्रास्तन्वंघ्रिकंठद्विजहस्तकर्णाः॥ स्थूलेक्षणाश्चेति य
थोक्तलिंगैः संकीर्णनागा व्यतिमिश्रसंज्ञाः॥ मिश्रत्वं भद्राणां मंदादि
संगेन॥ एवमन्यत्रापि॥ अथ परिमाणमाह। पंचोन्नतिः सप्त मृगस्य
दैर्घ्यं अष्टौ च हस्ताः परिणाहमानं॥ एकाद्विवृद्धावथ मंदभद्रौ संकीर्ण
नागो नियतप्रमाणः॥ मंदस्य षडुन्नतिः अष्टौ दैर्घ्यं। नवोदरपरिणाहः
॥ भद्रस्य सप्तोन्नतिः। नव दैर्घ्यं दश परिणाहाः। अन्यत्स्पष्टं। अत्र ह
स्तस्तिर्यग्यवोदराणीति कल्पनेन कार्यः॥ तेषां मदवर्णमाह स एव
॥ भद्रस्य वर्णो हरितो मदश्च मंदस्य हारिद्रकसन्निकाशः॥ कृष्णो मृ
गस्याभिहितो मदस्य संकीर्णनागस्य मदो विमिश्रः॥ गजप्राशस्त्य
माह। ताम्रोष्ठतालुवदनाः कलविंकनेत्राः स्निग्धोन्नताग्रदशनाः पृ
थुलायतास्याः। चापोन्नतायतनिमग्ननिगूढवंशास्तन्वेकरोमचि

तत्कूर्मसमानकुंभाः॥ कलविंकश्चटकः॥ तनून्येकजातीयानि रोमाणि
तैः। तथा॥ विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतैर्द्विनवविंशति
भिर्नखैश्च॥ एवमत्रयोपचितहस्तकराः सुवालधन्याः सुगंधिमदपुष्क
रमारुताश्चेति॥ हीनवाष्टादशविंशतिर्वा नखानि कूर्मोन्नतानि। पुष्क
रं शुंडाग्रं। तथा॥ मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्त
तः। दंतभंगफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदं॥ वामतः सुतपुरो
हितेभयं हंति साटविकदारनायकान्॥ आटविकोटव्यामधिकृतस्त
त्सहितादारनायकाद्दाराधिकृताः पुरुषास्तान् हंति। भयंकरी नीत्य
ध्याहारः। तथा। आदिशेदुभयगर्भदर्शनात्पार्थिवस्य सकलं कुलक्षयं॥
सौम्यलग्नतिथिभादिभिः शुभं वर्द्धते शुभमतोन्यथापरं॥ क्षीरिमिष्ट
फलपुष्पपादपेष्वापगातटविघट्टनेन च॥ वाममध्यरदभंगखंडनं श
त्रुनाशकृदतोन्यथापरं॥ वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छ
याहृष्टदृष्टिर्यायाद्यात्रानुकूलं त्वरितपदगतिर्वक्त्रमुन्नाम्य चोच्चैः।
भक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं स्वं हते वा तत्कालं वामदाप्ति
र्जयकृदथ रदं वेष्टयन्दक्षिणं च॥ स्खलितगतिरकस्मात्त्रस्तकर्णो
ऽतिदीनं श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्यां। द्रुतमुकुलितदृष्टिः
स्वप्नशीलो विलोमो भयकृदहितभक्षी नैकशोसृक् शकृच्च। अहि
तभक्षी रोगजनकतृणादिभक्षी॥ असृक् रुधिरं तत्सहितं शकृत्। तथा
॥ प्रवेशनं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य। ग्राहंगृही
त्वोत्तरणं द्विपस्य तोयात्स्थले वृद्धिकरं परं स्यात्॥ बंधनभूमीराह। भ
द्रमंदमृगमिश्रदंतिनां श्वेतरक्तकनकोपमाः सिताः। भूमयो द्विरदपु
ष्टिवृद्धिदा भूभुजामपि यशः सुखावहाः॥ शालामाह। ज्येष्ठा चतुर्विंश
तिरेव हस्ताद्व्यूनिते मध्यजघन्यशाले। विस्तारतस्तद्द्विगुणाश्च दीर्घा
स्तंभाश्च विस्तारसमुच्छ्रिताः स्युः। एते च शालास्तंभाः॥ अत्र पूर्वोक्तप
रिमाणमध्ये बहूनां हस्तिनां सन्निवेशः अतिहस्ति पूर्वोक्ता शाला ज्ञे
या। स्तंभानां परीणाहमाह। ज्येष्ठांगुलानि वहलोदशषड्युतानि मध्य
षु पंचदशकन्यसकोंगुलोनः। स्तंभप्रमाणविपुलाः क्रमशो निषंगाः श्री
कांगुलाः सदृशा बहुलत्वमेषां॥ निषंगा बंधनरज्जवः। द्वारमाह। द्वारो

यःकुंजरयामतुल्योविस्तारोस्यत्र्यंशहीनःसएव।हीनोभूयश्चात्मष
ष्ठांशकेनशालाद्वारंप्रागुदक्चप्रशस्तं। भूयःपुनःआत्मनस्त्र्यंशस्यष
ष्ठांशेनविस्तारः॥एवंचद्वारमुपरिसूक्ष्ममधोभागेमहच्चसंपन्नंभव
ति।बंधनार्थंवृक्षानाह।चंदनार्जुनशिरीषमधूकदेवदारुसरलार्जुन
शालाः॥रोहिणीखदिरचंपकशाकाःस्यंदनश्चसकदंबविशोकाः॥
शीताःशिवाश्चद्विपबंधनार्थमेतेद्रुमाःपुष्टिकरा द्विपानां॥स्तंभार्थ
मन्येपिहिसारवंतःकार्याःप्रशस्तागुणसंप्रयुक्ताः॥तथा।पूर्वाभिमु
खोनिबध्यतेयःक्षिप्रंसकरोतिविक्रमं।राज्ञःसमरेष्वनिर्जितोदीर्घंचायु
रवाप्नुयाद्गजः।उदङ्मुखोबंधमुपैतिनागोयोर्थस्यवृद्धिंसकरोतिभ
र्तुःप्राप्नोतिपुष्टिंचिरजीवितांचसंग्रामकालेष्वपराजयंचेति।अन्यदि
ङ्मुखेऽनिष्टमाह॥दक्षिणदिग्वदनस्यचबंधोजीवितनाशकरोद्विरदः
स्यात्॥पश्चान्मुखोबंधमवाप्यनागोनित्यंभवेद्रोगनिपीडितांगः।ना
शंचवित्तस्यकरोतिराज्ञस्तस्मात्सयाम्यापरदिग्विवर्ज्यइति।बंधस्तं
भमानमाह॥विश्येशान्यांबंधनार्थंद्विपानांस्तंभोराज्ञःश्रेयसेदंतिनश्चे
ति॥अन्यदिश्यनिष्टं।तत्परिमाणमाह।ज्येष्ठोदशोच्चोनवमध्यमश्चस्तं
भोष्टहस्तःकथितःकनीयान्॥सर्वेनिखाताश्चतुरश्चहस्तामानाधिको
नाश्चशिवायनस्युः।गजानांमदजनकान्यौषधानितुहस्तिचिकित्सायां
द्रष्टव्यानीतिनेहप्रपंचितानि॥ इतिसपरिकरगजनिरूपणं॥ अथाश्व
लक्षणमुक्तंयोगयात्रायां॥दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्र
ताल्वोष्ठजिह्वःसूक्ष्मत्वक्केशवालःसुशफगतिमुखोह्रस्वकर्णोष्ठपु
च्छः॥जंघाजानूरुवृत्तःसितसितदशनश्चारुसंस्थानरूपोवाजीसर्वां
गशुद्धोभवतिनरपतेःशत्रुनाशायनित्यं॥कूटंललाटोर्ध्वभागः।त्रिकं
कटिप्रदेशः॥केशाःशरीरस्थिताबालाग्रीवापुच्छगताःगोबलीवर्द
न्यायेनपृथग्ग्रहणं॥जंघायांजानुनिवृत्तःमंडलाकारः॥समानिनिम्नोन्न
त्वरहितानि।सिताःश्वेताः।इष्टानिष्टमाह।उत्सर्गान्नशुभदमासनापरस्थं
वामेचज्वलनमतोपरंप्रशस्तं॥सर्वांगज्वलनमवृद्धिदंहयानांद्वेवर्षेद
हनकणाश्चधूपनंच॥अंतःपुरंनाशमुपैतिमेढ्रेकोशःक्षयंयातिसुदरेप्र
दीप्ते॥भूपस्यपायौचपराजयःस्यात्वक्रोत्तमांगज्वलनेजयश्च।स्कं

धांसनांसज्वलनंजयायवधायपादज्वलनंप्रदिष्टं।ललाटवक्षोसिभु
जेचधूमःपराभवायज्वलनंजयाय॥प्रहेषोयवसांभसांप्रपतनेस्वे
दोनिमित्ताहिनाकंपोवावदनाच्चरक्तपतनंधूमस्यवासंभवः॥अ
स्वप्नश्चविरोधतोनिशिदिवानिद्रालसध्यानतासादोधोमुखताति
चेष्टितमिदंनष्टंस्मृतंवाजिनां।हेषितपरीक्षामाहमिहिरः॥क्रौंचवद्रि
पुवधायहेषितंग्रीवयात्ववलयाच्चसोन्मुखं॥स्निग्धमुच्चमनुनादि
हृष्टवक्त्रासरुद्धवदनैश्चवाजिभिः॥पूर्णपात्रदधिविप्रदेवतागंधपुष्पफ
लकांचनादिवा॥द्रव्यमिष्टमथवापरंभवेद्धेषतांयदिसमीपतोजयः।
वामैश्चपादैरभिताडयंतोमहींप्रवासायभवंतिभर्तुः।संध्यासुदीप्ता
मवलोकयंतोहेषंतिचेद्धूपराजयाय॥आरोहतिक्षितिपतौविनयो
पपन्नोयात्रानुगोन्यतुरगंप्रतिहेषितंच॥वक्त्रेणवास्पृशतिदक्षिणमा
त्मपार्श्वयोश्वःसभर्तुरचिरात्प्रकरोतिलक्ष्मीं॥मुहुर्मुहुर्मूत्रशकृत्क
रोतिनताड्यमानोप्यनुलोमयायी॥अकार्यभीतोश्रुविलोचनश्चशिवं
नभर्तुस्तुरगोभिधत्ते।रथपतिलक्षणंलोकतएवज्ञेयं॥इत्यश्वादिलक्ष
णम्॥ ॥अथाभियोज्यनृपाः॥योगयात्रायां॥शब्दायतेमुहुरपिशिवागर्द
भध्वानतुल्यंत्यक्तस्नेहाःपरिजनसुहृत्वाहनोपस्करेषु।कष्टंकोनः
शरणमितिवावादिनोयस्यसैन्येविहृष्टावाप्रचुरक्षुरूक्षाःसोभियो
ज्योनृपेण॥कापोतकोलूकमधूनियस्यसमाश्रयंतेध्वजचामराणि
॥छत्रायुधादीनिचसोभियोज्योयस्याथवानाहततूर्यशब्दः॥प्रतीपग
त्वंसरितामिषोश्चशोषोथवाशोष्यजलाशयानां।अवारिदेशेसलि
लप्रवृत्तिरवैकृतंचाप्सुतरेच्छिलावा॥भंगपातचलनान्यनिमित्तंरो
दनानिचसुरप्रतिमानां॥अग्निरूपमनलेनविनाशानिश्चलानिचसं
प्रचलंति॥प्रसूतिवैकृत्यमकालपुष्पाण्यरण्यसत्त्वस्यपुरप्रवेशः॥
प्रदोषकालेकृकवाकुशब्दाहिमागमेचान्यभृतप्रलापः॥अन्यभृतो
किलः।दीर्घदीनंसंहताःसारमेयाःक्रोशंत्युच्चैर्नित्यमेवानृतौच॥इन्दु
घोषायोषितोनिर्घृणाश्चप्रेतःकाकोनक्तमिंद्रायुधंच॥अनृतौशर
त्कालादन्यत्र॥अनृतावितींद्रायुधेप्यन्वेति।अहातिरिक्तःपवनोति
चंडोगंधर्वसंज्ञस्यभवेत्पुरस्य।व्यक्तिर्भवेच्चाहनितारकाणांनकंप

तारागणसंप्रणाशः।एवंनिमित्तानियदाभवंतितदाभियोज्याःक्षिति
पेनदेशाः॥नीतिसारे।भेदंकुर्वीतयत्नेनमंत्र्यमात्यपुरोधसां॥तेषुभि
न्नेषुभेदेहियुवराजेतथोर्जिते॥अमात्योयुवराजश्चभुजावेतौम
हीपतेः॥मंत्रीनेत्रेहिभिन्नेस्मिन्नेकस्मिन्नपितद्विधः॥सर्वावस्थंहि
मेधावीनकुलीनंविकारयेत्॥तत्रोपजापःकर्त्तव्योयःकोपानुग्रहक्ष
मः॥आगतान्पूजयेत्स्वामीनिजांश्चपरिसांत्वयेत्॥भेदंकुर्वीतमतिमा
न्निगृहीतोबलीयसा॥दंडेनहिसमाहन्याद्विलारेःसंहतंबलं।भिन्नं
हितत्काष्ठमिवजंतुजग्धंविशीर्यते॥इतिभेदंनृपःकृत्वाततोयाया
द्विषोःपुरमिति॥एवंसामदामभयादिनाभेदंकृत्वेत्यर्थः।अथदूतप्रे
षणमाहकामन्दकः॥यातव्यायप्रहिणुयाद्दूतंदूत्याभिमानिनं।तंवि
शिनष्टि।प्रगल्भःस्मृतिमान्वाग्मीशास्त्रेचास्त्रेचनिष्ठितः॥अभ्यास
कर्माभिरतोदूतोभवितुमर्हति॥तत्त्रैविध्यमाह।निसृष्टार्थोमितार्थ
श्चतथाशासनवाहकः॥तत्रयोशिक्षितमेवदेशकालोचितंयथायो
ग्यमन्यस्याग्रेवदतिसनिसृष्टार्थः॥यथापांडवानांदूतोवासुदेवः॥
यावत्संदिष्टवक्तामितार्थः॥शासनहारःप्रसिद्धः।दूतंप्रत्याह।नावि
ज्ञातःपुरेशत्रोःप्रविशेच्चनसंसदि॥कालमीक्षेतकार्यार्थमनुज्ञातश्च
निष्पतेत्॥निष्पतेदुपविशेत्॥सारवत्तांचराष्ट्रस्यदुर्गतत्गुप्तिमेवच
॥छिद्रंचशत्रोर्विजानीयात्कोशमित्रबलानिच॥उद्यतेष्वपिशस्त्रेषुयथो
क्तंशासनंवदेत्॥रागापरागौजानीयात्प्रकृतीनांचभर्त्तरि॥फलेनना
म्नाद्रव्येणकर्मणाचमहीयसा॥कुर्याच्चतुर्विधंस्तोत्रंपक्षयोरुभयो
रपि॥तीर्थाश्रमपुरस्थानैःशास्त्रविज्ञानहेतुना॥उपात्तव्यंजनोपे
तैःस्वचरैःसहसंवदेत्॥प्रतापंकुलमैश्वर्यंत्यागमुत्थानसौष्ठवं॥
अक्षुद्रतांचदाक्ष्यंचभर्त्तुःसर्वत्रकीर्त्तयेत्॥सहेतानिष्टवचनंकामं
क्रोधंचवर्जयेत्॥वैतसीमाश्रयेद्वृत्तिंनान्यवृक्षाश्रितांसदा॥नान्यं
शयेन्नभावंस्वंवदेद्विद्यात्परस्यच॥भावमंतर्गतंगुप्तंसुप्तोमत्तश्च
भाषते॥तस्मादेकःस्वपेन्नित्यंस्त्रीमद्येचविवर्जयेत्॥राष्ट्रान्त्यं
तपालानांआत्मसात्करणंतथा॥युद्धापसारभूज्ञानंदूतकर्मेतिकथ्य
ते॥दूतेनैवनरेंद्रस्तुकुर्वीतारिविमर्षणं॥स्वपक्षेचविजानीयात्परदू

तविचेष्टितं॥ इदंकर्मनिसृष्टार्थस्यैव। चराउक्तानीतिसारे॥ तपस्वि
लिंगिनोधूर्त्तापण्यशिल्पोपजीविनः॥ चराश्चरेयुःसरितःपिबंतोजग
तांमनः॥ निर्गच्छेयुर्विशेयुश्चसर्ववार्त्ताविदोन्वहं। सूक्ष्मसूत्रंहि
चारेणपश्येद्विविधचेष्टितं॥ स्वपन्नपिहिजागर्त्तिचारचक्षुर्महीपतिः
॥विवस्वानिवतेजोभिर्नभस्वानिवचेष्टितैः। राजाचरैर्जगत्कृत्स्नं
व्याप्नुयाल्लोकसंमतेः॥ एतैर्नैयास्तुसंचाराःसर्वेनान्योन्यवेदिनः॥ प्रकाशश्चा
प्रकाशश्च चरस्तुद्विविधःस्मृतः। अप्रकाशोयमुद्दिष्टःप्रकाशोदूत
इष्यते॥ तथा॥ जडमूकांधबधिरोन्मत्ताःपंडकास्तथा। किरातावाम
नाःकुब्जास्तद्विधायेचकारवः। भिक्षुकाश्चारणादास्योनानाकार्य
कलाविदः॥ अंतःपुरगतांवार्त्तांआहरेयुरलक्षिताः॥ छत्रव्यजनभृं
गारयानवाहनधारिणां॥ महामात्राबहिर्वार्त्तांविद्युरन्येचसंगताः
॥सूदाव्यंजनकर्त्तारःकल्पकाःसूचिकास्तथा। प्रसाधकाभोजका
श्चगात्रसंवाहकाअपि॥ जलतांबूलकुसुमगंधभूषणदायकाः॥
कर्त्तव्यावशगाह्येतेयेचान्येन्यासवर्त्तिनः॥ इतिदूतचारप्रपंचः॥ ॥
अथप्रयाणेयोधस्वरूपमाहमिहिरः॥ बंध शूराःकृतास्त्रमहाकुलजाताः
स्वामिहिताबलिनःकृतज्ञाः॥ दृष्टगुणाबद्धवैमित्रानागकरोरुभुजाः
कठिनांगाः॥ व्याघ्रमृगेश्वरगोवृषनादाःश्येनदृशःशुकसन्निभ
नासाः। केकरजिह्मनिमीलितनेत्राःपुण्यकृतासमरेषुसहायाः देश
गुणैःप्रथिताश्चपुरोगास्तेबहवोगुण लक्षणलभ्याः॥ काकभृतो
भ्रुकुटीकृतवक्त्राधर्मभृतोविविधायुधहस्ताः। अथप्रयाणेविशेषो
योगयात्रायां॥ अंतःपुराद्वास्वनिवेशनाद्वासिंहासनादग्निपरीत्ता
द्वा॥ कुर्यान्नरेंद्रःप्रथमंप्रयाणंविप्रैःशतार्चैःकृतमंगलाशीः॥ द्विजो
विष्णुक्रमाद्रूपमंत्रेणानेनदापयेत्॥ इदंविष्णुर्विचक्रमइतिपादं
समुद्धरेत्॥ अमुकस्यवधायदक्षिणंक्षितिपोन्यसेत्। मंगलानित
तःपश्यन्स्पृशञ्छृण्वन्नृपोव्रजेत्॥ अथदर्शनशकुनं॥ वराहमि
हिरः॥ वाचःशुभाःसारसचाषबर्हिणःकादंबहंसाश्चसजीवजीवकाः
॥काकश्चपंकाक्तवराहपृष्ठगोश्रीवृक्षबालव्यजनानिचंदनम्॥ दधि
मधुघृतरोचनाकुमारीध्वजकनकांबुजभद्रपीठसिंहाः। सितवृष

कुसुमांबराणिमीनद्विजगणिकाभजनाश्चचारुवेषाः॥ज्वलितशिखि
फलाक्षतेक्षुभक्ष्यंद्विरदमृदंकुशचामरायुधानि॥मरकतकुरुविंदपद्म
रागाःस्फटिकमणिप्रमुखाश्चरत्नभेदाः॥स्वयमथ रचितान्ययत्नतोवा
पथियदिकथितानिभवंतिमंगलानि॥सजयतिसकलांततोधरित्रींग्र
हणहृगालंभनश्चैतेरूपास्यां॥इदंमंगलंप्रात्यंद्रष्टव्यंस्प्रष्टव्यंश्रोतव्यंचे
त्यर्थः।अनिष्टफलान्युक्तानितेनैव।कार्पासौषधकृष्णधान्यलवणसी
वास्थितैलंवशापंकांगारगुडाहिचर्मशकृतः केशायतंव्याधिताः। वां
तोन्मत्तजडेंधनास्तृणतुषक्षुत्क्षामतक्रारयोमुंडाभ्यक्तविमुक्तकेश
पतिताःकाषायिणश्चाशुभाः॥यानदिनेक्षौराभ्यंगवर्जनंतुज्योतिःशा
स्त्रेज्ञेयं।एवंमंगलामंगलभिन्नदर्शनाः निष्टनापीष्टलाभइतिज्ञेयं।देश
विशेषेविशेषमाह।छुछुंदरीशूकरिकाशिवाचश्यामारलापिंगलिका
न्यपुष्टा।वामाःप्रशस्तागृहगोधिकाचपुंसंज्ञकायेचपतत्रिणश्च।त
था॥श्येनोरुरुःपूर्णकुटःकपिश्चश्रीकर्णछिक्कारकपिप्पिकाजाः॥स्त्री
संज्ञितायेचशिखिद्विपौचयानेहितादक्षिणभागसंस्थाः॥आस्फोटिता
स्वेडितशंखतूर्यपुण्याहवेदध्वनिगीतशब्दाः॥वामाःप्रयाणेशुभद
नराणामाक्रंदितंदक्षिणतःपरेषां॥आस्फोटितंमल्लयुद्धं।आस्वेडितं
मुखशब्दः।भारद्वाज्यजबर्हिचाषनकुलाःसंकीर्त्तनाद्दर्शनात्क्रोशंतश्च
शुभप्रदानस्वरतोदृष्टःशिवायत्क्वचित्।गोधाशूकरजाहकादिशशकाः
पापारुतालोकनेधन्यंकीर्त्तनमृक्षवानरफलंतद्व्यत्ययाच्छोभनं॥नकु
लस्यमृगस्यपक्षिणांवामोदक्षिणभागसेचनं॥शुभदंश्वशृगालयोरि
दंव्यत्ययेनफलदंप्रशस्यते॥चाषोनकुलश्चवाम — गोदिवसार्द्धात्पर
तःशुभप्रदौ॥मृगवच्चवनेषुकुक्कुराःशतपत्रोस्तमयेचदक्षिणःक्वचि
दपवादमाह।निरुपहतमनोज्ञवृक्षसंस्थाःशुचिरुचिरावनिसंस्थसं
स्थिताश्च॥शुभतिथिदिवसर्क्षलग्नकालेष्वशुभफलोपिशुभप्रदःप्रदि
ष्टः॥प्रभग्नशुष्कद्रुमकंटकेषुश्मशानभस्मास्थितुषाकुलेषु।प्राकार
शून्यालयदुर्दशेषुसौम्योपिपापःशकुनःप्रकल्प्यः।तथा।द्वंद्वार्त्तरोग
र्दितभीतमत्तवैरार्त्तयुद्धामिषकांक्षिणश्च।सीमांतनद्यंतरिताश्चसर्वे
नचिंतनीयाःसदसत्फलेषु॥इतिप्राणिशकुनः॥अथाऽप्राणिनः।सएव।

रिक्तोनुकूलः कलशोजलार्थमभ्युद्यतः सिद्धिकरः प्रयाणे। विद्यार्थिनां चौर्यसमुत्थितानां वणिक्क्रियाभ्युद्यमिनामतीव। विशेषमाह। यानं धुरेणरहितं वृहताच कन्यागर्भेण चातिमहता पुरतः स्थिता स्त्री। आगच्छति प्रविश गच्छ सि वा किमर्थं शब्दः स्थिरश्च गमनं प्रतिषेधयंति। क्षुते आह। सर्वत्र पापक्षुतमुद्दिशंति गोस्तत्क्षुतं मृत्युकरं वियासोः॥ मार्जाररावस्खलनं च यातुर्वस्त्रस्य भंगश्च न शोभनाय॥ तथा॥ द्रव्याणि भुक्त्वा नितुरंगमश्च पूर्वेण याम्येन शवं च मांसं। पश्चात्कुमारी दधि चातिशस्तं सौम्येन गोब्राह्मणसाधवश्च। तथा। काकः शुभो दक्षिणतश्चशेषामन्येषु देशेषु विपर्ययेण॥ पूर्वदेशे दक्षिणः काकः शुभः। अन्यस्मिन्वामइत्यर्थः। तथा॥ क्रोशादूर्ध्वं शकुनविरुतं निष्फलं प्राहुरेके तत्रानिष्टे प्रथमशकुने मानयेत्संच षट्‌च॥ विज्ञेया मान्नृपतिरशुभे षोडशे वा द्वितीये प्रत्यागच्छेत्स्वभवनमिति यद्यनिष्टस्तृतीयः॥ प्रयाणे प्रथमं यत्र अशकुनं जातं तत्रैव स्थित्वा एकादश यामानतिवाहयेत्। पुनः प्रस्थाने पद्यशकुनं ततः षोडश। ततोप्यशकुने गृहे आगमनं। एवं शकुनानि ग्रहबलादीनिवीक्ष्य राजा स्वयं यायात्। स्वस्य ग्रहाद्यानुकूल्याभावे तद्वत्तं यशस्विनममात्यं जयार्थं प्रेषयेत्॥ यथोक्तं योगयात्रायां॥ शत्रोर्वधाय सचिवं शुभदैवयुक्तमाज्ञापयेन्नृपतिरात्मनि दैवहीने इति॥ ग्रहाद्यानुकूल्यं ज्योतिःशास्त्रादवगंतव्यं॥ अथ स्कंधावारस्थलं॥ नीतिसारे॥ यायाद्वैरिपुराभ्याशे भूभागे साधुसंमते॥ स्कंधावारविशेषज्ञः स्कंधावारं निवेशयेत्॥ भूमिप्रदेशे सामर्थ्यादगारमुपकल्पयेत्॥ गुप्तं स्वच्छं राकारं महाद्विपसमावृतं। पार्ष्णिग्राहेण शुद्धं चरथपत्तिसमावृतं॥ तन्मध्ये मानसाल्हादि महन्मौलबलावृतं॥ अंतःकोशग्रहोपेतं कारयेद्राजमंदिरं॥ मौलभूतश्रेणिसुहृद्द्विषाटविकं बलं॥ राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत्। अंते च गणिनः शूरानलुब्धकान्दुष्कर्मणः। पर्याप्तवेतनानाप्तान्मंडले विनिवेशयेत्॥ हस्तिनो लब्धनामानस्तुरंगास्तु मनोजवाः॥ गृहोपकंठे नृपतेर्वसेयुः स्वाप्तरक्षिताः॥ युद्धयोग्यो महामंत्री सन्नद्धः साध्वधिष्ठितः। तिष्ठेन्नरपतेर्द्वारि वेगवांश्च तुरंगमः॥ निशितान्यो बहिर्गच्छेद्गच्छेच्चेद्द्वारि वारितः॥ सज्जोपकरणं तिष्ठेत्सर्वः

कार्यास्तु खेजनः॥ तथा। बहिश्चरवातान्सु छन्नान्तृणैरुपरिसंवृता
न्॥ परसैन्यविघातार्थं सर्वां भूमिं विनाशयेत्॥ क्वचित्कंटकशाखाभिः
क्वचित्कीलैरयोमुखैः॥ दूषयेत्परितो भूमिं प्रच्छन्नैर्वैरैरपि॥ निगूढ
क्षुरपाषाणास्थाणुवल्मीकनिम्नतां। उत्तममध्यमभेदास्तत्रैव। यस्मि
न्देशे यथाकालं सैन्यव्यायामभूमयः। परस्य विपरीताश्च स्मृतो देशः स
उत्तमः॥ आत्मनश्च परेषां च तुल्यव्यायामभूमयः। यत्र मध्यम उद्दिष्टो
देशः शास्त्रार्थचिंतकैः॥ अरातिसैन्यव्यायामसुपर्याप्तमहीतलः। आत्म
नो विपरीतश्च स सर्वदेशोऽधमः स्मृतः। स्कंधावारं विशिनष्टि कामंदकः। दि
व्यांतरिक्षे रुत्या तैः पार्थिवैश्चाप्यदूषितः। नीचैः प्रवृत्तपवनोऽभृंगालीत
तमंगलः। हृष्टपुष्टजनः साधुः सुगंधिज्वलितानलः॥ इत्यादिलक्षणोपे
तः स्कंधावारः प्रशस्यते॥ शस्तेतस्मिन्द्विषो भंगो ज्ञेयोन्यस्मिन्विपर्य
यः॥ शकुनाद्युपेते जयो। शकुनाद्युपेते भंग इत्यर्थः॥ सेनापतिरुक्तो नी
तिसारे॥ कुलोद्भतं जानपदं मंत्रज्ञं मंत्रिसंमतं॥ दंडनीतेः प्रयोक्तारं अध्ये
तारं च यत्नतः॥ प्रभावोत्साहसंपन्नमाजीव्यमनुजीविनां॥ नित्याकार
णवैरापामकर्त्तारमनाविलं॥ श्रुतानुबंधिकर्माणमल्पामित्रं बहुश्रुतं।
गजाश्वरथचर्यासु शिक्षितं त्यागिनं स्वदं। युद्धभूमिविभागज्ञं सिंहवद्रू
ढविक्रमम्। अदीर्घसूत्रं निस्तंद्रममर्षणमनुद्धतं॥ २ हस्त्यश्वरथश
स्त्राणां स्व्यक्तलक्षणवेदिनं॥ देशभाषास्वभावज्ञं लिपिज्ञं सुदृढं स्मृतं
॥ निशाप्रचारकुशलं कुशलज्ञाननिश्चितं॥ दिग्देशमार्गविज्ञानसंपन्नं
तज्ज्ञसेवितं॥ क्षुत्पिपासाश्रमश्वासशीतवातोष्णवृष्टिभिः॥ अनाहित
भयग्लानिशत्रुपक्षभयावहं। भेत्तारं परसैन्यानां दुःसाध्याहितनिश्चयं
॥ भग्नानां च स्वसैन्यानां अवष्टंभस्य कारकं॥ चरदूतप्रचारज्ञं महारंभ
फलोपगं॥ शश्वत्तं सिद्धकर्माणं सिद्धिकर्मनिषेवितं॥ इत्यादिलक्ष
णोपेतं कुर्वीत ध्वजिनीपतिं॥ तस्य कृत्यमुक्तं॥ ध्वजिनीं च सदोद्युक्तः
सगोपायेद्दिवानिशं॥ नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत्। सेनापति
स्तत्र तत्र गच्छेद्व्यूहीकृतैर्बलैः। व्यूहस्तु मकरश्येनसूचीशकटवज्र
सर्वतोभद्रभेदात् षोढा॥ तेषां विनियोग उक्तो महाभारते। यायाद्व्यू
हेन महता मकरेण पुरोभये। श्येनेनोभयपक्षेण सूच्या वा धीरवक्रे

या॥पश्चाद्रूपेतुशकटंपार्श्वयोर्वज्रसंज्ञितं॥अन्येचगरुडादयो-
व्यूहभेदानोक्ताः।तेषामेष्वेवांतर्भावात्॥सर्वतःसर्वतोभद्रंभयेव्यू
हंप्रकल्पयेत्॥रचनोक्तानीतिसारे॥नायकःपुरतोयायात्प्रवीरपु
रुषावृतः।मध्येकलत्रंकोशश्च स्वामीफल्गुचयद्बलं॥नायकःसेना
पतिः।फल्गुअन्नादितद्रक्षणीयमित्यर्थः।पार्श्वयोरुभयोरश्वावाजिनां
पार्श्वयोरथाः।रथानांपार्श्वयोर्नागानागानांचाटवीबलं॥पश्चात्सेना
पतिःसर्वंपुरस्कृत्यकृतीबलं॥यायात्सन्नद्धसैन्यौघैःखिन्नांश्चाश्वास
यन्जनान्॥पूर्वंसेनापतेरग्रेयानमुक्तंअधुनापश्चाद्यानं।अतोज्ञाय
तेअग्रेयातापश्चाद्यातान्चेतिसेनापतिद्वयमिति॥१॥इतिसेनापतिव्यू
हनिरूपणं॥अथकूटयुद्धेनशत्रुमारणसमयउक्तोनीतिसारे॥दीर्घा
ध्वनिपरिश्रांतंक्षुत्पिपासाहितश्रमं॥व्याधिदुर्भिक्षमरकैःपीडितंद
स्युविद्रुतं।घोराग्निभयवित्रस्तंवृष्टिवातसमाहतं॥पंकपांसुजलं
स्कंधव्यस्तंश्वासातुरंतथा।प्रसुप्तंभोजनेव्यग्रमभूमिष्ठमसंस्थितं॥
एवमादिषुजातेषुव्यसनेनसमाकुलं॥स्वसैन्यंसाधुरक्षेत्परसैन्यं
चघातयेत्॥विशिष्टोदेशकालाभ्यांयुक्तःप्रकृतिभिर्बलैः।कुर्यात्प्रका
शयुद्धंचकूटयुद्धंविपर्यये॥कूटयुद्धंनामविषाक्तशस्त्रादिना घातनं
लोकेप्रसिद्धं।किंचिदुक्तंनीतिसारे॥पुरस्ताद्दृष्टमेदेशेपश्चाद्धन्यात्तु
वेगवान्॥जितमेवेत्यविश्वस्तंहन्याच्छत्रुंव्यपाश्रितः॥दिवसाभ्या
पिपरानीकमप्रमत्तोविनाशयेत्।अवस्कन्दभयाद्राजाप्रजागरकृ
तश्रमं॥दिवासुप्तंसमाहन्यान्निद्राव्याकुलसैनिकं॥प्रातःसंगवस
न्नद्धमपराह्णेविनाशयेत्॥निशिविस्रंभसंसुप्तंतत्सौप्तिकविधान
वित्॥इत्येवंकूटयुद्धेनहन्याच्छत्रूनलघूत्थितः॥वदंतिसत्रमित्या
दिसत्रवत्सप्रकीर्त्तितः।अरिनाशोमहीपानांनयशास्त्रविशारदः॥सा
धुप्रमत्तं व्यवसायवर्तीयेनप्रकारेणपरंनिहन्यात्॥चौरैःसमावेदि
ततत्सचारःशंकेततेनैवततोप्रमत्तः।नियतमितिनिहन्यात्कूटयुद्धे
षशत्रुंनहितिरयतिधर्मश्छद्मनाशत्रुनाशः।अचकितमिवसुप्तंपांडवा
नामनीकंनिशिसुनिशितशस्त्रोद्रौणस्तुजघान।अत्रब्राह्मणवर्जं
हन्यात्॥ब्राह्मणंतुस्वस्यवधार्थमायांतंनिवारयेत्॥यद्वानिवारणम

प्यपिकर्तुमशक्तस्तदाहन्यादेव॥ यथाहमनुः।गुरुंवाबालवृद्धौवाब्राह्म
णंवाबहुश्रुतं।आततायिनमायांतंहन्यादेवाविचारयन्।नाततायिवधे
दोषोहंतुर्भवतिकश्चनेति।कात्यायनोपि।आततायिनमायांतमपि
वेदांतगंरणे॥जिघांसंतंजिघांसीयान्नतेनब्रह्महाभवेदिति।अतोजि
घांसतएवविप्रस्यमारणंनस्तुतादेः॥अत्रविज्ञानेश्वरः।मनुवाक्येवा
शब्दात्कात्यायनवाक्येप्यपिशब्दान्नब्राह्मणवधेनासंयं।किंतेनाह
शोब्राह्मणोपिवध्यःकिमुतान्यइतिकैमुतिकन्यायेनेतादृशान्यवधप
रमित्याह।वस्तुतस्तुस्ववधोद्यतोब्राह्मणोपिवध्यएव॥पूर्वोक्तवचन
योःस्वार्थत्यागेःसाधारणमानाभावात्॥गालवस्तुअहननेदोषमा
ह।उद्यम्यशस्त्रमायांतंभ्रूणमप्याततायिनं॥निहत्यभ्रूणहानस्याद
हत्वाभ्रूणहाभवेदिति।आत्मघातीभवेदित्यर्थः।बृहस्पतिरपि॥स्वाध्या
यिनंकुलेजातंयोहन्यादाततायिनं॥अहत्वाभ्रूणहासस्यान्नहत्वाभ्रू
णहाभवेदिति।सर्वतएवात्मानंगोपायेदितिश्रुतिरपि।अतःस्ववधार्थ
मागच्छन्ब्राह्मणोवध्यः।परवधार्थंगच्छंस्तुस्वयंनवध्यइतितात्पर्यं।ए
नतरमेवबार्हस्पत्यं॥आततायिनमुत्कृष्टंवृत्तस्वाध्यायसंयुतं।योन
हन्याद्वधप्राप्तंसोश्वमेधफलंलभेदिति।एवमेवचंद्रिकाशयः।मनुधृ
ष्टद्युम्नस्यद्रोणवधेकुत्सनंकृतं॥नतुब्राह्मणवधनिमित्तमेवकिंतुन्य
स्तशस्त्रवधनिमित्तं॥तादृशस्यब्राह्मणस्यवधेऽन्यायेस्यपादोषातिप्र
यात्॥प्रजापीडनमुक्तंभारते।उपरुंधंतिराजानोभूतानिविविधानिच
॥तएवविजयंप्राप्यवर्द्धयंतिपुनःप्रजाः॥तथा।तावद्भुठेसीडयेच्चश
त्रोःप्रकृतयःस्वयं।वशेजातेपुनस्तासुपितृवद्वृत्तिमाचरेत्॥अथधर्मर
णमाहमनुः।समोत्तमाधमैराजात्वाहूतःपालयन्प्रजाः॥विनिवर्तेतसं
ग्रामात्क्षात्रधर्ममनुस्मरन्॥तथा॥आहवेषुमिथोन्योन्यंजिघांसंतोम
हीक्षितः॥युध्यमानाःपरंशक्त्यास्वर्गंयांत्यपराङ्मुखाः॥योधान्प्रत्यु
पदेशउक्तोवराह — मिहिरेण॥अभिजनयुतायूयंशौर्येजनाःकथयं
तिवोधनुषिपरशौशक्त्यांचक्रेतथैवकृतश्रमाः॥मयिचभवतामस्ति
स्नेहःकथंनजयोममद्विरदतुरगंस्यादाक्रांतंभवद्भिरिदंयदा॥तथापु
राणोपदेशैश्चतान्प्रवर्त्तयेत्॥तथाहि।ज्योतिष्टोमादियज्ञैःस्वर्गोवा

प्तिस्तत्रच ज्ञानाद्यनेकंसाधनंमहत्कष्टायाससाध्यं॥ तथोपासनायांपंचा
ग्न्यादितपस्सुचक्लेशादिकंस्पष्टमेव॥ योगोपिवायुन्निरोधनाहारनि
द्रान्यायामनिरोधनादिनादुःसाध्यएव॥ सर्वत्रचकीर्त्तनेष्कृतेपुण्य
क्षयः॥ अतःसर्वापेक्षयारणमरणमेवस्वल्पायाससाध्यंसाधीयः
॥ तत्रहि पापि नामपिस्वर्गःकिमुतान्यस्य। तदुक्तंयोगयात्रायां॥ द्वैपा
यनेनमुनिनामनुनाचधर्मायुद्धेषु ये निगदिताविदितास्तुतेवः॥ स्वा
म्यर्थगोद्विजहितेत्यजतांशरीरंलोकाभवंतिसुलभाविपुलंयशश्च।
तपस्विभिर्यासुचिरेणलभ्यतेप्रयत्नतःसत्रिभिरिज्ययाचया॥ व्रजंति
तामाशुगतिंमनस्विनोरणाश्वमेधेपशुतामुपागताः॥ स्वर्गस्यमा
र्गबहवःप्रदिष्टास्तेकृच्छ्रसाध्याःकुटिलाःसविघ्नाः॥ निमेषमात्रेणम
हाफलोयमृजुश्चपंथाःसमरेन्यसुत्वमित्यपि॥ तथा॥ संरक्ष्यमाणा
मपिनाशमुपैत्यवश्यंएतच्छरीरमपहायसुहृत्सुतार्थान्॥ तत्किंवंध
सुपतांसुहृशांसमक्षंकिंनिघ्नतःपरबलंभृकुटीमुखस्य॥ हातातमाते
तिचवेदनार्त्तःकिरनशक्नन्मूत्रकफानुलिप्तः॥ वरंमृतःकिंभवनेकिमा
जौ संदष्टदंतच्छदभीमवक्त्रः॥ तथा। यस्यतयोनजनाःकथयंतिनो
मरणंसमरेविजयंवा॥ नश्रुतदानमहाधनतावातस्यभवःकृमिकी
टसमानः॥ लोकोमुभस्तिष्ठतुतावदन्यःपराङ्मुखानांसमरेषुपुंसां
॥ पत्न्यो पितेषांनहि यामुखानिपुरस्सखीनामवलोकयंति॥ शत्रु
सैन्यमवदार्यवर्त्ततायत्सुखंतुकथयामि तादृशं॥ शृण्वतांस्वयश
सोपपल्लवान्दिग्वधूवदनकर्णपूरकान्॥ निपततिशिरसिद्विपस्य
सिंहःस्वतनुशताधिकमांसराशिमूर्त्तिः॥ पिबतिचतदसृङ्मदेष्टगं
धंवदनगतांश्चशनैःप्रमृज्यमुक्तान्॥ भारतेइंद्राबरीषसंवादे। इंद्रो
यत्तत्वेनरणवर्णनंकृत्वातन्मध्येयोमृतस्तस्यफलमाह। भर्तुरर्थेतुयः
शूरोविक्रमेद्वाहिनीमुखे॥ भयान्नविनिवर्त्तेततस्यलोकायथामम॥
यश्चनावेक्षतेकंचित्सहायंविजयेस्थितः। जीवग्राहंप्रगृण्हातितस्य
लोकायथामम॥ आहवेनिहतंशूरैर्नशोचेतकदाचन। अशोच्यो
हिहतःशूरःस्वर्गलोकेमहीयते॥ नह्यन्नंनोदकंतस्यनस्नानंनाप्य
शौचकं। हतस्यकर्त्तुमिच्छंतितस्यलोकान्शृणुष्वमे॥ वराप्सरस्स

हस्तानिशूरमायोधनेहतं॥त्वरमाणाःप्रधावंतिममभर्त्ताभवेदिति।एत
त्तपश्चपुण्यंचधर्मश्चैवसनातनः॥चत्वारआश्रमास्तस्ययोयुद्धेनप
लायते।तथा।नहिशौर्यात्परंकिंचित्त्रिषुलोकेषुविद्यते॥शूरःसर्वंपालय
तिसर्वंशूरेप्रतिष्ठितं॥चराणामचराअन्नंअदंष्ट्रादंष्ट्रिणामपि॥अपा
णयःपाणिमतामन्नंशूरस्यकातराः॥समानपृष्ठोदरपाणिपादाःप
श्चाच्छूरंभीरवोनुव्रजंति॥अतोभयार्त्ताःप्रणिपत्यभूयःकृत्वांजली
नुपतिष्ठंतिशूरान्॥योगयात्राणामपि॥रुचिमत्कुचबाहुपंजरेहरि
णाक्ष्यःप्रवरोरुपीडनं।रमयंतिविमानसंस्थिताःसुरवध्वोतिमुदा
रणार्चितान्॥एकतोस्यसुरसुंदरीजनःश्रीःप्रतीच्छतियुयुत्सतो
न्यतः॥पापघ्नाःसहपल्लयातेपश्चैकतःकुलकलंककारकं॥त
था।चित्रंकिमस्मिन्वदसाहसंवायत्त्वामिनार्थेगणयंतिनासून्॥
युद्धात्प्रणष्टोविदितोरिमध्येयद्दालिशस्तिष्ठतिसाहसंतत्॥नकेवलं
गात्रविभूषणानिक्षतानिशूरस्यरणेकृतानि।यशस्तरोर्मूलकृतिक्ष
तानितान्येवसर्वस्यविभूषणानि॥भंगेजातेप्रत्यावृत्तौफलातिशय
स्तत्रैव।भग्नेषुयोधेष्ववपूर्वशस्त्राण्याजौप्रवृत्ताव्यसवःकृतार्थाऊ
र्ध्वानानावाजिकृताश्वलोकास्तेषांविमानान्यवलोकयंति।अश्वमेधस्रा
तलोकेभ्योप्युत्तमंलोकंयांतीत्यर्थः।येश्वमेधोविहितःफलंवादैवै
र्द्विजैर्वाश्रुतिशास्त्रकारैः।तैरेवभंगेप्रतिलोमगस्यपदेपदेवाजिमखः
प्रदिष्टः॥संमूर्छितंसंयुगसंप्रहारैःपश्यंतिसुप्तप्रतिबुद्धतुल्यं॥आ
त्मानमंकेषुसुरांगनानांमंदाकिनीमारुतवीजितांगाः।यत्तुपराशर
वचनं॥द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ।परिव्राड्योगयुक्तश्च
रणेचाभिमुखंहतइति॥तत्रपरिव्राड्ग्रहणंतस्यापिमोक्षइतिकेचि
द्व्याचक्षते॥युक्तंतुतमेवविदित्वातिमृत्युमेतीत्यादिभिःश्रुतिभिर्मो
क्षंप्रतिसाधनत्वावगमाद्ग्रहणस्यचज्ञानसाधनत्वाभावेनज्ञानानु
त्पत्तेर्नमोक्षइति।यत्तुवचनंनतत्साधारण्येनरणस्यमोक्षफलंब्र
वीति॥योगयुक्तश्चेतिपदंयोगेजातेज्ञानोत्पत्तेःप्राक्मृतस्ययेलोका
स्तेरणमृतस्यभवंतीत्येतत्परत्वेनाप्युपपन्नंनरणमरणस्यमोक्षसा
धनत्वगमयति।योगस्यतुमुक्त्युपहेतुत्वमेतेनयोगःप्रयुक्तइतिसूत्रे

निरूपितमुत्तरमीमांसायां॥यत्तुकाशीमरणेनमोक्षइतितत्रापिनका-
शीमरणंसाधनंकिंतुज्ञानमेव॥ज्ञानंचविशिष्टगुरोःशिवस्योपदेशा
च्छीघ्रमेवजायतइति॥विस्तरस्तुविस्तरभियानेहप्रतन्यतइति
दिक्॥भगवद्गीतायामपिश्रीभगवतायुद्धमेवक्षत्रियस्योत्कृष्ट
मुक्तं।स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि॥धर्म्याद्धियुद्धाच्छ्रेयो
न्यत्क्षत्रियस्यनविद्यते।यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं॥
सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं॥अथचेत्त्वमिमंधर्म्यंसंग्रा
मंनकरिष्यसि॥ततःस्वधर्मंकीर्त्तिंचहित्वापापमवाप्स्यसि॥अकी-
र्त्तिंचापिभूतानिकथयिष्यंतितेऽव्ययां॥संभावितस्यचाकीर्त्तिर्मर-
णादतिरिच्यते॥भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः॥येषांचत्वंब
हुमतोभूत्वायास्यसिलाघवं।अवाच्यवादांश्चबहून्वदिष्यंतितवा
हिताः।निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं।हतोवाप्राप्स्यसिस्व
र्गंजित्वावाभोक्ष्यसेमहीं।तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयइ
ति।तथाविशेषोभारते।गजोगजेनयातव्यस्तुरगेणतुरंगमः।रथि
नाचरथीयोज्यःपत्तिनापत्तिरेवच॥यथायोग्यंतुसंयोज्यघ्नन्धर्मे
णनहीयते॥एवमसंभवेप्रकारउक्तःकामंदकेन॥अश्वस्यप्रतियोद्धा
रोभवंतिपुरुषास्त्रयः॥प्रतिकल्प्यास्तुपंचाश्वाविधेयाःकुंजरस्यचेति
।पलायनेदोषमाहमनुः।यस्तुभीतःपरावृत्तःसंग्रामेहन्यतेपरैः।यत्किं
चिद्दुष्कृतंभर्तुस्तत्सर्वंप्रतिपद्यते॥यच्चास्यसुकृतंकिंचिदमुत्रार्थमु
पार्जितं॥भर्तातत्सर्वमादत्तेपरावृत्तहतस्यच॥उपदेशोयोगयात्रायां।
जीवतोपिनिहतस्यवारणेधर्मएवहिनरस्ययुध्यतः॥निश्चयात्तुमरणं
हिसंगरेनैवभीरुरजरामरःक्वचित्॥मानमात्रमवलंब्ययुध्यतेकीट
कोथविहगोथवापशुः॥कोहिनामपुरुषस्त्यजेद्रणंस्वर्गमानसुख
कीर्त्तिविनदं॥नारायणोपि॥यदिसमरमपास्यनास्तिमृत्योर्भयमि
तियुक्तमितोन्यतःप्रयातुं॥अथमरणमवश्यमेवजंतोःकिमितिमुधा
मलिनंयशःकुरुध्वमिति।अवध्यानाहमनुः।नचहन्यात्स्थलारू
ढंनक्लीबंनकृतांजलिं।नमुक्तकेशमासीनंनतवास्मीतिवादिनं।नसु
प्तंनविसन्नाहंननग्नंननिरायुधं।नायुध्यमानंपश्यंतंनपरेणसमागतं

नभीतंनपराावृत्तंसतांधर्ममनुस्मरन्।राजधर्मेषु।वृद्धोबालोनहंतव्यो
नैवस्त्रीनैवचद्विजः॥तृणपूर्णमुखश्चैवतवास्मीतिचयोवदेत्॥शंखः।
नपानीयंपिबंतंनभुंजानंनोपानहौप्रमुंचंतंनावर्माणंसवर्मानस्त्रियंन
करेणुंनवाजिनंनसारथिंनदूतंनब्राह्मणंनराजानमराजाहन्यात्।र
णेचदानमुक्तंनीतिसारे।प्रत्यग्रेकर्मणिकृतेश्लाघमानःकृतादरः।यो
धेभ्यस्तुततोदद्यात्कोहिदातुर्नयुध्यते॥तथा॥रूप्यंहेमचकुप्यंयोयोयज्ज
पतितस्यतत्।दद्याद्धस्त्वनुरूपंचहृष्टोयोधान्प्रहर्षयन्निति॥इतिवीरो
त्साहगर्भंधर्मयुद्धं॥एवंराजापरराष्ट्रंविजित्यतास्वप्रजाःपितृवत्पा
लयेत्॥तच्चोक्तंपूर्वमेव॥अथवीरोत्साहगर्भोनिंदापरिहारः॥भारते।यु
धिष्ठिरप्रश्नोभीष्मंप्रति॥क्षत्रधर्मान्न पापीयान्धर्मोस्तिभरतर्षभ॥
अभियानेचयुद्धेचराजाहंतिमहाजनं॥अथस्मकर्मणाकेनलोकाञ्ज
यतिपार्थिवः॥विद्वन्जिज्ञासमानायप्रब्रूहिभरतर्षभ।निग्रहेणचपापा
नांसाध्वनुग्रहणेनच॥यज्ञैर्दानैश्चराजानोभवंतिशुचयोमलाः॥उ
परुंधंतिराजानोभूतानिविजयार्थिनः॥तएवविजयंप्राप्यवर्द्धयंतिपुनः
प्रजाः॥अपविध्यंतिपापानिदानयज्ञतपोबलैः॥अनुग्रहेणभूतानां
पुण्यमेषांविवर्द्धते।एवंशस्त्राणिमुंचंतोघ्नंतिवध्याननेकधा॥तस्यैषा
निष्कृतिर्दृष्टाभूतानांभावनंपुनः।योभूतानिधनाज्ज्यावधात्क्लेशा
च्चरक्षति।दस्युभ्यःप्राणदानाच्चसधर्मःसुखदोविराट्।ससर्वयज्ञैरी
जानोराजाथाभयदक्षिणः॥अनुभूयेहभद्राणिप्राप्नोतींद्रसलोकतां
॥ब्राह्मणार्थेसमुत्पन्नेयोभिनिःसृत्ययुध्यते।आत्मानंयूपमुत्सृज्यस
यज्ञोनंतदक्षिणः॥आभीतोविकिरन्शत्रून्प्रतिगृण्हन्शरांस्तथा।
नतस्मात्रिदशाःश्रेयोभुविपश्यंतिकिंचन॥यस्ययावंतिशस्त्राणितनुं
भिंदंतिसंयुगे॥तावतःसोश्नुतेलोकान्सर्वान्कामदुघोक्षयान्।यद
स्यरुधिरंगात्राद्दाहवेषुप्रवर्त्तते॥सहतेनैवरक्तेनसर्वपापैःप्रमुच्य
ते॥यानिदुःखानिसहतेव्रणानामभिपातने॥नतपोभिस्ततोभूयइतिध
र्मविदोविदुः॥तथा।पतत्यभिमुखःशूरःपराङ्भीतःपलायते॥आस्थाय
स्वर्ग्यमध्वानंसहायान्विषमेत्यजेत्॥मास्मतांस्ताद्दशांस्तातभरिष्ठाः
पुरुषाधमान्।येसहायान्रणेहित्वास्वस्तिमंतोगृहान्ययुः॥अस्वस्ति

तस्मै कुर्वंतिदेवाइंद्रपुरोगमाः॥त्यागेनयःसहायानांस्वप्राणांस्त्रातु
मिच्छति॥संहन्युःकाष्ठलोष्टैर्वादेहेयुर्वाकटाग्निना॥पशुवन्मारयेयु
र्वाक्षत्रियायेऽत्वनीदृशाः॥अनीदृशाःअभीरवःशूराइत्यर्थः।अधर्मःक्ष
त्रियस्यैषयच्छय्यामरणंभवेत्॥विसृजन्श्लेष्मपित्तानिकृपणंपरिदे
वयन्॥अविक्षतेनदेहेनप्रलयंयोधिगच्छति॥क्षत्रियोनास्यतत्कर्मप्रशं
संतिपुराविदः॥नगृहेमरणंतातक्षत्रियाणांप्रवर्त्तते॥शौंडीराणामशौं
डीरमधर्म्यंकृपणंचयत्।रणेषुकदनंकृत्वाज्ञातिभिःपरिवारितः॥ती
क्ष्णैःशस्त्रैःसुनिर्भिन्नःक्षत्रियोवधमर्हति।शूरोहिसत्वमन्युभ्यामावि
ष्टोयुद्ध्यतेभृशं।कृत्यमानानिगात्राणिपरैर्नैवावबुध्यते।ससंख्येनि
धनंप्राप्यप्रशस्तंलोकपूजितं॥स्वधर्मंविपुलंप्राप्यशक्रस्यैतिसलोक
तां॥यत्रतत्रहतःशूरःशत्रुभिःपरिवारितः॥अक्षयान्लभतेलोकान्
यदिदैन्यंनभाषते॥इतिवीरोत्साहगर्भोविचिकित्सापरिहारः॥अथ
क्रीडा॥नृपाहतांराजनीतिमुक्त्वाशंकरनंदनः॥श्रीनीलकंठोवदतिक्री
डांबुद्धिबलाश्रितां॥पटेफलेवाभुविवाप्यकार्यंप्रागग्रेरवानवकंतथै
व॥उदग्दिगग्रंनवकंसमानमेवंचतुःषष्टिपदंहितत्स्यात्॥१॥कोणे
ष्वथोहंसपदैस्तदंकयेतत्पंक्तिगंदिक्षुपदद्वयंद्वयं॥मध्येचतुष्कंच
समंक्रयतत्रस्थाप्यंचसांग्रामिकसैन्ययुग्मं॥२॥अंत्येष्वष्टपदेषुमध्य
पदयोराजाचमंत्रीतयोरुष्ट्रौपार्श्वगतौतयोरपितथाश्वाहौतयोर्दंति
नौ॥तद्वग्राधरपंक्तिगावसुमितास्थाप्याबुधैःपत्तयःस्थाप्यंचाप्यपर
त्रसैन्यमुभयंचैवंरणायोद्यतं॥४॥राजादिक्षुविदिक्षुचाष्टपदगोमंत्रीविदिक्ष्वा
व्रगश्चैकैकंकरभस्त्वथंखलतयामध्यंविहायापरं॥वाजीदिक्पद
तोविदिग्गतपदेष्वष्टस्वथोकुंजरःपंक्तौसर्वपदेष्ववक्रगतिमान्प
त्तिःपुरोगच्छति॥५॥एकैकंविनिहंतिवक्रगमनेनैवंपरेचांतिमेप्रा
प्तोमंत्रिविदेषजायतइतौवृत्तःपदेपूर्वगे॥अंतेहंसपदेसचेदुपग
तस्तत्रैवमंत्रीभवेन्नोपूर्वंपरिवर्त्तनेनकथितामाषेहसम्यक्क्रम
त॥अनावृत्तिपरावृत्तिभिदाक्रीडाद्विधेष्यते।पदतत्स्थाप्यभेदेन
तत्राप्याद्याद्विधामता॥६॥सचिवाग्रगतौततःपदातीसविधौताव
तुतत्रचालनीयौ॥पदयुग्ममितीहसंप्रदायःपदगोन्योपिपरैःप्रव

त्यैनेव॥७॥गतागते ह्रयोष्ट्र्योर्नेचांतरानिवर्त्तकः॥पुरःस्थिताह्यपादयो
गजस्यते निवर्त्तकं॥मंत्रिणःपृष्ठकोणस्थौस्याप्यौपत्तीस्थिरावुभौ॥तथाऽ
मेलकस्यापि पश्चात्त्तुं खलुगावुभौ॥९॥व्यूहद्वयमिदंचक्रव्यूहवत्सरपा
रणं॥द्वित्रिप्रकारोथमनंतु रोरवशंप्रकीर्त्तितः॥१०॥परस्यराज्ञोभिमुखंद्वि
पंसंस्थाप्य मध्यतः॥स्वीयान्यस्यापसरणात्कोटीशःसप्रकीर्त्तितः॥११॥
नसांग्रामिकःकोपिसंस्थापनीयोविनासंश्रयंसंश्रयोनीचइष्टः॥नवैसंश्र
योभूपतेरन्यइष्टोनवामारणंभूपतेस्त्विष्टमेव॥संरोधनंराजजयोमतोत्रत
दृद्धैर्नैकाकितयाप्रदिष्टा॥साचेच्चतुःषष्टिमिताक्रमेणस्युर्यस्यसोप्यत्रपरा
जितःस्यात्॥राजाविरुद्ध — शयुतोनचेत्स्यात्नचास्यपक्षेगतिमान्द्वि
तीयः॥प्रमापयेत्सोथविपक्षपक्षेसमीपगंस्वस्यनिरोधनक्षमं॥निरुध्य
मानस्यनृपस्यसार्धंशिष्येतयद्येकतरस्तदैव॥तत्क्रीडकःसंगणयेत्सती
यांस्तेष्वात्मनोह्यवयवानान्द्विनिघ्नान्॥कृत्वातदंकान्गणयेत्सतीपक्रीडा
श्चतुःषष्टिमिताःसहीनः॥तन्मध्यएवास्यपराजयःस्यात्ततोधिकोसौवि
परीतकश्च॥१६॥अथाश्वस्यचतुःषष्टिपदगमनप्रकारः॥सिंहलद्वीपरातः
श्लोकौ॥सिंनहीवनिवप्रत्तापाकंश्रीरेमनोविल॥वाहलशमहुनंतंतिमेप
तुणपधाजिकु॥श्रीसिंहणमहीपालमेधाविकुलकंबहु॥णदेनवाजिनो
ज्ञानंचलनंप्रतिवेश्मनि॥अत्रचतुःषष्टिपदंमंडलंकृत्वातत्रनैर्ऋती
मारभ्यसिं नहीत्यादिश्लोकाक्षराणिलिखित्वापुनस्तान्येवेशानीतो
लिखित्वाश्रीसिंहणेत्यादिश्लोकाक्षराणिवाचयन्नश्वंनयेत्॥इति॥अ
थनानचरणानांश्लोकौ॥निनाशंत्रिशमेजंक्षकलुक्ष्मभिपणाश्वसारावि
रोतिषभूरानिवाश्ववेह्राषिहंयगे॥नारायणाव्हरामेशभूजनिःश्रुतिसद्म
नि॥निनायशंकरोवाहंस्वगेहात्सत्रिषष्टिमित्॥अथमायकःप्रकारः॥त्र्या
यंवस्वेकमष्टीद्वशिखिविधुपदंवन्हिजंनंदिसंज्ञंनंदैकंपंचयुग्मंशरहर
नयनंस्वाश्वयुगंत्रित्रियुक्तं॥अश्वद्विव्योमचंद्रंयुगमितमुडुराडक्षिषड्द्वित्रि
पंचोपांत्येवस्वब्धिभूमिज्वलनमुदधिकुद्वेरदंत्रिद्विषष्ठं॥षट्चंद्रंनेत्रयुग्मं
मुनिजमुदधिद्वंद्वंरवन्याशुगाब्धिव्योमलब्धीषुवेत्थंपुनरयनयदित्तोवा
जिनंनीलकंठः॥इतिश्रीजगद्गुरुनारायणभट्ट सूरिसूनुपंडितशिरोरत्नमी
मांसाद्वैतसाम्राज्यधुरंधरभट्टशंकरात्मजभट्टरंगनाथदामोदरनृसिंहानु

जभट्टनीलकण्ठेनकृते भास्करे नीतिमयूखः समाप्तः ॥ ७ ॥ ७ ॥

अथनीतिमयूखस्यसूचीपत्रम्।

इतिसूचीपत्रम्।

अथसंस्कारमयूखःप्रारभ्यते॥

श्रीगणेशायनमः॥यतःसर्वंविश्वंभजतिजनिसत्तालयमिदंयआत्मासर्व
गांस्थिरचरजडानामपिविभुः॥तमेतंभास्वंतंविधिहरिमहेशानवपुषंन
मस्यामःकामंपरमकमनीयंसुकृतिनां॥श्रीभास्करंशिवकरंसहस्राप्र
णम्यश्रीनीलकंठपितरंजननींचगंगां॥तत्पादचिंतनबलोबुधशंकराख्यः
संस्कारभास्करममुंवितनोतिकाश्यां॥ ॥तत्रास्यधर्मप्रमाणविवेचक
त्वात्प्रथमंधर्मप्रमाणान्युच्यंते॥तान्याहयाज्ञवल्क्यः॥श्रुतिःस्मृतिः
सदाचारःस्वस्यचप्रियमात्मनः।सम्यक्संकल्पजःकामोधर्ममूलमि
दंस्मृतमिति॥सदाचारःश्रुतिस्मृत्यविरुद्धोऽदृष्टार्थोवसंतोत्सवादिः
धर्मेमूलंप्रमाणमित्यर्थः।सम्यक्संकल्पाज्जातःकामोयथाभोजन
व्यतिरेकेणजलंनपातव्यमिति॥एतेषांचविरोधेपूर्वंपूर्वंबलीयः॥त
थाचप्रयोगपारिजातेसंग्रहे।श्रुतिस्मृतिपुराणेषुविरुद्धेषुपरस्परं।पूर्वं
पूर्वंबलीयस्यादितिन्यायविदोविदुः॥स्मृतिष्वपिमनुस्मृतिःप्रबलेति॥
तथाचांगिराः॥मन्वर्थविपरीतातुयास्मृतिःसाविनश्यतीति।अनादर
णीयेत्यर्थः।तथामनोर्ऋचःसामिधेन्योभवंतीत्यस्यवाक्यशेषेश्रूयते।य
द्वैकिंचमनुरवदत्तद्भेषजमिति।स्मृतिप्रवर्तकाउक्तायाज्ञवल्क्येन॥म
न्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोगिराः॥यमापस्तंबसंवर्ताःका
त्यायनबृहस्पती।पराशरव्यासशंखलिखितादक्षगौतमौ।शातात
पोवसिष्ठश्चधर्मशास्त्रप्रवर्तकाइति।अन्येप्युक्ताःपैठीनसिना।तेषां
मन्वंगिरोव्यासगौतमात्र्युशनोयमाः।वसिष्ठदक्षसंवर्तशातातपपरा
शराः।विष्ण्वापस्तंबहारीताःशंखःकात्यायनोगुरुः।प्रचेतानारदोयो
गीबौधायनपितामहौ।सुमंतुकाश्यपोबभ्रुःपैठीनोव्याघ्रएवच।स
त्यव्रतोभरद्वाजोगार्ग्यःकात्यायनस्तथा।जाबालिर्जमदग्निश्चलोगा
क्षिर्ब्रह्मसंभवः।इतिधर्मप्रणेतारःषट्त्रिंशदृषयःस्मृताः।षट्त्रिंशदि
तिनपरिसंख्या।तेनविश्वामित्रादीनामपिधर्मप्रणेतृत्वंसिद्धं।एवमापु
वैदादीनामपिस्मृतित्वं।तत्रकेचनदृष्टमूलाःकेचनश्रुतिमूलाअर्थाः॥

एवंपुराणादीनामपि।अस्माभिस्तुप्रामाणिकानांवराहमिहिरादीनांव
चांसिप्रमाणत्वेनोपन्यस्यंते।संहिताउक्ताहेमाद्रौभविष्यत्पुराणे॥भार्ग
वानारदीयाचबार्हस्पत्यांगिरस्यपि।स्वायंभुवस्यशास्त्रस्यचतस्रःसं
हितामताः।यत्तुसूतसंहितायां।आद्यासनत्कुमारोक्ताद्वितीयासूतसं
हिता।तृतीयाशांकरीविप्राश्चतुर्थीवैष्णवीमता॥तस्मात्संहिताब्रा
ह्मीसौरीत्यासंहितातथेतिसंहिताउक्तास्ताःस्कांदांतर्गतानस्वतंत्राः
अन्येपिसंहिताकर्त्तारःकश्यपेनगणिताः।सूर्यःपितामहोव्यासोवसि
ष्ठोत्रिःपराशरः।कश्यपोनारदोगर्गोमरीचिर्मनुरंगिराः।रोमशःपौल
शिश्चैवच्यवनोयवनोभृगुः।शौनकोष्टादशैवैतेज्योतिःशास्त्रप्रवर्त्त
काइति॥संहितालक्षणंच॥आदौशास्त्रोपनयनंखेटचारोब्दलक्षणं।
तिथिवारसनक्षत्रयोगतिथ्यर्द्धलक्षणं॥मुहूर्तोपग्रहःसूर्यसंक्रांति
र्गोचरक्रमः॥चंद्रताराबलंचैवक्रियाषोडशकर्मणां।नृपाभिषेचनंदेव
प्रतिष्ठासद्मलक्षणं॥अग्न्याधानंमेघगर्भनिखिलोत्पातलक्षणं।तत्
स्कंधेतिमिश्रकाध्यायस्तृतीयस्कंधसंभवः।तृतीयःस्कंधःसंहिता।सं
भवोरचना॥महापुराणान्युक्तानिवैष्णवे।ब्राह्मंपाद्मंवैष्णवंचशैवंभा
गवतंतथा।तथान्यंनारदीयंचमार्कंडेयंचसप्तमं॥आग्नेयमष्टमंचैव
भविष्यंनवमंतथा।दशमंब्रह्मवैवर्त्तंलैंगमेकादशंस्मृतं॥वाराहंद्वाद
शंचैवस्कांदंचात्रत्रयोदशं॥चतुर्दशंवामनंचकौर्मंपंचदशंस्मृतं।मात्स्यं
चगारुडंचैवब्रह्मांडंचततःपरं॥अष्टादशपुराणानिकीर्त्तितानिमयात
वेति।उपपुराणानिकौर्मे।अन्यान्यपिपुराणानिमुनिभिःकथितानितु।आ
द्यंसनत्कुमारोक्तंनरसिंहमतःपरं॥तृतीयंनारदमुद्दिष्टंकुमारेणतुभाषितं
॥दुर्वाससोक्तमाश्चर्यंनारदोक्तमतःपरं।कापिलंमानवंचैवतथैवोशन
सेरितं।ब्रह्मांडंवारुणंचैवकालिकाह्वयमेवच॥माहेश्वरंतथासांबं
सौरंसर्वार्थसंचयम्॥पराशरोक्तंप्रथमंतथाभागवताह्वयम्॥इद
मष्टादशंप्रोक्तंपुराणंकौर्ममुत्तमम्॥ ॥महापुराणमध्येगणितानाम
पिउपपुराणेष्वनुगणनायांनकोपिविरोधः।एकस्यैवोभयसंज्ञाकरणे
विरोधाभावात्॥इत्युपपुराणानि॥धर्मलक्षणंजैमिनिराह॥चोदना
लक्षणोर्थोधर्मः।विधिश्चोदनाशब्देनोच्यते।तत्प्रमाणकइत्यर्थः॥ध

र्मोधर्मयोरुपादानपरित्यागावुक्तौस्कांदे॥धर्माद्राज्यं धनंसौख्यमधर्माद्दुः
खसंभवः।तस्माद्धर्मंसुखार्थायकुर्यात्पापंविसर्जयेत्।धर्मेणपापमपनु
दतीतिचश्रुतिः॥धर्मश्चद्विविधः।श्रौतःस्मार्तश्च।श्रौतोग्निहोत्रज्योतिष्टो
मादिः।स्मार्तोऽष्टकादिः।अस्मिंश्चग्रंथेस्मार्तधर्मःक्रियते॥अथदेशाः।वि
ष्णुपुराणे।उत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणं।वर्षंतद्भारतंनामभारती
यत्रसंततिः।अत्रजन्मसहस्राणांसहस्रैरपिसत्तम॥कदाचिल्लभतेजंतु
र्मानुष्यंपुण्यसंचयात्।मनुः।आसमुद्रात्तुवैपूर्वादासमुद्रात्तुपश्चिमात्॥
तयोरेवांतरंगिर्योरार्यावर्तंविदुर्बुधाः।तयोर्हिमवद्विंध्ययोः।विष्णुर्विशे
षमाह।चातुर्वर्ण्यव्यवस्थानंयस्मिन्देशेनविद्यते॥तंम्लेच्छदेशंजानीयादा
र्यावर्तमतःपरं।मनुः।कृष्णसारस्तुचरतिमृगोयत्रस्वभावतः।सज्ञेयो
यज्ञियोदेशोम्लेच्छदेशस्ततःपरः॥तथा॥सरस्वतीदृषद्वत्योर्देवनद्योर्य
दंतरं।तंदेवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते।तथा॥हिमवद्विंध्ययोर्मध्ये
यःप्राग्विनशनादपि॥प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्तितः।विनशनं
सरस्वत्याः।तथा॥कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनिकाः।एषः
ब्रह्मर्षिदेशोवैब्रह्मावर्तादनंतरः।एतान्द्विजातयोदेशान्संश्रयेयुःप्रय
त्नतः।शूद्रस्तुयस्मिन्कस्मिन्वानिवसेद्वृत्तिकर्षितः।एषधर्मस्यवैयोनिः
समासात्कथितःकिल॥सर्वपापहरःपुण्यसाधनंसर्वकर्मणां॥अनंतर
ईषन्न्यूनः।मत्स्याविराटदेशाः।पंचालाःकान्यकुब्जदेशाः।शूरसेनि
कामथुरादेशाः॥व्यासः॥सर्वेशिलोच्चयाःपुण्याःसागराःसरितस्तथा॥अ
रण्यानिचपुण्यानिविशेषान्नैमिषंतथा।तथा।आर्यावर्तेसमुत्पन्नोद्वि
जोवायदिवाद्विजः।कर्मदांसिंधुपारंचकरतोयान्नलंघयेत्।आर्यावर्तम
तिक्रम्यविनातीर्थक्रियांद्विजः।आज्ञांचैवतथापित्रोरैंदवेनविशुद्ध्यतीति
॥इतिनिबंधोपयोगिविचारः॥ ॥अथसंस्कारोपयोगिविनायकपूज
नस्वस्तिवाचनाद्युच्यते।गृह्यपरिशिष्टे।आदौविनायकःपूज्यअंतेतु
कुलदेवताः।तथा।अथस्वस्तिवाचनमृद्धिपूर्तेषुकर्मसुविवाहांतादप
त्यसंस्काराःप्रतिष्ठोद्यापनेपूर्तेकर्मणश्चाद्यंतयोःकुर्यादिति।शौनकः।
पुण्याहवाचनविधिंवक्ष्याम्यथयथाविधि।प्रयोक्तुःकर्मणांचादावंते
चोदयसिद्धयइति।व्यासः।संपूज्यगंधमाल्याद्यैर्ब्राह्मणान्स्वस्तिवाचयेत्

त्।।धर्मकर्मणिमांगल्येसंग्रामेऽद्भुतदर्शने। तच्चप्रधानप्रयोगांतर्गतमितिके
चित्।।प्रयोगबहिर्भूतमितितुबहवः। तत्राद्येप्रधानसंकल्पेकृत्वातत्कार्यं
।।द्वितीयेतुतत्कृत्वाप्रधानसंकल्पइतिप्रयोगरत्ने भट्टचरणाः।कर्मप्रदी
पे।कर्मादिषुचसर्वत्रमातरःसगणाधिपाः। पूजनीयाःप्रयत्नेनपूजिताःपू
जयंतिताः।।प्रतिमासुचशुभ्रासुलिखित्वावापटादिषु। अपिवाक्षतपुंजेषु
नैवेद्यैश्चपृथग्विधैः।कुड्यलग्नांवसोर्धाराःसप्तवारंघृतेनतु। कारयेत्पं
चधारावानातिनीचानचोच्छ्रिता। आयुष्याणिचशांत्यर्थंजप्त्वातत्र
समाहितः।।षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदिति।।मातरो
गौर्यादयःषोडश।वसोर्धारादेवताब्राह्मीमाहेश्वरीत्याद्याःसप्तस्मृत्यं
तरप्रसिद्धाज्ञेयाः।षड्भ्यइतिकातीयच्छंदोगपरं। अन्येषांतुनवदैवतं
।महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच।।नवदैवतमत्रेष्टंशेषंषाट्
पौरुषंविदुरितिहेमाद्रौवचनादितितातचरणाः।ममतुप्रतिभाति।म
हालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच। तेयंद्वादशदैवत्यंतीर्थेप्रोष्ठपदे
सुचेतिद्वादशदैवत्यविधानात्पक्षत्रयमपियथासंप्रदायंव्यवतिष्ठ
तइति। नांदीश्राद्धनिमित्तान्याह।लौगाक्षिः। नामान्नचौलगोदानसीमो
पनयपुंसवे। स्नानाधानविवाहेषुनांदीश्राद्धंविधीयते। वृद्धगार्ग्यः।अ
ग्न्याधानाभिषेकादिष्विष्टापूर्तेक्रियाकृतौ। वृद्धिश्राद्धंप्रकुर्वीतआ
श्रमग्रहणेतथेति। विष्णुपुराणेपि। कन्यापुत्रविवाहेषुप्रवेशेनववे
श्मनः।नामकर्मणिबालानांचूडाकर्मणिकेतथा।सीमंतोन्नयनेचैवपु
त्रादिमुखदर्शने।।नांदीमुखंपितृगणमर्चयेत्प्रयतोगृही।।तथा।जा
तस्यजातकर्मादिक्रियाकांडमशेषतः।पुत्रस्यकुर्वीतपिताश्राद्धंचा
भ्युदयात्मकं।जातकर्मादिक्रियाकांडमपत्यसंस्काराः।पुत्रस्येतिपुं
स्त्वमविवक्षितमनुवाद्यविशेषणत्वात्।तेनकन्याया अपिसंस्कारां
गमाभ्युदयिकंसमंत्रकमेवभवति।मंत्रबाधमानाभावात्।।यत्तु
जातकर्मादिसंस्कारान् उक्त्वायाज्ञवल्क्यवचः।तूष्णीमेताःक्रियाः
स्त्रीणांविवाहस्तुसमंत्रकइतितत्प्रधानांगमंत्रबाधपरं।यदिहिअ
स्त्ववभृथेनचरंतीतितत्तीयांतेनवसांगभावनामुक्त्वातस्यांतूष्णींत्वं
विधीयेततदास्यादंगभूतमंत्रबाधः।इहतुपत्न्याश्चर्वणेवैकाम्याइत्य

त्वाउपांशुकर्त्तव्याइत्यत्रेष्टीनामिवक्रियाणांप्रथमांतपदोपात्तत्वात्
प्रधानएवतूष्णींत्वंविधिर्नांगेपीतिवृद्धिश्राद्धंसमंत्रकमेवभवतीति
श्राद्धमयूखेतातचरणाः। यत्तुनानिष्ट्वातुपितॄन्श्राद्धेकर्मवैदिकमार
भेत्। तद्यत्रप्रातिस्विकवाक्येनांदीश्राद्धमुक्तंतत्रैवोपसंह्रियते। यद्वा।
वाक्यांतरप्राप्तकर्मांगत्वेएतत्पूर्वकालतामात्रमेवबोधयतिनकर्मां
गत्वमपि। अतोनसंध्यावंदनादावतिप्रसंगः। पक्षद्वयेपिनाष्टकासु
भवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते॥ नसोष्यंतीजातकर्मप्रोषितागतक
र्मस्वितिकर्मप्रदीपवचोनुवादकमेवननिषेधकंप्राप्त्यभावात्।सो
ष्यंतीकर्मसुखप्रसवार्थं। प्रोषितागतेचपुत्रेपितुःकर्मच्छंदोगपरिशि
ष्टेप्रसिद्धमतएवनैमित्तिकमथावश्यंश्राद्धमभ्युदयात्मकं। पुत्रजन्म
नितत्कार्यंजातकर्मसमंनरैरितिमार्कंडेयपुराणवचनेनैमित्तिकजात
कर्मसमपदाभ्यांपुत्रजन्मनिमित्तकमेवश्राद्धंनतुकर्मांगमित्युक्तंसं
गच्छते॥ यत्तुहेमाद्रौ॥ वृद्धिश्राद्धंतुकर्त्तव्यंजातकर्मादिकेषुवैइति। त
त्रापिजातकर्मादौयेषामित्यतद्गुणसंविज्ञानबहुव्रीहिणानामकर्मादी
नामेवग्रहणं। नजातकर्मणइति। एवंचजातकर्मातिरिक्तसंस्कारेषुनां
दीश्राद्धस्यांगत्वेसिद्धेयदैकसंस्कार्यस्यानेकसंस्कारेष्वेककर्तृकेष्वेक
स्मिन्कालेयुगपदुपस्थितेषुदेशकालकर्त्रैक्याद्गृह्यमाणरूपतंत्रन्या
यादेवमातृपूजनाभ्युदयिकयोःसकृदनुष्ठानप्रसंगेगणशःक्रियमाणेषु
मातृभ्यःपूजनंसकृत्। सकृदेवभवेच्छ्राद्धमादौनपृथगादिष्वितिब्राह्म
वचनमनुवादकमेवनसकृत्त्वविधिपरं। अन्येतु। अनेनैवन्यायेनानेक
संस्कार्याणांसजातीयविजातीयानेकसंस्कारेष्वपिसकृदेवतंत्रमित्या
हुः। तन्न। संस्कारजन्यचरमापूर्वाणामनेकसंस्कार्यनिष्ठत्वेनतदंगाभ्यु
दयिकश्राद्धजन्यांगापूर्वाणामपितन्निष्ठत्वस्यावश्यकत्वात्। नचतत्सं
भवति। एकयासामग्र्याएकमेवकार्यंजन्यतइतिनियमस्ययोगसि
द्धाधिकरणेस्थापितत्वान्नसकृदनुष्ठितेनाभ्युदयिकेनानेकापूर्वोत्पत्ति
रिति अनेकसंस्कार्येषुपृथगेववृद्धिश्राद्धमितितातचरणाः॥ ननुसत्रादि
ष्वनेकयजमानगतान्यनेकान्यपूर्वाण्येकस्मात्तत्प्रयोगादुत्पद्यंतइति
उक्तनियमेव्यभिचारात्सकृत्तेपितथास्त्वितिचेन्न। तत्रापिस्वस्वात्मघटि

तत्सामग्रीभेदात्॥प्रधानावृत्त्यासाङ्गायानांदीश्राद्धावृत्तेरपवादः कर्मप्र
दीपे। असकृद्यानिकर्माणिक्रियेरन्कर्मकारिणा। प्रतिप्रयोगंनैतास्युर्मा
तरःश्राद्धमेवचेति। तान्येवकर्माण्याह। आधानहोमयोश्चैववैश्वदेवेतथै
वच। बलिकर्मणिदर्शेचपौर्णमास्यांतथैवच। नवयज्ञेचयज्ञज्ञावदंत्ये
वंमनीषिणः॥ एकमेवभवेच्छ्राद्धमेतेषुनपृथक्पृथक्। असकृत्पुनःपुनः
॥प्रतिदिनंप्रतिमासंप्रत्यब्दंचेतियावत्। नवयज्ञोनवान्नेष्टिः पूर्वश्लोक
स्थकर्मशब्दस्यउत्तरश्लोकपरिगणितेषुकर्मसुउपसंहारः तेनाऽपरि
गणितज्योतिष्टोमादिषुभवत्येवप्रतिप्रयोगंवृद्धिश्राद्धमितिनानन्तरणाः
होमादिनवयज्ञपर्यंतेषुनपृथक्श्राद्धं किंत्वाधानादौकृतमेवश्राद्धमुप
करोतीतिकेचित्। आभ्युदयिकेकालमाहवसिष्ठः। पूर्वेद्युर्मातृकंश्राद्धं
कर्माहेपैतृकंतथा। उत्तरेद्युःप्रकुर्वीतमातामहगणस्यतु। अलाभेभिन्न
कालानांनांदीश्राद्धत्रयंबुधः। पूर्वेद्युर्वैप्रकुर्वीतपूर्वाह्णेमातृपूर्वकमिति
मातृपूर्वकमेवश्राद्धत्रयंविहितमाश्वलायनेन। मातापितामहीचैवसंप्र
ज्याप्रपितामही॥ पित्रादयस्त्रयश्चैवमातुःपित्रादयस्त्रयः। एतेनवा
र्चनीयाःस्युःपितरोभ्युदयेद्विजैरिति। यत्तुवृद्धवसिष्ठवचनं। नांदीमु
खेविवाहेचप्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकमि
ति। स्मृत्यर्थसारेच। वृद्धौमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतेइति॥ तदा
श्वलायनान्यपरं। आश्वलायनानांत्वाश्वलायनवचनादानुलोम्येनत
न्मात्रादिपूर्वकमितिभट्टचरणप्रभृतयोबहवः। मात्रादीन्विशिनष्टिवि
ष्णुः। नांदीमुखान्पितॄनादौतर्पयेत्पितृदेवताइति। अत्रपितृशब्दोनज
नकपरः किंतुसपिंडीकरणजन्यपितृभावपरः। पितॄनितिबहुवचनात्
। यत्तुब्राह्मे। पितापितामहश्चैवतथैवप्रपितामहः। त्रयोह्यश्रुमुखाए
तेपितरःसंप्रकीर्तिताः। तेभ्यःपूर्वेत्रयोयेतुतेतुनांदीमुखाःस्मृताइति
। तन्महालयप्रकरणपठितत्वादितिहेमाद्र्यादयः। विभक्त्यादिविषय
विशेषःप्रयोगरत्नसंग्रहे। शुभायप्रथमांतेनवृद्धौसंकल्पमाचरेत्।
नषष्ठ्यायदिवाकुर्यान्महादोषोभिजायते। अनन्तमहद्दूशब्दानामरू
पाणामगोत्रिणां। अनाम्नावातिलैश्चैवनांदीश्राद्धंचसव्यवत्। कारिका
यांच। संबंधनामरूपाणिवर्जयेदत्रकर्मणि। पिंडदानव्यवस्थोक्ताप्रवि

व्यसुराणे। पिंडनिर्वपणंकुर्यान्नवाकुर्यान्नराधिप। वृद्धिश्राद्धेमहाबाहो
कुलधर्मानवेस्यत्विति। पिंडदानपक्षेविशेषमाहवृद्धवसिष्ठः दधिकर्कंधु
संमिश्रान्पिंडान्दद्यात्यथाक्रमं। कर्कंधुर्बदरीफलं। एकैकस्मैपिंडद्वयंदद्या
द्यं। एकंनाम्नापरंतूष्णींतथापिंडद्वयंबुधइति। चतुर्विंशतिमतात्। अत्र
कर्तृव्यवस्थोक्ताकात्यायनेन। स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु
॥ पिंडानोद्वाहनात्तेषांतस्याभावेतुतत्क्रमात्। तेषांसुतानामोद्वाहनात्त्र
थमविवाहपर्यंतंपितास्वपितृभ्यः पिंडदानोपलक्षितंवृद्धिश्राद्धंकुर्यात्
। तस्यपितुरभावेतस्यसंस्कार्यस्यपितॄणांयःक्रमस्तेनक्रमेणपितृव्यमा
तुलादिर्दद्यान्नस्वपितृभ्यइतिहेमाद्रिः। अत्रपितुरभावोध्वंसएव। नत्व
त्यंताभावः। तथात्वेश्रुतिनिषिद्धत्वाद्दैवतदीयेभ्यएवपित्रादिभ्योनदद्यात्स्वे
वेतिवचनवैयर्थ्यस्यात्। तत्पितरमारभ्यस्वस्यपितॄणांयःक्रमस्तेनक्र
मेणदद्यात्। तथाचतेषामितितच्छब्देनस्वपितरःपरामृश्यंतइतिव्या
ख्यानमयुक्तं। तस्याभावेतेषांदद्यादित्यनेनैवसाकांक्ष्यात्तत्क्रमादित्यस्य
वैयर्थ्यापत्तेः ओद्वाहनादित्यत्रविशेषःसापणीये। नांदीश्राद्धंपिताकु
र्यादाद्येपाणिग्रहेपुनः अतऊर्ध्वंसुतःकुर्यात्स्वयमेवतुनांदिकमिति।
अत्रलक्षण्यांस्त्रियमुद्वहेत्। अरोगामुपयच्छेतेत्यादौसांगोद्वाहभाव
नायांवरस्यकर्तृत्वेचनांदीश्राद्धेपितृकर्तृत्वंप्राप्तमपिपिंडानोद्वाहना
दित्यनेनापोदितमतऊर्ध्वमित्यनेनप्रसूयइतिविधिल्लाघवायातऊर्ध्व
मित्येवविधीयतेनतुपिताकुर्यादित्यपि। तेनप्रथमोद्वाहेपितुरभावेवरः
स्वयमेवकुर्यादित्युक्तं। जीवत्पिताकथंकुर्यादित्यपेक्षायामाहकात्या
यनः। वृद्धौतीर्थेचसंन्यस्तेताते च पतिते सति। येभ्यएवपितादद्यात्तेभ्यो
दद्यात्स्वयंसुतइति। ताते सतीतिवृद्धितीर्थसंन्यस्तपतितपदैः प्रत्येकं
संबध्यते। तत्रापिवृद्धौतीर्थेचेत्यनेकनिमित्तसमावेशेवाच्यभेदापत्ते
रद्धमंतर्वेदिमिनोत्यर्द्धंबहिर्वेदीत्यंतर्वेदिपदेइवसंधिदेशस्यजातपु
त्रःकृष्णकेशो। ग्निमादधीतेतिजातिपुत्रादिपदानोवयोविशेषस्य।
वृद्धितीर्थपदेजीवत्पितृकाधिकारिकश्राद्धमात्रोपलक्षकेइतिश्राद्धम
यूखेतातचरणाः। येभ्यएवेत्येवकारेणमृतमातृमातामहस्यापितृत्वा
वैयर्थ्यंनभवतइतिबोध्यं। पितामहप्रपितामहयोर्जीवतोविशेषउक्तोवि

ष्णुपुराणे॥पितरिजीवतियःश्राद्धंकुर्यात्सएषांपिताकुर्यात्तेषांकुर्यात्पि
तरिपितामहेचयेषांपितामहःपितरिपितामहेप्रपितामहेचनैवदद्या
दिति।आश्वलायनानांविशेषस्तुगृह्यपरिशिष्टे।जीवत्पितासुतसंस्का
रेषुमातृमातामहयोस्तस्यांजीवत्यांमातामहस्यकुर्यादिति॥अत्रान
योरन्यतरजीवनेतुसवर्गईज्यः।उभयोर्जीवनेतुवर्गत्रयमपिपितृनिवृ
त्तएव।केचित्तुएतद्वचसापित्रीयमातृमातामहपार्वणएवभवतो
नपितृपार्वणमित्याहुरितिदिक्॥ ॥अथसंस्काराः॥ ॥तानुद्दिशति
गौतमः।गर्भाधानंपुंसवनंसीमंतोन्नयनंजातकर्मनामकरणान्नप्रा
शनचौलोपनयनानिचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणीसंयो
गः।पंचानांयज्ञानामनुष्ठानमष्टकापार्वणश्राद्धंश्रावण्याग्रहायणी
चैत्रीआश्वयुजीतिसप्तपाकयज्ञसंस्थाअग्न्याधेयमग्निहोत्रंदर्शपू
र्णमासौचातुर्मास्यानिआग्रयणेष्टिर्निरूढपशुबंधःसौत्रामणीति
सप्तहविर्यज्ञसंस्थाअग्निष्टोमोऽत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयो
तिरात्रोप्तोर्यामइतिसप्तसोमसंस्थाइत्येतेचत्वारिंशत्संस्काराइति
यस्यैतेचत्वारिंशत्संस्काराअष्टावात्मगुणाश्चसब्रह्मणःसायुज्य
माप्नोतीति॥पार्वणस्थालीपाकःश्रावणीतत्रक्रियमाणंश्रवणाकर्म।
आग्रहायणीतत्रक्रियमाणंप्रत्यवरोहणं।चैत्रीतत्रक्रियमाणःशूलग
वः।आश्वयुजीतत्रक्रियमाणंआश्वयुजीकर्म।अष्टावात्मगुणाः।दयास
र्वभूतेषुक्षांतिरनसूयाशौचमनायासोमंगलमकार्पण्यमस्पृहेति।
हारीतः।द्विविधएवसंस्कारोभवतिब्राह्मोदैवश्च।गर्भाधानादिःस्मार्तो
ब्राह्मः।पाकयज्ञाहविर्यज्ञाश्चेतिदैवः।ब्राह्मेणसंस्कारेणसंस्कृतऋ
षीणांसलोकतांगच्छति।दैवेनोत्तरेणसंस्कृतोदेवानांसमानतांसलो
कतांगच्छतीति।अंगिरास्तुपंचविंशतिसंस्कारानाह।गर्भाधानंपुंस
वनंसीमंतोबलिरेवच॥जातकृत्यंनामकर्मनिष्क्रमोन्नाशनंपरं।चौ
लकर्मोपनयनंतद्व्रतानांचतुष्टयं।स्नानोद्वाहौचाग्रहणमष्टकाश्चय
थाथथं।श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं॥उत्सर्गश्चाप्युपा
कर्ममहायज्ञाश्चनित्यशः।संस्कारानियताह्येतेब्राह्मणस्यविशेषतः॥
पंचविंशतिसंस्कारैःसंस्कृतायेद्विजातयः।तेपवित्राश्चयोग्याश्चश्राद्ध

दिषु सु यंत्रिता इति ॥ बलिर्विष्णुबलिः ॥ आश्वलायनस्तु संज्ञाविशेष
मप्याह ॥ नैमित्तिकाः षोडशोक्ताः समुद्वाहवसानकाः ॥ सप्तैवाग्रय
णाद्याश्च संस्कारा वार्षिका मताः ॥ मासिकं पार्वणं प्रोक्तमशक्तानां तु
वार्षिकं ॥ महायज्ञाश्च नित्याः स्युः संध्यावच्चाग्निहोत्रवदिति ॥ पार्वण
श्राद्धं मासिकं मासि मासि कर्त्तव्यं। अशक्तानां वार्षिकं वर्षे एकवारं क
र्तव्यमिति ॥ संस्कारानुक्त्वाऽयमः ॥ शूद्रोऽप्येवंविधः कार्यो विना मंत्रे
ण संस्कृत इति ॥ होमोपि द्विजानामेव ॥ गार्भैर्होमैर्जातकर्मचूडामौ
ञ्जिनिबंधनैः ॥ बैजिकं गार्भिकं चैनो द्विजानामपमृज्यत इति मनुवा
क्ये द्विजग्रहणादिति धर्मप्रकाशे ॥ बीजं शुक्रशोणिते तत्संबंधिनि
षिद्धकालमैथुनादिप्रयुक्तं बैजिकं ॥ अशुचिगर्भकोशस्थितिजं गा
र्भिकं ॥ तदपगच्छतीति कुल्लूकभट्टः ॥ बीजगर्भयोः पापनिमित्तत्वा
भावादुभयसंसर्गादशुचित्वमात्रमेनः ॥ शब्दार्थो न पापमिति तु मे
धातिथिः ॥ विज्ञानेश्वरस्तु एवमेनः शमं याति बीजगर्भसमुद्भवमित्ये
तद्व्याख्याने गोत्रव्याधिसंक्रांतिनिमित्तमेनो न तु पतितोत्पन्नत्वादि
त्याह पापनिरासार्थत्वाच्च नित्यतापि ॥ याज्ञवल्क्यः ॥ ब्रह्मक्षत्रियवि
ट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः ॥ निषेकाद्याः श्मशानांतास्तेषां वै मं
त्रतः क्रिया इति ॥ तेषामेव मंत्रतः क्रिया इत्युक्तेः शूद्रस्यामंत्रका इति म
न्यते ॥ तत्र तस्याध्ययनाभावात्तदंगभूतोपनयनवेदव्रतादीनां निवृ
त्तिः ॥ जातकर्माद्याः स्त्रीणामप्यमंत्रकाः । तूष्णीमेताः क्रियाः स्त्रीणां
विवाहस्तु समंत्रक इति स्मृतेः । अत्र चोपनयनांतानामावश्यकत्वं न
स्नानादीनां ॥ तेन यमिच्छेत्तु तमावसेद्ब्रह्मचर्याद्देवप्रव्रजेदित्यादि सं
गच्छते ॥ आश्वलायनेन तु उपनिषद्गर्भलंभनं पुंसवनमनवलोभन
मप्युक्तं ॥ अन्येपि कर्णवेधादयः संस्कारा ज्योतिःशास्त्रोक्तास्तत्र त
त्र वक्ष्यंते ॥ ॥ इति संस्कारोद्देशः ॥ तत्र गर्भाधानहेतुरजोदर्शने प्रशस्ता
प्रशस्तकालानाह नारदः । कुलीरवृषचापांत्यद्वादशीप्रतिपत्स्वपि । प
रिघस्य च पूर्वार्द्धे व्यतीपाते च वैधृतौ ॥ संध्यासु पर्वविष्ट्यामशुभं
प्रथमार्त्तवं ॥ उपप्लवो ग्रहणं । तथा । रोगी पतिव्रता दुःखी पुत्रिणी भोग
भागिनी ॥ पतिव्रता क्लेशयुक्ता सूर्यवारादिषु क्रमात् ॥ गर्गः ॥ सुभगा चै

वदुःशीलावंध्यापुत्रसमन्विता॥ धर्मयुक्ताव्रतश्रीचपरसंतानमोहि-
नी॥सुपुत्राचैवदुःपुत्रापितृवेश्मरतासदा॥दीनाप्रज्ञावतीचैवपुत्रा-
ढ्याचित्रकारिणी॥साध्वीपतिव्रतानित्यंसुपुत्राकष्टचारिणी॥स्वक-
र्मनिरताहिंस्रापुण्यापौत्रादिसंयुता॥नित्यंधनकथासक्तापुत्रधान्य-
समन्विता॥मूर्खाःश्राद्धयागुणवतीदस्रर्क्षादेःक्रमात्फलम्॥स्मृति-
रत्ने॥शुभंचैवतुपूर्वाण्हेमध्यान्हेमध्यमफलं॥अपराण्हेतुवैधव्यंपूर्वे
रात्रौशुभंभवेत्॥कश्यपः॥मलिनामंदवारेतुरात्रावपितथैवचेति॥त-
था॥अमासंक्रांतिविष्ट्यांचव्यतीपातेचवैधृतौ॥परिघस्यचपूर्वार्द्धे
षट्चगंडातिगंडयोः॥व्याघातेनवशूलेतुनाड्यःपंचचतुर्दर्शने॥वैधव्य-
मथैहानिंचसुतनाशंमहद्भयं॥वैधव्यंशत्रुवृद्धिंचदारिद्र्यंक्षीणजीवनं
॥तेजोहानिंसमायातिसदापुष्पवतीक्रमात्॥स्थलविशेषेणफलमाह
वसिष्ठः॥ग्रामाद्बहिःपरग्रामेचेत्स्यात्साव्यभिचारिणी॥पतिव्रतापतिस्था-
नेसुशीलागृहमध्यके॥ग्राममध्येचरुद्धिश्चविधवाचदिगंबरा॥परा-
गारेचदुःशीलाआयुष्यंजलसन्निधौ॥परगृहइत्यनेनपित्रादिगृहमपि
गृह्यते॥वस्त्रविशेषेणफलभेदमाहवसिष्ठः॥सुभगाश्वेतवस्त्रास्याद्दृ-
ढवस्त्रापतिव्रता॥क्षौमवस्त्राक्षितीशस्यान्नववस्त्रासुखान्विता॥दु-
र्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा॥नीलांबरधरानारीविधवापु-
ष्पितायदि॥मलिनांबरतोनारीदरिद्रास्याद्रजस्वला॥देवरातः॥संमा-
र्जनीकाष्ठतृणाग्निशूर्पान्हस्तेदधानाकुलटातदास्यात्॥नलोपभोगे
नपसिस्थितांचेद्दृष्टंरजोभाग्यवतीतदास्यादिति॥इदंफलंप्रथमरजोद-
र्शनएव॥रजोबिंदुफलमाहवसिष्ठः॥वस्त्रेस्युर्विषमारक्तबिंदवःपुत्र-
माप्नुयात्॥समाश्चेत्कन्यकाचेतिफलंस्यात्सशुभान्तवे॥शांतिमाहना-
रदः॥निंद्यस्त्रीतिथिवारेषुयदिपुष्पंप्रदृश्यते॥तत्रशांतिंप्रकुर्वीतघृतदू-
र्वातिलाक्षतैरिति॥शांतिस्तुशांतिमयूखेवक्ष्यते॥वसिष्ठः॥प्रभूतदो-
षंयदिदृश्यतेतत्पुष्पंततःशांतिककर्मकार्यं॥विवर्जयेद्देवतदैकशय्या-
पावकस्नोदर्शनमन्यपत्ने॥अथरजस्वलानियमाः॥दक्षः॥अंजनाभ्यं-
जनेस्नानंप्रवासंदंतधावनं॥नकुर्यात्सार्त्तवानारीग्रहाणामीक्षणंतथा॥
नखानांकृंतनंरज्जुतालपत्रादिबंधनं॥दग्धेशरावेभुंजीतपेयंचांजलिना॥

पिबेत्॥वसिष्ठः॥त्रिरात्रंरजस्वलास्नानाच्छुचिर्भवति॥नांज्यान्नाभ्यं-
ज्यान्नाप्सुस्नायादधःशयीतनदिवास्वप्यान्नाग्निंस्पृशेन्नरज्जुंसृजेन्न
दंतान्धावयेन्नमांसमश्नीयादिति॥चतुर्थदिनेचस्नानादिनाशुद्धत
थाचस्मृत्यर्थसारे॥ब्राह्मणीरजस्वलाचतुर्थेन्हिषष्टिमृत्तिकाभिःशौ
चंकृत्वाक्षत्रियादिस्त्रीपादपादन्यूनमृत्तिकाभिर्विधवाद्विगुणाभिः
शौचंकृत्वामलंप्रक्षाल्यसचैलंसंगवेस्नायादिति॥अतःसूर्योदयात्पू
र्वस्नानाचरणंदुराचारएव॥इतिरजस्वलानियमाः॥अथगर्भाधानं॥त
च्चर्तौकार्यं॥तदाहयाज्ञवल्क्यः॥षोडशर्तुनिशाःस्त्रीणांतस्मिन्युग्मा
सुसंविशेत्॥ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत्॥निशाग्रहणं
दिवसनिषेधार्थं॥तथाचश्रुतिः॥प्राणंवाएतेप्रस्कंदंतियेदिवारत्यासंयु
ज्यंतेब्रह्मवर्चसमेवतद्यद्रात्रौसंयुज्यंतइति॥शंखलिखितावपि॥न
र्त्तावपिदिवाव्रजेदिति॥आद्याश्चतस्रइतिचतुर्थदिनेरजसोऽनिवृत्तौ
ज्ञेयं॥रजोनिवृत्तौतुदेवलः॥तस्मात्त्रिरात्रंदारान्वैपुष्पितान्परिवर्जयेदि
ति॥हिरण्यकेशिसूत्रमपि॥चतुर्थ्यांस्नातांप्रयतवस्त्रामलंकृतांब्राह्म
णसंभाषामाचम्योपह्वयतइति॥ब्राह्मणसंभाषांप्रशस्तब्राह्मणेनकृ
तसंभाषणं॥आपस्तंबः॥स्नानंरजस्वलायास्तुचतुर्थेहनिशस्यते॥गम्या
निवृत्तेरजसिनानिवृत्तेकथंचनेति॥युग्मासुफलमाहमनुः॥युग्मासुपु
त्राजायंतेस्त्रियोऽयुग्मासुरात्रिष्विति।एकस्यांसकृदेवगच्छेत्।यथोक्तं।
एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्।सुस्थइंदौसकृत्पुत्रंलक्ष
ण्यंजनयेत्पुमानिति।सुस्थेएकादशादिस्थानस्थिते।क्षामताचास्नि
ग्धभोजनात्कार्यारजःक्षयार्थं।यथोक्तं।पुमान्पुंसोऽधिकेशुक्रेस्त्रीभवत्य
धिकेस्त्रियाइति।तत्रयुग्मासुशोणिताधिक्येपुरुषाकृतिःस्त्री॥अयु
ग्मासुशुक्राधिक्येस्त्र्याकारःपुमानितिज्ञेयं।शुक्रशोणितयोरुपादान
कारणत्वात्॥ब्रह्मचार्येवेतियत्रब्रह्मचर्यंविहितंश्राद्धभोजनादौतत्रग
मनेनदोषः॥पर्वाणिविष्णुपुराणे॥चतुर्दश्यष्टमीचैवअमावास्याचपू
र्णिमा॥पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवचेति।अगमनेदोषमाहपरा
शरः॥ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति।घोरायांभ्रूणहत्यायां
युज्यतेनात्रसंशयइतिकश्चित्त्वस्थःसन्नितिपाठः।अथगमनेनिषिद्धका-

लाः मनुः। अमावास्यामष्टमींचपौर्णमासींचतुर्दशीं। ब्रह्मचारीभवेन्नित्य
मप्यृतौस्नातकोद्विजइति।।ज्योतिःशास्त्रे। पित्र्यंपौष्णंनैर्ऋतंचैवधिष्ण्यं
त्यक्त्वानारींसुप्रसन्नःप्रसन्नां। पुष्टःस्नातांपुत्रकामोभिगच्छन्सल्लक्षणं
पुत्रमाप्नोतिपित्र्यं। यौगपद्येदेवलः। यौगपद्येतुतीर्थानांविप्रादिक्रमशोव्रजे
त्। रक्षणार्थमपुत्रांवाग्रहणक्रमतोपिवेति। तीर्थंरजः। विशेषमाहयाज्ञव
ल्क्यः। यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन्निति। यथाकामीऋतुंवि
नापिस्त्रीकामनायांस्त्रियमभिरमयेत्।।एवंच। ऋतुंनोपैतियोभार्यामनृ
तौयश्चगच्छति। तुल्यमाहुस्तयोःपापमयोनौयश्चसिंचतीति। बौधाय
नीयेनृतुगमननिषेधःसस्त्रियाअकामनायांज्ञेयः। गर्भिणीगमनमप्यृ
तुजानात्यवि। षण्मासात्कामयेन्मर्त्योगर्भिणींस्त्रियमेवहि।।आदंतज
ननादूर्ध्वमेवंधर्मोनहीयतइति। बालकेजातेतस्यदंतजननादूर्ध्वंग
च्छेदित्यर्थः। स्त्रीणामप्यगमनेदोषइतिहेमाद्रौ।।ऋतुस्नातांतुयोना
रीभर्तारंनोपगच्छति। तांग्राममध्येविख्याप्यभ्रूणघ्नींतुविवासयेदिति
।अत्रऋतुकालाभिगामीस्याद्यावत्पुत्रोभिजायतइति।।कूर्मपुराणवा
क्येनैकपुत्रोत्पादनेनशास्त्रार्थस्यकृतत्वादानृण्येचजातेनपुत्रांतरो
त्पादनमावश्यकमितिकेचित्। तन्न। यद्यप्यानृण्यंजातंतथापिएकपु
त्रनिंदापूर्वकंबहुपुत्रप्राशस्त्यमुक्तं। भारते। अपत्यंतुममैवैकंकुलेमह
तिभारत। अपुत्रतैकपुत्रत्वमित्याहुर्धर्मवादिनः। चक्षुरेकंचपुत्रश्चअ
स्तिनैवचभारत।।चक्षुर्नाशेतनोर्नाशःपुत्रनाशेकुलस्यइति। तथाऋ
तुस्नातांतुयोभार्यामित्यस्यएकपुत्रानंतरंऋतौजातेप्रत्यविधानात्।
तथार्थवादेपि। एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत्।।यजेतवाश्वमे
धेननीलंवावृषमुत्सृजेदिति।।अतोबहुपुत्रोत्पत्तिरप्रतिषेधात्साशास्त्री
चकर्तव्या। अथगुर्विणीपतिधर्माः।।आश्वलायनः। वपनंमैथुनंतीर्थंव
र्जयेद्गुर्विणीपतिः। श्राद्धंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित्। श्राद्धश्रा
द्धभोजनमितिकेचित्।।अत्रप्रमाणंमृग्यं। अन्यत्कालविधानव्याख्यानं
सप्तमान्मासादितिसर्वत्रज्ञेयं। क्षौरंशवानुगमनंनखकृंतनंचश्राद्धंचवा
स्तुकरणंत्वतिदूरयानं। उद्वाहमंबुधिजलेगमनंतथैवसमाप्नुःस्वयंभवतिग
र्भिणिकापतीनां। केचित्तु। उद्वाहमौपनयनंजलधेश्चगाहमितिपाठः।।९

ज्योतिषरत्नेगालवः॥दहनंवपनंचैवचौलंवैगिरिरोहणं॥नावआरोहणं
चैववर्जयेद्गुर्विणीपतिः॥अव्यक्तगर्भोपतिरब्धियानंमृतस्यवाहंक्षुरक
र्मसंगं॥तस्यांतुयत्नेनगयादितीर्थेयागादिकंवास्तुविधिंनकुर्यात्
॥आयुःक्षयंतत्साधनं॥अथगुर्विणीपतिनियमाः॥पद्मपुराणेदि
तिंप्रतिकाश्यपः॥नावस्करेघूपविशेन्मुसलोलूखलादिषु॥जलं
चनावगाहेतशून्यागारंचवर्जयेत्॥विलिखेन्ननखैर्भूमिंनांगारेण
नभस्मना॥नशयालुःसदातिष्ठेद्व्यायामंचविवर्जयेत्॥नतुषांगा
रभस्मास्थिकपालेषुचसंविशेत्॥वर्जयेत्कलहंलोकैर्गात्रभंगंत
थैवच॥नशयीतोत्तरशिरानचैवाधःशिरःक्वचित्॥नवस्त्रहीनानो
द्विग्नानचार्द्रचरणासती॥मात्स्ये॥संध्यायांहिनभोक्तव्यंगर्भिण्या
वरवर्णिनि॥नस्थातव्यंनगंतव्यंवृक्षमूलेषुसर्वदा॥नशयालुःसदा
तिष्ठेत्तवक्वाच्छायांविवर्जयेत्॥सर्वौषधीभिःकोष्णेनवारिणास्नानमा
चरेत्॥स्नानशीलातृतीयांयांपार्वत्याभक्तिमाचरेत्॥गर्भिणीकुंजरा
श्वादिशैलहर्म्यादिरोहणं॥व्यायामंशीघ्रगमनंशकटारोहणंत्य
जेत्॥शोकंरक्तविमोक्षंचसाध्वसंकुक्कुटासनं॥व्यवसायंदिवास्वा
पंरात्रौजागरणंत्यजेत्॥अतिक्षारंतुनाश्नीयादत्यम्लमतिभूरिच॥
अत्युष्णमतिशीतंचगुर्वाहारंपरित्यजेत्॥यस्तुतस्याभवेत्सुतःस्थि
रायुर्वैहिसंयुतः॥अन्यथागर्भपतनंसात्वाप्नोतिनसंशयइति॥यात्रावि
षयेबृहस्पतिः॥चतुर्थेमासिषष्ठेवाप्यष्टमेगर्भिणीयदा॥यात्रानित्यंवि
वर्ज्यास्यादाषाढेतुविशेषतः॥चतुर्थात्षष्ठादष्टमादारभ्येत्यर्थः॥इदंच
समर्थासमर्थस्त्रीपरं॥अत्यसमर्थायास्तुचतुर्थमासा दारभ्यैव
यात्रावर्ज्येत्यर्थः॥आषाढेतुसर्वमासेषुदोहदमप्यवश्यंप्रदेयमित्या
हयाज्ञवल्क्यः॥दोहदस्याप्रदानेनगर्भोदोषमवाप्नुयात्॥वैरूप्यंम
रणंवापितस्मात्कार्यंप्रियंस्त्रियाः॥इतिगर्भाधानं॥अथपुंसवनं॥या
ज्ञवल्क्यः॥गर्भाधानमृतौपुंसःसवनंस्पंदनात्पुरेति॥गर्भचलनका
लःशारीरके॥तस्माच्चतुर्थेमासिचलनादावभिप्रायंकरोतीति॥पारस्क
रः॥मासेद्वितीयेवायदहःपुंसानक्षत्रेणचंद्रमायुक्तःस्यादिति॥पुन्नस
भणितं॥हस्तोमूलंश्रवणःपुनर्वसुर्मृगशिरास्तथापुष्यःपुंसंज्ञकेषु

कार्येष्वेनानिशुभानिधिष्ण्यानि॥ विशेषमाहजातूकर्ण्यः॥द्वितीयेवा
तृतीयेवामासिपुंसवनंभवेत्॥व्यक्तेगर्भेथवाकार्यंसीमंतेनसहाथवे
ति॥व्यक्तेअन्येनानुक्तेपिज्ञातुंशक्ये॥ अत्रसतिसंभवेशुक्लास्तमलमा
सादिवर्ज्यंअसंभवेतत्रापिकार्यमावश्यकत्वात्॥इदंचचंद्रताराबले
कार्यं॥पुंसवनंप्रकृत्यबलोपपन्नेदंपत्योश्चंद्रताराबलान्वितेइतिना
रदवचनात्॥इदंचपुमान्सूयतअनेनेतिव्युत्पत्त्याकर्मनामधेयं॥
तच्चकर्मयवसहितमाषद्वययुक्तदधिप्राशनं॥अत्रकेचित्कालानि
षेधतिबृहस्पतिः॥कुलीरमिथुनंकन्यांहित्वाशेषाःशुभावहाः॥इति॥
इतिपुंसवनं॥अथानवलोभनं॥वैजवापगृह्ये॥अथपुंसवनानवलो
भनेकरोतिमासिद्वितीयेवातृतीयेवेति॥ इदंचपुंसवनदिनएवतदु
त्तरंकार्यम्॥पुंसवनमुक्त्वाऽथास्यैमंडलागारच्छायायामानीतामोष
धींनस्तःकरोत्याश्वलायनगृह्येक्रमाम्नानात्॥इदमपितस्यस्वक
र्मणोनअवलुप्यतेगर्भोनेनेतिव्युत्पत्त्यागर्भाविनाशफलकंयत्कर्म
तस्यनामधेयंभकारश्छांदसः।तथाचमंत्रलिंगमाह।पौत्रमघंमानि
मायामिति।पुत्रसंबंधिअघंपापंमानिगायांमाप्राप्नुयामिति।एवं
चनाशकारणपापाभावाद्गर्भोनाशइति॥एतेचकर्मणीगर्भसंस्का
रत्वात्प्रतिगर्भमावर्त्तेतेइतिनारायणः॥तन्मतेसकृत्संस्कृतानारी
सर्वगर्भेषुसंस्कृतेतिदेवलवाक्यंसीमंतोन्नयनविषयमेवेतिप्रती
मः॥विज्ञानेश्वरस्तुपुंसवनस्यापिसकृदनुष्ठानमिच्छति॥तत्रयुक्ति
श्चिंत्या॥इत्यनवलोभनं॥अथसीमंतोन्नयनं।आपस्तंबः।सीमंतो
न्नयनंप्रथमेगर्भेचतुर्थेमासीति॥सांख्यायनगृह्येपि॥सप्तमेमासि
प्रथमेगर्भेसीमंतोन्नयनमिति॥याज्ञवल्क्यः।षष्ठेष्टमेवासीमंत
इति।आश्वलायनः॥आपूर्यमाणपक्षेयदापुंसानक्षत्रेणचंद्रमायुक्तः
स्यादिति॥पूर्यमाणपक्षःशुक्लपक्षः॥पुंनक्षत्राण्युक्तानि॥इदंचसकृ
देवकार्यम्॥प्रथमेगर्भेइतिसांख्यायनापस्तंबोक्तेः॥स्त्रीसंस्कारत्वा
च्चसकृत्संस्कृतानारीसर्वगर्भेषुसंस्कृतेतिवचनेप्रवृत्तेः॥यत्तुस्मृति
चंद्रिकायांविष्णुः।सीमन्तोन्नयनंकर्मतत्स्त्रीसंस्काराद्गर्भेगर्भेप्रयुंजते
इति॥तत्रकेचिद्दृष्टादनादरःस्पष्टः।हारीतस्तुस्पष्टमेवाह।सकृत्संस्कृ

तसंस्काराः सीमंतेनद्विजस्त्रियः॥ यंयंगर्भंप्रसूयंतेससर्वःसंस्कृतोभ
वेदिति॥ इदंचदैवज्ञोदितेशुभमुहूर्तेकार्यं॥ यथाहगर्गः॥ सीमंतोन्न
यनंकार्यंशुभांशेशुभलग्नके॥ कुलीरमृगकन्याश्चवर्ज्याःशेषाश्च
शोभनाइति॥ अत्रापिशुक्रास्तादिव्यतिरिक्तकालालाभेनतन्नका
र्यमन्यथाऽस्तादावपि। इति। नियतकालत्वात्॥ सीमंतेचभोक्तुर्दो
षमाह धर्मप्रकाशे धौम्यः॥ ब्रह्मौदनेचसोमेचसीमंतोन्नयनेथवा॥
जीवश्राद्धेनवश्राद्धेभुक्त्वाचांद्रायणंचरेदिति ब्रह्मौदनसाधनांग
भूतंजातश्राद्धेपुत्रेजातेवृद्धिश्राद्धं॥ अजातसीमंतायाःप्रसूतौसस्य
व्रतेआह॥ स्त्रीयदाकृतसीमंताप्रसूयेतकदाचन॥ गृहीतपुत्राविधि
वत्पुनःसंस्कारमर्हति॥ पुनःपादपूरणार्थः। यःसंस्कारोतिक्रांतःसक
र्तव्यइत्यर्थः। इतिसीमंतोन्नयनं॥ सूतिकागृहमाहवसिष्ठः॥ ऐंद्रेतु
विक्रमस्थानमाग्नेयेसूतिकागृहं॥ याम्यांपाशयनस्थानंवायव्यां
पशुमंदिरं॥ कौबेर्यांतुधनस्थानमैशान्यांदेवतालयइति॥ पद्मपुरा
णेपारस्करः॥ प्रविशेत्सूतिकागारंकृतरक्षंसमंततः॥ प्राग्द्वारमुत्त
रद्वारमथवासुदृढंशुभं॥ देवानांब्राह्मणानांचगवांकृत्वाचपूजनं॥
एरंडमूलचूर्णेनसघृतेनतथैवतां॥ सुखप्रसवनार्थायपश्चात्कार्ये
नुलेपयेदिति॥ अथजातकर्म॥ तत्रपितुःपुत्रेजातेस्नानमाहसंवर्तः॥
जातेपुत्रेपितुःस्नानंसचैलंतुविधीयतइति॥ इदंचशीताद्भिःकाम्य
मेवचेति॥ इदंचरात्रावपिकार्यमित्याह॥ रात्रौस्नानंनकुर्वीतदानंचै
वविशेषतः॥ नैमित्तिकेचकुर्वीतस्नानंदानंचरात्रिष्विति॥ ग्रहणो
द्वाहसंक्रांतियात्रार्तिप्रसवेषुच॥ दानंनैमित्तिकंज्ञेयंरात्रावपिनदु
ष्यतीति। संवर्तः॥ मातास्पृश्योदशाहेनस्नानात्तुस्पर्शनंपितुः॥ जैमिनिः
॥ यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं॥ छिन्नेनालेततःपश्चात्सू
तकंचविधीयतइति॥ अस्माद्यावन्नालच्छेदोत्तरमेवाशौचप्रवृत्ति
रितिभाति॥ ञ्यंचस्तुयावन्नछिद्यतेनालंनावच्छिशुमृतौपूर्णसूत
कंनाप्नोति॥ नालच्छेदोत्तरंतुशिशुमृतौसंपूर्णंप्राप्नोतीतिव्याचख्युः॥
एवंचजायतेतेषांजन्मोत्तरमेवाशौचप्रवृत्तिरिष्टेतियुक्तंचेदं॥ आशौ
चंजननोत्तरमेवप्रवर्तते॥ जातकर्मवृद्धिश्राद्धमादौतुनालकालिकी

शुद्धिर्वचनेनबोध्यते॥कर्तुस्तात्कालिकीशुद्धिरितिवत्॥एवंचस्नाना
न्तरंसंध्यादिकंनभवत्येवेतिदिक्॥दानार्थेदिनमनुज्ञातमादिपुराणे
॥देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां॥आयांतितस्मात्तदहः पु
ण्यंपूज्यंचसर्वतः॥तत्रदद्यात्सुवर्णंतुभूमिंगांतुरंगरथमिति॥पुत्र
मुखावलोकनस्यफलमाहवसिष्ठः॥जातमात्रकुमारस्यमुखमस्या
वलोकयेत्॥पिताऋणाद्विमुच्येतपुत्रस्यमुखदर्शनादिति॥आशौ
चांतरेपिपुत्रेजातेतात्कालिकीशुद्धिमाहप्रजापतिः॥सूतकेतुसमु
त्पन्नेपुत्रजन्मयदाभवेत्॥कर्तुस्तात्कालिकीशुद्धिरिति॥जातकर्मणि
प्रधानमाहाश्वलायनः॥कुमारंजातंपुराऽन्यैरालंभात्सर्पिर्मधुनीहि
रण्यनिकषंहिरण्येनप्राशयेदिति॥कात्यायनसूत्रेतुविशेषः।अना
मिकयासुवर्णांतर्हितयामधुघृतेप्राशयतिघृतंवेति॥तत्कालमाह
गर्गः॥जातमात्रकुमारस्यजातकर्मविधीयते॥स्तनप्राशनतःपूर्वंना
भिकर्त्तनतोपिवेति॥पूर्वमित्यर्थः॥अत्रचरहिश्चाहमासेनकार्यं
मित्याहप्रचेताः॥स्त्रीशूद्रःश्वपचश्चैवजातकर्मणिचाप्यथ॥आ
मश्राद्धंसदाकुर्याद्विधिनापार्वणेनतु॥यदातुपुत्रजन्ममूलादिनक्ष
त्रेषुतदामुखावलोकनजातकर्मादिशांतिंविनानकुर्यात्॥एवंसंक्रां
तिविष्ट्यादावपि॥शांतिस्तुशांतिमयूखेवक्ष्यते॥पुरुषापराधेनका
लेजातकर्माननुष्ठानेकालांतरमाहवैजवापः॥जन्मनोनंतरंकार्यंजा
तकर्मयथाविधि॥दैवादतीतकालेचेदतीतेसूतकेभवेदिति॥अस्यफ
लमाहाश्वलायनः॥गर्भाम्बुपानदोषाणामपनुत्त्यैशिशुंपिता॥प्राशये
न्मधुनासार्द्धंसाज्यंहेमरसंशुभमिति॥स्त्रीणामप्येतदमंत्रकंकार्यं
॥इतिजातकर्म॥दशदिनमध्येविशेषमाहव्यासः॥सूतिकावासनि
लयाजन्मदानामदेवताः॥तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तिता
॥प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा॥त्रिष्वाशौचंनकुर्वीतसूतकेपु
त्रजन्मनीति॥दद्यात्तुप्रथमेहेमषष्ठेवासप्तमेपिवा॥बलिदानंतुद
शमेदिवसेषष्ठेस्वर्णदानंप्रशस्यतइति॥अत्राशौचाभावोदानादिवि
षयएवनसंध्यादिविषये॥मार्कंडेयोपि॥रक्षणीयातथाषष्ठीनिशात
त्रविशेषतः॥रात्रौजागरणंकार्यंजन्मदानांतथाबलिः॥पुरुषाःशस्त्र

हस्ताश्वनृत्यगीतैश्चयोषितः॥रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके
नारदोपि॥जननात्सप्तमेचान्हिमृत्युरायातिघातकः॥दिनेदिनेचरक्षे
यंकर्त्तव्यायुर्विवृद्धये॥इतिप्रथमादिदिनकृत्यं॥आश्वलायनगृह्ये॥
जातकर्मोत्तरंकालांतरमनुक्त्वानामचास्मैदधुर्घोषवदाद्यंतरस्थम
भिनिष्ठानांतंद्व्यक्षरंचतुरक्षरंवाद्व्यक्षरंप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्च
सकामोयुग्मानित्वेवपुंसामयुग्मानिस्त्रीणामभिवादनीयंचसमीक्षे
ततन्मातापितरौविद्यातामोपनयनादितिनामकरणमुक्तं॥तेनत्राप
तेजातकर्मोत्तरमेवकालः।अस्यार्थः॥वर्गाणांप्रथमद्वितीयाःजिव्हा
मूलीयोपध्मानीयौशषसाश्चेत्यघोषाअन्येघोषवंतः।यरलवाअंत
स्थाः।अभिनिष्ठानोविसर्जनीयः॥अक्षराणिस्वराः।पुनर्युग्मानीति
ग्रहणंषडक्षरादिग्रहणार्थं।अभिवादनीयंअवकहडचक्रप्रमाणेनना
क्षत्रं।मनुः।नामधेयंदशम्यांतुद्वादश्यांवापिकारयेत्॥पुण्येतिथौमु
हूर्तेवानक्षत्रेवागुणान्वितइति॥दशम्यामतीतायामितिव्याख्यातारः
णिजविवक्षितः॥अहन्येकादशेनामेति॥याज्ञवल्क्योपि॥कालांतरंभ
विष्यत्पुराणे॥नामधेयंदशम्यांतुकेचिदिच्छंतिपार्थिव॥द्वादश्यामप
रेरात्र्यांमासेपूर्णेतथापरे॥अष्टादशेहनितथावदंत्यन्येमनीषिणइ
ति॥गृह्यपरिशिष्टे॥जननाद्दशरात्रेसंवत्सरेनामकरणमिति॥व्युष्टेती
तेविशेषमाहपतंजलिः॥घोषवदाद्यंतरस्थमवृद्धंत्रिपुरुषानूकमिति
॥नामकरणयोरधिकारीतस्ययेत्रयःपुरुषास्ताननुकापत्यभिधत्तेइ
तित्रिपुरुषानूकंअन्येषामपीतिदीर्घंइतिप्रदीर्घंइतिप्रदीपकारः॥प्रयो
गपारिजातेकपिलसंहितायां॥एकादशेन्हिविधिवन्नामकुर्यात्कुलो
चितम्॥देवतानांविशेषेणपित्रोर्वानामशस्यते॥नैवकार्यंनृपारीणां
नामजीवनहेतुतः॥पूर्वःपरस्यवर्णस्यहीनस्यापिनधारयेदिति॥कर्त्तुः
पित्रोरित्यर्थः।इदंचदाक्षिणात्यशिष्टाआचरंति॥मनुः॥मंगल्यंब्राह्म
णस्यस्यात्क्षत्रियस्यबलान्वितं॥वैश्यस्यधनसंयुक्तंशूद्रस्यतुजु
गुप्सितमिति॥स्त्रीषुविशेषमाह॥गोभिलः॥अयुग्दांतंस्त्रीणामि
ति॥दांतंयशोदाशर्मेत्यादिकेचित्तुपन्नामतदाशब्दांतंवर्णयंति।त
थाचपार्वतितदागंगदेत्येवंप्रयोज्यंतथाचतेषांमतेयशोदेत्यादिरुप

शोदादाइतिप्रयुञ्जीत॥इदंचव्याख्यानंनक्वापिनिबंधेषुदृष्टम्॥अ
तःपूर्वोक्तमेवज्यायइति॥शंखलिखिताभ्यांनामोक्तामाससंबंध
मपिनामकार्यमितिकेचिदित्युक्तं॥तत्रमासनामानिवसिष्ठआह॥
चैत्रादिमासनामानिवैकुंठोथजनार्दनः॥उपेंद्रोयज्ञपुरुषोवासुदे
वस्त्रिविक्रमः॥योगीशःपुंडरीकाक्षःकृष्णोनंतोऽच्युतस्तथा॥चक्र
धारीतिचैतानिक्रमादाहुर्मनीषिणइति॥अत्रकेचिन्मासानांमार्ग
शीर्षादिमितिसामान्यलिंगान्मार्गशीर्षमारभ्यमासनामानिकल्प
यंति॥तद्वासिष्ठेचैत्रग्रहणेनविशेषाभिधानादुपेक्ष्यं॥मलमासेज
न्मचेदुत्तरमासनाम॥षष्ठ्यांतुदिवसेमासःकथितोबादरायणैः॥
पूर्वमर्द्धंपरित्यज्यकर्त्तव्याचोत्तरेक्रियेत्युत्तरमासशेषत्वेनाभिधा
नात्॥विष्टिव्यतीपातादौकर्त्तव्यमित्याहगर्गः॥व्यतीपातेचसंक्रा
न्तौग्रहणेवैधृतावपि॥आहुर्विनाशुभंकर्मप्राप्तकालेपिनाचरेदिति
॥अतःशुभेमुहूर्त्तेपूर्वोक्तान्यतमकार्यंशुक्रास्तादीनांतुनैवविचा
रः॥विशेषमाहकश्यपः॥उक्तकालेप्रकर्त्तव्याद्विजानामखिलाःक्रि
याः॥अतोन्येषुतुकालेषुकर्त्तव्याश्चोत्तरायणे॥सुरेज्येप्यसुरेज्येवा
नास्तगेनचवार्द्धके॥शुभलग्नेशुभांशेचशुभेन्हिशुभवासरे॥चंद्रता
राबलोपेतेनैधनादपवर्जिते॥नाममंगलघोषेणरहस्यंदक्षिणश्रु
तौ॥बृहस्पतिः॥पूर्वाण्हःश्रेष्ठइत्युक्तोमध्यान्होमध्यमःस्मृतः॥अ
पराण्हंचरात्रिंचवर्जयेन्नामकर्मणीति॥इदंचपितुरन्येनापिसंनि
हितेनकार्यम्॥इतिनामकरणं॥कर्णवेधमाहबृहस्पतिः॥जन्म
तोदशमेवान्हिद्वादशेवाथषोडशे॥सप्तमेमासिवापुनरिति॥गर्गः
मासेषष्ठेसप्तमेवाप्यष्टमेमासिवत्सरे॥कार्त्तिकेपूर्णमासेवाचैत्रेवा
फाल्गुनेपिवा॥कर्णवेधंप्रशंसंतिशुक्लपक्षेशुभेदिनेइति॥कार्त्तिका
दिकंपूर्वकालापेक्षयाभिन्नं॥पूर्णमासइतिस्वतंत्रःकालः॥नविशेष
णविशेष्यभावः॥व्यासः॥योजन्ममासेक्षुरकर्मयात्रांकर्णस्यवेधंकु
रुतेतिमोहात्॥मूढःसरोगीधनपुत्रनाशंप्राप्नोतिमूढंवधबंधनानि
॥अन्येविधिनिषेधाज्योतिःशास्त्रादवसेयाः॥विशेषउक्तःसुबोधः॥
शातकुंभमयीसूचीवेधनेतुशुभप्रदा॥राजतीवाऽयसी—वापियथा

विभवतःशुभाइति॥ इतिकर्णवेधः॥ निष्क्रमणमाहतुःशंखलिखि
तौ॥ अतऊर्ध्वंतृतीयेमासिनिष्क्रमणिका॥ याज्ञवल्क्यः॥ चतुर्थेमा
सिनिष्क्रमइति॥ कर्तृमाहशंखः॥ चतुर्थेमासिकर्तव्यंबालस्यादित्य
दर्शनमिति॥ मुहूर्तसंग्रहे॥ पूर्वपक्षःशुभःप्रोक्तःकृष्णोप्यंत्यत्रिकंवि
नेति॥ अत्रदिवसानुपादानादैवज्ञोदितंतन्मासस्थंशुभंदिनंग्राह्यं॥
कारिकायांविशेषः॥ आदायगेहान्निष्क्रम्यगच्छेयुर्देवतालयं॥ अ
भ्यर्च्यदेवतांसम्यगाशिषोवाचयेदथ॥ कृत्वाप्रदक्षिणंगेहमानयं
तिततःस्वकं॥ मातृष्वसृगृहंवापिमातुलादेर्गृहंनयेत् तदाशीर्वादाद्यैः
स्याद्दीर्घायुरभिनंदितः॥ जयंतस्यमतेनापिलिखितःशिशुनिष्क्रम
इति॥ मातुलादिर्बालस्य॥ इतिनिष्क्रमणं॥ उपवेशनमुक्तंपद्मपुराणे
॥ अष्टमेचतथामासिभूमौतमुपवेशयेत्॥ तत्रसर्वेग्रहाःशस्ता भौ
मोराममविशेषतः॥ वराहंपूजयेद्देवं पृथिवींचतथाद्विजः॥ पूजनंपूर्व
वत्कृत्वागुरुदेवद्विजन्मनां॥ भूभागमुपलिप्याथकृत्वातत्रतुमंड
लं॥ शंखपुण्याहशब्देनभूमौतमुपवेशयेत्॥ तत्रमंत्रउक्तस्तत्रैव॥
रक्षैनंवसुधेदेविसदासर्वगतंशिशुमिति॥ आयुःप्रमाणंनिखिलंनि
क्षिपस्वहरिप्रिये॥ अचिरादायुषस्त्वत्रयेकेचित्परिपंथिनः॥ जीवि
तारोग्यवित्तेषुनिर्दहस्वाचिरेणतान्॥ धारिण्यशेषभूतानांमातस्त्व
मधिकाह्यसि॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतामिति॥ इत्यु
पवेशनं॥ अन्नप्राशनमाह यमः॥ ततोन्नप्राशनंमासिषष्ठेकार्यंयथा
विधि॥ अष्टमेवाथकर्तव्यंयद्वेष्टंमंगलंगृहे इति॥ कुलयद्देवमंगलंत
देवकार्यमितिकालांतरं॥ लौगाक्षिः॥ षष्ठेमासेन्नप्राशनंजातेनुवापू
र्णेसंवत्सरेवेति॥ अत्रापिदिनविशेषानुपादानादैवज्ञोदितंशुभंदि
नंग्राह्यं॥ कर्तव्यमाहमार्कंडेयः॥ देवतापुरतस्तस्यधात्र्युत्संगगत
स्यच॥ अलंकृतस्यदातव्यमन्नपात्रेथकांचने॥ मध्वाज्यकनकोपेतं
प्राशयेत्पायसंतुतमिति॥ आश्वलायनगृह्येतुविशेषः॥ षष्ठेमास्यन्न
प्राशनमाजमन्नाद्यकामस्तैत्तिरंब्रह्मवर्चसकामोघृतौदनंतेजस्कामो
दध्योदनमिंद्रियकामोभवतीतिविज्ञायते॥ आजंमांसं॥ तित्तिरसमभि
व्याहारात्॥ तत्रव्यंजनस्थानीयत्वान्मांसस्थानेग्राह्यमेव॥ अन्नप्राश

नेफलाधिक्यमाश्वलायनस्मृतौ॥स्वमलप्राशनाच्छुद्धेप्राशयेत्म
धुषेपिबेति॥ इत्यन्नप्राशनं॥ तदुत्तरं जीविकापरीक्षोक्तामार्कंडेये
न॥देवाग्रतोथविन्यस्यशिल्पभांडानिसर्वशः॥वस्त्राणिचैवशस्त्रा
णिततःपश्येत्तुलक्षणं॥शिल्पस्यलेखनादेर्भांडंवस्तुलेखनीमषी
पात्रादि॥शस्त्रंयुद्धवस्तु प्रथमंयत्स्पृशेद्बालस्ततोभांडंस्वयंतदा॥
जीविकातस्यबालस्यतेनैवतुभविष्यतीति॥इतिजीविकापरीक्षा॥
चूडाकर्माहमनुः॥चूडाकर्मद्विजातीनांसर्वेषामेवधर्मतः॥प्रथमे
ऽब्देतृतीयेवाकर्त्तव्यंश्रुतिचोदनात्॥यमः॥द्वितीयेवातृतीयेवाकर्त
व्यंश्रुतिचोदनादिति॥आश्वलायनः॥तृतीयेवर्षेचौलंयथाकुलध
र्मंवेति॥तथाउदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मो
पनयनगोदानविवाहाइति॥कारिकायां॥यथाकुलंचकेषांचिदुप
नीत्यासहेष्यतइति॥आश्वलायनस्मृतौ॥तृतीयेवत्सरेचौलंकुर्वी
तास्योत्तरायणे॥शुक्लपक्षेशुभर्क्षेतुकृत्वाभ्युदयिकंतथा॥शुभर्क्षे
इतिज्योतिर्विदुपदिष्टमुहूर्तेइत्यर्थः॥विवाहेचंडेश्वरः॥मार्गेमासित
थाज्येष्ठेक्षौरंपरिणयंव्रतं॥ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत्॥
वृत्तशते॥नजन्मधिष्ण्येनचजन्ममासेनजन्मकालीयदिनेविदध्या
त्॥ज्येष्ठेनमासेप्रथमस्यसूनोस्त्वाद्याःसुतायाअपिमंगलानीति॥नक्ष
त्राणिनिषेधतिव्यासः॥नक्षत्रेतुनकुर्वीतयस्मिन्जातोभवेन्नरः॥नप्रो
ष्ठपदयोःकार्यंनैवाग्नेयेचभारत॥तिथिंप्रतिपदंरिक्तांविष्टिंचैवविवर्ज
येत्॥विहितान्यपितेनैवोक्तानि॥अश्विनीश्रवणःस्वातीचित्रापुष्यः
पुनर्वसुः॥धनिष्ठारेवतीज्येष्ठामृगहस्तेषुकारयेदिति॥क्षौरमितिशे
षः॥अन्येचनक्षत्रयोगकरणविधिनिषेधाज्योतिःशास्त्रादवसेयाः
।गोत्रविशेषणविशेषमाहलौगाक्षिः॥दक्षिणतःकमुंजावसिष्ठानामु
भयतोत्रिकश्यपानांमुंडाभृगवःपंचचूडाअंगिरसोबालिमेकेमंगला
र्थंशिखिनोन्येयथाकुलधर्मं॥कमुंजाचूडाक्वचित्कुमुंजेतिपाठः॥
अन्येबालिंकेशपंक्तिकुर्वंतिअंतेसमरेखयामुंडनंकृत्वासर्वएवके
शाःस्थाप्याइतिस्मृतिचंद्रिकायां॥आपस्तंबस्तुविशेषमाह॥केशा
न्विनीययथार्षंशिखानिदधातीति।यथैषांकुलधर्मःस्यादिति॥यथाप्रवरं

एतेसंस्काराःस्त्रीणांमंत्ररहिताः॥एतेषांजातकर्मादीनांलोपेप्रायश्चि
त्तमाहशौनकः॥एतेष्वेकैकलोपेपिपादकृच्छ्रंसमाचरेत्॥चूडायाअ
र्द्धकृच्छ्रंस्यादापदित्येवमीरितं॥अनापदितुसर्वत्रद्विगुणंद्विगुणंचरेदि
ति॥अतीतानांकालमाहमनुः॥जातकर्मादिसंस्काराःस्वकालेनभवंति
चेत्॥चौलादर्वाक्प्रकुर्वीतप्रायश्चित्तादनंतरं॥गृह्यकारिकायांविकल्प
उक्तः॥प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै॥कार्यमित्येकआचार्या
नेत्यन्येतुविपश्चितइति॥शिष्टानांतुकरणपक्षएवसंमतं॥विशेषांत
रमाहनारदः॥शिशोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्॥पंचमाब्दा
दधोर्ध्वंतुगर्भिण्यामपिकारयेत्॥सहोपनीत्याकुर्याच्चेत्तत्रदोषोनवि
द्यतइति॥इतिचूडाकर्म॥विद्यारंभमाहमार्कंडेयः॥प्राप्तेथपंचमेवर्षे
विद्यारंभंतुकारयेत्॥ततःप्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेदिति॥
विद्यारंभश्चात्राक्षरपरिचितिः॥यथाहश्रीधरः॥उदग्गतेभास्वतिपंचमे
ब्देप्राप्तेक्षरस्वीकरणंशिशूनां॥सरस्वतींविघ्नविनायकंचगुडोदनाद्यैर
पिपूज्यकुर्यात्॥विष्णुधर्मोत्तरेपुष्करः॥प्राप्तेतुपंचमेवर्षेअप्रसुप्तेजना
र्दने॥षष्ठींप्रतिपदंचैववर्जयित्वातथाष्टमीं॥रिक्तांपंचदशींचैवसौरभौ
मदिनेतथा॥एवंसुनिश्चितेकालेविद्यारंभंतुकारयेत्॥इतिविद्यारंभः॥
अथानुपनीतधर्माः॥गौतमः॥प्रागुपनयनात्कामचारकामवादकाम
भक्षाइति॥कामचारोगम्यादिदेशगमनं॥कामवादोश्लीलादिभाषण
मनृतभाषणंच॥कामभक्षोलशुनपर्युषितभक्षणं॥कामभक्षादिकं
महापातकातिरिक्तविषयं॥स्यात्कामचारभक्षोपिमहतःपातकादृ
तइतिषड्विंशन्मतात्॥गौतमः॥नपादमूत्रपुरीषोभवतिनतस्याच
मनकल्पोविद्यतेनतस्योदङ्मुखोदिवारात्रौदक्षिणामुखइत्यादयो
नियमाः॥सएव॥अन्यत्रावमार्जनप्रक्षालनप्रोक्षणेभ्योनतस्यस्प
र्शनादशौचमिति॥इदंकृत्वास्पर्शनंकार्यमित्यर्थः॥स्मृतिदीपिकायां
॥शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतमिति॥रजस्वलादिसंस
र्शेस्नानमेवविधीयतइति॥तल्लक्षणानितत्रैव॥प्राक्चूडाकरणाद्बा
लः॥प्रागन्नप्राशनाच्छिशुः॥कुमारकस्तुविज्ञेयोयावन्मौंजीनबध्यते
इति॥बालप्रकृत्यगौतमः॥नत्वेवैनमग्निहवनबलिहरणयोर्नियुंज्या

दिति।।मनुः।।नह्यस्मिन्विद्यतेकर्मयावन्मौंजीनबध्यते।।नाभिव्या
हारयेद्ब्रह्मस्वधानिनयनादृते।।ब्रह्मवेदः।स्वधानिनयनंप्रेतकर्म।।इत्यनु
पनीतधर्माः।उपनयनमुक्तंश्रुतौ।।अष्टवर्षंब्राह्मणमुपनयीतेति।या
ज्ञवल्क्यः।गर्भाष्टमेऽष्टमेवाब्देब्राह्मणस्योपनायनं।।राज्ञामेकादशेसैकेवि
शामेकेयथाकुलमिति।।सैकेद्वादशे।।गर्भैकादशेगर्भद्वादशेद्वादशेवैश्य
स्येत्याह।।पैठीनसिरपि।।गर्भपंचमेब्राह्मणमुपनयेदिति।।गुणफल
माहमनुः।।ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे।।राज्ञोबलार्थिनः
षष्ठेवैश्यस्येहार्थिनोष्टमेइति।।आपस्तंबः।।सप्तमेब्रह्मवर्चसकाम
मष्टमआयुःकामंनवमेतेजस्कामंदशमेऽन्नाद्यकाममेकादशइंद्रियका
मंद्वादशेपशुकाममिति।।वर्णविशेषेणऋतुनियमउक्तःश्रुतौ।।वसंते
ब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्यमिति।।कालांतरमुक्तंज्यो
तिःशास्त्रे।।माघादिषुतुमासेषुमौंजीपंचसुशस्यते।।ज्येष्ठमासेज्ये
ष्ठोपनयनंनकार्यं।।तथाचगर्गः।।ज्येष्ठमासेविशेषेणसर्वज्येष्ठस्य
चैवहि।।उपनीतस्यज्येष्ठत्वंमृत्युरेवचेति।।जन्ममासेनकार्यमित्यु
क्तंसंग्रहे।।विवाहेचोपनयनेजन्ममासंविवर्जयेत्।।जन्ममासल
क्षणमुक्तंवृद्धगर्गेण।।आरभ्यजन्मदिवसंयावत्त्रिंशद्दिनंभवेत्।।ज
न्ममासःसविज्ञेयोगर्हितःसर्वकर्मसु।।एवंचाष्टम्यादितिथिमारभ्या
ष्टम्यंतोजन्ममासोभिमतः।।नतुदर्शांतःपूर्णिमांतोवा।।विशेषमाह
चंडेश्वरः।।माघेद्रविणशीलाढ्यःफाल्गुनेचदृढव्रतः।।चैत्रेभवतिमे
धावीवैशाखेकोविदोभवेत्।।ज्येष्ठेतुगृह्णीतिज्ञआषाढेक्रतुभा
ग्भवेत्।।मागशीर्षेभवेद्भ्रष्टःशेषेदुःखमवाप्नुयात्।।आषाढस्तुवि
ष्णुशयनात्प्रागेवतदूर्ध्वं।तत्रसर्वेषांनिषिद्धत्वात्।।विशेषमाहुर्वसि
ष्ठादयः।।आर्द्रादिकेस्वातिविरामकालेनसत्रवृंदेदशकेरविश्चेत्।वि
वाहचौलव्रतबंधनाद्यंसुरप्रतिष्ठादिनकार्यमेव।।आपूर्यमाणपक्षइ
तिसूत्रकृदाश्वलायनेनोक्तोमुख्यः।अनुकल्पमाहबृहस्पतिः।शुक्लप
क्षःशुभःप्रोक्तःकृष्णश्चांत्यत्रिकंविनेति।।अथगौणकालः।गृह्ये।।आ
षोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्यआचतुर्विंशा
द्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंति।।नोपनयेन्नाध्यापयेन्नयाज

यज्ञैर्भिश्चैवहरेयुः॥अत्रव्रात्यताप्रक्रम्य।सावित्रीपतितायस्यदशव
र्षाणिपंच च।सशिखंवपनंकृत्वाव्रतंकुर्यात्समाहितइति।यमेनस्प
ष्टंपंचदशवर्षोत्तरंप्रायश्चित्ताभिधानात्षोडशादिर्वाडःमर्यादार्थ
कः॥एवंपंचदशवर्षोत्तरमेवव्रात्यस्तोमादिकंजायतइति॥यत्तु।औ
पनायनिकःकालःपरःषोडशवार्षिकः॥द्वाविंशतिःपरोन्यस्यचतुर्विं
शतिमःपरइतिव्यासवाक्येसंपूर्णषोडशवर्षग्रहणाद्विरोधमुपन्य
स्यति॥तत्रधर्मप्रकाशेवंव्यवस्थोक्ता।यमवाक्यंजन्मप्रभृतिपंचद
र्षातिक्रमेप्रायश्चित्तविधिपरं॥व्यासवाक्यंत्वाधानप्रभृतिषोडशव
र्षातिक्रमेप्रायश्चित्तपरमितिनद्वयोरपिविरोधःईदृशीचसरणिःप्रा
कृक्वचिदाश्रितैवं॥यथाष्टादशदिनादर्वागस्पृश्यत्वंनविद्यते।चतुर्द
शदिनादर्वागस्पृश्यत्वंविधीयतइतिवाक्ययोःपूर्वंरजोदर्शनात्प्रभृ
त्युत्तरंतुस्नानादारभ्येति॥याज्ञवल्क्यः॥अतऊर्ध्वंपतंत्येतेसर्वध
र्मबहिष्कृताः॥सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोरिति॥तं
विनोपनयनेधिकारोनास्तीत्यर्थः।सचानुपनीतेनाऽनाहिताग्निना
विहितापिअवकीर्णिपशुवत्कार्यः॥यत्तोपयुक्ताध्यापनमगत्याकर्त
व्यं॥ततःस्मृत्युक्तंप्रायश्चित्तंकृत्वाउपनयनमिति॥अथनिषिद्धका
लः॥रत्नकोशे॥नष्टेचंद्रेऽस्तगेशुक्रेनिरंशेचैवभास्करे।कर्तव्यंनो
पनयनमनध्यायेगलग्रहे॥राशिप्रथमांशगःसूर्योनिरंशः॥अनः
ध्यायान्विस्तरेणाग्रेवक्ष्यामः।गलग्रहास्तत्रैव।त्रयोदशीचतुष्कंतुस
प्तम्यादित्रयंतथा॥चतुर्थ्येकाकिनीप्रोक्ता अष्टावेतेगलग्रहाइति।
वक्ष्यमाणानध्यायप्रतिपत्प्रसवमाहतुर्भरद्वाजवसिष्ठौ॥याचैत्र
वैशाखसितात्तृतीयामाघस्यसप्तम्यथफाल्गुनस्य।कृष्णेद्वितीयो
पनये प्रशस्ताःप्रोक्ताभरद्वाजमुनींद्रमुख्यैरिति॥चैत्रवैशाखशुक्ल
तृतीयेमन्वादियुगादी।माघसितसप्तम्यपिमन्वादिः।एतासामनध्या
यत्वंवक्ष्यते॥टोडरानंदेकारिकानिबंधेविशेषः॥अनध्यायाश्चपूर्वेद्यु
रनध्यायात्परेहनि॥द्वितीयाःसुरेश्वरेणप्रतिपदोक्तत्वादित्यपिव्या
ख्यातंतत्रैव।ननुनवम्यादित्रयमितिनवम्याअपिनिषेधात्कास्यविष
यः॥उच्यते॥निषेधद्वयवशाद्बाधिक्यकल्पना।मान्यास्तुयदानवमी

दशदंडांतदानिषेधःकालमात्रकइतिवचनात्तदुत्तरमुपनयनंग्रासम
नेननिषिध्यतइत्याहुः॥पूर्वाण्हादिप्राशस्त्यमाह॥धर्मप्रकाशेज्यो
तिर्मनुः॥सर्वदेशेषुपूर्वाण्हेमुख्यंस्यादुपनायनं॥मध्यान्हेमध्यमंप्रो
क्तमपराण्हेतुगर्हितमिति॥भरद्वाजः॥विनर्तुनावसंतेनकृष्णपक्षेग
लग्रहे॥अनध्यायेचोपनीतःपुनःसंस्कारमर्हतीति॥पुनरुपनयननि
मित्तानिचाग्रेविस्तरेणवक्ष्यामः॥विशेषमाहव्यावहारचंडेश्वरः
केतोरस्तदिनादूर्ध्वंसप्ताहानिपरित्यजेत्॥यावत्केतूदयस्तावदशुभः
समयेभवेदिति॥इदंब्रह्मपुत्राख्योग्रकेतुविषयमितिधर्मप्रकाशे॥गर्गः
॥चंद्रसूर्योपरागेषुत्र्यहमागमशुभंपश्चात्स्मृतंग्रहणमूलकं॥खंडग्र
हेगिरः॥सर्वग्रासेतुसप्ताहमर्द्धग्रासेदिनत्रयं॥त्रिद्व्येकांगुलतोग्रासे
दिनमेकंतुवर्जयेदिति॥विवाहचंडेश्वरः॥ग्रहेरवींद्वोरवनिप्रकंपेकेतू
द्गमोल्कापतनादिदोषे॥व्रतेदशाहानिवदंतितज्ज्ञास्त्रयोदशाहानि
वदंतिकेचित्॥ज्योतिर्निबंधेऽनुकल्पोप्युक्तः॥पंचदिनानिवसिष्ठस्त्रि
दिनंगर्गस्तुकौशिकस्त्वेकं॥यवनाचार्यस्यमतंपंचमुहूर्त्तान्दूषयतिराहुः
॥एवंसर्वमालोक्यज्योतिर्विदुपदिष्टमुहूर्त्तेउपनयनंकुर्यात्॥अत्रच
माणवककर्तृकंगुरुसमीपगमनंप्रधानमितिजरन्मीमांसकाः॥न
व्यास्तुणिजविवक्षायांमानाभावादाचार्यकर्तृकंमाणवकाधिकारिक
मुपनयनमेवविधीयतइत्याहुः॥युक्तंचेदं॥स्मृत्यर्थसारेतु॥आचार्य
समीपनयनमग्निसमीपनयनंवागायत्रीवाचनंवाप्रधानमित्युक्तं॥अ
थोपनेतुरुपनेयस्ययोरधिकारसंपादनार्थंप्रायश्चित्तमाहवृद्धविष्णुः॥कृच्छ्र
त्रयंचोपनेतात्रीन्कृच्छ्रांश्चबटुश्चरेदिति॥आचार्यस्यविशेषंसए
वाह॥सावित्रीमभ्यसेदग्निंपवित्राणिचसंस्मरन्॥सहस्रंद्वादशाख्यं
चसावित्रींप्रजपेद्बुधः॥स्वाधिकारार्थमेवास्याःप्रदानार्थंहिनत्स्मृत
मिति॥षंढादीनामप्युपनयनमुक्तंब्रह्मांडे॥ब्राह्मण्यांब्राह्मणाज्जा
तोब्राह्मणःसइतिश्रुतिः॥तस्माच्चषंढबधिरकुब्जवामनपंगुषु॥जड
गद्गदरोगार्त्तशुष्कांगविकलांगिषु॥मत्तोन्मत्तेषुमूकेषुशयनस्थेनिरिं
द्रिये॥ध्वस्तपुंस्त्वेषुचैतेषुसंस्काराःस्युर्यथोचितं॥यथोचितमितिअ
शक्यांगहीनेनेत्यर्थः॥मत्तोन्मत्तौनसंस्कार्याविति केचित्पठते॥कर्म

स्त्वनधिकाराच्चपात्रित्वंनास्तिचैतयोः॥तदपत्यंचसंस्कार्यमपरैस्त्वा
हुरन्यथा॥संस्कारमंत्रहोमादीन्करोत्याचार्यएवतु॥उपनेयांश्च
विधिवदाचार्यस्यसमीपतः॥आनीयाग्निसमीपंवासावित्रींस्पृश्य
वाजपेत्॥कन्यास्वीकरणादन्यत्सर्वंविप्रेणकारयेदिति॥उपनेतृक्र
ममाहगर्गः॥पितापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः॥उपायने
धिकारीस्यात्पूर्वाभावेपरःपरःतथा॥पितैवोपनयेत्पुत्रंतदभावेपितुः
पिता॥तदभावेपितुर्भ्रातातदभावेतुसोदरइति॥इतिकालादिनि
र्णयः॥अथपरिधानोत्तरीयनिर्णयः।तत्रगृह्ये।अहतेनवाससासं
वीतमैणेयेनवाब्राह्मणंरौरवेणक्षत्रियमाजेनवैश्यं।यदिवासांसि
वसीरन्रक्तानिवसीरन्काषायंब्राह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवैश्यइति
॥अहतलक्षणंप्रचेताआह॥ईषद्धौतंनवंश्वेतंसदशंयन्नधारितं॥अह
तंतद्धिजानीयात्सर्वकर्मसुपावनमितिपूर्वंगृह्यार्थः॥तत्रवासःसाधार
णंयदात्वजिनप्रावरणंतदाब्राह्मणादीनि॥एणीबिंदुसहितामृगी॥ए
ण्याइदम्॥यदिवासांसीत्यत्रवाक्यभेदव्यवहितान्वयौ॥वासांसिव
सीरन्नित्येकंवाक्यं॥यदिरक्तानिवसीरन्तदाकाषायमित्यादिवान्व
तं॥मनुर्विशेषमाह॥कार्ष्णरौरवबास्तानिचर्माणिब्रह्मचारिणः॥व
सीरन्नानुपूर्व्येणशाणक्षौमाविकानिचेति॥कार्ष्णरौरवबास्तान्युत्त
रीयाणिकृष्णरुरुबस्ताजिनान्युत्तरीयाणीतिशंखवचनात्॥वस्त्रे
षुविशेषमाहवसिष्ठः॥शुक्लमहतंवासोब्राह्मणस्यकार्पासंमांजिष्ठं
क्षौमंक्षत्रियस्य।पीतंकौशेयंवैश्यस्येति॥इतिवस्त्रादिनिर्णयः॥मे
खलाव्यवस्थामाहमनुः॥मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमे
खला॥क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशणतांतवी॥ज्याकदाचिच्च
र्ममयीभवतिकदाचित्तृणमयी॥तत्रचर्ममयीव्यावृत्त्यर्थंमौर्वीतिमे
धातिथिः॥ज्यायाश्चस्वरूपनाशप्रसंगान्त्रिवृत्त्वादिगुणोनेतिधर्मप्र
काशेनातच्चरणाः॥शाणेतुत्रिवृत्त्वादिगुणोस्त्येव॥गृह्येविशेषः॥तेषां
मेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्याबीवैश्यस्येति॥आवीऊर्ण
कृतेत्यर्थः॥अनुकल्पमाहमनुः॥मुंजालाभेतुकर्तव्याकुशाश्मंतकबल्व
जैः॥त्रिवृताग्रंथिनैकेनत्रिभिःपंचभिरेववेतिअत्रकुल्लूकभट्टः॥आदिश

ब्दस्यलोपमंगीकृत्याकांक्षितविधानान्मुंजादीनांतिसृणांमेखला
नामलाभेक्रमेणकुशाश्मंतकबल्वजाग्राह्या इत्याह। ग्रंथयश्च
शिष्टाचारात्प्रवरसंख्ययाकार्याः॥ तथाचमनूक्तोविकल्पोव्यवस्थि
तः। एकप्रवरस्यैवैकोग्रंथिस्त्रिप्रवरस्यत्रयः पंचप्रवरस्यपंचेति॥ इ
तिमेखलाव्यवस्था॥ दंडाउक्तागृह्ये॥ तेषांदंडाःपालाशोब्राह्मण
स्यौदुंबरःक्षत्रियस्यबैल्वोवैश्यस्य। केशसंमितोब्राह्मणस्यललाट
संमितःक्षत्रियस्य। घ्राणसंमितोवैश्यस्य। सर्वेवासर्वेषामिति॥ घ्रा
णोनासा। मनुर्विशेषमाह। ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखा
दिरौ॥ पैप्पलौदुंबरौवैश्योदंडानर्हंति धर्मतइति॥ नचात्रद्वंद्वनिर्देशा
त्समुच्चयइतिवाच्यं॥ दंडंप्रदायेतिसूत्रेगुणभूतदंडैकत्वश्रवणा
त्॥ मनुस्मृतावेवगुणविधिवाक्येकेशांतकोब्राह्मणस्येत्येकवचन
श्रवणात्॥ वसिष्ठस्मृतौ॥ स्पष्टमेवबैल्वःपालाशोवेतिविकल्पा
भिधानाच्च॥ अतोविकल्पितयोरेवद्वंद्वनिर्देशइति। सर्वेषामल
भेयमाह॥ एतेषामप्यलाभेतुसर्वेषांसर्वयज्ञियाइति॥ दंडा
न्विशिनष्टि श्लोकगौतमः॥ ऋजवस्तेतुसर्वेस्युरव्रणाः सौम्यदर्शनाः
॥ अनुद्वेगकरादंडाःसत्वचोनाग्निदूषिताइति॥ इतिदंडनिर्णयः॥ य
ज्ञोपवीतमाहमनुः॥ कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत्॥
शणसूत्रमयंराज्ञोवैश्यस्याविकसूत्रकम्॥ शणसूत्रमयमित्यत्रा
पिऊर्ध्ववृतंत्रिवृदितिसंबध्यते॥ आविकमव्यूर्णासंभवं। एवंच
यदिदानींतनानांक्षत्रियवैश्यानांकार्पासोपवीतधारणंतत्रमूलं
नविद्मः॥ विशेषउक्तःछंदोगपरिशिष्टे॥ त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रय
मधोवृतं॥ त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते॥ कर्तव्यतामा
हदेवलः॥ ग्रामान्निष्क्रम्यसंख्यायषण्णवत्यंगुलीषुतत्॥ तावः
त्रिगुणितंसूत्रंप्रक्षाल्याब्लिंगकैस्त्रिभिः॥ देवागारेथवागोष्ठेनद्यां
वान्यत्रवाशुचौ॥ सावित्र्यात्रिवृतंकुर्यान्नवसूत्रंतुतद्भवेत्॥ हरिब्रह्मे
श्वरेभ्यश्चप्रणम्याऽवदधात्यथ॥ यज्ञोपवीतमित्यादिव्याहृत्यावा
पिधारयेत्॥ तथा॥ यज्ञोपवीतंकुर्वीतसूत्राणिनवतंतवइति॥ वसि
ष्ठस्तुविशेषमाह॥ नाभेरूर्ध्वमनायुष्यमधोनाभेस्तपःक्षयः॥ तस्मा

न्नाभिसमंकुर्यादुपवीतंविचक्षणः॥कात्यायनोपि॥पृष्ठदेशेचनाभ्यांच
धृतंयद्विंदतेकटिम्॥तद्धार्यमुपवीतंस्यान्नातिलंबनचोच्छ्रितमिति
धारणेविशेषमाहभृगुः॥उपवीतंबटोरेकंद्वेतथेतरयोःस्मृते॥एक
मेवयतीनांस्यादितिशास्त्रस्यनिश्चयः॥इतरयोर्गृहस्थवनस्थयोः
॥यतीनांत्रिदंडिनां॥स्नानोत्तरमेवद्वेइत्याहवसिष्ठः॥स्नातकानांद्वि
तीयंस्यादंतर्वासस्तथोत्तरमिति॥एतद्धारणंनित्यं॥बहूनिचायुष्काम
स्येतिदेवलवचनाद्बहून्यपिधार्याणि॥बहुत्वावधिमाहकश्यपः॥त्री
णिचत्वारिपंचाष्टगृहिणःस्युर्दशापिवा॥सर्वैर्वाशुचिभिर्धार्यमुप
वीतंद्विजातिभिः॥इदंच॥सदोपवीतिनाभाव्यंसदाबद्धशिखेनच॥
विशिखोव्युपवीतश्चयत्करोतिनतत्कृतमितिभृगुस्मृतेर्नित्यं॥तत्र
पूर्वार्द्धेनपुरुषार्थत्वमुत्तरार्द्धेनक्रत्वंगत्वमिति॥विशेषमाहमनुः॥उ
द्धृतेदक्षिणेपाणावुपवीत्युच्यतेद्विजः॥सव्येप्राचीनआवीतीनिवी
तीकंठसज्जने॥असमासश्छांदसः॥स्मृतिसारेशल्यमन्यकृतमपिग्रा
ह्यमित्युक्तं॥छेदेविनाशेवास्नातःकन्ययानिर्मितंशुभं॥विधवाद्याभि
रथवासूत्रंगृह्णीतवैमुनिरिति॥मेखलादीनांछेदेजलमध्येप्रक्षेपःका
र्यइत्याहमनुः॥मेखलामजिनंदंडमुपवीतंद्विजातिभिः॥अप्सुप्रास्यवि
नष्टानिगृह्णीतान्यानिमंत्रवदिति॥मंत्रवदिति॥उपनयनकालेयैर्मंत्रै
र्धृतानितैर्मंत्रैर्गृह्यंते॥इत्युपवीतनिर्णयः॥इत्युपनयनं॥अथपुनरु
पनयनेविशेषमाहाश्वलायनः॥अथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननं
चानिरुक्तंपरिदानंकालश्चतत्सवितुर्वृणीमहइतिसावित्रीमिति॥कृताकृतंवै
कल्पिकं॥अथोयेनिरुक्तंनकर्तव्यमित्यर्थः॥कालनियमोपिनास्तीत्यर्थः॥पराशरः
॥अजिनंमेखलादंडोभैक्ष्यचर्याव्रतानिच॥निवर्त्तंतेद्विजातीनांपुनःसंस्का
रकर्मणीति॥इदंचपुनरुपनयनंवेदांतराध्ययनंचिकीर्षुःकुर्यादितिहरद
त्तः॥आहाश्वलायनः॥अध्वर्यूणांसामगानामृचमध्येतुमिच्छतो॥
क्रियास्यात्परिदानांतादीक्षादिनेविधीयते॥ऋचंऋग्वेदं॥परिदानमादि
त्यायव्रतपतयेब्रूतेददामीतिविहितं॥अन्येतुयत्रपुनःसंस्कारोविधी
यतेतत्रापीदमेवेतिकर्त्तव्यतेति॥अथपुनरुपनयननिमित्तानि॥भर
द्वाजः॥विनर्त्तुनावसंतेनकृष्णपक्षेगलग्रहे॥उपनीतस्त्वनध्यायेपुनः

संस्कारमर्हति ॥ अपराण्हे चोपनीतः पुनः संस्कारमर्हतीति ॥ पराशरः ॥
अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ॥ पुनःसंस्कारमर्हति त्रयो
वर्णा द्विजातयः ॥ विष्णुः ॥ विड्वराहग्रामकुक्कुटगोमांसभक्षणे शुद्धि
जातीनां प्रायश्चित्तांते पुनःसंस्कारं कुर्यादिति ॥ लशुनं गृंजनं जग्ध्वा
पलांडुं च तथा शुनः ॥ उष्ट्रमानुषकेभाश्वान्रासभीक्षीरभोजनात्
॥ उपायनं पुनः कुर्यान्न तप्तकृच्छ्रं चरेन्मुहुः ॥ देशांतरंगतस्यौर्ध्वदैहिके
कृते प्रवसतः पुनरायाति तत्रोक्तं संग्रहे ॥ जीवन्यदि समागच्छेद् घृत
कुंभे निमज्ज्य तं ॥ पुनरुत्थाप्य पित्वाऽस्य जातकर्मादि कारयेदिति ॥
बौधायनः ॥ सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः ॥ अगमनेनु
न दोषः ॥ अंगवंगकलिंगांश्च सौराष्ट्रमगधांस्तथा ॥ तीर्थयात्रां वि
ना गत्वा पुनःसंस्कारमर्हतीति श्लोकगौतमोक्तेः ॥ इति पुनरुपनय
ननिमित्तानि ॥ अथ ब्रह्मचारिधर्माः ॥ याज्ञवल्क्यः ॥ गुरुं चैवाप्युपासी
त स्वाध्यायार्थं समाहित इति ॥ आश्वलायनः ॥ अंजनाभ्यंजने क्षौरं
गंधपुष्पासनान्व्रती ॥ वर्जयेत्स्वादु केवलं त्रयानोष्णीषरथादिकान् ॥
न शयीतांतरिक्षे तु नाशुचौ न परैः सह ॥ न वासीतन नग्नश्च नालोके
विभूषाकृती ॥ नालीकं नालिकेरकमंडलु मिति ॥ धर्मप्रकाशे ॥ मनसा
पि न चोल्लंघ्या गुरोराज्ञा कथंचन ॥ गुरुवद्गुरुपत्नीषु तत्पुत्रादिषु सर्व
दा ॥ प्रत्यक्षे वा परोक्षे वा चरेत प्रथमाश्रमी ॥ वेदोदितव्रतैरन्यान्व्रता
नन्यान्न संचरेत् ॥ न स्नायात्सर्वतीर्थेषु न भुंजीयादितस्ततः ॥ तीर्थया
त्रां न कुर्यादित्यर्थः ॥ भैक्ष्यमाहृत्य भुंजीयात्सायंप्रातर्गुरौ वसन् ॥ दे
वर्षिपितृपूजां च कुर्याद्वा गुर्वनुज्ञया ॥ अच्छिन्नान्धारयेन्नित्यं दंडा
जिनकमंडलून् ॥ यज्ञसूत्रपवित्रे च मेखलां च गुरौ वसन् ॥ न शावः
सूतके स्यातां मातापित्रोर्मृतावृते ॥ व्रतिनश्चोत्सवालोकः श्राद्धान्न
च न शस्यते ॥ न भक्षयेच्चतांबूलं मद्यं मैथुनमेव च ॥ वर्जयेल्लशुनं ल
जान्लाजापूपादिकान्व्रती ॥ चरित्वा चतुरो वेदान्स्त्रीन्द्वौ चैकमथापि वा
॥ तोषयेद्दक्षिणाभिस्तु गुरुं भक्त्या विचक्षण इति ॥ सुमंतुः ॥ ब्रह्मच
र्येन पोभैक्ष्यं संध्ययोरग्निकर्म च ॥ स्वाध्यायं गुरुवृत्तिश्च नवर्षेयं ब्र
ह्मचारिणः ॥ व्यासः ॥ जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनीति ॥

गुरुसेवायाःफलमाहशंखः॥ नस्नानेननहोमेननैवाग्निपरिचर्यया॥ब्र
ह्मचारीदिवंयातिसयातिगुरुपूजनात्॥मनुः॥अधःशय्यासनंचास्य
नित्यंस्याद्गुरुसन्निधौ॥गुरोश्चचक्षुर्विषयेनयथेष्टासनोभवेत्॥प्रसा
रणादिकंनकुर्यादित्यर्थः॥अत्रनित्यग्रहणाद्ब्रह्मचर्यान्तरकालमप्येत
दनुवर्त्ततएव॥समासनमप्यनुजानातिकश्चिद्विष्णुः॥नास्यैकासनो
भवेदन्येशिलाफलकनौयानेभ्यइतिमनुः॥गुरोर्यत्रपरीवादोनिंदावापि
प्रवर्त्तते॥कर्णौतत्रपिधातव्यौगंतव्यंवाततोन्यतः॥सदोषकीर्त्तनंपरी
वादः॥असदोषोक्तिर्निंदा॥निंदादिकरणेफलमाहसएव॥भवेत्खरःप
रीवादाच्छ्वावैभवतिनिंदकः॥परिभोक्ताकृमिर्भवतिकीटोभवतिमत्स
री॥परिभोक्ताअदत्तगुरुदानभोक्ता॥हारीतः॥ऋचंवापदंवार्धर्चंपा
दंवायदिवाक्षरं॥सकाशाद्यस्यगृण्हीयान्निपतंतस्यगौरवं॥मनुः॥
नोदाहरेदस्यनामपरोक्षमपिकेवलं॥नचैवास्यानुकुर्वीतगतिभाषि
तचेष्टितमिति॥केवलंनामनग्राह्यंकिंतुउपाध्यायादिविशिष्टं॥उक्तंचगौ
तमेन॥नामगोत्रेगुरोःसमानतोनिर्दिशेदिति॥मानेनसहितंसमानं॥
याज्ञवल्क्यः॥मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं॥भास्करा
लोकनाश्लीलपरिवादादिवर्जयेदिति॥मधुक्षौद्रं॥आम्लपनसमृतौ।
क्षौद्रग्रहणात्॥शुक्तंनिष्ठुरवाक्यं॥यदिमांसभक्षणान्निवर्त्त्योव्याधित
स्तागुरोरुच्छिष्टंभक्षणीयं॥सचेद्व्याधीयीतकामंगुरोरुच्छिष्टंभेषजा
र्थंसर्वंप्राश्नीयादिति॥आपस्तंबोपि॥पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभो
क्तव्यमिति॥मनुः॥वर्जयेन्मधुमांसंचगंधमाल्यंरसान्स्त्रियः॥शुक्ता
निचैवसर्वाणिप्राणिनांचविहिंसनं॥अभ्यंगमंजनंचाक्ष्णोरुपानच्छ
त्रधारणं॥कामनमुपघातंपरस्यचेति॥प्रेक्षणालंभमितिमैथुनशंका
यामेव॥यथोक्तंगौतमेन॥प्रेक्षणालंभनेमैथुनशंकायामिति॥एवंच
मान्यस्त्रीणांप्रेक्षणमालंभःसंभाषणंवानदोषाय॥आलंभःस्पर्शः॥
मनुर्विशेषमाह॥मुंडोवाजटिलोवास्यादथवास्याच्छिखाजटीइति॥अ
थयःपक्षःमुंडः॥जटी॥शिखाजटीवेति॥गौतमोपि॥मुंडीशिखीवेति॥
कात्यायनोपि॥सशिखंवपनंकार्यमास्नानाद्ब्रह्मचारिणइति॥सर्वमुंडत्वं
सामगविषयमितिकेचित्॥तथाचविष्णुपुराणेज्ञापकं॥एतेलूनशिखास्त

स्यदर्शनैरविरोद्धृतैः॥कुशकाशाविराजंतेवटवःसामगाइवेति॥यमः॥
खट्वासनंचशयनंवर्जयेद्दंतधावनं॥स्वपेदेककुशेष्वेवनरेतःस्कंदयेत्
क्वचित्॥कूर्मपुराणे॥नादर्शंवैसमीक्षेतनाचरेद्दंतधावनमिति॥या
ज्ञवल्क्यः॥ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि॥ब्राह्मणःकाममश्नी
याच्छ्राद्धेव्रतमपीडयन्निति॥ब्रह्मचर्येस्थितोब्राह्मणादिरेकमेकसंब
धि अन्ननाद्यात्॥एकस्यान्नंनगृह्णीयात्॥किंतुबहूनांब्रह्मचारीतुश्रा
द्धेनिमंत्रितःसन्मधुमांसादिवर्जंएकस्यापिगृहेऽश्नीयात्॥अनेनतत्रा
यतेश्राद्धव्यतिरेकेणैकस्यान्नंनगृह्णीयादिति॥तथा॥अग्निकार्यंततः
कुर्यात्संध्ययोरुभयोरपीति॥ततःसंध्योत्तरंसंध्याविधिश्चाचारमयू
खेविस्तरेणवक्ष्यते॥कदाचित्प्रातःसंध्योत्तरमकृतस्याग्निकार्यस्यप्रा
तर्भोजनेगौणकालमाहसएव॥कृताग्निकार्योभुंजीतवाग्यतोगुर्वनु
ज्ञयेति॥सायमेवाग्निकार्यमित्याहापस्तंबः॥सायमेवाग्निपूजेत्येक
इति॥समिदाहरणमनुराह॥पुराहाहृत्यसमिधःसन्निदध्याद्विहाय
सि॥सायंप्रातश्चजुहुयात्ताभिरग्निमतंद्रितइति॥विहायसिमंडपा
दाविति धर्मप्रकाशे॥आपस्तंबः॥नास्तमितेसमिद्धारोगच्छेदिति॥
समित्परिमाणमाहकात्यायनः॥नांगुष्ठादधिकाकार्यासमित्स्थू
लतयाक्वचित्॥नवियुक्तात्वचाचैवनसकीटानपाटिता॥प्रादेशा
न्नाधिकानोनातथानस्याद्विशाखिका॥विशीर्णाविदलाह्रस्वावक्राः
ससुषिराःकृशाः॥दीर्घाःस्थूलाश्चसमिधोवर्जनीयाःफलप्रदाः। अग्निका
र्याकरणेप्रायश्चित्तमृग्विधाने॥मानस्तोकेजपेन्मंत्रंशतसंख्यंशिवा
लये॥अग्निकार्यंविनाभुंक्तेनपापंब्रह्मचारिणइति॥इत्यग्निकार्यं॥त
तोभिवादनमुक्तंयाज्ञवल्क्येन॥ततोभिवादयेद्वृद्धानसावहमितिब्रुव
न्निति॥ततोग्निकार्यानंतरं॥अत्राग्निकार्याभिवादनयोरंगांगित्वाभा
वात्कदाचिदग्निकार्याकरणेपिअभिवादनंकार्यमेव॥वृद्धामान्याःत
त्रमान्योगुरुः॥तंविशिनष्टियाज्ञवल्क्यः॥सगुरुर्यःक्रियाःकृत्वावेद
मस्मैप्रयच्छतीति॥क्रियानिषेकाद्याः॥मनुरपि॥निषेकादीनिकर्मा
णियःकरोतियथाविधि॥संभावयतिचान्नेनसविप्रोगुरुरुच्यतइति।
एवंचपितैवगुरुः॥निषेकादिक्रियाकर्तृत्वात्तस्य॥एवंचोपनीयवेदः

वेदमाचार्यःसउदाहृतइति॥आचार्यस्योपनेतृत्वंपित्रभावेद्रष्टव्यं॥
यद्यपिक्षत्रियस्यवृत्त्यर्थत्वेनाप्राप्तमध्यापनंतथाप्यापदिधर्मार्थमा
प्तमेव॥अतश्चपितैवोपनयेत्पुत्रमितिक्षत्रियादिपरत्वापदिप्रवर्त्तनंत
एवअयंपरंविशेषः॥याज्ञवल्क्यवाक्येसंज्ञासंबंधस्त्रैवर्णिकान्वि
षयीकरोति।नतुवाक्यंतुविप्रग्रहणात्तमेवविषयीकरोति॥एवंचवि
प्रसान्नसंभावनाकरणेगुरुत्वंयद्यपिमनुवाक्यं नप्रतिपादयतित
थापियाज्ञवल्क्यवचनात्तत्सिद्धिः॥एवंवर्णिकानामध्येयस्यैवैतद्व
चनद्वयप्रतिपादितानिनिमित्तानिनसंतिनतस्यगुरुशब्दवाच्यत्वं॥
शूद्राणांतुनकदाप्येतद्वचनद्वयप्रतिपादितंगुरुत्वंसंभाव्यते॥नन्वेवं
शूद्राणांगुरुतल्पगमनप्रायश्चित्तंनस्यादितिचेत् यद्यपिगुरुतल्प
गमनजन्यंनस्यात्तथापिमातृगमनजन्यंस्यादेवेतिनविरोधः॥यद्वा॥
उपाध्यायःपिताज्येष्ठोभ्रातानैवमहामतिः॥मातुलश्वशुरस्त्रातामा
तामहपितामहौ॥वर्णज्येष्ठःपितृव्यश्चपुंस्येतेगुरवःस्मृताः॥माताम
तामहीगुर्वीपितुर्मातुश्चसोदराः॥पितामहीस्वसाज्येष्ठाधात्रीचगुर
वःस्त्रियइति॥देवलवाक्येनकेवलस्यापिपितुर्गुरुसंज्ञाकरणात्त
द्भार्यागमनेभविष्यत्येव॥गुरुतल्पगमनप्रायश्चित्तं॥आचार्यंविशि
नष्टिमनुः॥उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः॥संकल्पंस रह
स्यंचतमाचार्यंप्रचक्षतेइति॥रहस्यमुपनिषदः॥उपाध्यायंविशि
नष्टिसएव॥एकदेशंतुयोवेदंवेदांगान्यथवापुनः॥योध्यापयतिवृत्त्य
र्थमुपाध्यायःसउच्यतइति॥शंखोपि॥भृतकाध्यापकोयस्तुसउपा
ध्यायउच्यतइति॥मासेदिनेवर्षेवाएतावद्द्रव्यमितिपरिच्छिद्ययोध्या
पयतिसभृतकाध्यापकः॥विष्णुरपि॥यस्त्वेनंमूल्येनाध्यापयेत्तमु
पाध्यायमिति॥विद्यादितिशेषः॥एषुचमध्येमातामान्यतरेत्युक्तं
याज्ञवल्क्येन॥एतेमान्यायथापूर्वमेभ्योमातागरीयसीति॥धर्मप्र
काशेपुराणेतु॥द्वौगुरूपुरुषस्येहपितामाताचधर्मतः॥तयोरपिपिता
श्रेयान्बीजप्राधान्यदर्शनात्॥अभावेबीजिनोमातातदभावेतुपूर्वज
इति॥पितुर्गरीयस्त्वमुक्तं॥अत्रेच्छयाविकल्पःतुल्यकल्पत्वंवा॥अ
न्यंविशेषमाहविष्णुः॥बालेसमानवयस्यध्यापकेगुरुवद्वर्तेतेति॥बा

लइतिनावगणनीयइत्यर्थः। इतिगुर्वादिनिरूपणं॥ अभिवादनप्रका
रमाहमनुः॥ अभिवादात्परंविप्रोज्यायांसमभिवादयन्॥ असौनामा
हमस्मीतिस्वंनामपरिकीर्तयेत्॥ अभिवादादभिवादयेइतिपदात्प
रंस्वंनामदेवदत्तोहंभोइत्युल्लेखः। एकहस्तेनाभिवादनकरणेदोष
माहविष्णुः॥ जन्मप्रभृतियत्किंचिच्चेतसाधर्ममाचरेत्॥ धर्मंतन्नि
ष्फलंयातिएकहस्ताभिवादनेइति॥ विशेषमाहात्रिः॥ दक्षिणंपाणिमु
द्धृत्यसकाममभिवादयेत्॥ श्रोत्रियेंजलिःकार्यःपादोपग्रहणंगुरो
रिति॥ एतस्माच्चवाक्यादेकहस्तेनाप्यभिवादनंगम्यते॥ एवंचपूर्वो
क्तदोषश्रवणंश्रोत्रियादौज्ञेयं॥ पादोपसंग्रहणप्रकारमाहमनुः॥ व्य
त्यस्तपाणिनाकार्यमुपसंहरणंगुरोः॥ सव्येनसव्यःस्प्रष्टव्योदक्षिणेन
तुदक्षिणः॥ गुरुचरणादितिशेषः॥ बौधायनः॥ श्रोत्रेसंस्पृश्येतिविशेष
माह। अन्यविशेषमाहमनुः॥ गुरोर्गुरौसन्निहितेगुरुवद्वृत्तिमाचरे
दिति॥ अथप्रत्यभिवादनमुक्तंमनुना॥ आयुष्मान्भवसौम्येतिवा
च्योविप्रोभिवादने॥ अकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः॥ अत्र
ननाम्नोंतेऽकारोविधीयते॥ किंतुयोनामांतेऽकारस्तमुद्दिश्यप्लुतमात्रं
विधीयते॥ नाम्नांचसर्वेषामकारांतत्वाभावादकारग्रहणंनामांतस्व
रोपलक्षणमितिव्याख्यातृसंप्रदायः॥ सौम्येतिनामग्रहणार्थंतथा
चनामांतस्वरःप्लुतोभवतिशर्मादिप्रयोगोपिकार्यइतिकेचित्॥ ए
वंचायुष्मान्भवदेवदत्ता३शर्मन्नितिप्रयोगः॥ केचित्तुशर्मशब्दांतग
ताऽकारंप्लुतंपठंति॥ तच्चिन्त्यं। शर्मशब्दस्यनामांतर्गतत्वाभावात्॥ तदं
तर्गतौकेवलशर्मप्रयोगाभावादवश्यवक्तव्यत्वापत्तेर्व्यंजनपरस्याक्षरनामानु
पपत्तेः॥ इदंचशूद्रस्यनभवति॥ प्रत्यभिवादेऽशूद्रइतिस्मृतिरूपपा
णिनिसूत्रात्॥ अनेनचज्ञायतेशूद्रंप्रत्यपिप्रत्यभिवादनंप्राप्तमिति
॥ ब्राह्मणस्यक्षत्रियादीनामभिवादनेप्रायश्चित्तंकथंभवेत्॥ ब्राह्म
णानांदशाहेवाअभिवाद्यविशुध्यति॥ अभिवाद्यद्विजःशूद्रंसचैलं
स्नानमाचरेत्॥ ब्राह्मणोभिवादयेत्॥ क्वचिदभिवादनमाहशातातपः
॥ उदक्यांसूतिकांनारींभर्तृघ्नींगर्भघातिनीं॥ अभिवाद्यद्विजोमोहाद
होरात्रेणशुध्यति॥ अनेननिषेधेनज्ञायतेस्त्रियोप्यभिवाद्याइति॥ य

प्रोक्तंमनुना॥कामंतुगुरुपत्नीनांयुवतीनांयुवाभुवि॥विधिवद्वंदनंकु
र्यादसावहमितिब्रुवन्निति॥विशेषउक्तस्तेनैव॥योनवेत्त्यभिवादस्यवि
प्रःप्रत्यभिवादनं॥नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः॥एतच्चा
भिवादनमधिकवयसामेवकार्यं॥ज्यायांसमभिवादयेदितिस्मृतेः॥त
था॥कुशलंब्राह्मणंपृच्छेत्क्षत्रबंधुमनामयं॥वैश्यंक्षेमंसमागम्यशू
द्रमारोग्यमेवचेति॥ब्राह्मणेनस्वस्मात्कनिष्ठानांक्षत्रियादीनांवाऽशी
र्देयेत्युक्तंभविष्यत्पुराणे॥ब्राह्मणःसर्ववर्णानांस्वस्तिकुर्यादितिस्थि
तिरिति॥विशेषउक्तःशातातपेन॥पाखंडंपतितंव्रात्यंमहापातकिनंश
ठं॥नास्तिकंचकृतघ्नंचनाभिवादेत्कथंचन॥धावंतंचप्रमत्तंचमंत्रोच्चा
रकृतंतथा॥भुंजानमाचमनार्हंनाभिवादेत्कथंचन॥वमंतंजृंभमाणंच
कुर्वंतंदंतधावनं॥अभ्यक्तशिरसंचैवस्नास्यंतंनाभिवादयेत्॥जम
दग्निः॥देवताप्रतिमांदृष्ट्वायतिंचैवत्रिदंडिनं॥नमस्कारंनकुर्याच्चेद
होरात्रेणशुद्ध्यति॥इत्यभिवादनप्रत्यभिवादननिर्णयः॥अथमान्य
तानिमित्तानि॥याज्ञवल्क्यः॥विद्याकर्मवयोबंधुवित्तैर्मान्यायथाक्रमं
॥अत्रपूर्वपूर्वस्यगरीयस्त्वंज्ञेयं॥उक्तंचगौतमेन॥श्रुतंसर्वेभ्योगरी
यस्तन्मूलत्वाद्धर्मस्येति॥मनुरपि॥पंचानांत्रिषुवर्णेषुभूयांसिगुण
वंतिच॥यत्रस्युःसोत्रमानार्हःशूद्रोपिदशमींगतइति॥दशमींगत
इतिनवतेरूर्ध्वावस्थांप्राप्तइत्यर्थः॥पंचानांविद्यादीनां॥याज्ञवल्क्यो
पि॥एतैःप्रभूतैःशूद्रोपिवार्द्धकेमानमर्हतीति॥मार्गापसरणेविशेषमा
हमनुः॥चक्रिणोदशमीस्थस्यरोगिणोभारिणःस्त्रियाः॥स्नातकस्य
चराज्ञश्चपंथादेयोवरस्यच॥वरोविवाहोद्यतः॥भारतेपि॥अष्टाव
क्रःपथिराज्ञासमेत्यप्रोत्सार्यमाणोवाक्यमिदंबभाषे॥अंधस्यपंथा
बधिरस्यपंथाःस्त्रियःपंथाभारवाहस्यपंथाः॥राज्ञःपंथाब्राह्मणेनासमे
त्यसमेत्यतुब्राह्मणस्यैवपंथाः॥इति॥इतिमान्यतानिमित्तं॥अथा
ध्ययनधर्माः॥मनुः॥चर्याविशेषैर्विविधैर्व्रतैश्चश्रुतिचोदितैः॥वेदःकृ
त्स्नोऽधिगंतव्यःसरहस्योद्विजन्मनेति॥रहस्यमुपनिषत्॥श्रुतौतस्मा
त्स्वाध्यायोऽध्येतव्यइति॥स्वःस्वकीयोध्यायःशाखा॥तदुक्तं॥अत्रस्वा
ध्यायशब्देनस्वशाखैवकातुगृह्यतइति॥अनेनचस्वाध्यायाध्ययनस्य

प्राथम्यमावश्यकंचोक्तंनतुद्वितीयवेदाध्ययनं।एवंचावेदानधीत्यवे
दौवावेदंवापियथाक्रममित्यविरुद्धं॥अत्रकेचित्॥बहूनांवेदानाम
ध्ययनेपिस्ववेदसंबंधिनीद्वितीयाशाखानाध्येतव्येतिव्याचक्षते॥
यथाआश्वलायनेनशांखायनशाखेति॥तदयुक्तं॥आश्वलायनेन
यजुःशाखाध्येतव्यानशांखायनशाखेत्यत्रमानाभावात्॥नचस्वा
ध्यायइत्यत्रैकवचनान्नसाध्वर्मीमांसारीत्योपादेयगत्वात्समुनात्र
त्रैवद्वितीयपश्वालंभवत्द्वितीयशाखाःनध्ययनमितिवाच्यं॥तत्र
हिएकत्वंप्रकृत्यत्वयिव्यावर्त्तकंसंभवतिनत्वेवमत्राःस्वाध्यायस्यैक
त्वेनपरिज्ञानत्वात्॥नह्याकाशइत्यत्रैकत्वंव्यावर्त्तकंभवति॥अतोत्र
एकवेदस्यशाखानामध्येयोऽन्यांसमाश्रयेत्॥स्वशाखांसंपरित्यज्य
शाखारंडःसउच्यतइति॥अन्यांस्वशाखाभिन्नांयत्रहिएकवेदशाखा
नांमध्येस्वीयांपरित्यज्ययोऽन्यामधीतेसशाखारंडइतिवदतातामधी
त्यअन्यशाखाध्ययनमनुज्ञातंभवति॥सएव॥अधीत्यशाखामात्मी
यांपरशाखांततःपठेदिति॥तथाषडंगोवेदोध्येयोज्ञेयश्चेति॥विशेष
माहकात्यायनः॥स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंतुयः॥कर्तुमिच्छ
तिदुर्मेधामोघंतस्यविचेष्टितमिति॥इदंस्वशाखोक्तविरुद्धंनकार्यमित्ये
वंपरं॥यथोक्तंतेनैव॥यन्नाम्नातंस्वशाखायांपारक्यमविरोधियत्॥वि
द्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकंयथेति॥अध्ययनधर्ममाहमनुः॥प्रा
क्कूलान्पर्युपासीनःपवित्रैश्चैवपावितः॥प्राणायामैस्त्रिभिःपूतस्ततओं
कारमर्हतीति॥प्राक्कूलान्प्रागग्रान्॥पवित्रमाहगौतमः॥प्राणोपस्पर्श
नंदर्भैरिति॥प्राणाइंद्रियाणिसंवर्त्तः॥प्रणवंप्राक्प्रयुंजीतव्याहृतीस्त
दनंतरं॥सावित्र्याश्चानुवचनंततोवृत्तांतस्थापिते॥ओंकारपूर्विकास्ति
स्रोमहाव्याहृतयोव्ययाः॥त्रिपदाचैवगायत्रीविज्ञेयंब्रह्मणोमुखं॥ति
स्रःभूर्भुवःस्वः॥ब्रह्मणोवेदस्य।मुखंआरंभेपठनीयमित्यर्थः।ब्राह्म
णःप्रणवंकुर्यादादावंतेचसर्वदा॥इतिवचनादंतेप्रणवमात्रं।गौतमः।
प्राङ्मुखोदक्षिणतःशिष्यउदङ्मुखोवेति।मनुः॥अध्येष्यमाणस्त्वाचां
तोयथाशास्त्रमुदङ्मुखः॥ब्रह्मांजलिकृतोध्याप्योलघुवासाजितेंद्रि
यइति।लृदप्रयोगेणाचमनमध्ययनांगं॥शूद्रसन्निधौनाध्येयमित्या

हव्यासः॥ अनध्यायेष्वधीतंयच्चशूद्रस्यसंनिधौ॥ प्रतिग्रहनिमित्तं यत्तत्सर्वमपत्यत इति॥ अस्माद्ध्ययनेलब्धिर्भविष्यतीत्याशायापि पठितं॥ नारदः॥ पुस्तकप्रत्ययाधीतंनाधीतंगुरुसन्निधौ॥ भ्राजतेनस भामध्येजारगर्भइवस्त्रियाः॥ नाविस्पष्टमधीयीतनशूद्रजनसन्निधौ॥ ननिशांतेपरिश्रांतोब्रह्माधीत्यपुनःस्वपेत्॥ नारदः॥ हस्तेनाधीयमानस्तुस्वरवर्णान्प्रयोजयन्॥ ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते॥ हस्तस्वराध्ययनंतुसामयजुर्वेदिनां॥ व्यासः॥ मेखलाजिनदंडानां धारणैर्ब्रह्मचारिभिरिति॥ शुश्रूषाफलमाहसएव॥ यथाखनन्खनित्रेणनरोवार्यधिगच्छति॥ तथागुरुगतांविद्यांशुश्रूषुरधिगच्छति॥ नारदः॥ अहेरिवगणाद्भीतःसौहित्यान्नरकादिव॥ राक्षसीभ्यइवस्त्रीभ्यः सविद्यामुपगच्छतीति॥ सौहित्यंतृप्तिः॥ लघुव्यासः॥ ऋक्पादमप्यधीयीतमार्गेणोक्तेनधर्मवित्॥ नत्वेवचतुरोवेदानन्यायेनकदाचन॥ वेदविप्लावनात्तेनवरंमौनंसमाश्रितं॥ वेदविप्लावनाद्भीतोनरकंयात्यधोमुखइति॥ वेदविद्योक्तंधर्मप्रकाशे॥ योऽर्थार्थीमोहिजेद्यात्सठेच्चैवाः विधानतः॥ अनध्यायेचतंप्राहुर्वेदविप्लावकंद्विजाः॥ विद्यानाशहेतुन्नारदआह॥ द्यूतंपुस्तकशुश्रूषानाटकासक्तिरेवच॥ स्त्रियस्तंद्रीच निद्राचविद्याविघ्नकराणिषट्॥ पुस्तकस्यपुराणादेःशुश्रूषाश्रोतुमिच्छा॥ अन्यान्यपिलोकतोविद्यानाशकारणान्यवगंतव्यानि॥ इत्यध्येतृधर्माः॥ गुरुधर्मानाहयाज्ञवल्क्यः॥ कृतज्ञाऽद्रोहिमेधाविशुचिकल्यानसूयकाः॥ अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः॥ कल्योनीरोगइति॥ धर्मप्रकाशेमनुः॥ आचार्यपुत्रःशुश्रूषुर्ज्ञानदोधार्मिकःशुचिः॥ आप्तःशक्तोर्थदःसाधुःस्वाध्याप्यादशधर्मतः॥ तथा॥ धर्मार्थौयत्रनस्यातांशुश्रूषावापितद्विधा॥ नतत्रविद्यावक्तव्याशुभंबीजमिवोखरे॥ यत्रविहिताःनतुष्ठापकायनास्तिकायचाध्यापयतितत्रधर्माभावः॥ नारदः॥ गुरुशुश्रूषयाविद्यापुष्कलेनधनेनवा॥ अथवाविद्ययाविद्याचतुर्थंनोपलभ्यतइति॥ चतुर्थंसाधनं॥ यमः॥ सततंप्रातरुत्थायदंतधावनपूर्वकं॥ स्नात्वाहुत्वाथशिष्येभ्यःकुर्यादध्यापनंद्विजइति॥ आपस्तंबः॥ शयानस्त्वाध्यापनंवर्जयेदिति॥ मनुः॥ अध्येष्यमाणस्तुगु

रुर्नित्यकालमतंद्रितः ॥ अधीष्व भोइतिब्रूयाद्विरामोस्त्विति चारमेत् ॥
ताडनंतुशिरसिनकार्यं ॥ यथोक्तंमनुना ॥ पृष्ठतस्तुशरीरस्यनोत्तमांगे
कथंचन ॥ अतोन्यथातुप्रहरन्प्राप्तः स्याच्चोरकिल्बिषं ॥ विद्यावतःशा
र्थितस्याःध्यापनमावश्यकं ॥ येहिविद्यामधीत्यार्थिनेनप्रब्रूयुर्नसध
र्मस्याद्द्विजातयः ॥ प्रब्रूयाद्ब्राह्मणस्तेषांनेतराविति निश्चयइतिमनु
वचनाद्ब्राह्मणेनैवकार्यं ॥ इतरौराजवैश्यौ ॥ अत्रवाक्यत्रयं ॥ त्रयोव
र्णाब्राह्मणादधीयीरन् । वक्ष्यमाणवचनस्वरसाद्ब्राह्मणादित्यध्याह
र्त्तव्यः ॥ ब्राह्मणएवप्रब्रूयादितिद्वितीयं ॥ नेतराविति प्रतिषेधरूपंतृती
यं ॥ एवंपराशस्त्रियादिरध्यापयतितदातस्याध्येतुश्चदोषः ॥ आपत्सु
भयोर्दोषोनास्तीत्याहमनुः ॥ अब्राह्मणादध्ययनमापत्कालेविधीय
ते ॥ अनुव्रज्यातुशुश्रूषायावदध्ययनंगुरोरिति ॥ अनुव्रज्यशुश्रूषेत्य
नुगमनमात्रं ॥ कार्यंनपादप्रक्षालनादि ॥ इयंचापद्ब्राह्मणाध्यापकाभा
वरूपाध्येतुः ॥ गौतमोपि ॥ आपत्कल्पोब्राह्मणाद्ब्राह्मणस्यविद्योप
योगोनुगमनंशुश्रूषासमाप्ते ब्राह्मणोगुरुरिति ॥ मनुरपि ॥ श्रद्दधान
शुभांविद्यामाददीतावरादपि ॥ अंत्यादपिपरंधर्मंस्त्रीरत्नंदुष्कुला
दपीति ॥ वेदाध्ययनस्यश्रैष्ठ्यमाह ॥ याज्ञवल्क्यः ॥ यज्ञानांतपसांच
शुभानांचैवकर्मणां ॥ वेदएवद्विजातीनांनिःश्रेयसकरःपरइति ॥ वि
द्यादानस्यफलमाहसएव ॥ सर्वधर्ममयंब्रह्मप्रदानेभ्योधिकंयतः ॥
तद्ददत्समवाप्नोतिब्रह्मलोकंसनातनमिति ॥ इतिगुरुधर्माः ॥ अथान
ध्यायाः ॥ तेचनित्यनैमित्तिकभेदेनद्विधा ॥ तत्रनित्यास्तावदुच्यते ॥ मनुः
॥ अमावास्यागुरुंहंतिशिष्यंहंतिचतुर्दशी ॥ ब्रह्माष्टमीपौर्णमास्यौत
स्मात्ताःपरिवर्जयेदिति ॥ तथा ॥ अमावास्याचतुर्दश्योःपौर्णमास्यष्टका
सुचेति ॥ अष्टमीत्वेनाष्टकानामुपादानाद्दोषातिशयार्थंपुनर्ग्रहणं ॥ के
चित्तु ॥ अष्टमीष्वित्येवपठंति ॥ अहोरात्रंचायमनध्यायः ॥ याज्ञवल्क्ये
नद्युनिशमित्यनुवृत्तौचतुर्दश्यादीनामुपादानात् ॥ रामायणेहनुमद्वा
क्यं ॥ सास्वभावेनतन्वंगीतद्वियोगाद्विशेषतः ॥ प्रतिपत्पाठशीलस्यविद्ये
वतनुतांगतेति ॥ हारीतोपि ॥ प्रतिपत्सुचतुर्दश्यामष्टम्यांपर्वणोर्द्वयोः
श्वोऽनध्यायेऽद्यशर्वर्यांनाधीयीतकदाचनेति ॥ तथा ॥ प्रदोषेषुत्रयोद

श्यां नाध्येयं प्रतिपत्सु चेति॥ त्रिमुहूर्त्तः प्रदोषः स्याद्भानावस्तंगते सतीत्यु
क्तप्रदोषे॥ यत्तु प्रदोष उक्तो बृहन्मनुना॥ चतुर्थ्यां च त्रयोदश्यां सप्तम्या
मर्धरात्रतः॥ अर्वाक् नाध्ययनं कुर्याद्यदीच्छेत्तस्य धारणं॥ स्मृत्यर्थ
सारे विशेषः॥ चतुर्थ्याः पूर्वरात्रे तु नवनाडीषु दर्शने॥ नाध्येयं पूर्वरात्रे स्या
त्सप्तमी च त्रयोदशी॥ अर्धरात्रात्सुराच्चेत्स्यान्नाध्येयं पूर्वरात्रके इति।
पूर्वं चतुर्थ्यामर्द्धरात्रतोऽर्वाक् नाध्येयमिति तावत्पर्यंतं चतुर्थीसत्वे॥ अ
न्यथा नवनाडीपर्यंतं॥ यत्तु पूर्वेणवचनेनार्द्धरात्रात्प्राक् दोषेऽवगते पुनर
त्र नवनाडीग्रहणं दोषातिशयार्थं॥ दक्षः॥ प्रदोषपश्चिमौ यामौ वेदाभ्या
सेन तौ नयेत्॥ यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥ बौधायनः॥ प्रातः
संध्या त्रिनाडी स्यात्सायंसंध्या तथाविधा॥ महानिशा तु विज्ञेया चतस्रो घ
टिकास्तथा॥ सायंप्रातःसंध्ययोश्च नाधीयीत महानिशि॥ तथा॥ महानि
शा तु विज्ञेया रात्रौ मध्यमयाममयोः॥ तस्यां स्नानं न कुर्वीत स्वाध्यायं पितृ
तर्पणमिति॥ अत्रापि घटिकाचतुष्टयं दोषातिशयार्थं स्मृतिचंद्रिकायां
पुराणे॥ महानवम्यां द्वादश्यां भरण्यां च महायुते॥ तथाक्षयतृतीयायां
शिष्यान्नाध्यापयेद्बुधः॥ माघमासस्य सप्तम्यां रथाख्यायां विवर्जयेदि
ति॥ महच्छब्दस्य द्वादश्यां भरण्यां च संबन्ध इति धर्मप्रकाशे॥ महान
वमी आश्विनशुक्ला। महाद्वादशी कार्त्तिकशुक्लद्वादशी॥ महाभरणी प्रौ
ष्ठपद्यनंतरेति तत्रैव॥ नारदीये॥ अयने विषुवे चैव शयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु॥ तथा॥ युगादिषु च सर्वासु
तथा मन्वंतरादिषु॥ अनध्यायं प्रकुर्वीत याश्च सोपपदास्तिथिः॥ मन्वंत
रादयो युगादयश्च श्राद्धमयूखे वक्ष्यंते॥ सोपपदा उक्ताः कालादर्शे॥
सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता॥ चतुर्थी द्वादशी माघे एताः
सोपपदाः स्मृता इति॥ यदि कदाचिदनध्यायतिथिः प्रातः सायं वा तदा
प्यनध्याय इत्याह बौधायनः॥ यस्यामनध्यायतिथिर्द्विमुहूर्त्ता परिदृश्येत त
मनध्यायं प्राहुरिति॥ दिनमध्ये परिदृश्येते सर्वैः॥ कालादर्शे स्मृतिः॥ चा
तुर्मास्यद्वितीयासु वेदाध्यायं विवर्जयेदिति॥ ता आह गार्ग्यः॥ शुचावूर्जेत
पस्ये च या द्वितीया विधुक्षये॥ चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिण

इति॥ विप्रुस्रयः कृष्णपक्षः। आषाढ्युत्तराकार्त्तिक्युत्तराफाल्गुन्युत्तरा
त्येस्यर्थः। इति नित्यानध्यायाः। अथ नैमित्तिकेषु तात्कालिकानध्यायानाह
याज्ञवल्क्यः॥ श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिस्वने॥ अमेध्यशव
शूद्रांत्यश्मशानपतितांतिके॥ देशेष्वशुचावात्मनि च विद्युत्स्तनितसंप्लवे
॥भुक्त्वार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते॥ पांसुवर्षे च दिग्दाहे संध्यानी
हारभीतिषु॥ धावतः पूतिगंधे च शिष्टे च गृहमागते॥ खरोष्ट्रयानहस्त्य
श्वनौरक्षेरिणरोहणे॥ सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुरि
ति॥ बाणो वंशः॥ शिष्टागमनेपि शिष्टाज्ञायां नानध्यायः॥ यथाह यमः॥
आगतं वास्तिथिं दृष्ट्वा नाधीयीतैव बुद्धिमान्॥ अथानुज्ञापितेतस्मि
न्नध्येतव्यं प्रयत्नत इति॥ यानं रथादि॥ इरिणमूखरं महाभूमिर्वा॥ या
वन्निमित्तं शब्दादि तावदेवानध्याय इत्यर्थः॥ मनुः॥ नित्यानध्याय ए
व स्याद्ग्रामेषु नगरेषु च॥ धर्मनैपुणकामानां पूतिगंधे च सर्वत इति॥ धर्म
स्य नैपुणं संपूर्णत्वं तत्कामयनीति॥ वसिष्ठो विशेषमाह॥ नगरेषु कामं
गोमधूकस्य कोविदारकपित्थयोः॥ श्लेष्मातकस्य च्छायायां चेति नात्का
लिकान्विदुः॥ श्राद्धपंक्तिषु विहितमंत्रभिन्नेषु श्राद्धभागेष्वनध्यायः।
विहितमंत्राः श्राद्धमयूखे वक्ष्यंते। मनुः। शयानः प्रौढपादश्च कृत्वा चैवा
वसक्थिकां॥ नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव चेति॥ प्रौढपादः
प्रसारितपादः॥ पादारोपितपादो वा॥ अवसक्थिका जानुनोर्मध्यस्य च
वंधः॥ स एव॥ नाधीयीत श्मशानांते ग्रामांते गोव्रजेपि वा॥ वसित्वा मैथु
नं वासः श्राद्धिकं प्रतिगृह्य च॥ न विवादे न कलहे न सेनायां न संगरे॥ न भु
क्तमात्रे नाजीर्णे न वमित्वा न सुक्तके॥ शास्त्रेण च क्षते गात्रे रुधिरे च प
रिस्रुते॥ सुक्तकं सुरवोद्गार इति धर्मप्रकाशे यमः॥ सामशब्दे नाथर्वयजु
षीति॥ नाधीयीतेत्यर्थः॥ आपस्तंबः॥ शाखांतरध्वनौ साम्नामनध्याय
इति गौतमः॥ अभ्रदर्शने चापर्त्तौ। अपर्त्तौ प्रावृड्भिन्नर्त्तौ॥ हेमाद्रौ स्मृ
तिः॥ गजगंडसारससिंहव्याघ्रमहापापिकृतप्रावेक्षणमनध्याय इति
।एषां यावदवेक्षणं तावदनध्याय इत्यर्थः॥ प्रचेताः। चतुष्पथवर्त्मनि महाप
थराजोद्यानेषु नाधीयीतेति। शंखः। नाधानाभियुक्तोपि यानगो न च नौगतः
।देवायतनवल्मीकश्मशानवनसन्निधौ॥ आपस्तंबः। ब्रह्माध्येष्यमाणो

मलवद्वाससेहनसंभाषितुंब्राह्मणेनसंभाष्यतयासंभाषेनब्राह्मणेनै
वसंभाष्याधीयीतेति॥यावद्ब्राह्मणसंभाषणंनकृतंतावदनध्यायमाह
मनुः॥प्रादुष्कृतेष्वग्निषुतुविद्युत्स्तनितनिःस्वने॥सज्योतिःस्यादनध्या
यःशेषेरात्रौयथादिवा॥प्रादुष्कृतेष्विति संध्योपलक्षणं॥सज्योतिरिति
सायंसंध्यायांरात्रौ॥पूर्वेविद्युत्स्तनितवर्षाणिप्रक्रांतानि॥तत्रोभयोरु
क्तं॥शेषेवर्षेयथादिवातथारात्रौ॥अहोरात्रमित्यर्थः॥वर्षेसंध्यायामेव॥
अयंसज्योतिरनध्यायःप्रावृट्काले॥यथाहपैठीनसिः॥यदावर्षास्वविवि
द्युत्स्तनितंवातदासज्योतिरिति॥अवर्षासुविद्युदादौत्रिरात्रंवक्ष्यते॥
इदंसायंसंध्यायांहारीतेन॥प्रातःसंध्यास्तनितेहोरात्रमित्युक्तत्वात्॥
स्मृत्यर्थसारे॥काकोलूकमूषककुक्कुटमंडूकाद्यंतरागमनं॥दिनेचेद्दिनां
तंरात्रौचेद्रात्र्यंतमनध्यायइति॥गौतमः॥श्मशानग्रामांतमहापथाशौ
चेष्वनध्यायइति॥इतिसज्योतिरनध्यायः॥अहोरात्रानध्यायमाहया
ज्ञवल्क्येन॥संध्यागर्जितनिर्घातभूकंपोल्कानिपातने॥समाप्यवेदंद्यु
निशमारण्यकमधीत्यच॥पशुमंडूकनकुलश्वाहिमार्जारमूषकैः॥कृ
तेंतरेत्वहोरात्रंशक्रःपार्वणसंबंधि॥एकोद्दिष्टेवक्ष्यते॥नवश्राद्धेन्नजर
णपर्यंतमनध्यायः॥शातातपः॥अष्टकासुत्वहोरात्रमुल्कासुचमहो
त्सवेइति॥गौतमः॥सकल्पोपाहितेवेदसमाप्तिःछर्दिःश्राद्धेमनुष्यय
ज्ञभोजनेष्वहोरात्रमिति॥सकल्पोपाहितोग्न्युत्पातः॥छर्दौविशेषमा
हापस्तंबः॥छर्दयित्वास्वप्नांतेघृतंवाप्राश्येति॥अधीयीतेत्यर्थःस्व
प्नांतंमोहनादि॥धर्मप्रकाशे॥अहोरात्रानुवृत्तौगोभिलः॥सब्रह्मचारि
णिमृतेप्रेतेभूमिपतावपीति॥अनध्यायइत्यर्थः॥गौतमः॥ऊर्ध्वभोजना
दुत्सवेप्राधानस्येति॥अस्यार्थः॥उत्सवेविवाहादावूर्ध्वभोजनादहोरात्र
मनध्यायः॥प्राधानस्यप्रथमाध्ययनेअनुत्सवेपिभोजनादूर्ध्वमनध्या
यइति॥इत्यहोरात्रानध्यायाः॥आकालिकानध्यायमाहमनुः॥विद्युत्स्त
नितवर्षेषुमहोल्कानांचसंप्लवे॥आकालिकमनध्यायमेतेषुमनुरब्रवीदि
ति॥विद्युदादित्रयसाहित्यमत्रज्ञेयं॥द्वंद्वनिर्देशादितिमेधातिथिः॥प्रत्येकं
निमित्ततेतिहेमाद्रिः॥इदंचवर्षाकालेतद्भिन्नेवक्ष्यते॥यस्मिन्समयेनि
मित्तंजातंतंकालमारभ्यान्यस्तावत्कालपर्यंतंविद्युदादीनांनिमित्तत्वेसं

ध्यायामेव।यथाहसएव।एतांस्त्वभ्युदितान्विद्याद्यदाप्रादुष्कृताग्निषु॥त
दाविद्यादनध्यायमनृतौचाभ्रदर्शने॥एवंचऋतावभ्रदर्शनेनानध्यायः
।अभ्रदर्शनेपिप्रादुष्कृतान्वयइतिधर्मप्रकाशे।आपस्तंबः।उल्कापातम
भ्युत्पातंचसर्वासांविद्यानामाकालिकमिति॥अनध्यायइत्यर्थः।हेमाद्रौ
स्मृत्यंतरे॥अभ्युत्पातेचाकालवृष्टौचाकालिकोनध्यायइति॥अभ्युत्पा
तश्चसमानग्रामभवः॥आपस्तंबः।विद्युत्स्तनयित्नुवृष्टयोःपर्तौयत्रस
न्निपतेयुस्त्र्यहमनध्यायोयावद्भूमिर्व्युदकेत्येके॥एकेनद्वाभ्यांचैतेषामा
कालमिति॥अपर्त्तुमाहगार्ग्यः।अनूराधर्क्षमारभ्यषोडशर्क्षेषुभास्करः।
यावत्प्रवर्त्ततेतावदकालंमुनयोविदुरिति॥एवंचमृगमारभ्यविशाखां
तंकालः।इत्याकालिकानध्यायः।पक्षिण्यनध्यायमाहमनुः॥यथाशा
स्त्रंतुकृत्वैवमुत्सर्गंछंदसांबहिः।विरमेत्पक्षिणींरात्रिंयद्वाप्येकमहर्नि
शमिति॥कालादर्शेमनुः।उत्सर्गप्रथमेध्यायेत्वनध्यायस्त्र्यहंभवेत्॥
धारणाध्ययनादौतुपक्षिणींदिनमेवचेति।इतिपक्षिण्यनध्यायः।त्रि
दिनाऽनध्यायमाहमनुः।प्रतिगृह्यद्विजोविद्वानेकोद्दिष्टस्यकेतनं॥त्र्य
हंनकीर्त्तयेद्ब्रह्मराज्ञोराहोश्चसूतकइति।अत्रकेचिन्नवश्राद्धेऽन्नज
रणपर्यंतमनध्यायएकोद्दिष्टेतुत्र्यहमित्यनौचित्यंमन्वानानवश्राद्धे
यामतिपूर्वान्नभोजनेऽन्नजरणपर्यंतमेकोद्दिष्टेषुमतिपूर्वेत्र्यहमि
तिव्यवस्थापयंति।मनूक्तैकोद्दिष्टशब्देननवश्राद्धान्यपिगृह्यंते।शंखः।
राहुदर्शनेशक्रध्वजपतनेआचार्येचमृतेत्रिरात्रमिति।इदंचसंपूर्णग्रहे
।खंडग्रहेतुगौतमोक्तमाकालिकमनध्यायंविद्यादितितत्रैव॥विज्ञाने
श्वरस्तुग्रस्तास्तेत्रिरात्रमन्यथाऽकालिकमित्याह।शक्रध्वजकालमा
हगार्ग्यः।द्वादश्यांतुसितेपक्षेमासिप्रोष्ठपदेतथा॥शक्रयष्टिनिपातन
मिति।पौर्णमास्यामितिकेचित्।मनुः।उपाकर्मणिचोत्सर्गेत्रिरात्रंक्ष
पणंस्मृतमिति।याज्ञवल्क्यः।त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबं
धुषु॥विश्वामित्रः॥समाप्यवेदंत्रिदिनंवेदानध्ययनंभवेदिति॥हारी
तः।आरण्यमूकरस्यत्र्यहंग्राम्यस्याहरिति।अंतरागमनइत्यर्थः।इ
तित्र्यहानध्यायाः॥महागुरुनिपातेब्राह्मणस्यद्वादशरात्रमध्यय
नादिनिषेधात्सोप्यनध्यायः।त्रिमासानध्यायउक्तोहेमाद्रौ॥अपि

गवयाजव्याघ्रनास्ति काद्येत्रिमासमिति॥षण्मासान ध्यायउक्तः॥
श्लोकगौतमेन॥गुर्वंतेवासिनांवेदमध्येतॄणांचमध्यतः मपुशः
शाःश्वपाकाःज्ञानाधीयीताहूं वत्सरमिति॥पूर्वमजेमासत्रयमुक्तं॥
अतोत्रप्रथमारंभेजगमनेषण्मासंज्ञेयं॥सेवत्सराःनध्यायापवादमा
हमनुःवेदेपाकरणेचैवस्वाध्यायेचैवनैत्यके॥नानुरोधोस्त्यनध्यायेहो
ममंत्रेषुचैवहीति॥नित्यस्वाध्यायोब्रह्मयज्ञः॥शौनकः॥नित्येजपेच
काम्येचवेदपारायणेतथा॥नानध्यायोस्तिवेदानांग्रहणेग्राहणेस्मृतः
॥तथा॥देवतार्चनमंत्राणांनानध्यायःस्मृतस्तथा॥नानध्यायेजपेहू
हान्रुद्रांश्चैवविशेषतः पौरुषंपावमानंचगृहीतनियमादृतेइति।
यदिमवेदमपठित्वानभोक्तव्यमितिनियमस्तदाध्येयमित्यर्थः॥न
था॥चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेवसर्वदा॥दुर्मेधसामनध्यायस्त्वंतराग
मनेषुच॥तत्रविस्मृतिशीलानांबहुवेदप्रपाठिनां॥चतुर्दश्यष्टमीपर्वप्र
तिपद्वर्जितेषुच॥वेदांगन्यायमीमांसाधर्मशास्त्राणिवाप्यसेदितिपठि
तं॥इत्यपवादाः॥भिक्षाप्रकारमाहमनुः॥प्रतिगृह्येप्सितंदंडमुपस्थाय
चभास्करं॥प्रदक्षिणंपरीत्याग्निंचरेद्भैक्षंयथाविधि॥भवत्पूर्वंचरेद्भैक्ष
मुपनीतोद्विजोत्तमः॥भवन्मध्यंतुराजन्योवैश्यस्तुभवदंतिमः॥वेदयज्ञै
रहीनानांप्रशस्तानांस्वकर्मसु॥ब्रह्मचार्याहरेद्भैक्षंगृहेभ्यःप्रयतोन्वह
मिति॥भवत्पूर्वमितिभवतीभिक्षांददातुभिक्षांभवतीददातुभिक्षांददातु
भवतीति॥व्यासः॥ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहं॥सजातीय
गृहेष्वेवसार्ववर्णिकमेववेति॥शूद्रादामंग्राह्यंनतुपक्वं॥तस्मादामंगृह्णी
तव्यंशूद्रादप्यंगिराब्रवीदित्यंगिरःस्मृतेः॥यस्तुवेदमधीयानःशूद्रान्न
मुपजीवति॥शूद्रोवेदफलंयातिशूद्रत्वंचाधिगच्छतीतिपराशरेणसिद्धा
न्नस्यनिंदितत्वाच्च॥एतच्चापद्विषयं॥चातुर्वर्ण्यंचरेद्भैक्षमलाभेकुरुनंद
नेतिभविष्यत्पुराणोक्तेः॥मनुरपि॥सर्ववापिचरेद्ग्रामंपूर्वोक्तानामसंभवे॥
नियम्यप्रयतोवाचमभिशस्तांस्तुवर्जयेदिति॥अभिशस्तवर्जनेनैवप
तितवर्जनंसुतरांसिद्धं॥विशेषमाहमनुः॥गुरोःकुलेनभिक्षेतनज्ञातिकु
लबंधुषु॥यत्नु॥मातरंवास्वसारंवामातुर्वाभगिनींनिजां॥भिक्षेतभिक्षांप्र
थमंयाचैनंननिवारयेदिति॥तथाप्रत्याख्यायिनमग्रेभिक्षेताःप्रत्याख्या

यिमंत्रेचेतितदुपनयनांगभिक्षापरमितिनविरोधः।एतच्चसायंप्रातःका
र्यं।सायंप्रातरमंत्रेणभिक्षांचरेदित्यापस्तंबोक्तेः।अमंत्रेविशेषमाह
हारीतः।।लौहेमृन्मयेवापात्रेभुंजीतेति।।विशेषमाहमनुः।।भैक्षेणवर्त
येन्नित्यंनैकान्नाशीभवेद्व्रतीति।यमः।आहारमात्रादधिकंनक्वचिद्भैक्ष
माहरेत्।।युज्यतेस्तेयदोषेणकामतोधिकमाहरन्निति।कामतइत्युक्त्या
ःज्ञानादधिकाहरणेनदोषः।अज्ञानादधिकाहरणे आपस्तंबः।नचोच्छि
ष्टंकुर्यादशक्तौभूमौनिखनेदप्सुवाप्रवेशयेदिति।।गुरवेनिवेद्यमित्याहम
नुः।समाहृत्यतुतद्भैक्षंयावदर्थममायया।।निवेद्यगुरवेश्नीयादाचम्य
प्राङ्मुखःशुचिरिति।।अमाययागुरुर्ग्रहीष्यतीतिभियास्वादुनगोपनी
यमित्यर्थः।याज्ञवल्क्यः।।कृताग्निकार्योभुंजीतवाग्यतोगुर्वनुज्ञया।।
अपोशानक्रियापूर्वंसत्कृत्यान्नमकुत्सयन्निति।गुरोरसन्निधौतत्पुत्रा
दिभ्योनुज्ञाग्राह्या।।असन्निधौतद्भार्यापुत्रसब्रह्मचारिसद्भ्यइतिगौतम
स्मरणात्।।आपस्तंबः।भुक्त्वास्वयममत्रंप्रक्षालयेदिति।।तच्चभोजन
मपरिमितमित्याहवसिष्ठः।अष्टौग्रासामुनेर्भैक्ष्यं वानप्रस्थस्यषोडश
।द्वात्रिंशत्तुगृहस्थस्याःपरिमितं ब्रह्मचारिणइति।।आपस्तंबः।आहि
ताग्निरनड्वांश्चब्रह्मचारीतितेत्रयः।अश्नंतएवसिध्यंतिनैषांसिद्धिरनश्न
तामिति।।आहिताग्नेर्बर्हिःसमिदाहरणादेरवश्यकर्तव्यत्वाद्ब्रह्मचारिण
श्चगुरुसेवायाअवश्यकर्तव्यत्वात्तद्विरोधिशरीरनैर्बल्यापादकंकाम्य
व्रतादिनानुष्ठानार्हमित्यर्थः।इतिभिक्षाटनं।ब्रह्मचर्यावधिमाह।।अव
श्यकर्तव्यत्वात्तद्विरोधिशरीरनैर्बल्यापादकंकाम्यव्रतादि याज्ञवल्क्यः
।।प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानिपंचवा।ग्रहणांतिकमित्येकइति।।या
वद्ग्रहणंस्वाधीनोच्चारणक्षमत्वंतावद्वा।।यमः।।वसेद्द्वादशवर्षाणिच
तुर्विंशतिमथवा।।षट्त्रिंशतंवावर्षाणिप्रतिवेदव्रतंचरेदिति।यस्तुचतुरो
वेदानध्येतुमिच्छतितस्याष्टाचत्वारिंशद्वर्षाणि।यथाहापस्तंबः।उपेत
स्याचार्यकुलेब्रह्मचारिण्यष्टाचत्वारिंशद्वत्सराणिनि।अत्रचपक्षविकल्पे
अध्ययनकालएववैकल्पिकानामादितोपधारणमितिन्यायेनैकःपक्षःपरि
ग्रहीतव्यःनत्विमंध्वद्वादशवर्षपक्षादौपरिगृहीतेमध्येगृहीतेपिवेदेकालः
पूरयितव्यइतिमेधातिथिः।इतिब्रह्मचर्यावधिः।द्विविधोब्रह्मचारीउपकुर्वा

णिको नैष्ठिकश्च॥ तत्र नैष्ठिकस्य विशेष उक्तो याज्ञवल्क्येन। नैष्ठिको ब्रह्म
चारी तु वसेदाचार्यसन्निधौ॥ तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वेति॥
वसिष्ठः। संयतवाक्चतुर्थषष्ठाष्टमकालभोजनखट्वाशयनदंतप्रक्षाल
नांजनाभ्यंजनवर्जी स्थानासनशील स्त्रिरह्नोऽभ्युपेयादिति। त्रिकालं
स्नायादित्यर्थः। देवलेन तु सकृत्स्वगाहनं सकृद्भोजनमुक्तं तदशक्तपरं
केषांचिन्नैष्ठिकब्रह्मचर्यमेवेत्याह॥ विष्णुः॥ कुब्जवामनजात्यंधक्ली
बपंग्वार्त्तरोगिणां। व्रतचर्या भवेत्तेषां यावज्जीवमनंशत इति। अत्रानंश
त इति हेतुवन्निर्देशान्मूलमुक्तं। अतः प्रतिग्रहादिना द्रव्यसद्भावे भवत्ये
व विवाहः। दृष्टं च धृतराष्ट्रसंग्रहेऽपि॥ पंग्वादीनामनंशत्वादसामर्थ्याच्च श
स्त्रतः। नियतं नैष्ठिकत्वं स्यात्कर्मस्वनधिकारत इति चैवं सर्वनैष्ठिकवि
धीनां कुब्जादिपरत्वेनोपसंहाराद्न्येषामनधिकार इति वाच्यं। यदि ला
स्यति को वा सो वसतोऽस्य गुरोः कुले॥ युक्तः आपस्तंबवचनविरोधः। द्वि
तीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थित इति दक्षिणेकाश्रमत्वोक्तेः। अ
स्य फलमाह याज्ञवल्क्यः॥ अनेन विधिना देहं साधयन् विजितेंद्रियः।
ब्रह्मलोकमवाप्नोति न चेहाजायते पुनरिति॥ इदं च फलं ब्रह्मविद्विषय
मं ब्रह्मविधिः। व्रतान्युक्तान्याश्वलायनस्मृतौ॥ प्रथमं स्यान्महानाम्नी
द्वितीयं स्यान्महाव्रतं। तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परमिति। स्मृ
त्यादेर्गोदानस्यैव केशांत इति संज्ञा॥ तत्कालमाह मनुः॥ केशांतः षोड
शे वर्षे ब्राह्मणस्य विधीयते॥ राजन्यबंधोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः
इति॥ द्व्यधिके चतुर्विंशे इत्यर्थः॥ एवं च व्रतानां वर्षव्यवधानेनानुष्ठेय
त्वाद्ब्राह्मणस्य त्रयोदशवर्षादारभ्य व्रतानि भवंति॥ राजन्यस्योनविं
शवर्षादारभ्य वैश्यस्यैकविंशादारभ्येति॥ एषु च व्रतेषु चौलवत्कालनि
र्णयः॥ तदुक्तं श्रीधरीये॥ तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणं॥ चौल
वत्सर्वमाख्यातं सगोदानव्रतेषु चेति॥ तैत्तिरीयाणां नामभेदः प्राजाप
त्यं सौम्यमाग्नेयं वैश्वदेवमिति॥ तेषु च व्रतेषु दंडादीनाह पराशरः॥ यस्य
स्व विहितं कर्म यत्सूत्रं यां च मेखलां॥ यो दंडो यच्च वसनं तत्तदस्य व्रतेष्व
पीति॥ स्वकाले व्रतलोपे प्रायश्चित्तमाहात्रिः॥ पिता भ्राता परो वापि भ्राजा
पत्यत्रयं चरेदिति। वटोरशक्तौ पित्रादीनामनुष्ठानं। शक्तौ तु तेनैव कार्यं॥

यथाहशौनकः॥प्रत्येकंकृच्छ्रमेकैकंचरित्वाज्याहुतीःशतं॥हुत्वाचैव
तुगायत्र्यास्नायादित्याहशौनकइति॥अत्रप्रायश्चित्तेस्नानसमानत
न्त्रैकत्वश्रवणाद्दृष्टोरेवकर्तृत्वंप्रायश्चित्तोत्तरकालमेतानिसमावर्तनेने
नसहकर्त्तव्यानीतिप्रयोगपारिजाते॥तत्रमूलंमृग्यं॥इतिव्रतलोपप्रा
यश्चित्तं॥अथाश्रमविकल्पसमुच्चयौ॥समुच्चयस्तावदादित्यपुराणे
॥ब्रह्मचारिगृहस्थप्रभवाश्चत्वारःपृथगाश्रमाः॥सर्वेपिक्रमशस्त्वेते
यथाशास्त्रंनिषेविताः॥यथोक्तकारिणंविप्रंनयंतिपरमांगतिमिति॥गृह
स्थप्रभवागृहस्थोपजीविनः।अन्त्यस्तनव्रतादीनांगृहस्थानामपिगृ
हस्थोपजीवित्वाच्चतुर्णांग्रहणं।क्रमशइतिप्रातिलोम्यंनाभीष्टं।तथा
चदक्षः।त्रयाणामानुलोम्यंस्यात्प्रातिलोम्यंनविद्यते॥प्रातिलोम्येन
योयातिनतस्मात्पापकृन्नरः॥त्रयाणामितिब्रह्मचर्येतरेषांग्रहणं।त
स्यावश्यकत्वादित्यर्थः।मनुर्विशेषमाह॥चतुर्थमायुषोभागंवसित्वा
द्यंगुरोःकुले॥द्वितीयमायुषोभागंकृतदारोगृहेवसेत्॥वनेषुचविहृ
त्यैवंतृतीयंभागमायुषः॥चतुर्थमायुषोभागंत्यक्त्वासंगान्परिव्रजेदि
ति॥अत्रशतायुर्वैपुरुषइतिश्रुतेः॥पंचविंशतिवर्षपर्यंतमेकैकस्मिन्ना
श्रमेवस्तव्यमितिनिबंधकृतः॥एवंक्रमेस्थितेयदापस्तंबेनोक्तं।च
त्वारआश्रमागार्हस्थ्याश्रमानुपसेवते॥ससर्वलोकान्निर्जित्यब्रह्मलो
कायकल्पतइति।विकल्पउक्तोजाबालश्रुतौ॥यदिवेतरथाब्रह्मचर्या
देवप्रव्रजेद्गृहाद्वावनाद्वेति।भविष्यत्पुराणेपि॥गार्हस्थ्यमिच्छन्भूपा
लःकुर्याद्दारपरिग्रहं॥ब्रह्मचर्येणवाकालंनयेत्संकल्पपूर्वकं॥वैखानसो
वापिभवेत्परिव्राडथवेच्छयेति॥वसिष्ठेनगार्हस्थ्यस्यस्तुतिरुक्ता॥गृ
हस्थएवप्रव्रजेद्गृहस्थस्तप्यतेयतः॥चतुर्णामाश्रमाणांतुगृहस्थस्तु
विशिष्यते॥सर्वेषामपिचैतेषांवेदस्मृतिविधानतः॥गृहस्थउच्यतेश्रेष्ठः
सत्रीनेतान्बिभर्त्तिहीति॥ततश्चैवमुक्तं।प्रथमंब्रह्मचर्यमावश्यकं॥त
तोयदितत्रैवहविरक्तोब्रह्मचर्येणैवाजीवंतिष्ठेत्॥यदिनहविरक्तो
गृहीवनीयतीवाभवेदिति॥ततोगार्हस्थ्येनैवायुःसमापयेत्॥वनाश्रमेण
वायत्याश्रमेणास्यचतुर्विधइतिमनुवाक्यब्राह्मणग्रहणंद्विजोपलक्ष
णमिति॥अथवनस्पतीन्॥ननुमेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु॥नग

त्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः॥ नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमै
थुनं॥ न च मूत्रं पुरीषं वा नाशुची राहुतारकाः॥ अयं मे वज्र इत्येवं सर्वं मंत्र
मुदीरयन्॥ वर्षत्यप्रावृतो गच्छेत्स्वपेत्प्रत्यक्शिरा न च॥ अयं मे वज्रः पा
प्मानमपहंत्विति मंत्रः॥ गच्छेन्न धावेत्॥ ष्ठीवनासृक्शकृन्मूत्ररेतांस्य
प्सु न निक्षिपेत्॥ जलमिति पेयमात्रोपलक्षणं॥ नांजलिना पिबेदिति गौत
मेन पेयविशेषानुपादानादिति कश्चित्तन्न॥ सामान्यस्यापि गौतमीयस्य
विशेषेण याज्ञवल्क्येनोपसंहर्तुं शक्यत्वात्॥ अतो जलमेव च पेयमात्र
मिति॥ शयानं श्रेष्ठं न प्रबोधयेदिति॥ नैकः स्वप्याच्छून्यगृहे श्रेयांसं न प्र
बोधयेदिति मनूक्तेः॥ विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरं॥ केशभस्म
तुषांगारकपालेषु च संस्थितिं॥ विरुद्धं जनपदकुलविरुद्धं। नदीतरणं
बाहुभ्यां। अत उडुपादिना पारगमने न दोषः॥ नदीमिति तडागाद्युपल
क्षणमिति कश्चित्॥ तत्र प्रमाणं मृग्यं॥ यदि परं मीमांसाभिज्ञः सन्नुद्दे
श्यविशेषणमविवक्षितमिति नीत्या नदीग्रहणमविवक्षितमेवं जलग्र
हणमिति यदि मन्यसे तर्हि श्रेयांसमिति विशेषणविवक्षाहेतोः किमिति
मूकोऽसि॥ एवं न ब्राह्मणं हन्यादित्यत्राप्यतिप्रसंगः॥ नाचक्षीत धयंतीं
गां नाद्वारेण विशेत्क्वचित्॥ न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रव
र्तिनः। परस्य क्षीरादि धयंतीं गां तस्मै नाचक्षीत॥ यद्वा वत्सं धापयंतीं अं
तर्भावितण्यर्थात्कृत्प्रत्ययः॥ न विनिवर्तयेदपि॥ न वारयेद्गां धयंतीं
न वाचक्षीत कस्यचिदिति मनूक्तेः॥ प्रतिग्रहे सूनिचक्रिध्वजिवेश्यान
राधिपाः। दुष्टा दशगुणं पूर्वात्पूर्वादेते यथाक्रमं॥ सूनी हिंसाशीलः॥
चक्री तिलपीडकः॥ ध्वजी सुराचक्रेण जीवी। देवर्त्विक्स्नातकाचार्यरा
ज्ञां छायां परस्त्रियाः॥ नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च। विप्राहि
क्षत्रियात्मानो नावज्ञेयाः कदाचन॥ आमृत्योः श्रियमाकांक्षेन्न कंचिन्म
र्मणि स्पृशेत्॥ दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत्॥ पादांभः पा
दप्रक्षालनोदकं॥ श्रुतिस्मृत्युदितं कर्म नित्यं सम्यक्समाचरेत्॥ गोब्राह्म
णानलान्नानि नोच्छिष्टो न पदा स्पृशेत्॥ न निंदाताडने कुर्यात्पुत्रं शिष्यं च
ताडयेत्॥ कथं तर्हि केवले गृहीते उच्छिष्टेन पुनः पात्रस्थं स्पृशते॥ भोजना
र्थं पात्रस्थेन दोष इति शिष्टविगानाभावात्कल्प्यते॥ कर्मणा मनसा वा

चापलाद्धर्मंसमाचरेत्॥अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु॥अ
नतुज्ञातमपिभोजनाच्छिष्टमांसभक्षणादिकंलोकविद्विष्टमतएवास्व
र्ग्यंनाचरेत्॥धर्मपदेनापिनायोगान्नस्वार्थेतास्यर्थे।केचित्त्विदानींतन
नांमधुपर्केपशुवधादीनामेतद्वचनमूलकत्वमितिवदंति॥तन्न॥क
लिनिषिद्धत्वेनैवानाचरणात्॥विधिविहितबाधकत्वायोगाच्च॥मात
पितृतिथिभ्रातृजामिसंबंधिमातुलैः॥वृद्धबालातुराचार्यवैद्यसंश्रित
बांधवैः॥ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः॥विवादंवर्जयित्वा
तुसर्वान्लोकान्जयेद्गृही॥पंचपिंडाननुद्धृत्यनस्नायात्परवारिषु॥स्ना
यान्नदीदेवखातह्रदप्रस्रवणेषुच॥परवापेतुसृष्टोदकं॥परशय्यास
नोद्यानगृहयानानिवर्जयेत्॥अदत्तान्यग्निहीनस्यनान्नमद्यादनाप
दि॥अदत्तान्यननुज्ञातानीतिग्रंथकृतः॥कदर्यबद्धचौराणांक्लीबरंगा
वतारिणां॥वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां॥चिकित्सका
तुरक्रुद्धपुंश्चलीमत्तविद्विषां॥क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजि
नां॥अवीरास्त्रीजितग्रामयाजिनां॥शस्त्रविक्रकर्मारतंतुवायश्ववृत्ति
नां॥नृशंसराजरजककृतघ्नवधजीविनां॥चैलधावकसुरास्वपीडये
त॥लोभात्यःपितरौभृत्यान्सकदर्यइतिलक्षितः॥वैणोवेणुच्छेदनजीवी
॥वीणावादनजीवीतिकेचित्॥गणदीक्षीबहुयाजकः॥पराशरस्मृति
व्याख्यानेतुगणान्नं।दीक्षीदीक्षितस्तस्यचेतिव्याख्यातं॥गणान्नंच
आचार्यास्तुवदंति॥उभयोरपिश्रुतित्वाविशेषणाबाधान्नाप्रामाण्यं॥न
तुक्लीबराजकभोज्यान्नवाक्यंचापर्ववैदिकं॥नचतस्याप्रमाणत्वेकिंचि
दप्यस्तिकारणमिति।तयोभयोर्विषयोपिप्रदर्शितः॥आपद्धर्मोयथैवान्य
मुख्यासंभवहेतुकः॥तथैवप्राणपीडायांक्लीबराजकभोजनं॥सामान्ये
नाभ्यनुज्ञातात्विशेषश्चविशिष्यते॥विशेषोत्यंतनिर्दोषः॥शाकदोषेतर
क्रियेतिप्रपंचितंचैतद्वार्तिककारैरितिकान्यभियानेहविस्तरेणप्रपंचितं
राजपुरोहितान्नानिवर्जयेदितिशंखस्मृतेः॥कदर्यादयश्चद्विजातयए
व॥शूद्राणांवक्ष्यमाणदासादिव्यतिरेकेणाभोज्यान्नत्वात्॥शूद्रेषुदा
सगोपालकुलमित्रार्द्धसीरिणः॥भोज्यान्नानापितश्चैवयश्चात्मानंनिवे
दयेदिति॥अर्द्धसीरीकृषिफलभागग्राही॥अहंत्वदेकाश्रितइतियोनिवेद

नमात्मनः करोति॥शूद्रादीनांभोज्यान्नत्वमापद्विषयमितिहरदत्तः॥चतुर्विंशतिटीकायांतु॥कंदुपक्वंस्नेहपक्वंपायसंदधिसक्तवः॥एतानिशूद्रान्नभक्ष्याणि भोज्यानिमनुरब्रवीदितिवचनोपात्तपरमिति॥स्नेहपक्वमस्पृष्टमित्यर्थः॥परंतुकलावेतेषां भोज्यान्नत्वनिषेधान्नातीवपरिच्छेदोस्माभिःक्रियते॥कलिवर्ज्यानिचसमयमयूखेवदर्शयिष्यामः॥माधवीयेमार्कंडेयः॥नम्लेच्छभाषांशिक्षेतनपश्येदात्मनःशकृत्॥वर्जयेन्मार्जनीरेणुंनापेयंचपिबेद्द्विजइति॥अपेयंकांजिकादि॥वयसःकर्मणोर्थस्यश्रुतस्याभिजनस्यच॥नोपरिक्तंनवारिस्थंनमध्यंनभसोगतं॥नलंघयेद्वत्सतंतींनप्रधावेच्चवर्षति॥वत्सतंतीवत्सबंधनरज्जुःवत्सग्रहणंचगोत्वजातेरुपलक्षणमितिहरदत्तः॥नचोदकेनिरीक्षेतस्वंरूपमितिधारणा॥नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतचाश्नतीं॥क्षुवंतींजृंभमाणांवानचासीनांयथासुखं॥नांजयंतींस्वकेनेत्रेनचाभ्यक्तामनावृतां॥नान्नमद्यादेकवासानननग्नःस्नानमाचरेत्॥नमूत्रंपथिकुर्वीतनभस्मनिनगोव्रजे॥नफालकृष्टेनजलेनचित्यांनचपर्वते॥नोदक्ययाभिभाषेतयज्ञंगच्छेन्नवाकृतः॥अवृतोयजमानेनाकारितोलोभान्नगच्छेत्द्रष्टुंतुकामंगच्छेत्॥नयज्ञमवृतोगच्छेद्दर्शनायतुकाममितिगौतमोक्तेः॥स्वाध्यायेभोजनेचैवदक्षिणंपाणिमुद्धरेत्॥नदीमिंद्रायुधंदृष्ट्वाकस्यचिद्दर्शयेद्बुधः॥नभुंजीतोद्धृतस्नेहंनातिसौहित्यमाचरेत्॥अनेनचोद्धृतस्नेहतक्रादिभोजनमनाचारः॥यत्तुतक्रादिभिन्नपिण्याकादिपरत्वंकल्पयन्तितत्रकिंचिन्मूलं॥सौहित्यंअत्यशनंनन्नृत्येद्यवागायेन्नवादित्राणिवादयेत्॥नपादौधावयेत्कांस्येकदाचिदपिभाजने॥नभिन्नभांडेभुंजीतनभावप्रतिदूषिते॥उपानहौचवासश्चधृतमन्यैर्नधारयेत्॥उपवीतमलंकारंस्रजंकरकमेवच॥बालातपःप्रेतधूमोवर्ज्योभिन्नंतथासनं॥बालातपःशरत्कालातपः॥संगवातपइत्यंतं॥नकर्मनिष्फलंकुर्यान्नापत्यायसंवादयं॥गवांरथेनयानंतुसर्वथैवविगर्हितं॥रथादियोगेत्वापद्विगर्हितमितिज्ञेयं॥रात्रौचवृक्षमूलानिदूरतःपरिवर्जयेत्॥सर्वंचतिलसंबंधंनाद्यादस्तमयेसति॥आर्द्रपादस्तुभुंजीतनार्द्रपादस्तुसंविशेत्॥नशूद्राचमतिंदः

घान्नोच्छिष्टंनहविःकृतं॥अयंचसाक्षादुपदेशनिषेधः।श्रावयेच्चतु
रोवर्णान्कृत्वाब्राह्मणमग्रतः॥इतिकरणेतुनदोषः॥उच्छिष्टंभुक्त्वाव
शिष्टंनदद्यात्॥शूद्रस्यगौतमेनोच्छिष्टाशनंशिल्पवृत्तिश्चेति॥उच्छि
ष्टाशनस्याभ्यनुज्ञानान्नदोषः॥दातुस्तुभवत्येव॥एवंचयदिमत्स्था
यमंगीकृत्योच्छिष्टंदद्यात्तदातेनभक्षणीयं॥यथाकुरुक्षेत्रादौदातु
रभ्युदयःप्रतिग्रहीतुर्दोषएवमत्रापीतिकेचित्॥सांप्रदायिकास्तुउ
च्छिष्टदानप्रतिषेधोगृहस्थशूद्रविषयः॥तद्भिन्नायानुदेयं॥तथाच
व्याघ्रः॥उच्छिष्टमन्नंदातव्यंशूद्रायाऽगृहमेधिने॥गृहस्थायतुदात
व्यमनुच्छिष्टंदिनेदिनइति॥नचास्योपदिशेद्धर्मंनचास्यव्रतमादिशे
त्॥धर्मंधर्मशास्त्रं॥पूर्वधर्मनिषेधस्तुदंडनीतिविषयइतिव्याख्याता
रः॥नसंहताभ्यांपाणिभ्यांकंडूयेदात्मनःशिरः॥नस्पृशेच्चैतदुच्छिष्टो
नचस्नायाद्दिवानतः॥एतत्शिरः॥इदंचशिरःस्नानंशक्तस्य॥नस्नानमा
चरेद्भुक्त्वानातुरोनमहानिशि॥भोजनोत्तरंस्नानस्यनिषेधोरागप्राप्त
स्य॥भद्रंभद्रमितिब्रूयाद्भद्रमित्येववादयेत्॥शुष्कवैरंविवादंचनकु
र्यात्केनचित्सह॥शुष्कंफलशून्यं॥एवंविवादोपि॥नाऽज्ञातेनसमंग
च्छेन्नैकोनवृषलैःसह॥अनातुरःस्वानिखानिनस्पृशेदनिमित्ततः॥
खानिछिद्राणि॥रोमाणिशबराख्यानिसर्वाण्येवविवर्जयेत्॥प्रतिग्रहस
मर्थोपिप्रसंगंतत्रवर्जयेत्॥नधर्मस्यापदेशेनपापंकृत्वाव्रतंचरेत्॥
यमान्सेवेतनियतंनित्यंचनियमान्बुधः॥आनृशंस्यंक्षमासत्यमहिंसाद
ममस्पृहा॥ध्यानंप्रसादोमाधुर्यमार्जवंचयमादश॥शौचमिज्यातपोदा
नंस्वाध्यायोपस्थनिग्रहः॥व्रतोपवासौमौनंचस्नानंचनियमादश॥नाद्या
च्छूद्रस्यपक्वान्नंविद्वानश्राद्धिनस्तथा॥श्राद्धिनःश्रद्धारहितस्य॥आद
दीताममेवास्माद्वृत्तावैकरात्रिकं॥उत्तमैरुत्तमैर्नित्यंसंबंधानाचरेत्सद
निनीषुःकुलमुत्कर्षमधमानधमांस्त्यजेत्॥गुरून्भृत्यांश्चोज्जिहीर्ष
न्नर्चिष्यन्देवतातिथीन्॥सर्वतःप्रतिगृह्णीयान्नतुतृप्येत्स्वयंततः॥ये
नास्यपितरोयातायेनयाताःपितामहाः॥तेनयायात्सतांमार्गंयेनगच्छ
न्नरिष्यति॥एषोदितागृहस्थस्यवृत्तिर्विप्रस्यशाश्वती॥स्नातकव्रतक
ल्पश्चसत्यवृत्तिकरःशुभइति॥अत्रस्वर्ग्यपुण्ययशस्यानिव्रतानीमा

निधारयेदित्युपक्रमात् स्नातकव्रतकल्पस्य सत्प्रवृत्तिकरः शुभ इत्युप
संहाराच्च मध्ये श्रुतानां नञामुपपदेनान्वयात्पर्युदासा अंगीक्रियंते॥
तदुक्तं भगवता जैमिनिना॥ तदुक्तेर्गेकर्माणि पुरुषार्थो येनितथा उपक्र
मे श्रुतं कर्मचाविव्रतपदं यतः। तदन्वयबलात्कर्मविशेषो नोत्रविद्यते
॥तेन लक्षणयाप्यत्र पर्युदासः सर्वश्रुतौः। बहिः स्थुतः फलाकांक्षी पुरु
षार्थत्वमृच्छतीति॥ संकल्प एव वात्र लक्ष्यते। उदाहृतश्च तेत्र रत्नस्मृ
तिः॥ त्रिसंध्यं जपता तेन सा वित्रीने क्षइ स्वयं॥ आदित्यं ध्यायता कार्यः
संकल्पः पापनाशन इति॥ विस्तरस्तु तत्र रत्नादौ द्रष्टव्यो दुर्गमत्व भि
यानेह प्रपंचितः॥ अन्येपि स्नातकधर्मा मानवगौतमीयादिशास्त्रेदृष्ट
व्या विस्तरभयात्तु नेह प्रपंचिताः। इति स्नातकधर्मप्रकरणं॥ स्नातक
भेदा उक्ता गोभिलेन॥ विद्यास्नातको व्रतको विद्याव्रतः स्नातकश्चेति।
विद्यामेवाधीत्य स्नानं कृतवानिति॥ विद्यास्नातकः॥ व्रतान्येव कृत्वा
स्नानं कृतवानिति व्रतस्नातकः॥ विद्यामधीत्य व्रतानि कृत्वा च यः स्ना
ति स उभयस्नातकः। तेषामंत्यः श्रेष्ठः। उभौ तुल्यौ॥ इति स्नातकभेदाः॥
उपकुर्वाणकस्य गार्हस्थ्यं कर्तुं विवाह उक्तो याज्ञवल्क्येन॥ अविप्लुतब्र
ह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्॥ अनन्यपूर्विकां कांतामसपिंडां यवी
यसीं॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजामिति॥ अस्यार्थः। ल
क्षण्यां बाह्याभ्यंतरलक्षणैर्युक्तां॥ बाह्यानि मनुनोक्तानि॥ अव्यंगांगीं
सौम्यनाम्नीं हंसवारणगामिनीं॥ तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रि
यमिति॥ वर्ज्या आह॥ स एव॥ नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगि
णीं॥ नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकां॥ न पक्ष्यहिप्रेष्यनाम्नीं न
विभीषणनामिकामिति॥ विष्णुपुराणे॥ न श्मश्रुव्यंजनवतीं न चैव पुरु
षाकृतिं॥ न घर्घरस्वरां क्षामां तथा काकस्वरां न च॥ नानिबद्धेक्षणां तद्व
द्वृत्ताक्षीं नोद्वहेद्बुधः॥ अनिबद्धेक्षणां मनोनुरंजनेक्षणरहितां॥ यस्याः
श्च रोमशे जंघे गुल्फौ यस्यास्तथोन्नतौ॥ गंडयोः कूपकौ यस्या हसंत्या
स्तां च नोद्वहेत्॥ नातिरूक्षच्छविं पांडुकरजामरुणेक्षणां॥ आपीनहस्त
पादां च न कन्यामुद्वहेद्बुधः॥ न वामनीं नातिदीर्घां नोद्वहेत्संगतभ्रुवं॥ न
चातिच्छिद्रदशनां न करालमुखीं नरइति॥ आभ्यंतराण्युक्तान्याश्वलाय

नेन॥अष्टौपिंडान्कृत्वाऋतमग्रेप्रथमंजज्ञऋतेसत्यंप्रतिष्ठितं॥यदि
यंकुमारीयेभिजातातदियमिहप्रतिपद्यतां॥यत्सत्यंतद्दृश्यतामिति
पिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहाणेतिक्षेत्राच्चेदुभयतःसस्या
न्प्रतिगृण्हीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्याद्गोष्ठात्पशुमतीवे
दिपुरीषाद्ब्रह्मवर्चस्विन्यविनाशिनोह्रदात्सर्वसंपन्नाद्देवनात्कितवाच्च
तुष्पथात्प्रव्राजिनीरिणादन्याश्मशानात्पतिघ्नीति॥देवनंद्यूतं॥ईरिण
मूखरं।नःअन्यःपूर्वोयस्याःसाऽनन्यपूर्विका॥दानेनोपभोगेनवा॥का
तांमनोनयनानंदकारिणीं॥यथोक्तमापस्तंबेन।यस्यांमनश्चक्षुषोर्नि
बंधस्तस्यामृद्धिरिति॥इयंचपरीक्षाकुलपरीक्षोत्तरंकार्या।कुलमग्रे
परीक्षेतेत्याश्वलायनस्मृतेः॥मनुः।उत्तमैरुत्तमैर्नित्यंसंबंधानाचरेत्स
देति॥उत्तमानाहसएव।विशुद्धाःकर्मभिश्चैवतथाश्रुतिनिदर्शितैः।अ
विप्लुतब्रह्मचर्यामहाकुलसमन्विताः।अक्रोधनाःसुप्रसादाःकार्याःसं
बंधिनःसदा॥नीचानाहसएव॥येस्तेनाःपिशुनाःक्लीबायेचनास्तिकवृत्त
यः॥विकर्मणाचजीवंतोविकृताकृतयस्तथा॥प्रवृद्धवैराःक्रूरैर्याराजकि
ल्बिषिणस्तथा॥ब्रह्मस्वादननिंद्याश्चकदर्याश्चविगर्हिताः॥अप्रजाये
षुवंशेषुस्त्रीप्रजाप्रसवास्तथा॥पतिघ्न्यश्चसुवासिन्यस्तांश्चयत्नेन
वर्जयेत्॥तान्वंशान्॥महांत्यपिसमृद्धानिगोजाविधनधान्यतः॥स्त्री
संबंधेदशैतानिकुलानिपरिवर्जयेत्॥हीनक्रियंनिःपुरुषंनिश्छंदोरो
मशार्शसं।क्षय्यामयाव्यपस्मारिश्वित्रिकुष्टिकुलानिच॥तथा।कुवि
वाहैःक्रियालोपैर्वेदानध्ययनेनच॥कुलान्यकुलतांयांतिब्राह्मणाति
क्रमेणच॥शिल्पेनव्यवहारेणशूद्रापत्यैश्चकेवलैः॥गोभिरश्वैश्च
यानैश्चकृष्याराजोपसेवया॥अयाज्ययाजनैश्चैवनास्तिक्येनच
कर्मणा॥कुलान्यकुलतांयांतियानिहीनानिमंत्रतइति॥विष्णुःअ
श्वंपित्रापरीक्षेतमात्राकन्यांपरीक्षयेत्॥कृष्याभूमिंपरीक्षेत आचा
रेणकुलंतथेति॥नारदेनकन्यालक्षणान्युक्तानि॥पूर्णचंद्रमुखीक
न्याबालसूर्यसमप्रभा॥विशालनेत्रारक्तोष्ठीसाकन्यालभतेसुखं॥
अंकुशंकुंडलंचक्रंयस्याःपाणितलेभवेत्॥पुत्रंप्रसूतेसानारीनरें
द्रंलभतेसुतं॥यस्याःपाणितलेरेखाप्राकारस्तोरणंतथा॥अपिदास

कुलेजाताराजपत्नीभविष्यति॥ यस्याःसंकुंचिताःकेशामुखंचपरि
मंडलं॥नाभिश्चदक्षिणावर्त्तासानारीप्रियभाग्भवेत्॥दीर्घांगुलीच
यानारीदीर्घकेशाचयाभवेत्॥दीर्घमायुरवाप्नोतिधनधान्यविवर्द्धिनी
ति॥अन्यान्यपिसामुद्रिकलक्षणानितद्ग्रंथतोवगंतव्यानि॥विस्तरभ
यान्नेहलिख्यंते॥ असपिंडामिति॥ अत्रकेचित्॥लेपभाजश्चतुर्थाद्याः
पित्राद्याःपिंडभागिनः॥पिंडदःसप्तमस्तेषांसापिंड्यंसाप्तपौरुषमिति॥मातृस्या
त्सप्तपुरुषपर्यवसायिनीसपिंडता॥तथाचदेवदत्तस्यपित्रादिभिःषड्भिः
सापिंड्यंपुत्रादिभिश्चषड्भिरिति॥साप्तपौरुषमितिसप्तपुरुषानभि
व्याप्येत्यर्थः॥इत्याहुः॥नन्वेवंभगिन्यादिभिःसापिंड्यंनस्यात्॥अत्रस
मादधिरेमाधवाचार्याः॥उद्देश्यदेवतात्वेनसापिंड्यनिर्वाहइति॥त
थाच देवदत्तकर्तृकेश्राद्धेभगिन्यादीनामप्युपोष्यत्वाच्चास्त्येवसा
पिंड्यं॥तथासतिमहालयादिश्राद्धेगुरुशिष्यादीनामपिसापिंड्यं
स्यात्॥अतोनिर्वाप्यपिंडान्वयपक्षंविहायअवयवानुवृत्तिपक्षमंगी
चक्रुर्विज्ञानेश्वरादयः॥तथाहि॥समानःपिंडोदेहोदेहावयवोयस्यः
ससपिंडानसपिंडेति॥तथाहि॥पितुरवयवानांरक्तमज्जादीनांपुत्र
शरीरेसाक्षात्प्रवेशःपितामहस्यपितृद्वाराएवंप्रपितामहादिष्वपि
यथाकथंचित्परंपरयाऽवयवानुवृत्तिरस्त्येवेति॥एवंमात्रादिभिरपि
॥एवंपत्यापत्न्याःएकशरीरारंभकत्वेन॥क्वचिच्चैकावयवाधारत्वे
नापिसापिंड्यंयथामात्रोर्भर्तृद्वाराश्वश्रुरावयवाधारत्वं॥यत्एवंयथा
कथंचित्सापिंड्यमन्यत्राप्यूह्यं॥यद्वायत्राभियुक्तानांसपिंडइतिप्रसि
द्धिस्तत्रसापिंड्यमिति॥अत्रयद्यप्यसपिंडामितिनञ्समासेनपर्युदा
सस्तथाप्ययंनिषेधफलकःसपिंडापरिणयनेप्रायश्चित्ताम्नानात्॥एव
मेकशरीरा वयवान्वयरूपेसापिंड्येविधातृशरीरेणापिपरंपरयास
पिंडापत्तिरतःसंकोचोयाज्ञवल्क्येन॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृ
तस्तथेति॥मातृतःपंचमात् पितृतःसप्तमादिति॥एतन्निष्कर्षश्चाभि
युक्तैःकृतः॥वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः॥पंचमीचेत्तयो
र्मातातत्सापिंड्यंनिवर्त्ततइतिकूटस्थोमूलपुरुषः॥यतःज्ञानभेदांस्त
तोगणयेत्॥नारदोपि॥मातृतःपंचमादूर्ध्वंपितृतःसप्तमात्तथा॥ग

हस्थउद्वहेत्कन्यामन्यथागुरुतल्पग इति॥पैठीनसिरपि॥पंचमींमातृतः
परिहरेत्सप्तमींपितृत इति॥यत्तु विष्णुपुराणे॥पंचमींमातृपक्षाच्चपि
तृपक्षात्तु सप्तमीं॥गृहस्थउद्वहेत्कन्यांन्याय्येन विधिनानृप॥यच्चवसि
ष्ठे॥पंचमींसप्तमींचैवमातृतः पितृतस्तथेतिनद्वुभयमप्यतीत्येतिव्या
ख्येयं॥पूर्वोक्तवचनविरोधात्॥सप्तमेपंचमेचैवयेषांवैवाहिकीक्रि
या॥क्रियापरा अपिहितेपतिताःशूद्रतांगता इतिमरीचिनादोषोक्तेश्च
॥यत्तुषट्त्रिंशन्मते॥तृतीयांमातृतःकन्यांतृतीयांपितृतस्तथा॥विवा
हयेन्मनुःप्राहपाराशर्योंगिरायमइति॥यदपिपैठीनसिस्मृतौत्रीन
तीत्यमातृतःपंचातीत्यपितृतइति॥तदर्वाक्दोषातिशयार्थं॥अन्य
थापंचमात्सप्तमादूर्ध्वमित्यनेनपंचमषष्ठादौक्लिप्तमाणोविवाहोनि
ष्टसाधनंषट्त्रिंशन्मतादिभिस्त्विष्टसाधनमितिविरुद्धबोधद्वयस्याश
क्यत्वात्॥दोषातिशयार्थत्वंकथमितिचेदुच्यते॥पंचमात्सप्तमादू
र्ध्वमित्यनेनपूर्वंबोधितोदोषः क्वचिदल्पःक्वचिद्भूयानितिबोधयितुं
शक्यत्वात्॥तस्यचप्रयोजनंप्रायश्चित्ताल्पत्वबहुत्वादि॥नहिस
पिंड्याविशेषेभगिनीगमनेयावानेवदोषस्तावानेवपंचम्यामितिव
क्तुंशक्यं॥अतःपूर्वोक्तमेवज्याय इति॥षट्त्रिंशन्मतादिवाक्यान्या
पद्विषयाणि॥अनुज्ञानंचनिषिद्धमप्यापदिचातुर्वर्ण्ये भैक्ष्यादि
दोषाभावोप्युक्तस्तत्रनिबंधकृद्भिरितिचेन्न॥तत्रापि आपत्कल्पद्वि
जःकृत्वाप्रायश्चित्तंपुनश्चरेदितिवचनेनदोषस्योक्तत्वात्॥स्तोक
दोषाच्चदोषाभाववचनं। यद्येवमंगीकृत्यतृतीयांपरिणयनमिष्टंयदा
क्रियतांनामनतुसर्वथादोषाभावः॥अत्रविंध्यदक्षिणवासिनःके
चित्॥मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच॥समानप्रवरांचैवत्य
क्त्वाचांद्रायणंचरेदित्यादिबहुस्मृतिनिषिद्धमपिमातुलकन्यापरि
णयनमाचरंति॥सचदुराचार इतिभट्टपादादयः॥भट्टसोमेश्वर
स्मृतिचंद्रिकाकारमाधवादयस्तुदुराचारत्वंनास्तीत्याहुः॥बलाधि
करणेश्रुत्यालिंगंबाध्यतेइत्युक्त्वाकन्विच्छ्रुतेनविरोधाधिकरणरी
त्यासंभवदन्यमूलायाःस्मृतेर्बाधः॥यथागर्भेतुनौजनितादंपतीकर्दै
वत्वष्टासविताविश्वरूप इतिदाशतय्यांश्रुतंतस्यार्थः॥यमीयमंस्वभ्रा

तरंप्रोवाच॥ साच धर्मेन आचेदमयुक्तमिति प्रत्याख्याता वदति॥ कः
प्रजापतिर्विश्वरूपो विश्वात्मा त्वष्टा सविता नौ आवयोर्गर्भे दंपती जनि
ताजनयिष्यति॥ आवयोरपत्ययोरवश्यं दंपतीत्वं भावि तद्दूरमावां मे
दंपती भवाव इति लिंगमनन्यगतिः। तथा आयाहींद्र पथिभिरीळि
तेभिर्यज्ञमिमं नो भागधेयं जुषस्व। तृप्तां जहुर्मातुलस्येव योषा भाग
स्ते पैतृष्वसेयी वपामिव॥ अस्यार्थः॥ हे इंद्र त्वं ईडितेभिः प्रशस्तैर्मा
र्गैर्नो अस्माकं यज्ञमायाहि आगच्छ आगत्य तृप्तामाज्यसिक्तां वपां भा
गधेयं वपारूपं भागं जुषस्व सेवस्व॥ तत्र वपाभागत्वे दृष्टांतद्वयं॥ य
था मातुलस्य जहुरपत्यरूपा या स्त्री कन्येत्यर्थः। मामातुःशब्दस्य
संबंधिशब्दत्वाद्भागिनेयापेक्षितेस्तस्य भागं सेवस्व। एते यजमाना
स्त्वामुद्दिश्य वपां जहुस्त्यक्तवंतः योषा दुहिता॥ अन्यत्पूर्ववत्॥ तथा
वाजसनेयिश्रुतौ स्रुग्व्यूहनार्थवादे तृतीये संगच्छामहै चतुर्थे संग
च्छामहै इत्यर्थे लिंगं॥ न चास्यार्थवादत्वात्स्वार्थापरत्वमिति वाच्यं।
अप्राप्तार्थस्योपरि हि देवेभ्यो धारयतीत्यादि विधिपरत्वात्॥ एवं स्थि
ते मातुलकन्यापरिणयने यत्प्रायश्चित्तादिस्मरणं तदासुरादिविवा
होत्पन्नाविषयं यद्दृष्टव्यं किं तत्र प्रमाणमिति चेदुच्यते॥ गोत्ररिक्थे
जनयितुर्न भजेज्जनककुले संबंधमात्रनिवृत्त्या सापिंड्यस्यापि नि
वृत्तिः प्रतीयते॥ अतः कन्याया अपि ब्राह्मादिविवाहचतुष्टये दानस
द्भावात्तत्र च सापिंड्यस्य निवृत्तेस्तत्परं मातुलकन्यापरिणयनं। आ
सुरादिविवाहेषु दानाभावात्सापिंड्यानिवृत्तेस्तत्परो निषेध इति॥
कथमिदानीं मातुलकन्यावत्पैतृष्वस्रेयी दौहित्री वा न परिणीयते
। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति निषेधाद्नोनदुरा
चारत्वमियाति। अत्रोच्यते॥ गर्भे तु नाविरुस्यामृषिपूर्वैषामा
चरितं स्मृत्यनुमेयश्रुतिविरोधान्न नादृश विधिकल्पकः। यत्र हि
नान्यविरोधः प्रामाण्यकत्वं च तत्रैव विधिनिषेधककल्पनं यथोल्मुकैर्हे
तस्य पूर्वे समाजग्मुरित्यादिषु॥ अन्यथा प्रजापतिरुषसमभ्यैत्स्वां दु
हितरमित्याद्यर्थवाददर्शनादन्यैरपि दुहितृगमनं कर्तव्यमिति कल्पनं
तदुक्तरीत्या केन निवार्येत॥ मित्रार्थवादेषु च वहवो र्थाः केचन सिद्धा॰

र्थानुवादकाययाग्निर्हिमस्यभेषजंवायुर्वैक्षेपिष्ठादेवनेति॥केचनराग
प्राप्तानुवादकायथातस्माद्धत्सोमातरंस्वसारंचाधिरोहति॥यस्मात्
तस्माच्छ्वश्रूश्चश्वशुरश्चपुत्रश्चदुहिताचसुरांपीत्वाविलपंतश्चास
तेइत्यादि॥केचनप्रायोदृष्टानुवादकायस्मात्तस्मात्प्रजादशमासान्
भृत्वाएकादशमनुप्रजायतइत्यादयः नैनावतावि ध्यादिकल्पनं
अतएवस्वार्थेतात्पर्याभावान्नविधिपरत्वमंगीकृतंसोरोदीदित्येव
मादीनांमीमांसकैः॥एवमत्रापिगर्भेतुनावित्यस्यांपूर्वाचरितमात्रं
कीर्त्यते॥आयाहींद्रेत्यस्यांचरागप्राप्तस्यानुवादः॥कथमनियतप्रा
प्तस्यनित्यवदनुवादइतिचेत्॥तस्मात्प्रजाइत्यस्यवाक्यस्यनित्यप्रा
प्तिः॥नत्वयथैवानियतप्राप्तिमुपजीव्यानुवादोपपत्तिरेवमत्रापि।यत्तुस
नेनसापिंड्यंनिवर्ततइति॥तत्रोच्यते॥मातापितावादद्यातांयमद्भिःपु
त्रमापदि॥सदृशंप्रीतिसंयुक्तंसज्ञेयोदत्रिमःसुतइतिपुंस्त्वविशिष्टानु
वादेनसंस्काकरणात्कन्यायाश्चदत्रिमसंज्ञाभावाद्दत्रिमानुवादेनवि
धीयमानापिसापिंड्यनिवृत्तिर्नकन्यायाभवति॥नन्वेवंदत्रिमस्यसा
पिंड्यनिवृत्तौजनककन्यादिपरिणयनंस्यादेवयद्यूर्ध्वंसप्तमासि
तृबंधुभ्योमातृबंधुभ्यःपंचमाद्बीजिनश्चसप्तमादितिवाक्यंनाभवि
ष्यत्।अत्रहिबीजिग्रहणेनदत्रिमस्यजनककुलेसापिंड्यमस्तीति
ज्ञायते॥गोत्रनिवृत्तिस्तु।स्वगोत्राद्भ्रश्यतेनारीविवाहात्सप्तमेपदे
त्यनेनवचनेनत्वन्येन।अतोमातुलकन्यापरिणयनंदुराचारः॥अत
एवभट्टपादैरुक्तं।वसुदेवांगजानाचकौंतेयस्यविरुध्यतेइति॥बौधा
यनेनचदुराचारान्परिगणयतास्पष्टमेवोक्तं॥पंचधाविप्रतिपत्तिर्दक्षि
णतस्तथोत्तरतोयानिदक्षिणत स्तान्यनुव्याख्यास्यामोनयैनदस्
पदेनसहभोजनंस्त्रियासहभोजनंपर्युषितभोजनंमातुलपितृष्वसृ
दुहितृगमनमिति॥अथोत्तरतऊर्णाविक्रयःसीधुपानमुभयतोदद्भि
र्व्यवहारआयुधीयकंसमुद्रयानमिति॥नत्रेतरस्मिन्कुर्वन्दुष्यति
तद्देशप्रामाण्यात्मिथ्यैतदितिगौतमः॥उभयमेवनाद्रियेतशिष्टस्मृ
तिविरोधदर्शनादितिग्रंथेन॥बृहस्पतिरपि॥उद्वाह्यतेदाक्षिणात्यैर्मा
तुलस्यसुताद्विजैः॥मत्स्यादाश्चनराःपूर्वेव्यभिचाररताःस्त्रियः॥उत

रेमद्यपाश्चैवसंस्पर्शयान्नृणांरजस्वलाः॥सजातांश्चापि— गृण्हंतिभ्रातृ
भार्यामभर्तृकां॥सर्वदेशेष्वनाचारोरथ्यातांबूलचर्वणमिति॥विशेषः
स्मृत्यंतरे॥गायत्र्याउपदेष्टुश्चकन्यांनैवोद्वहेद्द्विजः॥ गुरोश्चकन्यां
शिष्योवातत्संतत्यापिनेष्यते॥पुरुषत्रयपर्यंतंश्राद्धादेर्नैतदिष्यतइ
ति॥सपत्नमातामहकुलेसापिंड्यमाहसुमंतुः॥पितृपत्न्यःसर्वामा
तरस्तद्भ्रातरोमातुलास्तद्भगिन्योमातृष्वसारस्तद्दुहितरश्चभगिन्यस्त
दपत्यानिभागिनेयान्यन्यथासंकरकारिणःस्युरिति॥द्वितीयतच्छब्दे
नमातृपरामर्शः॥अत्रयावद्वचनंवाचनिकमितिन्यायात्परिगणितेष्वे
वसापिंड्यंनसप्तमादिपर्यंतंएतत्सापिंड्यविषयमेव॥असपिंडाच
यामातुरसपिंडाचयापितुः॥साप्रशस्ताद्विजातीनांदारकर्मणिमैथुन
इतिमनुवाक्यमितिनिबंधकृतः।एतदुपपत्तिश्चद्वैतनिर्णयेउक्ता॥अ
त्रासपिंडानिषेधःसार्ववर्णिकः॥ असमानार्षगोत्रजामितित्रयाणां
तत्रक्षत्रियवैश्ययोःपुरोहितगोत्रंनस्वतइतियवीयसामिति॥वय
सापरिमाणेनचन्यूनां॥वयोन्यूनतायांविशेषमाहमनुः॥त्रिंशद्वर्षोद्व
हेत्कन्यांहृद्यांद्वादशवार्षिकीं॥त्र्यष्टवर्षोऽष्टवर्षांवाधर्मेसीदतिसत्व
रइति॥अष्टवर्षश्चतुर्विंशतिवर्षः॥बृहस्पतिर्विशेषमाह॥त्रिंशद्वर्षो
दशाब्दांतुभार्यांविंदेतनग्निकां॥एकविंशतिवर्षोवासप्तवर्षामवाप्नु
यादिति॥भ्रातृमतीमिति॥अनेनपितुरभिप्रायमात्रेणापरिभाषि
तापिपुत्रिकाभवतीतिगम्यते॥अतएवगौतमः॥अभिसंधिमात्रा
त्पुत्रिकेत्येकेषांतत्संशयान्नोपयच्छेद्भ्रातृकामिति॥पुत्रिकाकर
णप्रकारादिकंव्यवहारमयूखेदर्शयिष्यामः असमानार्षगोत्रजामि
ति॥आर्षंचगोत्रंचसमानार्षगोत्रेजातासमानार्षगोत्रजानतादृशा
असमानार्षगोत्रजा।अत्रचप्रत्येकंप्रतिषेधः।समानार्षानोद्वाह्या॥
सगोत्राचनोद्वाह्येतिप्रत्येकंप्रायश्चित्ताम्नानात्॥तच्चप्रायश्चित्तम
यूखेवक्ष्यते॥आर्षंप्रवरः।गोत्रप्रवर्तकस्यऋषेर्व्यावर्तकोमुनिविशे
षः॥वत्सार्ष्टिषेणयोःगोत्रभेदेप्रवरैक्यात्॥द्व्यामुष्यायणानांसंत
तीनांप्रवरभेदेपिसगोत्रत्वादुभयोपादानं॥मातामहगोत्राप्यपरि
णेया॥तथाचमनुः॥मातुलस्यसुतामूढ्वामातृगोत्रांतथैवच॥स

मानप्रवरांश्चैवत्यक्त्वाचांद्रायणंचरेदिति॥ अत्रसगोत्रानोद्वाह्येत्यनेनै
वमातृगोत्रपर्युदासेसिद्धेमातृगोत्रग्रहणंमातुर्विवाह्यास्वगोत्रनिर
त्यर्थं।तथाचमातामहगोत्रानोद्वाह्येतिफलितं॥तच्चमाध्यंदिनीयानां
॥तथाचचतुर्विंशतिमतटीकायांसत्याषाढवचनं॥मातृगोत्रंमाध्यं
दिनीयानामिति॥अथगोत्रप्रवरनिर्णयः॥तत्रस्मृत्यर्थसारेगोत्र
लक्षणमुक्तं।जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः।वसिष्ठक
श्यपागस्त्यामुनयोगोत्रकारिणः॥एतेषांयान्यपत्यानितानिगोत्रा
णिमन्वतइति॥अपत्यानीतिनसाक्षात्॥किंतुपुत्रपौत्रादिपरया।
तथाबौधायनोप्याह॥एतेषामगस्त्याष्टमानांयदपत्यंतद्गोत्रमित्या
चक्षतइति॥एवमुच्यमानेभृग्वादीनांगोत्रत्वंनस्यात्॥तत्रकेचिद
ष्टापत्यापरिहरंति॥अपरेभृग्वादिषुअनादिशिष्टानांगोत्रत्वसमा
ख्यानात्प्रवरमंजरीप्रयोगपारिजातमदनरत्नानारूढत्वात्तत्र
वत्वंगोत्रलक्षणमुक्तमुत्पश्यामः॥तथाचसत्याषाढसूत्रेप्रवरानु
क्त्वातेगोत्राणीत्युक्तं॥तथाचतद्वत्गोत्रमित्युक्तंभवति।एवंचशि
ष्टाचारोप्यनुगृहीतोभवतिबहुग्रंथविरोधश्चपरिहृतोभवति।यत्तुबौधा
यनादिभिरगस्त्याष्टमपत्यंगोत्रमित्युक्तं।नतल्लक्षणाभिप्रायेणोक्तं
।नचैवंवत्सविदयोरार्ष्टिषेणादिभिःसगोत्रतापत्तिरितिवाच्यम्॥एक
एवऋषिर्यावत्प्रवरेष्वनुवर्त्तते॥तावत्समानगोत्रत्वमन्यत्रभृग्वंगिर
सांगणादिति॥बौधायनेनपर्युदासात्॥अनेनचपर्युदासेनज्ञायतेभृ
ग्वंगिरोगणेष्वस्तिसगोत्रत्वमिति।यत्तुप्रवरमंजरीकृताकेचिन्नस
र्वेषांगोत्रतेत्युक्तंतत्पूर्वापरग्रंथविरोधात्परमतानभिप्रायेण।यत्तुविश्व
नाथेनोक्तं।भृग्वंगिरोन्यत्रकिंचिदृषेर्यावत्सुवर्त्तनं॥तावत्समानगो
त्रत्वमितिकेचित्समूचिरे॥तन्नैवं॥सर्वत्रगोत्रत्वनिबंधने॥अनुद्वाहे
तुकुत्रस्यात्प्रवरैक्यंप्रयोजकमिति।तदस्माभिःपूर्वमसंकीर्णोदाहर
णोपन्यासादपास्तंतस्मादस्तिहरितादीनामपिगोत्रत्वं।यद्यपिगोत्रा
णामानंत्यंतथापितद्गणाएकोनपंचाशत्॥उक्तंचबौधायनेन॥गो
त्राणांचसहस्राणिप्रयुतान्यर्बुदानिच।ऊनपंचाशदेवैषांप्रवराऋषिद
र्शनादिति॥तेगणायथा॥भृगूणांसप्त।जमदग्नेस्तदंतर्भावः॥विश्वामि

त्राणांदश।१०।अत्रेश्चत्वारः४अंगिरसांसप्तदश।१७अत्रैवगौतमभर
द्वाजयोरंतर्भावः।कश्यपास्त्रयः।३।चत्वारोत्रवसिष्ठाःस्युर्विश्वामि
त्रास्तुतोदश॥अगस्त्य यस्तुचत्वारइतिसंग्रहश्लोकद्वयः।प्रवराःशिष्ट
परंपराप्रसिद्धाः।इतिगोत्रप्रवरलक्षणं॥अथोद्दिष्टगणक्रमेणबौधा
यनादिसूत्रोक्तानिगोत्राणिप्रदर्श्यंते॥तत्रतावत्केवलभार्गवाःपंच।
आर्ष्टिषेणाःयस्काःमित्रयुवोवैन्याःशुनकाइति॥तद्यथा॥आर्ष्टिषेणा
नैरथ्यपोग्राम्यायणयःकात्यायनाश्चांद्रायणाःपैटकलायनाःसिद्धाः
सुमनायनाःगौरांभिराभिरित्येतेआर्ष्टिषेणाः।तेषांपंचार्षेयाः।भार्गव
च्यावनाप्नवानार्ष्टिषेणानूपेति॥एषामविवाहः।इत्यार्ष्टिषेणगणः।
यस्कोमौनोमूकोवाधूलोवर्षपुष्पःमापोराजवैनोभास्करोदेवंताय
नोजैवंतायनोबाकल्योमाध्यमेयावासयःकौशांबेयाःकौटिल्याःसा
त्यकेयाःकौंचिल्याःसत्यकयश्चित्रसेनाःभागंतयस्ताकम्बिकेयाः
औक्ष्याःऔर्गविन्नतयःभागुरिश्चइत्येतेयस्काः।तेषांत्र्यार्षेयः।प्र
वरोभार्गववैनहव्यसावेतसेति।इतियस्कगणः।मित्रयवोरौक्षा
यणाःनाशायज्ञनाःरोङ्यायनाःशैक्यायनाःसरवंडिनाःसुरभिनया
माल्यायावाल्यायामहावाल्यास्ताक्ष्यायणाऔरक्षायणामाजाय
यःकैतवायनाइत्येतेमित्रयुवस्तेषांत्र्यार्षेयःप्रवरः।भार्गववैन्यपा
र्थेति॥इतिवैन्यगणः।शुनकाःसमदायज्ञपथःसौगंधयःस्वादेमाय
नागांगायनामत्स्यगंधाभार्गायणाःश्रोत्रियास्तैत्तिरीयाइत्येतेशुन
कास्तेषामेकार्षेयःप्रवरः शुनकेतिगृत्समदेतिवा॥इतिशुनकग
णः।इतिकेवलभृगवः।अथगणद्वयसमष्ट्यंतर्गतंवत्सविदाख्यंत
दुच्यते॥मार्कंडेयामांडव्यामांडूकेयाःकांसयआलेखनरयोवैही
नरयोविरोहिताबाह्यागौह्रायणाष्टैकयःकाशकृत्स्नावाड्तकाःकृ
तभागाएतिशायनासौकृतयोमंडविसौविस्तयःहस्त्यग्नयोहस्ता
मयश्रौह्रायकाः।वैकेषायःद्रोणजिव्हयः।औरसयःकांबरोदरयःकं
गेरकैह्रहलिविरूपासाभिकाश्वाउश्चैर्मन्यवःवैमत्याःआर्दायणाःमा
यणाकाव्हायनाःवायवाःदैवमत्याःआर्कयणाःकांकायनावायानिनः
शांकरवश्चांद्रमसाःगांगेयातोयेयायाज्ञियायावतिर्बाहुमित्रायणा

आपिशलयः वैष्टपुरेयालोहितायनाउष्ट्रवायानिनः शांकरहुंनायनाराजि
तवाहाः वात्सा वात्स्यायना इत्येते वत्सास्तेषां पंचार्षेयः प्रवरो भार्गवच्या
वनाप्नवानौर्वजामदग्न्येति ॥ इतिवत्सगणः। विदाः शैला अवयः शैलाः प्राची
नयोग्या अभयद्यानाः कांडरथ्यो वैनभृताः पुलस्तयः आर्कायणास्तां
त्रायणाः कामलाइत्येते विदास्तेषां पंचार्षेयः प्रवरो भवति भार्गवच्या
वनाप्नवानौर्ववैदेति ॥ इतिविदगणः ॥ आपस्तंबगणः। आपस्तंबस्तु
विशेषमाह स उच्यते ॥ तत्र यस्कगणो वाहव्यगणत्वेन व्यपदिष्टः ॥
सावेतसेत्यत्र सावेदसेति शुनकगणो गार्त्समदत्वेन व्यपदिष्टः मित्र
युगणो वाध्र्यगणत्वेन व्यपदिष्टः विदगणेनोक्तः। कात्यायनेन भृगो
र्द्वादशगणा उक्ताः ॥ तद्यथा वात्स्यायनाः आवाच्याः वैजवाः शाठर
माठराः विदाः। आर्ष्टिषेणाः वत्साः वेदविश्वज्योतिषः पार्श्वश्वेताः आ
पिशायनाः वीतहव्याः गृत्समदाश्चेति। वात्स्यायनानां पंचार्षेया भा
र्गवच्यावनाप्नवानौर्वजामदग्न्येति ॥ आवाच्यानां भार्गवच्यावना
वाच्येति ॥ वैजवानां भार्गवच्यावनाप्नवानवैजवनैमथितेति ॥ शाठर
माठराणां भार्गवशाठरमाठरेति ॥ विदानां भार्गवच्यावनाप्नवानेति।
आर्ष्टिषेणानां पूर्वोक्तः। वत्सपुरोधसां भार्गवच्यावनाप्नवानवैजवनै
मथितेति ॥ शाठरमाठराणां भार्गवशाठरमाठरेति ॥ विदानां भार्गवच्
च्यावनाप्नवानेति ॥ आर्ष्टिषेणानां पूर्वोक्ताः। वत्सपुरोधसां भार्गवच्या
वनाप्नवानवात्सपौरोधसेति ॥ भार्गववात्सपौरोधसेति वा। वेदविश्व
ज्योतिषाणां भार्गववेदवैश्वज्योतिषेति ॥ पार्श्वश्वेतानां भार्गववैन्यपार्थेति
॥ आपिशायनानां भार्गववाध्र्यश्वदैवोदासेति ॥ वीतहव्यानां भार्गव
वैतहव्यसावेधसेति ॥ गृत्समदानां गार्त्समदेति ॥ भार्गवगार्त्समदेति
वा ॥ लौगाक्षिस्तु सप्तगणेषु विशेषमाह ॥ गणास्तावत् ॥ वत्सा विदा
वात्स्या आर्ष्टिषेणाः स्वालायना वीतहव्या गार्त्समदाश्चेति ॥ तत्र वा
त्स्यानां पूर्ववत् ॥ विदानां त्र्यार्षेया भार्गवौर्वजामदग्न्येति। वात्स्यानां
भार्गवच्यावनाप्नवानेति ॥ आर्ष्टिषेणानां पूर्ववत् ॥ स्वालायनानां मि
त्रयुवत्। वीतहव्यानां भार्गववैतहव्यसावेतसेति। एवं पूर्वोक्तेषु वत्स
विदार्ष्टिषेणानामन्योन्यमविवाहः। गोत्रप्रवरैक्यात् ॥ यस्कमित्रयुव

वैन्यशुनकाः परस्परं न विवहेयुः॥ बौधायनमते प्रवरैक्यात् पूर्वोपपा
दितप्रकारेण गोत्रैक्याच्च॥ यस्कादिचतुर्भिर्विदादित्रिभिर्भवत्येव वि
वाहः॥ सगोत्रत्वाभावात्॥ ननु भार्गवरूपैकप्रवरसाम्यात्कथं विवा
हः उच्यते॥ पंचानां त्रिषु सामान्याद्विवाहस्त्रिषु द्वयोः॥ भृग्वंगिरोग
णेष्वेवं शेषेष्वेकोपि वारयेदिति बौधायनवचनेन भृगुगण एकानुवृत्ते
रप्रयोजकत्वात्॥ एवमग्रेपि द्रष्टव्यं॥ इति भार्गवनिर्णयः॥ अथांगि
रोनिर्णयः॥ तत्र तद्गणास्त्रयः॥ केवलांगिरसो गौतमा भरद्वाजाश्चे
ति॥ तत्र केवलांगिरसः षट्॥ चत्वारो भरद्वाजाः सप्त गौतमा इत्येवं स
प्तदश॥ तत्र केवलांगिरसां षट् गणमध्ये एकः संकृतिर्द्व्यामुष्यायणः
तत्प्रकरणे निरूपयिष्यामः॥ अवशिष्टाः पंच तद्यथा॥ विष्णुवृद्धक
ण्वहरितरथीतरमुद्गलाख्याः ते उच्यंते॥ विष्णुवृद्धाः शठामठाः भद्र
णा मद्रणा बादरायणाः सात्यकिः शालंकायना नैतुवाः स्तुत्याः भारु
ण्यावेहोढादेवस्थातयः इत्येते विष्णुवृद्धास्तेषां त्र्यार्षेयः प्रवरः आंगि
रसपौरकुत्सत्रासदस्यवेति॥ इति विष्णुवृद्धगणः॥ कण्वाः औपमः
कठायना बाष्कलाः पौलाः हलिनो मांजिः॥ मांजयः मौञ्जिगधाविजिवा
जंयावाजश्रवस इत्येते कण्वास्तेषां त्र्यार्षेयः प्रवरः आंगिरसाजमी
ढकाण्वेति॥ इति काण्वगणः॥ हरिताः कौत्सः सांख्योदाभ्यो भैम्यो
भैमगवो मलायुर्लंबोदरो वल्लोदरो महोदरो नैमिश्रयो मिश्रोदनामि
श्रपः कौतपाः कारीषयः कौलयः पौलयः मौद्गला माधूपमाधातमांड
कारय इत्येते हरितास्तेषां त्र्यार्षेयः आंगिरसांबरीषयौवनाश्वेति
॥ इति हरितगणः॥ रथीतरा हास्तिदासिकाब्धायना नैतिरक्षयः ऐ
शानयः शैलालयः मिलेभिलाभायसावढवाः भैसवाहाहेमगवा
इत्येते हरितास्तेषां त्रयः प्रवराः आंगिरसवैरूपराथीतरेति॥ इति र
थीतरगणः॥ मुद्गलाहिरण्याक्षाःऋषभामिनाःक्षपासस्याः झषाय
णाः दीर्घजंघाः प्रबलजंघाः स्तरणभिद्व इत्येते मुद्गलास्तेषां त्रयः प्र
वरा आंगिरसभार्म्यश्वमौद्गल्येति॥ इति मुद्गलगणः॥ इति केवलांगिर
सः॥ एषु पंचसु स्वं स्वं गणं हित्वा परस्परं विवाहः॥ यद्यप्यांगिरसेति प्रवरै
क्यं सर्वत्र तथाप्यंगिरोगणत्वाददोषः॥ अथ भरद्वाजांगिरसः॥ तद्गणाश्चत्वा

रः॥भरद्वाजाःकपयःगर्गारौक्षायणाइति॥तेउक्ताबौधायनेन भरद्वाजाःक्षा
म्यायणाःसंगडादेवाश्वाःउद्गह्म्याःप्राग्वंशयःबाह्लभावाद्योगावसा
यनावैदेहाआत्राःऔक्षाःभूरयःपरिणद्धयाःकेशरवेयाःशौङ्गयःउस्त्रदाःना
रिग्रीवयःऔपसयःवयोक्षिभेदा अग्निवेश्याव्ययाःशाठाःगौरिवाःलैला
यनास्तनकर्णाःकृक्षामाणिमिंद्याःकठोदकाःसौहुलयोवैल्लावारुडाव
योभाङ्गपद्मयःसौरभराःशुंगादेवमतयःऋजुमता औदमेधयःप्रवाहणे
याःकुल्माषाःराजस्तंभिःसुधापक्वतःवाराहयःवल्मीकयःरुक्षांगपथाः
शालाहलयःवैदवेलानृत्सायनाःशाल्वालयःशार्दूलयःशाकल्याबाष्कलाः
सत्यकेयाःक्रोडायनाकौंडिन्याब्रह्मस्तंभाराजस्तंभा आपस्तंभायेचा
न्येस्तंभशब्दा आरणसिंधुकौमुद्गंधयःशिखायना आत्रेयायणाभा
माण्याःकुक्षाःकौकक्षिपोनैतुंतयोशार्भयःश्यामेघाःमत्सकायाःकर
णायनाःकारुपथयःकारिषायणाःकौवल्या इत्येते भरद्वाजास्तेषांत्र्या
र्षेयःप्रवरःआंगिरसबार्हस्पत्यभारद्वाजेति॥इति भरद्वाजगणः॥
रौक्षायणाःकपिलाःशफिलावैकिडाकौशुमोग्निजिव्होनकर्णिश्वसूति
श्चेति॥रौक्षायणास्तेषांपंचप्रवराःआंगिरसबार्हस्पत्यभारद्वाजवांद
नमातवचसेति।इतिरौक्षायणगणः॥गर्गाःसांभराःवणाःसारव्यना
यणागंधरायणावालुकयोभ्राष्ट्रकाभ्राष्ट्रविंदवःक्रोष्टुकयःसौपामु
निःभ्राजिनाक्षयोहोत्रायःसख्याप्रवयःयवाःनवपलाशाःशाखावन
यःसंग्रहकल्पाःवेणुभिरिःसौहग्रकारिःरैतिकौंचाल्याःराजवत्ये
लबाः इत्येतेगर्गास्तेषांपंचप्रवराःआंगिरसबार्हस्पत्यभारद्वाजगा
र्ग्यसैन्येतित्रयोवा आंगिरससैन्यगार्ग्येति॥इतिगर्गगणः॥का
यःवैतलायनानांपतंजलीनांतरस्विनांताडिनांभोजस्मानांसारंगरवा
णांस्वरशिखंडिनांमौशितकिःसंशायःपौष्ययसेतिशायनाइत्येतेक
पयस्तेषांत्रयःप्रवराःअंवसामहीयवऔरुक्षयसेति॥भरद्वाजानां
चतुर्णामविवाहः।इतिकपिगणः॥इतिभरद्वाजांगिरसः॥गौतमांगि
रसासप्तगणाः।आयास्याःशरद्वताःकौमंडादीर्घतमसःकारेणुपाल
यःवामदेवाऔशनसाश्चेति॥तउच्यंते॥आयास्याआणिवेयामूढ
रथाःकावासयःवैदेहाकौमारवसांडिर्दर्भिर्दैवकिःसात्यमुग्रिःकोबा

स्त्वावैभ्यानैकरुधिष्टैकर्षिःकिरालयः कारुणिःकठोरिःकाशीवाकासी
वाइत्येते आयास्यास्तेषांत्रयःप्रवरा आंगिरसायास्यगौतमेति॥शर
द्वंतःअभिजितोरौहिण्याःक्षीरकरंभाःसौमुचयःसौयामुनाःकौपविंद
वोराहूगणाःगणयोमयणाःइत्येतेशरद्वंतास्तेषांत्रिप्रवराःआंगिरसगौ
तमशारद्वंतेति॥कौमांडामानसरेषणाःमासुराक्षाःकाण्वरेभयःआ
जायनोवाजायनाइत्येतेकौमांडास्तेषांपंचार्षेयःआंगिरसौचथ्यका
क्षीवतगौतमकौमंडेति॥दीर्घतमसांपंच आंगिरसौचथ्यकाक्षीवत
गौतमदैर्घतमसेति॥कारेणुपालयोवास्तव्याःश्वेतीयाःपौजिष्ठयःऔ
दजायनामाधुक्षाराअजगंधयइत्येतेकारेणुपालयस्तेषांत्रिप्रवराः
आंगिरसगौतमकारेणुपालेति।वामदेवानांत्रयः आंगिरसगौतमौ
ष्ठानसेति॥गौतमानांसत्तानामविवाहः॥इतिगौतमांगिरसः।अथ
विश्वामित्रास्तेषांगणादश॥कुशिकरौहितरौक्ष्यक कामकायनक
चधनंजय आज अघमर्षण पूरणेंद्र कौशिकाख्याः।तउच्यंते।कुशि
काःपार्णजंघावालुक्या औदरिर्मौथितैहदग्निरालशाद्यहिरापद्य
व्याःकामंदैनकाबहूकथ्याश्चिकिताःकामकायनाःशांकायनाःयम
दूताआनतिन्नास्तारकायणाश्चावासाजाबालयोयाज्ञवल्क्या
विदंडाभुवनयनाःसौश्रुतयऔपदहनयःऔदुंबरिश्रौष्ट्याःश्यामेया
श्रौत्रेयासाश्वतामयूराश्चित्रेभायनाअनुतंतवोमौतवोयेचान्येव्रत
शब्दाःबाभ्रव्याःकालोत्सराइत्येतेकुशिकास्तेषांत्रिप्रवराःवैश्वा
मित्रदेवरातऔदलेति।रौहितादंडकयश्चाक्रवर्मपिणाजत्नयिणा
वांजायनावासयइत्येतेरौहितास्तेषांत्रयःवैश्वामित्राष्टकरौहिते
ति॥रौक्ष्यकाःरवोहूहावलारेवणाश्चतेषांत्रयःवैश्वामित्ररौक्ष्यकरै
वणेति॥वैश्वामित्रदेवश्रवसदेवतरसऔमनज्याःकामकायनास्ते
षांत्रयःवैश्वामित्रकात्याक्कीलेति॥धनंजयाःपारिजामयःआश्रयेना
वापव्याःसैंधवायमयःपुष्करासास्तेषांत्रयःवैश्वामित्रमाधुछंदस
धानंजय्येति॥आजानांत्रयःवैश्वामित्रमाधुछंदसआजेति॥अघम
र्षणाःकौशिकास्तेषांत्रयोवैश्वामित्राघमर्षणकौशिकेति।।पूरणा
वारिधापयस्तेषांद्वौवैश्वामित्रपौरणेति।।इंद्रकानांद्वौवैश्वामित्रेंद्र

कौशिकेति॥सर्वेषांवैश्वामित्राणामविवाहः।अथात्रयश्चतुर्भेदाआ
त्रेयास्त्रयःवाद्भूतकागविष्ठिरामुद्गलाश्चेति।तउच्यंते।भूरयःछांदिको
दोगिपौष्टिकामौद्गलयःसोपानच्छरालाःछागलास्तृणविंदुर्भौगत
योमालरुचःव्यालयःसांभव्यायनाःसावव्यायनाःकर्मधीयानांका
मर्थीयनपदाक्षिस्तैदेह्वागणपतयःऔद्दालकिर्द्रोणभावागौरिग्रीवयो
गाविष्ठिराःशिंशुपालाःकृष्णात्रेयागौरात्रेयातृणात्रेयाअरुणात्रेयाः
गोपवनाःकालापयवयआनीलायनाआनीशायनाआनंदिर्मानंदि
गैरंदिःसैरंदिपुष्पयःशेफयःसाकेतायनाशाकटायनाभरद्वाजनय
इंद्रातिथिरित्येतेऽत्रयस्तेषांत्रयःप्रवराःआत्रेयार्चनानसश्यावाश्वेति
॥वाद्भूतकानांत्रयःआत्रेयार्चनानसवाद्भूतकेति।गविष्ठिराणांत्रयःआ
त्रेयार्चनानसगाविष्ठिरेति।।मुद्गलाव्यालिसंधिरर्णवाबोधाक्षावाजकिर्ग
विष्ठिराःशिरीषयःशालिमताव्रीहिमतागौरितोगौरवयोवायवनाबाष्कल
इत्येतेमुद्गलास्तेषांत्रयःप्रवराःआत्रेयार्चनानसपौर्वातिथेति।अत्रीणांस
र्वेषामविवाहः।इत्यत्रयोनिर्णीताः॥अथवसिष्ठास्तेषांचत्वारोगणाआद्य
वसिष्ठाःकुंडिनाउपमन्यवःपराशराश्चेति।तेउच्यंते॥वैतलकिर्वीरकिः
सारवलागौरिश्रवसःआश्वलायनाःकपिष्ठाःशैविरस्याःव्याघ्रपादो
वात्यकायनिर्वोढव्याजातूकर्ण्यौडुलोमिःकौभोजिःकौलायनाःसुद्
हरितःकांडवृद्धिःसौवत्सायनाआलंभायनालोमन्यःस्वस्ताकर्षिताःपार्ण
कायनाःपार्णवल्कोदेवलकानव्याविश्वावनावाहुकयःआविक्षिपयःवं
श्यजपयःपूर्णवेल्लाविशिखाइत्येतेवसिष्ठास्तेषामेकःप्रवरोवासिष्ठेति
।कुंडिनाहोलायनागोणाआश्वत्थावैकर्णेयआविल्वावदराआश्मरथ्या
वाहकःक्रौंकोक्याःसांगलिनःकापटवःपैटकानवग्रामाःहिरण्याक्षाःपैप्स्याः
पैप्पल्यादयमाध्यंदिनाःशांतिसौपत्तिरितिकुंडिनास्तेषांत्रयःप्रवराःवा
सिष्ठमैत्रावरुणकौंडिन्येति॥उपमन्यवऔपगवामांडलेखयःकापिंज
लाःजलागृहास्तपोलोकास्वैत्रेणांखवैषास्तागिरिःस्वरास्सरामौलयश्चै
लहलिनोमहाकर्णायनाबालशिखाऔदाहमानयश्चलायनाभागुरिःर
थायनाःकुंडोदरायणाकावाधयोवार्कौम्बयःआतुसारवआलववाःकपि
केशाइत्येतेउपमन्यवस्तेषांत्रयःप्रवराःवासिष्ठेंद्रप्रमदाभरद्वस्वेति।पर

शराःकंडुशयोवाजयोवाजिमंतयः।वैमातायनागोबालिःप्ररोहयोवैक
लयःस्रुस्रयःकौमुद्रादयोहार्यश्विरवल्लायनागोपायनाःश्यातयः।आरु
णिर्वीरुणिर्मौलुक्यावाजरिश्वकाव्हयनाःकैंकलयःक्रैमतिःकृष्णाजि
नाःकपिसुरवास्त्वरणायनयःश्वेतयूपयःपौष्कलसाविर्गोग्यायनयोवाणे
यःश्यामेयाःक्रैनुहिःसहवैरिस्तेषांत्र्यार्षेयःवासिष्ठशाक्त्यपाराशर्ये
ति।।अत्रगौबाल्यंताःकृष्णाःपराशराह्वार्यश्व्यंतागौराःवारुण्यंताअरुणाः
क्रैमत्यंतानीलाःपौष्कलसाद्यंताःश्वेताःसहचौल्यंताःश्यामाइतिसंज्ञा
।वासिष्ठानांसर्वेषांपरस्परमविवाहः।।आपस्तंबस्तुआद्यवसिष्ठानाम
पिवासिष्ठशाक्त्यपाराशर्येतित्रिप्रवरानप्याह।।अथकश्यपास्तेषांत्रयो
गणानिध्रुवारेभाःशांडिलाश्चेति।तउच्यंते।।कश्यपाःछागलेयामाठरा
ऐतिशायनाआभूत्याःवैशिरवाधूम्रायणाःसौम्यधर्म्यायणाऔदवृत्ति
रात्रायणाःपैंधकयः[सा]प्रावयेरद्रोणाअनयाःपांचापतिकामोषीतकिःसग
सपामार्घेरावयःसौधवयःसापस्थाआसुरायणाःछागव्याःसोमपाः
स्थौलकेशयःवार्हकयःऔपव्याःलासायणाःक्रोष्टाजीवनयःखाङ्गीय
नारोहितायनामितकुंभाःपिंगाक्षयऔडलयःमारयणाःपन्वयःवैकर्णेयाः
कौष्ठानकेयाःधूमलक्ष्मणयःसुरागौरिवायनाःविमथ्याःअग्निशर्मीला
यनाऔक्षायनयःकावोदरयःदवरातावेदूराःवावेलामहावक्केयाःपैठीन
स्याःपानस्याऋषगणादासमाणयःभालंदनाःशांखमित्रेयाहिरण्यया
वालाजारमण्योरमाणिसाविश्रवसोवैशंपायनाःसैंवरकिंकासतयःउल्का
यनिर्मार्जल्लायनाःकांसलायनाःदेवोहोतास्तूवयःस्वरेभापस्थूणाभा
गुरयःपाथिकायागोपायनाहिरण्मयाआग्निदेविस्तष्यशौर्यामुसलाअ
विश्रेण्याउत्तरतोगंडूबाःदलामैत्रिताःवैकर्णयःस्थूलविंदवइत्येतेनिध्रु
वास्तेषांत्रयःप्रवराःकाश्यपावत्सारनैध्रुवेति।।रेभाणांत्रयःकश्यपाव
त्सारैरेभ्येति।।शांडिलाःकोहलाःपार्थकाबाऔदमधयःसौदानवःसौपश
वःकारेयाःकौकटयःशैशिकयःमाहकयबहोरेहागोमूत्रावाकयशठाजा
लंधरिधन्वंतरिरित्येतेशांडिलास्तेषांत्रयःप्रवराःकाश्यपावत्सारशांडि
ल्येति१।कश्यपावत्सारदेवलेतिवा।२काश्यपावत्साराऽसितेतिवा३शांडि
ल्यासितदेवलेतिवा४काश्यपासितदेवलेतिवा।।आपस्तंबसूत्रेनिरूप

पराः कश्यपा उक्ताः॥ रेभशांडिलास्तु त्र्यार्षेया स्त्र्यार्षेया वा देवलासितेति॥ काश्यपदेवलासितेति। कश्यपानां सर्वेषामविवाहः। इति कश्यपनिर्णयः। अथागस्तयः। तेत्रयः। आद्या गस्तयः सांभवाहाः सोमवाहाश्चेति॥ तउच्यंते॥ अगस्तयो विशालाद्याः शालंकायना औदहनयः कुल्माषदंडिनाः पर्णाश्यः सावर्णिर्वैवंदयो वैरणयो बुधो दरयः सौचपथयः शाल्पातयामौंजिकराः शत्रयो हद्यो माः शांडिधाराः पथोद्गताः सोमवाहा यज्ञवाहाश्चेति। इध्मवाहानां त्रयः आगस्त्यदार्ढ्यच्युतेध्मवाहेति॥ सांभवाहानामागस्त्यदार्ढ्यच्युतसांभवाहेति॥ सोमवाहानामागस्त्यदार्ढ्यच्युतसोमवाहेति॥ यज्ञवाहानामागस्त्यदार्ढ्यच्युतेध्मवाहेति॥ कात्यायनलौगाक्षिभ्यामगस्तिगणमध्ये पुलस्त्यः पुलहः क्रतुरित्याद्युक्त्वा आगस्त्यमाहेंद्रमायोभुवेति प्रवरा उक्ताः॥ ततः पूरणादीनुक्त्वा आगस्त्यपौर्णमासपारणेति प्रवरा उक्ताः। सत्याषाढस्तु आद्यागस्तीनतुक्त्वा आगस्त्यदार्ढ्यच्युतेध्मवाहेति त्रीन्। अगस्तीनां सर्वेषामविवाहः। इत्यगस्त्यनिर्णयः॥ अथ द्व्यामुष्यायणाः॥ तत्र भरद्वाजानां केवलांगिरसामत्रीणां कश्यपानां वसिष्ठानां विश्वामित्राणां च द्व्यामुष्यायणानान्येषां तउच्यंते। तत्र संकृतिगणानां द्व्यामुष्यायणाः। स यथा। संकृतयो मलकाः पौलिस्तडिशंबुशैवगवाः परिभवास्तारकाव्याहिग्रीवा एतरेयाः षेणायाः आरायणा आश्वलायनाः श्रौतायना आग्रायणा आर्षभयश्चांद्रायणा आग्रापयः पूतिमाषा इत्येते संकृतयस्तेषां त्र्यार्षेयः आंगिरससांकृत्यगौरिवीतेति। आश्वलायनस्तु शाक्त्यगौरवीतसांकृत्येति प्रवरानाह। एतैः पूर्वोक्तैः परस्परं चतुर्विधवसिष्ठैश्च सह न विवाहः। चतुर्विंशतिटीकायां तु कश्यपैस्त्रिभिरविवाह इत्युक्तं। श्लोकेप्युक्तः काश्यपेयगणस्यापि वसिष्ठस्य गणस्य च॥ संकृतिपूतिमाषाभ्यां विवाहो न परस्परमिति। तत्राकरोमृग्यः। लौगाक्षीणां त्रयः प्रवराः काश्यपावत्सारवासिष्ठेति॥ एषां वासिष्ठकश्यपैरविवाहः॥ तथा धनंजयानां विश्वामित्रात्रिभिरविवाहः। एवं वामरथानां जातूकर्ण्यानां वसिष्ठात्रिभिरविवाहः। विश्वामित्रभरद्वाजैः शैगशैशिरिणां न विवाहः। अस्य प्रवराः। आंगिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेति। कश्चित्तु देवरातेन विश्वामित्रजमदग्निभिः सह न विवाह इ

त्युक्तं॥ तत्रकेषांचित्काशीस्थानामनादरः॥ विपरीतानुष्ठानात्॥ दक्षिण
देशेतुनकुर्वंति। तत्रमूलंमृग्यं॥ इतिह्यामुष्यायणाः। यत्तुमानवेतिवास
वेयामितिप्रवरउक्तः। सवरयोनतुविवाहादौतस्योपयोगः॥ राजन्यवै-
श्यानांसमानार्षेयत्वादिकंपुरोहितगोत्रादिभिर्विवारणीयं॥ अथकश्चि
द्विशेषोमृग्यमूलोपिलिख्यते॥ शैंगशैशिरीणांपंचोक्ताः॥ आंगिरसबा
र्हस्पत्यभारद्वाजशैंगशैशिरेतिवा॥ त्रयोवा॥ आंगिरसकात्यात्कीलेति
॥ भारद्वाजकात्यात्कीलेतिवा॥ कपिलानामांगिरसबार्हस्पत्यभारद्वाजवां
दनमातवच्चसेति॥ एषांविश्वामित्रभरद्वाजैर्नान्वयः॥ धनंजयानांवै
श्वामित्रमाधुछंदसधानंजयेति। एषामत्रिविश्वामित्रैर्नान्वयः॥ लौगा
क्षीणांकाश्यपावत्सारवासिष्ठेति॥ वासिष्ठावत्सारकाश्यपेति। एषांवसि
ष्ठकाश्यपैरविवाहः। यस्यविस्मरणादिनागोत्रनाशस्तस्यकाश्यपगो
त्रं। गोत्रनाशेतुकाश्यपमितिहेमाद्रौव्याघ्रोक्तेः। अथात्रस्मृत्यर्थसारस्थ
श्लोकाःसंग्रहार्थंलिख्यंते॥ अथात्रगोत्रप्रवरनिर्णयोवर्ण्यतेंजसा॥
जमदग्निभरद्वाजविश्वामित्रात्रिगौतमाः १ वसिष्ठकश्यपागस्त्यामु
नयोगोत्रकारिणः। एतेषांयान्यपत्यानितानिगोत्राणिमन्वते॥ २ प्रि
यंमाणतयावापिसंततयावानुवर्त्तनं॥ एकस्यदृश्यतेयत्रतद्गोत्रंतस्यक
थ्यते। ३ समानमुनिभूयस्त्वएकप्रवरनामपि॥ समानप्रवरत्वंचेद्बुधा
बौधायनोब्रवीत्। ४। मुनिप्रणीतप्रवरैरूनपंचाशतावयं॥ अनंतान्यपि
गोत्राणिचांगीकृत्याभिदध्महे। ५। जामदग्न्यैश्च वत्सविदावार्ष्टिषेणाःप
रस्परं॥ नान्वियुःप्रवरैक्येनसगोत्रत्वेनचादिमौ॥ ६। यस्कामित्रयुवोवै
न्याःशुनकाःप्रवरैक्यतः॥ स्वंस्वंहित्वागणंसर्वेविवहेयुःपरावरैः॥ ७।
उक्ताःसप्तभृगोर्वंशावक्ष्यंतेंगिरसोगणाः॥ गौतमाःसप्तचायास्याःशरद्
तास्तथापरे॥ ८॥ कौमांडादीर्घतमसस्ततःकारेणुपालयः॥ वामदेवाऔ
शनसागोत्रैक्यान्नान्वियुर्मिथः॥ ९॥ केवलांगिरसाश्चैके विष्णुवृद्धाःस
कण्वजाः॥ हरितारथीतराश्चमुद्गलाःप्रवरैक्यतः॥ १०॥ स्वंस्वंहित्वागणं
सर्वेविवहेयुःपरावरैः॥ षोडशांगिरसस्त्वेधाप्रोक्ताःसं कृतयस्तथा॥ ११
सं कृतीनांद्विवंश्यत्वाद्वासिष्ठैश्चचतुर्विधैः॥ स्ववर्गीयैःसगोत्रत्वात्प्रवरै
क्याच्चनान्वियुः॥ १२॥ चत्वारोत्रयआयास्त्रिवाद्भूतकपिष्ठिराः॥ मुद्गलाः

श्चेतिगोत्रैक्यात्प्रवरैक्याच्चनान्वियुः॥१३॥ अयस्यकश्यपगणानिध्रुव रैभशांडिलाः॥ गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुःपरस्परं॥१४॥ वासिष्ठैःक श्यपैर्नित्यंलौगाक्षीणामनन्वयः। अहंवसिष्ठतोकिंस्तुभयाजात्यादिगो चरा॥१५॥ वसिष्ठाःकुंडिनाश्चैवमुपमन्युपराशराः॥ वसिष्ठाइतिचत्वारो गोत्रैक्यान्नान्वियुर्मिथः॥१६॥ कुशिकारोहितगणारौक्षकाकामकाय नाः॥ कताधनंजयाआजाअघमर्षणपूरणाः॥१७॥ इंद्रकौशिकजाश्चे तिविश्वामित्रगणादश॥ नोद्वहेयुःसगोत्रत्वात्कचिच्च प्रवरैक्यतः॥१८ अगस्तयःसांभवाहाःसोमवाहाइतित्रयः। गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुःप रस्परं॥१९॥ वर्गाएकोनपंचाशत्प्रसिद्धामुनिभिःस्मृताः। अप्रसिद्धाःपरे वंश्याअंतर्भूताइहैवते॥२०॥ विश्वामित्राग्निगोत्रेणनोद्वहेयुर्धनंजयाः अत्रैस्तुपुत्रिकापुत्रावामरथ्यादयस्तथा॥२१॥ नैध्रुवजातुकर्ण्याश्चवसि ष्ठैरत्रिभिःसह॥ भरद्वाजेनशुंगेनविश्वामित्रस्यशैशिरैः॥२२॥ क्षेत्रेजातो द्विगोत्रर्षिःप्रोच्यतेशौंगशैशिरिः॥ विश्वामित्रभरद्वाजैस्तज्जानांतेनना न्वयः॥२३॥ कपिलानांभरद्वाजैर्विश्वामित्रैश्चनान्वयः। गुरोःसगोत्रप्रव रानोद्वाह्यास्तत्रविद्वणैः॥२४॥ सगोत्रास्तुनभिन्नैश्चविप्रैराचार्यगोत्रजाः दानादिनान्यगोत्राःस्युरज्ञातगुरुगोत्रिणः॥२५॥ समानप्रवरोद्वाहनि षेधःक्षत्रवैश्ययोः। प्रवरान्मानवेत्यस्मात्प्रवराच्चान्यगोत्वरः॥२६॥ इत्थं सगोत्रसंबंधविवाहविषयेस्थिते। यदिकश्चिज्ज्ञानतस्तांकन्यामूद्वो पगच्छति॥२७॥ गुरुतल्पव्रतांकुर्याद्गर्भस्तज्जोंत्यतांव्रजेत्॥ भोगत स्तांपरित्यज्यपालयेज्जननीमिव॥२८॥ अत्रप्रायश्चित्तप्रपंचःप्राय श्चित्तमयूखेवक्ष्यते॥ जामदग्न्यावत्सविदा आर्ष्टिषेणास्तथैवच॥ पं चावत्तिनएवैते अन्येचतुरवत्तिनः॥२९॥ अर्थतःपूर्वमेवव्याख्यातानि पद्यानि॥ इहकपिलानामित्यर्द्धंप्रक्षिप्तमितिटीकाकृतः॥ अत्रगोत्रप्रव रनिर्णयेबहुवक्तव्यमप्युपयोगाभावाद्विस्तरतिभयाच्चनोक्तं। विचारबा हुल्यजिज्ञासुनाद्वैतनिर्णयेद्रष्टव्यं॥ इतिकन्यालक्षणादि। एतानेवधर्मां तरैःनिदिशतियाज्ञवल्क्यः॥ एतैरेवगुणैर्युक्तःसुवर्णःश्रोत्रियोवरः। ब लात्परीक्षितःपुंस्त्वेयुवाधीमान्जनप्रियइति॥ अत्रभ्रातृमदनन्यपू र्वयवीयस्त्वरूपगुणत्रयभिन्नाःसर्वेगुणाअतिदिश्यंते॥ सवर्णउत्तमव

र्णोवा॥असपिंडादिगुणातिदेशादुभयतःसापिंड्यनिवृत्तिरभिप्रेता॥पुं
स्त्वपरीक्षोक्तानारदेन॥यस्याप्सुप्लवतेबीजंह्लादिमूत्रंचफेनिलं।पुमा
न्स्याल्लक्षणैरेतैर्विपरीतस्तुषंढकइति॥गृह्येबुद्धिमतेकन्यांप्रयच्छेदि
ति॥यमोप्याह॥कुलंचशीलंचवपुर्वयश्चविद्यांचवित्तंचसनाथतांच॥
एतान्गुणान्सप्तपरीक्ष्यदेयाकन्याबुधैःशेषमचिंतनीयमिति॥सामुद्रि
के॥पूर्वमायुःपरीक्षेतपश्चाल्लक्षणमादिशेत्॥आयुर्हीननराणांहिलक्ष
णैःकिंप्रयोजनमिति॥अन्यानिसामुद्रिकलक्षणानिविस्तरभियानोक्ता
नि॥इतिवरगुणाः॥अथविवाहक्रमः॥याज्ञवल्क्यः॥तिस्रोवर्णानुपूर्व्ये
णद्वेतथैकायथाक्रमं॥ब्राह्मणक्षत्रियविशांभार्यास्वाशूद्रजन्मनः॥इति
स्मइत्यादिसंख्यासवर्णाव्यतिरेकेणमनुः।सवर्णाग्रेद्विजातीनांप्रशस्ता
दारकर्मणि॥कामतस्तुप्रवृत्तानामिमाःस्युःक्रमशोवराः।अत्रप्राचःपु
त्रधर्मार्थत्वेनविवाहस्त्रिविधः।पुत्रार्थोद्विविधः।नित्यःकाम्यश्च॥अ
पुत्रस्ययःसुतार्थोविवाहःसकाम्यः।नात्रनित्येसवर्णैव॥काम्यपुत्रोत्पा
दनेशूद्राव्यतिरिक्ताः।रत्यर्थमनाश्रमित्वदोषपरिहारार्थंवाशूद्रापिपरि
णेया॥ननुपुत्रोत्पत्त्युद्देशेन॥यदुच्यतेद्विजातीनांशूद्रादारोपसंग्रहः॥
नैतन्ममम तंयस्मात्तत्रात्माजायतेस्वयमिति॥हेत्वभिधानात्॥नैवं
शूद्रापुत्रस्यविभागोनसंगच्छतइतिवाच्यं।रत्यर्थंप्रवृत्तस्यानुषंगे
णपुत्रेजातेवचनस्यार्थवत्वात्॥यदिनित्यपुत्रोत्पादनार्थंसवर्णानल
भ्यतेनदानुकल्पार्थमप्यसवर्णापरिणयनमित्याहुः॥विशेषउक्तो
याज्ञवल्क्येन॥पाणिर्ग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं॥वैश्याप्रतो
दमादद्याद्वेदनेत्वग्रजन्मनइति॥तथा॥वसनस्यदशाग्राह्याशूद्रयोत्कृ
ष्टवेदनेइतिच॥अत्रजन्मग्रहणेनउत्तमवर्णग्रहणं॥वैश्यायाःक्षत्रि
येणसहविवाहेप्रतोदएव॥इतिविवाहक्रमः॥अथविवाहभेदाः॥
मनुः॥ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः।गांधर्वोराक्षसश्चैव
पैशाचश्चाष्टमःस्मृतइति।तत्रक्रमेणैवाष्टानांस्वरूपंफलंचाहाश्वला
यनः।अलंकृत्यकन्यामुदकपूर्वांदद्यादेषब्राह्मोविवाहस्तस्यांजातो
द्वादशावरान्द्वादशपरान्पुनात्युभयतःऋत्विजेवितते कर्मणिदद्या
दलंकृत्यसदैवोदशावरान्दशपरान्पुनात्युभयतः[illegible]संवर्तेन॥अ

निप्राजापत्योष्टावरानष्टपरान्पुनात्युभयतो गोमिथुनं दत्त्वोपयच्छेत
सआर्षः। सप्तावरान्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयच्छे
तसगांधर्वो धनेनोपतोष्योपयच्छेतसआसुरः। सुप्तानांप्रमत्तानांवाऽपह
रेत्सपैशाचोहत्वाभित्वाचशीर्षाणिरुदतीं रुदद्भ्यो पहरेत्सराक्षसइति। ए
तेषुगुणदोषानाह मनुः। ब्राह्मादिषुविवाहेषुचतुर्ष्वेवानुपूर्वशः। ब्रह्मव
र्चस्विनः पुत्राजायंतेशिष्टसंमताः। इतरेष्ववशिष्टेषुनृशंसानृतवादिनः
। जायंतेदुर्विवाहेषुब्रह्मधर्मद्विषःसुताः। नृशंसाहिंस्राः ब्रह्मद्विषोवेद
द्विषः। गांधर्वादिष्वनंतरंहोमादिकर्मापिकार्यं। तद्विनाभार्यात्वानुत्प
त्तेः। तथाहदेवलः। गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः। कर्त्तव्यश्च
त्रिभिर्वर्णैःसमयेनाग्निसाक्षिकः॥ वसिष्ठोपि॥ बलादपहृताकन्यामंत्रै
र्यदिनसंस्कृता॥ अन्यस्मै विधिवद्देयायथाकन्यातथैवसा॥ अत्रव्य
वस्थामाहमनुः॥ चतुरोब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः। राक्ष
संक्षत्रियस्यैवमासुरंवैश्यशूद्रयोरिति॥ राक्षसःक्षत्रियस्यमुख्यः।
आसुरोवैश्यशूद्रयोर्मुख्यः। अनुकल्पमाहसएव॥ षडानुपूर्व्याद्विप्र
स्यक्षत्रस्यचतुरोवरान्॥ विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसा
न्। इति। अस्यार्थः। ब्राह्मणस्यब्राह्माद्यागांधर्वांताः षडेवनेतरौ। एवंच
क्षत्रियादेर्ब्राह्माद्यनुज्ञा॥ आसुरादयश्चत्वारःक्षत्रियस्यधर्म्यावैश्यशू
द्रयोरपिराक्षसवर्जमेतएव॥ एवंचराक्षसंक्षत्रियस्यैव। ब्राह्मणस्यष
ड्नेतरौ॥ क्षत्रियस्यसर्वे। आसुरंनिंदतिकाश्यपः॥ क्रीताद्रव्येणयाना
रीनसापत्नीविधीयते॥ नसादैवेनसापित्र्ये दासींतांकवयोविदुरिति॥
यमः॥ कन्याविक्रयिणो मूर्खाःरहःकिल्बिषकारिणः॥ पतंतिनरकेघो
रेदहंत्यासप्तमंकुलमिति॥ एवंचात्मार्थधनग्रहणेकन्यार्थेतुनदोषः।
यथाहमनुः॥ यासांनाददतेशुल्कंज्ञातयोनसविक्रयः। अर्हणंतत्कुमा
रीणांनानृशंस्यंतुकेवलं॥ आनृशंस्यसमापित्वंब्राह्मणस्यापिपैशा
चमनुजानातिवत्सः॥ सर्वोपायैरसाध्यास्यात्तुकन्यापुरुषस्ययाः॥
चौर्येणापिविवाहेनसाविवाह्यारहस्थितेति। विवाहमध्येस्त्रीणांरजो
दर्शनेविशेषमाहयत्तपार्श्वः। विवाहेविततेतंत्रेहोमकालउपस्थिते
॥ कन्यायामृतुरागच्छेत्कथंकुर्वंतियाज्ञिकाः। स्नापयित्वातुतांकन्या

मर्चयित्वायथाविधि॥ पुंनामाहुतिंहुत्वाततस्तंत्रंप्रवर्त्तयेदिति॥
॥इतिविवाहभेदः॥ अथकालः॥ अथगृह्ये। उदगयनआपूर्यमाणपक्षेक
ल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाइति॥ यत्तुसार्वकालमेके
विवाहमितितद्दक्षिणायनप्राशस्त्यार्थमितिधर्मप्रकाशेनारदः॥ माघफाल्
गुनवैशाखज्येष्ठमासाःशुभप्रदाः॥ मध्यमःकार्त्तिकोमार्गशीर्षकोनिंदि
ताःपरे॥ नकदाचिद्दशर्क्षेषुभानोरार्द्राप्रवेशनात्॥ विवाहंदेवतानांचप्र
तिष्ठांनोपनायनं॥ अत्रयद्यपिशेषानिंदितास्तथापिभानोरार्द्राप्रवेशना
दितिपुनःश्रुत्याषाढोभ्यनुज्ञातःसचार्द्राप्रवेशनात्पूर्वमिति॥ अत्रचवि
धिनिषेधाःसौरमानाभिप्रायेण। यथोक्तंगर्गेण॥ सौरोमासोविवाहादौ
यज्ञादौसावनःस्मृतइति॥ अतःकश्यपेनचांद्रमानमप्युक्तं॥ उपवास
व्रतोद्वाहयात्राक्षौरोपनायन॥ तिथिवर्षादिनिखिलंचांद्रमानेनगृह्यत
इति॥ मदनरत्नेमिहिरः॥ ज्येष्ठस्यज्येष्ठकन्यायाविवाहोनप्रशस्यते।
तयोरन्यतरेज्येष्ठेज्येष्ठमासोनशस्यते॥ द्वौज्येष्ठौमध्यमौप्रोक्तावेकः
ज्येष्ठःशुभावहः॥ ज्येष्ठत्रयंनकुर्वीतविवाहेसर्वसंमतं॥ ज्येष्ठोकन्यावरो
पिज्येष्ठःज्येष्ठमा सश्चेतित्रिज्येष्ठं। ज्येष्ठानक्षत्रेणवात्रिज्येष्ठं। ज्ये
ष्ठानक्षत्रंज्येष्ठमासःज्येष्ठाकन्येत्यपित्रिज्येष्ठं॥ चतुर्ज्यैष्ठेत्रिज्येष्ठस्य
सद्भावान्निषेधप्रवृत्तिरस्त्येव॥ ज्येष्ठशब्देनात्राद्यगर्भोत्पन्नमपत्यंन
दाहश्रीपतिः॥ आद्यगर्भेदुहितुःसुतस्यवाज्येष्ठमासिनतुजातुमंगलमि
ति॥ तथापक्षोपि॥ पूर्वस्त्वापूर्यमाणउक्तः॥ बृहस्पतिःकृष्णमप्याह॥ शु
क्लपक्षःशुभःप्रोक्तःकृष्णोप्यन्त्यत्रिकंविनेति॥ जन्मपक्षस्तुनिषिद्धः॥ वि
वाहेचोपनयनेजन्ममासंविवर्जयेत्॥ विशेषाज्जन्मपक्षंतुवसिष्ठादै
रुदाहृतमिति॥ तिथ्यादिप्राशस्त्यनिषेधादिज्योतिःशास्त्रादवगंतव्यं
॥इतिविवाहेकालनिर्णयः॥ अथविवाहकालः॥ बौधायनः॥ दद्याद्गुणव
तेकन्यांनग्निकांब्रह्मचारिणे॥ अपिवागुणहीनायनोपरुंध्याद्रजस्वला
मिति॥ उपरोधनेनरजस्वलाप्रयोजकानभवेदित्यर्थः॥ पुराणेपि॥ यावच
नेलज्जयायातिकन्यापुरुषसन्निधौ। योन्यादीन्नावगूहेतताववद्भवति
कन्यका॥ यमः॥ अष्टवर्षाभवेद्गौरीनववर्षातुरोहिणी॥ दशवर्षाभवेत्क
न्याअतऊर्ध्वंरजस्वलेति॥ ऊर्ध्वंद्वादशेवर्षइत्यर्थः॥ उक्तंचसंवर्त्तेन॥ अ

ष्टमेतुभवेद्गौरीनववर्षातुरोहिणी॥दशमेकन्यकाप्रोक्ताद्वादशेवृषली
भवेत्॥वृषलीरजस्वला॥यथोक्तंदेवलेन॥वंध्याचवृषलीज्ञेयावृषलीच
मृतप्रजा॥अपरावृषलीज्ञेयाकुमारीयारजस्वलेति॥यमस्तुदोषमाह॥
प्राप्तेद्वादशमेवर्षेयःकन्यांनप्रयच्छति॥मासिमासिरजस्तस्याःपितापि
बतिशोणितं॥द्वादशवर्षग्रहणंप्रायिकं॥कस्याश्चित्तत्रापितद्दर्शनाभावा
त्॥अतोरजोदर्शनेविवाहात्पूर्वंयथाकुर्यादित्युक्तंभवति।अतश्चत्रिंशद्
र्षोद्वहेत्कन्यांहृद्यांद्वादशवार्षिकीमित्यादिमनूक्तिःसंगच्छते॥अस्या
श्चग्रहणेपिदोषमाहयमः॥यस्तांसमुद्वहेत्कन्यांब्राह्मणोमदमोहितः॥
असंभाष्योह्यपांक्तेयःसविप्रोवृषलीपतिः।यत्तुमनुः।काममामरणा
त्तिष्ठेद्गृहेकन्यर्तुमत्यपि।नत्वेवैनांप्रयच्छेत्तुगुणहीनायकर्हिचिदिति
॥तदपिशब्दात्कामशब्दाच्चनस्वार्थपरं।किंतुगुणवद्दानप्रशंसार्थम
ग्रेस्वयमेवबाहुल्येनदोषाभिधानात्॥कन्यादानेफलमाहमनुः॥ना
ग्निहोत्रादिभिस्तत्स्याद्दत्तातोब्राह्मण स्यवा॥यत्कन्यांविधिवद्दत्वा
फलमाप्नोतिमानवइति॥सालंकृतिकन्यादानेविशेषमाहसंवर्त्तः॥कू
पश्चाश्वमेधीचप्राणदानाभयेषुच॥समंयांतिस्थापृष्ठास्त्रयोवैनात्र
संशयइति॥सत्कृत्यालंकृतांकन्यांयोददातिसकूपदइतिकोशः।नचै
दंफलश्रवणात्काम्यमेवेतिवाच्यं॥अप्रदानेदोषश्रवणात्॥अतोज
तिष्टिवन्नित्यंकाम्यंच॥तथाकालांतरमपिवैवाहिकोविधिःस्त्रीणा
मौपनायनिकःपरइति॥येउपनयनेकालाःपंचमवर्षादयस्तएवकन्या
विवाहेमनुर्विशेषमाह॥उत्कृष्टायानुरूपायवरायसदृशायच॥अ
प्राप्तामपितांतस्मैकन्यांदद्याद्विचक्षणः।अप्राप्तकालमप्राप्तामित्य
र्थः।वरानुरोधेनदेयेत्यर्थः।इतिविवाहकालः।अथदातृक्रमः।याज्ञ
वल्क्यः।पितापितामहोभ्रातासकुल्योजननीतथा॥कन्याप्रदःपूर्वना
शेप्रकृतिस्थःपरःपरः॥अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ॥
नारदेनत्वन्येप्युक्ताः॥पितादद्यात्स्वयंकन्यांभ्राताचानुमतेपितुः॥
मातामहोमातुलश्चसकुल्योबांधवस्तथा॥मातात्वभावेसर्वेषांप्र
कृतौयदिवर्त्तते॥तस्यामप्रकृतिस्थायांकन्यांदद्युःस्वजातयः॥प्रकृ
तिस्थःउन्मादादिदोषशून्यः॥वयोविशेषेणफलमाहमरीचिः।गौरीं

ददन्नाकपृष्ठेवैकुंठेरोहिणींददत्॥कन्यांदद्ब्रह्मलोकेरौरवंतुरजस्व
लामिति॥गौर्योदित्तरूपमुक्तंप्राकृयदिऋतुदर्शनेपिताचनददातित
दाकन्यावर्षत्रयंप्रतीक्ष्यस्वयमेववरयेत्॥तदाहबौधायनः॥त्रीणि
वर्षाण्यृतुमतीकांक्षेतपितृशासनं॥ततश्चतुर्थेवर्षेतुविंदेत्तुसदृशं
पतिं॥यत्तुविष्णुः॥ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरमितितन्गुण
वद्वरविषयं॥इयंप्रतीक्षादातृसद्भावे॥यदातुकोपिदातानास्तितदारा
जादद्यात्॥यथाहनारदः॥यदातुकश्चिन्नैवस्यात्कन्याराजानमाव्र
जेदिति॥यदाराजापिनददातितदास्वयंवरंकुर्यात्॥याज्ञवल्क्यः॥ग
म्यंत्वभावेदातृणांकन्याकुर्यात्स्वयंवरमिति॥गम्यंगमनार्हं॥तथापि
आज्ञयापिस्वयंवरउक्तोभारतेसावित्र्युपाख्याने॥पुत्रिप्रदानकाल
स्तेनचकश्चिद्वृणोतिमां॥स्वयमन्विच्छभर्त्तारंगुणैःसदृशमात्मनः॥
तथानलोपाख्यानेपि॥ससमीक्ष्यमहीपालःस्वांसुतांप्राप्तयौवनां॥
अपश्यदात्मनःकार्यंदमयंत्याःस्वयंवरमिति॥स्कांदेविशेषः॥आत्मी
कृत्यसुवर्णेनपरकीयांतुकन्यकां॥धर्मेणविधिनादातुमसगोत्रोपि
युज्यतइतितत्फलंतत्रैव॥अनाथांकन्यकांदद्यात्सदृशायाधिकेवरे
॥द्विगुणंफलमाप्नोतिकन्यादानेयदीरितमिति॥अतोऽन्यकन्याऽन्ये
नापिधर्मार्थंदेया॥इतिदानस्वयंवरनिर्णयः॥अथदत्तापहारः॥तत्र
दत्तापहारेदंडमाहयाज्ञवल्क्यः॥सकृत्प्रदीयतेकन्याहरंस्तांचोरदंड
भागिति॥नारदोपि॥दत्वान्यायेनयःकन्यांवरायनददातितां॥अदुष्टः
श्चेद्वरोराज्ञासदंड्यस्तत्रचोरवत्॥दत्तांवाग्दत्तां॥अदुष्टश्चेदित्यनेनदु
ष्टायनदेयेतिगम्यते॥उक्तंचगौतमेन॥प्रतिश्रुत्याप्यधर्मसंयुक्तायन
दद्यादिति ॥याज्ञवल्क्योपि॥दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्र
जेदिति॥यत्तुमनुनोक्तं॥एतत्तुनपरेचक्रुर्नापरेजातुसाधवः॥यदन्य
स्याभ्यनुज्ञायनरस्यान्यस्यदीयते॥यच्चसकृदंशोनिपततिसकृत्क
न्याप्रदीयतइतितद्दोषवर्जितविषयं॥दुष्टामपियदिपाणिग्रहणस
मयात्पूर्वंतंक्रियतेततोनैवग्राह्या॥अतएवनारदः॥स्त्रीपुंसयोस्तुसंबंधा
द्वरणंप्राग्विधीयते॥वरणाद्ग्रहणंपाणेःसंस्कारोविलक्षणः॥तयोर
नियतंप्रोक्तंवरणंदोषदर्शनादिति॥तयोर्वरणपाणिग्रहणयोर्मध्येव

रणामनियतंयतोतद्दोषदर्शनात्प्रत्यावर्त्ततइत्यर्थः॥यमोपि॥नोदके
ननवाचावाकन्यायाःपतिरुच्यते॥पाणिग्रहणसंस्कारात्पतिःस्यात्स
प्तमेपदेइति॥अनेनसप्तपद्याःप्राग्वरमरणेनवैधव्यमितिगम्यते॥वसि
ष्ठेनाप्युक्तं॥अद्भिर्वाचावदत्तायांम्रियेताऽऽदौवरोयदि॥नचमंत्रोपनी
तास्यात्कुमारीपितुरेवसेति॥वरणोत्तरंदेशांतरगमनेआहकात्यायनः
॥वरयित्वातुयःकश्चित्प्रणश्येत्पुरुषोयदा॥ऋत्वागमांस्त्रीनतीत्य
कन्यान्यंवरयेत्पतिमिति॥प्रणश्येद्देशांतरंगच्छेदितिमाधवः।अन्यथा
परीक्षार्थेप्यर्थात्॥एवंतुचप्रतिगृह्यचयःकन्यांवरोदेशांतरंव्रजेत्॥
त्रीनृतून्समतिक्रम्यकन्यान्यंवरयेद्वरमिति।नारदीयेनाप्येकार्थताभ
वति।शुल्कदातुर्देशांतरमृतौकात्यायनआह।प्रदायशुल्कंगच्छेद्यःक
न्यायाःस्त्रीधनंतथा॥धार्यासावर्षमेकंतुदेयान्यस्मैविधानतइति॥शु
ल्कदमरणेमनुराह॥कन्यायांदत्तशुल्कायांम्रियेतयदिशुल्कदः॥देवरा
यप्रदातव्यायदिकन्यानुमन्यते॥यदिकन्यानुमन्यतइत्यनेनकन्यानु
मतौकस्मिन्नप्यननुमतौवादेवरायपरितुदेवरातिरिक्तमेवानुमन्य
तेतदातस्माएव॥बहुभिर्निर्दोषैर्वरणेकृतेविशेषमाहकात्यायनः॥अने
केभ्योहिदत्तायामनूढायांतुनत्रवै॥परागतश्चसर्वेषांलभेतादिवरः
सुतां॥अथागच्छेत्तवोढायांदत्तंपूर्ववरोहरेत्॥अन्यस्मैदत्तायांतस्मा
यच्छुल्कंतदेवलभेतेत्यर्थः।सदोषायप्रथमंप्रतिश्रुतापिनदेया॥दत्ता
मपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव्रजेत्॥इतिस्मृतेः॥वसिष्ठस्तुपाणिग्र
हणोत्तरमपिग्राह्येत्याह॥पाणिग्रहेकृतेकन्याकेवलंमंत्रसंस्कृता॥सा
चेदक्षतयोनिःस्यात्पुनःसंस्कारमर्हति॥नारदोपि॥उद्वाहितापिसाक
न्यानचेत्संप्राप्तमैथुना॥पुनःसंस्कारमर्हेत्सायथाकन्यातथैवसा॥
अयंचोद्वाहोत्तरमपहारःकलौनिषिद्धः॥कलिनिषिद्धानिचसमयम
यूखेवक्ष्यंते॥वाग्दानोत्तरंतुकन्यादोषोपलंभेगृहीतायाअपित्यागमा
हमनुः॥विधिवत्प्रतिगृह्यापित्यजेत्कन्यांविगर्हितामिति॥विगर्हितां
दुष्टां।नारदः॥नदुष्टांदूषयेत्कन्यांनादुष्टांदूषयेद्वरं॥दोषेसतिनदोषः
स्यादन्योन्यंत्यजतोर्द्वयोः॥कन्यादोषानारदेनदर्शिताः।दीर्घकुत्सितरो
गार्त्ताव्यंगासंस्पृष्टमैथुना॥धृताऽन्याहितभावावाकन्यादुष्टाप्रकीर्ति

तेति॥ अन्यस्मिन्पुरुषांतरे आहितःकृतोभावोमानसाभिलाषोयथासा तथोक्ता॥ अदुष्टात्यागेदोषमाह याज्ञवल्क्यः॥ अदुष्टांचत्यजन्दंड्योदू षयंस्तुमृषाशतमिति॥ कन्यादोषमनाख्यायददत्पित्रादिरपिदंड्य इत्याहसएव॥ अनाख्यायददद्दोषंदंड्यउत्तमसाहसमिति। इतिदत्ता पहारनिर्णयः॥ अधिवेदनेनिमित्तान्याह याज्ञवल्क्यः। सुरापीव्याधि ताधूर्तावंध्यार्थघ्न्यप्रियंवदा॥ स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीत था॥ धूर्ताविसंवादशीला॥ अधिवेदनंभार्यांतरपरिग्रहः॥ विशेषमा हमनुः॥ मद्यपासत्यवृत्ताचप्रतिकूलाचयाभवेत्॥ व्याधितावाधिवे त्तव्या हिंस्रार्थघ्नीचसर्वदा॥ वंध्याष्टमेधिवेद्याब्देदशमेतुमृतप्रजा ॥एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी॥ एतेषुनिमित्तेष्वधिवेत्त व्येत्यभ्यनुज्ञामात्रं। नतुअधिवेदनियमः॥ नदत्तस्त्रीधनंयासांदत्तेः तद्वैप्रकल्पयेदिति। इत्यधिवेदनं॥ अथविवाहोपनयनादौनिषेधास्त उच्यंते॥ सारावल्यां॥ एकमातृप्रसूतानामेकस्मिन्वत्सरेयदि। विवा हंनैवकुर्वंतिकुर्वंतितुततोन्यथा॥ भिन्नमातृकयोर्वत्सरभेदेनवा॥ प्र योगपारिजातेस्मृत्यंतरे। विवाहस्त्वेकजन्यानामेकस्मिन्नुदयेकु ले॥ नाशंकरोत्येकवर्षेस्यादेकाविधवातयोः। उदयोलग्नं॥ क्वचिदप वादस्तत्रैव॥ एकोदरीकसंभवंत्रिभिर्वर्षस्तत्रैकाविधवाभवेदिति॥ मंगलेविवाहादौ। अमंगलेश्राद्धादि॥ अनुकल्पमाह गर्गः। पुत्रीपरिण याद्दूर्ध्वंयावद्दिनचतुष्टयं॥ पुत्र्यंतरस्यकुर्वीतनोद्वाहमितिसूरयः॥ अ नुकल्पांतरमाहसएव॥ भ्रातृयुग्मस्वसृयुग्मेच भ्रातृस्वसृयुगेतथा॥ नजातुमंडनेकार्यमेकस्मिन्मंडपेहनीति॥ भ्रातृयुग्मस्यस्वसृयुग्म स्यभ्रातृस्वसृयुग्मस्यचएकस्मिन्नहनिएकस्मिन्मंडपेमंडनंनकुर्या त्पृथगयंनिषेधः समुच्चयेमानाभावात्॥ इदंचवचनद्वयंभिन्नमातृ जविषयमितिकेचित्। तन्नमानाभावात्॥ एकोदराहितेकमुख्यजन्या पत्ययोर्मुख्यस्यभ्रातृशब्दस्यान्यगौणत्वाच्च॥ अन्यविशेषमाहनार दः॥ प्रत्युद्वाहोनैवकार्योनैकस्मैदुहितृद्वयं॥ नचैकजन्मनोःपुंसोरेकज न्येतुकन्यके॥ नूनंकदाचिदुद्वाहोनैकदामुंडनद्वयमिति॥ नूनंकदाचि दुद्वाहावितिसापत्न्यपरं॥ मुंडनद्वयंसापत्न्ययोरपिनभवति॥ दुहितृद्वयं

नदेयमित्यध्याहारः॥कन्यकेनदेयेइतिच॥विशेषांतरंसंहितासारावल्यां
॥सापत्नतोमुंडनमूर्ध्वमिष्टंनपुत्रयोर्मुंडनमेककार्ये॥नपुंविवाहोर्ध्वम
तुत्रयेपिविवाहकार्यंदुहितुःप्रकुर्यात्॥नमंडनाच्चापिहि मुंडनंतुगोत्रै
कतायांयदिनाब्दभेदइत्यपिकचित्मुंडनंचौलं।मुंडनंचौलमित्युक्तंव्रतोद्वा
होतुमंडनमिति।ऋतुत्रयापवादउक्तः सारावल्यां॥फाल्गुनेचैत्रमासेतुपु
त्रोद्वाहोपनायने॥भेदादब्दस्यकुर्वीतनर्तुत्रयविलंघनमिति॥हारी
तोन्यविशेषमाह॥स्पर्शितास्याद्यदाकन्यावाचापित्रुदकेनच॥अंतरा
प्रातिकूल्यंचेत्पूर्वोढाविधवाभवेत्॥अचिरेणैवकालेनपशुभृत्यधन
क्षयइति॥प्रातिकूल्यंमरणं॥दक्षः॥दंपत्योःपितरौभ्रातासौपनीतःस
होदरः॥पितृव्यसदृशश्चैवपितामहपितामही॥एषामन्यतमेनष्टेनो
द्वहेत्तावधूवरः॥ज्योतिःप्रकाशे॥प्रतिकूलेपिकर्तव्योविवाहोमासतःप
रं॥शांतिंविधायगांदत्वावाग्दानादिचरेत्पुनरिति शांतिर्नवग्रहयज्ञादिः
॥अथाशौचनिर्णयः॥याज्ञवल्क्यः॥दानेविवाहेयज्ञेचसंग्रामेदेशविप्ल
वे॥आपद्यपिचकष्टायांसद्यःशौचंविधीयते॥विष्णुः॥ब्रह्मयज्ञविवाहे
षुश्राद्धेहोमेर्चनेजपे॥प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकं॥प्रारंभोव
रणंयज्ञेसंकल्पोव्रतसत्रयोः॥नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रि
येति॥विष्णुः॥नदेवप्रतिष्ठाविवाहयोःपूर्वसंभृतयोरिति॥बृहस्पतिः॥
विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके॥पूर्वसंकल्पितार्थेषुनदोषःपरिकी
र्तितइति॥आरंभाभावेप्यग्रेकालांतराभावे आशौचापवादउक्तोवि
ष्णुना॥आरब्धस्यविशुध्यर्थंकूष्मांडैर्जुहुयाद्घृतं॥गांदद्यात्पंचगव्या
शीततःशुध्यतिसूतकी॥सूतकीतिजननाशौचंनेत्यर्थः॥इत्याशौचनि
र्णयः॥रजोदोषेमेधातिथिः॥चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि॥भा
र्यारजस्वलायस्यप्रायस्तस्यनशोभनं॥वधूवरान्यतमयोर्जननीचेद्र
जस्वला॥तस्याःशुद्धेःपरंकार्यंमांगल्यंमनुरब्रवीत्॥बृहस्पतिः॥वैध
व्यंचविवाहेस्याज्जडत्वंव्रतबंधने॥चूडायांचशिशोर्मृत्युर्वित्तंयात्राप्रवे
शयोः॥तथा॥सूतिकोदक्ययोःशुद्धौगांदद्याद्धोमपूर्वकं।प्रातेकर्मणिशु
द्धिःस्यादित रस्मिन्नशुध्यति।अलाभेसुमुहूर्तस्यरजोदोषेचसंगते॥
श्रियंसंपूज्यतत्कुर्याद्वृत्रहत्याभयंनहि॥हैमींमाषमितांपद्मांश्रीसूक्तवि

धिनार्चयेत्॥ग्रस्तुचंपायसंहुत्वा अभिषेकंसमाचरेदिति॥अस्यमूलं
मृग्यं॥विवाहवेदिमाहनारदः॥हस्तोच्छ्रितांचतुर्हस्तैश्चतुरस्रांसमं
ततः॥स्तंभैश्चतुर्भिःसुश्लक्ष्णैर्वामभागेस्वसद्मनः॥विचित्रितांचित्रकुं
भैर्विविधैस्तोरणांकुरैः॥एवंविधामारुरोहेन्मिथुनंसाग्निवेदिकामिति॥
इतिवेदिः। अथकन्यादानार्थंरात्रावपिस्नानमाह वृद्धयाज्ञवल्क्यः॥ग्र
हणोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषुच॥स्नानंनैमित्तिकंज्ञेयंरात्रावपित
दिष्यते॥विवाहेपिरात्रिमनुजानात्यत्रिः॥मुख्योविवाहःपूर्वाह्णेमध्या
ह्नेचोत्तमोत्तमः॥निशायांमध्यमःप्रोक्तस्त्वपराह्णेतुगर्हितइति॥वि
वाहश्चकन्यापितरंप्रतिदानं॥वरंप्रतिपाणिग्रहणादिकन्याभुक्तवत्ता
पिप्रातर्थोद्येत्याहव्यासः॥भुक्त्वासमुद्वहेत्कन्यांसावित्रीग्रहणंतथा।
उपोषितःसुतांदद्याद्दिनांतायद्विजायत्विति॥सर्वेषुदानेषुप्राङ्मुखोदा
तोदङ्मुखःप्रतिगृहीता॥कन्यादानउदङ्मुखोस्तत्प्राङ्मुखंसंप्रदान
मितिवक्ष्यते॥दानमयूखे॥मधुपर्कमाहाश्वलायनः॥ऋत्विजोवृत्वाम
धुपर्कमाहरेत्स्नातकायोपस्थितायेतिउपस्थितायकन्याप्रतिग्रहार्थमा
गताय।अस्मिन्मधुपर्केगवालंभःकलौनकार्यः।पादप्रक्षालनेमधुपर्के
विशेषेणविशेषमाहाश्वलायनः।दक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यं
शूद्रायेति॥अग्रग्रथमंएवंचवैश्यशूद्रयोरनियमः।ब्राह्मणग्रहणंद्विजो
पलक्षणमितिकेचित्।मधुपर्कस्यभोजनं॥नारायणेननामांसोमधु
पर्कोभवतीतिसूत्रव्याख्यानेउक्तं॥मांसस्यलोकेव्यंजनस्यानीयत्वा
त्तत्सहितोमधुपर्कोभोजनमिति।अयंचार्थशाखयाकार्यः।तदुक्तंपरि
शिष्टे॥अर्ध्यस्ययस्ययाशाखातच्छाखागृह्यचोदितः।मधुपर्कःप्रदात
व्योप्यन्यशाखेपिदातरीति।याज्ञिकास्तुज्योतिष्टोमादावन्यशाखीयो
पियच्छाखीयमार्त्विज्यंकरोतितच्छाखयाकुर्वंति॥नतुसंप्रदायमात्रं॥
कन्यादानंतुदानमयूखेवक्ष्यते॥अथवधूगृहप्रवेशः॥मिहिरः॥विवा
हस्यनिवृत्तिस्तुचतुर्थेहनिरात्रिषु॥तासुनागबलिःकार्योविप्राशीर्वा
चनंतथा॥नागानांहस्तिनांबलिःपूजा॥विधिमाहयज्ञपार्श्वः।चतुर्थे
दिवसेरात्रौलिखेन्नागान्सरोवरं॥हिरण्यगर्भंतन्मध्येगंधपुष्पाक्षता
दिभिः॥संपूज्याप्सरसश्चैवसोमगंधर्वपावकान्॥संपूज्यवाश्वहस्त्या

द्वीनाशेप्यस्वगृहंप्रति॥ संवेशनादिकंकर्म अन्यथातुव्रजेद्गृहं॥ संवेशनं गृहप्रवेशः॥ कालदीपे॥ शुभकालेगृहेप्राप्तौवर्द्धंतेसंपदः सदा॥ असत्कालेगृहप्राप्तौसर्वनाशोगृहेभवेत्॥ नारदः॥ आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिने॥ वधूप्रवेशःसंपत्त्यैदशमेथसमेदिने॥ तथा॥ समवर्षेसमेमासियदिनारीगृहंव्रजेत्॥ आयुष्यंहरतेभर्त्तुःसानारीमरणंव्रजेदिति॥ तथा॥ वधूप्रवेशःप्रथमेतृतीयेशुभप्रदः पंचमकेथवाब्दे॥ द्वितीयकेवाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यादिति॥ तथा॥ ज्योतिःप्रकाशे॥ वामेशुक्रेनवोढायाःसुखंहानिश्चदक्षिणे॥ धनंधान्यंचपृष्ठस्थेसर्वनाशःपुरास्थिते॥ नवोढायास्तुवैध्यंयदुक्तंसंमुखेभृगौ॥ नदेवंविबुधैर्ज्ञेयमन्यथातुद्विरागमेइति॥ अन्यत्कुमुहूर्त्तादिदेवज्ञोदितं ग्राह्यं॥ मंडपोद्वासनकालःप्रयोगरत्ने॥ अष्टमेदिवसेकुर्यान्मंडपोद्वासनंबुधः॥ षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ॥ षष्ठंनेष्टमित्यर्थः॥ विषममपिनेष्टंपंचमसप्तमेदिनेमुक्त्वाइतिमंडपोद्वासनं॥ अथतृतीयमानुषीविवाहनिषेधोमात्स्ये॥ तृतीयांमानुषींनैवचतुर्थींयःसमुद्वहेत्॥ पुत्रपौत्रादिसंपन्नःकुटुंबीसाग्निकोज्वरः॥ उद्वहेद्इतिसिद्ध्यर्थंतृतीयांनकदाचन॥ मोहादज्ञानतोवापियदिगच्छेत्तुमानुषीं॥ नश्यत्येवनसंदेहोगर्गस्यवचनंयथेति॥ संग्रहे॥ चतुर्थादिविवाहार्थंतृतीयेर्कंसमुद्वहेदिति॥ अर्कविवाहप्रकारःशांतिमयूखेवक्ष्यते॥ ज्येष्ठेभ्रातर्यकृतविवाहेकनिष्ठोनविवहेदित्युक्तं॥ चतुर्विंशतिमते॥ जीवत्पितरिनादध्यादाहिताग्निःसनोयदि॥ तथैवभ्रातरिज्येष्ठेनयजेन्नविवाहयेत्॥ ज्येष्ठभ्रात्रात्वनुज्ञातःकुर्यादग्निपरिग्रहं॥ अनुज्ञातोपिसन्मित्रानादध्यान्मनुरब्रवीत्॥ क्वचिददोषइत्याहकात्यायनः॥ देशांतरस्थक्लीबैकवृषणानसहोदरान्॥ वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥ जडमूकांधबधिरकुब्जवामनकुंडकान्॥ अतिवृद्धानभार्यांश्चकृषिसक्तान्नृपस्यच॥ धनवृद्धिप्रसक्तांश्चकामतोऽकारिणस्तथा॥ कुहकांस्तस्करांश्चापिपरिविंदन्नदुष्यति॥ अभार्यान्नैष्ठिकादीन्॥ अन्यथादोषइतिगम्यते॥ यमलयोर्मध्येजन्मनैवज्येष्ठता॥ केचिदाधानक्रमेणज्येष्ठवर्णयंतः पश्चाज्जातस्यपूर्वमाधानंभवतीतितस्यैवज्येष्ठतामाहुः॥

॥तन्न॥आधानप्राथम्येन ज्यैष्ठतायां मानाभावात्॥अन्यथापत्नीनांपू
र्वपरभावेनाधानेजातेउत्तराहितस्यप्रथमोत्पन्नोज्यैष्ठतानस्यात्॥आ
धानेजन्मशब्दाभावाच्च॥अतएवाहमनुः॥यमयोश्चैवगर्भेषुजन्मतो
ज्येष्ठतामतेति॥मेधातिथिनापिजन्मतएवज्यैष्ठ्यमित्युक्तं अस्मिन्वि
षये॥तथाचदीधितिषूविषयेभूयान्प्रपंचःप्रायश्चित्तमयूखेनिरूपयिष्यते
॥पुनर्विवाहेग्निमाहकात्यायनः॥सदारोन्यान्पुनर्दारानुद्वोढुंकारणांतरा
त्॥यदीच्छेदग्निमान्कुर्वन्क्वहोमोस्यविधीयते॥स्वाग्नावेवभवेद्धोमोलौ
किकेनकदाचनेति॥इदंचाग्निसन्निधाने॥अग्निसन्निधानाभावेतुलौकि
केकृत्वाग्निद्वयसंसर्गंकुर्यात्॥संसर्गमाहशौनकः॥अथाग्न्योर्गृह्ययोर्योग
सपत्नीभेदजातयोः॥सहाधिकारसिद्ध्यर्थमहंवक्ष्यामिशौनकः॥पृथक्
स्थंडिलयोरग्नीसमाधाययथाविधि॥तंत्रंकृत्वाज्यभागांतमग्न्याधाना
दिकंततः॥जुहुयात्पूर्वपत्न्याग्नौतयान्वारब्धआहुतीः॥अग्निमीळेपुरो
हितंसूक्तेनत्वर्चेनतुसमिध्येनंसमारोप्यायंतेयोनिरित्यृचा॥मत्यवरो
हेत्यनयाकनिष्ठाग्नौविधीयते॥आज्यभागांततंत्रादिकृत्वारब्धतदा
दितः॥समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धुतं॥चतुर्गृहीतेनैताभि
र्ऋग्भिःषड्भिर्यथाक्रमं॥अग्नावग्निश्चरतीतिअग्निनाग्निःसमिध्यते॥अ
स्तीदमितितिसृभिःपाहिनोअग्नएकया॥ततःस्विष्टकृदारभ्यहोमशेषं
समापयेत्॥गोयुग्मंदक्षिणादेयाश्रोत्रियायाहिताग्नये॥पत्न्योरेकायदि
मृतादग्ध्वातेनैवतांपुनः॥आदधीतान्ययासार्धमाधानविधिनागृहीति
॥इत्यग्निद्वयसंसर्गः॥अथसायंप्रातर्होमः॥तत्रसायंकालादारंभः॥त
त्कर्तॄनाहाश्वलायनः॥पाणिग्रहणादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रः
कुमार्यंतेवासीवेति॥दक्षः॥ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः
॥एतैरेवहुतंयत्तुतद्धुतंस्वयमेवत्विति॥एतैश्चयजमानस्यपत्न्यावा
अनुज्ञयातत्सन्निधौचहोतव्यंनान्यथापर्वणितुसायंहोमःस्वयमेवका
र्योनान्येन॥तत्रप्रादुष्करणकालमाहकात्यायनः॥स्तृयेतुशीलमप्रातेत
हतषड्भिरिहांगुलैः॥प्रादुष्करणमग्नीनांप्रातर्भासामदर्शने॥उक्तकाल
तिक्रमेव्याहृतिभिःकाज्याहुतिः॥होमकालमाहमनुः॥लेखामात्रस्तुदृश्ये
तरश्मिभिस्तुसमन्वितः॥उदितंतंविजानीयात्तत्रहोमंप्रकल्पयेत्॥अनु

कल्पोपि॥प्रदोषांतोहोमकालः संगवांतःप्रातस्तम तिनीयचतुर्गृहीत माज्यंजुहुयाद्याहुतिभिः॥होमद्रव्याणि गृह्यपरिशिष्टे॥पयोदधिसर्पिर्यवागूरोदनंतंडुलाःसोमस्तैलमापोव्रीहयोयवास्तिलाइतिहोम्या निसंग्रहे॥द्रवंहविःस्रुवेणैव पाणिनाकठिनंहविः॥अंगुल्यग्रेणहोनंस्यात्कुत्तांगुलिनोदनमिति॥आयतनंचोक्तं॥अरत्निमात्रमग्न्यर्थंकार्यमायतनंबुधैः॥एशीतमात्रमित्येकेतद्व्यासांतरंभवेदिति॥अपत्नीकोपि पूर्वमृतायैपत्न्यैअर्द्धाग्निंदत्वाऽवशिष्टार्द्धाग्नौ पूर्ववत्सायंप्रातर्होमेकुर्यादिष्टिं तुनेति॥इतिनित्यहोमः॥अथस्त्रीधर्माः॥मनुः॥बालयावायुवत्यावावृद्धयावापियोषिता॥नस्वातंत्र्येणकर्तव्यंकिंचित्कार्यंगृहेष्वपि॥पित्राभर्त्रासुतैर्वापिनेच्छेद्विरहमात्मनः॥एषांहिविरहेणस्त्रीणां गृहेकुर्यादुभेकुले॥याज्ञवल्क्यः॥संयतोपस्करादक्षाहृष्टाव्ययपराङ्मुखी॥कुर्याच्छ्वशुरयोःपादवंदनंभर्तृतत्परा॥नास्तिस्त्रीणांपृथग्यज्ञोन व्रतंनाप्युपोषणं॥पतिंशुश्रूषतेनारीतेनस्वर्गेमहीयते॥पाणिग्राहस्य साध्वीस्त्रीजीवतोवामृतस्यवा॥पतिलोकमभीप्संतीनाचरेत्किंचिदप्रियं॥ चरेत्॥स्कान्दे॥प्रसुप्तंतुसुखासीनंरममाणंयदृच्छया॥आतुरेष्वपिकार्येषुपतिंनोपातयेत्क्वचित्॥स्त्रीधर्मिणीत्रिरात्रंतुस्वमुखंनैवदर्शयेत्॥स्ववाक्यंश्रावयेन्नापियावत्स्नातानविशुद्ध्यति॥सुस्नाताभर्तृवदन मीक्षेन्नान्यस्यकस्यचित्॥अथवामनसिध्यात्वापतिंभानुंविलोकयेत् ॥नरजक्यानकारुक्यानचभ्रमणयापिच॥नचदुर्भगयाक्वापिसखित्वं कुरुतेतुसा॥भर्तृविद्वेषिणीनारीनसंभाषेतकर्हिचित्॥तथा॥उक्ताप्रत्युत्तरंदद्याद्यानारीक्रोधतत्परा॥साश्वनीजायतेग्रामेशृगालीनिर्जनेवने॥पतिंयाताडितुंचेच्छेत्साव्याघ्रीवृषदंशिकेति॥शंखः॥नानुक्त्वागृहान्निर्गच्छेन्नानुत्तरीयानत्वरितंव्रजेन्नपरपुरुषंभाषेतान्यत्रवणिक्प्रव्रजितवृद्धवैद्येभ्योननाभिंदर्शयेदागुल्फाद्वासःपरिदध्यान्नस्तनौविवृतौकुर्यान्नहसेदनपावृतंनभर्तारंतद्बंधूंन्वाद्विष्यात्॥मनुः॥तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत्॥भुंक्तेभुक्तेपतौयातुद्यासीनावापिबासिते॥विनिद्रेचविनिद्रायाप्रथमंप्रतिबुध्यते॥अनलंकृतमात्मानंपत्युर्नैदर्शयेत्क्वचित्॥आक्रुष्टावापिनाक्रोशेत्ताडितापिप्रसीदति।सेवतेभर्तुरुच्छि

ष्टमिष्टमन्नंफलादिकं॥ मत्प्रसाद इत्युक्त्वापतिदत्तंप्रतीच्छति॥ एतेपू
र्वोक्तानियमाविवाहोत्तरमेव॥ अथप्रोषितपतिकाधर्माः॥ याज्ञवल्क्यः
॥क्रीडाशरीरसंस्कारंसमाजोत्सवदर्शनं॥ हास्यंपरगृहेयानंत्यजेत्प्रोषि
तभर्तृका॥ तथाप्रोषितेमलिनाकृशेति॥ अथविधवाधर्माः॥ मनुः॥ कामंतु
क्षपयेद्देहंपुष्पमूलफलैःशुभैः॥ नतुनामापिगृह्णीयात्पत्यौप्रेतेपरस्य
तु॥ आसीतामरणात्क्षांतानियताब्रह्मचारिणी॥ तथा॥ विधवाकबरीबं
धोभर्तृबंधायजायते॥ शिरसोवपनंतस्मात्कार्यंविधवयासदा॥ एका
हारःसदाकार्योनद्वितीयःकदाचन॥ कृच्छ्रंपराकंकुर्याच्चतप्तकृच्छ्रम
थापिवा॥ यवान्नेनफलाहारैःशाकाहारैःपयोव्रतैः॥ प्राणयात्रांप्रकुर्वी
तयावत्प्राणःस्वयंव्रजेत्॥ पर्यंकशायिनीनारीविधवापातयेत्पतिं॥ तस्मा
द्भूशयनंकार्यंपतिसौख्यसमीहया॥ नैवांगोद्वर्तनाभ्यंगंस्त्रियाविधव
याक्वचित्॥ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः॥ तर्पणंपुत्रपौत्राभा
वे॥ नाधिरोहेदनड्वाहंप्राणैःकंठगतैरपि॥ कंचुकंनपरीदध्याद्वासोनवि
कृतंवसेत्॥ एवंधर्मसमायुक्ताविधवापिपतिव्रता॥ पतिलोकमवाप्नो
तिनभवेत्क्वापिदुःखितेति॥ यत्तुब्रह्मचर्येणसहवैकल्पिकंसहगमन
मुक्तंतद्विस्तरेणशुद्धिमयूखेप्रपंचयिष्यामः॥ इतिस्त्रीधर्माः॥ अथविवा
होत्तरंपंचयज्ञानुष्ठानमुक्तमाचारमयूखेदर्शयिष्यामः॥ अष्टकादिश्रा
द्धानंश्राद्धमयूखे॥ सप्तपाकसंस्थानित्याः॥ आधानादीनिनित्यानि॥
यथाहवसिष्ठः॥ अवश्यंब्राह्मणोग्नीनादधीत अग्निहोत्रदर्शपूर्णमासा
ग्रयणेष्टिपशुसोमांश्चयजते॥ याज्ञवल्क्योपि॥ प्रतिसंवत्सरंसोमःपशुः
प्रत्ययनंतथा॥ कर्त्तव्याग्रयणेष्टिश्चचातुर्मास्यानिचैवहीति॥ तथानित्या
निकर्माण्युक्त्वाबौधायनेनोक्तं॥ तस्मात्कंदैःफलैर्मूलैर्मधुनाज्यरसोद्भ
वा॥ नित्यंनित्यानिकुर्वीतनतुनित्यानिलोपयेत्॥ यानितुत्रैवार्षिकान्नोयः
सहिसोमंपिबेद्द्विजः॥ प्राक्सामिकीःक्रियाःकुर्याद्यस्यान्नंवार्षिकंभवेत्
॥तथा॥ पुण्यान्यन्यानिकुर्वीतश्रद्दधानोजितेंद्रियः॥ नत्वल्पदक्षिणैर्य
ज्ञैर्यजेताथकथंचन॥ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्तथर्त्विजं॥ आत्मानं
दक्षिणाहीनोनास्तियज्ञसमोरिपुरित्यादीनितानिकाम्यपराणि॥ नित्ये
षुयथाशक्त्यंगहीनेनाधिकारस्यषष्ठेस्थितत्वात्॥ कंदैर्मूलैरित्यादिव

संगच्छतेनसप्तर्षिसिद्धेवनाग्निशब्दःक्षत्रियाणांप्रतिनिधिर्नास्तितथाःउ
पादेयानांकालादीनांनत्यागइत्यादिस्थितंषष्ठे॥इतिसंस्काराः॥ब्रा
ह्मणस्यचतस्रोभार्याःक्षत्रियस्यतिस्रोवैश्यस्यद्वेशूद्रस्यैकेतिस्थिते॥
तत्रसमानजातिभ्यांपितृभ्यांजातानामपत्यानांसमानजातित्वंमातापि
त्रोर्वैजात्याज्जात्यंतरंचभवतीतिस्पष्टं॥लोकेनाजातीराहयाज्ञव
ल्क्यः॥सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः॥अनिंद्येषुविवाहेषु
पुत्राःसंतानवर्द्धनाः॥विप्रान्मूर्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां
॥अंबष्ठःशूद्र्यांज्जातोनिषादःपारशवोपिवा॥एकस्यैवनामद्वयं॥वैश्या
शूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ॥वैश्यात्तुकरणःशूद्र्यांवि
न्नास्वेषविधिःस्मृतः॥प्रतिलोमजाअप्युक्तास्तेनैव॥ब्राह्मण्यांक्षत्रि
यात्सूतोवैश्याद्वैदेहकस्तथा॥शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृ
तः॥क्षत्रियामागधंवैश्याच्छूद्रात्क्षत्तारमेवच॥शूद्रादायोगवंवैश्यां
जनयामासवैसुतं॥माहिष्येणकरण्यांतुरथकारःप्रजायते॥असत्सं
तस्तुविज्ञेयाःप्रतिलोमानुलोमजाइति॥प्रतिलोमाअसंतोऽनुलोमाः
संतइत्यर्थः॥एतेषांसंकीर्णसंकरभेदादिकमनुपयोगाद्विस्तृतिभयाच्च
नोक्तं॥एतासांचजातीनामंगत्वादिजातिस्थितंवार्त्तिके॥क्वचिज्जाते
शास्त्रगम्यतानि॥यथोक्तंयाज्ञवल्क्येन॥जात्युत्कर्षोयुगेज्ञेयःसप्तमे
पंचमेपिवा॥व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरमिति॥अस्यार्थो
मिताक्षरायांसप्तमेपिवाशब्दात्षष्ठेपंचमेयुगेजन्मनिजातेरुत्कर्षःपू
र्वजात्यपगमोन्यजातिप्राप्तिश्चब्राह्मणेनोढेत्येवंपरंपरयाषष्ठंब्राह्म
णंजनयति॥एवमुग्राक्षत्रियोढामाहिष्यायथाष्टमंषष्ठंपंचमंक्षत्रि
यंजनयति॥तथाकरणीयोढापंचमंवैश्यमिति॥इयंचदिक्॥तद्यथामू
र्द्धावसिक्तेनक्षत्रियोढातत्पुत्रेणापिक्षत्रियेत्येवंक्रमेणपंचमंक्षत्रियं
जनयति॥एवमंबष्ठेनोढावैश्यातत्पुत्रेणापिसत्येवंक्रमेणषष्ठंवैश्यंज
नयति॥एवंनिषादेनशूद्रोढातत्पुत्रेणापिशूद्रेत्येवंक्रमेणसप्तमंशू
द्रंजनयति॥एवंमूर्द्धावसिक्तादिष्वपियोज्यं॥तथाकर्मणांव्यत्ययेन
मपकृष्टकर्मणाव्यत्ययेसाम्यंयज्जातीयवृत्तिपरिग्रहस्तज्जातिप्राप्ति
रित्यर्थः॥तद्यथाब्राह्मणःस्वरसाऽजीवन्नापदिक्षत्रवृत्तिंकरोति॥गता

सामप्यापदितांनजहाति।तत्पुत्रोप्येवमितिक्रमेणपंचमःक्षत्रियएवजाय-
ते॥तथापिआपदिवैश्यवृत्त्याजीवतस्तांगतायामपितांवृत्तिंनजहात्ये
वंतत्पुत्रोपीत्येवंक्रमेणषष्ठेवैश्यएवजायते॥एवंशूद्रवृत्त्यापिजीवतः
एवंक्षत्रियवैश्ययोरपियोज्यं॥अस्मिन्व्याख्यानेपिशब्दस्यषष्ठपर
त्वंमूलंमृग्यं।एतेषांवृत्तयस्तदुपयोगान्योक्ताः॥इतिवर्णजातिविवेकः
॥अथसाधारणावर्णधर्माः॥तत्रब्राह्मणस्यषट्कर्माणियजनाध्य
यनदानयाजनाध्यापनप्रतिग्रहाख्यानि।तेषुत्रीणिवृत्त्यर्थानि॥यथा
हमनुः॥षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका॥याजनाध्याप
नेचैवविशुद्धाच्चप्रतिग्रहइति॥यजनंतत्रतत्रस्पष्टं।याजनंकेषांचि
त्प्रतिषिद्धं॥यथाहदेवलः॥यःशूद्रान्पतितांश्चापियाजयेदर्थकारणा
त्॥याजिनोवापुनस्ताभ्यांब्राह्मणोयाज्ययाजकइति॥सुमंतुरप्यया
ज्यानाह॥अभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिवस्त्रकार
तैलिकचाक्रिकध्वजिसुवर्णकारवर्मकारवेधकिगणगणगणिकसौनि
कव्याधनिषादरजकनुरुडचर्मकाराअभोज्यान्नाअप्रतिग्राह्याअया
ज्याश्चेति॥तथाभिचारयाजनमपिप्रतिषिद्धंयथाहमनुः॥व्रात्यानांया
जनंकृत्वायनेपूर्वभुक्ते॥अथब्राह्मणस्यापत्कल्पः॥तत्रपूर्वोक्तवृत्ति
त्रयासंभवेमनुः॥अजीवंस्तुस्वधर्मेणब्राह्मणःस्वेनकर्मणा॥जीवेत्क्ष
त्रियधर्मेणसह्यस्यप्रत्यनंतरइति॥पुनःस्वकर्मग्रहणंविगुणकर्मसंग्र
हार्थं।एतदुक्तंभवति॥यथोक्तैःप्रतिग्रहादिभिरजीवन्दुःप्रतिग्रहादिक
मपिकुर्यात्॥नत्वन्यंवृत्तिं॥यथोक्तंभगवता॥श्रेयान्स्वधर्मोविगुणः
परधर्मात्स्वनुष्ठितादिति॥मनुरपि॥वरंस्वधर्मोविगुणोनपारक्येन॥वि
शोवाप्यापदिद्विजइति॥वैश्यवृत्तावपिकृषिःकारणीयास्वयंनकार्या
॥यथोक्तंबृहस्पतिना॥कुसीदकृषिवाणिज्यंप्रकुर्वीतास्वयंकृतं॥आ
पत्कालेस्वयंकुर्यान्नैवसायुज्यतेद्विजइति॥तत्रापिनीलीकृषिर्वर्ज्या॥
नीलीकर्षणकर्त्तातुचंडालसदृशोहिसइत्यापस्तंबेननिंदितत्वात्॥
कृषिधर्मान्वक्ष्यामः॥वाणिज्येपिविशेषमाहयाज्ञवल्क्यः॥फलोपल
क्षौमसोममनुष्यापूपवीरुधः॥तिलौदनरससारान्दधिक्षीरघृतंज
लं॥रसासवमधूच्छिष्टमधुलाक्षाःसबर्हिषः॥मृच्चर्मपुष्पकुतपकेश

तत्रविषस्मितीः॥कौशेयनीलीलवणमांसैकशफसीसकान्॥शाकार्द्रौ
षधिपिण्याकपुष्पगंधांस्तथैवच॥वैश्यवृत्त्यापिजीवन्नोविक्रीणीतक
दाचनेति॥मनुरपि॥अश्मनोलवणंचैवपशवोयेचमानुषाः॥सर्वंचतां
तवंरक्तंशाणक्षौमाविकानिच॥अपिचेत्स्युररक्तानिफलमूलेतथौष
धीः॥अपःशस्त्रंविषंमांसंसोमंगंधांश्चसर्वशः॥क्षीरंक्षौद्रंदधिघृतं
तैलंमधुगुडंकुशान्॥आरण्यांश्चपशून्सर्वान्दंष्ट्रिणश्चवयांसिच॥
मद्यंनीलींचलाक्षांचसर्वांश्चैकशफांस्तथा॥नविक्रीणीयादितिशेषः
॥तथा॥भोजनाभ्यंजनात्दानाद्यदन्यत्कुरुतेतिलैः॥कृमिभूतःश्वविष्ठायांपितृ
भिःसहमज्जति॥सद्यःपततिमांसेनलाक्षयालवणेनच॥त्र्यहेणशूद्रो
भवतिब्राह्मणःक्षीरविक्रयात्॥इतरेषांतुपण्यानांविक्रयादिहकामतः॥
ब्राह्मणःसप्तरात्रेणवैश्यभावंनियच्छति॥इतरेषांपूर्वोक्तानांक्षीरव्यति
रिक्तानां॥इदमनापदि॥रसेषुविशेषमाहसएव॥रसारसैर्निमातव्यान
त्वेवलवणंरसैः॥कृतान्नंचाकृतान्नेनतिलाधान्येनतत्समाइति॥वाणि
ज्यमप्यस्वयंकृतमित्याहगौतमः॥वाणिज्यंकृषिवद्वेतिअत्यंतापदि
तुस्वयमपिकुर्यात्॥सर्वासंभवेसेवामप्यनुजानातिप्रचेताः॥महत्याप
न्नोविप्रःक्षत्रसेवांसमाश्रयेत्॥शूद्रसेवानकर्तव्याप्राणैःकंठगतैर
पि॥शूद्रसेवायांप्रायश्चित्ताम्नानादत्यंतापदिकार्यैत्येवंगम्यते॥तथा
प्यत्यंतापदिचौर्यमनुजानातियाज्ञवल्क्यः॥बुभुक्षितस्त्र्यहंस्थित्वा
धान्यमब्राह्मणाद्धरेत्॥प्रतिगृह्यतदाख्येयमभियुक्तेनधर्मतः॥अब्रा
ह्मणादितिशूद्राद्धरेत्तदलाभेक्षत्रियादितिनिबंधकृतः॥मनुः॥द्विजोध्व वैश्य
गःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके॥आददानःपरक्षेत्रान्नदंडंदातुमर्हति
॥तथैवसप्तमेभक्तेभक्तानिषडनश्नता॥अश्वस्तनविधानेनहर्तव्यंहीन
कर्मणइति॥राजानंप्रत्याहमनुः॥तस्यवृत्तंकुलंशीलंश्रुतमध्ययनंतथा॥
ज्ञात्वाराजाकुटुंबंचधर्म्यांवृत्तिंप्रकल्पयेदिति॥एवंक्षत्रियस्यापदिवैश्य
वृत्तिः॥शूद्रवृत्तिस्तदसंभवे॥वैश्यस्यापदिशूद्रवृत्तिःक्षत्रवृत्तिर्वानतु
ब्राह्मणवृत्तिः॥शूद्रस्यापदिवैश्यवृत्तिस्तदसंभवेक्षत्रवृत्तिः॥नतुविप्र
वृत्तिः॥यथोक्तं॥उत्कृष्टंवापकृष्टंवातयोःकर्मनविद्यते॥मध्यमेकर्मणीहि
त्वासर्वसाधारणेहिते॥एवंयथाकथंचिदप्यापदंहित्वाप्रायश्चित्तंकुर्यात्

यथोक्तं॥ याज्ञवल्क्येन॥ निस्तीर्यैतामथात्मानंभावयित्वान्यसेत्पथि॥
पराशरोपि॥ अशक्तोनिंदितंकुर्यात्प्रायश्चित्तंपुनश्चरेदिति॥ अतोज्ञाय
तेनुज्ञानेपिईषद्दोषोस्त्येव॥ यत्तु॥ आपद्गतःसंप्रगृण्हन् भुंजानोवायतस्
ततः॥ नलिप्येतैनसाविप्रोज्वलनार्कसमोहिसइतितन्नसर्वथादोषा
भावप्रतिपादनपरंकिंतुसर्वेनएवात्मानंगोपयेदितिगोपनस्यपापाभा
वार्थत्वादेनावश्यकत्वार्थं अग्रेप्रायश्चित्ताम्नानात्॥ एतावान्परंविशे
षोयदापदिकृतानांनिंदितानांकर्मणांबहुप्रायश्चित्तमापदित्वल्पं
मिति॥ इत्यापत्कल्पनिरूपणं॥ क्षत्रियधर्मोअपिगीतायां॥ शौर्यंतेजो
धृतिर्दाक्ष्यंयुद्धेचाप्यपलायनं॥ दानमीश्वरभावश्चक्षात्रंकर्मस्वभावज
मिति॥ अन्येचउक्तानीतिमयूखादौविस्तरेणवक्ष्यंतेच॥ वैश्यधर्माउक्ता
याज्ञवल्क्येन॥ कुसीदकृषिवाणिज्यंपाशुपाल्यंविशःस्मृतमिति॥ भा
रतेवैश्यवाक्यं॥ यद्ददातिनतन्न्यूनंयद्गृण्हातिनचाधिकं॥ विक्रीणामिर
सांश्चाहंमद्यवर्जममायचेति॥ कृष्युपयुक्तहलेविशेषमाहहारीतः॥
अष्टगवंधर्म्यहलंषड्गवंजीवितार्थिनां॥ चतुर्गवंनृशंसानांद्विगवंब्र
ह्मघातिनामिति॥ द्विगवंब्रह्मघातवन्निंदितमित्यर्थः॥ इदंचकठिनभू
मिविषयत्वेनयोज्यं॥ योज्यवृषान्पराशरआह॥ स्थिरांगंनीरुजंतृप्तं
सुनर्दंषंढवर्जितं॥ वाहयेद्दिवसस्यार्धंपश्चात्स्नानंसमाचरेत्॥ सुनर्दं
श्रांतः॥ स्नानंरुक्षाणां॥ वर्ज्यानाहसएव॥ क्षुधितंतृषितंश्रांतंबलीवर्दं
नयोजयेत्॥ हीनांगंव्याधितंक्लीबंवृषंविप्रोनवाहयेदिति॥ विप्रस्तु
पलक्षणं॥ भारते॥ वाहमेहुंकृतेनेवशाखयावासमन्वया॥ नदंडेननय
ष्ट्यावानपाशेननदारुणा॥ खलयज्ञमाहपराशरः॥ वृक्षंछित्वामहींभि
त्वाहत्वाचकृमिकीटकान्॥ कर्षकःखलयज्ञेनसर्वपापैःप्रमुच्यते॥ ख
लयज्ञःखलस्यधान्यदानं॥ धान्यभागउक्तःशैवपुराणे॥ राज्ञेदत्वातु
षड्भागंदेवानांचैकविंशकं॥ विप्राणांत्रिंशकंभागंसर्वपापैःप्रमुच्यते॥ दे
वग्रहणंपितॄणामुपलक्षणमितिधर्मप्रकाशे॥ एतद्दानेदोषउक्तस्तत्रै
व॥ अदत्वाकर्षकोदेविपस्तुधान्यंप्रवेशयेत्॥ मरुदेशेभवेद्वृक्षःसपुष्प
फलवर्जितइति॥ एतादृशस्यफलमुक्तंभारते॥ वणिग्धर्ममनुश्चन्वैदेव
ब्राह्मणपूजकः॥ सवणिक्स्वर्गमाप्नोतिपूज्यमानोप्सरोगणैः॥ वैश्यस्यभ

वत्येवेति॥ इति वैश्यधर्माः॥ शूद्रधर्ममाह मनुः॥ विप्रसेवैव शूद्रस्य वि
शिष्टं कर्म कथ्यत इति विष्णुपुराणे॥ द्विजशुश्रूषयैवैष पाकयज्ञाधिका
रवान्॥ निजान्जयति वै लोकान्शूद्रो धन्यतरः स्मृत इति॥ द्विजैश्च
शूद्रवृत्तिः कार्येत्युक्तं भारते॥ यश्च कश्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजे
त्॥ कल्प्या तस्य वनैरावृत्तिर्धर्मविदो जनाः॥ गौतमः॥ जीर्णान्युपान
च्छत्रवासांसि कूर्चानीति देयानीति शेषः॥ कूर्चं तृणमयमासनं॥ उपल
संवेदं॥ अतश्चापेक्षितं जीर्णशय्याकंबलाद्यपि देयं॥ कृत्यंतरमाहया
ज्ञवल्क्यः॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत्॥ शिल्पैर्वा
विविधैर्जीवेद्द्विजातिहितमाचरन्निति॥ शूद्रस्य वाणिज्ये प्रसक्ते पूर्वोक्ता
नां फलोपलादीनां विक्रयेन दोषः॥ लवणं दधि तक्रं च तैलं दधि घृतं पयः॥
न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयमिति बृहत्पराशरोक्तेः॥ क्वचि
द्विशेषमाह स एव॥ विक्रीणन्मद्यमांसानि ह्यभक्ष्यस्य च भक्षणं॥ कुर्व
न्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥ कपिलाक्षीरपानेन ब्राह्मणीग
मनेन च॥ वेदाक्षरविचारेण शूद्रश्चांडालतां व्रजेदिति॥ एवं च मद्यमां
सातिरिक्तं विक्रेयमिति॥ पुराणादिश्रवणे शूद्रस्याधिकारो नाध्ययने॥
तथा च भारते॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा॥ तेन भारत
माख्यानं मुनिना कृपया कृतं॥ श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणम
ग्रत इति॥ शूद्रं प्रति विशेषमाहांगिराः॥ तस्माच्छूद्रं समासाद्य सदा
धर्मपथे स्थितं॥ प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति॥ स्वयं
कर्तृकयोर्जपहोमयोर्निषेधः॥ अतो ब्राह्मणेन जपहोमे वा कारिते न
दोषः॥ तदुक्तं धर्मप्रकाशे धर्मविवृतौ॥ उपवासो व्रतं होमस्तीर्थस्नान
जपादिकं॥ विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति॥ शूद्रस्य पं
चगव्याशनमाह पराशरः॥ स्त्रीशूद्रस्य विशुद्ध्यर्थं प्राजापत्यं समाचरे
त्॥ पंचगव्यं तु कुर्वीत स्नात्वा पीत्वा शुचिर्भवेदिति॥ यत्त्वत्रिणोक्तं॥ पं
चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्॥ उभौ तौ पापकर्माणौ पूया
ख्ये नरके वसेदिति॥ तद्धि कल्पार्थमिति केचित्प्रायश्चित्तांगं पंचगव्यप्रा
शनं गमनं तु नेति व्यवस्थेति धर्मप्रकाशे॥ युक्तं तु कलौ पाराशरः स्मृति
रित्यनेनान्यस्मृतिविरोधे कलौ पराशरस्मृतिर्बलीयसीत्युच्यते॥ अ

तःकलौप्राशनमेव॥युगांतरेतुविकल्पइति॥शूद्रस्यसर्वसंस्कारप्रा
प्तौकेषांचिद्बाधः॥तत्रगर्भाधानप्रभृत्यन्नप्राशनांताःसंस्काराःशूद्रस्य
भवंति।यत्तुब्राह्मणक्षत्रियवैश्यानांगर्भाधानसीमंतोन्नयनजातकर्म
नामकरणान्नप्राशनचूडोपनयनव्रतचर्याध्ययनसमावर्तनविवाह
यज्ञदानानिसमानानीतिसुमंतुवाक्यं॥तत्त्रयाणांमंत्रवत्संस्कारं न
शूद्रपरिसंख्यार्थं॥तथासतितस्यविवाहाप्रसक्तेः।चूडाकरणंतु।चू
डाकर्मद्विजातीनांसर्वेषामेवधर्मतइतिमनुवचनेद्विजातिग्रहणात्
शूद्रस्यनेतिमेधातिथिः।अपरार्कस्तु।चूडाकरणंमंत्रसहितंनभवती
त्याह॥वसिष्ठस्तुस्पष्टंविकल्पमाह॥परिचर्यातुशूद्रस्यानियतःकेश
वेष इति॥अस्यार्थोधर्मप्रकाशे।केशवेषएकाशिखासोऽनियतोवै
कल्पिकः॥तस्माच्छिखामात्रधारणंमुंडनंवेत्यर्थइति॥उपनयनं
त्वध्ययनाभावान्नास्ति॥मनुरपि॥चतुर्थएकजातिर्जननंयस्येत्यर्थः
॥शूद्रस्यपंचमहायज्ञमंत्रमाहयाज्ञवल्क्यः॥नमस्कारेणमंत्रेणपं
चयज्ञान्नहापयेदिति॥स्वाहास्थानेनमःशब्दप्रयोक्तव्यइत्यर्थः
देवताभ्यःपितृभ्यश्चेतिवानमस्कारमंत्रइतिविज्ञानेश्वरः।भारतेतु
॥स्वाहाकारोनमस्कारोमंत्रःशूद्रेविधीयतइतिस्वाहाशब्दस्यापि
विधानाद्विकल्पः॥अत्रचशूद्रावाजसनेयिनइतिवसिष्ठवाक्याद्वा
नितेषांकर्माणितानिकातीयसूत्रानुसारेणकार्याणीति।वैश्वदेवा
दौलौकिकाग्निर्ज्ञेयः॥तथाशूद्रस्यागमोक्तादीक्षापूजाचभवति।वरा
हपुराणेशैववर्णिकानांदीक्षाविधिरुक्ता।शूद्रस्यापिप्रवक्ष्यामिमद्भ
क्तस्यवरांगने॥यांतुदीक्षांसमासाद्यमुच्यतेसर्वकिल्बिषैरित्युक्त
त्वात्॥सूतसंहितायामपित्रैवर्णिकानांमंत्रपूजामुक्त्वासन्यासिनां
प्र णवेनपूजामुक्त्वा।नमोंतेनशिवेनैवस्त्रीणांपूजाविधीयते॥शिव
मंत्रेणशूद्राणामेवंपूजाप्रकीर्तितेत्युक्तं॥तत्रैव॥शूद्रःकर्मरतस्ते
नस्पृश्यमानोद्विजन्मना॥हृष्यामहंचसुतरांपूज्यमानश्चसुंदरि।व
र्णत्रयस्यशुश्रूषांशुचिःशूद्रःकरोतियः॥स्वयंवापिदीक्षयेत्सूर्यमं
डले॥आराध्यदेवतांसूर्यमंडलेत्वयापूज्यावेत्युपदिश्यदीक्षयेदित्य
र्थः।वराहपुराणे॥ब्राह्मणक्षत्रियविशांपंचरात्रंविधीयते॥शूद्रादीनां

चतच्छ्रोत्रपदवीमुपयास्यतीतिपंचरात्रश्रवणविधानाच्चसौरवैष्णवशै
वशाक्तवैनायकमंत्रेष्वधिकारःसिद्धः॥यत्तुसूतसंहितायांपूजनं
स्पर्शनंचोक्तंतत्स्वकृतपार्थिवादिविषयं।स्थावरेस्फाटिके॥केशवंवा
शिवंवापिस्पृष्ट्वानरकमश्नुतइतिनिषेधात्॥दीक्षितानांस्थावरेऽपि
ब्राह्मणद्वारापूजाभवतीति॥विशेषस्त्वाचारमयूखेवक्ष्यते॥तथाशू
द्रस्यज्ञानेधिकारीमहाभारते॥प्राप्यज्ञानंब्राह्मणात्क्षत्रियाद्वावैश्याः
शूद्राअपिनीचाअभीक्ष्णं॥श्रद्धातव्यंश्रद्दधानेनइत्थंतंश्रद्धातुंजन्म
गृह्याविशेषामिति॥यत्तूत्तरमीमांसायांकथंशूद्राधिकरणेशूद्रस्यब्र
ह्मविद्यानधिकारउक्तःसत्रैवर्णिकादिवदुपनिषच्छ्रवणादिनानभव
तीत्येवंपरः।पुराणादिश्रवणेनतुब्रह्मज्ञानंकेनवार्येत॥तेनसर्वंब्र
ह्मणउत्पन्नंब्रह्मण्यध्यस्तंमिथ्याब्रह्मैवसत्यमित्येवंरूपेणनिदि
ध्यासनेनज्ञानंसंपादनीयं।अतएवगीतायां॥मामुपाश्रित्यकौंतेय
येपिस्युःपापयोनयः॥स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांग
मित्युक्तं॥तथाशूद्रेणक्रियमाणेश्राद्धेब्राह्मणेनमंत्राःपठनीयाः॥
अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्णतइतिवाराहोक्तेः॥यत्तुमात्स्ये
॥शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाततइति॥तत्स्वयंमंत्रप्रयोगेनक
र्तव्यइत्येवंपरं॥सर्वश्राद्धानिवामेनभवंति॥शूद्रःकुर्यात्स्वदेवही
त्युक्तेः॥यत्तुवाराहेश्राद्धंप्रकृत्य।त्रिषुवर्णेषुकर्तव्यंपाकभोजनमे
वतु।शुश्रूषामभिपन्नानांशूद्राणांचवरानने।इतिपाकश्राद्धमुक्तं त
च्छूद्राणांद्विजोत्पन्नविषयमितिकेचित्॥युक्तंतुतस्मिन्शूद्रस्त्वाभा
वाच्छूद्राश्चपा   कर्त्तारइत्यापस्तंबोक्तपाककर्तृगोपालादिसच्छू
द्रपरमिति॥तच्चकलियुगातिरिक्तयुगविषयमितिवक्ष्यते॥यत्तुभ
विष्यत्पुराणे॥आवाहनादिकर्तव्यंयथाशूद्रेणतच्छृणु॥देवानां
देवनाम्नातुपितॄणांनामगोत्रतः॥पिंडांश्चनिर्वपेद्धीरनामतोगोत्र
तस्तथेतिशूद्राणांगोत्रमुक्तंतत्रकेचिद्वदंति॥तस्मादाहुःसर्वाःप्र
जाःकाश्यप्यइतिसामान्यदर्शनात्सर्वशूद्राणांकाश्यपंगोत्रं॥तस्य
चश्राद्धएवोक्तेस्तेनंनान्यत्रयावद्वचनंवाचनिकमितिन्यायात्॥अन्य
थासर्वशूद्राणामेकगोत्रत्वाद्विवाहःप्रसज्येतेति।अन्येतुमुख्यशूद्र

स्यसमर्थ्येन्यतमापत्यत्वाभावाच्छूद्रायामुत्पन्नः पारशवोगृह्यतइ
त्याहुः। पुत्रंतुब्राह्मणेनोत्पादितः पारसवस्तेनशूद्रोद्यातदुत्पन्नेनपु
नः शूद्रोदेत्येवंसप्तमेशूद्रोभवति॥ तस्यपरंपरयासप्तर्ष्यन्यतमाप
त्यत्वेनगोत्रसत्वात्तत्स्वरमेवेति॥ अन्येशूद्रधर्माआशौचापवादस्त
त्रतत्रवक्ष्यंतेशांतिकादावप्यधिकारः शांतिमयूखेस्थापयिष्यते॥
अन्येच॥ अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः॥ दानंदमोदया
क्षांतिः सर्वेषांधर्मसाधनमितिसाधारणधर्माअपिज्ञेयाः॥ इतिशूद्र
धर्माः॥ अथाश्रमधर्माः॥ तत्रब्रह्मचारिधर्माउक्ताः॥ गृहस्थोद्विविधउ
क्तोदेवलेन॥ द्विविधोगृहस्थोयायावरः शालीनश्च॥ तयोर्यायावरःप्र
वरोयाजनाध्यापनप्रतिग्रहवर्जनादिति॥ तस्यजीवनोपायमाहयाज्ञ
वल्क्यः॥ जीवेद्वापिशिलोंछे नेति॥ गृहीतधान्येक्षेत्रेपतितमंजरीग्रह
णंउंछं॥ धान्यस्यसंचयउक्तस्तेनैव॥ कुसूलकुंभीधान्योवात्र्याहिको
ऽश्वस्तनोपिवेति॥ स्वकुटुंबपोषणपरिमितंद्वादशदिनपर्यायमन्नंयः
संगृण्हातिसकुसूलधान्यः॥ षड्दिनपर्याप्तसंगृहीतःकुंभीधान्यः।
त्र्याहिकाऽश्वस्तनौस्पष्टौ॥ एषांमध्येपरःपरःश्रेष्ठः॥ शालीनमाहदेव
लः॥ षट्कर्माधिष्ठितःश्रेष्ठश्चतुष्पदगृहग्रामधनधान्ययुक्तोलोका
नुवर्तीशालीनइति॥ सचतुर्विधः॥ यथोक्तंमनुना॥ षट्कर्मैकोभव
त्येषांत्रिभिरन्यःप्रवर्त्तते॥ द्वाभ्यामन्यश्चतुर्थस्तुब्रह्मसत्रेणजीवती
ति॥ अस्यार्थः॥ कश्चिद्याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपा
ल्यैःषड्भिर्जीवति॥ अन्यस्त्रिभिः॥ प्रतिग्रहाध्यापनयाजनैः॥ तृतीयो
द्वाभ्यांयाजनाध्यापनाभ्यांचतुर्थस्त्वध्यापनेनैवेति॥ एतेष्वपिपरः
परःश्रेष्ठः॥ अन्येगृहस्थधर्माउक्तावक्ष्यंतेच॥ इतिगृहस्थधर्माः॥
तृतीयाश्रममाहयाज्ञवल्क्यः॥ वानप्रस्थोब्रह्मचारी तदारण्यंस
माश्रयेदिति॥ सुतनि क्षेपेपारिपत्यांविद्यमानायां॥ तत्रकृत्यमाहम
नुः॥ वैतानिकंचजुहुयादग्निहोत्रंयथाविधि॥ दर्शप्रभृदात्मवान्॥ मनुः
।संत्यजग्राम्यमाहारंसर्वंचैवपरिच्छदमिति॥ अन्नसंचयमाहयाज्ञव
ल्क्यः। अन्होमासस्यषण्णांवातथासंवत्सरस्यवा॥ अर्थस्यसंचयंकु
र्यात्कृतमाश्वयुजेत्यजेत्॥ दांतस्त्रिषवणस्नायीति॥ वृत्तश्चप्रतिग्र

हात्॥ स्वाध्यायवान्दानशीलःसर्वसत्वहितेरतः॥ दंतोलूखलिकः कालपक्काशीवाश्मकुट्टकः॥ श्रौतस्मार्त्तफलस्नेहैःकर्मकुर्यात्क्रियास्तथा॥ क्रियाःव्रतादिक्रियाअंजनादयः॥ तथाचांद्रायणैर्नयेत्कालंकृच्छ्रैर्वावर्त्तयेत्सदा॥ पक्षेगतेवाप्यश्नीयान्मासेवाऽहनिवागते॥ स्वप्याद्भूमौशुचीरात्रौदिवसंप्रपदैर्नयेत्॥ स्थानासनविहारैर्वायोगाभ्यासेनवातथा॥ रात्रावपिदिवसव्यावृत्त्यर्थं॥ प्रपदैरटनैः॥ ग्रीष्मेपंचाग्निमध्यस्थोवर्षासुस्थंडिलेशयः॥ पंचाग्निप्रकारश्चतुर्दिक्षुअग्नयःएकःसूर्यइतिपंच॥ अन्यत्रद्वादशाग्निप्रकारोपि॥ तद्यथा॥ स्वस्परितएकादशाग्न्यायतनानि॥ एकःसूर्यश्चेतिस्थंडिलेशयइति॥ आवरणरहितेदेशेस्थेयमित्यर्थः॥ शयनमुपलक्षणं॥ तेनोपवेशनाद्यपिग्राह्यं॥ आर्द्रवासास्तुहेमंतेशक्त्यावापितपश्चरेत्॥ कंटकैर्यश्चतुदतिचंदनैर्यश्चलिंपति॥ अक्रुद्धोपरितुष्टश्चसमस्तस्यचतस्यच॥ पूर्ववन्याहारतोक्ता॥ इदानींग्रामादाहृत्यापिआहारंकुर्यादित्याहसएव॥ ग्रामादाहृत्यवाग्रासानष्टौभुंजीतवाग्यतः॥ वायुभक्षःप्रागुदीचींगच्छेद्वावर्ष्मसंक्षयादिति॥ प्रागुदीचीऐशानी॥ इतिवानप्रस्थधर्माः॥ संन्यासमाहयाज्ञवल्क्यः॥ वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणां॥ प्राजापत्यांतदंतेतानग्नीनारोप्यचात्मनि॥ अधीतवेदोजपकृत्पुत्रवानन्नदोग्निमान्॥ वेदाध्ययनमात्रं॥ वैराग्यंचाधिकारिविशेषणं॥ यदहरेवविरजेत्तदहरेवप्रव्रजेदितिश्रुतेः॥ याज्ञवल्क्यः॥ अवेक्ष्यागर्भवासाश्चकर्मजागतयस्तथा॥ आधयोव्याधयःक्लेशाजरारूपविपर्ययः॥ भवोजातिसहस्रेषुप्रियाप्रियविपर्ययइति॥ एतद्विचारेक्रियमाणेवैराग्यंभवतीति॥ तत्राद्ययोर्द्वयोःशिखासूत्रधारणंपुत्रदत्तान्नभोजनंभवति॥ परंतुसर्वव्यासंगान्विहायाध्यात्मविद्याभ्यसनीयाहंसस्तुपुत्रादीनांत्यागंकृत्वावनादौवसेत्॥ शिखासूत्रेवैकल्पिके॥ परमहंसोमुंडःसूत्ररहितश्च॥ सर्वेषांब्रह्मविद्याभ्यासस्तुल्यः॥ अस्माभिस्तुप्रायशःपरमहंसधर्माएवोच्यंतेतदुक्तं॥ श्रुतौ॥ सोऽथपरिव्राड्वैकशाटीपरिहितोमुंडोदरअरण्यनित्योभिक्षार्थंग्रामंप्रविशेद्दासायंप्रदक्षिणेनाऽविचिकित्सन्सार्ववर्णंभैक्षचर्यमभिशस्तपतितवर्जमयज्ञोपवीतीशौचवि

छुःकाममेकंवैणवंदंडमाददीतेति॥सार्ववर्णमापदि॥तत्रशूद्राद्यामग्रह
णंकाममितिवैकल्पिकदंडग्रहणं॥परमहंसस्यायमेकएवदंडः॥त्रिदं
डादिकंहंसादीनां॥अतएवपरमहंससंन्यासग्रहणेतेषांत्यागउक्तः।
अतऊर्ध्वंयज्ञोपवीतमासनंशिखांयष्टयःशिक्यमित्येतानिवर्जयि॰
त्वाथदंडमादत्तेसखामांगोपायतीति॥संन्यासश्चज्ञानप्रतिबंधकदु
रितनाशद्वाराज्ञानसाधनमितिस्थितमुत्तरमीमांसायां।क्वचिज्जन्मां
तरीयःसंन्यासोन्यजन्मन्युपयुज्यते॥तथाचश्रूयते॥यद्यातुरःस्यान्म
नसावाचावासंन्यसेदिति॥अयंचसंन्यासोनपूर्वसन्यासापेक्षयाक
र्मांतरं॥पूर्वस्योपस्थितत्वाद्भेदेवाप्रमाणाभावाच्च॥अतःपूर्वोक्तसन्न्यस्य
संन्यासस्ययदिब्राह्मणोयजेतेत्यादिवदातुरकर्तृकप्रयोगांतरंविधी
यते॥तत्रापिवैराग्यमपेक्षितमेव॥नचातुरस्यवैराग्यसत्वे॥यदहरेव
विरजेत्तदहरेवप्रव्रजेदित्यनेनैवप्राप्तेरनर्थकंपुनर्विधानमितिवाच्यंसं
न्यासस्यकाम्यत्वेनसर्वांगोपसंहारासमर्थमातुरंप्रत्यप्राप्तेः॥अतोर्थव
दूनवमिति॥विस्तरस्तुदुर्गमत्वभियानेहप्रतन्यते॥अंगिराअपि॥अंधः
पंगुर्दरिद्रोवाविरक्तःसंन्यसेद्द्विजः॥सर्वेषामेववैराग्यंसंन्यासेतुविधीय
तेइति॥सुमंतुः॥आतुराणांचसंन्यासेनविधिर्नैवचक्रिया॥प्रैषमात्रंस
मुच्चार्यसन्यासंतत्रकारयेदिति॥तत्रसन्यासांगभूतंश्राद्धमयूखेवक्ष्य
ते॥गोभिलः॥ततःसमाचरेत्स्नानंहेमरूप्यकुशांभसा॥कृत्वातुवपनं
विद्वान्भवेन्मुंडोथवाशिखी॥बह्वृचगृह्यपरिशिष्टे॥अथपुत्रान्सुहृ
दोवंधून्प्रत्याहनमेकश्चिन्नाहंकस्यचिदिति॥मनुः॥ततःपुत्रेषणायाश्च
वित्तेषणायाश्चव्युत्थितोहमितिअपःपाणिनाहुत्वाशिखार्थंरक्षितान्
केशानुत्पाट्याथयज्ञोपवीतंभूमावप्सुवानिक्षिपेत्।ततःप्राङ्मुखस्तिष्ठ
न्नूर्ध्वबाहुर्ब्रूयात्संन्यस्तंमयेतित्रिः॥अभयंसर्वभूतेभ्योमत्तइतिउद
कपूर्णमंजलिंनिनयेत्॥अथनामानि।तीर्थाश्रमवनारण्यगिरिपर्वतसा
गराः॥सरस्वतीभारतीच पुरीनामयतेर्दशेति॥ततोगुरुरद्वैतब्रह्मोपदे
शंकुर्यात्॥ततोनग्नउदीचींदिशंगच्छेत्॥यदिविविदिषुस्ततःश्रवणा
द्यर्थंगुरुसमीपआगच्छेत्॥उक्तंच॥नहिज्ञानार्थंसगुरुमेवाभिगच्छे
त्समित्पाणिः॥श्रोत्रियंब्रह्मनिष्ठमितिततःकौपीनंकटिसूत्रंचोपादधात्

अत्रविशेषमाह॥कौपीनाच्छादनंवासःकंथाशीतनिवारिणी॥पादु
केचापिगृण्हीयात्कुर्यान्नान्यस्यसंग्रहमिति।।गुरोश्चसेवाकायवाङ्म
नोभिःकार्या॥एवंसन्यस्तस्यधर्मानाहपराशरः॥एकाकीनिस्पृहस्ति
ष्ठेन्न केनापिसहालपेत्॥दद्यान्नारायणेत्येवंप्रतिवाक्यंसदायतिः॥
दक्षः॥एकोभिक्षुर्यथोक्तस्तुद्वावेवमिथुनंस्मृतं॥त्रयोग्रामःसमाख्या
तऊर्द्ध्वंतुनगरंस्मृतमिति॥याज्ञवल्क्यः॥अप्रमत्तश्चरेद्भैक्ष्यंसायान्हे
नाभिलक्षितः॥रहितेभिक्षुकैर्ग्रामेयात्रामात्रमलोलुपः॥यात्रामात्रंकु
र्यीत॥प्राणयात्रांभवतितस्याभुंजीतेत्यर्थः॥वसिष्ठः॥सप्तागाराण्य
संकल्पितानिचरेद्भैक्ष्यमेकवारमितितत्कालमाहमनुः॥विधूमेसन्न
मुशलेव्यंगारेभुक्तवज्जने॥वृत्तेशरावसंपातेनित्यंभिक्षांयतिश्चरेदि
तितथाष्टौमासान्कीटवत्परिचरेत्॥चतुरोवार्षिकान्मासानेकत्रतिष्ठे
दिति॥चत्वारःश्रावणादिकार्त्तिकांताः॥तत्रचमासचतुष्टयपर्यंतंके
शनखादिधारणं॥अन्यत्रतुऋतुसंधिषुवापयेदितिमासद्वयोत्तरं
॥केचित्तत्रापिपक्षावेवमासइतिलिंगदर्शनान्मासद्वयोत्तरमेवानुति
ष्ठंति॥पात्राण्याहयाज्ञवल्क्यः॥यतिपात्राणिमृद्वेणुदार्वलाबुमया
नि च॥सलिलैःशुद्धिरेतेषांगोवालैश्चावघर्षणमिति॥यतेस्तांबूलनि
षिद्धंवायुपुराणे॥द्वावेतौसमवीर्यौतुसुरातांबूलमेवच॥तस्मात्सर्व
प्रयत्नेनतांबूलंवर्जयेद्यतिः॥तथासर्वदाप्रणवजपपूर्वंब्रह्मानुध्या
नरतोभवेत्॥गयायांयतेर्विशेषः॥गयायांमुंडपृष्ठेचकूपेयूपवटेत
था॥दंडंप्रदर्शयेद्भिक्षुःपितृभिःसहमुच्यते॥प्रदर्शयेत्स्पर्शयेत्॥ए
वंसंन्यासपूर्वकंजातस्यज्ञानत्वमुक्तंश्रुतौ॥ब्रह्मसंस्थोमृतत्वमेती(
तिजाबालश्रुतौ॥शतंकुलानांपुरस्ताबभूवतथापराणांत्रिशतंसमग्रं॥
एतेभवंतिसुकृतस्यलोकेयेषांकुलेसंन्यसतीहविप्रइति॥यतिमरणे
विशेषः॥सर्वसंगनिवृत्तस्यध्यानयोगपरस्यच॥नतस्यदहनंकार्यं
नाशौचंनोदकक्रिया॥निदध्यात्प्रणवेनैवध्यानभिक्षोःकलेवरं॥प्रोक्ष
णंखननंचैवसर्वंतेनैवकारयेदिति॥एतच्चसंक्षेपेणोक्तायतिधर्माः॥
विस्तरस्तुविश्वेश्वरनिबंधादौद्रष्टव्यः॥इतिभगवंतभास्करेसंस्कारम
निरूपणं॥अथपूर्वोद्दिष्टानांसंस्काराणांकालौयस्यसूत्रानुसारेणप्रयोगो

लिख्यते॥ तत्र परिभाषासूत्रं॥ अथातो गृह्यस्थालीपाकानां कर्म परि-
समूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मास
नमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृ-
त्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्निकुर्यात्॥ स्रुवं प्रतप्य सं
मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणी
श्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयाद्
एष एव विधिर्यत्र क्वचिद्धोम इति॥ ब्रह्मासने ब्रह्मोपवेशनीयः॥ अथ स
र्वत्रोपयुक्तः स्थालीपाकप्रयोगः॥ तत्र प्रथमारंभे पुण्याहमातृपूजाभ्यु
दयिकानि कृत्वा देशकालौ स्मृत्वा अमुकस्थालीपाकेन यक्ष्य इति संक
ल्प्य अमुककर्मणि कृताकृतप्रत्यवेक्षणार्थं ब्रह्माणं त्वां वृणे इति ब्रह्माणं
वृत्वाग्न्यायतने भूमौ दर्भैस्त्रिः परिसमुह्योपलिप्य स्फ्येनोल्लिख्यानामिका
ङ्गुष्ठेनोद्धृत्याद्भिरभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्ती-
र्य तत्र ब्रह्माणमुपवेश्य प्रणीताः प्रणयेत्॥ तद्यथा॥ वामहस्ते वारुणं च
मसमादाय दक्षिणेन जलं संपूर्याग्नेरुत्तरतो निधाय जलं स्पृष्ट्वाग्नेरीशा
न्यां स्थापयेत्॥ ततः प्रागग्रैः कुशैः परिस्तरणं॥ तत उत्तरतोऽग्नेरर्थवतां
पात्राणामासादनं॥ तद्यथा॥ पवित्रच्छेदनकुशाः पवित्रे तु प्रोक्षणीपात्र
माज्यस्थाली चरुस्थाली संमार्गकुशा उपयमनकुशाः समिधस्तिस्रः
प्रादेशमात्र्यः खादिरः स्रुवः आज्यं तंडुलाः पूर्णपात्रं चेत्येतान्यासादयेत्
॥ ततस्त्रिभिः कुशैः कुशद्वयं छित्वा प्रादेशमात्रं स्थापयेत्॥ ततः प्रोक्षणी
पात्रे प्रणीतोदकमासिच्य पवित्राभ्यामुत्पवनं॥ तदेव पात्रं सव्यहस्ते नि
धाय सव्यहस्तस्थितस्यैव दक्षिणेनोद्दिंगनं॥ ततो भूमौ निधाय प्रणी-
तोदकेन प्रोक्षेत्॥ तत आसादितानामेकैकस्य प्रोक्षणं प्रोक्षण्युदकेन॥
ततः प्रणीताग्न्योर्मध्ये प्रोक्षणीपात्रस्य निधानं॥ तत आज्यस्थाल्यामा
ज्यनिर्वापः॥ चरुस्थाल्यां तंडुलप्रक्षेपः॥ त्रिः प्रक्षालनं॥ आज्याधिश्र
यणं॥ आज्यादुत्तरतश्चरोरधिश्रयणं। उभयोः पर्यग्निकरणं॥ उल्कोप
स्पर्शनं॥ चरुश्रपणं कृत्वार्द्धशृते चरौ स्रुवप्रतपनं संमार्गकुशैः संमार्ज
नं॥ अग्रैरग्रं मूलैर्मूलं प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य निदधाति। आ
ज्योद्वासनं॥ ततश्चरोरुद्वासनं॥ घृतानां तु पूर्वेणोद्वासितानां तु पश्चतः। प

वित्राभ्यामाज्योत्स वनं॥ततोवेक्षणं॥ ततआज्यमध्येपतितनापद्रव्यनि
रसनं॥प्रोक्षण्युत्पवनं॥उपयमनकुशादानं॥ततस्तिष्ठत्समिधोभ्या
धायप्रोक्षण्युदकेनाग्निंपर्युक्षेत्॥पवित्रयोःप्रणीतामध्येनिधानं॥त
तोदक्षिणंजान्वाच्यस्रुवेणाज्यमादायजुहोतिप्रजापतयेस्वाहेतिप
श्चिमतआरभ्यपूर्वपर्यंतमाघारयेत्॥इदंप्रजापतयेनममेतित्यागः॥
संस्रवंप्रोक्षणीमध्येस्थापयेत्॥एवंसर्वत्रइंद्रायस्वाहेतितथैव॥इद
मिंद्रायनममेति॥एतावाघारौ॥अग्नयेस्वाहेतिपूर्वोत्तरतःसोमायस्वा
हेतिपूर्वदक्षिणतः॥एतावाज्यभागौ॥ततोयथाप्रधानहोमः॥ततोग्न
येस्विष्टकृतेस्वाहेतिस्विष्टकृत्॥आज्यहोमेस्विष्टकृत् सर्वहोमांते
भवति॥ततोव्याहृतिभिराज्यंजुहुयात्॥भूःस्वाहाइदमग्नये॥भुवःस्वा
हाइदंवायवे॥स्वःस्वाहाइदंसूर्याय॥भूर्भुवःस्वःस्वाहा॥इदंप्रजापत
ये॥ततस्त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेलोवयासिसीष्ठाःयजि
ष्ठोवन्हितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा॥इदम
ग्नीवरुणाभ्यां॥सत्वंनोअग्नेवमोभवोतीनेदिष्ठतेअस्याउषसोव्युष्टौ
॥अवयक्ष्वणोवरुणꣳरराणोवीहिमृलीकꣳसुहवोनएधिस्वाहा॥इ
दमग्नीवरुणाभ्यां नमम॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्व
मयाअसि॥अयानोयज्ञंवहास्ययानोधेहिभेषजं स्वाहा॥इदमग्नये
अयसे॥येतेशतंवरुणंयेसहस्रंयज्ञियाःपाशाविततामहांतः॥तेभि
र्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायस
वित्रे॥विष्णवेविश्वेभ्योमरुद्भ्यःस्वर्केभ्योनमम॥उदुत्तमंवरुणपाशम
स्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसोअदि
तयेस्यामस्वाहा॥इदंवरुणायादितये॥प्रजापतयेस्वाहाइदंप्रजापतये
॥एताआज्याहुतीर्ब्राह्मणान्वारब्धोजुहोति॥ततःसंस्रवप्राशनं॥पवि
त्रेग्नौप्रहरति॥ब्रह्मणेपूर्णपात्रंदक्षिणा॥प्रणीताविमोकः॥उपयमन
स्याग्नौप्रक्षेपः॥यत्रब्राह्मणभोजनमाम्नातंतत्रतत्कुर्यात्॥ इतिसक
लस्थालीपाकेतिकर्त्तव्यता॥आज्यहोमेचरुसंबद्धपदार्थनिवृत्तिः॥
अन्यत्समानं॥ अथपुंसवनं॥गर्भाधानोत्तरंद्वितीयेतृतीयेवामासिपू
र्वेत्तकालेकर्त्तासुचिर्गर्भिणीमुपवासंकारयित्वास्नापयित्वाऽहतेवास

सीपरिधाप्यकालात्पुल्लिरव्यास्यगर्भस्यबीजगर्भसमुद्भवैनोनिबर्ह
णार्थंपुंसवनंकरिष्ये इतिसंकल्प्यपुण्याहमातृपूजाभ्युदयिकानिकृ॰
त्वा॥ वटरोहाग्रपल्लवानुदकेनपिष्ट्वाहिरण्यगर्भोद्भः संभृतइतिद्वाभ्यामृ
ग्भ्यांपत्न्यानासिकादक्षिणपुटेआसिंचेत॥ अत्रयदिमेवीर्यवान्पुत्रो
भवत्वितिकामनातत उदकपूर्णंशरावंबध्वाउपस्थेस्याःपयित्वासुप
र्णोसीतिविद्कृतिलुंदस्कयास्वःपतेत्यंतयागर्भोशपंस्पृष्ट्वाअभिमंत्रये
त॥ इतिपुंसवनं॥ अथसीमंतोन्नयनं॥ कर्त्ताशुचिर्दर्भपाणिर्देशकालौ
स्मृत्वाबीजगर्भसमुद्भवैनोनिबर्हणार्थंपरमेश्वरप्रीत्यर्थंसीमंतोन्नयनं
करिष्यइतिसंकल्प्यपुण्याहवाचनमातृपूजाभ्युदयिकानिकृत्वापं
चभूसंस्कारान्कृत्वालौकिकाग्निमुपसमाधायाज्यभागांतंकृत्वातिल
मुद्गमिश्रेणचरुणाप्रजापतयेस्वाहेतिजुहुयात्॥ इदंप्रजापतयइतित्या
गः॥ ततउत्तरार्द्धात्स्विष्टकृतंहुत्वाव्याहृत्यादिनवाहुतीर्हुत्वासंस्रवंप्रा
श्यब्रह्मणेपूर्णपात्रंवरंवादत्वाग्नेःपश्चात्कोमला — — — —
सनेभद्रपीठाख्येगर्भिणींस्नातामहतवस्त्रामुपवेश्यऔदुंबरेणयुग्मफ
लवताअपक्वस्तबकेनअश्वत्थशंकुनात्रिभिश्चदर्भपिंजूलैस्त्रेण्याशल
ल्यासूत्रकर्तनेनार्थयाचसूच्याइत्येतैरेकीकृतैस्ततःसीमंतंविनयतिभू
र्भुवःस्वर्विनयामीतिमंत्रेणयद्वा॥ भूर्विनयामिभुवर्विनयामिस्वर्विनया
मीति त्रिभिर्मंत्रैस्त्रिभिर्विनयति॥ ततस्तत्सर्ववेण्यांबध्नाति॥ अयमूर्जा
वतोवृक्षउर्जीवफलिनीभवेतिमंत्रेण। ततोवीणागाथिनौप्रतिराजानं
संगायेतामितिप्रेषंददाति॥ यद्वासोमराजानंसंगायेतामितिप्रैषः॥ तौच
प्रेषितौसोमएवनोराजेमामानुषीप्रजाः॥ अविमुक्तचक्रआसीरंस्तीरे
तुभ्यमसाविति गाथांगायतः॥ असौस्थानेसमीपावस्थितायागंगा
प्रमुखानद्यानामगृह्णातिस्त्री॥ इतिसीमंतः॥ अथसोष्यंतीकर्माशुचिः
प्रसूतिशूलवतींस्त्रियं। एजतुदशमास्यइत्यृचा। अत्रज्जरायुणासह
त्यंतयाद्भिरभ्युक्षति॥ ततःस्त्रीसमीपेअवैतुपृश्निशेवलंशुनेजरायुत्त
नैवमांऽसेनपीवरीनकस्मिंश्चनायतनमजरायुमद्यतामितिमंत्रंजपेत्॥
अथकुमारेजातेनालछेदात्पूर्वंस्नात्वापुण्याहवाचनवृद्धिश्राद्धादिकृत्वा

जातकर्मकरिष्येइतिसंकल्प्यमेधाजननायुष्येकुर्यात्।मेधाजननंयथा
॥अनामिकयासुवर्णांतर्हितयामधुघृतेमिश्रयित्वाकेवलंवाघृतं॥भूस्त्व
यिदधामि॥भुवस्त्वयिदधामिस्वस्त्वयिदधामिभूर्भुवःस्वस्त्वयिदधा
मीतिमंत्रेणसकृत्प्राशयेत्॥आयुष्यंयथा॥कुमारस्यनाभिसमीपेकर्ण
समीपेवाग्निरायुष्मानित्यष्टौमंत्रान्त्रिर्जपेत्॥तेयथा॥अग्निरायुष्मां
स्सवनस्पतिभिरायुष्मांस्तेनत्वायुषाऽऽयुष्मंतंकरोमि॥सोमआयुष्मां
स्सओषधीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि॥ब्रह्मायुष्मत्तद्ब्राह्म
णैरायुष्मत्तेनत्वायुषायुष्मत्करोमि॥देवाआयुष्मंतस्तेऽमृतेभिरायुष्मं
तस्तेनत्वायुषायुष्मंतंकरोमि॥ऋषयआयुष्मंतस्तेव्रतैरायुष्मंतस्तेन
त्वायुषायुष्मंतंकरोमि॥पितरआयुष्मंतस्तेस्वधाभिरायुष्मंतस्तेनत्वा
युषायुष्मंतंकरोमि॥यज्ञआयुष्मान्सदक्षिणाभिरायुष्मांस्तेनत्वायुषाऽऽ
युष्मंतंकरोमि॥समुद्रआयुष्मान्त्स्रवंतीभिरायुष्मांस्तेनत्वायुषायुष्मंतंक
रोमि॥ततस्त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं॥यद्देवेषुत्र्यायुषंतन्नोअ
स्तुत्र्यायुषमितिमंत्रंजपति॥यदिपिताकामयेतायंकुमारःसर्वमायुरिया
दितितदाकुमारमभिमृशेद्दिवस्परीत्यनुवाकेन॥अथचतुरोब्राह्मणान्
कुमारस्यचतुर्दिक्षुस्थापयित्वाइदमनुप्राणितेतितान्प्रेष्यति॥ततःपू
र्वादिदिगवस्थिताब्राह्मणाःक्रमेणैवकुमारंलक्षीकृत्यचतुरोमंत्रान्प
ठंतिप्राणःव्यानःअपानःउदानःमध्यस्थःपंचमःउपरिष्टादवेक्षमाणो
ब्रूयात्समानइति॥ब्राह्मणाभावेस्वयमेवतस्यांदिशिस्थित्वामंत्रान्ब्रू
यात्॥नदातुप्रैषाभावः॥ततोयस्मिन्देशेकुमारोजातस्तंदेशंवेदतेभूमि
हृदयंदिविचंद्रमसिश्रितं॥वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशतंजीवे
मशरदः शतं शृणुयामशरदःशतमितिमंत्रेणकुमारमभिमृशति॥त
तःकुमारस्यमातरंइडासिमैत्रावरुणीवीरेवीरमजीजनथाः॥मातस्त्वं
वीरवतीभवयास्मान्वीरवतोकरदितिमंत्रेणाभिमंत्रयेत्॥अथसूतिका
यादक्षिणंस्तनंप्रक्षाल्यइमंस्तनमित्यृचाकुमारायप्रयच्छति॥ततोय
स्तेस्तनइत्यृचाद्वयेनवामंप्रक्षाल्यप्रयच्छति॥ततःकुमारस्यशिरःप्र
देशेजलपूर्णपात्रंआपोदेवेषुजाग्रथयथादेवेषुजाग्रथ॥एवमस्यांसू
तिकायांसपुत्रिकायांजाग्रथेतिमंत्रेणस्थापयेत्॥तदुदपात्रंयावत्सूति

कोत्थानंतावत्तिष्ठेत्॥ ततः सूतिकागृहद्वारे पूर्वोक्तान्पंचभूसंस्कारान्कृत्वाग्निं स्थापयेत्॥ ततस्तंडुलकणमिश्रान्सर्षपान्प्रातर्जुहोति॥ सायमाहुतिद्वयं प्रातश्चेति तद्यथा॥ शंडामर्का उपवीरः शौंडिकेय उलूखलः॥ मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा॥१॥ आलिखन्ननिमिषः किंवदंत उपश्रुतिः हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा॥ २॥ इदमग्नय इत्युभयत्र त्याग इति हरिहरः॥ अथ नैमित्तिकं॥ यदि कुमारग्रहो बालमभिभवेत्तदा मत्स्यग्रहणजालेनोत्तरीयेण वा तं प्रच्छाद्यांके गृहीत्वा वक्ष्यमाणं जपेत्॥ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबंधनः॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं॥ तत्ते देवा वरमदुः स त्वं कुमारमेव वा वृणीथाः॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं॥ यत्ते देवा वरमददुः स त्वं कुमारमेवा वृणीथाः॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यं॥ यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वरेति॥ ततो न नामयति न रुदति न हृष्यति न ग्लापयति॥ यत्र वयं वदामो यत्र चाभिमृशामसीत्यनेन बालमभिमंत्रयेत॥ इति जातकर्मादि॥ सूतकांते सूतिकायास्थाप्य नामकरणं गतयात्रीन्ब्राह्मणान्भोजयित्वा पुण्ये देशकाले स्मृत्वा बालस्य बीजगर्भसमुद्भवैनोनाशार्थं नामकरिष्य इति संकल्प्य पुण्याहवाचननांदीश्राद्धादि कृत्वा नाम कुर्यात्॥ अत्रायं शिष्टाचारः॥ पिप्पलपत्रादौ करिष्यमाणनाम लिखित्वा संपूज्य ब्राह्मणानुज्ञातो बालस्य दक्षिणे कर्णे कथयेत्॥ चैत्र नामासीति॥ अथ निष्क्रमणं॥ चतुर्थे मासि शुभेऽह्नि शुचिर्नांदीश्राद्धं कृत्वा बालकं तच्चक्षुरिति मंत्रेण सूर्यं दर्शयति। यदि पिता प्रोषितः पुत्रजन्मोत्तरं गृहे आगच्छति तदा गृहोपस्थापनं कुर्यात्॥ गृहा मा बिभीतेति॥ ततः पुत्रं दृष्ट्वा अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्र नामासि स जीव शरदः शतमिति जपेत्॥ ततः प्रजापतेस्त्वा हिंकारेणावजिघ्रामि॥ सहस्रायुषासु कशर्मन्सं जीव शरदः शतमिति मंत्रेण कुमारस्य मूर्द्धानं जिघ्रेत॥ ततः पुनर्गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषासु कशर्मन् जीव शरदः शतमिति मंत्रेण सकृन्मूर्द्धा

नमवज्जिघ्रतिहिस्तूष्णींतनौबालस्यदक्षिणेकर्णेअस्मेप्रयंधिमघव
न्नृजीषिन्निंद्ररायोविश्ववारस्यभूरेः॥अस्मेशतंशरदोजीवसेधाअ
स्मेवीरांच्छश्वतइंद्रशिप्रिन्नितिमंत्रंजपेत्॥ततःसव्येइंद्रश्रेष्ठानिद्र
विणानिधेहिचित्तिंदक्षस्यसुभगत्वमस्मे।पोषंरयीणामरिष्टिंतनूनां
स्वद्मानंवाचस्सुदिनत्वमन्हामितिजपेत्॥कन्यायास्तुमूर्द्धावघ्राणमात्रं
नमंत्रजापः॥अथान्नप्राशनं॥पूर्वोक्तेदैवज्ञोदितेमुहूर्तेशिशोरस्यबी
जगर्भसमुद्भवैनोनिबर्हणार्थंअन्नप्राशनमहंकरिष्येइतिसंकल्प्यपु
ण्याहाभ्युदयिकांतंकृत्वापंचभूसंस्कारचरुश्रपणादिआज्यभागांतं
पूर्ववत्कुर्यात्॥तत्रप्रधानं॥देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवो
वदंति।सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतुस्वाहाइदं
देव्यैवाचे॥देवीवाचमितिमंत्रंपुनःपठित्वा।वाजइत्यस्यमरा त्रिष्टुप्छंदःअ
न्नदेव होमे॰।वाजोनोअद्यप्रसुवातिदानंवाजोदेवांऋतुभिःकल्पयाति
॥वाजोहिमासर्ववीरंजजानविश्वाआशावाजपतिर्जयेयंस्वाहा॥इदंव
चेवाजायेतित्यागः॥इदमाहुतिद्वयमाज्येन॥ततःस्थालीपाकेनजुहु
यात्॥तद्यथा॥प्राणेनान्नमशीयस्वाहा॰।इदंप्राणाय।अपानेनगंधा
नशीयस्वाहा।इदमपानाय।चक्षुषारूपाण्यशीयस्वाहा।इदंचक्षुषे
॥श्रोत्रेणयशोशीयस्वाहा॥इदंश्रोत्राय।एवंचतस्रआहुतीर्हुत्वास्वि
ष्टकृदादिदक्षिणांतंसमाप्यैकस्मिन्पात्रेसर्वान्रसान्समुद्धृत्यसकृ
त्तूष्णींप्राशयेत्॥हंतेतिमंत्रेणवातत्रकाम्यता॥तत्रयदिबालस्यवा
ग्मित्वमिच्छेत्तदाभरद्वाजपक्षिविशेषमांसंप्राशयेत्॥यद्यन्नाद्यत्वंत
र्हिकपिंजलमांसंयदिजवत्वंतदामत्स्यमांसंयदिदीर्घायुष्यंतर्हिकृक
षामांसं॥कृकषागृहगोधिकायदिसर्वाणितदासर्वमांसानिप्राशयेत्।
ततःकर्मसमृद्ध्यर्थंब्राह्मणभोजनं॥इत्यन्नप्राशनं॥अथचूडाकरणं॥
तत्रकर्त्ताकान्यतमकालेमातृपूजाभ्युदयिकेकृत्वात्रीन्ब्राह्मणान्संभो
ज्यास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृध्यर्थं
चौलकर्मकरिष्येइतिसंकल्प्यशुद्धभूमौलौकिकाग्निंसंस्थाप्यमात्रंके
कुमारमग्नेःपश्चिमतउपवेश्यब्रह्मोपवेशनाद्याज्यभागांतंकृत्वाशी
तोष्णोदकेनवनीतघृतदध्न्यतमंमिश्रयेत्तांशलालींपृथक्पृथक्त्रि

द्धानि त्रीणि त्रीणि कुशतरुणानि ताम्रपरिष्कृतमायसं क्षुरमानडुहं गो
मयं चेत्युपकल्प्य पवित्रकरणादि प्रोक्षणांतं कृत्वा आघारादि स्वि
ष्टकृदंतं होमं विधाय संस्रवाज्यशेषपूर्णपात्रं वरयोरन्यतरं ब्रह्मणे द
त्वा उष्णेन वाय उदकेनेह्यदिते केशान्वपामीत्यनेन मंत्रेण शीतास्व
प्सु उष्णा आप आसिंच्य नवनीतादन्यतमं चैतासु प्रक्षिप्य तदुदकमा
दाय सवित्रा प्रसूता दैव्या आप उंदंतु ते तनूं दीर्घायुत्वाय वर्चस इत्यनेन
मंत्रेण दक्षिणं शिरःप्रदेशं क्लेदयित्वा त्र्येण्या शलल्या केशान्विनीय ओ
षधे त्रायस्वेति मंत्रेण कुशतरुणान्यंतर्धाय शिवो नामासि स्वधितिस्ते
पिता नमस्ते अस्तु मा मा हिंसीरित्युपकल्पितक्षुरमादाय कुशतरु
णांतर्हितेषु निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय
सुवीर्यायेत्यनेन मंत्रेण क्षुरमभिनिधाय येनावपत्सविता क्षुरेण सोम
स्य राज्ञो वरुणस्य विद्वान् तेन ब्रह्माणो वपतेदमस्यायुष्यं जरदष्टिर्य
थासदित्यनेन मंत्रेण सकेशानि कुशतरुणानि प्रक्षिप्यानडुहे गोम
यपिंडे उत्तरतो ध्रियमाणे प्रक्षिप्यैवं तूष्णीं वारद्वयं कुर्यात्॥ एवमे
वं पश्चिमोत्तरयोः शिरःप्रदेशयोः सकृत्समंत्रं द्विस्तूष्णीं कुर्यात्॥ पश्चि
मे त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु
त्र्यायुषमिति छेदनं॥ उत्तरतो येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सू
र्य्यं॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इ
ति छेदनं॥ अन्यद्विशिष्टं। ततो यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा
वा वपति केशान्छिंधि शिरो मास्यायुः प्रमोषीरित्यनेन मंत्रेण शिरः समंता
त्प्रदक्षिणं॥ क्षुरं भ्रामयेद्द्विस्तूष्णीं॥ ततस्तेनैवोदकेन समस्तं शिर आ
प्लाव्याक्षण्वन्परिवपेत्यनेन मंत्रेण नापिताय क्षुरं प्रयच्छेत्॥ ततो
नापितः केशान्वपन्यथोक्तं केशशेषकरणं कुर्यात्॥ अथ सकेशं गोम
यपिंडमुदकादौ प्रक्षिप्याचार्याय वरं दद्यादिति॥ इयमेव कर्त्तव्यता के
शांतेपि ज्ञेया॥ इयांस्तु विशेषः॥ उष्णोदकासेकमंत्रे उष्णेन वाय उद
केनेह्यदिते केशश्मश्रु वपेत्यर्थे क्षुरपरिहरणे मुखसहितं शिरः परिहरेत
मंत्रे वपत्क्षुरेण मज्जयितेत्यादि मा स्यायुः प्रमोषीर्मुखमिति स्वाचा
र्याय च गोद्वयमिति॥ अथोपनयनं॥ यथोक्तकाले मातृपूजाभ्युदयिके कृ

त्वाकुमारंवापयित्वात्रीन्ब्राह्मणान्संभोज्यपंचभूसंस्काराग्निंवाशाग्नौ किकाग्निंसंस्थाप्यकुमारमाचार्यसमीपमानीयतद्दक्षिणतोवस्थाप्या चार्येणब्रह्मचर्यमागामीतिब्रूहीत्युक्तोबटुर्ब्रह्मचर्यमागामीत्याचार्योब्रह्मचार्यस तिब्रूहीत्युक्तोबटुर्ब्रह्मचार्यसानीतिब्रूयात्॥ ततोब्रह्मचार्यसानीति ब्रूहीत्युक्तोब्रह्मचार्यसानीतिब्रूयात्॥ अथवासःपरिधाप्यइयंदुरु क्तंपरिबाधमानावर्णंपवित्रंपुनतीमआगात्॥ प्राणापानाभ्यांबलमा दधानास्वसादेवीसुभगामेखलेयमितिमंत्रं॥ युवासुवासाःपरिवीत आगात्सउश्रेयान्भवतिजायमानः तंधीरासःकवयउन्नयंतिस्वाध्यो मनसादेवयंतइतिवामंत्रंपठति॥ तूष्णींवाबटोःकटिप्रदेशेमेखलां बध्ध्वयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात्॥ आयुष्य मग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजइतिमंत्रंपठतोयज्ञोपवीतं निवेश्यतूष्णीमजिनंपरिधाप्यदंडंदद्यात्॥ ततोबटुर्योमेदंडःपरापत द्विहायसोधिभूम्यां॥ तमहंपुनरादद आयुषेब्रह्मणेब्रह्मवर्चसायेत्यनेनमंत्रे णदंडंपरिगृह्णीयात्॥ अथाचार्यःस्वांजलिंजलेनापूर्यापोहिष्ठेतित्रि सृभिर्माणवकांजलिंनैवपूरयित्वासूर्यमुदीक्षस्वेतिबटुंवदेत्॥ बटु श्चक्षुरितिमंत्रेणसूर्यमुदीक्षेत॥ अथाचार्योबटोर्दक्षिणांसोपरि स्वदक्षिणहस्तंनीत्वाममव्रतेहृदयंतेदधामि॥ ममचित्तमनुचित्तंतेअ स्तु॥ ममवाचमेकमनाजुषस्वबृहस्पतिष्ट्वानियुनक्तुमह्यमितिमंत्रेणहृ दयमालभ्यबटोर्दक्षिणंहस्तं सांगुष्ठंगृहीत्वाकोनामासीतिवदेत्॥ बटु रमुकशर्माहंभोइतिप्रतिवदेत्॥ ततःकस्यब्रह्मचार्यसीत्युक्तोबटुर्भवत इतिब्रूयात्॥ अथाचार्यइंद्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्य स्तवामुकशर्मन्नितिपठित्वाप्रजापतयेत्वापरिददामिदेवायत्वासवित्रे परिददामिअद्भ्यस्त्वौषधीभ्यस्त्वापरिददामिद्यावापृथिवीभ्यांपरि ददामिविश्वेभ्यस्त्वाभूतेभ्यःपरिददामिसर्वेभ्यस्त्वाभूतेभ्यःपरिददा मिअरिष्ट्याइतिमंत्रेणभूतेभ्योबटुंत्वाददामिप्रदक्षिणीकृत्यस्वोत्तर तोबटावुपविष्टेब्रह्मोपवेशनादिपर्युक्षणांतेकृत्वाआद्याःस्विष्टकृदंताश्च तुर्दशाज्याहुतीर्हुत्वाहुतशेषंप्राश्यपूर्णपात्रंवरंवाब्रह्मणेदद्यात्॥ अथा चार्येणब्रह्मचार्यसीत्युक्तोबटुरसानीतिब्रूयात्॥ अपोशानेत्युक्तःअ

शान्नीतिकर्मकुर्वित्युक्तःकरवाणीति॥मादिवासुषुप्थेत्युक्तोनस्वप्मीति
वाचंयच्छेत्युक्तोयच्छामीति॥समिधमाधेहीत्युक्तआदधामीति॥अ
पोशानेत्युक्तःअशानीतिब्रूयात्॥अथाचार्योग्नेरुत्तरतोदक्षिणतोवा
प्रत्यङ्मुखायोपविष्टायतिष्ठतेवापादोपसंग्रहपूर्वकमुपसन्नायाचार्य
मीक्षमाणस्वयमीक्षितायवटवे ॐकारव्याहृतिपूर्वकंप्रथमंपच्छः द्वितीय
र्धर्चशस्तृतीयंसर्वांकृत्स्नंचपठन्सावित्रीमुपदिशेत्॥अथबटुःपूर्वदक्षि
णहस्तेनअग्नेसुश्रवःसुश्रवसंमाकुरुयथात्वमग्नेसुश्रवःसुश्रवाअसि
॥एवंमांसुश्रवःसौश्रवसंकुरु॥यथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि
॥एवमहंमनुष्याणांवेदस्यनिधिपोभूयासमित्येतैःपंचभिर्मंत्रैःपरिस
मिंधनप्रक्षेपेणाग्निंसंधुक्ष्याद्भिःपर्युक्ष्यतिष्ठन्अग्नयेसमिधमाहार्षंबृह
तेजातवेदसे॥यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयाव
र्चसापशुभिर्ब्रह्मवर्चसेनसमिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्य
निराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादोभूयासंस्वाहेत्यनेनमं
त्रेणोक्तलक्षणामेकांसमिधमग्नावादध्यादनेनैवद्वितीयांतृतीयांचादध्या
त्॥एषातेअग्नेसमिदित्यादिनावामंत्रेण॥अग्नयेसमिधमाहार्षमितिएषा
तेअग्नेसमिदित्येताभ्यांसमुच्चिताभ्यांमंत्राभ्यांवाएकैकशस्तिस्रःस
मिधआदध्यात्॥अथोपविश्यपूर्ववदग्नेसुश्रवइत्यादिभिरग्निंसंधुक्ष्य
पर्युक्ष्यतूष्णींपाणीप्रताप्यतनूपाअग्नेसितन्वंमेपाहि।आयुर्दाअग्ने
स्यायुर्मेदेहिवर्चोदाअग्नेसिवर्चोमेदेहि।अग्नेयन्मेतन्वाऊनंतन्मआपृ
ण।मेधांमेदेवःसविताआदधातुमेधांमेदेवीसरस्वतीआदधातु।मेधां
मेअश्विनौदेवावाधत्तांपुष्करस्रजौ॥इतिसप्तभिर्मंत्रैःप्रतिमंत्रमुखंवि
मार्ष्टि।ततःशिष्टाचारादंगानिचमआप्यायन्तामित्यनेनशिरःप्रभृतिपाद
तंसर्वांगानिस्पृशेत्॥वाक्चमआप्यायतामितिमुखं।प्राणश्चमआप्या
यतामितिनासारंध्रेयुगपत्॥चक्षुश्चमआप्यायतामितिचक्षुषीयुगपत्
श्रोत्रंचमआप्यायतामितिदक्षिणंश्रोत्रं।ततोऽनेनैववामं॥यशोबलंच
मआप्यायतामितिमंत्रंपठित्वायुगपद्बाहूस्पृशेत्॥अथतन्नोअस्तुमाय
षमितिहृदिस्पृशेत्॥ततोमुकगोत्रोमुकप्रवरोमुकशर्माहंभोअमुकश
र्मन्त्वामभिवादयेइत्युक्त्वागुर्वा मभिवादयेत्॥ततोगुर्वादिरा

गुष्मान्भवामुकशर्मन् भो इत्यभिवादयेत्॥ ततो भवति भिक्षां देहीति ब्रा
ह्मणो भिक्षेत्॥ भिक्षां भवति देहीति राजन्यः भिक्षां देहि भवतीति वैश्यः। ए
वं भिक्षित्वा भैक्षं गुरवे निवेद्याहः शेषं वाग्यतस्तिष्ठेदासीन वेति नियमः। त
त उपास्तमयं संध्यामुपास्य पूर्ववदग्निकार्यं कृत्वा वाचं विसृजेदित्युप
नयनं॥ अथ समावर्त्तनं॥ तत्राचार्यो मातृपूजाभ्युदयिके कृत्वा वटुना
भो आचार्य ऽहं स्नास्य इत्युक्तः स्नाहीत्युक्त्वा पंच भूसंस्कारान्कृत्वा लौ
किकाग्निं संस्थाप्य ब्रह्मोपवेशनाद्याज्यभागांतं कृत्वा ऋग्वेदमधीत्य स्ना
तितदा पृथिव्यै स्वाहाग्नये स्वाहेति द्वे आज्याहुती जुहुयात्॥ यदि यजुर्वे
दं तदांतरिक्षाय स्वाहेति द्वे। यदि सामवेदं तदा दिवे स्वाहा सूर्याय स्वाहे
ति द्वे यद्यथर्ववेदं तदा दिग्भ्यः स्वाहा चंद्रमसे स्वाहेति द्वे यद्येकदा वेदच
तुष्टयं त्रयं द्वयं वा तदा तत्तद्दाहुती हुत्वा ब्रह्मणे छंदोभ्य इति च द्वे हुत्वा प्रजा
पतय इत्याद्याः सप्त मंत्रेण जुहुयात्॥ ततो ब्रह्मणे छंदोभ्य इत्याद्यानवाहु
तीर्हुत्वा महाव्याहृत्यादि स्विष्टकृदंता दशाहुतीर्हुत्वा संस्रवप्राशनं पूर्ण
पात्रं वरयोरन्यतरं ब्रह्मणे दक्षिणां दद्यात्॥ ततो ब्रह्मसंग्रहणपूर्वकं गुरुं
नमस्कृत्य परिसमूहनादि व्याघुष्करणांतं तस्मिन्नग्नौ समिदाधानं कु
र्यात्॥ ततोग्नेरुत्तरतोष्टौ कलशान् दक्षिणोत्तरायतान्संस्थाप्य तत्पूर्वे
भागे प्रागग्रकुशेषु उदङ्मुखः स्थित्वा ये प्स्वंतरग्नयः प्रविष्टा गोह्य उपगो
ह्यो मयूषो मनोहा स्खलो विरुजस्तनूदूषुरिंद्रियहा तान्विजहामि यो
रोचनस्तमिह गृह्णामीति मंत्रेणाद्यकुंभादुदकमादाय तेनात्मानमभिषिं
चामिश्रिये यशसे ब्रह्मणे ब्रह्मवर्चसायेति मंत्रेणात्मानमभिषिच्यैवम
न्येभ्यः प्रत्येकं समंत्रकं जलमादाय येन श्रियमकृणुतां येनावमृशतां
सुरां॥ येनाक्षावभ्यषिंचतां यद्वां तदश्विना यश इति॥ आपो हि ष्ठा म
योभुवः। यो वः शिवतमो रसः। तस्मा अरं गमाम वः। इत्येतैश्चतुर्भिर्मंत्रैः
प्रतिमंत्रमात्मानमभिषिच्य त्रिस्तूष्णीमभिषिंचेत्॥ तत उदुत्तममिति
मंत्रेण मेखलां शिरोमार्गेण निःसार्य भूमौ निधायाऽन्यद्वासः परिधा
याचम्योद्यन् भ्राजनभृष्णुरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशस
निरसि दशसनिं मा कुर्वाविदन्मागमयेत्यनेनादित्यमुपस्थाय दधि वा
तिलान्वा दक्षिणहस्तमध्यगतसोमतीर्थेन प्राश्य जटालोमनखानि

वापयित्वा स्नात्वाचम्योक्तलक्षणेनौदुंबरकाष्ठेनान्नाद्याय व्यूहध्व
ंसोमोराजायमागमत्समेमुखंप्रमार्क्ष्यीयशसाचभगेनचेत्यनेनमं
त्रेणदंतान्प्रक्षालयित्वाचम्य सुगंधिद्रव्यमिश्रितेनयवादिचूर्णेनतैल
स्नानीतेनशरीरमुद्वर्त्यपुनःसशिरस्कंस्नात्वाचम्यचंदनाद्यनुलेपनं
पाणिभ्यांगृहीत्वामुखंनासिकांचप्राणापानौमेतर्पयचक्षुर्मेतर्पयश्रो
त्रंमेतर्पयेत्यनेनमंत्रेणालभ्यपाणीप्रक्षाल्यतदुदकमंजलिनाऽपा
पसव्यंकृत्वादक्षिणमुखोभूत्वापितरःशुंधध्वमित्यनेनमंत्रेणपितृ
तीर्थेननिषिच्ययज्ञोपवीतीभूत्वोदकमुपस्पृश्यचंदनादिनासुचक्षा
अहमक्षिभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितिमंत्रे
णात्मानमनुलिप्यपरिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि
शतंचजीवामिशरदःपुरूचीरायस्पोषमभिसं व्ययिष्यइतिमंत्रेणा
हतंधौतंवासःपरिधायपूर्वधृतमुपवीतमुत्तार्यजलेप्रक्षिप्यपूर्ववदु
क्तलक्षणमुपवीतंयज्ञोपवीतमित्यादिनामंत्रेणपरिधाययशसामा
द्यावापृथिवीयशसेंद्राबृहस्पतीयशोभगश्चमाविदद्यशोमाप्रतिपद्य
यताअहंप्रतिगृह्णामियशसाचभगेनचेतिपुष्पाण्यतःप्रतिगृह्यय
द्यशोप्सरसामिंद्रश्चकारविपुलंपृथुतेनसंग्रथिताःसुमनआबध्नामि
यशोमयीतिमंत्रेणशिरसिबध्वायुवासुवासाइत्यनयर्चोष्णीषेण
शिरोवेष्टयित्वालंकरणमसिभूयोलंकरणंभूयादितिमंत्रेणदक्षिणक
र्णेकुंडलेकृत्वातेनैववामकर्णेधृत्वावृत्रस्यासिकनीनकस्त्वंवि॰
लोक्यबृहस्पतेश्छदिरसिपाप्मनोमामंतर्धेहितेजसोयशसोमामंत
र्धेहीत्यनेनच्छत्रंप्रतिगृह्यप्रतिष्ठस्थोविश्वतोमापातमित्युपान
हौयुगपत्पादयोःप्रतिमुच्यविश्वाभ्योमानाष्ट्राभ्यस्परिपाहिसर्वतइ
तिवैणवंदंडमादध्यात्॥अथाचार्यःस्नातकस्ययमान्त्रिरात्रव्रतानि
चश्रावयेत्सचतानियथोक्तानिकुर्यादिति।।समावर्त्तनं।।अथविवा
हः।।तत्रपुण्येहनिवरःपितामातृपूजाभ्युदयिकेकृत्वासुतंकन्यापितृ
गृहमानयेत्।।ततःकन्यापितामातृपूजाभ्युदयिकेकृत्वागृहगतंवरं
मधुपर्केणार्चयेत्।।तत्राचार्योतिकमानीयविष्टरोविष्टरोविष्टरइत्यन
न्यश्रावितेप्रतिगृह्यतामित्यन्येहस्तेविष्टरंदद्यात्।।अथाचार्योवर्ष्मोस्मि

समानानामुद्यतामिवसूर्यः॥इमंतमभितिष्ठामियोमाकश्चाभिदास
तीत्यनेनमंत्रेणासनाधोविष्टरंकृत्वातत्रोपविशेत्॥ततोर्चकःपाद्यंपा
द्यंपाद्यमित्यनेनश्राविते प्रतिगृह्यतामितिपाद्यार्थोदकमर्च्यायसमर्प
येत्॥ततोर्च्यस्तत्पात्रंभूमौनिधायांजलिनाजलमादायविराजोदो
होसिविराजोदोहमशीयमयिपाद्यायैविराजोदोहइतिमंत्रेणदक्षि
णंपादंप्रक्षाल्यतेनैवमंत्रेणवामंप्रक्षालयेत्॥ब्राह्मणःक्षत्रियवैश्यौ
तुपूर्वंसव्यंततोदक्षिणमितिविशेषः॥ततोर्चकेनपुनःपूर्ववद्दत्तविष्टरम
र्च्योवर्ष्मोसीत्यादिमंत्रेणपादयोरधस्तान्निदध्यात्॥ततोर्चकोर्घोर्घो
र्घइतिइत्यनेनश्राविते प्रतिगृह्यतामित्युक्त्वाआवस्थयुष्माभिःसर्वान्
कामानवाप्नवानीतिमंत्रमुक्तवतेर्च्यायार्घंप्रयच्छेत्॥ततोर्च्योर्घंप्रति
गृह्यमूर्ध्नपर्यंतमानीयसमुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छत॥अरि
ष्टाअस्माकंवीरामापरासेचिमत्पयइत्यनेनमंत्रेणजलिनयन्नभिमंत्रये
त्॥ततोर्चकआचमनीयमाचमनीयमित्यनेनश्राविते प्रतिगृह्यता
मित्युक्तेर्च्यहस्तेआचमनीयंप्रयच्छेत्॥अथार्च्यःप्रतिगृह्यामाग
न्यशसासंसृजवर्चसातंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टिं
तनूनामितिमंत्रेणसकृदाचम्यस्मार्त्तमाचमनंकुर्यात्॥ततोर्चकोमधु
पर्कोमधुपर्कोमधुपर्कइत्यन्येनोक्तेप्रतिगृह्यतामितिब्रूयात्॥ततोर्च्यो
र्चकहस्तस्थितमुद्घाटितंमधुपर्कंमित्रस्यत्वाचक्षुषाप्रतीक्षइतिमंत्रे
णावेक्ष्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृ
ह्णामीतिमंत्रेणसकृदालोड्यतूष्णींसकृदनामिकांगुष्ठाभ्यामादायब
हिर्निक्षिप्यपुनर्द्विरालोड्यनिरीक्ष्ययन्मधुनोमधव्यंपरमंरूपमन्ना
द्यंतेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोस
नीतिमंत्रेणानामिकांगुष्ठाभ्यामादायत्रिःप्राश्नीयात्॥मधुवाताऋता
यतइत्यादिभिस्त्रिभिर्ऋग्भिःप्रत्यृचंत्रिःप्राश्नीयाद्वाशेषंशिष्यादिभ्यो
दद्यात्सर्वंवाभक्षयेत्॥प्रागुदिश्यसंचरेवाप्रक्षिपेत्॥अथाचम्यवाङ्
मन्नसोस्त्वितिकराग्रेणमुखंस्पृशेत्॥नसोर्मेप्राणोस्त्वितिदक्षिणवाम
नासारंध्रेअक्ष्णोर्मेचक्षुरितिदक्षिणोत्तरेचक्षुषीकर्णयोर्मेश्रोत्रमस्त्वि
तिमंत्रावृत्त्यादक्षिणोत्तरौकर्णौस्पृशेत्॥एवंबाह्वोर्मेबलमस्त्वितिद

क्षिणोत्तरौबाहू॥ऊर्वोर्मेओजोस्त्विति युगपदूरूअरिष्टानिमेंगानित
नूस्तन्वामेसहसंत्विति शिरःप्रभृति पादांतंसर्वांगमुभाभ्यांहस्ताभ्यांस्पृ
शेत्॥ततःखड्गहस्तोर्चकःगौर्गौर्गौरालभ्यतामितिब्रूयात्॥अथाच्योंमा
तारुद्राणामित्यादिपाप्माहतः॥ॐमित्युपांशूक्त्वोत्सृजततृणान्यत्तु
इत्युच्चैःप्रतिब्रूयात्॥ततोवरईशान्यांदिशिचतुर्हस्तायांवेदिकायांलौ
किकंनिर्मथ्यंवाग्निंस्थापयित्वापश्चादग्नेस्तृणपूलकंकटंवास्थापयेत्
॥ततःकन्यापितावस्त्रचतुष्टयंवरायप्रयच्छेत्॥वरश्चतेषुमध्येजरांग
च्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावाशतंचजीवामिशरदः
सुवर्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिधत्स्ववासइतिमंत्रेणा
परमितिवासोयुगंकुमारींपरिधाप्यपरिधास्येयशोधास्येदीर्घायुत्वाय
जरदष्टिरस्मिशतंचजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये
इत्यनेनैकंयशसामाद्यावापृथिवीयशसेंद्राबृहस्पती॥यशोभगश्चमा
विदद्यशोमाप्रतिपद्यतामित्यपरमितिवासोयुगंपरिदध्यात्॥अथवधू
पितापरस्परंसमंजेथामितिसंप्रेष्यवधूवरौसमंजयतिततोवरःसमंजं
तुविश्वेदेवाःसमापोहृदयानिनौ॥संमातरिश्वासंधातासमुदेष्ट्रीदधा
तुनाविति पठेत्॥अथकन्यापितोदङ्मुखःकुशजलाक्षतपाणिरमुक
गोत्रस्यामुकप्रवरस्यामुकशर्मणःप्रपौत्रायामुकशर्मणःपौत्रायामुक
शर्मणःपुत्रायेतिवरपक्षेअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःप्रपौ
त्रीममुकशर्मणःपौत्रीममुकशर्मणःपुत्रीमितिकन्यापक्षेएवंपुनर्वारद्व
यमुक्त्वाप्राङ्मुखोपविष्टायामुकगोत्रायामुकप्रवरायामुकशर्मणेप्र
त्यङ्मुखोपविष्टाममुकगोत्राममुकप्रवराममुकनाम्नीमिमांकन्यांसालं
कारांप्रजापतिदैवत्यांपुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसम
फलप्राप्तिकामोभार्यात्वेनतुभ्यमहंसंप्रददइत्युक्त्वासकुशाक्षतजलं
कन्याहस्तंवरदक्षिणहस्तेदद्यात्॥वरश्चद्यौस्त्वाददातुपृथिवीत्वाप्र
तिगृह्णात्विति मंत्रेणतांप्रतिगृह्यकोदादित्यादिकामस्तुतिंपठेत्॥अथ
कन्यापिताकन्यादानप्रतिष्ठासिद्ध्यर्थंसुवर्णंगोमिथुनंचदक्षिणांदत्वा
यौतकत्वेनगोमहिष्यश्वग्रामादियथासंभवंदद्यात्॥ततोवरोपदेवि
मनसादूरंदिशोनुपवमानोवाहिरण्यपर्णोवैकर्णःसत्वामन्मनसांकरो

त्वमुकिइत्यनेनमंत्रेणप्रतिग्रहस्थानाद्वधूंगृहीत्वानिष्क्रम्याग्निसमी
पमागच्छेत्॥अत्रावसरेकश्चिज्जलपूर्णकुंभंस्कंधेनिधायाग्नेर्दक्षिण
तउत्तरतोवाभिषेकपर्यंतंवाग्यतऊर्ध्वंतिष्ठेत्॥ततोवधूपित्रापरस्परंस
मीक्षेथामितिप्रेषितौवरःसमीक्षमाणांसमीक्षमाणअघोरचक्षुरपति
घ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाःवीरसूर्देवकामास्योनाशन्नोभवद्वि
पदेशंचतुष्पदे॥सोमःप्रथमोविविदेगंधर्वोविविदउत्तरः॥तृतीयोअग्निष्टेप
तिस्तुरीयस्तेमनुष्यजाः॥सोमोऽददद्गंधर्वायगंधर्वोऽददग्नये॥रयिं
चपुत्रांश्चादादग्निर्मह्यमथोइमांसानःपूषाशिवतमामासानऊरूशती
विहर॥यस्यामुशंतःप्रहरामशेपंयस्यामुकामाबहवोनिविष्ट्याइतिप
ठित्वाप्रदक्षिणमग्निंपरीत्यपश्चादग्नेःपूर्वस्थापिततेजनीकटयोर
न्यतरस्मिन्दक्षिणपादमग्रेःकृत्वोपविशेत्॥स्वदक्षिणतोवधूंचोप
वेश्यब्रह्मोपवेशनादिचरुवर्जंपर्युक्षणांतंकर्मकुर्यात्॥इयांस्तुविशे
षः॥शमीपलाशमिश्रालाजाःअश्माअश्मंलोहितमानडुहंचर्मवधू
भ्रातासूर्पंदृढपुरुषआचार्योयवरद्रव्यमित्येतावंतिवस्तून्युपकल्प
येत्॥नप्रोक्षेत्॥ततःस्रुवमादायदक्षिणंजान्वाच्यब्राह्मणान्वारब्धः
प्रजापतयेस्वाहाइदंप्रजापतये॥इंद्रायस्वाहाइदमिंद्रायेत्याघारौ॥
अग्नयेस्वाहाइदमग्नये॥सोमायस्वाहाइदंसोमायेत्याज्यभागौ॥
ॐभूःस्वाहाइदमग्नये॥ॐभुवःस्वाहाइदंवायवे॥ॐस्वःस्वाहाइ
दंसूर्याय॥त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः
॥यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा
इदमग्नीवरुणाभ्यां॥सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसो
व्युष्टौ॥अवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा
इदमग्नीवरुणाभ्यां॥अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमया
असि॥अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहाइदंवरुणायस
वित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः॥उदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय॥अथावयमादित्यव्रतेतवानागसो
अदितयेस्यामस्वाहाइदंवरुणाय॥ब्रह्मणान्वारब्धोहुत्वाततोराष्ट्र
भृतोयथा॥ऋताषाडृतधामाग्निर्गंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै॰

स्वाहावाट्॥इदमृतासाहेऋतधाम्नेऽग्नयेगंधर्वाय॥ऋताषाडृतधामा
ग्निर्गंधर्वस्तस्यौषधयोऽप्सरसोमुदोनामताभ्यःस्वाहा।इदमोषधिभ्यो
ऽप्सरोभ्योमुद्भ्यः॥संहितोविश्वसामासूर्योगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहावाट्॥इदंसंहितायविश्वसाम्नेसूर्यायगंधर्वाय॥संहितोवि
श्वसामासूर्योगंधर्वस्तस्यमरीचयोऽप्सरसआयुवोनामताभ्यःस्वाहा
वाट्॥इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगंधर्वाय॥सुषुम्णःसूर्यरश्मिश्चं
द्रमागंधर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहा॥इदंनक्ष
त्रेभ्योऽप्सरोभ्योभेकुरिभ्यः॥इषिरोविश्वव्यचावातोगंधर्वःसनइदंब्रह्मक्ष
त्रंपातुतस्मैस्वाहावाट्॥इदमिषिरायविश्वव्यचसेवातायगंधर्वाय॥इ
षिरोविश्वव्यचावातोगंधर्वस्तस्यापोअप्सरसऊर्जोनामताभ्यःस्वाहा
इदमद्भ्योऽप्सरोभ्यऊर्ग्भ्यः॥भुज्युःसुपर्णोयज्ञोगंधर्वःसनइदंब्रह्मक्ष
त्रंपातुतस्मैस्वाहावाट्।इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय।भुज्युःसुप
र्णोयज्ञोगंधर्वस्तस्यदक्षिणाअप्सरसस्तावानामताभ्यःस्वाहा॥इदंद
क्षिणाभ्योऽप्सरोभ्यस्तावानामताभ्यःप्रजापतिर्विश्वकर्मामनोगंधर्वःस
नइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥इदंप्रजापतयेविश्वकर्मणेमनसे
गंधर्वाय।प्रजापतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामान्यप्सरसए
ष्टयोनामताभ्यःस्वाहाइदमृक्सामभ्योऽप्सरोभ्यएष्टिभ्यः॥अथजया
होमः॥चित्तंचस्वाहाइदंचित्ताय।चित्तिश्चस्वाहाइदंचित्त्यै॥आकूतंच
स्वाहाइदमाकूताय॥आकूतिश्चस्वाहाइदमाकूत्यै॥विज्ञातंचस्वाहाइ
दंविज्ञाताय।विज्ञातिश्चस्वाहाइदंविज्ञात्यै।मनश्चस्वाहाइदंमनसे॥श
क्वरीश्चस्वाहाइदंशक्वरीभ्यः॥दर्शश्चस्वाहाइदंदर्शाय॥पूर्णमासंच
स्वाहाइदंपूर्णमासाय॥बृहच्चस्वाहाइदंबृहते।रथंतरंचस्वाहाइदंर
थंतराय॥प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाजयेषु॥तस्मैविशः
समनमंतसर्वाःसउग्रःसइद्धव्योबभूवस्वाहाइदंप्रजापतयेजयानिंद्रा
य।अथाभ्यातानः।अग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मि
न्क्षत्रेऽस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्यांस्वाहा॥इ
दमग्नयेभूतानामधिपतये।एवंसमावत्वित्येवमादिस्वाहाकारांतस्यो
त्तरत्राप्यनुषंगः।इंद्रोज्येष्ठानामधिपतिः।इदमिंद्रायज्येष्ठानामधिपत

ये॥ यमः पृथिव्या अधिपतिः॥ इदं यमाय पृथिव्या अधिपतये॥ वायुरं
तरिक्षस्याधिपतिः॥ इदं वायवेंतरिक्षस्याधिपतये॥ सूर्योदिवोधिप
तिः। इदं सूर्याय दिवोधिपतये॥ चंद्रमा नक्षत्राणामधिपतिः॥ इदं चंद्र
मसे नक्षत्राणामधिपतये॥ बृहस्पतिर्ब्रह्मणोधिपतिः। इदं बृहस्पत
ये ब्रह्मणोधिपतये। मित्रः सत्यानामधिपतिः। इदं मित्राय सत्यानाम
धिपतये। वरुणोपामधिपतिः। इदं वरुणायापामधिपतये॥ समुद्रः
स्रोतानामधिपतिः इदं समुद्राय स्रोतानामधिपतये॥ अन्नं साम्रा
ज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन्०। इदमन्नाय साम्रा
ज्यानामधिपतये॥ सोम ओषधीनामधिपतिः॥ इदं सोमायौषधीनामधि
पतये॥ सविता प्रसवानामधिपतिः॥ इदं सवित्रे प्रसवानामधिपतये
॥ रुद्रः पशूनामधिपतिः। इदं रुद्राय पशूनामधिपतये॥ उदकोपस्पर्श
नं॥ त्वष्टा रूपाणामधिपतिः॥ इदं त्वष्ट्रे रूपाणामधिपतये॥ विष्णुः पर्व
तानामधिपतिः०। इदं विष्णवे पर्वतानामधिपतये॥ मरुतो गणानाम
धिपतिः स मावत्वस्मिन्०। इदं मरुद्भ्यो गणानामधिपतिभ्यः॥ पितरः
पितामहाः परेवरे ततामहा इह मावत्वस्मिन्०। स्वाहा। इदं पितृभ्यः पि
तामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः॥ उदकस्पर्शनं॥ अ
ग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्। तदयं राजा
वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्स्वाहा॥ इदमग्नये॥ इमा
मग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था
जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा॥ इदमग्न
ये॥ स्वस्ति नो अग्ने दिवा पृथिव्या विश्वानि धेह्ययथा यजत्र। यदस्यां
महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं स्वाहा॥ इदमग्नये
॥ सुगन्नु पंथां प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः॥ अपैतु मृ
त्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा॥ इदं वैवस्वताय॥ प
रं मृत्यो अनुपरेहि पंथां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते
ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा॥ इदं मृत्यवे॥ उदकोप
स्पर्शनं॥ ततो वधूभ्राता पूर्वोपकल्पितान् शमीपलाशमिश्रान् लाजान्
शूर्पे धृतानंजलिना दापयेद् वध्वंजलावावपेत्॥ ततः प्राङ्मुखी वधूस्तिष्ठ

नोअर्यमणंदेवंकन्याअग्निमयक्षत॥सनोअर्यमादेवःप्रेतोमुंचतु
मापतेःस्वाहेत्यनेनमंत्रेणांजलिस्थान्लाजान्तृतीयांशंहुत्वाइदमर्य
म्णे इत्युक्त्वाइयंनार्युपब्रूतेलाजानावपंतिकाआयुष्मानस्तुमेपतिरे
धंतांज्ञातयोममस्वाहेत्यनेनांजलिस्थलाजार्द्धंहुत्वाइदमग्नये॥इ
त्युक्त्वा॥इमान्लाजानावपाम्यग्नौसमृद्धिकरणंतव॥ममतुभ्यंचसं
वदनंतदग्निरनुमन्यतामियंस्वाहेत्यनेनसर्वान्लाजान्हुत्वाइदमग्न
येइतिब्रूयात्॥ततोवरोगृभ्णामितेसौभगत्वायहस्तंमयापत्याजरद
ष्टिर्यथासः।भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः
अमोहमस्मिसात्वंसात्वमस्यमोअहं।सामाहमस्मिऋक्त्वंद्यौरहंपृ
थिवीत्वं॥तावेवविवहावहैसहरेतोदधावहैप्रजांप्रजनयावहैपुत्रा
न्विंदावहैबहून्तेसंतुजरदष्टयः।संप्रियौरोचिष्णूसुमनस्यमानौ।प
श्येमशरदःशतंजीवेमशरदःशतंशृणुयामशरदःशतमित्यनेनमंत्रेण
वध्वासांगुष्ठंदक्षिणकरंगृह्णीयात्॥ततोवध्वादक्षिणंपादंधृत्वाआरो
हेममश्मानमश्मेवत्वंस्थिराभव॥अभितिष्ठपृतन्यतोबाधस्वपृतना
यतइतिमंत्रेणाग्नेरुत्तरस्थिताश्मोपरिसंस्थाप्य॥सरस्वतिप्रेदमवसु
भगेवाजिनीवति॥यांत्वांविश्वस्यभूतस्यप्रजयामस्याग्रतः॥यस्यांभूत
समभवद्यस्यांविश्वमिदंजगत्॥तामद्यगाथांगास्यामियास्त्रीणामुत्त
मंयशइतिप्रगीयतुभ्यमग्नेपर्यवहन्सूर्यांवहतुनासह।पुनःपतिभ्यो
जायांदाअग्नेःप्रजयासहेतिमंत्रंपठित्वावध्वासहाग्निंपरिक्रम्यैवं
पुनर्द्विवारंलाजावपनादिपरिक्रमणांतंकुर्यात्॥ततोवधूभ्रातासूर्पे
कोणप्रदेशेनसर्वान्लाजान्वध्वंजलावावपेत्॥अथोत्थायवध्वाभ
गायस्वाहेत्यनेनहुत्वेदंभगायेतित्यागेकृतेवरस्तयासहाचारात्तूष्णीं
चतुर्थंपरिक्रमणंकृत्वाब्रह्मणान्वारब्धःप्रजापतयेस्वाहेतिहुत्वेदंप्र
जापतयेइतित्यागंकुर्यात्॥ततोवधूंवरएकमिषेविष्णुस्त्वानयत्वित्युक्ते
एकंपदमुदकंदद्यात्॥द्वेऊर्जेविष्णुस्त्वानयत्वित्युक्तेद्वितीयं।त्रीणि
रायस्पोषायविष्णुस्त्वानयत्वित्युक्तेतृतीयं।चत्वारिमायोभवायवि
ष्णुस्त्वानयत्वित्युक्तेचतुर्थं।पंचपशुभ्योविष्णुस्त्वानयत्वित्युक्तेपंच
मं॥षडृतुभ्योविष्णुस्त्वानयत्वित्युक्तेषष्ठं॥सखेसप्तपदीभवसामाम

त्सुव्रताभवविष्णुस्त्वानयत्वित्युक्तेसप्तमंपदंदद्यात्॥अथवरःपूर्वमभि
षेकार्थंधृतकुंभादुदकमादायापःशिवाःशिवतमाःशांताःशांततमा॥
स्तेकृण्वंतुभेषजमित्यनेनमंत्रेणवधूमूर्द्धन्यभिषिंच्यपुनरुदकमादा
यापोहिष्ठेतितृचंपठित्वाभिषिच्यसूर्यमुदीक्षस्वेतिवधूंसंप्रेष्यतच्चक्षु
रित्यादिशृणुयामशरदःशतमित्यंतंमंत्रंपठित्वासूर्यमुदीक्षितेतस्याद
क्षिणांसस्योपरिहस्तंनीत्वा।ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तं
तेअस्तु।ममवाचमेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यमि—
तिमंत्रेणतद्धृदयमालभ्यसुमंगलीरियंवधूरिमांसमेत्यपश्यत।सौभा
ग्यमस्यैदत्वायाथास्तंविपरेतनेत्यनेनतामभिमंत्र्याचारात्तद्वामभा
गेउपवेश्यतस्याःसीमंतेवरःसिंदूरंदद्यात्॥अथाग्नेःप्रागुदग्वापूर्वक
ल्पितेउत्तरलोम्निप्राग्ग्रीवेआनडुहेचर्मणिइहगावोनिषीदंतिहास्वा
इहपूरुषः।इहोसहस्रदक्षिणायज्ञइहपूषानिषीदति॥इतिमंत्रेणव
धूंदृढपुरुषोवरोचोत्थाप्योपवेशयेत्।ततोवरःपूर्ववद्यथास्थानमुप
विश्यब्रह्मान्वारब्धोग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृते।इति
स्विष्टकृद्धोमंकृत्वासंस्रवान्प्राश्यब्रह्मणेपूर्णपात्रंवरयोरन्यतरंदक्षि
णात्वेनदत्वास्वाचार्यायवरंदत्वाभूयसींसंकल्प्यादित्यंस्तमितेध्रु
वमीक्षस्वेतिवधूंप्रेष्यध्रुवमसिध्रुवंत्वापश्यामिध्रुवैधिपोष्येमयिम
ह्यंत्वादाद्बृहस्पतिः॥मयापत्याप्रजावतीसंजीवशरदःशतमितिमंत्रं
वाचयित्वाध्रुवमीक्षयीततत्तोदंपतीविवाहादारभ्यत्रिरात्रमक्षाराल
वणाशिनावधःशायिनौसंवत्सरंद्वादशरात्रंषड्रात्रंत्रिरात्रंवाब्रह्म
चारिणौस्यातामिति॥इतिविवाहप्रयोगः।चर्मण्वतीतरणिजाशुभसं
गमस्यसान्निध्यभाजिकृतशालिनिमध्यदेशे॥ रव्यातामेरेहनगरी
किलतत्रराजाराजीवलोचननरनोभगवंतदेवः॥ ॥इतिश्रीसेंगरवंशाव
तंसश्रीमहाराजाधिराजश्रीभगवंतदेवादिष्टमीमांसकभट्टशंकरा॥
त्मजभट्टनीलकंठकृतेभगवंतभास्करेसंस्कारमयूखःसमाप्तः॥ ॥